ह्येकाग्र आसीदिति वाक्येन ब्रह्म वा इदमग्र आसीदित्यादिसर्ववाक्यार्थसिद्धान्तमेव बोधितम् ॥ ७ ॥ परंपराक्रमेणापि सर्वकारणं शक्तेरेवेति हयग्रीवः ॥ ८ ॥

इति श्रीशाक्तदर्शने द्वादशाध्यायस्य चतुर्थः पादः ॥

द्वादशोध्यायः समाप्तः ॥

अथ त्रयोदशोध्यायः ॥

चतुष्टयवैराग्यसंपन्नो योगाधिकारी ॥१॥ श्रवणमननसंपन्नाष्टाङ्गेन निर्विकल्पम् ॥ २ ॥ रहितः श्रवणादिषु ॥ ३ ॥ वैराग्ययोगी त्रिधा ॥४॥ हठराजमन्त्रयोगीति ॥५॥ हठमार्गादष्टाङ्गपरो हठयोगी ॥ ६ ॥ राजमार्गाद्राजयोगी ॥ ७ ॥ मन्त्रमार्गान्मन्त्रयोगी ॥ ८ ॥ यमनियमासनप्राणायामप्रत्याहारधारणाध्यानसविकल्प-

---

प्रतिपादकानि । वस्तुतः शक्तिरेव निर्गुणं परं तत्त्वं देवी ह्येकाग्र आसीदिति वाक्येन बोध्यते । निर्गुणेयं शक्तिः साक्षिरूपात्मनि वर्तमाना सगुणा भवति । ततोनन्तरं चिदाभासयुतेश्वरी शक्तिरिति कथ्यते व्यक्तप्रपञ्चकारणं च भवति ।।

इति बादरिमतनिरासो नाम द्विषष्टितमं प्रकरणम् ॥

अथ शक्तिब्रह्मज्ञानसाधनं योगमाह—**चतुष्टयवैराग्यसंपन्न इति** । स्त्रियोन्नं पानमैश्वर्यमिति चत्वारि वस्तूनि चतुष्टयशब्देनाभिप्रेतानि । एतद्विषये वीतरागस्यैव योगाधिकार इति भावः । **श्रवणमननेति** । यमनियमासनेत्यादीन्यष्ट योगाङ्गानि प्रसिद्धान्येव । श्रवणमननाभ्यां सहितैरेतैरष्टभिरङ्गैः संपन्नो योगी निर्विकल्पस्य समाधेरधिकारी भवति । अनन्तरं श्रवणादीन्यप्यनपेक्षमाणो वैराग्ययोगी भवति । स च त्रिप्रकारः । हठयोगी राजयोगी मन्त्रयोगीति ॥

इति योगिप्रकारत्रयनिरूपणं नाम त्रिषष्टितमं प्रकरणम् ॥

अथाष्टाङ्गयोगं निरूपयति—**यमनियमेति** । एतान्यष्टाङ्गानि योगशास्त्रे प्रसिद्धानि (पात. यो. सू. २।२९) । एषां स्वरूपमग्रे एव स्फुटीभविष्यति ।

समाधयोऽष्टाङ्गानि योगस्य ॥ ९ ॥ राजयोगस्तमः ॥ १० ॥ सर्वं खल्विदं ब्रह्मेति विषयेभ्य इन्द्रियनिग्रहो यमः ॥ ११ ॥ अन्तःकरणवृत्तिं प्रपञ्चान्निगृह्य ब्रह्मविषयीकरणं नियमः ॥ १२ ॥ सुखेन ब्रह्मचिन्तनप्रदस्थितिरासनम् ॥ १३ ॥ चित्तादिसर्वभावान् ब्रह्मभावनद्वारा निरोधः प्राणायामः ॥ १४ ॥ अहं ब्रह्मेति वृत्तिः पूरकः ॥ १५ ॥ अनात्मप्रपञ्चनिषेधो रेचकः ॥ १६ ॥ अखण्डाकारवृत्त्या निश्चलस्थितिः कुम्भकः ॥ १७ ॥ शब्दादिविषयेष्वप्यात्मदर्शनं प्रत्याहारः ॥ १८ ॥ मनोविषयेषु ब्रह्मदर्शनानुसंधानं धारणा ॥१९॥ अहं ब्रह्म इत्यखण्डाकारवृत्त्यां निश्चलस्थितिर्ध्यानम् ॥ २० ॥ त्रिपुटिराहित्याखण्डाकारवृत्तिः समाधिः ॥ २१ ॥

इति श्रीशाक्तदर्शने त्रयोदशाध्यायस्य प्रथमः पादः ॥

अथ द्वितीयः पादः

विषयेभ्यश्चित्तवृत्तिनिरोधो योगः ॥ १ ॥ चित्तं पञ्च ॥ २ ॥

राजयोगस्तमः । पाठभ्रंशोत्र दृश्यते । तमः इति शब्दस्य कोर्थोभिप्रेत इति न ज्ञायते । नान्धकारवाचित्वम् । तम इति तमप्प्रत्ययसादृश्येन श्रेष्ठवाचीति भाति । तथा च राजयोगः सर्वश्रेष्ठ इति भावः । तस्य स्वरूपं यमादिभिरङ्गैर्निर्दर्शयति— **सर्वं खल्विदमिति** । सर्वं खल्विदं ब्रह्मेति निष्ठासंपन्नस्य बाह्येन्द्रियनिग्रहो यमः । अत्र सर्वत्र यमनियमादयो योगशास्त्रे व्याख्याता गृह्यन्ते । (पात. यो. सू. २।३०–३।३) तेषु च प्रत्येकमपेक्षिता अन्तःकरणवृत्तयस्तत्र तत्र वर्ण्यन्ते । ताश्च यमनियमादिशब्दानां व्याख्यात्वेन कथ्यन्ते । **त्रिपुटिराहित्यादिति** । त्रिपुटीनिरासस्वरूपं मण्डलब्राह्मणोपनिषदि द्रष्टव्यम् ॥

इति राजयोगनिरूपणं नाम चतुःषष्टितमं प्रकरणम् ॥

अथ सामान्येन योगस्वरूपं निरूपयति—**विषयेभ्य इति** । योगश्चित्तवृत्तिनिरोध इति तु सर्वमान्या सामान्या योगशब्दस्य व्याख्या (पा. यो. सू. १।२) **चित्तं पञ्चेति** । चित्तशब्देनात्र चित्तवृत्तयो लक्ष्यन्ते । ताश्च प्रमाणविपर्यय-

क्षेपमूढयोर्नाधिकारो योगे ॥ ३ ॥ अभ्यासयोगमयो विक्षेपः ॥ ४ ॥ एकाग्रभूमिकामयो भुवनराजः ॥ ५ ॥ गुदमेढ्रान्तरालगो मूलवह्निः ॥ ६ ॥ मूलप्रकृतिमय आधारः ॥ ७ ॥ साभासा शक्तिर्ब्रह्मरन्ध्रे ॥ ८ ॥ आधारे व्यावहारब्रह्म गणपतिः ॥ ९ ॥ राजसस्थाने नाभौ ब्रह्मा ॥ १० ॥ हृदि सत्त्वे विष्णुः ॥ ११ ॥ दृक्चक्रे तामसो रुद्रः ॥ १२ ॥ ब्रह्मरन्ध्रे परा शक्तिः ॥ १३ ॥ मणिपूरे वा विष्णुः ॥ १४ ॥ अनाहते रुद्रः ॥ १५ ॥ विशुद्धयां जीवसाक्षी ॥ १६ ॥ आज्ञाया-मीशसाक्षी ॥ १७ ॥ ब्रह्मरन्ध्रे परा शक्तिः ॥ १८ ॥ ध्यानसिद्ध्या समाधिम् ॥ १९ ॥ सविकल्पान्निर्विकल्पम् ॥ २० ॥ तत्सिद्धौ मुक्तः ॥ २१ ॥

इति श्रीशाक्तदर्शने त्रयोदशाध्यायस्य द्वितीयः पादः ॥

विकल्पनिद्रास्मृतिरूपाः पञ्च (पा. यो. सू. १।६)। **क्षेपमूढयोरिति**। क्षेप-शब्देनात्र चित्तस्य क्षिप्तावस्थोच्यते यस्यां चित्तं स्वोपसर्जनरजस्तमःसंसर्गा-दणिमाद्यैश्वर्यशब्दादिविषयानुरक्तं भवति यथा दैत्यदानवादीनाम्। तच्च यदा आभिभूतरजस्कतमसानुविद्धं भवति तदा मूढावस्थमित्युच्यते। यथा रक्षः-पिशाचादीनाम्। तदेव चित्तं यदा प्रक्षीणतमस्करजोमात्रासंसर्गात्सर्वविषयाकार-वृत्तिमद्धर्मज्ञानवैराग्यैश्वर्यप्रियं तदा विक्षिप्तावस्थमित्युच्यते। एकाग्रं चित्तं भुवनराज इत्युच्यते। अत्र चित्तस्य चतस्र एवावस्था उच्यन्ते। पातञ्जलयोग-सूत्रवृत्तौ नागेशभट्टैः क्षिप्तं मूढं विक्षिप्तमेकाग्रं निरुद्धामिति चित्तस्य पञ्चावस्था उक्ताः (योगसूत्रवृत्तिः १।२)॥

इति चित्तावस्थानिरूपणं नाम पञ्चषष्टितमं प्रकरणम् ॥

अधुना देहस्थितषट्चक्रनिरूपणं प्रस्तौति—**गुदमेढ्रान्तरालग** इति। मूलाधारस्वाधिष्ठानमणिपूरानाहतविशुद्धाज्ञानामानि षट् चक्राणि योगशास्त्रे प्रसिद्धानि। तत्र मूलाधारं गुदमेढ्रयोर्मध्ये पृथ्वीतत्त्वकं पीतवर्णं गन्धगुणं वशष-सरूपं चतुर्दलं चक्रम्। स्वाधिष्ठानं मेढ्रस्योपरिवर्तमानं जलतत्त्वकं शुभ्रवर्णं रस-

अथ तृतीयः पादः ॥

नानासिद्धिदो हठयोगः ॥ १ ॥ अहिंसाद्या यमा दश ॥ २ ॥ यज्ञव्यतिरिक्तविषयेषु हिंसावर्जनमहिंसा ॥ ३ ॥ दृष्टश्रुतज्ञानोक्तिः सत्यम् ॥ ४ ॥ पारकीयनिवृत्तिरस्तेयम् ॥ ५ ॥ परस्त्रीवर्जनं ब्रह्मचर्यम् ॥ ६ ॥ भूतानुज्ञा दया ॥७॥ शत्रुमित्रैकस्थितिरार्जवम् ॥८॥ शत्रुपीडायामपि क्षोभनिवृत्तिः क्षमा ॥ ९ ॥ विज्ञाननिष्पत्तिर्धृतिः ॥ १० ॥ त्रिभागोदरभोजनं मिताहारः ॥ ११ ॥ स्वदेहमलमोचनं

गुणं बभमयरलरूपं षड्दलं चक्रम् । तृतीयं मणिपूरं नाभिदेशे स्थितं तेजस्तत्त्वकं रक्तवर्णं रूपगुणं डादिदशवर्णरूपं दशदलम् । चतुर्थमनाहतं हृद्देशे स्थितं वायुतत्त्वकं धूसरवर्णं स्पर्शगुणं कादिद्वादशवर्णरूपं द्वादशदलम् । पञ्चमं विशुद्धं कण्ठदेशे स्थितमाकाशतत्त्वकं शुभ्रवर्णं शब्दगुणं षोडशस्वररूपं षोडशदलम् । षष्ठमाज्ञाचक्रं भ्रुवोर्मध्ये स्थितं मनोवृत्तिरूपं हक्षवर्णात्मकं द्विदलम् । ब्रह्मरन्ध्रं तु सर्वेषामेषां षट्चक्राणामुपरि मूर्ध्नि स्थितम् । तत्र ब्रह्मरन्ध्रे साभासा शक्तिः । मूलाधारे गणपतिर्व्यावहारिकब्रह्मरूपः । नाभिचक्रे मणिपूरे ब्रह्मा । अनाहतचक्रे हृदि विष्णुः । दृक्चक्रे रुद्रस्तामसः । अथवा केषांचिन्मतेन ब्रह्मरन्ध्रे परा शक्तिः । आज्ञायामीशः साक्षी । विशुद्धौ साक्षी जीवः । अनाहते रुद्रः । मणिपूरे च विष्णुः । ध्यानसिद्ध्या सविकल्पः समाधिस्ततो निर्विकल्पः । निर्विकल्पकसमाधिसिद्धिरेव मुक्तिः ॥

इति षट्चक्रनिरूपणं नाम षट्षष्टितमं प्रकरणम् ॥

अथ हठयोगस्वरूपमाह—**नानासिद्धिदो हठयोगः** । नानासिद्धिद इति पदं हठयोगस्य वैशिष्ट्यं प्रतिपादयति । अस्मिन् योगे दश यमा वर्तन्ते ते च अहिंसासत्यास्तेयब्रह्मचर्यदयार्जवक्षमाधृतिमिताहारशौचनामका यज्ञव्यतिरिक्तेत्यादिदशसूत्र्या सलक्षणं व्याख्याताः । पातञ्जलयोगसूत्रे तु अहिंसासत्यास्तेयब्रह्मचर्यापरिग्रहा यमाः (योगसूत्र २-३०) इति सूत्रेण पञ्चैव यमा निर्दिष्टाः ॥

इति यमनिरूपणं नाम सप्तषष्टितमं प्रकरणम् ॥

शौचम् ॥ १२ ॥ संतोषाद्या नियमा दश ॥ १३ ॥ यदृच्छालाभप्रीतिः संतोषः ॥१४॥ श्रौतस्मार्तविश्वास आस्तिक्यम् ॥१५॥ सत्पात्रे दीयमानं दानम् ॥ १६ ॥ शक्त्यर्चनमीशपूजनम् ॥ १७ ॥ व्रतैः शरीरशोषणं तपः ॥ १८ ॥ कुत्सितकर्मलज्जा ह्रीः ॥ १९ ॥ वैदिकश्रद्धा मतिः ॥ २० ॥ मन्त्राभ्यासो जपः ॥ २१ ॥ व्रतदिवसेषु नियमस्थितिर्व्रतः ॥ २२ ॥

इति श्रीशाक्तदर्शने त्रयोदशाध्यायस्य तृतीयः पादः ॥

अथ चतुर्थः पादः ॥

पद्मादीन्यासनानि ॥१॥ ऊर्वोरुपरिकृतपादाङ्गुल्योर्हस्ताभ्यां व्युत्क्रमग्रहणं पद्मासनम् ॥ २ ॥ ऋजुकायेन दक्षिणोरुणि वामपादविन्यासो वीरासनम् ॥ ३ ॥ गुल्फौ सीवनीपार्श्वयोः

अथ हठयोगगतान् दश नियमानाचष्टे—**संतोषाद्या नियमा दश**ेति। ते च संतोषास्तिक्यदानेशपूजनतपोह्रीमतिजपव्रतनामका दश व्याख्यापूर्वकं यदृच्छालाभेति दशसूत्र्या प्रतिपादिताः इति यद्यपि स्पष्टमत्रोक्तं तथापि वस्तुतोत्र नवैव नियमा व्याख्याता उपलभ्यन्ते। जाबालदर्शनोपनिषदि (२।१-१६) दश नियमा व्याख्याताः। तन्मध्ये दृश्यमानः सिद्धान्तश्रवणनामा वेदान्तश्रवणेति व्याख्यातो नियमोत्र न दृश्यते। कदाचिल्लेखकप्रमादाद् गलितो भवेत्। कदाचिंन्नियमा नव इति मूलपाठः स्यात्। योगसूत्रे तु शौचसंतोषतपःस्वाध्यायेश्वरप्रणिधानानि नियमाः (योगसूत्र २।३२) इति सूत्रेण पञ्चैव नियमाः प्रतिपादिताः। **व्रतदिवसेष्विति**। व्रत इति सौत्रं पुंस्त्वम् ॥

इति नियमनिरूपणं नामाष्टषष्टितमं प्रकरणम् ॥

अधुना आसनानि व्याचष्टे—**पद्मादीन्यासनानीति**। तत्र पद्मासनं व्याचष्टे—**ऊर्वोरुपरीति**। योगसूत्रवृत्तौ पद्मासनं व्याख्यातम्—"अङ्गुष्ठौ संनिबध्नीयाद्धस्ताभ्यां व्युत्क्रमेण तु। ऊर्वोरुपरि विप्रेन्द्र कृत्वा पादतले उभे" इति। तथैव "एकपादमथैकस्मिन्विन्यस्योरौ च संस्थितः। इतरस्मिंस्तथा पादं वीरासनमुदाहृतम्" इति वीरासनं व्याख्यातम्। भद्रासनं व्याचष्टे—**गुल्फाविति**।

क्षिप्त्वा पार्श्वपादयोः पाणिभ्यां ग्रहणं भद्रम् ॥ ४ ॥ सुखधैर्यप्रदं सुखासनम् ॥ ५ ॥ षण्णवत्यङ्गुलात्मको देहः ॥ ६ ॥ वह्निशिखाग्रगो मूलाधारः ॥ ७ ॥ तस्मात्सर्वोत्पत्तिः ॥ ८ ॥ आधारज्ञाता परं पदम् ॥ ९ ॥ तत्रैव कुण्डलिनी शक्तिः ॥ १० ॥ व्यवहारब्रह्मसाक्षी गजाननः ॥ ११ ॥ आधारे नाडीकन्दम् ॥ १२ ॥ नाड्यो द्विसप्ततिसहस्राणि ॥ १३ ॥ चतुर्दश मुख्याः ॥ १४ ॥ सुषुम्ना ब्रह्मनाडी ॥ १५ ॥ वीणादण्डेन ब्रह्मरन्ध्रम् ॥ १६ ॥

योगसूत्रवृत्तौ—“गुल्फौ च वृषणस्याधः सीवन्याः पार्श्वयोः क्षिपेत् । पार्श्वपादौ च पाणिभ्यां दृढं बद्ध्वा सुनिश्चलः । भद्रासनं भवेदेतत्सर्वव्याधिविषापहम्” इत्येवं भद्रासनमुपवर्णितम् । योगसूत्रव्यासभाष्ये तु पद्मासनं वीरासनं भद्रासनं स्वस्तिकं दण्डासनं सोपाश्रयं पर्यङ्कं क्रौञ्चनिषदनं हस्तिनिषदनम् उष्ट्रनिषदनं समसंस्थानं स्थिरसुखं यथासुखं चेत्येवमादीन्यासनानि वर्णितानि वाचस्पतिकृतटीकायां च व्याख्यातान्युपलभ्यन्ते ॥

इत्यासननिरूपणं नामैकोनसप्ततितमं प्रकरणम् ॥

अथ देहवर्णनपूर्वकं मूलाधारचक्रं वर्णयति—**षण्णवत्यङ्गुलेति** । स्वाङ्गुलिपरिमाणेन नरस्य षण्णवत्यङ्गुलिपरिमितोन्मानो देहः । तत्र सर्वोत्पत्तिकरं मूलाधारचक्रं मूलवह्निशिखाग्रे गुदमेढ्रान्तराले तिष्ठति । इदमेव कुण्डलिन्याः व्यवहारब्रह्मसाक्षिणो गजाननस्य च स्थानम् । इत एव सर्वा नाड्यो नाडीकन्दात् प्रवर्तन्ते कन्दोर्ध्वे च कुण्डलिन्याः स्थितिः । **नाड्यो द्विसप्ततिसहस्राणीति** । आसां नाडीनां संख्योद्गमस्थानं च भिन्नभिन्नत्वेन वर्णितं तत्रतत्रोपनिषत्सु । तथा च च्छान्दोग्योपनिषदि काठकोपनिषदि च दृश्यते—शतं चैका च हृदयस्य नाड्यस्तासां मूर्धानमभिनिःसृतैका । तयोर्ध्वमायन्नमृतत्वमेति विष्वङ्ङन्या उत्क्रमणे भवन्ति (छा. ८।६।६; कठ ६।१६) इति । प्रश्नोपनिषदि चैषैव संख्या दृश्यते ‘अत्रैतदेकशतं नाडीनाम्’ (प्रश्न ३।६) इति । बृहदारण्यके तु ‘हिता नाम नाड्यो द्वासप्ततिसहस्राणि हृदयात्पुरीततमभिप्रतिष्ठन्ते’ (बृह. २।१।१९) इति । **सुषुम्ना ब्रह्मनाडीति** । अत्र सुषुम्नाया एव ब्रह्मनाडीत्वेनोल्लेखो दृश्यते ।

कन्दोर्ध्वे कुण्डलिनी ॥ १७ ॥ सुषुम्ना योगसिद्धिदा ॥ १८ ॥

इति श्रीशाक्तदर्शने त्रयोदशाध्यायस्य चतुर्थः पादः ॥

त्रयोदशोध्यायः समाप्तः ॥

अथ चतुर्दशोध्यायः ॥

ब्रह्मरन्ध्रमुखं स्वमुखेन समावेष्टय कन्दपार्श्वेषु निरुध्य संस्थिता कुण्डलिनी. ॥ १ ॥ सुषुम्नापार्श्वयोरिडापिङ्गले ॥ २ ॥ पृष्ठपार्श्वयोः कुहूसरस्वती ॥३॥ गान्धारहस्तिजिह्वा समायाः ॥४॥ पूषायशस्विनी पिङ्गलायाः ॥ ५ ॥ कुहूहस्तिजिह्वामध्ये विश्वोदरा ॥ ६ ॥ कुहूयशस्विन्योर्वरुणा ॥ ७ ॥ पूषासरस्वत्योः यशस्विनी ॥८॥ गान्धारसरस्वत्योः शङ्खिनी ॥ ९ ॥ वामनासान्तमिडा ॥१०॥

नागेशभट्टकृतयोगसूत्रवृत्तौ तु सुषुम्नायाः शाखात्वेन वर्ण्यते ब्रह्मनाडी (योगसूत्रवृत्ति १।३६)। सुषुम्णेत्यपि पाठः क्षुरिकोपनिषदि दृश्यते ॥

इति मूलाधारनाडीकन्दनिरूपणं नामैकसप्ततितमं प्रकरणम् ॥

अधुना चतुर्दशमुख्यनाडीस्तासां स्थानानि विस्तारं च वर्णयति—**ब्रह्मरन्ध्रमुखमिति**। एताश्चतुर्दश नाड्यस्तु—कुण्डलिनी सुषुम्ना इडा पिङ्गला कुहूः सरस्वती गान्धारी हस्तिजिह्वा पूषा यशस्विनी विश्वोदरा वरुणा यशस्विनी शङ्खिनी च। योगचूडामण्युपनिषदि तु किंचिद्भेदेनैतत्पठ्यते। तथा च—"तत्र नाड्यः समुत्पन्नाः सहस्राणां द्विसप्ततिः। तेषु नाडीसहस्रेषु द्विसप्ततिरुदाहृताः॥ प्रधानाः प्राणवाहिन्यो भूयस्तासु दश स्मृताः। इडा च पिङ्गला चैव सुषुम्ना च तृतीयगा॥ गान्धारी हस्तिजिह्वा च पूषा चैव यशस्विनी। अलम्बुसा कुहूश्चैव शङ्खिनी दशमी स्मृता॥ एतन्नाडीमहाचक्रं ज्ञातव्यं योगिभिः सदा। इडा वामे स्थिता भागे दक्षिणे पिङ्गला स्थिता॥ सुषुम्ना मध्यदेशे तु गान्धारी वामचक्षुषि। दक्षिणे हस्तिजिह्वा च पूषा कर्णे च दक्षिणे। यशस्विनी वामकर्णे चानने चाप्यलंबुसा। कुहूश्च लिङ्गदेशे तु मूलस्थाने तु शङ्खिनी" (योगचूडामणि

दक्षिणान्तं पिङ्गला ॥ ११ ॥ वामपादाङ्गुष्ठान्तं यशस्विनी ॥ १२ ॥ वामाक्ष्यन्तं पूषा ॥ १३ ॥ याम्यकर्णान्तं पयस्विनी ॥ १४ ॥ जिह्वान्तं सरस्वती ॥ १५ ॥ सव्यपादाङ्गुष्ठान्तं हस्तिजिह्वा ॥ १६ ॥ शङ्खिनी सव्यकर्णान्तम् ॥ १७ ॥ सव्यनेत्रान्तं गान्धारी ॥ १८ ॥ विश्वोदरा कन्दस्था ॥ १९ ॥

इति श्रीशाक्तदर्शने चतुर्दशाध्यायस्य प्रथमः पादः ॥

अथ द्वितीयः पादः

नाडीसंचारका वायवः ॥ १ ॥ वायवो दश ॥ २ ॥ पञ्च मुख्याः ॥ ३ ॥ प्राणापानौ प्रवरौ ॥ ४ ॥ पूज्यः प्राणः ॥ ५ ॥

१।१५–२०)। अत्र सूत्रेषु वामयाम्यशब्दौ वामपरौ सव्यशब्दस्तु दक्षिणार्थपरः प्रयुज्यमानो दृश्यते । कदाचिदपपाठः स्यात् ॥

इति चतुर्दशनाडीनिरूपणं नामैकसप्ततितमं प्रकरणम् ॥

अधुना नाडीषु वहमानान्वायून्निरूपयति–**नाडीसंचारका वायव** इति । **वायवो दशेति** । एते दश वायवो वर्णिता योगचूडामण्युपनिषदि—'प्राणापानसमानाख्या व्यानोदानौ च वायवः । नागः कूर्मोऽथ कृकरो देवदत्तो धनंजयः ॥' इति । तेषां च स्थानानि दर्शितानि—'हृदि प्राणः स्थितो नित्यमपानो गुदमण्डले । समानो नाभिदेशे तु उदानः कण्ठमध्यगः । व्यानः सर्वशरीरे तु प्रधानाः पञ्च वायवः । उद्गारे नाग आख्यातः कूर्म उन्मीलने तथा । कृकरः क्षुत्करो ज्ञेयो देवदत्तो विजृम्भणे । न जहाति मृतं वापि सर्वव्यापी धनंजयः' (योगचूडामणि १।२२–२५) इति । **इडादित्रयाणां त्रिमूर्तय इति** । 'सोमसूर्याग्नयस्त्रिमूर्तयः । तथा च योगचूडामण्युपनिषदि—'इडापिङ्गलासुषुम्नाः प्राणमार्गे च संस्थिताः । सततं प्राणवाहिन्यः सोमसूर्याग्निदेवताः' (योगचूडामणि १।२१) इति ॥

इति नाडीसंचारकवायुनिरूपणं नाम द्विसप्ततितमं प्रकरणम् ॥

इडाद्वित्रयाणां त्रिमूर्तयः ॥ ६ ॥ रेचकपूरककुम्भकात्मकः प्राणायामः ॥ ७ ॥ मूलमन्त्रात्मकः ॥ ८ ॥ हकारस्मरणपूर्वं कर्षणं षोडशमात्रैः पूरकः ॥ ९ ॥ रेफस्य चतुःषष्ट्या तु मात्रया कुम्भकः ॥ १० ॥ ईकारस्य द्वात्रिंशन्मात्रया रेचकः ॥ ११ ॥ क्रमव्युत्क्रमतः ॥ १२ ॥ धारणे मूलमन्त्रजपः ॥ १३ ॥ पूरके वेदसंख्या ॥ १४ ॥ कलाः कुम्भके ॥ १५ ॥ वसु रेचके ॥ १६ ॥ अपानोर्ध्वनयन आनन्दः ॥ १७ ॥ आधाररोधनेन वायुदीप्तो वह्नी रुहति कुण्डलीम् ॥ १८ ॥ सुषुम्नाया वायुर्वह्निनोर्ध्वं गच्छति ॥ १९ ॥ वायुर्जितः ॥ २० ॥ तेन चित्तशुद्धिः ॥ २१ ॥

इति श्रीशाक्तदर्शने चतुर्दशाध्यायस्य द्वितीयः पादः ॥

इदानीं प्राणायामस्वरूपं निरूप्यते–**रेचकपूरकेति**। रेचकपूरकेति क्रमो ह्यत्र योगग्रन्थाननुसृत्य कृतः। तथा चोक्तम्–'प्राणायामस्तु विज्ञेयो रेचकपूरककुम्भकैः' इति। तथैव 'रेचकं पूरकं त्यक्त्वा सुखं यद्वायुधारणम्। प्राणायामोयमित्युक्तः सर्वैः केवलकुम्भकः' इति। **मूलमन्त्रात्मक** इति। प्राणायामवेलायां मूलमन्त्रजपः कार्य इत्यर्थः। **हकारस्मरणेति**। तथा चोक्तं नागेशभट्टैर्योगसूत्रवृत्तौ–'तत्र मात्रा निमेषोन्मेषावच्छिन्नः कालः, लघ्वक्षरावच्छिन्नो वा। ...प्रणवोच्चारणावच्छिन्नकाल इत्यन्ये। तत्र त्रयोपि द्वादशमात्रावच्छिन्ना इत्यधमः पक्षः। षोडशमात्रावच्छिन्नः पूरकः। चतुःषष्टिमात्रावच्छिन्नः कुम्भकः। द्वात्रिंशन्मात्रावच्छिन्नो रेचक इति वसिष्ठसंहितायाम्' इति। अत्र तु पूरककुम्भकरेचकवेलायामनुक्रमेण हकाररेफेकाराणां स्मरणं विशेषः तथैव रेचककुम्भकपूरकक्रमेण व्युत्क्रमोप्युक्तः। धारणे इति। रेचकानन्तरं पूरणात्प्राग्यः कालः स धारणशब्देनोच्यते। अयमेव योगसूत्रे चतुर्थशब्देनोच्यते (योगसूत्र २।५१) **वेदसंख्येति**। वेदसंख्या चतुर्लक्षणा। कलाशब्देन षोडशसंख्योच्यते वसुशब्देन चाष्टौ। **अपानोर्ध्वनयन** इति। अपानवायोरूर्ध्वगमनसाधनं कष्टसाध्यमपि महानन्दजनकमिति योगशास्त्रे प्रसिद्धम् ॥

इति प्राणायामनिरूपणं नाम त्रिसप्ततितमं प्रकरणम् ॥

अथ तृतीयः पादः ॥

इन्द्रियाणां बलादाहरणं विषयेषु प्रत्याहारः ॥ १ ॥ आपादतलमस्तकमनिलमापूर्य पादद्वयाधारनाभिहृत्कण्ठतालुललाटभ्रूमध्यमूर्ध्नि निरोधश्च ॥ २ ॥ बाह्यभूतानि क्रमेणाभ्यन्तरबीजानुस्मरणपूर्वं धारणं धारणा ॥ ३ ॥ पञ्चभूतेषु पञ्च देवान् ॥ ४ ॥ मूलवह्निशिखाग्रे मूलप्रकृतिः ॥ ५ ॥ मूले कुण्डलिनी ॥ ६ ॥ कामदायिनी पीठम् ॥ ७ ॥ शक्तिः पद्मम् ॥ ८ ॥ वादिसान्तवर्णकम् ॥ ९ ॥ व्यावहारब्रह्मगणपतिशक्तिपुत्रो देवता ॥ १० ॥ स्वाधिष्ठानं योनिपीठम् ॥ ११ ॥ सादिवर्णकं राजसी ॥ १२ ॥ ब्रह्मा देवता

अथ प्रत्याहारो निरूप्यते—**इन्द्रियाणामिति** । तत्तद्विषयेषु तेषां तेषामिन्द्रियाणां विषयेभ्यो दूरीकृत्य स्थिरीकरणं प्रत्याहारः । चित्तं हि इन्द्रियाणि प्रवर्तयति । यदि चित्तं स्थिरीक्रियते तर्हि इन्द्रियाणि विषयेभ्यः प्रत्याहृतानि भवन्त्येव । तथा च योगसूत्रे ‘ स्वविषयासंप्रयोगे चित्तस्य स्वरूपानुकार इवेन्द्रियाणां प्रत्याहारः इति प्रत्याहारलक्षणम् । कथं स प्रत्याहारः संपाद्यते तदाह—**आपादतलमस्तकेति** । प्राणायामबलात्सर्वं शरीरं वायुना ऽऽपूर्य तेषां तेषां शरीरस्थानानां वायुना निरोधः प्रत्याहार इति फलितम् ॥

इति प्रत्याहारनिरूपणं नाम चतुःसप्ततितमं प्रकरणम् ।

अधुना धारणां व्याचष्टे—**बाह्यभूतानीति** । भूतानीत्यस्य स्थाने भूतानामिति पाठः सुगमः । आभ्यन्तरबीजस्मरणपूर्वकं बाह्यभूतेषु चित्तसंस्थापनं धारणेत्युच्यते ॥ तथा च योगसूत्रम्-देशबन्धश्चित्तस्य धारणेति । कथं सा धारणा क्रियते तदाह—**पञ्चभूतेष्विति** । मूलाधारादीनि पञ्च चक्राणि यथाक्रमं पृथिव्यादिपञ्चभूतात्मकानि गणपत्यादिदेवताकानि । **वादिसान्तेति** । वशषसवर्णाः मूलाधारचक्रस्थपद्मस्य चत्वारि दलानि । **स्वाधिष्ठानमिति** । एतच्चक्रस्थपद्मं वादिषड्वर्णमयषड्दलम् । **सादिवर्णकमिति** । अपपाठोयम् ।

॥१३॥ मणिपूरमुड्याणम् ॥१४॥ सात्त्विकी विष्णुर्देवता ॥१५॥ कादिठान्तमनाहतम् ॥ १६ ॥ तामसी रुद्रः ॥ १७ ॥ तालुमूलं जालंधरम् ॥ १८ ॥ स्वरात्मकम् ॥ १९ ॥ महेशः ॥ २० ॥ आज्ञा द्विदलम् ॥ २१ ॥ सदाशिवः ॥ २२ ॥ ब्रह्मरन्ध्रं सहस्रारम् ॥ २३ ॥ देवता परा शक्तिः ॥ २४ ॥

इति श्रीशाक्तदर्शने चतुर्दशाध्यायस्य तृतीयः पादः ॥

अथ चतुर्थः पादः॥

ओंकारमाधारे ॥ १ ॥ हकारं स्वाधिष्ठाने ॥ २ ॥ रेफं

वादिवर्णकमिति समीचीनम् । **मणिपूरमुड्याणमिति** । ओड्याणं ओड्डियाणं वा मणिपूरस्य पर्यायः । तथा च योगचूडामण्युपनिषदि–' ओड्याणं कुरुते यस्माद- विश्रान्तं महाखगः । ओड्डियाणं तदेव स्यान्मृत्युमातङ्गकेसरी । उदरात्पश्चिमं ताणमधोनाभेर्निगद्यते । ओड्याणमुदरे बन्धस्तत्र बन्धो विधीयते ' इति । अस्मिन्मणिपूरे डादिफान्तदशवर्णात्मकं दशदलमोड्याणं चक्रम् । मणिपूरवर्णसंख्यात्र सूत्रकारैर्न निर्दिष्टा । कदाचित्तन्निर्देशकं सूत्रं भ्रष्टं स्यात् । अनाहते चक्रे कादिठान्तद्वादशवर्णात्मकं द्वादशदलं पद्मं वर्तते ॥ **तालुमूलं जालंधरमिति** । वस्तुतो जालंधरमिति बन्धनाम यथोड्डियाणं मणिपूरस्य । तथा च योगचूडामण्युपनिषदि–' ततो जालंधरो बन्धः कष्टदुःखौघनाशनः । जालन्धरे कृते बन्धे कण्ठसंकोचलक्षणे । न पीयूषं पतत्यग्नौ न च वायुः प्रधावति ' (योगचूडामणि १।५१) इति । जालंधरशब्देनात्र षोडशदलं विशुद्धिचक्रं षोडशस्वरात्मकं महेशदेवताकं निर्दिश्यते । **आज्ञा द्विदलमिति** । हक्षेतिवर्णद्वयात्मकं सदाशिवदेवताकम् । **ब्रह्मरन्ध्रं सहस्रारमिति** । षट्चक्रोपरिस्थितं ब्रह्मरन्ध्रं सहस्रारम् । अस्य शक्तिरेव देवता । विस्तरस्तु चक्राणां पद्मानां बन्धानां च योगचूडामण्युपनिषदोवगन्तव्यः । प्राक् षट्षष्टितमप्रकरणनिरूपणं चावलोकनीयम् ॥

इति धारणानिरूपणं नाम पञ्चसप्ततितमं प्रकरणम् ॥

अथ ब्रह्मरन्ध्राधःस्थितषट्चक्रेषु बीजमन्त्रस्य ध्यानं निरूपयति–**ओंकार-**

मणिपूरे ॥ ३ ॥ ईकारमनाहते ॥ ४ ॥ बिन्दुं विशुद्धयाम् ॥ ५ ॥ ध्वनिमाज्ञायाम् ॥ ६ ॥ सतारं मायां ब्रह्मरन्ध्रे ॥ ७ ॥ कुण्डलोर्ध्वनयनाधःस्थापनात्मकं सकृद् ध्यानम् ॥ ८ ॥ परजीवैकतां प्रति संविदुत्पत्तिः समाधिः ॥ ९ ॥

इति श्रीशाक्तदर्शने चतुर्दशाध्यायस्य चतुर्थः पादः ॥

चतुर्दशोऽध्यायः समाप्तः ॥

अथ पञ्चदशोऽध्यायः ॥

शान्तिमूलप्रकृतिमय आधारः ॥ १ ॥ नाभिचक्रं राजसम् ॥ २ ॥ हृच्चक्रं सत्त्वम् ॥ ३ ॥ दृक्चक्रं तामसम् ॥ ४ ॥ सत्त्वोद्रिक्तगुणमयं ब्रह्मरन्ध्रम् ॥ ५ ॥ गणपतिराधारस्य ॥ ६ ॥ नाभेर्ब्रह्मा ॥ ७ ॥ हृदो विष्णुः ॥ ८ ॥ दृशो रुद्रः ॥ ९ ॥ शक्ती रन्ध्रस्य ॥ १० ॥ आधारे प्रणवः ॥ ११ ॥ नाभौ हकारः ॥ १२ ॥ हृदि रेफः ॥ १३ ॥ दृशि ईकारः ॥ १४ ॥ ह्रींकारो रन्ध्रे ॥ १५ ॥ त्रिसाहस्रसंख्यान्तं वृत्तिराधारे ॥ १६ ॥ सहस्रं नाभौ ॥ १७ ॥ हृदि दृशि च ॥ १८ ॥

माधारे इति । ओंकाराक्षरस्य संपूर्णस्य मूलाधारे ध्यानं कुर्यात् । तत्स्थस्य च हकारस्य स्वाधिष्ठाने इति क्रमेण विशुद्धिचक्रे मकाररूपबिन्दुध्यानानन्तरमनुरणनात्मकध्वनेराज्ञाचक्रे ध्यानं कुर्यात् । ततोपि परं मायाध्यानं ब्रह्मरन्ध्रे कुर्यात् । तत्प्रभावतश्च कुण्डलिन्या ऊर्ध्वाधोनयनं कर्तुं ध्यानी प्रभवति समाधावधिकारी च भवति समाधिना सर्वश्रेष्ठं जीवैक्यं च साक्षात्करोति ॥

इति ध्याननिरूपणं नाम षट्सप्ततितमं प्रकरणम् ॥

अधुना षण्णां चक्राणां गुणान्देवता मन्त्रवर्णाक्षराणि जपसंख्यां निदर्श्य ध्यानं निरूपयति—**शान्तिमूले**ति । मूलप्रकृतिमयं गणपतिदेवताकं प्रणवस्वरूपं मूलाधारचक्रम् । तथैव नाभिचक्रं राजसं ब्रह्मदेवताकं हकाररूपम् । अत्र प्रकरणे स्वाधिष्ठानविशुद्धचक्रे न निदर्श्येते । तद्व्यतिरिक्तान्याधारनाभिहृद्दृक्चक्रा-

षट्साहस्रं रन्ध्रे ॥ १९ ॥ वृत्तिरेषा मन्त्रयोगः ॥ २० ॥ एष एकः ॥ २१ ॥ ध्यानमेतत् ॥ २२ ॥ ऐक्यभावनं समाधिः ॥ २३ ॥ यमः सामान्यधर्मः ॥ २४ ॥ नियमो वर्णधर्मः ॥ २५ ॥ यथासुखमासनम् ॥ २६ ॥ मूलेन प्राणायामः ॥ २७ ॥ प्रत्याहारो मन्त्रसन्ध्या ॥ २८ ॥ धारणमर्चनम् ॥ २९ ॥ यन्त्रोत्तमबिम्बेषु ॥ ३० ॥ हृदि च ॥ ३१ ॥ ध्यानं जपेन ॥ ३२ ॥ ऐक्यानुसंधानं समाधिः ॥ ३३ ॥ आभ्यन्तरपरो राजयोगी ॥ ३४ ॥ हठाद्याभ्यन्तरपरो हठयोगी ॥ ३५ ॥ बाह्याभ्यन्तरपरो मन्त्रयोगी ॥ ३६ ॥

इति श्रीशाक्तदर्शने पञ्चदशाध्यायस्य प्रथमः पादः ॥

ण्यन्ते च ब्रह्मरन्ध्रं वर्ण्यते । एषु चक्रेषु तत्स्वरूपविषये प्रत्ययैकतानता ध्यानमिति भावः ॥

इति मन्त्रयोगनिरूपणं नाम सप्तसप्ततितमं प्रकरणम् ॥

अथ योगित्रयं व्याचष्टे तदङ्गतया च यमनियमप्रयोजनमाह— **यमः सामान्यधर्म इति** । अहिंसादयो यमाः मनुष्यमात्रेण सर्वेण पालनीयाः । नियमाः प्रतिवर्णं किंचिद्भिन्नाः स्ववर्णाचारानुरूपं पालनीयाः । प्राणायामार्थं स्थैर्यसंपादकमासनं सर्वेषामावश्यकम् । **मूलेन प्राणायाम** इति । मूलमन्त्रं मनसि कृत्वा प्राणायामः कार्य इत्यर्थः । इन्द्रियनिग्रहरूपः प्रत्याहारो मन्त्रसन्ध्यारूपो मन्तव्यः । तथैव धारणमर्चनरूपं मन्वीत । तदर्चनरूपं चित्तधारणं यन्त्रेषु उत्तमाबिम्बेषु च कार्यम् । ध्यानं जपेन कुर्यात् । सर्वस्यास्य परिणामः शक्त्यैक्यानुसंधानं, स एव समाधिः । एवं समन्त्रं योगाचरणं कुर्वन्नाभ्यन्तरा मानसीः सर्वाः क्रियाः प्राधान्येन कुर्वन् राजयोगीति कथ्यते । हठेन सर्वमेतच्छरीरेन्द्रियैः संपादयन् हठयोगीति कथ्यते । बाह्या आभ्यन्तराश्च द्वितया अपि योगाक्रियाः कुर्वन् मन्त्रयोगीति कथ्यते ॥

इति मन्त्रपूर्वकाष्टाङ्गयोगनिरूपणं नाम अष्टसप्ततितमं प्रकरणम् ॥

।। अथत्रयोदशम प्रकाशः ।।

स्वरोदय निरूपणं

अजोऽकलोऽविनाशी यः, यः समता सरित्पतिः ।
निष्कलङ्को विशुद्धश्च, पातुवः श्रीजिनाधीशः ।।१।।
निरञ्जनश्च नैर्गुण्यः, सगुणो निर्मलः सदा ।
निर्भयो निरहङ्कारः, निर्ग्रन्थो जगदीश्वरः ।।२।।
जन्मजरात्वरोगादि, क्लेशकर्मबहिर्मुखम् ।
प्रातिहार्य समायुक्तः, सर्वज्ञः परमेश्वरः ।।३।।
पार्श्वेश जिनदेवानां, मूर्त्तिः कल्याणकारिणी ।
सम्मेताचलप्रासादे, स्थितां वन्दे निरन्तरम् ।।४।।
कालज्ञान प्रभावेन, आगमस्यानुसारतः ।
हृदिगुरुकृपां धृत्वा, स्वरज्ञानं निरूप्यते ।।५।।
सर्वत्रैवोपयुज्येत, धर्मकार्येऽपरे तथा ।
अतस्तदपि प्रोच्येत, मयाज्ञानानुसारतः ।।६।।
अत्यन्तस्थिरचित्तेन, ज्ञायते च स्वरोदयम् ।
ततः शुभाशुभं कार्यं, भाविलाभस्य सूचकम् ।।७।।

शरीरे नाडिकाः सन्ति, अनेका गुणधारिकाः ।
तासुतिस्रः प्रधानाःस्युः,कथ्यन्ते चाभिधाः खलु ॥८॥
इङ्गलापिङ्गले चैव, सुषुम्ना च तृतीयका ।
विभिन्नाश्च गुणास्तासां, कथ्यन्ते सुखहेतवे ॥६॥
भवति भ्रकुटी चक्रे, प्रकाशः प्राणवायुनाम् ।
बङ्कनाड्याश्च मार्गेण, नाभौ निवसनं भवेत् ॥१०॥
नाभिप्रदेश सञ्चारा, दक्षिणं इङ्गलागृहम् ।
वामतः पिङ्गलास्थानं, द्वयोर्मध्ये तृतीयकम् ॥११॥
वामस्वरस्य सञ्चाराचन्द्रोदयं विज्ञायताम् ।
यदा दक्षिणसञ्चारः, तदा सूर्यो निगद्यते ॥१२॥
निशाकरः सुकार्याय, दुष्कार्याय रविः पुनः ।
एवं विधे च कर्त्तव्ये, जायते सुखशांतिता ॥१३॥
द्विस्वरस्यैव सञ्चारः, समकाले यदा भवेत् ।
तृतीया नाडिका ज्ञेया, कार्ये हानिर्भवेत्तदा ॥१४॥
चन्द्रस्वरस्य सञ्चारे, स्थिरकार्यं दृढं भवेत् ।
सूर्यस्वरस्य सञ्चारे, चरकार्यं सुयोगतः ॥१५॥
कृष्णपक्षपतिस्सूर्यः, शुक्लपक्षपतिस्तथा ।
चन्द्रश्च परिज्ञातव्यः,लात्वा तिथिविभागकम् ॥१६॥

कर्त्तव्यकार्यकर्त्तव्ये, तत्रैव लाभता भवेत् ।
कृष्णपक्षेषु चाद्यास्ताः,तिथितिसश्चसंमताः ॥१७॥
तत्पश्चाच्चन्द्रस्था ज्ञेया, तिस्रश्च तिथयः खलु ।
ततः सूर्यस्य ज्ञातव्याः चन्द्रस्यापि ततो मता ॥१८॥
एवं रीत्या च पक्षान्तपर्यन्तं परिज्ञायताम् ।
शुक्लपक्षस्य रीतिश्च, कथ्यते सुखहेतवे ॥१९॥
शुद्धपक्षेषु चाद्यास्ताः, चन्द्रस्य तिथियो मताः ।
ततः सूर्यस्य चन्द्रस्य,ज्ञातव्याः स्युश्च भावतः॥२०॥
भोमशनिश्चरादित्य, वाराणां च रविः पतिः ।
सोम बुध गुरूणां च, शुक्राणां चन्द्रमा पतिः॥२१॥
एवं रीत्या च ऋक्षाणां, पति विषय भावनम् ।
पश्चात्कार्यस्य कर्त्तव्ये,लाभस्तु बहुलो भवेत् ॥२२॥
कृष्णपक्ष तिथीनामारम्भे, सूर्यस्वरो भवेत् ।
तत्पक्षः सुखकारी, स्यात्प्रवीणस्य न संशयः ॥२३॥
शुक्लपक्ष तिथौ प्रातः, चन्द्रस्वरोदयो भवेत् ।
तदा पक्षः स शान्तित्वा,ऽऽधायकः परिज्ञायताम्॥२४॥
चन्द्र तिथौ स्वरश्चन्द्रः, सूर्ये सूर्य उदाहृतः ।
वहेद्यदि तदाकार्ये, पुष्टिः सुखं च जायते ॥२५॥

चन्द्रतिथौ स्वरः सूर्यः, यदि प्रकाश्यते तदा ।
कायपीडा च संक्लेशः, वित्तनाशश्च जायते ॥२६॥
सूर्यतिथिदिने प्रातः, चन्द्रस्वरश्च ज्ञायते ।
राजभयादि संक्लेशः,स्वान्ते चञ्चलता भवेत्॥२७॥
प्रतिपदि द्विपक्षाणां, सुषुम्नायाः स्वरो भवेत् ।
न लाभो हानिता नैव, भवेदत्र न संशयः ॥२८॥
सिंह वृषभ वृश्चिकाः,कुम्भश्चैताश्च राशयः ।
चन्द्रस्वरस्य विज्ञेया, कथ्यन्ते च पुना रवेः ॥२९॥
अन्यथा कार्यकर्त्तव्ये, हानिर्भवति सर्वथा ॥३०॥
कर्क मकर तूलाश्च, मेष एताश्च राशयः ।
तत्सूर्य योगसद्भावे, चरकार्यं प्रशान्तिदम् ॥३१॥
मीनमिथुनकन्याश्च, धनमेताश्च राशयः ।
द्विस्वाभावाश्च विज्ञेयाः, कार्ये हानिप्रदा मताः॥३२॥
चन्द्र सूर्यस्य ये मासाः, स्वरशास्त्रे प्रकाशिताः ।
पृथग्रूपेण विज्ञेयाः, राशिवर्गित भास्करात् ॥३३॥
कोऽपि प्रश्न विधानाय, आगतः शुभभावतः ।
पृच्छकश्च दिशायाश्च, विचारः खलु कथ्यते ॥३४॥

सम्मुखे वामके चोर्ध्वं, द्विविस्थते नैव पृच्छयते ।
तदा तु चन्द्रयोगश्चे,त्कार्यसिद्धौ न संशयः ॥३५॥
दक्षिणस्यामधश्चैव, पश्चिमायां स्थितेन वै ।
पृच्छयते सूर्य, योगश्चेत्कार्य सिद्धिर्भवेद्धुवम्॥३६॥
वामेतरे च स्थित्वा वै, सूर्यस्वरेषु पृच्छयते ।
लग्नवारतिथेर्योगे, मीलने कार्यता भवेत् ॥३७॥
वामेतरे च स्थित्वानु, प्रश्नः प्रासङ्गिको भवेत् ।
पूर्णश्चन्द्रः स्वरस्तत्र, कार्यसिद्धिस्तु जायते ॥३८॥
वामेतरे च स्थित्वा वै, चन्द्रस्वरेण पृच्छयते ।
रवि तत्त्वतिथिर्वारान्विना, कार्यं भवेत्कथम् ॥३९॥
अधः पश्चात्स्थितः कोपि, प्रश्नश्चागत्य पृच्छयते।
उदयश्चन्द्रतायाश्चेत्फलं, किञ्चिन्न जायते ॥४०॥
स्थित्वा वामेतरे भागे, सूर्यस्वरेण पृच्छयते ।
चन्द्रयोगं विना तस्य, कार्यसिद्धिर्न सम्भवेत् ॥४१॥
सन्मुखोर्ध्वदिशां स्थित्वा, सूर्यस्वरेण पृच्छयते ।
चन्द्रयोगं विना तस्य, कार्यसिद्धिर्भवेन्नहि ॥४२॥
समाक्षराणि चन्द्रस्य, विषमानि रवेः सदा ।
तेषां सङ्ख्या विधानाय, पद्धतिः परिदृश्यते ॥४३॥

चतुःषडष्ट द्विः सप्त; दशद्वादश स्युस्तथा ।
समाक्षराणि ज्ञायन्तां, चन्द्रस्य[1] हि तदानि च ॥४४॥
एक त्रिपञ्चसप्तत्वं, नवैकादशसंख्यका ।
अक्षराणां च ज्ञातव्याः, विषमरूपयोगतः ॥४५॥
सूर्ययोगस्य ज्ञेयानि, विषमान्यक्षराणि च ।
स्वरं प्रश्नाक्षरं चैव, विज्ञाय निर्णयः खलु ॥४६॥
सर्वलौकिककार्याणि, त्यक्त्वा ध्याने दृढो भवेत् ।
श्रवणमननादीनां, करणे स्वरज्ञानता ॥४७॥
प्राणायामं तु योगाङ्ग, स्थिरचित्तेन साधयेत् ।
प्रथमभूमिकाः तस्य, स्वरोदयस्तु ज्ञायताम् ॥४८॥
प्राणायामविचारश्च, कठिनः सर्वदा मतः ।
द्वौ भेदौ तस्य विज्ञेयौ, निश्चय व्यवहारजौ ॥४९॥
स्वरूपे च स्वरूपेण, लीनो निश्चयतो भवेत् ।
सञ्चरेच्च यथाश्रेणि, सयोगी कुशलो मतः ॥५०॥
क्षपकोपशमे श्रेणी, कथिते जैन शासने ।
तयोः कालाद्यभावेन, साधना नैव विद्यते ॥५१॥

१—चन्द्रस्वरस्य ।

प्रत्यहं ध्यानताऽभ्यासे, मनः स्थैर्यं तु चेद्भवेत् ।
तदाऽनुभव लेशं च, अत्र प्राप्नोति कश्चन ॥५२॥
स्वानुभवस्य लेशेन, कठिनं कर्म नश्यति ।
अल्पभवे स भव्यात्मा, सिध्यति नात्र संशयः॥५३॥
व्यवहारानुसारेण, ध्यानभेदो न कथ्यते ।
पृथक्पृथक्स्वरूपेण, कथने ग्रन्थवृद्धिता ॥५४॥
अष्टौ भेदाश्च योगस्य, प्राणायामश्चतुर्थकः ।
तस्य सप्तप्रभेदाः स्युः, सकलसिद्धिदायकाः ॥५५॥
रेचकपूरके ज्ञेये, कुम्भकश्च तृतीयकः ।
शान्तिकसमते ज्ञेये, एकता लीनता तथा ॥५६॥
द्रव्यभावप्रभेदेन, रेचकादेश्च भिन्नता ।
देहस्थाशुद्धवायूनां, निष्कासने तु रेचकः[१] ॥५७॥
हिंसाऽसत्यादि पापानां, कषायाणां तथैव च ।
दुर्गुणानाञ्च निष्कासे, रेचको भावतो मतः ॥५८॥
शुद्धवायुप्रवेशेन, पूरको द्रव्यतः किल ।
दयासत्यादि भावानां, क्षमामार्दववस्तूनाम् ॥५९॥

१—रेचको द्रव्यतोभवेद् ।

सर्वोत्तमगुणानां च, प्रवेशो भावपूरकः।
दुर्गुणानां च निष्कासे, गुणानां च प्रवेशने ॥६०॥
सर्वथा गुणवत्त्वं स्या, त्कदाचिद्दैव योगतः।
वायुस्थिरत्व कर्त्तव्ये, कुम्भको द्रव्यतो मतः ॥६१॥
वैराग्याभ्यासद्वारेण, गुणस्थैर्यं यदा भवेत्।
भावकुम्भकता तत्र, अन्यथा नाममात्रतः ॥६२॥
वायूनां च प्रवेशेन, कश्चात्मनि गुणो भवेत्।
पुद्गलरूपता वायोः, आत्मनि च निरूपता ॥६३॥
द्वयोश्चनैव सम्बन्धः, केनापि रूपतो भवेत्।
अतः कथं द्वयोश्चैवं, मीलनं परिसम्भवेत् ॥६४॥
किमुद्दिश्य च वायूनां, प्रोक्तात्मशुद्धिहेतुता।
शङ्कायाश्च समाधानं, प्रोच्यते जैनशास्त्रतः ॥६५॥
जैनेतरीय—शास्त्रेषु, समाधानं न विद्यते।
विचारः सूक्ष्मश्चैव, कृतः केनापि नो कदा ॥६६॥
द्रव्यरेचकवायूनां, देहे सम्बन्धता मता।
वायुशुद्धप्रवेशेन, शरीरे स्वस्थता भवेत् ॥६७॥
आसनादिक योगाङ्गं, विना शरीरयोगतः।
कदापि सम्भवेन्नैव, अतः स्वस्थत्व सिद्धये ॥६८॥

साधनता च वायूनामतः, कारणात्सम्मता ।
धर्मसाधनदेहस्य, स्वास्थ्यं चैव ततो भवेत् ॥६९॥
स्वस्थशरीरसम्बन्धा, दुर्गुणानाञ्च त्याजने ।
शीघ्रं मनः प्रवर्त्तेत; प्राणायामस्तु भावतः ॥७०॥
जायते नैव सन्देहः; आत्मशुद्धेश्च साधने ।
गुणानां पूरणे चैव, दुर्गुणानाञ्च त्याजने ॥७१॥
सर्वगुणमयश्चैव, आत्मा योगेन जायते ।
अतोहि रेचकादीनां, परम्परा च हेतुता ॥७२॥
भावतः प्राणयामस्य, हेतुता चात्मशुद्धिके ।
द्रव्यतो रेचकादीनां, देहशुद्धौ च हेतुता ॥७३॥
गुणानामेकताऽऽदाने, एकता परिजायते ।
निजयोगे च तल्लीने, लीनता परिकथ्यते ॥७४॥
लीनदशा बहिर्भावा, त्समाधित्वस्वरूपके ।
निश्चयतः स जीवात्मा, स्वामी शिवपुरस्य वै ॥७५॥
स्वरख्याति स्थिरी भावे, स्वल्पकं कर्षणं न वै ।
मूलबन्धे दृढी भावे, बीजसञ्चारता भवेत् ॥७६॥
देहे पञ्चापि वाताःस्युः, प्राणसमान नामकौ ।
अपानोदान व्यानाश्च, ज्ञातव्या गुरुयोगतः ॥७७॥

हृदये प्राणता ज्ञेया, समानः सर्वदेहगः ।
अधोऽपानगवायुः, स्यात्कण्ठस्थोदानता भवेत् ॥७८॥
विज्ञेयः सन्धिगो व्यानः, ज्ञेया एते च वायवः ।
तेषाञ्च पञ्च बीजानि ज्ञातव्यानि च ज्ञानिना ॥७९॥
ऐं पैं रौं ब्लौं क्लौं बीजानि, कथितानि प्रधानतः ।
तेषां गर्भित भेदानां, रूपं वक्तुं न शक्यते ॥८०॥
पञ्चवीजप्रचारेण, अनहद्ध्वनिर्भवेत् ।
ध्वनि निर्गम भेदाश्च, योगीश्वरेण संस्मृताः॥८१॥
वर्णमात्रं तु बीजस्य, विद्याच्च कमलं प्रति ।
भिन्न भिन्न गुणास्तेषां, शास्त्रतश्चावधार्यताम् ॥८२॥
सर्वसिद्धिर्वसत्यस्मिन्, सर्वा लब्धिश्च विद्यते ।
सम्पद्यतेऽद्य काश्चिच्च, काश्चिच्च नभवन्त्यपि॥८३॥
नाभौ च वर्णसञ्चारः, सोऽहं प्रकाशरूपकः ।
जापं वै चाजपं, विद्यात्सर्वत्रानुभवो भवेत् ॥८४॥
नाभेः सञ्चारभावेन, रंकारोऽत्र प्रकाशते ।
तत्र भवेन्मनः स्थैर्यं, सङ्कल्पश्चाशुभो नवै ॥८५॥
अनहदाधिपश्चैव, यो देवः स्थिरचित्तकम् ।
दृष्ट्वा सेवा स्वरूपेण, अनेकर्द्धिं सदर्शयेत् ॥८६॥

दृष्ट्वा पौद्गलिकीं ऋद्धिं, यस्यचित्तं च नो चलेत् ।
स नरो ज्ञान सम्पत्तिं, प्राप्नोति नात्र संशयः ॥८७॥
वेद भेदः समाधिः, स्याद्ग रुगमेन लक्ष्यकम् ।
कुण्डलिर्नाभिपार्श्वे च, तत्पश्चाद्बङ्कनाडिका ॥८८॥
मार्गो दशम द्वारस्य, स सरलो विज्ञायते ।
वक्रमार्ग प्रचारे च, प्राप्यते न कदाचन ॥८९॥
मुद्रापञ्चापि ज्ञातव्याः, त्रयो बन्धाश्च कीर्त्तिताः ।
मुख्यंपद्मासनं ज्ञेयं, चतुरशीतिरासने ॥९०॥
अस्त व्यस्तं चरेद्वायुः, कारणयोगभावतः ।
षट्कर्माणि प्रकुर्वन्ति, नेलिधोत्यादिकाः क्रियाः ॥९१॥
त्राटकादि क्रियाश्चैव, बस्ति भेदादिकास्तथा ।
हठयोगेषु विज्ञेयाः, निषिद्धा जैनशासने ॥९२॥
यद्यपि त्राटकं योगं, द्विभेदं खेदशान्तिदम् ।
निरुणद्धि गदान् देहे, निद्राऽलस विनाशकम् ॥९३॥
तथापि हठहेतुः स्यात्त्याज्यं, चात्मार्थिभिर्जनैः ।
आत्मकल्याणता यस्मिन् सयोगः क्रियते नरैः ॥९४॥
पौद्गलिकर्द्धिलोभेन, हठयोगे पतन्ति ये ।
बाह्यख्याति निमित्तेन, आत्मख्यातिं त्यजन्ति ते॥९५॥

अग्रे योगाङ्ग कर्त्तव्ये, लोभात्क्षणो न विद्यते ।
स्वल्प स्वार्थेन मूर्खाश्च, कुर्वन्ति नात्मसाधनम् ॥६६॥

दृष्टयो योगस्य ज्ञेयाः, अष्टौ वस्तुगतेर्मता ।
अन्तर्गताश्च ध्यानादौ, कथ्येते तत्प्रभेदकौ ॥६७॥

आद्यं सालम्बनं ज्ञेयं, निरालम्बं द्वितीयकम् ।
तत्करणेन सज्ज्ञानं, भावतस्तु प्रकाशते ॥६८॥

मित्रा तारा बला दीप्ता, स्थिरा कान्ता प्रभा परा ।
दृष्टयो गदिताश्चाष्टौ, बोधतः परिदृश्यते ॥६९॥

सघनाघनदैवस्य[1], रात्रिषु बालमन्दकाः ।
अन्ये च दृष्टि भेदेन, पश्यन्ति भिन्नरूपतः ॥१००॥

ओघ दृष्टि प्रचारेण, अर्थ दृष्टौ विभिन्नता ।
भिन्नार्थ दर्शनं चैव, ओघदृष्टि प्रभावतः ॥१०१॥

विनाऽनुभव विज्ञानं, आडम्बरः प्रजायते ।
आडम्बरेण हानिः, स्यात्कल्याणं प्रणिनश्यति ॥१०२॥

निरुपाधिक स्थानञ्च, एकान्त ध्यान पुष्टिदम् ।
स्त्रीषण्ठादिकराहित्यं, ध्यानयोग्यं मतं च तत् ॥१०३॥

१—*दिवसेषु ।*

अल्पाऽऽहारी विनिद्रः, स्याद्भक्ता भक्त विवर्जितः ।
लोकैषणा न काचित्स्या, त्प्रभु प्रीतौ दृढो भवेत् ।१०४।
आशामोक्षं विना नैव, कर्त्तव्या हि कदाचन ।
ध्यानयोग्यः स ज्ञातव्यः, भववृद्धेः पराङ्मुखः ॥१०५॥
पञ्चाधारे समायुक्तः, साध्वाचारे सदारतः ।
मानामाने च साम्यत्वं, समस्तृणधनादिषु ॥१०६॥
गृह्णाति बाह्यपदवी नो, न रोगाणां चिकित्सकः ।
लोलुपी नैव सत्कारे, न स्वस्तुत्यादिकारकः ॥१०७॥
धर्मध्याने रतो नित्यं, स्वशंसायामधोमुखी ।
एतद्गुणसमालीनः, ध्यानाधिकारको मतः ॥१०८॥
त्यागी च परनिन्दायाः, स्वनिन्दाश्रवणे सुखी ।
विकथा परिहारी स्या, द्धर्षशोके पराङ्मुखः ॥१०९॥
शत्रौमित्रे समत्वं वै, पराऽऽशात्यागभावुकः ।
ध्यानाभ्यासे च जिज्ञासुः, गुणान्वेषणतत्परः ॥११०॥
ध्यानाभ्यासी भवेद्यो ना, तस्य दुःखं न जायते ।
इन्द्रादिभिः स पूज्यः, स्याद्वृद्धिस्तस्यैवस्वान्तके ॥१११॥
पुष्पमालायते सर्पः, मृगपतिर्मृगायते ।
पावको जलस्थानं, स्यात्समुद्रोगोष्पदायते ॥११२॥

अरण्यं नगरायेत, शत्रुर्मित्रायते किल ।
विषं चामृतता, भूयाद्वैरं च समतायते ॥११३॥
व्यवहारेण सद्ध्याना, द्द वेन्द्रत्वं च प्राप्यते ।
निश्चयतः सुध्यानाच्च, मोक्षरूपं फलं भवेत् ॥११४॥
सुखाऽऽनन्त्यं च जायेत, साद्यनन्तं च तत्रवै ।
कर्माष्टकं क्षयं कृत्वा, प्राप्नोति परमंपदम् ॥११५॥
स्युर्ध्यानानि हि चत्वारि प्रोक्तानि जैनशासने ।
रूपस्थं च पदस्थं च, पिण्डस्थं रूपवर्जितम् ॥११६॥
स्वगुणांशं च तद्ध्यानं, लभेत प्रथमं तदा ।
स्वरूपभेदताऽऽद्यस्य, कथिता स्वरशास्त्रके ॥११७॥
विकाररूपतां त्यक्त्वा, निर्विकारे स्थितः सदा ।
मनसा सङ्गनिस्तस्य, क्रियते सुखहेतवे ॥११८॥
तीर्थकृत्पदप्राधान्यं, अनन्त गुण हेतुकम् ।
तद्गुणध्यान भावेन,प्राप्यन्ते चात्मसद्गुणाः॥११९॥
पदस्थध्यानता ज्ञेया, पिण्डस्थं परिदृश्यते ।
दुरात्मा क्व मलीनोऽहं,क्व शुद्धः परमेश्वरः ॥१२०॥
क्व कर्माष्टविनिर्मुक्तः, क्व कर्मग्रथितो जनः ।
शुद्धरूपः पराज्योतिः, क्वाशुचिरपवित्रकः ॥१२१॥

भेदाऽनन्त्यं द्वयोर्ज्ञेयं, ईश्वरे मादृशोजने ।
स्वपरिणति रूपेशः, सर्वथा परिकीर्त्तितः ॥१२२॥
परपरिणतीरूपो, स्वपरिणतिर्नैव च ।
मयि तादृशरूपत्वं, ईश्वरे न कदाचन ॥१२३॥
निजस्वरूप भोगी सः, सदा स्वगुणपोषकः ।
शुद्धगुणेषु शुद्धत्वं, स्वपरिणतिरुच्यते ॥१२४॥
स्वकीय शक्ति सद्ध्याने,यः प्राप्नोति शान्तिताम् ।
पिण्डस्थं ध्यानकं ज्ञेयं,रूपातीतं निगद्यते ॥१२५॥
रूपादिकं न विद्येत, क्षायिकगुणताजुषः ।
तस्य ध्यानेन तद्रूपं,रूपातीतं तु कीर्त्तितम् ॥१२६॥
पिण्डस्थादिकध्यानानां, स्वरुपं च विशेषतः ।
सङ्क्षेपेणैव कथ्येत, भव्यानां सुखहेतवे ॥१२७॥
देहस्थः कर्मनिर्मुक्तः, ज्ञानवान् परमेश्वरः ।
जिनेन्द्रः स्मर्यते यत्र,पिण्डस्थ तन्निगद्यते ॥१२८॥
अर्हद्रूपाणि, यन्मन्त्रपदानि हृदयाम्बुजे ।
चिन्त्यन्ते शशिशुभ्राणि,पदस्थं तत्प्ररूपितम् ॥१२९॥
प्रातिहार्येण संयुक्तः, समवसरणो जिनः ।
यद्ध्यायतेऽत्र तद्बिम्बं, रूपस्थं तन्निगद्यते ॥१३०॥

अमूर्त्तः चिन्मयः शुद्धः, निराकारो निरञ्जनः ।
सिद्धेशः स्मर्यतेयत्र, रूपातीतं तु कीर्त्तितम्॥१३१॥
प्राणायामे च कर्त्तव्ये, पिण्डस्थं ध्यानसम्मतम् ।
समागमं मनोवाय्वोः,ज्ञात्वा वायुं च साधयेत्॥१३२॥
ततो निजगृहे स्वान्तं, आनयति च बुद्धिमान् ।
तत्र निरन्तरां प्रीतिं, कारयेदधिकाऽधिकाम् ॥१३३॥
योगानलं च स्व स्वान्ते,करोति जागृतिं तथा ।
शुभासनं मिताऽऽहारं, दृढ़भावेन तन्यते ॥१३४॥
चक्षुर्भ्यां च त्यजेन्निद्रा, भिन्नतां जीवदेहयोः ।
जानीयात्स्वर्णपाषाण, वत्कथंचिच्च वा शुचिः ॥१३५॥
भेदनयेन तद्दृष्टिं, स्थापयेद्हृदये किल ।
तत्र शङ्कां परित्यज्य,निश्चयतो दृढ़तां भजेत्॥१३६॥
कार्यप्रसङ्गतो वक्ता वदति, स्तोकमात्रकम् ।
अधिकं न वदेत्किञ्चि,न्निरवद्यं वचोऽपि तत् ॥१३७॥
स्वप्नवत्संसृतिं विद्याद्देहं, धनं च यौवनम् ।
सर्वमसाररूपं च, जानीयात्संसृतौ सदा ॥१३८॥
जिनवाणीं दृढ़ां स्वान्ते स्थापयेच्छुद्ध भावतः ।
रसं ध्यानानुसम्भूतं,योगीन्द्र एव स्वादते ॥१३९॥

विरला: संसृतौ ज्ञेया:, रोगशोकादिवर्जिता: ।
शरीरे शक्तिप्राचर्यं, वर्धते च दिने दिने ॥१४०॥
यो हि निश्चलचित्तेन, ध्यानमाराधयेत्सदा ।
तस्याल्पाहारनैरोग्यं, प्रत्यहमुपयोगता ॥१४१॥
जायते नात्र संदेह:, कथितं ज्ञानभानुना ।
नासाग्रभागदृग्धृत्वा,कृत्वाऽथवा द्विसम्पुटम्॥१४२॥
हृत्पद्मे योऽपि ध्यायेत, सिद्धचक्र स्वरूपकम् ।
तस्य स्वभावतो,ध्यानमतिरायाति स्पष्टत: ॥१४३॥
मायाबीजेन सद्युक्तं, प्रणवं प्रथमं मतम् ।
वर्णबीजगुणज्ञानान्नादवर्णस्थिरत्वत: ॥१४४॥
स्थिरस्वर: प्रजायेत, लक्ष्याग्रे नादता तत: ।
तस्य प्रकाशना स्वान्ते,जायते गुरु योगत: ॥१४५॥
प्राणायामं च सम्पूर्णं, कथितुं नैव शक्यते ।
स्वल्पज्ञानं च स्वल्पायु:,मादृशै: कथ्यतेकथम्॥१४६॥
नाममात्रेण किञ्चिच, प्रोक्तं स्वरमहोदधौ ।
भूमयो दशसङ्ख्याका:,प्रथमं च स्वरोदय: ॥१४७॥
परप्रकाशता रूपं स्वरं, जानाति यो जन: ।
पञ्चतत्त्वानि जानीया, द्विचाराशयपूर्वकम् ॥१४८॥

द्विस्वरे पञ्चतत्त्वानां, ज्ञानेन वर्णमानकौ ।
आकारकाल साफल्यं,ज्ञायते नात्र संशयः ॥१४६॥
पृथ्वीजलाग्निवाताश्च, आकाशं पञ्चमं मतम् ।
पृथ्वीजलाधिपश्चन्द्रः,अन्येषां च पती रविः ॥१५०॥
पीतश्वेतहरिद्रक्त, श्यामवर्णाश्च पञ्चधा ।
पञ्च तत्त्वेषु विज्ञेयाः, अनुक्रमेण ते तथा ॥१५१॥
सम्मुखं सञ्चरेत्पृथ्वी, दूरतो द्वादशांगुलम् ।
समचतुरस्राऽऽकारः घ्राणतः सन्मुखं तथा ॥१५२॥
घ्राणतोऽधो विभागं च, जलं च षोडशांगुलम् ।
आकृतिर्वर्त्तुला तस्य,चन्द्रस्य सादृशी मता ॥१५३॥
घ्राणत उर्ध्वदिक्षु च, सञ्चरेत्तत्वपावकम् ।
चतुरंगुलता तस्य, आकारो बालभास्करः ॥१५४॥
तिर्यक् चरतिवातोऽपि, अष्टांगुलं च घ्राणतः ।
ध्वजासमानताऽऽकारैः ज्ञेयं तत्त्वचतुर्थकम् ॥१५५॥
नाशा सम्पुटस्थानेषु, चलेन्न बाह्यभासता ।
श्यामवर्णश्च तस्य,स्यान्नभस्तत्त्वं च पञ्चकम् ॥१५६॥
पञ्चाशत्पलपर्यन्तं, पृथ्वीतत्वं च सञ्चरेत् ।
चत्वारिंशज्जलं तत्त्वं;त्रिंशत्पलं च पावकम् ॥१५७॥

विंशतिपलपर्यन्तं, वायुतत्त्वंतु सञ्चरेत् ।
दशपलत्वपर्यन्तं, नभस्तत्त्वंतु सम्मतम् ॥१५८॥
अध्यर्धद्विघटी चैव, एकस्वरे विज्ञायताम् ।
एवं च पञ्चतत्त्वानां, अहोनिशि प्रचारता ॥१५९॥
लिखेत्स्वरेषु तत्त्वं वै, यः कोऽपिभिन्नरूपतः ।
काल समय विज्ञानं, वर्षदिवसमानकम् ॥१६०॥
प्रथममेषसंक्रान्तेः, प्रवेशो जायते यदा ।
तदा तत्त्वं विचार्यैव,श्वास स्थैर्यं विधीयते ॥१६१॥
पृथ्वीतत्वस्य यश्चैव,प्रकाशोः नामतः स्वरे ।
मुख्ययोगस्तदा ज्ञेयः, यस्य फलं निगद्यते ॥१६२॥
प्रजासु सुखप्राचुर्यं, समयश्चोत्तमो भवेत् ।
धान्योत्पत्तेश्च बाहुल्यं;पशूनां सुख शान्तिता॥१६३॥
ईतिभीतिर्भवेन्नैव; जनवृद्धिश्च जायते ।
इत्येवं श्रेष्टता तस्य,नृपाणां,सुखशान्तिकम्॥१६४॥
अप्तत्त्वं च तदा तत्र; शशिस्वरेषु संचरेत् ।
फलं तस्यतु विज्ञेयं,स्थिर चित्तेन श्रूयताम् ॥१६५॥
वैपुल्यं मेघवृष्टेः स्यो; दन्नं चोत्पद्यते खलु ।
प्रजासु सुखसर्वस्वं, जायते नात्रसंशयः ॥१६६॥

धर्म भावश्च सर्वेषां, हृदये बहु जायते ।
दान पुण्यादि भावेषु, नीतिमार्गे नृपोभवेत्॥१६७॥
प्रीतिश्च तत्र जायेत, सर्वस्वं सर्वथा सदा ।
शशिस्वरे च ज्ञातव्यं, तत्त्वयुग्मंतु सुन्दरम्॥१६८॥
मेषसंक्रान्ति लग्ने च, प्रथमघटिकासु वै ।
स्वरे तत्वं यथा रूपं; दृश्यते तादृशं फलम् ॥१६९॥
स्वरे पावक तत्त्वं, स्याद्वृष्टिः स्वल्पा च जायते ।
रोगदुःखेषु प्राचुर्यं, दुष्कालश्च प्रजायते ॥१७०॥
देशभङ्गोऽपि जायेत, प्रजा सुखं न विद्यते ।
अग्नि तत्त्वस्य प्राकाश्यं, द्विस्वरेषु यदा भवेत् ॥१७१॥
अशुभं च फलं ज्ञेयं; फलार्थिना च सर्वदा ।
वायु तत्त्वं स्वरे चैव; चलेत्तदा तु युद्धता ॥१७२॥
अल्पवृष्टिस्तु विज्ञेया; वर्षं च मध्यमं भवेत् ।
जायते स्वल्पधान्यादि, स्वल्पं तृणादिकं तथा॥१७३॥
नभस्तत्त्वं स्वरे पूर्वं, चलेत्तस्य फलं तदा ।
न जायते तृणं पूर्णं, अन्यत्सर्वं च पूर्ववत्॥१७४॥
एवं रीत्या च विज्ञेयं, स्वरतत्त्वफलं महत् ।
धारणीयं च तत्स्वान्ते, कार्यं पश्चाद्विधीयताम्॥१७५॥

मधुमासोज्वले पक्षे; प्रतिपदि तिथ्यादिके ।
लग्नविचारता शुद्धा; संचारे स्वतत्त्वतः ॥१७६॥
तस्य वर्णोपि ज्ञातव्यः, स्वरतत्त्वानुसारतः ।
प्रातःकाले स्वरेचन्द्रे, पृथ्वी तत्त्वं भवेद्यदा ॥१७७॥
तत्फलं तु तदा ज्ञेयं; सर्वदा सुखदायिता ।
मेघवृष्टिर्भवेत्तत्र, सुखशान्तिप्रदा सदा ॥१७८॥
समयः सुन्दरो ज्ञेयः; राजप्रजासु हार्दिकः ।
सन्तोषो हर्षपूर्णश्च; ईतिभीतिर्न विद्यते ॥१७९॥
चन्द्रस्वरेक्षतत्त्वस्य[१], फलं तु कथितं मया ।
प्रातःकाले स्वरे चन्द्रे, जलतत्त्वं भवेद्यदा ॥१८०॥
सुभिक्षसमयस्तत्र, वर्षा सर्वत्र जायते ।
शान्तिः पुष्टिर्भवेद्दार्ढ्या, धर्मेरागोदृढोभवेत ॥१८१॥
भव्यस्वान्ते च ज्ञातव्यः, बाहुल्यं दानपुण्यके ।
जलं पृथ्वी च तत्त्वे द्वे, यदि सूर्यस्वरेच ते ॥१८२॥
समयोमध्यमस्तत्र, प्रातःकाल स्वरे फलम् ।
राजभङ्गः प्रजापीडा, नभस्तत्त्वं स्वरे यदा ॥१८३॥

१—क्षिति तत्वस्य ।

मध्यमवर्गद्वेषी च, पूर्ववाक्यानुसारतः ।
तत्त्वत्रयावशिष्टस्य, स्वरतत्त्वविचारणे ॥१८४॥
बहुदेशेषु दुष्कालं, संशयो नात्र जायते ।
सूर्यस्वरोऽग्नि तत्त्वं च, प्रातःकाले भवेद्यदि ॥१८५॥
रोगशोकादिकं सर्वं, सर्व जनेषु जायते ।
संक्लेशोऽप्यधिको ज्ञेयः,दुष्कालं च पतेद्ध्रुवम्॥१८६
सूर्येपावकतत्त्वं, चेन्नृपविग्रहता क्वचित्।
अल्पवृष्टिः प्रजायेत, अनिलतत्त्वयोगतः ॥१८७॥
प्रातःकाले च तद्दिने, सुषुम्ना यदि सञ्चरेत् ।
तदैव म्रियते दृष्टा, छत्रभङ्गश्च जायते ॥१८८॥
अन्नं स्तोकं च कुत्रचि, त्कुत्रचित्सर्वथा न हि ।
सुषुम्नायाः फलं ज्ञेयं, स्वरशास्त्रानुसारतः ॥१८९॥
स्वरतत्त्वसमालोके, इयं रीतिश्च वार्षिकी ।
अपरागे तु ज्ञातव्या, हृदये प्रेमभावतः ॥१९०॥
माघमासे च सप्तम्यां, वैशाखे च तृतीयके ।
प्रातःकाले च दृष्टव्यः, वर्षबीजं च भावतः॥१९१॥
तत्त्वे जले पृथ्व्यां चैव, चन्द्रस्वरः प्रविश्यते ।
तत्कालकृत व्यापारे,सर्वत्र स सुखी भवेत् ॥१९२॥

अपरे स्वरतत्त्वे च फलं, स्याद्धमं तथा ।
सिध्यति च फलं तस्य,मध्यमं निश्चयं भवेत्॥१९३॥
परीक्षा सर्वसद्भावे, मेषभावे बलीयसी ।
तद्दिने तत्त्वदृष्टव्ये, फलं ज्ञेयं दृढं हृदि ॥१९४॥
अद्यतने प्रदृष्टश्च, विचारः परिकथ्यते ।
स्वहृदि विलिख्य स्वान्ते,स्वरविचारतां भजेत्॥१९५॥
प्रतिपच्चैच शुद्धस्य, तत्र शशि स्वरो नचेत् ।
तदा तस्य त्रिमासेषु, अत्युद्वेगः प्रजायते ॥१९६॥
चैत्रमासे द्वितीयायां, चन्द्रस्वरश्च नो चलेत् ।
गतिस्तस्य विदेशो, स्याद्दुःखं तत्रैव जायते ॥१९७॥
चैत्रशुक्लतृतीयायां, चन्द्रस्वरस्य शून्यतः ।
पित्त ज्वरादिकं सर्वं, जायते नात्र संशयः ॥१९८॥
नवमासे च मृत्युः स्याद्यति,स्वरोऽपि ज्ञायते ।
चैत्र शुक्ल चतुर्थ्यां च,चन्द्र स्वरो न भासते॥१९९
नवमासे च मृत्युः, स्याद्दृष्टं च स्वरवेदिना ।
पञ्चम्यां तदभावेन, राजदण्डश्च जायते ॥२००॥
षष्ठ्यां चन्द्रस्वराभावे, वर्षमध्ये च तस्यवै ।
बन्धुमृत्युः प्रजायेत, दृष्टव्यं ज्ञानिना सदा ॥२०१॥

चन्द्रस्वरो न सप्तम्यां, प्रातःकाले च दृश्यते ।
म्रियते गेहिनी तस्य, विज्ञेयं स्वर ज्ञानतः ॥२०२॥
चन्द्रस्वरो न चाष्टम्यां,प्रातःकाले च दृश्यते ।
अत्यन्त दैहिकी पीडा,जायते च सुखं न हि॥२०३॥
चद्रः स्वरश्च दृश्येत, तदा शारीरिकं सुखम् ।
भाग्योदयस्य प्राबल्यं,वर्षपर्यन्त सौख्यकम् ॥२०४॥
अथ जनेन केनाऽपि, प्रश्न श्चागत्य तन्यते ।
चन्द्रस्वरे च कं पृथ्वीतत्त्वं, पूर्णं च दृश्यते ॥२०५॥
प्रश्नकर्त्तु स्तदा तस्य, कार्यसिद्धि प्रजायते ।
तेजोऽनिले च खं तत्त्वं,चन्द्रस्वरेषु दृश्यते ॥२०६॥
प्रश्नकर्त्तु स्तदा चैव, कार्यसिद्धिर्न जायते ।
पृथ्वीजलस्थिरे कार्ये, चन्द्रस्वरे प्रशान्तिके ॥२०७॥
चरकार्याय नो ज्ञेयं, इतिसर्व-व्यवस्थितम् ।
तेजोऽनिले च व्योमानि,चरकार्याय सन्ति वै ॥२०८॥
रोगिजनस्य प्रश्नं च, आगत्य केनचिद्यदि ।
तस्य श्वासविचारेण, उत्तरं प्रविधीयते ॥२०९॥

१—जलं ।

चन्द्रस्वरे चलेत्पृथ्वी, तस्यां दिशि च पृच्छयते ।
निश्चयतश्च तैर्ज्ञेयं, रोगी न म्रियते तदा ॥२१०॥
चन्द्रस्वरश्च बध्येत, सूर्यस्वरश्चलेत्तदा ।
वामपार्श्वे च रोगिणां,प्रश्ने जीवेन्न सर्वथा ॥२११॥
पूर्णस्वरेषु चागत्य, प्रश्नकाले स्वरो न चेत् ।
रोगिणां शान्तिता नैव, विद्यते लेशमात्रतः॥२१२॥
शून्यस्वरेषु चागत्य, प्रश्नः स्वरप्रचारणे ।
रोगी मृतो न विज्ञेयः,वर्तते सुखशान्तिना॥२१३॥
वातपित्त कफानाञ्च, त्रयाणां पिण्डता त्रयं ।
समताविग्रहे शान्तिः,विषमे रोगता भवेत् ॥२१४॥
चतुरशीतिकावार्ताः, पित्तस्य पञ्चविंशतिः ।
कफस्त्रयप्रकारश्च, द्वादशशतकं भवेत् ॥२१५॥
वायुनिश्वासनौदर्यं, तत्स्वामिको दिवाकरः ।
शतनाड्यां सदा, तिष्ठेत्कथितं स्वरवेदिना ॥२१६॥
स्कन्धे पित्तनिवासः स्यात्ज्जठराग्नौ च सञ्चरेत ।
दिवानाथः पतिर्ज्ञेयः,योगिभिः कथितं खलु ॥२१७॥
नाभिकमलतो, वामदिशि त्रिकरपल्लवे ।
कफस्य नाडियुग्मं वै,हृत्स्थितिकं च ज्ञायताम्॥२१८॥

चन्द्रपतिश्च तस्याः, स्यात्कथ्यते व्यवहारतः ।
निश्चयतः स्वलक्ष्ये, स्यात्स्थीयन्ते त्रिकनाडिकाः २१६
त्रयाणां स्वीय स्वीयर्त्तौ, वातपित्तकफात्मनाम् ।
ज्ञापयन्ति बलं देहे, तस्यारोपश्च तन्यते ॥२२०॥
स्वकर्त्तव्यं च विस्मृत्य, अन्यगृहेषु गम्यते ।
कफाद्युद्रेकता रोगः, सन्निपाते न जायते ॥२२१॥
पादोनं च द्विरोगाश्च, प्रतिरोम भवन्ति वै ।
अशुभोदययोगे च, विपाकेन विपच्यते ॥२२२॥
स्वतत्त्वं स्वस्वरे चैव, देहेचलेच रोगिणाम् ।
एक रोगोदयो ज्ञेयः, स्थिरचित्तेन ज्ञानिना ॥२२३॥
एक स्वरे द्वितीयस्य, स्वरस्य च प्रकाशता ।
प्रश्नश्वर्त्तुर्मनुष्यस्य, रोगाणां बहुलं भवेत् ॥२२४॥
पूर्णस्वरेण चागत्य, पूर्णस्वरेषु पृच्छयते ।
सर्वसंसारिकार्यस्य, ज्ञेया सम्पूर्णता तदा ॥२२५॥
शून्यस्वरेणचागत्य, शून्यश्चारेण पृच्छयते ।
यद्यच्चिन्तितकार्यं, तन्नहि सिध्येत्कदाचन ॥२२६॥
शून्यस्वरेण चागत्य, वहत्स्वरेण पृच्छयते ।
तस्य कार्यस्य सिद्धिर्वै, ज्ञेया नैवात्र संशयः ॥२२७

पूर्णस्वरेण परित्यज्य, शून्यस्वरेण पृच्छयते ।
तस्यकार्ये च नैष्फल्यं, न साफल्यं कदाचन ॥२२८॥
वायुर्गुरौ च श्रेष्टः स्या, द्व्योमशनिश्चरे शुभम् ।
एतद्द्वये च सञ्चारे, पूर्वरोगो विनश्यति ॥२२९॥
प्रातःकाले च सौम्ये वै, क्षिति तत्त्वं शुभं मतम् ।
पुष्करं सोमवारे च शुक्रे, तेजः सुसम्मतम् ॥२३०॥
चन्द्रसूर्यस्वरे कार्य, कर्त्तव्यं कथ्यते मया ।
नूतनजैनप्रासाद, खातक्षणे स्वरो विधुः ॥२३१॥
तद्योगेऽमृतता भावः, स्थिरारुणद्युतिर्भवेत् ।
बिम्बस्य प्रतिष्ठाकारे, प्रभावश्चाति जायते ॥२३२॥
मूलसिंहासने देव, स्थिरीकरणकालिके ।
जिनगृहेषु कुम्भस्य, चारोहे चन्द्रता शुभम् ॥२३३॥
पौषधशाल कर्त्तव्ये, दानशाला गृहापणे ।
प्रासाददुर्ग प्राकारे, संघमाला विधापके ॥२३४॥
तीर्थयात्राप्रदाने वै, दीक्षाऽऽदाने तथैव च ।
चन्द्रयोगः सुखाकारी, मन्यते जैन शासने ॥२३५॥
नूतनगृहपुर्यां च, प्रवेशो प्रथमे तथा ।
वस्त्राभूषणताऽऽदाने, योगाभ्यासे कृते खलु ॥२३६॥

औषधाराम कर्त्तव्ये, नृपमैत्रिकृते च वै ।
राजतिलककर्त्तव्ये, प्राकारे प्रविवेशने ॥२३७॥
राज्यसिंहासनाऽऽरोहे, अन्यस्मिन्स्थिरकार्यके ।
चन्द्रयोगः शुभोज्ञेयः,स्थिरकार्ये च लाभकृत्॥२३८॥
सूर्यस्वरे च कर्त्तव्ये, कार्यं परिनिगद्यते ।
विद्याध्ययनध्याने च, देवाराधनमंत्रके ॥२३९॥
अरीणां जयकर्त्तव्ये, विषभूतस्य कर्षणे ।
रोगिणामौषधाऽऽदाने,विघ्ननाशक कार्यके ॥२४०॥
गजाश्ववाहने चैव, अशनपानस्नानके ।
लिखने नूतने ग्रन्थे, ऋतुदानादिके किल ॥२४१॥
युद्धार्थं गमने राज्ञां, समरे च यशस्करे ।
प्रयाणकालिके कार्ये,गन्तव्ये वाञ्छिते द्वीपे॥२४२॥
कार्यञ्च सफलं कृत्वा, क्षिप्रमायाति मन्दिरे ।
सूर्ययोगे च तत्सर्वं,सफलं स्यान्न संशयः॥२४३॥
चरकार्ये च कर्त्तव्ये, सूर्ययोगःशुभो मतः ।
लाभालाभौ समालोच्य,कर्त्तव्यं क्रियतां सदा॥२४४॥
सौम्यकार्ये विधोर्योगः, सूर्ययोगः क्रूरे शुभः ।
सुषुम्ना चलने कार्यं,कर्त्तव्यं नैव किञ्चन ॥२४५॥

आग्रहेणैव कर्त्तव्ये, हानिर्भवति निश्चिता ।
दुःखदौर्भाग्य पीडां,च लभेत नात्र संशयः॥२४६॥
श्वासशीघ्रपरावर्त्तौ, क्षणे चन्द्रः क्षणे रविः ।
सुषुम्ना स स्वरोज्ञेयः,स्वरज्ञानं चिकीर्षता॥२४७॥
सुषुम्ना स्वर सञ्चारे, आत्मध्यानं विधीयते ।
आत्मतत्त्व परामर्शे,संसारेऽलिप्तता भवेत् ॥२४८॥
तत्त्वस्वरूप ज्ञातव्ये, उपायस्तु प्रकाश्यते ।
भावौ शुभाशुभौ तस्य,हृदयेऽधिकसम्मतौ॥२४९॥
चरस्थिरप्रवक्तव्ये, तृतीया द्विस्वभावजा ।
वार्त्ताऽपि कथिता ज्ञेया,सुषुम्ना स्वरसम्भवा।२५०।
द्व्यंगुष्टाभ्यां च करणे द्वे तर्जनीभ्यां तु चक्षुषी ।
मध्यमाभ्यां च घ्राणे द्वे,पराभ्यां चाधरौ स्मृतौ।२५१।
आच्छाद्य भ्रकटौ श्वान्तं, नेयं च गुरुयोगतः ।
यद्रङ्गयुक्तविन्दुश्च, पतति भ्रकुटौ किल ॥२५२॥
तादृशो वर्णो विज्ञेयः,रक्तः श्वेतो हरित्पीतः ।
श्यामश्चेत्यभिधेयंतद्,विन्दुरूपेण ज्ञायताम् ।२५३।
प्रथमो वायु सञ्चारः,द्वितीयोग्निश्च सम्मतः ।
तृतीया भूश्च ज्ञातव्या, तूर्यं ज्ञेयं जलं तथा ।२५४

आकाशः पञ्चमं तत्त्वं, स्वर उत्थान बोधकम् ।
पिंगलायां वहेच्चैव, सङ्क्रमः प्रणिगद्यते ॥२५५॥
पृथ्वीजले शुभे ज्ञेये, अग्निश्च मध्यमो मतः ।
वायुर्हानिप्रदोज्ञेयः, आकाशं मृत्युदं मतम् ॥२५६॥
ऊर्ध्वं मृत्युरधः शान्तिः,उच्चाटनं तिरश्चीनम् ।
मध्ये च स्तम्भनं ज्ञेयं, वर्जितोपायता रवौ ॥२५७॥
जंघायां भूश्च विज्ञेया, नाभ्यामनिलतामता ।
अग्नि तत्त्वंतु स्कन्धे,स्यान्नभस्तु मस्तके मतम्॥२५८॥
स्थिरकार्यें प्रधाना भूः, चरे जलं विचार्यताम् ।
अग्निश्च समकार्येस्या, द्वायुरुच्चाटने मतः ॥२५९॥
व्योमसञ्चलने कार्यं, कर्त्तव्यं न कदाचन ।
ध्यानयोगे हि चाभ्यासरीतिश्च कथिता मया॥२६०॥
पश्चिम दक्षिणे चैव, भूजले चैव तत्त्वके ।
प्राधान्यमुत्तरस्यां वै, पूर्वस्यां वातता मता ॥२६१॥
स्थिर स्थानं च व्योमैव, दिशातत्त्वस्य ज्ञायताम् ।
भूजले कार्यसिद्धिः,स्यादग्नौ मृत्युर्विचार्यताम्॥२६२॥
क्षयकारी प्रवातःस्यान्नभो, निष्फल रूपकं ।
शनैः सिद्धिः क्षमायां च,जलं तत्कालसिद्धिदम्॥२६३

अग्निवाय्वोश्च हानिः,स्यात्कार्यं नभसि निष्फलम् ।
रणकार्ये बली वह्निः, भूजलयोश्च संग्रहे ॥२६४॥
जीवितविजयालाभे, मित्रार्थयुद्धसङ्कटे ।
गमनागम कार्ये च, ज्ञेया सर्वोत्तमा मही ॥२६५॥
कलहशोकभावेषु, मरणोत्पात संक्रमे ।
वायोः फलं च विज्ञेयं, प्रसिद्धं स्वरयोगतः ॥२६६॥
राजनाशोऽग्नि तत्त्वे च, दुर्भिक्षं च क्षमाजले ।
रोगादयश्च विज्ञेयाः, तत्तत्त्वस्यैवचारके ॥२६७॥
दुर्भिक्षघोरसंक्लेशौ, देशभङ्गभयादिकम् ।
अनिलाकाशतायां च, चतुष्पदविनाशता ॥२६८॥
महेन्द्रवरुणे योगे, वृष्टिर्घनस्य जायते ।
राजवृद्धिः प्रजासौख्यं, कालश्च सुखदो मतः॥२६९॥
पृथिवीजलतत्त्वे च, चन्द्रस्थानं स्थिरंमतम् ।
तयोः फलं शुभं ज्ञेयं, अनुपमं च सर्वदा ॥२७०॥
पृथिव्यां बहुपादाःस्युः, जलवाय्वोर्युगौ पदौ ।
चतुष्पदाश्चवह्नौस्युः, आकाशं पादहीनकम्॥२७१॥
रविस्वर्भानुभौमत्वं, शनिसौरीशस्वामिनः ।
पञ्चतत्त्वस्य ज्ञातव्याः, सूर्यस्य परिकीर्त्तिताः ॥२७२॥

बुधौ भूमिपतिर्ज्ञेयः जलस्य शशि सम्मतः ।
अग्नेःपतिर्मतः शुक्रः, वायुर्गुरुश्च चान्द्रके ॥२७३॥
जय तुष्टिश्चपुष्टिश्च, रतिः क्रीड़ा च हास्यता ।
षडैवचन्द्रदशा ज्ञेया, पृथ्वीजलस्य सन्निधौ ॥२७४॥
ज्वरनिद्रा प्रयासाश्च, चतुर्थं कम्पनं मतम् ।
चन्द्रस्य वै दशा ज्ञेयाः, अग्निर्वायुश्चत्तत्वके॥२७७॥
गतायुः प्रथमे ज्ञेयं, मृत्युर्ज्ञेयं द्वितीयके ।
नभस्तत्व प्रसंगेन, चान्द्रस्य द्वादशीमता ॥२७६॥
मधुकषायताः तिक्ताम्लानि रसाश्चा कीर्त्तिता ।
पञ्चमोऽव्यक्तरूपश्चा, अनुक्रमेण दृश्यते ॥२७७॥
यादृशरसताऽऽस्वादे, प्रीतिर्मनसि जायते ।
तादृक्तत्वं चा ज्ञातव्यं, शङ्कायाः समयोनहि ॥२७८॥
धनिष्ठाः श्रुति रोहिण्याः,पृथिव्याबीजरूपकम्॥२७६॥
मूलोत्तरा भद्रा चैव, शतभिषक् चा दयार्द्रना ।
पूर्वाषाढा चा वाऽश्लेषा, जलस्य स्थानरूपकम्॥२८०॥
हस्तविशाखता चित्रा, मृगशिराः पुनर्वसुः ।
उत्तराःफाल्गुनी चैव, अश्विनी वातबोधिका ॥२८१॥

नभसः पवनं तस्मा, त्पावकं च जलं ततः ।
ततो भुवश्च प्राकाशः,ज्ञायते स्वर योगतः ॥२८२॥
अग्न्युदये क्षुधाद्यश्च, इच्छा वायूदये सति ।
क्षान्त्यादिकं च वै, श्वान्ते चोदय जलभूमिके॥२८३
पूर्वाफाल्गुनिकामाघम्, पूर्वाभाद्रपदा तथा ।
कृतिका भरणीपुष्यमग्नेः सप्तक भानि च ॥२८४॥
गुदाधारो क्षमा चैव, लिङ्गाधारश्च पानीयम् ।
चाक्षुराधारता तैजे, घ्राणाधारश्च वातकः ॥२८५॥
श्रवणाधारमाकाशं, निहाराः पञ्चकीर्त्तिताः ।
चान्द्रस्वरेच सञ्चारे, युद्धार्थं नैव गम्यते ॥२८६॥
चलने तत्र शत्रूणां, जयो भवति निश्चयात् ।
सूर्यस्वरस्य सञ्चारे, युद्धार्थं परिगम्यते ॥२८७॥
समये विजयः स्वस्य, जायते नात्र संशयः ।
सूर्यस्वरः स्वकीयश्च, शत्रूणामपि सैव च ॥२८८॥
प्रथमस्तत्र यो याति, जयस्तस्यैव जायते ।
शशिस्वरे च सञ्चारे, सङ्ग्रामे नैव गम्यते ॥२८९॥

१—श्रवण । २—भाद्रपदा । ३—आदि पदेन रेवती ।
४—मघा ।

स्वस्य पराभवो ज्ञेयः, शत्रूणां विजयो भवेत् ।
दूरदेशे च संग्रामे, चन्द्रस्वरः शुभो मतः ॥२६०॥
निकटदेशसंग्रामे, सूर्यस्वरश्च सुन्दरः ।
संग्राम विषये प्रश्नाः,स्वरशास्त्रे निरूपिताः ॥२६१॥
गर्भविषयमादाय, काचिद्विचारता खलु ।
श्रूयतां सावधानेन, स्वरशास्त्रानुसारतः ॥२६२॥
क्लीबकन्याप्रसूत्यादि, गर्भपतनकादीनाम् ।
दीर्घस्वल्पायुषां चैव, विचारः परितन्यते ॥२६३॥
चन्द्रस्वरे च सञ्चारे, आगत्य पूर्ण[illegible]तः ।
गर्भवत्याः कृते प्रश्ने,कन्येति परिकथ्यताम् ॥२६४॥
सूर्यस्वरे च संचारे, पूर्णदिशि प्रपृच्छने ।
गर्भे पुत्रो विज्ञातव्यः, संशयो नैव विद्यते ॥२६५॥
सुषुम्ना स्वर सञ्चारे, गर्भ विषय प्रश्नके ।
गर्भे नपुंसको ज्ञेयः,गर्भ प्रश्नार्थिना खलु ॥२६६॥
चन्द्रस्वरे च पृष्टव्ये, ज्ञातुः सूर्यस्वरोमतः ।
पुत्रजन्मविज्ञातव्यः,किन्तु स नैव जीवति ॥२६७॥
सूर्यस्वरे कृते प्रश्ने, तस्य सूर्यस्वरस्तथा ।
सुखदायी सुतो ज्ञेयः, संशयो नैव जायते ॥२६८॥

चन्द्रस्वरे कृते प्रश्ने, तस्य सूर्यस्वरो भवेत् ।
पुत्री चोत्पद्यते तस्य, सा जीवेन्न कदाचन ॥२९९॥
चन्द्रस्वरस्तयोर्द्वयोः, प्रश्नक प्राश्निकेषु च ।
कन्या निश्चयतो ज्ञेया,दीर्घायुः साऽपि भुज्यते॥३००॥
भूमातत्त्वे च ज्ञातव्ये, प्रश्नकर्त्तुर्नरस्यवै ।
सन्मानं राजद्वारा स्याद्रूपे, देवकुमारवत् ॥३०१॥
जलतत्त्वे समागत्य, प्रश्नः केनापि तन्यते ।
धनवांश्च सुखीपुत्रः, भोक्ता षड्रसवस्तुनः ॥३०२॥
अग्नितत्त्वे कृते प्रश्ने, गर्भपतनता भवेत् ।
यदि च जायते जन्म, जीवेन्नहि स सर्वथा ॥३०३॥
वायुतत्त्वे कृते प्रश्ने, गर्भोगलति वै तदा ।
प्रश्नकरणकाले च, यदि छाया च विद्यते ॥३०४॥
व्योमतत्त्वे च पृष्ठव्ये, गर्भो नपुंसको भवेत् ।
चलचन्द्रेतु कन्यास्यात् ,वन्ध्यात्व दोषसंयुता ॥३०५॥
चन्द्रसूर्यस्वरे चारे, यदि चन्द्रवली भवेत् ।
गर्भवत्याश्च गर्भे वै, कन्यायुग्मं च जायते॥३०६॥
चन्द्रसूर्यस्वरे चारे, यदि रविर्वली भवेत् ।
गर्भवत्याश्च गर्भे तु, पुत्रस्तस्य युग्मकम् ॥३०७॥

स्त्री गर्भाधानके तत्त्वं, यद्वा शुभाशुभं भवेत् ।
तस्यफलं क्रमेणैव, विज्ञेयं शास्त्रयोगतः ॥३०८॥
जातो गर्भः क्षमातत्त्वे, सन्मानं लभते सदा ।
स्वयं सुखी च राजा,स्यात्कर्त्तव्यो नैव संशयः॥३०६॥
गर्भाधाने च के[1] तत्त्वे, पुण्ययोगेन चेद्यदि ।
धनी भोगी सदाचारी, दारकः स्याद्विचक्षणः॥३१०॥
गर्भाधानं च वह्नौस्यादल्पायुष्कसुतो भवेत् ।
विद्यते जीवने दुःखं,तन्माता म्रियतेऽथवा ॥३११॥
गर्भाधानं च वायौ स्याद्, दुःखी देशान्तरे खलु ।
बुद्धिहीनं मनस्तस्य, जायते वायुयोगतः ॥३१२॥
गर्भाधाने नभस्तत्त्वे गर्भस्यैव च हानिता ।
तत्त्वे जन्मफलंवच्मि, अनुक्रमेण ज्ञायताम् ॥३१३॥
पृथ्वीतत्वे सुतो ज्ञेयः, जलतत्वे सुता मता ।
गर्भौ वाताग्निवायूनां, गगने क्लीबरूपता ॥३१४॥
स्व स्व स्वरे च कर्त्तव्ये, प्राधान्यं परिज्ञायताम् ।
संक्रमसमये प्रश्ने,स्थितेऽपि नाशता भवेत् ॥३१५॥

१—जले ।

विदेशागमने कार्ये, विचारः क्रियते खलु ।
दक्षिणपश्चिमादिक्षु, चन्द्रयोगो बलीमतः ॥३१६॥
विदेशे सुखता प्राप्तिः, आगच्छेच्छान्तितो गृहे ।
दिशिपूर्वोत्तरस्यां च, सूर्ययोगे न गम्यते॥३१७॥
योग इच्छाप्रदो ज्ञेयः, कथितः स्वरवेदिना ।
स्वीय स्वीय विदिक्षुवै, दिगनुसारजंफलं[१] ॥३१८॥
चन्द्रस्वरे च संचारे, पूर्वोत्तरा निषिध्यते ।
गमनागमनं चैव, पीड़ाऽथवा प्रजायते ॥३१९॥
दक्षिणपश्चिमायां च, भानुयोगे न गम्यताम् ।
गमने म्रियते तत्र, किंवा मृत्युसमंफलम् ॥३२०॥
दूरविदेशगन्तव्ये, योगेप्रबलता भवेत् ।
निकटदेश गन्तव्ये, मध्यमो योगशान्तिदः॥३२१॥
पृथ्वीजलं च तत्वयुग्, प्रयाणप्रश्नके शुभम् ।
अन्यानि चैव तत्वानि, मन्यतामशुभानि च ॥३२२॥
ऊर्ध्वदिशापतिश्चन्द्रः, अधोदिशापती रविः ।
क्रूरसौम्याकृतिं ज्ञात्वा,गतिभावश्च ज्ञायताम्॥३२३

१—दिगनुसारेण शुभाशुभं ।

विदेशनरप्रस्तावे, प्रश्नः केनापि तन्यते ।
सुखदुःखजिज्ञासायां, उत्तरं च विधीयते ॥३२४॥
जलतत्वं भवेद्यत्र, वक्तव्यं दृढतस्तदा ।
कार्यसिद्धिं च कृत्वा,वै आयाति शीघ्रतः सुखम् ॥३२५
पृथ्वी तत्वे च पृष्टव्ये, वक्तव्यं स्थिरता तदा ।
दुःखलेशो न विद्येत, ज्ञातव्यं भूमि योगतः॥३२६॥
वायुतत्वे कृते प्रश्ने, परित्यजति केतनम् ।
परस्थाने गतो ज्ञेयः, चिन्ता तस्यैव जायते ॥३२७॥
अग्नितत्वे रुजः पीडा, नभो मृत्युं प्रकाशते ।
अतस्तत्वं परिज्ञाय, सर्वकार्यं प्रतन्यते ॥३२८॥
सूर्ये विषमपादाश्च, चन्द्रे समपदा मताः ।
वारतिथि प्रकाराणां, ज्ञातव्या दृश्यते स्थितिः[१]॥३२९
चन्द्रेऽग्रे वामपादाश्च, ध्रियन्ते चत्वारः सदा ।
गमनकाले ज्ञेयं, लाभस्तत्र प्रजायते ॥३३०॥
सूर्यस्वरेऽभिदक्षिणान्, पादान्धृत्वा च वै चलेत् ।
गतिकार्यं विधेयं च, तत्र सफलता भवेत् ॥३३१॥

१—पद्धति ।

स्वरं, विज्ञाय कर्त्तव्ये, कार्यं कुशलता सदा ।
अन्यथा मूढवत्कार्यं,सम्मूर्छिमं च सम्मतम् ॥३३२॥
तिथिवार नक्षत्राणां, योगस्यकरणे खलु ।
दिक्छूलतिथिदग्धानां, व्यतिपातकवस्तूनाम् ॥३३३
शुक्रास्तयोगिन्याश्चैव, यमघण्टादिवस्तूनाम् ।
सञ्ज्ञाश्चापयोगानां, स्वरज्ञाने न विद्यते ॥३३४॥
विज्ञेयं स्वरविज्ञानं, मानसे गुरुयोगतः ।
सरोहि चोदकं नाना, शोभानैव समर्प्यते ॥३३५॥
देवकुलं बिना देवं, विना चन्द्रं विभावरी ।
साधवश्च तपो हीना, तपोऽपि समतां विना॥३३६॥
यथैव ते न शोभन्ते, तथैवात्रावधार्यताम् ।
विनैव स्वरविज्ञानं, योगीन्द्रो नैव शोभते ॥३३७॥
न भवेत्साधनं नाना, स्वरज्ञानं च पूर्णकम् ।
अतो गुरुगमाद्यं च, पूर्णसाधनकारणम् ॥३३८॥
दक्षिण स्वरभुक्तिश्च, वामतः पीयते जलम् ।
शयनं वामपार्श्वे, स्यान्नायाति तनुरोगता ॥३३९॥

१-पृथक पृथक २—बिना ।

चन्द्रस्वरे च सञ्चारे, भोजनं च वितन्यते ।
सूर्यस्वरे पयः पाने, नायाति तनु रोगताम् ॥३४०॥
अजीर्णे भुक्ति भुञ्जाने, स्त्रीभुक् च बलहीनके ।
अपथ्य पथ्य कर्त्तव्ये, नेत्रहानिश्च जायते ॥३४१॥
पञ्चसप्तदिनादौ च, स्वरेषु विपरीतता ।
विज्ञेया विग्रहे पीडा, स्वरज्ञानानुसारतः ॥३४२॥
स्थण्डिले इङ्गला ज्ञेया, लघुनीत्यां च पिङ्गला ।
पूर्वदिशासु शायं च,प्रतिदिनं हि सम्मतम्॥३४३॥
दिवसे चन्द्सञ्चारे, रात्र्यां सूर्यस्वरे तथा ।
अभ्यासे तादृशो कार्ये, आयुः पूर्णं तु भुज्यते॥३४४॥
विपर्यासे च सञ्चारे, फलं स्वरस्य ज्ञायते ।
समीपे चागतं मृत्युः; तत्र किंचिन्न संशयः॥३४५॥
द्विघटिका च ह्यध्यर्धा, चन्द्र सूर्यस्वरौ मतौ ।
त्रयोदशात्र स्वासा स्युः,सुषुम्ना स्वरचालने ॥३४६॥
अष्टौ प्रहरपर्यन्तं, भानुस्वरो निरन्तरम् ।
यदि चलेत्तदा ज्ञेयं, आयुष्कर्म त्रिवार्षिकम् ॥३४७॥
चान्द्रश्च पिङ्गलायाश्च, षोडश प्रहरावधि ।
यदि भवति सञ्चारः,आयुस्तदा द्विवार्षिकम्॥३४८॥

सूर्यो निरन्तरं गत्या, त्रिरात्रिदिवसं चरेत्।
ज्ञाते आकाशतत्वे च, आयुवर्षमितंमतम् ॥३४९॥
चतुर्दिवसपर्यन्तं, आकाशं सञ्चलेद्यदि ।
शरीरे स्थिरता ज्ञेया,उत्कृष्टा मासषट्ककम् ॥३५०॥
सूर्यस्वरंनिरन्तर्यं, त्रिरात्रिदिवसं चलेत् ।
आयुर्वर्षमितं ज्ञेयं, दीर्घनिद्रां ततो भजेत् ॥३५१॥
षोडशदिवसं सौर्यं, स्वरं चलेन्निरन्तरम् ।
एकमासिकमायुश्च, अवश्यं म्रियते ततः ॥३५२॥
निरन्तरं वहेच्छ्वासं, सूर्यस्वरं कुयोगतः ।
द्विदिनजीवनं ज्ञेयं, अधिकं न हि कुत्रचित् ॥३५३॥
निरन्तरं सुषुम्ना वै, घटिका पञ्च सञ्चलेत् ।
तत्कालमरणं ज्ञेयं, कथितं ज्ञानभानुना ॥३५४॥
चन्द्रसूर्यौ न विद्येते, सुषुम्नापि च नो भवेत् ।
मुखाच्छ्वासस्य सञ्चारे,चत्वारो घटिकास्थितिः॥३५५
चन्द्रस्वरो दिने चैव, रात्रौ सूर्यस्वरो भवेत् ।
मन्तव्यमितिदीर्घायुः, स्वरयोगप्रधानतः ॥३५६॥
सूर्यस्वरो दिने चैव, रात्रौ चन्द्रस्वरोभवेत् ।
जीवितं मासषट्कंच, अग्रे चाशा न विद्यते॥३५७॥

द्वादशाचतुरष्टौ च, षोडषविंशतिदिनाः ।
चन्द्रस्व य संचारे, आयुस्तत्र निगद्यते ॥३५८॥
दीर्घायुस्तस्य विज्ञेयं, कर्त्तव्यः संशयो नहि ।
दिवसत्रयपर्यन्तं, चलेत्तत्वं नभोयदि ॥३५९॥
जीवति वर्षपर्यन्तं, अधिकं नैव विद्यते ।
एवं रीत्या च सर्वत्र, सर्वदा जीवितंमतम् ॥३६०॥

प्रोक्तं श्राद्धविधौः—

ऊर्ध्वं वह्निरधस्तोयं, तिरश्चीनः समीरणः ।
भूमिर्मध्यपुटे व्योम, सर्वाङ्ग वहते पुनः ॥३६१॥
वायुं वह्नि जलं पृथ्वीं, व्योमतत्वं वहेत्क्रमात् ।
वहत्योरुभयोर्नाड्योः,ज्ञातव्योऽयं क्रमःसदा ॥३६२॥
पृथ्व्याः पलानि पञ्चाशच्च,त्वारिंशत्तथाऽम्भसः ।
अग्नेः त्रिंशत्पुनर्वायोः, विशतिर्नभसोदश॥३६३॥
तत्त्वाभ्यां भूजलाभ्यां,स्याच्छान्ति कार्ये फलोन्नतिः।
दीप्ता स्थिरादिके कृत्ये,तेजोवाय्वम्बरैः शुभम्॥३६४
जीवितव्ये जये लाभे, शस्योत्पत्तौ च वर्षणे ।
पूजार्थे युद्धप्रश्ने च, गमनागमने तथा ॥३६५॥

भूकेतत्वे शुभे स्यातां, वह्निवातौ च नो शुभौ ।
अर्थसिद्धिः स्थिरोर्व्यां च,शीघ्रमम्भसि निर्दिशेत् ३६६
पूजाद्रव्यार्जनोद्वाहे, दुर्गादि सरिदागमे ।
जीविते शुभ कार्यादौ गृहक्षेत्रादि संग्रहे ॥३६७॥
क्रयविक्रयणे वृष्टौ, सेवाकृषिद्विषत्क्षये ।
विद्यापट्टाभिषेकादौ, शुभार्थे च शुभःशशिः ॥३६८॥
प्रश्ने प्रारम्भणे चापि, कार्याणां वामनाशिका ।
पूर्णवायुः प्रवेशश्चेत्तदा, सिद्धिरसंशया ॥३६९॥
बद्धानां रोगमुक्तानां, स्वपदाद्भ्रष्टजन्तूनाम् ।
प्रश्ने युद्धविधौ वैरि, संग्रामे सहसा भये ॥३७०॥
स्थाने पानेऽशने नष्टान्वेषणे सुतकार्यके ।
विवाहे दारुणे कार्ये, सूर्यनाडिः प्रशस्यते ॥३७१॥
विद्यारम्भे च दीक्षायां, शस्त्राभ्यास विवादके ।
राजदर्शनगीतादौ, मन्त्रतन्त्रादि साधने ॥३७२॥
योगदर्शनकार्याय, आन्तर साधनादिके ।
दक्षिणे यदि वा वामे, यत्र वायुर्निरन्तरम् ॥३७३॥
चन्द्रस्वरो यदि स्यात्चे, दुदधिसुतवासरे ।
सूर्येरविश्च जायेत तदा, तु सर्वथा सुखम् ॥३७४॥

तं पादमग्रतो दत्वा, निःसरेन्निजमन्दिरात् ।
अधर्म वैरि चौरादि, विग्रहो न भवेत्कदा ॥३७५॥
चन्द्रस्वरे चतुःपादान्, चाग्रेधृत्वा च वामतः ।
सूर्यस्वरे त्रिपादांश्च, धृत्वाग्रे चैव गम्यताम्॥३७६॥
स्वजनस्वामि गुर्वाद्याः, ये चान्ये हितचिन्तका ।
जीवाङ्गे ते ध्रुवं कार्या,कार्यसिद्धि च काङ्क्षिणा॥३७७
तिथिवार नक्षत्राणि,दिक्छूलं कृति[१] योगतः ।
व्यतिपातश्च दग्धादि, यमघण्टादिकं यथा ॥३७८॥
अपयोगादिकानाञ्च, न स्यात्प्रवेशता स्वरे ।
सदा स्वरस्य प्राधान्यं,न योगकरणा दीनाम्॥३७९॥
विनोदकं तडाकं न, सरो हंसं विना न हि ।
तरुः छायां विना नैव,शोभां न लभते कदा॥३८०॥
तपो बिना मुनिर्नैव, तपश्च समतां विना ।
स्वरज्ञानं बिना योगी,शोभते न कदाचन ॥३८१॥
स्वराणां साधनं नाना, पूर्णज्ञानं भवेन्नहि ।
साधनं गुरुयोगाच्च, प्राप्तव्यं सर्वदा जनैः ॥३८२॥

१—करण ।

दिने चन्द्रस्वरश्चैव, निशायां च चलेद्रविः ।
अभ्यास स्तादृशो यस्य, पूर्णायुस्तस्य सर्वथा॥३८३॥
त्रिरात्रिदिनपर्यन्तं, व्योमतत्त्वं च सञ्चरेत् ।
जीवनं वर्ष पर्यन्तं, तत्पश्चाच्च विपद्यते ॥३८४॥
चतुर्दिनस्य पर्यन्तं, व्योतत्त्वं च सञ्चलेत् ।
आयुः षाण्मासिकं ज्ञेयं, दीर्घनिद्रा ततः परा ॥३८५॥
लघुनीति बृहन्नीत्योः, वायुश्च युगपत्स्रवेत् ।
दशदिवसपर्यन्तं, जीवनं तस्य निश्चितम् ॥३८६॥
एक पक्षत्व पर्यन्तं, विपरीतः स्वरश्चलेत् ।
रोगोत्पत्तिश्च देहेस्या, उज्ञातव्या स्वरवेदिना॥३८७॥
निकट मृत्युकालं वै, ज्ञात्वा च तत्वज्ञानिना ।
आत्मसाधन बाहुल्यं, कर्त्तव्यमप्रमादिना ॥३८८॥
धनबुध्या कुलाचारं, जानन्ति दुष्टबुद्धयः ।
वस्तुस्वभाव सद्धर्मं, जानन्ति विरला जनाः॥३८९॥
तत्वं सुवर्णरूप्यादिं, कथ्यते गृहिना सदा ।
स्वद्रव्यगुणपर्यायं, मन्यन्ते ज्ञानिनः खलु ॥३९०॥
स्त्रीनरभोग क्रीडां वै, कामं गदन्ति कामिनः ।
गुणाभिलाषकामंतु, ज्ञानिना वस्तु कथ्यते ॥३९१॥

देव लोकादि भोगं तु, मन्यते मन्दधीः शिवम् ।
भावबन्ध परिमुक्तं, गदति ज्ञानिनः शिवम् ॥३६२॥
एक समयमात्रं च, कार्याप्रमादता न हि ।
धर्मसाधनभावेषु, ज्ञानिना तु विशेषतः ॥३६३॥
शिरसि कालचक्रं च, भ्रमति सर्वदा खलु ।
प्रतिक्षणं च जीवानां, आयुर्नश्यति पश्यताम्॥३६४॥
अस्थिररूपसंसारः, शरीरमस्थिरंमतम् ।
सम्पत्तिरस्थिरा ज्ञेया, यौवनमपि नो स्थिरम्॥३६५॥
सन्ध्याँ रागसमानं, तद्वनयौवनसम्मतम् ।
पदार्थाः सकला ज्ञेयाः,बाह्याश्च स्वप्नसन्निभा॥३६६॥
ममेदं मम सर्वं च, कर्त्तव्यं सर्वथा न हि ।
त्वदीयं तु न किञ्चित्स्यात्संसारे स्वप्नसन्निभे॥३६७।
त्वदीयं तव पार्श्वेऽस्ति, बाह्यं तव न विद्यते ।
ममेदं च ममेदं वै, कथं मूढः प्रघोषयेः ॥३६८॥
ममेदं च ममेदं च, वैकारिकैः प्रजल्प्यते ।
आत्मार्थिनां च नो,किञ्चित्संसारे परिविद्यते॥३६९॥
हृदिचेज्ज्ञान सूर्यःस्या, द्वैराग्यं चन्द्रसन्निभम् ।
तत्समी पेच मिथ्यात्व,तमः किञ्चिन्न जन्यते॥४००॥

एव स्वरूपश्च स्वान्ते, हि विलोकन्ते च वै जनाः ।
तेषां भवभयं नैव, विद्यते च कदाचन ॥४०१॥
समभावः सदा येषां, निर्ममताऽपि सर्वदा ।
समीपे समता तेषां, निवासः क्रियते सदा॥४०२॥
किञ्चिन्न बन्धनं तेन, बध्यते साम्परायिकम् ।
परपरिणतिस्त्याज्या, परसङ्गश्च सर्वथा ॥४०३॥
कञ्चुकी त्यागतः सर्पः, सर्पत्वं नैव मुञ्चति ।
तथा देहस्य संत्यागे,नोज्झति जीवतां जीवः॥४०४॥
उत्पद्यते पदार्थो यः, स पदार्थो न त्वं खलु ।
विनश्यसि न त्वं चैव, न लघु न महानपि ॥४०५॥
त्वयि न रूपवस्तुत्वं न, जातिन कुलंहितत् ।
न राजा न चरं कोऽपि,न रोगी नैव शोकवान्॥४०६॥
सर्वस्मिन्त्वं सदा चासि,भिन्नोऽसि सर्वदा तथा ।
अवक्तव्यः स्वरूपोऽसि, सच्चिदानन्दरूपकः॥४०७॥
मृत्युजन्मजरा नैव, ईतिर्भीतिर्न विद्यते ।
कस्यचिच्च नरेन्द्रस्य, यत्राज्ञा सर्वथा नहि ॥४०८॥
सदेशः स्वस्य विज्ञेयः, अन्यः परश्चज्ञायते ।
तत्रगन्तुं जिज्ञासा, चेदन्यत्सर्वं परित्यजेत् ॥४०९॥

नश्वरशील भावेषु, आशां कर्त्तुं न युज्यते ।
स्वयं रङ्कश्च नो चान्यं,ईश्वरी कर्त्तुमीश्वरः॥४१०॥
विनाशि पुद्गला ज्ञेयाः, अविनाशीत्वमेवहि ।
स्वयमेव हि स्वस्मिंश्च,विचारः क्रियते खलु॥४११॥
सुवर्णनिगडं पुण्यं, पापं लौहमयं मतम् ।
पुण्यपापौ परित्यज्य, पृथक् सर्वत्र स्थीयताम्॥४१२॥
पञ्चमीं च गतिं प्राप्तिं विना सुखं न जायते ।
त्रिलोकी सुखसंदोहः,तदग्रे विन्दुमात्रकम्॥४१३॥
ज्ञानध्यान रसालीना, निर्विकल्पदशां भजेत् ।
विकल्पजालकं त्यक्त्वा,स्वोपयोगी भवेत्सदा॥४१४॥
निर्विकल्पोपयोगस्तु, समाधिरूपको मतः ।
केवलज्ञानप्राकट्यं, तत्र प्रकाशते सदा ॥४१५॥
दर्शनं स्वस्वरूपस्य, जायते तत्र निर्मलम् ।
कालराक्षस त्रासस्य, तत्र स्थानं न विद्यते॥४१६॥
अहमस्य मदीयास्ते, ईदृशी यत्र भावना ।
बन्धनं तत्र विज्ञेयं, बहिरात्मत्व दर्शिनः ॥४१७॥
अहं न कस्य यूयं मे नो, भावना सदा भवेत् ।
यत्रेदृशी भवेद्बुद्धिः, तत्स्थानं सुमनोरमम्॥४१८॥

ममेदमिति भावेन, रागद्वेषाश्च सर्वदा ।
ममता भावना त्यागे,नश्यन्ति प्रपञ्चाः खलु॥४१६॥
येषां रागश्च द्वेषो न, तेषां जन्म न विद्यते ।
मृत्युस्तेषां समीपेतु, कदाचिन्नैव तिष्ठति ॥४२०॥
एकसमयमात्रं वै, प्रमादो न विधीयताम् ।
प्रमादोऽपि महाशत्रुः,आन्तरिक उदाहृतः ॥४२१॥
बाह्यशत्रुर्बहिर्भावः, विनाशकरणोद्यतः ।
आभ्यन्तरप्रमादस्तु, सर्वं हरति पश्यतः ॥४२२॥
क्षणमात्रप्रसङ्गश्च, प्रमादाय न दीयताम् ।
स्तोकमपि क्षणं लब्ध्वा,धर्ममार्गात्स पातयेत्॥४२३॥
वीतरागस्य ध्यानं तत्, प्रत्यहं क्रियते जनैः ।
एक श्वासःसुध्यानेन, भवकोट्यघतां हरेत् ॥४२४॥
एकमुहूर्त्तपर्यन्तं, श्वाससङ्ख्या कियद्भवेत् ।
जैनधर्मानुसारेण, प्रमार्णं तस्य कथ्यते ॥४२५॥
त्रिसहस्राधिका सप्तशती, त्रिसप्ततिर्मता ।
एकदिवससङ्ख्यानां, परिमाणं निगद्यते ॥४२६॥
शतंनवतियुक्तं च, सहस्राणां त्रयोदश ।
तदुपर्येकलक्षं च, दिनेश्वासा उदाहृताः ॥४२७॥

एवं रीत्या च वर्षाणां, प्रमाणमपि कार्यताम् ।
पश्चान्मनसि धर्त्तव्य,कति मे निष्फला गताः॥४२८॥
षोडशाधिकतायुक्तं, शतवर्षंच जीवन ् ।
उत्कृष्टं प्रायिकं चैत, तसोपक्रमं च तन्मतम्॥४२९॥
अध्यवसायनैमित्त, शस्त्रगर्तादिकं तथा ।
श्वासोच्छ्वासश्च,रोगाश्चस्पर्शश्चायुर्विनाशकाः ४३०
स्तोकश्वासश्च स्पर्शश्च, यत्र तत्र न ह्रासता ।
अधिकश्वाससञ्चारे, आयुश्च परिक्षीयते ॥४३१॥
समाधौ च चतुःश्वासाः, शुभध्याने च षण्मताः ।
दश तृष्णा विशून्ये च,द्वादशजल्पने मताः ॥४३२॥
षोडशशयने क्षीणाः, गन्तव्ये द्विश्च विंशतिः ।
स्त्रीसम्भोगे च षट्त्रिंशत्;श्वासा नश्यन्तितत्र वै।४३३
अधिकाः स्वल्पकाले च, नश्यन्ति प्राणवायवः ।
आयुक्षयश्च शक्तीनां,रोगाश्चनाशकामताः॥४३४॥
अधिकं नैव वक्तव्यं, शयनं चाधिकं नहि ॥
अतिशीघ्रं न गन्तव्यं,विवेको मानसे यदा॥४३५॥
मनो वाय्वोर्गतिश्चैव, ज्ञाता येन महात्मना ।
श्वासः स्थिरी कृतो येन,स योगे कुशलो भवेत्॥४३६॥

२२

आत्मध्यानगुहां गत्वा, प्राणायामं विधीयते ।
पश्चाद्धुताशनं तस्य, दशमे स्थानके मिलेत्॥४३७॥
तेषां व गच्छतां मार्गे, यदाऽऽश्चर्यं प्रजायते ।
शान्तदशानुभावेन, मुखाद्वक्तुं न शक्यते ॥४३८॥
स्वान्ते सद्भावना वृद्धिः, जायते वचनातिगा ।
तदा सुखसमुद्रस्य, उत्तिष्ठेल्लहरी मधु ॥४३९॥
इन्द्रस्यभोगभुञ्जाने, यादृशं कथितं सुखम् ।
क्षणध्याननिमग्नस्य, अग्रे तद्बिन्दुमात्रकम् ॥४४०॥
न प्राप्यते विना ध्यानं, मनःशुद्धस्वरूपता ।
विना शुद्धस्वरूपं च, विकल्पो नैव शाम्यति॥४४१॥
पद्मासनं समालम्ब्य, मूलबन्धो विधीयते ।
मेरुदण्डसमीकारे, भेदो द्वारस्य प्राप्यते ॥४४२॥
श्वास सञ्चारणं कृत्वा,कल्पना जालकं त्यजेत् ।
तथा यथा भवेत्स्थैर्यं, तथा प्रेमविवर्धते ॥४४३॥
प्राप्यते न विना प्रेम, परिश्रमे कृतेऽपि च ।
समीपे प्रेमप्रातीत्यां, सर्वमुपस्थितं भवेत् ॥४४४॥
या रचना त्रिलोक्यां,स्यात्सर्वास्वस्मिंश्च विद्यते ।
अनुभवं विना सर्वं, नैव जानाति मूढधीः॥४४५॥

विचारेऽभ्यन्तरे भावे, मनोवायुःस्थिरो भवेत् ।
तथा नाभिसरोजे च, पूरकेण समीयते ॥४४६॥
नाभिश्वासं च सम्भृत्य,ऊर्ध्वं तु रेचके खलु ।
अजपाजापता तत्र, कोऽपि जानाति सज्जनः॥४४७॥
उत्तिष्ठति स्वरोऽहं च, सोकारे परिमीयते ।
अजपा जापतायाश्च, रहस्यं दर्शितंमया ॥४४८॥
देहमध्येऽधिका नाड्यः, सन्ति विस्तृतरूपतः ।
पिण्डरूप प्रदृष्ट्यर्थं, विचारोऽपि महान्मतः ॥४४९॥
विस्तारो वटशाखाव, जायते नाभिकेन्द्रतः ।
ज्ञेयो वहिःप्रभेदोऽपि,स्वरोदयस्य शास्त्रतः॥४५०॥
नागाकारमध्यर्धं च, तत्र द्विवलयं मतम् ।
कुण्डलि नाडितो नाभौ,निवासः क्रियते सदा॥४५१
ता ऊर्ध्वं गामिन्यश्चैव, नाड्यो दश शरीरके ।
द्वे द्वे तिरश्चिनी नाड्यौ, चतुर्विंशतिरङ्गतः ॥४५२॥
दशवायु प्रवाहिन्यः, मनसो दशमुख्यतः ।
इङ्गलापिङ्गले चैव, गन्धारिकासुषुम्नके ॥४५३॥
हस्तजिह्वा च पुष्पा वै, यशस्विनी अलम्बुसा ।
शङ्खिनी दश विज्ञेया,आसां स्थानं विचार्यते॥४५४॥

इङ्गला वामपार्श्वे, स्यात्पिङ्गला दक्षिणेमता ।
नाशापुटे चरन्ती च, मध्ये ज्ञेया सुषुम्नका॥४५५॥
वामकर्णे यशस्विनी, पुष्पा मता च दक्षिणे ।
अलम्बुसा मुखस्थाने, लिङ्गस्थानं न मन्यते ॥४५६॥
गुदायां शङ्खिनी ज्ञेया, दिग्नाडिका च देवतः[1] ।
प्राणाश्रिताश्च ज्ञातव्याः, कथ्यन्ते वातसंश्रिताः॥४५७
प्राणापानौ समानश्च, उदानव्यानकौ तथा ।
नागा किरकराकूर्मौ, देवदत्ता धनञ्जयी ॥४५८॥
प्राणादि पञ्चवायूनां, स्वरूपं नाममात्रतः ।
नागादिपञ्चनाडीनां, स्वरूपं च प्रकाश्यते ॥४५९॥
नागनाडी प्रकाशेन, उद्गारः परिजायते ।
उदयात्कूर्मनाडीनां, चित्तमुन्मीलितं भवेत् ॥४६०॥
छींकोत्पत्तिः किर्करातः, प्रकाशो देवदत्ततः ।
जम्भादिकं च सुस्थैर्यं, जायते देवतः पुनः ॥४६१॥
यदा स्वर बहिश्चारः, आगत्य कोऽपि पृच्छति ।
सिद्धिश्च तस्य कार्यस्य, कदापि नैव जायते॥४६२॥

१.—देवेषु ।

आन्तरस्वरसञ्चारे, आगत्य कोऽपि पृच्छति ।
कोऽप्यु पाये च तस्यैव,कार्यसिद्धिर्न जायते ॥४६३॥
आम्नाय क्रमभावेन, स्वरध्यानं विधीयताम् ।
सम्यक्त्वयुक्तविज्ञेन, शिवसुखं च प्राप्यते ॥४६४
स्वर विचारः संक्षेपा,त्कथितो मन्दबुद्धिना ।
स्खलना कापि दृश्येत, सूचनीया च प्रेमतः ॥४६५॥
सद्बुद्ध्या सूचनाकार्या, स्वीक्रियते मया सदा ।
मन्यते चोपकारश्च, अत्र परत्र सर्वथा ॥४६६॥

卐

॥ इति शास्त्रविशारद जगद्गुरुपूज्य जंगम युग प्रधान सकलागम रहस्यवेदि शासनसम्राट्सूरि चक्रचक्रवर्त्ति वाराणसी पालीताणा मधुमती म्हेसाणमोहमयी गुरुकुलपाठशाला संस्थापक वीरमगामपाटडी आग्राप्रभृत्यनेकग्राम पुस्तकालय संस्थापक अनेक बोर्डीङ्ग संस्थापकानेक जीर्णोद्धार कारक साहित्यधर्मोद्धारक भारत यूरोपफ्रांस इटली जर्मनी प्रभृत्यनेक देशवासि जन

शङ्का समुद्धारकानेकराजसद्बोधक पूज्यपाद आराध्यदेव श्रीविजयधर्म सूरिशिष्येण न्यायविशारद न्याय तीर्थोपाध्याय मङ्गलविजयेन विरचिते योगप्रदीपे यमांगे स्वरोदयवर्णननामा त्रयोदश प्रकाशः समाप्तः ॥ अत्र समस्त श्लोकसंख्या त्रिसहस्रं तत्समाप्तौच समाप्तं यमाऽऽख्यं प्रथमं योगाङ्गम् ॥

अथ द्वाविंशः पटलः

श्रीआनन्दभैरवी उवाच

शृणु शम्भो प्रवक्ष्यामि षट्चक्रस्य फलोदयम् ।
यज्ज्ञात्वा योगिनः सर्वे चिरं तिष्ठन्ति भूतले ॥ १ ॥

श्री आनन्दभैरवी ने कहा—हे शम्भो ! अब षट्चक्र में होने वाले फलों को कहती हूँ जिसे जान कर सभी योगी पृथ्वी पर बहुत काल तक जीते रहते हैं ॥ १ ॥

मूलाधारं महापद्मं चतुर्दलसुशोभितम् ।
वादिसान्तं स्वर्णवर्णं शक्तिब्रह्मपदं व्रजेत् ॥ २ ॥
क्षित्यप्तेजोमरुद्व्योममण्डलं षट्सु पङ्कजे ।
क्रमेण भावयेन्मन्त्री मूलविद्याप्रसिद्धये ॥ ३ ॥

मूलाधार नाम का महापद्म चार दलों से सुशोभित है, उस पर व, श, ष, स—ये चार वर्ण हैं जो स्वर्ण के समान चमकीले हैं। उसका ध्यान करने वाला साधक शक्तिब्रह्म का पद प्राप्त करता है क्षिति जल, तेज, वायु, व्योम तथा शून्य ये छः चक्रों में निवास करते हैं । अतः मन्त्रज्ञ साधक मूल विद्या की प्राप्ति के लिए इन चक्रों का ध्यान करे ॥ २-३ ॥

मूलाधार महापद्म



मूलपद्मोद्र्ध्वदेशे च स्वाधिष्ठानं महाप्रभम् ।
षड्दलं राकिणीं विष्णुं कर्णिकायां स्मरेद्यतिः ॥ ४ ॥

मूलाधार वाले महापद्म के ऊपर अत्यन्त तेजस्वी **स्वाधिष्ठान** नामक महाचक्र हैं जिसमें छः पत्ते हैं, साधक यति उसकी कर्णिका में राकिणी शक्ति के साथ विष्णु का स्मरण करे ॥ ४ ॥

षड्दलं बादिलान्तं च वर्णं ध्यात्वा सुराधिपः ।
कन्दर्पवायुना व्याप्तलिङ्गमूले भजेद्यतिः ॥ ५ ॥

स्वाधिष्ठान महाचक्र

षट्‌दल कमल



राकिणी एवं विष्णु का ध्यान

उस स्वाधिष्ठान के षड्दल पर ब, भ, म, य, र, ल, इन छः वर्णों का ध्यान करने से मनुष्य इन्द्र पदवी प्राप्त कर सकता है, यह लिङ्ग के मूल में संस्थित हैं तथा कामवायु से व्याप्त हैं, यति को उस स्वाधिष्ठान का आश्रय लेना चाहिए ॥ ५ ॥

तदूर्ध्वे नाभिमूले च मणिकोटिसमप्रभम् ।
दशदलं योगधर्मं डादिफान्तार्थगं भजेत् ॥ ६ ॥
लाकिनीसहितं रुद्रं ध्यायेद्योगादिसिद्धये ।
महामोक्षपदं दृष्ट्वा जीवन्मुक्तो भवेद् ध्रुवम् ॥ ७ ॥

मणिपूरचक्र

दशदल कमल



लाकिनी एवं रुद्र का ध्यान

उस स्वाधिष्ठान के ऊपर नाभिमूल में करोड़ों मणि के समान प्रकाश वाला **मणिपूर** चक्र है जिसमें डकार से लेकर प फ पर्यन्त दश वर्ण हैं योगधर्म की प्राप्ति के लिए साधक को उनका ध्यान करना चाहिए ॥ ६ ॥

उस मणिपूर चक्र में योग सिद्धि के लिए साधक लाकिनी सहित रुद्र का ध्यान करे । फिर वह महामोक्ष पद का दर्शन कर निश्चित रूप से जीवन्मुक्त हो जाता है ॥ ७ ॥

बन्धूकपुष्पसङ्काशं दलद्वादशशोभितम् ।
कादिठान्तार्णसहितमीश्वरं काकिनीं भजेत् ॥ ८ ॥
तदूर्ध्वे षोडशोल्लासपदे साक्षात् सदाशिवम् ।
महादेवीं साकिनीगं कण्ठे ध्यात्वा शिवो भवेत् ॥ ९ ॥

अनाहतचक्र

द्वादशदल कमल

काकिनी ईश्वर का ध्यान

बन्धूक पुष्प के समान अरुण वर्ण वाले क से लेकर ठ पर्यन्त द्वादश वर्ण से सुशोभित **द्वादश पत्र** वाले चक्र पर काकिनी सहित ईश्वर का ध्यान करना चाहिए ।

उसके ऊपर **सोलहदल वाले पद्म** पर साकिनी सहित सदाशिव का ध्यान कर साधक सदाशिव बन जाता है ॥ ८-९ ॥

विमर्श—द्वादशशब्दस्य संख्यापरत्वमभ्युपेत्य दलशब्देन षष्ठीतत्पुरुषः । अथवा-द्वादशसंख्यकानि दलानि इति मध्यमपदलोपिसमासे पूर्वनिपातव्यत्यासेन दलद्वादशेति सिध्यति, तैः शोभितमिति ।

विशुद्धाख्यं महापुण्यं धर्मार्थकाममोक्षदम् ।
धूम्रधूमाकरं विद्युत्पुञ्जं भजति योगिराट् ॥ १० ॥
आज्ञानामोत्पलं शुभ्रं हिमकुन्देन्दुमन्दिरम् ।
हंसस्थानं बिन्दुपदं द्विदलं भ्रूकुटे भजेत् ॥ ११ ॥

यह महापुण्यदायक **विशुद्ध** नामक महापद्म है जो धर्म, अर्थ, काम तथा मोक्ष को देने वाला है । यह धुएं के आकार से परिपूर्ण विद्युत्पुञ्ज के समान है । योगिराज इसका भजन करते हैं । इसके बाद हिम, कुन्द, इन्दु के मन्दिर के समान **आज्ञा** नामक महापद्म है जो भ्रूकुटी में है । यह चक्र दो पत्तों वाला है । बिन्दु पद से युक्त हंस मन्त्र का स्थान है, उसका भजन करना चाहिए ॥ १०-११ ॥

आज्ञाचक्र महापद्म

शाकिनी सदाशिव
का ध्यान

द्विदल कमल



हंस मन्त्र

विशुद्धचक्र महापद्म

शाकिनी सदाशिव
का ध्यान

षोडशदल कमल

लक्षवर्णद्वयाढ्यं यद् बिन्दुयुक्तं मनोलयम् ।
तयोः स्त्रीपुंप्रकृत्याख्यं कोटिचन्द्रोज्ज्वलं भजेत् ॥ १२ ॥

इस पर ल और क्ष दो वर्ण हैं जो बिन्दु से युक्त हैं । यहीं पर मन का लय होता है । उन दोनों में एक स्त्री दूसरा पुरुष प्रकृति वाला है । यह करोड़ों चन्द्रमा के समान उज्ज्वल है, साधक को इसका भजन करना चाहिए ॥ १२ ॥

कण्ठे षोडशपत्रे च षोडशस्वरवेष्टितम् ।
अकारादिविसर्गान्तं विभाव्य कुण्डलीं नयेत् ॥ १३ ॥

ऊपर कहा गया (द्र० २२. ९) कण्ठ में रहने वाला षोडश पत्रात्मक पद्मचक्र षोडश स्वर से परिवेष्टित है । अकार से लेकर विसर्ग पर्यन्त वर्ण सोलह स्वर कहे गए हैं । इन स्वरों का ध्यान कर फिर कुण्डली को ऊपर ले जाना चाहिए ॥ १३ ॥

आज्ञाचक्रे समानीय कोटिचन्द्रसमोदयाम् ।
कण्ठाधारां कुण्डलिनीं जीवन्मुक्तो भवेदिह ॥ १४ ॥

करोड़ों चन्द्रमा के समान प्रकाश वाली कुण्डली को कण्ठाश्रित-चक्र से ऊपर उठा कर आज्ञा-चक्र (द्विदल कमल) में लाकर उसका ध्यान करने से साधक यहाँ पर ही जीवन्मुक्त हो जाता है ॥ १४ ॥

यदि श्वासं न त्यजति बाह्यचन्द्रमसि प्रभो ।
भ्रूमध्ये चन्द्रनिकरे त्यक्त्वा योगी भवेदिह ॥ १५ ॥

हे प्रभो ! यदि साधक अपनी श्वास बाह्य चन्द्रमा में न छोड़े किन्तु भ्रू के मध्य में रहने वाले चन्द्र समूह में छोड़े तो वह यती योगी बन जाता है ॥ १५ ॥

सूक्ष्मवायूद्गमेनैव त्यजेद् वायुं मुहुर्मुहुः ।
सहस्रादागतं मूले मूलात्तत्रैवमानयेत् ॥ १६ ॥

साधक को सूक्ष्म वायु को ऊपर चढ़ाकर उसे धीरे धीरे छोड़ना चाहिए । सहस्रार चक्र (सहस्रदल कमल) से आए हुए वायु को मूलाधार में, फिर मूलाधार से सहस्रार के मध्य में ले आना चाहिए ॥ १६ ॥

चन्द्रः सूर्ये लयं याति सूर्यश्चन्द्रमसि प्रभो ।
यो बाह्ये नानयेत् शब्दं तस्य बिन्दुचयो भवेत् ॥ १७ ॥

चन्द्रमा सूर्य में लय को प्राप्त होता है । सूर्य चन्द्रमा में लय प्राप्त करता है । जो बाहर में शब्द का आनयन नहीं करता, उसमें बिन्दु (वीर्य) एकत्रित होता है ॥ १७ ॥

यावद् बाह्ये चन्द्रमसि मनो याति रविप्लुते ।
अन्तर्गते चन्द्रसूर्ये न तस्य दुरितं तनौ ॥ १८ ॥

जब चन्द्र एवं सूर्य का लय हो जाता है, तब चन्द्र सूर्य दोनों ही भीतर हो जाते हैं, इस प्रकार रवि प्लुत बाह्य चन्द्र में जब मन चला जाता है तो शरीर में पाप नहीं रहता ॥ १८ ॥

केवलं सूक्ष्मवायुस्थं वायवीशक्तिलालितम् ।
मानसं यः करोतीति तस्य योगादिवर्द्धनम् ॥ १९ ॥

वायवी शक्ति से सुरक्षित सूक्ष्म वायु में जो अपना मन स्थापित करता है उसके योग की अभिवृद्धि होती है ॥ १९ ॥

प्राप्ते यज्ञोपवीते यः श्रीधरो ब्राह्मणोत्तमः ।
योगाभ्यासं सदा कुर्यात् स भवेद्योगिवल्लभः ॥ २० ॥

यज्ञोपवीत हो जाने पर उत्तम ब्राह्मण श्रीसम्पन्न हो जाता है, उसे सर्वदा योगाभ्यास करते रहना चाहिए । ऐसा करने से वह योगी वल्लभ होता है ॥ २० ॥

यावत्कालं स्थितं बिन्दुं बाल्यभावे यथा यथा ।
तथा तथा योगमार्गं बिन्दुपातान्मरिष्यति ॥ २१ ॥

बाल्यकाल में जिस जिस प्रकार से बिन्दु (वीर्य) स्थित रहता है, उस उस प्रकार से योगमार्ग भी वृद्धिगत होता है, जब बिन्दु पात की स्थिति आती है तो साधक मरने की स्थिति में आ जाता है ॥ २१ ॥

तथापि यदि मासं वा पक्षं वा दशभिर्दिनम् ।
यदि तिष्ठति बिन्दूग्रः साक्षादभ्यासतो जयी ॥ २२ ॥

फिर भी यदि एक मास एक पक्ष अथवा दश दिन तक बिन्दु स्थित रखे तो वह साक्षात् अभ्यास से योग में विजयी हो जाता है ॥ २२ ॥

कामानल[१]महापीडाविशिष्टः पुरुषो यदा ।
तत्कामादिसंहरणे विना योगेन कः क्षमः ॥ २३ ॥

जब पुरुष कामानल की महापीड़ा से ग्रस्त हो जाता है, तो वह योग नहीं कर सकता कामादि को रोके बिना योग में कौन समर्थ हो सकता है ॥ २३ ॥

समसंसर्गगूढेन कामो भवति निश्चितम् ।
तत्कामात् क्रोध उत्पन्नो महाशत्रुर्विनाशकृत् ॥ २४ ॥
क्रोधाद् भवति सम्मोहः सम्मोहात् स्मृतिविभ्रमः ।
स्मृतिभ्रंशाद् बुद्धिनाशो बुद्धिनाशाद् विनाशनम् ॥ २५ ॥

अपने समान (पुरुष या स्त्री) के साथ संबन्ध स्थापित करने पर निश्चित रूप से काम उत्पन्न होता है, उस काम से क्रोध उत्पन्न होता है जो विनाशकर्ता एवं महाशत्रु है । क्रोध से गाढ़ा मोह उत्पन्न होता है, उससे स्मृति नष्ट हो जाती है । इस प्रकार स्मृति के विनाश होने पर बुद्धि का विनाश होने लगता है । जब बुद्धि विनष्ट होती है तब पुरुष का विनाश हो जाता है ॥ २४-२५ ॥

विमर्श—गीता में भी कहा है—कामात् क्रोधेऽभिजायते ।

अतः सम्बुद्धिमाधार्य मूलादिब्रह्ममण्डले ।
ध्यात्वा श्रीनाथपादाब्जं सिद्धो भवति साधकः ॥ २६ ॥
ईश्वरस्य कृपाचिन्हमादौ शान्तिर्भवेद् हृदि ।
शान्तिभिर्जायते ज्ञानं ज्ञानान्मोक्षमवाप्नुयात् ॥ २७ ॥

इसलिए साधक को अपनी बुद्धि को सुरक्षित रख कर उससे मूलाधार स्थित ब्रह्म मण्डल में महाविष्णु के चरण कमलों का ध्यान कर सिद्धि प्राप्त करनी चाहिए । जब सर्वप्रथम हृदय में शान्ति होने लगे तो उसे ईश्वर की कृपा का चिन्ह समझना चाहिए । क्योंकि शान्ति से ज्ञान होता है और ज्ञान से मोक्ष प्राप्ति होती है ॥ २६-२७ ॥

शान्तिर्विद्या प्रतिष्ठा च निवृत्तिरिति ताः स्मृताः ।
चतुर्व्यूहस्ततो देवः प्रोच्यते परमेश्वरः ॥ २८ ॥

---

१. कामानामनलेन महापीडा, तया विशिष्ट इति तत्पुरुषसमासः ।

इदं ज्ञानमिदं ज्ञेयमिति चिन्तासमाकुलाः ।
पठन्त्यहर्निशं शास्त्रं परतत्त्वपराङ्मुखाः ॥ २९ ॥

प्रथम शान्ति, फिर विद्या, फिर प्रतिष्ठा, तदनन्तर निवृत्ति ये चार व्यूह हैं । इसके निवास के कारण परमेश्वर चतुर्व्यूह कहे जाते हैं । यह ज्ञान है, यह ज्ञेय है, इस प्रकार के विचार से समाकुल लोग दिन रात शास्त्र पढ़ते हैं, तब भी वे तत्त्व से पराङ्मुख रहते हैं ॥ २८-२९ ॥

शिरो वहति पुष्पाणि गन्धं जानाति नासिका ।
पठन्ति मम तन्त्राणि दुर्लभा भावबोधकाः ॥ ३० ॥

शिर पुष्प का भार जानता है, किन्तु उसके गन्ध का ज्ञान नासिका को ही होता है । इसी प्रकार लोग हमारे तन्त्र को पढ़ते हैं, किन्तु उसके भाव का ज्ञान जानने वाले साधक यति दुर्लभ हैं ॥ ३० ॥

यज्ञोपवीतकाले तु पशुभावाश्रयो भवेत् ।
यावद्योगं न सम्प्राप्तं तावद् वीराचरं न च ॥ ३१ ॥

यज्ञोपवीत काल में साधक पशुभाव का आश्रय ग्रहण करे । जब तक योग ज्ञान की संप्राप्ति न हो, तब तक वीराचार ग्रहण करना मना है ॥ ३१ ॥

आचारो विनयो विद्या प्रतिष्ठा योगसाधनम् ।
तस्यैव जायते सिद्धिरिष्टपादाम्बुजे मतिः ॥ ३२ ॥
देवे गुरौ महाभक्तिर्यस्य नित्यं विवर्धते ।
संवत्सरात्तस्य सिद्धिर्भवत्येव न संशयः ॥ ३३ ॥

ऐसा आचरण करने वाले साधक को ही आचार, विनय, विद्या, प्रतिष्ठा, योगसाधन और अपने इष्ट देवता के चरण कमलों में बुद्धि उत्पन्न होती है । जिस साधक को अपने गुरु में और देवता में निरन्तर भक्ति की अभिवृद्धि होती रहती है । उसे एक संवत्सर मात्र में सिद्धि प्राप्त हो जाती है, इसमें संशय नहीं ॥ ३२-३३ ॥

वेदागमपुराणानां सारमालोक्य यत्नतः ।
मनः संस्थापयेदिष्टपादाम्भोरुहमण्डले ॥ ३४ ॥

वेद आगम (मन्त्र शास्त्र) तथा पुराण का तत्त्व यत्नपूर्वक जान कर तदनन्तर अपने इष्ट देवता के चरण कमल मण्डल में मन संस्थापित करे ॥ ३४ ॥

चेतसि क्षेत्रकमले षट्चक्रे योगनिर्मले ।
मनो निधाय मौनी यः स भवेद् योगवल्लभः ॥ ३५ ॥

क्षेत्र रूपी कमल में रहने वाले, योग से सर्वथा विशुद्ध और चेतना संयुक्त षट्चक्र में मन स्थापित कर जो साधक मौन धारण करता है, वह योग का वल्लभ होता है ॥ ३५ ॥

मनः करोति कर्माणि मनो लिप्यति पातके ।
मनःसंयमनी भूत्वा पापपुण्यैर्न लिप्यते ॥ ३६ ॥

मन ही कर्म करता है । मन ही पाप पङ्क से लिप्त रहता है । अतः जो मन को अपने वश में रखता है, वह पाप पुण्य से लिप्त नहीं होता ॥ ३६ ॥

श्री भैरव उवाच

वद कान्ते रहस्यं मे येन सिद्धो भवेन्नरः ।
तत्प्रकारं विशेषेण योगिनामप्यगोचरम् ॥ ३७ ॥
यत्रैव[1] गोपयेद्यद्यदानन्देन निरीक्षयेत् ।
पूजयेद् भावयेच्चैव वर्जयेन्न जुगुप्सयेत् ॥ ३८ ॥
क्रमेण वद तत्त्वञ्च यदि स्नेहोऽस्ति[2] मां प्रति ।
न[3] ज्ञात्वापि च भूतत्त्वं योगी मोहाश्रितो भवेत् ॥ ३९ ॥

श्री भैरव ने कहा—हे कान्ते ! अब उस रहस्य को बताइए, जिससे पुरुष को सिद्धि प्राप्त होती है । विशेष कर उसके प्रकार को जो योगियों के लिए भी अगोचर है । जिसमें जो जो गोपनीय हो, जो जो आनन्दपूर्वक निरीक्षण के योग्य हो, जो जो पूजनीय हो, जो जो ध्यान के योग्य हो, जो जो वर्जनीय हो तथा जो जो जुगुप्सा के योग्य न हो, हे प्रिये ! यदि मुझमें आपका स्नेह हो तो क्रमशः उन तत्त्वों को प्रकाशित कीजिए । क्योंकि इन्हें बिना जाने योगी भूत के समान रहता है और मोह के वशीभूत हो जाता है ॥ ३७-३९ ॥

आनन्दभैरवी उवाच

त्रैलोक्ये योगयोग्योऽसि षट्चक्रभेदने रतः ।
त्वमेव परमानन्द महाधिष्ठाननिर्मल ॥ ४० ॥
सङ्घातयेन्महावीर एतान्दोषान् महाभयान् ।
कामक्रोधलोभमोहमदमात्सर्यसञ्ज्ञकान् ॥ ४१ ॥

आनन्दभैरवी ने कहा—हे परमानन्द ! हे महाधिष्ठान निर्मल ! मात्र आप ही योग की योग्यता रखते हैं तथा षट्चक्र भेदन की क्रिया में समर्थ हैं । हे महावीर, महाभय देने वाले काम, क्रोध, लोभ, मोह, मद तथा मात्सर्य संज्ञक इन दोषों का साधक को संहार करना चाहिए ॥ ४०-४१ ॥

सङ्घातयेन्महावीरो विकारं चेन्द्रियोद्भवम् ।
निद्रा-लज्जा-दौर्मनस्यं दशकालानलान् प्रभो ॥ ४२ ॥
सङ्गोपयेन्महावीरो महामन्त्रं कुलक्रियाम् ।
मुद्राक्षसूत्रतन्त्रार्थं गोपिनां वीरसङ्गमम् ॥ ४३ ॥

---

१. घातयेत्—क० ।
२. योगिनी—ग० ।
३. अज्ञात्वा पीठतत्त्वं च—ग० ।

हे प्रभो ! महावीर को इन्द्रियों से उत्पन्न होने वाले सभी विकारों को निद्रा लज्जा दौर्मनस्य तथा **दश कालाग्नियों** का विनाश करना चाहिए । महावीर को महामन्त्र, कुण्डलिनी के उत्थान की क्रिया, मुद्रा, अक्ष (माला) सूत्र, तन्त्रार्थ गोपनीय वीर का सङ्गम गुप्त रखना चाहिए ॥ ४२-४३ ॥

अत्याचारं भैरवाणां योगिनीनां च साधनम् ।
नाडीग्रथनमानञ्च गोपयेन्मातृजारवत् ॥ ४४ ॥

भैरवों के आचार का अतिक्रमण, योगिनियों के साधन के प्रकार और नाड़ियों का मान माता के जार (उपपति) की तरह गुप्त रखना चाहिए ॥ ४४ ॥

न निन्देत् प्राणनिधने देवतां गुरुमीश्वरम् ।
सुरां विद्यां महाक्षेत्रं पीठं योगाधिकारिणम् ॥ ४५ ॥
योगिनी जडमुन्मत्तं जन्मकर्मकुलक्रियाम् ।
प्रयोगे धर्मकर्तारं न निन्देत् प्राणसंस्थितौ ॥ ४६ ॥
पत्नीं भ्रातृवधूञ्चैव बौद्धाचारञ्च योगिनीम् ।
कर्म शुभाशुभञ्चैव महावीरो न निन्दयेत् ॥ ४७ ॥

साधक जीवन मरण की, देवता की, गुरु की तथा ईश्वर की निन्दा न करे । इसी प्रकार सुरा की, महाविद्या की, महाक्षेत्र, सिद्धपीठ, योग के अधिकारी, योगिनी, जड़, उन्मत्त, जन्म कर्म, कुण्डलिनी, क्रिया तथा प्रकृष्ट योग में धर्म करने वाले की प्राण रहते कदापि निन्दा न करनी चाहिए । पत्नी, भाई की भार्या, बौद्धाचार, योगिनी, शुभाशुभ कर्म की महावीर निन्दा न करे ॥ ४५-४७ ॥

निरीक्षयेन्न कदापि कन्यायोनिं दिने रतिम् ।
पशुक्रीडां[1] दिग्वसनां कामिनीं[2] प्रकटस्तनीम् ॥ ४८ ॥
विग्रहं द्यूतपाशार्थं क्लीबं विष्ठादिकं शुचौ ।
अभिचारभारञ्च क्रियामप्रमत्तस्य[3] नेक्षयेत् ॥ ४९ ॥

कन्या की योनि, दिन में रति, पशुओं का मैथुन, नङ्गी स्त्री तथा खुले स्तन वाली कामिनी, जूआ के लिए लड़ने वाले जुआड़ी, नपुंसक, शुचि रहने पर विष्टा आदि घृणित वस्तु अभिचार (मारणादि क्रिया) तथा असमत्त की क्रिया वीर पुरुष न देखे ॥ ४८-४९ ॥

पूजयेत्परया भक्त्या देवतां गुरुमीश्वरम् ।
शक्तिं साधुमात्मरूपं स्थूलसूक्ष्मं प्रयत्नतः ॥ ५० ॥
अतिथिं मातरं सिद्धं पितरं योगिनं तथा ।
पूजयेत् परया भक्त्या सिद्धमन्त्रं सुसिद्धये ॥ ५१ ॥

---

१. विवसनाम्—ग० ।
२. प्रकटौ स्तनौ यस्याः सा, ताम् ।
३. अज्ञस्य—क० ।

देवता गुरु, ईश्वर शक्ति, साधु, स्थूल तथा सूक्ष्म अपने आत्मस्वरूप की अत्यन्त भक्ति के साथ प्रयत्न पूर्वक पूजा करे । अतिथि, माता, सिद्ध, पिता योगी इनकी भी परा भक्ति से पूजा करे । इसी प्रकार सिद्धि के लिए प्रयुक्त सिद्ध मन्त्र को भी आदर की दृष्टि से देखे ॥ ५०-५१ ॥

भावयेदेकचित्तेन साधूक्तं योगसाधनम् ।
गुरोर्वाक्योपदेशं च स्वधर्मं तीर्थदेवताम् ॥ ५२ ॥
कुलाचारं [१] वीरमन्त्रमात्मानं परमेष्ठिनम् ।
भावयेद्विधिविद्यां च तन्त्रसिद्धार्थनिर्णयम् ॥ ५३ ॥

साधुओं का उपदेश, योग का साधन, गुरुवाक्य, उपदेश, अपना धर्म, तीर्थ, देवता कुलाचार, वीरमन्त्र, आत्मा, परमेष्ठी, विधिपूर्वक प्राप्त की गई विद्या, तन्त्र तथा सिद्धार्थ निर्णय इनका अनन्य मन से ध्यान करना चाहिए ॥ ५२-५३ ॥

वर्जयेत् साधकश्रेष्ठोऽगम्यागमनादिकम् ।
धूर्तसङ्गं वञ्चकञ्च प्रलापमनृताशुभम् ॥ ५४ ॥
वर्जयेत् पापगोष्ठीयमालस्यं बहुजल्पनम् ।
अवेदकर्मसञ्चारं गोसवं [२] ब्राह्मणस्य च ॥ ५५ ॥
जुगुप्सयेन्न कदापि विण्मूत्रं क्लेदशोणितम् ।
हीनाङ्गीं पिशितं नाथ कपालाहरणादिकम् ॥ ५६ ॥
सुरां गोपालनञ्चैव निजपापं रिपोर्भयम् ।
जुगुप्सयेन्न सुधर्म्मं यदि सिद्धिमिहेच्छति ॥ ५७ ॥

श्रेष्ठ साधक अगम्या स्त्री से संभोग जैसे पतित कार्य, धूर्त्त का साथ, ठगहारी, प्रलाप, झूठ, अशुभ इनको वर्जित करे । पापियों की गोष्ठी, आलस्य, बकवाद, वेद विरुद्ध कर्म का प्रचार, गोहत्या, ब्रह्महत्या जैसे पापों का वर्जन करे । हे नाथ ! विष्ठा मूत्र, कफ, खून, हीन अङ्ग वाली स्त्री, मांस तथा कपाल हरणादि की निन्दा कदापि न करे । सुरा, गोपालन, अपना पाप और शत्रु से होने वाले भय की निन्दा न करे । इसी प्रकार सिद्धि चाहने वाला साधक श्रेष्ठ धर्म की भी निन्दा न करे ॥ ५४-५७ ॥

समयाचारमेवेदं योगिनां वीरभाविनाम् ।
गुर्वाज्ञया यः करोति जीवन्मुक्तो भवेद् भुवि ॥ ५८ ॥
वृथा धर्म वृथा चर्यं वृथा दीक्षा वृथा तपः ।
वृथा सुकृतमाख्येति गुर्वाज्ञालङ्घनं नृणाम् ॥ ५९ ॥

वह वीरभाव प्राप्त करने वालों के लिए इस प्रकार का समयाचार है । जो गुरु की आज्ञा से इनका पालन करता है वह पृथ्वी पर ही जीवन्मुक्त हो जाता है । मनुष्य को, गुरु की

---

१. तन्त्रम्—ग० ।
२. गोरसम्—ग० ।

आज्ञा उल्लंघन जैसा पाप, उसके धर्म को, आचरण की दीक्षा को, तप को, पुण्य को तथा यश को व्यर्थ बना देता है ॥ ५८-५९ ॥

ब्राह्मणक्षत्रियादीनामादौ योगादिसाधनम् ।
पश्चात् कुलक्रिया नाथ [१] योगविद्याप्रसिद्धये ॥ ६० ॥
विना भावेन वीरेण पूर्णयोगी कुतो भवेत् ।
आदौ कुर्यात् पशोर्भावं पश्चात् कुलविचारणम् ॥ ६१ ॥

हे नाथ ! योग विद्या में प्रकृष्ट सिद्धि चाहने के लिए ब्राह्मण, क्षत्रिय आदि को प्रथम योगादिसाधन करना चाहिए । उसके पश्चात् कुल क्रिया कुण्डलिनी का उत्थान करना चाहिए। वीरभाव के बिना कोई मनुष्य किस प्रकार पूर्णयोगी बन सकता है । उसमें भी प्रथम पशुभाव का आचरण करे । पश्चात् कुण्डलिनी का आचरण करे ॥ ६०-६१ ॥

मम तन्त्रे महादेव केवलं सारनिर्णयम् ।
अकस्माद् भक्तिसिद्ध्यर्थं कुलाचारं च योगिनाम् ॥ ६२ ॥
ब्राह्मणानां कुलाचारं केवलं ज्ञानसिद्धये ।
ज्ञानेन जायते योगी योगादमरविग्रहः ॥ ६३ ॥
भूत्वा योगी कुलीनश्च योगाभ्यासमहर्निशम् ।
षट्चक्रं भूतनिलयं भावयेद् भावसिद्धये ॥ ६४ ॥

हे महादेव ! हमारे (शक्ति) तन्त्र में केवल सार निर्णय यह है कि अकस्माद् भक्ति की सिद्धि के लिए योगियों का कुलाचार करे । ब्राह्मणों को कुलाचार (कुण्डलिनी का अभ्युत्थान) केवल ज्ञान की सिद्धि के लिए करना चाहिए । क्योंकि ज्ञान से योगी, तदनन्तर योग से अमर शरीर प्राप्त होता है । कुलीन (कुण्डलिनी का उपासक) योगी दिन रात योगाभ्यास करे और पञ्चभूत के स्थानभूत षट्चक्रों का भावसिद्धि के लिए ध्यान करे ॥ ६२-६४ ॥

मूलपद्मस्योद्ध्वदेशे लिङ्गमूले महाशुचिः ।
स्वाधिष्ठाने महापद्मं पद्दले वायुना यजेत् ॥ ६५ ॥
एतत् षड्दलवर्णानां भावनां यः करोति हि ।
तस्य साक्षाद् भवेद्विष्णुः राकिणीसहितः प्रभो ॥ ६६ ॥

मूलाधार में स्थित महापद्म के ऊपर लिङ्गमूल के स्वाधिष्ठान नामक महापद्म के पाद के (नीचे) दल में पवित्र साधक वायु द्वारा यजन करे । स्वाधिष्ठान स्थित छः पत्तों पर स्थित रहने वाले वर्णों की जो भावना करता है, हे प्रभो ! उसे राकिणी सहित महाविष्णु का साक्षात्कार हो जाता है ॥ ६५-६६ ॥

स्वाधिष्ठानषड्दलस्य कर्णिकामध्यमण्डले ।
दलाष्टकं भावयित्वा नागयुक्तं स ईश्वरः ॥ ६७ ॥

---

१. योगस्य विद्या, तस्याः प्रकर्षेण सिद्धिस्तस्यै ।

अष्टौ नागा अष्टदले प्रतिभान्ति यथारुणाः ।
जलस्योपरि पद्मे च ध्यायेत्तन्नागवल्लभाम् ॥ ६८ ॥

स्वाधिष्ठान के छः पत्तों वाले कर्णिका के मध्य मण्डल में स्थित नाग युक्त आठ पत्तों का ध्यान कर साधक साक्षात् सदाशिव हो जाता है । जिस प्रकार अष्टदल पर अरुण वर्ण के आठ नाग शोभित होते हैं, उसी प्रकार जल के ऊपर रहने वाले उस महापद्म पर नागपत्नियों का भी ध्यान करना चाहिए ॥ ६७-६८ ॥

अनन्तं वासुकिं पद्मं महापद्मं च तक्षकम् ।
कुलीरं कर्कटं शङ्खं दक्षिणादौ दले भजेत् ॥ ६९ ॥
अष्टदलोपरि ध्यायेत् कर्णिकावृत्तयुग्मकम् ।
तदूर्ध्वे षड्दलं वादिलान्तयुक्तं सबिन्दुकम् ॥ ७० ॥

अनन्त, वासुकि, पद्म, महापद्म, तक्षक, कुलीर, कर्कट तथा शंख इन आठ नागों का दक्षिण दल से प्रारम्भ कर ध्यान करना चाहिए । उस अष्टदल के ऊपर कर्णिका से युक्त दो वृत्तों का ध्यान करे । उसके ऊपर षड्दल का ध्यान करना चाहिए, जिस पर बिन्दु के सहित व भ म य र ल ये छः वर्ण हैं ॥ ६९-७० ॥

पूर्वादिक्रमयोगेन दक्षिणावर्त्तवायुना ।
पुनः पुनः कुम्भयित्वा ध्यायेत् षड्वर्णवायवीम् ॥ ७१ ॥
केशरं युगलं ध्यायेत् कुलोर्ध्वे साकृतिं मुदा ।
अष्टदले षड्दले च विभाव्य योगिराड् भवेत् ॥ ७२ ॥
अष्टदलस्योर्ध्वदेशे वृत्तयुग्मं मनोहरम् ।
तस्योपरि पुनर्ध्यायेत् षड्दले वादिलान्तकम् ॥ ७३ ॥

पूर्व दिशा के क्रम से दक्षिणावर्त वायु द्वारा पुनः पुनः कुम्भक कर वायु देवता वाले इन छः वर्णों का ध्यान करे । कुल के ऊर्ध्व भाग में अष्टदल पर तथा षड्दल पर आकृति सहित दो केशरों का प्रसन्नता पूर्वक ध्यान करे । ऐसा करने से साधक योगिराज बन जाता है । उस अष्टदल के ऊर्ध्व देश में मनोहर दो वृत्त हैं । उसके ऊपर षड्दल पर पुनः 'व भ म य र ल' इन छः वर्णों का ध्यान करना चाहिए ॥ ७१-७३ ॥

दलाष्टकाधो ध्यायेद्वो वृत्तयुग्मं मनोहरम् ।
वृत्ताधोमण्डलाकारं वं बीजं व्याप्य तिष्ठति ॥ ७४ ॥
वृत्तलग्नं समाव्याप्तं यं बीजं विद्युदाकरम् ।
कोटिसूर्यसमाभासं विभाव्य योगिनां पतिः ॥ ७५ ॥
यान्तबीजकलानां तु अधः षट्कोणमण्डलम् ।
षट्कोणे दक्षिणादौ च भावयेद् यादिलान्तकम् ॥ ७६ ॥

अष्टदल के नीचे पुनः दो मनोहर वृत्तों का ध्यान करना चाहिए । जिस वृत्त के अधः मण्डल के आकार वाला 'वं' बीज व्याप्त हो कर स्थित है । वृत्त में लगा हुआ उसी के समान, विद्युदाकर, करोड़ों सूर्य के समान तेज वाला 'यं' बीज का ध्यान कर साधक योगियों का

अधिपति हो जाता है । यान्त बीज 'रं' कला के नीचे षट्कोण का मण्डल है । उस षट्कोण मण्डल में दक्षिण दिशा से आरम्भ कर य र ल वर्णों का ध्यान करना चाहिए ॥ ७४-७६ ॥

तत्षट्कोणमध्यदेशे षट्कोणं धूम्र[१]मण्डलम् ।
तत्कोणे दक्षिणादौ च द्रव्यादिषट्कमाश्रयेत् ॥ ७७ ॥
द्रव्यं गुणास्तथा कर्म सामान्यं सविशेषकम् ।
समवायं क्रमेणैव षट्कोणेषु विभावयेत् ॥ ७८ ॥

उस षट्कोण के मध्य भाग में धूम्र मण्डल युक्त एक षट्कोण और है । उस षट्कोण में द्रव्यादि छः पदार्थ अर्थात् १. द्रव्य, २. गुण, ३. कर्म, ४. सामान्य, ५. सविशेष तथा ६. समवाय—इन छः पदार्थों का ध्यान करना चाहिए ॥ ७७-७८ ॥

पूर्वादिक्रमयोगेन दक्षिणावर्तवायुना ।
सर्वत्र भावयेन्मन्त्री कुम्भयित्वा पुनः पुनः ॥ ७९ ॥
द्रव्यषट्कोणमध्ये तु षट्कोणं चारुतेजसम् ।
कोणे कोणे च षड्वर्गान् भावयेत् स्थिरचञ्चलान् ॥ ८० ॥
तन्मध्ये च त्रिकोणे च राकिणीसहितं हरिम् ।
कोटिचन्द्रमरीचिस्थं ध्यायेद्योगी विशालधीः ॥ ८१ ॥

षट्कोण के मध्य में अत्यन्त सुन्दर तेजस्वी एक षट्कोण और है । उसके प्रत्येक कोण में स्थिर तथा चञ्चल प्रकृति वाले, क वर्ग, च वर्ग, ट वर्ग, त वर्ग, प वर्ग और य वर्ग—इन छः वर्गों का ध्यान करना चाहिए । उसके मध्य में रहने वाले त्रिकोण में विशाल बुद्धि वाले योगी को करोड़ों चन्द्रमा की किरणों के समान राकिणी के सहित श्री हरि का ध्यान करना चाहिए ॥ ७९-८१ ॥

षड्दलान्तर्गतं पद्मं योगिनामपि साधनम् ।
यो नित्यं कुरुतेऽभ्यासं तस्य योगः प्रसिद्ध्यति ॥ ८२ ॥
एतच्चक्रप्रसादेन नीरोगी निरहङ्कृतः ।
सर्वज्ञो भवति क्षिप्रं श्रीनाथपदभावनात् ॥ ८३ ॥

इस प्रकार षट्दल में रहने वाला पद्म योगियों का साधन है । जो इस पद्म का ध्यान करता है, उसका योग सिद्ध हो जाता है । इस चक्र की कृपा से महाविष्णु के चरण कमल में की गई भावना से साधक नीरोग और अहङ्कार रहित हो कर बहुत शीघ्र सर्वज्ञ हो जाता है ॥ ८२-८३ ॥

ज्योतीरूपं योगमार्गं सूक्ष्मातिसूक्ष्मनिर्मलम् ।
त्रैलोक्यकामनासिद्धिं षट्चक्रे भावयेद्धरिम् ॥ ८४ ॥
यो हरिः शेषशम्भुश्च यः शम्भुः सूक्ष्मरूपधृक् ।
सूक्ष्मरूपस्थितो ब्रह्मा ब्रह्माधीनमिदं जगत् ॥ ८५ ॥

---

१. धूम्रतेजसम्—क० ।

योग मार्ग प्रकाश स्वरूप है, सूक्ष्म से सूक्ष्म तथा अत्यन्त निर्मल है । अतः उक्त षट्चक्र में त्रिलोकी के समस्त कामनाओं की सिद्धि करने वाले श्री हरि का ध्यान करना चाहिए । जो हरि हैं वही शेष और वही शम्भु हैं । सूक्ष्म रूप धारण करने वाले जो शम्भु हैं वही सूक्ष्म रूप में स्थित रहने वाले ब्रह्मा हैं । यह सात लोक उन्हीं ब्रह्मदेव के अधीन है ॥ ८४-८५ ॥

एकमूर्तिस्त्रयो देवा ब्रह्मविष्णुपितामहाः ।
मम विग्रहसंश्लिष्टाः सृजत्यवति हन्ति च ॥ ८६ ॥
प्राणायामोद्‌गता एते योगविघ्नकराः सदा ।
प्राणायामेन निष्पीड्य प्रसभं सिद्धिमाप्नुयात् ॥ ८७ ॥

ऐसे ब्रह्मा, विष्णु तथा पितामह नाम वाले देवता तीन हैं, किन्तु उनकी एक ही मूर्ति है। ये सभी मेरे शरीर से संश्लिष्ट हैं जो सृष्टि, पालन तथा उसका संहार करते हैं । ये प्राणायाम से उत्पन्न हुए हैं और सर्वदा योगमार्ग में विघ्न डालने वाले हैं । इसलिए साधक प्राणायाम के द्वारा इनका निष्पीड़न कर सिद्धि प्राप्त करे ॥ ८६-८७ ॥

अकारं ब्रह्मणो वर्णं शब्दरूपं महाप्रभम् ।
प्रणवान्तर्गतं नित्यं योगपूरकमाश्रयेत् ॥ ८८ ॥
उकारं वैष्णवं वर्णं शब्दभेदिनमीश्वरम् ।
प्रणवान्तर्गतं सत्त्वं योगकुम्भकमाश्रयेत् ॥ ८९ ॥

ओम् का स्वरूप—महातेजस्वी शब्दरूप **अकार** ब्रह्मा का वर्ण है । यह प्रणव के अन्तर्गत नित्य रहने वाला है । यह योग का पूरक है अतः इसका आश्रय लेना चाहिए । शब्द को भिन्न भिन्न करने वाला सबका ईश्वर **उकार** वैष्णव वर्ण है, जो प्रणवान्तर्गत सत्त्व है और कुम्भक प्राणायाम योग है । साधक को इसका भी आश्रय लेना चाहिए ॥ ८८-८९ ॥

मकारं शाम्भवं रूपं बीजभूतं विधूद्‌गतम् ।
प्रणवान्तस्थितं कालं लयस्थानं समाश्रयेत् ॥ ९० ॥
वर्णत्रय[१]विभागेन प्रणवं परिकल्पितम् ।
प्रणवाज्जायते हंसो हंसः सोऽहं परो भवेत् ॥ ९१ ॥
सोऽहं ज्ञानं महाज्ञानं योगिनामपि दुर्लभम् ।
निरन्तरं भावयेद्यः स एव परमो भवेत् ॥ ९२ ॥

मकार श्री शम्भु का बीजभूत रूप है जो चन्द्रमा से उत्पन्न है । प्रणव के भीतर रहने वाला लय का स्थान तथा काल स्वरूप है, इसका आश्रय लेना चाहिए । तीन वर्ण के अलग अलग रूपों को एक में मिलाने से प्रणव का रूप बनता है, इस प्रणव से 'हंस' मन्त्र बनता है, फिर यही हंस, सोऽहं का रूप बन जाता है । सोऽहं का ज्ञान महाज्ञान है, जो योगियों के लिए भी दुर्लभ है; जो निरन्तर इसकी भावना करता है वह परब्रह्म हो जाता है ॥ ९०-९२ ॥

---

१. वर्णत्रयस्य अकारोकारमकारेति त्रयस्य ।

हं पुमान् श्वासरूपेण चन्द्रेण प्रकृतिस्तु सः ।
एतद्धंसं विजानीयात् सूर्यमण्डलभेदकम् ॥ ९३ ॥
विपरीतक्रमेणैव सोऽहं ज्ञानं यदा भवेत् ।
तदैव सूर्यगः सिद्धः [1]स्वधास्वरप्रपूजितः ॥ ९४ ॥

श्वास रूप चन्द्र से 'हं' पुमान् है और 'सः' प्रकृति है यही हंस मन्त्र है जो सूर्य मण्डल का भी भेदक है । इस हंस को उलट देने पर 'सोऽहं' ज्ञान हो जाता है । तब साधक सूर्यमण्डल में गमन करने वाला सिद्ध हो जाता है और स्वधा स्वर से पूजित होता है ॥ ९३-९४ ॥

हकारार्णं सकारार्णं लोपयित्वा ततः परम् ।
सन्धिं कुर्यात्ततः पश्चात् प्रणवोऽसौ महामनुः ॥ ९५ ॥
एतद् हंसं महामन्त्रं स्वाधिष्ठाने मनोगृहे ।
मनोरूपं भजेद्यस्तु स भवेत् सूर्यमध्यगः ॥ ९६ ॥

हकार वर्ण तथा सकार वर्ण का लोप कर जब शेष की सन्धि कर दे तो वही प्रणव रूप महामन्त्र बन जाता है । यह हंस रूप महामन्त्र मन के गृहभूत स्वाधिष्ठान चक्र में रहता है । अतः साक्षात् मनोरूप से इसका जो जप करता है वह सूर्य मण्डल में गमन करता है ॥ ९५-९६ ॥

हंसं सूर्य विजानीयात् सोऽहं चन्द्रो न संशयः ।
विपरीतो यदा भूयात्तदैव मोक्षभाग् भवेत् ॥ ९७ ॥
यदि हंसमनोरूपं स्वाधिष्ठाने हरेः पदे ।
विभाव्य श्रीगुरोः पादे नीयते नात्र संशयः ॥ ९८ ॥

'हंस' का अर्थ सूर्य है और सोऽहं का अर्थ चन्द्रमा है, इसमें संशय नहीं जब 'हंस' 'सोऽहं' इस विपरीत रूप में हो जाता है तब साधक मोक्ष का भागी बन जाता है । यदि साधक हंस मनोरूप को स्वाधिष्ठान स्थित विष्णु के पद में ध्यान कर श्री गुरु के चरण में समर्पित कर दे तो भी साधक मोक्ष का गामी बन जाता है इसमें संशय नहीं ॥ ९७-९८ ॥

सोऽहं यदा शक्तिकूटं अकाराकारसम्पुटम् ।
कृत्वा जपति यो ज्ञानी स भवेत् कल्पपादपः ॥ ९९ ॥
जपहोमादिकं सर्वं हंसेन यः करोति हि ।
तदैव चन्द्रसूर्य स्यात् हंसमन्त्रप्रसादतः ॥ १०० ॥

जब साधक 'सोऽहं' इस शक्ति कूट को ॐकार से सम्पुटित कर ॐ सोऽहं ॐ का जप करता है तो वह महाज्ञानी तथा कल्पवृक्ष हो जाता है । जो हंस मन्त्र से जप होमादि कार्य करता है, तब उस हंस मन्त्र की कृपा से वह चन्द्र एवं सूर्य बन जाता है ॥ ९९-१०० ॥

---

१. स्यात् सुरासुरप्रपूजितः—ग० ।

एतज्जपं महादेव देहमध्ये करोम्यहम् ।
एकविंशसहस्राणि षट्शतानि च हंमनुः ॥ १०१ ॥

हे महादेव ! मैं इस हंस मन्त्र का अपने देह के मध्य में जप करती रहती हूँ, इस हंस मन्त्र की जप संख्या २१ हजार छः सौ है ॥ १०१ ॥

पुंरूपेण हकारञ्च स्त्रीरूपेण सकारकम् ।
जप्त्वा रक्षां करोतीह [१] चन्द्रबिन्दुशतेन च ॥ १०२ ॥

चन्द्र बिन्दु से संयुक्त पुरुष रूप से हकार (हं) तथा स्त्री रूप सकार का जप कर साधक अपनी रक्षा करने में समर्थ हो जाता है ॥ १०२ ॥

प्रणवान्तं महामन्त्रं नित्यं जपति यो नरः ।
वायुसिद्धिर्भवेत्तस्य वायवी सुकृपा भवेत् ॥ १०३ ॥
बृहद् हंसं प्रवक्ष्यामि येन सिद्धो भवेन्नरः ।
कामरूपी [२] क्षणादेव वाक्सिद्धिरिति निश्चितम् ॥ १०४ ॥

जो मनुष्य आदि में प्रणव लगाकर उसके अन्त में इस महामन्त्र का जप करता है उस पर वायवी कृपा हो जाती है और वायु की सिद्धि हो जाती है । अब मैं उस बृहद्धंस मन्त्र को कहती हूँ, जिसके जप से पुरुष सिद्ध हो जाता है । वह इच्छानुसार रूप धारण कर लेता है और उसे निश्चित रूप से वाक्सिद्धि हो जाती है ॥ १०३-१०४ ॥

आदौ प्रणवमुच्चार्य ततो हंसपदं लिखेत् ।
तत्पश्चात् प्रणवं ज्ञेयं ततः परपदं स्मरेत् ॥ १०५ ॥
तर्पयामि [३] पदस्यान्ते प्रणवं फडिति स्मरेत् ।
एतद्धि [४] हंसमन्त्रस्तु वीराणामुदयाय च ॥ १०६ ॥

पहले प्रणव (ॐ) का उच्चारण करे । उसके बाद 'हंस' इस पद को लिखे, उसके बाद फिर प्रणव (ॐ), तदनन्तर 'पर पद' इसके बाद 'तर्पयामि' उसके अन्त में प्रणव (ॐ) से युक्त 'फट्' पद लिखे । यह वृहद्धंस मन्त्र वीरभाव वालों के अभ्युदय के लिए है ॥ १०५-१०६ ॥

विमर्श—बृहद् हंस मन्त्र का स्वरूप—ॐ हंस ॐ पर तर्पयामि ॐ फट् ।

बृहद् हंसप्रसादेन षट्चक्रभेदको भवेत् ।
षट्चक्रे च प्रशंसन्ति सर्वे देवाश्चराचराः ॥ १०७ ॥

---

१. चन्द्रबिन्दुः—ग० ।
२. कुलादेव—ग० ।
३. परमान्ते हंसपदं ततः प्रणवमेव च—क० ।
४. फडितिमन्त्रस्मरणमेव, एतदित्यस्यार्थः ।

साधक इस 'बृहद्धंस की कृपा से षट्चक्र का भेदन करने वाला हो जाता है । षट्चक्रों की सभी देवता तथा चराचर प्रशंसा करते हैं ॥ १०७ ॥

योगसिद्धिं विघाताय[1] भ्रमन्ति योगिनस्तनौ ।
यदि हंसं बृहद्धंसं जपन्ति वायुसिद्धये ॥ १०८ ॥
तदा सर्वे पलायन्ते राक्षसान्मानुषा यथा ॥ १०९ ॥

॥ इति श्रीरुद्रयामले उत्तरतन्त्रे महातन्त्रोद्दीपने भावनिर्णये पाशवकल्पे षट्चक्रसारसङ्केते योगशिक्षाविधिनिर्णये सिद्धमन्त्रप्रकरणे भैरवीभैरवसंवादे द्वाविंशः पटलः ॥ २२ ॥

योगसिद्धि में विघात करने के लिए योगी के शरीर में विघ्न घूमते रहते हैं, यदि साधक वायु सिद्धि के लिए हंस तथा परमहंस मन्त्र का जप करे तो वे सभी इस प्रकार भाग जाते हैं जैसे राक्षस से मनुष्य ॥ १०८-१०९ ॥

॥ श्रीरुद्रयामल के उत्तरतन्त्र में महातन्त्रोद्दीपन में भावार्थनिर्णय के पाशव-कल्प में षट्चक्रसारसङ्केत में योगशिक्षाविधिनिर्णय में सिद्धमन्त्रप्रकरण में भैरवी-भैरव-संवाद में बाइसवें पटल की डॉ० सुधाकर मालवीय कृत हिन्दी व्याख्या पूर्ण हुई ॥ २२ ॥

१. विदाया मे भ्रमन्ति क्रोधिनस्तनौ—ग० ।

दिब्रह्मगुणै श्चतुर्धा भिद्यते । पुरुषःपुरुषात्मकः परमपुरुषः धर्ममयइति, सत्यः सत्यात्मकः ज्ञानस्सर्वतेजोमयइति, अच्युतोऽपरिमितः ऐश्वर्यः श्रीपतिरिति, अनिरुद्धः महान् वैराग्यस्सर्वसंहारइति । एषां रूपं पुरा वर्णादिकथने विधि नाचोक्तम् । एवं पञ्चमूर्त्तिनामभिभेदैः गुरूपदेशेन अष्टाऽङ्ग योगमार्गेण ध्यात्वा आवाह्य अर्च्चयेदित्याह मरीचिः ।

इति श्रीवैखानसे मरीचिप्रोक्ते विमानार्चनाकल्पे अयुतग्रन्थसंहितायां ज्ञानस्वरूपनिरूपणंनाम पञ्चनवति तमः पटलः ॥ ९५ ॥ (मातृकान्तरे ८८)

(अथ षण्णवतितमःपटलः)

अथातो अष्टांऽगयोगं वक्ष्ये---

जीवात्मपरमात्मनोर्योगो योगइत्यामनन्ति । 'यम नियमाऽऽसन प्राणायाम प्रत्याहार ध्यान धारण समाधय' इति योगांगानि ॥

(यमस्य लक्षणम्)

तेषु यमः अहिंसा, सत्य, मचौर्य, गृहस्थस्य स्वदार निरति रन्येषां सर्वत्रमैथुनत्यागः, दया, आर्जवं, क्षान्तिः, धैर्यं, मिताशनं, शौच मिति यमगुणा दशधा भवन्ति ।

(नियमस्यलक्षणम्)

नियमस्तु तप स्संतोषास्तिक्य दान विष्णुपूजा वेदार्थश्रवण कुत्सित कर्मसुलज्जा गुरूपदेशश्रद्धा मंन्त्रांऽ

भ्यासो होम इति नियमगुणा दशधा भवन्ति । एतै र्विंशतिगुणैर्युक्तो योगाधिकारी भवेत् ।

(आसनस्य)

आसनानि नवभेदानि—ब्राह्म स्वस्तिक पद्म गोमुख सिह्ममुख वीरभद्र मयूराणि इति ॥

दक्षिणपादमूर्ध्वं, वामपादमधःकृत्वा जान्वन्तरे अंगुष्ठौ निगूह्य, अंके वामपाणिं तदूर्ध्वे दक्षिणपाणि मुत्थानं न्यस्य ऋजुकायो भ्रूमध्ये क्षणमासनं तद् ब्राह्मम् ।

सीवन्या उभयोःपार्श्वयोः गुल्फद्वयं निक्षिप्य पूर्व वदासनं स्वस्तिकं ।

ऊर्वोरुपरि पादतलौ विन्यस्य पूर्ववद्धस्ततलद्वयं न्यसेत् तत्पद्मासनम् ।

दक्षिणजानुं वामजानुं संश्लिष्टं निविशयेत् तत् गोमुखम् । (दक्षिणेतरं दक्षिणपार्श्वे, अदक्षिणं दक्षि णोरौ इति गुल्फौ निवेशयेत् - तत्गोमुखम् ।

पूर्ववत् वृषणस्याऽधः सीवन्याः पार्श्वयोः गुल्फौ न्यस्य हस्तौ प्रसार्य जान्वोः स्थाप्य नासाग्रं निरीक्ष्य संवृताऽऽस्यो भवेत् एतत् सिंहासनम् ।

गुल्फं सव्यं मेढ्रादुपरि विन्यस्य असव्यं तदुपरि न्यसेत् एतत् मुक्तासनम् ।

दक्षिणंपादं वामोरोरुपरि न्यस्य वामपादोपरि दाक्षि णोरुं न्यसेत् एतत्, वीरासनम् ।

ब्राह्मं जान्वन्तरद्वयमन्न मंगुष्ठं निगूह्य भ्रूमध्येक्षणं गुल्फौ वृषणस्याऽधस्सीवन्याःपार्श्वयोःपादौ न्यस्य, पाणिभ्यां बध्वा भद्रासनम् करतले भूमौ संस्थाप्य कूर्परौ नाभिपार्श्वयोर्न्यस्य न(उन्नत)तशिराःपादौ दंडवद्व्योम्नि संस्थितो मयूरासनमिति ।

(आसनस्योत्तमत्वादिकम्)

एतेषु ब्राह्मस्वस्तिकपद्मासनान्युत्तमानि । गोमुखसिंहमुक्तानि मध्यानि । वीरभद्रमयूराणि अधमानि इति विज्ञायते । (मातृकान्तरे ९० प०)

अथातःप्राणायामः---

प्राणापानसमानयोगः प्राणायामः रेचक पूरक कुंभकइति सच त्रिविधो भवेत् । निश्वासविसर्गोरेचकः । निश्वासोध्मानं पूरकः । निश्वासनिरो (धः)धनं कुंभक (कइ)मिति ।

(रेचकादिप्रकारः)

प्राणमपानेन संयोज्य देहमध्ये रेफबीजान्वितं वह्निमण्डलं प्रवेश्य तत्रस्थपुरुषं पश्यति । अग्निं प्रज्वाल्य अग्निना सममुदरस्थमनिलंमिडया समारोप्य पूरयित्वा नासाग्रे ऋकारबीजान्वितम् अमृतं स्रवन्तमिन्दुमण्डलं तत्रस्थपुरुषं च नेत्राभ्यां पश्यन् मन्दपिंगलयारेचयति । पुनरपि पिंगलया वायु मारोप्य पूरयित्वा सकार.बीजा

न्वितम् अर्कमण्डलं तत्रस्थपुरुषं प्रविश्य (पश्येत्) इडया शनैर्विरेचयेत् ।

एवं त्रिसंधिषु चतुर्मासमाचरेत् । पृथक्चिह्नोप लक्षिता(तां)नाडीशुद्धिमाप्नोति ।

प्राणमपानवायुना संयोज्य इडया षोडशमात्रै र्वायुना संयोज्य इडया षोडशमात्रैर्वायु मारोप्य म(अ-कारमूर्ति) कारं संस्मरेत् । पश्चात् चतुष्षष्टिमात्रं पूरितं धारयेत् । यावच्छक्यं तावद्धारयति । पिंगलया द्वात्रिंश न्मात्रै रेचयेत् । पुनः पिंगलया षोडशमात्रैर्वायुमारोप्य मकारमूर्त्तिं संस्मरन् पूरितंप्राणं धारयेत् । अकारमूर्त्तिं ध्यात्वा चत्वारिंशत्प्रणवं जपेत् । पश्चादिडया रेचयित्वा पुनः पूर्ववदिडया वायुमारोप्य पूरयित्वा धारयेत् प्रणवं संस्मरन् सव्याहृतिकां सप्रणवां गायत्रीम् अन्ते सशि-रस्कां त्रिर्जपेत् । एवं त्रिसंधिषु प्राणसंयमनं करोति ।

ततोऽग्निमंडलं प्रविश्य तत्रस्थपुरुषेण संयुज्य वह्निना सहवायुमारोप्य,पिंगलयाआदित्यमण्डलमनुप्रविश्य(तत्र स्थपुरुषेण संयुज्य) पश्चादिडया वायुमारोप्य,चन्द्रमण्डल मनुप्रविश्य, तत्रस्थपुरुषेण संयुज्य, ततोवह्निना कुण्डली मुखं तप्त्वा, वायुमारोप्य सुषुम्नयाचोर्ध्वं नीत्वा कण्ठ (न्द)मध्येस्थितं हृदयकमलमूर्ध्वमुखं विकासितं कृत्वा तत्र परमात्मानं नारायणं पश्यतीति विज्ञायते ।

इति श्रीवैखानसे मरीचिप्रोक्ते विमानार्चनाकल्पे यमनियमासनप्राणायामविधिर्नाम षण्णवतितमः पटलः ॥ ९६ ॥ (मातृकान्तरे ९१-प०)

(अथ सप्ततितमः पटलः)

(प्रत्याहारस्वरूपम्, तद्भेदः)

अथातः प्रत्याहारः पञ्चधा भवति । इन्द्रियाणां सर्वेभ्यो विषयेभ्यो बलादाहरणम्, आत्मनि सर्वमात्मव दीक्षमाणं, विहितकर्माणि (कर्मणां) बहिर्विनामनसाकृतं, पादांगुष्ठादिमूर्धान्तम् अष्टादशमर्मस्थानेषु वायुमारोप्य, धारयित्वा स्थानात्स्थनादूर्ध्वतोऽधस्ताच्च समाकर्षणं, नाडीमार्गेषु वायुमारोप्य, निरोधनमिति च ।

(अष्टादशमर्मस्थानानि तल्लक्षणम्)

पादांगुष्ठ गुल्फ जंघा(मध्य)चितिमूल जानू रुमध्य पायुमूल देहमध्य मेढ् नाभि हृदय कण्ठ तालु मूल नासिका मूला ऽक्षिमण्डल भ्रूमध्य ललाट मूर्धान इति अष्टादश स्थानानि ।

एतेषांप्रमाणं पादमानं सार्धचतुरंगुलं, तदव सान (गुल्फ) मंगुलं, ततोदशांऽगुलं जंघामध्यं, ततो दशांऽगुलं चितिमूलं, तद्व्यंगुलं जानु, ततो नवांगुल मूरुमध्यं, नवांऽगुलं पायुमूलं, तदर्धाधिकं त्र्यंगुलं देहमध्यं, ततो द्व्यर्धांगुलं मे (म्)मूलं, नाभिः चतुरंगुलम्, तदेकां

दशांगुलं हृन्मध्यम्, ततो द्वादशांगुलं कण्ठकूबरम्, षडंगुलं तालुमूलं। ततश्चतुरंगुलं नासिकामूलं, अक्षि मण्डलं द्व्यंगुलं, द्व्यंगुलं भ्रूमध्यं, ततो द्व्यंगुलं ललटान्तं त्र्यंगुलं मूर्धेति।

(तत्र वायुसंयमन प्रकारः)

एतेषु स्थानेषु मनसा वायुमारोप्य; स्थानात्समाकृष्य निरोधंचोर्ध्वतोऽधश्च यथाक्रमेण करोति। इडा पिंगलाभ्यां वायु मारोप्य,कुण्डलीपार्श्वयोः आपूर्य, नासाभ्या मुदरस्थं वायु मारोप्य, पूरयित्वा, भ्रूमध्ये कुचौसमारोप्य, धारयति। एवं नित्यं समाचरेत्। आत्मनः प्राण सुषुम्नया भ्रूमध्यान्तं समारोप्य, यावन्मण्डलोदयं तावत् संयमनं करोतीति विज्ञायते।

इति श्रीवैखानसे मरीचिप्रोक्ते विमानार्चनाकल्पे अयुतग्रन्थसंहितायां प्रत्याहारविधिर्नाम सप्तनवतितमः पटलः ॥ ९७ ॥ (मातृकान्तरे ९२)

(अथ अष्टनवतितमःपटलः)

(धारणलक्षणम्, शरीरे पृथिव्यादिस्थानम्, तत्रध्येयं रूपम्)

अथातो धारणानि अष्टधा भवन्ति। तेष्वात्मनि यमादिगुणयुक्तमनसास्स्थितिः, हृत्पद्मान्तराकाशे बाह्याकाशे धारणंच, पृथिव्यादि महाभूतेषु पञ्चसु देवानां पंच धारणानि, हृत्पद्ममध्ये परमात्मानन्दविग्रहधारणामिति।

पादादिजानुपर्यन्तं पृथिवीस्थानं तत्र लकारसंयुक्तं(नो) वायुमारोप्य,अनिरुद्धमूर्त्तिं ध्यात्वा,धारयेत्।जान्वोः(नोः)पायुपर्यन्तम् अपांस्थानं तत्रवकारसंयुक्तं वायुमारोप्य,अच्युतमूर्त्तिंध्यात्वा धारयेत्।पायोर्हृदयान्तमग्निस्थानं तत्र रेफयुतं वायुमारोप्य सत्यमूर्तिंध्यात्वा धारयेत्। हृदयात् भ्रूमध्यान्तं वायुस्थानं तत्र यकारसंयुक्तं वायुमारोप्य, पुरुषमूर्त्तिं ध्यात्वा धारयेत्। आभ्रूमध्यात् मूर्धान्तं व्योमस्थानं तत्र हकारसंयुक्तं वायुमारोप्य विष्णुमूर्त्तिं ध्यात्वा धारयेत्। एतेषांदेवानां ध्यानस्वरूपं पूर्वं नाडीष्वकारसंयुक्तं वायुमारोप्य हन्मध्ये प्रणवेन कार्यम्। स्वेस्वे संभृ(हृ)त्यकरणे प्रणवस्य नादान्ते परमानन्दविग्रहं परमात्मानं नारायणं शुद्धस्फटिकसंकाशं ध्यात्वा, धारयेत्। एतां धारणां नियमादिसंयुक्तः नित्यंवाचरेत्। इत्याह मरीचिः।

इति श्रीवैखानसे धारणाविधिर्नाम अष्टनवतितमः पटलः॥ ९८॥ (मातृकान्तरे ९३)

(एकोनवतितमःपटलः)

(ध्यानस्वरूपम्, तद्विभागः)

अथातो ध्यानं वक्ष्ये—परमात्मनो जीवात्मना चिंतनं ध्यानं, निष्कलं सकलमिति (तत्द्विविधम्) निष्कलं देवैरप्यनभिलक्ष्य मदृश्यंस्यात्। सकलंद्विविधं निर्गुणंसगुणंचेति। निर्गुणं निष्कलस्वभावः। परं-

मात्मनोन्यन्नाकिंचिदस्तीति काष्ठेअग्निरिव सर्वंव्याप्य आकाशोपमः सर्वेषां आत्मगुहायां निहितः अन्तर्बहिश्च संस्थितो दृश्यादृश्यस्थूलसूक्ष्मः अमलोऽत्यच्छः अप्रमेयो निरवयवो निरुद्योगो नित्योऽचिंत्यो निष्कलः तमेव प्राणायामप्रत्याहार धारणादात्मसंस्कारं कृत्वा आत्मना पश्येत् ।

मध्यदेहान्मूर्धपर्यन्तं भ्रुवोर्मध्ये अन्तरात्मानं नारायणं सर्वजगत्कारणम् अव्ययम् अव्यक्तम् एकरूप परंज्योति र्ज्वलति । अवभासयति । एकं निर्गुणध्यानम् 'नारायणपरंज्योति रात्मा नारायणःपरः' इति श्रुतिः। तस्मात्प्रधानपरमोऽव्ययो विष्णुस्सदा ध्येयः ।

निष्कलमेव प्राणायामैर्विकासितहृदयकमलांतराकाशे वैश्वानरशिखामध्ये परंज्योति र्ज्वालारूपवत् स्वयमेवपुरुषः कृष्णपिंगलः ऊर्ध्वरेता विरूपाक्षः विश्वरूपः परमानंदविग्रहो भवेत् । तं परमयाभक्त्या पश्येत् । तत्र सन्निहितो भवेत् । इति निर्गुणध्यानं भवतीति विज्ञायते॥ (मातृकान्तरे ९३प०)

अथ सगुणध्यानं वक्ष्ये---

प्राणमपानेन संयोज्य, तमनुप्रविश्य तत्र पुरुषं दृष्ट्वा, पुनः पिंगलया आदित्यमंडलमनुप्रविश्य, तत्रस्थ पुरुषंदृष्ट्वा,ततश्चेडया चन्द्रमण्डलमनुप्राविश्य, तत्र मण्डल

पुरुषं दृष्ट्वा ततो ज्वलिताऽग्निना कुण्डलीमुख(ख)ज्वलनेन दग्ध्वा, सुषुम्नयाचोर्ध्वंगत्वा, प्राणायामेन विकसित हृदयकमलांतराकाशे वैश्वानरशिखामध्ये चतुरश्रं हेमाभं बिन्दुनासह यकारबीजान्वितं माहेन्द्रमण्डलं तन्मध्ये अर्धचन्द्राऽऽकृतिं श्वेतं बिन्दुनासह वकारबीजान्वितं वारुणं (मण्डलं) ध्यात्वा, तन्मध्येप्रणववेष्टितं सुवर्णाऽऽभमादिबीजं स्मृत्वा, प्रज्वलितज्योतीरूपमेव भक्त्या सकलं संकल्प्य देवीभूषणायुधैस्सह परिषद्गणैस्सह कल्याणगुणनिधिं पूर्ववध्यायेत्। एतत्सगुणध्यानमुत्तमम्। सर्वसिद्धिप्रदं सर्वत्र प्रयोक्तव्यम्।

हृत्पद्मान्तराकाशे वैश्वानरशिखामध्ये अग्नि(अर्क) मण्डलं पूर्ववध्यात्वा, तन्मध्ये परंज्योतिरेव सकलं संकल्प्य, देवीभूषणायुधैः परिषद्गणैस्सहवृतं यज्ञमूर्त्तिं पूर्ववत् ध्यायेत्। अग्निहोत्रादिहोमः तदपि सगुणध्यानम्।

हृत्पद्मे वैश्वानरशिखामध्ये अर्कमंडलं पूर्ववत् ध्यात्वा, पद्ममध्ये परंज्योतिरेव सकलंसंकल्प्य, तरुणादित्यसंकाशं विष्णुं पूर्ववध्यायेत्। एतत्सगुणध्यानं सर्वत्र प्रयोक्तव्यम् सर्वसिद्धिप्रदम्।

हृदयकमलान्तराकाशे वैश्वानरशिखामध्ये सोममंडलं पूर्ववध्यात्वा, तन्मध्ये परंज्योतिरेव सकलं संकल्प्य,

शुद्धस्फटिकसंकाशं नारायणमूर्त्तिं ध्यायेत् । सगुणध्यानं सर्वसिद्धिप्रदं सर्वत्र प्रयोक्तव्यम् ।

एवं सगुणध्यानं चतुर्विधं भवति । एतानि वैदिक ध्यानमार्गाणि अन्यान्यवैदिकानि सर्वाणि जघन्यानि । तैःषड्भिःप्रकारैः भगवंतंनारायणं नित्यमभ्यसेत् । सर्वं समाधिना पश्यतीति विज्ञायते ।

इति श्रीवैखानसे मरीचिप्रोक्ते विमानार्चनाकल्पे ध्यानभेदविधिः नाम एकोनशततमः पटलः ॥ ९९ ॥ (मातृकान्तरे ९४)

(अथ शततमःपटलः)

(सामाधिस्वरूपम्-तत्फलम्)

अथातः समाधिं वक्ष्ये—जीवात्म(नः)परमात्मनो (त्मस) स्समावस्थासमाधिः । यथा अनुष्णोपलमादित्य-दर्शनादुष्णत्वमाश्रितमिव (तथा) परामात्मदर्शनात् प्रत्यगात्मा नित्यशुद्धबुद्धमुक्तस्वभाव (क) परमानन्दमयत्वं प्राप्य, परमात्मानं नारायणं सदापश्यत्यनुभवत्येव । अष्टांऽगयोगमार्गेण नित्यमणिमाद्यैश्वर्यंच प्राप्नोति । जीवन्मुक्तो भवेत् ।

(देहत्यागप्रकारः)

अथवांऽत्यकाले सर्वद्वाराणि संयम्य, प्राणमपानेन संयोज्य, शोधयित्वा, सर्वेषु नाडीमार्गेषु निरुध्य

य इमं ज्ञानयोगाख्यं खण्डं श्रद्धापुरःसरम् । पठते सुमुहूर्तेषु न स भूयोऽभिजायते ॥ ५८ ॥
ज्ञानार्थी ज्ञानमाप्नोति सुखार्थी सुखमाप्नुयात् । वेदकामी लभेद्वेदं विजयार्थी जयं लभेत् ॥ ५९ ॥
राज्यकामो लभेद्राज्यं क्षमाकामः क्षमी भवेत्[1] । तस्मात्सर्वेषु कालेषु पठितव्यो मनीषिभिः[2] ॥ ६० ॥

इति श्रीस्कन्दपुराणे सूतसंहितायां ज्ञानयोगखण्डे समाधिर्नाम विंशोऽध्यायः ॥ २० ॥

सूतो मुनीन्संबोध्याऽऽह–**इत्येवमुक्त्वेति** ॥ ५१–५४ ॥ कृतकृत्यस्य किं स्थापनप्रवृत्त्याऽपीत्यत आह–**यो हि स्थापयितुमिति** । स्वयं कृतकृत्येनापि परमकारुणिकेन शत्रोरपि भवदल्पमप्यनिष्टं न सोढव्यं किमुत सकललोकस्य प्राप्तं विद्यासंप्रदायोच्छेदलक्षणं महत्तरमनिष्टमित्यर्थः ॥ ५५–६० ॥

संहितायाश्च सूतस्य व्याख्यां तात्पर्यदीपिकाम् । सुस्थिरामनुगृह्णातु विद्यातीर्थमहेश्वरः ॥ १ ॥

इति श्रीमत्काशीविलासश्रीक्रियाशक्तिपरमभक्तश्रीमत्त्र्यम्बकपादाब्जसेवापरायणेनोपनिषन्मार्गप्रवर्तकेन श्रीमाधवाचार्येण विरचितायां श्रीसूतसंहितातात्पर्यदीपिकायां ज्ञानयोगखण्डे समाधिनिरूपणं नाम विंशोऽध्यायः ॥ २० ॥

–समाप्तमिदं ज्ञानयोगखण्डम्–

भक्ति है उसे निश्चित ही ये सब विषय समझ आ जाते हैं ॥ ५० ॥

सूतजी बोले–हे मुनियों ! करुणासागर भगवान् ने इतना कहकर अन्य कुछ बताने योग्य विषय बचा न समझ मौन धारण किया ॥ ५१ ॥ बृहस्पति ने भी वेदान्तश्रवण से परमानन्द में स्थिति पायी ॥ ५२ ॥ आप लोगों ने भी मुझसे आत्मज्ञान प्राप्त किया है, अतः आप सभी कृतकृत्य हो गये हैं, इसमें शंका मत कीजिये ॥ ५३ ॥ मोक्ष के इस घण्टापथ को अध्ययन, आचरण, निश्चय और प्रचार द्वारा स्थापित कीजिये । वैदिक मार्ग दृढतापूर्वक प्रतिष्ठित होने से सब कुछ स्थिर होता है ॥ ५४ ॥ जो इस मार्ग की स्थापना में समर्थ हो और आलस्यादिवशात् इसके लिये प्रयास न करे, उसे यदि कोई अन्य व्यक्ति मार भी दे तो अधिक दोष का भागी नहीं होता यह वेदान्तों का निर्णय है ॥ ५५ ॥ जो व्यक्ति असमर्थ होने पर भी श्रद्धा से प्रेरित हो इसकी स्थापना का प्रयास करता है वह सब पापों से रहित हो तत्त्वज्ञान पा ही लेता है ॥ ५६ ॥ जो तार्किकंमन्य वेदमार्ग के प्रवर्तक को असद्-युक्तियों से हराता है वह महापापी है ॥ ५७ ॥

जो श्रद्धालु शुभ समय में इस ज्ञानयोगखण्ड का अध्ययन करता है उसे पुनः गर्भवास नहीं करना पड़ता ॥ ५८ ॥ ज्ञानेच्छुक इसके पाठ से ज्ञान प्राप्त करता है, सुखप्रार्थी सुख पाता है, वेद चाहने वाले को वेद कण्ठ करने की सामर्थ्य मिल जाती है, विजयकामी की जीत होती है, राज्येच्छुक को राज्य और सहनशीलता चाहने वाले को उसीकी प्राप्ति हो जाती है । अतः बुद्धिमानों को हर समय इसका पठन करना चाहिये । ॥ ५९–६० ॥

–ज्ञानयोग खण्ड पूरा हुआ–

---

१. "मः क्षमां लभेत् । यद्यदिच्छेच्च मनसा तत्तदेव फलं लभेत् ॥ इति वाल. पाठोधिकः । २. गुणान्विताय शिष्याय प्रदेयोऽयं प्रयत्नतः ॥ इति तत्राधिकम् ।

रेकात्मकं जगुः ॥१६॥ अतश्चित्तलयेनैवाऽहं गणेशो न संशयः । चित्तपंचकमुत्सृज्य पूर्णयोगमवाप्नुयात् ॥१७॥ तत्र समाधिजं सौख्यं वदामि युक्तिभावतः । गणेशोऽहं तदाकारो भवामि यदि योगतः ॥१८॥ तदा संयोगजः प्रोक्तोऽनुभवो योगिनां हृदि । यदाऽहं गणनाथश्चेन्नागतो न गतः कदा ॥१९॥ तदा ह्ययोगजः प्रोक्तोऽनुभवः शांतिदायकः । अतोऽयोगमयो योगः कथं तत्र प्रवर्तते ॥२०॥ चित्तं नानाविधं दक्ष संयोगायोगधारकम् । योगे योगात्मकोऽहं च तदा शांतिः प्रलभ्यते ॥२१॥ शांतीनां शांतिरूपा सा योगशांतिः प्रजापते । तस्मात् परं विद्यते न ब्रह्म योगात् सुनिश्चितम् ॥२२॥ अतोऽयं गणनाथस्तु ब्रह्मणस्पतिरुच्यते । संयोगाऽयोगकादीनां ब्रह्मणां पातृभावतः ॥२३॥ एतत् सर्वं समाख्यातं रहस्यं परमाद्भुतम् । गजाननस्य ते दक्ष प्रकृतं शृणु सांप्रतम् ॥२४॥

॥ ॐमिति श्रीमदान्त्ये पुराणोपनिषदि श्रीमन्मौद्गले महापुराणे नवमे खंडे योगचरित्रे गणेशस्वरूपवर्णनं नाम तृतीयोऽध्यायः ॥

॥ श्रीगणेशाय नमः ॥ तपसा भक्तिभावेनागतं दृष्ट्वा गजाननम् । अयोगो हर्षितोऽत्यंतमुत्थाय प्रणनाम तम् ॥ १ ॥ ततः पूज्य गणेशानं प्रभुं नानोपचारकैः । पुनः प्रणम्य विघ्नेशं तुष्टाव करसंपुटः ॥२॥ अयोग उवाच । शांतिस्वरूपाय सुशांतिदाय वाणीमनोहीनतमाय ढुंढे । वाणीमनोयुक्तविचारिणे वै योगाय योगाधिपते नमस्ते ॥३॥ वाणीमनोयुक्तमयं वदामि नो विश्वरूपोऽसि कथं स्तवीमि । नित्यं गणेशाय नमो महात्मन् योगाय योगाधिपते नमस्ते ॥४॥ वाणीमनोहीनमयं कथं त्वां ब्रुवेऽद्य संयोगमयं कदा च । नो योगरूपं त्वथ ते नमो वै योगाय योगाधिपते नमस्ते ॥५॥ त्वत्तः प्रसूतानि महानुभाव ब्रह्माणि विश्वानि पराणि भूयः । त्वय्येव लीनानि ह्यभिन्नभावाद्योगाय योगाधिपते नमस्ते ॥६॥ नित्यं ह्ययोगाय निवृत्तिदाय मायाविहीनाय गणाधिपाय । वाणीमनोहीनतया सुलभ्य योगाय योगाधिपते नमस्ते ॥७॥ स्वानंदरूपाय सुशांतिदाय सिद्ध्या च बुद्ध्या सह खेलकाय । वाणीमनोहीन निजात्मलभ्य योगाय योगाधिपते नमस्ते ॥८॥ अव्यक्तरूपाय च साहजाय मोहेन हीनाय सदा शिवाय । त्रैविध्यनाथाय च नेति कर्त्रे योगाय योगाधिपते नमस्ते ॥९॥ सामान्यरूपाय त्रयीमयाय द्वंद्वप्रकाशाय च विष्णवे ते । आनंदनाथाय सुखेलकाय योगाय योगाधिपते नमस्ते

॥१०॥ आत्मस्वरूपाय सदाऽमृतस्थयोगेन संलभ्यतमाय भानो। भेदैर्विहीनाय च जीवनाय योगाय योगाधिपते नमस्ते ॥११॥
नानाप्रभेदेषु च तन्मयाय सर्वस्वरूपाय च शक्तये ते। आनंत्यभावैश्च सुमोहदाय योगाय योगाधिपते नमस्ते ॥१२॥ साक्षि-
स्वरूपाय च सांख्ययोगलभ्यस्वरूपाय सदात्मसंस्थ । बोधेन हीनाय परात्पराय योगाय योगाधिपते नमस्ते ॥१३॥
बोधस्वरूपाय संख्याविहारकर्त्रे सदा पालकभावधारिन् । त्रैविध्यनाथाय महोदराय योगाय योगाधिपते नमस्ते ॥१४॥
सोहंस्वरूपाय च चिन्मयाय मोहेन युक्ताय च हीनकाय । देहिस्वरूपेण विहारकर्त्रे योगाय योगाधिपते नमस्ते ॥१५॥
बिंदुप्रचुराय चतुष्पदाय चतुर्विधेषु प्रभवाय तुभ्यम् । आनंत्यतत्त्वाय च देहभोक्त्रे योगाय योगाधिपते नमस्ते ॥१६॥
तुर्यात्मदेहाय लयात्मकाय कालस्वरूपाय गणेश्वराय । नादात्मकायाऽथ त्रिदेहगाय योगाय योगाधिपते नमस्ते ॥१७॥
आनंदकोशात्मकसंस्थिताय प्राज्ञाय सौषुप्तमयाय तुभ्यम् । नित्येश्वरायैव तयोः प्रचारिन् योगाय योगाधिपते नमस्ते ॥१८॥
सर्वांतरस्थाय च सूक्ष्मकाय स्वप्नप्रचुराय च तैजसाय। हिरण्यगर्भाय तयोः प्रचारिन् योगाय योगाधिपते नमस्ते ॥१९॥ बाह्य-
स्थितायान्नमयाय विश्ववैश्वानरायैव तयोः प्रचारिन् । स्थूलस्वरूपाय च जागृदास्थ योगाय योगाधिपते नमस्ते ॥२०॥ विश्वस्य
द्वैविध्यमयाय तुभ्यं नानाऽऽदिरूपाय च खेलकाय। शक्तेश्च धात्रे हरये शिवाय योगाय योगाधिपते नमस्ते ॥२१॥ एते
गणेशाधिपते कलांशा विघ्नेश्वरास्ते गणनायकाय। न त्वं सदैतैः सहितो हि तुभ्यं योगाय योगाधिपते नमस्ते ॥२२॥
स्तुमः कथं नाथ गणेशरूपं संयोगहीनं च ह्ययोगहीनम् । नादात्म्यरूपं भव तुष्टचित्तं योगाय योगाधिपते नमस्ते ॥२३॥
मुद्गल उवाच । एवं स्तुत्वा गणेशानं प्रणनाम कृतांजलिः । अयोगस्तं गणाधीशो जगाद घननिःस्वनः ॥२४॥ गणेश उवाच ।
वरान् वृणु महाभाग मनसीप्सितरूपकान् । दास्यामि भक्तितुष्टोऽहं स्तोत्रेणानेन योगप ॥२५॥ त्वया कृतमिदं स्तोत्रं
योगशांतिपदप्रदम् । पठतां शृण्वतां नित्यं नानासिद्धिप्रदं भवेत् ॥२६॥ यं यमिच्छसि तं तं वै दास्यामि स्तोत्र-
पाठतः। मयि प्रीतिकरं चास्तु भक्तिभावप्रदं तथा ॥२७॥ एकविंशतिवारं चैकविंशति दिनावधि। पठेत् तस्य सर्वं च
दास्यामि दुर्लभं हि चेत् ॥२८॥ एवमुक्त्वा गणेशानः सस्वजे तं गणाधिपम्। अयोगरूपिणं हर्षसंयुक्तं प्रचकार
ह ॥२९॥ ततोऽयोगो गणाध्यक्षं प्रणम्य च पुनः पुनः । जगाद भक्तिसंयुक्तो हृष्टरोमा सुहर्षितः ॥३०॥ अयोग उवाच ।
यदि ढुंढे वरान् मे त्वं दास्यसि भक्तिमोहितः । तदा ते पादयुग्मे मे भक्तिं देहि दृढां पराम् ॥३१॥ पूर्णयोगस्वरूपस्थं मां

कुरुष्व गजानन । मुक्तं मुक्तस्वरूपस्थं नाथ नेच्छामि ते नमः ॥३२॥ मुद्गल उवाच । अयोगगणराजस्य श्रुत्वा वचनमुत्तमम् ।
जगाद तं गणेशानस्तथेत्यंतर्हितोऽभवत् ॥३३॥ अयोगस्तं हृदि स्थाप्य भजनेऽनन्यमानसः । अंते योगमयः सोऽपि बभूव
मोक्षनायकः ॥३४॥ इति ते सर्वमाख्यातं चरितं गणपस्य यत् । पूर्णयोगधरस्यापि समासेन प्रजापते ॥३५॥ अतस्त्वं
गणराजं तं भजस्व भक्तिसंयुतः । तेन यज्ञमिमं पूर्णं करिष्यसि न संशयः ॥३६॥ अंते योगयुतश्चैव ब्रह्मभूतो भविष्यसि ।
आज्ञां देहि गमिष्यामि त्वदातिथ्यसुतोषितः ॥३७॥ रहस्यं गणनाथस्य कथितं सकलं मया । नान्यत किंचिदतो दक्ष परं
वेदादिसंमतम् ॥३८॥ शृणुयाद्यः पठेद्वापि स सर्वं प्राप्नुयाच्छुभम् । अंते योगमयो भूत्वा संतिष्ठेत गणपात्मकः ॥३९॥

॥ ओमिति श्रीमदान्त्ये पुराणोपनिषदि श्रीमन्मौद्गले महापुराणे योगचरिते नवमे खंडे पूर्णयोगचरितवर्णनं नाम चतुर्थोऽध्यायः ॥

॥ श्रीगणेशाय नमः ॥ दक्ष उवाच । धन्योऽहं कृतकृत्योऽहं कृतस्त्वया महामुने । येन गणेशमाहात्म्यं श्रावितं योगदायकम् ॥१॥ गणेशगीतासारादि कथितं तु विशेषतः । ज्ञानं योगप्रदं पूर्णं संक्षेपेण त्वया परम् ॥२॥ तत्र बुद्धं मया सर्वमतः सौलभ्यतो वद । योगं क्रमयुतं पूर्णं येन योगी नरो भवेत् ॥३॥ सूत उवाच । एवं पृष्टो महायोगी मुद्गलस्तमुवाच यत् । हर्षेण महता युक्तस्तत्तेऽहं कथयामि तु ॥४॥ मुद्गल उवाच । धन्योऽसि कृतकृत्योऽसि साक्षाद्गणपतेः किल । विभूतिवाचकस्तत्र न चित्रमिदमुत्तमम् ॥५॥ त्वया पृष्टं महाभाग लोकोपकारकारकम् । सर्वेषां सुलभत्वेन योगशांतिपदप्रदम् ॥६॥ कथयामि च ते प्रीत्या गुह्यं वेदरहस्यकम् । शृणुष्वैकमना दक्ष योगं शांतिप्रदायकम् ॥७॥ चित्तं पंचविधं प्रोक्तं तेषु पंचविधो रसः । सरसं चित्तमुत्सृज्य योगी भवति मानवः ॥८॥ क्षिप्तं मूढं च विक्षिप्तमेकाग्रं च निरोधकम् । चित्तं पंचविधं विद्धि जगत्सु ब्रह्मसु स्थितम् ॥९॥ व्यष्टिभावे स्थिता ये तु जंतवो विविधात्मकाः । लक्षचतुरशीतिषु योनिषु संभवाः किल ॥१०॥ देहभोगादिमार्गेषु कुशलाः संभवंति ये । तेषु स्वस्वप्रपंचेषु नानाकार्यपरायणाः ॥११॥ तैः क्षिप्तं कार्यसिद्ध्यर्थं चित्तं कार्येषु नित्यदा । तत्तत्कार्यप्रकाशेन प्रकाशयति तान् हृदि ॥१२॥ तेन कार्येषु दक्षास्ते भवंत्यत्र न

संशयः । तदेव क्षिप्तसंज्ञं त्वं चित्तं जानीहि मानद ॥१३॥ केचित् स्वल्पज्ञकास्तेषु केचिज्ज्ञानाधिका मताः । मध्यमाः केचिदेवं तु नानाभेदाश्रिता नराः ॥१४॥ त्रिविधेषु विभागेषु स्थिता नानाविभेदतः । नानाज्ञानयुतास्तेषां रूपं न कथितुं क्षमम् ॥१५॥ लक्षचतुरशीतिषु जंतवो विविधात्मकाः । व्यष्टिस्थाः सर्वकार्येषु ज्ञानहीना भवंति ये ॥१६॥ ते मूढाः कथ्यते लोकैर्विषये चतुरैः सदा । तेषु नानाविधा भेदा अल्पाधिकसुमध्यमाः ॥१७॥ तेषां प्रकाशकं चित्तं नानामूढ-स्वभावगम् । तदेव मूढसंज्ञाख्यं चित्तं ज्ञानक्षयमंजसा ॥१८॥ परैः संबोधितो जंतुर्न बुबोध विचारतः । कार्यं नानाविधं तस्य चित्तं मूढं प्रकीर्तितम् ॥१९॥ व्यष्टिस्था ये नरा दक्ष स्वधर्मनिरताः सदा । नानातपःपरा भूत्वा मुक्तिमिच्छंति शाश्वतीम् ॥२०॥ विषयेषु विरज्यैव सदा ब्रह्मपरायणाः । कुर्वंति विविधं कर्माऽहर्निशं मुक्तिकारणात् ॥२१॥ तदपि ब्रह्म हृदये न दृष्टं तैर्महात्मभिः । न संसारसुखे चित्तं तेषां रमति कर्हिचित् ॥२२॥ अतो विक्षिप्तचित्तास्ते मता योगि-जनैः पुरा । ब्रह्मार्पणक्रियाः सर्वाः कुर्वन्त्यंतरबाह्यजाः ॥२३॥ विशेषेणैव क्षिप्तोऽहं संसारे मायया सदा । विगतक्षेपणं सर्वं नानासाधनभावतः ॥२४॥ तेषां मुक्त्यर्थमत्यंतं प्रकाशयति भावनाम् । चित्तं क्रियात्मिकां तेन विक्षिप्तं तत्प्रकीर्ति-तम् ॥२५॥ तत्र नानाक्रियायाश्च सामर्थ्येन विमोहितः । जानाति देवतां तुष्टां ममोपरि न संशयः ॥२६॥ कदा देव-प्रसादादि गृह्य विक्षेपसंयुतः । अनाधारां क्रियां कुर्याद्देवाज्ञावशगो मुधा ॥२७॥ स्वप्नेषु विविधान् भावान् पश्यति तद्गतचेतसा । सत्यं स्वप्नं मदीयं तु मान्यं तादृशजं चरेत् ॥२८॥ एवं विक्षिप्तभावेन मोहितः स कदाचन । अनाधारं करोत्येव नानातपःप्रभावतः ॥२९॥ समष्टिव्यष्टिसंस्थं यच्चित्तं वैराटगं परम् । तेन व्यष्टिं समाव्याप्य भुंक्ते स विविधं सुखम् ॥३०॥ वैराटस्य क्रिया प्रोक्ता व्यापिका शास्त्रसंमते । तत्र व्यापकभावस्य चित्तं प्रकाशदं मतम् ॥३१॥ तत्त्वेषु विविधेष्वेव स्थूलसूक्ष्मादिगेषु च । व्यापकभावकाशत्वाच्चित्तं तेषु स्थितं मतम् ॥३२॥ समष्टिव्यष्टिसंयोगेऽत्र ब्रह्म स्थूलगं परम् । तथा स्वप्नगतं सूक्ष्मं सौषुप्तं समसंस्थितम् ॥३३॥ चेतनाभावगं पूर्णं तद्वन्नादात्मकं मतम् । अस्मिताख्यं परं ब्रह्म तेषु चित्तं प्रकीर्तितम् ॥३४॥ समष्टिव्यष्टिभागस्य तयोरैक्यस्य च प्रभो । प्रकाशकारकं विद्धि चित्तमेकाग्रसंज्ञितम् ॥३५॥ समष्टिव्यष्टिभावेषु न भिन्नं भवतीत्यहो । तेनैकाग्रं समाख्यातं चित्तं तज्ज्ञानकारकम् ॥३६॥ देहश्चतुर्विधः प्रोक्तः स्थूलः सूक्ष्मः समात्मकः । अस्मिताख्यश्चतुर्थश्च तेषु देही स्थितो मतः ॥३७॥ देहेषु मोहितो देही जीव इत्यभिधीयते ।

मोहहीनः स एवाऽपि शिवः प्रोक्तो मनीषिभिः ॥३८॥ जीवशिवात्मिका संज्ञा देहिनो भ्रममात्रतः । सदैकात्मस्वभावत्वात्तत्र भेदो न विद्यते ॥३९॥ तत्र जीवशिवाकारभावप्रकाशकारकम् । चित्तमेकाग्रसंज्ञाख्यं तिष्ठति देहिसंश्रितम् ॥४०॥ तास्मितायाः परं चित्तमेकाग्रं विद्यते न वै । देहदेहिमयं चित्तमेकाग्रं योगिनां मते ॥४१॥ चतुर्णां वपुषां यत्र ब्रह्माकारेण जायते । संयोगो बिंदुरूपं तज्ज्ञानत्वं ब्रह्म सर्वगम् ॥४२॥ चतुष्पदं बुधैः प्रोक्तं चतुर्भिर्वर्जितं सदा । देहानां ब्रह्म विख्यातं नानादेहस्वभावगम् ॥४३॥ तत्र चतुष्पदाकारभावप्रकाशकारकम् । चतुर्भिर्वर्जितस्यैव चित्तं तिष्ठति तद्गतम् ॥४४॥ देहेषु न भवेद्भिन्नं सर्वगात्मस्वभावतः । निरोधं कथ्यते चित्तं बिंदुधर्मप्रकाशकम् ॥४५॥ जीवशिवात्मभावस्थं मोहहीनं सदात्मगम् । ब्रह्म सोऽहं समाख्यातं सदा भ्रांतिविवर्जितम् ॥४६॥ तत्र जीवशिवाकारमोहहीनप्रकाशकम् । चित्तमात्मस्वरूपस्थं निरोधं कथ्यते बुधैः ॥४७॥ देहदेहिसमायोगे स्वत उत्थानमुच्यते । बोधाख्यं द्वंद्वभावेन ब्रह्म खेलकरं सदा ॥४८॥ तत्र निरोधकं चित्तं तस्य रूपं वदाम्यहम् । संक्षेपेण प्रजानाथ शृणु भावसमन्वितः ॥४९॥ बाह्यं स्थूलं समाख्यातमांतरं सूक्ष्मगं मतम् । बाह्यांतरैकभावस्थमानंददेहगं परम् ॥५०॥ त्रिभिर्हीनं त्रयाणां च चालकं ह्यस्मितात्मकम् । अहमानुभवेनैतज्ज्ञानत्वं योगिनां हृदि ॥५१॥ तेषां संयोगभावे यच्चतुर्णां वपुषां परम् । सर्वात्मकं भवेद्ब्रह्म पंचमं बिंदुसंज्ञितम् ॥५२॥ चतुर्विधा नरस्यैव कल्पना हृदि संस्थिता । अतः परं न भेदोऽस्ति भवेद्येनास्य कल्पना ॥५३॥ बिंदुत्यागे निरालंबं चित्तं भवति सर्वदा । सततं तत् समाख्यातं ब्रह्म ध्यातृविहीनतः ॥५४॥ न किंचिज्ज्ञायते यत्र भेदहीनप्रभावतः । सोहं मात्रात्मकं चित्तं निरालंबसमाधिदम् ॥५५॥ अवलंबनगं चित्तं चतुर्धा देहिसंश्रितम् । अवलंबनहीनं तद्देहिगं चिन्मयं भवेत् ॥५६॥ निरालंबपरित्यागेऽधिकसंरोधनं भवेत् । चित्तस्य देहदेहिभ्यां हीनत्वान्नात्र संशयः ॥५७॥ मनोवाणीविहीनं तच्चित्तं ज्ञानत्वमादरात् । अस्तिनास्तिविहीनत्वादाधाराधेययोगतः ॥५८॥ अवलंबनयोगो न पंचधा योगिनां हृदि । निरालंबनकं तस्मात् मनोवाणीविवर्जितम् ॥५९॥ बोधेन बुध्यते सर्वं निरालंबं समाधिना । अवलंबनकं तद्वद्बोधबोधो न विद्यते ॥६०॥ एवं बोधात्मकं ब्रह्म देहदेहिसमाधिदम् । देहदेहिसमायोगप्रकाशं चित्तमुच्यते ॥६१॥ देहसौख्यं प्रजानाति देहिसौख्यं निरंतरम् । तयोर्योगे च यत् सौख्यं जानाति ब्रह्म बोधगम् ॥६२॥ पदानां बोधभावेन पदार्थानां विशेषतः । उत्थानं जायते तस्मात् स्वत उत्थानमुच्यते ॥६३॥ सुखं ज्ञात्वा समुत्थानं स्वयमेव करोति यः । देहदेहि च सृष्ट्वा स खेलति ब्रह्म-

तत्परः ॥६४॥ तत्रोत्थानप्रकाशाख्यं चित्तं निरोधसंज्ञकम् । तिष्ठत्यत्र न संदेहो ज्ञातव्यं योगिनां हृदि ॥६५॥ बोधत्यागे समाख्यातं ब्रह्म सांख्यं प्रजापते । कः संख्यां कुरुते तस्य बोधनाशप्रभावतः ॥६६॥ उत्थानवर्जितं ब्रह्म सांख्यं साक्षिस्वभावगम् । बोधहीनात् कदा तत्रोत्थानं नैव प्रजापते ॥६७॥ प्रकृतिसंभवं बोधं तयोः पुरुषसंभवम् । योगसौख्यं न जानाति सांख्यं बोधविहीनतः ॥६८॥ बुद्ध्वा सुखं नरस्यैवोत्थानं यथा प्रजापते । तथा मायासुखं ज्ञात्वा ब्रह्मणोत्थानकं भवेत् ॥६९॥ तथा परत उत्थानं सांख्ये नित्यं प्रतिष्ठितम् । तत्र योगं प्रवक्ष्यामि येन योगी नरो भवेत् ॥७०॥ यद्युत्थानसमायुक्तं भवति चेत्तदा भवेत् । उत्थानवर्जितं दक्ष तदेवं बीजमाद्यकम् ॥७१॥ उत्थानहीनभावेन सदा सांख्यं विराजति । स्वयं च स्वत उत्थानं निःसृतं तत् प्रभावतः ॥७२॥ सांख्येन न कृतं चैतत्तथाप्युत्थानहीनतः । स्वयं च स्वत उत्थानं जायते नात्र संशयः ॥७३॥ यदाऽसृतं भवेद्दक्ष तदा सत्यं प्रकीर्त्यते । एकं ब्रह्म यदा तिष्ठेत् सत्यं तत् केन कथ्यते ॥७४॥ न दृष्टमसृतं येन न जानाति स सत्यकम् । सदा तादृशरूपत्वादेकभावप्रदर्शनात् ॥७५॥ अत उत्थानहीनत्वं धृतं तेन विशेषतः । स्वत उत्थानभावाख्यं स्वयमेवोपजायते ॥७६॥ न कृतं तेन सांख्येन स्वयमेव विनिःसृतम् । अतः परत उत्थानं प्राप्तं तत्र न संशयः ॥७७॥ संख्याहीनप्रकाशाख्यं चित्तं तत्र प्रवर्तते । बोधहीनप्रकाशेन ज्ञायते तन्निरोधकम् ॥७८॥ उत्थानेन युतं ब्रह्म बोधमयं प्रकीर्तितम् । सांख्यमुत्थानहीनं च तयोर्योगे निजात्मकम् ॥७९॥ स्वतः परत उत्थानं तत्र नैव प्रजापते । जगतां ब्रह्मणां योगे भवति स्वस्वरूपकम् ॥८०॥ स्वस्वरूपात् परो नास्ति संयोगः तन्मयः कदा । स समाधिः समाख्यातो ब्रह्मणस्यान्वयात्मकः ॥८१॥ स्वकीयाभेदभावस्य तत्र प्रकाशकारकम् । चित्तं निरोधसंज्ञं तु तिष्ठत्यत्र न संशयः ॥८२॥ संयोगः पञ्चधा दक्ष भवति शृणु रूपकम् । तस्य भिन्नं प्रवक्ष्यामि लोकानां हितकारणात् ॥८३॥ एते भेदाः समाख्याता योगेन लयतां ययुः । स्वसंवेद्येन संदेहस्तेन सृष्टाश्च पालिताः ॥८४॥ एतेषां रूपमास्थाय खेलति स्वस्वरूपकम् । नानालीलाकरं प्रोक्तं तदेवं वेदवादिभिः ॥८५॥ उत्पत्तिनाशसंयुक्ता भेदा एते मनीषिभिः । तेषां निजस्वभावत्वादसत्त्वानंद उच्यते ॥८६॥ तद्ब्रह्म शक्तिरूपाख्यं ज्ञातव्यं भेदधारणात् । तत्रासत्काशभावेन चित्तं तिष्ठति निश्चितम् ॥८७॥ एतैर्भेदैर्विहीनं यदसृतं ब्रह्म कथ्यते । एतेषां जीवनं नित्यं तच्च सत्स्वस्वरूपकम् ॥८८॥ तद्ब्रह्म सौरमाख्यातं भेदहीनप्रभावतः । तत्र

तिस्यस्य काशाख्यं चित्तं निरोधकं मतम् ॥८९॥ असत् सत् द्विविधं प्रोक्तं तयोर्योगे समात्मकम् । स्वसंवेद्यं परं ब्रह्म विष्णु-द्वंद्वप्रवेशनात् ॥९०॥ तत्रानंदप्रकाशाख्यं चित्तं निरोधसंज्ञितम् । तिष्ठते तेन योगींद्रास्तं गच्छंति समाधिना ॥९१॥ त्रिभिर्हीनं त्रिभिर्युक्तमव्यक्तं नेति कारकम् । मोहहीनप्रभावेण तुरीयं ब्रह्म कथ्यते ॥९२॥ तदेव शिवसंज्ञाख्यं ज्ञानवर्यं योगसेवया । तत्र नेति प्रकाशाख्यं चित्तं तिष्ठति तद्गतम् ॥९३॥ त्रिविधं मोहसंयुक्तं मोहहीनं चतुर्थकम् । तेषां संयोग-भावे वै स्वसंवेद्यं प्रकीर्तितम् ॥९४॥ पूर्णसंयोगभावाख्यं पंचमं ब्रह्म तत् स्मृतम् । तस्मात् परो न संयोगः कथ्यते योगिभिः सदा ॥९५॥ स एव गणनाथस्तु स्वानंदाख्यः प्रकीर्तितः । तत्र निजप्रकाशाख्यं चित्तं तिष्ठति सर्वगम् ॥९६॥ अतः परमयोगाख्यं ब्रह्म मायाविवर्जितम् । तदेव योगिभिः प्रोक्तं निवृत्तिसुखदायकम् ॥९७॥ न तत्र जगतां दक्ष ब्रह्मणां योग उच्यते । तस्याऽपि तेषु तद्वच्च तेनायोग इति स्मृतः ॥९८॥ ब्रह्मणि तन्मयत्वेन स्वस्य संयोग उच्यते । तस्मान्नि-वृत्तिरापन्ना तेन निवृत्तिसंज्ञकम् ॥९९॥ स्वसंवेद्यस्य नाशेन लभ्यते व्युत्समाधिना । नाऽगतं न गतं ब्रह्म संयोगः कुत्र जायते ॥१००॥ तत्रायोगप्रकाशाख्यं चित्तं निरोधसंज्ञितम् । तिष्ठति चापवादेषु निवृत्तिसुखदायकम् ॥१॥ इदं पंचविधं चित्तं कथितं ते प्रजापते । जगत्सु ब्रह्मसु तज्ज्ञं नानाप्रकाशदायकम् ॥२॥ भूमयः पंच विख्यातास्त्रिचित्तस्य विविधात्मनः । भूमीनां त्यागभावे तच्चित्तं ब्रह्ममयं भवेत् ॥३॥ अतः पंचविधं चित्तं त्यज त्वं योगसेवया । योगी भविष्यसि दक्ष चिंतामणौ न संशयः ॥४॥ संयोगायोगसंज्ञस्थं निरोधाख्यं मतं बुधैः । अतः परो निरोधो न विद्यते सर्वसंमते ॥५॥ सार्वभौमात्मधर्मेण योगी भवति मानवः । तत्र शांतिं लभेच्चित्तं त्यक्त्वा भूमिभवं भ्रमम् ॥६॥ योगरूपे सुखं यद्वै योगिनां हृदि वर्तते । तदेव कथितुं दक्ष शक्यते न कदाचन ॥७॥ मनोवाणीमयं चित्तं चतुर्विधं प्रकीर्तितम् । मनोवाणी-विहीनं तु निरोधसंज्ञकं मतम् ॥८॥ अतो योगः समाख्यातो मनोवाणीमयो न च । मनोवाणीविहीनोऽपि कथ्यते नैव योगिभिः ॥९॥ कीदृशं ब्रह्म तत्राहं योगेन कीदृशेन च । ब्रह्मभूतः स्वयं जात एभ्यः शांतिं लभेन्नरः ॥११०॥ योगे योगी नरो जानस्तत्र न ज्ञायते कदा । ब्रह्म वा साधनं किंचिद्ब्रह्मभूतस्य कारकम् ॥११॥ तन्मयत्वं ब्रह्मणि न न च तन्मयवर्जनम् । अतः शांतिं समागृह्य शांतियोगपरो भवेत् ॥१२॥ पंचविधेषु चित्तेषु दृश्यते जगतां परम् । ब्रह्मणामैश्वरं सौख्यं रसं तत्र न धारयेत् ॥१३॥ नानारसविहीनं तु चित्तं कृत्वा प्रजापते । तत्त्यक्त्वा स भवेद्योगी शांत्या शांतिमवाप्नुयात् ॥१४॥

स्रोतसोऽर्णवमानंदाद्रक्षंत्यप्रेरितान्यपि । प्रारब्धेन तथा कामान् भुनक्ति योगिसत्तमः ॥१७॥ नानाद्वंद्वविहारेषु समभावपरायणः । योगी भवति शांत्या च सदा योगसुखे रतः ॥१८॥

॥ ॐ तत्सदिति श्रीमदांत्ये पुराणोपनिषदि श्रीमन्मौद्गले महापुराणे नवमे खंडे योगचरिते मुद्गलदक्षसंवादे योगामृतार्थशास्त्रे चित्तभूमिनिरोधनं सार्वभौमयोगो नाम पंचमोऽध्यायः ॥

॥ इति योगगीतासूपनिषत्सु स्मृतासु प्रथमोऽध्यायः ॥

॥ श्रीगणेशाय नमः ॥ दक्ष उवाच । योगस्यानुभवं ब्रूहि यत्र शांतिं लभेत मनः । स्वं त्यक्त्वा सुशांत्या तद्युक्तं तिष्ठेत महामुने ॥१॥ मुद्गल उवाच । न तत्र दृश्यते दक्ष जगद्ब्रह्मभवं सुखम् । तन्मायामयगं दृष्ट्वा तस्मान्निर्वृत्तिगो भवेत् ॥२॥ नाहं देहो न मे देहो नाहं नानाभ्रमान्वितः । चराचरमयो नैव ताभ्यां संवर्जितो न च ॥३॥ न समष्टिसमायुक्तो व्यष्टिगो न कदाचन । ब्रह्माऽहमखिलेष्वेव तत्तद्भावविवर्जितः ॥४॥ न बाह्यसुखभोक्ताऽहं नांतरस्थपरायणः । न समानगतोऽहं तु नात्मप्रतीतिधारकः ॥५॥ न स्थूलो नैव सूक्ष्मोऽहं नानंदगः कदाचन । न नाददेहसंस्थश्च सर्वाकारः सदा मतः ॥६॥ चतुष्पादाः संति मे चेत मायया संयुता मया । मायाहीनप्रभावेण पादहीनोऽहमंजसा ॥७॥ मायायुक्तवियुक्तत्वं मयि नैव प्रतिष्ठितम् । मायासंस्थापितं द्वंद्वं तदप्याश्चर्यमुत्तमम् ॥८॥ अनेनानुभवेनैव योगी विंदुरतो भवेत् । तत्र लीनस्वभावेन सदा शांत्या प्रवर्तते ॥९॥ अथाहं भेदहीनश्च न भेदो मयि वर्तते । सदा संततभावेन संस्थितोऽत्र निरंतरम् ॥१०॥ न सृजामि हराम्येव पालयामि न निश्चितम् । स्वयमेव जगद्भाति यथा मयि धृतं भवेत् ॥११॥ उत्पन्नं स्वस्वभावेन स्थितं नष्टं तथा किल । विश्वं तत्र न मे हानिर्वृद्धिर्भवति कर्हिचित् ॥१२॥ न विश्वस्मिन्नहं जीवो न शिवः साक्षिभावगः । भ्रांत्या मायायुतं हीनं वदंत्ययोगिनः सदा ॥१३॥ यथाऽऽकाशभवं मेघपटलं सर्वतः स्थितम् । तत्र सूर्यस्य किं दक्षाच्छादनं संभवेत् कदा ॥१४॥ नष्टेऽभ्रे किं रविः साक्षाच्छादनेन विवर्जितः । तथा मोहविमोहौ च मयि भ्रांत्या वदंति ये ॥१५॥

तदैकात्मस्वरूपाख्ये मयि मोहविमोहकौ । कथं भेदौ प्रवर्तेते पश्य मायाप्रभावजौ ॥१६॥ तथापि विश्वसंयुक्तो मोहितो-
ऽहं न संशयः । ज्ञात्वाऽऽत्मानं विमोहोऽहं सदा साक्षी न संशयः ॥१७॥ मायया जीवसंज्ञोऽहं तथा शिवो न संशयः ।
रपि ब्रह्मणि विश्वं तत दृश्यते नैव दृश्यते ॥१८॥ एवं ज्ञात्वा स्वयं योगी सदा शांत्या प्रवर्तते । द्वंद्वभावं परित्यज्य
गोऽहं ब्रह्मणि संस्थितः ॥१९॥ अतः परं प्रवक्ष्यामि ब्रह्मानुभवरूपकम् । न देहो नैव देहस्थोऽहं भवामि कदाचन ॥२०॥
तनं मयि नास्त्येव विश्वं मयि न विद्यते । भेदाभेदविहीनत्वाद्ब्रह्म ब्रह्मण्यहं रतः ॥२१॥ विश्वरूपोऽहमेवेदं मयि सर्वं
निष्ठितम् । विश्वहीनो न संदेहः सदैकरूपधारकः ॥२२॥ न सृष्टं पाल्यते नैव ह्रियते न मया कदा । विश्वं सृष्टं हृतं
नित्यं पालितं सर्वदा मया ॥२३॥ मयि संततभावश्च दृश्यते न विनिश्चितम् । न विश्वं विविधाकारं नानादेहपरायणम् ॥२४॥
सदा बोधमयोऽहं तु देहदेहियुतस्तथा । मम तत्र न भो दक्ष बंधाऽबंधौ प्रकीर्तितौ ॥२५॥ मायया संयुतो नित्यं देहदेहिमयो
रतः । मायाहीनप्रभावेण देहदेहिविवर्जितः ॥२६॥ मायायुक्तवियुक्तत्वं मयि कुत्र प्रदृश्यते । सदाऽहं बोधरूपाख्यो
ब्रह्मणि ब्रह्मभावितः ॥२७॥ एवं बोधात्मकेनैवानुभवेन प्रजायते । योगी योगसमायुक्तः सदा शांत्या प्रवर्तते ॥२८॥
अतः परं विबोधाख्यं वक्ष्यामि ब्रह्मभूतकम् । प्रकृतिर्न तथा दक्ष पुरुषोऽहं न निश्चितम् ॥२९॥ तयोर्योगेन बोधोऽहं
ब्रह्माऽहं भोगवर्जितः । सदा ब्रह्मणि संस्थश्च खेलहीनप्रभावतः ॥३०॥ मिथ्यारूपं जगत् सर्वं जगदात्मा तथा मतः ।
तयोर्योगकरं ब्रह्म मिथ्यामूलप्रकाशकम् ॥३१॥ मयि ब्रह्मणि नास्त्येव प्रकृतिर्वा पुमान् क्वचित् । तयोर्योगो भ्रमाकारः
सदा खेलपरायणः ॥३२॥ बोधेनोत्थानभावश्च जायते ब्रह्मणः सदा । मिथ्याभूतं तदेवाऽपि कथं मयि प्रवर्तते ॥३३॥
सत्यं ब्रह्म इति प्रोक्तं वेदेषु वेदवादिभिः । तत्र खेलोऽनृताकारः कुतस्तिष्ठति भ्रांतिदः ॥३४॥ सदा ब्रह्मसुखे सक्तो
ब्रह्मणि ब्रह्मभावितः । तत्र भेदादिकं नास्ति स्त्रीपुंभावमयं कदा ॥३५॥ मायया रचितं सर्वमनृताख्यं न संशयः । सा
मयि न स्थिता दक्ष निराधारा भ्रमान्विता ॥३६॥ ब्रह्मरूपं च मां दृष्ट्वा स्वयमेव विनश्यति । माया ततः स्वयं साक्षात्
सत्यरूपो भविष्यति ॥३७॥ यद्यहं मायया युक्तस्तया स्त्रीपुंमयं जगत् । सृजामि चेत्तदा सत्यं मयि कुतः प्रतिष्ठति ॥३८॥
यत्रानृतस्वरूपं तु नास्त्येव वेदवादतः । तदेव सत्यमाख्यातमतो बोधो न दृश्यते ॥३९॥ अनृतं विश्वमखिलं प्रकृतिपुरुषा-
त्मकम् । तस्माद्भिन्नोऽहमेकश्च सत्यरूपो न संशयः ॥४०॥ योगेनैतादृशेनैव शांतियुक्तो भवेन्नरः । संख्यां त्यक्त्वा स

विविधां ब्रह्मभूतस्वभावतः ॥४१॥ अथ स्वानंदयोगं तु वदिष्यामि हिताय ते । तं शृणुष्व प्रजानाथ सावधानेन चेतसा ॥४२॥ सत्यमुत्थानहीनं चानृतमुत्थानसंयुतम् । ब्रह्मणि द्विविधं नास्ति स्वस्वरूपिणि नित्यदा ॥४३॥ बोधयुक्तं स्वतोत्थानं सांख्यमुत्थानवर्जितम् । तयोर्योगं परं ब्रह्माऽसत्स्वानंदमयं भवेत् ॥४४॥ उत्थानवर्जितोऽहं नोत्थानयुक्तोऽपि तांजसा । उत्थानयुक्तहीनोऽहं पश्य मे योगमुत्तमम् ॥४५॥ मयि ब्रह्मणि सर्वं तत् स्वस्वरूपमयं भवेत् । तत्रोत्थानेन युक्तत्वं हीनत्वं नैव दृश्यते ॥४६॥ अहो मायाप्रभावेण मां वदंति विमोहिताः । उत्थानेन युतं हीनं स्वस्वरूपं निजं स्तम् ॥४७॥ उत्थानसंयुतं ब्रह्मोत्थानहीनं प्रकीर्तितम् । ब्रह्मणि तन्मयं सर्वं संयोगायोगभावतः ॥४८॥ मयि ब्रह्मणि संयोगो जायते योगिनां यदा । उत्थानेन युतं हीनं कः पश्यति ततः परम् ॥४९॥ समाधिहीनभावेन पश्यंति विविधं सदा । अयोगिनो न संदेहो योगिनां वै न विद्यते ॥५०॥ सर्वं ब्रह्मेति वेदेषु कथ्यते वेदवादिभिः । अतो मायां परित्यज्य ब्रह्माकारो भवेत्नरः ॥५१॥ अनेन विधिना योगं साधयेद्यः समाधिना । ब्रह्मणि ब्रह्मभूतः स शांतिं प्राप्नोति शाश्वतीम् ॥५२॥ अथ सत्स्वस्वरूपस्य विधियोगं वदामि भोः । तं ज्ञात्वा योगमार्गेण योगी भवति मानवः ॥५३॥ सर्वं ब्रह्मेति वेदेषु कथितं नात्र संशयः । तदेवोपाधिसंयुक्तं सर्वं मायाप्रभावतः ॥५४॥ एकमेवाद्वितीयं यद्ब्रह्म वेदविवादतः । तत्र सर्वं कुतो भाति नानाभावपरायणम् ॥५५॥ नाहमुत्थानसंयुक्तो नाहमुत्थानवर्जितः । तयोर्योगमयोऽहं नाद्वितीयेऽस्मिन् स्थितः सदा ॥५६॥ न सत्यं मयि नास्त्यवानृतं तत् संयुतं परम् । ब्रह्म संयोगदं नास्ति सदाऽहं ब्रह्मसंज्ञकः ॥५७॥ न मया सत्यरूपं तु सृष्टं नानृतरूपकम् । तयोर्योगमयं नैवामृतोऽहं चात्मभावतः ॥५८॥ आदिमध्यांतभावाश्च कुतो मयि भवंति ते । सदामृतमये संस्थोऽहमात्मा ब्रह्मभावितः ॥५९॥ मायया संयुताः सर्वे सर्वेषां जीवनं परम् । मां वदंति विशेषेण मयि सर्वं न विद्यते ॥६०॥ सर्वात्मकं परं ब्रह्म नानात्वेत्युतं भवेत् । खेलहीनं भवति च तदेवापि तयोः परम् ॥६१॥ तत्राहं नागतो दक्ष न गतोऽपि कदाचन । स्वयमेव भवेत् पश्य जीवनं मे प्रभावतः ॥६२॥ तत्र किं मयि सर्वात्मविकारो दृश्यते कदा । भ्रांतियुक्ता मां वदंति जीवनं ब्रह्मणां परम् ॥६३॥ ब्रह्मणां जगतां नैव जीवनं संधृतं मया । स्वयमेव प्रभावेण मयि तत् दृश्यते वृथा ॥६४॥ सदा ब्रह्मणि संस्थोऽहं भेदाभेदादिवर्जितः । अद्वितीयप्रभावेणात्माऽहं पूर्णस्वभावतः ॥६५॥ अनेन योगमुख्येन योगी संजायते नरः । ब्रह्मणिब्रह्मभूतत्वाच्छांतियुक्तो भवेत् सदा ॥६६॥ अतः परं समाख्यं यद्ब्रह्मानु-

भवरूपकम् । कथयामि महाप्रीत्या येन योगी भवेत्परः ॥६७॥ नाहं सर्वात्मको दक्ष नाहमात्मात्मकः कदा । आनंदोऽहं
तयोः साम्ये ब्रह्मणि ब्रह्मभावतः ॥६८॥ मया मायाबलेनैव सर्वात्मकं प्रतिष्ठितम् । एकमेवाद्वितीयाख्यं तयोः साम्येऽहमा-
स्थितः ॥६९॥ ब्रह्मणि सर्वभावश्च भावहीनं कुतो भवेत् । अमृतं मृतमूलं यत्रास्त्येव मयि सर्वदा ॥७०॥ अनंतलीलया
युक्तं लीलाहीनं न विद्यते । मयि लीलायुतं हीनं वर्तते पश्य मे महः ॥७१॥ अखंडरूपभावेन संस्थितोऽहं सदाऽमलः ।
नानाविकारहीनत्वाद् द्वाभ्यां हीनोऽहमंजसा ॥७२॥ ब्रह्मणि सर्वभावश्च वर्तते नात्र संशयः । सदात्मभावस्तत्रैव साम्यं
वेद ततः स्मृतम् ॥७३॥ यद्यत् संकथ्यते वेदे तेषु ब्रह्म स्थितं मतम् । न वर्ण्यते तथा तत्र न तद्ब्रह्ममयं किल ॥७४॥
अतः समं समाख्यातं ब्रह्म वेदविवादतः । आनंदमुभयानंदादासमंताद्विचारय ॥७५॥ आनंदोऽहं न संदेहो ब्रह्म ब्रह्मसु
संस्थितम् । अनेनानुभवेनैव शांतियुक्तो नरो भवेत् ॥७६॥ अतस्ते व्यक्तसंज्ञस्थं कथयामि प्रजापते । ब्रह्मानुभवमाहात्म्यं
येन योगी भवेत्परः ॥७७॥ अहमव्यक्तरूपश्च त्रिभिर्हीनः सदा मतः । त्रिषु मोहविहीनोऽहं त्रितनिकारकः परः ॥७८॥
सर्वात्मकं मयि नास्ति तथाऽमृतमयं न च । साम्यं स्वाधीनसंज्ञेऽथ ब्रह्मणि तंदनात्मकम् ॥७९॥ उत्थानयुक्तहीनाख्यो मोहः
सर्वमये स्थितः । सदाऽमृतमयो मोहोऽखंडब्रह्मणि कथ्यते ॥८०॥ नंदनं सर्वभावेषु समत्वात्मोहरूपकम् । सदा स्वाधीनता
तेषु कुतस्त्रिषु भवेत् किल ॥८१॥ त्रिभिर्युक्तोऽहमत्यंतं तदपि त्रिविमोहनः । भिन्नः सदा त्रयाणां तु नेति कर्ता-
हऽमंजसा ॥८२॥ नानाभावसमायुक्तं भावहीनं ततः परम् । साम्यमुभयगं तेभ्यः परोऽव्यक्तस्ततः स्मृतः ॥८३॥ सृष्ट्वाऽहं
त्रिविधां मायां तत्र खेलकरो मुदा । मोहहीनोऽहं तदपि मायायाः स्वप्रभावतः ॥८४॥ मदाज्ञया त्रयं नित्यं चलत्यत्र न
संशयः । स्वस्वव्यापारसंयुक्तं स्वाधीनोऽहं प्रभावतः ॥८५॥ त्रयाणामंतरे प्रज्ञस्तिष्ठाम्यत्र न संशयः । ममांतरे कोऽपि न वै
प्रेरकः साधुसत्तम ॥८६॥ स्वस्वभावेषु नित्यं तु प्रेरकस्त्रिषु संस्थितः । तथापि नैव मे मोहो नाहं प्रेरक उच्यते ॥८७॥
अहमव्यक्तरूपश्च वेदे संकथितो मतः । नेह नानास्तिभावाख्यः सदा नानात्रिवर्जितः ॥८८॥ नेह नानाप्रमाणेनाऽव्यक्तं
ब्रह्म सनातनम् । तदेवाहं सुखे सक्तः सदा ब्रह्मणि योगतः ॥८९॥ सर्वेषां नेति कर्ताऽहं महादंडधरः प्रभुः । नेति कर्ता
नास्ति मे कस्तेनाव्यक्तोऽहमंजसा ॥९०॥ मनोवाणीविहीनोऽहमव्यक्तः परमो मतः । अनेनानुभवेनैव शांतिं प्राप्नोति
मानवः ॥९१॥ अथ पूर्णनिजानंदानुभवं शृणु सौख्यदम् । येन स्वानंदसंयुक्तो भविष्यसि महामते ॥९२॥ अहं ब्रह्ममयः

साक्षात् मयि मोहविवर्जितम् । कुतो मोहयुतं ब्रह्म निजरूपे भवेत् कदा ॥९३॥ महावाक्ययुता वेदा यदा लीनाः
समाधिना । तदा स्वानंदगाः प्रोक्ताः पश्य वेद महात्मभिः ॥९४॥ अहंभावयुतो जंतुर्मायया तुर्यभावया । मोहहीनश्च
युक्तश्च भवति भ्रमभावतः ॥९५॥ चतुर्विधं मया सृष्टं नानाभावपरायणम् । भावहीनं समानं चाव्ययं तेषु स्थितेन
वै ॥९६॥ ब्रह्मदोषविहीनं तु दोषयुक्तं प्रकीर्तितम् । साम्यं तेतिमयं वेद चतुर्हीनपरं भवेत् ॥९७॥ स्वानंदे तन्मयो योगी
भवेत् यः समाधिना । न पश्यति पुनस्तत्र चतुर्षु मोहितात्मसु ॥९८॥ समाधिना युतो योगी निजरूपे लयं
गतः । न पुनर्दर्शनं तस्य तेषां तत्र प्रवर्तते ॥९९॥ कीदृशोऽहमिमां मायां यस्त्यक्त्वा योगसंयुतः । ब्रह्मणि ब्रह्मभूतः
स भवति स्वस्वरूपिणि ॥१००॥ यदा ब्रह्मणि योगेन तन्मयो भवति स्वयम् । स्वपरादिकमेवेदं पुनर्वद कुतः
प्रभो ॥१॥ अहं ब्रह्मेति यत् प्रोक्तं पश्य वेद विचारतः । तेनैव कृतकृत्यः स भवति योगसेवया ॥२॥
एवं संयोगयोगेन भवेत् ब्रह्मणि तन्मयः । शांतियुक्तः स वै साक्षात् वर्तते शांतिधारकः ॥३॥ अतः परमयोगाख्यं वदामि
योगमुत्तमम् । तत्रानुभवमात्रेण शांतियुक्तो नरो भवेत् ॥४॥ अहं ब्रह्मेति यत् प्रोक्तं कुतस्तत्र भवेदिदम् । तत्सत्यत्वं
प्रजानाथ ब्रह्म ब्रह्मणि संस्थितम् ॥५॥ ब्रह्म वार्णाविहीनं च मनोगतिविवर्जितम् । तदेव नागतं कुत्र न ब्रह्मणि गतं
पुनः ॥६॥ यदा भिन्नं विहारेषु संसक्तं जायते परम् । तदा योगेन स्वानंदयुक्तं भवति नान्यथा ॥७॥ ब्रह्म ब्रह्मणि संस्थं
च नागतं न गतं सतम् । कुतो योगेन तत्रैव तन्मयो जायते नरः ॥८॥ सदाऽहं ब्रह्मरूपश्च न मायासंयुतः कदा । भ्रांत्या
मां नैव जानंति स्वमहिम्नि स्थितं परम् ॥९॥ सर्वसंयोगयोगाख्या माया नानाभ्रमात्मिका । मयि ब्रह्मणि सा कुत्र
तिष्ठति ब्रह्मवर्जिता ॥११०॥ यथा मरीचिसंस्थं च तोयं व्यर्थभ्रमप्रदम् । तथा मयि महामाया व्यर्था संयोगधारिका ॥११॥
ब्रह्मदोषविहीनं तु वेद संकथितं पुरा । तदेव मायया युक्तं कथं भवति मोहितम् ॥१२॥ भ्रांतियुक्तं सुयोगेन भ्रांतिहीनं
भवेत् कथम् । ब्रह्ममायायुता सृष्टा वदंति ब्रह्मवर्जिताः ॥१३॥ अतोऽहं नागतः पश्य जगत्सु ब्रह्मसु प्रभुः । न ब्रह्मणि
गतस्तत्र पुनर्योगस्य सेवया ॥१४॥ ब्रह्मणि विविधाकारा माया नैव प्रतिष्ठति । मायायां नैव तद्ब्रह्म ह्यपवादप्रभावतः ॥१५॥
अयोगस्त्रिविधः प्रोक्तो मृदुमध्याधिमात्रतः । तेषां भेदं प्रवक्ष्यामि मायामूलनिकृंतनम् ॥१६॥ स्वतोत्थानभ्रमं त्यक्त्वाऽहं
ब्रह्म ह्यपवादतः । यस्तिष्ठति नरः सोऽपि मृदुयोगयुतो मतः ॥१७॥ परतोत्थानजं दक्ष भ्रमं त्यक्त्वा ह्ययोगतः । तिष्ठति

मध्यगः सोऽपि मनो योगस्य सेवया ॥१८॥ स्वतः परत उत्थानहीनं संयोगधारकम्। ब्रह्म तस्य भ्रमं त्यक्त्वा तिष्ठति सोऽस्मिमात्रगः ॥१९॥ नाऽऽगतोऽहं यदा भ्रांत्या जगत्सु ब्रह्मसु भ्रमन। तदा मे गमनं कुत्र योगेनैव भविष्यति ॥१२०॥ ब्रह्मभूतस्वभावेन स तिष्ठति नरोत्तमः। निवृत्तियोगमाश्रित्य सदा शांत्या प्रवर्तते ॥२१॥ अधुना पूर्णयोगस्यानुभवं ते वदाम्यहम। योगी येन नरो भूत्वा तिष्ठति गणपप्रियः ॥२२॥ नाहं न ब्रह्म वेदेषु कथितं भेदभ्रांतिदम्। ब्रह्मणि द्विविधं दक्ष कुतो भवति चित्तगम् ॥२३॥ अहं चित्तमयश्चैव ब्रह्म चित्तमयं तथा। चित्तं पंचविधं त्यक्त्वा योगी भवति मानवः ॥२४॥ जगद्रूपं महच्चित्तं ब्रह्मरूपं तथा मतम्। जगतां ब्रह्मणां संयोगायोगं चित्तमुच्यते ॥२५॥ भ्रांतियुक्तं भवेच्चित्तं नानामायाविमोहितम्। योगमेवापरं चित्तं भ्रांतिहीनं तथा भवेत् ॥२६॥ अहं कुतस्तथा ब्रह्म कुतस्तयोश्च योगतः। अभेदः सर्वगं चित्तं क्रीडत्यत्र न संशयः ॥२७॥ नाहं सर्वत्र योगेन संयोगाभेदभावतः। तिष्ठामि चित्तमोहेन वदंत्ययोगिनो मुधा ॥२८॥ ब्रह्म ब्रह्मणि संस्थं यन्नागतं न गतं कदा। अयोगधारकोऽहं न चित्तं तदेव संमतम् ॥२९॥ धर्ममिच्छति चित्तं च भ्रमयुक्तं तथार्थकम्। कामं मोक्षं ब्रह्मभूतं पंचभूमिप्रभावतः ॥१३०॥ चित्तं त्यक्त्वा महायोगी पंचरूपं सुशांतिगः। ब्रह्मभूतो भवेन्नूनं चिंतामणिः प्रकथ्यते ॥३१॥ चित्तरूपा महाबुद्धिस्तत्र भ्रांतिप्रदायिका। सिद्धिस्तयोः पतिः साक्षात् क्रीडति स्वेच्छयाऽपरः ॥३२॥ तं ज्ञात्वा ब्रह्मभूतश्च भवत्यत्र न संशयः। सिद्धिबुद्धिमयं सर्वं त्यक्त्वा योगी प्रजायते ॥३३॥ नैव ब्रह्मणि संयोगो नायोगो वर्तते कदा। सिद्धिबुद्धिभ्रमेणैव परं वाञ्छति तत्पतिः ॥३४॥ गणेशोऽहं न संदेहो कुतो मयि भवेदिदम्। सिद्धिबुद्धिकृतं सर्वं तेन योगी स जायते ॥३५॥ सिद्धिबुद्धिसमायुक्तो ब्रह्मभूतो नरो भवेत्। शांतियोगेन शांतिस्थो वर्तते नित्यमादरात् ॥३६॥ ब्रह्मणि योगभावेन मायायुक्तविहीनता। शांतिं प्राप्तः स्वयं त्यक्त्वा योगं योगी स जायते ॥३७॥ एतादृशभवेनैवानुभवेन युतं परम्। चित्तं भ्रांतिभवं सर्वं रसं त्यक्त्वा सुतिष्ठति ॥३८॥ योगे रससमायुक्तं सदा भवति तत्परम्। निश्चलं शांतिसंयुक्तं मायामलविवर्जितम् ॥३९॥ एतत्ते कथितं सर्वमनुभवभवं

सुखम् । यज्ज्ञात्वा ब्रह्मभूतः स तिष्ठत्यत्र न संशयः ॥१४०॥ शृणुयाद्यः पठेद्वाऽपि योगानुभवरूपगम् । माहात्म्यं स लभेत् सर्वं वाञ्छितं शांतिमाप्नुयात् ॥१४१॥

॥ ॐ तत्सदिति श्रीमदांत्ये पुराणोपनिषदि श्रीमौद्गले महापुराणे नवमे खंडे योगचरिते मुद्गलदक्षसंवादे
योगामृतार्थशास्त्रे चित्तभूमिनिरोधेन योगिचित्तानुभवशांतिसुखवर्णनयोगो नाम षष्ठोऽध्यायः ॥

॥ इति योगगीतासूपनिषत्सु सुगमासु द्वितीयोऽध्यायः ॥

॥ श्रीगणेशाय नमः ॥ दक्ष उवाच । स्थितिं वद महायोगिन जीवन्मुक्तस्य सौख्यदाम । शुभाशुभकृतं तेन कुत्र गच्छति तत्परम् ॥१॥ कायिकं वाचिकं मानसिकं सांसर्गिकं प्रभो । कर्म योगिकृतं सर्वं कीदृशं तस्य का गतिः ॥२॥ मुद्गल उवाच । जीवन्मुक्तः स्वयं योगी स्वेच्छाचारी भवेत सदा । प्रारब्धप्रेरितः साक्षाद् वर्तते नित्यमादरात ॥३॥ स्वयं ब्रह्मणि संस्थश्च विंबं चित्ते प्रतिष्ठति । योगिनस्तत्कृतं सर्वं न कदा बंधदं भवेत ॥४॥ नरवत सर्वकर्ताऽपि तथाऽपि दोषवर्जितः । ब्रह्मणि ब्रह्मभूतत्वाच्छुभाशुभविवर्जितः ॥५॥ प्रारब्धेन स्वयं योगी प्रेरितः पुण्यमाचरेत । तीर्थयात्रादिकं सर्वं यज्ञदेवार्चनादिकम ॥६॥ सदा शौचसमायुक्तो नित्यं धर्मपरायणः । तथापि पुण्यजं भोगं भुनक्ति नैव निश्चितम ॥७॥ अथवा पूर्वजेनैव प्रारब्धेन नियंत्रितः । पापानि नित्यमानंदात प्रकुर्याद्विविधानि सः ॥८॥ ब्रह्महत्यादिकं सर्वं मातृगमनकादिकम । मद्यपानादिकं चौर्यं प्रकुर्याद् दैवयोगतः ॥९॥ एवं पापसमाचारो यदि तिष्ठति मानवः । योगी पापफलं नैव भुनक्ति नरवत कदा ॥१०॥ पूर्वजन्मार्जितेनैव प्रारब्धेन प्रजापते । कारितं योगिना तत्र तेन किंचित कृतं न च ॥११॥ मरणे या मतिः प्राप्ता तादृशीं लभते गतिम् । नरो योगयुक्तो यो योगी ब्रह्मैव जायते ॥१२॥ इदं संशयनाशार्थं कथितं ब्रह्मणः सुत । योगिनां कर्मजं सर्वं माहात्म्यं लेशतो मया ॥१३॥ योगी योगसमायुक्तो न पापानि कदाचन । चरति धर्मनिष्ठः स भवत्यत्र न संशयः ॥१४॥ लोकोद्धारकराः सर्वे योगिनः परिकीर्तिताः । नाचरंति कदा पापमहिंसादिसमन्विताः ॥१५॥

फलहीनस्वभावेन धर्मं चरति नित्यदा । योगी लोकोपकारार्थं स्वयं ब्रह्मपरायणः ॥१६॥ कदाचित् पूर्वसंस्कारात् पापं तेन कृतं परम् । न तत्र पापयुक्तोऽसौ तदर्थो वर्णितः पुरा ॥१७॥ किमर्थं प्राणिनां योगी दुःखदायकमाचरेत् । पापं पापसमायुक्तो न भवेन्निश्चितं पुरा ॥१८॥ सर्वत्र गणनाथं स पश्यत्यनन्यचक्षुषा । पुण्येन सुखसंयुक्तं विश्वं भवति तच्चरेत् ॥१९॥ प्रारब्धं योगिनां दक्ष न भवेत् पापकारकम् । पुण्यचेष्टासमायुक्तं तेषां प्रारब्धमंजसा ॥२०॥ योगार्थं धर्मसंयुक्तो ब्रह्मार्पणविधानतः । यतते जन्मसु प्राज्ञस्तदा योगी भवेन्नरः ॥२१॥ तस्य प्रारब्धकं दक्ष कुतो दुर्बुद्धिदायकम् । भवति च महायोगी धर्मयुक्तो भवेत् सदा ॥२२॥ अथ योगिजनानां ते स्थितिं वदामि सर्वदा । क्रमयुक्तो यथा योगी भ्रांतो नैव भवेत् कदा ॥२३॥ साधयित्वा महायोगं चित्तनिरोधकारकम् । पंचविधं परित्यज्य चित्तं योगी भवेन्नरः ॥२४॥ चित्तचिंतामणिं ज्ञात्वा सचित्तः सहसा गतः । तदाकारः स वै योगी तत्र ब्रह्मणि संरतः ॥२५॥ प्रारब्धं योगिनां नास्ति भोगदं शास्त्रसंमतम् । यदा हठयुतो योगी भवेत् प्रारब्धचालकः ॥२६॥ देहपातं प्रकुर्याच्चेदात्महत्यां लभेन्न च । आयुषा संयुतो वाऽपि देहं त्यजति निश्चितम् ॥२७॥ तथापि योगसंयुक्तो न देहं त्यजति प्रभुः । न प्रारब्धमतिक्रम्य करोति किंचिदंजसा ॥२८॥ शांतियुक्तस्वभावेन निष्ठत्यत्र न संशयः । यद्भावि तद्भवत्येव मायामोहविवर्जितः ॥२९॥ देहपातेन किं ग्राह्यं देहरक्षणतस्तथा । रचितं गणनाथेन सदा भवतु तादृशम् ॥३०॥ एवं निश्चित्य चित्तेन शांतियुक्तस्वभावतः । आचरेद्योगसंयुक्तः स्वधर्मे संस्थितां क्रियाम् ॥३१॥ वर्णाश्रमयुतो योगी भवेद्यदि स सर्वदा । तदा स्वधर्मजं कुर्यात् कर्म निःसंगभावतः ॥३२॥ देहः कर्ममयः प्रोक्तस्तस्थोऽकर्मी कुतो भवेत् । व्यवस्थासंभवं कर्म कृतं भवति न ह्यपि ॥३३॥ यदि कर्म परित्यज्य निष्ठेद्योगपरायणः । तदा देहनिपातेन युक्तो भवेन्न संशयः ॥३४॥ अन्नभक्षणरूपं यद्भवति कर्म निश्चितम् । जागृत्स्वप्नादिकं सर्वं त्यक्त्वा जीवति तत्कथम् ॥३५॥ क्रियतेऽनेन यत्किंचित् सा क्रिया परिकीर्तिता । अतः कर्ममयो देहस्तेन धर्मं समाचरेत् ॥३६॥ देहत्यागे समुद्युक्तो यदि योगी भवेत् प्रभो । सहने द्वंद्वभावस्य न समर्थः स वै स्मृतः ॥३७॥ अशांतिसंयुतः सोऽपि योगहीनो यथा नरः । तथा द्वंद्वं समालोक्य सहने न समर्थकः ॥३८॥ गणेशेन कृतं तस्येच्छया सर्वं च यद्भवेत् । भवतु तादृशं सर्वं सहे नित्यं सुशांतिगः ॥३९॥ स योगी शांतिहीनो न प्रभवेत् क्वचिदंजसा । ब्रह्मभूतो महाश्रेष्ठः पावनः सर्वदेहिनाम् ॥४०॥ अतो वर्णाश्रमस्थो यो योगी भवेत् स तत् क्रियाम् ।

ब्रह्मार्पणतया कुर्याद् हृदि ध्यात्वा गजाननम् ॥४१॥ यदि स्वधर्मसंयुक्तं कर्म नैव समाचरेत्। तमक्रियं समालोक्यान्ये त्यजेयुः स्वधर्मकम् ॥४२॥ अतो लोकोपकारार्थं योगी कर्म समाचरेत्। अन्यान् कर्मयुतान् कुर्यात् स्ववशान् धर्मपालकः ॥४३॥ सर्वेभ्यश्चाधिको योगी कुर्यात् सत्कर्म धर्मदम्। तादृशं कर्म सर्वेऽपि करिष्यंति विशेषतः ॥४४॥ तेन प्रामाण्यमानंदात् कृतं कर्म प्रजापते। तदेव सर्वलोकाश्च मान्यं कुर्वंति निश्चितम् ॥४५॥ ब्रह्मार्पणतया कर्म बंधदं न भवेत् कदा। ब्रह्मप्राप्तिकरं तस्य फलं प्रोक्तं मनीषिभिः ॥४६॥ योगिभिश्च कृतं कर्म लोकसंग्रहकारणात्। असक्तमनसा नित्यं नैमित्तिकं न बंधदम् ॥४७॥ सदा ब्रह्ममयत्वेन तेन किंचित् कृतं न च। देहस्वभावजो भावो भवेदस्य निरंतरम् ॥४८॥ अन्यं मार्गं प्रवक्ष्यामि ये निंदंति स्तुवंति तम्। योगिनं पापभोक्तारो भवंति पुण्यभोगिनः ॥४९॥ योगिना यत् कृतं पापं तत् स्प्रष्टुं न क्षमं कदा। निंदकांस्तत् समाश्रित्य प्रतिष्ठेत्तस्य नित्यदा ॥५०॥ योगिना यत् कृतं पुण्यं तदेव तं न संस्पृशेत्। स्तुवतस्तान् समाश्रित्य नित्यं तिष्ठेत् स्वभावजम् ॥५१॥ अतो न योगिनां निंदां कदा कुर्याद्विचक्षणः। सेवां समाचरेत्तेषां तेन सौख्ययुतो भवेत् ॥५२॥ वने यदि स्थितो योगी प्रारब्धेन नियंत्रितः। फलादिकं तत्र भुंजन् शांत्या तिष्ठेत् स नित्यदा ॥५३॥ तत्र निंदाकरास्तस्य तथा सेवाकरा न च। एक एव महायोगी शुभाशुभं समाचरेत् ॥५४॥ तदेव देहपातेऽस्य योगिनश्च मृतं भवेत्। शुभाशुभं निराधारमुपोषणसमन्वितम् ॥५५॥ एतत्ते कथितं दक्ष ब्रह्मीभूतस्य चेष्टितम्। कर्मयोगमयं पूर्णं श्रवणाच्छुभदं भवेत् ॥५६॥ अथ योगं प्रवक्ष्यामि ज्ञानात्मकमहं परम्। योगिभ्यः सुखदं पूर्णं शांतियुक्तं विशेषतः ॥५७॥ देहः कर्मात्मकः प्रोक्तस्तत्र योगं समाचरेत्। ब्रह्मार्पणतया कर्म चाचरन् शांतिधारकः ॥५८॥ ज्ञानं स्फूर्तिमयं प्रोक्तं हृदि तिष्ठति सर्वदा। विवेकात्ममयं तत्र ज्ञानयोगं समाचरेत् ॥५९॥ हृदि यस्माद् भवेज्ज्ञानं नानायोगार्थसौख्यदम्। अथवा विषयार्थानां बोधकं तत् स संत्यजेत् ॥६०॥ उत्पत्तिनाशसंयुक्तं ज्ञानं विषयबोधकम्। ब्रह्म सौख्यप्रदं ज्ञानं योगभूमिप्रभावजम् ॥६१॥ उपाधिसंयुतं चैकमनुपाधियुतं परम्। तत्त्यक्त्वा योगसंयुक्तो भवेद्योगी महायशाः ॥६२॥ ज्ञानानां सकलानां च योगे ज्ञानमयः स्मृतः। योगस्तत्र भवेल्लीनो ब्रह्मीभूतस्वभावतः ॥६३॥ ब्रह्मणि ब्रह्मीभूतोऽहं मम ज्ञानं कुतो भवेत्। नानाभ्रांतिकरं हृत्स्थं त्यक्त्वा ब्रह्मपरो भवेत् ॥६४॥ अनेन विधिना सर्वं ज्ञानं त्यक्त्वा हृदि स्थितम्। शांतियुक्तः स्वयं योगी तिष्ठेद्ब्रह्मपरायणः ॥६५॥ न कर्ताऽहं कदाचिद्वै कारयिता

न निश्चितम् । मायामोहयुता मां ते वदंति कर्मकारिणम् ॥६६॥ अहं साक्षी शरीरस्य यद्देहेन कृतं भवेत् । तन्मया न कृतं क्वापि ब्रह्माहं परतः परः ॥६७॥ यद्यत् स्फूर्तिर्भवेत् मे वै सा माया भ्रांतिदायिका । न तस्यां संस्थितो जीवः सदा साक्षिस्वभावतः ॥६८॥ न मोहेन समायुक्तो न कदा मोहवर्जितः । मायया मां वदंत्येव ह्ययोगिनो न संशयः ॥६९॥ एवं सदा महायोगी साक्षिवत्संस्थितो भवेत् । हृदयज्ञानयोगस्थस्त्यक्त्वा स्फूर्तिभवं भ्रमम् ॥७०॥ सर्वत्र रसहीनं यत् मतस्तस्य महात्मनः । शांत्या युक्तं भवेद्दक्ष ब्रह्मीभूतस्य नित्यदा ॥७१॥ एष ते कथितो योगो ज्ञानात्मको विशेषदः । साक्षिवद्देहसंस्थः स मया तिष्ठति लेशतः ॥७२॥ अतः परं समं योगं शृणु स्थितिपरायण । यं ज्ञात्वा ब्रह्मभूतो यः शांतिहीनो भवेत्स सः ॥७३॥ देहः कर्मत्रयस्तत्र कर्मयोगं समाचरेत् । मनो विवेकरूपं तु साक्षित्वं तत्र संचरेत् ॥७४॥ अहं ब्रह्म यदा दक्ष कृतस्तत्र भवेदिदम् । द्वंद्वरूपं विशेषेण तस्य वक्ष्यामि रूपकम् ॥७५॥ देहः कर्ममयः प्रोक्तो विवेकः कर्मवर्जितः । द्वंद्वं ज्ञात्वा महायोगी समयोगं समाचरेत् ॥७६॥ देहे कर्ममयोऽहं तु हृदि साक्षी तथाऽमलः । उभयोर्योग-भावेन भवति किंचिदंजसा ॥७७॥ यदा विवेकहीनश्चेत् देहः किं तु करिष्यति । देहहीनं मनस्तद्वज्ज्ञानदं कस्य वा भवेत् ॥७८॥ आनंदमयभावेन संस्थितोऽहं तदात्मकः । उभयत्र ततः स्वस्वव्यापारं कुरुतः परौ ॥७९॥ देहे कर्ममयोऽहं वै हृदि विवेकधारकः । द्विविधां रचयतां मायां सदानंदतधर्मगः ॥८०॥ तयोः समानभावेन संस्थितोऽहं न संशयः । अनुपाधेरुपाधेश्च वर्जितो ब्रह्मसंज्ञितः ॥८१॥ अतः समं समाश्रित्य बाह्यांतरैकभावतः । यादृशं संस्थितं ब्रह्म तादृशं तत्र चाचरेत् ॥८२॥ देहे कर्मकरो भूत्वा हृदि साक्षिमयो भवेत् । उभयं तत् परित्यज्यानंदावस्थां समाचरेत् ॥८३॥ यद्यदुभयभावाख्यं नानाभेदमयं परम् । तत्र योगमयो भूत्वा तिष्ठदानंदसंयुतः ॥८४॥ आनंदानां समायोगे ब्रह्मानंदः प्रकीर्तितः । उभयेषां प्रजानाथ तादृशं चाचरेद्बुधः ॥८५॥ मदीयसंगयोगेनोभयं प्रवर्तते सदा । उभयं चाचरेत् सर्वसुभाभ्यां वर्जितोऽपि सः ॥८६॥ इयमानंदरूपाख्या कथिता योगिभिः पुरा । ब्रह्मीभूतः समास्थाय तिष्ठेत्तां शांति-संयुतः ॥८७॥ अतः परं प्रजानाथावस्थां शृणु सुखप्रदाम् । सहजाख्यां महायोगी चाचरेत्तां विशेषतः ॥८८॥ देहः कर्म-मयः प्रोक्तस्तत्र योगं समाचरेत् । ब्रह्मार्पणतया नित्यं कर्मणां योगिसत्तमः ॥८९॥ हृदि साक्षिस्वभावेन तिष्ठेत्तयोः परे ततः । समभावं समाश्रित्य त्रिषु त्रैधं प्रकीर्तितम् ॥९०॥ तेषु विस्मृतिभावेन भ्रांत्या वा विस्मृतं भवेत् । विपरीतं

भवेद्वाऽपि ततः खेदं न धारयेत् ॥९१॥ त्रिविधं मायया युक्तं पराधीनं प्रकीर्तितम् । तुर्यं स्वाधीनरूपाख्यं प्रोक्तं शास्त्रेषु सर्वदा ॥९२॥ तुर्येच्छया त्रिधा भूतं चलत्यत्र न संशयः । स्वस्वप्रारब्धसंयुक्तं सदा भ्रांतमिव स्थितम् ॥९३॥ न कस्याहंकृतिस्तस्य तुरीयस्य कदाचन । यादृशं कुरुते कर्म तादृशं फलमश्नुते ॥९४॥ अतः प्रारब्धयोगेन विस्मृतोऽहं स्थितिं पराम् । योगरूपां च तुर्येण प्रेरितः सर्वधारिणा ॥९५॥ अथवा ज्ञानमोहेन विपरीतं कृतं मया । त्यक्त्वा योगस्थितिं पूर्णां प्रारब्धं तत्र मुख्यकम् ॥९६॥ प्रारब्धधारकं प्रोक्तं तुरीयं नात्र संशयः । तस्येच्छया च यज्जातं तदेवं योगदं भवेत् ॥९७॥ पराधीनोऽहमत्यंतं तुर्येच्छया समन्वितः । करोमि कर्म साक्षित्वमानंदं वा न संशयः ॥९८॥ सदा स्वाधीनभावेन तिष्ठति ब्रह्म तुर्यगम् । तुरीयैः खेलकं प्रोक्तं तस्य किं बंधनं भवेत् ॥९९॥ यज्जातं तत्कृतं तेन तुरीयेण न संशयः । तत्र कुत्र स्थितोऽहं तु स्वेच्छया क्रीडति प्रभुः ॥१००॥ इयं तु सहजावस्था कथिता ते प्रजापते । यज्जातं तत्र सा प्रोक्ता न कृता तदपि ध्रुवम् ॥१॥ यत्कृतं सह जातेन स्वयमेव प्रवर्तते । योगस्तेन समाख्याता सहजा तुर्यसंज्ञिता ॥२॥ अतः परं ब्रह्मभूतं स्वानंदाख्यं प्रकीर्तितम् । तत्र योगस्वरूपाख्यां स्थितिं शृणु सुखप्रदाम् ॥३॥ स्वाधीनं तुर्यभावाख्यं पराधीनं त्रिधा मतम् । तेषां योगे निजात्मस्थो भवेद्योगी निजात्मसु ॥४॥ त्रिविधं खेलरूपं तु तुर्यः खेलक उच्यते । तयोर्योगे प्रजानाथ स्वानंदस्थो भवेन्नरः ॥५॥ ब्रह्मणि ब्रह्मभूतस्य योगिनश्च कुतो भवेत् । स्वाधीनं तु पराधीनं मायायुक्तं न संशयः ॥६॥ योगस्थितिं समाश्रित्य बुधश्चत्वारि चाचरेत् । तेषां संयोगरूपेण तिष्ठेत्तेषु महात्मवान् ॥७॥ कर्मयोगं समाश्रित्य देहचेष्टां समाचरेत् । ज्ञानयोगं तथाऽऽश्रित्य साक्षित्वं चाचरेत् बुधः ॥८॥ समयोगं समाश्रित्य आनंदं आचरेत् परम् । सहजं स समाश्रित्य विपरीतेन शोकभाक् ॥९॥ चतुर्भिः संयुतो भूत्वा चतुर्भिर्वर्जितस्तथा । तिष्ठेद्योगमयीं दक्षावस्थामाश्रित्य सर्वदा ॥११०॥ अवस्था निजरूपे तु कुतोऽवस्थाप्रधारकः । तयोर्योगे योगमयी व्यवस्था ते प्रकीर्तिता ॥११॥ चतुर्मयी चतुर्हीना योगावस्था प्रकीर्तिता । योगिभिस्तां समाश्रित्य शांतिहीनो भवेन्न सः ॥१२॥ अधुना शृणु योगस्थामवस्थां द्वितीयां पराम् । अयोगधारिकां पूर्णां सदा निवृत्तिदायिकाम् ॥१३॥ ब्रह्मणि ब्रह्मभूतो यो योगी तां संश्रयेत् पराम् । यदा निवृत्तिसंयुक्तः शांतिहीनो भवेन्न सः ॥१४॥ ब्रह्मणि ब्रह्मसंस्थं तन्नागतं न गतं पुनः । मायायां ब्रह्मभूतो योऽवस्थाया धारकः कुतः ॥१५॥ यत् कुर्यात् कारयेद्यच्च तत्र नैवावलोकयेत् ।

मायामयं विनिश्चित्य पंचकं पंचकेषु गम् ॥१६॥ नाहं पंचकगश्चैव ततस्तत्कुतमंजसा । कुतो मयि प्रहृदयेनाधार्यनिवृत्तिगो भवेत् ॥१७॥ जीवनं मरणं जन्म योगो योगात्मिका परा । अवस्था मे कुतो मायामोहयुक्तं स्मृतं बुधैः ॥१८॥ अथ योगमयीं पूर्णामवस्थां शृणु मानद । संयोगायोगहीनां तां यया शांतो भवेन्नरः ॥१९॥ ब्रह्मणि ब्रह्मभूतोऽहं मयि मायामयं परम् । पंचकं च कुतो भाति मायाहीनमयोगकम् ॥२०॥ विधिनिषेधसंयुक्तं चित्तं भवति सर्वदा । विधिनिषेधहीनं तु तदेवं जायते मुधा ॥२१॥ देहेन कर्मयोगश्च ज्ञानगो हृदि जायते । उभयत्र समश्चैव तुर्येषु सहजात्मकः ॥२२॥ सर्वसंयोगभावेषु स्वानंदाख्यः प्रवर्तते । निवृत्तिषु ह्ययोगाख्यो योगेषु शांतियोगकः ॥२३॥ एवं नानाविधं योगं समास्थाय महामतिः । योगी शांत्या समानिष्ठेद्ब्रह्मीभूतोऽपि निश्चितम् ॥२४॥ योगस्थितिः समाख्याता ब्रह्मीभूतसुखप्रदा । अनेन विधिना देहनिर्वाहो योगिनां भवेत् ॥२५॥ वर्णाश्रमस्थितो योगी चाचरेत् स्थितिमुत्तमाम् । लोकसंग्रहकार्यार्थमसक्तस्तत्फलादिषु ॥२६॥ यदा वर्णाश्रमं त्यक्त्वा पंचमाश्रमधारकः । न तस्य स्थितिरूपं तु कदाचिन्नात्र संशयः ॥२७॥ विधिनिषेधहीनोऽयं विनायको भवेत् सदा । यद्यत् कुर्यात् स तत् सर्वं योगरूपं भवेत् सदा ॥२८॥ यदि स्थितिसमायुक्तो वेदादिषु प्रमाणतः । तदा विधियुतः सोऽपि भवेत् पश्य प्रजापते ॥२९॥ यदा स्थितिविहीनोऽयं तिष्ठेत् संकथितं परम् । वेदेषु स निषेधेन तदा युक्तो भवेत् परः ॥१३०॥ अतः स्थितियुतो योगी स्थितिहीनो यथारुचि । वर्णाश्रमान् परित्यज्य तिष्ठेद्विनायको यथा ॥३१॥ शांत्या नित्यं चरेत् सर्वं मनसीप्सितमंजसा । विधिनिषेधहीनश्च ब्रह्मणि रसधारकः ॥३२॥ एतत् सर्वं समाख्यातं योगिनां चेष्टितं महत् । ब्रह्मभूतात् परं पूर्णं चरेदेवं निरंतरम् ॥३३॥ शृणुयाद्यः पठेद्वाऽपि स सर्वं हीप्सितं लभेत् । अंते योगमयो भूत्वा तिष्ठेत् स गणपे रतः ॥१३४॥

॥ ॐ तत्सदिति श्रीमदांत्ये पुराणोपनिषदि श्रीमन्मौद्गले महापुराणे नवमे खंडे योगचरिते मुद्गलदक्षसंवादे योगामृतार्थशास्त्रे योगस्थितिवर्णनयोगो नाम सप्तमोऽध्यायः

॥ इति योगगीतासूपनिषत्सु सुगमासु तृतीयोऽध्यायः ॥

॥ श्रीगणेशाय नमः ॥ दक्ष उवाच । योगशांतिं समाश्रित्य योगमभ्यस्य नित्यदा । ब्रह्मणि ब्रह्मभूतः स योगभ्रष्टः कथं
भवेत् ॥१॥ मायामयं जगत् सर्वं नानाभ्रमसमन्वितम् । ज्ञात्वा स्वयं पुनर्भ्रष्टः कौतुकं वद मे मुने ॥२॥ मुद्गल उवाच ।
ब्रह्मणि ब्रह्मभूतस्य योगिनो बिंबसंस्थितम् । बुद्धौ तस्यां विमोहेन मोहयुक्तं प्रजापते ॥३॥ दृष्ट्वा नानाविधान् भोगान्
स्वयं मोहेन मोहितः । तेषु भूत्वा रसयुतो नातिच्छति निरंतरम् ॥४॥ तत्र तस्य हृदि दक्ष विवेकः संस्थितो भवेत् ।
तस्य रूपं प्रवक्ष्यामि शृणु बुद्धिविशारद ॥५॥ अहं ब्रह्मणि योगेन ब्रह्मीभूतो न संशयः । पापपुण्यादिकं मे न शुभा-
शुभकृतं भवेत् ॥६॥ यदा भोगं परित्यज्य तिष्ठामि नित्यमादरात् । तदा योगस्य वृद्धिर्मे न भविष्यति निश्चितम् ॥७॥
यदा नित्यं प्रभुंजाने भोगान्नानाविधान् परान् । पापपुण्यमनाहत्य तदा योगक्षयो न च ॥८॥ अतोऽहं योगमुत्सृज्य
किमर्थं दुःखसंयुतः । तिष्ठामि शांतिमाश्रित्य विधिनिषेधसंयुतः ॥९॥ एवं मनसि संधार्य योगी भोगेषु लालसः ।
विविधेष्वेव भवति रसयुक्तः क्रमेण सः ॥१०॥ अयं मोहः समाख्यातो योगिहृच्छांतिदायकः । तेन शांतिं परित्यज्य
पापपुण्यपरो भवेत् ॥११॥ ततः कामं समाश्रित्य देहसौख्यप्रदायकम् । इच्छेत स विविधान् भोगान् पुण्यपापपरायणः ॥१२॥
भोगार्थं यतमानस्य योगिनः कामभावतः । तत्र विघ्नः कृतः केन ततः क्रोधयुतो भवेत् ॥१३॥ येन विघ्नः कृतस्तेषु भोगेषु
तस्य भोगिनः । तं शत्रुं स हि जानाति भिन्नभावपरायणः ॥१४॥ ततो ह्यज्ञानसंभूतिः क्रमेणोत्पद्यते परा । योगिनश्च
तया युक्तो हंतुं तं यतते सदा ॥१५॥ शत्रुशिक्षार्थमर्थान् स नानाभावसमन्वितः । संपाद्य तं तु निर्जित्य भोगान् भुंक्ते
प्रयत्नतः ॥१६॥ स्वपरज्ञानहीनत्वं गतं तस्य प्रजापते । तदेवाज्ञानसंभूतिः शत्रुमित्रप्रदर्शिनी ॥१७॥ ततः शांतेः क्रमेणास्य
विस्मृतिर्जायते परा । तया युतः स्वयं देहं मन्यते सत्यरूपकम् ॥१८॥ देहे संतोषमापन्नं कृतकृत्यमिव स्थितम् । मन्यते
विपरीते स आत्मानं भाग्यवर्जितम् ॥१९॥ ततो योगं परित्यज्य स्वयं बिंबी प्रजायते । बिंबे तन्मयभावेनागमिष्यति न
संशयः ॥२०॥ एवं क्रमेण योगी स शांतिहीनस्वभावतः । सदा तिष्ठति तं योगं नाश्रयते कदाचन ॥२१॥ सुखयुक्ते शरीरे
स सुखयुक्तो भवेत् स्वयम् । दुःखयुक्ते तथा दुःखी नानाभावपरायणः ॥२२॥ लेशमात्रमयं शांतिं लभते न कदाचन ।
असंतोषयुतो नित्यं भ्रमते भोगलिप्सया ॥२३॥ भोगार्थं विविधान्येव नित्यं पापानि चादरात् । चरते सर्वपुण्यानि
विधिनिषेधवर्जितः ॥२४॥ वर्णाश्रमयुतो योगी स्वधर्मं त्यज्य नित्यदा । पापं चरति वा पुण्यं स्वधर्मैः संयुतः कदा ॥२५॥

भोगान् भुंक्ते विशेषेण मोहयुक्तो निरंतरम् । योगभ्रष्टोऽयमाख्यातस्त्यक्त्वा योगं नरो भवेत् ॥२६॥ हृदि तस्य विवेकश्च
सदा तिष्ठति मोहदः । पुण्यपापविहीनोऽहं ब्रह्मैव ब्रह्मभावितः ॥२७॥ अंते स नरकान् गच्छेद् द्वंद्वदुःखप्रदायकान् ।
यातनां घोररूपां तु पतेद्भुक्त्वा भयानकं ॥२८॥ दक्ष उवाच । योगभ्रष्टगतिं ब्रूहि योगींद्र दयया परम् । कथं नरकगो भुक्त्वा
यातनां प्राप्नुयात् परम् ॥२९॥ कर्मफलपरित्यागादिह जन्मधरः कथम् । संभवेद्विस्मयो भाति चेष्टितं योगिनः परम् ॥३०॥
मुद्गल उवाच । ब्रह्मणि ब्रह्मभूतस्य पुनर्विषयसेवनात् । ब्रह्मणो भक्तिहीनस्यांते स्थानं न भवेत् किल ॥३१॥ अपारपुण्य-
योगेन ब्रह्मणि देहिनः कदा । रसोत्पत्तिर्भवेद्दक्ष सर्वश्रेष्ठस्य योगदा ॥३२॥ देहविषयसंयोगाद् द्वंद्वभावपरात्मनः ।
नानापापादियोगेन पुण्यं स्वल्पं प्रहीयते ॥३३॥ मृतोऽयं शिवलोके वै वैकुंठे सौरशाक्तयोः । ब्रह्मण इंद्रलोके वा पतेदंते
न संशयः ॥३४॥ शोकहर्षप्रदं विश्वं नानाद्वंद्वसमन्वितम् । नरको नात्र संदेहो योगिनां शास्त्रसंमतम् ॥३५॥ उत्पत्तिनाश-
संयुक्तं त्यक्त्वा ब्रह्मपरायणः । ब्रह्मणि ब्रह्मभूतः स पुनर्द्वंद्वपरो यतः ॥३६॥ वैकुंठादिपदे संस्थो द्वंद्वं भुंक्ते निरंतरम् ।
उत्पत्तिनाशसंयुक्तं नानाभोगपरायणः ॥३७॥ अतो योगी प्रजानाथ स्वर्गाख्यान्नरकान् परान् । भुक्त्वा द्वंद्वमयान् पश्चादिह
जन्मधरो भवेत् ॥३८॥ भवेद्योगिकुले तस्य जन्म वा तापसे कुले । ऋद्धिमतां स तत्रापि पुनर्योगं चरिष्यति ॥३९॥
पूर्वसंस्कारयोगेन न भोगे स रमेत् कदा । चित्तं तस्य महायोगी प्रभवेत् स्वल्पयोगतः ॥४०॥ पुनर्न योगभ्रष्टः स
संभवेद्ब्रह्मणः सुत । शांत्यायुक्तस्वभावेन शरीरं पोषयेत् मुदा ॥४१॥ अंते ब्रह्मणि योगी स तदाकारो भवेत् परम् ।
योगसंस्कारपुण्येन स्थितिं लब्ध्वा महामतिः ॥४२॥ एतत्ते कथितं पूर्णं योगभ्रष्टस्य चेष्टितम् । किं पुनः श्रोतुमिच्छा ते वद
धातर्वदाम्यहम् ॥४३॥

॥ ॐ तत्सदिति श्रीमदांत्ये पुराणोपनिषदि श्रीमन्मौद्गले महापुराणे नवमे खंडे योगचरिते मुद्गलदक्षसंवादे योगामृतार्थशास्त्रे योगभ्रष्टचरितनिरूपणं नाम अष्टमोऽध्यायः ॥

॥ इति योगगीतासूपनिषत्सु सुगमासु चतुर्थोऽध्यायः ॥

॥ श्रीगणेशाय नमः ॥ दक्ष उवाच । चित्तं चंचलमत्यंतं विषयेषु परायणम् । दुर्ग्रहं शांतिसंयुक्तं न भवेत मुनिसत्तम ॥१॥ अतो योगस्य प्राप्त्यर्थं सिद्ध्यर्थं सुगमं ततः । उपायं वद चित्तस्य जयार्थं वाऽपरं प्रभो ॥२॥ मुद्गल उवाच । पंचचित्तेषु यद्दिव्यं स्थितं भ्रांत्या समन्वितम् । चिंतामणेः समाख्यानं तस्यैव भजनं चरेत् ॥३॥ तेन चित्तं जयेद्योगी नान्यं पश्यामि भो विभो । विना चित्तजयं योगदायकं नात्र संशयः ॥४॥ दक्ष उवाच । सुगमं वद मार्गं मे सर्वेभ्यो ब्रह्मदायकम् । संसेव्य जंतवः सर्वे ब्रह्मीभूता भवंति वै ॥५॥ मुद्गल उवाच । अज्ञानेन समायुक्तो नरो विषयलंपटः । शिश्नोदरपरो नित्यं योगं नेच्छति कर्हिचित् ॥६॥ तस्य सकामिकं कर्म सुखदं बोधयेत् परम् । अलभ्यप्रापकं ह्यस्माचरेल्लोभसंयुतः ॥७॥ अलभ्यलभ्यलोभेन त्यक्त्वा पापं महाखलः । सत्कर्मनिरतो भूत्वा चरेत् पुण्यं निरंतरम् ॥८॥ ततस्तेनैकभावेन पापं नश्येन्निरंतरम् । शुद्धोऽत्यंतं नरः कुर्यात् कर्म कामयुतं परम् ॥९॥ समाप्नुयात्ततोऽलभ्यं हृद्यं चेत पुनरेव सः । विश्वासेन समायुक्तः कुर्यात कर्म विशेषतः ॥१०॥ अथवा नैव संप्राप्तमलभ्यं तेन तं तदा । उपादिशेद्विशेषेणाधिकं सत्कर्म चाचर ॥११॥ अनंतजन्मभिः पापं त्वया कृतमसंशयम् । अपारमंतरायो भवति ते तद्विघातकम् ॥१२॥ एवं कर्मपरः सोऽपि दुःखितोऽत्यंतमाचरेत् । पापनाशार्थमानंदात्तेन शुद्धांतरो भवेत् ॥१३॥ सत्कामिकपरस्यास्य कर्मात्यंतप्रभावतः । तस्य बुद्धिर्भवेत् दक्ष निःकामिकपरायणा ॥१४॥ जन्ममृत्युप्रदा भोगा भुक्ता विविधजन्मसु । अपारसुखदं ब्रह्म न प्राप्तं देहधारिणा ॥१५॥ अलभ्यं न मया प्राप्तं प्रारब्धाधीनतोऽथवा । प्रारब्धं चालितुं कोऽपि न समर्थो भविष्यति ॥१६॥ अतो निःकामिकं कर्म करोमि नित्यमादरात् । जन्ममृत्युविहीनोऽहं भविष्यामि न संशयः ॥१७॥ ब्रह्मसुखमपारं यल्लब्ध्वा ब्रह्मपरायणः । ब्रह्मीभूतो भविष्यामि यत्नं करोमि तत्परः ॥१८॥ एवं धार्यं परित्यज्य कामान् सेवेत स पंचकान् । देवान् गणेशमुख्यांश्च मुक्तिमार्गपरायणः ॥१९॥ सालोक्यादिभवं सौख्यमिच्छति नित्यमादरात् । क्रमेण तपसा युक्तो प्रभवेत मानवस्ततः ॥२०॥ विभूतिर्ब्रह्मणः प्रोक्ता नानारूपा प्रजापते । तत्र तस्य रमेच्चित्तमैश्वर्ययुक्तभावतः ॥२१॥ इमे समर्थरूपा वै ब्रह्मणः परमात्मनः । अंशतेजोधरास्तस्य सर्वाधीशा भवंत्यतः ॥२२॥ एवं सर्वत्र संचिंत्य तेषां पूजापरो भवेत् । लभेत्ततत् कृपया दक्ष चित्तशुद्धिं नरोत्तमः ॥२३॥ विचारेण गणेशानं ज्ञात्वा संपूर्णमंजसा । सर्वपूज्यादिचिह्नैस्तं श्रेष्ठं तत्र रतो भवेत् ॥२४॥ ज्ञात्वा स्वानंदनाथं तं स्वानंदार्थं विशेषतः । प्रभजेद्गणराजं स निष्कामभक्तिसंयुतः ॥२५॥ ततोऽहर्निशमत्यंतं

भजेत्तत्परमो युतः । मोक्षार्थं सर्वभावेन विरक्तो विषयादिषु ॥२६॥ गणेशकृपया तस्य चित्तशुद्धिर्भवेत् परा । तया सर्वस्वभावेन भजेत्तं गणनायकम् ॥२७॥ विश्वं चराचरं सर्वं जानीयात्तत्स्वरूपकम् । सर्वेषां हितभावेन भजेत्तं द्विरदाननम् ॥२८॥ कस्यापि संभवेत् दुःखं तादृशं प्रचरेन्न सः । सहते सत द्वंद्वजं भावमार्जवेन समन्वितः ॥२९॥ देवकार्यं विना साधुर्न क्रियात स कदाचन । परार्थिकं विशेषेण विश्वरूपपरायणः ॥३०॥ एकान्ते निर्जने स्थाने स्थित्वा ध्यात्वा गजाननम् । पूजयेद्भक्तिसंयुक्तो ध्यानं कुर्याद्विशेषतः ॥३१॥ अनन्यमनसा देवं भजेत्तं भावधारकः । शमदमपरो भूत्वा चित्तनिग्रहमाचरेत् ॥३२॥ दुर्जयं चित्तमत्यंतं ज्ञात्वा वायुनिबंधनः । प्राणायामपरो भूत्वा जयेत्तन्नात्र संशयः ॥३३॥ अथ वायुनिरोधस्य वदामि मार्गमुत्तमम् । येन पापं परित्यज्य शुद्धचित्तो नरो भवेत् ॥३४॥ पूरयेद्वामनासायां वायुं तस्माच्चतुर्गुणम् । धारणं तस्य कुर्यात् स स्वोदरे नियतो भवेत् ॥३५॥ पूरकाद् द्विगुणं कुर्याद्रेचकं च प्रजापते । पुनस्तया दक्षिणया पूरयेत् कुंभकं चरेत् ॥३६॥ वामया रेचकं चैव पुनः पुनर्निरंतरम् । प्राणायामं चरेद् धीमान् पापहीनो नरो भवेत् ॥३७॥ एवं त्रैकालिकं कुर्यात् प्राणायामं विशेषतः । नातिनिरोधसंयुक्तं वायुं हठसमन्वितः ॥३८॥ अतिहठेन संरुद्धो वायू रोमभ्य एव च । निःसृत्य कुष्ठसंयुक्तं तं करोति न संशयः ॥३९॥ नाभिमूलस्थिता नाडी इडा च पिंगलाऽपरा । सुषुम्णा तत्र रोधेन मार्गो भवति निर्मलः ॥४०॥ अपानो नाभिमूलस्थो ह्यधो गच्छति सर्वदा । प्राण ऊर्ध्वं तथा जन्तोर्नाडीभिः प्रेरितः सदा ॥४१॥ मार्गरोधनभावेन नाड्यां मार्गो भविष्यति । वायुर्मूलं समाश्रित्य तिष्ठति क्रमतस्ततः ॥४२॥ तत्र लघ्वक्षराण्येव द्वादशापि प्रतिष्ठति । वायुश्चेत् स लघुः प्रोक्तः प्राणायामश्च योगिभिः ॥४३॥ ततो द्विगुणतस्तिष्ठेद्यदा वायुः सुरोधितः । मध्यमः स समाख्यातस्त्रिगुणादुत्तमोत्तमः ॥४४॥ एवं प्राणमपानं च स्वमूले संनयेद् बुधः । तयो रोधनभावेन मूलगौ तौ भविष्यतः ॥४५॥ एवं क्रमेण मूलेऽयं वायुर्मुहूर्तं संस्थितः । तदा समानगा नाडी भिद्यते तत्र संस्थिता ॥४६॥ सा सुषुम्णा समाख्याता तत्र संमिलितौ क्रमात् । प्राणापानौ समौ भूत्वा तद्रूपौ तौ भविष्यतः ॥४७॥ त्रिकालज्ञः स्वयं सिद्धो भविष्यति नरोत्तमः । वायुसाधनपात्रत्वं प्राप्य तेजःसमन्वितः ॥४८॥ ततः स्वाधीनतां यातौ प्राणापानौ विशेषतः । स नयिष्यति तौ यत्र क्रमात्तत्र गमिष्यतः ॥४९॥ ततो ध्यानपरो भूत्वा षट्चक्रभेदने रतः । चक्रस्थं स्वस्वरूपं स पश्येत्तद्वायुना गतः ॥५०॥ एवं क्रमेण योगींद्रो गच्छेद्भेद्य प्रजापते । सहस्रारे स

चक्राणि तत्र पश्येद्गजाननम् ॥५१॥ तत्र क्रमेण वायुं संस्थापयेत सुसमाधिना। वायुना संयुतस्तिष्ठेत पश्यन विघ्नेश्वरं परम् ॥५२॥ क्रमाद्वायुबलेनैवं शुद्धचित्तो भविष्यति। पश्येत सर्वत्र भावेषु स्थितं ब्रह्म सनातनम् ॥५३॥ ततः स्वाधीनतायुक्तः प्रभवेत स्वेन तेजसा। यं यमिच्छेत स तं तं तु सद्यो वै सफलं भवेत ॥५४॥ किंचिदिच्छेन्न यो योगी तदा योगमवाप्नुयात। नो चेच्छंदरतो भूत्वा भोगयुक्तः पुनः पतेत ॥५५॥ साधनं द्विविधं प्रोक्तं क्रियारूपं प्रजापते। बाह्यं कर्मस्वरूपाख्यं तपोयुक्तं स्वधर्मजम ॥५६॥ आंतरं वायुरोधाख्यं सर्वसिद्धिप्रदायकम। नाभ्यां चित्तं विनिगृह्य स्ववशं कारयेन्नरः ॥५७॥ बाह्यकर्मरताच्चांतरांतरं शीघ्रसिद्धिदम। सहस्राधिकभावाख्यं प्रोक्तं योगींद्रमुख्यकैः ॥५८॥ अतः परं तृतीयं ते साधनं कथयाम्यहम। येन योगींद्रसंज्ञः स ध्रुवं भवति मानवः ॥५९॥ चित्तशुद्धेश्च कार्यार्थं कर्म द्विविधमुच्यते। शुद्धचित्तो नरः पश्चात संपश्येद्ब्रह्म शाश्वतम ॥६०॥ सर्वत्र पूर्णभावेन संस्थितं परमव्ययम। अवयवादिभिर्हीनं तत्र लीनो भवेत स्वयम ॥६१॥ एतावान फलादानाऽयं क्रियायोगः प्रकीर्तितः। बाह्यांतरात्मकः पूर्णस्ततोऽन्यत साधनं चरेत ॥६२॥ चित्तं रसयुतं कुत्र जायते योगिनः परम। तज्जयेद्ब्रह्मभावेन शमदमपरायणः ॥६३॥ स्वधर्मसंयुतो भूत्वा देहनिर्वाहकं चरेत्। देहस्य शमनं तत्र जायते स दमः स्मृतः ॥६४॥ विषयार्थं मनस्तस्य संकल्पं यत समाचरेत। तत्रकेचित्तमागृह्य कुर्याद्ब्रह्मपरायणम ॥६५॥ अयं शमः समाख्यातस्तेन चित्तं भवेत परम। स्वाधीनं सर्वभावं च त्यक्त्वा ब्रह्मपरं भवेत ॥६६॥ शनैः शनैरुपरमेद्विषयेभ्यो महात्मवान। धृतिं योगमयीं धृत्वा भवेद्योगी स मानवः ॥६७॥ कर्ममार्गं परित्यज्य द्विविधं योगिसत्तमः। ध्यानयोगपरो भूत्वा तिष्ठेत्तित्यं वदामि तम ॥६८॥ मनोवाणीविहीनं यद्ब्रह्म तत्र समाचरेत। ध्यानं संकल्पत्यागाख्यं विषयेषु निरंतरम ॥६९॥ यो यश्चित्तेन संकल्पः क्रियते विषयेषु च। तत्तत्संकल्पहीनं स कारयेद्योगतत्परः ॥७०॥ एवं चित्तं नरस्यैव स्वाधीनं जायते सदा। यदा धर्तुं स नो शक्तस्तदान्यदाचरेद्बुधः ॥७१॥ देहेंद्रियाणि संगृह्य तिष्ठेद्भूमौ महायशाः। न चलेत स्थाणुवत सोऽपि क्रियां नैव समाचरेत ॥७२॥ तत्र यत्मिलितं चान्नं जलपानादिकं चरेत। परेच्छया समायुक्तः सदा तिष्ठेत महायशाः ॥७३॥ केनापि जलपानादि न दत्तं तादृशो वसेत। न तदर्थं भ्रमेत् सोऽपि नेच्छेत प्रारब्धधारकः ॥७४॥ सर्पवृश्चिकव्याघ्राद्यैः पीडितो यदि मानवः। नानाप्रहारयोगैश्च मानवादिभिरेव वा ॥७५॥ तथापि न चलेत् सोऽपि स्वस्थानाज्जडवत्परः। देहप्रारब्धमाश्रित्य न तेषु क्रोधमाचरेत् ॥७६॥ पूर्वजन्मकृतं कर्म

मया तेन प्रबोधितः । इमं संपीडयंत्येवमेषां दोषो न विद्यते ॥७७॥ अथवा सात्त्विकैस्तत्र पूजितः सर्वभावतः । नित्यं
नानाजनैः सोऽपि सेवितो न चलेत्तदा ॥७८॥ पूर्वजन्मकृतं कर्म प्रेरितास्तेन मानवाः । मया मां पूजयंत्येव गुण एषां न
विद्यते ॥७९॥ एवं मनसि संधार्य तेषां नच्छेच्छुभं कदा । द्वंद्वमेवं परिगृह्य तिष्ठेन्नित्यं महायशाः ॥८०॥ अनेन विधिना
सोऽपि स्वल्पकालेन भो विभो । चित्तं जयेन्न संदेहः शांतिं पूर्णामवाप्नुयात् ॥८१॥ नान्यत् किंचिच्चरेत् कर्म न ध्यानादिक-
मावरेत् । एवं शमदमौ धृत्वा भवेद्योगी स मानवः ॥८२॥ विचारं ब्रह्मणस्तत्र कुर्यान्नित्यं विशेषतः । कीदृशं ब्रह्म हृत्स्थं
स वेदार्थैः प्रतिपादितम् ॥८३॥ पंचभूमिमतिक्रम्य तिष्ठेत् क्रमेण मानवः । नानाब्रह्माणि पश्यन् सन्नेन शांतिमवाप्नुयात्
॥८४॥ शांतियुक्तो नरः पश्चात् संत्यजेत्तां महाद्भुताम् । जडावस्थां पुनः सोऽपि यथेच्छाचारगो भवेत् ॥८५॥ हृदि
चिंतामणिं दृष्ट्वा पंचभूमिप्रचालकम् । शांत्या युक्तो भवेन्नित्यं स्वाधीनहृदयः परः ॥८६॥ दृष्ट्वा ब्रह्म स्वयं योगी
रसहीनो भवेत् मुदा । सर्वत्र नात्र संदेहः शांत्या सर्वं समाचरेत् ॥८७॥ अनेन विधिना दक्ष ज्ञानी पापपरायणः । क्रमेण
साधयेद्योगं स योगी संभवेत् परः ॥८८॥ एवं कर्तुमशक्तश्चेत्तदा श्रुत्वा महामतिः । इमं योगं स्वयं तत्र निष्ठायुक्तो
भवेत् सदा ॥८९॥ स्वधर्मनिरतो भूत्वा योगमिच्छेन्निरंतरम् । विषयभोगान् प्रभुंजन् सन्नेन स्वानंदगो भवेत् ॥९०॥
गणेश्वरं तत्र दृष्ट्वा योगयुक्तो भविष्यति । ज्योतिर्देहधरो भूत्वा प्रभजेद्गणनायकम् ॥९१॥ ब्रह्म कल्पमयं स्थित्वा
कालं तत्र महामतिः । तद्देह लीनतां प्राप्य ब्रह्मभूतो भविष्यति ॥९२॥ एवं कर्तुमशक्तश्चेत्तदा स धर्मसंयुतः । कर्माचरेत्
प्रजानाथ ब्रह्मार्पणविधानतः ॥९३॥ तेनैव शुक्लगत्या स ब्रह्मीभूतो नरो भवेत् । निःकामयोगमार्गेण सदा ब्रह्मणि
तत्परः ॥९४॥ एवं कर्तुमशक्तश्चेत्तदाऽहं ब्रह्मभावतः । त्रिविधं फलमुत्सृज्य कर्मजं योगमाप्नुयात् ॥९५॥ कर्मत्यागबले-
नैवाहं ब्रह्म निश्चयेन सः । क्रमेण कर्मसंयुक्तो भविष्यत्यन्यजन्मनि ॥९६॥ निःकामकर्मकर्ता स पुनरन्यभवे नरः ।
योगरससमायुक्तो भवेद्विषयनिंदकः ॥९७॥ एवं क्रमेण शांतिं स लभेत् पूर्णां न संशयः । क्रमार्थं रचितं सर्वं
नानामतसमन्वितम् ॥९८॥ सुगमं सर्वभावेषु गणेशभजनं परम् । तेन योगी भवेन्नूनं सर्वशास्त्रेषु संमतम् ॥९९॥
यत्किंचिद् गणराजस्य व्रतपूजादिकं प्रभोः । कीर्तनश्रवणाद्यं तु ब्रह्मीभूतप्रदायकम् ॥१००॥ नानाविषयसंयुक्तो नरः
स्मरेद्गणाधिपम् । अहर्निशं तदास्यांते गणेशस्मरणं भवेत् ॥१॥ तेन स्वानंदगो भूत्वा योगमभ्यस्य तन्मयः । ब्रह्मकल्पांत-

भावे स भविष्यति न संशयः ॥२॥ स्मरणं गणराजस्य प्रकुर्यान्नित्यमादरात् । तस्यांते गणराजस्य स्मृतिं दद्यात्परात्परः ॥३॥ अतोऽहर्निशमेकं तं संस्मरेत् मानवः परम् । नानायोगादिकं सर्वं साध्य योगिसमो भवेत् ॥४॥ आयासेन विहीनोऽपि सदा विषयलंपटः । गणेशस्मरणे सक्तः सः शुकसमतां व्रजेत् ॥५॥ शिवविष्णुमुखादीनां नरो यः स्मरणं चरेत् । अंते तेषां स्मृतिं तस्मै स दद्याच्चित्तगः प्रभुः ॥६॥ तेषां लोकं समासाद्य भुक्त्वा भोगान् मनोहरान् । प्रपतेन्नाऽत्र संदेहो मृत्युलोके विशेषतः ॥७॥ पुराणेषु प्रपश्यंते त्रिगुणानां लयाः सदा । अतः स जन्ममृत्युभ्यां युक्तो भवति तद्रतः ॥८॥ अतः सारं समाख्यातं गणेशभजनं परम् । तेनाज्ञानसमायुक्तो नरो ब्रह्ममयो भवेत् ॥९॥ एतत्ते कथितं दक्ष योगप्राप्त्यर्थमादरात् । अज्ञानसंयुतस्यापि ब्रह्मीभूतप्रदायकम् ॥१०॥

ॐ तत्सदिति श्रीमदान्त्ये पुराणोपनिषदि श्रीमन्मौद्गले महापुराणे नवमे खंडे योगचरिते मुद्गलदक्षसंवादे योगामृतार्थशास्त्रे अज्ञानिनां कृतयोगवर्णनं नाम नवमोऽध्यायः ॥

॥ इति योगगीतामृतार्णवस्तु सुगमासु पंचमोऽध्यायः ॥

॥ श्रीगणेशाय नमः ॥ दक्ष उवाच । विभूतीर्वद योगीश गणेशस्य महात्मनः । या ज्ञात्वा ताः समाराध्य गणेशज्ञो भवेन्नरः ॥१॥ मुद्गल उवाच । अपारा गणनाथस्य विभूतयो न संशयः । ता न शक्ताः कथयितुं भवंति शंकरादयः ॥२॥ क्षणे क्षणे गणेशानो नानास्वेल्परायणः । विभूतिभिर्जगत्सर्वं भावयति परात्परः ॥३॥ लोकेषु तत्त्वमुख्येषु जगत्सु ब्रह्मसु प्रभोः । ये श्रेष्ठास्तस्य ते सर्वे विभूतिपदधारकाः ॥४॥ कल्पे कल्पे विभूतीनामवतारा असंख्यकाः । गणेशस्य तथा दक्ष तात वक्तुं कः क्षमो भवेत् ॥५॥ अतः संक्षेपतस्तुभ्यं कथयिष्यामि ताः शृणु । विभूतीर्गणनाथस्य नानासिद्धिप्रदायिनीः ॥६॥ जगत्सु ब्रह्मसु प्राज्ञ योगरूपो गजाननः । कथं न भिन्नभावाख्यं वर्तते वर्णयाम्यहम् ॥७॥ मायाभ्यां संयुतः सोऽपि नानावेषप्रधारकः । अयोगिनामिदं हृद्यं सत्यं संभासते सदा ॥८॥ मायायुक्तप्रभावेण किं किं गजाननस्य

च । न संभवदहं मायां समाश्रित्य वदामि ताः ॥९॥ कलांशाः कलया युक्ताः कलांशांशाः कलात्मकाः । तेषामंशधरा
ये ते सर्वे विभूतिधारकाः ॥१०॥ एवमेव गणेशानः पृष्टश्च नारदेन सः । जगाद ताः शृणुष्व त्वं विभूतीः परमाद्भुताः ॥११॥
श्रीगणेश उवाच । पूर्णो योगेषु सर्वेषु चित्तरोधमयः परः । मायाहीनप्रभावाणामयोगोऽहं महामुने ॥१२॥ स्वानंदो निजभक्तेषु
तुर्येष्वव्यक्तसंज्ञितः । आनंदसमभावेषु जीवेष्वात्माहमंजसा ॥१३॥ नानाभेदेषु ब्रह्माहममद्रूपप्रधारकम । सत्येषु सांख्य-
रूपोऽहं बोधः स्वल्पकेषु च ॥१४॥ देहाभिमानयुक्तेषु सदैकोऽहं महामते । देहेषु बिंदुरूपोऽहं चेतनासु गुणेश्वरः ॥१५॥
कोशेष्वानंदकोशोऽहं विज्ञानं सूक्ष्मजानिषु । विवेकेषु मनश्चाहं चालकेषु समीरणः ॥१६॥ स्थूलेष्वन्नस्वरूपोऽहं समष्टिषु
तथेश्वरः । व्यष्टिषु प्राज्ञरूपोऽहमणुषु च महाविराट् ॥१७॥ इंद्रियेषु मनश्चाहं भूतेष्वाकाशसंज्ञितः । तन्मात्राणामहं
शब्दो ज्ञाताहं देवतासु च ॥१८॥ तत्त्वेषु विविधेष्वेव महत्तत्त्वमहं परम् । गुणेषु गुणपोऽहं तु पालकेषु जनार्दनः ॥१९॥
हरः संहारकर्तृणां स्रष्टृणां प्रपितामहः । कर्मणामर्यमाऽऽत्माऽहं मोहकानां च शक्तिका ॥२०॥ देवानां मघवाऽहं तु
आदित्यानां विनायकः । तेजसां भानुरूपोऽहममृतेषु विधुः परः ॥२१॥ अग्निः प्रतापदेष्वेव धर्मः समप्रवृत्तिषु । यमो
यमवतां चाहं रक्षसां निर्ऋतिः स्वयम् ॥२२॥ जलेषु वरुणोऽहं तु बलवत्सु समीरणः । निधीनां धनदाताऽहं रुद्राणां शंकरः
प्रभुः ॥२३॥ कामो धनुर्धराणां च रतिर्भोगेषु भोगदा । नागेशानामहं शेषः सर्पाणां तक्षकः स्वयम् ॥२४॥ नागानां
वासुकिर्नाम जंबुद्वीपेषु सर्वदः । स्वादूदकः समुद्राणां पर्वतेषु हि मेरुकः ॥२५॥ पितॄणां यमरूपोऽहं वृक्षेषु शमिका मता ।
देववृक्षेषु मंदारस्तरूणां कामदायकः ॥२६॥ धेनूनां कामधेनुर्या दूर्वा चौषधिषु प्रभुः । पक्षिषु तु मयूरोऽहं मृगाणां
सिंहरूपधृक् ॥२७॥ मासानां श्रावणश्चाहं चौराणां मूषकाधिपः । वाहनेष्वश्ववाहोऽहं सिद्धिरैश्वर्यदेषु च ॥२८॥ विद्यासु
बुद्धिरूपोऽहं चित्तं प्रकाशकारिणाम् । अहं मनश्च वेगानां मोहदेष्वभिमानकः ॥२९॥ नराधिपो नराणां तु वर्णेषु ब्राह्मणो-
ऽप्यहम् । आश्रमेषु तुरीयोऽहं पोषकेषु गृहस्थकः ॥३०॥ त्यागिनामवधूतोऽहं तिथीनां च चतुर्थिका । प्रजापतिषु दक्षोऽहं
ब्रह्मर्षिषु भृगुस्तथा ॥३१॥ नारदो दैवतर्षीणां दत्तोऽवधूतरूपिणाम् । कपिलस्तत्त्वविज्ञानां योगिनां शुक एव यः ॥३२॥
जनकोऽहं विदेहानां निःसंगेषु महामुने । सनकादय एवाऽहं ज्ञानिनां बादरायणः ॥३३॥ वसिष्ठः कर्मकर्तृणां गाणपत्येषु
मुद्गलः । भृशुंडी चैकनिष्ठेषु ब्रह्मिष्ठानां बृहस्पतिः ॥३४॥ अन्नानां तिलरूपोऽहं गव्यानां घृतमंजसा । मधु सर्वरसानां च

मकरो जलजात्मनाम् ॥३५॥ कौमंडली नदीनां च तीर्थेषु गाणपं परम् । क्षेत्राणां मयूरक्षेत्रं काशिराजः सुबुद्धिषु ॥३६॥
मयूरेशोऽवतारणां गार्ग्य उपासकात्मनाम् । ध्याननिष्ठेषु सर्वेषु गृत्समदोऽहमेव च ॥३७॥ सुबोधौ दैत्यजातीनां ज्ञाना-
रिर्दूषकारिणाम् । दुर्जयेषु मनश्चाहं वर्णेष्वोंकार एव सः ॥३८॥ शुकोऽहं भाविकेष्वेव त्रिशिराः शुद्धचेतसाम् । उपदेश-
प्रदातॄणां याज्ञवल्क्यः प्रतापवान् ॥३९॥ पौराणिकेषु सूतोऽहं श्रोतॄणां शौनको मुनिः । सेनानीनामहं स्कंदो विष्णु-
र्यशस्विनामहम् ॥४०॥ पापेष्वनृतरूपोऽहं कलहो भेदधारिणाम् । प्राप्तिषु लोभरूपोऽहं मणीनां चिंतितार्थदः ॥४१॥
ज्ञानं पवित्रं भावानां सामगायकधर्मिणाम् । वेदेष्वथर्वसंज्ञोऽहं शस्त्रेषु परशुः परः ॥४२॥ निर्लेपानामहं साक्षी राजश्रीषु
राजस्तथा । विषयो भ्रांतिदानां च रंभा ह्यप्सरसामहम् ॥४३॥ गंधर्वाणां चित्ररथो वैद्यानां वैद्यनायकः । धन्वंतरिस्तु
भिषजां समुद्रः सरसात्मनाम् ॥४४॥ स्रोतसां जाह्नवी विप्र मंत्राणामेकवर्णजः । सूक्तेषु ब्राह्मणस्पत्यं यज्ञेषु ज्ञान-
रूपधृक् ॥४५॥ प्राणेषु तु समानोऽहं शक्तिः शक्तिमतामहम् । बृहदारण्यकं विद्धि नानोपनिषदां परम् ॥४६॥ शास्त्रेषु
योगशास्त्रं च पुराणेषु च मौद्गलम् । अरण्यानां महारण्यं दंडकाख्यमहं परम् ॥४७॥ नियंतॄणामहं दंडो मायाऽहं भावकारि-
णाम् । स्मृतीनां याज्ञवल्क्यस्य स्मृतिरेव परा मता ॥४८॥ गायत्री छंदसां विप्र स्वानंदो नगरात्मनाम् । व्याकरणमंग-
भूतेषु कलासु योगदा ह्यहम् ॥४९॥ नीतिज्ञेषु तथा काव्यो वृषभो भूमिधारिणाम् । नंदिकेशो गवां चाहं नग्नो भैरव-
भाविनाम् ॥५०॥ एवं नानाविधाऽऽकारा विभूतीर्गणपस्य या । कथितुं नैव शक्या सा सारा संकथिता मया ॥५१॥
यद्यच्छ्रेष्ठतमं विप्र सा विभूतिर्न संशयः । लोकेषु गणराजस्य तां भावय विशेषतः ॥५२॥ मुद्गल उवाच । एवमुक्त्वा
गणेशानो विरराम प्रजापते । नारदस्तं प्रणम्यैव जगाम तादृशोऽभवत् ॥५३॥ य इमां श्रावयेद्दक्ष शृणुयाद्वा प्रयत्नतः ।
न मोहं स लभेत क्वापि ज्ञात्वा मामग्रजं महः ॥५४॥ अपारमहिमायुक्ता जीवाश्च परमेश्वराः । ते सर्वे विघ्नराजस्य
विभूतिपदधारकाः ॥५५॥ एवं ज्ञात्वा गणेशानं ये भजंति मनीषिणः । ते सर्वे ब्रह्मभूताश्च भविष्यंति प्रजापते ॥५६॥

॥ ॐ तत्सदिति श्रीमदांत्ये पुराणोपनिषदि श्रीमन्मौद्गले महापुराणे नवमे खंडे योगचरिते मुद्गलदक्षसंवादे
योगामृतार्थशास्त्रे चित्तभूमिनिरोधने विभूतियोगो नाम दशमोऽध्यायः ॥

॥ इति योगगीतामृतोपनिषत्सु सुगमासु षष्ठोऽध्यायः ॥

॥ श्रीगणेशाय नमः ॥ दक्ष उवाच । त्वया प्रोक्तः पुरा विप्र विचारो ब्रह्मणः परः । तं कृत्वा योगमाप्नोति तद्वदस्व हितावहम् ॥१॥ क्रियया शुद्धचित्तो यो नरो ब्रह्मपरायणः । सर्वत्र ब्रह्मरूपं यद्विधिना केन पश्यति ॥२॥ मुद्गल उवाच । आह्यांतरां क्रियां कृत्वा शुद्धचित्तो नरोत्तमः । तत्त्वविचारमार्गेण पश्यति ब्रह्म शाश्वतम् ॥३॥ तत्तेऽहं कथयिष्यामि तत्त्वज्ञानं प्रजापते । आदौ योगिजनानां यत् साधनं योगदायकम् ॥४॥ पृथ्वी जलं तथा तेजो वायुराकाशमेव यत् । पंचभूतमयो देहः प्रकृतिः सा च पंचधा ॥५॥ क्रियारूपा महाभागा नानाभेदपरायणा । विभज्यात्मानमेवं सा क्रीडति विविधं रता ॥६॥ भूतानामेकभावाख्या पंचानां ज्ञानरूपिणी । प्रकृतिर्हृदि संस्था सा जीवभावधरा परा ॥७॥ तया ज्ञानं भवेत् सर्वं नानाविवेकदायकम् । तदाधारं जगत् सर्वमेकरूपा प्रकीर्तिता ॥८॥ तयोर्योगे प्रजानाथ ब्रह्मैवमभिधीयते । क्रियाज्ञानस्वरूपाख्यं द्वंद्वहीनं परात्परम् ॥९॥ तदेव पंचधा जानं शृणु तद्योगदायकम् । स्थूलं सूक्ष्मं समं चात्मप्रतीतं बिंदुसंज्ञितम् ॥१०॥ समष्टिव्यष्टिभावेन द्विविधं ब्रह्म कथ्यते । पृथक्त्वेन स्वयं भाति पंचसु पंचभेदतः ॥११॥ स्थूलं जागृन्मयं ब्रह्म तदेव द्विविधं मतम् । विश्वाख्यं व्यष्टिरूपेण वैश्वानरं समष्टिगम् ॥१२॥ अंडेषु विविधा रूपा जंतवो दृष्टिगोचराः । जागृद्भावधराः सर्वे विश्वात्मका उदाहृताः ॥१३॥ तस्य भेदं प्रवक्ष्यामि सुगमार्थप्रकाशकम् । क्रियात्मकेषु देहेषु क्रियारूपा भवंति ते ॥१४॥ ज्ञानात्मकेषु देहेषु ज्ञानरूपधरा मताः । उभयोर्योगभावेन विश्वाख्यास्ते प्रकीर्तिताः ॥१५॥ बाह्यदेहस्य भो दक्ष वितस्तिर्यादृशी भवेत् । तावन्मानेन सर्वेषां ज्ञानदेहो हृदि स्थितः ॥१६॥ विराट् जागृत् स्वरूपस्थो वैश्वानर इति स्मृतः । व्यापकात्मकदेहेन तिष्ठति विश्वभाविषु ॥१७॥ तस्यापि द्विविधो देहः क्रियाज्ञानप्रभेदतः । तयोर्योगे समाख्यातो वैश्वानरश्च तन्मयः ॥१८॥ विश्ववैश्वानरयोश्च योगे ब्रह्म प्रकीर्तितम् । जागृद्भावधरं पूर्णं स्थूलभूतप्रकाशकम् ॥१९॥ एतत् स्थूलस्य तत्त्वं ते कथितं तु समासतः । तत्र तत्त्वविधिं भिन्नं शृणु योगसमाधिदम् ॥२०॥ जन्ममृत्युयुतं यच्च नानाभावपरायणम् । त्वंपदाख्यं प्रजानाथ विद्धि तत् सर्वभावगम् ॥२१॥ जन्ममृत्युविहीनं यदेकरूपं प्रकीर्तितम् । तत्पदाख्यं च तद्विद्धि परं सर्वात्मधारकम् ॥२२॥ तयोर्योगे भवेत्तत्वं तदेवासिपदं परम् । द्वंद्वभावविहीनं यद् द्वंद्वरूपप्रकाशकम् ॥२३॥ त्वंपदं क्रियया युक्तं ज्ञानाख्यं तत्पदं भवेत् । तयोर्योगे भवेद्विश्वं तत्त्वरूपं न संशयः ॥२४॥ एवं वैश्वानराख्यं त्वं जानीहि तत्त्वसंज्ञितम् । क्रियाज्ञानसमायोगे तयोः प्रकाशकारकम् ॥२५॥ अथान्यच्छृणु दक्ष त्वं तत्त्वरूपं पुरातनम् । विश्वाख्या

जंतवः सर्वे नानाभावात्मका बुधैः ॥२६॥ जन्ममृत्युयुताः प्रोक्तास्त्वंपदधारका मताः । वैश्वानरस्त्वंपदश्चैकरूपाद्व्यापको मतः ॥२७॥ तयोरभेदभावे यद्ब्रह्मतत्त्वं प्रकीर्त्यते । जागृद्भावधरं पूर्णं स्थूलभावपरायणम् ॥२८॥ एवं नानाविभागेषु ज्ञातव्यं तत्स्वरूपकम् । सूक्ष्मादिषु प्रजानाथ ब्रह्मसौख्यप्रदायकम् ॥२९॥ अथ सूक्ष्मं प्रवक्ष्यामि योगमार्गप्रसिद्धये । शुद्धचित्तप्रभावेण तज्ज्ञानं तन्मयं भवेत् ॥३०॥ बाह्यं स्थूलं विशेषेण जागृदत्रमयं परम् । आंतरं स्वप्नभावाख्यं सूक्ष्मं जानीहि मानद ॥३१॥ प्राणो दशविधः प्रोक्तः सूक्ष्मरूपोऽतरे स्थितः । तस्मात् सूक्ष्मं मनः प्रोक्तं प्राणांतः संव्यवस्थितम् ॥३२॥ तस्मात् सूक्ष्मं च विज्ञानं देहद्वंद्वजमुत्तमम् । मनोऽतरे स्थितं पूर्णं तदंतरं च विद्यते ॥३३॥ त्रिविधं कोशसंयुक्तं स्वप्नं सूक्ष्मस्वरूपकम् । सर्वांतरे स्थितं ब्रह्म द्वंद्वमायाप्रचालकम् ॥३४॥ क्रियारूपस्तथा देहः सूक्ष्मभूतमयः स्मृतः । सर्वांतरे समास्थाय कल्पिताभोगकारकः ॥३५॥ ज्ञानदेहः समाख्यातः सदैकभावधारकः । पूर्ववत् सर्वं विज्ञेयं सूक्ष्ममायाप्रकाशकम् ॥३६॥ भिन्नभावधराः सर्वे जंतवः स्वप्नगाः पराः । तैजसास्ते मताः शास्त्रे क्रियाज्ञानप्रकाशकाः ॥३७॥ विराट् तत्र समाख्यातो हिरण्यगर्भसंज्ञितः । व्यापकः स्वप्नभावेषु नानाजंतुप्रचालकः ॥३८॥ तयोरभेदभावे यद्ब्रह्म स्वप्नात्मकं परम् । सूक्ष्ममायाप्रकाशत्वात् सूक्ष्मं तत् कथ्यते बुधैः ॥३९॥ पूर्ववत्तत्त्वभावश्च विज्ञेयः सूक्ष्मगः परः । शुद्धचित्तप्रभावेण साक्षात्कारं करोति सः ॥४०॥ अतः परं समाख्यं यद्ब्रह्म सुषुप्तिसंज्ञितम् । कथयामि महाप्रीत्या लोकानामुपकारकम् ॥४१॥ बाह्यं जागृन्मयं दक्ष वपुः सर्वत्र पठ्यते । आंतरं स्वप्नमित्युक्तं तयोर्योगे समात्मकम् ॥४२॥ बाह्यांतरैकभावाख्यं बाह्यांतरविवर्जितम् । आनंदकोशगं साम्यं कृतं भूतैर्गुणात्मकैः ॥४३॥ जागृत्त्यक्त्वा नरो यस्तु स्वप्नं गच्छति तत्र सः । तयोः संधिं समाश्रित्य सुषुप्तिर्जायते परा ॥४४॥ तथा स्वप्नं परित्यज्य जागृतिं गच्छति स्वयम् । तयोः संधिं समास्थाय तिष्ठति सा सुषुप्तिका ॥४५॥ यत्र सुप्तो नरो दक्ष ज्ञानयुक्तो भवत्यसौ । न जानाति स्वकं चान्यं स्वप्नं नैव प्रपश्यति ॥४६॥ सा सुषुप्तिः समाख्याता निद्रां संश्रित्य तिष्ठति । जागृतिस्वप्नबोधं या करोति सा सुषुप्तिका ॥४७॥ सा द्विधा मायया युक्ता प्राज्ञेश्वरस्वभावतः । भिन्नदेहधराणां तु प्रज्ञाख्या सा प्रकीर्तिता ॥४८॥ विराड्रूपधरा नित्या सेश्वराख्या प्रकथ्यते । ब्रह्मरूपा तयोर्योगे तत्त्वसंज्ञा यथा पुरा ॥४९॥ अथ तुरीयरूपं ते कथयामि समासतः । नादरूपधरं भूततन्मात्राभेदमंजसा ॥५०॥ व्यवस्थासंश्रितं पूर्णं त्रिषु साक्षिवदुच्यते । तस्यानुभवमाहात्म्यं कथयामि हिताय ते ॥५१॥ मया जागृन्मयं भुक्तं मया स्वप्नं विलोकितम् । निद्रायां न मया

किंचिज्ज्ञानं वदति यः स वै ॥५२॥ यदा जागर्ति विश्वस्थस्तदा द्वाभ्यां विवर्जितः। यदा स्वपिति स द्वाभ्यां हीनस्तिष्ठति निश्चितम् ॥५३॥ यदा सुषुप्तिसंस्थोऽयं तदा द्वाभ्यां विवर्जितः। एवं भेदप्रकारैः स त्र्यवस्थासंयुतो मतः ॥५४॥ तस्य तत्त्वं प्रवक्ष्यामि वैश्वतैजसप्राज्ञतः। त्वंपदाख्यः समाख्यातो नादरूपधरः प्रभुः ॥५५॥ त्रिविगणमय एवासौ तत्पदाख्यः प्रकीर्त्यते। तयोरभेदभावे स तत्त्वरूपोऽस्मितामयः ॥५६॥ अवस्थानां समायोगो नादस्तुरीयधारकः। सदैकभावसंयुक्तः सर्वत्राऽसौ विराजति ॥५७॥ न बाह्यो नाऽऽन्तरस्थोऽयं नोभयात्मक उच्यते। अहमित्येव कोशात्माऽस्मिताख्यः परमेश्वरः ॥५८॥ अतः परं प्रवक्ष्यामि बिंदुतत्त्वं सुसौख्यदम्। पंचमं ब्रह्मसंज्ञं तत् देहानां देहगं परम् ॥५९॥ त्र्यवस्थामयसंस्थं यत्त्वंपदस्थं प्रकथ्यते। तुरीयसंज्ञितं देहं तत्पदाख्यं प्रकीर्तितम् ॥६०॥ तयोरभेदभावे यत्तत्त्वं योगमयं परम्। चतुर्षु संस्थितं पूर्णं चतुर्भिर्वर्जितं सदा ॥६१॥ एवं तत्त्वविचारेण शमदमपरायणः। संकल्पजान् सदा कामांस्त्यक्त्वा योगमयो भवेत् ॥६२॥ सर्वत्र ब्रह्मसंस्थं यत् पश्येत्तन्नात्र संशयः। तत्त्वरूपधरं पूर्णं तत्त्वविचारतः सदा ॥६३॥ अथान्यत्तत्त्वमार्गं ते कथयिष्यामि सर्वदम्। बिंदुस्त्वंपदसंज्ञस्थः सोऽहं तत्पदगं मतम् ॥६४॥ तयोर्योगे प्रजानाथ बोधस्तत्त्वमयः स्मृतः। मनोवाणीविहीनत्वात् दृश्यते योगिना परः ॥६५॥ बोधस्त्वंपदरूपश्च विबोधस्तत्पदात्मकः। तयोर्योगे स्वसंवेद्यं तत्त्वं वेदे प्रकीर्तितम् ॥६६॥ असत्त्वंपदरूपं सत्तत्पदस्थमुदुच्यते। तयोर्योगे समं ब्रह्म तत्त्वं योगप्रदं मतम् ॥६७॥ समं त्वंपदसंज्ञस्थमव्यक्तं तत्पदस्थितम्। तयोर्योगे तथा तत्त्वं स्वानंदाख्यं प्रकीर्तितम् ॥६८॥ स्वानंदस्त्वंपदाख्यश्चायोगस्तत्पदमुच्यते। तयोर्योगे परं तत्त्वं पूर्णयोगमयं मतम् ॥६९॥ सिद्धिस्त्वंपदगा प्रोक्ता बुद्धिस्तत्पदगा मता। तयोर्योगे गणेशानस्तत्त्वरूपः प्रकथ्यते ॥७०॥ एवं नानामतैर्युक्ता वेदांतार्थविचक्षणाः। तत्त्वं वदंति दक्ष त्वं जानीहि नात्र संशयः ॥७१॥ अनंतभावसंयुक्तं त्वंपदं विद्धि सर्वदा। अकल्पितं तत्पदाख्यं तयोर्योगे परं भवेत् ॥७२॥ इदं सारं रहस्यं ते कथितं योगदं परम्। येन सर्वत्र योगं स संपश्येज्ज्ञानचक्षुषा ॥७३॥

॥ ॐ तत्सदिति श्रीमदांत्ये पुराणोपनिषदि श्रीमन्मौद्गले महापुराणे नवमे खंडे योगचरिते मुद्गलदक्षसंवादे योगामृतार्थशास्त्रे चित्तभूमिनिरोधेन तत्त्वविचारयोगो नाम एकादशोऽध्यायः ॥

॥ इति योगगीतासूपनिषत्सु सुगमासु सप्तमोऽध्यायः ॥

॥ श्रीगणेशाय नमः ॥ दक्ष उवाच । शुक्लां कृष्णां गतिं ब्रूहि याभ्यां मुक्तिमवाप्नुयात् । संसारं च तथा योगिन् दयया
सर्वनायक ॥१॥ मुद्गल उवाच । कर्मत्वं त्रिविधं विद्धि कर्माकर्मविकर्मगम् । स्वधर्मवर्जितं सर्वं कर्म विकर्मसंज्ञकम् ॥२॥
स्वधर्मसंयुतं कर्म भोगवासनया युतम् । कर्मसंज्ञं विजानीहि कृष्णगतिपदप्रदम् ॥३॥ ब्रह्मार्पणतया कर्म स्वधर्मस्थं भवेत्
परम् । शुक्लगतिमयं विद्धि मुक्तिदं तदकर्मकम् ॥४॥ आग्नेयं ज्योतिरयनमुत्तराख्यं दिवा तथा । शुक्लगतिमयं सर्वं जानीहि
मुक्तिदायकम् ॥५॥ चांद्रं ज्योतिर्धूमरात्री दक्षिणायनमेव यत् । कृष्णगतिस्वरूपं तज्जानीहि जनिमृत्युदम् ॥६॥ तयोर्भेदं
प्रवक्ष्यामि लोकानां हितकाम्यया । येन द्वैधं परित्यज्य ब्रह्मणि निरतो भवेत् ॥७॥ निःकामिकं कर्म कृत्वा मृतो नरो
यदा भवेत् । रात्रौ स दक्षिणार्के वा न तं गृह्णंति देवताः ॥८॥ देवभोगांस्तिरस्कृत्य ब्रह्मार्पणपरायणम् । नरं तं किं
करिष्यंति देवाः स्वर्गसुखप्रदाः ॥९॥ अतो दाहे स वै दक्ष अग्निज्योतिःस्थगो भवेत् । दिवसे समनुप्राप्ते दिवा देवतरा-
स्तथा ॥१०॥ उत्तरायणसंभूते स गच्छेद्भानुमंडले । प्रलये मंडलस्यैव नाशे पुरुषगो भवेत् ॥११॥ महाप्रलयवेलायां
प्रकृतेः पुरुषस्य च । नाशे ब्रह्मणि गच्छेत स ब्रह्मभूतो भवेत्ततः ॥१२॥ सकामकं कर्म कृत्वा दिवसे उत्तरायणे । मृतं
नरं न तं भानुर्गृह्णाति कामनायुतम् ॥१३॥ सदायं धूमसंस्थश्च यदा रात्रिः समागता । तदा तस्यां समाश्रित्य तथा तिष्ठत
प्रजापते ॥१४॥ दक्षिणायनमानंदादागतं वीक्ष्य तत्क्षणात् । विमानवरमारुह्य गच्छेत स्वर्गं विहायसा ॥१५॥ चांद्रं
ज्योतिः समाश्रित्य भोगान् भुंक्ते स्वकर्मजान् । कर्मप्रमाणमार्गेण नानास्वर्गपरायणः ॥१६॥ विधिं तत्र प्रवक्ष्यामि चंद्र-
कलासमुद्भवम् । अमृतं देवलोकेषु स्वर्गेषु भोगदं परम् ॥१७॥ इह कर्म कृतं पूर्णं नरैस्तदमृतात्मकम् । भवति चंद्रगं
सर्वं तेन कलायुतो भवेत् ॥१८॥ शुक्लपक्षे क्रमेणायमेकैककलया प्रभुः । वृद्धियुक्तः स्वयंपूर्णः पूर्णिमायां प्रदृश्यते ॥१९॥
कृष्णपक्षे सुराः सर्वे क्रमेणामृतभोजिनः । पिबंति चंद्रसंस्थं तदमृतं तृप्तिकारकम् ॥२०॥ तेन तृप्तियुताः सर्वे भवंति
मासमानतः । अमायां पतितश्चंद्र ओषधीषु न संशयः ॥२१॥ अत ओषधयश्छेद्या नरेण नैव निश्चितम् । अमायां
चंद्रसंयोगयुक्ताः सुखपरायणाः ॥२२॥ अतश्चंद्रभवं सर्वममृतं देवभूमिषु । चांद्रः स्वर्ग इति प्रोक्तस्तेनैवं वेदवादिभिः ॥२३॥
देवानां विविधानां स कर्म कृत्वा सकामकम् । कर्मांगदेवमभ्यर्च्य गच्छेत् समर्प्य तत्क्रियाम् ॥२४॥ तत्तल्लोकसुखं
भुक्त्वा नानाभोगसमन्वितम् । भोगांते पुनरेवाऽसौ मेघमंडलगो भवेत् ॥२५॥ तत्र जलमयो भूत्वा पतेद् वृष्ट्या स भूमिषु ।

तत औषधिगो भूत्वा भवेदन्नमयस्ततः ॥२६॥ ततो वीर्यं समाश्रित्य गच्छेत स जठरे स्त्रियः । तत्र तत्त्वानि तं दक्ष आविशंति न संशयः ॥२७॥ क्षेत्रज्ञः संस्थितस्तत्र तत्त्वैः क्षेत्रं विनिर्ममे । विधिं तस्य प्रवक्ष्यामि गर्भोपनिषदि भवम ॥२८॥ तत्रैकदिवसेनैव स्त्रीवीर्यं रक्तसंश्रितं । तस्मिन संमिलतं कृत्वा तदाकारो भवेन्नरः ॥२९॥ ततस्त्रिदिवसैः सोऽपि फेनरूपो भवेन्नरः । बुद्बुदः पंचदिवसैः पेशी सप्तदिनैस्तथा ॥३०॥ ततश्चतुर्दशैः सोऽपि दिवसैः फुल्लतां गतः । पंचविंशतिभिस्तत्र मांसरूपो भवेत स्वयम ॥३१॥ मासेन कठिनत्वं स प्रगच्छेत्तत्र संस्थितः। द्विमासाभ्यां शिरो युक्तो भवेत्तत्र प्रजापते ॥३२॥ त्रिमासैः कंठसंयुक्तश्चतुर्मासैस्त्वचा युतः । पंचमासैर्भवेज्जंतुरिंद्रियैः संयुतः क्रमात् ॥३३॥ अवयवादिसंयुक्तो नखरोम-समन्वितः । भवेत मुखेन संयुक्तो मासैः षड्भिर्न संशयः ॥३४॥ तत इंद्रियसंभूतं ज्ञानं भवेत क्रमेण वै । षण्मासैः परिपूर्णश्चाऽऽकृतिः पूर्णा भवेत परा ॥३५॥ पूर्वकर्मानुसारेण यादृशी योनिराभवेत । तादृशाकृतिसंयुक्त इंद्रियैश्च समन्वितः ॥३६॥ सप्तमासैर्भवेज्जंतुश्चेतनया समन्वितः। उदरे प्रचरेत् सोऽपि मातुर्दुःखसमन्वितः ॥३७॥ अवकाश-विहीनः स पीडितो जंतुभिः सदा। मूर्च्छां गच्छेत् पुनः संज्ञां कोमलोऽतीव मानवः ॥३८॥ अष्टमासैस्ततस्तत्र बुद्धियुक्तो भवेन्नरः। सांख्ययोगपरो भूत्वा ध्यायेद्ब्रह्म सनातनम् ॥३९॥ अतिसंकोचभावेन पीडितो जंतुभिस्तथा। मातुर्भक्ष्यान्न-दोषैः स वेदनासंयुतो भवेत् ॥४०॥ गर्भदुःखं स विज्ञाय तन्निवृत्त्यर्थमादरात्। सांख्ययोगपरो भूत्वा भजेत्तं गणनायकम् ॥४१॥ ततस्तत्र भवेत्तस्य ज्ञानं परमसौख्यदम् । तेनानंतभवानां स दृष्ट्वा दुःखं निवृत्तिगः ॥४२॥ अनन्यमनसा देवं स्तुयात् स्तोत्रैर्महामतिः। गर्भवासप्रशांत्यर्थं ब्रह्म भूयार्थमादरात् ॥४३॥ गर्भ उवाच। नमस्ते गणनाथाय ब्रह्मणे ब्रह्मरूपिणे। अनाथानां प्रणाथाय विघ्नेशाय नमो नमः ॥४४॥ ज्येष्ठराजाय देवाय देवदेवेशमूर्तये । अनादये परेशाय चादिपूज्याय ते नमः ॥४५॥ सर्वपूज्याय सर्वेषां सर्वरूपाय ते नमः। सर्वादये परब्रह्मन् सर्वेशाय नमो नमः ॥४६॥ गजाकारस्वरूपाय गजाकारमयाय ते। गजमस्तकधाराय गजेशाय नमो नमः ॥४७॥ आदिमध्यांतभावाय स्वानंदपतये नमः । आदि-मध्यांतहीनाय त्वादिमध्यांतगाय ते ॥४८॥ सिद्धिबुद्धिप्रदात्रे च सिद्धिबुद्धिविहारिणे। सिद्धिबुद्धिमयायैव ब्रह्मेशाय नमो नमः ॥४९॥ शिवाय शक्तये चैव विष्णवे भानुरूपिणे। मायिनां मायया नाथ मोहदाय नमो नमः ॥५०॥ किं स्तौमि त्वां गणाधीश यत्र वेदादयोऽपरे। योगिनः शांतिमापन्ना अतस्त्वां प्रणमाम्यहम् ॥५१॥ रक्ष मां गर्भदुःखात्त्वं त्वामेव

शरणागतम्। जन्ममृत्युविहीनं वै कुरुष्व ते पदप्रियम् ॥५२॥ एवं संस्तुवतं तं नवमासादनंतरम्। प्रसूतिजो महा-
वायुर्बहिः कुर्यात्तरं क्षणात् ॥५३॥ वायुना चालितः सोऽपि मुमूर्च्छ दुःखसंयुतः। संकीर्णांगः पतेज्जंतुर्धरण्यां योनि-
मार्गतः ॥५४॥ भवेत् स सावधानोऽत्र विस्मृतो ज्ञानमुत्तमम्। बालभावधरः कुर्याद्रोदनं धरणीतले ॥५५॥ फलहीनं
भवेत् सर्वं गर्भागारकृतं महत्। ज्ञानादिकमतो भूमौ साधयेत् सर्वमंजसा ॥५६॥ न साधितं नरेणात्र कर्मभूमौ प्रजापते।
ज्ञानादिकं तदा सोऽपि गर्भजं दुःखमश्नुते ॥५७॥ एवं कृष्णा गतिश्चैव कथिता ते विशेषतः। जन्ममृत्युकरी जंतोः
सुखदुःखप्रदायिनी ॥५८॥ इदं गर्भकृतं स्तोत्रं यः पठिष्यति मानवः। स भुक्त्वा सकलान् भोगानंते स्वानंदगो भवेत् ॥५९॥
न कदाचिल्लभेत् सोऽपि गर्भवासं प्रजापते। अतो विशेषतो जंतुर्निरंतरमिदं जपेत् ॥६०॥ अधुना कथयिष्यामि
ह्यन्यमर्थं सुखप्रदम्। शुक्लकृष्णगतिसंस्थं येन ज्ञानं तयोर्भवेत् ॥६१॥ भक्तिमुक्तिफलोभार्थं नरः कुर्यान्निरंतरम्। कर्म
स्वधर्मसंयुक्तो नानादैवं स योगवित् ॥६२॥ उत्तरायणगे भानौ दिवसे वा मृतो भवेत्। स चाग्निलोकमासाद्य तपो-
युक्तो भवेत् सदा ॥६३॥ तत्र भोगस्मुतां ज्वाल्य गच्छेच्छक्ति महामतिः। तत्राभिमानमुत्सृज्य गच्छेत् दिवं
दिवाकरम् ॥६४॥ अतिध्यानेन संयुक्तस्तत्रात्मानं स चिंतयेत्। अंतरात्मानमुत्सृज्य गच्छेद्विकुंठमेव च ॥६५॥ तत्रानंदं
परित्यज्य शिवं गच्छेन्न संशयः। तत्र साक्षित्वमुत्सृज्य गच्छेत् स्वानंदमंजसा ॥६६॥ तत्र गणेश्वरं दृष्ट्वा ब्रह्मीभूतो
नरो भवेत्। शुक्लगतिप्रभावेण कथितं ते प्रजापते ॥६७॥ यदा दक्षिणगे भानौ रात्रौ वा स मृतो भवेत्। भुक्तिमुक्तिपरः
सोऽपि गच्छेत् स्वर्गं ततो नरः ॥६८॥ नानास्वर्गफलं भुक्त्वा स्वकर्मनिर्मितं नरः। पुनः पतेद्द्विधे भूमौ तत्र मोक्षरुचि-
र्भवेत् ॥६९॥ ततः शुक्लां समाश्रित्य मोक्षं गच्छेत् स योगवित्। एवं जानीहि भो दक्ष गत्योर्मार्गं पुरातनम् ॥७०॥
यदैकदेवतां श्रित्वा तद्भक्तस्तत्परः सदा। उपासनाविधानेन स्वधर्मस्थो भजेत् स ताम् ॥७१॥ स मृतः स्वेष्टदेवस्य लोकं
गच्छेन्न संशयः। तत्क्षणाच्चंद्रसूर्याख्यौ मार्गौ नैव प्रकीर्तितौ ॥७२॥ तत्र भोगान् प्रभुंजानः स पतेदिह निश्चितम्।
त्रिगुणात्ममया देवास्तेषां नाशो प्रजापते ॥७३॥ यदा गणेश्वरं सोऽपि भजेदत्रैव मानवः। अंते स्वानंदगो भूत्वा ब्रह्मीभूतो
भविष्यति ॥७४॥ स्वानंदो नाशहीनश्च सदा ब्रह्मसुखप्रदः। अतः स्वानंदमाश्रित्य ब्रह्मीभूतो भविष्यति ॥७५॥ मरणे
दाघहीनश्चेत्तेजस्तत्त्वं समाश्रितः। अथवा धूम्रतत्त्वं स शुक्लकृष्णगतिश्रितः ॥७६॥ पूर्ववत् सर्वमाख्यातं तस्य सर्वं

प्रजापते। एवं विस्तरतो गत्योः कथितं ते प्रजापते ॥७७॥ अतो गणेश्वरं दक्ष समाश्रय हितप्रदम्। योगक्षेमं स ते कुर्यादनन्यचेतसः सदा ॥७८॥ न शुक्ला नैव कृष्णा ते भविष्यति गतिः कदा। ब्रह्मभूयमयं भावं प्राप्स्यसे नात्र संशयः ॥७९॥

॥ ॐ तत्सदिति श्रीमदान्त्ये पुराणोपनिषदि श्रीमन्मौद्गले महापुराणे नवमे खण्डे योगचरिते मुद्गलदक्षसंवादे योगामृतार्थशास्त्रे चित्तभूमिनिरोधने शुक्लकृष्णगतियोगो नाम द्वादशोऽध्यायः ॥

॥ इति योगगीतासूपनिषत्सु सुगमासु अष्टमोऽध्यायः ॥

॥ श्रीगणेशाय नमः ॥ दक्ष उवाच। क्षेत्रं वद महाभाग क्षेत्रज्ञं च तयोः परम्। सर्वगं ब्रह्म यत् प्रोक्तं येन ज्ञानं तयोर्भवेत् ॥१॥ मुद्गल उवाच। देहं क्षेत्रमयं विद्धि देही क्षेत्रज्ञमंजसा। तयोर्योगे महद्ब्रह्म स्वत उत्थानसंज्ञितम् ॥२॥ भूतानि पंचतन्मात्राः पंच ज्ञानेंद्रियाणि तु। कर्मेंद्रियाणि पंचैव वायवः पंच देवताः ॥३॥ इंद्रियाणां दशैवाऽपि द्वेष इच्छा धृतिस्तथा। अव्यक्तं चेतना दुःखं सुखं मोहनमेव च ॥४॥ चित्तं बुद्धिः स्थूलसूक्ष्मे कारणं च तुरीयकम्। एतेषां योगभावे यत् क्षेत्रं तत् कथितं बुधैः ॥५॥ सदैकभावरूपश्च भेदैः संवर्जितः परः। क्षेत्रज्ञः क्षेत्रमास्थाय सर्वांतर्यामितां दधे ॥६॥ तयोर्योगे परं ब्रह्म दृश्यादृश्यविवर्जितम्। दृश्यादृश्यमयं पूर्णं बोधरूपं प्रजापते ॥७॥ स्थूलसूक्ष्मसमात्माख्यैर्भावैर्माया विशेषतः। क्षेत्रज्ञं मोह्यस्वाधीनं करोति नित्यमादरात् ॥८॥ चतुर्भेदैर्विशेषेण मोहितोऽत्यंतमेव सः। अहं देहस्वरूपाख्यो मन्यते सततं मुधा ॥९॥ ततः क्षेत्रस्य भोगार्थं नानाकर्मपरायणः। त्रिगुणेषु भ्रमेणैव भ्रमतेऽहंममात्मकः ॥१०॥ ततस्तमोगुणं त्यक्त्वा राजसं धारयेन्नरः। राजसं च ततस्त्यक्त्वा सात्त्विकः संभवेत् क्रमात् ॥११॥ ततस्तुरीयमाश्रित्य गणेशं स भजेत् परम्। सर्वगं पंचमं साध्यं ब्रह्मीभूतो भवेन्नरः ॥१२॥ इह सौख्यप्रदं यच्च कर्म संजायते सदा। पापरूपमयं तेन ज्ञायते न कदाचन ॥१३॥ देहभोगकरं पूर्णं शिश्नोदरपरायणम्। तामसं तद्विजानीहि चांते नरकदं भवेत् ॥१४॥ तत्र तामससंयुक्ता भुक्त्वा दुःखं महाद्भुतम्।

पुना रोगादिसंयुक्ता भवंति नीचयोनिषु ॥१५॥ काणमूकादिदोषैस्ते संयुक्ताः पापचेतसः । दरिद्रादिसमायुक्ता भोगैर्हीना भवंत्यपि ॥१६॥ पुनः पापसमाचारा भवंति यदि मानवाः । अंते यमस्य गेहे ते नरकस्थाः पुनः पुनः ॥१७॥ अतस्तमोगुणस्थं स्वभावं त्यक्त्वा च मानवाः । धर्मार्थधृतिसंयुक्ता यत्नेन दैवयोगतः ॥१८॥ विद्धि राजसगं भावं नरा भुवि सकामकम् । सततं कर्म कुर्वंति भोगदं धर्मसंयुताः ॥१९॥ वासनासंयुतं कर्म स्वधर्मस्थं भवेत्किल । तदेव राजसं विद्धि नानाभावगतं परम् ॥२०॥ राजसाः सर्वभोगं तु भुक्त्वा पुनः पतंत्यपि । इह ये यादृशं कर्म कुर्वंते तादृशं फलम् ॥२१॥ अथवा स्वल्पभावेन कृतं राजससंभवम् । कर्म तेन नरा भूमौ भवंते तत्क्षणात् पुनः ॥२२॥ अथवा विविधास्ते ते योनिषु संभवंत्यपि । नीचोचासु विशेषेण जन्ममृत्युपरायणाः ॥२३॥ राजसानां प्रजानाथ नरको नैव विद्यते । स्थावरं जंगमं भित्वा भवंते जन्मसंयुताः ॥२४॥ तत्र दुःखं सुखं नाना भुंजते नात्र संशयः । एवं राजसगं सर्वं कथितं ते समासतः ॥२५॥ अतः परं प्रवक्ष्यामि सात्त्विकं कामवर्जितम् । स्वधर्मस्था जना विद्धि तत्कुर्वंति निरंतरम् ॥२६॥ ब्रह्मार्पणतया यद्यद्भवति कर्म धर्मजम् । नानाविधं परं तत्तत् सात्त्विकं विद्धि मानद ॥२७॥ तेन शुद्धगतिं भित्त्वा गच्छंति मोक्षसंज्ञता । अतः सत्त्वगुणेनैव युक्ता भवंति मानवाः ॥२८॥ अतःपरं तुरीयं ते कथयामि समासतः । रसहीनस्वभावेन चित्तं देहसमन्वितम् ॥२९॥ तदा भवति चेत्तुर्यं कर्म संजायते परम् । नानाविधं जगत् सर्वं ब्रह्माकारं न संशयः ॥३०॥ यद्यत्तेन कृतं कर्म तदेव ब्रह्मदं भवेत् । स्तुतिनिंदादिकं किंचिन्नैव तत्र प्रकीर्तितम् ॥३१॥ देवभक्तादिकं दक्ष नैव तुर्ये प्रतिष्ठितम् । ब्रह्मणि समभावेन वर्तते सर्वदा स्वयम् ॥३२॥ अंतरे सर्वभावेषु पश्यति विश्वरूपिणम् । तदा तुरीयगं कर्म क्वचिद्भवति नान्यथा ॥३३॥ एवं सर्वसमत्वेन यद्भवेत्तत्तुरीयकम् । कर्म प्रारब्धयोगेन ब्रह्मणो रसभावतः ॥३४॥ अंतेऽस्मिन्नामये तेन लीनो भवति मानवः । महाकारणभावेन भवेत् त्रिगुणचालकः ॥३५॥ अतः परमहं कर्म कैवल्यं कथयामि ते । निषेधविधिहीनं यद्भवेत् कर्म स्वेच्छया ॥३६॥ ब्रह्मभूयमयं विद्धि पंचमं योगिसंमतम् । कर्ता देहो न संदेहस्तुरीयं प्रेरकं मतम् ॥३७॥ कुतस्तत्र व्यवस्थाख्यं तुरीयं वर्तते परे । चतुर्विधं येन सृष्टमिदं सर्वं स्वलीलया ॥३८॥ स एव कर्तृभावेन कारयितृप्रभावतः । तत्र तिष्ठति कोऽहं तु कुतो ब्रह्मविचारतः ॥३९॥ नाहं नरो न वै ब्रह्म मया साध्यं निरंतरम् । भ्रांत्या सर्वं न संदेहो दृश्यते मायया मयि ॥४०॥ स्वेच्छया खेलति ब्रह्म चतुर्भेदमयं परम् । शुभाशुभं तस्य नास्ति वृथाऽहंतां

त्यजेन्नरः ॥४१॥ अनेनानुभवेनैव शान्त्या संवर्तते नरः । रसं सर्वत्र संत्यज्य ब्रह्मणो रसधारकः ॥४२॥ एवं चतुर्विधं भाव
स्थितं देहिस्वरूपकम् । देहभ्रांतिविहीनं तत्कृत्वा सोऽहंपरो भवेत् ॥४३॥ एवं क्रमेण योगींद्रा भवद्योगान्नरोत्तमः ।
कथितं विस्तरात् सर्वं क्षेत्रक्षेत्रज्ञसाधनम् ॥४४॥ अथ वर्णाश्रमाचारं शृणु सर्वसुखप्रदम् । येन धर्मार्थकामांश्च लभेत् मोक्षं
नरोत्तमः ॥४५॥ चित्तेंद्रियाणि वश्यानि क्षमार्जवतपांसि च । शौचं श्रुतिस्मृतीनां वै ज्ञानं यत्र प्रतिष्ठति ॥४६॥ वेदाचार-
विहीनं यन्न करोति कदाचन । सदा ब्रह्मपरो यस्माद्ब्राह्मणः स च संस्मृतः ॥४७॥ शौर्यं दाक्ष्यं तथा दार्ढ्यं युद्धे संमुखता
सदा । शरण्यरक्षणं नित्यं प्रभुत्वं दंडधारणम् ॥४८॥ धृतिः क्षात्रं सदा तेजश्चित्तमौदार्यसंयुतम् । सुनीत्या पालनं पंच
कर्मयुक्तः स बाहुजः ॥४९॥ क्रयविक्रयको नित्यं वस्तूनां भूमिकर्षणम् । गवां पालनकं त्रेधा कर्मयुक्तः स वैश्यकः ॥५०॥
त्रिवर्णसेवनं दानं नाममंत्रं जपेत् परम् । पुराणश्रवणं शौद्रं कर्म पौराणिकं द्विजात् ॥५१॥ अंत्यजानां पुराणोक्तं कर्म
विप्रमुखोद्गतम् । नैव शूद्रसमं चान्यदस्पर्शत्वं द्विजादिषु ॥५२॥ कृतोपवीतको विप्रः क्षत्रियो वैश्य एव यः । वेदादिकं
समभ्यस्यन् ब्रह्मचर्ययुतो भवेत् ॥५३॥ भिक्षाशनो भवेन्नित्यं गुरोराज्ञावशानुगः । गायत्रीं संजपेन्नित्यं त्रिकालेषु च
रोमधृक् ॥५४॥ सायं प्रातश्च जुहुयात् हविर्नित्यं जितेंद्रियः । षोडशाब्दं द्वादशाब्दं ब्रह्मचर्यं चरेत् परम् ॥५५॥ पंचयज्ञपरो
नित्यं नैमित्तं स समाचरेत् । कृतदारः प्रजार्थं स ऋतुगामी भवेद् गृही ॥५६॥ स्त्रीसंगं संपरित्यज्य स्त्रिया युक्तो वसेद्वनम् ।
वन्येन सर्वकर्माणि कुर्यान्नित्यं तपः परम् ॥५७॥ नखलोमयुतश्चैव न ग्रामेषु प्रवेशयेत् । कुर्यादेवं वानप्रस्थो वायुभक्ष्यादिकं
चरेत् ॥५८॥ मनसाऽपि स्मरेन्नैव स्त्रीसंगं न्याससंयुतः । चित्तनिग्रहसंयुक्तो भिक्षाशी सततं नरः ॥५९॥ कपर्दिकादिकं
किंचिन्न स्पृशेत् स कदाचन । ब्रह्मणि ब्रह्मभूतत्वं तदर्थं श्रमयेत् सदा ॥६०॥ साक्षिवद् देहसंस्थोऽपि मौनादिदंडधारकः ।
अथवा दंडहीनः स ज्ञानदंडधरो भवेत् ॥६१॥ एवं संन्यासकं कृत्वा सदा तिष्ठेद्यतात्मवान् । मुक्तिमार्गमयं शास्त्रं
स्पृशेन्नान्यद्विनिश्चितम् ॥६२॥ वर्णाश्रमविहीनश्चेद्योगी पंचमगः स्मृतः । विधिनिषेधहीनः स यथा विनायको भवेत् ॥६३॥
एतत्ते सर्वमाख्यातं स्वधर्माचरणादिकम् । येनैव प्राप्यते योगो नरेण ब्रह्मदायकः ॥६४॥ दक्ष उवाच । धर्मार्थकाममोक्षाणां
स्वरूपं वद मानद । ब्रह्मीभूतस्य भिन्नं मे भ्रमनाशकरं परम् ॥६५॥ केचिद्धर्मं महाश्रेष्ठमर्थं कामं तु मोक्षकम् । परात्परं
वदंत्येव ब्रह्मभूयं तथाऽपरे ॥६६॥ मुद्गल उवाच । धर्मेण ब्रह्मलोकश्च लभ्यते मानवैः परः । ब्रह्मा सर्वसमानश्च स्वधर्माख्यः

प्रकीर्तितः ॥६७॥ अर्थः समर्थभावाख्य ईशलोकप्रदायकः । ईश्वरात्र समर्थोऽन्यः पश्य ब्रह्मांडमंडले ॥६८॥ कामो भोगात्मकः प्रोक्तो विष्णुलोकप्रदायकः । स लक्ष्मीपतिराख्यातो नानाकामप्रदः प्रभुः ॥६९॥ मुक्तिः सौगतिका प्रोक्ता सूर्यः पुरुष उच्यते । शुक्लमार्गधरः पूर्णः साक्षात साक्षी विभावसुः ॥७०॥ ब्रह्मीभूतमयः प्रोक्तः स्वानंदः पूर्णयोगदः । वदंति न परं लोकं स्वानंदाद्द्वैतवादिनः ॥७१॥ अन्यच्छृणु प्रजानाथ पंचैते योगदायकाः । योगार्थवाचकाः सर्वे तत्र भेदं वदाम्यहम् ॥७२॥ योगधर्मेण योगश्च लभ्यते मानवैः परः । न योगादपरः श्रेष्ठस्तेनार्थोऽयं प्रकीर्त्यते ॥७३॥ योगकामेन योगोऽयं लभ्यते सर्वभावतः । मायाया वरणं त्यक्त्वा मोक्षयोगः प्रकीर्त्यते ॥७४॥ ब्रह्म ब्रह्मणि वेदेषु कथितं नात्र संशयः । तत्र योगेन योगी यो ब्रह्मीभूतः स वै स्मृतः ॥७५॥ धर्मार्थकाममोक्षाख्या योगशास्त्रे विशेषतः । भिन्ना मायामयाः प्रोक्ता ब्रह्मीभूतस्तु पंचमः ॥७६॥ ब्रह्मणि ब्रह्मभूतो यो योगी एव स उच्यते । न भिन्नः सर्वथा तस्माद्ब्रह्मणो ब्रह्मगः परः ॥७७॥

॥ ॐ तत्सदिति श्रीमदन्त्ये पुराणोपनिषदि श्रीमन्मौद्गले महापुराणे नवमे खंडे योगचरिते मुद्गलदक्षसंवादे योगामृतार्थशास्त्रे चित्तभूमिनिरोधने श्रेष्ठश्रेष्ठज्ञानयोगो नाम त्रयोदशोऽध्यायः ॥

॥ इति योगगीतामृतार्थतत्त्वम् मुद्गलात् नवमोऽध्यायः ॥

॥ श्रीगणेशाय नमः ॥ मुद्गल उवाच । वक्ष्यामि भावनां चैकां वेदशास्त्रार्थसंयुताम । नानामतभयं त्यक्त्वा तया योगी भवेन्नरः ॥१॥ चैतन्यं न्यायशास्त्रज्ञा वदंति ब्रह्ममुख्यकम । चैतन्येन युताः सर्वे स्वस्वकार्यपरायणाः ॥२॥ सर्वप्रकाशकत्वात्तचैतन्यं ब्रह्मसंज्ञितम । चैतन्येन यदा त्यक्तं तदा नाशमुपैष्यति ॥३॥ पंचचित्तात्मयोगेन चैतन्यं ब्रह्मसंज्ञितम् । भवत्यत्र न संदेहः शब्दार्थानामनेकतः ॥४॥ तार्किकाः प्रवदंत्येव सर्वाभेदं परं मतम् । ब्रह्मवेदांतवादेषु विद्यते शास्त्रसंमतौ ॥५॥ पंचचित्तमया भेदा अभेदा योगिना कृताः । योग एकार्थभावाख्यो भवत्यर्थप्रमाणतः ॥६॥ धर्मशास्त्र-

विदः सर्वे बोधात्मैव परं पदम्। ब्रह्म बोधमयं मुख्यं भावाभावविवर्जितम् ॥७॥ पंचचित्तगतो धर्मस्त्यक्त्वास्तेन योगकः। धर्मो भवेन्न संदेहो ब्रह्मधर्मधरः प्रभुः ॥८॥ सांख्या वदंति सांख्यं यद्ब्रह्म संख्याविवर्जितम्। विरोधान्न परं ब्रह्म खेलहीनप्रभावतः ॥९॥ तत्र पंचविधं चित्तं परं योगेन संख्यया। हीनं तदेव भवति योगाख्यं शब्दमानतः ॥१०॥ मीमांसका वदंत्येव स्वसंवेद्यं परं मतम्। कारणं ब्रह्म तत्रान्यन्नास्ति ब्रह्मणि संस्थितम् ॥११॥ पंचचित्तं परित्यज्य ब्रह्मरूपं करोति तत्। मीमांसया स्वयं योगी योगवाच्यं भवेत् परम् ॥१२॥ एवं नानामतैर्युक्ता वदंति शास्त्रभेदतः। ब्रह्म नानाविधं दक्ष तदेवं योगगं भवेत् ॥१३॥ शक्तिर्ब्रह्मेति शाक्ता वै न वदंति न तत्परम्। संयोगो द्वंद्वयोर्यत्र तदेवं योगगं भवेत् ॥१४॥ शक्तिः पंचमचित्तगा सा ब्रह्मणि समागता। परिगृह्य निरोधाख्यं चित्तं देवी ततः स्मृता ॥१५॥ सौरं ब्रह्मेति सौराश्च वदंति तु परात्परम्। तस्मात्परं न विद्येत सर्वाधारप्रमाणतः ॥१६॥ भेदात्मकं स संजीव्य नित्यं तिष्ठति चादरात्। तेन योगमयः सूर्यो भवत्यत्र न संशयः ॥१७॥ वदंति विष्णुर्ब्रह्मेति मुख्यं यद्वैष्णवा जनाः। तस्मात् परं पदं नास्ति सदानंदप्रमाणतः ॥१८॥ चित्तं यत् पंचमं तत्र मोहं त्यक्त्वा तदात्मकम्। ब्रह्मयोगे भवेद्योग आनंदो नात्र संशयः ॥१९॥ शैवाः शैवं परं ब्रह्म वदंति मुख्यभावतः। वेद तस्मात् परं नास्ति किंचित् मोहविहीनकम् ॥२०॥ निरोधं त्रिविधं दक्ष पराधीनं न संशयः। तत्रस्थं योगरूपाख्यं स्वाधीनं योगगं भवेत् ॥२१॥ एवं नानामतैर्युक्ता स्वस्वदेवपरायणाः। वदंति तत् प्रमाणं वै शब्दानामर्थभावतः ॥२२॥ अनेकार्थमयाः शब्दास्तेषु किं किं न संभवेत्। सर्वे योगार्थवाच्या वै जायंते योगिनः क्रमात् ॥२३॥ अन्नप्राणादिकाः शब्दा एवं ब्रह्मप्रवाचकाः। ते सर्वे योगदा दक्ष भवंति ब्रह्मधारणात् ॥२४॥ वेदांतमथ वक्ष्यामि सर्वमान्यं विशेषतः। शास्त्राणि च तदंगानि तत्प्रमाणानि सर्वदा ॥२५॥ यः सर्वं सर्वभावेषु युतो जानाति मायया। मायाहीनप्रभावेण योगस्तिष्ठति नित्यदा ॥२६॥ तदेव ब्रह्ममुख्यं तु सर्वेभ्यो नात्र संशयः। ब्रह्मभ्य ऋग्जगादैव प्रज्ञानं योगगं स्मृतम् ॥२७॥ पंचचित्तभवं सर्वं यो जानाति तदेव सः। योगस्तद्गतभावैः संवर्जितो भवति प्रभुः ॥२८॥ अहं ब्रह्मेति यद्ब्रह्म सर्वदोषविवर्जितम्। सदैवं यजुषा प्रोक्तं मुख्यं वै परतः परम् ॥२९॥ पंचचित्तभवा भेदास्तेष्वेवं भेदवर्जितम्। योगं विद्धि प्रजानाथ योगशास्त्रप्रमाणतः ॥३०॥ मायामोहयुतं यच्च मायामोहविवर्जितम्। तयोर्योगे परं ब्रह्म साम्ना संकथितं किल ॥३१॥ मायामोहयुतं ब्रह्म स्वानंदाख्यं ततः परम्। अयोगं मायया

हीनं तयोर्योगे तु योगगम् ॥३२॥ ब्रह्म ब्रह्मणि संस्थं यन्मनोवाणीमयं न तत् । मनोवाणीविहीनं नाथर्ववेदो जगाद ह ॥३३॥ मनोवाणीमयः प्रोक्तः संप्रज्ञातो न संशयः । असंप्रज्ञातकस्ताभ्यां हीनो योगस्तयोः परः ॥३४॥ एवं वेदार्थयुक्तानि महावाक्यानि मानद । योगाक्यानि विशेषेण जानीया योगमेवगा ॥३५॥ कर्मादयः समाख्याताः शब्दा ब्रह्ममया बुधैः । भवंति योगसंज्ञस्यास्ते सर्वं योगिनां मतं ॥३६॥ सर्वशास्त्रमतैक्यं ते कथितं शब्दधारणात् । तज्ज्ञात्वा मोहहीनः स सदा भवति मानवः ॥३७॥

॥ ॐ तत्सदिति श्रीमदान्त्ये पुराणोपनिषदि श्रीमन्मौद्गले महापुराणे नवमे खण्डे योगचरिते मुद्गलदक्षसंवादे योगामृतार्थशास्त्रे चित्तभूमिनिरोधेन नानात्मैक्ययोगो नाम चतुर्दशोऽध्यायः ॥

॥ इति योगगीतामृतनिरूपणं समाप्तम् दशमोऽध्यायः ॥

॥ श्रीगणेशाय नमः ॥ मुद्गल उवाच । अथो लयं प्रवक्ष्यामि येन चित्तं लयं व्रजेत् । ब्रह्मण्यास्थाय योगं च ज्ञात्वा योगं प्रजापते ॥१॥ लयश्चतुर्विधः प्रोक्तो नित्यो नैमित्तिकः परः । तृतीयः प्राकृतो विप्रैः सारस्वतश्चतुर्थकः ॥२॥ कर्माकर्मविकर्माख्यो नित्यः प्रोक्तो बुधैः पुरा । कर्मानुकूलभावेन जनानां जननादिकम् ॥३॥ क्षणक्रमादिमाख्यायायुषामंतः समास्थितः । गर्भाधानाद्यवस्थानां प्रकाशश्च प्रकथ्यते ॥४॥ ब्रह्मणो दिवसांते स कुंठितो नात्र संशयः । नैमित्तिकलयेनैव त्रिलोकलयकारिणा ॥५॥ शुभाशुभयुताः सर्वे जंतवो लयमाययुः । शुभाशुभफलैर्हीना बभूवुः कर्मकुंठनात् ॥६॥ स्वर्गमंडलपर्यंतं त्रैलोक्यं प्रलयं गतम् । तावता स प्रमाणेन नित्यः संकथितो बुधैः ॥७॥ अथो नैमित्तिकं दक्ष कथयामि समासतः । चतुर्युगसहस्राणि ब्रह्मणो दिनमुच्यते ॥८॥ नैमित्तिको दिनांतो यस्तदाख्यं वर्तते लयः । तेन नैमित्तिकः प्रोक्तो नाम्ना सर्वार्थकोविदैः ॥९॥ अधुना प्राकृतं वच्मि व्यवस्थाभिर्युतं लयम् । महाकारणगं चेदं स प्राकृत उदाहृतः ॥१०॥ तत्त्वानामेकभावोऽयं स्थूलसूक्ष्मसमात्मनाम् । प्राकृतः प्रकृतिस्थत्वात् कथ्यते विबुधैः परः ॥११॥ सारस्वतं परं पूर्णं शृणु योगप्रदं प्रभो । निरोधचित्तभावेन पंचचित्तलयात्मकम् ॥१२॥ मनोवाणीमयं सर्वं

विश्वं नानास्वभावगम् । मनोवाणीविहीनं त्वमसंप्रज्ञातं विदुर्बुधाः ॥१३॥ वाण्या संकथ्यते भावो मनस्तत्र प्रगच्छति । नानापदार्थभिन्नत्वात् सर्वेषां प्राणिनां प्रभो ॥१४॥ वाण्या वाणीविहीनं यत् कथितं ब्रह्म हृद्गतम् । चित्तं समाधिना तत्र सदा तिष्ठति तादृशम् ॥१५॥ वाणी सा द्विविधा प्रोक्ता ब्रह्माकारा जगन्मयी । तयोर्नाशे लयः प्रोक्तः परः सारस्वतो बुधैः ॥१६॥ सरस्वतीलयं यत्र योगभावात् प्रगच्छति । महावाक्यादिसंयुक्ता स सारस्वत उच्यते ॥१७॥ सारस्वतलयेनैव चित्तं पंचविधं प्रभो । चिंतामणौ लयं कृत्वा तिष्ठ त्वं योगिसंमतः ॥१८॥ एतत् सर्वं समाख्यातं योगदं ते समासतः । गोपयैनं महायोगं ततो योगी भविष्यसि ॥१९॥ मा योगं कथयस्व त्वमिमं कस्मै प्रजापते । पात्रहीन-प्रभावेण भ्रंशदस्ते भविष्यति ॥२०॥ वासनाहीनभावेन गणेशज्ञानलालसान् । तान् बोधय विशेषेण तदाऽयं शुभदो भवेत् ॥२१॥ अत्र ते कारणं दक्ष कथयामि समासतः । तस्य श्रवणमात्रेण संशयस्तु लयं व्रजेत् ॥२२॥ योगाकारो गणेशानो यदा खेलपरोऽभवत् । तदा तं वचनं मायि सिद्धिबुद्धी समूचतुः ॥२३॥ सिद्धिबुद्धी ऊचतुः । यदि खेलं करोषि त्वमावाभ्यां गणनायक । आवां त्वां छादयिष्यावो नानाभावप्रदर्शनात् ॥२४॥ वेदादिभिस्तत्र वाणीमयी गाथा गजानन । स्वरूपं ते यथातथ्यं कथयिष्यति मानवान् ॥२५॥ तेन त्वां ब्रह्मणां नाथं ज्ञास्यंते मानवादयः । त्वदुपासन-मात्रेण भवेयुर्ब्रह्मभूतकाः ॥२६॥ न त्वां छादयितुं शक्ते वाणीस्थं गणनायक । अतस्तदर्थमानंदात् कुरु किंचिद्गजानन ॥२७॥ एवं तयोर्वचः श्रुत्वा ते जगाद गजाननः । मा खेदं कुरुतं देव्यौ वाणीं संमोहयाम्यहम् ॥२८॥ मोहिता सा मया वाणी वर्णनं भ्रांतिदं च मे । करिष्यति प्रगूढार्थयुतं सत्यार्थभाषितम् ॥२९॥ गूढार्थं नैव देवेशा योगीशास्तत्त्वदर्शिनः । ज्ञास्यंति तेन मां सर्वे न भजिष्यंति भावतः ॥३०॥ सिद्धिबुद्धियुतं ब्रह्म वाणी प्रकटयिष्यति । न गणेशमयीं गाथां कथयिष्यति योगदाम् ॥३१॥ सिद्धिबुद्धिमयं सर्वं जगद्ब्रह्म प्रसेव्य यः । यदा शुद्धो नरो भावी तदा मां ज्ञास्यति प्रिये ॥३२॥ परं सिद्धियुतं ब्रह्म कथितं सिद्धिदायकम् । स एव गणनाथोऽयं पतिः सिद्धेः प्रमाणतः ॥३३॥ परं बुद्धियुतं ब्रह्म परं बुद्धेः प्रकथ्यते । गणेश एव संप्रोक्तः पतिर्बुद्धेः प्रमाणतः ॥३४॥ एवं त्रैविध्यगं वाणी वदिष्यति सदा तु माम् । सिद्धिदं बुद्धिगं ब्रह्म शास्त्रेष्वेतत् त्रयं मतम् ॥३५॥ एवमुक्त्वा गणेशानः पुनस्तूष्णीं बभूव तम् । उवाच प्रणनामादौ भक्तिः परम-दुःखिता ॥३६॥ भक्तिरुवाच । वरो दत्तस्त्वया नाथ सिद्ध्यै बुद्ध्यै गजानन । तेन भक्तिविहीनाश्च भविष्यंति सदा नराः ॥३७॥

अतोऽहं दुःखसंयुक्ता चरिष्यामि निरंतरम् । मां पालय गणाध्यक्ष भक्तियुक्तान् जनान् कुरु ॥३८॥ एवमुक्तो गणाध्यक्ष-
स्तामुवाच सुदुःखिताम् । भक्तिं भक्तिप्रियः पूर्णः स्मयमानः प्रजापते ॥३९॥ श्रीगणेश उवाच । मा शोकं कुरु कल्याणि नरा
मद्भक्तिकारकाः । देवनागासुराद्याश्च भविष्यंति न संशयः ॥४०॥ नानादेवपरा ये तु भक्त्या जन्मनि जन्मनि । संतुष्टा
अमरास्तेभ्यो दास्यंत्यपि रुचिं मुदा ॥४१॥ ततस्तेऽपि समागम्य भक्तियुक्ता निरंतरम् । तुष्टं तं वै करिष्यंति नानायज्ञ-
परायणाः ॥४२॥ ततस्तस्य कृपायोगात् देवीभक्तियुता नराः । भविष्यंति च ते सर्वे तां भजिष्यंति संयताः ॥४३॥ एवं
बहौ गते काले संतुष्टा सा प्रदास्यति । तेभ्यः सौरीं महाभक्तिं भजिष्यंति तया रविम् ॥४४॥ ततो बहौ गते काले
सूर्यस्तोषसमन्वितः । उग्रां दास्यति भक्तिं तु वैष्णवीं तेभ्य आदरात् ॥४५॥ तया युक्ता भजिष्यंति विष्णुं भावसम-
न्विताः । नरास्ततः स संतुष्टो बहुकाले भविष्यति ॥४६॥ तुष्टो विष्णुः स्वयं तेभ्यो दाता स्याद्भक्तिमुत्तमाम् । शैवीं
तया ततस्ते तं भजिष्यंति सदाशिवम् ॥४७॥ ततो बहौ गते काले तुष्टः शंभुः प्रदास्यति । भक्तिं गाणेश्वरीं तेभ्यो भजिष्यंति
तया च माम् ॥४८॥ नराः शांतिं समालभ्य मत्तो योगपरायणाः । ब्रह्मीभूता भविष्यंति भजिष्यंति तथाऽपि ते ॥४९॥
एवं क्रमेण मद्भक्ता भविष्यंति नरादयः । त्वद्युक्ता मां भजिष्यंति तेषां वश्यो भवाम्यहम् ॥५०॥ न भक्ते
ते समं मे वै प्रियं किंचिद्भविष्यति । यत्र भक्तिर्गता तत्र यथा स्थास्यामि किंकरः ॥५१॥ स्वानंदं लक्षलाभौ
च सिद्धिं बुद्धिं मदीयकम् । सर्वं तेभ्यः प्रदास्यामि भक्तेभ्यो नात्र संशयः ॥५२॥ अयं मदीयदेहश्च भक्त्यधीनो
भविष्यति । भक्ताग्रे भक्तरूपेण सदा स्थास्यामि दासवत् ॥५३॥ कर्मभ्यश्चाधिकं भक्ते तपः परमदुश्चरम् ।
तपोभ्यश्चाधिकं ज्ञानं निःसंगपददायकम् ॥५४॥ ज्ञानाद्योगः समाख्यातोऽधिकः शांतिप्रदायकः । तस्माच्च त्वं महाभक्ते
भविष्यस्यधिका प्रिया ॥५५॥ भक्तेः परं न किंचित् मे ह्यधिकं शास्त्रसंमतम् । भविष्यति महाभागे मा चिंतां कुरु
सर्वथा ॥५६॥ अन्यद्वाणी मदीयं यद् गूढं रूपं वदिष्यति । तदर्थं ते प्रियं भक्ते करोमि शृणु मे वचः ॥५७॥ मदीयभुज-
संस्थोऽयं मुद्गलः सर्वदर्पहा । स एव ब्राह्मणो भूत्वा चरिष्यति निरंतरम् ॥५८॥ कृतं तेन मदीयं वै पुराणं वेदबृंहितम् ।
गूढार्थद्योतनं भावि सर्वेभ्यो भक्तिदायकम् ॥५९॥ स्वरूपं तत्र मे भक्ते प्रकटं पश्यतां नृणाम् । शृण्वतां तत्तदा पूर्णं
भविष्यति न संशयः ॥६०॥ तथापि दुर्लभा भक्तिर्मदीया त्वं भविष्यसि । अतोऽल्पप्रज्ञा न मां देवि भजिष्यंति कदा-

चन ॥६१॥ विघ्नं मौद्गलशास्त्रेऽहं करिष्यामि भ्रमप्रदम् । अश्रद्धं तेन नष्टं तद्भविष्यति कदा कदा ॥६२॥ तव भावस्य रक्षार्थं मौद्गलं निर्मितं मया । अतः परं महाभक्त वद किं ते करोम्यहम् ॥६३॥ एवं तस्य वचः श्रुत्वा हर्षिता सा ननाम तम् । गणेशं भावगंभीरा न किंचित् पुनरब्रवीत् ॥६४॥ एतत्ते कथितं दक्ष गुह्यं विघ्नेश्वरस्य यत् । अतो गुप्तं प्रकर्षेण शास्त्रं कुरु मदीयकम् ॥६५॥ त्वं दक्षः सर्वभावेषु दक्षादक्षो न विद्यते । अतस्तुभ्यं मया सर्वं कथितं शास्त्रमुत्तमम् ॥६६॥ हृदिस्थेन गणेशेन प्रेरितोऽहं प्रजापते । तदाज्ञया हृदिस्थं मे कथितं शास्त्रमुत्तमम् ॥६७॥ अनेन विधिना दक्ष भज त्वं गणनायकम् । तेनैष्सितं समासाद्य गाणपत्यो भविष्यसि ॥६८॥

॥ ॐ तत्सदिति श्रीमदांत्ये पुराणोपनिषदि श्रीमन्मौद्गले महापुराणे नवमे खंडे योगचरिते मुद्गलदक्षसंवादे योगामृतार्थशास्त्रे चित्तभूमिनिरोधनं गणेशरहस्ययोगो नाम पंचदशोऽध्यायः ॥

॥ इति योगगीतासूपनिषत्सु सुगमासु एकादशोऽध्यायः

॥ श्रीगणेशाय नमः ॥ दक्ष उवाच । धन्योऽहं कृतकृत्योऽहं कृतस्त्वया महामते । त्वदाज्ञावशगः स्वामिन् गुप्तं ग्रंथं करोमि ते ॥१॥ अधुना वद मे भक्तिं गणेशस्य तथा परम् । भजिष्यामि विशेषेण सदा भक्तिपरायणः ॥२॥ मुद्गल उवाच । सांख्ययोगौ प्रजानाथ श्रृणु ते कथयाम्यहम् । ताभ्यां युक्तस्ततो भक्तिं करिष्यसि परां मुदा ॥३॥ चित्तं पंचविधं प्रोक्तं पंचसंख्याविवर्जितम् । कुरु चिंतामणौ लीनभावेन त्वं सुयोगतः ॥४॥ एतत् सांख्यं समाख्यातं गणेशाभेददायकम् । तेन योगी भवेत् सद्यः शांतियुक्तो विशेषतः ॥५॥ पंचचित्तोद्भवेषु त्वं भोगेष्वसि सुसंस्थितः । बिंबरूपेण तान् भुंक्ष्व शांत्या रससमन्वितः ॥६॥ चित्तेषु चित्तभूतेषु कर्म ज्ञानादिकं भवेत् । तद्गणेशार्पणं सर्वं कुरु त्वं नित्यमादरात् ॥७॥ स्वधर्मसंस्थितं देहं चित्तं शांतिसमन्वितम् । कुरुष्व सततं दक्ष ब्रह्मभावपरायणः ॥८॥ अयं योगः समाख्यातः शास्त्रे वै सर्वसंमतः । वेदेषु च पुराणेषु ब्रह्मभूयप्रदायकः ॥९॥ सांख्ययोगौ समाराध्य भजस्व गणनायकम् । योगाकारं समाध्याय तन्निष्ठस्तत्परायणः ॥१०॥ श्रवणं गणनाथस्य गुणानां नित्यमादरात् । कीर्तनं तस्य तद्भक्त्वं कुरुष्वैतद्रसैर्युतम् ॥११॥

गणेशस्य च भावस्य विस्मृतिं मा कुरु प्रभो। गणेशपादजं मोहं धारयेः सत्यभावनः ॥१२॥ सांगं गणेश्वरस्यैव कुरु सर्वं विशेषतः। गणेशान्न परं श्रेष्ठं तस्मात्तन्निष्ठको भव ॥१३॥ गाणपत्यस्य मार्गस्य सेवनं कुरु सर्वदा। साक्षिरूपं गणेशानं ज्ञात्वा हृत्स्थं भजस्व च ॥१४॥ गणेशान्नैव भिन्नोऽहं भावयस्व निरंतरम्। एवं नवप्रकारैस्त्वं भज त्वं भक्तिसंयुतः ॥१५॥ बाह्यांतरं गणेशार्थं कुरु त्वं कर्म चादरात्। तथा स्वेष्टभावेन पूर्णभक्तो भविष्यसि ॥१६॥ अथो चतुर्विधां भक्तिं कथयामि शृणुष्व ताम्। कायिकां वाचिकां पूर्णां मानसीं नित्यदा कुरु ॥१७॥ तथा सांसर्गिकीं दक्ष तस्याश्चिह्नं वदाम्यहम्। गणेशार्थं सदा देहश्रमं कुरु महामते ॥१८॥ गणेशभावहीनां यां वाचं मा त्वं वदस्व ताम्। गणेशचिंतनं तद्वद्गणेशभावकस्य वा ॥१९॥ गणेशभक्तियुक्तानां संगतिं कुरु सर्वदा। एवं भजस्व भक्त्या त्वं भक्तराजो भविष्यसि ॥२०॥ भक्तिः सा द्विविधा दक्ष मानवैः क्रियते परा। पाखंडसंयुता पूर्णा देवप्रीत्यर्थमेव वा ॥२१॥ देहे विषयभोगार्थं भजनं संप्रवर्तते। पाखंडिनां सदा दक्ष लोकमोहकरं परम् ॥२२॥ पाखंडभजनस्यैव चिह्नं मुख्यं वदाम्यहम्। तच्छृणु त्वं हितार्थाय लोकानां लोकनायक ॥२३॥ सर्वाहंकारनिर्मुक्तः पाखंडी दृश्यते जनैः। जना मोहयुता येन भवंति भजने यतः ॥२४॥ यत्र येषां रुचिर्दक्ष यादृशी तादृशं सदा। करोति तत्र यत्नेन सर्वभावं प्रदर्शयन् ॥२५॥ येनैव विषयाणां च प्राप्तिः संजायते परा। तादृशं भजनं तस्य परं भवति सर्वदा ॥२६॥ अथवा चैकनिष्ठः स भवति देवतत्परः। स्वदेवभक्तान् संमोह्य भुंक्ते दुष्टोऽर्थलालसः ॥२७॥ स्वदेवभजने सक्ता जनाः स्वल्पमतो बहु। तेषां रुचिप्रमाणेन भवति भजनं यतः ॥२८॥ जनानां मोहदा भक्तिः कथिता ते प्रजापते। पाखंडिभिः सदा पूर्णा सेव्यते सा रुचिप्रदा ॥२९॥ पाखंडसंयुता नित्यं भक्तिं कुर्वंति शाश्वतीम्। चांडालास्ते मताः शास्त्रे देवानां दुःखदायकाः ॥३०॥ सत्यसंकल्पसिद्ध्या ते संयुतं देवमुत्तमम्। संगृह्य भिक्षुकं दुष्टाः कुर्वंतेऽधः प्रगामिनः ॥३१॥ अथ देवप्रियां भक्तिं शृणुष्व सुसमाहितः। विचार्य हृदये भक्तिं कुरुते देवतुष्टये ॥३२॥ सदा देवपरो भूत्वा भजनेऽनन्यमानसः। लोकानां तत्र संभूयाद्रुचिर्वा ह्यरुचिः कदा ॥३३॥ लोका निंदंति तं भक्तमुत्तमाश्च स्तुवंति वा। ताननादृत्य देवस्य प्रीत्यर्थं भजते सदा ॥३४॥ स्वकीये हृदये सोऽपि विचार्य कुरुते सदा। भक्तिं यां तां प्रजानाति देवस्तस्य हृदि स्थितः ॥३५॥ यदा देवस्य मार्गस्यापमानं वा ह्यनादरम्। कुर्वंति तान् परित्यज्य तदा भजति सर्वदा ॥३६॥ लोकानां रुचिदं तस्य भजनं जायते कदा। कदा तेषां विरुद्धं वा भक्त्या

तद्देवतुष्टिदम् ॥३७॥ अनेन विधिना दक्ष भजस्व गणनायकम् । गाणपत्यो न संदेहो भविष्यसि परात् परः ॥३८॥ पंच चित्तेषु यज्ज्ञानं तद्विद्धि विषयात्मकम् । तत्र रुचिविहीनस्त्वं भजस्व गणनायकम् ॥३९॥ सदा गणेश्वरे दक्ष रसोत्पत्तिः प्रजायते । चित्तस्य नान्यभावेषु यस्य भक्तः स उच्यते ॥४०॥ एतद्भक्तिरहस्यं ते कथितं भक्तिदायकम् । समासेन भजस्वैव गणेशं ब्रह्मनायकम ॥४१॥ इमं योगं नरो यस्तु शृणुयाच्छ्रावयेत् परम् । योगिभ्यो वाऽन्यजंतुभ्यः स ईप्सित-मवाप्नुयात् ॥४२॥ नानेन सदृशं किंचिद्योगदं शास्त्रसंमतम् । अस्य श्रवणमात्रेण ब्रह्मीभूतो भवेन्नरः ॥४३॥ महापापोप-पापेभ्यो मुच्यते पठनात् किल । श्रवणादस्य योगस्यांते ब्रह्म प्राप्नुयात् परम् ॥४४॥ पुत्रपौत्रादिसंयुक्तो धनधान्य-समन्वितः । आरोग्यादिसमायुक्तो लभेदंते परं पदम् ॥४५॥ सकामको लभेद्भोगान् पठनादस्य निश्चितम् । अंते ब्रह्ममयो भावी श्रवणान्नात्र संशयः ॥४६॥ योगगीतां पठेद्यस्तु निष्कामः शृणुयादथो । स विघ्नहीनतां प्राप्य ब्रह्मीभूतो भविष्यति ॥४७॥ योगगीतां पठेद्यस्तु स भवेत् शांतिसंयुतः । शृणुयाद्ब्रह्मभूतश्च ज्ञानवान् स्थितिसंयुतः ॥४८॥ कर्म-निष्ठैरियं सेव्या तपोनिष्ठैः प्रजापते । तत्तत्सिद्धिसमायुक्तैरिहांते ब्रह्म चाप्यते ॥४९॥ नित्यं पठेदिमां गीतां स गणेशो धरातले । दर्शनात् पावनो नृणां सर्वसिद्धिप्रदायकः ॥५०॥ एककालं द्विकालं वा त्रिकालं यः पठेदिमाम् । कृत्वाऽवश्यं गणेशानं स भवेत् सर्वदायकः ॥५१॥ शुक्लकृष्णचतुर्थ्योस्तु पठेदेतां नरोत्तमः । स भुक्त्वा सकलान् भोगानंते ब्रह्म लभेत् परम् ॥५२॥ अथवा शुक्लजायां स चतुर्थ्यां भाद्रमाघयोः । ज्येष्ठे माघे च कृष्णायां पठेदीप्सितमाप्नुयात् ॥५३॥ अथवा गणराजस्य तीर्थक्षेत्रादिके गतः । पठेदिमां सुभावेन स ईप्सितमवाप्नुयात् ॥५४॥ वेदशास्त्रपुराणेषु यत् सारं समुदाहृतम् । योगगीतामयं तुभ्यं सर्वसिद्धिप्रदायकम् ॥५५॥

॥ ॐ तत्सदिति श्रीमदान्त्ये पुराणोपनिषदि श्रीमन्मौद्गले महापुराणे नवमे खण्डे योगचरिते मुद्गलदक्षसंवादे योगामृतार्थशास्त्रे चित्तभूमिनिरोधेन भक्तिरहस्यवर्णनयोगो नाम षोडशोऽध्यायः ॥

॥ इति योगगीतासूपनिषत्सु सुगमासु द्वादशोऽध्यायः ॥

॥ श्रीगजाननार्पणमस्तु ॥

॥ गीताश्लोकसंख्या ॥ ९९८ ॥

|| श्रीगणेशाय नमः || मुद्गल उवाच । एतत्ते कथितं सर्वं रहस्यं परमं मया । गणेशस्य प्रजानाथ समासेन शुभप्रदम् ||१||
अतो भज गणाध्यक्षं सर्वमिष्टमवाप्स्यसि । मा शोकं कुरु दक्ष त्वं यज्ञध्वंसभवं परम् ||२|| सूत उवाच । एवमुक्त्वा ददौ
तस्मै मंत्रमेकाक्षरं परम् । विधियुक्तं विधानेन मुनिर्दक्षाय मुद्गलः ||३|| तेन संपूजितो योगी ह्यभवद्दंतुमुद्यतः । तस्मिन्
काले गणाध्यक्षः प्रकटोऽभूच्छुभप्रदः ||४|| मूषकोपरिसंस्थं तं सिद्धिबुद्धिसमन्वितम् । पाशांकुशवरैर्युक्तमभयं धारकं
प्रभुम् ||५|| गजास्यं रक्तवस्त्रैः संछादितं भूषणैर्युतम् । नाभिशेषं गणैर्युक्तं प्रमोदाद्यैः सुसेवितम् ||६|| त्रिनेत्रमेकदंतं
च महाकुक्षिं परात्परम् । दृष्ट्वा समागतं दक्षो मुद्गलो हर्षितोऽभवत् ||७|| उत्थाय सर्वसंयुक्तो ननाम द्विरदाननम् । दक्षश्च
मुद्गलो विप्रो दंडवत् पृथिवीतले ||८|| ततोऽतिहर्षसंयुक्तो दक्षस्तं प्रजगाद ह । गणेशं भक्तिसंयुक्तः सरोमांचोऽश्रुसंयुतः ||९||
दक्ष उवाच । धन्योऽहं सर्वभावैश्च दर्शनात्ते गजानन । वेदानामगोचरोऽसि त्वं ब्रह्मरूपः समागतः ||१०|| धन्योऽयं मुद्गलो
योगी पुराणं धन्यमुत्तमम् । मौद्गलं येन विघ्नेशो मया प्राप्तः परात्परः ||११|| मुद्गलेन समाख्यातं भक्त्याधीनो गजाननः ।
तदद्य सत्यरूपं यत् मया ज्ञातं प्रमाणतः ||१२|| मुद्गलस्यैव भक्त्या त्वं मोहितः सहसाऽऽगतः । त्वत्तः श्रेष्ठो गणेशान
मुद्गलो नात्र संशयः ||१३|| एवं प्रवदतस्तस्य दक्षस्यासीत् महात्मनः । भक्ते रसः समुत्पन्नो ननर्त स हि विह्वलः ||१४||
भ्रांतस्तत्र स जानाति कृत्यं विघ्नेश्वरारय सः । जय हेरंब विघ्नेश गणेश मूषकध्वज ||१५|| गजानन परेशान जय लंबोदर
प्रभो । उच्चरन् साश्रुनेत्रश्च देहातीत इवाऽभवत् ||१६|| एतस्मिन्नंतरे सर्वे समाजग्मुः सुरेश्वराः । शिवविष्णुमुखास्तत्रागतं
ज्ञात्वा गजाननम् ||१७|| मुनयो भृगुमुख्याश्च नारदाद्याः सुरर्षयः । शुकाद्याः सनकाद्याश्च कपिलाद्या महामुने ||१८||
वसवः साध्यरुद्राश्च गंधर्वाप्सरसस्तथा । अश्विनौ शेषमुख्याश्च नागाः पर्वतनायकाः ||१९|| सिद्धाश्चारणमुख्याद्या असुरा
धर्मपालकाः । विद्याधराः कामदुघा गावो विप्रा अनेकशः ||२०|| प्रणेमुर्गणराजं ते हर्षयुक्ताः प्रतुष्टुवुः । भक्तियुक्ता
विशेषेणात्मानं धन्यं च मेनिरे ||२१|| ततः स मुद्गलो योगी विस्मितः प्रबभूव ह । पुराणश्रवणस्यैतत् दृष्ट्वा
फलमनंतकम् ||२२|| बोधयामास दक्षं स ततो दक्षोऽतिहर्षितः । हर्षं नियम्य विघ्नेशं यथाविधि पुपूज ह ||२३|| ततो
देवेश्वरान् देवान् विप्रादीन् योगिमुख्यकान् । पूजयित्वा पुनः सोऽपि प्रणनाम गजाननम् ||२४|| साश्रुनेत्रः प्रतुष्टाव
भक्तिनम्रात्मकंधरः । अनु तं देवविप्राद्यास्तुष्टुवुस्तं परेश्वरम् ||२५|| सदेवर्षिर्दक्ष उवाच । नमस्ते गणेशाय सर्वात्मने ते सदा

भक्तिमोहन मोहात्मकाय । महेशादिदेवैः शुकाद्यैः स्तुताय अयोगाय संयोगधारिन्नमस्ते ॥२६॥ गजाननाय वै तुभ्यं नमः परशुपाणये । गदाधराय शंखं वै धारिणे ते नमो नमः ॥२७॥ विघ्नेशाय परेशाय महाविघ्नविदारिणे । अनाथाय सनाथाय हेरंबाय नमो नमः ॥२८॥ नमो नमस्तेऽस्तु महोदराय स्वभक्तसंरक्षणतत्पराय । अभक्तकामान् विनिहंतृकाय सदा सुशांतिप्रद ते नमो वै ॥२९॥ ब्रह्मेशाय नमस्तुभ्यं सदा स्वानंदवासिने । सिद्धिबुद्धिवरायैव मूषकध्वजिने नमः ॥३०॥ दैत्यमस्तकघाताय दितिपुत्राय ते नमः । कंठाग्रे देवकार्याय नमो सुरसुराय ते ॥३१॥ योगाय सर्वात्मकसर्वपूज्य मायाविनां मोहकराय तुभ्यम् । मायाप्रचालाय सुसिद्धिदाय धर्मस्य पालाय तु शूलपाणे ॥३२॥ अनंतलीलया नाथ स्वयं खेलसि मायया । तत्र किं वर्णयाम्येवाऽतो ब्रवीमि नमो नमः ॥३३॥ सदा योगस्वरूपाय भक्तिभावप्रदाय ते । भक्तिप्रियाय पूर्णाय भक्तवत्सल ते नमः ॥३४॥ प्रसीद पाहि विघ्नेश दासं ते भक्तिलालसम् । मां मुद्गलस्य शिष्यं वै भक्तराजस्य मानद ॥३५॥ एवमुक्त्वा गणेशानं प्रणनाम प्रजापतिः । अनु तं देवविप्राद्याः प्रणेमुस्तं परात्परम् ॥३६॥ तमुत्थाप्य गणाधीशो जगाद वच उत्तमम् । दक्षं मुद्गलमालोक्य स्वभक्तं भक्तपालकः ॥३७॥ श्रीगणेश उवाच । वरान् वृणु प्रजानाथ दास्ये ते तुष्टिमागतः । श्रवणेन पुराणस्य स्तोत्रेण मनसीप्सितान् ॥३८॥ त्वया कृतमिदं स्तोत्रं भुक्तिमुक्तिप्रदं भवेत् । यं यमिच्छति तं तं वै दास्यामि स्तोत्रपाठतः ॥३९॥ ब्रह्मप्रदं सुशांतेश्च दायकं भक्तिवर्धनम् । भविष्यति महाप्राज्ञ परं मत्प्रीतिवर्धनम् ॥४०॥ गणेशवचनं श्रुत्वा दक्षो हर्षसमन्वितः । प्रणम्य तं जगादाऽथ भक्तिनम्रात्मकंधरः ॥४१॥ दक्ष उवाच । वरदोऽसि गणाध्यक्ष तदा ते भक्तिमुत्तमाम् । देहि मे यच्च कृत्यं तदादिशेः करवाणि किम् ॥४२॥ तच्छ्रुत्वा गणनाथस्तं जगाद वच उत्तमम् । ज्ञात्वा भक्तिप्रियं दक्षं हृष्टरोमा महामुने ॥४३॥ श्रीगणेश उवाच । मदीयां भक्तिमत्यंतं करिष्यसि महामते । दक्षाऽद्यप्रभृति प्राज्ञो भविष्यसि यथार्थगः ॥४४॥ यज्ञं कुरु महेशेन मया ध्वस्तं समन्वितः । किंचित् कृष्टं प्रदत्तं ते शापैः शैवैः सुखी भव ॥४५॥ योगशांतियुतो नित्यं मां भजिष्यसि सर्वदा । सर्वमान्यः सर्वमुख्यो भविष्यसि प्रजापतिः ॥४६॥ एवमुक्त्वा गणेशानो विरराम च शौनक । दक्षो हृष्टमना भूत्वा स चक्रे यज्ञमुत्तमम् ॥४७॥ संपूज्यादौ गणाध्यक्षं ततः शंभुमुखान् सुरान् । मुनीन्नागादिकान् सर्वान् विससर्ज सुहर्षितः ॥४८॥ ततो मुद्गलविप्रेशं पूजयन् भक्तिसंयुतः । उवाच तं सरोमांचो दक्षो दक्षगणाग्रणीः ॥४९॥ दक्ष उवाच । किं ददामि महायोगिन् शिष्योऽहं ते नमाम्यतः । शरीरं पादपद्मे ते समर्पितमिदं

प्रभो ॥५०॥ ततो दक्षं समानंद्य मुद्गलः प्रययौ मुने । स्वाश्रमं गाणपत्यैः संसेवितं गणपप्रियः ॥५१॥ इदं दक्षस्य माहात्म्यं कथितं ते समासतः । मुद्गलस्य तथा श्रेष्ठं सर्वसिद्धिप्रदायकम् ॥५२॥ पुराणं मौद्गलं पूर्णं कथितं योगभावितम् । सर्वमान्यं विशेषेण सर्वसंशयनाशनम् ॥५३॥ पुराणश्रवणस्यापि फलं प्रोक्तं मया परम् । श्रवणेन प्रजानाथो दक्षो दक्षो बभूव ह ॥५४॥ अधुनाऽहं गमिष्यामि स्वाश्रमं विप्रनायक । त्वदाज्ञया वद स्वामिन् किं करोमि हितं पुनः ॥५५॥

॥ ओमिति श्रीमदान्त्ये पुराणोपनिषदि श्रीमन्मौद्गले महापुराणे नवमे खंडे योगचरिते दक्षसिद्धिप्राप्तिवर्णनं नाम सप्तदशोऽध्यायः ॥

॥ श्रीगणेशाय नमः ॥ शौनक उवाच । धन्योऽस्मि सूत सर्वेभ्यो भवान् ज्ञानाधिको मतः । समस्त्रिभुवने नैव संशयानां विनाशकः ॥१॥ सर्वसंशयहीनोऽहं धन्यश्चाद्य त्वया कृतः । अधुना कृतकृत्यश्च जातो मुनिसमन्वितः ॥२॥ न मुद्गलसमं किंचित् मया ज्ञातं परात्परम् । तेनोक्तं मौद्गलं सूत मुद्गलेन सदृक् परम् ॥३॥ वेदशास्त्रपुराणानां नानामतनिकृंतनम् । मौद्गलं मुद्गलाकारं सर्वसारप्रकाशकम् ॥४॥ त्रैलोक्ये मुद्गलो योगी मान्यः सर्वैः प्रकीर्तितः । सर्वाभिमानहीनत्वाद्यथार्थकरणात् किल ॥५॥ मुद्गलेन कृतं यद्वै पुराणं मुद्गलाकृति । तस्यापमानभावेन नारकी जायते नरः ॥६॥ यामा मुद्गरहस्तास्ते मारयिष्यंति निश्चितम् । न वक्ता कुत्र योगींद्रो मुद्गलेन सदृक् भवेत् ॥७॥ न भूतो नाधुना कुत्र वर्तते सूत निश्चितम् । निरहंकारसंयुक्तं भाषणं मुद्गलस्य च ॥८॥ पुराणानि च सर्वाणि स्वस्वब्रह्मपराणि वै । अभिमानेन संगोप्य स्वदोषं प्रवदंति हि ॥९॥ यथार्थभाषणं सर्वं पुराणानां न संशयः । मुनीनां देवतादीनां स्थितस्तत्राप्यहं किल ॥१०॥ तेन भिन्नमतादीनां प्रकाशस्तेषु जायते । मौद्गलं सर्वमान्यं वै निरहंकारभावतः ॥११॥ अभिमानो महाघोरो त्यजेयो देवयोगिभिः । मुद्गलेन समाचूर्ण्य कृतो जीवविवर्जितः ॥१२॥ अतोऽयं मुद्गलः प्रोक्त एक एव महर्षिभिः । तत्र चित्रं न वै सूत सर्वमान्यं वदेत् परम् ॥१३॥ अहो गणेशहस्तस्थो मुद्गलः पतितो भुवि । नराकारस्वरूपेणांगिरसेन प्रपालितः ॥१४॥ स एव मुद्गलो योगी योगरूपप्रकाशकः । तत्र किं चित्रकं मन्येऽभिमानैर्वर्जितात्मकम् ॥१५॥ मुद्गलस्य च दक्षस्य संवादेन युतं परम् । पुराणं चांगिरःप्रोक्तं श्रुतं शांतिप्रदं मया ॥१६॥ अधुना वद सूत त्वं पुराणस्य प्रविस्तरात् ।

परतरं क्षेत्रं त्रिषु लोकेषु विद्यते। सत्यं सत्यं महादेवि शपथेन वदामि ते। संसारबहुलो देवि मुक्तिमिच्छति यः पुनः। मामेव शरणं गत्वा तिष्ठेत् काश्यां स यन्त्रितः। स एव पतितो ज्ञानी स एव कुलपावनः। प्राणान्तेऽपि महादेवि काश्या न निःसरेद्विजः। स एव परमो मूर्खः स एव कुलनाशनः। वृथैव मूर्खलोकेन काशीं प्राप्य त्यजेद् यदि। बहुभिर्जन्मभिः पुण्यैर्यदि काशीं लभेत् पुनः। तदा नैव त्यजेत् काशीं प्राणान्तेऽपि कदाचन। अनायासेन संसारसागरं यस्तितीर्षति। स गच्छेत् खट्ट केनापि मम वाराणसीं पुरीम्। अन्नं दद्यादन्नपूर्णा ज्ञानं दद्यात् सरस्वती। प्राणान्ते मुक्तिदाताहं काश्यान्यं भावना किमु॥

वृन्दावनकाञ्च्यादिमाहात्म्यस्त्वत्र ग्रन्थगौरवभिया न लिखितम्। अन्वेषकैर्योगिनीतन्त्रे पूर्वखण्डे पञ्चदशपटलादिषु तदन्नेष्यमिति॥

श्रीप्राणतोषण्यां भक्तिकाण्डाभिधानं सप्तपरिच्छेदान्वितं पञ्चमकाण्डं समाप्तम्॥

षष्ठस्य ज्ञानकाण्डस्य निर्घण्टोऽत्र विधीयते। आदौ पञ्चमहायोगो यमादिस्तदनन्तरम्। षडङ्गयोगकथनं

p. 780) यमानां मुख्यकीर्त्तनम्। नियमानां तथा

मुख्यमासनं तदनन्तरम्। योगविद्या योगविघ्ना मठक्रिया

ततः परम्। प्राणायामस्य भेदश्च कुम्भकस्य ततः परम्।

प्राणायमक्रियाकालाश्चत्वारः परिकीर्त्तिताः।

श्रेष्ठमध्याधमत्वेन प्राणसिद्धेश्च लक्षणम्। श्रमोदकेन

तेनैव तनुमार्जनजं फलम्। नाडीशुद्धेश्च चिह्नानि

कुम्भसिद्धिफलं ततः। वर्जनीयानि योगे च ततः सिद्धिकराणि च।

अपथ्यपथ्ये योगस्य ततोऽवस्था मनोन्मनी। कुम्भकाः सप्तधा

भिन्ना नेत्यादि तदनन्तरम्। कर्माणि फलयुक्तानि धौत्यादीनि ततः

परम्। साधकाभ्यासजफलं तद्विघ्नकीर्त्तनं ततः।

घटावस्था तत्फलञ्च तद्विघ्नञ्च ततः परम्। ततश्च

मुद्रादशकं सफलञ्च निरूपितम्।

एतदाद्यपरिच्छेदसमापनमतः परम्। पृथ्व्यादिधारणं तस्य

फलं ध्यानं ततः परम्।

समाधिस्तस्यापि फलं प्राणायामफलान्तरम्। तिथिभेदे

वामदक्षनासावायुगतिक्रमः। विपरीतगतेर्दोषो निर्गमे

चोपवेशने। वायोः कर्मविशेषे तु फलञ्च वामदक्षयोः।

वायोः कर्मविशेषेऽपि फलं प्रश्ने च दिक्स्थितेः। फलं

पूर्णशून्यभेदाद्गतिर्नाड्यास्तथैव च। अङ्गभेदे कार्यभेदे

पञ्चभूतादयस्ततः। तेषां शुभाशुभे चैव तत्कालस्य निरूपणम्। भूतज्ञानं तदवस्थाः पञ्च बाल्यादिभेदतः। तत्फलञ्च वारभेदे वामदक्षफलं ततः। दिग्गतिर्धमनी वायौ स्वस्वनाडीफलं ततः। विपरीते वैपरीत्यं फलस्य तदनन्तरम्। वृहन्नाडीपदे यात्रा शुभदा वातवेदतः। यात्रापदानि च वहन्नाडीहस्तस्य मार्जनम्। तत्फलं पूर्णरिक्ताङ्गभेदे कर्मनिरूपणम्। वामनासाश्रितं कर्म दक्षनासाश्रितं तथा॥ सुषुम्नाश्रितकार्याणि भूतरूपादिवेदनम्। भूतगतिः पञ्चभूतभेदे कार्यस्य निर्णयः। प्रश्नस्य निर्णयो भूतैः शुभाशुभनिरूपणम्। मूलादि चिन्ताविज्ञानं भूतैस्तात्कालिकी तथा। अवस्थेन्दोः

p. 781) सिद्धिकालः पृथ्व्यवस्थानिरूपणम्। तत्त्वैर्नक्षत्रविज्ञानं निसर्गगतिनिर्णयः। गमनाद्यैर्गतेर्भेदो वायोस्तत् न्यूनकारणाम्। फलञ्च तद्वदूर्द्ध्वादौ श्वासभेदे जयाजयौ। तत्त्वेनास्त्रस्य घटनं तत्त्वैर्युद्धे जयादिकम्। प्रवेशकाले लाभादिर्हानिर्निःसरणे तथा। शून्ये न घातनिर्णातिर्भूतेन स्थाननिर्णयः। जयादिनिर्णयश्चैव वशीकरणमेव च। गर्भज्ञानं वत्सरस्य शुभाशुभफलं ततः। निदानादिपरिज्ञानं रोगस्य निर्णयस्ततः।

मृत्युजीवनविज्ञानं कालज्ञानं ततः परम्।

वर्षत्रयादिविज्ञानं जीवनस्य स्वकस्य च।

अरुन्धत्यादिविज्ञानमायुर्वृद्धिक्रिया ततः।

स्वरज्ञानप्रशंसेति परिच्छेदद्वितीयकम्॥ राजयोगप्रशंसा च

तद्भेदस्तिथिसंख्यकः। भेदानां लक्षणञ्चैव लक्षयोगस्ततः

परम्। तस्य पञ्चविधो भेदो राजयोगस्य लक्षणम्। हटयोगश्च

द्विविधो ज्ञानयोगस्तदन्तरम्। वाह्यलक्षं

तत्फलञ्चाकाशपञ्चकलक्षणम्।

षोडशाधारनिर्णीतिरष्टाङ्गविवृतिस्ततः।

पिण्डब्रह्माण्डयोरैक्यं पिण्डमध्ये जगत्स्थितिः।

राजयोगसिद्धिफलं पद्मसङ्केतमद्भुतम्।

अव्यक्तादेर्गुणाश्चैव योगादेशस्ततः परम्। योगाधिकारी योगस्य

सिद्धिकारणमेव च। योगभेदान्मन्त्रयोगो लययोगस्य विस्तृतिः।

कालपुरुषविज्ञानं तत्फलं तदनन्तरम्। रसनासाधनं तस्य

फलं नानाविधं ततः। परिच्छेदतृतीयस्य समाप्तिकीर्त्तनं

ततः। स्थूलसूक्ष्मक्रमेणैव ब्रह्माण्डस्य निरूपणम्।

सर्वदेवाश्रयो मेरुः सत्यलोकस्तदूर्द्धतः। अधो रसातलं तस्य

भुवनान्येवमेव च। आधारपद्मविस्तारः स्वाधिष्ठानस्य

वर्णनम्। तत्र वैकुण्ठगोलोकवर्णनं तदनन्तरम्।

मणिपूरवर्णनञ्चानाहतस्य च वर्णनम्। विशुद्धवर्णनं

तस्मादाज्ञाख्यवर्णनं ततः। सहस्रारवर्णनञ्चाधो वक्रे गुरुदेवयोः। स्थितिवीजञ्च षट्चक्रप्रकारान्तरवर्णनम्।

p. 782) परिच्छेदचतुर्थस्य समापनमिति स्मृतम्॥ ज्ञानप्रकारं ज्ञानस्य द्वैविध्यं द्वैतवर्जितम्। ज्ञानं तत्फलनिर्देशोऽद्वैतज्ञानाकृतिस्ततः। तत्त्वज्ञानं तत्प्रशंसात्मनः साक्षित्वनिर्णयः। रथित्वञ्च रथादित्वं शरीरादेस्ततः परम्। भोक्तृमुक्तत्वनिर्णीतिरुत्तमादिनिरूपणम्। ब्रह्मज्ञस्य ध्यानपूजाद्यभावस्तदनन्तरम्। आत्मनिरूपणं ज्ञानं त्रिविधं ज्ञानकारणम्। निर्वाणसाधकं कर्म शिववीजनिरूपणम्। पाशनिरूपणं जीवात्माभेददर्शनं ततः। आत्मनो जन्ममरणाद्यभावदर्शनं पुनः। पिण्डपदादिनिर्णीतिस्तन्त्र श्रवणजं फलम्। विद्यातत्त्वं ब्रह्मविद्या प्रशंसार्जितपुण्यतः। ब्रह्मज्ञानं परमात्मनिर्णयस्तदनन्तरम्। भिक्षुनिष्ठैव सा विद्या ब्रह्मणो जगदुद्भवः। ब्रह्मज्ञानप्राप्तिफलं ब्रह्ममन्त्रप्रशंसनम्। ब्रह्ममन्त्रोद्धृतिर्मन्त्रार्थचैतन्ये तदर्चना। ब्रह्मस्तोत्रं तत्कवचं तन्नैवेद्यफलं ततः। तदर्चकप्रशंसा च तन्मन्त्रस्य पुरस्क्रिया। अन्यान्यपि च वेद्यानि यथास्थानं मनीषिभिः। परिच्छेदपञ्चमस्य समापनमिति

स्मृतम्। मात्रादिचक्रविंशश्च बालादिचक्रमध्यगम्। तस्य व्याख्यानमेतद्धि षष्ठच्छेदसमापनम्। सर्वतोभद्रचक्रञ्च तद्व्याख्या प्रक्रियायुता। चक्रं शतपदं तस्मात् तद्व्याख्या तदनन्तरम्। प्रश्नप्रवचने वाणी प्रणामो मन्त्र एव च। प्रश्नस्य कथने तस्य सङ्केतस्तदनन्तरम्। प्रस्तारचक्रं तस्यापि व्याख्यानं तदनन्तरम्। परिच्छेदसप्तमस्य समापनमिदं कृतम्। यथास्थानमन्यदपि ज्ञेयं धीमद्भिरत्र तु॥

इदं विस्तृतसप्तभिर्ज्ञानकाण्डं परिच्छेदरूपैः प्रसूनैः सुरम्यम्। बुधालोकतां गन्धमुग्धोऽनुवारं फलं किन्तु गुर्वास्यलभ्यं नु विविद्धि। क्षमध्वं पण्डिता दोषं परपिण्डोपजीविनः। ममाशुधादिकं सर्वं शोध्यं युष्माभिरुत्तमः॥ आदेष्टृसत्वरतया पुनरीक्षितुं नैतच्छक्यमुत्तमवचो रचितं ममेदम्। विज्ञापयानि सततं p. 783) परिविक्ष्य सर्वं घोरा भवद्भिरतिसूक्ष्मधिया विशोध्यम्॥

रुद्रजामले उत्तरखण्डे षड्विंशत्पटले। यथा॥

श्री-आनन्दभैरव्युवाच॥

त्रिगुणज्ञानविकलो न पश्यति दिवानिशम्। दिवा रात्रौ ज्ञानहेतौ न पश्यति कलेवरम्। इति कृत्या हि मरणं नृणां जन्मनि जन्मनि। तज्जन्मक्षयहेतोश्च मम योगं समभ्यसेत्।

पञ्चामरामहायोगं कृत्वा स्यादमरो नरः। तत् प्रकारं शृणु प्राणवल्लभ प्रियदर्शन । तव भावेन कथये न कुत्रवद शङ्कर । यदि नो कस्य निकटे कथ्यते योगसाधनम्। विघ्ना घोरा वसन्त्ये व गात्रे योगादिकं कथम्।

योगयोगाद्भवेन्मोक्षस्तत्प्रकाशाद्धि नाशनम्। अतो न दर्शयेद् योगं यदीच्छेदात्मनो हितम्। कृत्वा पञ्चामरायोगं प्रत्यहं भक्तिसंयुतः। पठेत् श्रीकुण्डलीदेवीसहस्रनाम चाष्टकम्। महायोगी भवेन्नाथ श्वासेन नात्र संशयः।

पञ्चामरायोगविद्या सर्वविद्याप्रकाशिनी कृत्वा पञ्चामरासिद्धिं ततोऽष्टाङ्गादिधारणा। आदौ पञ्चामरासिद्धिस्ततोऽल्पयोगसाधनम्। तत्प्रकारं प्रवक्ष्यामि सावधानावधारय। अहं जानामि संसारे केवलं योगपण्डिता । तत्साक्षिणी ह्यहं नाथ भक्तानामुदयाय च। इदानीं कथये तेऽहममरायोगसाधनम्। एवं कृत्वा नित्यरूपी योगानामङ्कुरायते। योगकालेन पुरुषः सिद्धिमाप्नोति निश्चितम्।

पञ्चामराविधानानि क्रमेण शृणु शङ्कर । नेतीयोगं हि सिद्धानां महाकफविनाशनम्। दन्तीयोगं प्रवक्ष्यामि

हृदयग्रन्थिभेदनम्। धौतीयोगं ततः पश्चात् सर्वं
मलविनाशनम्। नेतीयोगं हि परमं सर्वाङ्गोदरचालनम्।
क्षालनं परमं योगं नाडीनां क्षालनं स्मृतम्। एवं
पञ्चामरायोगं यमिनामतिगोचरम्। यमनियमकाले तु
पञ्चामराक्रियां यजेत्। अमरासाधनादेव अमरत्वं

p. 784) भवेद्ध्रुवम्। एतत्करणकाले च तथा पञ्चामराशनम्।
पञ्चामराभक्षणेन अमरो योगसिद्धिभाक्। तानि द्रव्याणि
वक्ष्यामि तवाग्रे परमेश्वर । येन हीना न सिध्यन्ति
कल्पकोटिशतेन च। एका तु अमरा दूर्वा तस्या ग्रन्थिं समानयेत्।
अन्या तु विजयादेवी सिद्धिरूपा सरस्वती। अन्या तु विल्वपत्रस्था
शिवसन्तोषकारिणी। अन्य तु योगसिद्धार्थे निर्गुणी चामरा मता।
अन्या तु कालतुलसी श्रीविष्णोः प्रियतोषणी। एताः पञ्चामरा
ज्ञेया योगसाधनकर्मणि। एतासां द्विगुणं ग्राह्यं
विजयापत्रमुत्तमम्। ब्राह्मणी क्षत्रिया वैश्या शूद्रा सर्वत्र
पूजिता। एतद्द्रव्याणि संगृह्य भक्षयेच्चूर्णमुत्तमम्।
तच्चूर्णभक्षसमये एतन्मन्त्रादिपञ्चकम्। पठित्वा भक्षणं
कृत्वा नरो मुच्येत सङ्कटात्। ॐ हरे अमरपुष्टे
त्वममृतोद्भवसम्भवे । अमरं मां सदा भद्रे कुरुष्व
त्वं हरप्रिये । ॐ दूर्वायै स्वाहा। इति दूर्वायाः॥

पुनर्विजयामन्त्रेण शोधयेत् सर्वकन्यकाः॥ ओं संविदे ब्रह्म इत्यादि॥ ओं ब्राह्मण्यै नमः स्वाहा॥ ओं सिद्धिमूलकरे देवीत्यादि। अर्द्धं राजपुत्त्रवशङ्करि राजकन्ये त्रिशूलिनि। ऐँक्षत्त्रियायै नमः स्वाहा। ओं अज्ञानेन्धनेत्यादि। ह्रीं वैश्यायै नमः स्वाहा। ओं नमस्यामीत्यादि। श्रीं शूद्रायै नमः स्वाहा। ओं कायसिद्धिकरे देवि विल्वपत्रनिवासिनि। अमरत्वं सदा देहि शिवतुल्यं कुरुष्व माम्। ओं शिवदायै नमः स्वाहा। ओं निर्गुण्डि परमेशानि योगानामधिदेवते। सा मां रक्षतु अमरे भावसिद्धिप्रदे नमः। ओं शोकापहायै नमः स्वाहा। ओं विष्णोः प्रिये महामाये कालज्वालनिवासिनि। तुलसि मां सदा रक्ष मामेकममरं कुरु। ओं ह्रीं श्रीं ऐं ह्रीं अमरायै नमः स्वाहा। पुनरेकत्र आहृत्य सर्वासां शोधनं चरेत्। ओं अमृते अमृतोद्भवे इत्यादि। धेनुमुद्रां

p. 785) योनिमुद्रां मत्स्यमुद्रां प्रदर्शयेत्।
तत्त्वमुद्राक्रमेणैव तर्पणं कारयेद्बुधः। अमन्त्रकं सप्तवारं गुरुनाम्ना शिरेऽर्पयेत्। सप्तवारमिष्टदेव्या नाम्ना मूर्ध्नि प्रदापयेत्। ततस्तर्पणमाकुर्यात् तर्पयामि नमो नमः। एतद्वाक्यस्य पूर्वे तु इष्टमन्त्रं समुच्चरेत्। परदेवतां समुद्धृत्य सर्वाद्यप्रणवं स्मृतम्। ततो मुखे प्रजुहुयात्

कुण्डानां नामपूर्वकम्। ओं वद वदेत्यादि
सर्वसत्त्ववशङ्करि। शत्रुकण्ठत्रिशूलिनि स्वाहा। एतदुक्त्वा
आश्रमौ च वशी साधकसत्तमः। पञ्चामरारसानन्दः
कुलाचारविधिप्रियः। स्थिरचेता भवेद् योगो यदि पञ्चामरागतः।

दत्तात्रेयसंहितायां प्रथमाध्याये॥ यमश्च
नियमश्चैव आसनञ्च ततः परम्। प्राणायामश्चतुर्थः स्यात्
प्रत्याहारश्च पञ्चमः। षष्ठी तु धारणा प्रोक्ता ध्यानं
सप्तममुच्यते। समाधिरष्टमः प्रोक्तः सर्वपुण्यफलप्रदः।
एवमष्टाङ्गयोगञ्च याज्ञवल्क्यादयो विदुः। कलसाद्यास्तथा
सिद्धा हटं कुर्युस्तथा यथा॥ निरुत्तरतन्त्रे चतुर्थपटले॥
आसनं प्राणसंरोधः प्रत्याहारश्च धारणा।
ध्यानं समाधिरेतानि योगाङ्गानि वदन्ति षट्।
प्राणायामद्विषट्केन प्रत्याहारः प्रकीर्त्तितः।
प्रत्याहारद्विषट्केन जायते धारणा शुभा।
धारणाद्वादशप्रोक्तं ध्यानं ध्यानविशारदैः।
ध्यानद्वादशकैरेव समाधिरभिधीयते। यत् समाधौ परं
ज्योतिरुत्तरं विश्वतोमुखम्। तस्मिन् दृष्टे क्रिया काचिद् यातायातं
न विद्यते॥ दत्तात्रेयसंहितायाम्। यमा ये दश सम्प्रोक्ता
ऋषिभिस्तत्त्वदर्शिभिः। लघ्वाहारस्तु तेष्वेको मुख्यो भवति नापरे।

अहिंसा नियमेष्वेको मुख्यो भवति नापरे। चतुरशीतिलक्षेषु त्वासनेषूत्तमं शृणु। आदिनाथेन सम्प्रोक्तं पद्मासनमिहोच्यते। उत्तानौ चरणौ कृत्वा ऊरुसंस्थौ प्रयत्नतः।

p. 786) ऊरुमध्ये तथोत्तानौ पाणी कृत्वा ततो दृशौ। नासाग्रे विन्यसेद्वक्त्रं दन्तमूलञ्च जिह्वया। उत्तोल्य चिवुकं वक्षः संस्थाप्य पवनं शनैः। यथाशक्त्या समाकृष्य पूरयेदुदरं शनैः। यथाशक्त्या समाकृष्य धारयेदुदरं शनैः। यथाशक्त्या ततः पश्चाद्रेचयेदुदरं शनैः। इदं पद्मासनं प्रोक्तं सर्वव्याधिविनाशनम्॥ ग्रहजामले त्रयोदशपटले॥ ऊर्वोरुपरि मेढ्रान्ते उभे पादतले तथा। पद्मासनं भवेदेतत् सर्वपापप्रणाशनम्। तथा। युवावस्थोऽपि वृद्धोऽपि व्याधितो वा शनैः शनैः। अभ्यासात् सिद्धिमाप्नोति योगे सर्वस्य तन्त्रता। ब्राह्मणः श्रमणो वापि वृद्धो वाप्यहितोऽपि वा। कापालिको वा चार्वाकः श्रद्धया सहितः सुधीः। योगाभ्यासरतो नित्यं सर्वसिद्धिमवाप्नुयात्। क्रियायुक्तः स सिद्धः स्यादक्रियस्य कथं भवेत्। शास्त्रस्य पाठमात्रेण कथं सिद्धिः प्रजायते। मुण्डो वा दण्डधारी वा काषायवसनोऽपि वा। नारायणवदो वापि जटिलो भस्मलेपनः। नमः शिवायवादी वा ब्रह्मर्चापूजकोऽपि वा।

स्थानद्वादशपूज्यो वा बहुवत्सलभाषितः। क्रियाहीनोऽथवा क्रूरः कथं सिद्धिमवाप्नुयात्। न वेशधारणं सिद्धेः कारणं न च तत्तथा। क्रियैव कारणं सिद्धेः सत्यमेतत्तु साङ्कृते। शिश्नोदरार्थं योगस्य कथं वा वेशधारिणः। अन्नपानविहीनास्तु वञ्चयन्ति जनान् किल। उच्चावचैर्विप्रलम्भैर्यजन्ते कृशमानवाः। योगिनी वयमित्येवं मुखभोगपरायणाः। शनैस्तथाविधानज्ञान् योगाभ्यासविवर्जितान्। कृतार्थान् वचनैरेव वर्जयेद्वेशधारिणः। एते चाविष्टभूताः स्युर्योगाभ्यासस्य सर्वदा। वर्जयेत्तान् प्रयत्नेन न ईदृशी सिद्धिदा क्रिया। प्रथमाभ्यासकालेषु प्रवेशस्य सदा मुने । आलस्यं प्रथमो विघ्नो द्वितीयस्तु प्रकथ्यते। पूर्वोक्तधूर्त्तगोष्ठी च तृतीयो मन्त्रसाधनम्।

p. 787) चतुर्थो धातुवादश्च पञ्चमः पापवादकः। एवं बहुविधा विघ्ना मृगतृष्णासमा मुखे। स्थिरा मनसि जायन्ते तास्तु ज्ञात्वा त्यजेत् सुधीः। तथा। सुशोभनं मठं कुर्यात् सूक्ष्मद्वारन्तु निर्व्रणम्। सुष्ठु लिप्तं गोमयेन सुधया वा प्रयत्नतः। दिने दिने सुसंमृष्टं सम्मार्जन्याप्यतन्द्रितैः। वासितञ्च सुगन्धेन धूपितं गुग्गुलादिभिः॥ ग्रहजामले द्वादशपटले॥

ईश्वर उवाच॥

हटविद्या परा गोप्या योगिनां सिद्धिमिच्छताम्। देवी वीर्यवती गुप्ता निर्वीर्या च प्रकाशिता। सुवाह्ये धार्मिके देशे सुभिक्षे निरुपद्रवे। एकान्तं मठमध्ये च स्थातव्यं हटयोगिनाम्। स्वल्पद्वारमरन्ध्रगर्त्तपिटकं नात्युच्चनीचायतं सम्यग्गोमयसान्द्रलिप्तममलं निःशेषवाह्योज्झितम्। वाह्ये मण्डपकूपवेदिरचितं प्राकारसंवेष्टितं प्रोक्तं योगमठस्य लक्षणमिदं संसारनिस्तारिणि ॥ एवंविधमठे स्थित्वा सर्वचिन्ताविवर्जितः। गुरुपदिष्टमार्गेण हटयोगं समभ्यसेत्॥ दत्तात्रेयसंहितायाम्॥

मलमूत्रादिभिर्दोषैरष्टादशभिरेव च। वर्जितो दारसम्बन्धं वस्त्रं वाऽजिनमेव च। नान्यत्रास्तरणासीनः परशङ्काविवर्जितः। तस्मिन् शस्तं समास्तीर्य आसनं विष्टरादिकम्। तत्रोपविश्य भेधावी पद्मासनसमन्वितः। समकायः प्राञ्जलिश्च प्रणम्य चेष्टदेवताम्। ततो दक्षिणहस्तस्याप्यङ्गुष्ठेन तु पिङ्गलाम्। निरुध्य पूरयेद्वायुमिडया तु शनैः शनैः। यथाशक्त्या निरोधेन ततः कुर्याच्च कुम्भकम्। ततस्त्यजेत् पिङ्गलया शनैरेव न वेगतः।

पुनः पिङ्गलयाकृष्।य पूरयेदुदरं शनैः। धारयित्वा
यथाशक्ति रेचयेन्मारुतं शनैः। यया त्यजेत्तयापूर्य
धारयेदविरोधतः। एवं प्रातः समासीनः
कुर्याद्विंशतिकुम्भकान्। कुम्भकः सहितो नाम
सर्वग्रहविवर्जितः। मध्याह्नेऽपि तथा कुर्यात्
पुनर्विंशतिकुम्भकान्। एवं सायं प्रकुर्वीत

p. 788) पुनर्विंशतिकुम्भकान्। कुर्वीत रेककुम्भाभ्यां सहितान्
प्रतिवासरम्। कुर्यादेवं चतुर्वारमनालस्यो दिने दिने। एवं
मासत्रयं कुर्यान्नाडीशुद्धिस्ततो भवेत्॥ ग्रहजामले
त्रयोदशपटले॥ प्राणायामस्त्रिधा प्रोक्तो रेचकुम्भकपूरकैः।
सहितः केवलश्चेति कुम्भको द्विविधो मतः। रेचश्चापूर्य यः
कार्यः स वै सहितकुम्भकः। यावत्केवलसिद्धिः स्यात् सहितः
तावदभ्यसेत्। रेचकं पूरकं त्यक्त्वा सुखं यद्वायुधारणम्
। प्राणायामोऽयमित्युक्तः स वै केवलकुम्भकः।
गुरुपदिष्टमार्गेण प्राणायामं समाचरेत्। यावद्वायुः स्थितो
देहे तावज्जीवितमुच्यते। मरणं तस्य निष्क्रान्तिस्ततो वायुं
निबन्धयेत्। मलाकुलासुनाडीषु मारुतो नैव मध्यगः। कथं
स्यात्तन्मलीभावः कायशुद्धिः कथं भवेत्। शुद्धिमेति यदा
सर्वं नाडीचक्रं मलाकुलम्। तदैव जायते योगी

प्राणसंग्रहणे क्षमः। प्राणायामं ततः कुर्यान्नित्यं सात्त्विकया धिया। तथा सुषुम्नापार्श्वस्था मलाः शोषं प्रयान्ति हि। बद्धपद्मासनो योगी प्राणं चन्द्रेण पूरयेत्। धारयित्वा यथाशक्ति पुनः सूर्येण रेचयेत्। प्राणं सूर्येण चाकृष्य पूजयेदुदरं शनैः। विधिवत् कुम्भकं कृत्वा पुनश्चन्द्रेण रेचयेत्। येन त्यजेच्च तेनैव पूरयेदनिरोधतः। रेचयेच्च ततोऽन्येन रेचयेच्च न वेगतः। चन्द्रेण वामनासया सूर्येण दक्षिणनासया इत्यर्थः। प्राणं चेदिडया पिबेन्नियमितं भूयोऽन्यथा रेचयेत् पीत्वा पिङ्गलया समीरणमथो बद्ध्वा त्यजेद्वामया। सूर्याचन्द्रमसोरनेन विधिना विम्बद्वयं ध्यायतः शुद्धा नाडिगणा भवन्ति यामिनो मासत्रयादूर्द्ध्वतः॥ प्रातर्मध्यन्दिनं सायं मध्यरात्रे च कुम्भकान्। चतुरशीतिपर्यन्तं चतुर्वारं समभ्यसेत्। प्राणायामे महाधर्मो योगिनो मोक्षदायकः। प्राणायामो दिवारात्रौ देवि जलं परित्यजेत्। अधमे द्वादशी मात्रा मध्यमे द्विगुणा स्मृता। उत्तमे त्रिगुणा ज्ञेया

p. 789) प्राणायामस्य निर्णये। कनीयसि भवेत् स्वेदः कम्पो भवति मध्यमे। उत्तिष्ठत्युत्तमे प्राणी बद्धपद्मासनो मुहुः। जलेन श्रमजातेन गात्रमार्जनमाचरेत्। दृढतालयुता दीप्तिस्तेन

गात्रस्य जायते। यदा तु नाडीशुद्धिः स्यात्तदा चिह्नानि वाह्यतः। जायन्ते योगिनो देहे तानि वक्ष्याम्यशेषतः। शरीरलघुता दीप्तिर्जठराग्निविवर्द्धनम्। कृशत्वञ्च शरीरस्य तस्य जायेत निश्चितम्। पूर्वोक्तकाले कुर्वन्ति परमाभ्यासमेव च। ततः परं यथेष्टन्तु शक्तिः स्याद्वायुधारणे। यथेष्टधारणाद्वायोः सिद्धिः कुम्भस्य केवला। केवले कुम्भके सिद्धे रेचपूरकवर्जिते। न तस्य दुर्लभं किञ्चित् त्रिषु लोकेषु दिद्यते॥

अथ कुम्भकसिद्धिफलम्॥ प्रस्वेदो जायते पूर्वं मर्दनं तेन कारयेत्। ततस्तु धारणाद्वायोः क्रमेणैव शनैः शनैः। कम्पो भवति देहस्य आसनस्थस्य योगिनः। ततोऽधिकतराभ्यासाद्दार्दुरी जायते ध्रुवम्। यथैव दर्दुरो गच्छेदुत्पत्योत्प्लुत्य भूतले। पद्मासनस्थितो योगी तथा गच्छति भूतले। ततोऽधिकतराभ्यासाद्भूमित्यागश्च जायते। पद्मासनस्थितो वासौ भूमिमुत्सृज्य वर्त्तते। निराधारो विचित्रं हि तदा सामर्थ्यमुद्वहेत्। अल्पं वा बहु वा भुक्त्वा योगौ न व्यथते क्वचित्। अल्पमूत्रपुरीषे तु अल्पनिद्रा च जायते। क्रिमयो वृश्चिका नानास्वेदो दुर्गन्धता तनोः। एतानि सर्वख्यातस्य न जायते कदाचन। अभ्यासकाले प्रथमे शस्तं क्षीराज्यभोजनम्। ततोऽभ्यासे स्थिरीभूते न तादृङ्नियमग्रहः। यथा सिंहो गजो

व्याघ्रो भवेद्वश्यः शनैः शनैः। तथैव सेवितो वायुरन्यथा हन्ति साधकम्। प्राणायामेण युक्तेन सर्वरोगक्षयो भवेत्। अयुक्ताभ्यासयोगेन सर्वरोगसमुद्भवः। हिक्का श्वासश्च कासश्च शिरः कर्णाक्षिवेदना। भवन्ति विविधा दोषाः पवनस्य व्यतिक्रमात्॥ इति वायुव्यतिक्रमदोषः॥

दत्तात्रेयसंहितायाम्॥ तथा वर्ज्यानि वक्ष्यामि योगविघ्नकराणि च। लवणं सर्षपञ्चान्नमुष्णं रूक्षञ्च निन्दकम्। अतीव भोजनं त्याज्यं स्त्रिया सङ्गमनं बहु। अग्निसेवा तु सन्त्याज्या धूर्त्तगोष्ठो विशेषतः॥ ग्रहजामले। अत्याहारः प्रवासश्च प्रजल्पो नियमग्रहः। जनसङ्गश्च लौल्यञ्च षड्भिर्योगः प्रणश्यति॥ इति वर्जनीयानि॥ उत्साहान्निश्चयाद्धैर्यात्तत्त्वज्ञानाच्च साहसात्। जनसङ्गपरित्यागात् षड्भिर्योगो हि सिध्यति। तथा। कट्वम्लतिक्तलवणोष्णहरीतशाकाः सौवीरतैलबहुसर्षपमत्स्यमद्याः। आजादिमांसदधितक्रकुलत्थकोलाः पिन्याकहिङ्गुलसुनादिमपथ्यमस्मिन्॥ भोजनसहितं विद्यात् पुनरप्युष्णीकृतं भोज्यम्। अतिलवणाशनपललकन्दशाकोत्कटं दुष्टम्॥ वर्जयेद् दुर्जनप्रीतिं वह्नितापस्य सेवनम्। प्रातः

स्नानोपवासादि कायक्लेशविधिं तथा॥ इत्यपथ्यानि॥

तथा। गोधूमशालिकलाययवषष्टिकान्नं

क्षीराज्यखण्डनवनीतसितामधूनि।

शुण्ठीकणाकणफलादिकपञ्चशाकं दुग्धादिदिव्यमुदकञ्च

यमीन्द्रपथ्यम्॥ मिष्टं सुमधुरं स्निग्धं रम्यं

धातुप्ररोहणम्। मनोऽभिलषितं भोज्यं योगी भोजनमाचरेत्॥

इति पथ्यानि॥

दत्तात्रेयसंहितायाम्॥ उपायञ्च प्रवक्ष्यामि शीघ्रं

योगस्य सिद्धये। क्षीरं घृतञ्च मिष्टान्नं मिताहारश्च

शस्यते। षट्कर्मभिर्गतस्थौल्यः कफमेदोमलार्त्तिगः।

प्राणायामं ततः कुर्यादनायासेन सिध्यति। प्राणायामैरेव

सर्वे विशुष्यन्ति मलाः प्रिये । मेदःश्लेष्मादिकं न्यस्य

कर्मषट्कं न सम्मतम्। सुमनस्कात्मको भावो यदि वायुं

p. 791) समभ्यसेत्। षट्कर्मयोगमाप्नोति पवनाभ्यासतत्परः।

ब्रह्मादयोऽपि त्रिदशाः पवनाभ्यासतत्पराः। अतः सिद्धिं

गतास्ते च तस्मात्पवनमभ्यसेत्। यावद्बद्धो मरुद्देहे

तावच्चित्तं निराशयम्। त्राटकञ्चेद्भ्रुवोर्मध्ये

तावत्कालभयं कुतः। विधिवत् प्राणसंरोधान्नाडीचक्रे विशोषिते। सुषुम्नावदनं भित्त्वा मुखाद्विशति मारुतः। मारुते मध्यसञ्चारे मनःस्थैर्यं प्रजायते। यो मनःसुस्थिरीभावः सैवावस्था मनोन्मनी। तत्सिद्धये विशेषज्ञाश्चित्रान् कुर्वीत कुम्भकान्। विचित्रकुम्भकाभ्यासाद्विचित्रां सिद्धिमाप्नुयात्॥ अथ त्राटकम्॥ निरीक्षेन्निश्चलदृशा सूक्ष्मलक्ष्यं प्रयत्नतः। अश्रुसम्पातपर्यन्तं त्राटकं तन्महेश्वरि । यत्नतस्त्राटकं गोप्यं तथा हाटकपेटिका॥ विचित्रकुम्भकास्तु। सूर्यभेदनमुज्ञाख्यं तमा शीत्कारशीतली। भस्त्रिका भ्रामरी मूर्च्छा प्लावनी सप्त कुम्भकाः। आदौ सूर्यभेदनम् ॥ आसने सुखदे योगी बद्ध्वा मुक्तासनं ततः। दक्षनाड्या समाकृष्य वह्निस्थं पवनं शनैः। आकेशाग्रान्नखाग्राद्वा निरोधावधि कुम्भयेत्। ततः शनैः सव्यनाड्या रेचयेत् पवनं सुधीः॥ अस्य फलम्॥ कपालशोधनं वातदोषघ्नं कृमिदोषहम्। पुनः पुनरिदं कार्यं सूर्यभेदनमुत्तमम्॥ १॥

अथ उज्ञाख्यम्॥ मुखं संयम्य नासाभ्यां चाकृष्य पवनं शनैः। यथा लगति कण्ठान्ते हृदयावधि सस्वनः। पूर्ववत् कुम्भयेत् प्राणं रेचयेदिडया ततः॥ फलम्॥ स्लेष्मरोगहरश्चैतदनलैर्दीप्तबन्धनम्।

नाडीजलोदराधातुगण्डादोषविनाशनम्। गच्छता तिष्ठता कार्यमुड्डाख्यं कुम्भकन्त्विदम्॥ २॥

अथ शीत्कारः॥ शीत्कारञ्च सदा वक्रे घ्राणे चैव विजृम्भकम्। एवमभ्यासयोगेन कामदेवो द्वितीयकः॥ फलम्॥ योगिनीचक्रमासाद्य सृष्टिसंहारकारकः। न क्षुधा न तृषा निद्रा नैव मूर्च्छा प्रजायते। भवेत् स्वच्छन्ददेहश्च

p. 792) सर्वोपद्रववर्जितः। अनेन च विना सत्यं योगीन्द्रो भूमिमण्डले। रसनाताद्द मूलेन यः प्राणं सततं पिबेत्। यत्नादूर्द्ध्वं भवेत् सिद्धिः सर्वरोगक्षयो भवेत्॥ ३॥

अथ शीतली॥ जिह्वया वायुमाकृष्।य पूर्ववत् कुम्भकादितः। शनैस्तु घ्राणरन्ध्राभ्यां रेचयेदनिलं प्रिये ॥ फलम्॥ गुल्मप्लीहादिकान् दोषान् ज्वरं रेतःक्षयं सुधाम्। तृष्णाञ्च शीतली नाम कुम्भकोऽयं निहन्ति वै॥ ४॥

अथ भस्त्रिका॥ सम्यक् पद्मासनं बद्धा समग्रीवोदरं प्रिये । मुखं संयम्य यत्नेन प्राणं घ्राणेन रेचयेत्। तथैव स्वशरीरस्थं पवनं चालयेत् स्फुटम्। तथा लगति

हृत्कण्ठकपाले श्वसनस्ततः। वेगेन पूरयेत् किञ्चित्
हृत्पद्मावधि मारुतम्। पुनर्विरेचयेत्तद्वत् पूरयेच्च पुनः पुनः।
यथैव लौहकारस्य भस्त्रां वेगेन चालयेत्। तथैव
स्वशरीरस्थं पवनं चालयेच्छनैः। यदा श्रमो भवेत् पूर्णो
बन्धने च तदा लघु। कारयेन्नासिकामध्यं तर्जनीभ्यां विना
दृढम्। कुम्भकं पूर्ववत् कृत्वा रेचयेदिडयानिलम्॥ फलम्॥
वातपित्तश्लेष्महरं शरीराग्निविवर्द्धनम्।
कुण्डलीरोधनञ्चक्रे भारघ्नं शुभदं शुचि।
ब्रह्मनाडीमुखे संस्थकफघ्नं मलनाशनम्।
सम्यञ्मात्रं समुद्भूतं ग्रन्थित्रयविभेदनम्। विशेषेणैव
कर्त्तव्यं भस्त्राख्यं कुम्भकं त्विदम्॥ ५॥

अथ भ्रामरी॥ वेदोद्घोषं पूरकं भृङ्गनादं
भृङ्गीनादं रेचकं मन्दमन्दम्।
योगीन्द्राणामेवमभ्यासयोगाच्चिते जाता काचिदानन्दवल्ली॥ ६।

अथ मूर्च्छा॥ पूरकान्ते गाढतरं बद्ध्वा जालन्धरं
शनैः। रेचयेन्मूर्च्छनाख्योऽयं मनोमूर्च्छा सुखप्रदा॥ ७
॥

अथ प्लावनी॥ अन्तःप्रवर्त्तिताधारमरुता पूरितोदरम्।

साक्षात्पयस्यगाधेऽपि प्लवते पद्मपत्रवत्॥ ८॥

रुद्रजामले उत्तरखण्डे॥ नेतीयोगविधानानि शृणुष्व

p. 793) वीरपूजित। येन सर्वमस्तकस्थकफानां दाहनं भवेत्।
सूक्ष्मसूत्रं दृढतरं प्रदद्यान्नासिकाविले। मुखरन्ध्रे
समानीय सन्धायैनं समाश्रयेत्। पुनः पुनः सदा योगी
यातायातेन घर्षयेत्। क्रमेण वर्द्धनं कुर्यात् सूत्रस्य
परमेश्वर । नेतीयोगेन नासाया रन्ध्रं निर्मलकं भवेत्।
वायोर्गमनकाले तु महासुखमिति प्रभो ॥ १॥

दन्तीयोगं ततः पश्चात् कुर्यात् साधकसत्तमः। दन्तधावनकाले
तु योगमेतं प्रकाशयेत्। दन्तधावनकाष्ठन्तु
सार्द्धहस्तैकसम्भवम्। नातिस्थूलं नातिसूक्ष्मं नवीनं
नम्रमुत्तमम्। अपक्वं यत्नतो ग्राह्यं मृणालसदृशं तरुम्।
गृहीत्वा दन्तकाष्ठं वत् प्रातःकाले प्रभक्षयेत्।
दन्तकाष्ठाग्रभागञ्च कनिष्ठाङ्गुलिपर्व च। एवं
दन्तावलीभ्याञ्च चर्वणं सुन्दरञ्चरेत्। तत् प्रक्षाल्य च नीरेण
शनैर्निर्गममाचरेत्। शनैः शनैः प्रकर्त्तव्यं

कायवाक्चित्तशोधनम्। यावन्न याति काष्ठाग्रं नाभिमूले त्वनाकुलम्। तावत् सूक्ष्मतरं ग्राह्यमवश्यं प्रत्यहञ्चरेत्। हृदये जलचक्रञ्च यावत् खण्डं न जायते। तावत्कालं सर्वदिने प्रभाते रदसाधनम्। हृदये कफभाण्डस्यं खण्डनं जायते ध्रुवम्। पवनागमने सौख्यं प्राप्नोति योगनिर्भरम्। खेचरत्वं लवणजमम्लत्वं कुम्भकोद्भवम्। मिष्टत्वं शाकदध्यन्नं द्विवारं रात्रिभोजनम्। अवश्यं योजयेद् योगी यदि योगमिहेच्छति। एकभागं स्वस्ववीजं द्विभागं तण्डुलं मतम्। उत्तमं पक्कमाहृत्य घृतदुग्धेन भक्षयेत्। अथवा केवलं दुग्धं तर्पणं कारयेद्बुधः। कुण्डलीं कुलरूपाञ्च दुग्धेन परितर्पयेत्। कुण्डलीतर्पणं योगी यदि जानाति शङ्कर । अनायासेन योगी स्यात् स ज्ञानीन्द्रो भवेद्ध्रुवम्॥

सप्तत्रिंशत्पटले॥

आनन्दभैरव्युवाच

धौतीयोगं प्रवख्यामि यत् कृत्वा निर्मलो भवेत्। अत्यन्तगुह्यं योगञ्च समाप्तिकारणं नृणाम्। यदि नो कुरुते योगं तदा

मरणमाप्नुयात्। धौतीयोगं विना नाथ कः सिध्यति महीतले।
सूक्ष्मात् सूक्ष्मतरं वस्त्रं द्वात्रिंशद्धस्तमानतः।
एकहस्तक्रमेणैव यः करोति शनैः शनैः।
यावद्द्वात्रिंशद्धस्तञ्च तावत्कालं क्रियाञ्चरेत्।
एतत्क्रियाप्रयोगेण योगी भवति तत्क्षणात्। क्रमेण मन्त्री सिद्धः
स्यात् कालजालं वशं नयेत्। एतन्मध्ये चासनानि शरीरस्थानि
चाचरेत्। दृढासने योगसिद्धिरिति तन्त्रार्थनिर्णयः। सिद्धे मनौ
परावाप्तिः पञ्चयोगासनेन च। पार्श्वे चाष्टाङ्गुलं वस्त्रं
दीर्घं द्वात्रिंशदीश्वर । एतत् सूक्ष्मं सुवसनं गृहीत्वा
कारयेद् यती। जितेन्द्रियः सदा कुर्यात् ज्ञानध्याननिषेवणम्।
अनाचारेण हानिः स्यादिन्द्रियाणां बलेन च।
महापातकमुख्यानां सङ्गदोषेण हानयः। सम्भवन्ति
महादेव तव योग्यं सुकर्म च। वृद्धो वा यौवनस्थो वा बालो
वा यत्र तत्र वा एकवर्णाद्दीर्घजीवी स्यादमरो लोकवल्लभः।
मन्त्रसिद्धिरिष्टसिद्धिः स सिद्धीनामधीश्वरः। शनैः शनैः
सदा कुर्यात् कालदोषविनाशनम्। हृदयग्रन्थिभेदेन
सर्वावयववर्द्धनम्। धौतीयोगोद्भवं कामं
महामरणकारणम्। तस्य त्यागं यः करोति सदैव देवविक्रमः।
दौतीयोगानन्तरं हि नेडणीकर्म चाचरेत्। नेडणीयोगमात्रेण
आसने नेडणोपमः। नेडणीसाधनादेव चिरजीवी निरामयः।

तत्कारणं प्रवक्ष्यामि सावधानाऽवधारय। भुक्त्वा मुद्गान्नपक्कञ्च वारैकं प्रतिपालयेत्। प्रतिपालयेत् स्वोदरञ्च कठिनाशाविवर्जितः। पुनः पुनश्चालनञ्च कुर्यात् स्वोदरमध्यकम्। कुलालचक्रवत् कुर्याद् भ्रमणञ्चोदरस्य च। सर्वाङ्गचालनादेव कुण्डलीशक्तिचालनम्। चालनात् कुण्डलीदेव्याश्चेतना सा भवेत् प्रभो । एतस्यानन्तरं देव

p. 795) क्षालनं परिकीर्त्तितम्। नाडीनां क्षालनादेव सर्वविद्यानिधिर्भवेत्। वायुसिद्धिर्भवेत्तस्य पञ्चभूतस्य सिद्धिभाक्। मुण्डासनं हि सर्वत्र सर्वदा कारयेद्बुधः। ऊर्द्ध्वपद्मासनं कृत्वा अधोहस्ते जपं चरेत्। तदा त्रिदिनमाकर्त्तुं समर्थो मुण्डिकासनम्। तदा हि सर्वनाड्यश्च वशीभूता न संशयः। नाडीक्षालनयोगेन सिद्धिमाप्नोति साधकः नेडणीं यो न जानाति स कथं कर्त्तुमुद्यतः। स धीरो मानसचरो मतिमान् स जितेन्द्रियः। यो नेडणीयोगसारं कर्त्तुमुद्यमपारगः। स चावश्यं क्षालनञ्च कुर्यान्नाड्यादिसाधनम्। नेडणीयोगमार्गेण नाडीक्षालनतत्परः। भवत्येव महाकाल राजराजेश्वरो यथा। केवलं प्राणवायोश्च धारणात् क्षालनं भवेत्। विना क्षालनयोगेन देहशुद्धिर्न जायते। क्षालनं नाडिकादीनां

कफपित्तादिनाशनम्। करोति यत्नतो योगी मुण्डासनानिलाशनात्। वायुग्रहणमेवं हि नेडणीवशकालके। न कुर्यात् केवलं नाथ अन्यकाले सदाचरेत्। यावन्नेडणीं न जानाति तवद्वायुं न सम्पिबेत्। बहुतरं न संग्राह्यं वायोरोगमलादिकृत्। केवलं श्वासगणनं यावन्नेडणी न सिद्ध्यति। पञ्चामरासाधनाच्च पञ्चवायुवशो भवेत्॥

ग्रहजामले॥ मेदःश्लेष्माधिकः पूर्वं षट्कर्माणि समाचरेत्। अन्यथा नाचरेत्तानि दोषाणामप्यभावतः। धौती च गजकरिणी वस्ती लौली नती तहा। कपालभाती चैतानि षट् कर्माणि महेश्वरि। कर्मषट्कमिदं गोप्यं घटशोधनकारणम्। विचित्रगुणमाधाय पूज्यते योगिपुङ्गवः॥ तत्र धौती॥ चतुरङ्गुलविस्तारं हस्तपञ्चदशेन तु। गुरूपदिष्टमार्गेण सिक्तं वस्त्रं शनैर्ग्रसेत्। ततः प्रत्याहरेच्चैतत् क्षालनं धौतकर्म तत्। कासः श्वासः प्लीहा कुष्ठं कफरोगाश्च विंशतिः। धौतीकर्मप्रसादेन शुध्यन्ते च न संशयः॥ १॥

p. 796) अथ गजकरिणी॥ उदरगतपदार्थमुद्वमन्ती पवनमपानमुदीर्य कण्ठकाले। क्रमपरिचयस्य पायुमार्गाद्गजकरिणीति निगद्यते सा॥ २॥

अथ वस्ती॥ नाभिनिम्नजले पायुं न्यस्य चलोत्कटासनम्।
आधारानञ्जनं कुर्यात् क्षालनं वस्तिकर्म तत्। गुल्मप्लीहोदरा
रोगा वातपित्तकफोद्भवाः। वस्तिकर्मप्रभावेण सर्वरोगक्षयो
भवेत्। धात्विन्द्रियान्तःकरणप्रसादं दद्याच्च कान्तिं
दहनप्रदीप्तिम्। अशेषदोषोपचयं निहन्यादभ्यस्यमानं
जनवस्तिकर्म॥ ३॥

अथ लौली॥ भूम्यादावतिवेगेन तुन्दं सव्यापसव्यतः। नतांसो
भ्रामयेदेषा लौली स्यात् परमेश्वरि ॥ फलम्॥
मन्दाग्निसन्दीपनपाचकादिसन्दीपकानन्दकरी सदैव।
अशेषदोषामयशोषणी च हठक्रिया मौलिरियञ्च लौली॥ ४॥

अथ नती॥ सूत्रं वितस्तिमात्रन्तु नासानाले प्रवेशयेत्। मुखेन
गणयेच्चैषा नती स्यात् परमेश्वरि ॥ फलम्॥ कपालशोधनी
कण्ठ्या दिव्यदृष्टिप्रदायिनी। य ऊर्ध्वं जायते रोगो
नमयत्याशु तं नती॥ एवञ्च नेती नतीति नाममात्रभेदः। नेती
तु पूर्वमुक्ता॥ ५॥

अथ कपालभाती॥ भस्त्रेव लौहकारे च कर्णपूरौ ससम्भ्रमौ।

कपालभाती विख्याता कफदोषन्निनाशिनी। इति कपालभाती॥ ६॥

दत्तात्रेयसंहितायाम्॥ ततोऽधिकतराभ्यासाद्बलमुत्पद्यते भृशम्। येन भूचरसिद्धिः स्याद् भूचराणां जये क्षमः। व्याघ्रो द्द लापो वन्यो वा ऋक्षो वा गज एव वा। सिंहो वा म्रियते तेन योगिनो हस्तताडनात्। कन्दर्पस्य यथा रूपं तथा तस्यापि योगिनः। तस्मिन् काले महाविघ्नो योगिनः स्यात् प्रमादतः। तद्रूपवशगा नार्यः काङ्क्षन्ते तस्य सङ्गमम्। यदि सङ्गं करोत्येव विन्दुस्तस्य विनश्यति। आत्मक्षयो विन्दुहीनादसामर्थ्यञ्च जायते।

p. 797) तस्मात् स्त्रीणां सङ्गवर्जं कुर्यादत्यन्तमादरात्। योगिनस्तस्य सिद्धिः स्यात् सततं विन्दुधारणात्। तस्मात् सर्वप्रयत्नेन रक्ष्यो विन्दुर्हियोगिना। ततो रहस्यमाविष्टः प्रणवं प्लुतमात्रया। जपेत् पूर्वार्जितानां हि पापानां नाशहेतवे। सर्वविघ्नहरश्चायं प्रणवः सर्वदोषहा। एवमभ्यासयोगेन सिद्धिरारम्भसम्भवा। ततो भवेद् घटावस्था पवनाभ्यासिनः सदा। प्राणापानौ मनो वायु जीवात्मपरमात्मकौ। अन्योन्यस्याविरोधेन एवं सङ्घटते यथा। तद्वद् घटद्वयावस्था प्रसिद्धा योगिनां स्मृता। तत्र चिह्नानि यानि स्युस्तानि वक्ष्यामि कानिचित्। पूर्वं यः

कथितोऽभ्यासश्चतुर्द्धा तं परित्यजेत्। दिवा वा यदि वा रात्रौ मासमात्रं समभ्यसेत्। एकवारं प्रतिदिनं कुर्यात् केवलकुम्भकम्। प्रत्याहारो हि एवं स्यादेवं कुर्युर्हि योगिनः। इन्द्रियाणीन्द्रियार्थेभ्यो यत् प्रत्याहरते स्फुटम्। योगी कुम्भकमास्थाय प्रत्याहारः स उच्यते। यद्यत् पश्यति चक्षुर्भ्यां तत्तदात्मनि भावयेत्। यद्यत् शृणोति कर्णाभ्यां तत्तदात्मनि भावयेत्। जिह्वया यद्रसयति तत्तदात्मनि भावयेत्। त्वचा यदङ्गं स्पृशति तत्तदात्मनि भावयेत्। एवं ज्ञानेन्द्रियाणां हि तत्संख्याभिस्तु सङ्घयेत्। यामं यामं प्रतिदिनं योगी यत्नादतन्द्रितः। तदा विचित्रसामर्थ्यं जायते योगिनो ध्रुवम्। दूरश्रुतिर्दूरदृष्टिः क्षणाद्दूरगतिस्तथा। वाक्सिद्धिः कामचारत्वं तथाऽदृश्यपदं भवेत्। मलमूत्रोपलेपेन लौहानां स्वर्णता तथा। खेचरत्वं तथा स्याच्च सतताभ्यासयोगतः। तदा बुद्धिमता भाव्यं योगिना योगसिद्धये। एते विघ्ना महासिद्ध्यै न रमेत्तेषु बुद्धिमान्। न शीलयेत्तु कस्मैचित् स्वसामर्थ्यं हि सर्वदा। कदाचिद्दर्शयेन्मर्त्त्यो भक्तियुक्ताय वा पुनः। यथा मूर्खो यथा मूढो यथा वधिर एव वा। तथा वर्त्तेत लोकेषु

p. 798) स्वसामर्थस्य गुप्तये। नोचेत् शिष्या हि बहवो भवन्त्येव न

संशयः। स्वस्वकार्येषु योगीन्द्रं प्रार्थयन्ते जनाः सदा। तत्कर्मकरणव्यग्रः स्वाभ्यासे शिथिलो भवेत्। अभ्यासेन विहीनस्तु ततो लौकिकतां व्रजेत्। अविस्मृत्य गुरोर्वाक्यमभ्यासात्तदहर्निशम्। एवं भवेद्घटावस्था सहजाभ्यासयोगतः। अनभ्यासेन योगोऽयं वृथा गोष्ठ्या न सिध्यति। तस्मात् सर्वप्रयत्नेन योगमेतं समभ्यसेत्। ततः परिचयावस्था जायतेऽभ्यासयोगतः। वायुः परिचितो यत्नादात्मना सह कुण्डलीन्। बोधयित्वा सुषुम्नायां प्रविशेदविरोधतः। वायुना सह चित्तन्तु प्रविशेत्तु महापथम्। महापथं श्मशानञ्च सुषुम्नाप्येकमेव हि। नाना मतान्तरे भेदाः फलभेदो न विद्यते। वर्त्तमानं भविष्यञ्च भूतार्थञ्चापि वेत्यसौ। यस्य चित्तं सपवनं सुषुम्नां प्रविशेद्दिवा। भव्याभव्ये च विज्ञाय योगी रहसि यत्नतः। पञ्चधा धारणं कुर्यात् तत्तद्भूतभयापहम्॥

ग्रहजामले चतुर्दशपटले॥ सशैलवनधात्रीणां यथाधारोऽहिनायकः। सर्वेषां हठतन्त्राणां तथाधारा हि कुण्डली॥ अहिनायकोऽनन्तः॥ सुप्ता गुरुप्रसादेन यदा जागर्त्ति कुण्डली। तदा पद्मानि सर्वाणि भिद्यन्ते ग्रन्थयोऽपि च। प्राणस्य शून्यपदवी तदा राजपथायते। तदा चित्तं निरालम्बं तदा कालस्य वञ्चनम्॥ शून्यपदवी सुषुम्ना तत्रैवोक्ता यथा॥

सुषुम्ना शून्यपदवी ब्रह्मरन्ध्रं महापथः। श्मशानं शङ्खिनी मध्यमार्गश्चेत्येकवाचकम्॥ राजपथायत इत्यनेन सुखगमनं व्यज्यते॥ तस्मात्सर्वप्रयत्नेन प्रबोधयितुमीश्वरीम्। ब्रह्मरन्ध्रमुखे सुप्तां मुद्राभ्यासं समाचरेत्। महामुद्रा महाबन्धो महावेदश्च खेचरी। उड्डीयानं मूलबन्धो बन्धो जालन्धराभिधः। करणं विपरीताख्यं

p. 799) विज्रिनीशक्तिचालनम्। इदन्तु मुद्रादशकं जरामरणनाशनम्। देवेशि कथितं दिव्यमष्टैश्वर्यप्रदायकम्। वल्लभं सर्वसिद्धानां दुर्लभं मरुतामपि। गोपनीयं प्रयत्नेन यथा रत्नकरण्डकम्। कस्य चिन्नैव वक्तव्यं कुलस्त्रीसुरतं यथा॥

अथ महामुद्रा॥ दत्तात्रेयसंहितायाम्॥ महामुद्रां प्रवक्ष्यामि भैरवोक्तां समादरात्। पार्ष्णिं वामस्य पादस्य योनिस्थाने नियोजयेत्। प्रसाद्य दक्षिणं पादं हस्ताभ्यां धारयेद्दृढं। चिवुकं हृदये न्यस्य पूरयेद्वायुना पुनः। कुम्भकेन यथाशक्ति धारयित्वा च रेचयेत्। वामाङ्गेन समभ्यस्य दक्षिणाङ्गेन चाभ्यसेत्। प्रसारितस्तु यः पादस्तमूरूपरि विन्यसेत्॥ ग्रहजामले॥ पादमूलेन वामेन

योनिं सम्पीड्य दक्षिणम्। पादं प्रसारितं कृत्वा कराभ्यां धारयेद् दृढम्। कण्ठे वक्त्रं समारोप्य धारयेद्वायुमूर्द्धतः। यथा दण्डाहतः सर्पो दण्डाकारः प्रजायते। ऋज्वीभूता तथा शक्तिः कुण्डली सहसा भवेत्। तदासौ मरणावस्था जायते द्विपुटीश्रिता। अतः शनैः शनैरेव रेचयेत्तं न वेगतः। इयं खलु महामुद्रा तव स्नेहात् प्रकाश्यते॥ फलम्॥ महाक्लेशादयो दोषाः क्षीयन्ते मरणादयः। महामुद्रा तु तेनैव समाख्याता महेश्वरि । चन्द्राङ्गेन समभ्यस्य सूर्याङ्गेन समभ्यसेत्। यावत्संख्या भवेत्तुल्या ततो मुद्रां विसर्जयेत्। न हि पथ्यमपथ्यं वा रसाः सर्वेऽपि नीरसाः। अपि भुक्तं विषं घोरं पीयूषमिव जीर्यति। क्षयकुष्ठगुदावर्त्ता गुदप्लीहपुरोगमाः। तस्य दोषाः क्षयं यान्ति महामुद्राञ्च योऽभ्यसेत्। कथितेयं महामुद्रा जरामरणनाशिनी। गोपनीया प्रयत्नेन न देया यस्य कस्यचित्॥

अथ महाबन्धः॥ अयमेव महाबन्धो मुद्रां बद्धा यमभ्यसेत्। महाबन्धस्थितो भूमौ स्फिचौ सन्ताडयेच्छनैः।

p. 800) अयमेव महाबन्धः सिद्धैरभ्यस्यते नरैः। पार्ष्णिं वामस्य पादस्य योनिस्थाने नियोजयेत्। वामोरूपरि संस्थाप्य

दक्षिणं चरणं तथा। पूरयित्वा मुखे पाप हृदये चिबुकं
दृढम्। निष्पीड्य योनिमाकुञ्च्य मनोमध्ये नियोजयेत्। रेचयेच्च
शनैरेवं महाबन्धोऽयमुच्यते। अमुं योगी महाबन्धं
महासिद्धिप्रदायकम्। वामाङ्गञ्च समभ्यस्य दक्षाङ्गे
पुनरभ्यसेत्। अयञ्च सर्वनाडीनामूर्द्धं गतिनिरोधकः।
त्रिवेणीसङ्गमं धत्ते केदारं प्रापयेन्मनः।
रूपलावण्यसम्पन्ना यथा स्त्री पुरुषं विना।
महामुद्रामहाबन्धौ निष्फलौ वेधवर्जितौ॥ २॥

अथ महावेधः॥ महाबन्धस्थितो योगी कृत्वा
प्रकरमेकधा। वायुना गतिमावृत्य विधृतं कण्ठमुद्रया।
समस्तयुक्तो यो भूमौ स्फिचौ सन्ताडयेच्छनैः। पुटद्वयं
समाकृष्य वायुश्चरति सत्वरः। सोमसूर्याग्निसन्दग्धो जायते
चामृताय वै। मृतावस्था समुत्पन्ना ततो मृत्युभयं कुतः।
राजदण्डश्च जिह्वायां बन्धः शस्तो भवेद्धितः।
महावेधसमाभ्यासो महासिद्धिप्रदायकः। बन्धत्रयं
महागुह्यं जरामरणनाशनम्। वह्निवृद्धिकरं
चैवाणिमाद्यष्टगुणप्रदम्। अबाधं हरते पापं यामं
यामं दिने दिने। पुण्यसद्भारसभावं पापौघातिहरं सदा।
सम्यक् शिक्षावतामेव स्वप्नं प्रथमसाधने। वह्निं

स्त्रीपथसेवनमादौ मज्जनमाचरेत्॥ ३॥

अथ खेचरी॥ नाऽशनं सिद्धसदृशं न कुम्भः केवलोपमः। न खेचरीसमा मुद्रा न नादसदृशो लयः। छेदनं चालनं देहे कलाक्रमेण बर्द्धयेत्तावत्। सा यावद् भ्रूमध्यं स्पृशति साक्षात् खेचरीसिद्धिः॥ दत्तात्रेयसंहितायाम्॥ अन्तः कपालविवरे जिह्वां व्यावृत्य बन्धयेत्। भ्रूमध्यदृष्टिरप्येषा मुद्रा भवति खेचरी॥ ग्रहजामले॥ स्नुहीपत्रनिभं शस्त्रं सुतीक्ष्णं सिग्धनिर्मलम्। मर्यादायै ततस्तेन रोममात्रं समुच्छिनेत्। कृत्वा सैन्धवपथ्याभ्यां चूर्णिताभ्यां प्रवर्त्तते॥ पथ्या हरीतकी॥ पुनः सप्तदिने पराप्ते रोममात्रं समुच्छिनेत्। एवं क्रमेण षण्मासं नित्ययुक्तः समाचरेत्। षण्मासाद्रसनामूलशिराबन्धो विनश्यति॥ योगिनी वेणुवल्कलधारेणेदानीं रसनामूलमेवं क्रमेण छिन्दन्ति॥ अथ वागीश्वरीधाम शिरो वस्त्रेण वेष्टयेत्। शनैरुत्कर्षयेद् योगी कालवेलाविधानवित्। वागीश्वरीधाम जिह्वा तस्याः शिरोऽग्रभागः। वस्त्रप्रमाणमपि तत्रैव॥ वितस्तिप्रमितं दैर्घ्यं विस्तारं चतुरङ्गुलम्। मृदुलं धवलं प्रोक्तं वेष्टनालम्बनक्षणम् पुनः षण्मासमात्रेण पुनः सङ्कर्षणात् प्रिये । भ्रूमध्यावधि वर्द्धेत

तिर्यक्कर्णविलावधि। अधस्तच्चिवुकं मूलं प्रयाति क्रमकारिता।
क्रोशादूर्द्ध्वं चङ्क्रमति तिर्यक् सङ्घावधि प्रिये । पुनः
संवत्सरे देवि द्वितीये चैव लीलया। ब्रह्मरन्ध्रत आवृत्य तिष्ठेत्
पवनवन्दिते। सताद्द मूलं सङ्घृष्य सप्तवासरमात्मनि।
पूर्वोक्तेन प्रकारेण मलं सर्वं विशोधयेत्। अङ्गुल्यग्रेण
सङ्घृष्य जिह्वां तत्र निवेशयेत्। शनैः शनैर्मस्तकान्तं
महावज्रकवाटभित्। पूर्वं विजयतां विद्या विख्याता
भुवनत्रये। अस्यां षडङ्गं कुर्वीत तथा षड्चक्रभिन्नया। खे
निरस्तसकलक्रियाक्रमयाचिता चरति। शाश्वतोदये
सशिरोभूसमवायकारिणी॥ क्रमेणैव प्रकर्त्तव्याभ्यासेन
वरवर्णिनि । युगपद्विलये तस्य शरीरं विलयं व्रजेत्।
तस्माच्छनैः शनैः कार्योऽभ्यासिना योगकः प्रिये । एवं
वर्षत्रयं कृत्वा ब्रह्मद्वारं विशोद्धुवम्। षड्चक्राणि
विभेद्य शक्तिभुजगीं प्रोत्थाप्य मूलस्थितां भित्त्वा
ग्रन्थितमञ्च पश्चिमशिराः प्राकाररूपं महत्। नीत्वा
प्राणमहः शिरोऽपि विमलं निर्मथ्य चित्तेन तत् तल्लिङ्गं

p. 802) पिबतेन्दुमण्डलगलन्मुक्तः स साक्षाच्छिवः॥
नित्यं यस्तूर्द्ध्वजिह्वो यदि पिबति पुमान् सप्तधारामृतौघं
सुस्वादं शीतलाङ्गं दुरितभयहरं क्षुत्पिपाशानिवारम्।

पिण्डस्थैर्यं हि तस्मान्मृड इव निवसन्मृत्युरोगात्तरेत्तु
दौर्भाग्यं याति नाशं प्रसरति सकलं त्रित्रिकालो भ्रमित्वा॥
कपालकुहरे जिह्वा प्रविष्टा विपरीतगा। भ्रुवोरन्तर्गता
दृष्टिर्मुद्रा भवति खेचरी। कलां पराङ्मुखीं कृत्वा त्रिपथे
परिवर्त्तयेत्। सा भवेत् खेचरीमुद्रा व्योमचक्रं तदुच्यते।
रसनामूर्द्धगां कृत्वा क्षणार्द्धं यस्तु तिष्ठति।
विषयान्मुच्यते योगी व्याधिमृत्युजरादिभिः। न रोगमरणं तस्य,
न निद्रा न क्षुधा तृषा। न च मूर्च्छा भवेत्तस्य यो मुद्रां
वेत्ति खेचरीम्। पिड्यते न स रोगेण लिप्यते न स कर्मणा। बाध्यते
न स कालेन यस्य मुद्रास्ति खेचरी। चित्तं चरति खे यस्मात् जिह्वा
चरति खे गता। तेनैषा खेचरी नाम मुद्रासननमस्कृता।
खेचर्यामुदितं येन विवरं लम्बिकोर्द्धकम्। तस्य न क्षरते
विन्दुः कामिन्याश्लेषितस्य च। चलितोऽपि यदा विन्दुः सम्प्राप्तो
योनिमण्डले। व्रजेत्तूर्द्धं हठाच्छक्त्या निबद्धो योनिमुद्रया।
ऊर्द्धजिह्वः स्थिरो भूत्वा सोमपानं करोति यः। मासार्द्धेन
न सन्देहो मृत्युं जयति योगवान्। इन्धनानि यथा वह्निस्तेन
वर्त्तिञ्च दीपकः। तथा सोमलतापूर्णं देहं देही न मुञ्चति।
नित्यं सोमकलापूर्णं देहं देही न मुञ्चति। नित्यं
सोमकलापूर्णं शरीरं यस्य योगिनः। तक्षकेणापि दष्टस्य
विषं तस्य न सर्पति। तस्मादिदं प्रकुर्वीत नित्ययुक्तः समाहितः।

रसनां शेषयेदूर्द्धं पिबेदमरवारुणीम्। कुलीनं तमहं
वन्दे इतरे कुलघातकाः। गोशब्देनोदिता जिह्वा तत्प्रवेशो हि तादृ नि।
गोमांसभक्षणं तत्तु महापातकनाशनम्। जिह्वाप्रवेशदं
भूतवायुना स्थापितं खदृ। चन्द्राद् गलति संसारं

p. 803) तत्स्यादमरवारुणी। मूद्र्ध्नः षोडशपत्रपद्मगलितं
प्राणादवाप्तं हठादूर्द्धास्यो रसनां नियम्य विवरे
शक्तिं परां चिन्तयेत्। तत्कल्लोलकलाजलञ्च विमलं धारामृतं
यः पिबेत् निर्दोषः स मृणालकोमलवपुर्योगी चिरं जीवति॥
चुम्बन्ती यदि लम्बिकाग्रमनिशं जिह्वा रसस्यन्दिनी सक्षारा
कटुकाथ दुग्धसदृशी क्षीराज्यतुल्याथवा। व्याधीनां
हरणं जरान्तकरणं शास्त्राङ्गमोद्गीरणं तस्य
स्यादमरत्वमष्टगुणवत् सिद्धाङ्गनाकर्षणम्॥ एकं
सृष्टिमयं वीजं एका मुद्रा च खेचरी। एको देवो निरालम्बो
ह्येकावस्था मनोन्मनी। सुचिरं ज्ञानजनकं
पञ्चतत्त्वसमन्वितम्। तिष्ठन्ती खेचरीमुद्रा तस्मिन् शून्ये
निरञ्जने॥ ४॥

अथ मूलबन्धः॥ पार्ष्णिभागेन सम्पीड्य
योनिमाकुञ्चयेद्गुदम्। अपानमूर्द्धमुत्थाप्य

मूलबन्धोऽयमुच्यते। अधोगतमपानञ्च ऊर्द्धङ्गं कुरुते हठात्। आकुञ्चनेन तं वच्मि मूलबन्धं महेश्वरि । योनिपार्ष्णी तु सम्पीड्य वायुमाकुञ्चयेद्बलात्। वारं वारं तथा चोर्द्धं समायाति समीरणः। प्राणादिनोदितो विन्दुर्मूलंबन्धेन चैकतः। ततो योगस्य संसिद्धिः प्रमा तत्र न संशयः। प्राणापानौ च पवनौ मूलबन्धेन चैकताम्। गत्वा योगस्य संसिद्धिं गच्छतो नात्र संशयः। अपानप्राणयोरैक्यात् क्षयान्मूत्रपुरीषयोः। युवा भवति वृद्धोऽपि सततं मूलबन्धनात्। अपाने चोर्द्धगे याते सम्प्राप्ते योनिमण्डले। तदानना शिखा दीर्घा वर्द्धते वायुना हता। ततो यातं बद्धयोनौ प्राणेषु च स्वरूपकम्। तैलाभ्यक्तं प्रदीपन्तु ज्वलनो देहगस्तथा। तेन कुण्डलिनी सुप्ता सन्तप्ता संविवर्द्धते। दण्डाहता भुजङ्गीव निश्वस्य ऋजुतां व्रजेत्। विलं प्रविष्टैव ततो ब्रह्मनाड्यन्तरं व्रजेत्। तस्मान्नित्यम् मूलबन्धः कर्त्तव्यः परमेश्वरि ॥ ५॥

p. 804) अथ उड्डीयानम्॥ बद्धो येन सुषुम्नायां प्राण उड्डीयते ततः। तस्मादुड्डीयनाख्योऽयं ज्ञातव्यः परमेश्वरि । उड्डीनं कुरुते यस्मादधिश्रान्तो महाखगः। उड्डीयानं तदेव स्यात् तत्र बन्धो निगद्यते। उदरे पश्चिमे भालं

नाभेरूर्द्ध्वञ्च कारयेत्। उड्डीयानो ह्यसौ बन्धो मृत्युमातङ्गकेशरी। उड्डीयानन्तु सहजं कथ्यते परमेश्वरि । अभ्यासेन वितन्द्रस्तु वृद्धोऽपि तरुणो भवेत्। नाभेरूर्द्ध्वमधश्चापि ताद्दं कुर्यात् प्रयत्नतः। षण्मासाभ्यासतो मृत्युं जयत्येव न संशयः। सति वज्रासने पादौ कराभ्यां धारयेद् दृढम्। फल्गुदेशसमीपे च बन्धं तत्र प्रपीडयेत्। पश्चिमे ताद्द मुदरे कारयेद्धृददये गले। शनैः शनैर्यथा प्राणस्तुन्दसिद्धिं स गच्छति। सर्वेषामेव बन्धानामुत्तमोऽप्युड्डियानकः। उद्डीयाने महेशानि मुक्तिः स्वाभाविकी भवेत्॥ दत्तात्रेयसंहितायाञ्च॥ उड्डीयानञ्च सहजं मुनिभिः कथितं सदा। अभ्यसेद् यस्तु सत्त्वस्थो वृद्धोऽपि तरुणायते। नाभेरूर्द्ध्वमधश्चापि प्राणं कुर्यात् प्रयत्नतः। षण्मासमभ्यसेन्मृत्युं जयत्येव न संशयः। मूलबन्धस्तु यो नित्यमभ्यसेत् स तु योगवित्॥ ६॥

अथ जालन्धरबन्धः॥ ग्रहजामले॥ कण्ठमाकुञ्च्य हृदये स्थापयेच्चिवुकं दृढम्। बन्धो जालन्धराख्योऽयममृताव्ययकारकः॥ दत्तात्रेयसंहितायाञ्च । कण्ठमाकुञ्च्य हृदये मारुतं धारयेद् दृढम्। जालन्धरे बन्ध एष ह्यमृतद्व्यपारगः। नाभिस्थाग्निकपालस्थं

सहस्रकमलच्च्युतम्। अमृतं सर्वदास्रावं विन्दुत्वं याति देहिनाम्। यथाग्निश्च तदमृतं न पिबेच्च पिबेत् स्वयम्। याति पश्चिममार्गेण एवमभ्यासतः सदा। अमृतं कुरुते देहं जालन्धरमतोऽभ्यसेत्॥ ग्रहजामले॥ बध्नाति हि शिराजालमध्ये गामि न भोजनम्। अतो जालन्धरो बन्धः कण्ठे दुःखौघनाशनः। जालन्धरे कृते बन्धे कण्ठे सङ्कोचने कृते।

p. 805) न पीयूषं पचत्यग्नौ न च वायुः प्रधावति। कण्ठसङ्कोचनेनैव द्वे नाड्यौ कुम्भयेद् दृढम्। मध्यचक्रमिदं ज्ञेयं षोडशाधारबन्धनम्। बन्धत्रयमिदं श्रेष्ठं महासिद्धनिषेवितम्। सर्वेषां हठतन्त्राणां कुर्यात् साधनमीश्वरि । अथ आकुञ्चनेनाशु कण्ठसङ्कोचने कृते। मध्ये पश्चिमताद्द ः स्यात् प्राणस्तु मध्यनाडिगः। ब्रह्मस्थानस्थितो बोधः प्रयाति पवनालयम्। ततो न जायते मृत्युर्नास्य जरादिकं तथा। मूलस्थानं समाकुञ्च्य उड्डानाख्यन्तु कारयेत्। इडाञ्च पिङ्गलां बद्ध्वा वाहयेत् पश्चिमां दिशम्। अनेनैव विधानेन प्राप्नोति पवनो लयम्। ततो न जायते मृत्युर्जरारोगादिकं तथा॥

अथ विपरीतकरणम्। यत्किञ्चित् स्रवते चन्द्रादमृतं

दिव्यरूपिणम्। तत्सर्वं ग्रसते सूर्यस्तेन पिण्डो जरायुतः। तत्रास्ति करणं दिव्यं सूर्यस्य मुखबन्धनम्। गुरुपदेशतो ज्ञेयं न च शास्त्रार्थकोटिभिः। ऊर्द्ध्वं नाभिरधस्ताद्द रूर्द्ध्वं भानुरधः शशी। करणं विपरीताख्यं सर्वव्याधिविनाशनम् । नित्यमभ्याससंयुक्तं जठराग्निविवर्द्धनम्। स्वल्पाहारो निराहारः क्षुधार्त्तो बलहा भवेत्। आहारं बहुलं तस्य सम्पाद्य साधकस्य तु। अल्पाहारो यदि भवेदग्निर्देहं दहेत् क्षणात्। अधः शिराश्चोर्द्ध्वपादः क्षणं स्यात् प्रथमे दिने। क्षणाच्च किञ्चिदधिकमभ्यसेद्धि दिने दिने। बलितं पलितञ्चैव षण्मासाद्धि विनाशयेत्। मासमात्रन्तु यो नित्यमभ्यसेत् स तु कर्णजित्॥ दत्तात्रेयसंहितायामपि॥ पक्षिणा गुदमायुज्य वाममार्गं चरेद्बलात्। वारं वारं यथा चोर्द्ध्वं समायाति समीरणः। प्राणापानौ नादविन्दू मूलबन्धेन चैकताम्। महायोगस्य संसिद्धिं याति नास्त्यत्र संशयः। करणं विपरीताख्यं सर्वव्याधिविनाशनम्। नित्यमभ्यासयुक्तस्य जठराग्निविवर्द्धनम्। आहारा बहवस्तस्य स्वल्पाद्याः साङ्कृते ध्रुवम्। अल्पाहारो यदि भवेदग्निर्दाहं

p. 806) करोति वै। ऊर्द्ध्वं राहुरधश्चन्द्रस्तथा दृष्टिश्च साङ्कृते । अधःशिराश्चोर्द्ध्वपादः क्षणं स्यात् प्रथमे दिने।

क्षणात्तु किञ्चिदधिकमभ्यसेत्तु दिने दिने। बलिश्च पलितश्चैव षण्मासोर्द्धं न दृश्यते। याममात्रन्तु यो नित्यमभ्यसेत् स तु योगवित्॥

अथ वज्रोणी॥ वज्रोणी चामरोणी च सयोनी च त्रिधा मतः। तत्तासां लक्षणं वक्ष्ये कर्त्तव्यञ्च विशेषतः। स्वेच्छया वर्त्तमानोऽपि योगोक्तनियमं विना। वज्रोणीं यो विजानाति स योगी सिद्धिभाजनः। अधोभागे गतं विन्दुमभ्यासेनोर्द्धमाहरेत्। चलितस्तु स्वकं विन्दुमूर्द्धमाकृष्य रक्षयेत्। तत्र वस्तुद्वयं वक्ष्ये दुर्लभं यस्य कस्यचित्। क्षीरञ्चैव द्वितीयञ्च नारी च वशवर्त्तिनी। मेढ्रेण च शनैः सम्यक् कृत्वाकुञ्चनमभ्यसेत्। पुरुषो वापि नारी वा वज्रोणी सिद्धिमाप्नुयात्। प्रयत्नतः शराजालं फुत्कारैः कम्बु वर्द्धयेत्। शनैः शनैः प्रकुर्याच्च वायुसञ्चारकारणात्। भार्याभगगतं विन्दुमभ्यासेनोर्द्धमाहरेत्। बलितं पलितं विन्दुं विन्दुमाकृष्य रक्षयेत्। एवनतु रक्षयन् विन्दुं मृत्यु जयति योगवान्। मरणं विन्दुपातेन जीवितं विन्दुधारणात्। सुगन्धियोगिनो देहो जायते विन्दुधारणात्। यावद्बिन्दुः स्थितो देहे तावन्मृत्युभयं कुतः। मलायत्तं बलं पुंसां शुक्रायत्तञ्च जीवितम्। तस्माच्छुक्रं मलञ्चैव रक्षणीयं

प्रयत्नतः। ऋतुमत्या रजोऽप्येवं स्वयं विन्दुञ्च रक्षयेत्।
मेढ्रादाकर्षयेदूर्द्धं सम्यगभ्यासयोगतः
सहयोन्यमरोणी च वज्रोण्या एव भेदतः। वज्रोणी
मैथुनादूर्द्धं स्त्रीपुंसोः साङ्गलेपनम्। आसीनयोः
सुखेनैव सूक्ष्मव्यापारयोः क्षणात्। सहयोनिरियं प्रोक्ता
श्रद्धया परमेश्वरि । पित्तोल्वणत्वात् प्रथमाञ्च धारां
विहाय निःसारतयान्त्यधाराम्। निषेवते शितलमध्यधारां

p. 807) कफोणिकैः खण्डमतेरमर्यः। अमरीं यः पिबेन्नित्यं
न्यासं कुर्वन् दिने दिने। वज्रोणीमभ्यसेदेवममरोणीति कथ्यते।
यक्षणाकुञ्चनेनोर्द्धं या रजः सा हि योगिनी। अतीतानागतं
ज्ञातं खेचरी च प्रजायते। देहसिद्धिञ्च लभते
वज्रोण्यभ्यासयोगतः। अयं शुभकरो योगो भोगान् भुङ्क्ते
विमुक्तिदः॥ ९॥

अथ शक्तिचालनम्॥ कुण्डलाङ्गी कुण्डलिनी भुजङ्गी
शक्तिरीश्वरी। कुण्डल्यरुन्धती देवी शब्दाः पर्यायवाचकाः।
गङ्गायमुनयोर्मध्ये बाला रण्डा तपस्विनी। बलादाकृष्य
गृह्णीयात्तद्विष्णोः परमं पदम्। पुच्छं प्रगृह्य भुजगीं
सुप्तामुद्बोधयेदपि। निद्रां विहाय सा ऋज्वी ऊर्द्धमुत्तिष्ठते

हठात्। वज्रासनस्थितो योगी चालयित्वा तु कुण्डलीम्।
कुर्यादनन्तरं भस्त्रां कुण्डलीमाशु बोधयेत्।
मृत्युवज्रगतस्यापि ततो मृत्युभयं कुतः।
मुहूर्त्तद्वयपर्यन्तं निर्भयं चालनादसौ। ऊर्द्ध्वमाकर्षते
किञ्चित् सुषुम्नां कुण्डलीगताम्। तेन कुण्डलिनी तस्याः
सुषुम्नायाः समुद्गताः। जहाति नित्यं प्राणोऽयं सुषुम्नां
ब्रजति स्वनः। तस्मात् सञ्चालयेन्नित्यं शब्दगर्भामरुन्धतीम्।
यस्याः सञ्चालनेनैव रोगी रोगैर्विमुच्यते। येन सञ्चालिता शक्तिः
स योगी सिद्धिभाजनः। किमत्र बहुनोक्तेन कालं जयति लीलया।
अभ्यासान्निःसृतां चैन्द्रीं सह नित्यं समाश्रयेत्।
धारयेत्तूत्तमाङ्गे च दिव्यदृष्टिप्रदायिकाम्। इति मुद्रा दश
प्रोक्तास्तव स्नेहान्महेश्वरि । एकैका चाशु यमिनां
महासिद्धिप्रदायिनी। राजयोगं विना पृथ्वी राजयोगं विना शिला
। राजयोगं विना निद्रा विचित्रापि न राजते। मारुतस्य विधिं सर्वं
मनोयुक्तं मनीषिणाम्। शिवापि मध्यमा नाडी दृढाभ्यासे च
योगिनाम्। आसने प्राणसंयोगे मुद्राभिः सकला भवेत्।

p. 808) उपसन्नेऽपि मुद्राणां राजयोगः समुद्रवत्।
रुद्राणाञ्चापरा मुद्रा तदा सिद्धिं प्रयच्छति॥

इति प्राणतोषिण्यां षष्ठे ज्ञानकाण्डे पञ्चामरादिमुद्रादशकरूपग्रन्थिकथनं नाम प्रथमः परिच्छेदः॥

दत्तात्रेयसंहितायाम्॥ पञ्चधारणानन्तरम्॥ पृथिवीधारं वक्ष्ये पार्थिवेभ्यो भयावहम्। नाभेरधो गुदस्योर्द्ध्वं घटिकाः पञ्च धारयेत्। वायुं ततो भवेत् पृथ्वीधारणं तद्भयापहम्। पृथिवीसम्भवात्तस्य न मृत्युर्योगिनो भवेत्। नाभिस्थाने ततो वायुं धारयेत् पञ्च नाडिकाः। ततो जलभयं नास्ति जलमृत्युर्न योगिनः। नाभ्यूर्द्धमण्डले वायुं धारयेत् पञ्च नाडिकाः। आग्नेयी धारणा सेयं न मृत्युस्तस्य वह्निना। न दह्यते शरीरं हि प्रक्षिप्ते वह्निकुण्डके। नाभिभ्रुवोर्हि मध्ये तु प्रादेशद्वयसम्मिते। धारयेत् पञ्च घटिका वायुं सैव हि वायववी। धारणात्तस्य वायोस्तु योगिनो न भयं भवेत्। भ्रूमभ्यादुपरिष्टात्तु धारयेत् पञ्च नाडिकाः। वायुं योगी प्रयत्नेन सेयमाकाशधारणा। आकाशधारणं कुर्वन्मृत्युं जयति तत्त्वतः। यत्र तत्र स्थितो वापि सुखमत्यन्तमश्नुते। एवञ्च धारणाः पञ्च कुर्याद्योगी विधानतः। ततो दृढशरीरस्य मृत्युरस्य न विद्यते। इत्येवं पञ्चभूतानां धारणं यः समभ्यसेत्। ब्रह्मणः प्रलये वापि तस्य मृत्युर्न विद्यते।

समभ्यसेत्तदा ध्यानं घटिकाः षष्टिमेव च। वायुं निरुध्य तां ध्यायेद्देवतामिष्टसाधिनीम्। सगुणध्यानमेतत् स्यादणिमादिसुखप्रदम्। निर्गुणं खमिव ध्यायेन्मोक्षमार्गः प्रवर्त्तते। निर्गुणध्यानसम्पन्नः समाधिञ्च समभ्यसेत्। दिनद्वादशकेनैव समाधिं समवाप्नुयात्। वायुं निरुध्य मेधावी जीवन्मुक्तो भवेद्ध्रुवम्। समाधिः समतावस्था

p. 809) जीवात्मपरमात्मनोः। यदि स्याद्देहमुत्स्रष्टुमिच्छा चेदुत्सृजेत् स्वयम्। परं ब्रह्मणि लीयेत त्यक्त्वा कर्म शुभाशुभम्। अथ नोचेत् समुत्सृष्टं स्वशरीरं यदि प्रियम्। सर्वलोकेषु विचरेदणिमादिगुणान्वितः। कदाचित् स्वेच्छया देवो भूत्वा स्वर्गेऽपि सञ्चरेत्। मनुष्यो वापि यक्षो वा स्वेच्छयापि क्षणाद्भवेत्। सिंहो व्याघ्रो गजो वापि स्यादिच्छातोऽन्यजन्मताम्। यथेष्टमेव वर्त्तेतयोगी विद्वान्महेश्वरः। कविमार्गोपयुक्तं ते साङ्कृतेऽष्टाङ्गयोगतः। सिद्धानां कपिलादीनां मतं वक्ष्ये ततः परम्। अभ्यासभेदात्तद्भेदेन फलं तत्समं तथा। इत्यनन्तरं जलन्धरादिरुक्तः। तेन दत्तात्रेयमते जलन्धरादिं विनापि योगी भवतीति सुधीभिर्विभाव्यावगन्तव्यम्। पक्षिणा गुदमायुज्य वाममार्गं चरेद्बलात्। वारं वारं यथा चोर्द्ध्वं समायाति समीरणः। प्राणापानौ नादविन्दू

मूलबन्धेन चैकताम्। महायोगस्य संसिद्धिं याति नास्त्यत्र संशयः। करणं विपरीताख्यं सर्वव्याधिविनाशनम्। नित्यमभ्यासयुक्तस्य जठराग्निविवर्द्धनम्। आहारा बहवस्तस्य सम्पाद्याः साङ्कृते ध्रुवम्। अल्पहारो यदि भवेदग्निर्दाहं करोति वै। ऊर्द्धं राहुरधश्चन्द्र तथा दृष्टिश्च साङ्कृते। अधःशिराश्चोर्द्धपादः क्षणात् स्यात् प्रथमे देने। क्षणात्तु किञ्चिदधिकमभ्यसेत्तु दिने दिने। बलिश्च पलितश्चैव षण्मासोर्द्धं न दृश्यते। याममात्रन्तु यो नित्यमभ्यसेत् स तु योगवित्। वज्रोणीं ते प्रवक्ष्यामि योगिभिर्गोपितं सदा। अतीव तद्रहस्यं हि न देयं यस्य कस्यचित्। लभ्यते यदि तस्यैकं योगसिद्धिकरं परम्। क्षीरमङ्गरसं चेति द्वयोराद्यञ्च लभ्यते। तृतीयं बलिनां पुंसां स्त्रीभ्यः साध्यमुपागतः। योगाभ्यासरता स्त्री च पुंसां यत्नेन साधयेत्। पुंसां स्त्री वा तदन्यद्वा स्त्रीत्वं पुंस्त्वमपेक्षया। स

p. 810) प्रयोजनमात्रैकसाधनात् सिद्धिमाप्नुयात्। गलितो यदि विन्दुस्तु मूद्ध्नि चाकृष्।य धारयेत्। एवं हि रक्षिते विन्दौ मृत्यं जयति तत्त्वतः। मरणं विन्दुपातेन जीवनं विन्दुरक्षणात्। विन्दुरक्षाप्रसादेन सर्वे सिध्यन्ति योगिनः। अमरोणिस्तु यथा स्यात् सहयोनिस्ततो यथा। तदभ्यासक्रमो ज्ञेयः सिद्धानां

सम्प्रदायतः। एतैः सर्वैस्तु कथितैरभ्यसेत् कालयोगतः। ततो भवेद्राजयोगो नान्तरीभवति ध्रुवम्। न दिङ्मात्रेण सिद्धिः स्यादभ्यासो नैव जायते। राजयोगपदं प्राप्य सर्वसङ्कल्पभञ्जकम्। सर्वं कुर्यान्न वा कुर्याद् यथारुचि विचेष्टितम्। तथान्तरा च योगेन निष्पन्ना योगिनः क्रिया। तदावस्था हि नश्यन्ती भक्तिमुक्तिप्रदा भवेत्॥

प्राणायामस्य फलान्तरन्तु ग्रहयामले॥ आदौ चन्द्रः सिते पक्षे भास्करस्तु सितेतरे। प्रतिपत्क्रमतो हानिस्त्रीणि कृत्वोदयत्ययम्॥ त्रिपुरासारमुच्चये तु॥ अमावास्यावध्युदयमाह यथा॥
आरभ्य दर्शं प्रथमामुदेति वामे पुटे त्रीणि दिनानि देवः।
वामेतरे त्रीणि ततो दिनानि पूर्णां तिथिं यावदथैवमेवम्॥
एकस्य पक्षस्य विपर्ययेण रोगाभिभूतिर्भवतीह पुंसाम्।
पक्षद्वये बन्दुसुहृद्विपत्तिः पक्षत्रये व्यत्ययतो मृतिः स्यात्॥
ब्रह्मजामले॥ चन्द्रोदये यदा सूर्यश्चन्द्रः सूर्योदये यदा।
अशुभं हानिरुद्वेगः शुभं सर्वं नियोजयेत्। चन्द्रोदये वामनाड्यां वायुगमननिरूपितसमये एवं सूर्योदये दक्षिणनाड्यां वायुगमननिरूपितसमये कर्मविशेषः। नासिकयोर्वायोः प्रवेशनिर्गमाभ्याञ्च शुभत्वमपि तत्रैव॥
यात्रादाने विवाहे च वस्त्रालङ्कारधारणे। शुभकर्मषु सर्वेषु

प्रवेशे च शशी शुभः। विग्रहद्यूतयुद्धेषु
स्नानभोजनमैथुने। व्यवहारे भये भङ्गे भानुनाडी
प्रशस्यते। मोहनं शान्तिकञ्चैव दिव्यौषधिरसायनम्।

p. 811) विद्यारम्भः स्थिरं कार्यं कर्त्तव्यञ्च निशाकरे।
दूरयुद्धे जयी चन्द्रः समासन्ने दिवाकरः। वहन्नाडीपदे चैव
यात्रा भवति सिद्धिदा॥ यस्यां नासिकायां
प्राणवायोर्गतिर्वक्ष्यते तदंशीयपादप्रसारणपूर्विका यात्रा
सिद्धिदा भवतीत्यर्थः। शयने च प्रसङ्गे वा युवत्यालिङ्गनेऽपि
वा। यः सूर्येण पिबेच्चन्द्रं स भवेन्मकरध्वजः॥ सूर्येण
दक्षिणनासिकास्थप्राणवायुना चन्द्रं नार्या
वामनासिकागतप्राणवायुं पिबति तत्सङ्गमकाले
स्वीयनिश्वासमतिनिविष्टः सन्नाकर्षयति। तत्फलं तत्रैव।
चन्द्रचारी विषं हन्ति सूर्यो बालां वशं नयेत्। सुषुम्नायां
भवेन्मोक्ष एको देवस्त्रिधा मतः। भुक्तमात्रेण मन्दाग्नी
स्त्रीणां वश्येऽथ कर्मणि। शयनं सूर्यवाहेन कर्त्तव्यं
सर्वदा बुधैः। शान्ते शोके विवादे च ज्वरिते मूर्च्छिते तथा।
सज्जनस्यापि बोधार्थे चन्द्रचारं प्रवाहयेत्। भुक्तमात्रादौ
वामपार्श्वेन श्रान्तादिषु दक्षिणपार्श्वेन शयनं कार्यमिति
तात्पर्यम्। चतुर्दिक्षूर्द्ध्वमधस्ताच्चान्यतरस्थानमाश्रित्य यदि

दूतः पृच्छति तदा कस्यां नाड्यां वायुगतिः शुभेत्याह॥
ऊर्द्ध्ववामाग्रतो दूतो ज्ञेयो वामपथस्थितः। पृष्ठे दक्षे तथाधस्तात् सूर्यवाहगतो मतः। पूर्णनाडीगतो दूतो यत् पृच्छति शुभाशुभम्। तत्सर्वं सिद्धिमाप्नोति शून्ये शून्यं न संशयः। आदौ शून्यगतः पृच्छेत् पश्चात् पूर्णो विशेद् यदि। तदा सर्वार्थसिद्धिः स्यादिति जानीहि निश्चितम्॥ इदानीं प्राणवायोः प्रवेशनिर्गमाभ्यां विशेषमाह॥ प्रवेशकाले यद्दूतो वाञ्छति स्वप्रयोजनम्। तत्सर्वं सिद्धिमाप्नोति निर्गमे नास्ति सुन्दरम्॥ कर्मविशेषे नाडीविशेषगतिमाह॥ मारणं मोहनं स्तम्भं विद्वेषोच्चाटनं तथा।
प्रेरणाकर्षणक्षोभं भानुनाड्युदये कुरु। शान्तिकं पौष्टिकं क्षेमं दिव्यौषधिरसायनम्। योगाभ्यासादिकर्माणि कर्त्तव्यानि निशाकरे॥ त्रिपुरासारसमुच्चये॥ भूतानामुदयं

p. 812) द्वयोरपि बुधः संलक्षयेत् पक्षयोस्तत्रादौ वसुधोदयं निहितधीर्घ्राणस्य दण्डस्पृशि। देवेऽधःस्पृशि वारिणो हुतवहस्योर्द्ध्वा गतिश्चोदयं तिर्यक्संस्पृशि मारुतस्य परितः पृष्ठे मरुद्वर्त्मनः॥ देवे प्राणवायौ॥ फलं जामले॥
पृथ्वीजले शुभे तत्त्वे तेजो मिश्रफलोदयम्। हानिमृत्युकरौ पुंसामुभयौ व्योममारुतौ।

कर्मविशेषे भूतोदयफलम् त्रिपुरासारे॥

वश्यस्तम्भनयोः प्रशस्त उदयो भूमेर्जलस्योदयः शस्तः

शान्तिकपौष्टिकादिषु शुभेष्वह्नाय वह्नेः पुनः।

शत्रोर्मारणदारणादिकरणे उच्चाटनोच्छेदयोर्वायोः

शान्तिकनिर्विषीकरणयोर्व्योम्नो हितश्चोदयः॥

कियत्कालमेकनाडीगतो वायुर्भवति तत्रापि पञ्चभूतोदयः केन

ज्ञेय इत्यपेक्षायां नाडीगतिकालं स्थानक्रमेण

भूतोदयञ्चाह जामले॥ एकैकस्य कलाः पञ्च क्रमेणैवोदयन्ति

ताः। पृथिव्यापस्तथा तेजो वायुराकाशमेव च। मध्ये पृथ्वी

त्वधश्चाप ऊर्द्धे वहति चानलः। तिर्यग्वायुप्रवाहश्च नभो

वहति सङ्क्रमे॥ प्रपञ्चसारेऽपि॥ पुटयोरुभयोश्च

दण्डसंस्था पृथिवी तोयमधः कृशानुरूर्द्धम्। पवनस्त्वथ

पार्श्वगोऽपि मध्ये गगनं भूतगतिस्तनूद्भवेयम्॥ तत्रापि

बाल्याद्यवस्थाभेदमाह॥ रुद्रजामले उत्तरखण्डे

एकादशपटले॥ स्वकीयनासिकाग्रस्थं पञ्चमं परिकीर्त्तितम्।

यन्नासापुटमध्ये तु वायुर्भ्रमति भैरव ।

तन्नासाप्यूर्द्धमध्ये तु भावाभावं विचारयेत्। आकाशं

वायुरूपं हि तैजसं प्रभो । पार्थिवं क्रमशो ज्ञेयं

बाल्यास्तादिक्रमेण तु। वामोदये शुभा वामा दक्षिणे पुरुषः

शुभः। वायूनां गमनं ज्ञेयं गगनावधिरेव च। केवलं मध्यदेशे तु गमनं पवनस्य च। तदाकाशं विजानीयाद्बाल्यभावं प्रकीर्त्तितम्। तिर्य्यग्गतिस्तु नासाग्रे वायोरुदयमेव च। केवलं भ्रमणं ज्ञेयं सर्वमङ्गलमेव

p. 813) च। किशोरं तद्विजानीयाद्वायो तिर्य्यग्गतौ विभो । केवलार्द्धनासिकाग्रे वायुर्गच्छति दण्डवत्। तत्तैजसं विजानीयात्तेजसा बलवान् भवेत्। यौवनं तद्विजानीयात् कर्मसिद्धिर्भवेद्ध्रुवम्। यदावाप्य गच्छतीह नासापुटमनाकुलम्। जलोदयं विजानीयात् तदा व्यामोहमेव च। तद्वृद्धगतभावश्च विलम्बोऽधिकचेष्टया। प्राप्नोति परमां प्रीतिं वारुणार्णोदयेऽरुणम्। यदधो गच्छति क्षिप्रं किञ्चिदूर्द्धमगोचरम्। यदा करोति प्राग्बालं तदा रोगाद् बलोदयः पृथिव्या उन्नतं भाग्यं रोगार्त्तिपरिपीडितम्। अस्तमितं महादेव अनुलोमविलोमतः। पवनो गच्छति क्षिप्रं वामदक्षिणभेदतः। वामनासापुटं याति पृथिवी जलमेव च। सदा फलाफलं दातुमुदिता कुलमण्डले। तयोर्वै वायवी शक्तिः फलभागं तदा लभेत्। इत्यवस्थाभेदतत्फलकथनं तत्रैव॥ यद्येवं वामभागे तु बालायाः प्रश्नकर्मणि। यदि तत्र पुमान् प्रश्नं करोति वामगामिनी। तदा रोगमवाप्नोति

कर्महानिर्भवेद्ध्रुवम्। यदि वायूदयो वामे दक्षिणे पुरुषः स्थितः। तदा कुफलमाप्नोति द्रव्यागमनदुर्लभम्। अकस्माद्द्रव्यहानिः स्यान्मनोगतफलापहम्। सुहृद्भङ्गं विवादश्च भिन्ने भिन्नोदयाच्छुभम्। केवलं वरुणस्यैव पुरुषो दक्षिणे शुभः। अशुभं पृथिवीदक्षे भेदोऽयं वरदुर्लभः। सदोदयं दक्षिणे च वायोस्तैजस एव च। आकाशस्य विजानीयाच्छुभाशुभफलं प्रभो । यदि भाग्यवशादेव वायोर्मन्दगतिर्भवेत्। दक्षनासामध्यदेशे तदा वामोदयं शुभम्। तदा वामे विचारश्च वायुतेजःस्वरस्य च। ज्ञात्वोदयं विजानीयान्मिश्रे हानिः स्वरे भयम्। एवं स्वभुवनागारे यदि गच्छति वायवी। तस्मिन् काले पुमान् वामदक्षभागस्थसम्मुखः । तदा कन्यादानफलं यथा प्राप्नोति मानवः तदा

p. 814) वायुप्रसादेन प्राप्नोति धनमुत्तमम्। देशान्तरशुभा वार्त्ता आयाति पुत्त्रसम्पदः। इति स्त्रीपुंसभेदेन फलकथनम्॥

सूक्ष्मस्वरोदये॥ गुरुशुक्रबुधेन्दूनां वासरे वामनाडिकाः। सिध्यन्ति सर्वकार्येषु कृष्णपक्षे विशेषतः अर्काङ्गारकसौराणां वासरे दक्षनाडिका। स्मर्त्तव्या चिरकामेण शुक्लेनैवोदयः स्थितः। क्रमादेकैकनाड्यास्तु

तत्त्वानां पृथगुद्भवः। अहोरात्रस्य मध्ये तु ज्ञेया द्वादशसंक्रमाः। वृषकर्कटकन्यालिमृगमीननिशाकरे। मेषे सिंहे च धनुषि तुलायां मिथुने घटे। उदयो दक्षिणे ज्ञेयः शुभाशुभविनिर्णयः। इति वारादिभेदेन नाडीविशेषफलकथनम्॥ तिष्ठेत् पूर्वोत्तरे चन्द्रो भानुः पश्चिमदक्षिणे। दक्षनाड्याः प्रवाहे तु न गच्छेद्दक्षपश्चिमे। इति नाडीविशेषेण दिग्ज्ञानम्॥ वामाचारप्रवाहे तु न गच्छेत् पूर्व उत्तरे। परिपन्थी भवेत्तस्य गतोऽसौ न निवर्त्तते। तस्मादत्र न गन्तव्यं बुधैः सर्वहितैः शुभैः। तदा तत्र तु सञ्जातमृत्युरेव न संशयः॥ इति वहन्नाडीकस्य दिग्विशेषगमननिन्दा॥ शुक्लपक्षे द्वितीयायामर्के वहति चन्द्रमाः। प्रदृश्यते महाँलाभः पुंसः सौम्यं प्रजायते। सूर्योदये यदा सूर्यश्चन्द्रे चन्द्रोदयो भवेत्। सिध्यन्ति सर्वकार्याणि दिवारात्रिगतान्यपि॥ इति स्वस्वनाडीफलकथनम्॥ चन्द्रकार्ये यदा सूर्यः सूर्यश्चन्द्रोदये भवेत्। उद्वेगः कलहो हानिः शुभं सर्वं निधारयेत्॥ इति विपरीतनिन्दा॥ सूर्यस्य वाहे प्रवदन्ति जालम् एकासने युक्तमनस्थिरञ्च। श्वासेन युक्तस्य तु शीतरश्मेः प्रवाहकाले फलमन्यदस्याम्॥ यदि प्रत्यूषकाले तु विपरीतोदयो भवेत्। चन्द्रस्थाने स्थिते चार्के रविस्थाने च चन्द्रमाः । प्रथमे मानसोद्वेगं धनहानिं द्वितीयके। तृतीये गमनं

ज्ञेयमिष्टनाशं चतुर्थके। पञ्चमे राज्यविभवं षष्ठे
सर्वार्थनाशनम्। सप्तमे व्याधिदुःखानि अष्टमे मृत्युमृच्छति॥

p. 815) इति दिनभेदेन विपरीतफलम्॥ कालत्रयं विनानिष्टं
विपरीतं यदा भवेत्। तदा दुष्टफलं प्रोक्तं
किञ्चिन्न्यूनेऽतिशोभनम्। प्रातर्मध्याह्नयोश्चन्द्रः सायंकाले
दिवाकरः। तदा नित्यं जयोलाभो विपरीतन्तु दुःखदम्॥ इति
कालभेदेन कालफलम्। वामे वा दक्षिणे वापि यत्राप्याक्रम्यते
स्वरः। कृत्वा तत्पदमाद्यञ्च यात्रा भवति सिद्धिदा॥ इति
वहन्नाडीकस्य यात्राफलम्॥ चन्द्रः सम्पदकार्याणि रविन्तु
विषमं सदा। पूर्णपादं पुरः कृत्वा यात्रा भवति सिद्धिदा।
सप्तपादाः शनौ शुक्रे ज्ञातव्याश्च विचक्षणैः। चन्द्रो
रविपदं रुद्र कुजमन्दं तथैव च। सार्द्धं सदा गुरुपदौ
ज्ञातव्यौ च विचक्षणैः॥ इति वारभेदे पादयात्राभेदः॥
लोकानां शीघ्रं गन्तुञ्च कुशलायाङ्गमिष्यते। परदले यथा
ग्राह्यो हानिश्च कलहागमे। यदङ्गं वहते नाडी ग्राह्यं
गतिकरं नृणाम्। चन्द्रचारे चतुष्पादं पञ्चपादञ्च भास्करे
॥ इति वारभेदे पादयात्राभेदः॥

एवञ्च गमनं श्रेष्ठं साधयेद्भुवनत्रयम्।

यत्राङ्गे चरते वायुस्तदङ्गस्य करस्तथा। सुप्तोत्थितमुखं श्रेष्ठं लभते वाञ्छितं फलम्। न हानिः कलहो नैव कण्टकैर्नापि भिद्यते। निवर्त्तते सुखेनव सर्वोपद्रववर्जितः॥ इति वहन्नाडीहस्तेन मुखमार्जनफलम्। गुरुर्बन्धुर्नृपश्चात्मा अन्येऽपि शुभदायिनः। पूर्णाङ्गे खद्ग कर्त्तव्या कार्यसिद्धिर्मनीषिभिः। ऐरी चौराम्वुवर्णाद्या अन्येषाञ्चादिविग्रहः। कर्त्तव्या खद्ग रिक्तायां जयलाभः सुखार्थिभिः। दूरदेशे निधातव्यं गमनन्तु हिमद्युतेः। तेभ्यो न देयो दीप्ते च भवनावर्त्तनञ्च न। तत्किञ्चित् पूर्वमुद्दिष्टं लाभादिसमरागमम्। तत्सर्वं पूर्वनाडीषु जायते निर्विकल्पकम् । शून्यं नाडीविपरीतं यत् पूर्वं प्रतिपादितम्। जायते

p. 816) नान्यथा चैव यथा सर्वज्ञभाषितम्। हव्यवाहे खलोच्चाटे देवविद्यादिवञ्चके। कुपितः स्वाद्विठो वाद्याः पूर्णस्थाः स्युर्भयङ्कराः॥ इति पूर्णरिक्तफलम्॥ दूराध्वनि शुभश्चन्द्रो निर्विघ्नेऽभीष्टसिद्धिदः। प्रवेशकार्यहेतुषु सूर्यः शीघ्रं प्रशस्यते। चन्द्रचारी विषं हन्ति सूर्ये बाला वशं नयेत्। सुषुम्नायां भवेन्मोक्ष एको देवः स्थिरास्थितः। स योगी योगता नाडी योगस्थानेऽपि योग्यता। कार्यानुबन्धनं जीवं कथमूर्द्धं समाचरेत्। शुभाशुभानि कार्याणि

क्रियतेऽहर्निशं यदा। तदा कार्यानुरोधेन कार्यं

नाडीप्रचालनम्॥ इति नाडीचालनकारणम्। चालनन्तु गुरुतो

ज्ञातव्यम्॥

अथेडास्थिरकर्माणि दूराध्वगमने तथा। आश्रमे

हर्म्यप्रासादे वस्तूनां सङ्ग्रहेऽपि च।

वापीकूपतडागादिप्रतिष्ठान्ते तु देवयोः। यात्रादाने विवाहे च

वस्त्रालङ्कारभूषणे। शान्तिकं पौष्टिकञ्चैव

दिव्यौषधिरसायनम्। स्वामिसन्दर्शने यात्रावाणिज्यानाञ्च

सङ्ग्रहे। गृहप्रवेशे सेवायां कृषीणां वीजवापने।

शुभकर्माणि सन्धौ च निर्गमे वा शुभः शशी॥ इति कर्मविशेषे

कर्मनाडीफलम्॥ विद्यारम्भादिकार्येषु बान्धवानाञ्च

दर्शने। जनमुखे च धर्मे च दीक्षायां मन्त्रसाधने।

कालव्याधिचिकित्सायां स्वामिसम्बोधने तथा। गजाश्वारोहणे

धन्विगजाश्वानाञ्च बन्धने। परोपकरणे चैव निधीनां

स्थापने तथा। गीतवाद्यादिनृत्याद्यैर्गीतशास्त्रविचारणे।

पुरग्रामनिवासे च तिलकच्छत्रधारणे। शान्तिशोके विषादे च

ज्वरिते मूर्च्छितेऽपि वा। स्वजने स्वामिसम्बन्धे

धान्यादेर्दारुसङ्ग्रहे। स्त्रिया आनन्दभूषाणां

विष्टरागमने तथा। गुरुपूजाविषादानाञ्चालनञ्च वरानने ।

इडायां सिद्धिदं प्रोक्तं योगाभ्यासादिकर्म च॥ इति कर्मविशेषे नाडी॥ तत्रापि वर्जयेद्वायुस्तेज आकाशमेव च।

p. 817) सर्वकर्माणि सिध्यन्ति दिवा रात्रौ गतानि च। सर्वत्र शुभकार्येषु चन्द्रचारः प्रशस्यते।

अथ पिङ्गला। कठिनक्रूरविद्यानां पठने पाठने तथा।
स्त्रीसङ्गवेश्यागमने महानौकादिरोहणे। इष्टकार्ये सुरापाने
वीरमन्त्र उपासने। बहुलध्वंसदेशादिविषदानादिवैरिणाम्।
शास्त्राभ्यासे च गमने मृगादिपशुविक्रमे।
इष्टकाकाष्ठपाषाणे रत्नघर्षणदारुणे। गीताभ्यासे
यन्त्रतन्त्रे दुर्गपर्वतरोहणे। द्यूते
चौरगजाश्वादिरथवाहनसाधने। व्यायामे मारणोच्चाटे
षट्कर्मादिषु साधने। रक्षिणीयक्षवेतालविश्वभूतादिसंग्रहे।
खरोष्ट्रमहिषादीनां गजस्यारोहणे तथा। नदीजलौघतरणे
भेषजे लेखने मणेः। मारणं मोहनं
स्तम्भविद्वेषोच्चाटनं वशम्। प्राण आकर्षणे दाने
चक्रविक्रयणे तथा। खड्गहस्ते वैरियुद्धे भोगे वा राजदर्शने।
भोजने व्यवहारे च क्रूरे दीप्ते रविः शुभः। भुक्तमात्रे च
मन्दाग्नौ स्त्रीणां वश्यार्थकर्मणि। शयनं सूर्यबाहेन

कर्त्तव्यं सर्वदा बुधैः। क्रूराणि सर्वकर्माणि चराणि विविधानि च। तानि सिध्यन्ति सूर्येण नात्र कार्या विचारणा। इति कर्मविशेषे पिङ्गलाफलम्॥

अथ सुषुम्ना॥ क्षणं वामे दक्षे यदा वहति मारुतः। सुषुम्ना सा च विज्ञेया सर्वकार्यहरा शुभा। तस्यां नाड्यां स्थितो वह्निर्ज्वलन्ति कालरूपिणः। विषमं तं विजानीयात् सर्वकार्यविनाशनम्। यदानुक्रममुल्लङ्घ्य तस्यां नाड्यां द्वयं वहेत्। तदा तस्य विजानीयादशुभं समुपस्थितम्। क्षणम् वामे क्षणं वायुर्विषमं भावमादिशेत्। विपरीतफलं ज्ञेयं ज्ञातव्यञ्च वरानने । उभयोरेव सञ्चारी विषमं तं विदुर्बुधाः। न कुर्यात् क्रूरसौम्यानि तत्सर्वं निष्फलं भवेत्। जीविते मारणप्रश्ने लाभालाभौ जयाजयौ। विषमे

p. 818) वैपरीत्यस्य स स्मरेज्जगदीश्वरम्। ईश्वरं चिन्तितं कार्यं योगाभ्यासादिकर्म च। अन्यत् किञ्चिन्न कर्त्तव्यं जयलाभसुखादिभिः। सूर्येण वहमानायां सुषुम्नायां मुहुर्मुहुः। शापं दद्याद्वरं दद्यात् सर्वदा च तदन्यथा। नाड्यसंक्रमणे काले तत्त्वसंक्रमणे तथा। शुभं किञ्चिन्न कर्त्तव्यं पुण्यदानादि कोटिधा विषमद्वितीयायां त्रिस्थोऽपि

मनसापि न चिन्तयेत्। यात्राहानिकरी तस्य मृत्युकाले न संशयः।

पुरोनासोर्द्धतश्चन्द्रो दक्षोर्द्धे पृष्ठतो रविः।

पूर्णारिक्तविवेकोऽयं ज्ञातव्यो देशिकैः सदा।

ऊर्द्धवामाग्रतो दूतो ज्ञेयो वामपथि स्थितः। पृष्ठे दक्षे तथाधस्तात् सूर्यवाहो गतो मतः। अनादि विषमं सन्धिनिराहारं निराकुलम्। परं सूक्ष्मं विलीयन्ते सा सन्ध्या सन्धिरुच्यते। विषवत् सन्धिकाप्रश्नः सा सन्ध्या सन्धिरुच्यते। न वेदं वेदमित्याह वेदो वेदो निगद्यते। परमात्मा हि यत्रास्ति स वेदो वेद उच्यते। इति नाडीत्रयभेदनिर्णयः॥

श्रीदेव्युवाच॥

देवदेव महादेव सर्वसंसारतारक । स्थितं त्वदीयहृदये रहस्यं वद मे प्रभो ।

श्रीशिव उवाच॥

स्वरज्ञानरहस्यन्तु न किञ्चिदिष्टदेवता। स्वरज्ञानरतो योगी स योगी परमो मतः। पञ्चतत्त्वाद्भवेत् सृष्टिस्तत्त्वे तत्त्वं विलीयते। पञ्चतत्त्वात् परं तत्त्वं तत्त्वात्मानं निरञ्जनम्।

तत्त्वानां नाम विज्ञेयं सिद्धियोगेन योगिनः। भूतानां दुष्टचिह्नानि जानन्ति हि सुरोत्तमाः। पृथिव्यापस्तथा तेजो वायुराकाश एव च। पञ्चभूतात्मकं सर्वं यो जानाति स पूजकः। सर्वलोकस्य जीवेन न भेदं भिन्नतत्त्वकम्। भूर्ल्लोकसत्यपर्यन्तं नाडीभेदं पृथक् पृथक्। भूर्लोको नाभिः सत्यं मस्तकं तत्र तल्लोकावस्थानात्। वामे वा दक्षिणे

p. 819) वापि उदयश्च प्रकीर्त्तितः। अष्टधा धातुविज्ञानं श्रृणु वक्ष्यामि सुन्दरि । प्रथमे तत्त्वसंख्यायां द्वितीये श्वाससन्धिषु। तृतीये स्वरचिह्नानि चतुर्थे प्राणमेव च। पञ्चतत्त्वस्य वर्णः स्यात् षष्ठे च स्थानमेव च। सप्तमे स्वादुसंयुक्तं अष्टमे गतिलक्षणम्। एवमष्टविधं प्राणं विषमं तत् चराचरम्। स्वरात्परतरं देवि नान्यत् स्थातुं कदाचन। निरीक्षितव्यं यत्नेन यदा प्रत्यूषकालतः। कालस्य वञ्चनार्थाय कर्म कुर्वन्ति योगिनः।
श्रुत्योरङ्गुष्ठयोर्मध्याङ्गुल्योर्नासापुटद्वये। वदने प्रान्तगोपान्तेऽङ्गुलं देशे दृगद्वयोः। अस्या भूतपृथिव्यादि तत्त्वज्ञानं भवेत् क्रमात्।
पीतश्वेतारुणश्यामविन्दुभिर्निरुपाधिकम्। दर्पणे च समालोक्य तत्र श्वासं विनिक्षिपेत्। आकारन्तु विजानीयात्तत्त्वभेदं

विचक्षणः। इति भूतप्रक्रिया॥ चतुरस्रमर्द्धचन्द्रं कौण्यं वर्त्तुलसम्मितम्। विन्दुभिस्तु न विज्ञेयं साकारैस्तत्त्वलक्षणम्। मध्ये अर्द्धञ्च पश्चादर्द्धञ्च वहतेऽनलः। तीर्थवायुप्रवाहञ्च नभो वहति संक्रमे। इति भूतज्ञानप्रकारः। आपः श्वेताः क्षितिः पीता रक्तवर्णो हुताशनः। मारुता नीलजीमूता आकाशं सर्ववर्णकम्। इति भूतरूपाणि। स्कन्धद्वये स्थितो वह्निर्नाभिमूले प्रभञ्जनः। जानुदेशे क्षितिस्तोयं पादान्ते मस्तके नभः॥ इति स्थानविशेषस्थतत्त्वेन भूतज्ञानम्॥ महीयं मधुरस्वादुः काषायं मधुरं जलम्। तिक्तं तेजः समीरोऽम्लमाकाशं कटुकं तथा। इति भूतरसाः। अष्टाङ्गुलं वहेद्वायुरनलश्चतुरङ्गुलम्। द्वादशाङ्गुलं माहेयं षोडशाङ्गुलं वारिणः। इति भूतगतिः। ऊर्द्ध्वमृत्युरधः शान्तिस्तिर्यगुच्चाटनं तथा। मध्ये स्तम्भं विजानीयान्नभः सर्वत्र मध्यमम्। पृथिव्यां स्थिरकर्माणि चरकर्माणि वारुणे। तेजसि क्रूरकर्माणि मारणोच्चाटनेऽनिले। व्योम्निकिञ्चिन्न

p. 820) कर्त्तव्यं मध्यमो योगसेवया। इति भूतविशेषे षट्कर्मविशेषः। शून्ये तु सर्वकार्येषु नात्र कार्या विचारणा। पृथ्वीजलाभ्यां सिद्धिः स्यान्मृत्युवह्नौ क्षयोऽनिले। नभस्यं

निष्फलं सर्वं ज्ञातव्यं तत्त्ववेदिभिः। चिरलाभा क्षितिर्ज्ञेया तत्क्षणात्तोयतत्त्वतः। हानिः स्याद्वह्निवाताभ्यां नभस्यं विफलं लभेत्। पीतश्योणैर्मध्यवाही तनुपीवरवद्धृतिः। कवोष्णः पार्थिवो वायुः स्थिरकार्यप्रसाधकः। अधोवाही गुरुध्वानः शीघ्रगः शीणभासितः। यः षोडशाङ्गुलो वायुः स पापः शुभकर्मकृत्। आवर्त्तगश्च चोष्णश्च स्वर्णाभश्चतुरङ्गुलः। ऊर्द्धवाहो च यः क्रूरकर्मकारी च तैजसः। उष्णशीतः कृष्णवर्णस्तिर्यग्गाम्यष्टमाङ्गलः। वायुः पवनसमो ज्ञेयश्चरकर्मसु सिद्धिदः। यः समीरस्य पवनः सर्वतत्त्वगुणावहः। आवर्त्तं तं विजानीयाद् योगिनां योगदायकम्। पीतञ्चैव चतुष्कोणं मधुरं मध्यमाश्रितः। भोगदं पार्थिवं तत्त्वं प्रवाहे द्वादशाङ्गुलम्। श्वेतमर्द्धेन्दुसङ्काशं स्वादुकाषायमादकम्। लाभकृद्वारुणं तत्त्वं प्रवाहे षोडशाङ्गुलम्। रक्तत्रिकोणतिक्तः स्यादूर्द्धमार्गप्रवाहकः। दीप्तञ्च तैजसं तत्त्वं प्रवाहे चतुरङ्गुलम्। नीलञ्च वर्त्तुलाकारं स्वाद्वम्लं तीर्यगाश्रितम्। चपलं मारुतं तत्त्वं प्रवाहेऽष्टाङ्गुलं स्मृतम्। वर्णाकारं स्वादुवहमव्यक्त सर्वगामिनम्। मोक्षदं नाभसं तत्त्वं सर्वकार्येषु निष्फलम्॥ इत्यङ्गुनिविशेषगत्या भूततत्फलम्॥

पृथ्वीजले शुभे तत्त्व तेजो मिश्रफलोदयम्। हानिमृत्युकरौ पुंसामुभौ च व्योममारुतौ। अपूर्वपश्चिमे पृथ्वी तेजश्च दक्षिणे तथा। वायुश्च उत्तरे ज्ञेयो मध्यकोणगतं नभः। चन्द्रे पृथ्वीजले स्यातां सूर्ये अग्निर्यदा भवेत्। तदा सिद्धिर्नसन्देहः सौम्ये सौम्येषु कर्मषु। लाभः पृथ्वीकृतो न स्यान्निशायां लाभकृज्जलम्। वह्नौ मृत्युः क्षितौ वायुर्नभः

p. 821) स्थानं दहेत् क्वचित्। जीवितव्ये जये लाभे कृष्याञ्च धनकर्मणि। मन्त्रार्थी युद्धप्रश्ने च गमनागमने तथा। आयाति वारुणे शत्रुस्तत्रस्थेऽपि शुभः क्षितौ। प्रयाति वायुतो नित्यं हानिर्मृत्युर्नभोऽनिले॥ इति भूतविशेषे फलविशेषः॥

पृथिव्यां मूलचिन्ता स्यात् मूलमाकाशतो वहेत्। तेजसि धातुचिन्ता स्यात् जीवः स्याज्जलवातयोः॥ इति भूतविशेषेण मूलजीवादिनिर्णयः॥ पृथिव्यां बहुपादः स्याद् द्विपादस्यैव वायवे। तेजसि च चतुष्पादो नभसः पादवर्जितः। इति भूतविशेषेण बहुपादादिनिर्णयः। कुजे वह्नीरवौ पृथ्वी सौरिरापः प्रकीर्त्तितः। वायुस्थले स्थितो राहुर्दक्षरन्ध्रप्रवाहकः। जले चन्द्रो बुध पृथ्वी गुरौ वातः सितेऽनिलः। वामनाड्यां स्थिताः सर्वे

सर्वकार्येषु निश्चितम्। पार्थिवे मूलविज्ञानं जीवज्ञानं तथा जले। अग्नौ च धातुविज्ञानं व्योम्नि शून्यं विनिर्दिशेत्॥ इति भूतभेदेन धात्वादि॥ तुष्टिपुष्टिरतिक्रीडाजपहास्यं धराजले। वायौ तेजशि सुप्तज्ञो यत्तत् कल्पं प्रवासिनाम्। ततो मृत्युश्च आकाशे चन्द्रावस्थाः प्रकीर्त्तिताः। द्वादशैताः प्रयत्नेन ज्ञातव्या देशिकैः सदा। पूर्वस्यां पश्चिमायां वै उत्तरस्यां यथाक्रमम्। पृथिव्यादीनि तत्त्वानि बलिष्ठानि विनिर्दिशेत् । पृथिव्यापस्तथा तेजो वायुराकाश एव च॥ पृथिवी पलपञ्चाशत् चत्वारिंशदपस्तथा। तेजस्त्रिंशद्विजानीयाद्वायुश्च विंशतिर्नभः। नभोऽपि विंशतिपलमिति काकाक्षिगोलकन्यायेनोभयत्र सम्बध्यते॥ पृथिवी चिरकाले च लाभश्चापो भवेत् क्षणात्। जायते पवनैस्तुल्यः सिद्धयोऽग्नौ भविष्यति। इति तत्त्वेन प्रश्नफलकालनिर्णयः॥ पृथ्वीपञ्च अपां वेदागुणास्तेजो द्विवायवः। नभश्चैकगुणश्चैव तत्त्वज्ञानमिदं भवेत्। इति पञ्चभूतेषु

p. 822) शब्दादिगुणपरिमाणम्॥ यत्कारकृत् प्रस्फुटिता विदीर्णा अतीता धरा। ददाति सर्वकार्येषु अवस्थासदृशं फलम्। इति पृथिव्यवस्था। घनिष्ठा रेवती ज्येष्ठानुराधा श्रवणा तथा। अभिजिच्चोत्तराषाढा पृथ्वीतत्त्वमुदाहृतम्। पूर्वाषाढा

तथाश्लेषा मूलार्द्रा चैव रोहिणी। उत्तरभाद्रपदा तोयं आपस्तत्त्वन्त्वभीष्टदम्। भरणी कृत्तिका पुष्या मघा पूर्वा च फल्गुनी। पूर्वभाद्रपदास्वाती तेजस्तत्त्वमिति प्रिये । विशाखोत्तरफल्गुन्यौ हस्ता चित्रा पुनर्वसुः। अश्विनी मृगशीर्षा च वायुस्तत्त्वमुदाहृतम्॥ इति पञ्चभूतनक्षत्राणि॥ बहन्नाडीस्थितो भूतो यदि पृच्छेच्छुभाशुभम्। तत् सर्वं सिद्धिमायाति शून्ये शून्यं न संशयः। इति पूर्णनाड्यादिगतस्य प्रश्नफलम्॥ तत्त्वैरामो जयं प्राप्तः सतत्त्वे च धनञ्जयः। कौरवा निहताः सर्वे मूर्द्धतत्त्वविपर्य्यये। जन्मान्तरस्य संस्कारात् प्रसादादथवा गुरोः। कैश्चित्तु ज्ञायते तत्त्वं वासनाविमलात्मभिः। कायनगरमध्ये तु मारुतो रक्षपालकः। प्रवेशे दशभिः प्रोक्तो निर्गमे द्वादशाङ्गुलम्। गमने च चतुर्विंशं नेत्रवेदाश्च धावने। धावने जवेन गमने। मैथुने पञ्चषष्टिश्च शयने च शताङ्गुलम्। प्राणस्य सा गतिर्देवि स्वभावाद् द्वादशाङ्गुला। भोजने वचने चैव गतिरष्टादशाङ्गुला॥ इति कार्यविशेषे प्राणानां वहिर्गतिनिर्णयः॥

एकाङ्गुलिकृते न्यूने प्राणनिष्कामता मता। आनन्दस्तु द्वितीये च कविशक्तिस्तृतीयके। वाचाशक्तिश्चतुर्थे तु दूरदृष्टिस्तु

पञ्चमे। षष्ठे आकाशगमनं खण्डवेश्च सप्तमे। अष्टमे सिद्धयश्चाष्टौ नवमे निधनं न च। दशमे दशमूर्त्तिः स्याच्छायानाश एकादशे। द्वादशे हंसचारश्च गङ्गामृतरसं पिबेत्। आनखाग्रं प्राणपूरकस्य भक्ष्यञ्च

p. 823) भोजनम्। एवं प्राणविधिः प्रोक्तः सर्वकार्यफलप्रदः। ज्ञातव्यो गुरुवाक्येन न विद्याशास्त्रकोटिभिः। प्रातश्चन्द्रो रविः सायं यदि दैवेन लभ्यते। मध्याह्ने मध्यरात्रौ च परं तत्त्वं प्रवर्त्तते। दूरयुद्धे जयी चन्द्रः समासन्ने दिवाकरः। यात्रादाने विवाहे च प्रवेशे नगरादिके। शुभकार्येषु सर्वेषु चन्द्रचारः प्रशस्यते॥ अयनतिथिदिनेशस्तूपतत्त्वेन युक्तो यदि वहति कदाचिद्दैवयोगेनपुंसः। स जयति रिपुसैन्यं स्तम्भमात्रे स्वरेण प्रभवति स च विज्ञः केशवस्यापि लोकम्॥ जीववक्षे जीववक्षं जीवाङ्गे परिधाय च। जीवो जयति यो युद्धे जीवो जयति मेदिनीम्। भूमौ जले च कर्त्तव्यं गमनं शास्त्रिकर्मसु। वह्निवायुप्रदीप्तेषु पुनर्नैव भविष्यति। इति तत्त्वविशेषेण गतेः शुभाशुभफलम्॥

जीवेन शस्त्रं बध्नीयात् जीवेनैव विकाशयेत्। जीवे च प्रक्षिपेच्छस्त्रं युद्धे जयति सर्वथा। आकर्षे प्राणपवनः

समासे हेतुवाहनः। समोत्तरे पदं दद्यात् सर्वकार्याणि साधयेत्
। अपूर्णे शत्रुसंग्रामे पूणवसु वनं तथा कुरुते
पूर्णतत्त्वस्थो जयत्येको वसुन्धराम्। या नाडी वहते चाङ्गे
तद्वामे व्याधिदेवता। सन्मुखेऽपीदृशी तेषां
सर्वकार्यफलप्रदा। आदौ च कुरुते मुद्रां पश्चाद्युद्धं
समाचरेत्। सर्वमुद्रा कृता येन तेषां सिद्धिर्न संशयः।
यन्त्रप्रवाहेऽपि यथा सूर्यावाहे भटाः समाः। जाते हि
योधकामः समीरणतत्त्वयोर्वादम्। स प्रापित एषु नीतस्य न
प्रातःकालद्रीटा। यदि सम्बहे वायुयुद्धं यदा तदा सदापेतः
॥ जयत्येव न सन्देहः शत्रुश्च यदि चाग्रतः। यत्र नाड्यां
वहेद्वायुस्तदंशं प्राणमेव च। आकृष्य गच्छेत् कर्णान्तं
जयत्येव पुरन्दरम्। प्रतिपक्षं यदारभ्य पूर्णो
ज्ञेयोऽभिरक्षितम्। न तस्या रिपुभिः शक्तिर्बलिष्ठैरपि हन्यते।
अङ्गुष्ठतर्जनीमध्ये पादाङ्गुष्ठे तथा धनुः।

p. 824) युद्धकाले च कर्त्तव्यं लक्षयोधजयो भवेत्। निशाकरे
रवौ चारे मध्ये यस्य समीरणः। स्थितो रक्षेद्दिगन्तानि
जयाकाङ्क्षी नरः सदा। श्वासप्रवेशकाले तु दूतो जल्पति
वाञ्छितम्। तस्यार्थाः सिद्धिमायान्ति निर्गमेणैव सुन्दरि ॥ इति
श्वासप्रवेशकाले प्रश्नफलम्॥

लाभादीनि स्वकार्याणि पृष्टानि कीर्त्तितानि च। सजीवे सति सिध्यन्ति हानिर्निःसरणे भवेत्। नरो दक्षः स्वकीयश्च स्त्रिया वामः प्रशस्यते। कुम्भको युद्धकाले च त्रयो नाडी स्त्रियो गतिः। हकारस्य सकारस्य विना भेदं स्वरः कथम्। सोऽहं हंसः पदेनैव जीवो जपति सर्वदा। वामे वा यदि वा दक्षे यदा पृच्छति पृच्छकः। तत्र घातो न जायेत शून्ये घातं विनिर्दिशेत्।
भूरात्मनो भवेद्घातः पदस्थानं जले भवेत्।
ऊरुस्थलेऽग्निर्भवनं कटिस्थानेन वायुना।
शिरःस्थात्मखतत्त्वेन ज्ञातव्यो घातनिर्णयः। एवं पञ्चविधो घातः स्वरप्रश्ने प्रकाशितः। इति तत्त्वेन घातस्थाननिर्णयः॥
युद्धोदये कृतप्रश्ने पूर्णस्य प्रथमो जयः। रिक्ते चैव द्वितीयेषु जयी भवति नान्यथा। पूर्णनाडीगतप्रश्ने शून्ये गततदग्रतः। शून्यस्थानेऽग्रतः शत्रुर्म्रियते नात्र संशयः। वामाचारे समा नासा यस्य तस्य जयो भवेत्। पृच्छको दक्षिणे भागे विजयो दक्षिणा शिरा। यदि पृच्छति चन्द्रस्थस्तदा सन्धानमादिशेत्। पृच्छेद् यदा तु सूर्यस्थस्तदा जानीहि विग्रहम्॥ इति वामदक्षिणभेदेन प्रश्ने सन्धिविग्रहकथनम्॥

पार्थिवे च भवेद् युद्धं सन्धिर्भवति वारुणे। जयो हि

तैजसे भङ्गो मृत्युर्वायौ च नाभसे। इति तत्त्वविशेषेण युद्धादिज्ञानम्॥

निवर्त्तिकाप्रमादाद्वा यदा न ज्ञायतेऽनिलः। प्रश्नकाले यदि कुर्याद् बद्धयुद्धेन बुद्धिमान्। निश्चलां धारणां ज्ञात्वा पुष्पहस्ते निपातयेत्। पूर्णाङ्गे पुष्पपतनं शून्ये वा

p. 825) तत्फलं वदेत्। तत्फलं पूर्णरिक्तफलम्। तिष्ठन्नुपविशन् वापि प्राणमाकर्षयन्निजम्। मनोभङ्गः कृतो येन सर्वकार्येषु जीवति। जीवेन स्थापयेद्वायुर्जीवेनावस्थयेत् पुनः। जीवेन क्रियते नित्यं युद्धे जयति सर्वथा। स्वरज्ञानी फलादग्र्यं निष्फलं कोटिधा भवेत्। इह लोके परेणैव स्वरज्ञानी बली सदा। दशशतायुतं लक्ष्मीर्देशाधिपचलं क्वचित्। शतक्रतुः सुरेन्द्राणां बलं कोटिगुणं भवेत्।

श्रीदेव्युवाच।

परस्परं मनुष्याणां युद्धे प्रोक्तो जयस्तथा। समे युद्धे समुत्पन्ने मनुष्याणां कथं जयः।

श्रीशिव उवाच।

ध्यायेत्तत्त्वं स्थिरे जीवे जुहुयात् स्थिरसङ्गमम्।
इष्टसिद्धिर्भवेत्तस्य महालाभो जयस्तथा। निराकारं
समुत्पन्नं साकारं सकलं जगत्। तस्याकारं निराकारं
ज्ञाने भवति तन्मयम्॥ इति ज्ञानयुद्धविजयप्रकरणम्॥

अथ वशीकरणम्॥

श्रीदेव्युवाच।

नरयुद्धं हिमयुद्धं त्वयोक्तञ्च महेश्वर । इदानीं वद
देवश वशीकरणमुत्तमम्।

श्रीशिव उवाच।

चन्द्रसूर्येण चन्द्रस्य स्थापयेज्जीवमण्डले। आजन्मवशगा
वामा कथितोऽयं तपोधनैः। जीवेन गृह्यते जीवा जीवो जीवस्य
दीयते। जावस्थानगतो जीवो बालाजीवाशुकारकः।
रात्र्यस्तयामवेलायां प्रसुप्ते कामिनीजने। ब्रह्मवीज पिबेद्यस्तु

बालाजीवहरस्तु सः। अष्टाक्षरं जपित्वा तु तस्मिन् काले रते सति। तत् क्षणाद्दीयते चन्द्रो मोहमायाति कामिनी। समये वा प्रसङ्गे वा युवत्यालिङ्गनेऽपि वा। तत्क्षणाद्दापयेदाशु मोहयेत् कामिनीन्तु सः। यः सूर्येण पिबेच्चन्द्रं स भवेन्मकरध्वजः। शिव आलिङ्ग्यते शक्त्या प्रसङ्गे दक्षिणेऽपि वा। सप्त नव त्रयः पञ्च रवौ सङ्गस्तु सूर्यके। चन्द्रे दिवातुरीयाष्टे वश्या भवति कामिनी ॥ सूर्याचन्द्रौ समौ कृत्वा सर्वाकृत्यधरोष्ठयौः।

p. 826) महापद्मे मुखं प्रोच्य वारं वारमिदं चरेत्। अध्यानमिति पादस्य यावन्निद्रावशं गता। पश्चाज्जाग्रतबेलायां चोष्य ते गलचक्षुषी। अनेन विधिना कामी वशयेत् सर्वकामिनीः। इदं वचनमन्यस्मिन् इत्याज्ञा परमेश्वरि ॥ इति वशीकरणम्॥

अथ गभप्रकरणम्। ऋतुकाले भवेन्नारी पञ्चमेऽह्नि यदा शुचिः। सूर्याचन्द्रमसौ योगो जीवेन पुत्रसम्भवः। शङ्खावली गवां दुग्धं पृथ्वधी वहते यदा। भर्त्तुरग्रे वदेद्वाक्यं गर्भं देहि त्रिभिर्वचः। ऋतुस्नाता पिबेन्नारी ऋतुदानन्तु योजयेत्। रूपलावण्यसम्पन्नं नरसिंहं प्रसूयते। सुषुम्नासूर्यगन्धेन ऋतुज्ञानन्तु योजयेत्। अङ्गहीनः

पुमांस्तत्र जायते कृमिविग्रहः। विषमाङ्गे दिवा रात्रौ विषमाङ्गे दिनाधिपः। चन्द्रनेत्राग्नितत्त्वेषु बन्ध्या पुत्त्रमवाप्नुयात्। रत्यारम्भे रविः पुंसां रत्यन्ते च सुधाकरः। अनेन कर्मयोगेन नादण्डे देवदण्डकः। रत्यारम्भे रविः पुंसां स्त्रियाश्चैव सुधाकरः। उभयोः सङ्गमे प्राप्ते बन्ध्या पुत्त्रमवाप्नुयात्॥ इति पुत्त्रकन्याजन्मनिदानम्॥ चन्द्रनाडी वहेत् प्रश्ने गर्भे कन्या यदा भवेत्। सूर्ये भवेत्तदा पुत्रो द्वयोर्गर्भो विहन्यते। चन्द्रः स्त्री पुरुषः सूर्यो मध्यमार्गे नपुंसकः। शून्ये शून्यं युगे युग्मं गर्भपातश्च संक्रमे। सूर्यभागे कृते पुत्रश्चन्द्रवारे तु कन्यका। विषमे गर्भपातः स्याद्द्वयोरथ नपुंसकः। तत्त्वैरथ विजानीयात् कथितं तत्तु सुन्दरि ॥ इति प्रश्ने गर्भे पुत्रादिज्ञानम्॥ गर्भाधानं मारुते स्यात् सुदुःखी दिव्ये ख्यातो वारुणे सौख्ययुक्तः। गर्भस्रावः स्वल्पजीवी च वह्नौ भोगी भव्यः पार्थिवेऽनर्थयुक्तः॥ धनवान् सौख्ययुक्तश्च भोगवान् गर्भसंस्थितः। सोत्तमो वरुणे तत्त्वे व्योम्नि गर्भो विनश्यति। माहेन्द्रे जायते पुत्रो वरुणे दुहिता भवेत्। शेषेषु

p. 827) गर्भहानिः स्याज्जातमात्रस्य वा मृतिः। रविमध्ये गतश्चन्द्रश्चन्द्रमध्ये गतो रविः। ज्ञातव्यो गुरुतः शीघ्रं न

विद्याशास्त्रकोटिभिः॥ इति गर्भप्रकरणम्॥

अथ संवत्सरप्रकरणम्। चैत्रशुक्लप्रतिपदि
प्रातस्तत्त्वविभेदतः। पश्येद्भावी क्षणो योगी दक्षिणे
चोत्तरायणे। चन्द्रोदयस्य वेलायां वहमानोऽठ तत्त्वतः।
पृथिव्यापस्तथा वायुः सुभिक्षं सर्वशस्यगम्। तेजोव्योम्नि
भयं घोरं दुर्भिक्षं कालतत्त्वतः। एवं तत्त्वफलं
ज्ञेयं वर्षे मासे दिने तथा। मध्यमो भवति क्रूरो दुष्टः
सर्वत्र कर्मषु। देशभङ्गो महारोगः क्लेशकष्टादिदुःखदः।
मेषसंक्रान्तिवेलायां स्वरभेदं विचारयेत्। संवत्सरफलं
ब्रूयाल्लोकानां तत्त्वचिन्तकः। पृथिव्यादिगतत्त्वानां
दिनमासाब्दजं फलम्। भोजनञ्च तथा दुष्टं
व्योममारुतवह्निभिः। सुभिक्षं वा प्रवृद्धिः स्याद् बहुशस्या
वसुन्धरा। बहुवृष्टिस्तथा सौख्यं पृथ्वीतत्त्वं वहेद् यदि।
दुर्भिक्षं राष्ट्रभङ्गः स्याद् वेगोत्पत्तिः सुदारुणा।
अल्पादल्पतरा वृष्टिरग्नितत्त्वं वहेद् यदि। उत्पातोपद्रवौ
भीतिरल्पवृष्टिः स्युरीतयः। मेषसंक्रान्तिवेलायां वायुतत्त्वं
वहेद् यदि। मेषसंक्रान्तिवेलायां व्योमतत्त्वं वहेद् यदि। तत्रापि
सूरिभिर्ज्ञेयः शस्यादीनामुपद्रवः। पूर्वपूर्वतरस्यैव
श्वासतत्त्वेन सिद्धिदः। सूर्यश्चन्द्रो यथाभूते संग्रहे

सर्वसिद्धिदः। विषमे वह्नितत्त्वस्य ज्ञायते केवलं नभः। तत्
कुर्याद्वस्तुसंग्राही द्विमासे च महार्घ्यता। रवौ संक्रमणे
नाडी गलते च प्रसर्पति। सोऽनिले वह्नियोगे च रौरवं जगतीतले॥ इति
संवत्सरप्रकरणम्॥

अथ रोगप्रकरणम्। महीतले सरोगश्च जले च जलमातरः।
असौ शून्यगतो दूतः पश्चात् पूर्णे विशेत् यदि। मूर्च्छितोऽपि
ध्रुवं जीवेद् यदर्थं परिपृच्छति। यस्मिन्नङ्गे स्थितो
जीवस्तत्रस्थः परिपृच्छति। तदा जीवति जीवोऽसौ यदि रोगैरुपद्रुतः।
दक्षिणे यदि वा वामे दुःखरौद्राक्षरो वदेत्। तदा जीवति जीवोऽसौ
चन्द्रः समफलः क्रमात्। जीवाकारे च वह्न्यात्मा जीवाकारं
विलोक्य च। जीवस्थो जीवितप्रश्ने तस्य स्यात् जीवितं फलम्।
वामाचारस्तदा दक्षे प्रवेशे यत्र वाहने। तत्रस्थः पृच्छते
दूतस्तस्य सिद्धिर्न संशयः। प्रश्ने चाधः स्थितो जीवो न्यूनं
जीवो हि जीवति। ऊर्द्ध्वाचारस्थितो जीवो जीवो याति यमालयम्।
विपरीताक्षरप्रश्नं रिक्तायां पृच्छको यदि। विपर्ययश्च
विज्ञेयो विषमस्थोदये सति। चन्द्रस्थाने स्थितो जीवः सूर्यस्थाने च
पृच्छकः। तदा प्राणविमुक्तोऽसौ यदि रोगैरुपद्रुतः।
पिङ्गलायां स्थितो जीवो वामे दूतस्तु पृच्छति। तदापि म्रियते रोगी
यदि त्राता महेश्वरः। एकस्य भूतस्य विपर्ययेण

रोगाभिभूतिर्भवतीह पुंसाम्। तयोर्द्वयोर्बन्धसुहृद्विपत्तिः पक्षत्रयव्यत्ययतो मृतिः स्यात्॥

अथ कालज्ञानम्। मासादौ वत्सरादौ तु पक्षादौ च यथाक्रमम्। ज्ञेयं कालं परीक्षेत् वायुचारबलात् सुधीः। पञ्चभूतात्मकं दीपं शशिस्नेहेन सिञ्चितम्। रक्षयेत् सूर्यवातेन तेन जीवः स्थिरो भवेत्। मारुतं बन्धयित्वा तु सूर्यं बन्धयते यदि। अभ्यासाजीवितो जीवः सूर्यकालेऽपि वञ्चते। गगनात् स्रवते चन्द्रः कायपद्मानि सिञ्चयेत्। शशाङ्कं वारयेद्रात्रौ दिवाचार्यो दिवाकरः। इत्यभासे ततो नित्यं स योगी नात्र संशयः। अहोरात्रं यदैकत्वं वहते यस्य मारुतः। तदा तस्य भवेदायुः सम्पूर्णं वत्सरत्रयम्। अहोरात्रद्वयं यस्य पिङ्गलायाः सदागतिः। तस्य वर्षद्वयं प्रोक्तं जीवितं तत्त्ववेदिभिः। त्रिवारं वहते यस्य पिङ्गलायां सदागतिः। तदा संवत्सरं चायुः प्रवदन्ति मनीषिणः। सदागतिर्वायुः। रात्रौ

p. 829) चन्द्रो दिवा सूर्यो वहेद् यस्य निरन्तरम्। जानीयात्तस्य वै मृत्युः षण्मासाभ्यन्तरे भवेत्। एकादिषोडशाहानि यदि भानुर्निरन्तरम्। वहेदस्य च वै मृत्युः शेषाहेन च मासिके। सम्पूर्णं वहते सूर्यचन्द्रमाश्च न दृश्यते। पक्षेन जायते

मृत्युः कालज्ञानेन भाषितम्। सम्पूर्णं वहते चन्द्रः सूर्यो नैव च दृश्यते। मासेन जायते मृत्युः कालज्ञानेन भाषितम्। मूत्रं पुरीषं यस्यैव समकाले प्रवर्त्तते। तदासौ चलितो ज्ञेयो दशाहे म्रियते ध्रुवम्। अरुन्धतीं ध्रुवञ्चैव विष्णोस्त्रीणि पदानि च। गतायुषो न पश्यन्ति चतुर्थं मातृमण्डलम्। अरुन्धती भवेज्जिह्वा ध्रुवो नासाग्रमेव च। भ्रुवौ विष्णुपदं ज्ञेयं तारकं मातृमण्डलम्। नवध्रुवं सप्तघोषं पञ्चतत्त्वां त्रिनासिकाम्। जिह्वामेकविलां दृष्ट्वा म्रियते वा नरो ध्रुवम्। कोणमत्स्याङ्गतुल्यन्तु किञ्चित्पिण्डं निरीक्षयेत्। यदा न दृश्यते विन्दुर्दशाहेन नरो मृतः॥ इति कालज्ञानम्॥

अथ नाडीज्ञानम्। इडा गङ्गेतिविज्ञानं पिङ्गला यमुनानदी। मध्ये सरस्वतीज्ञेया प्रयागो योगतस्त्रिभिः। आदौ साधनमाख्यातं सद्यः प्रत्ययकारकम्। बद्धपद्मासनो योगी विदध्यादुड्डियानकम्। पूरकं कुम्भकञ्चैव रेचकञ्च तृतीयकम्। ज्ञातव्यं योगिभिर्नित्यं देहसंसिद्धिहेतवे। पूरकं कुरुते पृथ्वी धातुसाम्यं तथैव च। कुम्भकं स्तम्भनं कुर्यात् जीवरक्षाविवर्द्धनम्। रेचको हरते पापं कुम्भाद्योगपदं व्रजेत्। पश्चात् संग्रामवत्तिष्ठेन्नतु बन्धे च कारयेत्। कुम्भयेत् सहजं वायुर्यथाशक्त्या प्रयत्नतः। रेचयेत्

चन्द्रमार्गेण सूर्येण पूरयेत् सुधीः। चन्द्रमाः पिबते सूर्यं सूर्यः पिबति चन्द्रकम्। अन्योन्यकालभावेन जीवेदाचन्द्रतारकम्।

p. 830) यत्राङ्गे वहते नाडी तन्नाडीबोधनं कुरु।
मुखबद्धमुन्मोचयन् वै परानाञाय तेषु वा।
मुखनासिककर्णानामङ्गुलीभिर्निरुध्येत्। तत्त्वोदयमिति ज्ञेयं सम्मुखीकरणं प्रिये । तस्य रूपगतं नेदं मण्डलीलक्षणन्त्विदम्। यो वेत्ति मानवो लोके स क्षुद्रोऽपिच योगवित्। निराशीर्निष्फलो योगी न किञ्चिदपि चिन्तयेत्। वासनामुन्मनीकृत्य कालं जयति लीलया। यस्य या शंसिता शक्तिः सिद्धस्य गुणगह्वरम्। बद्धपद्मासनस्थो हि गुदवायुं निरुद्धयेत्। विमुञ्चेत प्राणकाद्यं कुम्भकत्रयमानिले। शक्त्या प्राणे निरुद्धे विवरमुपगतं ब्रह्मचक्रे च नित्या निक्षेपाकाशमार्गे शिवचरणरता यान्ति ते केऽपि धन्याः॥ एतज्जानाति यो योगी एतत् पठति नित्यशः। सर्वदुःखविनिर्मुक्तो लभते वाञ्छितं फलम्। स्वरज्ञानं शिवे यस्य लक्ष्मीः पदतले भवेत्। प्राणवत् सर्वदेवानां ब्रह्माण्डे भास्करो यथा।
मर्त्यलोकेऽयमापूज्यः स्वरज्ञानी पूमानपि। नाडीत्रयं विजानाति तत्त्वज्ञानं तथैव च। नैव तेन भवेत्तूल्यं लक्षकोटिरसायनम्। एकाक्षरप्रदातारं नाडीभेदेन भेदकम्।

पृथिव्यां नास्ति तद्द्रव्यं यद्दत्त्वा चात्रृणी भवेत्। स्वरतत्त्वं तथा युद्धं दिव्यवश्यत्रयन्तथा। एवं प्रवर्त्ततेलोके प्रसिद्धं सिद्धियोगिभिः। एतत् तन्त्रं महाभागे पठनात् सिद्धिदायकम्। सुस्थासनं समासीनो नीरजायतलोचने । चिन्तयेत् परमात्मानं यो वदेत् स भविष्यति॥

इति श्रीप्राणतोषिण्यां षष्ठे ज्ञानकाण्डे स्वरज्ञानरूपशाखाकथनं नाम द्वितीयः परिच्छेदः॥

अथ राजयोगः॥ योगस्वरोदये।

ईश्वर उवाच।

राजयोगं प्रवक्ष्यामि श्रृणु सर्वत्र सिद्धिदम्। गुह्याद्गुह्यतरं देवि नानाधर्मं परात्परम् राजयोगेन देवेशि नृपपूज्यो भवेन्नरः। राजयोगी चिरायुश्च अष्टैश्वर्यमयो भवेत्॥ पञ्चदशप्रकारोऽयं राजयोगः॥ क्रियायोगो ज्ञानयोगः कर्मयोगो हठस्तथा। ध्यानयोगो मन्त्रयोग उरयोगश्च वासना। राजत्येतद् ब्रह्मवशीव एभिश्च पञ्चदशधा। इदानीं लक्षणञ्चैषां कथयामि श्रृणु प्रिये ।

ध्यानपूजादानयज्ञजपहोमादिका क्रिया। क्रियामुक्तिमयो योगः सपिण्डिसिद्धिदायकः। यत्कारोमीति सङ्कल्पं कार्यारम्भे मनः सदा। तत्साङ्गाचरणं कुर्वन् क्रियायोगरतो भवेत्। क्षमाविवेकवैराग्यशान्तिसन्तोषनिस्पृहाः। एतन्मुक्तियुतो योऽसौ क्रियायोगो निगद्यते। मात्सर्यं ममता माया हिंसा च मदगर्विता। कामः क्रोधो भयं लज्जा लोभो मोहस्तथाऽशुचिः। रागद्वेषौ घृणालस्यश्रान्तिदम्भक्षमाभ्रमाः। यस्यैतानि न विद्यन्ते क्रियायोगी स उच्यते। स एव मुक्तः स ज्ञानी चण्डि नाशेन ईश्वरः। क्रियामुक्तिकरो योऽसौ राजयोगः स मुक्तिदः। ज्ञानयोगं प्रवक्ष्यामि तज्ज्ञानी शिवतां व्रजेत्। पठनात् स्मरणाद्ध्यानान्मण्डनात् ब्रह्मसाधकः। तद्भेदस्यैकसन्धानमष्टैश्वर्यमयो भवेत्। त्रितीर्थं यत्र नाडी च त्रिपुण्यं परमेश्वरि । स्वदेहे यो न जानाति स योगी नामधारकः। नवचक्रं कलाधारं त्रिलक्षं व्योमपञ्चकम् । स्वदेहे यो न जानाति स योगी नामधारकः। एषोऽस्य विश्वरूपस्य राजयोगो मतो बुधैः। विशेषं कथयिष्यामि शृणु चैकमनाः सति । मूलकन्दे स्थले चैका नाडी तेजस्वती परा। गुदोर्द्धे सा त्रिभागाभूदिडा नाम शशिप्रभा। शक्तिरूपामहानाडी ध्यानात् सर्वार्थदायिनी। दक्षिणेऽपि कुलाख्येति पुंरूपा सूर्यविग्रहा। मध्यभागे सुषुम्नाख्या ब्रह्मविष्णुशिवात्मिका

। शुद्धचित्तेन सा विज्ञा विद्युत्कोटिसमप्रभा।

p. 832) भुक्तिमुक्तिप्रदा ध्यानादणिमादिगुणप्रदा। सुषुम्नान्तः समाश्रित्य नवचक्रं यथा शृणु। मूलाधारं चतुष्पत्रं गुदोर्द्धे वर्त्तते महत्। तन्मध्ये स्वर्णपीठे तु त्रिकोणं मण्डलं परम्। तत्र वह्निशिखाकारा मूर्त्तिः सर्वत्र सिद्धिदा। अस्या ध्यानं मनोमध्ये विना पीठेन वाङ्मयम्। सर्वशास्त्राणिसङ्कर्षं सदा स्फुरति योगवित्। लिङ्गमूले तु पीठाभं स्वाधिष्ठानन्तु षड्दलम्। तन्मध्ये बालसूर्याभं महज्ज्योतिः सुसिद्धिदम्। ध्यानाच्च वर्द्धते आयुः कन्दर्पसमतां व्रजेत्। तृतीयं नाभिदेशे तु दिग्दलं परमाद्भुतम्। महामेघप्रभं तत्तु कोटिविद्युत्समन्वितम्। कल्पान्ताग्निसमं ज्योतिस्तन्मध्ये संस्थितं स्वयम्। तस्य ध्यानाच्चिरायुः स्यादरोगो जगतां वरः। सर्वपापविनिर्मुक्तो जगत्क्षोभकरो महान्। अनाहतमष्टपीठं चतुर्थकमलं हृदि। सूर्यपत्रं महाज्योतिर्महासूक्ष्मन्तु चाक्षुषम्। सूर्यपत्रं द्वादशदलम्। तन्मध्येऽष्टदलं पद्ममूर्द्धवक्रं महाप्रभम्। प्राणवायोः स्थलश्चास्य लिङ्गाकारन्तु कर्णिका। कालिकाख्या कर्णिकेयं अस्या मध्ये तु कुण्डली। पद्मवत्याः प्रभाङ्गुष्ठप्रमाणा रत्नसन्निभा। तस्यासङ्गी जीव इति अनन्तो

बलरूपतः। अस्य ध्यानं जगद्वश्यं खेचरीसर्वगो भवेत्।
भवन्ति वश्या देवाद्याश्चिन्ताकर्त्तुर्न चान्यथा। इष्टानिष्टो
भवेद्वश्यः सत्यं सत्यं न संशयः। इष्टसिद्धिर्भवेत्तस्य
सर्वज्ञादिगुणोदयः। कलापत्रं पञ्चमन्तु विशुद्धं
कण्ठदेशतः। अस्य मध्ये पुमानेकः कोटिचन्द्रसमप्रभः।
नश्यन्त्यसाध्यरोगा हि सहस्रायुश्च चिन्तनात्। आज्ञाख्यं
षष्ठकं चक्रं भ्रुवोर्मध्ये द्विपत्रकम्। अग्निज्वालानिभं
ज्योतिः पुंसः स्त्रीतो विवर्जितम्। ध्यानाच्चास्य
सर्वसिद्धिरजरामरतां व्रजेत्। चतुःषष्टिदलं ताद्द मध्ये
चक्रन्तु मध्यमम्। पीयूषपूर्णं कोटीन्दुसन्निभं

p. 833) चामृतस्थली। तन्मध्ये घटिकासंज्ञा कर्णिका
रक्तसन्निभा। सह चेन्दुकला तत्रामृतधारां स्रवत्यसौ।
एतद्ध्यात्वामृतैः स्नात्वा सदा योगात् प्रमुच्यते।
उन्मादज्वरपित्तादिदाहशूलादिवेदनाः। नश्यन्ति च शिरोदुःखं
जाड्यभावोऽपि नश्यति। सद्योध्यानाद्भुक्तविश्वं
जिह्वाजाड्यञ्च नश्यति। ब्रह्मरन्ध्रेऽष्टमं चक्रं शतपत्रं
महाप्रभम्। जालन्धरं नाम पीठं एतत्तु परिकीर्त्तितम्।
सिद्धपुंसः स्थलं ज्ञात्वा अग्निधूमनिभा शिखा।
आदिमध्यान्तहीना स्त्रीपुंमूर्त्तिवर्त्तते परा। अन्तज्ञानी

भवेद्ध्यानादाकाशेऽपि समागमः। निरन्तरं सर्ववेत्ता इत्यूचानो महान् भवेत्। जगन्मध्ये स्थितो जन्तुर्जगद्बाधाविवर्जितः। नवमन्तु महाशून्यं चक्रन्तु तत्परात्परम्। तदुपरि परं किञ्चिन्नास्ति किञ्चिन्महापरम्। महाचक्रं सिद्धचक्रं पूर्णगौर्यादिसंज्ञकम्। तन्मध्ये वर्त्तते पद्मं सहस्रदलमद्भुतम्। ऊर्द्धवक्रं महावक्रे वर्णशोभापदं महत्। सर्वकल्याणसम्पूर्णमस्य तुल्यं न विद्यते परिमाणं वक्तमस्य मनसा वचसा न हि। त्रिकोणकर्णिका तत्र वर्त्तते जगदीश्वरि । कला सप्तदशी तत्र वर्त्तते परमेश्वरि । निरञ्जनकला सा तु कोटिसूर्यसमप्रभा। कोटिचन्द्रप्रभा चैव शीतोष्णादिविवर्जिता। अस्य ध्यानात् साधकस्य मनोदुःखं भवेन्न हि। अनन्तपरमानन्दस्थानं ज्ञेयं तदूर्द्धतः। ऊर्द्धगतकला तत्र तस्य ध्यानाद्भवेदिति। इति सिद्धिराजयोगं स्त्रीणां भोगं महासुखम्। गीतवाद्यविनोदादि सशिवं वर्द्धते क्षितौ। ध्यानं निरन्तरञ्चास्य पुण्यपापे स्थिरे न हि। निजरूपस्य दृष्टिः स्याद्दूरस्यार्थञ्च पश्यति॥

सुखसाध्यं लक्षयोगमिदानीं शृणु पार्वति । पञ्चधा लक्षयोगश्च ऊर्द्धलक्षादिभेदतः। ऊर्द्धलक्षः अधोलक्षो वाह्यलक्षस्तथैव च। मध्यलक्षस्तथा ज्ञेयोऽनन्तलक्षस्तथैव

p. 834) च। लक्षणं श्रृणु चैषां हि फलं ज्ञात्वा महेश्वरि ।
आकाशे दृष्टिमास्थाय मन ऊर्द्धन्तु कारयेत्। ऊर्द्धलक्षो
भवेदेष परमेशस्य चैकता। नासिकोपरि देवेशि
द्वादशाङ्गुलमानतः। दृष्टिः स्थिरा तु कर्त्तव्या अधो
लक्षमिमं भज। अथवा नासिकाग्रे तु स्थिरा दृष्टिरियं भवेत्।
स्थिरा दृष्टिश्चिरायुः स्यात्तथासौ स्थिरदृष्टिमान्। वाह्यलक्षं
स्वयं ज्ञेयं याति तत्त्वनिवासिनाम्। कामिनान्तु
वहिर्दृष्टिश्चिन्तादिषु सुसिद्धिदा। एषा वाह्यमध्यलक्षा इष्टचिन्ता
निराकुलम्। अन्तर्लक्षं श्रृणु शुक्रदिग्विदिगादिवर्जितम्।
चलज्जाग्रत्सुषुप्तेषु भोजनेषु च सर्वदा। सर्वावस्थासु देवेशि
चित्तं शून्ये नियोजयेत्। कर्त्ताकारयिता शुन्यः मूर्त्तिमान् शून्य
ईश्वरः। हर्षशोकघटस्थोऽयं जन्म मृत्यु लभेत् स्वयम्।
घटस्थाचिन्त्ययोर्मूर्त्तिर्हतचिन्तास्वरूपधृक्। विषयं
विषवद्दुष्टं त्यक्त्वा ज्ञात्वा तु मारुतम्। संज्ञाशून्यमना
भूत्वा पुण्यपापैर्न लिप्यते। बाह्यमभ्यन्तरं खं हि
अन्तर्लक्षमिति स्मृतम्। एतद्ध्यानात् सदा किञ्चित् दुःखं न
स्याच्छिवो भवेत्। शून्यन्तु सच्चिदानन्दं निःशब्दं
ब्रह्मशब्दितम्। सशब्दं ज्ञेयमाकाशमिति भेदद्वयन्त्विह।
इदानीं कथयिष्यामि राजयोगस्य लक्षणम्। राजयोगे कृते पुंभिः

सिद्धिचिह्नं भवेदिति। परिपूर्णं भवेच्चित्तं जगत्स्थोऽपि जगद्बहिः। न क्षोभो जन्म मृत्युश्च न दुःखं न सुखं तथा। भेदाभेदौ मनःस्थौ न ज्ञानं शीलं कुलं तथा। प्रकाशकुशसम्बन्धिप्रसङ्गोऽयं निरन्तरम्। सर्वप्रकाशकोऽसौ तु नष्टभेदादिरेव च। अस्य जातेर्न चिह्नञ्च निष्कलोऽयं निरञ्जनः। अनन्तोऽयं महाज्योतिर्वाञ्छांभोगं ददाति च। अस्य चित्ते नानुरागो विरागो न भवेदिति। राज्य प्राप्तेऽपि नो हर्षो हानौ दुःखं भवेन्नहि। क्वचिद्वस्तुनि देशस्य निःस्वने

p. 835) केषु कुत्रचित्। विद्याविद्यामित्रशत्रौ समा दृष्टिश्च सर्वशः। भोगासक्तादिकर्त्तृत्वेन मनो नो भवेत् खवत्। लोकमध्ये भवेत् कर्त्ता मनोमध्येऽपि निष्क्रियः। एषोऽपि राजयोगीति सुखे दुःखे समस्तथा। हर्षशोकौ न जात्वेषां नोद्वेगो लोकसङ्गमे। नित्योल्लासे निराकारे निरासने निरात्मनि। मनसा निश्चलो भूत्वा सदा तिष्ठेत् समोऽपि च। यथाकाशे भ्रमन् वायुराकाशं व्रजते स्वयम्। तथाकाशे मनो लीनं राजयोगक्रिया मता। जगत्संसर्गनिर्लेपं पद्मपत्रजलं यथा॥

इदानीं हठयोगस्तु कथ्यते हठसिद्धिदः। कृत्वासनं पवनाशं शरीरे रोगहारकम्। पूरकं कुम्भकञ्चैव रेचकं

वायुना भजेत्। इत्थं क्रमोत्क्रमं ज्ञात्वा पवनं साधयेत् सदा। धौत्यादिकर्मषट्कञ्च प्रकुर्याद्धठसाधकः। एतन्नाड्यान्तु देवेशि वायुपूर्णं प्रतिष्ठितम्। ततो मनो निश्चलं स्यात्तत आनन्द एव हि। हठयोगान्न कालः स्यान्मनोनाशो भवेद् यदि। इदानीं हठयोगस्य द्वितीयं भेदमच्छृणु। आकाशे नासिकाग्रे तु सूर्यकोटिसमं स्मरेत्। श्वेतं रक्तं तथा पीतं कृष्णमित्यादिरूपतः। एवं ध्यात्वा चिरायुः स्यादङ्गाजननवर्जितम्। शिवतुल्यो महात्मासौ हठयोगप्रसादतः। हठाज्ज्योतिर्मयो भूत्वा ह्यन्तरेण शिवो भवेत्। अतोऽयं हठयोगः स्यात् सिद्धिदः सिद्धसेवितः। इदानीं ज्ञानयोगस्य लक्षणं कथ्यते शिवे । यज्ज्ञात्वा ज्ञानसम्पूर्णः शिवः स्यान्न पुनर्भवः। एकमेव जगत् पश्येद्विश्वात्मा विश्वभावनः। इति कृत्वा तु वै युक्तो ज्ञानयोगं समाचरेत्। यत्र तत्र स्थितो वापि सर्वज्ञानमयं जगत्। य एवमस्ति बोधेन सोऽपि ज्ञानाधिकारवान्। प्राप्नोति शाम्भवीमन्त्रान् सदा नित्यपरायणः। यथा न्यग्रोधवीजं हि क्षितौ वपुर्द्रुमायते। आदावेकस्ततोऽनेकः

p. 836) स्वभावाच्छादनादिभिः। वर्द्धतेऽहर्निशं वृक्षः पत्रपल्लवविस्तृतः। स्नेहपुष्पफलैर्वीजैर्विस्तारोऽयं स्वभावतः

। तथासौ निर्मलो नित्यो निर्विकारो निरञ्जनः। एकोऽनेकः स्वयं भूयान् साधनाद् बहुधा स्थितः। पञ्चतत्त्वमयो बुद्धिमायाहङ्कारविक्रियः। एवं बहुविधं विश्वं लोकालोकसुविस्तरम्। एकमेव न चान्वोऽस्ति यो जानाति स तत्त्ववित्। स्थावराः पर्वताद्या हि जङ्गमाः खेचरादयः। जङ्गमस्थावराकारः संसारः स्यात् स ईश्वरः। स्वभावलीलया भाति शून्येऽसौ शून्यबुद्धितः। यद्दृष्टं विषयं वस्तु तद्दृश्यमिति कथ्यते। यो दृष्टातीतः सोऽदृश्यस्तदा दृष्टं हि मन्यते। स्वतनूभेदमेवन्तु संसारं दुःखसङ्कुलम्। यत्नाद्दूरं परित्यज्य ज्ञानयोगो भवेत् सुधीः। ज्ञानसंयोग एकस्तु एकस्तु ज्ञानयोगवान्। अतो हि ज्ञानतोऽभिन्नं ज्ञेयं ज्ञानात् पृथक् पृथक्। दूरीकृत्यैवमापृथ्वी भेदवाक्येन दर्शनात् । ज्ञानयोगी भवेद् येन ज्ञानयोगस्तु चैककः। एवं ज्ञानान्महेशानि कालजित् शिवतां व्रजेत्। स्वभावभेदमेतत् शृणु देवि प्रयत्नतः। यच्छ्रुत्वा सर्वबोधः स्यात् मुक्तिदः सिद्धिवाञ्छितः। आत्मनो वा पृथिव्याद्याः स्वभावः किञ्चिदुच्यते। आत्मैव पृथिवी धात्री कोमला च क्वचिद्दृढा। क्वचिन्मनोहरा सा च विमला च मलामला। दुर्गन्धा च सुगन्धा च निर्गन्धा गन्धमोहिनी। स्वर्णरूपा धातुरूपा चित्रा रत्नमयी परा। क्वचित् श्वेता क्वचिद्रक्ता क्वचित् पीता च कृष्णला। ऊर्वरा

ऊर्वरा सा तु विषामृतमयी सदा। तथा च
देवगन्धर्वकिन्नराद्याः खगादयः। सुखसम्पिण्डितो रोगी
तथैव क्रोधशान्तधीः। अशेषरूपबलितो नानाबुद्धिरतः स्वयम्
। देवतत्त्वं भूतशक्त्या जीवसंज्ञा भ्रमात्मिका। ज्ञानयोगी
निर्विकारो निस्ताप एक ईश्वरः। आत्मैकमूर्त्तिमान् भूत्वा निर्विकल्पो

p. 837) निरञ्जनः। सुखी दुःखी मोहयुक्तोऽनन्तचेताः स्वभावतः
। स्त्रीपुंरूपी महान् सो हि परस्परविमोहितः। अमनस्कः
स्वीयभावात् ज्ञानयोगी निराकुलः। स्त्रक्चन्दनादिवामासु
स्वभावाद्भोगमिच्छुकः। सुखात्मकैः सुखस्थाय
परदुःखाय सञ्चितिः। आत्मना मनसा पद्भ्यां
पुत्त्रादिरत्नसम्पदौ। असारसारणात्तर्हि ज्ञानधीर्मनसा भवेत्।
आत्माविवेकमागम्य चलच्चित्तं महाकुलम्। विषयान्धतमो
दृष्ट्वा नो वेत्ति परमात्मनः। अमायात्मा तत्त्वातीतः
सत्सन्धानविवर्जितः। सुखी दुःखी जन्म मृत्युं याति सत्यं पुनः
पुनः। वैराग्यादिधनं त्यक्त्वा विषवद् दुःखकृद्धियः।
कोटिसूर्यसमात्मेति ज्ञानयोगाद्विमुच्यते। रवी तेजो घृतं दुग्धे
तिले तैलं स्वभावतः। शशमिन्दौ कुले शाखं क्षारे च लवणं
यथा। तथा ब्रह्मणि संसारो ह्यखण्डपरिपूर्वके। इदानीं
वाह्यलक्षाणि सिद्धिदानि श्रृणु प्रिये । धारणाख्या तु चैतानि

ज्ञातव्यानि विशेषतः। लीलया भावयेल्लीनं ज्योतिःपूर्णं महापरम्। अथवा तत्र देवेशि धूम्राकारं षडङ्गुलम्। अथवाष्टाङ्गुलं रक्तं नासिकोपरि लक्षयेत्। द्वादशाङ्गुलमानं वा पृथ्वीतत्त्वन्तु पीतभम्। लक्षयेदथवा तत्र कोटिसूर्यसमप्रभम्। तेजः पुञ्जं महाकाशं तत्तद्ध्यानाच्छिवो भवेत्। आकाशमध्ये आकाशोपरितो दृष्टिसुस्थिरम्। कृत्वा ध्यानाद्विना सूर्यं चण्डसूर्यन्तु पश्यति । अथवा लक्षमेतत्तु कर्त्तुर्वहिः शिवोपरि। ऊर्द्ध्वं सप्तदशाङ्गुल्यं प्रमाणं तेजसा प्रभम्। अथवा पृथिवीतत्त्वं तप्तकाञ्चनसन्निभम्। दृष्टिरग्रे तु कर्त्तव्यं लक्षमेतद्यतात्मनाम्। उक्तानां यस्य कस्यैव एकशः करणं प्रिये । बलीपलितहीनः स्यादौषधेन विना तथा। सर्वरोगाणि नश्यन्ति मित्रवच्च वशी रिपुः। जीवेद्वर्षसहस्रन्तु सर्वलोकेषु पूजितः। जिह्वाग्रे प्रभवेद्विद्या विना शास्त्रावलोकनात्।

p. 838) मूलकन्दोत्थतलतो ब्रह्मनाडीसमुद्भवा। श्वेतवर्णा ब्रह्मरन्ध्रपर्यन्तमेव तिष्ठति। एषा तु ब्रह्मरन्ध्राख्या तन्मध्ये वर्त्तते परा। पद्मतन्तुममाकारा कोटिसूर्यतडित्प्रभा । चलत्यूर्द्ध्वं महामूर्त्तिरस्य ध्यानाद्भवेच्छिवः। अणिमाद्यष्टसिद्धिस्तु समग्रेण प्रसीदति। ललाटोपरि वा ध्यात्वा

चन्द्रं वा ज्योतिरीश्वरम्। नाशयेत् कुष्ठरोगादीन् महायुष्मान्
शिवः परः। भ्रुवोर्मध्येऽथवा ध्यात्वा अर्कन्तु तेज ईश्वरम्।
स्थिरदृष्टौ राजपूज्यो जीवन्मुक्तः शिवो यथा।
आत्मानमात्मरूपं हि ध्यात्वा यो निष्क्रियो भवेत्।
निराशीर्यततत्त्वोऽयं इतरो न नृपस्थितिः।

इदानीं शृणु नाडीनां भेदं वक्ष्यामि सिद्धिदम्।
मेरुवाह्ये इडानाम्नी पिङ्गलया समन्विता। सुषुम्ना
भानुमार्गेण ब्रह्मद्वारावधि स्थिता। सरस्वती सुगन्धा तु
गान्धारी हस्तिजिह्वका। ज्ञातव्या कर्णयोर्मध्ये नेत्रयोश्च
तथान्तिमा। पूषा चालम्बुषा चेति मूलस्था कुत्रचित् तथा।
लिङ्गद्वारादिडामार्गे ब्रह्मस्थानावधि प्रिये । नाड्यन्तं
प्रतिलोमेषु सहस्राणां द्विसप्ततिः। इदानीं देहमध्यस्थाः
कथ्यन्ते दश वायवः। कार्यकारणभावेन कथ्यन्ते तानि
चिह्नतः। प्राणवायुर्हृदि स्थित्वा श्वासोच्छ्वासं करोति सः।
असिकान्तं पीतमीशं करोति योगसंज्ञकः। अपानो गुददेशस्थः
करोत्याकुञ्चनं स तु। स्तम्भनञ्च तथापानः समानो
नाभिमण्डले। तोषकादिपोषकन्तु नाडीनां रूचिदायकः।
दीप्ताग्निमध्येऽपि तथा समानाख्या महापरा। तादृ मध्ये
उदानस्तु अश्नाति पिबतीति च। शरीरं सकलं व्याप्य व्यानवायुः

प्रतिष्ठितः। शरीरे चालनं तेषु करोति स्थापयत्यपि। नेत्रमध्ये कूर्मनामा निमेषोन्मेषकृदयम्। उद्गारे नाग आख्यातः ऊर्द्धवायुः प्रचालने। कृकरः क्षुत्करो ज्ञेयो देवदत्तो

p. 839) विजृम्भणे। धनञ्जयः सच्चिदाकारो मृतदेहं न मुञ्चति। यद्यपि सर्गकाण्डे सर्वमेतदुक्तं तथापि कार्यकारणभावज्ञापनाय पुनर्निर्दिष्टमिति न पुनरुक्तम्।

इदानीं मध्यलक्षन्तु कथ्यते सिद्धिकारकम्। श्वेतं रक्तं तथा पीतं धूम्राकारन्तु नीलभम्। अग्निज्वालासमानाभा विद्युत्पुञ्जसमप्रभा। आदित्यमण्डलाकारमथवा चन्द्रमण्डलम्। ज्वलदाकाशतुल्यं वा भावयेद्रूपमात्मनः। एतज्ज्योतिर्मयं देहं मनोमध्ये तु लक्षयेत्। एतेषाञ्च कृते लक्षे नानादुःखं प्रणश्यति। मनसस्तु मलो याति महानन्दो भवेत्ततः। कथ्यते तु देव्यधुनाकाशं पञ्चभिर्लक्षणैः। आकाशन्तु महाकाशं पराकाशं परात्परम्। तत्त्वाकाशं सूर्यकाशमाकाशं पञ्चलक्षणम्। सवाह्याभ्यन्तरे नित्यं निराकाशन्तु निर्मलम्। कर्त्तव्यं लक्ष्माकाशं साधयेत् साधनं विना। घनान्तरालसदृशं पराकाशं तथैव च। कल्पान्ताग्निसमं ज्योतिर्महाकाशं

स्मरेत्तथा। कोटिकोटिप्रदीपाभं तत्त्वाकाशं स्मरेत्तथा। सूर्याकाशं तथा कोटिसूर्यविन्दुसमं स्मरेत्। सवाह्याभ्यन्तरे चैवमाकाशं लक्षयेत्तु यः। शिववद्विहरेद्विश्वे पापपुण्यविवर्जितः। एतेषाञ्चैव लक्षेण कर्मद्वाराऽघमाहरेत् । नवचक्रं कलाधारं द्विलक्षं व्योमपञ्चकम्। समग्रं यो न जानाति स योगी नामधारकः। षोडशाधारभेदन्तु शृणु देवि विशेषतः। अङ्गुष्ठपादयोस्तेजः सलक्षस्थिरदृष्टिमान्। पादाङ्गुष्ठे य आधारः प्रथमो योगतत्त्वतः। द्वितीयं पादमूलन्तु पादमूलपरं स वै। पादस्य पार्ष्णी संस्थाप्य बलवान् प्रभवेन्मुनिः। पादमूलेऽथवा पादाङ्गुष्ठमूलं विधारयेत्। तृतीयन्तु गुदाधारो गुदसङ्कोचनक्रिया। विकाशाकुञ्चनं तस्य स्थिरवायौ च मृत्युजित्। लिङ्गाधारं चतुर्थन्तु लिङ्गसङ्कोचनन्तु च। लिङ्गसङ्कोचनाभ्यासात्

p. 840) पश्चिमादण्डमध्यगः। वज्रनाडीति तन्मध्ये पुनरभ्यसयं स्तथा। सञ्चारो वायुमनसोरतिसञ्चार इति त्रिधा। ग्रन्थित्रयविभेदस्तु तद्भेदो ब्रह्ममार्गतः। ब्रह्मपद्मो वायुपूर्णो भूत्वा तिष्ठति योगिराट्। वीर्यस्तम्भो भवेत्तेन साधयेत्तु सदा युवा। मूलाधारे ब्रह्मपद्मे षट्पद्मे च तथा तथा। पञ्चमं जठराधारं तदा बन्धयति क्रमात्। मृत्युना

भङ्गसिद्धोऽयं मृत्योरेव क्षयङ्करः। अनेन
पश्चिमादूर्द्धं वायुः कुर्याद्विशालधीः। बन्धोऽयं
बुद्धिमनसोः पञ्चमाधारकालजित्। नाभ्याधारो भवेत्
षष्ठस्तत्र प्राणं समभ्यसेत्। स्वयमुत्पद्यते नादो नादतो
मुक्तिदन्ततः। सप्तमो हृदयाधारस्तस्मिन् वायुनिबन्धनात्।
ऊर्द्धक्राणि पद्मानि विकसन्ति महान् भवेत्।
कण्ठाधारोऽष्टमस्तत्र कण्ठसङ्कोचलक्षणः। जालन्धराख्यो
बन्धः स्यात्तस्मिन् सति मरुद्दृढः। नवमो घण्टिकाधारस्तत्र
जिह्वाग्रमग्रतः। सम्पिवत्यमृतं तस्माद् योगजिन्मृत्युजित्परः।
दशमस्ताद्द काधारस्तत्र जिह्वाग्रतः कृते। चलने दोहने चैव जिह्वा
जडति लम्बिता। नासिकाप्राप्तजिह्वेयं ताद्द लग्ना भवेत्ततः।
एकादशी भवेज्जिह्वा तलजाधार ईश्वरि । जिह्वाग्रमथने तस्मिन्
पानीयं मधुरं भवेत्। तत्पीतेषु कविर्गीतिज्योतिश्छन्दोविदां
वरः। दन्ताधारो द्वादशेति सर्वरोगक्षयङ्करः।
धारयेद्दन्तयोर्मध्ये जिह्वाग्रञ्च बलादपि।
धृत्वार्द्धघटिकामात्रं सर्वरोगन्तु नाशयेत्। नासाधारस्ततो
ज्ञेयो नासालक्षस्त्रयोदशः। मनःस्थिरकरो यस्तु वायुस्थिरकरो
महान्। नासापुटे स्थिरा दृष्टिराधारोऽयं चतुर्द्दशः।
कृतेऽस्मिन् स्वीयतेजः स्यात् प्रत्यक्षं षड्मिासतः। पार्थिवं
त्रुटति क्षिप्रं प्रत्यक्षं स्वीयतेजसा। पञ्चदशो भ्रुवोर्मध्ये

स्थिरदृष्टिस्तथा ध्रुवम्। अस्मिन् दृष्टिः स्थिरा कोटिः किरणानि स्फुरन्ति हि। नेत्राधारः षोडशोऽयमङ्गुल्यग्रेण चालयेत्।

p. 841) पृथ्वीमध्ये तु यत्किञ्चिद्वर्त्तते जठरानलः। प्रत्यक्षं तद्भवेत्सर्वं तदाभ्यासान्न संशयः। सर्वज्ञः प्रभवेत्तेन इति आधारषोडशः॥

इदानीं योगमष्टाङ्गं शृणु लक्षणसंयुतम्। यमश्च नियमश्चैव चासनं प्राणसंयमः। प्रत्याहारो धारणा च समाधिश्च विशेषतः। अष्टाङ्गयोग एभिस्तु चैतेषां लक्षणं शृणु। शान्तिः सन्तोष आहारो निद्राल्पा मनसो दमः। शून्यान्तःकरणश्चेति यमा इति प्रकीर्त्तिताः। चापल्यन्तु दूरे त्यक्त्वा मनःस्थैर्यं विधाय च। एकत्र मेलनं नित्यं प्राणमात्रेण सा मतिः। सदोदासीनभावस्तु सर्वत्रेच्छाविवर्जनम् । यथालाभेन सन्तुष्टः परमेश्वरमानसः। मानदानपरित्याग एते तु नियमा इति। आसनानि च तावन्ति यावन्तो जीवजन्तवः। प्राणायामस्त्रिधा चेति बहुधा प्रथमं शृणु। आसने प्राणसंयामे न शक्ताः सुकुमारकाः। महापुण्यप्रभावेण शक्यते तु महात्मना। इडां शशिप्रभां ध्यात्वा मन्देन्दुना तु पूरयेत्। पूरयित्वा यथाशक्ति ध्यानयोगी तु कुम्भयेत्।

महाज्योतिर्मनो भूत्वा वायुः पूर्णकलेवरः। शक्तित्रासन्तु

सन्त्रास्य रेचयेद्वायुमर्हितः। पिङ्गलामर्कवर्णान्तु

त्यजेद्ध्यात्वा शनैः शनैः। अयं पतङ्गः

काष्ठाग्निप्रत्यासेन पुनः पुनः। कृत्वा कलेवरं शुद्धं

कुर्याद्यत्नैर्महात्मना। मनो निवार्य संसारे विषयकार्ये

तथैव च। मनोविकारभवश्चैव त्यक्त्वा शून्यमयो भवेत्।

प्रत्यहारो भवत्येव सर्वनिन्दाचमत्कृतः। ध्यानन्तु द्विविधं

प्रोक्तं स्थूलसूक्ष्मविभेदतः। स्थूलं मन्त्रमयं विद्धि

सूक्ष्मन्तु मन्त्रवर्ज्जितम्। समाधिर्निश्चला बुद्धिः

श्वासोच्छ्वासादिवर्जितः। पिण्डब्रह्माण्डयोरैक्यं

शृण्विदानीं प्रयत्नतः। ब्रह्माण्डे सन्ति ये चाण्डाः

पिण्डमध्येऽपि ते स्थिताः। तलं पादाङ्गुष्ठतले तस्योपरि

p. 842) तलातलम्। महातलं गुल्फयोर्मध्ये गुल्फोपरि रसातलम्।

सुतलं जङ्घयोर्मध्ये वितलं जानुमध्यकम्।

ऊर्वोर्मध्येऽतलं प्रोक्तं सप्तपातालमीरितम्। तलं तलातलञ्चेति

महातलरसातलम्। सप्तपातालमेतत्तु सुतलं वितलातलम्। इदानीं

पिण्डमध्ये तु सप्तलोकं शृणु प्रिये। मूलाधारे तु भूर्लोको

लिङ्गाग्रे तु भुवस्ततः। स्वर्लोको लिङ्गमूले तु मेरुमूले महस्तथा

। मेरुच्छिद्रे जनोलोको मेरुनाड्यां तपस्तथा। कमले मर्त्त्यलोकस्तु

इति लोकः पृथक् पृथक्। भूर्भुवः स्वर्महश्चेति जनश्चैव तपस्तथा। सप्तमः सत्यलोकस्तु सप्तलोक इति स्मृतः। सप्तलोकैस्तु पातालैर्भुवनानि चतुर्दश। अथ ब्रह्माण्डमध्यस्थाश्चत्वारो लोकपालकाः। पिण्डमध्ये तु तान् ज्ञात्वा सर्वसिद्धीश्वरो भवेत्। इन्द्रो ब्रह्मा विष्णुरीशश्चत्वारश्चात्मदेवताः। मूलाधारे चतुष्पत्रे गजारूढो महानिति। सृष्टिकर्त्ता च तत्रैव स्वाधिष्ठाने महान् हरिः। मणिपूरे शूलपाणिरष्टसिद्धीश्वरो महान्। ताद्दृ द्वारे ताद्दृ मध्ये ललाटे वक्षकण्ठके। शृङ्गाटिका कपाले च लम्बिका ब्रह्मरन्ध्रके। नवचक्रमूर्द्धचक्रञ्च त्रिकूटेत्येकविंशतिः। ब्रह्माण्डानि वसन्तीति ज्ञातव्यानि प्रयत्नतः। सप्त द्वीपानि कथ्यन्तेऽधुना तानि शृणु प्रिये । जम्बूद्वीपस्तु मज्जायां शाकद्वीपस्तु मध्यमः। शाल्मद्वीपः शिरोमध्ये मांसमध्ये कुशस्तथा। त्वचि क्रौञ्चो लोममध्ये गोमयद्वीप ईरितः। नखमध्ये तथा श्वेतः सप्तद्वीपा वसुन्धरा। जम्बूः शाकस्तथा शाल्मः कुशः क्रौञ्चश्च गोमयः। श्वेतः सप्तेति खण्डानि सप्तखण्डैर्वसुन्धरा। गुप्तान्येतानि रूपाणि देहमध्ये स्थिराणि च। समुद्राः सप्त कथ्यन्ते पिण्डमध्ये व्यवस्थिताः। लवणेक्षुसुरासर्पिर्दधिदुग्धजलान्तकाः। लवणं स्वेदमध्ये तु इक्षूरक्ते मधु त्वचि। सर्पिर्मेदो वसा मध्ये दधि क्षीरं ललाटके

।

p. 843) वीर्यमध्येऽमृतो ज्ञेयः पादे कूर्मः स्थितो महान्।
इदानीन्तु नवद्वारे नव खण्डानि संशृणु। पाय्वादौ भारतं खण्डं काश्मीरं त्रिकमण्डद्द म्। द्विजखण्डमेकपादं खण्डं वक्ष्ये समण्डलम्। कैवर्त्तं गर्त्तगान्धारं नवखण्डमिति स्थितम्। इदानीं पर्वताश्चाष्टौ कथ्यन्ते शृणु यत्नतः। मेरुदण्डे सुमेरुस्तु पीठमध्ये हिमालयः। वामस्कन्धे तथा दक्षे मलयो मन्दराचलः। विन्ध्यस्तु दक्षिणे कर्णे वामे मैनाक ईश्वरि । ललाटे मध्यदेशे तु श्रीशैलः परमेश्वरि । तथा ब्रह्मकपाटस्थः कैलासः पर्वतो महान्। सुमेरुर्हिमवान् विन्ध्यो मलयो मन्दरस्तथा। श्रीशैलो मैनाकश्चेति कैलासोऽष्टौ च पर्वताः। अपरे पर्वताः सर्वे अङ्गुलीमध्यवासिनः। शरीरे नवनाडीस्था नर्मदा च महेश्वरि । इडायां यमुना देवि पिङ्गलायां सरस्वती। सुषुम्नायां वहेद्गङ्गा चान्योन्यासु च नाडिषु। गङ्गा सरस्वती गोदा नर्मदा यमुना तथा। कावेरी चन्द्रभागा च वितस्ता च इडावती। द्विसप्ततिसहस्रेषु नदीनदपरिस्रवः। इतस्ततो देहमध्ये ऋक्षश्च सप्तविंशतिः। योगाश्च राशयश्चैव ग्रहाश्च तिथयस्तथा। लहरीषु मीनमनी चावाहनं स्थापनं तथा। सर्वाङ्गेषु च देवेशि समग्रं ऋक्षमण्डलम्। त्रयस्त्रिंशत्कोटयस्तु निवसन्ति च

देवताः। तथा पीठानि सर्वाणि देहमध्ये स्थितानि च। हृदये व्योममध्ये तु अनन्ताद्यास्तु वासुकिः। उदरे व्योममध्ये तु परे नागा वसन्ति हि। गन्धर्वकिन्नराः शूरा विद्याधराप्सरादयः। अनेकतीर्थवर्णाश्च गुह्यकाश्च वसन्ति हि। अनन्तसिद्धयो बुद्ध्या प्रकाशो वर्त्तते हृदि। मेघस्य मण्डलं ज्ञेयम् अश्रुपाते तथैव च। चन्द्रार्कौ नेत्रयोर्मध्ये जङ्घा लोमसु साक्षिणः। तृणगुल्मादिकञ्चापि विश्वरूपं स्मरेत्ततः। समग्रदर्शनान्मुक्तः स्वर्गभोगञ्च मत्सुखम्।

p. 844) तदेतच्चिन्तया याति रोगशोकविवर्जितः। यत्कर्मा कर्मणा शङ्का मनोमध्ये भवेद्बहिः। तत्कर्मकरणं मुक्तिरित्याह भगवान् शिवः। यस्य दर्शनमात्रेण रोगशोकविवर्जितः। परमानन्दचित्तः स्यात्तपस्वी चैव कीर्त्तितः। सप्तद्वीपा भवेद्दृष्टा तत्त्वज्ञानं ततो भवेत्। सर्वभावं विजानीयाद् वज्रदेहो भवेत्तथा। सर्पदष्टे विषं न स्यात् क्षुधा निद्रा तृषा तथा। उष्णता शीतता चेति वाक्सिद्धिः स्यान्न संशयः। विद्युत्पातेऽपि देहस्य क्वचिद्धानिर्न जायते। ततोऽसौ वायुयोगी स्याद्दृष्ट्वा पृथ्वीकुलान्वितः। अणिमाद्यष्टसिद्धिः स्यान्महापद्मोदयस्तथा। आगच्छन्ति समीपे च निधयो नात्र संशयः। यत्रेच्छा गमनं तत्र स्वर्गे मर्त्त्यैरसातले।

स्फुरत्याज्ञाख्यः सर्वत्र समीपे परमेश्वरः। कारणे हारणे शक्तो रक्षणेऽपि च पार्वति । आत्ममध्ये मनो नित्यं निर्जने निवसेत् सुधीः। कृत्वात्ममनसोरैक्यं प्राप्नोति परमं पदम्। चन्द्रः सूर्यः स्थिरो यावत् तावद्देहस्थितिस्तथा। तावदेकं समाभाष्य प्राप्नोति च सदागतिः। स भवेत् कविता धीरा निश्चला शान्तिरेव च। गुरुपादप्रसादेन तदैक्यं याति सिद्धिभाक्। अधुना कमलानान्तु शृणु सङ्केतमद्भुतम्। अनेकाकारभेदोत्थं कं स्वरूपन्तु निर्मलम्। कमलं तेन विख्यातं त्रिविधं तत्त्वदेहकम्। तत्राधारश्चतुष्पत्रे सत्त्वरजस्तमोदयः। एतद्भावस्थितश्चात्मा साध्वसाधुकरो भवेत्। अस्मिन् सति स्थिरे चित्ते यमो वन्दीव गच्छति। अनाहतो द्वितीयं यत्कथ्यते शृणु श्रद्धया। अनाहते महापीठे चतुरस्रसमन्वितम्। वर्त्ततेऽष्टदलं पद्ममधोवक्रन्तु सत्पुरम्। स्पर्शशब्दरूपरसगन्धा बुद्धिर्मनस्तथा। अहङ्कारः क्रमादेते तत्राष्टदलसंस्थिताः। सपर्या पृथगाकारा वर्त्तते तत्र निश्चितम्। ध्यानादात्मप्रकाशोऽस्य प्रकाशं कमलं ततः ।

p. 845) यथा सूर्यप्रकाशेन ऊर्द्ध्ववक्रं प्रकाशितम्। आत्मध्यानात् सदा तत्र आयुर्वृद्धिर्दिने दिने। शक्तिप्रसन्नता स्याच्च रोगशोकविवर्जितः। यस्य मुद्राभ्यासशाली सम्यक् सिद्धा च खेचरी। चिदानन्दमयं चित्तं चेतना चन्द्रिकान्विता।

परमात्मा महासूर्यः सूर्य एकः प्रकाशकः।
प्रकाशानन्दयोरैक्यं कर्त्तव्यञ्च निरन्तरम्। दीप्तस्तथा
महाज्योतीरविर्भाति परं पदम्। सदोदितं मनःसूर्यं
चन्द्रज्योतिरिवेक्षते। तन्मध्ये नाभिकर्तेति करणं ना कुलाकुलम्।
अव्यक्तन्तु परं तत्त्वमनित्यं वर्त्तते सदा। एको नाम पुमानस्ति
तस्मात्तस्मात् परं पदम्। तस्मात्तु परमं शून्यं तस्मात्
स्यात्तु निरञ्जनम्। एते पञ्चगुणोपेताः कथ्यन्ते तद्गुणं यथा।
निर्गुणत्वं निर्मलत्वं परिपूर्णत्वमेव च। व्यापकत्वं
केवलत्वं आनन्दस्य गुणा इति। निराकारत्वनित्यत्वनिजत्वञ्च
निरञ्जनम्। निर्णिकेतनता चेति तत्पदस्येति तद्गुणाः।
लीनताशीर्णतामूर्च्छातोयमण्डलता इति। गुणाः पञ्च
समाख्याताः शून्यस्य परमस्य वै। स्वभावं सहजं सत्यं
शान्तिः शान्तिस्वरूपतः। इति। निरञ्जनगुणाः पञ्च एतज्ज्ञानी
महेश्वरः। विद्योत्पत्तिस्तदानीन्तु कथ्यते शृणु यत्नतः।
आनन्दपरमात्मेति परमानन्द एकतः।
प्रबोधपरमानन्दचित्तोत्पत्तिप्रबोधवान्। चिदुदयात् प्रकाशश्च
एषां पञ्च तथैव च। अविनाश्योऽक्षयोऽभेदोऽदाह्यो ह्यखाद्य
एव च। एते पञ्च गुणाः प्रोक्ता अनादो नादवैरिणा।
किरणस्फूर्त्तिविस्फूर्त्तिहर्षवत् परमात्मना। तेतु पञ्च प्रकारेण
गुणाः पञ्च प्रकीर्त्तिताः। विचारश्च प्रभोल्लासा विभावश्च

लयस्तथा। प्रबोधस्य गुणाः पञ्च कीर्त्त्यन्ते तेन हेतुना। अभ्यासकर्तृकमनाः सर्वतत्त्वप्रभा तथा। चिदुदयस्य पञ्चेति गुणा ज्ञेया विशेषतः। बोधनं समयत्वञ्च विस्मृतिः

p. 846) सकलप्रभा। प्रकाशस्य गुणाः पञ्चचैते ज्ञानकराः शुभाः। एतज्ज्ञाने ततश्चैषां ज्ञानमुत्पद्यते महत्। आकाशात् पवनो वायोस्तेजस्तेजस एव च। जलं जलात्तथा पृथ्वी एषां पञ्चगुणास्तथा। अगोचराद्व्यानन्तग्राह्यमेषां तथात्मनः। सञ्चारश्चालनं शेषे पञ्चधूम्राभमम्बरे। उष्मप्रकाशरक्ताभज्वालादाहस्तु तेजसा। प्रकाशादेव शैथिल्यमधुता श्वेततज्जले। स्थूलसाकारकाठिन्यगन्धं पातमृदौ तथा। महाभूतानि पञ्चेति देहमध्येऽधुना शृणु। महाभूतानि पञ्चेति पृथ्वीतेजो मरुत् खकम्। एतेषाञ्च तथा पञ्चगुणस्थानं शृणु प्रिये । अस्थि मांसं लोम नाडी त्वक् चेति पृथिवीगुणाः। क्षुधातृष्णालस्यनिद्रा ग्लानिश्च पञ्च वारिणः। रोगो लज्जा भयोद्वेगौ धारणा च मरुद्गुणाः। एतज्ज्ञानेनैव तेषां बुद्धिरुत्पद्यते शुभा। यद्यपि सर्गकाण्डे पृथ्व्यादेर्गुणा उक्तास्तथाप्येतज्ज्ञानेनेत्यनेन कार्यकारणभावदर्शनाय पुनरुच्यन्ते। मनो बुद्धिरहङ्कारश्चित्तं चैतन्यमेव च। एते पञ्चप्रकाराश्च

अन्तःकरणसम्भवाः। मननामननं ज्ञेयं बुद्ध्यादिपञ्च पञ्च तु। विवेकशान्तिसन्तोषक्षमावैराग्यतेति च। एते पञ्चगुणा बुद्धेरहङ्कारगुणान् शृणु। अहम्भावमहञ्चादियुगान्तं हिंसनं तथा। वृत्तिः स्मृतिर्मतिस्त्याज्यं निराशं चैतिका गुणाः । निःस्पृहता द्वेषताधैर्यं विमर्षचिन्तनं तथा। चित्तेर्गुणास्त्रयो जीवगुणान् शृणु महेश्वरि । आस्था श्रद्धा कृपा भक्तिः सत्यं सत्त्वगुणा इति। त्यागो भोगश्च श्रद्धा च सार्थवस्तुस्पृहा तथा। रसो पञ्चगुणाः चैते तामसस्य गुणान् शृणु। प्रमोदः स्वादकलहौ विवादो भ्रान्तिवर्द्धनम्। वञ्चनञ्च तथा शोकस्तामसस्य गुणा इमे। स्वप्नजाग्रत्सुषुप्तानि चैतन्यं जीवका गुणाः। एतादृशि सति तत्त्वं चैतन्यात्तद्भवेदिति।

p. 847) प्रकृतीच्छा क्रिया माया वचः पञ्च गुणा इति। आशा तृष्णास्पृहाकाङ्क्षामिथ्यान्तं प्रकृतेरिति। उन्मादो वासना वाञ्छा चेक्षिता च गुणाः प्रिये । शरणं सत्कुलाचारः कार्यनिश्चय उच्यते। इदं योगरहस्यञ्च न वाच्यं मूर्खसन्निधौ॥

योगदेशस्तु तत्रैव॥ उत्पातरहिते देशे कण्टकादिविवर्जिते। अभ्यस्यते सदा योगः समः स्यात् सुखदुःखयोः। सुराजनि

समाश्रित्य कर्त्तव्यो निरुपद्रवे। देशे तु सर्वशस्याढ्ये लोभमोहविवर्जिते। स्तुतिर्निन्दा न कर्त्तव्या साधुना सत्यवादिना॥ योगानधिकारिणमाह तत्रैव॥ मनोमध्ये दया नास्ति सदा यः कलहप्रियः। स्वकार्यलोभने शीलो गुरुकार्यपराङ्मुखः। एतस्मै च न दातव्यं वक्तव्यं तस्य सन्निधौ। नञुभयत्र सम्बध्यते न वक्तव्यमित्यर्थः। योगाधिकारिणोऽपि तत्रैव॥ भावाभावविनिर्मुक्तः सर्वग्रहविवर्जितः। सदानन्दमयो योगी सदाभ्यासी सदा भवेत्। विरुद्धे दुःखदेशे च विरूपेऽतिभयानके। एतदनिष्टसंस्पर्शे न्यूनाधिके बलाधिके। एवम्भूतस्य कर्माणि सङ्कल्परहितानि च। एवं गच्छन् स्वपन् पश्यन् पापपुण्यैर्न लिप्यते। उत्पन्नतत्त्वबोधः स्यात् सदा शीलस्य सर्वदा। परे दृष्टिविलं न स्याद् विविधानि मृतानि च। अन्तःकरणमेतस्ययोगिनो निष्क्रियं तु स। सर्वदा सहजस्तस्य निष्कलाध्यात्मवादिनः। यदा प्रयत्ननिष्पाद्यं ग्राह्यं सर्वमकारणम्। यस्य चित्ते हठं नास्ति सहजानन्दनिर्भरम्। कर्त्तव्या च स्थिरा दृष्टिस्तेनैव परमं स्थिरम्। मनः स्थिरञ्च तेनैव कर्त्तव्यं तत्परं पदम्। इदानीं योगमाहात्म्यं कथ्यते यद्बवेत्ततः। गुरोरनुग्रहाच्छास्त्रपाठादाचारतस्तथा। वेदान्तार्थरहस्यार्थसर्वज्ञानादुपासनात्। आसनाद्धारणाद्ध्यानाल्लयषट्कर्मसाधनात्।

आसनाच्चतुरशीतिवैराग्यत्यागसम्भवात्।

p. 848) हठयोगाद्वरौषध्यात् मुद्रासाधनमानतः।
वनवासाद्बहुक्लेशात्तथा मन्त्रादिसाधनात्।
बहुदानतपस्तीर्थसेवनाद् दानशिक्षणात्। सन्ध्यात्रयग्रहेणाथ
षडदर्शग्रहणात्तथा। शिरोम्ण्डगतो न्यासाद् योगतत्त्वञ्च
विद्यते। गुरुपादोदकं शिष्टसेविना सत्यवादिना।
कन्यास्त्र्यादिदृष्टिपातहर्षगतिविवर्त्तनात्। प्रसादात् सद्गुरोः सम्यक्
प्राप्नोति परमं पदम्। न गुरोरधिकं तत्त्वं यत्तस्मात् परमं
पदम्। निमेषार्द्धेन तस्यैव आज्ञापालनतो भवेत्।
महानन्दशतप्राप्तिस्तस्मै श्रीगुरवे नमः।
नानाविकल्पविभ्रान्तिनाशञ्च कुरुते तु यः। सद्गुरुः स तु विज्ञेयो
न तु वैरप्रकल्पकः। अत एव महेशानि सद्गुरुः शिव आदितः।
सत्यवादी च सच्छीलो गुरुभक्तो दृढव्रतः। स्वल्पाचाररतात्मा यो
दानादिशीलसंयुतः। कापट्यलोभविन्यासौ
महावंशसमुद्भवः। ईदृशः सद्गुरुस्तस्य सङ्गतौ यत्नवान्
भवेत्। तदेव मनसः शान्तिं प्राप्नोति परमं पदम्॥

दत्तात्रेयसंहितायां प्रथमाध्यये तु॥ योगो हि बहुधा
ब्रह्मन् तत्सर्वम् कथयामि ते। मन्त्रयोगो लयश्चैव

हठयोगस्तथैव च। राजयोगश्च सर्वेषां योगानामुत्तमः स्मृतः॥ इति योगभेदः॥

आरम्भश्च घटश्चैव तथा परिचयः स्मृतः।
निष्पत्तिश्चेत्यवस्था च चतुर्द्धा परिकीर्त्तिता। इति योगावस्था।
एतेषां विस्तरंवक्ष्ये इत्थं श्रोतुमिहेच्छसि। अङ्गेषु मातृकान्यासपूर्वं मन्त्रं जपन् सुधीः। एवञ्च मन्त्रसिद्धिः स्यान्मन्त्रयोगः स उच्यते। मृदुस्तत्राधिकारी स्याद्द्वादशाब्दैस्तु साधनात्। प्रायेण लभते ज्ञानं सिद्धिश्चैवाणिमादिका। अल्पबुद्धिरयं योगः सेवते साधकाधमः। मन्त्रयोगश्च यः प्रोक्तो योगानामधमः स्मृतः॥ इति मन्त्रयोगः॥
लययोगश्चित्तयोगात् सङ्केतैश्च प्रजायते। आदिनाथेन सङ्केतानन्तकोटिः प्रकीर्त्तिता।

साङ्कृतिरुवाच।

भगवन्नादिनाथस्य कोऽयं रूपः स उच्यताम्॥

दत्तात्रेय उवाच॥

देवदेवस्य नामेदं आदिनाथश्च भैरवः। स्वशरीरैश्च देवोऽयं लीलया च विरिञ्चिभः। श्रीकण्ठपर्वते गौर्या सह प्रथमनायकः। महेन्द्रपर्वते चैव कदलीवनगोचरे। गिरिकूटे चित्रकूटे सपादनियुते गिरौ। कृपयैकैकसंयुक्तं शवरेभ्येऽपि दत्तवान्। तानि सर्वाणि वक्तुं हि न शक्नोमि तु विस्तरात्। कानिचित् कथयिष्यामि सहजाभ्यासतः सुखम्। तिष्ठन् गच्छन् स्वपन् भुञ्जन् शून्यं ध्यायेदहर्निशम्। अयमेको हि सङ्केत आदिनाथेन भाषितः। नासाग्रदृष्टिमात्रेण परमः परिकीर्त्तितः। शिवः पद्मे तु भर्गस्य ध्यानं मृत्युञ्जयः परः। हुँ। भ्रूमध्ये दृष्टिमात्रेण परः सङ्केत उच्यते। विभूतिलेपलाभोऽपि उत्तमः परिकीर्त्तितः। स्वस्य दक्षिणपादस्याङ्गुष्ठेन लयमुत्तमम्। उत्तमः शरवद्भूमौ शयनञ्चोक्तमुत्तमम्। शिथिले निर्जने देशे कुर्याच्चेत् सिद्धिमाप्नुयात्। एवञ्च बहुसङ्केतान् कथयामास शङ्करः। सङ्केतैर्बहुभिः पुण्यैर्यस्य चित्तं लयं गतम्। स एव लययोगः स्याद् हठयोगं ततः शृणु। इति॥ अत्र सर्वयोगोत्तमत्वेनादौ हठयोग उक्तः। मन्त्रयोगस्तु साधनरूपतया योगप्रकरणेन लिखित इति। शिवागमे पञ्चमपटले॥

अथातः सम्प्रवक्ष्यामि कालपूरुषलक्षणम्। येत

विज्ञानमात्रेण त्रिकालज्ञो भवेन्नरः। कालोदरस्थितश्चापि येनोपायेन लक्ष्यते। तद्वदामि समासेन यथोद्दिष्टं शिवागमे। एकान्ते निर्जने गत्वा कृत्वादित्यन्तु पृष्ठतः। निरीक्षेत्तु निजां छायां कण्ठदेशे समाहितः। ततश्चाकाशं वीक्षेत तत्र पश्यति शङ्करम्। ॐ ह्रीं परमात्मने नमः। अष्टोत्तरशतं जप्त्वा ततः पश्यति शङ्करम्। शुद्धस्फटिकसङ्काशं नानारूपधरं हरम्। षण्मासाभ्यासयोगेन भूधराणां पतिर्भवेत्। वर्षद्वयेन हे नाथ कर्त्ता हर्त्ता स्वयं प्रभुः।

p. 850) त्रिलोकत्वमवाप्नोति परमानन्ददायकम्। सन्तताभ्यासयोगेन नास्ति किञ्चित् सुदुर्लभम्। तद्रूपं कृष्णवर्णञ्च यः पश्येद्व्योम्नि निर्मले। षण्मासान्मृत्युमाप्नोति स योगी नात्र संशयः। पीते व्याधिस्तथा रक्ते नीले हत्यां विनिर्दिशेत्। नानावर्णस्वरूपेऽस्मिन्नुद्वेगो जायते महान्। पादगुल्फोदराणाञ्च विनाशो मृत्युमादिशेत्। अर्द्धवर्षेण वर्षेण क्रमाद्वर्षद्वयेन च। विनष्टे दक्षिणे बाहौ स्वबन्धुर्म्रियते ध्रुवम्। वामबाहौ तथा भार्या विनश्यति न संशयः। शिरोदक्षिणबाहूनां विनाशे मृत्युमादिशेत्। अशिरोमासमरणं विना जङ्घे दिनैर्नरः। अष्टाभिः

स्कन्धनाशे तु शरीरार्द्धे तु तत्क्षणात्। योगार्णवे॥ प्रातः पृठगते रवावनिमिषं छायां गते स्वां चिरं दृष्ट्वोर्द्ध्वं नयनेन यं सितनरं छायानरं पश्यति। तत्कर्णांसकरास्यपार्श्वहृदयाभावे क्षणेऽर्काश्वदिक् भूवाणाक्षिसमाः शिरोविगमतो मासांस्त्वसौ जीवति।

ज्ञानसारे द्वितीयाध्याये॥ रसनामर्द्धगां कृत्वा कलार्द्धं योऽवतिष्ठते। क्षणेन मुच्यते देवि व्याधिमृत्युजरादिभिः। रसना त्वन्तरे नित्यं यावद्ब्रह्मविलं गता। अमृतं रसनाग्रेण पीयमानं विचिन्तयेत्। मासार्द्धं जीयते मृत्युः सत्यं सत्यं हि पार्वति । सर्वव्याधिविनिर्मुक्तो योगीन्द्रो नात्र संशयः। रसनाताद्द मूले च वायुं पीत्वा शनैः शनैः। षण्मासाभ्यन्तरे देवि महायोगी भविष्यति। रसनास्वादसम्भेदं विशेषं श्रृणु पार्वति क्षीरेण नश्यति व्याधिः कटुकण्डुविनाशनम्। सुस्वादेन महादेवि बालपापविनाशनम्। घृतस्वादनमात्रेण अमरत्वं लभेन्नरः। मधुस्वादरसाच्चैव शास्त्रमुद्गिरते स तु। मिष्टान्नखण्डखाद्यानि लड्डूकस्वादवर्त्तिनि।

p. 851) एवमादीन्यनेकानि कामधेनुरुपस्थिता। दिव्यकन्यां

रमेन्नित्यमाकृष्टिर्जायते सदा। अणिमादिगुणोपेत ऊर्द्धरेताः प्रजायते। हिक्कां दद्यात् सदा वक्रे घ्राणञ्चैव विजृम्भते। एवमभ्यासयोगेन कामदेवो द्वितीयकः। योगिनीगणमासाद्य सृष्टिसंहारकारकः। न क्षुधा न तृषा निद्रालस्यं देवि प्रजायते। भवेच्च स्वर्गगामीव सर्वदोषविवर्जितः॥

इति श्रीप्राणतोषिण्यां षष्ठे ज्ञानकाण्डे राजयोगरूपपल्लवकथनं नाम तृतीयः परिच्छेदः॥

योगज्ञानार्थं क्षुद्रब्रह्माण्डत्वेन शरीरमुक्तम्। निर्वाणतन्त्रे दशमपटले यथा॥ कथितं वाह्यदेशस्य ब्रह्माण्डस्य तु लक्षणम्। तन्मध्ये वर्त्तते साक्षाद्भुवनानि चतुर्दश। तदेव विग्रहं देवि महाब्रह्माण्डमध्यगम्। एवं बहुविधं देवि तत्र ब्रह्माण्डके स्थितम्। वृहद्ब्रह्माण्डे ये सर्वे तेऽपि यस्य शरीरिणः। पृथिव्यां तेऽपि वर्त्तन्ते जन्तोराकारविग्रहाः महाब्रह्माण्डमध्ये तु वृहद्ब्रह्माण्डमेव च। तन्मध्ये जन्तवो देवि तन्मध्ये भुवनानि च। दृष्टिमात्रेण भेदोऽस्ति स्थूलसूक्ष्मादि भेदतः। महाब्रह्माण्डके यद्यत् प्रकारं परमेश्वरि तत्तत्सर्वं हि देवेशि वृहद्ब्रह्माण्डमध्यतः॥ चतुर्थपटले॥ श्रृणु देवि

प्रवक्ष्यामि वृहद्ब्रह्माण्डलक्षणम्। मेरुः पर्वतमध्ये च सर्वदेवाश्रयः प्रिये । महाधीरा नदी तत्र मध्यदेशे तु सा स्थिता। सुमेरोश्चोर्द्धदेशे च सत्यलोको वरानने । अधोभागे महेशानि प्रतिष्ठति रसातलम्। एवं क्रमे मेरुमध्ये भुवनानि चतुर्दश। पातालसप्तकस्योर्द्धे ब्रह्मपद्मं महेश्वरि । आधारचक्रं तत् पद्मं धरामध्ये चतुर्दलम्। पद्ममध्ये वीजकोशे क्षितिचक्रं मनोहरम्। बलयाकाररूपेण समुद्राः सप्त संस्थिताः। जम्बूद्वीपं मध्यदेशे चतुष्कोणं मनोहरम्।

p. 852) त्रिकोणं मदनागारं कन्दर्पश्चाधिदेवता। इन्द्ररूपं हि लंबीजं गजेन्द्रवाहनं शिवे । त्रिकोणे मदनागारे लिङ्गरूपी महेश्वरः। मायाशक्तिर्महेशानि भुजगाकाररूपिणी। तयैव वेष्टितं लिङ्गं सार्द्धत्रिबलयाकृति। लिङ्गच्छिद्रं स्ववक्रेण समाच्छाद्य सदा स्थितम्। इन्द्रवीजं वरारोहे लिङ्गस्य वामदेशके। सुसिद्धं ब्रह्मसदनं नादोपरि सुसुन्दरम्। तत्रैव निवसेद् ब्रह्मा सृष्टिकर्त्ता प्रजापतिः। वामभागे च सावित्री वेदमाता सुरेश्वरी। तस्याः प्रसादमासाद्य सृष्टिं वितनुते सदा। यद्रूपं ब्रह्मसदनं लक्षयोजनविस्तृतम् तत् सर्वं परमेशानि ऋग्वेदाख्या मयोदितम्। त्रिकोणं परमेशानि द्विषष्टिकुण्डलाहिवत्। तदेव पर्वतं

प्रोक्तं सर्वदेवाश्रयं हि तत्। त्रिकोणमध्ये तद्वाह्ये पश्यापूर्वं वरानने । स्थावरं पर्वतं पश्य कीटं पशुमनुत्तमम्। खगं नगादिकं देवि नास्ति किं पृथिवीतले। त्रिकोणवाह्ये गिरिजे पर्वतं बहुरूपकम्। नीलाचलं मन्दराख्यं पर्वतं चन्द्रशेखरं। हिमालयं सुवेलञ्च मलयं भस्मपर्वतम्। चतुष्कोणे वसेद्देवि एतत् सप्तकुलाचलम्। तृणगुल्मलतादीनि नानारूपाणि तत्र वै। जायन्ते च म्रियन्ते च पूर्वोक्तेनैव वर्त्मना॥ इति मूलाधारकथनम्॥

पञ्चमपटले॥

शिव उवाच॥

एतत् पद्मस्योर्द्धदेशे भीमाख्यं पङ्कजं शुभम्। पत्रषट्कं तथा वृत्तं चतुर्द्वारविभूषितम्। पद्ममध्ये वीजकोषे भुवोलोकं मनोहरम्। सिन्दूरसदृशं रक्तवर्णेन भूषितं तदा। तस्योर्द्धे निवसेद्विष्णुः श्रीवाण्यौ वामदक्षिणे । ब्रह्मणा सृज्यते लोकः पाल्यते चक्रपाणिना। वैकुण्ठं नाम तत् स्वर्गं नानादेवालयं हि तत्। वैकुण्ठस्य दक्षभागे गोलोकं सर्वमोहनम्। तत्रैव राधिका देवी द्विभुजो मुरलीधरः।

नारदाद्यैः सुरगणैः शोभितं वेदपारगैः।
वैकुण्ठसदृशं स्थानं नास्ति ज्ञाने च मामके। अग्रे मध्ये
तथा वामे ज्योतिषां परिपश्यति। नानाभोगयुताः सर्वे
नानारत्नोपशोभिताः। इन्द्राद्या देवताः सर्वा यथा सर्वं
प्रपश्यति। तथैव भूमिगाः सर्वे तिष्ठन्ति स्तुतिहेतवे।
महातत्त्वमयं लोकं वेदबाहुविराजितम्। पीताम्बरं
शान्तमूर्त्तिं वनमालाविराजितम्। एवं सर्वं भक्तजनं
वैकुण्ठे चोपशोभितम्। विष्णुशब्दं विष्णुगणं वैष्णवं
विष्णुरूपकम्। विष्णुनाम विना नास्ति वैकुण्ठे परमेश्वरि ।
यद्रूपं गोलकं धामं तद्रूपं नास्ति मामके। ज्ञाने वा
चक्षुषोः किं वा ध्यानयोगेन विद्यते। शुद्धतत्त्वमयं देवि
नानादेवेन शोभितम्। मध्यदेशे गोलकाख्यं
श्रीविष्णोर्लोभमन्दिरम्। श्रीविष्णोः सत्त्वरूपस्य यत् स्थलं
चित्तमोहनम्। तस्य स्थानस्य महात्म्यं किं मया कथ्यतेऽधुना
। तत्रैव सततं भाति द्विभुजो मुरलीधरः। तदा सत्त्वमयो
विष्णुर्भुवनं पाति निश्चितम्। वैष्णवस्य महामोक्षो यत्रैव
परमेश्वरि । इति स्थानस्य माहात्म्यं संक्षेपेण मयोदितम्।
विस्तारेण न शक्नोमि जन्मान्तरशतेन च। वीजकोषस्य वाह्ये तु
वेष्टितं तोयमण्डलम्। प्रमाणं सुन्दरं तोयं यथा
क्षीरोदसागरम्। धूम्रस्य ज्योतिषाकारं कोटिचन्द्रसमप्रभम्।

बलयाकाररूपेण सुशुभ्रं तोयमण्डलम्। गङ्गादिसरितः सर्वास्तथैव भान्ति सुन्दरि । इन्द्रादिदेवताः सर्वाः स्तूयमाना निरन्तरम्। गन्धर्वयक्षनागादिकुष्माण्डा भैरवास्तथा। नानासुखविलासेन सदा चैकाग्रचेतसः। विष्णुगानं प्रकुर्वन्ति स्तुतिभक्तिपरायणाः। वेदगानं प्रकुर्वन्ति चतुर्वक्त्रेण वेधसा। मालवाद्याश्च षड्रागाः षट्त्रिंशद्रागिणी तथा। वेदगाने च भावन्तो मूर्त्तिमन्तः सदैव हि। मालवेनैव रागेण सामगानं सदा प्रिये । मल्लारेण सदा पूर्वं वसन्तेन तथा पुनः। हिल्लोलेन यजुः पाठं सदा कुर्वन्ति वेधसा। कर्णाटेनैव ऋग्वेदं श्रीरागेण तथा शिवे । निर्दिष्टपाठमेतत्तु अनिर्दिष्टमतः परम्। अत्रैव सन्ति ते रागाः सहस्राणि च षोडश। मुरारेर्मुलरीगानात् सर्वस्तालः प्रजायते। तेन तालेन रागेण सदा गायन्ति वेधसा। तद्रागस्य विभागं हि कुर्वन्ति मुनयो जनाः वसन्ताद्याश्च ऋतवस्तिष्ठन्ति तत्र सन्ततम्। नानाऋतुप्रसूनेन भूषितं मुरलीधरम्। तत्रैव राधिका देव नानासुखविलासिनी। वदन्ती मुरलीगानं कुरु कान्त प्रमोहणम्। येन शब्देन कामस्य उत्पत्तिर्जायते सदा। तद्रागञ्चैव तत्तालं कुरु गानं प्रयत्नतः। एवमानन्दसंयुक्ता महावेशविलासिनी। वामभागे सदा भाति राधिका भक्तवत्सला। तथा। आदौ राधां ततः कृष्णं जपन्ति ये च मानवाः। सद्गतिं चैव तेषां हि दास्यामि नात्र संशयः

। गुरुणा भावमार्गेण मन्त्रमार्गेण चैव हि। ये जना मां भजन्त्येव ते नरा मत्समाः सदा। या नारी मामभेदेन भजते पुरुषं तथा। तत्समाना च सा नारी जायते नात्र संशयः। भक्त्या वाप्यथवाऽ।भक्त्या जपन्ति युगलं यदि तव भक्त्या प्रदास्यामि मद्गतिं श्रृणु राधिके ॥ इति स्वाधिष्ठानकथनम्॥

षष्ठपटले॥ एतत्पद्मस्योर्द्धदेशे महापद्मं सुदुर्लभम्। दशपत्रं नीलवर्णं सहजं घोररूपकम्। डादिफान्तैः सचन्द्रैश्च पङ्कजञ्चातिशोभनम्॥ तन्मध्ये वीजकोषे निवसति सततं वह्निवीजं सुसिद्धम् वाह्ये तत् त्रैपुराख्यं नवतपननिभं स्वस्तिकं तत्त्रिभागे॥ स्वर्लोकाख्यमिदं देवि सर्वदेवप्रपूजितम्। साकारं वह्निवीजञ्च सदैव मेषवाहनम्। रुद्रालयं हि तत्रैव महामोहस्य नाशनम्। भद्रकाली महाविद्या वामभागे सुशोभिता। भद्रकाली महाविद्या सदा संहारकारिणी।

p. 855) ब्रह्मणा सृज्यते लोकः पाल्यते विष्णुरूपिणा। परो देवो रुद्ररूपः सदा संहारकारकः। संहरेद्रुद्ररूपस्तु भद्रकालिकया सह। रुद्रस्य भाषणाद्देवि किं न सिध्यति भूतले । यद्रूपं कथितं पूर्वं गोलोकं सर्वमोहनम्। तस्माद्वै

सर्वतोभावे रुद्रलोकं चतुर्गुणम्। महामोक्षप्रदं नित्यं रुद्रं भस्माङ्गभूषणम्। भ्द्रकाली महाविद्या रुद्रस्य वामदेशके। ततः कालीं महाविद्यां सदैव मुरलीधरः। आराध्य वहुयत्नेन वैकुण्ठाधिपतिर्भवेत्। गोलोकाधिपतिर्देवि स्तुतिभक्तिपरायणः। कालीपादप्रसादेन स भवेल्लोकपालकः। लोकानां रक्षनार्थाय सस्त्रीको मुरलीधरः। समाराध्य भद्रकालीं गोलोके निवसेत् सदा। प्रसादं कालिकायाश्च विष्णुना भुज्यते सदा। अतश्च पालको विष्णुर्महासत्त्वपरायणः॥ इति मणिपूरकथनम्॥

सप्तमपटले॥ एतत्पद्मस्योर्द्धदेशे विमलं पद्ममुत्तमम् । शोभितं द्वादशिः पत्रैः शोणबन्धूकसन्निभम्। वाञ्छन्ति रिक्तफलदं सिद्धिसिन्दूरसोदरम्। पद्ममध्ये वीजकोषे षड्कोणमण्डलं शुभम्। मण्डलस्य मध्यदेशे वायुवीजं मनोहरम्। सवीजं वायुवीजेन वेदबाहुविराजितम्। लोकत्रयस्य ईशानमीश्वरं सर्वपूजितम्। या विद्या भुवनेशानी त्रिषु लोकेषु पूजिता। ईश्वरस्य वामभागे सा देवी परितिष्ठति। महर्ल्लोकमिदं भद्रे पूजास्थानं सुरेश्वरि ॥ तत्रैव मानसं योगं कुरुते योगविद्वरः। सिन्दूरारक्तचार्वङ्गी स्फाटिकैर्निर्मिता यतः। अतश्च मानवाः सर्वे ज्योतिषं परिपश्यति। सर्वावयवसंयुक्ता

देवास्तिष्ठन्ति सन्ततम्। भूमिगाः परिपश्यन्ति चक्राकारं हि तैजसम्। स्वर्लोकगामिनः सर्वे परिपश्यन्ति साकृतिम्। अङ्गभेदं न पश्यन्ति स्थूलरूपनिरीक्षणम्। यथैव भूमिगा लोकाः प्रसरन्ति महीतले। तथैव देवताः सर्वाः स्वर्गे तिष्ठन्ति पार्वति ।

p. 856) भूर्लोके निवसेद्ब्रह्मा भुवोलोके जनार्द्दनः। स्वर्लोके निवसेच्छम्भुः सदा संहारकारकः। ब्रह्मादीनाञ्च ईशानः सर्वकर्त्ता च ईश्वरः। सर्वस्वामिस्वरूपश्च सर्वकर्ता च ईश्वरः । गोलोकं कथितं देवि यद्रूपं शोभितं सदा। तस्माच्छतगुणं देवि महर्लोकं सुसुन्दरम्। विस्तीर्णञ्च शतगुणं सर्वं शतगुणं शिवे । महर्लोकस्य माहात्म्यं किं वक्तुं शक्यते मया। महर्लोके वसेद्यो हि सामान्यभावतत्परः। तस्मादेव शतैकाशं गोलोके मुरलीधरम्। तदाज्ञां प्राप्य सहसा सृज्यते पद्मयोनिना। तदाज्ञया पाति लोकान् द्विभुजो मुरलीधरः। एवं हि रुद्ररूपेण संहरत्यखिलं जगत्। सर्वकर्त्ता यतो देवो ह्यत एव महेश्वरि । ईश्वरः सर्वकर्त्ता च निर्गुणश्चाचलः शिवः। भुवनेशीं समासाद्य सर्वस्वामी च ईश्वरः। अत एव महेशानि स एव मोक्षदायकः। विश्वमाता च सा देवी विश्वपालनकारिणी। मोक्षदा सर्वलोकानां मुक्तिदा विश्वमातृका। भुवनेशीं विना

ईशः किञ्चित् कर्तुं न शक्यते। अत एव हि सा देवी मोक्षदा सर्वरूपिणी। इत्यनाहतकथनम्।

अष्टमपटले॥

शङ्कर उवाच।

अस्योर्द्ध्वे निर्मलं पद्मं सर्वमोहनकारणम्। षोडशैः पत्रकैर्युक्तं मोहान्धाकारनाशनम्। धूममध्ये यथा वह्निस्तथा ज्योतिर्मयं प्रिये । पद्ममध्ये वराटे च जनोलोकं सुसुन्दरम्। महामोहान्धशमनं तद्बाह्ये चन्द्रमण्डलम्। देववृन्दैर्गाथकैश्च मुनिभिः परिशोभितम्। गोलोकस्य लक्षगुणमिदं स्थानं सुदुर्लभम्। दैर्घ्येण च मयोक्तञ्च विस्तीर्णञ्च तथा पुनः। सर्वं लक्षगुणं देवि गोलोकान्नात्र संशयः। वीजकोषे मणिद्वीपे षट्कोणं यन्त्रमुत्तमम्। यन्त्रमध्ये च वृषभं महासिंहार्द्धदेहकम्।

p. 857) तस्योपरि महागौरी दक्षभागे सदाशिवः। त्रिनेत्रं पञ्चवक्त्रश्च प्रतिवक्त्रे त्रिलोचनः। विभूतिभूषिताङ्गश्च रजताद्रिसहोदरः। व्याघ्रचर्मधरो देवोऽणिमादिभिर्विभूषितः।

लोकानामिष्टदाता च लोकानां भयनाशनः। लोकानां भुक्तिजनको लोकानां मुक्तिदायकः। सदानन्दकरो देवश्चार्द्धनारीश्वरो विभुः। क्वचित् ज्योतिर्मयो देवः क्वचिदाकारवर्जितः। देवानां पूज्यरूपश्च देवानां स्वामिरूपकः। भक्तस्य मुक्तिदो नित्यं विष्णुत्वदायकः प्रभुः। विल्वपत्रैः पूजकस्य निजसायुज्यदायकः। गोलोकाधिपतिं कृत्वा भक्तं रक्षति यः शिवः। तस्य देवस्य माहात्म्यं विस्तारेण च चण्डिके । या गौरी लोकमाता च ब्रह्मार्द्धाङ्गस्वरूपिणी। त्रिगुणा सा महादेवी गुणैकेन पिनाकधृक्। तस्याः सङ्गं समासाद्य सर्वकर्ता सदाशिवः॥ इति विशुद्धस्थानकथनम्॥

नवमपटले॥

शङ्कर उवाच॥

एतत् पद्मस्योर्द्धदेशे ज्ञानपद्मं सुदुर्लभम्। पद्मद्वयसमायुक्तं पूर्णचन्द्रस्य मण्डलम्। पद्ममध्ये वीजकोषे स्मरेच्चिन्तामणेः पुरीम्। तन्मध्ये नवकोणञ्च यन्त्रं परमदुर्लभम्। शम्भुवीजं हि तन्मध्ये साकारं हंसरूपकम्। हंसः परं ब्रह्मरूपः साकारः शिवरूपकः

। तारचञ्चूर्वरारोहे निर्गमागमपक्षवान्।
शिवशक्तिपदद्वन्द्वं विन्दुत्रयविलोचनम्। विहारश्चास्य हंसस्य हेमपङ्कजपूजिते। एवं हंसो मणिद्वीपे तस्य क्रोडे परः शिवः। वामभागे सिद्धकाली सदानन्दस्वरूपिणी। तस्याः प्रसादमासाद्य सर्वकर्त्ता महेश्वरः। तपोलोकमिदं भद्रे सर्वलोकस्य दुर्लभम्। यत्र ब्रह्मादयो देवा ध्यानं कुर्वन्ति सर्वदा। मनसापि न लभ्येत योगेन तपसा न च। तपोलोकं गोलोकस्य चतुर्लक्षणं शिवे । ब्रह्मलोकेषु ये देवा वैकुण्ठे ये सुरादयः। शम्भुलोके वसेद् यो हि ते च भक्तिपरायणः।

p. 858) तपसापि न लभ्येत तपोलोकगतिः शिवे । तपोलोकसमो नास्ति लोकमध्ये सुलोचने । सालोक्यं हि महर्लोके सारूप्यं जनलोकके। सायुज्यं च तपोलोके निर्वाणं हि तदूर्द्धके। ततो ब्रह्मादयो देवास्तपोलोकार्थिनः सदा। इति ते कथितं कान्ते क्रमषट्कस्य लक्षणम्। यज्ज्ञानादमरत्वञ्च जीवन्मुक्तश्च साधकः। यज्ज्ञात्वा जननीगर्भं न विशेत्तु कदाचन॥ इति ज्ञानस्थानकथनम्॥

दशमपटले॥

शङ्कर उवाच।

ज्ञानपद्मस्योर्द्धदेशे सहस्रदलपङ्कजम्। अधोवक्त्रं महापद्मं सुमेरोर्मध्यसंस्थितम्। शुक्लं रक्तं तथा पीतं कृष्णं हरितमेव च। विचित्रचित्ररूपेण नानावर्णेन शोभितम्। शुक्लं क्षणात् क्षणाद्रक्तं क्षणात् पीतं सुशोभितम्। यस्मिन् क्षणे शुक्लवर्णं हरितं वर्णमुत्तमम्। चित्ररूपञ्च चार्वङ्गि धत्ते कस्मिन् क्षणे क्षणे। एवं नानाविधं देवि तत् पद्मं शोभितं सदा। यथैव धाम गोलोकं प्रतिपत्रे तथैव हि। गोलोकाधिपतिस्तत्र भक्तिभावपरायणः। कैलासाधिपतिर्देवि ध्यानयोगं सदाभ्यसेत्। एवं ब्रह्मादयो देवा इन्द्राद्यास्त्रिदिवेश्वराः। स्तुतिभक्तिपराः सर्वे दीनभावे सदा स्थिताः। लक्षं लक्षं महेशानि तत्रैव मुरलीधरः। शतलक्षं तत्र रुद्रो ब्रह्मा लक्षशतं प्रिये । प्रत्यहं परमेशानि ब्रह्माण्डा बहवोऽभवन्। तन्मध्ये स्थापयेद् ब्रह्मा तत्रैव कमलापतिम्। शिवं बहुविधाकरं तत्रैव स्थापयेत्ततः। एवं हि परमेशानि नानाशक्तिं प्रविन्यसेत्। प्रतिब्रह्माण्डमध्ये तु ब्रह्मादिदेवतात्रयम्। नानाशक्तियुतं कृत्वा ब्रह्माण्डस्थापनञ्चरेत्। ब्रह्मपद्मे पृथिव्यान्तु वर्त्तन्ते मानुषादयः। ते सर्वे देवि ब्रह्माण्डस्तन्मध्ये भुवनानि च।

p. 859) पातालसप्तकं तत्र तत्रैव स्वर्गसप्तकम्। एवं चक्रे सर्वदेहे भुवनानि चतुर्द्दश। प्रतिदेहं परेशानि ब्रह्माण्डं नात्र संशयः॥ तथा। स्थानं बहुविधाकारं सर्वदेहस्य चाश्रयम्। तन्मध्ये सत्यलोकञ्च महारुद्रस्य कारणम्। दशकान्तेन स्वर्णेन निर्मितं चक्रपाणिना। दिक्षु तोयमण्डलञ्च तथा पूर्णेन्दुमण्डलम्। परितः पारिजातानि मध्ये कल्पद्रुमः पुनः। कल्पद्रुमस्य निकटे ज्योतिर्मन्दिरमेव च। ओं उद्यदादित्यसङ्काशं चतुर्द्वारविभूषितम्। मन्दवाद्यसमायुक्तं गन्धपुष्पैरलङ्कृतम्। तन्मध्ये वेदिका देवि रत्नसिंहासनं प्रिये । महाकाली परमात्मा चणकाकाररूपतः। माययाच्छादितात्मासौ तन्मध्ये समभागतः। महारुद्रः स एवात्मा महाविष्णुः स एव हि। महाब्रह्मा स एवात्मा नाममात्रविभेदकः। एकमूर्त्तिस्त्रिनामानि ब्रह्मविष्णुमहेश्वराः। नानाभावे मनो यस्य तस्य मोक्षो न विद्यते। ब्रह्माण्डास्तत्र जायन्ते लक्षं लक्षं सुलोचने । तत्र ब्रह्मा तत्र विष्णुस्तत्र रुद्रः प्रविन्यसेत्। एवं ब्रह्माण्डनिर्माणं कृत्वा विष्णुः सनातनः। स जीवमूर्त्तिं निर्माय तथा जन्तोश्च विग्रहम्। एवं ब्रह्माण्डं विविधं नित्यं सृजति निर्गुणम्। निर्गुणे विष्णुरूपश्च

सिद्धिकारणमेव हि। केचिद्वदन्ति स ब्रह्मा कैश्चिद्विष्णुः प्रकथ्यते। केचिद्रुद्रो महापूर्व एकदेवो निरञ्जनः। आद्याशक्तियुतो देवश्चणकाकाररूपकः। इन्द्रजालस्य दीपाभं चन्द्रसूर्याग्निरूपकम्। महाज्योतिर्निराकारं गोलोकं सुमुखं त्वथ। सत्यलोके वीजकोषे चिन्तामणिगृहे शुभे। ध्यायेन्निरञ्जनं देवि रत्नसिंहासनोपरि। तस्यान्तिके निजगुरुं पूजाध्यानपरायणः। सकान्तं पूजयेद्देवि रजताचलसोदरम् सुरक्तां चारुवदनां स्वप्रकाशस्वरूपिणीम्। एवं कान्तायुतं देवं स्वमूर्ध्निस्थं विचिन्तयेत्। यथा

p. 860) दर्पणमध्ये तु परिपश्यन्ति पर्वतम्। सहस्रारे महापद्मे तथा देवं विचिन्तयेत्। एवं ब्रह्ममयं ह्येतत् परं मोक्षमयं प्रिये । निर्गुणस्यालयं साक्षान्महाकालालयं शिवे । यत्रैव वर्त्तते नित्यं निराकारश्च निश्चलः। यस्य रूपं परानन्दं परापरजगत्पतिः। नित्यानन्दपरा देवी काली कालप्रकाशिनी। आद्याशक्तिर्महाकाली देवनिर्वाणकारिणी। जायते च क्षितौ वृक्षो यथा पृथ्व्यां विलीयते। तोयात्तु वुद्बुदं जातं यथा तोये विलीयते। जलदे तडिदुत्पन्ना लीयते च यथा घने। तथा ब्रह्मादयो देवाः कालिकाया भवन्ति। तथा प्रलयकाले तु पुनस्तस्यां प्रलीयते। शक्तिज्ञानं विना देवि मुक्तिर्हास्याय

कल्प्यते। एकांशेन भवेद्ब्रह्मा एकांशेन जनार्द्दनः।

एकांशेन भवेच्छम्भुः कालिकायाः सुलोचने । अपरा सा

महाकाली नद्यादीनां समुद्रवत्। गोष्पदे च तथा तोयं

ब्रह्माद्या देवतास्तथा। गोष्पदं किं विजानीयात् समुद्रस्य

जलं शिवे । तेन ब्रह्मा न जानाति विष्णुः किं वेत्ति शङ्करम्।

सृष्टिकर्त्ता यथा काल्या जन्यन्ते च सुरादयः। तथा प्रलयकाले तु

पुनस्तस्यां प्रलीयते। अतो निर्वाणदा काली पुमान् स्वर्गप्रदायकः

। दक्षिणस्यां दिशि स्थाने संस्थितश्च रवेः सुतः। कालीनाम्ना

पलायेत भीतियुक्तः समन्ततः। अतः सा दक्षिणानाम्नी त्रीषु

लोकेषु गीयते। निर्गुणः पुरुषः काल्या सृज्यते द्द प्यते यतः। अतः सा

दक्षिणानाम्नी त्रिषु लोकेषु गीयते। वश्यविद्या महाविद्या कालिका

जगदम्बिका। साकाररूपा सा काली चणकाकाररूपिणी।

हस्तपादादिरहिता सोमसूर्याग्निरूपिणी। तस्याः स्थानं कथितं

सत्यलोकं वरानने । यत् स्थानं सर्वदेवस्य प्रार्थनीयं

सदानघे । तस्य स्थानस्य माहात्म्यं किं मया कथ्यतेऽधुना

।

p. 861) सहस्रदलपद्मस्य चैकपत्रे सुलोचने । सहस्रं गोलकं

धाम ततो वक्तुं न शक्यते। जन्मान्तरसहस्रेण जिह्वाकोटिशतेन

च। तद्वक्तुं न हि शक्नोमि एकपत्रस्य शोभनम्। अतस्त्वं हि

वरारोहे विरता भाव पार्वति । किञ्जल्कमध्ये या शोभा किं

वक्तुं शक्यते मया। तन्मध्ये कर्णिका देवि तन्मध्ये वीजकोषकम्। वीजकोषस्य मध्ये तु सुधासागर उत्तमः। लक्षयोजनविस्तारः सुशोभं तोयमुत्तमम्। तन्मध्ये तु मणिद्वीपं सहस्रयोजनं प्रिये । परितः पारिजाताश्च कदम्बवनमुत्तमम्। मध्ये कल्पद्रुमस्तत्र ज्योतिर्मन्दिरमुत्तमम् । चतुर्द्वारसमायुक्तं हेमप्राकारभूषितम्। मन्दवाद्यसमायुक्तं गन्धधूपसमन्वितम्। देवकन्यासहस्राणि परिचर्यापराणि च। तन्मध्ये वेदिका देवि पञ्चाशदक्षरात्मिका। तस्योपरि महेशानि रत्नसिंहासनं शिवे । महाकाली महारुद्रश्चणकाकाररूपकः। इन्द्रजालस्य दीपाभं महाज्योतिः सनातनम्। शाक्तानन्दतरङ्गिण्यां चतुर्थोल्लासधृतसमयाचारतन्त्रे॥

देव्युवाच॥

देवदेव महाबाहो सृष्टिस्थितिलयात्मक । मूर्ध्नि पद्मं सहस्रारं रक्तवर्णमधोमुखम्। तस्य मध्यस्थितं ध्यायेद्गुरुं शान्तं सशक्तिकम्। मूलाधारे महाशक्तिं कुण्डलीरूपधारिणीम्। अधोवक्त्रे क्रमेणैव सर्वपद्मेषु भावना। तदा कथं भवेत्तत्र चिन्तनं गुरुदेवयोः। आधारे च

स्थितस्तत्र अधोभागे कथं भवेत्॥

महादेव उवाच।

यथा युक्तं त्वया देवि कथितं वीरवन्दिते । एवमेवात्र सन्देहो जायते नात्र संशयः। कथ्यते परमेशानि सन्देहच्छेदकारणम्। तानि पद्मानि देवेशि सुषुम्नान्तःस्थितानि च। परंब्रह्मस्वरूपाणि शब्दब्रह्ममयानि च। तत् सर्वं पङ्कजं देवि सर्वतोमुखमेव च। प्रवृत्तिश्च निवृत्तिश्च द्वौ

p. 862) भावौ जीवसंस्थितौ। प्रवृत्तिमार्गः संसारी निवृत्तिः परमात्मनि। प्रवृत्तिभावचिन्ताया मध्ये वक्त्राणि चिन्तयेत्। निवृत्तियोगमार्गेण सदैवोर्द्धमुखानि च। एवमेव भावभेदाद् हृत्सन्देहो न जायते॥

श्रीतत्त्वचिन्तामणौ तु विशेष उक्तो यथा॥ मेरोर्वाह्यप्रदेशे शशिमिहिरशिरे। सव्यदक्षेण सन्ने मध्ये नाडी सुषुम्ना त्रितयगुणमयी चन्द्रसूर्याग्निरूपा। धुस्तूरस्मेरपुष्पग्रथिततमवपुः कन्दमध्याच्चिरस्था वज्राख्या मेढ्रदेशोच्छिरसि परिणता मध्यमे स्याज्ज्वलन्ती॥

तन्मध्ये चित्रिणी सा प्रणवविलसिता योगिनां योगगम्या

लूतातन्तूपमेया सकलसरसिजान्मेरुमध्यान्तराले। भित्त्वा

देदीप्यते तद्ग्रथनरचनया शुद्धबोधप्रबोधा तन्मध्ये

ब्रह्मनाडी हरमुखकुहरादादिदेवान्तरास्था॥

विद्युन्मालाविलासा मुनिमनसि लसत्तन्तुरूपा सुसूक्ष्मा

शुद्धज्ञानप्रबोधा सकलसुखलसच्छुद्धभावाद्यभावा।

ब्रह्मद्वारं तदास्ये प्रविलसितसुधासाररम्यप्रदेशम्

ग्रन्थिस्थानं तदेतद्वदनमिति सुषुम्नाख्यनाड्या लपन्ति॥

अथाधारपद्मं सुषुम्नास्यलग्नं ध्वजाधोगुदोर्द्ध्वं

चतुःशोणपत्रम्।

अधोवक्त्रमुद्यत्सुवर्णाभरम्यैर्वकारादिशान्तैर्युतं

वेदवर्णैः॥ अमुष्मिन् धरायाश्चतुष्कोणचक्रं

समुद्भासिशूलाष्टकैरावृतं तत्। लसत्पीतवर्णं

तडित्कोमलाङ्गं तदम्भःसमास्ते धरायाः स्ववीजम्॥

चतुर्बाहुभूषं गजेन्द्रादिरुढं तदङ्के

नवीनार्कतुल्यप्रकाशम्। शिशुः सृष्टिकारी

लसद्वेदबाहुर्मुखाम्भोजलक्ष्मीश्चतुर्भागवेदः॥ वसेदत्र

देवी च डाकिन्याभिख्या लसद्वेदबाहूज्ज्वला रक्तनेत्रा।

समानोदितानेकसूर्यप्रकाशा प्रकाशं वहन्ती सदा

शुद्धबुद्धेः॥ वज्राख्या वक्त्रदेशाद्विलसति सततं

कर्णिकामध्यसंस्थं कोणं तत् त्रैपुराख्यं तडिदिव विलसत् कोमलं कामरूपम्। कन्दर्पो नाम वायुर्विलसति सततं तस्य मध्ये समन्तात् जीवेशो बन्धुजीवप्रकरमपि हसन् कोटिसूर्य प्रकाशः॥ तन्मध्ये लिङ्गरूपौ द्रुतकमलकणाकोमलः पश्चिमास्यो ज्ञानध्यानप्रकाशः प्रथमकिशलयाकाररूपः स्वयम्भूः।

उद्यत्पूर्णेन्दुविश्वप्रकरकरचयस्निग्धसन्तानहासी काशीवासी विलासी विलसति सरिदावर्तरूपप्रकाशी॥ तस्योर्द्धे विषतन्तुशोकविलसत्सूक्ष्मा जगन्मोहिनी ब्रह्मद्वारमुखं मुखेन मधुरं सञ्छादयन्ती स्वयम्। शङ्खावर्त्तनिभा नवीनचपलामालाविलासास्पदा सुप्ता सर्पसमा शिवोपरि लसत्सार्द्धत्रिवृत्तावृतिः॥ कूजन्ती कुलकुण्डली च मधुरं मत्तालिमालास्फुटं वाचं कोमलवाक्यबन्धरचनाभेदाविभेदक्रमैः। श्वासोच्छासविभञ्जनेन जगतां जीवो यया धार्यते सा मूलाम्बुजगह्वरे विलसति प्रोद्दामदीप्तावलिः॥ तन्मध्ये परमा कलातिकुशला सूक्ष्मातिसूक्ष्मा परा नित्यानन्दपरस्परातिचपला मालालसद्दीधितिः। ब्रह्माण्डादिकटाहमेव सकलं यद्भासया भासते सेयं श्रीपरमेश्वरी विजयते नित्यप्रबोधोदया॥ ध्यात्वैतन्मूलपद्मान्तरपथविलसत्कोटिसूर्यप्रकाशम्

वाचामीशो नरेन्द्रः स भवति सहसा सर्वविद्याविनोदी। आरोग्यं तस्य नित्यं निरवधि स महानन्दंचित्तात्मरात्मा वाक्यैर्वाक्यप्रबन्धैः। सकलसुरगुरुन् सेवते शुद्धशीलः। सिन्दूरपूररुचिरारुणपद्ममन्यत् सौषुम्नमध्यघटितं ध्वजमूलदेशे। अङ्गच्छदैः परिवृतं तडिदाभवर्णैर्वाद्यैः सविन्दुलसितैश्च पुरन्दरान्तैः॥ तस्यान्तरे प्रविलसद्वियदप्रकाशमम्भोजमण्डलमथो वरुणस्य तस्य। अर्द्धेन्दुरूपलसितं शरदिन्दुशुभ्रं वङ्कारवीजममलं मकराधिरूढः॥ तस्याङ्कदेशशयितो हरिरेव पायान्नीलप्रकाशरुचिरश्रियमादधानः। पीताम्बरः प्रथमयौवनगर्भधारी श्रीवत्सकौस्तुभधरो धृतवेदबाहुः॥

p. 864) अत्रैव भाति सततं खलू राकिणी सा नीलाम्बु जोदरसहोदरकान्तिशोभा। नानायुधोद्यतलसत्सतताङ्गलक्ष्मीर्दिव्याम्बराभरणभूषित- मत्तचित्ता॥

अथ ज्ञानप्रशंसा॥ निगमकल्पद्रुमे तृतीयपटले॥ ज्ञानेन लभते मोक्षं ज्ञानेन पापनाशनम्। ज्ञानेन वीरकर्मा च ज्ञानेन पशुभावनम्। ज्ञानेन दिव्यभावी च

परतरं क्षेत्रं त्रिषु लोकेषु विद्यते। सत्यं सत्यं महादेवि शपथेन वदामि ते। संसारबहुलो देवि मुक्तिमिच्छति यः पुनः। मामेव शरणं गत्वा तिष्ठेत् काश्यां स यन्त्रितः। स एव पतितो ज्ञानी स एव कुलपावनः। प्राणान्तेऽपि महादेवि काश्या न निःसरेद्विजः। स एव परमो मूर्खः स एव कुलनाशनः। वृथैव मूर्खलोकेन काशीं प्राप्य त्यजेद् यदि। बहुभिर्जन्मभिः पुण्यैर्यदि काशीं लभेत् पुनः। तदा नैव त्यजेत् काशीं प्राणान्तेऽपि कदाचन। अनायासेन संसारसागरं यस्तितीर्षति। स गच्छेत् खड्ग केनापि मम वाराणसीं पुरीम्। अन्नं दद्यादन्नपूर्णा ज्ञानं दद्यात् सरस्वती। प्राणान्ते मुक्तिदाताहं काश्यान्यं भावना किमु॥ वृन्दावनकाञ्च्यादिमाहात्म्यस्त्वत्र ग्रन्थगौरवभिया न लिखितम्। अन्वेषकैर्योगिनीतन्त्रे पूर्वखण्डे पञ्चदशपटलादिषु तदन्नेष्यमिति॥

श्रीप्राणतोषण्यां भक्तिकाण्डाभिधानं सप्तपरिच्छेदान्वितं पञ्चमकाण्डं समाप्तम्॥

षष्ठस्य ज्ञानकाण्डस्य निर्घण्टोऽत्र विधीयते। आदौ पञ्चमहायोगो यमादिस्तदनन्तरम्। षडङ्गयोगकथनं

p. 780) यमानां मुख्यकीर्त्तनम्। नियमानां तथा

मुख्यमासनं तदनन्तरम्। योगविद्या योगविघ्ना मठक्रिया

ततः परम्। प्राणायामस्य भेदश्च कुम्भकस्य ततः परम्।

प्राणायमक्रियाकालाश्चत्वारः परिकीर्त्तिताः।

श्रेष्ठमध्याधमत्वेन प्राणसिद्धेश्च लक्षणम्। श्रमोदकेन

तेनैव तनुमार्जनजं फलम्। नाडीशुद्धेश्च चिह्नानि

कुम्भसिद्धिफलं ततः। वर्जनीयानि योगे च ततः सिद्धिकराणि च।

अपथ्यपथ्ये योगस्य ततोऽवस्था मनोन्मनी। कुम्भकाः सप्तधा

भिन्ना नेत्यादि तदनन्तरम्। कर्माणि फलयुक्तानि धौत्यादीनि ततः

परम्। साधकाभ्यासजफलं तद्विघ्नकीर्त्तनं ततः।

घटावस्था तत्फलञ्च तद्विघ्नञ्च ततः परम्। ततश्च

मुद्रादशकं सफलञ्च निरूपितम्।

एतदाद्यपरिच्छेदसमापनमतः परम्। पृथ्व्यादिधारणं तस्य

फलं ध्यानं ततः परम्।

समाधिस्तस्यापि फलं प्राणायामफलान्तरम्। तिथिभेदे

वामदक्षनासावायुगतिक्रमः। विपरीतगतेर्दोषो निर्गमे

चोपवेशने। वायोः कर्मविशेषे तु फलञ्च वामदक्षयोः।

वायोः कर्मविशेषेऽपि फलं प्रश्ने च दिक्स्थितेः। फलं

पूर्णशून्यभेदाद्गतिर्नाड्यास्तथैव च। अङ्गभेदे कार्यभेदे

पञ्चभूतादयस्ततः। तेषां शुभाशुभे चैव तत्कालस्य निरूपणम्। भूतज्ञानं तदवस्थाः पञ्च बाल्यादिभेदतः। तत्फलञ्च वारभेदे वामदक्षफलं ततः। दिग्गतिर्धमनी वायौ स्वस्वनाडीफलं ततः। विपरीते वैपरीत्यं फलस्य तदनन्तरम्। वृहन्नाडीपदे यात्रा शुभदा वातवेदतः। यात्रापदानि च वहन्नाडीहस्तस्य मार्जनम्। तत्फलं पूर्णरिक्ताङ्गभेदे कर्मनिरूपणम्। वामनासाश्रितं कर्म दक्षनासाश्रितं तथा॥ सुषुम्नाश्रितकार्याणि भूतरूपादिवेदनम्। भूतगतिः पञ्चभूतभेदे कार्यस्य निर्णयः। प्रश्नस्य निर्णयो भूतैः शुभाशुभनिरूपणम्। मूलादि चिन्ताविज्ञानं भूतैस्तात्कालिकी तथा। अवस्थेन्दोः

p. 781) सिद्धिकालः पृथ्व्यवस्थानिरूपणम्। तत्त्वैर्नक्षत्रविज्ञानं निसर्गगतिनिर्णयः। गमनाद्यैर्गतेर्भेदो वायोस्तत् न्यूनकारणाम्। फलञ्च तद्वदूर्द्धादौ श्वासभेदे जयाजयौ। तत्त्वेनास्त्रस्य घटनं तत्त्वैर्युद्धे जयादिकम्। प्रवेशकाले लाभादिर्हानिर्निःसरणे तथा। शून्ये न घातनिर्णातिर्भूतेन स्थाननिर्णयः। जयादिनिर्णयश्चैव वशीकरणमेव च। गर्भज्ञानं वत्सरस्य शुभाशुभफलं ततः। निदानादिपरिज्ञानं रोगस्य निर्णयस्ततः।

मृत्युजीवनविज्ञानं कालज्ञानं ततः परम्।
वर्षत्रयादिविज्ञानं जीवनस्य स्वकस्य च।
अरुन्धत्यादिविज्ञानमायुर्वृद्धिक्रिया ततः।
स्वरज्ञानप्रशंसेति परिच्छेदद्वितीयकम्॥ राजयोगप्रशंसा च
तद्भेदस्तिथिसंख्यकः। भेदानां लक्षणञ्चैव लक्षयोगस्ततः
परम्। तस्य पञ्चविधो भेदो राजयोगस्य लक्षणम्। हटयोगश्च
द्विविधो ज्ञानयोगस्तदन्तरम्। वाह्यलक्षं
तत्फलञ्चाकाशपञ्चकलक्षणम्।
षोडशाधारनिर्णीतिरष्टाङ्गविवृतिस्ततः।
पिण्डब्रह्माण्डयोरैक्यं पिण्डमध्ये जगत्स्थितिः।
राजयोगसिद्धिफलं पद्मसङ्केतमद्भुतम्।
अव्यक्तादेर्गुणाश्चैव योगादेशस्ततः परम्। योगाधिकारी योगस्य
सिद्धिकारणमेव च। योगभेदान्मन्त्रयोगो लययोगस्य विस्तृतिः।
कालपुरुषविज्ञानं तत्फलं तदनन्तरम्। रसनासाधनं तस्य
फलं नानाविधं ततः। परिच्छेदतृतीयस्य समाप्तिकीर्त्तनं
ततः। स्थूलसूक्ष्मक्रमेणैव ब्रह्माण्डस्य निरूपणम्।
सर्वदेवाश्रयो मेरुः सत्यलोकस्तदूर्द्धतः। अधो रसातलं तस्य
भुवनान्येवमेव च। आधारपद्मविस्तारः स्वाधिष्ठानस्य
वर्णनम्। तत्र वैकुण्ठगोलोकवर्णनं तदनन्तरम्।
मणिपूरवर्णनञ्चानाहतस्य च वर्णनम्। विशुद्धवर्णनं

तस्मादाज्ञाख्यवर्णनं ततः। सहस्त्रारवर्णनञ्चाधो वक्रे गुरुदेवयोः। स्थितिवीजञ्च षट्चक्रप्रकारान्तरवर्णनम्।

p. 782) परिच्छेदचतुर्थस्य समापनमिति स्मृतम्॥ ज्ञानप्रकारं ज्ञानस्य द्वैविध्यं द्वैतवर्जितम्। ज्ञानं तत्फलनिर्देशोऽद्वैतज्ञानाकृतिस्ततः। तत्त्वज्ञानं तत्प्रशंसात्मनः साक्षित्वनिर्णयः। रथित्वञ्च रथादित्वं शरीरादेस्ततः परम्। भोक्तृमुक्तत्वनिर्णीतिरुत्तमादिनिरूपणम्। ब्रह्मज्ञस्य ध्यानपूजाद्यभावस्तदनन्तरम्। आत्मनिरूपणं ज्ञानं त्रिविधं ज्ञानकारणम्। निर्वाणसाधकं कर्म शिववीजनिरूपणम्। पाशनिरूपणं जीवात्माभेददर्शनं ततः। आत्मनो जन्ममरणाद्यभावदर्शनं पुनः। पिण्डपदादिनिर्णीतिस्तन्त्र श्रवणजं फलम्। विद्यातत्त्वं ब्रह्मविद्या प्रशंसार्जितपुण्यतः। ब्रह्मज्ञानं परमात्मनिर्णयस्तदनन्तरम्। भिक्षुनिष्ठैव सा विद्या ब्रह्मणो जगदुद्भवः। ब्रह्मज्ञानप्राप्तिफलं ब्रह्ममन्त्रप्रशंसनम्। ब्रह्ममन्त्रोद्धृतिर्मन्त्रार्थचैतन्ये तदर्चना। ब्रह्मस्तोत्रं तत्कवचं तन्नैवेद्यफलं ततः। तदर्चकप्रशंसा च तन्मन्त्रस्य पुरस्क्रिया। अन्यान्यपि च वेद्यानि यथास्थानं मनीषिभिः। परिच्छेदपञ्चमस्य समापनमिति

स्मृतम्। मात्रादिचक्रविंशञ्च बालादिचक्रमध्यगम्। तस्य व्याख्यानमेतद्धि षष्ठच्छेदसमापनम्। सर्वतोभद्रचक्रञ्च तद्याख्या प्रक्रियायुता। चक्रं शतपदं तस्मात् तद्याख्या तदनन्तरम्। प्रश्नप्रवचने वाणी प्रणामो मन्त्र एव च। प्रश्नस्य कथने तस्य सङ्केतस्तदनन्तरम्। प्रस्तारचक्रं तस्यापि व्याख्यानं तदनन्तरम्। परिच्छेदसप्तमस्य समापनमिदं कृतम्। यथास्थानमन्यदपि ज्ञेयं धीमद्भिरत्र तु॥

इदं विस्तृतसप्तभिर्ज्ञानकाण्डं परिच्छेदरूपैः प्रसूनैः सुरम्यम्। बुधालोकतां गन्धमुग्धोऽनुवारं फलं किन्तु गुर्वास्यलभ्यं नु विविद्धि। क्षमध्वं पण्डिता दोषं परपिण्डोपजीविनः। ममाशुधादिकं सर्वं शोध्यं युष्माभिरुत्तमः॥ आदेष्टृसत्वरतया पुनरीक्षितुं नैतच्छक्यमुत्तमवचो रचितं ममेदम्। विज्ञापयानि सततं p. 783) परिविक्ष्य सर्वं घोरा भवद्भिरतिसूक्ष्मधिया विशोध्यम्॥

रुद्रजामले उत्तरखण्डे षड्त्रिंशत्पटले। यथा॥

श्री-आनन्दभैरव्युवाच॥

त्रिगुणज्ञानविकलो न पश्यति दिवानिशम्। दिवा रात्रौ ज्ञानहेतौ न पश्यति कलेवरम्। इति कृत्या हि मरणं नृणां जन्मनि जन्मनि। तज्जन्मक्षयहेतोश्च मम योगं समभ्यसेत्।

पञ्चामरामहायोगं कृत्वा स्यादमरो नरः। तत् प्रकारं श्रृणु प्राणवल्लभ प्रियदर्शन । तव भावेन कथये न कुत्रवद शङ्कर । यदि नो कस्य निकटे कथ्यते योगसाधनम्। विघ्ना घोरा वसन्त्ये व गात्रे योगादिकं कथम्।

योगयोगाद्भवेन्मोक्षस्तत्प्रकाशाद्धि नाशनम्। अतो न दर्शयेद् योगं यदीच्छेदात्मनो हितम्। कृत्वा पञ्चामरायोगं प्रत्यहं भक्तिसंयुतः। पठेत् श्रीकुण्डलीदेवीसहस्रनाम चाष्टकम्। महायोगी भवेन्नाथ श्वासेन नात्र संशयः।

पञ्चामरायोगविद्या सर्वविद्याप्रकाशिनी कृत्वा पञ्चामरासिद्धिं ततोऽष्टाङ्गादिधारणा। आदौ पञ्चामरासिद्धिस्ततोऽल्पयोगसाधनम्। तत्प्रकारं प्रवक्ष्यामि सावधानावधारय। अहं जानामि संसारे केवलं योगपण्डिता । तत्साक्षिणी ह्यहं नाथ भक्तानामुदयाय च। इदानीं कथये तेऽहममरायोगसाधनम्। एवं कृत्वा नित्यरूपी योगानामङ्कुरायते। योगकालेन पुरुषः सिद्धिमाप्नोति निश्चितम्।

पञ्चामराविधानानि क्रमेण श्रृणु शङ्कर । नेतीयोगं हि सिद्धानां महाकफविनाशनम्। दन्तीयोगं प्रवक्ष्यामि

हृदयग्रन्थिभेदनम्। धौतीयोगं ततः पश्चात् सर्वं
मलविनाशनम्। नेतीयोगं हि परमं सर्वाङ्गोदरचालनम्।
क्षालनं परमं योगं नाडीनां क्षालनं स्मृतम्। एवं
पञ्चामरायोगं यमिनामतिगोचरम्। यमनियमकाले तु
पञ्चामराक्रियां यजेत्। अमरासाधनादेव अमरत्वं

p. 784) भवेद्ध्रुवम्। एतत्करणकाले च तथा पञ्चामराशनम्।
पञ्चामराभक्षणेन अमरो योगसिद्धिभाक्। तानि द्रव्याणि
वक्ष्यामि तवाग्रे परमेश्वर । येन हीना न सिध्यन्ति
कल्पकोटिशतेन च। एका तु अमरा दूर्वा तस्या ग्रन्थिं समानयेत्।
अन्या तु विजयादेवी सिद्धिरूपा सरस्वती। अन्या तु विल्वपत्रस्था
शिवसन्तोषकारिणी। अन्य तु योगसिद्धार्थे निर्गुणी चामरा मता।
अन्या तु कालतुलसी श्रीविष्णोः प्रियतोषणी। एताः पञ्चामरा
ज्ञेया योगसाधनकर्मणि। एतासां द्विगुणं ग्राह्यं
विजयापत्रमुत्तमम्। ब्राह्मणी क्षत्रिया वैश्या शूद्रा सर्वत्र
पूजिता। एतद्द्रव्याणि संगृह्य भक्षयेच्चूर्णमुत्तमम्।
तच्चूर्णभक्षसमये एतन्मन्त्रादिपञ्चकम्। पठित्वा भक्षणं
कृत्वा नरो मुच्येत सङ्कटात्। ॐ हरे अमरपुष्टे
त्वममृतोद्भवसम्भवे । अमरं मां सदा भद्रे कुरुष्व
त्वं हरप्रिये । ॐ दूर्वायै स्वाहा। इति दूर्वायाः॥

पुनर्विजयामन्त्रेण शोधयेत् सर्वकन्यकाः॥ ओं संविदे ब्रह्म इत्यादि॥ ओं ब्राह्मण्यै नमः स्वाहा॥ ओं सिद्धिमूलकरे देवीत्यादि। अर्द्धं राजपुत्त्रवशङ्करि राजकन्ये त्रिशूलिनि। ऐँक्षत्त्रियायै नमः स्वाहा। ओं अज्ञानेन्धनेत्यादि। ह्रीं वैश्यायै नमः स्वाहा। ओं नमस्यामीत्यादि। श्रीं शूद्रायै नमः स्वाहा। ओं कायसिद्धिकरे देवि विल्वपत्रनिवासिनि। अमरत्वं सदा देहि शिवतुल्यं कुरुष्व माम्। ओं शिवदायै नमः स्वाहा। ओं निर्गुण्डि परमेशानि योगानामधिदेवते। सा मां रक्षतु अमरे भावसिद्धिप्रदे नमः। ओं शोकापहायै नमः स्वाहा। ओं विष्णोः प्रिये महामाये कालज्वालनिवासिनि। तुलसि मां सदा रक्ष मामेकममरं कुरु। ओं ह्रीं श्रीं ऐं ह्रीं अमरायै नमः स्वाहा। पुनरेकत्र आहृत्य सर्वासां शोधनं चरेत्। ओं अमृते अमृतोद्भवे इत्यादि। धेनुमुद्रां

p. 785) योनिमुद्रां मत्स्यमुद्रां प्रदर्शयेत्।
तत्त्वमुद्राक्रमेणैव तर्पणं कारयेद्बुधः। अमन्त्रकं सप्तवारं गुरुनाम्ना शिरेऽर्पयेत्। सप्तवारमिष्टदेव्या नाम्ना मूर्ध्नि प्रदापयेत्। ततस्तर्पणमाकुर्यात् तर्पयामि नमो नमः। एतद्वाक्यस्य पूर्वे तु इष्टमन्त्रं समुच्चरेत्। परदेवतां समुद्धृत्य सर्वाद्यप्रणवं स्मृतम्। ततो मुखे प्रजुहुयात्

कुण्डानां नामपूर्वकम्। ओं वद वदेत्यादि
सर्वसत्त्ववशङ्करि। शत्रुकण्ठत्रिशूलिनि स्वाहा। एतदुक्त्वा
आश्रमौ च वशी साधकसत्तमः। पञ्चामरारसानन्दः
कुलाचारविधिप्रियः। स्थिरचेता भवेद् योगो यदि पञ्चामरागतः।

दत्तात्रेयसंहितायां प्रथमाध्याये॥ यमश्च
नियमश्चैव आसनञ्च ततः परम्। प्राणायामश्चतुर्थः स्यात्
प्रत्याहारश्च पञ्चमः। षष्ठी तु धारणा प्रोक्ता ध्यानं
सप्तममुच्यते। समाधिरष्टमः प्रोक्तः सर्वपुण्यफलप्रदः।
एवमष्टाङ्गयोगञ्च याज्ञवल्क्यादयो विदुः। कलसाद्यास्तथा
सिद्धा हटं कुर्युस्तथा यथा॥ निरुत्तरतन्त्रे चतुर्थपटले॥
आसनं प्राणसंरोधः प्रत्याहारश्च धारणा।
ध्यानं समाधिरेतानि योगाङ्गानि वदन्ति षट्।
प्राणायामद्विषट्केन प्रत्याहारः प्रकीर्त्तितः।
प्रत्याहारद्विषट्केन जायते धारणा शुभा।
धारणाद्वादशप्रोक्तं ध्यानं ध्यानविशारदैः।
ध्यानद्वादशकैरेव समाधिरभिधीयते। यत् समाधौ परं
ज्योतिरुत्तरं विश्वतोमुखम्। तस्मिन् दृष्टे क्रिया काचिद् यातायातं
न विद्यते॥ दत्तात्रेयसंहितायाम्। यमा ये दश सम्प्रोक्ता
ऋषिभिस्तत्त्वदर्शिभिः। लघ्वाहारस्तु तेष्वेको मुख्यो भवति नापरे।

अहिंसा नियमेष्वेको मुख्यो भवति नापरे। चतुरशीतिलक्षेषु त्वासनेषूत्तमं शृणु। आदिनाथेन सम्प्रोक्तं पद्मासनमिहोच्यते। उत्तानौ चरणौ कृत्वा ऊरुसंस्थौ प्रयत्नतः।

p. 786) ऊरुमध्ये तथोत्तानौ पाणी कृत्वा ततो दृशौ। नासाग्रे विन्यसेद्वक्त्रं दन्तमूलञ्च जिह्वया। उत्तोल्य चिवुकं वक्षः संस्थाप्य पवनं शनैः। यथाशक्त्या समाकृष्य पूरयेदुदरं शनैः। यथाशक्त्या समाकृष्य धारयेदुदरं शनैः। यथाशक्त्या ततः पश्चाद्रेचयेदुदरं शनैः। इदं पद्मासनं प्रोक्तं सर्वव्याधिविनाशनम्॥ ग्रहजामले त्रयोदशपटले॥ ऊर्वोरुपरि मेढ्रान्ते उभे पादतले तथा। पद्मासनं भवेदेतत् सर्वपापप्रणाशनम्। तथा। युवावस्थोऽपि वृद्धोऽपि व्याधितो वा शनैः शनैः। अभ्यासात् सिद्धिमाप्नोति योगे सर्वस्य तन्त्रता। ब्राह्मणः श्रमणो वापि वृद्धो वाप्यहितोऽपि वा। कापालिको वा चार्वाकः श्रद्धया सहितः सुधीः। योगाभ्यासरतो नित्यं सर्वसिद्धिमवाप्नुयात्। क्रियायुक्तः स सिद्धः स्यादक्रियस्य कथं भवेत्। शास्त्रस्य पाठमात्रेण कथं सिद्धिः प्रजायते। मुण्डो वा दण्डधारी वा काषायवसनोऽपि वा। नारायणवदो वापि जटिलो भस्मलेपनः। नमः शिवायवादी वा ब्रह्मर्चापूजकोऽपि वा।

स्थानद्वादशपूज्यो वा बहुवत्सलभाषितः। क्रियाहीनोऽथवा क्रूरः कथं सिद्धिमवाप्नुयात्। न वेशधारणं सिद्धेः कारणं न च तत्तथा। क्रियैव कारणं सिद्धेः सत्यमेतत्तु साङ्कृते। शिश्नोदरार्थं योगस्य कथं वा वेशधारिणः। अन्नपानविहीनास्तु वञ्चयन्ति जनान् किल। उच्चावचैर्विप्रलम्भैर्यजन्ते कृशमानवाः। योगिनी वयमित्येवं मुखभोगपरायणाः। शनैस्तथाविधानज्ञान् योगाभ्यासविवर्जितान्। कृतार्थान् वचनैरेव वर्जयेद्वेशधारिणः। एते चाविष्टभूताः स्युर्योगाभ्यासस्य सर्वदा। वर्जयेत्तान् प्रयत्नेन न ईदृशी सिद्धिदा क्रिया। प्रथमाभ्यासकालेषु प्रवेशस्य सदा मुने । आलस्यं प्रथमो विघ्नो द्वितीयस्तु प्रकथ्यते। पूर्वोक्तधूर्त्तगोष्ठी च तृतीयो मन्त्रसाधनम्।

p. 787) चतुर्थो धातुवादश्च पञ्चमः पापवादकः। एवं बहुविधा विघ्ना मृगतृष्णासमा मुखे। स्थिरा मनसि जायन्ते तास्तु ज्ञात्वा त्यजेत् सुधीः। तथा। सुशोभनं मठं कुर्यात् सूक्ष्मद्वारन्तु निर्व्रणम्। सुष्ठु लिप्तं गोमयेन सुधया वा प्रयत्नतः। दिने दिने सुसंमृष्टं सम्मार्जन्याप्यतन्द्रितैः। वासितञ्च सुगन्धेन धूपितं गुग्गुलादिभिः॥ ग्रहजामले द्वादशपटले॥

ईश्वर उवाच॥

हटविद्या परा गोप्या योगिनां सिद्धिमिच्छताम्। देवी वीर्यवती गुप्ता निर्वीर्या च प्रकाशिता। सुवाह्ये धार्मिके देशे सुभिक्षे निरुपद्रवे। एकान्तं मठमध्ये च स्थातव्यं हटयोगिनाम्। स्वल्पद्वारमरन्ध्रगर्त्तपिटकं नात्युच्चनीचायतं सम्यग्गोमयसान्द्रलिप्तममलं निःशेषवाह्योज्झितम्। वाह्ये मण्डपकूपवेदिरचितं प्राकारसंवेष्टितं प्रोक्तं योगमठस्य लक्षणमिदं संसारनिस्तारिणि ॥ एवंविधमठे स्थित्वा सर्वचिन्ताविवर्जितः। गुरुपदिष्टमार्गेण हटयोगं समभ्यसेत्॥ दत्तात्रेयसंहितायाम्॥

मलमूत्रादिभिर्दोषैरष्टादशभिरेव च। वर्जितो दारसम्बन्धं वस्त्रं वाऽजिनमेव च। नान्यत्रास्तरणासीनः परशङ्काविवर्जितः। तस्मिन् शस्तं समास्तीर्य आसनं विष्टरादिकम्। तत्रोपविश्य भेधावी पद्मासनसमन्वितः। समकायः प्राञ्जलिश्च प्रणम्य चेष्टदेवताम्। ततो दक्षिणहस्तस्याप्यङ्गुष्ठेन तु पिङ्गलाम्। निरुध्य पूरयेद्वायुमिडया तु शनैः शनैः। यथाशक्त्या निरोधेन ततः कुर्याच्च कुम्भकम्। ततस्त्यजेत् पिङ्गलया शनैरेव न वेगतः।

पुनः पिङ्गलयाकृष्।य पूरयेदुदरं शनैः। धारयित्वा यथाशक्ति रेचयेन्मारुतं शनैः। यया त्यजेत्तयापूर्य धारयेदविरोधतः। एवं प्रातः समासीनः कुर्याद्विंशतिकुम्भकान्। कुम्भकः सहितो नाम सर्वग्रहविवर्जितः। मध्याह्नेऽपि तथा कुर्यात् पुनर्विंशतिकुम्भकान्। एवं सायं प्रकुर्वीत

p. 788) पुनर्विंशतिकुम्भकान्। कुर्वीत रेककुम्भाभ्यां सहितान् प्रतिवासरम्। कुर्यादेवं चतुर्वारमनालस्यो दिने दिने। एवं मासत्रयं कुर्यान्नाडीशुद्धिस्ततो भवेत्॥ ग्रहजामले त्रयोदशपटले॥ प्राणायामस्त्रिधा प्रोक्तो रेचकुम्भकपूरकैः। सहितः केवलश्चेति कुम्भको द्विविधो मतः। रेचश्चापूर्य यः कार्यः स वै सहितकुम्भकः। यावत्केवलसिद्धिः स्यात् सहितः तावदभ्यसेत्। रेचकं पूरकं त्यक्त्वा सुखं यद्वायुधारणम् । प्राणायामोऽयमित्युक्तः स वै केवलकुम्भकः। गुरुपदिष्टमार्गेण प्राणायामं समाचरेत्। यावद्वायुः स्थितो देहे तावज्जीवितमुच्यते। मरणं तस्य निष्क्रान्तिस्ततो वायुं निबन्धयेत्। मलाकुलासुनाडीषु मारुतो नैव मध्यगः। कथं स्यात्तन्मलीभावः कायशुद्धिः कथं भवेत्। शुद्धिमेति यदा सर्वं नाडीचक्रं मलाकुलम्। तदैव जायते योगी

प्राणसंग्रहणे क्षमः। प्राणायामं ततः कुर्यान्नित्यं सात्त्विकया धिया। तथा सुषुम्नापार्श्वस्था मलाः शोषं प्रयान्ति हि। बद्धपद्मासनो योगी प्राणं चन्द्रेण पूरयेत्। धारयित्वा यथाशक्ति पुनः सूर्येण रेचयेत्। प्राणं सूर्येण चाकृष्य पूजयेदुदरं शनैः। विधिवत् कुम्भकं कृत्वा पुनश्चन्द्रेण रेचयेत्। येन त्यजेच्च तेनैव पूरयेदनिरोधतः। रेचयेच्च ततोऽन्येन रेचयेच्च न वेगतः। चन्द्रेण वामनासया सूर्येण दक्षिणनासया इत्यर्थः। प्राणं चेदिडया पिबेन्नियमितं भूयोऽन्यथा रेचयेत् पीत्वा पिङ्गलया समीरणमथो बद्ध्वा त्यजेद्वामया। सूर्याचन्द्रमसोरनेन विधिना विम्बद्वयं ध्यायतः शुद्धा नाडिगणा भवन्ति यामिनो मासत्रयादूर्द्ध्वतः॥ प्रातर्मध्यन्दिनं सायं मध्यरात्रे च कुम्भकान्। चतुरशीतिपर्यन्तं चतुर्वारं समभ्यसेत्। प्राणायामे महाधर्मो योगिनो मोक्षदायकः। प्राणायामो दिवारात्रौ देवि जलं परित्यजेत्। अधमे द्वादशी मात्रा मध्यमे द्विगुणा स्मृता। उत्तमे त्रिगुणा ज्ञेया

p. 789) प्राणायामस्य निर्णये। कनीयसि भवेत् स्वेदः कम्पो भवति मध्यमे। उत्तिष्ठत्युत्तमे प्राणी बद्धपद्मासनो मुहुः। जलेन श्रमजातेन गात्रमार्जनमाचरेत्। दृढतालयुता दीप्तिस्तेन

गात्रस्य जायते। यदा तु नाडीशुद्धिः स्यात्तदा चिह्नानि वाह्यतः। जायन्ते योगिनो देहे तानि वक्ष्याम्यशेषतः। शरीरलघुता दीप्तिर्जठराग्निविवर्द्धनम्। कृशत्वञ्च शरीरस्य तस्य जायेत निश्चितम्। पूर्वोक्तकाले कुर्वन्ति परमाभ्यासमेव च। ततः परं यथेष्टन्तु शक्तिः स्याद्वायुधारणे। यथेष्टधारणाद्वायोः सिद्धिः कुम्भस्य केवला। केवले कुम्भके सिद्धे रेचपूरकवर्जिते। न तस्य दुर्लभं किञ्चित् त्रिषु लोकेषु दिद्यते॥

अथ कुम्भकसिद्धिफलम्॥ प्रस्वेदो जायते पूर्वं मर्दनं तेन कारयेत्। ततस्तु धारणाद्वायोः क्रमेणैव शनैः शनैः। कम्पो भवति देहस्य आसनस्थस्य योगिनः। ततोऽधिकतराभ्यासाद्दार्दुरी जायते ध्रुवम्। यथैव दर्दुरो गच्छेदुत्पत्योत्प्लुत्य भूतले। पद्मासनस्थितो योगी तथा गच्छति भूतले। ततोऽधिकतराभ्यासाद्भूमित्यागश्च जायते। पद्मासनस्थितो वासौ भूमिमुत्सृज्य वर्त्तते। निराधारो विचित्रं हि तदा सामर्थ्यमुद्वहेत्। अल्पं वा बहु वा भुक्त्वा योगौ न व्यथते क्वचित्। अल्पमूत्रपुरीषे तु अल्पनिद्रा च जायते। क्रिमयो वृश्चिका नानास्वेदो दुर्गन्धता तनोः। एतानि सर्वख्यातस्य न जायते कदाचन। अभ्यासकाले प्रथमे शस्तं क्षीराज्यभोजनम्। ततोऽभ्यासे स्थिरीभूते न तादृङ्नियमग्रहः। यथा सिंहो गजो

व्याघ्रो भवेद्वश्यः शनैः शनैः। तथैव सेवितो वायुरन्यथा हन्ति साधकम्। प्राणायामेण युक्तेन सर्वरोगक्षयो भवेत्। अयुक्ताभ्यासयोगेन सर्वरोगसमुद्भवः। हिक्का श्वासश्च कासश्च शिरः कर्णाक्षिवेदना। भवन्ति विविधा दोषाः पवनस्य व्यतिक्रमात्॥ इति वायुव्यतिक्रमदोषः॥

दत्तात्रेयसंहितायाम्॥ तथा वर्ज्यानि वक्ष्यामि योगविघ्नकराणि च। लवणं सर्षपञ्चान्नमुष्णं रूक्षञ्च निन्दकम्। अतीव भोजनं त्याज्यं स्त्रिया सङ्गमनं बहु। अग्निसेवा तु सन्त्याज्या धूर्त्तगोष्ठो विशेषतः॥ ग्रहजामले। अत्याहारः प्रवासश्च प्रजल्पो नियमग्रहः। जनसङ्गश्च लौल्यञ्च षड्भिर्योगः प्रणश्यति॥ इति वर्जनीयानि॥ उत्साहान्निश्चयाद्धैर्यात्तत्त्वज्ञानाच्च साहसात्। जनसङ्गपरित्यागात् षड्भिर्योगो हि सिध्यति। तथा। कट्वम्लतिक्तलवणोष्णहरीतशाकाः सौवीरतैलबहुसर्षपमत्स्यमद्याः। आजादिमांसदधितक्रकुलत्थकोलाः पिन्याकहिङ्गुलसुनादिमपथ्यमस्मिन्॥ भोजनसहितं विद्यात् पुनरप्युष्णीकृतं भोज्यम्। अतिलवणाशनपललकन्दशाकोत्कटं दुष्टम्॥ वर्जयेद् दुर्जनप्रीतिं वह्नितापस्य सेवनम्। प्रातः

स्नानोपवासादि कायक्लेशविधिं तथा॥ इत्यपथ्यानि॥

तथा। गोधूमशालिकलाययवषष्टिकान्नं

क्षीराज्यखण्डनवनीतसितामधूनि।

शुण्ठीकणाकणफलादिकपञ्चशाकं दुग्धादिदिव्यमुदकञ्च

यमीन्द्रपथ्यम्॥ मिष्टं सुमधुरं स्निग्धं रम्यं

धातुप्ररोहणम्। मनोऽभिलषितं भोज्यं योगी भोजनमाचरेत्॥

इति पथ्यानि॥

दत्तात्रेयसंहितायाम्॥ उपायञ्च प्रवक्ष्यामि शीघ्रं

योगस्य सिद्धये। क्षीरं घृतञ्च मिष्टान्नं मिताहारश्च

शस्यते। षट्कर्मभिर्गतस्थौल्यः कफमेदोमलार्त्तिगः।

प्राणायामं ततः कुर्यादनायासेन सिध्यति। प्राणायामैरेव

सर्वे विशुष्यन्ति मलाः प्रिये । मेदःश्लेष्मादिकं न्यस्य

कर्मषट्कं न सम्मतम्। सुमनस्कात्मको भावो यदि वायुं

p. 791) समभ्यसेत्। षट्कर्मयोगमाप्नोति पवनाभ्यासतत्परः।

ब्रह्मादयोऽपि त्रिदशाः पवनाभ्यासतत्पराः। अतः सिद्धिं

गतास्ते च तस्मात्पवनमभ्यसेत्। यावद्बद्धो मरुद्देहे

तावच्चित्तं निराशयम्। त्राटकञ्चेद्भ्रुवोर्मध्ये

तावत्कालभयं कुतः। विधिवत् प्राणसंरोधान्नाडीचक्रे विशोषिते। सुषुम्नावदनं भित्त्वा मुखाद्विशति मारुतः। मारुते मध्यसञ्चारे मनःस्थैर्यं प्रजायते। यो मनःसुस्थिरीभावः सैवावस्था मनोन्मनी। तत्सिद्धये विशेषज्ञश्चित्रान् कुर्वीत कुम्भकान्। विचित्रकुम्भकाभ्यासाद्विचित्रां सिद्धिमाप्नुयात्॥ अथ त्राटकम्॥ निरीक्षेन्निश्चलदृशा सूक्ष्मलक्ष्यं प्रयत्नतः। अश्रुसम्पातपर्यन्तं त्राटकं तन्महेश्वरि । यत्नतस्त्राटकं गोप्यं तथा हाटकपेटिका॥ विचित्रकुम्भकास्तु। सूर्यभेदनमुड्डाख्यं तमा शीत्कारशीतली। भस्त्रिका भ्रामरी मूर्च्छा प्लावनी सप्त कुम्भकाः। आदौ सूर्यभेदनम् ॥ आसने सुखदे योगी बद्ध्वा मुक्तासनं ततः। दक्षनाड्या समाकृष्य वह्निस्थं पवनं शनैः। आकेशाग्रान्नखाग्राद्वा निरोधावधि कुम्भयेत्। ततः शनैः सव्यनाड्या रेचयेत् पवनं सुधीः॥ अस्य फलम्॥ कपालशोधनं वातदोषघ्नं कृमिदोषहम्। पुनः पुनरिदं कार्यं सूर्यभेदनमुत्तमम्॥ १॥

अथ उड्डाख्यम्॥ मुखं संयम्य नासाभ्यां चाकृष्य पवनं शनैः। यथा लगति कण्ठान्ते हृदयावधि सस्वनः। पूर्ववत् कुम्भयेत् प्राणं रेचयेदिडया ततः॥ फलम्॥ स्लेष्मरोगहरश्चैतदनलैर्दीप्तबन्धनम्।

नाडीजलोदराधातुगण्डादोषविनाशनम्। गच्छता तिष्ठता कार्यमुड्डाख्यं कुम्भकन्त्विदम्॥ २॥

अथ शीत्कारः॥ शीत्कारञ्च सदा वक्रे घ्राणे चैव विजृम्भकम्। एवमभ्यासयोगेन कामदेवो द्वितीयकः॥ फलम्॥ योगिनीचक्रमासाद्य सृष्टिसंहारकारकः। न क्षुधा न तृषा निद्रा नैव मूर्च्छा प्रजायते। भवेत् स्वच्छन्ददेहश्च

p. 792) सर्वोपद्रववर्जितः। अनेन च विना सत्यं योगीन्द्रो भूमिमण्डले। रसनाताद्द मूलेन यः प्राणं सततं पिबेत्। यत्नादूर्द्ध्वं भवेत् सिद्धिः सर्वरोगक्षयो भवेत्॥ ३॥

अथ शीतली॥ जिह्वया वायुमाकृष्।य पूर्ववत् कुम्भकादितः। शनैस्तु घ्राणरन्ध्राभ्यां रेचयेदनिलं प्रिये ॥ फलम्॥ गुल्मप्लीहादिकान् दोषान् ज्वरं रेतःक्षयं सुधाम्। तृष्णाञ्च शीतली नाम कुम्भकोऽयं निहन्ति वै॥ ४॥

अथ भस्त्रिका॥ सम्यक् पद्मासनं बद्ध्वा समग्रीवोदरं प्रिये । मुखं संयम्य यत्नेन प्राणं घ्राणेन रेचयेत्। तथैव स्वशरीरस्थं पवनं चालयेत् स्फुटम्। तथा लगति

हृत्कण्ठकपाले श्वसनस्ततः। वेगेन पूरयेत् किञ्चित्
हृत्पद्मावधि मारुतम्। पुनर्विरेचयेत्तद्वत् पूरयेच्च पुनः पुनः।
यथैव लौहकारस्य भस्त्रां वेगेन चालयेत्। तथैव
स्वशरीरस्थं पवनं चालयेच्छनैः। यदा श्रमो भवेत् पूर्णो
बन्धने च तदा लघु। कारयेन्नासिकामध्यं तर्जनीभ्यां विना
दृढम्। कुम्भकं पूर्ववत् कृत्वा रेचयेदिडयानिलम्॥ फलम्॥
वातपित्तश्लेष्महरं शरीराग्निविवर्द्धनम्।
कुण्डलीरोधनञ्चक्रे भारघ्नं शुभदं शुचि।
ब्रह्मनाडीमुखे संस्थकफघ्नं मलनाशनम्।
सम्यञ्मात्रं समुद्भूतं ग्रन्थित्रयविभेदनम्। विशेषेणैव
कर्त्तव्यं भस्त्राख्यं कुम्भकं त्विदम्॥ ५॥

अथ भ्रामरी॥ वेदोद्घोषं पूरकं भृङ्गनादं
भृङ्गीनादं रेचकं मन्दमन्दम्।
योगीन्द्राणामेवमभ्यासयोगाच्चिते जाता काचिदानन्दवल्ली॥ ६।

अथ मूर्च्छा॥ पूरकान्ते गाढतरं बद्ध्वा जालन्धरं
शनैः। रेचयेन्मूर्च्छनाख्योऽयं मनोमूर्च्छा सुखप्रदा॥ ७
॥

अथ प्लावनी॥ अन्तःप्रवर्त्तिताधारमरुता पूरितोदरम्।

साक्षात्पयस्यगाधेऽपि प्लवते पद्मपत्रवत्॥ ८॥

रुद्रजामले उत्तरखण्डे॥ नेतीयोगविधानानि शृणुष्व

p. 793) वीरपूजित। येन सर्वमस्तकस्थकफानां दाहनं भवेत्।
सूक्ष्मसूत्रं दृढतरं प्रदद्यान्नासिकाविले। मुखरन्ध्रे
समानीय सन्धायैनं समाश्रयेत्। पुनः पुनः सदा योगी
यातायातेन घर्षयेत्। क्रमेण वर्द्धनं कुर्यात् सूत्रस्य
परमेश्वर । नेतीयोगेन नासाया रन्ध्रं निर्मलकं भवेत्।
वायोर्गमनकाले तु महासुखमिति प्रभो ॥ १॥

दन्तीयोगं ततः पश्चात् कुर्यात् साधकसत्तमः। दन्तधावनकाले
तु योगमेतं प्रकाशयेत्। दन्तधावनकाष्ठन्तु
सार्द्धहस्तैकसम्भवम्। नातिस्थूलं नातिसूक्ष्मं नवीनं
नम्रमुत्तमम्। अपक्कं यत्नतो ग्राह्यं मृणालसदृशं तरुम्।
गृहीत्वा दन्तकाष्ठं वत् प्रातःकाले प्रभक्षयेत्।
दन्तकाष्ठाग्रभागञ्च कनिष्ठाङ्गुलिपर्व च। एवं
दन्तावलीभ्याञ्च चर्वणं सुन्दरञ्चरेत्। तत् प्रक्षाल्य च नीरेण
शनैर्निर्गममाचरेत्। शनैः शनैः प्रकर्त्तव्यं

कायवाक्चित्तशोधनम्। यावन्न याति काष्ठाग्रं नाभिमूले त्वनाकुलम्। तावत् सूक्ष्मतरं ग्राह्यमवश्यं प्रत्यहञ्चरेत्। हृदये जलचक्रञ्च यावत् खण्डं न जायते। तावत्कालं सर्वदिने प्रभाते रदसाधनम्। हृदये कफभाण्डस्यं खण्डनं जायते ध्रुवम्। पवनागमने सौख्यं प्राप्नोति योगनिर्भरम्। खेचरत्वं लवणजमम्लत्वं कुम्भकोद्भवम्। मिष्टत्वं शाकदध्यन्नं द्विवारं रात्रिभोजनम्। अवश्यं योजयेद् योगी यदि योगमिहेच्छति। एकभागं स्वस्ववीजं द्विभागं तण्डुलं मतम्। उत्तमं पक्वमाहृत्य घृतदुग्धेन भक्षयेत्। अथवा केवलं दुग्धं तर्पणं कारयेद्बुधः। कुण्डलीं कुलरूपाञ्च दुग्धेन परितर्पयेत्। कुण्डलीतर्पणं योगी यदि जानाति शङ्कर । अनायासेन योगी स्यात् स ज्ञानीन्द्रो भवेद्ध्रुवम्॥

सप्तत्रिंशत्पटले॥

आनन्दभैरव्युवाच

धौतीयोगं प्रवख्यामि यत् कृत्वा निर्मलो भवेत्। अत्यन्तगुह्यं योगञ्च समाप्तिकारणं नृणाम्। यदि नो कुरुते योगं तदा

मरणमाप्नुयात्। धौतीयोगं विना नाथ कः सिध्यति महीतले।
सूक्ष्मात् सूक्ष्मतरं वस्त्रं द्वात्रिंशद्धस्तमानतः।
एकहस्तक्रमेणैव यः करोति शनैः शनैः।
यावद्वात्रिंशद्धस्तञ्च तावत्कालं क्रियाञ्चरेत्।
एतत्क्रियाप्रयोगेण योगी भवति तत्क्षणात्। क्रमेण मन्त्री सिद्धः स्यात् कालजालं वशं नयेत्। एतन्मध्ये चासनानि शरीरस्थानि चाचरेत्। दृढासने योगसिद्धिरिति तन्त्रार्थनिर्णयः। सिद्धे मनौ परावाप्तिः पञ्चयोगासनेन च। पार्श्वे चाष्टाङ्गुलं वस्त्रं दीर्घं द्वात्रिंशदीश्वर । एतत् सूक्ष्मं सुवसनं गृहीत्वा कारयेद् यती। जितेन्द्रियः सदा कुर्यात् ज्ञानध्याननिषेवणम्।
अनाचारेण हानिः स्यादिन्द्रियाणां बलेन च।
महापातकमुख्यानां सङ्गदोषेण हानयः। सम्भवन्ति महादेव तव योग्यं सुकर्म च। वृद्धो वा यौवनस्थो वा बालो वा यत्र तत्र वा एकवर्णाद्दीर्घजीवी स्यादमरो लोकवल्लभः।
मन्त्रसिद्धिरिष्टसिद्धिः स सिद्धीनामधीश्वरः। शनैः शनैः सदा कुर्यात् कालदोषविनाशनम्। हृदयग्रन्थिभेदेन सर्वावयववर्द्धनम्। धौतीयोगोद्भवं कामं महामरणकारणम्। तस्य त्यागं यः करोति सदैव देवविक्रमः।
दौतीयोगानन्तरं हि नेडणीकर्म चाचरेत्। नेडणीयोगमात्रेण आसने नेडणोपमः। नेडणीसाधनादेव चिरजीवी निरामयः।

तत्कारणं प्रवक्ष्यामि सावधानाऽवधारय। भुक्त्वा
मुद्गान्नपक्कञ्च वारैकं प्रतिपालयेत्। प्रतिपालयेत् स्वोदरञ्च
कठिनाशाविवर्जितः। पुनः पुनश्चालनञ्च कुर्यात्
स्वोदरमध्यकम्। कुलालचक्रवत् कुर्याद् भ्रमणञ्चोदरस्य च।
सर्वाङ्गचालनादेव कुण्डलीशक्तिचालनम्। चालनात्
कुण्डलीदेव्याश्चेतना सा भवेत् प्रभो । एतस्यानन्तरं देव

p. 795) क्षालनं परिकीर्त्तितम्। नाडीनां क्षालनादेव
सर्वविद्यानिधिर्भवेत्। वायुसिद्धिर्भवेत्तस्य पञ्चभूतस्य
सिद्धिभाक्। मुण्डासनं हि सर्वत्र सर्वदा कारयेद्बुधः।
ऊर्द्ध्वपद्मासनं कृत्वा अधोहस्ते जपं चरेत्। तदा
त्रिदिनमाकर्त्तुं समर्थो मुण्डिकासनम्। तदा हि सर्वनाड्यश्च
वशीभूता न संशयः। नाडीक्षालनयोगेन सिद्धिमाप्नोति
साधकः नेडणीं यो न जानाति स कथं कर्त्तुमुद्यतः। स धीरो
मानसचरो मतिमान् स जितेन्द्रियः। यो नेडणीयोगसारं
कर्त्तुमुद्यमपारगः। स चावश्यं क्षालनञ्च
कुर्यान्नाड्यादिसाधनम्। नेडणीयोगमार्गेण
नाडीक्षालनतत्परः। भवत्येव महाकाल राजराजेश्वरो यथा।
केवलं प्राणवायोश्च धारणात् क्षालनं भवेत्। विना
क्षालनयोगेन देहशुद्धिर्न जायते। क्षालनं नाडिकादीनां

कफपित्तादिनाशनम्। करोति यत्नतो योगी मुण्डासनानिलाशनात्।
वायुग्रहणमेवं हि नेडणीवशकालके। न कुर्यात् केवलं नाथ
अन्यकाले सदाचरेत्। यावन्नेडणीं न जानाति तवद्वायुं न
सम्पिबेत्। बहुतरं न संग्राह्यं वायोरोगमलादिकृत्। केवलं
श्वासगणनं यावन्नेडणी न सिद्ध्यति। पञ्चामरासाधनाच्च
पञ्चवायुवशो भवेत्॥

ग्रहजामले॥ मेदःश्लेष्माधिकः पूर्वं षट्कर्माणि
समाचरेत्। अन्यथा नाचरेत्तानि दोषाणामप्यभावतः। धौती च
गजकरिणी वस्ती लौली नती तहा। कपालभाती चैतानि षट् कर्माणि
महेश्वरि। कर्मषट्कमिदं गोप्यं घटशोधनकारणम्।
विचित्रगुणमाधाय पूज्यते योगिपुङ्गवः॥ तत्र धौती॥
चतुरङ्गुलविस्तारं हस्तपञ्चदशेन तु। गुरूपदिष्टमार्गेण
सिक्तं वस्त्रं शनैर्ग्रसेत्। ततः प्रत्याहरेच्चैतत् क्षालनं
धौतकर्म तत्। कासः श्वासः प्लीहा कुष्ठं कफरोगाश्च
विंशतिः। धौतीकर्मप्रसादेन शुध्यन्ते च न संशयः॥ १॥

p. 796) अथ गजकरिणी॥ उदरगतपदार्थमुद्वमन्ती
पवनमपानमुदीर्य कण्ठकाले। क्रमपरिचयस्य
पायुमार्गाद्गजकरिणीति निगद्यते सा॥ २॥

अथ वस्ती॥ नाभिनिम्नजले पायुं न्यस्य चलोत्कटासनम्। आधारानञ्जनं कुर्यात् क्षालनं वस्तिकर्म तत्। गुल्मप्लीहोदरा रोगा वातपित्तकफोद्भवाः। वस्तिकर्मप्रभावेण सर्वरोगक्षयो भवेत्। धात्विन्द्रियान्तःकरणप्रसादं दद्याच्च कान्तिं दहनप्रदीप्तिम्। अशेषदोषोपचयं निहन्यादभ्यस्यमानं जनवस्तिकर्म॥ ३॥

अथ लौली॥ भूम्यादावतिवेगेन तुन्दं सव्यापसव्यतः। नतांसो भ्रामयेदेषा लौली स्यात् परमेश्वरि ॥ फलम्॥ मन्दाग्निसन्दीपनपाचकादिसन्दीपकानन्दकरी सदैव। अशेषदोषामयशोषणी च हठक्रिया मौलिरियञ्च लौली॥ ४॥

अथ नती॥ सूत्रं वितस्तिमात्रन्तु नासानाले प्रवेशयेत्। मुखेन गणयेच्चैषा नती स्यात् परमेश्वरि ॥ फलम्॥ कपालशोधनी कण्ठ्या दिव्यदृष्टिप्रदायिनी। य ऊर्द्ध्वं जायते रोगो नमयत्याशु तं नती॥ एवञ्च नेती नतीति नाममात्रभेदः। नेती तु पूर्वमुक्ता॥ ५॥

अथ कपालभाती॥ भस्त्रेव लौहकारे च कर्णपूरौ ससम्भ्रमौ।

कपालभाती विख्याता कफदोषन्निनाशिनी। इति कपालभाती॥ ६॥

दत्तात्रेयसंहितायाम्॥ ततोऽधिकतराभ्यासाद्बलमुत्पद्यते भृशम्। येन भूचरसिद्धिः स्याद् भूचराणां जये क्षमः। व्याघ्रो द्द लापो वन्यो वा ऋक्षो वा गज एव वा। सिंहो वा म्रियते तेन योगिनो हस्तताडनात्। कन्दर्पस्य यथा रूपं तथा तस्यापि योगिनः। तस्मिन् काले महाविघ्नो योगिनः स्यात् प्रमादतः। तद्रूपवशगा नार्यः काङ्क्षन्ते तस्य सङ्गमम्। यदि सङ्गं करोत्येव विन्दुस्तस्य विनश्यति। आत्मक्षयो विन्दुहीनादसामर्थ्यञ्च जायते।

p. 797) तस्मात् स्त्रीणां सङ्गवर्जं कुर्यादत्यन्तमादरात्। योगिनस्तस्य सिद्धिः स्यात् सततं विन्दुधारणात्। तस्मात् सर्वप्रयत्नेन रक्ष्यो विन्दुर्हियोगिना। ततो रहस्यमाविष्टः प्रणवं प्लुतमात्रया। जपेत् पूर्वार्जितानां हि पापानां नाशहेतवे। सर्वविघ्नहरश्चायं प्रणवः सर्वदोषहा। एवमभ्यासयोगेन सिद्धिरारम्भसम्भवा। ततो भवेद् घटावस्था पवनाभ्यासिनः सदा। प्राणापानौ मनो वायु जीवात्मपरमात्मकौ। अन्योन्यस्याविरोधेन एवं सङ्घटते यथा। तद्वद् घटद्वयावस्था प्रसिद्धा योगिनां स्मृता। तत्र चिह्नानि यानि स्युस्तानि वक्ष्यामि कानिचित्। पूर्वं यः

कथितोऽभ्यासश्चतुर्द्धा तं परित्यजेत्। दिवा वा यदि वा रात्रौ मासमात्रं समभ्यसेत्। एकवारं प्रतिदिनं कुर्यात् केवलकुम्भकम्। प्रत्याहारो हि एवं स्यादेवं कुर्युर्हि योगिनः। इन्द्रियाणीन्द्रियार्थेभ्यो यत् प्रत्याहरते स्फुटम्। योगी कुम्भकमास्थाय प्रत्याहारः स उच्यते। यद्यत् पश्यति चक्षुर्भ्यां तत्तदात्मनि भावयेत्। यद्यत् शृणोति कर्णाभ्यां तत्तदात्मनि भावयेत्। जिह्वया यद्रसयति तत्तदात्मनि भावयेत्। त्वचा यदङ्गं स्पृशति तत्तदात्मनि भावयेत्। एवं ज्ञानेन्द्रियाणां हि तत्संख्याभिस्तु सञ्चयेत्। यामं यामं प्रतिदिनं योगी यत्नादतन्द्रितः। तदा विचित्रसामर्थ्यं जायते योगिनो ध्रुवम्। दूरश्रुतिर्दूरदृष्टिः क्षणाद्दूरगतिस्तथा। वाक्सिद्धिः कामचारत्वं तथाऽदृश्यपदं भवेत्। मलमूत्रोपलेपेन लौहानां स्वर्णता तथा। खेचरत्वं तथा स्याच्च सतताभ्यासयोगतः। तदा बुद्धिमता भाव्यं योगिना योगसिद्धये। एते विघ्ना महासिद्ध्यै न रमेत्तेषु बुद्धिमान्। न शीलयेत्तु कस्मैचित् स्वसामर्थ्यं हि सर्वदा। कदाचिद्दर्शयेन्मर्त्यो भक्तियुक्ताय वा पुनः। यथा मूर्खो यथा मूढो यथा वधिर एव वा। तथा वर्त्तेत लोकेषु

p. 798) स्वसामर्थस्य गुप्तये। नोचेत् शिष्या हि बहवो भवन्त्येव न

संशयः। स्वस्वकार्येषु योगीन्द्रं प्रार्थयन्ते जनाः सदा। तत्कर्मकरणव्यग्रः स्वाभ्यासे शिथिलो भवेत्। अभ्यासेन विहीनस्तु ततो लौकिकतां व्रजेत्। अविस्मृत्य गुरोर्वाक्यमभ्यासात्तदहर्निशम्। एवं भवेद्घटावस्था सहजाभ्यासयोगतः। अनभ्यासेन योगोऽयं वृथा गोष्ठ्या न सिध्यति। तस्मात् सर्वप्रयत्नेन योगमेतं समभ्यसेत्। ततः परिचयावस्था जायतेऽभ्यासयोगतः। वायुः परिचितो यत्नादात्मना सह कुण्डलीन्। बोधयित्वा सुषुम्नायां प्रविशेदविरोधतः। वायुना सह चित्तन्तु प्रविशेत्तु महापथम्। महापथं श्मशानञ्च सुषुम्नाप्येकमेव हि। नाना मतान्तरे भेदाः फलभेदो न विद्यते। वर्त्तमानं भविष्यञ्च भूतार्थञ्चापि वेत्यसौ। यस्य चित्तं सपवनं सुषुम्नां प्रविशेद्दिवा। भव्याभव्ये च विज्ञाय योगी रहसि यत्नतः। पञ्चधा धारणं कुर्यात् तत्तद्भूतभयापहम्॥

ग्रहजामले चतुर्दशपटले॥ सशैलवनधात्रीणां यथाधारोऽहिनायकः। सर्वेषां हठतन्त्राणां तथाधारा हि कुण्डली॥ अहिनायकोऽनन्तः॥ सुप्ता गुरुप्रसादेन यदा जागर्त्ति कुण्डली। तदा पद्मानि सर्वाणि भिद्यन्ते ग्रन्थयोऽपि च। प्राणस्य शून्यपदवी तदा राजपथायते। तदा चित्तं निरालम्बं तदा कालस्य वञ्चनम्॥ शून्यपदवी सुषुम्ना तत्रैवोक्ता यथा॥

सुषुम्ना शून्यपदवी ब्रह्मरन्ध्रं महापथः। श्मशानं
शङ्खिनी मध्यमार्गश्चेत्येकवाचकम्॥ राजपथायत इत्यनेन
सुखगमनं व्यज्यते॥ तस्मात्सर्वप्रयत्नेन प्रबोधयितुमीश्वरीम्
। ब्रह्मरन्ध्रमुखे सुप्तां मुद्राभ्यासं समाचरेत्।
महामुद्रा महाबन्धो महावेदश्च खेचरी। उड्डीयानं
मूलबन्धो बन्धो जालन्धराभिधः। करणं विपरीताख्यं

p. 799) विज्रिनीशक्तिचालनम्। इदन्तु मुद्रादशकं
जरामरणनाशनम्। देवेशि कथितं
दिव्यमष्टैश्वर्यप्रदायकम्। वल्लभं सर्वसिद्धानां
दुर्लभं मरुतामपि। गोपनीयं प्रयत्नेन यथा रत्नकरण्डकम्
। कस्य चिन्नैव वक्तव्यं कुलस्त्रीसुरतं यथा॥

अथ महामुद्रा॥ दत्तात्रेयसंहितायाम्॥ महामुद्रां
प्रवक्ष्यामि भैरवोक्तां समादरात्। पार्ष्णिं वामस्य पादस्य
योनिस्थाने नियोजयेत्। प्रसाद्य दक्षिणं पादं हस्ताभ्यां
धारयेद्दृढं। चिवुकं हृदये न्यस्य पूरयेद्वायुना पुनः।
कुम्भकेन यथाशक्ति धारयित्वा च रेचयेत्। वामाङ्गेन
समभ्यस्य दक्षिणाङ्गेन चाभ्यसेत्। प्रसारितस्तु यः
पादस्तमूरूपरि विन्यसेत्॥ ग्रहजामले॥ पादमूलेन वामेन

योनिं सम्पीड्य दक्षिणम्। पादं प्रसारितं कृत्वा कराभ्यां धारयेद् दृढम्। कण्ठे वक्रं समारोप्य धारयेद्वायुमूर्द्ध्वतः। यथा दण्डाहतः सर्पो दण्डाकारः प्रजायते। ऋज्वीभूता तथा शक्तिः कुण्डली सहसा भवेत्। तदासौ मरणावस्था जायते द्विपुटीश्रिता। अतः शनैः शनैरेव रेचयेत्तं न वेगतः। इयं खलु महामुद्रा तव स्नेहात् प्रकाश्यते॥ फलम्॥ महाक्लेशादयो दोषाः क्षीयन्ते मरणादयः। महामुद्रा तु तेनैव समाख्याता महेश्वरि। चन्द्राङ्गेन समभ्यस्य सूर्याङ्गेन समभ्यसेत्। यावत्संख्या भवेत्तुल्या ततो मुद्रां विसर्जयेत्। न हि पथ्यमपथ्यं वा रसाः सर्वेऽपि नीरसाः। अपि भुक्तं विषं घोरं पीयूषमिव जीर्यति। क्षयकुष्ठगुदावर्त्ता गुदप्लीहपुरोगमाः। तस्य दोषाः क्षयं यान्ति महामुद्राञ्च योऽभ्यसेत्। कथितेयं महामुद्रा जरामरणनाशिनी। गोपनीया प्रयत्नेन न देया यस्य कस्यचित्॥

अथ महाबन्धः॥ अयमेव महाबन्धो मुद्रां बद्ध्वा यमभ्यसेत्। महाबन्धस्थितो भूमौ स्फिचौ सन्ताडयेच्छनैः।

p. 800) अयमेव महाबन्धः सिद्धैरभ्यस्यते नरैः। पार्ष्णिं वामस्य पादस्य योनिस्थाने नियोजयेत्। वामोरूपरि संस्थाप्य

दक्षिणं चरणं तथा। पूरयित्वा मुखे पाप हृदये चिबुकं
दृढम्। निष्पीड्य योनिमाकुञ्च्य मनोमध्ये नियोजयेत्। रेचयेच्च
शनैरेवं महाबन्धोऽयमुच्यते। अमुं योगी महाबन्धं
महासिद्धिप्रदायकम्। वामाङ्गञ्च समभ्यस्य दक्षाङ्गे
पुनरभ्यसेत्। अयञ्च सर्वनाडीनामूर्द्धं गतिनिरोधकः।
त्रिवेणीसङ्गमं धत्ते केदारं प्रापयेन्मनः।
रूपलावण्यसम्पन्ना यथा स्त्री पुरुषं विना।
महामुद्रामहाबन्धौ निष्फलौ वेधवर्जितौ॥ २॥

अथ महावेधः॥ महाबन्धस्थितो योगी कृत्वा
प्रकरमेकधा। वायुना गतिमावृत्य विधृतं कण्ठमुद्रया।
समस्तयुक्तो यो भूमौ स्फिचौ सन्ताडयेच्छनैः। पुटद्वयं
समाकृष्य वायुश्चरति सत्वरः। सोमसूर्याग्निसन्दग्धो जायते
चामृताय वै। मृतावस्था समुत्पन्ना ततो मृत्युभयं कुतः।
राजदण्डश्च जिह्वायां बन्धः शस्तो भवेद्धितः।
महावेधसमाभ्यासो महासिद्धिप्रदायकः। बन्धत्रयं
महागुह्यं जरामरणनाशनम्। वह्निवृद्धिकरं
चैवाणिमाद्यष्टगुणप्रदम्। अबाधं हरते पापं यामं
यामं दिने दिने। पुण्यसद्भारसभावं पापौघातिहरं सदा।
सम्यक् शिक्षावतामेव स्वप्नं प्रथमसाधने। वह्निं

स्त्रीपथसेवनमादौ मज्जनमाचरेत्॥ ३॥

अथ खेचरी॥ नाऽशनं सिद्धसदृशं न कुम्भः केवलोपमः। न खेचरीसमा मुद्रा न नादसदृशो लयः। छेदनं चालनं देहे कलाक्रमेण बर्द्धयेत्तावत्। सा यावद् भ्रूमध्यं स्पृशति साक्षात् खेचरीसिद्धिः॥ दत्तात्रेयसंहितायाम्॥ अन्तः कपालविवरे जिह्वां व्यावृत्य बन्धयेत्। भ्रूमध्यदृष्टिरप्येषा मुद्रा भवति खेचरी॥ ग्रहजामले॥ स्नुहीपत्रनिभं शस्त्रं सुतीक्ष्णं सिग्धनिर्मलम्। मर्यादायै ततस्तेन रोममात्रं समुच्छिनेत्। कृत्वा सैन्धवपथ्याभ्यां चूर्णिताभ्यां प्रवर्त्तते॥ पथ्या हरीतकी॥ पुनः सप्तदिने पराप्ते रोममात्रं समुच्छिनेत्। एवं क्रमेण षण्मासं नित्ययुक्तः समाचरेत्। षण्मासाद्रसनामूलशिराबन्धो विनश्यति॥ योगिनी वेणुवल्कलधारेणेदानीं रसनामूलमेवं क्रमेण छिन्दन्ति॥ अथ वागीश्वरीधाम शिरो वस्त्रेण वेष्टयेत्। शनैरुत्कर्षयेद् योगी कालवेलाविधानवित्। वागीश्वरीधाम जिह्वा तस्याः शिरोऽग्रभागः। वस्त्रप्रमाणमपि तत्रैव॥ वितस्तिप्रमितं दैर्घ्यं विस्तारं चतुरङ्गुलम्। मृदुलं धवलं प्रोक्तं वेष्टनालम्बनक्षणम् पुनः षण्मासमात्रेण पुनः सङ्कर्षणात् प्रिये । भ्रूमध्यावधि वर्द्धेत

तिर्यक्कर्णविलावधि। अधस्तच्चिवुकं मूलं प्रयाति क्रमकारिता।
क्रोशादूर्द्धं चङ्क्रमति तिर्यक् सङ्ख्यावधि प्रिये । पुनः
संवत्सरे देवि द्वितीये चैव लीलया। ब्रह्मरन्ध्रत आवृत्य तिष्ठेत्
पवनवन्दिते। सताद्द मूलं सङ्घृष्य सप्तवासरमात्मनि।
पूर्वोक्तेन प्रकारेण मलं सर्वं विशोधयेत्। अङ्गुल्यग्रेण
सङ्घृष्य जिह्वां तत्र निवेशयेत्। शनैः शनैर्मस्तकान्तं
महावज्रकवाटभित्। पूर्वं विजयतां विद्या विख्याता
भुवनत्रये। अस्यां षडङ्गं कुर्वीत तथा षट्चक्रभिन्नया। खे
निरस्तसकलक्रियाक्रमयाचिता चरति। शाश्वतोदये
सशिरोभूसमवायकारिणी॥ क्रमेणैव प्रकर्त्तव्याभ्यासेन
वरवर्णिनि । युगपद्विलये तस्य शरीरं विलयं व्रजेत्।
तस्माच्छनैः शनैः कार्योऽभ्यासिना योगकः प्रिये । एवं
वर्षत्रयं कृत्वा ब्रह्मद्वारं विशोद्धुवम्। षट्चक्राणि
विभेद्य शक्तिभुजगीं प्रोत्थाप्य मूलस्थितां भित्त्वा
ग्रन्थितमञ्च पश्चिमशिराः प्राकाररूपं महत्। नीत्वा
प्राणमहः शिरोऽपि विमलं निर्मथ्य चित्तेन तत् तल्लिङ्गं

p. 802) पिबतेन्दुमण्डलगलन्मुक्तः स साक्षाच्छिवः॥
नित्यं यस्तूर्द्धजिह्वो यदि पिबति पुमान् सप्तधारामृतौघं
सुस्वादं शीतलाङ्गं दुरितभयहरं क्षुत्पिपाशानिवारम्।

पिण्डस्थैर्यं हि तस्मान्मृड इव निवसन्मृत्युरोगात्तरेत्तु
दौर्भाग्यं याति नाशं प्रसरति सकलं त्रित्रिकालो भ्रमित्वा॥
कपालकुहरे जिह्वा प्रविष्टा विपरीतगा। भ्रुवोरन्तर्गता
दृष्टिर्मुद्रा भवति खेचरी। कलां पराङ्मुखीं कृत्वा त्रिपथे
परिवर्त्तयेत्। सा भवेत् खेचरीमुद्रा व्योमचक्रं तदुच्यते।
रसनामूर्द्धगां कृत्वा क्षणार्द्धं यस्तु तिष्ठति।
विषयान्मुच्यते योगी व्याधिमृत्युजरादिभिः। न रोगमरणं तस्य,
न निद्रा न क्षुधा तृषा। न च मूर्च्छा भवेत्तस्य यो मुद्रां
वेत्ति खेचरीम्। पिड्यते न स रोगेण लिप्यते न स कर्मणा। बाध्यते
न स कालेन यस्य मुद्रास्ति खेचरी। चित्तं चरति खे यस्मात् जिह्वा
चरति खे गता। तेनैषा खेचरी नाम मुद्रासननमस्कृता।
खेचर्यामुदितं येन विवरं लम्बिकोर्द्धकम्। तस्य न क्षरते
विन्दुः कामिन्याश्लेषितस्य च। चलितोऽपि यदा विन्दुः सम्प्राप्तो
योनिमण्डले। व्रजेत्तूर्द्धं हठाच्छक्त्या निबद्धो योनिमुद्रया।
ऊर्द्धजिह्वः स्थिरो भूत्वा सोमपानं करोति यः। मासार्द्धेन
न सन्देहो मृत्युं जयति योगवान्। इन्धनानि यथा वह्निस्तेन
वर्त्तिश्च दीपकः। तथा सोमलतापूर्णं देहं देही न मुञ्चति।
नित्यं सोमकलापूर्णं देहं देही न मुञ्चति। नित्यं
सोमकलापूर्णं शरीरं यस्य योगिनः। तक्षकेणापि दष्टस्य
विषं तस्य न सर्पति। तस्मादिदं प्रकुर्वीत नित्ययुक्तः समाहितः।

रसनां शेषयेदूर्द्ध्वं पिबेदमरवारुणीम्। कुलीनं तमहं वन्दे इतरे कुलघातकाः। गोशब्देनोदिता जिह्वा तत्प्रवेशो हि ताद्द नि। गोमांसभक्षणं तत्तु महापातकनाशनम्। जिह्वाप्रवेशदं भूतवायुना स्थापितं खद्द । चन्द्राद् गलति संसारं

p. 803) तत्स्यादमरवारुणी। मूद्र्ध्नः षोडशपत्रपद्मगलितं प्राणादवाप्तं हठादूर्द्ध्वास्यो रसनां नियम्य विवरे शक्तिं परां चिन्तयेत्। तत्कल्लोलकलाजलञ्च विमलं धारामृतं यः पिबेत् निर्दोषः स मृणालकोमलवपुर्योगी चिरं जीवति॥ चुम्बन्ती यदि लम्बिकाग्रमनिशं जिह्वा रसस्यन्दिनी सक्षारा कटुकाथ दुग्धसद्दशी क्षीराज्यतुल्याथवा। व्याधीनां हरणं जरान्तकरणं शास्त्राङ्गमोद्गीरणं तस्य स्यादमरत्वमष्टगुणवत् सिद्धाङ्गनाकर्षणम्॥ एकं सृष्टिमयं वीजं एका मुद्रा च खेचरी। एको देवो निरालम्बो ह्येकावस्था मनोन्मनी। सुचिरं ज्ञानजनकं पञ्चतत्त्वसमन्वितम्। तिष्ठन्ती खेचरीमुद्रा तस्मिन् शून्ये निरञ्जने॥ ४॥

अथ मूलबन्धः॥ पार्ष्णिभागेन सम्पीड्य योनिमाकुञ्चयेद्गुदम्। अपानमूर्द्ध्वमुत्थाप्य

मूलबन्धोऽयमुच्यते। अधोगतमपानञ्च ऊर्द्ध्वङ्गं कुरुते हठात्। आकुञ्चनेन तं वच्मि मूलबन्धं महेश्वरि । योनिपार्ष्णी तु सम्पीड्य वायुमाकुञ्चयेद्बलात्। वारं वारं तथा चोर्द्ध्वं समायाति समीरणः। प्राणादिनोदितो विन्दुर्मूलंबन्धेन चैकतः। ततो योगस्य संसिद्धिः प्रमा तत्र न संशयः। प्राणापानौ च पवनौ मूलबन्धेन चैकताम्। गत्वा योगस्य संसिद्धिं गच्छतो नात्र संशयः। अपानप्राणयोरैक्यात् क्षयान्मूत्रपुरीषयोः। युवा भवति वृद्धोऽपि सततं मूलबन्धनात्। अपाने चोर्द्ध्वगे याते सम्प्राप्ते योनिमण्डले। तदानना शिखा दीर्घा वर्द्धते वायुना हता। ततो यातं बद्धयोनौ प्राणेषु च स्वरूपकम्। तैलाभ्यक्तं प्रदीपन्तु ज्वलनो देहगस्तथा। तेन कुण्डलिनी सुप्ता सन्तप्ता संविवर्द्धते। दण्डाहता भुजङ्गीव निश्वस्य ऋजुतां व्रजेत्। विलं प्रविष्टैव ततो ब्रह्मनाड्यन्तरं व्रजेत्। तस्मान्नित्यम् मूलबन्धः कर्त्तव्यः परमेश्वरि ॥ ५॥

p. 804) अथ उड्डीयानम्॥ बद्धो येन सुषुम्नायां प्राण उड्डीयते ततः। तस्मादुड्डीयनाख्योऽयं ज्ञातव्यः परमेश्वरि । उड्डीनं कुरुते यस्मादधिश्रान्तो महाखगः। उड्डीयानं तदेव स्यात् तत्र बन्धो निगद्यते। उदरे पश्चिमे भालं

नाभेरूर्द्धञ्च कारयेत्। उड्डीयानो ह्यसौ बन्धो मृत्युमातङ्गकेशरी। उड्डीयानन्तु सहजं कथ्यते परमेश्वरि । अभ्यासेन वितन्द्रस्तु वृद्धोऽपि तरुणो भवेत्। नाभेरूर्द्धमधश्चापि ताद्दं कुर्यात् प्रयत्नतः। षण्मासाभ्यासतो मृत्युं जयत्येव न संशयः। सति वज्रासने पादौ कराभ्यां धारयेद् दृढम्। फल्गुदेशसमीपे च बन्धं तत्र प्रपीडयेत्। पश्चिमे ताद्द मुदरे कारयेद्धृददये गले। शनैः शनैर्यथा प्राणस्तुन्दसिद्धिं स गच्छति। सर्वेषामेव बन्धानामुत्तमोऽप्युड्डियानकः। उद्डीयाने महेशानि मुक्तिः स्वाभाविकी भवेत्॥ दत्तात्रेयसंहितायाञ्च॥ उड्डीयानञ्च सहजं मुनिभिः कथितं सदा। अभ्यसेद् यस्तु सत्त्वस्थो वृद्धोऽपि तरुणायते। नाभेरूर्द्धमधश्चापि प्राणं कुर्यात् प्रयत्नतः। षण्मासमभ्यसेन्मृत्युं जयत्येव न संशयः। मूलबन्धस्तु यो नित्यमभ्यसेत् स तु योगवित्॥ ६॥

अथ जालन्धरबन्धः॥ ग्रहजामले॥ कण्ठमाकुञ्च्य हृदये स्थापयेच्चिवुकं दृढम्। बन्धो जालन्धराख्योऽयममृताव्ययकारकः॥ दत्तात्रेयसंहितायाञ्च । कण्ठमाकुञ्च्य हृदये मारुतं धारयेद् दृढम्। जालन्धरे बन्ध एष ह्यमृतद्वयपारगः। नाभिस्थाग्निकपालस्थं

सहस्रकमलच्च्युतम्। अमृतं सर्वदास्रावं विन्दुत्वं याति देहिनाम्। यथाग्निश्च तदमृतं न पिबेच्च पिबेत् स्वयम्। याति पश्चिममार्गेण एवमभ्यासतः सदा। अमृतं कुरुते देहं जालन्धरमतोऽभ्यसेत्॥ ग्रहजामले॥ बध्नाति हि शिराजालमध्ये गामि न भोजनम्। अतो जालन्धरो बन्धः कण्ठे दुःखौघनाशनः। जालन्धरे कृते बन्धे कण्ठे सङ्कोचने कृते।

p. 805) न पीयूषं पचत्यग्नौ न च वायुः प्रधावति। कण्ठसङ्कोचनेनैव द्वे नाड्यौ कुम्भयेद् दृढम्। मध्यचक्रमिदं ज्ञेयं षोडशाधारबन्धनम्। बन्धत्रयमिदं श्रेष्ठं महासिद्धनिषेवितम्। सर्वेषां हठतन्त्राणां कुर्यात् साधनमीश्वरि । अथ आकुञ्चनेनाशु कण्ठसङ्कोचने कृते। मध्ये पश्चिमताद्द ः स्यात् प्राणस्तु मध्यनाडिगः। ब्रह्मस्थानस्थितो बोधः प्रयाति पवनालयम्। ततो न जायते मृत्युर्नास्य जरादिकं तथा। मूलस्थानं समाकुञ्च्य उड्डानाख्यन्तु कारयेत्। इडाञ्च पिङ्गलां बद्धा वाहयेत् पश्चिमां दिशम्। अनेनैव विधानेन प्राप्नोति पवनो लयम्। ततो न जायते मृत्युर्जरारोगादिकं तथा॥

अथ विपरीतकरणम्। यत्किञ्चित् स्रवते चन्द्रादमृतं

दिव्यरूपिणम्। तत्सर्वं ग्रसते सूर्यस्तेन पिण्डो जरायुतः। तत्रास्ति करणं दिव्यं सूर्यस्य मुखबन्धनम्। गुरुपदेशतो ज्ञेयं न च शास्त्रार्थकोटिभिः। ऊर्द्ध्वं नाभिरधस्तात्तु रूर्द्ध्वं भानुरधः शशी। करणं विपरीताख्यं सर्वव्याधिविनाशनम्। नित्यमभ्याससंयुक्तं जठराग्निविवर्द्धनम्। स्वल्पाहारो निराहारः क्षुधार्त्तो बलहा भवेत्। आहारं बहुलं तस्य सम्पाद्य साधकस्य तु। अल्पाहारो यदि भवेदग्निर्देहं दहेत् क्षणात्। अधः शिराश्चोर्द्ध्वपादः क्षणं स्यात् प्रथमे दिने। क्षणाच्च किञ्चिदधिकमभ्यसेद्धि दिने दिने। बलितं पलितञ्चैव षण्मासाद्धि विनाशयेत्। मासमात्रन्तु यो नित्यमभ्यसेत् स तु कर्णजित्॥ दत्तात्रेयसंहितायामपि॥ पक्षिणा गुदमायुज्य वाममार्गं चरेद्बलात्। वारं वारं यथा चोर्द्ध्वं समायाति समीरणः। प्राणापानौ नादविन्दू मूलबन्धेन चैकताम्। महायोगस्य संसिद्धिं याति नास्त्यत्र संशयः। करणं विपरीताख्यं सर्वव्याधिविनाशनम्। नित्यमभ्यासयुक्तस्य जठराग्निविवर्द्धनम्। आहारा बहवस्तस्य स्वल्पाद्याः साङ्कृते ध्रुवम्। अल्पाहारो यदि भवेदग्निर्दाहं

p. 806) करोति वै। ऊर्द्ध्वं राहुरधश्चन्द्रस्तथा दृष्टिश्च साङ्कृते । अधःशिराश्चोर्द्ध्वपादः क्षणं स्यात् प्रथमे दिने।

क्षणात्तु किञ्चिदधिकमभ्यसेत्तु दिने दिने। बलिश्च पलितश्चैव षण्मासोर्द्धं न दृश्यते। याममात्रन्तु यो नित्यमभ्यसेत् स तु योगवित्॥

अथ वज्रोणी॥ वज्रोणी चामरोणी च सयोनी च त्रिधा मतः। तत्तासां लक्षणं वक्ष्ये कर्त्तव्यञ्च विशेषतः। स्वेच्छया वर्त्तमानोऽपि योगोक्तनियमं विना। वज्रोणीं यो विजानाति स योगी सिद्धिभाजनः। अधोभागे गतं विन्दुमभ्यासेनोर्द्धमाहरेत्। चलितस्तु स्वकं विन्दुमूर्द्धमाकृष्य रक्षयेत्। तत्र वस्तुद्वयं वक्ष्ये दुर्लभं यस्य कस्यचित्। क्षीरञ्चैव द्वितीयञ्च नारी च वशवर्त्तिनी। मेढ्रेण च शनैः सम्यक् कृत्वाकुञ्चनमभ्यसेत्। पुरुषो वापि नारी वा वज्रोणी सिद्धिमाप्नुयात्। प्रयत्नतः शराजालं फुत्कारैः कम्बु वर्द्धयेत्। शनैः शनैः प्रकुर्याच्च वायुसञ्चारकारणात्। भार्याभगगतं विन्दुमभ्यासेनोर्द्धमाहरेत्। बलितं पलितं विन्दुं विन्दुमाकृष्य रक्षयेत्। एवनतु रक्षयन् विन्दुं मृत्यु जयति योगवान्। मरणं विन्दुपातेन जीवितं विन्दुधारणात्। सुगन्धिर्योगिनो देहो जायते विन्दुधारणात्। यावद्बिन्दुः स्थितो देहे तावन्मृत्युभयं कुतः। मलायत्तं बलं पुंसां शुक्रायत्तञ्च जीवितम्। तस्माच्छुक्रं मलञ्चैव रक्षणीयं

प्रयत्नतः। ऋतुमत्या रजोऽप्येवं स्वयं विन्दुश्च रक्षयेत्।
मेढ्रादाकर्षयेदूर्द्ध्वं सम्यगभ्यासयोगतः
सहयोन्यमरोणी च वज्रोण्या एव भेदतः। वज्रोणी
मैथुनादूर्द्ध्वं स्त्रीपुंसोः साङ्गलेपनम्। आसीनयोः
सुखेनैव सूक्ष्मव्यापारयोः क्षणात्। सहयोनिरियं प्रोक्ता
श्रद्धया परमेश्वरि । पित्तोल्वणत्वात् प्रथमाञ्च धारां
विहाय निःसारतयान्त्यधाराम्। निषेवते शितलमध्यधारां

p. 807) कफोणिकैः खण्डमतेरमर्यः। अमरीं यः पिबेन्नित्यं
न्यासं कुर्वन् दिने दिने। वज्रोणीमभ्यसेदेवममरोणीति कथ्यते।
यक्षणाकुञ्चनेनोर्द्ध्वं या रजः सा हि योगिनी। अतीतानागतं
ज्ञातं खेचरी च प्रजायते। देहसिद्धिश्च लभते
वज्रोण्यभ्यासयोगतः। अयं शुभकरो योगो भोगान् भुङ्क्ते
विमुक्तिदः॥ ९॥

अथ शक्तिचालनम्॥ कुण्डलाङ्गी कुण्डलिनी भुजङ्गी
शक्तिरीश्वरी। कुण्डल्यरुन्धती देवी शब्दाः पर्यायवाचकाः।
गङ्गायमुनयोर्मध्ये बाला रण्डा तपस्विनी। बलादाकृष्य
गृह्णीयात्तद्विष्णोः परमं पदम्। पुच्छं प्रगृह्य भुजगीं
सुप्तामुद्बोधयेदपि। निद्रां विहाय सा ऋज्वी ऊर्द्ध्वमुत्तिष्ठते

हठात्। वज्रासनस्थितो योगी चालयित्वा तु कुण्डलीम्।
कुर्यादनन्तरं भस्त्रां कुण्डलीमाशु बोधयेत्।
मृत्युवज्रगतस्यापि ततो मृत्युभयं कुतः।
मुहूर्त्तद्वयपर्यन्तं निर्भयं चालनादसौ। ऊर्द्ध्वमाकर्षते
किञ्चित् सुषुम्नां कुण्डलीगताम्। तेन कुण्डलिनी तस्याः
सुषुम्नायाः समुद्गताः। जहाति नित्यं प्राणोऽयं सुषुम्नां
ब्रजति स्वनः। तस्मात् सञ्चालयेन्नित्यं शब्दगर्भामरुन्धतीम्।
यस्याः सञ्चालनेनैव रोगी रोगैर्विमुच्यते। येन सञ्चालिता शक्तिः
स योगी सिद्धिभाजनः। किमत्र बहुनोक्तेन कालं जयति लीलया।
अभ्यासान्निःसृतां चैन्द्रीं सह नित्यं समाश्रयेत्।
धारयेत्तूत्तमाङ्गे च दिव्यदृष्टिप्रदायिकाम्। इति मुद्रा दश
प्रोक्तास्तव स्नेहान्महेश्वरि । एकैका चाशु यमिनां
महासिद्धिप्रदायिनी। राजयोगं विना पृथ्वी राजयोगं विना शिला
। राजयोगं विना निद्रा विचित्रापि न राजते। मारुतस्य विधिं सर्वं
मनोयुक्तं मनीषिणाम्। शिवापि मध्यमा नाडी दृढाभ्यासे च
योगिनाम्। आसने प्राणसंयोगे मुद्राभिः सकला भवेत्।

p. 808) उपसन्नेऽपि मुद्राणां राजयोगः समुद्रवत्।
रुद्राणाञ्चापरा मुद्रा तदा सिद्धिं प्रयच्छति॥

इति प्राणतोषिण्यां षष्ठे ज्ञानकाण्डे

पञ्चामरादिमुद्रादशकरूपग्रन्थिकथनं नाम प्रथमः

परिच्छेदः॥

दत्तात्रेयसंहितायाम्॥ पञ्चधारणानन्तरम्॥ पृथिवीधारं वक्ष्ये पार्थिवेभ्यो भयावहम्। नाभेरधो गुदस्योर्द्ध्वं घटिकाः पञ्च धारयेत्। वायुं ततो भवेत् पृथ्वीधारणं तद्भयापहम्। पृथिवीसम्भवात्तस्य न मृत्युर्योगिनो भवेत्। नाभिस्थाने ततो वायुं धारयेत् पञ्च नाडिकाः। ततो जलभयं नास्ति जलमृत्युर्न योगिनः। नाभ्यूर्द्ध्वमण्डले वायुं धारयेत् पञ्च नाडिकाः। आग्नेयी धारणा सेयं न मृत्युस्तस्य वह्निना। न दह्यते शरीरं हि प्रक्षिप्ते वह्निकुण्डके। नाभिभ्रुवोर्हि मध्ये तु प्रादेशद्वयसम्मिते। धारयेत् पञ्च घटिका वायुं सैव हि वायववी। धारणात्तस्य वायोस्तु योगिनो न भयं भवेत्। भ्रूमभ्यादुपरिष्टात्तु धारयेत् पञ्च नाडिकाः। वायुं योगी प्रयत्नेन सेयमाकाशधारणा। आकाशधारणं कुर्वन्मृत्युं जयति तत्त्वतः। यत्र तत्र स्थितो वापि सुखमत्यन्तमश्नुते। एवञ्च धारणाः पञ्च कुर्याद्योगी विधानतः। ततो दृढशरीरस्य मृत्युरस्य न विद्यते। इत्येवं पञ्चभूतानां धारणं यः समभ्यसेत्। ब्रह्मणः प्रलये वापि तस्य मृत्युर्न विद्यते।

समभ्यसेत्तदा ध्यानं घटिकाः षष्टिमेव च। वायुं निरुध्य तां ध्यायेद्देवतामिष्टसाधिनीम्। सगुणध्यानमेतत् स्यादणिमादिसुखप्रदम्। निर्गुणं खमिव ध्यायेन्मोक्षमार्गः प्रवर्त्तते। निर्गुणध्यानसम्पन्नः समाधिञ्च समभ्यसेत्। दिनद्वादशकेनैव समाधिं समवाप्नुयात्। वायुं निरुध्य मेधावी जीवन्मुक्तो भवेद्ध्रुवम्। समाधिः समतावस्था

p. 809) जीवात्मपरमात्मनोः। यदि स्याद्देहमुत्स्रष्टुमिच्छा चेदुत्सृजेत् स्वयम्। परं ब्रह्मणि लीयेत त्यक्त्वा कर्म शुभाशुभम्। अथ नोचेत् समुत्सृष्टं स्वशरीरं यदि प्रियम्। सर्वलोकेषु विचरेदणिमादिगुणान्वितः। कदाचित् स्वेच्छया देवो भूत्वा स्वर्गेऽपि सञ्चरेत्। मनुष्यो वापि यक्षो वा स्वेच्छयापि क्षणाद्भवेत्। सिंहो व्याघ्रो गजो वापि स्यादिच्छातोऽन्यजन्मताम्। यथेष्टमेव वर्त्तेतयोगी विद्वान्महेश्वरः। कविमार्गोपयुक्तं ते साङ्कृतेऽष्टाङ्गयोगतः। सिद्धानां कपिलादीनां मतं वक्ष्ये ततः परम्। अभ्यासभेदात्तद्भेदेन फलं तत्समं तथा। इत्यनन्तरं जलन्धरादिरुक्तः। तेन दत्तात्रेयमते जलन्धरादिं विनापि योगी भवतीति सुधीभिर्विभाव्यावगन्तव्यम्। पक्षिणा गुदमायुज्य वाममार्गं चरेद्बलात्। वारं वारं यथा चोर्द्धं समायाति समीरणः। प्राणापानौ नादविन्दू

मूलबन्धेन चैकताम्। महायोगस्य संसिद्धिं याति नास्त्यत्र संशयः। करणं विपरीताख्यं सर्वव्याधिविनाशनम्। नित्यमभ्यासयुक्तस्य जठराग्निविवर्द्धनम्। आहारा बहवस्तस्य सम्पाद्याः साङ्कृते ध्रुवम्। अल्पहारो यदि भवेदग्निर्दाहं करोति वै। ऊर्द्ध्वं राहुरधश्चन्द्र तथा दृष्टिश्च साङ्कृते । अधःशिराश्चोर्द्धपादः क्षणात् स्यात् प्रथमे देने। क्षणात्तु किञ्चिदधिकमभ्यसेत्तु दिने दिने। बलिश्च पलितश्चैव षण्मासोर्द्ध्वं न दृश्यते। याममात्रन्तु यो नित्यमभ्यसेत् स तु योगवित्। वज्रोणीं ते प्रवक्ष्यामि योगिभिर्गोपितं सदा। अतीव तद्रहस्यं हि न देयं यस्य कस्यचित्। लभ्यते यदि तस्यैकं योगसिद्धिकरं परम्। क्षीरमङ्गरसं चेति द्वयोराद्यञ्च लभ्यते। तृतीयं बलिनां पुंसां स्त्रीभ्यः साध्यमुपागतः। योगाभ्यासरता स्त्री च पुंसां यत्नेन साधयेत्। पुंसां स्त्री वा तदन्यद्वा स्त्रीत्वं पुंस्त्वमपेक्षया। स

p. 810) प्रयोजनमात्रैकसाधनात् सिद्धिमाप्नुयात्। गलितो यदि विन्दुस्तु मूर्द्धिं चाकृष्।य धारयेत्। एवं हि रक्षिते विन्दौ मृत्यं जयति तत्त्वतः। मरणं विन्दुपातेन जीवनं विन्दुरक्षणात्। विन्दुरक्षाप्रसादेन सर्वे सिध्यन्ति योगिनः। अमरोणिस्तु यथा स्यात् सहयोनिस्ततो यथा। तदभ्यासक्रमो ज्ञेयः सिद्धानां

सम्प्रदायतः। एतैः सर्वैस्तु कथितैरभ्यसेत् कालयोगतः। ततो भवेद्राजयोगो नान्तरीभवति ध्रुवम्। न दिङ्मात्रेण सिद्धिः स्यादभ्यासो नैव जायते। राजयोगपदं प्राप्य सर्वसङ्कल्पभञ्जकम्। सर्वं कुर्यान्न वा कुर्याद् यथारुचि विचेष्टितम्। तथान्तरा च योगेन निष्पन्ना योगिनः क्रिया। तदावस्था हि नश्यन्ती भक्तिमुक्तिप्रदा भवेत्॥

प्राणायामस्य फलान्तरन्तु ग्रहयामले॥ आदौ चन्द्रः सिते पक्षे भास्करस्तु सितेतरे। प्रतिपत्क्रमतो हानिस्त्रीणि कृत्वोदयत्ययम् ॥ त्रिपुरासारमुच्चये तु॥ अमावास्यावध्युदयमाह यथा॥
आरभ्य दर्शं प्रथमामुदेति वामे पुटे त्रीणि दिनानि देवः।
वामेतरे त्रीणि ततो दिनानि पूर्णां तिथिं यावदथैवमेवम्॥
एकस्य पक्षस्य विपर्ययेण रोगाभिभूतिर्भवतीह पुंसाम्।
पक्षद्वये बन्दुसुहृद्विपत्तिः पक्षत्रये व्यत्ययतो मृतिः स्यात्॥
ब्रह्मजामले॥ चन्द्रोदये यदा सूर्यश्चन्द्रः सूर्योदये यदा।
अशुभं हानिरुद्वेगः शुभं सर्वं नियोजयेत्। चन्द्रोदये वामनाड्यां वायुगमननिरूपितसमये एवं सूर्योदये दक्षिणनाड्यां वायुगमननिरूपितसमये कर्मविशेषः। नासिकयोर्वायोः प्रवेशनिर्गमाभ्याञ्च शुभत्वमपि तत्रैव॥
यात्रादाने विवाहे च वस्त्रालङ्कारधारणे। शुभकर्मषु सर्वेषु

प्रवेशे च शशी शुभः। विग्रहद्यूतयुद्धेषु
स्नानभोजनमैथुने। व्यवहारे भये भङ्गे भानुनाडी
प्रशस्यते। मोहनं शान्तिकञ्चैव दिव्यौषधिरसायनम्।

p. 811) विद्यारम्भः स्थिरं कार्यं कर्त्तव्यञ्च निशाकरे।
दूरयुद्धे जयी चन्द्रः समासन्ने दिवाकरः। वहन्नाडीपदे चैव
यात्रा भवति सिद्धिदा॥ यस्यां नासिकायां
प्राणवायोर्गतिर्वक्ष्यते तदंशीयपादप्रसारणपूर्विका यात्रा
सिद्धिदा भवतीत्यर्थः। शयने च प्रसङ्गे वा युवत्यालिङ्गनेऽपि
वा। यः सूर्येण पिबेच्चन्द्रं स भवेन्मकरध्वजः॥ सूर्येण
दक्षिणनासिकास्थप्राणवायुना चन्द्रं नार्या
वामनासिकागतप्राणवायुं पिबति तत्सङ्गमकाले
स्वीयनिश्वासमतिनिविष्टः सन्नाकर्षयति। तत्फलं तत्रैव।
चन्द्रचारी विषं हन्ति सूर्यो बालां वशां नयेत्। सुषुम्नायां
भवेन्मोक्ष एको देवस्त्रिधा मतः। भुक्तमात्रेण मन्दाग्नी
स्त्रीणां वश्येऽथ कर्मणि। शयनं सूर्यवाहेन कर्त्तव्यं
सर्वदा बुधैः। शान्ते शोके विवादे च ज्वरिते मूर्च्छिते तथा।
सज्जनस्यापि बोधार्थे चन्द्रचारं प्रवाहयेत्। भुक्तमात्रादौ
वामपार्श्वेन श्रान्तादिषु दक्षिणपार्श्वेन शयनं कार्यमिति
तात्पर्यम्। चतुर्दिक्षूर्द्ध्वमधस्ताच्चान्यतरस्थानमाश्रित्य यदि

दूतः पृच्छति तदा कस्यां नाड्यां वायुगतिः शुभेत्याह॥
ऊर्द्ध्ववामाग्रतो दूतो ज्ञेयो वामपथस्थितः। पृष्ठे दक्षे तथाधस्तात् सूर्यवाहगतो मतः। पूर्णनाडीगतो दूतो यत् पृच्छति शुभाशुभम्। तत्सर्वं सिद्धिमाप्नोति शून्ये शून्यं न संशयः। आदौ शून्यगतः पृच्छेत् पश्चात् पूर्णो विशेद् यदि। तदा सर्वार्थसिद्धिः स्यादिति जानीहि निश्चितम्॥ इदानीं प्राणवायोः प्रवेशनिर्गमाभ्यां विशेषमाह॥ प्रवेशकाले यद्दूतो वाञ्छति स्वप्रयोजनम्। तत्सर्वं सिद्धिमाप्नोति निर्गमे नास्ति सुन्दरम्॥ कर्मविशेषे नाडीविशेषगतिमाह॥ मारणं मोहनं स्तम्भं विद्वेषोच्चाटनं तथा।
प्रेरणाकर्षणक्षोभं भानुनाड्युदये कुरु। शान्तिकं पौष्टिकं क्षेमं दिव्यौषधिरसायनम्। योगाभ्यासादिकर्माणि कर्त्तव्यानि निशाकरे॥ त्रिपुरासारसमुच्चये॥ भूतानामुदयं

p. 812) द्वयोरपि बुधः संलक्षयेत् पक्षयोस्तत्रादौ वसुधोदयं निहितधीर्घ्राणस्य दण्डस्पृशि। देवेऽधःस्पृशि वारिणो हुतवहस्योर्द्ध्वा गतिश्चोदयं तिर्यक्संस्पृशि मारुतस्य परितः पृष्ठे मरुद्वर्त्मनः॥ देवे प्राणवायौ॥ फलं जामले॥
पृथ्वीजले शुभे तत्त्वे तेजो मिश्रफलोदयम्। हानिमृत्युकरौ पुंसामुभयौ व्योममारुतौ।

कर्मविशेषे भूतोदयफलम् त्रिपुरासारे॥

वश्यस्तम्भनयोः प्रशस्त उदयो भूमेर्जलस्योदयः शस्तः

शान्तिकपौष्टिकादिषु शुभेष्वह्नाय वह्नेः पुनः।

शत्रोर्मारणदारणादिकरणे उच्चाटनोच्छेदयोर्वायोः

शान्तिकनिर्विषीकरणयोर्व्योम्नो हितश्चोदयः॥

कियत्कालमेकनाडीगतो वायुर्भवति तत्रापि पञ्चभूतोदयः केन

ज्ञेय इत्यपेक्षायां नाडीगतिकालं स्थानक्रमेण

भूतोदयञ्चाह जामले॥ एकैकस्य कलाः पञ्च क्रमेणैवोदयन्ति

ताः। पृथिव्यापस्तथा तेजो वायुराकाशमेव च। मध्ये पृथ्वी

त्वधश्चाप ऊर्द्धे वहति चानलः। तिर्यग्वायुप्रवाहश्च नभो

वहति सङ्क्रमे॥ प्रपञ्चसारेऽपि॥ पुटयोरुभयोश्च

दण्डसंस्था पृथिवी तोयमधः कृशानुरूर्द्धम्। पवनस्त्वथ

पार्श्वगोऽपि मध्ये गगनं भूतगतिस्तनूद्भवेयम्॥ तत्रापि

बाल्याद्यवस्थाभेदमाह॥ रुद्रजामले उत्तरखण्डे

एकादशपटले॥ स्वकीयनासिकाग्रस्थं पञ्चमं परिकीर्त्तितम्।

यन्नासापुटमध्ये तु वायुर्भ्रमति भैरव ।

तन्नासाप्यूर्द्धमध्ये तु भावाभावं विचारयेत्। आकाशं

वायुरूपं हि तैजसं प्रभो । पार्थिवं क्रमशो ज्ञेयं

बाल्यास्तादिक्रमेण तु। वामोदये शुभा वामा दक्षिणे पुरुषः

शुभः। वायूनां गमनं ज्ञेयं गगनावधिरेव च। केवलं मध्यदेशे तु गमनं पवनस्य च। तदाकाशं विजानीयाद्बाल्यभावं प्रकीर्त्तितम्। तिर्य्यग्गतिस्तु नासाग्रे वायोरुदयमेव च। केवलं भ्रमणं ज्ञेयं सर्वमङ्गलमेव

p. 813) च। किशोरं तद्विजानीयाद्वायो तिर्य्यग्गतौ विभो। केवलार्द्धनासिकाग्रे वायुर्गच्छति दण्डवत्। तत्तैजसं विजानीयात्तेजसा बलवान् भवेत्। यौवनं तद्विजानीयात् कर्मसिद्धिर्भवेद्ध्रुवम्। यदावाप्य गच्छतीह नासापुटमनाकुलम्। जलोदयं विजानीयात् तदा व्यामोहमेव च। तद्वृद्धगतभावश्च विलम्बोऽधिकचेष्टया। प्राप्नोति परमां प्रीतिं वारुणार्णोदयेऽरुणम्। यदधो गच्छति क्षिप्रं किञ्चिदूर्द्धमगोचरम्। यदा करोति प्राग्बालं तदा रोगाद् बलोदयः पृथिव्या उन्नतं भाग्यं रोगार्त्तिपरिपीडितम्। अस्तमितं महादेव अनुलोमविलोमतः। पवनो गच्छति क्षिप्रं वामदक्षिणभेदतः। वामनासापुटं याति पृथिवी जलमेव च। सदा फलाफलं दातुमुदिता कुलमण्डले। तयोर्वै वायवी शक्तिः फलभागं तदा लभेत्। इत्यवस्थाभेदतत्फलकथनं तत्रैव॥ यद्येवं वामभागे तु बालायाः प्रश्नकर्मणि। यदि तत्र पुमान् प्रश्नं करोति वामगामिनी। तदा रोगमवाप्नोति

कर्महानिर्भवेद्ध्रुवम्। यदि वायूदयो वामे दक्षिणे पुरुषः स्थितः। तदा कुफलमाप्नोति द्रव्यागमनदुर्लभम्। अकस्माद्द्रव्यहानिः स्यान्मनोगतफलापहम्। सुहृद्भङ्गं विवादश्च भिन्ने भिन्नोदयाच्छुभम्। केवलं वरुणस्यैव पुरुषो दक्षिणे शुभः। अशुभं पृथिवीदक्षे भेदोऽयं वरदुर्लभः। सदोदयं दक्षिणे च वायोस्तैजस एव च। आकाशस्य विजानीयाच्छुभाशुभफलं प्रभो । यदि भाग्यवशादेव वायोर्मन्दगतिर्भवेत्। दक्षनासामध्यदेशे तदा वामोदयं शुभम्। तदा वामे विचारश्च वायुतेजःस्वरस्य च। ज्ञात्वोदयं विजानीयान्मिश्रे हानिः स्वरे भयम्। एवं स्वभुवनागारे यदि गच्छति वायवी। तस्मिन् काले पुमान् वामदक्षभागस्थसम्मुखः । तदा कन्यादानफलं यथा प्राप्नोति मानवः तदा

p. 814) वायुप्रसादेन प्राप्नोति धनमुत्तमम्। देशान्तरशुभा वार्त्ता आयाति पुत्त्रसम्पदः। इति स्त्रीपुंसभेदेन फलकथनम्॥

सूक्ष्मस्वरोदये॥ गुरुशुक्रबुधेन्दूनां वासरे वामनाडिकाः। सिध्यन्ति सर्वकार्येषु कृष्णपक्षे विशेषतः अर्काङ्गारकसौराणां वासरे दक्षनाडिका। स्मर्त्तव्या चिरकामेण शुक्लेनैवोदयः स्थितः। क्रमादेकैकनाड्यास्तु

तत्त्वानां पृथगुद्भवः। अहोरात्रस्य मध्ये तु ज्ञेया द्वादशसंक्रमाः। वृषकर्कटकन्यालिमृगमीननिशाकरे। मेषे सिंहे च धनुषि तुलायां मिथुने घटे। उदयो दक्षिणे ज्ञेयः शुभाशुभविनिर्णयः। इति वारादिभेदेन नाडीविशेषफलकथनम्॥ तिष्ठेत् पूर्वोत्तरे चन्द्रो भानुः पश्चिमदक्षिणे। दक्षनाड्याः प्रवाहे तु न गच्छेद्दक्षपश्चिमे। इति नाडीविशेषेण दिग्ज्ञानम्॥ वामाचारप्रवाहे तु न गच्छेत् पूर्व उत्तरे। परिपन्थी भवेत्तस्य गतोऽसौ न निवर्त्तते। तस्मादत्र न गन्तव्यं बुधैः सर्वहितैः शुभैः। तदा तत्र तु सञ्जातमृत्युरेव न संशयः॥ इति वहन्नाडीकस्य दिग्विशेषगमननिन्दा॥ शुक्लपक्षे द्वितीयायामर्के वहति चन्द्रमाः। प्रदृश्यते महाँलाभः पुंसः सौम्यं प्रजायते। सूर्योदये यदा सूर्यश्चन्द्रे चन्द्रोदयो भवेत्। सिध्यन्ति सर्वकार्याणि दिवारात्रिगतान्यपि॥ इति स्वस्वनाडीफलकथनम्॥ चन्द्रकार्ये यदा सूर्यः सूर्यश्चन्द्रोदये भवेत्। उद्वेगः कलहो हानिः शुभं सर्वं निधारयेत्॥ इति विपरीतनिन्दा॥ सूर्यस्य वाहे प्रवदन्ति जालम् एकासने युक्तमनस्थिरञ्च। श्वासेन युक्तस्य तु शीतरश्मेः प्रवाहकाले फलमन्यदस्याम्॥ यदि प्रत्यूषकाले तु विपरीतोदयो भवेत्। चन्द्रस्थाने स्थिते चार्के रविस्थाने च चन्द्रमाः । प्रथमे मानसोद्वेगं धनहानिं द्वितीयके। तृतीये गमनं

ज्ञेयमिष्टनाशं चतुर्थके। पञ्चमे राज्यविभवं षष्ठे सर्वार्थनाशनम्। सप्तमे व्याधिदुःखानि अष्टमे मृत्युमृच्छति॥

p. 815) इति दिनभेदेन विपरीतफलम्॥ कालत्रयं विनानिष्टं विपरीतं यदा भवेत्। तदा दुष्टफलं प्रोक्तं किञ्चिन्न्यूनेऽतिशोभनम्। प्रातर्मध्याह्नयोश्चन्द्रः सायंकाले दिवाकरः। तदा नित्यं जयोलाभो विपरीतन्तु दुःखदम्॥ इति कालभेदेन कालफलम्। वामे वा दक्षिणे वापि यत्राप्याक्रम्यते स्वरः। कृत्वा तत्पदमाद्यञ्च यात्रा भवति सिद्धिदा॥ इति वहन्नाडीकस्य यात्राफलम्॥ चन्द्रः सम्पदकार्याणि रविन्तु विषमं सदा। पूर्णपादं पुरः कृत्वा यात्रा भवति सिद्धिदा। सप्तपादाः शनौ शुक्रे ज्ञातव्याश्च विचक्षणैः। चन्द्रो रविपदं रुद्र कुजमन्दं तथैव च। सार्द्धं सदा गुरुपदौ ज्ञातव्यौ च विचक्षणैः॥ इति वारभेदे पादयात्राभेदः॥ लोकानां शीघ्रं गन्तुञ्च कुशलायाङ्गमिष्यते। परदले यथा ग्राह्यो हानिश्च कलहागमे। यदङ्गं वहते नाडी ग्राह्यं गतिकरं नृणाम्। चन्द्रचारे चतुष्पादं पञ्चपादञ्च भास्करे ॥ इति वारभेदे पादयात्राभेदः॥

एवञ्च गमनं श्रेष्ठं साधयेद्भुवनत्रयम्।

यत्राङ्गे चरते वायुस्तदङ्गस्य करस्तथा। सुप्तोत्थितमुखं श्रेष्ठं लभते वाञ्छितं फलम्। न हानिः कलहो नैव कण्टकैर्नापि भिद्यते। निवर्त्तते सुखेनव सर्वोपद्रववर्जितः॥ इति वहन्नाडीहस्तेन मुखमार्जनफलम्। गुरुर्बन्धुर्नृपश्चात्मा अन्येऽपि शुभदायिनः। पूर्णाङ्गे खद्द कर्त्तव्या कार्यसिद्धिर्मनीषिभिः। ऐरी चौराम्वुवर्णाद्या अन्येषाञ्चादिविग्रहः। कर्त्तव्या खद्द रिक्तायां जयलाभः सुखार्थिभिः। दूरदेशे निधातव्यं गमनन्तु हिमद्युतेः। तेभ्यो न देयो दीप्ते च भवनावर्त्तनञ्च न। तत्किञ्चित् पूर्वमुद्दिष्टं लाभादिसमरागमम्। तत्सर्वं पूर्वनाडीषु जायते निर्विकल्पकम् । शून्यं नाडीविपरीतं यत् पूर्वं प्रतिपादितम्। जायते

p. 816) नान्यथा चैव यथा सर्वज्ञभाषितम्। हव्यवाहे खलोच्चाटे देवविद्यादिवञ्चके। कुपितः स्वाद्विठो वाद्याः पूर्णस्थाः स्युर्भयङ्कराः॥ इति पूर्णरिक्तफलम्॥ दूराध्वनि शुभश्चन्द्रो निर्विघ्नेऽभीष्टसिद्धिदः। प्रवेशकार्यहेतुषु सूर्यः शीघ्रं प्रशस्यते। चन्द्रचारी विषं हन्ति सूर्ये बाला वशं नयेत्। सुषुम्नायां भवेन्मोक्ष एको देवः स्थिरास्थितः। स योगी योगता नाडी योगस्थानेऽपि योग्यता। कार्यानुबन्धनं जीवं कथमूर्द्धं समाचरेत्। शुभाशुभानि कार्याणि

क्रियतेऽहर्निशं यदा। तदा कार्यानुरोधेन कार्यं
नाडीप्रचालनम्॥ इति नाडीचालनकारणम्। चालनन्तु गुरुतो
ज्ञातव्यम्॥

अथेडास्थिरकर्माणि दूराध्वगमने तथा। आश्रमे
हर्म्यप्रासादे वस्तूनां सङ्ग्रहेऽपि च।
वापीकूपतडागादिप्रतिष्ठान्ते तु देवयोः। यात्रादाने विवाहे च
वस्त्रालङ्कारभूषणे। शान्तिकं पौष्टिकञ्चैव
दिव्यौषधिरसायनम्। स्वामिसन्दर्शने यात्रावाणिज्यानाञ्च
सङ्ग्रहे। गृहप्रवेशे सेवायां कृषीणां वीजवापने।
शुभकर्माणि सन्धौ च निर्गमे वा शुभः शशी॥ इति कर्मविशेषे
कर्मनाडीफलम्॥ विद्यारम्भादिकार्येषु बान्धवानाञ्च
दर्शने। जनमुखे च धर्मे च दीक्षायां मन्त्रसाधने।
कालव्याधिचिकित्सायां स्वामिसम्बोधने तथा। गजाश्वारोहणे
धन्विगजाश्वानाञ्च बन्धने। परोपकरणे चैव निधीनां
स्थापने तथा। गीतवाद्यादिनृत्याद्यैर्गीतशास्त्रविचारणे।
पुरग्रामनिवासे च तिलकच्छत्रधारणे। शान्तिशोके विषादे च
ज्वरिते मूर्च्छितेऽपि वा। स्वजने स्वामिसम्बन्धे
धान्यादेर्दारुसङ्ग्रहे। स्त्रिया आनन्दभूषाणां
विष्टरागमने तथा। गुरुपूजाविषादानाञ्चालनञ्च वरानने ।

इडायां सिद्धिदं प्रोक्तं योगाभ्यासादिकर्म च॥ इति कर्मविशेषे नाडी॥ तत्रापि वर्जयेद्वायुस्तेज आकाशमेव च।

p. 817) सर्वकर्माणि सिध्यन्ति दिवा रात्रौ गतानि च। सर्वत्र शुभकार्येषु चन्द्रचारः प्रशस्यते।

अथ पिङ्गला। कठिनक्रूरविद्यानां पठने पाठने तथा। स्त्रीसङ्गवेश्यागमने महानौकादिरोहणे। इष्टकार्ये सुरापाने वीरमन्त्र उपासने। बहुलध्वंसदेशादिविषदानादिवैरिणाम्। शास्त्राभ्यासे च गमने मृगादिपशुविक्रमे। इष्टकाकाष्ठपाषाणे रत्नघर्षणदारुणे। गीताभ्यासे यन्त्रतन्त्रे दुर्गपर्वतरोहणे। द्यूते चौरगजाश्वादिरथवाहनसाधने। व्यायामे मारणोच्चाटे षट्कर्मादिषु साधने। रक्षिणीयक्षवेतालविश्वभूतादिसंग्रहे। खरोष्ट्रमहिषादीनां गजस्यारोहणे तथा। नदीजलौघतरणे भेषजे लेखने मणेः। मारणं मोहनं स्तम्भविद्वेषोच्चाटनं वशम्। प्राण आकर्षणे दाने चक्रविक्रयणे तथा। खड्गहस्ते वैरियुद्धे भोगे वा राजदर्शने। भोजने व्यवहारे च क्रूरे दीप्ते रविः शुभः। भुक्तमात्रे च मन्दाग्नौ स्त्रीणां वश्यार्थकर्मणि। शयनं सूर्यबाहेन

कर्त्तव्यं सर्वदा बुधैः। क्रूराणि सर्वकर्माणि चराणि विविधानि च। तानि सिध्यन्ति सूर्येण नात्र कार्या विचारणा। इति कर्मविशेषे पिङ्गलाफलम्॥

अथ सुषुम्ना॥ क्षणं वामे दक्षे यदा वहति मारुतः। सुषुम्ना सा च विज्ञेया सर्वकार्यहरा शुभा। तस्यां नाड्यां स्थितो वह्निर्ज्वलन्ति कालरूपिणः। विषमं तं विजानीयात् सर्वकार्यविनाशनम्। यदानुक्रममुल्लङ्घ्य तस्यां नाड्यां द्वयं वहेत्। तदा तस्य विजानीयादशुभं समुपस्थितम्। क्षणम् वामे क्षणं वायुर्विषमं भावमादिशेत्। विपरीतफलं ज्ञेयं ज्ञातव्यञ्च वरानने । उभयोरेव सञ्चारी विषमं तं विदुर्बुधाः। न कुर्यात् क्रूरसौम्यानि तत्सर्वं निष्फलं भवेत्। जीविते मारणप्रश्ने लाभालाभौ जयाजयौ। विषमे

p. 818) वैपरीत्यस्य स स्मरेज्जगदीश्वरम्। ईश्वरं चिन्तितं कार्यं योगाभ्यासादिकर्म च। अन्यत् किञ्चिन्न कर्त्तव्यं जयलाभसुखादिभिः। सूर्येण वहमानायां सुषुम्नायां मुहुर्मुहुः। शापं दद्याद्वरं दद्यात् सर्वदा च तदन्यथा। नाड्यसंक्रमणे काले तत्त्वसंक्रमणे तथा। शुभं किञ्चिन्न कर्त्तव्यं पुण्यदानादि कोटिधा विषमद्वितीयायां त्रिस्थोऽपि

मनसापि न चिन्तयेत्। यात्राहानिकरी तस्य मृत्युकाले न संशयः।
पुरोनासोर्द्धतश्चन्द्रो दक्षोर्द्धे पृष्ठतो रविः।
पूर्णारिक्तविवेकोऽयं ज्ञातव्यो देशिकैः सदा।
ऊर्द्धवामाग्रतो दूतो ज्ञेयो वामपथि स्थितः। पृष्ठे दक्षे
तथाधस्तात् सूर्यवाहो गतो मतः। अनादि विषमं
सन्धिनिराहारं निराकुलम्। परं सूक्ष्मं विलीयन्ते सा सन्ध्या
सन्धिरुच्यते। विषवत् सन्धिकाप्रश्नः सा सन्ध्या सन्धिरुच्यते। न
वेदं वेदमित्याह वेदो वेदो निगद्यते। परमात्मा हि यत्रास्ति स
वेदो वेद उच्यते। इति नाडीत्रयभेदनिर्णयः॥

श्रीदेव्युवाच॥

देवदेव महादेव सर्वसंसारतारक । स्थितं त्वदीयहृदये
रहस्यं वद मे प्रभो ।

श्रीशिव उवाच॥

स्वरज्ञानरहस्यन्तु न किञ्चिदिष्टदेवता। स्वरज्ञानरतो योगी स
योगी परमो मतः। पञ्चतत्त्वाद्भवेत् सृष्टिस्तत्त्वे तत्त्वं विलीयते।
पञ्चतत्त्वात् परं तत्त्वं तत्त्वात्मानं निरञ्जनम्।

तत्त्वानां नाम विज्ञेयं सिद्धियोगेन योगिनः। भूतानां दुष्टचिह्नानि जानन्ति हि सुरोत्तमाः। पृथिव्यापस्तथा तेजो वायुराकाश एव च। पञ्चभूतात्मकं सर्वं यो जानाति स पूजकः। सर्वलोकस्य जीवेन न भेदं भिन्नतत्त्वकम्। भूर्लोकसत्यपर्यन्तं नाडीभेदं पृथक् पृथक्। भूर्लोको नाभिः सत्यं मस्तकं तत्र तल्लोकावस्थानात्। वामे वा दक्षिणे

p. 819) वापि उदयश्च प्रकीर्त्तितः। अष्टधा धातुविज्ञानं शृणु वक्ष्यामि सुन्दरि । प्रथमे तत्त्वसंख्यायां द्वितीये श्वाससन्धिषु। तृतीये स्वरचिह्नानि चतुर्थे प्राणमेव च। पञ्चतत्त्वस्य वर्णः स्यात् षष्ठे च स्थानमेव च। सप्तमे स्वादुसंयुक्तं अष्टमे गतिलक्षणम्। एवमष्टविधं प्राणं विषमं तत् चराचरम्। स्वरात्परतरं देवि नान्यत् स्थातुं कदाचन। निरीक्षितव्यं यत्नेन यदा प्रत्यूषकालतः। कालस्य वञ्चनार्थाय कर्म कुर्वन्ति योगिनः। श्रुत्योरङ्गुष्ठयोर्मध्याङ्गुल्योर्नासापुटद्वये। वदने प्रान्तगोपान्तेऽङ्गुलं देशे दृगद्वयोः। अस्या भूतपृथिव्यादि तत्त्वज्ञानं भवेत् क्रमात्। पीतश्वेतारुणश्यामविन्दुभिर्निरुपाधिकम्। दर्पणे च समालोक्य तत्र श्वासं विनिक्षिपेत्। आकारन्तु विजानीयात्तत्त्वभेदं

विचक्षणः। इति भूतप्रक्रिया॥ चतुरस्रमर्द्धचन्द्रं कौण्यं वर्त्तुलसम्मितम्। विन्दुभिस्तु न विज्ञेयं साकारैस्तत्त्वलक्षणम्। मध्ये अर्द्धञ्च पश्चादर्द्धञ्च वहतेऽनलः। तीर्थवायुप्रवाहञ्च नभो वहति संक्रमे। इति भूतज्ञानप्रकारः। आपः श्वेताः क्षितिः पीता रक्तवर्णो हुताशनः। मारुता नीलजीमूता आकाशं सर्ववर्णकम्। इति भूतरूपाणि। स्कन्धद्वये स्थितो वह्निर्नाभिमूले प्रभञ्जनः। जानुदेशे क्षितिस्तोयं पादान्ते मस्तके नभः॥ इति स्थानविशेषस्थतत्त्वेन भूतज्ञानम्॥ महीयं मधुरस्वादुः काषायं मधुरं जलम्। तिक्तं तेजः समीरोऽम्लमाकाशं कटुकं तथा। इति भूतरसाः। अष्टाङ्गुलं वहेद्वायुरनलश्चतुरङ्गुलम्। द्वादशाङ्गुलं माहेयं षोडशाङ्गुलं वारिणः। इति भूतगतिः। ऊर्द्धमृत्युरधः शान्तिस्तिर्यगुच्चाटनं तथा। मध्ये स्तम्भं विजानीयान्नभः सर्वत्र मध्यमम्। पृथिव्यां स्थिरकर्म्माणि चरकर्म्माणि वारुणे। तेजसि क्रूरकर्म्माणि मारणोच्चाटनेऽनिले। व्योम्नि किञ्चिन्न

p. 820) कर्त्तव्यं मध्यमो योगसेवया। इति भूतविशेषे षट्कर्मविशेषः। शून्ये तु सर्वकार्य्येषु नात्र कार्या विचारणा। पृथ्वीजलाभ्यां सिद्धिः स्यान्मृत्युवह्नौ क्षयोऽनिले। नभस्यं

निष्फलं सर्वं ज्ञातव्यं तत्त्ववेदिभिः। चिरलाभा क्षितिर्ज्ञेया तत्क्षणात्तोयतत्त्वतः। हानिः स्याद्वह्निवाताभ्यां नभस्यं विफलं लभेत्। पीतश्योणैर्मध्यवाही तनुपीवरवद्भृतिः। कवोष्णः पार्थिवो वायुः स्थिरकार्यप्रसाधकः। अधोवाही गुरुध्वानः शीघ्रगः शीणभासितः। यः षोडशाङ्गुलो वायुः स पापः शुभकर्मकृत्। आवर्त्तगश्च चोष्णश्च स्वर्णाभश्चतुरङ्गुलः। ऊर्द्ध्ववाहो च यः क्रूरकर्मकारी च तैजसः। उष्णशीतः कृष्णवर्णस्तिर्यग्गाम्यष्टमाङ्गलः। वायुः पवनसमो ज्ञेयश्चरकर्मसु सिद्धिदः। यः समीरस्य पवनः सर्वतत्त्वगुणावहः। आवर्त्तं तं विजानीयाद् योगिनां योगदायकम्। पीतश्चैव चतुष्कोणं मधुरं मध्यमाश्रितः। भोगदं पार्थिवं तत्त्वं प्रवाहे द्वादशाङ्गुलम्। श्वेतमर्द्धेन्दुसङ्काशं स्वादुकाषायमादकम्। लाभकृद्वारुणं तत्त्वं प्रवाहे षोडशाङ्गुलम्। रक्तत्रिकोणतिक्तः स्यादूर्द्धमार्गप्रवाहकः। दीप्तश्च तैजसं तत्त्वं प्रवाहे चतुरङ्गुलम्। नीलञ्च वर्त्तुलाकारं स्वाद्वम्लं तीर्यगाश्रितम्। चपलं मारुतं तत्त्वं प्रवाहेऽष्टाङ्गुलं स्मृतम्। वर्णाकारं स्वादुवहमव्यक्त सर्वगामिनम्। मोक्षदं नाभसं तत्त्वं सर्वकार्येषु निष्फलम्॥ इत्यङ्गुनिविशेषगत्या भूततत्फलम्॥

पृथ्वीजले शुभे तत्त्व तेजो मिश्रफलोदयम्। हानिमृत्युकरौ पुंसामुभौ च व्योममारुतौ। अपूर्वपश्चिमे पृथ्वी तेजश्च दक्षिणे तथा। वायुश्च उत्तरे ज्ञेयो मध्यकोणगतं नभः। चन्द्रे पृथ्वीजले स्यातां सूर्ये अग्निर्यदा भवेत्। तदा सिद्धिर्नसन्देहः सौम्ये सौम्येषु कर्मषु। लाभः पृथ्वीकृतो न स्यान्निशायां लाभकृज्जलम्। वह्नौ मृत्युः क्षितौ वायुर्नभः

p. 821) स्थानं दहेत् क्वचित्। जीवितव्ये जये लाभे कृष्याञ्च धनकर्मणि। मन्त्रार्थी युद्धप्रश्ने च गमनागमने तथा। आयाति वारुणे शत्रुस्तत्रस्थेऽपि शुभः क्षितौ। प्रयाति वायुतो नित्यं हानिर्मृत्युर्नभोऽनिले॥ इति भूतविशेषे फलविशेषः॥

पृथिव्यां मूलचिन्ता स्यात् मूलमाकाशतो वहेत्। तेजसि धातुचिन्ता स्यात् जीवः स्याज्जलवातयोः॥ इति भूतविशेषेण मूलजीवादिनिर्णयः॥ पृथिव्यां बहुपादः स्याद् द्विपादस्यैव वायवे। तेजसि च चतुष्पादो नभसः पादवर्जितः। इति भूतविशेषेण बहुपादादिनिर्णयः। कुजे वह्नीरवौ पृथ्वी सौरिरापः प्रकीर्त्तितः। वायुस्थले स्थितो राहुर्दक्षरन्ध्रप्रवाहकः। जले चन्द्रो बुध पृथ्वी गुरौ वातः सितेऽनिलः। वामनाड्यां स्थिताः सर्वे

सर्वकार्येषु निश्चितम्। पार्थिवे मूलविज्ञानं जीवज्ञानं तथा जले। अग्नौ च धातुविज्ञानं व्योम्नि शून्यं विनिर्दिशेत्॥ इति भूतभेदेन धात्वादि॥ तुष्टिपुष्टिरतिक्रीडाजपहास्यं धराजले। वायौ तेजशि सुप्तज्ञो यत्तत् कल्पं प्रवासिनाम्। ततो मृत्युश्च आकाशे चन्द्रावस्थाः प्रकीर्त्तिताः। द्वादशैताः प्रयत्नेन ज्ञातव्या देशिकैः सदा। पूर्वस्यां पश्चिमायां वै उत्तरस्यां यथाक्रमम्। पृथिव्यादीनि तत्त्वानि बलिष्ठानि विनिर्दिशेत्। पृथिव्यापस्तथा तेजो वायुराकाश एव च॥ पृथिवी पलपञ्चाशत् चत्वारिंशदपस्तथा। तेजस्त्रिंशद्विजानीयाद्वायुश्च विंशतिर्नभः। नभोऽपि विंशतिपलमिति काकाक्षिगोलकन्यायेनोभयत्र सम्बध्यते॥ पृथिवी चिरकाले च लाभश्चापो भवेत् क्षणात्। जायते पवनैस्तुल्यः सिद्धयोऽग्नौ भविष्यति। इति तत्त्वेन प्रश्नफलकालनिर्णयः॥ पृथ्वीपञ्च अपां वेदागुणास्तेजो द्विवायवः। नभश्चैकगुणश्चैव तत्त्वज्ञानमिदं भवेत्। इति पञ्चभूतेषु

p. 822) शब्दादिगुणपरिमाणम्॥ यत्कारकृत् प्रस्फुटिता विदीर्णा अतीता धरा। ददाति सर्वकार्येषु अवस्थासदृशं फलम्। इति पृथिव्यवस्था। घनिष्ठा रेवती ज्येष्ठानुराधा श्रवणा तथा। अभिजिच्चोत्तराषाढा पृथ्वीतत्त्वमुदाहृतम्। पूर्वाषाढा

तथाश्लेषा मूलार्द्रा चैव रोहिणी। उत्तरभाद्रपदा तोयं आपस्तत्त्वन्त्वभीष्टदम्। भरणी कृत्तिका पुष्या मघा पूर्वा च फल्गुनी। पूर्वभाद्रपदास्वाती तेजस्तत्त्वमिति प्रिये । विशाखोत्तरफल्गुन्यौ हस्ता चित्रा पुनर्वसुः। अश्विनी मृगशीर्षा च वायुस्तत्त्वमुदाहृतम्॥ इति पञ्चभूतनक्षत्राणि॥

बहन्नाडीस्थितो भूतो यदि पृच्छेच्छुभाशुभम्। तत् सर्वं सिद्धिमायाति शून्ये शून्यं न संशयः। इति पूर्णनाड्यादिगतस्य प्रश्नफलम्॥ तत्त्वैरामो जयं प्राप्तः सतत्त्वे च धनञ्जयः। कौरवा निहताः सर्वे मूर्द्धतत्त्वविपर्य्यये। जन्मान्तरस्य संस्कारात् प्रसादादथवा गुरोः। कैश्चित्तु ज्ञायते तत्त्वं वासनाविमलात्मभिः। कायनगरमध्ये तु मारुतो रक्षपालकः। प्रवेशे दशभिः प्रोक्तो निर्गमे द्वादशाङ्गुलम्। गमने च चतुर्विंशं नेत्रवेदाश्च धावने। धावने जवेन गमने। मैथुने पञ्चषष्टिश्च शयने च शताङ्गुलम्। प्राणस्य सा गतिर्देवि स्वभावाद् द्वादशाङ्गुला। भोजने वचने चैव गतिरष्टादशाङ्गुला॥ इति कार्यविशेषे प्राणानां वहिर्गतिनिर्णयः॥

एकाङ्गुलिकृते न्यूने प्राणनिष्कामता मता। आनन्दस्तु द्वितीये च कविशक्तिस्तृतीयके। वाचाशक्तिश्चतुर्थे तु दूरदृष्टिस्तु

पञ्चमे। षष्ठे आकाशगमनं खण्डवेश्च सप्तमे। अष्टमे सिद्धयश्चाष्टौ नवमे निधनं न च। दशमे दशमूर्त्तिः स्याच्छायानाश एकादशे। द्वादशे हंसचारश्च गङ्गामृतरसं पिबेत्। आनखाग्रं प्राणपूरकस्य भक्ष्यञ्च

p. 823) भोजनम्। एवं प्राणविधिः प्रोक्तः सर्वकार्यफलप्रदः। ज्ञातव्यो गुरुवाक्येन न विद्याशास्त्रकोटिभिः। प्रातश्चन्द्रो रविः सायं यदि दैवेन लभ्यते। मध्याह्ने मध्यरात्रौ च परं तत्त्वं प्रवर्त्तते। दूरयुद्धे जयी चन्द्रः समासन्ने दिवाकरः। यात्रादाने विवाहे च प्रवेशे नगरादिके। शुभकार्येषु सर्वेषु चन्द्रचारः प्रशस्यते॥ अयनतिथिदिनेशस्तूपतत्त्वेन युक्तो यदि वहति कदाचिद्दैवयोगेनपुंसः। स जयति रिपुसैन्यं स्तम्भमात्रे स्वरेण प्रभवति स च विज्ञः केशवस्यापि लोकम्॥ जीववक्षे जीववक्षं जीवाङ्गे परिधाय च। जीवो जयति यो युद्धे जीवो जयति मेदिनीम्। भूमौ जले च कर्त्तव्यं गमनं शस्त्रिकर्मसु। वह्निवायुप्रदीप्तेषु पुनर्नैव भविष्यति। इति तत्त्वविशेषेण गतेः शुभाशुभफलम्॥

जीवेन शस्त्रं बध्नीयात् जीवेनैव विकाशयेत्। जीवे च प्रक्षिपेच्छस्त्रं युद्धे जयति सर्वथा। आकर्षे प्राणपवनः

समासे हेतुवाहनः। समोत्तरे पदं दद्यात् सर्वकार्याणि साधयेत्
। अपूर्णे शत्रुसंग्रामे पूणवसु वनं तथा कुरुते
पूर्णतत्त्वस्थो जयत्येको वसुन्धराम्। या नाडी वहते चाङ्गे
तद्वामे व्याधिदेवता। सन्मुखेऽपीदृशी तेषां
सर्वकार्यफलप्रदा। आदौ च कुरुते मुद्रां पश्चाद्युद्धं
समाचरेत्। सर्वमुद्रा कृता येन तेषां सिद्धिर्न संशयः।
यन्त्रप्रवाहेऽपि यथा सूर्यावाहे भटाः समाः। जाते हि
योधकामः समीरणतत्त्वयोर्वादम्। स प्रापित एषु नीतस्य न
प्रातःकालद्वीटा। यदि सम्बहे वायुयुद्धं यदा तदा सदापेतः
॥ जयत्येव न सन्देहः शत्रुश्च यदि चाग्रतः। यत्र नाड्यां
वहेद्वायुस्तदंशं प्राणमेव च। आकृष्य गच्छेत् कर्णान्तं
जयत्येव पुरन्दरम्। प्रतिपक्षं यदारभ्य पूर्णो
ज्ञेयोऽभिरक्षितम्। न तस्या रिपुभिः शक्तिर्बलिष्ठैरपि हन्यते।
अङ्गुष्ठतर्जनीमध्ये पादाङ्गुष्ठे तथा धनुः।

p. 824) युद्धकाले च कर्त्तव्यं लक्षयोधजयो भवेत्। निशाकरे
रवौ चारे मध्ये यस्य समीरणः। स्थितो रक्षेद्दिगन्तानि
जयाकाङ्क्षी नरः सदा। श्वासप्रवेशकाले तु दूतो जल्पति
वाञ्छितम्। तस्यार्थाः सिद्धिमायान्ति निर्गमेणैव सुन्दरि ॥ इति
श्वासप्रवेशकाले प्रश्नफलम्॥

लाभादीनि स्वकार्याणि पृष्टानि कीर्त्तितानि च। सजीवे सति सिध्यन्ति हानिर्निःसरणे भवेत्। नरो दक्षः स्वकीयश्च स्त्रिया वामः प्रशस्यते। कुम्भको युद्धकाले च त्रयो नाडी स्त्रियो गतिः। हकारस्य सकारस्य विना भेदं स्वरः कथम्। सोऽहं हंसः पदेनैव जीवो जपति सर्वदा। वामे वा यदि वा दक्षे यदा पृच्छति पृच्छकः। तत्र घातो न जायेत शून्ये घातं विनिर्दिशेत्। भूरात्मनो भवेद्धातः पदस्थानं जले भवेत्। ऊरुस्थलेऽग्निर्भवनं कटिस्थानेन वायुना। शिरःस्थात्मखतत्त्वेन ज्ञातव्यो घातनिर्णयः। एवं पञ्चविधो घातः स्वरप्रश्ने प्रकाशितः। इति तत्त्वेन घातस्थाननिर्णयः॥ युद्धोदये कृतप्रश्ने पूर्णस्य प्रथमो जयः। रिक्ते चैव द्वितीयेषु जयी भवति नान्यथा। पूर्णनाडीगतप्रश्ने शून्ये गततदग्रतः। शून्यस्थानेऽग्रतः शत्रुर्म्रियते नात्र संशयः। वामाचारे समा नासा यस्य तस्य जयो भवेत्। पृच्छको दक्षिणे भागे विजयो दक्षिणा शिरा। यदि पृच्छति चन्द्रस्थस्तदा सन्धानमादिशेत्। पृच्छेद् यदा तु सूर्यस्थस्तदा जानीहि विग्रहम्॥ इति वामदक्षिणभेदेन प्रश्ने सन्धिविग्रहकथनम्॥

पार्थिवे च भवेद् युद्धं सन्धिर्भवति वारुणे। जयो हि

तैजसे भङ्गो मृत्युर्वायौ च नाभसे। इति तत्त्वविशेषेण युद्धादिज्ञानम्॥

निवर्त्तिकाप्रमादाद्वा यदा न ज्ञायतेऽनिलः। प्रश्नकाले यदि कुर्याद् बद्धयुद्धेन बुद्धिमान्। निश्चलां धारणां ज्ञात्वा पुष्पहस्ते निपातयेत्। पूर्णाङ्गे पुष्पपतनं शून्ये वा

p. 825) तत्फलं वदेत्। तत्फलं पूर्णरिक्तफलम्। तिष्ठन्नुपविशन् वापि प्राणमाकर्षयन्निजम्। मनोभङ्गः कृतो येन सर्वकार्येषु जीवति। जीवेन स्थापयेद्वायुर्जीवेनावस्थयेत् पुनः। जीवेन क्रियते नित्यं युद्धे जयति सर्वथा। स्वरज्ञानी फलादग्र्यं निष्फलं कोटिधा भवेत्। इह लोके परेणैव स्वरज्ञानी बली सदा। दशशतायुतं लक्ष्मीर्देशाधिपचलं क्वचित्। शतक्रतुः सुरेन्द्राणां बलं कोटिगुणं भवेत्।

श्रीदेव्युवाच।

परस्परं मनुष्याणां युद्धे प्रोक्तो जयस्तथा। समे युद्धे समुत्पन्ने मनुष्याणां कथं जयः।

श्रीशिव उवाच।

ध्यायेत्तत्त्वं स्थिरे जीवे जुहुयात् स्थिरसङ्गमम्।
इष्टसिद्धिर्भवेत्तस्य महालाभो जयस्तथा। निराकारं
समुत्पन्नं साकारं सकलं जगत्। तस्याकारं निराकारं
ज्ञाने भवति तन्मयम्॥ इति ज्ञानयुद्धविजयप्रकरणम्॥

अथ वशीकरणम्॥

श्रीदेव्युवाच।

नरयुद्धं हिमयुद्धं त्वयोक्तञ्च महेश्वर । इदानीं वद
देवश वशीकरणमुत्तमम्।

श्रीशिव उवाच।

चन्द्रसूर्येण चन्द्रस्य स्थापयेज्जीवमण्डले। आजन्मवशगा
वामा कथितोऽयं तपोधनैः। जीवेन गृह्यते जीवा जीवो जीवस्य
दीयते। जावस्थानगतो जीवो बालाजीवाशुकारकः।
रात्र्यस्तयामवेलायां प्रसुप्ते कामिनीजने। ब्रह्मवीज पिबेद्यस्तु

बालाजीवहरस्तु सः। अष्टाक्षरं जपित्वा तु तस्मिन् काले रते सति। तत् क्षणाद्दीयते चन्द्रो मोहमायाति कामिनी। समये वा प्रसङ्गे वा युवत्यालिङ्गनेऽपि वा। तत्क्षणाद्दापयेदाशु मोहयेत् कामिनीन्तु सः। यः सूर्येण पिबेच्चन्द्रं स भवेन्मकरध्वजः। शिव आलिङ्ग्यते शक्त्या प्रसङ्गे दक्षिणेऽपि वा। सप्त नव त्रयः पञ्च रवौ सङ्गस्तु सूर्यके। चन्द्रे दिवातुरीयाष्टे वश्या भवति कामिनी ॥ सूर्याचन्द्रौ समौ कृत्वा सर्वाकृत्यधरोष्ठयौः।

p. 826) महापद्मे मुखं प्रोच्य वारं वारमिदं चरेत्। अध्यानमिति पादस्य यावन्निद्रावशं गता। पश्चाज्जाग्रतबेलायां चोष्य ते गलचक्षुषी। अनेन विधिना कामी वशयेत् सर्वकामिनीः। इदं वचनमन्यस्मिन् इत्याज्ञा परमेश्वरि ॥ इति वशीकरणम्॥

अथ गभप्रकरणम्। ऋतुकाले भवेन्नारी पञ्चमेऽह्नि यदा शुचिः। सूर्याचन्द्रमसौ योगो जीवेन पुत्रसम्भवः। शङ्खावली गवां दुग्धं पृथ्वधी वहते यदा। भर्त्तुरग्रे वदेद्वाक्यं गर्भं देहि त्रिभिर्वचः। ऋतुस्नाता पिबेन्नारी ऋतुदानन्तु योजयेत्। रूपलावण्यसम्पन्नं नरसिंहं प्रसूयते। सुषुम्नासूर्यगन्धेन ऋतुज्ञानन्तु योजयेत्। अङ्गहीनः

पुमांस्तत्र जायते कृमिविग्रहः। विषमाङ्के दिवा रात्रौ विषमाङ्के दिनाधिपः। चन्द्रनेत्राग्नितत्त्वेषु बन्ध्या पुत्त्रमवाप्नुयात्। रत्यारम्भे रविः पुंसां रत्यन्ते च सुधाकरः। अनेन कर्मयोगेन नादण्डे देवदण्डकः। रत्यारम्भे रविः पुंसां स्त्रियाश्चैव सुधाकरः। उभयोः सङ्गमे प्राप्ते बन्ध्या पुत्त्रमवाप्नुयात्॥ इति पुत्त्रकन्याजन्मनिदानम्॥ चन्द्रनाडी वहेत् प्रश्ने गर्भे कन्या यदा भवेत्। सूर्ये भवेत्तदा पुत्रो द्वयोर्गर्भो विहन्यते। चन्द्रः स्त्री पुरुषः सूर्यो मध्यमार्गे नपुंसकः। शून्ये शून्यं युगे युग्मं गर्भपातश्च संक्रमे। सूर्यभागे कृते पुत्रश्चन्द्रवारे तु कन्यका। विषमे गर्भपातः स्याद्द्वयोरथ नपुंसकः। तत्त्वैरथ विजानीयात् कथितं तत्तु सुन्दरि ॥ इति प्रश्ने गर्भे पुत्रादिज्ञानम्॥ गर्भाधानं मारुते स्यात् सुदुःखी दिव्ये ख्यातो वारुणे सौख्ययुक्तः। गर्भस्रावः स्वल्पजीवी च वह्नौ भोगी भव्यः पार्थिवेऽनर्थयुक्तः॥ धनवान् सौख्ययुक्तश्च भोगवान् गर्भसंस्थितः। सोत्तमो वरुणे तत्त्वे व्योम्नि गर्भो विनश्यति। माहेन्द्रे जायते पुत्रो वरुणे दुहिता भवेत्। शेषेषु

p. 827) गर्भहानिः स्याज्जातमात्रस्य वा मृतिः। रविमध्ये गतश्चन्द्रश्चन्द्रमध्ये गतो रविः। ज्ञातव्यो गुरुतः शीघ्रं न

विद्याशास्त्रकोटिभिः॥ इति गर्भप्रकरणम्॥

अथ संवत्सरप्रकरणम्। चैत्रशुक्लप्रतिपदि
प्रातस्तत्त्वविभेदतः। पश्येद्भावी क्षणो योगी दक्षिणे
चोत्तरायणे। चन्द्रोदयस्य वेलायां वहमानोऽठ तत्त्वतः।
पृथिव्यापस्तथा वायुः सुभिक्षं सर्वशस्यगम्। तेजोव्योम्नि
भयं घोरं दुर्भिक्षं कालतत्त्वतः। एवं तत्त्वफलं
ज्ञेयं वर्षे मासे दिने तथा। मध्यमो भवति क्रूरो दुष्टः
सर्वत्र कर्मषु। देशभङ्गो महारोगः क्लेशकष्टादिदुःखदः।
मेषसंक्रान्तिवेलायां स्वरभेदं विचारयेत्। संवत्सरफलं
ब्रूयाल्लोकानां तत्त्वचिन्तकः। पृथिव्यादिगतत्त्वानां
दिनमासाब्दजं फलम्। भोजनञ्च तथा दुष्टं
व्योममारुतवह्निभिः। सुभिक्षं वा प्रवृद्धिः स्याद् बहुशस्या
वसुन्धरा। बहुवृष्टिस्तथा सौख्यं पृथ्वीतत्त्वं वहेद् यदि।
दुर्भिक्षं राष्ट्रभङ्गः स्याद् वेगोत्पत्तिः सुदारुणा।
अल्पादल्पतरा वृष्टिरग्नितत्त्वं वहेद् यदि। उत्पातोपद्रवौ
भीतिरल्पवृष्टिः स्युरीतयः। मेषसंक्रान्तिवेलायां वायुतत्त्वं
वहेद् यदि। मेषसंक्रान्तिवेलायां व्योमतत्त्वं वहेद् यदि। तत्रापि
सूरिभिर्ज्ञेयः शस्यादीनामुपद्रवः। पूर्वपूर्वतरस्यैव
श्वासतत्त्वेन सिद्धिदः। सूर्यश्चन्द्रो यथाभूते संग्रहे

सर्वसिद्धिदः। विषमे वह्नितत्त्वस्य ज्ञायते केवलं नभः। तत्
कुर्याद्वस्तुसंग्राही द्विमासे च महार्घ्यता। रवौ संक्रमणे
नाडी गलते च प्रसर्पति। सोऽनिले वह्नियोगे च रौरवं जगतीतले॥ इति
संवत्सरप्रकरणम्॥

अथ रोगप्रकरणम्। महीतले सरोगश्च जले च जलमातरः।
असौ शून्यगतो दूतः पश्चात् पूर्णे विशेत् यदि। मूर्च्छितोऽपि
ध्रुवं जीवेद् यदर्थं परिपृच्छति। यस्मिन्नङ्गे स्थितो
जीवस्तत्रस्थः परिपृच्छति। तदा जीवति जीवोऽसौ यदि रोगैरुपद्रुतः।
दक्षिणे यदि वा वामे दुःखरौद्राक्षरो वदेत्। तदा जीवति जीवोऽसौ
चन्द्रः समफलः क्रमात्। जीवाकारे च वह्न्यात्मा जीवाकारं
विलोक्य च। जीवस्थो जीवितप्रश्ने तस्य स्यात् जीवितं फलम्।
वामाचारस्तदा दक्षे प्रवेशे यत्र वाहने। तत्रस्थः पृच्छते
दूतस्तस्य सिद्धिर्न संशयः। प्रश्ने चाधः स्थितो जीवो न्यूनं
जीवो हि जीवति। ऊर्द्ध्वाचारस्थितो जीवो जीवो याति यमालयम्।
विपरीताक्षरप्रश्नं रिक्तायां पृच्छको यदि। विपर्ययश्च
विज्ञेयो विषमस्थोदये सति। चन्द्रस्थाने स्थितो जीवः सूर्यस्थाने च
पृच्छकः। तदा प्राणविमुक्तोऽसौ यदि रोगैरुपद्रुतः।
पिङ्गलायां स्थितो जीवो वामे दूतस्तु पृच्छति। तदापि म्रियते रोगी
यदि त्राता महेश्वरः। एकस्य भूतस्य विपर्ययेण

रोगाभिभूतिर्भवतीह पुंसाम्। तयोर्द्वयोर्बन्धसुहृद्विपत्तिः पक्षत्रयव्यत्ययतो मृतिः स्यात्॥

अथ कालज्ञानम्। मासादौ वत्सरादौ तु पक्षादौ च यथाक्रमम्। ज्ञेयं कालं परीक्षेत् वायुचारबलात् सुधीः। पञ्चभूतात्मकं दीपं शशिस्नेहेन सिञ्चितम्। रक्षयेत् सूर्यवातेन तेन जीवः स्थिरो भवेत्। मारुतं बन्धयित्वा तु सूर्यं बन्धयते यदि। अभ्यासाजीवितो जीवः सूर्यकालेऽपि वञ्चते । गगनात् स्रवते चन्द्रः कायपद्मानि सिञ्चयेत्। शशाङ्कं वारयेद्रात्रौ दिवाचार्यो दिवाकरः। इत्यभासे ततो नित्यं स योगी नात्र संशयः। अहोरात्रं यदैकत्वं वहते यस्य मारुतः। तदा तस्य भवेदायुः सम्पूर्णं वत्सरत्रयम्। अहोरात्रद्वयं यस्य पिङ्गलायाः सदागतिः। तस्य वर्षद्वयं प्रोक्तं जीवितं तत्त्ववेदिभिः। त्रिवारं वहते यस्य पिङ्गलायां सदागतिः। तदा संवत्सरं चायुः प्रवदन्ति मनीषिणः। सदागतिर्वायुः। रात्रौ

p. 829) चन्द्रो दिवा सूर्यो वहेद् यस्य निरन्तरम्। जानीयात्तस्य वै मृत्युः षण्मासाभ्यन्तरे भवेत्। एकादिषोडशाहानि यदि भानुर्निरन्तरम्। वहेदस्य च वै मृत्युः शेषाहेन च मासिके। सम्पूर्णं वहते सूर्यचन्द्रमाश्च न दृश्यते। पक्षेन जायते

मृत्युः कालज्ञानेन भाषितम्। सम्पूर्णं वहते चन्द्रः सूर्यो नैव च दृश्यते। मासेन जायते मृत्युः कालज्ञानेन भाषितम्। मूत्रं पुरीषं यस्यैव समकाले प्रवर्त्तते। तदासौ चलितो ज्ञेयो दशाहे म्रियते ध्रुवम्। अरुन्धतीं ध्रुवञ्चैव विष्णोस्त्रीणि पदानि च। गतायुषो न पश्यन्ति चतुर्थं मातृमण्डलम्। अरुन्धती भवेज्जिह्वा ध्रुवो नासाग्रमेव च। भ्रुवौ विष्णुपदं ज्ञेयं तारकं मातृमण्डलम्। नवध्रुवं सप्तघोषं पञ्चतत्त्वां त्रिनासिकाम्। जिह्वामेकविलां दृष्ट्वा म्रियते वा नरो ध्रुवम्। कोणमत्स्याङ्गतुल्यन्तु किञ्चित्पिण्डं निरीक्षयेत्। यदा न दृश्यते विन्दुर्दशाहेन नरो मृतः॥ इति कालज्ञानम्॥

अथ नाडीज्ञानम्। इडा गङ्गेतिविज्ञानं पिङ्गला यमुनानदी। मध्ये सरस्वतीज्ञेया प्रयागो योगतस्त्रिभिः। आदौ साधनमाख्यातं सद्यः प्रत्ययकारकम्। बद्धपद्मासनो योगी विदध्यादुड्डियानकम्। पूरकं कुम्भकञ्चैव रेचकञ्च तृतीयकम्। ज्ञातव्यं योगिभिर्नित्यं देहसंसिद्धिहेतवे। पूरकं कुरुते पृथ्वी धातुसाम्यं तथैव च। कुम्भकं स्तम्भनं कुर्यात् जीवरक्षाविवर्द्धनम्। रेचको हरते पापं कुम्भाद्योगपदं व्रजेत्। पश्चात् संग्रामवत्तिष्ठेन्नतु बन्धे च कारयेत्। कुम्भयेत् सहजं वायुर्यथाशक्त्या प्रयत्नतः। रेचयेत्

चन्द्रमार्गेण सूर्येण पूरयेत् सुधीः। चन्द्रमाः पिबते सूर्यं
सूर्यः पिबति चन्द्रकम्। अन्योन्यकालभावेन जीवेदाचन्द्रतारकम्।

p. 830) यत्राङ्गे वहते नाडी तन्नाडीबोधनं कुरु।
मुखबद्धमुन्मोचयन् वै परानाञाय तेषु वा।
मुखनासिककर्णानामङ्गुलीभिर्निरुध्येत्। तत्त्वोदयमिति ज्ञेयं
सम्मुखीकरणं प्रिये । तस्य रूपगतं नेदं
मण्डलीलक्षणन्त्विदम्। यो वेत्ति मानवो लोके स क्षुद्रोऽपिच योगवित्।
निराशीर्निष्फलो योगी न किञ्चिदपि चिन्तयेत्। वासनामुन्मनीकृत्य
कालं जयति लीलया। यस्य या शंसिता शक्तिः सिद्धस्य
गुणगह्वरम्। बद्धपद्मासनस्थो हि गुदवायुं निरुद्धयेत्।
विमुञ्चेत प्राणकाद्यं कुम्भकत्रयमानिले। शक्त्या प्राणे
निरुद्धे विवरमुपगतं ब्रह्मचक्रे च नित्या निक्षेपाकाशमार्गे
शिवचरणरता यान्ति ते केऽपि धन्याः॥ एतज्जानाति यो योगी एतत्
पठति नित्यशः। सर्वदुःखविनिर्मुक्तो लभते वाञ्छितं फलम्।
स्वरज्ञानं शिवे यस्य लक्ष्मीः पदतले भवेत्। प्राणवत्
सर्वदेवानां ब्रह्माण्डे भास्करो यथा।
मर्त्यलोकेऽयमापूज्यः स्वरज्ञानी पूमानपि। नाडीत्रयं
विजानाति तत्त्वज्ञानं तथैव च। नैव तेन भवेत्तूल्यं
लक्षकोटिरसायनम्। एकाक्षरप्रदातारं नाडीभेदेन भेदकम्।

पृथिव्यां नास्ति तद्द्रव्यं यद्दत्त्वा चात्रृणी भवेत्। स्वरतत्त्वं तथा युद्धं दिव्यवश्यत्रयन्तथा। एवं प्रवर्त्ततेलोके प्रसिद्धं सिद्धियोगिभिः। एतत् तन्त्रं महाभागे पठनात् सिद्धिदायकम्। सुस्थासनं समासीनो नीरजायतलोचने । चिन्तयेत् परमात्मानं यो वदेत् स भविष्यति॥

इति श्रीप्राणतोषिण्यां षष्ठे ज्ञानकाण्डे स्वरज्ञानरूपशाखाकथनं नाम द्वितीयः परिच्छेदः॥

अथ राजयोगः॥ योगस्वरोदये।

ईश्वर उवाच।

राजयोगं प्रवक्ष्यामि श्रृणु सर्वत्र सिद्धिदम्। गुह्याद्गुह्यतरं देवि नानाधर्मं परात्परम् राजयोगेन देवेशि नृपपूज्यो भवेन्नरः। राजयोगी चिरायुश्च अष्टैश्वर्यमयो भवेत्॥ पञ्चदशप्रकारोऽयं राजयोगः॥ क्रियायोगो ज्ञानयोगः कर्मयोगो हठस्तथा। ध्यानयोगो मन्त्रयोग उरयोगश्च वासना। राजत्येतद् ब्रह्मवशीव एभिश्च पञ्चदशधा। इदानीं लक्षणञ्चैषां कथयामि श्रृणु प्रिये ।

ध्यानपूजादानयज्ञजपहोमादिका क्रिया। क्रियामुक्तिमयो योगः सपिण्डिसिद्धिदायकः। यत्कारोमीति सङ्कल्पं कार्यारम्भे मनः सदा। तत्साङ्गाचरणं कुर्वन् क्रियायोगरतो भवेत्। क्षमाविवेकवैराग्यशान्तिसन्तोषनिस्पृहाः। एतन्मुक्तियुतो योऽसौ क्रियायोगो निगद्यते। मात्सर्यं ममता माया हिंसा च मदगर्विता। कामः क्रोधो भयं लज्जा लोभो मोहस्तथाऽशुचिः। रागद्वेषौ घृणालस्यश्रान्तिदम्भक्षमाभ्रमाः। यस्यैतानि न विद्यन्ते क्रियायोगी स उच्यते। स एव मुक्तः स ज्ञानी चण्डि नाशेन ईश्वरः। क्रियामुक्तिकरो योऽसौ राजयोगः स मुक्तिदः। ज्ञानयोगं प्रवक्ष्यामि तज्ज्ञानी शिवतां व्रजेत्। पठनात् स्मरणाद्ध्यानान्मण्डनात् ब्रह्मसाधकः। तद्भेदस्यैकसन्धानमष्टैश्वर्यमयो भवेत्। त्रितीर्थं यत्र नाडी च त्रिपुण्यं परमेश्वरि । स्वदेहे यो न जानाति स योगी नामधारकः। नवचक्रं कलाधारं त्रिलक्षं व्योमपञ्चकम् । स्वदेहे यो न जानाति स योगी नामधारकः। एषोऽस्य विश्वरूपस्य राजयोगो मतो बुधैः। विशेषं कथयिष्यामि शृणु चैकमनाः सति । मूलकन्दे स्थले चैका नाडी तेजस्वती परा। गुदोर्द्धे सा त्रिभागाभूदिडा नाम शशिप्रभा। शक्तिरूपामहानाडी ध्यानात् सर्वार्थदायिनी। दक्षिणेऽपि कुलाख्येति पुंरूपा सूर्यविग्रहा। मध्यभागे सुषुम्नाख्या ब्रह्मविष्णुशिवात्मिका

। शुद्धचित्तेन सा विज्ञा विद्युत्कोटिसमप्रभा।

p. 832) भुक्तिमुक्तिप्रदा ध्यानादणिमादिगुणप्रदा। सुषुम्नान्तः समाश्रित्य नवचक्रं यथा शृणु। मूलाधारं चतुष्पत्रं गुदोर्द्ध्वे वर्त्तते महत्। तन्मध्ये स्वर्णपीठे तु त्रिकोणं मण्डलं परम्। तत्र वह्निशिखाकारा मूर्त्तिः सर्वत्र सिद्धिदा। अस्या ध्यानं मनोमध्ये विना पीठेन वाङ्मयम्। सर्वशास्त्राणिसङ्कर्षं सदा स्फुरति योगवित्। लिङ्गमूले तु पीठाभं स्वाधिष्ठानन्तु षड्दलम्। तन्मध्ये बालसूर्याभं महज्ज्योतिः सुसिद्धिदम्। ध्यानाच्च वर्द्धते आयुः कन्दर्पसमतां व्रजेत्। तृतीयं नाभिदेशे तु दिग्दलं परमाद्भुतम्। महामेघप्रभं तत्तु कोटिविद्युत्समन्वितम्। कल्पान्ताग्निसमं ज्योतिस्तन्मध्ये संस्थितं स्वयम्। तस्य ध्यानाच्चिरायुः स्यादरोगो जगतां वरः। सर्वपापविनिर्मुक्तो जगत्क्षोभकरो महान्। अनाहतमष्टपीठं चतुर्थकमलं हृदि। सूर्यपत्रं महाज्योतिर्महासूक्ष्मन्तु चाक्षुषम्। सूर्यपत्रं द्वादशदलम्। तन्मध्येऽष्टदलं पद्ममूर्द्धवक्त्रं महाप्रभम्। प्राणवायोः स्थलञ्चास्य लिङ्गाकारन्तु कर्णिका। कालिकाख्या कर्णिकेयं अस्या मध्ये तु कुण्डली। पद्मवत्याः प्रभाङ्गुष्ठप्रमाणा रत्नसन्निभा। तस्यासङ्गी जीव इति अनन्तो

बलरूपतः। अस्य ध्यानं जगद्वश्यं खेचरीसर्वगो भवेत्। भवन्ति वश्या देवाद्याश्चिन्ताकर्त्तुर्न चान्यथा। इष्टानिष्टो भवेद्वश्यः सत्यं सत्यं न संशयः। इष्टसिद्धिर्भवेत्तस्य सर्वज्ञादिगुणोदयः। कलापत्रं पञ्चमन्तु विशुद्धं कण्ठदेशतः। अस्य मध्ये पुमानेकः कोटिचन्द्रसमप्रभः। नश्यन्त्यसाध्यरोगा हि सहस्रायुश्च चिन्तनात्। आज्ञाख्यं षष्ठकं चक्रं भ्रुवोर्मध्ये द्विपत्रकम्। अग्निज्वालानिभं ज्योतिः पुंसः स्त्रीतो विवर्जितम्। ध्यानाच्चास्य सर्वसिद्धिरजरामरतां व्रजेत्। चतुःषष्टिदलं तादृ मध्ये चक्रन्तु मध्यमम्। पीयूषपूर्णं कोटीन्दुसन्निभं

p. 833) चामृतस्थली। तन्मध्ये घटिकासंज्ञा कर्णिका रक्तसन्निभा। सह चेन्दुकला तत्रामृतधारां स्त्रवत्यसौ। एतद्ध्यात्वामृतैः स्नात्वा सदा योगात् प्रमुच्यते। उन्मादज्वरपित्तादिदाहशूलादिवेदनाः। नश्यन्ति च शिरोदुःखं जाड्यभावोऽपि नश्यति। सद्योध्यानाद्धुक्तविश्वं जिह्वाजाड्यञ्च नश्यति। ब्रह्मरन्ध्रेऽष्टमं चक्रं शतपत्रं महाप्रभम्। जालन्धरं नाम पीठं एतत्तु परिकीर्त्तितम्। सिद्धपुंसः स्थलं ज्ञात्वा अग्निधूमनिभा शिखा। आदिमध्यान्तहीना स्त्रीपुंमूर्त्तिवर्त्तते परा। अन्तज्ञानी

भवेद्ध्यानादाकाशेऽपि समागमः। निरन्तरं सर्ववेत्ता इत्यूचानो महान् भवेत्। जगन्मध्ये स्थितो जन्तुर्जगद्बाधाविवर्जितः। नवमन्तु महाशून्यं चक्रन्तु तत्परात्परम्। तदुपरि परं किञ्चिन्नास्ति किञ्चिन्महापरम्। महाचक्रं सिद्धचक्रं पूर्णगौर्यादिसंज्ञकम्। तन्मध्ये वर्त्तते पद्मं सहस्रदलमद्भुतम्। ऊर्द्ध्ववक्त्रं महावक्त्रे वर्णशोभापदं महत्। सर्वकल्याणसम्पूर्णमस्य तुल्यं न विद्यते परिमाणं वक्तमस्य मनसा वचसा न हि। त्रिकोणकर्णिका तत्र वर्त्तते जगदीश्वरि । कला सप्तदशी तत्र वर्त्तते परमेश्वरि । निरञ्जनकला सा तु कोटिसूर्यसमप्रभा। कोटिचन्द्रप्रभा चैव शीतोष्णादिविवर्जिता। अस्य ध्यानात् साधकस्य मनोदुःखं भवेन्न हि। अनन्तपरमानन्दस्थानं ज्ञेयं तदूर्द्ध्वतः। ऊर्द्ध्वगतकला तत्र तस्य ध्यानाद्भवेदिति। इति सिद्धिराजयोगं स्त्रीणां भोगं महासुखम्। गीतवाद्यविनोदादि सशिवं वर्द्धते क्षितौ। ध्यानं निरन्तरञ्चास्य पुण्यपापे स्थिरे न हि। निजरूपस्य दृष्टिः स्याद्दूरस्यार्थञ्च पश्यति॥

सुखसाध्यं लक्ष्ययोगमिदानीं श्रृणु पार्वति । पञ्चधा लक्ष्ययोगश्च ऊर्द्ध्वलक्षादिभेदतः। ऊर्द्ध्वलक्षः अधोलक्षो वाह्यलक्षस्तथैव च। मध्यलक्षस्तथा ज्ञेयोऽनन्तलक्षस्तथैव

p. 834) च। लक्षणं श्रृणु चैषां हि फलं ज्ञात्वा महेश्वरि ।
आकाशे दृष्टिमास्थाय मन ऊर्द्धन्तु कारयेत्। ऊर्द्धलक्षो
भवेदेष परमेशस्य चैकता। नासिकोपरि देवेशि
द्वादशाङ्गुलमानतः। दृष्टिः स्थिरा तु कर्त्तव्या अधो
लक्षमिमं भज। अथवा नासिकाग्रे तु स्थिरा दृष्टिरियं भवेत्।
स्थिरा दृष्टिश्चिरायुः स्यात्तथासौ स्थिरदृष्टिमान्। वाह्यलक्षं
स्वयं ज्ञेयं याति तत्त्वनिवासिनाम्। कामिनान्तु
वहिर्दृष्टिश्चिन्तादिषु सुसिद्धिदा। एषा वाह्यमध्यलक्षा इष्टचिन्ता
निराकुलम्। अन्तर्लक्षं श्रृणु शुक्रदिग्विदिगादिवर्जितम्।
चलज्जाग्रत्सुषुप्तेषु भोजनेषु च सर्वदा। सर्वावस्थासु देवेशि
चित्तं शून्ये नियोजयेत्। कर्त्ताकारयिता शुन्यः मूर्त्तिमान् शून्य
ईश्वरः। हर्षशोकघटस्थोऽयं जन्म मृत्यु लभेत् स्वयम्।
घटस्थाचिन्त्ययोर्मूर्त्तिर्हतचिन्तास्वरूपधृक्। विषयं
विषवद्दुष्टं त्यक्त्वा ज्ञात्वा तु मारुतम्। संज्ञाशून्यमना
भूत्वा पुण्यपापैर्न लिप्यते। बाह्यमभ्यन्तरं खं हि
अन्तर्लक्षमिति स्मृतम्। एतद्घ्यानात् सदा किञ्चित् दुःखं न
स्याच्छिवो भवेत्। शून्यन्तु सच्चिदानन्दं निःशब्दं
ब्रह्मशब्दितम्। सशब्दं ज्ञेयमाकाशमिति भेदद्वयन्त्विह।
इदानीं कथयिष्यामि राजयोगस्य लक्षणम्। राजयोगे कृते पुंभिः

सिद्धिचिह्नं भवेदिति। परिपूर्णं भवेच्चित्तं जगत्स्थोऽपि जगद्वहिः। न क्षोभो जन्म मृत्युश्च न दुःखं न सुखं तथा। भेदाभेदौ मनःस्थौ न ज्ञानं शीलं कुलं तथा। प्रकाशकुशसम्बन्धिप्रसङ्गोऽयं निरन्तरम्। सर्वप्रकाशकोऽसौ तु नष्टभेदादिरेव च। अस्य जातेर्न चिह्नञ्च निष्कलोऽयं निरञ्जनः। अनन्तोऽयं महाज्योतिर्वाञ्छांभोगं ददाति च। अस्य चित्ते नानुरागो विरागो न भवेदिति। राज्य प्राप्तेऽपि नो हर्षो हानौ दुःखं भवेन्नहि। क्वचिद्वस्तुनि देशस्य निःस्वने

p. 835) केषु कुत्रचित्। विद्याविद्यामित्रशत्रौ समा दृष्टिश्च सर्वशः। भोगासक्तादिकर्त्तृत्वेन मनो नो भवेत् खवत्। लोकमध्ये भवेत् कर्त्ता मनोमध्येऽपि निष्क्रियः। एषोऽपि राजयोगीति सुखे दुःखे समस्तथा। हर्षशोकौ न जात्वेषां नोद्वेगो लोकसङ्गमे। नित्योल्लासे निराकारे निरासने निरात्मनि। मनसा निश्चलो भूत्वा सदा तिष्ठेत् समोऽपि च। यथाकाशे भ्रमन् वायुराकाशं व्रजते स्वयम्। तथाकाशे मनो लीनं राजयोगक्रिया मता। जगत्संसर्गनिर्लेपं पद्मपत्रजलं यथा॥

इदानीं हठयोगस्तु कथ्यते हठसिद्धिदः। कृत्वासनं पवनाशं शरीरे रोगहारकम्। पूरकं कुम्भकञ्चैव रेचकं

वायुना भजेत्। इत्थं क्रमोत्क्रमं ज्ञात्वा पवनं साधयेत्

सदा। धौत्यादिकर्मषट्कञ्च प्रकुर्याद्धठसाधकः।

एतन्नाड्यान्तु देवेशि वायुपूर्णं प्रतिष्ठितम्। ततो मनो

निश्चलं स्यात्तत आनन्द एव हि। हठयोगान्न कालः

स्यान्मनोनाशो भवेद् यदि। इदानीं हठयोगस्य द्वितीयं

भेदमच्छृणु। आकाशे नासिकाग्रे तु सूर्यकोटिसमं स्मरेत्।

श्वेतं रक्तं तथा पीतं कृष्णमित्यादिरूपतः। एवं ध्यात्वा

चिरायुः स्यादङ्गाजननवर्जितम्। शिवतुल्यो महात्मासौ

हठयोगप्रसादतः। हठाज्ज्योतिर्मयो भूत्वा ह्यन्तरेण शिवो

भवेत्। अतोऽयं हठयोगः स्यात् सिद्धिदः सिद्धसेवितः। इदानीं

ज्ञानयोगस्य लक्षणं कथ्यते शिवे । यज्ज्ञात्वा

ज्ञानसम्पूर्णः शिवः स्यान्न पुनर्भवः। एकमेव जगत्

पश्येद्विश्वात्मा विश्वभावनः। इति कृत्वा तु वै युक्तो

ज्ञानयोगं समाचरेत्। यत्र तत्र स्थितो वापि सर्वज्ञानमयं

जगत्। य एवमस्ति बोधेन सोऽपि ज्ञानाधिकारवान्। प्राप्नोति

शाम्भवीमन्त्रान् सदा नित्यपरायणः। यथा न्यग्रोधवीजं हि

क्षितौ वपुर्द्रुमायते। आदावेकस्ततोऽनेकः

p. 836) स्वभावाच्छादनादिभिः। वर्द्धतेऽहर्निशं वृक्षः

पत्रपल्लवविस्तृतः। स्नेहपुष्पफलैर्वीजैर्विस्तारोऽयं स्वभावतः

। तथासौ निर्मलो नित्यो निर्विकारो निरञ्जनः। एकोऽनेकः स्वयं भूयान् साधनाद् बहुधा स्थितः। पञ्चतत्त्वमयो बुद्धिमायाहङ्कारविक्रियः। एवं बहुविधं विश्वं लोकालोकसुविस्तरम्। एकमेव न चान्योऽस्ति यो जानाति स तत्त्ववित्। स्थावराः पर्वताद्या हि जङ्गमाः खेचरादयः। जङ्गमस्थावराकारः संसारः स्यात् स ईश्वरः। स्वभावलीलया भाति शून्येऽसौ शून्यबुद्धितः। यद्दृष्टं विषयं वस्तु तद्दृश्यमिति कथ्यते। यो दृष्टातीतः सोऽदृश्यस्तदा दृष्टं हि मन्यते। स्वतनूभेदमेवन्तु संसारं दुःखसङ्कुलम्। यत्नाद्दूरं परित्यज्य ज्ञानयोगो भवेत् सुधीः। ज्ञानसंयोग एकस्तु एकस्तु ज्ञानयोगवान्। अतो हि ज्ञानतोऽभिन्नं ज्ञेयं ज्ञानात् पृथक् पृथक्। दूरीकृत्यैवमापृथ्वी भेदवाक्येन दर्शनात् । ज्ञानयोगी भवेद् येन ज्ञानयोगस्तु चैककः। एवं ज्ञानान्महेशानि कालजित् शिवतां व्रजेत्। स्वभावभेदमेतत् शृणु देवि प्रयत्नतः। यच्छ्रुत्वा सर्वबोधः स्यात् मुक्तिदः सिद्धिवाञ्छितः। आत्मनो वा पृथिव्याद्याः स्वभावः किञ्चिदुच्यते। आत्मैव पृथिवी धात्री कोमला च क्वचिद्दृढा। क्वचिन्मनोहरा सा च विमला च मलामला। दुर्गन्धा च सुगन्धा च निर्गन्धा गन्धमोहिनी। स्वर्णरूपा धातुरूपा चित्रा रत्नमयी परा। क्वचित् श्वेता क्वचिद्रक्ता क्वचित् पीता च कृष्णला। ऊर्वरा

ऊर्वरा सा तु विषामृतमयी सदा। तथा च

देवगन्धर्वकिन्नराद्याः खगादयः। सुखसम्पिण्डितो रोगी

तथैव क्रोधशान्तधीः। अशेषरूपबलितो नानाबुद्धिरतः स्वयम्

। देवतत्त्वं भूतशक्त्या जीवसंज्ञा भ्रमात्मिका। ज्ञानयोगी

निर्विकारो निस्ताप एक ईश्वरः। आत्मैकमूर्त्तिमान् भूत्वा निर्विकल्पो

p. 837) निरञ्जनः। सुखी दुःखी मोहयुक्तोऽनन्तचेताः स्वभावतः

। स्त्रीपुंरूपी महान् सो हि परस्परविमोहितः। अमनस्कः

स्वीयभावात् ज्ञानयोगी निराकुलः। स्रक्कन्दनादिवामासु

स्वभावाद्भोगमिच्छुकः। सुखात्मकैः सुखस्थाय

परदुःखाय सञ्चितिः। आत्मना मनसा पञ्चां

पुत्त्रादिरत्नसम्पदौ। असारसारणात्तर्हि ज्ञानधीर्मनसा भवेत्।

आत्माविवेकमागम्य चलच्चित्तं महाकुलम्। विषयान्धतमो

दृष्ट्वा नो वेत्ति परमात्मनः। अमायात्मा तत्त्वातीतः

सत्सन्धानविवर्जितः। सुखी दुःखी जन्म मृत्युं याति सत्यं पुनः

पुनः। वैराग्यादिधनं त्यक्त्वा विषवद् दुःखकृद्धियः।

कोटिसूर्यसमात्मेति ज्ञानयोगाद्विमुच्यते। रवी तेजो घृतं दुग्धे

तिले तैलं स्वभावतः। शशमिन्दौ कुले शाखं क्षारे च लवणं

यथा। तथा ब्रह्मणि संसारो ह्यखण्डपरिपूर्वके। इदानीं

वाह्यलक्षाणि सिद्धिदानि शृणु प्रिये । धारणाख्या तु चैतानि

ज्ञातव्यानि विशेषतः। लीलया भावयेल्लीनं ज्योतिःपूर्णं महापरम्। अथवा तत्र देवेशि धूम्राकारं षडङ्गुलम्। अथवाष्टाङ्गुलं रक्तं नासिकोपरि लक्षयेत्। द्वादशाङ्गुलमानं वा पृथ्वीतत्त्वन्तु पीतभम्। लक्षयेदथवा तत्र कोटिसूर्यसमप्रभम्। तेजः पुञ्जं महाकाशं तत्तद्ध्यानाच्छिवो भवेत्। आकाशमध्ये आकाशोपरितो दृष्टिसुस्थिरम्। कृत्वा ध्यानाद्विना सूर्यं चण्डसूर्यन्तु पश्यति । अथवा लक्षमेतत्तु कर्त्तुर्वहिः शिवोपरि। ऊर्द्ध्वं सप्तदशाङ्गुल्यं प्रमाणं तेजसा प्रभम्। अथवा पृथिवीतत्त्वं तप्तकाञ्चनसन्निभम्। दृष्टिरग्रे तु कर्त्तव्यं लक्षमेतद्यतात्मनाम्। उक्तानां यस्य कस्यैव एकशः करणं प्रिये । बलीपलितहीनः स्यादौषधेन विना तथा। सर्वरोगाणि नश्यन्ति मित्रवच्च वशी रिपुः। जीवेद्वर्षसहस्रन्तु सर्वलोकेषु पूजितः। जिह्वाग्रे प्रभवेद्विद्या विना शास्त्रावलोकनात्।

p. 838) मूलकन्दोत्थतलतो ब्रह्मनाडीसमुद्भवा। श्वेतवर्णा ब्रह्मरन्ध्रपर्यन्तमेव तिष्ठति। एषा तु ब्रह्मरन्ध्राख्या तन्मध्ये वर्त्तते परा। पद्मतन्तुममाकारा कोटिसूर्यतडित्प्रभा । चलत्यूर्द्ध्वं महामूर्त्तिरस्य ध्यानाद्भवेच्छिवः। अणिमाद्यष्टसिद्धिस्तु समग्रेण प्रसीदति। ललाटोपरि वा ध्यात्वा

चन्द्रं वा ज्योतिरीश्वरम्। नाशयेत् कुष्ठरोगादीन् महायुष्मान्
शिवः परः। भ्रुवोर्मध्येऽथवा ध्यात्वा अर्कन्तु तेज ईश्वरम्।
स्थिरदृष्टौ राजपूज्यो जीवन्मुक्तः शिवो यथा।
आत्मानमात्मरूपं हि ध्यात्वा यो निष्क्रियो भवेत्।
निराशीर्यततत्त्वोऽयं इतरो न नृपस्थितिः।

इदानीं शृणु नाडीनां भेदं वक्ष्यामि सिद्धिदम्।
मेरुवाह्ये इडानाम्नी पिङ्गलया समन्विता। सुषुम्ना
भानुमार्गेण ब्रह्मद्वारावधि स्थिता। सरस्वती सुगन्धा तु
गान्धारी हस्तिजिह्वका। ज्ञातव्या कर्णयोर्मध्ये नेत्रयोश्च
तथान्तिमा। पूषा चालम्बुषा चेति मूलस्था कुत्रचित् तथा।
लिङ्गद्वारादिडामार्गे ब्रह्मस्थानावधि प्रिये । नाड्यन्तं
प्रतिलोमेषु सहस्राणां द्विसप्ततिः। इदानीं देहमध्यस्थाः
कथ्यन्ते दश वायवः। कार्यकारणभावेन कथ्यन्ते तानि
चिह्नतः। प्राणवायुर्हृदि स्थित्वा श्वासोच्छ्वासं करोति सः।
असिकान्तं पीतमीशं करोति योगसंज्ञकः। अपानो गुददेशस्थः
करोत्याकुञ्चनं स तु। स्तम्भनञ्च तथापानः समानो
नाभिमण्डले। तोषकादिपोषकन्तु नाडीनां रूचिदायकः।
दीप्ताग्निमध्येऽपि तथा समानाख्या महापरा। ताहृ मध्ये
उदानस्तु अश्नाति पिबतीति च। शरीरं सकलं व्याप्य व्यानवायुः

प्रतिष्ठितः। शरीरे चालनं तेषु करोति स्थापयत्यपि। नेत्रमध्ये कूर्मनामा निमेषोन्मेषकृदयम्। उद्गारे नाग आख्यातः ऊर्द्ध्ववायुः प्रचालने। कृकरः क्षुत्करो ज्ञेयो देवदत्तो

p. 839) विजृम्भणे। धनञ्जयः सच्चिदाकारो मृतदेहं न मुञ्चति । यद्यपि सर्गकाण्डे सर्वमेतदुक्तं तथापि कार्यकारणभावज्ञापनाय पुनर्निर्दिष्टमिति न पुनरुक्तम्।

इदानीं मध्यलक्षन्तु कथ्यते सिद्धिकारकम्। श्वेतं रक्तं तथा पीतं धूम्राकारन्तु नीलभम्। अग्निज्वालासमानाभा विद्युत्पुञ्जसमप्रभा। आदित्यमण्डलाकारमथवा चन्द्रमण्डलम्। ज्वलदाकाशतुल्यं वा भावयेद्रूपमात्मनः। एतज्ज्योतिर्मयं देहं मनोमध्ये तु लक्षयेत्। एतेषाञ्च कृते लक्षे नानादुःखं प्रणश्यति। मनसस्तु मलो याति महानन्दो भवेत्ततः। कथ्यते तु देव्यधुनाकाशं पञ्चभिर्लक्षणैः। आकाशन्तु महाकाशं पराकाशं परात्परम्। तत्त्वाकाशं सूर्यकाशमाकाशं पञ्चलक्षणम्। सवाह्याभ्यन्तरे नित्यं निराकाशन्तु निर्मलम्। कर्त्तव्यं लक्षमाकाशं साधयेत् साधनं विना। घनान्तरालसदृशं पराकाशं तथैव च। कल्पान्ताग्निसमं ज्योतिर्महाकाशं

स्मरेत्तथा। कोटिकोटिप्रदीपाभं तत्त्वाकाशं स्मरेत्तथा। सूर्याकाशं तथा कोटिसूर्यविन्दुसमं स्मरेत्। सवाह्याभ्यन्तरे चैवमाकाशं लक्षयेत्तु यः। शिववद्विहरेद्विश्वे पापपुण्यविवर्जितः। एतेषाञ्चैव लक्षेण कर्मद्वाराऽघमाहरेत् । नवचक्रं कलाधारं द्विलक्षं व्योमपञ्चकम्। समग्रं यो न जानाति स योगी नामधारकः। षोडशाधारभेदन्तु शृणु देवि विशेषतः। अङ्गुष्ठपादयोस्तेजः सलक्षस्थिरदृष्टिमान्। पादाङ्गुष्ठे य आधारः प्रथमो योगतत्त्वतः। द्वितीयं पादमूलन्तु पादमूलपरं स वै। पादस्य पार्ष्णी संस्थाप्य बलवान् प्रभवेन्मुनिः। पादमूलेऽथवा पादाङ्गुष्ठमूलं विधारयेत्। तृतीयन्तु गुदाधारो गुदसङ्कोचनक्रिया। विकाशाकुञ्चनं तस्य स्थिरवायौ च मृत्युजित्। लिङ्गाधारं चतुर्थन्तु लिङ्गसङ्कोचनन्तु च। लिङ्गसङ्कोचनाभ्यासात्

p. 840) पश्चिमादण्डमध्यगः। वज्रनाडीति तन्मध्ये पुनरभ्यसयं स्तथा। सञ्चारो वायुमनसोरतिसञ्चार इति त्रिधा। ग्रन्थित्रयविभेदस्तु तद्भेदो ब्रह्ममार्गतः। ब्रह्मपद्मो वायुपूर्णो भूत्वा तिष्ठति योगिराट्। वीर्यस्तम्भो भवेत्तेन साधयेत्तु सदा युवा। मूलाधारे ब्रह्मपद्मे षट्पद्मे च तथा तथा। पञ्चमं जठराधारं तदा बन्धयति क्रमात्। मृत्युना

भङ्गसिद्धोऽयं मृत्योरेव क्षयङ्करः। अनेन

पश्चिमादूर्द्धं वायुः कुर्याद्विशालधीः। बन्धोऽयं

बुद्धिमनसोः पञ्चमाधारकालजित्। नाभ्याधारो भवेत्

षष्ठस्तत्र प्राणं समभ्यसेत्। स्वयमुत्पद्यते नादो नादतो

मुक्तिदन्ततः। सप्तमो हृदयाधारस्तस्मिन् वायुनिबन्धनात्।

ऊर्द्धक्राणि पद्मानि विकसन्ति महान् भवेत्।

कण्ठाधारोऽष्टमस्तत्र कण्ठसङ्कोचलक्षणः। जालन्धराख्यो

बन्धः स्यात्तस्मिन् सति मरुद्दृढः। नवमो घण्टिकाधारस्तत्र

जिह्वाग्रमग्रतः। सम्पिवत्यमृतं तस्माद् योगजिन्मृत्युजित्परः।

दशमस्ताद्द काधारस्तत्र जिह्वाग्रतः कृते। चलने दोहने चैव जिह्वा

जडति लम्बिता। नासिकाप्राप्तजिह्वेयं ताद्द लग्ना भवेत्ततः।

एकादशी भवेज्जिह्वा तलजाधार ईश्वरि । जिह्वाग्रमथने तस्मिन्

पानीयं मधुरं भवेत्। तत्पीतेषु कविर्गीतिज्योतिश्छन्दोविदां

वरः। दन्ताधारो द्वादशेति सर्वरोगक्षयङ्करः।

धारयेद्दन्तयोर्मध्ये जिह्वाग्रञ्च बलादपि।

धृत्वार्द्धघटिकामात्रं सर्वरोगन्तु नाशयेत्। नासाधारस्ततो

ज्ञेयो नासालक्षस्त्रयोदशः। मनःस्थिरकरो यस्तु वायुस्थिरकरो

महान्। नासापुटे स्थिरा दृष्टिराधारोऽयं चतुर्द्दशः।

कृतेऽस्मिन् स्वीयतेजः स्यात् प्रत्यक्षं षड्मिासतः। पार्थिवं

त्रुटति क्षिप्रं प्रत्यक्षं स्वीयतेजसा। पञ्चदशो भ्रुवोर्मध्ये

स्थिरदृष्टिस्तथा ध्रुवम्। अस्मिन् दृष्टिः स्थिरा कोटिः किरणानि स्फुरन्ति हि। नेत्राधारः षोडशोऽयमङ्गुल्यग्रेण चालयेत्।

p. 841) पृथ्वीमध्ये तु यत्किञ्चिद्वर्त्तते जठरानलः। प्रत्यक्षं तद्भवेत्सर्वं तदाभ्यासान्न संशयः। सर्वज्ञः प्रभवेत्तेन इति आधारषोडशः॥

इदानीं योगमष्टाङ्गं शृणु लक्षणसंयुतम्। यमश्च नियमश्चैव चासनं प्राणसंयमः। प्रत्याहारो धारणा च समाधिश्च विशेषतः। अष्टाङ्गयोग एभिस्तु चैतेषां लक्षणं शृणु। शान्तिः सन्तोष आहारो निद्राल्पा मनसो दमः। शून्यान्तःकरणश्चेति यमा इति प्रकीर्त्तिताः। चापल्यन्तु दूरे त्यक्त्वा मनःस्थैर्यं विधाय च। एकत्र मेलनं नित्यं प्राणमात्रेण सा मतिः। सदोदासीनभावस्तु सर्वत्रेच्छाविवर्जनम् । यथालाभेन सन्तुष्टः परमेश्वरमानसः। मानदानपरित्याग एते तु नियमा इति। आसनानि च तावन्ति यावन्तो जीवजन्तवः। प्राणायामस्त्रिधा चेति बहुधा प्रथमं शृणु। आसने प्राणसंयामे न शक्ताः सुकुमारकाः। महापुण्यप्रभावेण शक्यते तु महात्मना। इडां शशिप्रभां ध्यात्वा मन्देन्दुना तु पूरयेत्। पूरयित्वा यथाशक्ति ध्यानयोगी तु कुम्भयेत्।

महाज्योतिर्मनो भूत्वा वायुः पूर्णकलेवरः। शक्तित्रासन्तु सन्त्रास्य रेचयेद्वायुमर्हितः। पिङ्गलामर्कवर्णान्तु त्यजेध्यात्वा शनैः शनैः। अयं पतङ्गः काष्ठाग्निप्रत्यासेन पुनः पुनः। कृत्वा कलेवरं शुद्धं कुर्याद्यत्नैर्महात्मना। मनो निवार्य संसारे विषयकार्ये तथैव च। मनोविकारभवञ्चैव त्यक्त्वा शून्यमयो भवेत्। प्रत्यहारो भवत्येव सर्वनिन्दाचमत्कृतः। ध्यानन्तु द्विविधं प्रोक्तं स्थूलसूक्ष्मविभेदतः। स्थूलं मन्त्रमयं विद्धि सूक्ष्मन्तु मन्त्रवर्ज्जितम्। समाधिर्निश्चला बुद्धिः श्वासोच्छ्वासादिवर्जितः। पिण्डब्रह्माण्डयोरैक्यं शृण्विदानीं प्रयत्नतः। ब्रह्माण्डे सन्ति ये चाण्डाः पिण्डमध्येऽपि ते स्थिताः। तलं पादाङ्गुष्ठतले तस्योपरि

p. 842) तलातलम्। महातलं गुल्फयोर्मध्ये गुल्फोपरि रसातलम्। सुतलं जङ्घयोर्मध्ये वितलं जानुमध्यकम्। ऊर्वोर्मध्येऽतलं प्रोक्तं सप्तपातालमीरितम्। तलं तलातलञ्चेति महातलरसातलम्। सप्तपातालमेतत्तु सुतलं वितलातलम्। इदानीं पिण्डमध्ये तु सप्तलोकं शृणु प्रिये । मूलाधारे तु भूर्लोको लिङ्गाग्रे तु भुवस्ततः। स्वर्लोको लिङ्गमूले तु मेरुमूले महस्तथा । मेरुच्छिद्रे जनोलोको मेरुनाड्यां तपस्तथा। कमले मर्त्त्यलोकस्तु

इति लोकः पृथक् पृथक्। भूर्भुवः स्वर्महश्चेति जनश्चैव तपस्तथा। सप्तमः सत्यलोकस्तु सप्तलोक इति स्मृतः। सप्तलोकैस्तु पातालैर्भुवनानि चतुर्दश। अथ ब्रह्माण्डमध्यस्थाश्चत्वारो लोकपालकाः। पिण्डमध्ये तु तान् ज्ञात्वा सर्वसिद्धीश्वरो भवेत्। इन्द्रो ब्रह्मा विष्णुरीशश्चत्वारश्चात्मदेवताः। मूलाधारे चतुष्पत्रे गजारूढो महानिति। सृष्टिकर्त्ता च तत्रैव स्वाधिष्ठाने महान् हरिः। मणिपूरे शूलपाणिरष्टसिद्धीश्वरो महान्। ताहृ द्वारे ताहृ मध्ये ललाटे वक्षकण्ठके। शृङ्गाटिका कपाले च लम्बिका ब्रह्मरन्ध्रके। नवचक्रमूर्द्धचक्रञ्च त्रिकूटेत्येकविंशतिः। ब्रह्माण्डानि वसन्तीति ज्ञातव्यानि प्रयत्नतः। सप्त द्वीपानि कथ्यन्तेऽधुना तानि शृणु प्रिये । जम्बूद्वीपस्तु मज्जायां शाकद्वीपस्तु मध्यमः। शाल्मद्वीपः शिरोमध्ये मांसमध्ये कुशस्तथा। त्वचि क्रौञ्चो लोममध्ये गोमयद्वीप ईरितः। नखमध्ये तथा श्वेतः सप्तद्वीपा वसुन्धरा। जम्बूः शाकस्तथा शाल्मः कुशः क्रौञ्चश्च गोमयः। श्वेतः सप्तेति खण्डानि सप्तखण्डैर्वसुन्धरा। गुप्तान्येतानि रूपाणि देहमध्ये स्थिराणि च। समुद्राः सप्त कथ्यन्ते पिण्डमध्ये व्यवस्थिताः। लवणेक्षुसुरासर्पिर्दधिदुग्धजलान्तकाः। लवणं स्वेदमध्ये तु इक्षूरक्ते मधु त्वचि। सर्पिर्मेदो वसा मध्ये दधि क्षीरं ललाटके

।

p. 843) वीर्यमध्येऽमृतो ज्ञेयः पादे कूर्मः स्थितो महान्।
इदानीन्तु नवद्वारे नव खण्डानि संश्रृणु। पाय्वादौ भारतं
खण्डं काश्मीरं त्रिकमण्डद्द म्। द्विजखण्डमेकपादं
खण्डं वक्ष्ये समण्डलम्। कैवर्त्तं गर्त्तगान्धारं
नवखण्डमिति स्थितम्। इदानीं पर्वताश्चाष्टौ कथ्यन्ते श्रृणु
यत्नतः। मेरुदण्डे सुमेरुस्तु पीठमध्ये हिमालयः।
वामस्कन्धे तथा दक्षे मलयो मन्दराचलः। विन्ध्यस्तु दक्षिणे
कर्णे वामे मैनाक ईश्वरि । ललाटे मध्यदेशे तु श्रीशैलः
परमेश्वरि । तथा ब्रह्मकपाटस्थः कैलासः पर्वतो महान्।
सुमेरुर्हिमवान् विन्ध्यो मलयो मन्दरस्तथा। श्रीशैलो
मैनाकश्चेति कैलासोऽष्टौ च पर्वताः। अपरे पर्वताः सर्वे
अङ्गुलीमध्यवासिनः। शरीरे नवनाडीस्था नर्मदा च महेश्वरि
। इडायां यमुना देवि पिङ्गलायां सरस्वती। सुषुम्नायां
वहेद्गङ्गा चान्योन्यासु च नाडिषु। गङ्गा सरस्वती गोदा
नर्मदा यमुना तथा। कावेरी चन्द्रभागा च वितस्ता च इडावती।
द्विसप्ततिसहस्त्रेषु नदीनदपरिस्त्रवः। इतस्ततो देहमध्ये ऋक्षश्च
सप्तविंशतिः। योगाश्च राशयश्चैव ग्रहाश्च तिथयस्तथा।
लहरीषु मीनमनी चावाहनं स्थापनं तथा। सर्वाङ्गेषु च
देवेशि समग्रं ऋक्षमण्डलम्। त्रयस्त्रिंशत्कोटयस्तु निवसन्ति च

देवताः। तथा पीठानि सर्वाणि देहमध्ये स्थितानि च। हृदये व्योममध्ये तु अनन्ताद्यास्तु वासुकिः। उदरे व्योममध्ये तु परे नागा वसन्ति हि। गन्धर्वकिन्नराः शूरा विद्याधराप्सरादयः। अनेकतीर्थवर्णाश्च गुह्यकाश्च वसन्ति हि। अनन्तसिद्धयो बुध्या प्रकाशो वर्त्तते हृदि। मेघस्य मण्डलं ज्ञेयम् अश्रुपाते तथैव च। चन्द्रार्कौ नेत्रयोर्मध्ये जङ्घा लोमसु साक्षिणः। तृणगुल्मादिकञ्चापि विश्वरूपं स्मरेत्ततः। समग्रदर्शनान्मुक्तः स्वर्गभोगञ्च मत्सुखम्।

p. 844) तदेतच्चिन्तया याति रोगशोकविवर्ज्जितः। यत्कर्मा कर्मणा शङ्का मनोमध्ये भवेद्वहिः। तत्कर्मकरणं मुक्तिरित्याह भगवान् शिवः। यस्य दर्शनमात्रेण रोगशोकविवर्जितः। परमानन्दचित्तः स्यात्तपस्वी चैव कीर्त्तितः। सप्तद्वीपा भवेद्दृष्टा तत्त्वज्ञानं ततो भवेत्। सर्वभावं विजानीयाद् वज्रदेहो भवेत्तथा। सर्पदष्टे विषं न स्यात् क्षुधा निद्रा तृषा तथा। उष्णता शीतता चेति वाक्सिद्धिः स्यान्न संशयः। विद्युत्पातेऽपि देहस्य क्वचिद्धानिर्न जायते। ततोऽसौ वायुयोगी स्याद्दृष्ट्वा पृथ्वीकुलान्वितः। अणिमाद्यष्टसिद्धिः स्यान्महापद्मोदयस्तथा। आगच्छन्ति समीपे च निधयो नात्र संशयः। यत्रेच्छा गमनं तत्र स्वर्गे मर्त्त्यैरसातले।

स्फुरत्याज्ञाख्यः सर्वत्र समीपे परमेश्वरः। कारणे हारणे शक्तो रक्षणेऽपि च पार्वति । आत्ममध्ये मनो नित्यं निर्जने निवसेत् सुधीः। कृत्वात्ममनसोरैक्यं प्राप्नोति परमं पदम्। चन्द्रः सूर्यः स्थिरो यावत् तावद्देहस्थितिस्तथा। तावदेकं समाभाष्य प्राप्नोति च सदागतिः। स भवेत् कविता धीरा निश्चला शान्तिरेव च। गुरुपादप्रसादेन तदैक्यं याति सिद्धिभाक्। अधुना कमलानान्तु शृणु सङ्केतमद्भुतम्। अनेकाकारभेदोत्थं कं स्वरूपन्तु निर्मलम्। कमलं तेन विख्यातं त्रिविधं तत्त्वदेहकम्। तत्राधारश्चतुष्पत्रे सत्त्वरजस्तमोदयः। एतद्भावस्थितश्चात्मा साध्वसाधुकरो भवेत्। अस्मिन् सति स्थिरे चित्ते यमो वन्दीव गच्छति। अनाहतो द्वितीयं यत्कथ्यते शृणु श्रद्धया। अनाहते महापीठे चतुरस्रसमन्वितम्। वर्त्ततेऽष्टदलं पद्ममधोवक्रन्तु सत्पुरम्। स्पर्शशब्दरूपरसगन्धा बुद्धिर्मनस्तथा। अहङ्कारः क्रमादेते तत्राष्टदलसंस्थिताः। सपर्या पृथगाकारा वर्त्तते तत्र निश्चितम्। ध्यानादात्मप्रकाशोऽस्य प्रकाशं कमलं ततः
।

p. 845) यथा सूर्यप्रकाशेन ऊर्द्ध्ववक्रं प्रकाशितम्। आत्मध्यानात् सदा तत्र आयुर्वृद्धिर्दिने दिने। शक्तिप्रसन्नता स्याच्च रोगशोकविवर्जितः। यस्य मुद्राभ्यासशाली सम्यक् सिद्धा च खेचरी। चिदानन्दमयं चित्तं चेतना चन्द्रिकान्विता।

परमात्मा महासूर्यः सूर्य एकः प्रकाशकः।

प्रकाशानन्दयोरैक्यं कर्त्तव्यञ्च निरन्तरम्। दीप्तस्तथा

महाज्योतीरविर्भाति परं पदम्। सदोदितं मनःसूर्यं

चन्द्रज्योतिरिवेक्षते। तन्मध्ये नाभिकर्तेति करणं ना कुलाकुलम्।

अव्यक्तन्तु परं तत्त्वमनित्यं वर्त्तते सदा। एको नाम पुमानस्ति

तस्मात्तस्मात् परं पदम्। तस्मात्तु परमं शून्यं तस्मात्

स्यात्तु निरञ्जनम्। एते पञ्चगुणोपेताः कथ्यन्ते तद्गुणं यथा।

निर्गुणत्वं निर्मलत्वं परिपूर्णत्वमेव च। व्यापकत्वं

केवलत्वं आनन्दस्य गुणा इति। निराकारत्वनित्यत्वनिजत्वञ्च

निरञ्जनम्। निर्णिकेतनता चेति तत्पदस्येति तद्गुणाः।

लीनताशीर्णतामूर्च्छातोयमण्डलता इति। गुणाः पञ्च

समाख्याताः शून्यस्य परमस्य वै। स्वभावं सहजं सत्यं

शान्तिः शान्तिस्वरूपतः। इति। निरञ्जनगुणाः पञ्च एतज्ज्ञानी

महेश्वरः। विद्योत्पत्तिस्तदानीन्तु कथ्यते श्रृणु यत्नतः।

आनन्दपरमात्मेति परमानन्द एकतः।

प्रबोधपरमानन्दचित्तोत्पत्तिप्रबोधवान्। चिदुदयात् प्रकाशश्च

एषां पञ्च तथैव च। अविनाश्योऽक्षयोऽभेदोऽदाह्यो ह्यखाद्य

एव च। एते पञ्च गुणाः प्रोक्ता अनादो नादवैरिणा।

किरणस्फूर्त्तिविस्फूर्त्तिहर्षवत् परमात्मना। तेतु पञ्च प्रकारेण

गुणाः पञ्च प्रकीर्त्तिताः। विचारश्च प्रभोल्लासा विभावश्च

लयस्तथा। प्रबोधस्य गुणाः पञ्च कीर्त्त्यन्ते तेन हेतुना।
अभ्यासकर्तृकमनाः सर्वतत्त्वप्रभा तथा। चिदुदयस्य पञ्चेति
गुणा ज्ञेया विशेषतः। बोधनं समयत्वञ्च विस्मृतिः

p. 846) सकलप्रभा। प्रकाशस्य गुणाः पञ्चचैते ज्ञानकराः
शुभाः। एतज्ज्ञाने ततश्चैषां ज्ञानमुत्पद्यते महत्।
आकाशात् पवनो वायोस्तेजस्तेजस एव च। जलं जलात्तथा पृथ्वी
एषां पञ्चगुणास्तथा। अगोचराद्वयानन्तग्राह्यमेषां
तथात्मनः। सञ्चारश्चालनं शेषे पञ्चधूम्राभमम्बरे।
उष्मप्रकाशरक्ताभज्वालादाहस्तु तेजसा। प्रकाशादेव
शैथिल्यमधुता श्वेततज्जले। स्थूलसाकारकाठिन्यगन्धं
पातमृदौ तथा। महाभूतानि पञ्चेति देहमध्येऽधुना श्रृणु।
महाभूतानि पञ्चेति पृथ्वीतेजो मरुत् खकम्। एतेषाञ्च तथा
पञ्चगुणस्थानं श्रृणु प्रिये । अस्थि मांसं लोम नाडी त्वक् चेति
पृथिवीगुणाः। क्षुधातृष्णालस्यनिद्रा ग्लानिश्च पञ्च वारिणः।
रोगो लज्जा भयोद्वेगौ धारणा च मरुद्गुणाः। एतज्ज्ञानेनैव
तेषां बुद्धिरुत्पद्यते शुभा। यद्यपि सर्गकाण्डे
पृथ्व्यादेर्गुणा उक्तास्तथाप्येतज्ज्ञानेनेत्यनेन
कार्यकारणभावदर्शनाय पुनरुच्यन्ते। मनो
बुद्धिरहङ्कारश्चित्तं चैतन्यमेव च। एते पञ्चप्रकाराश्च

अन्तःकरणसम्भवाः। मननामननं ज्ञेयं बुद्ध्यादिपञ्च पञ्च तु। विवेकशान्तिसन्तोषक्षमावैराग्यतेति च। एते पञ्चगुणा बुद्धेरहङ्कारगुणान् श्रृणु। अहम्भावमहञ्चादियुगान्तं हिंसनं तथा। वृत्तिः स्मृतिर्मतिस्त्याज्यं निराशं चैतिका गुणाः। निःस्पृहता द्वेषताधैर्यं विमर्षचिन्तनं तथा। चित्तेर्गुणास्त्रयो जीवगुणान् श्रृणु महेश्वरि। आस्था श्रद्धा कृपा भक्तिः सत्यं सत्त्वगुणा इति। त्यागो भोगश्च श्रद्धा च सार्थवस्तुस्पृहा तथा। रसो पञ्चगुणाः चैते तामसस्य गुणान् श्रृणु। प्रमोदः स्वादकलहौ विवादो भ्रान्तिवर्द्धनम्। वञ्चनञ्च तथा शोकस्तामसस्य गुणा इमे। स्वप्नजाग्रत्सुषुप्तानि चैतन्यं जीवका गुणाः। एतादृशि सति तत्त्वं चैतन्यात्तद्भवेदिति।

p. 847) प्रकृतीच्छा क्रिया माया वचः पञ्च गुणा इति। आशा तृष्णास्पृहाकाङ्क्षामिथ्यान्तं प्रकृतेरिति। उन्मादो वासना वाञ्छा चेक्षिता च गुणाः प्रिये। शरणं सत्कुलाचारः कार्यनिश्चय उच्यते। इदं योगरहस्यञ्च न वाच्यं मूर्खसन्निधौ॥

योगदेशस्तु तत्रैव॥ उत्पातरहिते देशे कण्टकादिविवर्जिते। अभ्यस्यते सदा योगः समः स्यात् सुखदुःखयोः। सुराजनि

समाश्रित्य कर्त्तव्यो निरुपद्रवे। देशे तु सर्वशस्याढ्ये लोभमोहविवर्जिते। स्तुतिर्निन्दा न कर्त्तव्या साधुना सत्यवादिना॥ योगानधिकारिणमाह तत्रैव॥ मनोमध्ये दया नास्ति सदा यः कलहप्रियः। स्वकार्यलोभने शीलो गुरुकार्यपराङ्मुखः। एतस्मै च न दातव्यं वक्तव्यं तस्य सन्निधौ। नञुभयत्र सम्बध्यते न वक्तव्यमित्यर्थः। योगाधिकारिणोऽपि तत्रैव॥ भावाभावविनिर्मुक्तः सर्वग्रहविवर्जितः। सदानन्दमयो योगी सदाभ्यासी सदा भवेत्। विरुद्धे दुःखदेशे च विरूपेऽतिभयानके। एतदनिष्टसंस्पर्शे न्यूनाधिके बलाधिके। एवम्भूतस्य कर्माणि सङ्कल्परहितानि च। एवं गच्छन् स्वपन् पश्यन् पापपुण्यैर्न लिप्यते। उत्पन्नतत्त्वबोधः स्यात् सदा शीलस्य सर्वदा। परे दृष्टिविलं न स्याद् विविधानि मृतानि च। अन्तःकरणमेतस्ययोगिनो निष्क्रियं तु स। सर्वदा सहजस्तस्य निष्कलाध्यात्मवादिनः। यदा प्रयत्ननिष्पाद्यं ग्राह्यं सर्वमकारणम्। यस्य चित्ते हठं नास्ति सहजानन्दनिर्भरम्। कर्त्तव्या च स्थिरा दृष्टिस्तेनैव परमं स्थिरम्। मनः स्थिरञ्च तेनैव कर्त्तव्यं तत्परं पदम्। इदानीं योगमाहात्म्यं कथ्यते यद्भवेत्ततः। गुरोरनुग्रहाच्छास्त्रपाठादाचारतस्तथा। वेदान्तार्थरहस्यार्थसर्वज्ञानादुपासनात्। आसनाद्धारणाद्ध्यानाल्लयषट्कर्मसाधनात्।

आसनाच्चतुरशीतिवैराग्यत्यागसम्भवात्।

p. 848) हठयोगाद्वरौषध्यात् मुद्रासाधनमानतः।
वनवासाद्बहुक्लेशात्तथा मन्त्रादिसाधनात्।
बहुदानतपस्तीर्थसेवनाद् दानशिक्षणात्। सन्ध्यात्रयग्रहेणाथ
षडदर्शग्रहणात्तथा। शिरोम्ण्डगतो न्यासाद् योगतत्त्वञ्च
विद्यते। गुरुपादोदकं शिष्टसेविना सत्यवादिना।
कन्यास्त्र्यादिदृष्टिपातहर्षगतिविवर्त्तनात्। प्रसादात् सद्गुरोः सम्यक्
प्राप्नोति परमं पदम्। न गुरोरधिकं तत्त्वं यत्तस्मात् परमं
पदम्। निमेषार्द्धेन तस्यैव आज्ञापालनतो भवेत्।
महानन्दशतप्राप्तिस्तस्मै श्रीगुरवे नमः।
नानाविकल्पविभ्रान्तिनाशञ्च कुरुते तु यः। सद्गुरुः स तु विज्ञेयो
न तु वैरप्रकल्पकः। अत एव महेशानि सद्गुरुः शिव आदितः।
सत्यवादी च सच्छीलो गुरुभक्तो दृढव्रतः। स्वल्पाचाररतात्मा यो
दानादिशीलसंयुतः। कापट्यलोभविन्यासौ
महावंशसमुद्भवः। ईदृशः सद्गुरुस्तस्य सङ्गतौ यत्नवान्
भवेत्। तदेव मनसः शान्तिं प्राप्नोति परमं पदम्॥

दत्तात्रेयसंहितायां प्रथमाध्यये तु॥ योगो हि बहुधा
ब्रह्मन् तत्सर्वम् कथयामि ते। मन्त्रयोगो लयश्चैव

हठयोगस्तथैव च। राजयोगश्च सर्वेषां योगानामुत्तमः स्मृतः॥ इति योगभेदः॥

आरम्भश्च घटश्चैव तथा परिचयः स्मृतः।
निष्पत्तिश्चेत्यवस्था च चतुर्द्धा परिकीर्त्तिता। इति योगावस्था।
एतेषां विस्तरंवक्ष्ये इत्थं श्रोतुमिहेच्छसि। अङ्गेषु मातृकान्यासपूर्वं मन्त्रं जपन् सुधीः। एवञ्च मन्त्रसिद्धिः स्यान्मन्त्रयोगः स उच्यते। मृदुस्तत्राधिकारी स्याद्द्वादशाब्दैस्तु साधनात्। प्रायेण लभते ज्ञानं सिद्धिश्चैवाणिमादिका। अल्पबुद्धिरयं योगः सेवते साधकाधमः। मन्त्रयोगश्च यः प्रोक्तो योगानामधमः स्मृतः॥ इति मन्त्रयोगः॥
लययोगश्चित्तयोगात् सङ्केतैश्च प्रजायते। आदिनाथेन सङ्केतानन्तकोटिः प्रकीर्त्तिता।

साङ्कृतिरुवाच।

भगवन्नादिनाथस्य कोऽयं रूपः स उच्यताम्॥

दत्तात्रेय उवाच॥

देवदेवस्य नामेदं आदिनाथश्च भैरवः। स्वशरीरैश्च देवोऽयं लीलया च विरिञ्चिभिः। श्रीकण्ठपर्वते गौर्या सह प्रथमनायकः। महेन्द्रपर्वते चैव कदलीवनगोचरे। गिरिकूटे चित्रकूटे सपादनियुते गिरौ। कृपयैकैकसंयुक्तं शवरेभ्येऽपि दत्तवान्। तानि सर्वाणि वक्तुं हि न शक्नोमि तु विस्तरात्। कानिचित् कथयिष्यामि सहजाभ्यासतः सुखम्। तिष्ठन् गच्छन् स्वपन् भुञ्जन् शून्यं ध्यायेदहर्निशम्। अयमेको हि सङ्केत आदिनाथेन भाषितः। नासाग्रदृष्टिमात्रेण परमः परिकीर्त्तितः। शिवः पद्मे तु भर्गस्य ध्यानं मृत्युञ्जयः परः। हुँ। भ्रूमध्ये दृष्टिमात्रेण परः सङ्केत उच्यते। विभूतिलेपलाभोऽपि उत्तमः परिकीर्त्तितः। स्वस्य दक्षिणपादस्याङ्गुष्ठेन लयमुत्तमम्। उत्तमः शरवद्भूमौ शयनञ्चोक्तमुत्तमम्। शिथिले निर्जने देशे कुर्याच्चेत् सिद्धिमाप्नुयात्। एवञ्च बहुसङ्केतान् कथयामास शङ्करः। सङ्केतैर्बहुभिः पुण्यैर्यस्य चित्तं लयं गतम्। स एव लययोगः स्याद् हठयोगं ततः शृणु। इति॥ अत्र सर्वयोगोत्तमत्वेनादौ हठयोग उक्तः। मन्त्रयोगस्तु साधनरूपतया योगप्रकरणेन लिखित इति। शिवागमे पञ्चमपटले॥

अथातः सम्प्रवक्ष्यामि कालपूरुषलक्षणम्। येत

विज्ञानमात्रेण त्रिकालज्ञो भवेन्नरः। कालोदरस्थितश्चापि येनोपायेन लक्ष्यते। तद्वदामि समासेन यथोद्दिष्टं शिवागमे। एकान्ते निर्जने गत्वा कृत्वादित्यन्तु पृष्ठतः। निरीक्षेत्तु निजां छायां कण्ठदेशे समाहितः। ततश्चाकाशं वीक्षेत तत्र पश्यति शङ्करम्। ॐ ह्रीं परमात्मने नमः। अष्टोत्तरशतं जप्त्वा ततः पश्यति शङ्करम्। शुद्धस्फटिकसङ्काशं नानारूपधरं हरम्। षण्मासाभ्यासयोगेन भूधराणां पतिर्भवेत्। वर्षद्वयेन हे नाथ कर्त्ता हर्त्ता स्वयं प्रभुः।

p. 850) त्रिलोकत्वमवाप्नोति परमानन्ददायकम्। सन्तताभ्यासयोगेन नास्ति किञ्चित् सुदुर्लभम्। तद्रूपं कृष्णवर्णञ्च यः पश्येद्व्योम्नि निर्मले। षण्मासान्मृत्युमाप्नोति स योगी नात्र संशयः। पीते व्याधिस्तथा रक्ते नीले हत्यां विनिर्दिशेत्। नानावर्णस्वरूपेऽस्मिन्नुद्वेगो जायते महान्। पादगुल्फोदराणाञ्च विनाशो मृत्युमादिशेत्। अर्द्धवर्षेण वर्षेण क्रमाद्वर्षद्वयेन च। विनष्टे दक्षिणे बाहौ स्वबन्धुर्म्रियते ध्रुवम्। वामबाहौ तथा भार्या विनश्यति न संशयः। शिरोदक्षिणबाहूनां विनाशे मृत्युमादिशेत्। अशिरोमासमरणं विना जङ्घे दिनैर्नरः। अष्टाभिः

स्कन्धनाशे तु शरीरार्द्धे तु तत्क्षणात्। योगार्णवे॥ प्रातः पृठगते रवावनिमिषं छायां गते स्वां चिरं दृष्ट्वोर्द्धं नयनेन यं सितनरं छायानरं पश्यति। तत्कर्णांसकरास्यपार्श्वहृदयाभावे क्षणेऽर्काश्वदिक् भूवाणाक्षिसमाः शिरोविगमतो मासांस्त्वसौ जीवति।

ज्ञानसारे द्वितीयाध्याये॥ रसनामर्द्धगां कृत्वा कलार्द्धं योऽवतिष्ठते। क्षणेन मुच्यते देवि व्याधिमृत्युजरादिभिः। रसना त्वन्तरे नित्यं यावद्ब्रह्मविलं गता। अमृतं रसनाग्रेण पीयमानं विचिन्तयेत्। मासार्द्धं जीयते मृत्युः सत्यं सत्यं हि पार्वति । सर्वव्याधिविनिर्मुक्तो योगीन्द्रो नात्र संशयः। रसनाताद्द मूले च वायुं पीत्वा शनैः शनैः। षण्मासाभ्यन्तरे देवि महायोगी भविष्यति। रसनास्वादसम्भेदं विशेषं शृणु पार्वति   क्षीरेण नश्यति व्याधिः कटुकण्डुविनाशनम्। सुस्वादेन महादेवि बालपापविनाशनम्। घृतस्वादनमात्रेण अमरत्वं लभेन्नरः। मधुस्वादरसाच्चैव शास्त्रमुद्गिरते स तु। मिष्टान्नखण्डखाद्यानि लड्डूकस्वादवर्त्तिनि।

p. 851) एवमादीन्यनेकानि कामधेनुरुपस्थिता। दिव्यकन्यां

रमेन्नित्यमाकृष्टिर्जायते सदा। अणिमादिगुणोपेत ऊर्द्धरेताः प्रजायते। हिक्कां दद्यात् सदा वक्रे घ्राणञ्चैव विजृम्भते। एवमभ्यासयोगेन कामदेवो द्वितीयकः। योगिनीगणमासाद्य सृष्टिसंहारकारकः। न क्षुधा न तृषा निद्रालस्यं देवि प्रजायते। भवेच्च स्वर्गगामीव सर्वदोषविवर्जितः॥

इति श्रीप्राणतोषिण्यां षष्ठे ज्ञानकाण्डे राजयोगरूपपल्लवकथनं नाम तृतीयः परिच्छेदः॥

योगज्ञानार्थं क्षुद्रब्रह्माण्डत्वेन शरीरमुक्तम्। निर्वाणतन्त्रे दशमपटले यथा॥ कथितं वाह्यदेशस्य ब्रह्माण्डस्य तु लक्षणम्। तन्मध्ये वर्त्तते साक्षाद्भुवनानि चतुर्दश। तदेव विग्रहं देवि महाब्रह्माण्डमध्यगम्। एवं बहुविधं देवि तत्र ब्रह्माण्डके स्थितम्। वृहद्ब्रह्माण्डे ये सर्वे तेऽपि यस्य शरीरिणः। पृथिव्यां तेऽपि वर्त्तन्ते जन्तोराकारविग्रहाः महाब्रह्माण्डमध्ये तु वृहद्ब्रह्माण्डमेव च। तन्मध्ये जन्तवो देवि तन्मध्ये भुवनानि च। दृष्टिमात्रेण भेदोऽस्ति स्थूलसूक्ष्मादि भेदतः। महाब्रह्माण्डके यद्यत् प्रकारं परमेश्वरि तत्तत्सर्वं हि देवेशि वृहद्ब्रह्माण्डमध्यतः॥ चतुर्थपटले॥ श्रृणु देवि

प्रवक्ष्यामि वृहद्ब्रह्माण्डलक्षणम्। मेरुः पर्वतमध्ये च सर्वदेवाश्रयः प्रिये । महाधीरा नदी तत्र मध्यदेशे तु सा स्थिता। सुमेरोश्चोर्द्धदेशे च सत्यलोको वरानने । अधोभागे महेशानि प्रतिष्ठति रसातलम्। एवं क्रमे मेरुमध्ये भुवनानि चतुर्दश। पातालसप्तकस्योर्द्धे ब्रह्मपद्मं महेश्वरि । आधारचक्रं तत् पद्मं धरामध्ये चतुर्दलम्। पद्ममध्ये वीजकोशे क्षितिचक्रं मनोहरम्। बलयाकाररूपेण समुद्राः सप्त संस्थिताः। जम्बूद्वीपं मध्यदेशे चतुष्कोणं मनोहरम्।

p. 852) त्रिकोणं मदनागारं कन्दर्पश्चाधिदेवता। इन्द्ररूपं हि लंबीजं गजेन्द्रवाहनं शिवे । त्रिकोणे मदनागारे लिङ्गरूपी महेश्वरः। मायाशक्तिर्महेशानि भुजगाकाररूपिणी। तयैव वेष्टितं लिङ्गं सार्द्धत्रिबलयाकृति। लिङ्गच्छिद्रं स्ववक्त्रेण समाच्छाद्य सदा स्थितम्। इन्द्रवीजं वरारोहे लिङ्गस्य वामदेशके। सुसिद्धं ब्रह्मसदनं नादोपरि सुसुन्दरम्। तत्रैव निवसेद् ब्रह्मा सृष्टिकर्त्ता प्रजापतिः। वामभागे च सावित्री वेदमाता सुरेश्वरी। तस्याः प्रसादमासाद्य सृष्टिं वितनुते सदा। यद्रूपं ब्रह्मसदनं लक्षयोजनविस्तृतम् तत् सर्वं परमेशानि ऋग्वेदाख्या मयोदितम्। त्रिकोणं परमेशानि द्विषष्टिकुण्डलाहिवत्। तदेव पर्वतं

प्रोक्तं सर्वदेवाश्रयं हि तत्। त्रिकोणमध्ये तद्वाह्ये पश्यापूर्वं वरानने । स्थावरं पर्वतं पश्य कीटं पशुमनुत्तमम्। खगं नगादिकं देवि नास्ति किं पृथिवीतले। त्रिकोणवाह्ये गिरिजे पर्वतं बहुरूपकम्। नीलाचलं मन्दराख्यं पर्वतं चन्द्रशेखरं। हिमालयं सुवेलञ्च मलयं भस्मपर्वतम्। चतुष्कोणे वसेद्देवि एतत् सप्तकुलाचलम्। तृणगुल्मलतादीनि नानारूपाणि तत्र वै। जायन्ते च म्रियन्ते च पूर्वोक्तेनैव वर्त्मना॥ इति मूलाधारकथनम्॥

पञ्चमपटले॥

शिव उवाच॥

एतत् पद्मस्योर्द्ध्वदेशे भीमाख्यं पङ्कजं शुभम्। पत्रषट्कं तथा वृत्तं चतुर्द्वारविभूषितम्। पद्ममध्ये वीजकोषे भुवोलोकं मनोहरम्। सिन्दूरसदृशं रक्तवर्णेन भूषितं तदा। तस्योर्द्ध्वे निवसेद्विष्णुः श्रीवाण्यौ वामदक्षिणे । ब्रह्मणा सृज्यते लोकः पाल्यते चक्रपाणिना। वैकुण्ठं नाम तत् स्वर्गं नानादेवालयं हि तत्। वैकुण्ठस्य दक्षभागे गोलोकं सर्वमोहनम्। तत्रैव राधिका देवी द्विभुजो मुरलीधरः।

नारदाद्यैः सुरगणैः शोभितं वेदपारगैः।
वैकुण्ठसदृशं स्थानं नास्ति ज्ञाने च मामके। अग्रे मध्ये तथा वामे ज्योतिषां परिपश्यति। नानाभोगयुताः सर्वे नानारत्नोपशोभिताः। इन्द्राद्या देवताः सर्वा यथा सर्वं प्रपश्यति। तथैव भूमिगाः सर्वे तिष्ठन्ति स्तुतिहेतवे। महातत्त्वमयं लोकं वेदबाहुविराजितम्। पीताम्बरं शान्तमूर्त्तिं वनमालाविराजितम्। एवं सर्वं भक्तजनं वैकुण्ठे चोपशोभितम्। विष्णुशब्दं विष्णुगणं वैष्णवं विष्णुरूपकम्। विष्णुनाम विना नास्ति वैकुण्ठे परमेश्वरि । यद्रूपं गोलकं धामं तद्रूपं नास्ति मामके। ज्ञाने वा चक्षुषोः किं वा ध्यानयोगेन विद्यते। शुद्धतत्त्वमयं देवि नानादेवेन शोभितम्। मध्यदेशे गोलकाख्यं श्रीविष्णोर्लोभमन्दिरम्। श्रीविष्णोः सत्त्वरूपस्य यत् स्थलं चित्तमोहनम्। तस्य स्थानस्य महात्म्यं किं मया कथ्यतेऽधुना । तत्रैव सततं भाति द्विभुजो मुरलीधरः। तदा सत्त्वमयो विष्णुर्भुवनं पाति निश्चितम्। वैष्णवस्य महामोक्षो यत्रैव परमेश्वरि । इति स्थानस्य माहात्म्यं संक्षेपेण मयोदितम्। विस्तारेण न शक्नोमि जन्मान्तरशतेन च। वीजकोषस्य वाह्ये तु वेष्टितं तोयमण्डलम्। प्रमाणं सुन्दरं तोयं यथा क्षीरोदसागरम्। धूम्रस्य ज्योतिषाकारं कोटिचन्द्रसमप्रभम्।

बलयाकाररूपेण सुशुभ्रं तोयमण्डलम्। गङ्गादिसरितः सर्वास्तथैव भान्ति सुन्दरि । इन्द्रादिदेवताः सर्वाः स्तूयमाना निरन्तरम्। गन्धर्वयक्षनागादिकुष्माण्डा भैरवास्तथा। नानासुखविलासेन सदा चैकाग्रचेतसः। विष्णुगानं प्रकुर्वन्ति स्तुतिभक्तिपरायणाः। वेदगानं प्रकुर्वन्ति चतुर्वक्रेण वेधसा। मालवाद्याश्च षड्रागाः षट्त्रिंशद्रागिणी तथा। वेदगाने च भावन्तो मूर्त्तिमन्तः सदैव हि। मालवेनैव रागेण सामगानं सदा प्रिये । मल्लारेण सदा पूर्वं वसन्तेन तथा पुनः। हिल्लोलेन यजुः पाठं सदा कुर्वन्ति वेधसा। कर्णाटेनैव ऋग्वेदं श्रीरागेण तथा शिवे । निर्दिष्टपाठमेतत्तु अनिर्दिष्टमतः परम्। अत्रैव सन्ति ते रागाः सहस्राणि च षोडश। मुरारेर्मुलरीगानात् सर्वस्तालः प्रजायते। तेन तालेन रागेण सदा गायन्ति वेधसा। तद्रागस्य विभागं हि कुर्वन्ति मुनयो जनाः वसन्ताद्याश्च ऋतवस्तिष्ठन्ति तत्र सन्ततम्। नानाऋतुप्रसूनेन भूषितं मुरलीधरम्। तत्रैव राधिका देव नानासुखविलासिनी। वदन्ती मुरलीगानं कुरु कान्त प्रमोहणम्। येन शब्देन कामस्य उत्पत्तिर्जायते सदा। तद्रागञ्चैव तत्तालं कुरु गानं प्रयत्नतः। एवमानन्दसंयुक्ता महावेशविलासिनी। वामभागे सदा भाति राधिका भक्तवत्सला। तथा। आदौ राधां ततः कृष्णं जपन्ति ये च मानवाः। सद्गतिं चैव तेषां हि दास्यामि नात्र संशयः

। गुरुणा भावमार्गेण मन्त्रमार्गेण चैव हि। ये जना मां भजन्त्येव ते नरा मत्समाः सदा। या नारी मामभेदेन भजते पुरुषं तथा। तत्समाना च सा नारी जायते नात्र संशयः। भक्त्या वाप्यथवाऽ।भक्त्या जपन्ति युगलं यदि तव भक्त्या प्रदास्यामि मद्गतिं शृणु राधिके ॥ इति स्वाधिष्ठानकथनम्॥

षष्ठपटले॥ एतत्पद्मस्योर्द्ध्वदेशे महापद्मं सुदुर्लभम्। दशपत्रं नीलवर्णं सहजं घोररूपकम्। डादिफान्तैः सचन्द्रैश्च पङ्कजञ्चातिशोभनम्॥ तन्मध्ये वीजकोषे निवसति सततं वह्निवीजं सुसिद्धम् वाह्ये तत् त्रैपुराख्यं नवतपननिभं स्वस्तिकं तत्त्रिभागे॥ स्वर्लोकाख्यमिदं देवि सर्वदेवप्रपूजितम्। साकारं वह्निवीजञ्च सदैव मेषवाहनम्। रुद्रालयं हि तत्रैव महामोहस्य नाशनम्। भद्रकाली महाविद्या वामभागे सुशोभिता। भद्रकाली महाविद्या सदा संहारकारिणी।

p. 855) ब्रह्मणा सृज्यते लोकः पाल्यते विष्णुरूपिणा। परो देवो रुद्ररूपः सदा संहारकारकः। संहरेद्रुद्ररूपस्तु भद्रकालिकया सह। रुद्रस्य भाषणाद्देवि किं न सिध्यति भूतले । यद्रूपं कथितं पूर्वं गोलोकं सर्वमोहनम्। तस्माद्वै

सर्वतोभावे रुद्रलोकं चतुर्गुणम्। महामोक्षप्रदं नित्यं रुद्रं भस्माङ्गभूषणम्। भ्द्रकाली महाविद्या रुद्रस्य वामदेशके। ततः कालीं महाविद्यां सदैव मुरलीधरः। आराध्य वहुयत्नेन वैकुण्ठाधिपतिर्भवेत्। गोलोकाधिपतिर्देवि स्तुतिभक्तिपरायणः। कालीपादप्रसादेन स भवेल्लोकपालकः। लोकानां रक्षनार्थाय सस्त्रीको मुरलीधरः। समाराध्य भद्रकालीं गोलोके निवसेत् सदा। प्रसादं कालिकायाश्च विष्णुना भुज्यते सदा। अतश्च पालको विष्णुर्महासत्त्वपरायणः॥ इति मणिपूरकथनम्॥

सप्तमपटले॥ एतत्पद्मस्योर्द्धदेशे विमलं पद्ममुत्तमम् । शोभितं द्वादशिः पत्रैः शोणबन्धूकसन्निभम्। वाञ्छन्ति रिक्तफलदं सिद्धिसिन्दूरसोदरम्। पद्ममध्ये वीजकोषे षट्कोणमण्डलं शुभम्। मण्डलस्य मध्यदेशे वायुवीजं मनोहरम्। सवीजं वायुवीजेन वेदबाहुविराजितम्। लोकत्रयस्य ईशानमीश्वरं सर्वपूजितम्। या विद्या भुवनेशानी त्रिषु लोकेषु पूजिता। ईश्वरस्य वामभागे सा देवी परितिष्ठति। महर्ल्लोकमिदं भद्रे पूजास्थानं सुरेश्वरि ॥ तत्रैव मानसं योगं कुरुते योगविद्वरः। सिन्दूरारक्तचार्वङ्गी स्फाटिकैर्निर्मिता यतः। अतश्च मानवाः सर्वे ज्योतिषं परिपश्यति। सर्वावयवसंयुक्ता

देवास्तिष्ठन्ति सन्ततम्। भूमिगाः परिपश्यन्ति चक्राकारं हि तैजसम्। स्वर्लोकगामिनः सर्वे परिपश्यन्ति साकृतिम्। अङ्गभेदं न पश्यन्ति स्थूलरूपनिरीक्षणम्। यथैव भूमिगा लोकाः प्रसरन्ति महीतले। तथैव देवताः सर्वाः स्वर्गे तिष्ठन्ति पार्वति ।

p. 856) भूर्लोके निवसेद्ब्रह्मा भुवोलोके जनार्द्दनः। स्वर्लोके निवसेच्छम्भुः सदा संहारकारकः। ब्रह्मादीनाञ्च ईशानः सर्वकर्त्ता च ईश्वरः। सर्वस्वामिस्वरूपश्च सर्वकर्ता च ईश्वरः । गोलोकं कथितं देवि यद्रूपं शोभितं सदा। तस्माच्छतगुणं देवि महर्लोकं सुसुन्दरम्। विस्तीर्णञ्च शतगुणं सर्वं शतगुणं शिवे । महर्लोकस्य माहात्म्यं किं वक्तुं शक्यते मया। महर्लोके वसेद्यो हि सामान्यभावतत्परः। तस्मादेव शतैकाशं गोलोके मुरलीधरम्। तदाज्ञां प्राप्य सहसा सृज्यते पद्मयोनिना। तदाज्ञया पाति लोकान् द्विभुजो मुरलीधरः। एवं हि रुद्ररूपेण संहरत्यखिलं जगत्। सर्वकर्त्ता यतो देवो ह्यत एव महेश्वरि । ईश्वरः सर्वकर्त्ता च निर्गुणश्चाचलः शिवः। भुवनेशीं समासाद्य सर्वस्वामी च ईश्वरः। अत एव महेशानि स एव मोक्षदायकः। विश्वमाता च सा देवी विश्वपालनकारिणी। मोक्षदा सर्वलोकानां मुक्तिदा विश्वमातृका। भुवनेशीं विना

ईशः किञ्चित् कर्तुं न शक्यते। अत एव हि सा देवी मोक्षदा सर्वरूपिणी। इत्यनाहतकथनम्।

अष्टमपटले॥

शङ्कर उवाच।

अस्योर्द्ध्वे निर्मलं पद्मं सर्वमोहनकारणम्। षोडशैः पत्रकैर्युक्तं मोहान्धाकारनाशनम्। धूममध्ये यथा वह्निस्तथा ज्योतिर्मयं प्रिये । पद्ममध्ये वराटे च जनोलोकं सुसुन्दरम्। महामोहान्धशमनं तद्बाह्ये चन्द्रमण्डलम्। देववृन्दैर्गाथकैश्च मुनिभिः परिशोभितम्। गोलोकस्य लक्षगुणमिदं स्थानं सुदुर्लभम्। दैर्घ्येण च मयोक्तञ्च विस्तीर्णञ्च तथा पुनः। सर्वं लक्षगुणं देवि गोलोकान्नात्र संशयः। वीजकोषे मणिद्वीपे षट्कोणं यन्त्रमुत्तमम्। यन्त्रमध्ये च वृषभं महासिंहार्द्धदेहकम्।

p. 857) तस्योपरि महागौरी दक्षभागे सदाशिवः। त्रिनेत्रं पञ्चवक्रश्च प्रतिवक्रे त्रिलोचनः। विभूतिभूषिताङ्गश्च रजताद्रिसहोदरः। व्याघ्रचर्मधरो देवोऽणिमादिभिर्विभूषितः।

लोकानामिष्टदाता च लोकानां भयनाशनः। लोकानां भुक्तिजनको लोकानां मुक्तिदायकः। सदानन्दकरो देवश्चार्द्धनारीश्वरो विभुः। क्वचित् ज्योतिर्मयो देवः क्वचिदाकारवर्जितः। देवानां पूज्यरूपश्च देवानां स्वामिरूपकः। भक्तस्य मुक्तिदो नित्यं विष्णुत्वदायकः प्रभुः। विल्वपत्रैः पूजकस्य निजसायुज्यदायकः। गोलोकाधिपतिं कृत्वा भक्तं रक्षति यः शिवः। तस्य देवस्य माहात्म्यं विस्तारेण च चण्डिके । या गौरी लोकमाता च ब्रह्मार्द्धाङ्गस्वरूपिणी। त्रिगुणा सा महादेवी गुणैकेन पिनाकधृक्। तस्याः सङ्गं समासाद्य सर्वकर्ता सदाशिवः॥ इति विशुद्धस्थानकथनम्॥

नवमपटले॥

शङ्कर उवाच॥

एतत् पद्मस्योर्द्ध्वदेशे ज्ञानपद्मं सुदुर्लभम्। पद्मद्वयसमायुक्तं पूर्णचन्द्रस्य मण्डलम्। पद्ममध्ये वीजकोषे स्मरेच्चिन्तामणेः पुरीम्। तन्मध्ये नवकोणञ्च यन्त्रं परमदुर्लभम्। शम्भुवीजं हि तन्मध्ये साकारं हंसरूपकम्। हंसः परं ब्रह्मरूपः साकारः शिवरूपकः

। तारचञ्चूर्वरारोहे निर्गमागमपक्षवान्।
शिवशक्तिपदद्वन्द्वं विन्दुत्रयविलोचनम्। विहारश्चास्य हंसस्य हेमपङ्कजपूजिते। एवं हंसो मणिद्वीपे तस्य क्रोडे परः शिवः। वामभागे सिद्धकाली सदानन्दस्वरूपिणी। तस्याः प्रसादमासाद्य सर्वकर्त्ता महेश्वरः। तपोलोकमिदं भद्रे सर्वलोकस्य दुर्लभम्। यत्र ब्रह्मादयो देवा ध्यानं कुर्वन्ति सर्वदा। मनसापि न लभ्येत योगेन तपसा न च। तपोलोकं गोलोकस्य चतुर्लक्षणं शिवे । ब्रह्मलोकेषु ये देवा वैकुण्ठे ये सुरादयः। शम्भुलोके वसेद् यो हि ते च भक्तिपरायणः।

p. 858) तपसापि न लभ्येत तपोलोकगतिः शिवे । तपोलोकसमो नास्ति लोकमध्ये सुलोचने । सालोक्यं हि महर्लोके सारूप्यं जनलोकके। सायुज्यं च तपोलोके निर्वाणं हि तदूर्द्धके। ततो ब्रह्मादयो देवास्तपोलोकार्थिनः सदा। इति ते कथितं कान्ते क्रमषट्कस्य लक्षणम्। यज्ज्ञानादमरत्वञ्च जीवन्मुक्तश्च साधकः। यज्ज्ञात्वा जननीगर्भं न विशेत्तु कदाचन॥ इति ज्ञानस्थानकथनम्॥

दशमपटले॥

शङ्कर उवाच।

ज्ञानपद्मस्योर्द्ध्वदेशे सहस्रदलपङ्कजम्। अधोवक्त्रं महापद्मं सुमेरोर्मध्यसंस्थितम्। शुक्लं रक्तं तथा पीतं कृष्णं हरितमेव च। विचित्रचित्ररूपेण नानावर्णेन शोभितम्। शुक्लं क्षणात् क्षणाद्रक्तं क्षणात् पीतं सुशोभितम्। यस्मिन् क्षणे शुक्लवर्णं हरितं वर्णमुत्तमम्। चित्ररूपञ्च चार्वङ्गि धत्ते कस्मिन् क्षणे क्षणे। एवं नानाविधं देवि तत् पद्मं शोभितं सदा। यथैव धाम गोलोकं प्रतिपत्रे तथैव हि। गोलोकाधिपतिस्तत्र भक्तिभावपरायणः। कैलासाधिपतिर्देवि ध्यानयोगं सदाभ्यसेत्। एवं ब्रह्मादयो देवा इन्द्राद्यास्त्रिदिवेश्वराः। स्तुतिभक्तिपराः सर्वे दीनभावे सदा स्थिताः। लक्षं लक्षं महेशानि तत्रैव मुरलीधरः। शतलक्षं तत्र रुद्रो ब्रह्मा लक्षशतं प्रिये । प्रत्यहं परमेशानि ब्रह्माण्डा बहवोऽभवन्। तन्मध्ये स्थापयेद् ब्रह्मा तत्रैव कमलापतिम्। शिवं बहुविधाकरं तत्रैव स्थापयेत्ततः। एवं हि परमेशानि नानाशक्तिं प्रविन्यसेत्। प्रतिब्रह्माण्डमध्ये तु ब्रह्मादिदेवतात्रयम्। नानाशक्तियुतं कृत्वा ब्रह्माण्डस्थापनञ्चरेत्। ब्रह्मपद्मे पृथिव्यान्तु वर्त्तन्ते मानुषादयः। ते सर्वे देवि ब्रह्माण्डस्तन्मध्ये भुवनानि च।

p. 859) पातालसप्तकं तत्र तत्रैव स्वर्गसप्तकम्। एवं चक्रे सर्वदेहे भुवनानि चतुर्द्दश। प्रतिदेहं परेशानि ब्रह्माण्डं नात्र संशयः॥ तथा। स्थानं बहुविधाकारं सर्वदेहस्य चाश्रयम्। तन्मध्ये सत्यलोकञ्च महारुद्रस्य कारणम्। दशकान्तेन स्वर्णेन निर्मितं चक्रपाणिना। दिक्षु तोयमण्डलञ्च तथा पूर्णेन्दुमण्डलम्। परितः पारिजातानि मध्ये कल्पद्रुमः पुनः। कल्पद्रुमस्य निकटे ज्योतिर्मन्दिरमेव च। ओं उद्यदादित्यसङ्काशं चतुर्द्वारविभूषितम्। मन्दवाद्यसमायुक्तं गन्धपुष्पैरलङ्कृतम्। तन्मध्ये वेदिका देवि रत्नसिंहासनं प्रिये । महाकाली परमात्मा चणकाकाररूपतः। माययाच्छादितात्मासौ तन्मध्ये समभागतः। महारुद्रः स एवात्मा महाविष्णुः स एव हि। महाब्रह्मा स एवात्मा नाममात्रविभेदकः। एकमूर्त्तिस्त्रिनामानि ब्रह्मविष्णुमहेश्वराः। नानाभावे मनो यस्य तस्य मोक्षो न विद्यते। ब्रह्माण्डास्तत्र जायन्ते लक्षं लक्षं सुलोचने । तत्र ब्रह्मा तत्र विष्णुस्तत्र रुद्रः प्रविन्यसेत्। एवं ब्रह्माण्डनिर्माणं कृत्वा विष्णुः सनातनः। स जीवमूर्त्तिं निर्माय तथा जन्तोश्च विग्रहम्। एवं ब्रह्माण्डं विविधं नित्यं सृजति निर्गुणम्। निर्गुणे विष्णुरूपश्च

सिद्धिकारणमेव हि। केचिद्वदन्ति स ब्रह्मा कैश्चिद्विष्णुः प्रकथ्यते। केचिद्रुद्रो महापूर्व एकदेवो निरञ्जनः। आद्याशक्तियुतो देवश्चणकाकाररूपकः। इन्द्रजालस्य दीपाभं चन्द्रसूर्याग्निरूपकम्। महाज्योतिर्निराकारं गोलोकं सुमुखं त्वथ। सत्यलोके वीजकोषे चिन्तामणिगृहे शुभे। ध्यायेन्निरञ्जनं देवि रत्नसिंहासनोपरि। तस्यान्तिके निजगुरुं पूजाध्यानपरायणः। सकान्तं पूजयेद्देवि रजताचलसोदरम् सुरक्तां चारुवदनां स्वप्रकाशस्वरूपिणीम्। एवं कान्तायुतं देवं स्वमूर्ध्निस्थं विचिन्तयेत्। यथा

p. 860) दर्पणमध्ये तु परिपश्यन्ति पर्वतम्। सहस्रारे महापद्मे तथा देवं विचिन्तयेत्। एवं ब्रह्ममयं ह्येतत् परं मोक्षमयं प्रिये । निर्गुणस्यालयं साक्षान्महाकालालयं शिवे । यत्रैव वर्त्तते नित्यं निराकारश्च निश्चलः। यस्य रूपं परानन्दं परापरजगत्पतिः। नित्यानन्दपरा देवी काली कालप्रकाशिनी। आद्याशक्तिर्महाकाली देवनिर्वाणकारिणी। जायते च क्षितौ वृक्षो यथा पृथ्व्यां विलीयते। तोयात्तु वुद्बुदं जातं यथा तोये विलीयते। जलदे तडिदुत्पन्ना लीयते च यथा घने। तथा ब्रह्मादयो देवाः कालिकाया भवन्ति। तथा प्रलयकाले तु पुनस्तस्यां प्रलीयते। शक्तिज्ञानं विना देवि मुक्तिर्हास्याय

कल्प्यते। एकांशेन भवेद्ब्रह्मा एकांशेन जनार्द्दनः।
एकांशेन भवेच्छम्भुः कालिकायाः सुलोचने । अपरा सा
महाकाली नद्यादीनां समुद्रवत्। गोष्पदे च तथा तोयं
ब्रह्माद्या देवतास्तथा। गोष्पदं किं विजानीयात् समुद्रस्य
जलं शिवे । तेन ब्रह्मा न जानाति विष्णुः किं वेत्ति शङ्करम्।
सृष्टिकर्त्ता यथा काल्या जन्यन्ते च सुरादयः। तथा प्रलयकाले तु
पुनस्तस्यां प्रलीयते। अतो निर्वाणदा काली पुमान् स्वर्गप्रदायकः
। दक्षिणस्यां दिशि स्थाने संस्थितश्च रवेः सुतः। कालीनाम्ना
पलायेत भीतियुक्तः समन्ततः। अतः सा दक्षिणानाम्नी त्रीषु
लोकेषु गीयते। निर्गुणः पुरुषः काल्या सृज्यते द्द प्यते यतः। अतः सा
दक्षिणानाम्नी त्रिषु लोकेषु गीयते। वश्यविद्या महाविद्या कालिका
जगदम्बिका। साकाररूपा सा काली चणकाकाररूपिणी।
हस्तपादादिरहिता सोमसूर्याग्निरूपिणी। तस्याः स्थानं कथितं
सत्यलोकं वरानने । यत् स्थानं सर्वदेवस्य प्रार्थनीयं
सदानघे । तस्य स्थानस्य माहात्म्यं किं मया कथ्यतेऽधुना
।
p. 861) सहस्रदलपद्मस्य चैकपत्रे सुलोचने । सहस्रं गोलकं
धाम ततो वक्तुं न शक्यते। जन्मान्तरसहस्रेण जिह्वाकोटिशतेन
च। तद्वक्तुं न हि शक्नोमि एकपत्रस्य शोभनम्। अतस्त्वं हि
वरारोहे विरता भाव पार्वति । किञ्जल्कमध्ये या शोभा किं

वक्तुं शक्यते मया। तन्मध्ये कर्णिका देवि तन्मध्ये वीजकोषकम्। वीजकोषस्य मध्ये तु सुधासागर उत्तमः। लक्षयोजनविस्तारः सुशोभं तोयमुत्तमम्। तन्मध्ये तु मणिद्वीपं सहस्रयोजनं प्रिये । परितः पारिजाताश्च कदम्बवनमुत्तमम्। मध्ये कल्पद्रुमस्तत्र ज्योतिर्मन्दिरमुत्तमम् । चतुर्द्वारसमायुक्तं हेमप्राकारभूषितम्। मन्दवाद्यसमायुक्तं गन्धधूपसमन्वितम्। देवकन्यासहस्राणि परिचर्यापराणि च। तन्मध्ये वेदिका देवि पञ्चाशदक्षरात्मिका। तस्योपरि महेशानि रत्नसिंहासनं शिवे । महाकाली महारुद्रश्चणकाकाररूपकः। इन्द्रजालस्य दीपाभं महाज्योतिः सनातनम्। शाक्तानन्दतरङ्गिण्यां चतुर्थोल्लासधृतसमयाचारतन्त्रे॥

देव्युवाच॥

देवदेव महाबाहो सृष्टिस्थितिलयात्मक । मूर्ध्नि पद्मं सहस्रारं रक्तवर्णमधोमुखम्। तस्य मध्यस्थितं ध्यायेद्गुरुं शान्तं सशक्तिकम्। मूलाधारे महाशक्तिं कुण्डलीरूपधारिणीम्। अधोवक्त्रे क्रमेणैव सर्वपद्मेषु भावना। तदा कथं भवेत्तत्र चिन्तनं गुरुदेवयोः। आधारे च

स्थितस्तत्र अधोभागे कथं भवेत्॥

महादेव उवाच।

यथा युक्तं त्वया देवि कथितं वीरवन्दिते । एवमेवात्र सन्देहो जायते नात्र संशयः। कथ्यते परमेशानि सन्देहच्छेदकारणम्। तानि पद्मानि देवेशि सुषुम्नान्तःस्थितानि च। परंब्रह्मस्वरूपाणि शब्दब्रह्ममयानि च। तत् सर्वं पङ्कजं देवि सर्वतोमुखमेव च। प्रवृत्तिश्च निवृत्तिश्च द्वौ

p. 862) भावौ जीवसंस्थितौ। प्रवृत्तिमार्गः संसारी निवृत्तिः परमात्मनि। प्रवृत्तिभावचिन्ताया मध्ये वक्त्राणि चिन्तयेत्। निवृत्तियोगमार्गेण सदैवोर्द्धमुखानि च। एवमेव भावभेदाद् हृत्सन्देहो न जायते॥

श्रीतत्त्वचिन्तामणौ तु विशेष उक्तो यथा॥ मेरोर्वाह्यप्रदेशे शशिमिहिरशिरे। सव्यदक्षेण सन्ने मध्ये नाडी सुषुम्ना त्रितयगुणमयी चन्द्रसूर्याग्निरूपा। धुस्तूरस्मेरपुष्पग्रथिततमवपुः कन्दमध्याच्चिरस्था वज्राख्या मेढ्रदेशोच्छिरसि परिणता मध्यमे स्याज्ज्वलन्ती॥

तन्मध्ये चित्रिणी सा प्रणवविलसिता योगिनां योगगम्या
लूतातन्तूपमेया सकलसरसिजान्मेरुमध्यान्तराले। भित्त्वा
देदीप्यते तद्ग्रथनरचनया शुद्धबोधप्रबोधा तन्मध्ये
ब्रह्मनाडी हरमुखकुहरादादिदेवान्तरास्था॥
विद्युन्मालाविलासा मुनिमनसि लसत्तन्तुरूपा सुसूक्ष्मा
शुद्धज्ञानप्रबोधा सकलसुखलसच्छुद्धभावाद्यभावा।
ब्रह्मद्वारं तदास्ये प्रविलसितसुधासाररम्यप्रदेशम्
ग्रन्थिस्थानं तदेतद्वदनमिति सुषुम्नाख्यनाड्या लपन्ति॥
अथाधारपद्मं सुषुम्नास्यलग्नं ध्वजाधोगुदोर्द्ध्वं
चतुःशोणपत्रम्।
अधोवक्त्रमुद्यत्सुवर्णाभरम्यैर्वकारादिशान्तैर्युतं
वेदवर्णैः॥ अमुष्मिन् धरायाश्चतुष्कोणचक्रं
समुद्भासिशूलाष्टकैरावृतं तत्। लसत्पीतवर्णं
तडित्कोमलाङ्गं तदम्भःसमास्ते धरायाः स्ववीजम्॥
चतुर्बाहुभूषं गजेन्द्रादिरुढं तदङ्के
नवीनार्कतुल्यप्रकाशम्। शिशुः सृष्टिकारी
लसद्वेदबाहुर्मुखाम्भोजलक्ष्मीश्चतुर्भागवेदः॥ वसेदत्र
देवी च डाकिन्याभिख्या लसद्वेदबाहूज्ज्वला रक्तनेत्रा।
समानोदितानेकसूर्यप्रकाशा प्रकाशं वहन्ती सदा
शुद्धबुद्धेः॥ वज्राख्या वक्त्रदेशाद्विलसति सततं

कर्णिकामध्यसंस्थं कोणं तत् त्रैपुराख्यं तडिदिव विलसत्
कोमलं कामरूपम्। कन्दर्पो नाम वायुर्विलसति सततं तस्य
मध्ये समन्तात् जीवेशो बन्धुजीवप्रकरमपि हसन् कोटिसूर्य
प्रकाशः॥ तन्मध्ये लिङ्गरूपी द्रुतकमलकणाकोमलः
पश्चिमास्यो ज्ञानध्यानप्रकाशः प्रथमकिशलयाकाररूपः
स्वयम्भूः।
उद्यत्पूर्णेन्दुबिम्बप्रकरकरचयस्निग्धसन्तानहासी काशीवासी
विलासी विलसति सरिदावर्तरूपप्रकाशी॥ तस्योर्द्ध्वे
विषतन्तुशोकविलसत्सूक्ष्मा जगन्मोहिनी ब्रह्मद्वारमुखं
मुखेन मधुरं सञ्छादयन्ती स्वयम्। शङ्खावर्त्तनिभा
नवीनचपलामालाविलासास्पदा सुप्ता सर्पसमा शिवोपरि
लसत्सार्द्धत्रिवृत्तावृतिः॥ कूजन्ती कुलकुण्डली च मधुरं
मत्तालिमालास्फुटं वाचं
कोमलवाक्यबन्धरचनाभेदाविभेदक्रमैः।
श्वासोच्छ्वासविभञ्जनेन जगतां जीवो यया धार्यते सा
मूलाम्बुजगह्वरे विलसति प्रोद्दामदीप्तावलिः॥ तन्मध्ये परमा
कलातिकुशला सूक्ष्मातिसूक्ष्मा परा नित्यानन्दपरस्परातिचपला
मालालसद्दीधितिः। ब्रह्माण्डादिकटाहमेव सकलं यद्भासया
भासते सेयं श्रीपरमेश्वरी विजयते नित्यप्रबोधोदया॥
ध्यात्वैतन्मूलपद्मान्तरपथविलसत्कोटिसूर्यप्रकाशम्

वाचामीशो नरेन्द्रः स भवति सहसा सर्वविद्याविनोदी। आरोग्यं तस्य नित्यं निरवधि स महानन्दंचित्तात्मरात्मा वाक्यैर्वाक्यप्रबन्धैः। सकलसुरगुरुन् सेवते शुद्धशीलः। सिन्दूरपूररुचिरारुणपद्ममन्यत् सौषुम्नमध्यघटितं ध्वजमूलदेशे। अङ्गच्छदैः परिवृतं तडिदाभवर्णैर्वाद्यैः सविन्दुलसितैश्च पुरन्दरान्तैः॥ तस्यान्तरे प्रविलसद्वियदप्रकाशमम्भोजमण्डलमथो वरुणस्य तस्य। अर्द्धेन्दुरूपलसितं शरदिन्दुशुभ्रं वङ्कारवीजममलं मकराधिरूढः॥ तस्याङ्कदेशशयितो हरिरेव पायान्नीलप्रकाशरुचिरश्रियमादधानः। पीताम्बरः प्रथमयौवनगर्भधारी श्रीवत्सकौस्तुभधरो धृतवेदबाहुः॥

p. 864) अत्रैव भाति सततं खलू राकिणी सा नीलाम्बु जोदरसहोदरकान्तिशोभा। नानायुधोद्यतलसत्सतताङ्गलक्ष्मीर्दिव्याम्बराभरणभूषित-मत्तचित्ता॥

अथ ज्ञानप्रशंसा॥ निगमकल्पद्रुमे तृतीयपटले॥ ज्ञानेन लभते मोक्षं ज्ञानेन पापनाशनम्। ज्ञानेन वीरकर्मा च ज्ञानेन पशुभावनम्। ज्ञानेन दिव्यभावी च

एषां तत्त्वान्तर्भावात् तत्त्वविद्भिरेवं संज्ञा कृता इत्यर्थः॥

शारदायाम्॥

अग्निषोमात्मको देदो बिन्दुर्यदुभयात्मकः।

शुक्रमग्निरूपं रक्तं सोमरूपम्।

p. 57) स तदात्मकत्वाद्बिन्दुरूभयात्मक इत्यर्थः॥

तदुक्तं राघवभट्टधृतेन॥

कलाषोडशकश्चन्द्रः स्याद्द्वादशकलो रविः।

कलादशयुतो वह्निः कलाष्टत्रिंशदंशभुक्।

साम्प्रतं सम्भवन्तीह गर्भाधानस्य हेतवे।

अग्निषोमात्मकं तेन गीयते सचराचरम्।

कलांशकेन योगेन भूयाद् गर्भस्य सम्भवः॥

ब्रह्मज्ञानतन्त्रे प्रथमपटले॥

शिव उवाच॥

अस्थिमांसनखाश्चैव नाडीत्वक् चेति पञ्चमः।

पृथ्वीपञ्चगुणाः प्रोक्ता ब्रह्मज्ञानेन भाषितम्।

मलं मूत्रं तथा शुक्रं श्लेष्मा शोणितमेव च।

तोयं पञ्चगुणाः प्रोक्ता ब्रह्मज्ञानेन भाषितम्।

हासो निद्रा क्षुधा चैव भ्रान्तिरालस्यमेव च।

तेजःपञ्चगुणाः प्रोक्ता ब्रह्मज्ञानेन भाषितम्।

धारणं चालनं क्षेपः सङ्कोचः प्रसवस्तथा।

वायुपञ्चगुणाः प्रोक्ता ब्रह्मज्ञानेन भाषितम्।

कामक्रोधस्तथा लोभस्त्रपा मोहश्च पञ्चमः नमःपञ्चगुणाः प्रोक्ता ब्रह्मज्ञानेन भाषितम्॥

राघवभट्टधृतम्।

अस्थि मांसं त्वचं स्नायुरोम एवं तु पञ्चमं।

इति पञ्चविधा प्रोक्ता पृथिवी कठिनात्मिका।

लाला मूत्रं तथा शुक्रं शोणितं मज्ज पञ्चमम्।

अपां पञ्चगुणाते रुद्ररूपाः प्रकीर्तिताः।

क्षुधा तृष्णा भयं निद्रा आलस्यं क्षान्तिरेव च।

तृष्णात्मका गुणा एते तेजसः परिकीर्तिताः।

धारणं वलानं भुक्तिराकुञ्चनप्रसारणम्।

एते पञ्च गुणा वायोः क्रियारूपा व्यवस्थिताः।

रागद्वेषौ तथा लज्जा भयं मोहस्तथैव च।

व्योम्नः पञ्च गुणाः प्रोक्ताः शून्याख्ये शुषिरात्मनीति।

इति पञ्चभूतोद्भवास्थ्यादिकथनम्॥

शाक्तानन्दतरङ्गिण्याम्॥

प्राणापानसमानश्चोदानव्यानौ च वायवः।

नागः कूर्मोऽथ कृकरो देवदत्तो धनञ्जयः।

एते दशगुणाः प्रोक्ताः सर्वप्राणवशात्मनः॥

शारदातिलके॥

दक्षिणांशः स्मृतः सूर्यो वामभागो निशाकरः।

नाडीर्दश विदुस्तासु मुख्यास्तिस्रः प्रकीर्तिताः।

p. 58) इडा वामतनोर्मध्ये सुषुम्ना पिङ्गला परे।

मध्या तास्वपि नाडी स्यादग्नीषोमस्वरूपिणी।

अत्रेडा वाममुष्काधःस्था धनुर्वक्रा वामनासापर्यन्तं गता।

एवं पिङ्गला दक्षिणाण्डाधःस्था धनुर्वक्रा दक्षिणनासान्तं गता।

पृष्ठवंशान्तर्गता सुषुम्ना इत्यर्थः।

एतदग्रे स्फुटीभविष्यति॥

तथा प्रपञ्चसारे।

ऊर्द्धन्तु मरुतानुन्ना त्तस्मादपि मलद्वयी।

उभयात्मिक्यधोवृत्ता नाडी दीर्घा भवेदृजुः।

अवाङ्मुखी सा तस्याश्च भवेत् पक्षद्वये द्वयम्।

पक्षद्वये पार्श्वद्वये।

नाड्यस्ताः सन्निरुद्धा स्युः सप्तान्या नाडिका मताः।

तत्र या प्रथमा नाडी सा सुषुम्नेति कथ्यते।

या वामेडेति सा ज्ञेया दक्षिणा पिङ्गला मता॥

तथा काचिन्नाडी वहिर्वक्त्रा या मातुर्हृदि वध्यते।

यया स पुष्टिमायाति केदार इव कुल्यया।

मातुराहाररसजैर्धातुभिः पुष्यते क्रमात्।

क्रमवृद्धौ परं ज्योतिः कलाक्षेत्रज्ञतामियात्।

सक्षेत्रज्ञं मलं तत्तु सभूतं सगुणं पुनः।

सदोषं दूष्यसम्पन्नं जन्तुरित्यभिधीयते।

सभूतपञ्चकं सक्षेत्रज्ञमात्रसहितं तत् पूर्वोक्तमानवादिमलं जन्तुरित्युच्यते।

इत्यन्वयः।

किम्भूतं सगुणं सत्त्वादिगुणं सत्त्वादिगुणयुक्तं सदोषं वायुपित्तकफयुक्तं दूष्यसम्पन्नं सप्तधातूद्भवम्।

इति जन्तुलक्षणम्॥

फलकोषद्वयं तत्तु व्यक्तं पुंसो न तु स्त्रियाः।

नपुंसकस्य किञ्चित्तु व्यक्तिरत्रोपलक्ष्यते।

फलकोषद्वयमण्डकोषद्वयम्॥

निरुत्तरतन्त्रे प्रथमपटले॥

नाडीनां संवहो देवि कञ्जयोनिः खगाण्डवत्।

तत्र नाड्यः समुत्पन्नाः सहस्राणां द्विसप्ततिः।

कञ्जस्य पद्मस्य योनिरूत्पत्तिस्थानं शालूकमिति यावत्।

प्रधानाः प्राणवाहिन्यो नाड्यत्रदश स्मृताः।

इडा च पिङ्गला चैव सुषुम्ना च तृतीयिका।

गान्धारी हस्तिजिह्वा च पूषा चैव यशस्विनी।

अलम्बुषा कुहुश्चैव शङ्खिनी च दश स्मृताः।

एवं नाडीमयं चक्रं विज्ञेयं शक्तिचक्रके।

p. 59) इडायाः पिङ्गलायाश्च मध्ये या सा सुषुम्निका।

इयञ्च त्रिगुणा ज्ञेया ब्रह्मविष्णुशिवात्मिका।

रजोगुणा च वज्राख्या चित्रिणी सत्त्वसंयुता।

तमोगुणा ब्रह्मनाडी कार्यभेदक्रमेण च।

तथा।

वायुर्भानुमयो ज्ञेयो मनश्चन्द्रात्मकं तथा।

प्राणोऽपानः समानश्चोदानव्यानौ च वायवः।

या वाममुष्कसम्बन्धा संश्लिष्यन्ती सुषुम्नया।

दक्षिणञ्चक्रमाश्रित्य धनुर्वक्रा हृदि स्थिता।

वामांशयन्त्रान्तरगा दक्षिणां नासिकामियात्।

तथा दक्षिणमुष्कस्था नासाया वामरन्ध्रगा।

तन्त्रान्तरे॥

षुषुम्नाकलिता याता मुष्कं दक्षिणमाश्रिता।

सङ्गता वामभागस्य यन्त्रमध्यं समाश्रिता।

दक्षिणं नासिकाद्वारं प्राप्तेति गिरिजात्मजे ।

वाममण्डमनुस्यूतामनन्या सव्यनासिकामिति।

अनयोः स्वरूपमुक्तं योगार्णवे।

इडा च शङ्खचन्द्राभा तस्या वामे व्यवस्थिता।

पिङ्गला सितरक्ताभा दक्षिणं पार्श्वमाश्रिता इति।

तन्त्रान्तरे इडायां संश्रितश्चन्द्रः पिङ्गलायां दिवाकर इति।

तास्वपि सुषुम्ना मुख्येत्यर्थः।

उक्तञ्च श्रीतत्त्वचिन्तामणौ॥

मेरोर्वाह्यप्रदेशे शशिमिहिरशिवे सव्यदक्षे निषण्णे मध्ये नाडी सुषुम्ना त्रितयगुणमयी चन्द्रसूर्याग्निरूपा।

अन्यत्रापि तयोः पृष्ठवंशं समाश्रित्य मध्ये सुषुम्ना स्थिता ब्रह्मरन्ध्रन्तु यावत्।

अन्यासां नामान्यपि शारदायाम्।

गाधारी हस्तिजिह्वाख्या सपूषालम्बुषा मता।

यशस्विनी शङ्खिनी च कुहुः स्युः सप्त नाडयः।

आसां स्थितिस्वरूपं योगार्णवे॥

इडापृष्ठे तु गान्धारी मयूरगलसन्निभा।

सव्यपादादिनेत्रान्ता गान्धारी परिकीर्तिता।

हस्तिजिह्वोत्पलप्रेक्षा नाडी तस्याः पुरः स्थिता।

सव्यभागस्य मूर्द्धादिपादाङ्गुष्ठान्तमाश्रिता।

पूषा तु पिङ्गलापृस्ठे नीलजीमूतसन्निभा।

याम्यभागस्य नेत्रान्ता यावत् पादतलं गता।

यशस्विनी शङ्खवर्णा पिङ्गला पूर्वदेशगा।

गान्धार्याश्च सरस्वत्या मध्यस्था शङ्खिनी मता।

p. 60) सुवर्णवर्णा पादादिवर्णान्ता सव्यभागके।

पादाङ्गुष्ठादिमूर्द्धान्तयाम्यभागे कुहुर्मता।

रावणा सरस्वती विश्वोदरी शङ्खिनी एता अपि प्रधानत्वेनोक्ताः।

उक्तञ्च।

ताश्च भूरितरास्तासु मुख्याः प्रोक्ताश्चतुर्दश।

सुषुम्नेडा पिङ्गला च कुहूरथ सरस्वती।

गान्धारी हस्तिजिह्वा च रावणा च यशस्विनी।

विश्वोदरी शङ्खिनी च ततः पूषा यशस्विनी।

अलम्बुषेति॥

शाक्तानन्दतरङ्गिणीधृतज्ञानभाष्ये॥

इडा च वामनासायां दक्षिणे पिङ्गला मता।

सुषुम्ना ब्रह्मरन्ध्रे च गान्धारी वामचक्षुषि।

दक्षिणे हस्तिजिह्वा च पूषा कर्णेऽथ दक्षिणे।

वामे यशस्विनी ज्ञेया मुखे चालम्बुषा मता।

कुहुश्च लिङ्गमूले स्यात् शङ्खिनी शिरसोपरि।

एवं द्वारं समाश्रित्य तिष्ठन्ति दश नाडिकाः।

क्षितिश्च वारि तेजश्च वायुराकाशमेव च।

स्थैर्यं गता इमे पञ्च वाह्याभ्यन्तर एव च॥

एवं प्रधाननाडीनिरूपणानन्तरं शाखारूपनाडी निरूपिता॥

शारदायां॥

नाड्योऽनन्ताः समुत्पन्नाः सुषुम्ना पञ्चपर्वसु।

सर्वाणि स्वाधिष्ठानमणिपूरकानाहतविशुद्धाज्ञान्तानि।

तत्राधोऽधोग्रन्थिमारभ्योर्ध्वोर्द्ध्वसर्वग्रन्थिपर्यन्तं समाप्तिः।

गणयितुमशक्यत्वादनन्ताः।

यदाहुः।

पूर्वोक्तायाः सुषुम्नाया मध्यस्थायाः सुलोचने ।

नाभिहृत्कण्ठतालूभ्रूमध्यपर्वसमुद्भवाः।

अधोमुखाः शिराः काश्चित् काश्चिदूर्द्धमुखास्तथा।

परास्थिर्यग्गताः काश्चित्तत्र लक्षत्रयाधिकाः।

नाड्योऽर्द्धलक्षसंख्याताः प्रधानाः समुदीरिताः॥

तासु सर्वासु बलवान् प्राणो वायुः समन्ततः॥

विश्वसारे तु॥

नाभेः सकाशाज्जायन्ते नाड्यः क्षेत्रप्रपोषिक्ताः।

इडा तु वामभागे स्याद्दक्षिणे पिङ्गला मता।

मध्ये सुषुम्ना विज्ञेया चन्द्रसूर्यानलात्मिका।

नाड्योऽनन्ताः समुत्पन्नास्तस्याः पञ्चसु पर्वसु।

इति नाभेः सकाशादिति यदुक्तं तत्क्षेत्रपोषिका इत्यनेन रसादिचालनेन शरीरपुष्ट्यर्थं न तु ज्ञानध्यानाद्यर्थं वायुसाधनप्रकरणे एतत् स्पष्टीकरिष्ये।

p. 61) नरपतिजयचर्यास्वरोदयधृतब्रह्मब्रह्मजामलमपि शरीरपुष्ट्यर्थमे नाभौ कुण्डलिनी माह यथा महाशक्तिः कुण्डलिनी नाडीस्थाहिस्वरूपिणी।

ततो दशोर्द्धगा नाड्यो दश चाधोगतास्तथा द्वे द्वे तिर्य्यग्गते नाड्यौ चतुर्विंशतिसंख्यया।

सूक्ष्ममुख्यास्त्वतो नाड्यः सहस्राणां द्विसप्ततिः।

कुण्डलिन्यां महाशक्तौ मूलमार्गा भवन्त्यमी।

ताभ्यः सूक्ष्ममुखा नाड्यः शरीरं प्रतिपोषिकाः।

सप्त शतानि जायन्ते सप्तोत्तराणि संख्यया।

प्रधाना दश नाड्यस्तु दश वायुप्रवाहिकाः॥

योगियाज्ञवल्क्ये प्रथमध्यायेऽपि नाभिचक्रमुपक्रम्य।

कन्दमध्ये स्थिता नाडी सुषुम्नेति प्रकीर्तिता।

तिष्ठन्ति परितः सर्वाश्चक्रेऽस्मिन् नाडिकास्ततः।

नाडीनामपि सर्वासां मुख्या गार्गि चतुर्दश॥

गार्गि इति याज्ञवक्यस्य स्थियाः सम्बोधनम्॥

इडा च पिङ्गला चैव सुषुम्ना च सरस्वती।

वारूणी चैव पूषा च हस्तिजिह्वा यशस्विनी।

विश्वोदरी कुहुश्चैव शङ्खिनी च पयस्विनी।

अलम्बुषा च गान्धारी मुख्याश्चैताश्चतुर्दश।

तासां मुख्यतमास्तिस्त्रस्तिसृष्वेकोत्तमोत्तमा।

मुक्तिमार्गे तु सा प्रोक्ता सुषुम्ना विश्वधारिणी।

कन्दस्य मध्यमे गार्गि सुषुम्ना च प्रतिष्ठिता।

पृष्ठमध्ये तु तेनास्थ्ना सह मूर्ध्नि व्यवस्थिता।

मुक्तिमार्गे सुषुम्ना वैष्णवी स्थिता।

इडा च पिङ्गला चैव तस्याः सव्ये च दक्षिणे।

इडायां पिङ्गलायाञ्च चरतश्चन्द्रभास्करौ।

इडायां चन्द्रमा ज्ञेयः पिङ्गलायां दिवाकरः।

चन्द्रस्तामस इत्युक्तः सूर्यो राजस उच्यते।

विषभागो रवेर्भागश्चन्द्रभागोऽमृतं तथा।

तावेव तदधः सर्वं कालं रात्रिन्दिवात्मकम्॥

भोक्त्री सुषुम्ना कालस्य गुह्यमेतदुदाहृतम्।

p. 62) सरस्वती कुहुश्चैव सुषुम्ना पार्श्वयोः स्थिते।

गान्धारी हस्तिजिह्वा च इडायाः पृष्ठपूर्वयोः।

यशस्विनी च पूषा च पिङ्गला पृष्ठपूर्वयोः।

कुहुश्च हस्तिहिह्वा च मध्ये विश्वोदरी स्थिता।

यशस्विन्याः कुहोर्मध्ये वारुणी सा प्रतिष्ठिता।

पूषायाश्च सरस्वत्याः स्थिता मध्ये यशस्विनी।

गान्धार्याश्च सरस्वत्याः स्थिता मध्ये च शङ्खिनी।

अलम्बुषा च विप्रेन्द्रि कन्दमध्यादधः स्थिता।

पूर्वभागे सुषुम्नायास्त्वामेढ्रान्तं कुहुः स्थिता।

अधश्चोर्द्धश्च विज्ञेया वारुणी सर्वगामिनी।

यशस्विनी च याम्यस्य पादाङ्गुष्ठान्तमिष्यते।

पिङ्गला चोर्द्धगा याम्ये नासान्तं विद्धि मे प्रिये ।

याम्ये पूषा च नेत्रान्ता पिङ्गलायाः सुपृष्ठतः।

पयस्विनी तथा गार्गि याम्ये नेत्रान्तमिष्यते।

सरस्वती तथाचोर्द्धं हस्तिजिह्वा प्रकीर्तिता।

आसव्यकर्णाद्विप्रेन्द्रि शङ्खिनी चोर्द्धमागता।

गाधारी सव्यन्तेत्रान्तमिडायाः सव्यतः स्थिता।

इडा च सव्यनासान्तं मध्यभागे व्यवस्थिता।

हस्तिजिह्वा तथा सव्यपादाङ्गुष्ठान्तमिष्यते।

विश्वोदरी तु सा नाडी तुन्दमध्ये व्यवस्थिता।

अलम्बुषा महाभागे वायुमूला तथोर्द्ध्वगा।

एतास्त्वन्याः समुत्पन्नाः शिवास्त्वन्याश्च ता अपि।

यदश्वत्थदले तद्वत् पद्मपत्रेषु चापि वा।

नाडीष्वतासु सर्वासु विज्ञातव्या तपोधने ॥

इति नाड्युत्पत्तिकथनम्।

आध्यात्मविवेके।

अस्यां शरीरं संख्या स्यात् षष्टियुक्तं शतत्रयम्।

त्रीण्येवास्थिशतान्यत्र धन्वन्तरिरभाषत।

द्वे शते त्वस्थिसन्धीनां स्यातामत्र दशोत्तरे।

पेशीस्नायुशिरासन्धिसहस्रद्वितयं मतम्।

नव स्नायुशतानि स्युः पञ्च पेशीशतान्यपि।

अधिका विंशतिः स्त्रीणां स्तनयोर्दिग्दिगीरिता।

शिराधमनिकानान्तु लक्षाणि नव विंशतिः।

सार्द्धानि स्युर्नवशती षट्पञ्चाशद्युता तथेति॥

इत्यस्थ्याद्युत्पत्तिकथनम्॥

रुद्रजामले सप्तदशपटले॥

p. 63) तिस्रः कोट्योऽर्द्धकोटी च यानि लोमानि मानुषे।

नाडीमुखानि सर्वाणि धर्मबिन्दुं क्षरन्ति च।

इति नाडीमुखस्थानकथनम्॥

इति श्रीप्राणतोषिण्यां प्रथमे सर्गकाण्डेऽन्नमयकोषात्मकमनुष्यदेहकथनं नाम चतुर्थः परिच्छेदः॥

एवं नाडीप्रभृतीनां निरूपणानन्तरं वायुप्रकरणस्यौचित्यात्तन्निरूप्यते॥

शारदातिलके॥

मूलाधारोद्गतः प्राणस्ताभिर्व्याप्नोति तत्तनुम्।

वायवोऽत्र दश प्रोक्ता वह्नयश्च दश स्मृताः॥

ताभिर्नाडीभिः॥

तत्तनुमनुभूततनुम्॥

वायुनामानि तत्रैव।

प्राणाद्या मरुतः पञ्च नागः कूर्मो धनञ्जयः।

कृकरः स्याद्देवदत्त इति नामभिरीरिताः॥

प्राणाद्या इति प्राणापानव्यानोदानसमानाः।

योगियाज्ञवल्क्ये चतुर्थाध्यायेऽपि।

प्राणोऽपानः समानश्च उदानो व्यान एव च।

नागः कूर्मश्च कृकरो देवदत्तो धनञ्जयः।

एते नाडीषु सर्वासु चरन्ति दश वायवः।

एतेषु वायवः पञ्च मुख्याः प्राणादयः स्मृताः।

तेषु मुख्यतमावेतौ प्राणापानौ नरोत्तमे ।

प्राण एवैतयोर्मुख्यः सर्वप्राणभृतां सदा॥

एषां रूपाणि स्थानानि च योगार्णवे।

इन्द्रनीलप्रतीकाशं प्राणरूपं प्रकीर्तितम्।

आस्यनासिकयोर्मध्ये हृन्मध्यनाभिमध्यके।

प्राणालयमिति प्राहुः पादाङ्गुष्ठेऽपि केचन॥

अपानयत्यपानोऽयमाहारञ्च प्रलापितम्।

शुक्रं मूत्रं तथोत्सर्गमपानस्तेन मारुतः।

इन्द्रगोपप्रतीकाशः सन्ध्याजलदसन्निभः।

स च मेढ्रे च पायौ च उरुवङ्क्षणजानुषु॥

मेढ्रे लिङ्गे पायौ गुदे ऊरौ प्रसिद्धरूपे वङ्क्षणे उरुसन्धौ जानुनि प्रसिद्धरूपे
।

इन्द्रगोपो रक्तवर्णकीटविशेषः।

कापासियापोका इति ख्यातः।

जङ्घोदरकृकाट्याञ्च नाभिमूले च तिष्ठति॥

व्यानो व्यानशतोत्पन्नः सर्वव्याधिप्रकोपणः।

p. 64) महारजतसम्प्रेक्षो हारोपादानकारकः।

महारजतं काञ्चनम्।

हारोपादानकारक आहारग्राहक इत्यर्थः॥

स्वीयाक्षिकर्णयोर्मध्ये कट्यां वै गुल्फयोरपि।

कटिः प्रसिद्धाः।

गुल्फः पादग्रन्थिः।

घ्राणे गले स्फिगुद्देशे तिष्ठत्यत्र निरन्तरम्।

स्पन्दयत्यधरं वक्त्रं गात्रनेत्रप्रकोपणः।

उद्वेजयति चार्थानि तूदानो नाम मारुतः।

विद्युत्पावकवर्णः स्यादुत्थानासनकारकः।

पादयोर्हस्तयोश्चापि स तु सन्धिषु वर्तते॥

पीतं भक्षितमाघ्रातं रक्तपित्तकफानिलान्॥

समं नयति गात्रेषु समानी नाम मारुतः।

गोक्षीरसदृशाकारः सर्वदेहे व्यवस्थितः॥

योगियाज्ञवल्क्ये च॥

आस्यनासिकयोर्मध्ये हृन्मध्ये नाभिमध्यके।

प्राणालयमिति प्राहुः पादाङ्गुष्ठे च केचन।

अधश्चोर्द्ध्वं कुण्डलिन्याः परितः प्राणस।ंश्रयः।

अपाननिलयं केचिद् गुदमध्योरुजानुषु।

उदरे वृषणे कट्यां जङ्घे नाभौ वदन्ति हि।

गुदाधारद्वयोस्तिष्ठेन्मध्येऽपानप्रभञ्जनः।

स्थानेष्वेतेषु सततं प्रकाशयति दीपवत्।

उदानः सर्वसन्धिस्थः पादयोर्हस्तयोरपि।

समानः सर्वगात्रेषु सर्वं व्याप्य व्यवस्थितः॥

रायमुकुटस्तु॥

हृदि प्राणो गुदेऽपानः समानो नाभिदेशके।

उदानः कण्ठदेशस्थो व्यानः सर्वशरीरग इत्याह॥

उद्गारे ना इत्युक्तो नीलजीमूतसन्निभः॥

उन्मीलने स्थितः कूर्मो भिन्नाञ्जनसमप्रभः॥

कृकरः क्षुत्परश्चैव जवाकुसुमसन्निभः॥

विजृम्भणे देवदत्तः शुद्धस्फटिकसन्निभः॥

धनञ्जयस्तथा घोषे महारजतवर्णकः॥

ललाटे चोरसि स्कन्धे हृदि नाभौ त्वगस्थिषु।

नागाद्या वायवः पञ्च सहैव परिनिष्ठिताः॥

विश्वसारप्रथमपटले तु॥

प्राण आदौ हृदि स्थाने पद्मरागसमद्युतिः।

अपानो गुह्यदेशे च इन्द्रगोपसमः स्मृतः।

गोक्षीरधवलाकारः समानो नाभिदेशके।

उदानः कण्ठदेशे च धूम्रवर्णः प्रकीर्तितः।

p. 65) व्यानः सर्वेषु चाङ्गेषु ज्योतीरूपेण वर्तते॥

एतद्वचनानुसारेण पूर्वकथितरायमुकुटधृतं वचननमिति पूर्ववचनोक्तैतद्वचनोक्तरूपभेदस्त्वाम्नायादिभेदेन समाधेय इति॥

प्रपञ्चसारकारस्तु॥

धनञ्जयाख्यो देहेऽस्मिन् कुर्याद्बहुविधान् श्वसान्।

स तु लौकिकवायुत्वान्मृतञ्च न विमुञ्चतीति॥

अतव विश्वसारे।

मैथुनञ्चेच्छति यदा मैथुनञ्च तदा चरेत्।

काले धनञ्जयो वायु र्बीजं गर्भे च सञ्चयेत्।

निधायानिलमार्गे च पुनरेव प्रवेशयेदिति धनञ्जयवायुतो गर्भसञ्चार इत्युक्तम्।

अन्यैस्तु चत्वारो वायवोऽधिका उक्ता यथा।

वैरम्भणः स्थानमुख्यः प्रद्योतः प्रकृतस्तथा।

वैरम्भणादयस्तत्र सर्ववायुवशं गता इति।

नरपतिजयचर्यास्वरोदयधृतब्रह्मजामले॥

पिङ्गलेडासुषुम्नाभिर्नाडीभिस्तिसृभिर्बुधैः।

प्रकटो वयुसञ्चारो लक्ष्यते देहमध्यतः।

इडानाड्यां स्थितश्चन्द्रः पिङ्गला भानुवाहिनी।

सुषुम्ना शम्भुरूपा च शम्भुर्हंसस्वरूपकः।

हकारो निर्गमः प्रोक्तः सकारस्तु प्रवेशने।

हकारः शम्भुरूपः स्यात् सकारः शक्तिरुच्यते।

अत्र विशेषोऽग्रे वक्ष्यते।

शारदायां द्वितीयपटले॥

पिङ्गलायां स्थिता ह्रस्वा इडायां सङ्गताः परे।

सुषुम्नामध्यगा ज्ञेयाश्चत्वारो ये नपुंसकाः।

अत्र प्रकारः वामनासातो दक्षिणनासाप्रवेशप्रारम्भसमये देहवायुः कञ्चित् काल मुभयत्र वहति स दक्षिणायणप्रारम्भसमयस्तदानीं ऋऌकारात्मकं ह्रस्वद्वन्द्वमुदेति।

एवं दक्षिणनासातो वामनासागमनकालेऽपि स उत्तरायणप्रारम्भकालस्तदानीं ॠॡरूपं दीर्घद्वन्द्वमुदेति।

तदुक्तं प्रयोगसारे॥

स्वरं सप्त समारभ्य चत्वारो ये नपुंसकाः।

ते सुषुम्नाश्रिते प्राणे प्रोद्यन्त्वयनसंक्रमे इति॥

जामले॥

शक्तिरूपः स्थितश्चन्द्रो वामनाडीप्रवाहकः।

दक्षनाडीप्रवाहे तु शम्भु रूपी दिवाकरः।

इति शरीरस्थवायुकथनम्॥

p. 66) शारदायाम्॥

अग्नयो दोषदूष्येषु संलीना दश देहेषु।

तेषां नामानि राघवभट्टधृतानि यथा॥

जृम्भको दीपकश्चैव विभ्रमो भ्रमशोभनः।

आवसथ्याहवनीयौ दक्षिणाग्निस्तथैव च।

अन्वाहार्यो गार्हपत्य इत्येते दश वह्नयः॥

भ्रमेण सह शोभन इति मध्यपदलोपिससासाश्रयणेन भ्रमशोभनश्चेति दशाग्निकथनम्॥

शारदायाम्॥

बुभुक्षा च पिपासा च प्राणस्य मनसः स्मृतौ।

शोकमोहौ शरीरस्य जरा मृत्युः षडूर्मयः॥

प्रपञ्चसारेऽपि॥

बुभुक्षा च पिपासा च शोकमोहौ जरामृती।

षडूर्मयः प्राणबुद्धिदेहधर्मेषु संस्थिता इति॥

ऊर्मीनामार्त्युत्पादकोऽवस्थाविशेषः॥

शारदायाम्॥

शुक्रात् स्नायुस्थिमज्जानस्त्वङ्मांसाश्रूणि शोणितात्।

पितुः शुक्रात् स्नाय्वादि।

शोणितान्मातुः शोणितात् त्वगादि।

षाट्कौषिकमिति प्रोक्तं सर्वदेहेषु देहिनाम्।

प्रपञ्चसारे द्वितीयपटलेऽपि॥

मज्जास्थिस्नायवः शुक्राद्रक्तात्त्वङ्मांसशोणितम्।

इति षाट्कौषिको नाम देहो भवति देहिनाम्।

वेदान्तविद्भिस्त्वपरप्रकारेण पञ्च कोषा उक्ता यथा पौर्णमास्यां
पञ्चकोषविवेकेऽष्टमप्रकरेणे विद्यानन्दस्वामिना।

पितृभुक्तान्नजाद्वीर्याज्जातोऽन्नेनैव वर्द्धते।

देहः सोऽन्नमयो नात्मा प्राक् चोर्द्ध्वं तदभावतः॥

पितृभुक्तेत्यत्रैकशेषेण मातृपितृभुक्तान्नजातादिति लभ्यते।

अन्नेन दुग्धाद्याहारेण प्राक् जन्मन इति शेषः।

मरणादूर्द्ध्वं तदभावतः देहाभावतः।

पूर्णो देहे बलं स्याद् यल्लक्षाणां यः प्रवर्तकः।

वायुः प्राणमयो नासावात्मा चैतन्यवर्जनात्।

लीना सुप्तौ वपुर्बोधे वाप्नुयादानखाग्रगा।

चिच्छायोपेतधीर्नात्मा विज्ञानमयशब्दभाक्।

भवतीति शेषः।

कर्तृत्वकरणत्वाभ्यां विक्रियेतान्तरिन्द्रियम्॥

विज्ञानमनसी अन्तर्वहिश्चैते परस्परमिति।

अत्र रामकृष्णपण्डितस्य व्याख्यानम्।

ननु मनोबुद्ध्योरन्तःकरणत्वाविशेषान्मनो-मयविज्ञानमयरूपेण नोमयविज्ञानमयरूपेण कोषद्वयकल्पना अनुपपन्नेत्याशङ्क्य कर्तृकरणत्वाभ्यां भेदसद्भावाद् घटत एव मनोमयत्वादिभेद इत्याह।

p. 67) कर्तृत्वेत्यादि अन्तरिन्द्रियमन्तःकरणं कर्तृत्वकरणत्वाभ्यां कर्तृरूपेण कर्णरूपेण च विक्रियेत विपरिणमेत इत्यर्थः।

एते कर्तृकरणे विज्ञानमनसी विज्ञानमनःशब्दवाच्ये भवतः।

एते च परस्परमन्तर्वहिर्भावेन वर्तेते।

अतः कोषद्वयत्वमुपपद्यते इत्यर्थः॥

कादिदन्तर्मुखा वृत्तिरानन्दप्रतिबिम्बभाक्।

पुण्यभोगे भोगशान्तौ निद्रारूपेण लीयते।

इदानीमानन्दमयस्यानात्मत्वं दर्शयितुं तत्स्वरूपमाह काचिदित्यादि।

पुण्यभोगे पुण्यकर्मफलानुभवकाले काचिद्धीवृत्तिरन्तर्मुखा सती आनन्दप्रतिबिम्बभाक् आत्मस्वरूपस्यानन्दस्य प्रतिविम्बं भजते।

सैव भोगशान्तौ पुण्यकर्मफलभोगोपरमे सति निद्रारूपेण लीयते विलीना भवति।

सा वृत्तिरानन्दमय इत्यभिप्रायः।

एतेन मज्जामयोऽस्थिमयः स्नायुमयश्चर्ममयो मांसमयो रक्तमयश्चेति ये षट्कोषास्तन्त्रविद्भिरुक्तास्ते तु वेदान्तविद्भिरन्नमयकोषान्तर्गतत्वेनैव पर्यवसिताः।

अधिकास्तु प्राणमयविज्ञानमयमनोमयानन्दमयेति चत्वार उक्ताः।

अतो दशकोषकोऽयं देह इत्यायातम्।

इति शरीरकोषविवरणम्॥

प्रपञ्चसारे॥

रसादितः क्रमात् पाकशुक्रान्तेषु तु धातुषु।

धातुषु रसादितः क्रमात् पाको भवतीत्यन्वयः।

शुक्रपाकात् स्वयं भिद्याज्जराणामष्टमी दशा।

क्षेत्रज्ञस्य तदा जन्तु केवलाश्रयमिष्यते।

यथा स्नेहः प्रदीपस्य यथाभ्रमशनित्विषः।

बहुद्वारेण कुम्भेन संवृतस्य हविर्भुजः।

यथा तेजः प्रसरति समीपालोकशक्तिमत्।

तथा देहावृतस्यापि क्षेत्रज्ञस्य महात्विषः।

इन्द्रियैः संविवर्द्धन्ते स्वं स्वमर्थग्रहं प्रति।

प्रदीपस्य प्रज्वलनसमये स्नेहस्तैलादिर्यथा प्रज्वलनार्थं शिखां प्रति प्रसरति स्वयमायाति यथा वा अशनित्विषो विद्युतो द्युतिसमयेऽभ्रं मेघो यथा व बहुच्छिद्रकुम्भावृतस्य वह्नेर्घृतभक्षणसमये समीपालोकशक्तिमन्निकटप्रकाशकशक्तियुक्तं तेजस्तथा देहावृतस्य कोषदशकाभ्यन्तरवर्तिन आत्मनः स्वं स्वं विषयग्रहणं प्रति इन्द्रियैः करणैस्तेजांसि संविवर्द्धन्ते प्रसरन्ति इत्यर्थः।

p. 68) यथा स्नेहमिति पाठे तु व्यक्त एवार्थस्तथापि व्याख्यायते।

प्रदीपस्य तेजो यथा स्नेहं विद्युतस्तेजो यथा मेघं बहुच्छिद्रपात्रावृतवह्नेर्यथा घृतं प्रति तेजः प्रसरति तथात्मनस्तेजांसि स्वं स्वं विषयग्रहणं प्रति प्रसरन्तीत्यर्थः।

संविवर्द्धन्ते इति बहुवचननिर्देशादेकदापि बहिन्द्रियैर्बह्वर्थग्रहणमिति सूचितम्।

अतव अन्तर्दृष्टिर्वहिरुपगतप्रेक्षणाच्छिन्नपाशः प्रौढोल्लासाधिगतपरमब्रह्मनिर्विघ्नचेताः।

तत्तद्भावोदितमधुरगीः सुप्रसन्नान्तरात्मा स्मेरास्या मे भवतु सततं शाम्भवो काप्यवस्था॥

इत्यादि कुलयोगिनः प्रौढोल्लासप्रार्थना॥

अन्तर्दृष्टिर्वहिश्चक्षुरित्यादिवक्ष्यमाणकुलार्णववचनञ्च साधु सङ्गच्छते।

वैष्णवैरप्युच्यते।

पुङ्खानुपुङ्खविषये क्षणतत्परोऽपि धीरो न मुह्यति मुकुन्दपदारविन्दे।

सङ्गीतनृत्यगतितालवशं गतापि मौलिस्थकुम्भपरिरक्षणधीर्नटीव।

इत्यादि प्रत्यक्षसिद्धमपि कश्चिद् युगपद् गात्रं कण्डूयते एवं प्रेषयत्यपरं पश्यति च।

एतेन युगपदुभयविषयकज्ञानं न मन्यामह इति केषाञ्चिम्मतं प्रशस्यमप्रशस्यं वा सुधीभिर्निपुणं विभाव्य विचारणीयमित्यास्तां विस्तरः।

प्रकृतमनुसरामः।

इन्द्रियेषु पञ्चभूतस्थितिप्रकारमाहुः प्रपञ्चसारे आचार्याः॥

नभःश्रोत्रेऽनिलश्चर्मण्यग्निश्चक्षुष्यथोदकम्।

जिह्वायामवनी घ्राणे इत्थमर्थप्रवर्तनम्।

नभ आकाशं अनिलो वायुरुदकं जलमवनी पृथ्वी।

इदन्तु प्रधानतया उक्तम्।

वस्तुतस्तु प्रागुक्तपञ्चीकरणरूपेण पञ्चस्वपि पञ्च भूतानि सन्तीति पुरैवोक्तम्।

यदा पित्तं मरुन्नून्नं विलीनं प्रविलापयेत्।

p. 69) धातुस्तदा क्रमाद्रक्तं लसीकां द्रावयेत् क्षणात्।

द्रुता सा तुलसीकाह्वा रोमकूपैः प्रवर्द्धते।

वहिः सर्वत्र कणशस्तथा स्वेदः प्रवर्तते।

यदा कफो मरुत्पित्तनुन्नो लीनः प्रवर्तते।

ऊर्ध्वंद्रुतो द्रुतं वाष्पं प्रत्येकञ्च प्रवर्तते।

कफात्मिका तु विकृतिः कर्णशष्कुलिपूरिका।

गण्डमालादिकान् वापि कुर्याज्जन्तोस्तु कर्मजान्॥

शारदायाम्॥

इत्थं भूतस्तदा गर्भे पूर्वजन्मशुभाशुभम्।

स्मरंस्तिष्ठति दुःखात्मा छन्नदेहो जरायुणा॥

शाक्तानन्दतरङ्गिण्याम्।

नवमे मासि गर्भस्थः सर्वान् संस्मरते हृदा।

नवद्वारपुरे देही समयान् गमयेच्छनैः।

स्थितिप्रकारस्तु राघवभट्टधृते।

कृताञ्जलिर्ल्ललाटेऽसौ मातृपृष्ठमभिश्रितः।

अध्यास्ते सङ्कुचद्गात्रो गर्भे दक्षिणपार्श्वगः।

वामपार्श्वाश्रिता नाडीं क्लीवं मध्याश्रितं मतम्॥

विश्वसारे।

योनिदेशोद्भवं रन्ध्रं नाभिमूलमतः परम्।

गर्भाशयन्तु तं प्राहुः सर्वतन्त्रविदो जनाः।

कललं तत्र तिष्ठेद्वै तत्र गर्भः प्रजायते।

कर्मयोगात्मरूपेण निर्माणं विधिरादिशेत्॥

पूर्वार्जितकर्मफलं पूर्वपूर्वतरार्जितम्।

जीवः प्रवेशनं कुर्यात् पूर्वकर्मबुभुक्षया।

प्राक्तनकर्मफलं भोक्तुमिच्छया जीवोऽविद्योपाधिकः प्रवेशनं कुर्याद् गर्भे इति शेषः।

पूर्वकर्मफलं किम्भूतं पूर्वं पूर्वार्जितमित्यादि।

अयमाशयः।

कर्म त्रिविधं सञ्चितं प्रारब्धमागामि च।

तत्र सञ्चितस्य प्रायश्चित्तौषधादिना नाशः।

आगामिनश्च तपसा।

अत एव दोषप्रागभावासमकालीनदोषध्वंसवन्तः शिष्टा इति गोपीनाथतर्काचार्येण शिष्टलक्षणं कृतम्।

प्रारब्धस्य भोगं विना न गत्यन्तरमस्ति।

अतस्तत्फलभोगाय गर्भे जीवप्रवेशमाह।

उक्तञ्च प्रारब्धकर्मणां भोगादेव क्षय इति॥

शाक्तानन्दतरङ्गिण्याम्॥

सुकृतं दुष्कृतञ्चैव यत् कृतं पूर्वजन्मनि।

तत् सर्वं सकलं ज्ञात्वा ऊर्ध्वपादस्त्वधोमुखः।

गर्भे तु सम्प्रविष्टोऽसौ स्तिमिते घोरदर्शने॥

p. 70) स्तिमितेऽन्धकारे घोरदर्शने भयङ्करे।

अभ्यस्यामि शिवं ज्ञानं संसारार्णवतारणम्।

चिरयोगी ततो भूत्वा मुक्तो यास्यामि तत्पदम्।

एवं गर्भस्थितो जीवो गर्भयातनयार्दितः।

नित्यं भावयते चित्ते लब्धचैतन्यलक्षणः॥

विश्वसारे॥

इत्थम्भूतस्तदा गर्भः पूर्वजन्मशुभाशुभम्।

क्षणं तिष्ठेत् स्मरंस्तत्र निश्चेष्टो भवति ध्रुवम्।

शरीरे पञ्चाशदक्षरस्थितिं विना शब्दादिर्न निर्गन्तुमाननतः शक्तोऽतः शब्दब्रह्मप्रादुर्भावः गर्भं तेषां स्थानमुक्तम् तत्रैव।

पुरा कृतयुगे देवि।

कैलासे पर्वतोत्तमे।

त्वदीयपादयुगलं ध्यायेऽहं ध्यानयोगतः।

मम सिद्धिर्भवेत्तत्र युगान्ते कमलानने ।

परानन्दमयस्तत्र हस्तवाद्यो ममाभवत्।

तस्मिन्नेव क्षणे देवि शब्दब्रह्मविभूषितः।

पटहश्चाभवत्तत्र ममानन्दविवृद्धये।

शब्दार्थकात्मनादेन द्रव्ययोगेन शब्यते।

पञ्चाशद्वर्णसंयुक्तं नादबिन्दुविभूषितम्।

पञ्चाशद्वर्णसंयुक्ता मातृका चक्रसंस्थिता।

षड्चक्राङ्कितमन्त्रा च मातृकान्तः शरीरिणाम्।

आधारे लिङ्गनाभौ हृदयसरजिजे तालूमूले ललाटे द्वे पत्रे षोडशारे
द्विदशदशदले द्वादशार्द्धे चतुष्के।

वासान्ते बालमध्ये डफकठसहिते कण्ठदेशे स्वरांश्च हक्षौ कोदण्डमध्ये
न्यसतु विमलधीर्न्यासम्पत्तिसिद्ध्यै।

देहे चतुर्दशभुवनस्थानमुक्तम् शाक्तानन्दतरङ्गिण्याम्।

पातालं भूधरा लोका आदित्यादिनवग्रहाः।

भूधरादिसप्तस्वर्गाश्च नागाश्च सर्वदेहिनाम्।

पिण्डमध्ये स्थिताः सर्वे स्थानं तेषां वदामि ते।

पादाधस्तात्तलं विद्यात्तदूर्द्धं वितलन्तथा।

जानुनोः सुतलञ्चैव अतलं सन्धिरन्ध्रके।

तलातलं गुदमध्ये लिङ्गमूले रसातलम्।

पातालं कटिसन्धौ च पादादौ लक्षयेद्बुधः।

भूर्लोको नाभिदेशेच भुवोलोकस्तथा हृदि।

स्वर्लोकः कण्ठदेशे च महर्लोकश्च चक्षुषि।

जनलोकस्तदूर्द्धञ्च तपोलोको ललाटके।

p. 71) सत्यलोको महायोनौ भुवनानि चतुर्दश।

त्रिकोणे च स्थितो मेरुरूर्द्धकोणे च मन्दरः।

कैलासो दक्षिणे कोणे वामकोणे हिमालयः।

विन्ध्यो विष्णुस्तदूर्द्धे च सन्त्येते कुलपर्वताः।

अस्थिस्थाने महेशानि जम्बुद्वीपो व्यवस्थितः।

मांसेषु च कुशद्वीपः क्रौञ्चद्वीपः शिरासु च।

शाकद्वीपः स्मृतो रक्ते प्राणिनां सर्वसन्धिषु।

तदूर्द्धं शाल्मलिद्वीपः प्लक्षश्च लोमसञ्चये।

नाभौ च पुष्करद्वीपः सागरस्तदनन्तरम्।

लवणोदस्तथा मूत्रे शुक्रे क्षीरोदसागरः।

मज्जा दधिसमुद्रश्च तदूर्द्धं घृतसागरः।

वशापः सागरः प्रोक्त इक्षुः स्यात् कटिशोणितम्।

शोणिते च सुरासिन्धुः कथिताः सप्त सागराः।

ग्रहाणां मण्डलञ्चैव शृणु वक्ष्यामि पार्वति ।

नादचक्रे स्थितः सूर्यो बिन्दुचक्रे च चन्द्रमाः।

लोचने मङ्गलः प्रोक्तो हृदि सोमसुतस्तथा।

उदरे च गुरुश्चैव शुक्रे शुक्रस्तथैव च।

नाभिस्थितोऽथ मन्दो वै मुखे राहुस्तथा स्थितः।

पादौ पाणौ च केतुश्च शरीरे तीर्थमण्डलम्।

विश्वसारे॥

शीर्षे मुखे तथा वाहौ हृदये चोदरे क्रमात्।

कटौ वस्तौ च गुह्योरुजानुजङ्घाङ्घ्रिषु स्थिताः।

मेषाद्या राशयो देहे तेषां रूपाण्यतः शृणु।

अरुणसितहरितपाटलपाण्डुविचित्राः सितेतरपिशङ्गौ।

पिङ्गलकर्वुरकमलिनारुचयो यथासंख्यम्।

हरितः श्यामलः।

सितेतरः कृष्णः।

पिशङ्गो नीलपीतमिश्रः।

कर्वुरः प्रसिद्धः।

वभ्रुः कपिलः॥

मेषं वृषं समिथुनं कर्कटं सिंहमेव च।

कन्यां तुलां वृश्चिकञ्च धनुषं मकरं तथा।

कुम्भं मीनं न्यसेद् गात्रे ॐकाराद्यं नमोऽन्वितम्॥

अश्विनी भरणी चैव कृत्तिका रोहिणी तथा।

मृगशिरस्तथार्द्रा च पुनर्वसुरतः परम्।

पुष्याश्लेषा मघा चैव पूर्वफल्गुन्यतः परम्।

उत्तराफल्गुनी चैव हस्ता चित्रा ततः परा।

स्वाती विशाखानुराधा ज्येष्ठा मूला ततः परा।

p. 72) पूर्वाषाढा चोत्तरा च श्रवणाभिजितस्तथा।

धनिष्ठा शतभिषा चैव पूर्वभाद्रपदा तथा।

उत्तरभाद्रपदा चैव रेवत्यन्ताः समीरिताः।

मूर्ध्नि भ्रुयुगले चाक्ष्णोः कर्णयोर्नसि गण्डयोः।

ओष्ठयोर्दन्तपंक्तौ च जिह्वायां ग्रीवमूलके।

स्तनद्वन्द्वे तथा वक्षःपार्श्वयोर्नाभिदेशके।

नितम्बे च तथा पृष्ठे गुह्ये च पादयोः पुनः।

पादमेकं द्विनक्षत्रं राशीनां परिणामकृत्।

शरीरे राशिनक्षत्रकथनप्रयोजनन्तु प्रश्नकाले प्रष्टा यदङ्गे हस्तं दत्त्वा पृच्छति तदङ्गे यो राशिः पतितः तेन वर्णादिकं ज्ञातव्यम् इत्याभिप्रायः॥

श्रीविद्याया राशिन्यासो नक्षत्रन्यासश्चानेनैवोक्त इति॥

शाक्तानन्दतरङ्गिणीघृतज्ञानभाष्ये।

शुक्रादुत्पद्यते रक्तं रक्ताद्बिन्दुसमुद्भवः।

प्राणतो वायुरुत्पन्नः कालाग्निः स्यादपानतः।

शुक्रतो नाभिरुत्पन्ना शुक्रादग्निसमुद्भवः।

अपानात् कालाग्निर्जातो नाभिस्थानस्थो वडवाग्निरूपो य आहारं पचति
शुक्रसम्भूता वायुपित्तकफधातुस्था दशाग्नय इति भेदेन वह्न्युत्पत्तिर्द्विरुक्ता।

मांसतश्च मलोत्पत्तिर्मज्जा चापि ततो भवेत्।

शुक्रेणोत्पादिता जिह्वा नासिका सप्त देहिनाम्।

रक्तादुत्पद्यते नेत्रं वामञ्चैव तु दक्षिणम्।

प्राणादुत्पद्यते शून्यं घ्राणरन्ध्रद्वयं तथा॥

तत्त्वसारे षष्ठपटले॥

ईश्वर उवाच।

चन्द्रः सूर्यस्तथा वह्निः शरीरे दश नाडिकाः।

देहस्था वायवः पञ्च मनो बिन्दुस्तथैव च।

षट्चक्रं मेरुदण्डञ्च उड्डीयानं तथैव च।

जालन्धरः कामरूपः पूर्णग्रीवः श्रीहट्टकः॥

निर्वाणतन्त्रे प्रथमपटले॥

जान्तोराकारं ब्रह्माण्डं नानावर्ष्म च पार्वति ।

ब्रह्माण्डं विग्रहं प्रोक्तं स्थूलसूक्ष्मादिकं हि तत्।

मेरुपर्वतो मध्ये च देवि सप्त कुलाचलाः।

मूलादिमस्तकान्तं हि सुमेरुर्नाम पर्वतः।

स्थितो मेरोरधोभागे व्यङ्गुलश्चोर्द्धदेशतः।

भूर्लोकादि महेशानि सप्तसर्गं क्रमेण हि।

व्यङ्गुलं सप्त पातालास्तिष्ठन्ति परमेश्वरीति।

p. 73) तत्त्वसारे॥

प्रकृतिः पुरुषो देहे ब्रह्मा विष्णुः शिवस्तथा।

नदाश्चैव समुद्राश्च भुवनानि चतुर्दश।

ब्रह्माण्डे ये गुणाः सन्ति ते तिष्ठन्ति कलेवरे।

तेषां सङ्क्षेपतः सर्वं प्रवक्ष्यामि शुचिस्मिते ।

मेरुपृष्ठे स्थितश्चन्द्रो द्विरष्टकलयान्वितः।

अहर्निशं तुषाराभां धारां वर्षत्यधोमुखः।

सुधांशुर्विविधस्त्रावी पीयूषबिन्दुरेव च।

बिन्दुरत्नस्य मध्येन देहसिद्धिः प्रजायते।

जवाकुसुमसङ्काशो वस्तिदेशे सुशोभने ।

शङ्खिनीमूलं संव्याप्य सूर्यस्तिष्ठति देहिनाम्।

द्वादशकलया सूर्यो वह्निर्दशकलात्मकः।

सर्वेषां देहिनां देहे सदा अन्नादिपाचकः।

तुषारं वर्षते चन्द्रो रविः शुष्यति सर्वदा।

संयोगेन स्थितः प्राणो वियोगे मरणं भवेत्।

ऊर्द्ध्वं त्ववयवे रश्मिरधश्चन्द्रामृतं सदा।

अभ्यासं कामरूपस्य योगं योगविदो विदुः।

संयोगी च भवेद्योगी प्राणापानैकयोगतः।

प्राणश्चन्द्रमयः प्रोक्तोऽपानः सूर्यमयस्तथा।

अनयोः सङ्गमो मध्ये रजो रोगस्य साधनम्।

उड्डीयानं दृढं बद्धा कुर्याद्रेचकपूरकौ।

समानोदानयोर्योगः प्राणापानैकयोगतः।

कामरूपे त्रिभिर्योगं प्राणापानसमानकैः॥

नाभिशक्तिद्वयोर्मध्ये उड्डीयानः स उच्यते।

वस्तौ जालन्धरो ज्ञेयः कामरूपस्य गर्भके।

पूर्णग्रीवो भ्रुवोर्मध्ये श्रीहट्टस्तालूकोपरि॥

तथा।

नाभिमध्ये स्थितो ब्रह्मा हृदि मध्ये च केशवः।

शङ्करः शिरसि ज्ञेयस्त्रिस्थानं मुक्तिदायकम्॥

इति शरीरे तीर्थादिकथनम्॥

शाक्तानन्दतरङ्गिण्याम्॥

एतस्मिन्नन्तरे देवि विश्वेषां गर्भसङ्कटे।

नवमे दशमे मासि प्रबलैः सूतिमारुतैः।

निःसार्यते वाण इव जन्तुश्छिद्रेण सज्वरः।

पीडार्दितः इत्यर्थः।

पातितोऽपि न जानाति मूर्च्छितोऽपि ततश्चपतिम्।

सूतिवातस्य वेगेन योनिरन्धस्य पीडनात्।

विस्मृतं सकलं ज्ञानं गर्भे यच्चिन्तितं हृदि॥

तत्र पापिनां जन्मसमये पीडाधिक्यं तदुक्तम् प्रपञ्चसारे द्वितीयपटले॥

p. 74) अथ पापकृतां शरीरभाजामुदरान्निष्क्रमितुं महान् प्रयासः।

नलिनोद्भवधीर्विचित्रवृत्ता नितरां कर्मगतिस्तु मानुषाणाम्।

नलिनोद्भवस्य ब्रह्मणः।

जायतेऽधिकसद्विग्नो जृम्भतेऽङ्गैः प्रकम्पितैः।

यात्युल्वणं निश्वसिति भीत्या रोदितुमिच्छति।

मूलाधारात् प्रथममुदितो यस्तु तारः पराख्यः पश्चात् पश्यत्यथ हृदयगो बुद्धियुङ्मध्यमाख्यम्।

वक्त्रे वैखर्यथ रुरुदिषोर्यस्य जन्तोः सुषुम्नाबद्धस्तस्माद्भवति पवनप्रेरितो वर्णसङ्घः।

जन्मानन्तरबालकरोदनस्याप्यव्यक्तवर्णात्मकत्वात् वर्णोत्पत्तिप्रकारं वदन्
कुण्डलिनीतः सामान्यतः सववर्णानामुत्पत्तिं दर्शितवान्।

श्रोतोमार्गस्याविभक्तत्वहेतोस्तत्रार्णानां जायते न प्रकाशः।

तावद् यावत्कण्ठमूर्द्धादिभेदो वर्णव्यक्तिस्थानसंस्था यतोऽतः।

जातोऽस्मीति यदा भावो मनोऽहङ्कारबुद्धिमान्।

जातश्चित्पूर्वको जन्तोः स्वभावः क्रमवर्द्धितः।

बध्नाति मातापित्रोस्तु ततो बन्धुषु च क्रमात्।

स पीत्वा बहुशं स्तन्यं मातरं स्तनपायिनीम्।

न रोदिति च तांवीक्ष्य तत्र स्यादितरेतरम्॥

शाक्तानन्दतरङ्गिण्यां॥

पञ्चैतान्यपि सृज्यन्ते गर्भस्थस्यैव देहिनः।

आयुः कर्म च वित्तञ्च विद्या निधनमेव च।

बालकश्च शिशुश्चैव गण्डः कैशोरकस्तथा।

अतः परन्तु युवकः प्रौढश्चैव ततः परम्।

अतिप्रौढस्तथा वृद्धस्त्वतिवृद्धस्ततः परम्।

पलितं मरणञ्चैव अवस्थाः परिकीर्त्तिताः॥

इत्येकादशावस्थाकथनम्॥

मरणानन्तरमपि तत्रैव॥

ततः स नरके याति स्वर्गे वा स्वेन कर्मणा।

देवत्वमथ मानुष्यं पशुत्वं पक्षितां तथा।

कृमित्वं स्थावरत्वञ्च जायते जन्मकर्मभिः॥

तथा।

कर्मणा जायते जन्तुः कर्मणैव प्रलीयते।

देहे विनष्टे तत्कर्म पुनर्देहं प्रपद्यते।

यथा धेनुसहस्रेषु वत्सो विन्दति मातरम्।

तथा शुभाशुभं कर्म कर्तारमनुगच्छति।

नन्वाशु विनाशिनः कथं कर्मणोऽमुत्र भोग इति सन्देहस्य निरसनाय सदृष्टान्तमुक्तम् कुलार्णवे पञ्चमखण्डे प्रथमोल्लासे॥

p. 75) इह यत् क्रियते कर्म तत्परत्रोपभुज्यते।

सिक्तमूलस्य वृक्षस्य फलं शाखासु दृश्यते इति॥

इति श्रीप्राणतोषिण्यां प्रथमकाण्डे मनुष्यजन्मकथनं नाम पञ्चमः परिच्छेदः।

प्रस्तुतं वर्णोत्पत्तिप्रकारं क्रमेण दर्शयति प्रपञ्चसारे॥

अवैशद्यान्मुखश्रोतोमार्गस्याविशदाक्षरम्।

अप्यव्यक्तं प्रलपति यदा सा कुण्डली तदा।

मूलाधारे विष्वनति सुषुम्नां वेष्टते मुहुः।

मुखश्रोत्रमार्गस्यावैषम्यादनैर्मूल्याद्धेतोर्यदा सा कुण्डली अविशदाक्षरमविस्पष्टमक्षरं यत्राव्यक्ते ध्वनाविति शेषस्तं प्रलपति अर्थात् कलभाषणादिकं करोति तदा मूलाधारे विष्वनति शब्दायते सुषुम्नाञ्च मुहुर्वेष्टते इत्यन्वयः।

कुण्डलीस्वरूपमुक्तम् शारदातिलके॥

ततश्चैतन्यरूपा सा सर्वगा विश्वरूपिणी।

शिवसन्निधिमागत्य नित्यानन्दगुणोदया॥

तिष्ठतीति परेणान्वयः।

शिवसन्निधीत्यनेन शक्तिशब्दवाच्येयमित्यायातम् अतः स्त्रीलिङ्गेन विशेषणानि।

यद्यपि शिवशक्त्योरेकात्मकत्वेनाभेदस्तथापि काल्पनिकं भेदमुरीकृत्य शिवसन्निधीत्युक्तम्॥

तदुक्तमभिनवगुप्तपादाचार्यैः॥

शक्तिश्च शक्तिमद्रूपाद्व्यक्तिरूपेण वाञ्छति।

तादात्म्यमनयोर्नित्यं वह्निदाहिकयोरिव।

गुणा नामुदयो यस्यां नित्यानन्दा चासौ गुणोदया चेति सा।

दिक्कालाद्यनवच्छिन्ना सर्वा सर्वार्थगा शुभा।

परापरविभागेन परा शक्तिरियं मता।

काचन परशक्तिः काचनापरशक्तिस्तद्विभागेनापीयं परशक्तिरेव॥

तदुक्तं भगवद्गीतायाम्।

भूमिरापोऽनलो वायुः खं मनो बुद्धिरेव च।

अहङ्कार इतीयं मे भिन्ना प्रकृतिरष्टधा।

अपरेयमिति त्वन्यां प्रकृतिं विद्धि मे पराम्।

जीवभूतां महावाहो ययेदं धार्यते जगत्॥

शारदायम्॥

p. 76) योगिनां हृदयाम्भोजे नृत्यन्ती नृत्यमञ्जसा॥

अञ्जसा तत्त्वेनेत्यर्थः॥

आधारे सर्वभूतानां स्फुरन्ती विद्युदाकृतिः।

आधारे मूलाधारे भूतानां जन्तूनाम्॥

शङ्खावर्तक्रमाद्देवी सर्वमावृत्य तिष्ठति।

शङ्खमध्ये य आवर्त्तः स यथा शङ्खमावृत्य तिष्ठति तद्वदियमपि सर्वं शिवमावृत्य तिष्ठतीत्यर्थः।

कुण्डलीभूतसर्पाणामङ्गश्रियमुपेयुषी।

सर्ववेदमयी देवी सर्वमन्त्रमयी शिवा।

सर्वतत्त्वमयी साक्षात् सूक्ष्मात् सूक्ष्मतरा विभुः।

विभुः इयत्तया ज्ञातुमशक्या।

त्रिधामजननी देवी शब्दब्रह्मस्वरूपिणी।

त्रिधामेति चन्द्रसूर्याग्निरूपा।

द्विचत्वारिंशद्वर्णात्मा पञ्चाशद्वर्णरूपिणी॥

द्विचत्वारिंशदिति भूतलिपिमन्त्रमयी।

पञ्चाशदिति मातृकामयीत्यर्थः।

गुणिता सर्वगात्रेण कुण्डली परदेवता विश्वात्मना प्रबुद्धा सा सूते मन्त्रमयं जगत्।

सर्वगात्रेण सर्ववर्णेन गुणिता परस्परमिलिता सती मन्त्रमयं जगत् सूते प्रकाशयतीत्यन्वयः॥

मूलाधारे सर्पवत् कुण्डलीभूता नाडी वर्तते तन्मध्यस्थायित्वादियं कुण्डली।

एकधा गुणिता शक्तिः सर्वविश्वप्रवर्तिनी।

सर्वविश्वेत्युभयोपादानात् शब्दार्थरूपोभयोत्पादिकेति सूचितम्॥

वेदादिबीजं श्रीबीजं शक्तिबीजं मनोभवम्॥

प्रासादं तुम्बुरुं पिण्डं चिन्तारत्नं गणेश्वरम्।

मार्तण्डभैरवं दौर्गं नारसिंहं वराहजम्।

वासुदेवं हयग्रीवं बीजं श्रीपुरुषोत्तमम्।

अन्यान्यपि च वीजानि तदोत्पादयति ध्रुवम्।

यदा भवति सा संविद्द्विगुणीकृतविग्रहा।

संहवर्णौ परात्मानौ शब्दार्थौ वासरक्षपे।

सृजत्येषा परा देवी तदा प्रकृतिपुरुषौ।

यद्यदन्यज्जगत्यस्मिन् युगं तत्तदजायत।

त्रिगुणीकृतसर्वाङ्गी चिद्रूपा शिवगेहिनी।

प्रसूते त्रैपुरं मन्त्रं मन्त्रं शक्तिविनायकम्।

पाशाद्यं त्र्यक्षरं मन्त्रं त्रैपुटं चण्डनायकम्।

सौरं मृत्युञ्जयं शक्तिं शाम्भवं विनतासुतम्।

p. 77) वागीशी त्र्यक्षरं मन्त्रं नीलकण्ठं विषापहम्।

मन्त्रं त्रिगुणितं देव्या लोकत्रयगुणत्रयम्।

धामत्रयं सा वेदानां त्रयं वर्णत्रयं शुभा।

त्रिपुष्करं स्वरान् देवी ब्रह्मादीनां त्रयं त्रयम्॥

त्रिपुष्करमिति ज्येष्ठमध्यमकनिष्ठत्वेन तीर्थत्रयम्।

स्वरानिति उदात्तानुदात्तसमाहारान्॥

वह्नेः कालत्रयं शक्तेस्त्रयं वृत्तित्रयं महत्।

नाडीत्रयं त्रिवर्गं सा यद्यदन्यत्त्रिधा मतम्॥

प्रपञ्चसारे द्वितीयपटलेऽपि॥

द्विचतुःपञ्चषड्सप्त चाष्टौ च दश एव च।

तथा द्वादशपञ्चाशद्भेदेन गुणयेत् क्रमात्।

यदा यदा त्रिगुणयेत्तदा त्रिगुणता विभुः।

शक्तिः कालाग्निनादात्मा गूढमूर्तिः प्रतीयते।

तदा तां तारमित्याहुर्व्योमात्मेति बहुश्रुताः।

तामेव शक्तिं ब्रुवते हरेत्यात्मिति चापरे।

त्रिगुणा सा त्रिदोषा सा त्रिवर्णा सा त्रयी स चा।

त्रिलोका सा त्रिमूर्तिः सा त्रिरेखा सा विशिष्यते।

एतेषां तारणात्तारः शक्तिस्तद्भूतशक्तितः।

यदा चतुर्धा गुणिता सूक्ष्मादिस्थानचारिका।

वाचिका जाग्रदादीनां करणानाञ्च सा तदा।

सा यदा पञ्चगुणिता पञ्चपञ्चविभेदिनी।

पञ्चानामक्षराणाञ्च वर्णानां मरुतां तथा।

मरुतां प्राणादीनां॥

गुणिता सा यदा षोढा कोषोर्मिरसभेदिनी।

तदा षड्गुणिताख्यस्य चन्द्रस्य च विभेदिनी।

यदा सा सप्तगुणिता तारहृल्लेखयोस्तथा।

भेदैरहाद्यैः शान्तान्तैर्विद्यते सप्तभिः पृथक्।

अकारश्चाप्युकारश्च मकारो बिन्दुरेव च।

नादः शक्तिश्च शान्तिश्च तारभेदाः समीरिताः।

हकारो रेफमाये च बिन्दुनादौ तथैव च।

शक्तिशान्तौ च सा प्रोक्ताः शक्तेर्भेदाश्च।

अङ्गेभ्योऽस्यान्तु सप्तभ्यः सप्तधा भिद्यते जगत्।

लोकाद्रिद्वीपपातालसिन्धुग्रहमुनीश्वरैः।

धात्वादिभिस्तथान्यैश्च सप्तसंख्याप्रभेदकैः।

यदाष्टधा सा गुणिता तदा प्रकृतिभेदिनी।

p. 78) दशधा गुणिता नाडी मर्मांशादिविभेदिनी।

द्वादशादिक्यापि यदा तदा राश्यर्कमूर्तियुक्।

मन्त्रश्च द्वादशार्णाख्यमभिधत्ते स्वरानपि।

तत्संख्यश्च तदा मन्त्रं शक्तिस्तद्गुणितात्मकम्।

पञ्चाशद्धाप्रगुणिता पञ्चाशद्वर्णभेदिनी।

पञ्चाशदंशगुणिताथ यदा भवेत् सा देवी तदात्मविनिवेशितदिव्यभावा।

सौषुम्नवर्त्मशुषिरोदितनादसङ्गात् पञ्चाशदीरयति पंक्तिश एव वर्णान्।

सुषुम्नापथरन्ध्रोद्गतध्वनेः सङ्गात् सा शक्तिः पञ्चाशतं वर्णान्
प्रेरयतीत्यर्थः॥

शारदायाम्॥

चतुःप्रकारगुणिता शाम्भवी शर्मदायिनी।

तदानीं पद्मिनीबन्धोः करोति चतुरक्षरम्।

चतुष्टयं गणेशानामात्मादीनां चतुष्टयम्।

ओजापूजादिकं पीठं धर्मादीनां चतुष्टयम्।

दलकादीन् गजान् देवि यद्यदन्यच्चतुष्टयम्।

पञ्चधा गुणिता पत्नी शम्भोः सर्वार्थदायिनी।

त्रिपुरा पञ्चकूटं सा तस्याः पञ्चाक्षरद्वयम्।

पञ्चरत्नं महादेव्या सर्वकामफलप्रदम्।

पञ्चाक्षरं महेशस्य पञ्चवर्णं गरुत्मतः।

सम्मोहनान् पञ्च वाणान् कामान् पञ्च सुरद्रुमान्।

पञ्च प्राणादिकान् वायून् पञ्च वर्णान् महेशितुः।

मूर्तिः पञ्चकलाः पञ्च पञ्च ब्रह्म ऋचः क्रमात्।

सृजत्येषा परा शक्तिर्वेदवेदार्थरूपिणी।

षोढा सा गुणिता देवी धत्ते मन्त्रं षडक्षरम्।

षट्कूटं त्रिपुरामन्त्रं गाणपत्यं षडक्षरम्।

षडक्षरं हिमरुचेर्नारसिंहं षडक्षरम्।

ऋतून् वसन्तमुख्यान् षडामोदादीन् गुणाधिपान्।

कोषानूर्मांत्रसान् शक्तीर्डाकिन्याद्याः षडध्वनः।

यन्त्रं षड्गुणितं शक्तेः षडाधारन्जीजनत्।

षड्विधं यज्जगत्यस्मिन् सर्वं तत् परमेश्वरी।

सप्तधा गुणिता नित्या शङ्करार्द्धशरीरिणी।

सप्तार्णं त्रिपुरामन्त्रं सप्तवर्णं विनायकम्।

सप्तकं व्याहृतीनां सा सप्तवर्णं सुदर्शनम्।

लोकान् गिरीन् सुरान् धातून् मुनीन् सप्त ग्रहान् द्विपान्।

p. 79) समिधः सप्त संख्याताः सप्त जिह्वा हविर्भुजः।

अन्यं सप्तविधं यद् यद् तत्तदस्यामजायत।

अष्टधा गुणिता शक्तिः शैवमष्टाक्षरद्वयम्।

अष्टाक्षरं हरेः शक्तेरष्टा क्षरद्वयं परम्।

भानोरष्टाक्षरं दौर्गमष्टार्णं परमात्मनः।

अष्टार्णं नीलकण्ठस्य वासुदेवात्मकं मनुम्।

यन्त्रं कामार्गलं दिव्यं देवीयन्त्रं घटार्गलम्।

गन्धाष्टकं शुभं देवीदेवानां हृदयङ्गम्।

ब्राह्म्याद्या भैरवान् सर्वान् मूर्त्तीराशा वसूनपि।

अष्टपीठं महादेव्या अष्टाष्टकसमन्वितम्।

चाष्टौ सा प्रकृतिर्विघ्नवक्रतुण्डादिकान् क्रमात्।

अणिमादिगुणानागान् वह्नेर्मूर्त्तीर्यमादिकान्।

अष्टात्मकं जगत्यन्यं सर्वं वितनुते तदा।

नवधा गुणिता नित्या सूते मन्त्रं तदात्मकम्।

नवकं शक्तितत्त्वानां तत्त्वरूपा महेश्वरी।

नवकं पीठशक्तीनां शृङ्गारादीन् रसान्नव।

माणिक्यादीनि रत्नानि नव वर्गयुतानि च।

नवकं प्राणदूतीनां मण्डलं नवकं शुभम्।

यद् यन्नवात्मकं लोके सर्वमस्यामुदञ्चति।

दशधा विकृता शम्भोर्भाविनी भवदुःखहा।

दशाक्षरी गणपतेस्त्वरिताया दशाक्षरम्।

त्रिपुरा दशकूटं सा त्रिपुराया दशाक्षरम्।

दशाक्षरं सरस्वत्या यक्षिण्याः सा दशाक्षरम्।

वासुदेवात्मकं मन्त्रमश्वारूढादशाक्षरम्।

नाम्ना पद्मावतीमन्त्रं वायुमन्त्रं दशाक्षरम्।

दशकं शक्तितत्त्वानां तत्त्वरूपा महेश्वरी।

नारीणां दशकं विष्णोरवतारान् दश क्रमात्।

दशकं लोकपालानां यद् यदन्यत् सृजत्यसौ।

एकादश क्रमात् संविद्गुणिता सा जगन्मयी।

रुद्रैकादशिनीमाद्यशक्तेरेकादशाक्षरम्।

एकादशाक्ऽरं वाण्या रुद्रानेकादश क्रमात्।

समुद्गिरति सर्वज्ञा गुणिता द्वादश क्रमात्।

नित्यामन्त्रं महेशाद्या वासुदेवात्मकं मनुम्।

राशीन् भानून् हरेर्मूर्तीर्यन्त्रं सद्वादशात्मकम्।

अन्यदेतादृशं सर्वं यत्तदस्यामजायत॥

p. 80) राघवभट्टधृतपदार्थादर्शे।

त्रयोदशधा गुणिता वागीश्वर्यश्वारूढामन्त्रं विश्वेदेवादिकञ्च।

चतुर्दशा गुणिता वासुदेवगोपालमन्त्रभुवनादिकम्।

पञ्चदशधा गुणिता नित्या शूलिनो मन्त्रतिथ्यादिकम्।

षोढशधा गुणिता चक्रमन्त्रस्वरकलादिकम्।

स्वरेति अकारादिविसर्गान्तम्।

सप्तदशधा गुणिता लघु पञ्चमी ताराविद्यामन्त्रादिकम्।

ऊनविंशतिधा कृष्णधरामन्त्रादिकम्।

विंशतिधा गुणिता रत्नधारोमामहेश्वरमन्त्रादिकम्।

एकविंशतिधा गुणिता बहुकनाममन्त्रयन्त्रादिकम्।

द्वाविंशतिधा गुणिता कृष्णान्नाधिपतिसुमुखीमन्त्रादिकम्।

त्रयोविंशतिधा गुणिता लघुश्यामापुरुषोत्तमहृदयङ्गममन्त्रादिकं सूते इति॥

शारदायाम्॥

चतुर्विंशतितत्त्वात्मा तदा भवति शोभना।

गायत्री सवितुः शम्भोर्गायत्री नदनात्मिका।

गायत्री विष्णुगायत्री गायत्री त्रिपुरात्मनः।

गायत्री दक्षिणामूर्तेर्गायत्री शम्भुयोषितः।

चतुर्विंशतितत्त्वानि तस्यामासन् परात्मनि।

तत्राप्यन्यदिति ज्ञेयम्॥

द्वात्रिंशद्भेदगुणिता सर्वमन्त्रमयी विभुः।

सूते मृत्युञ्जयं मन्त्रं नारसिंहं महामनुम्।

लवणाद्यं महामन्त्रं वरुणस्य महात्मनः।

हयग्रीवमनुं दौर्गं वाराहं वह्निनायकम्।

गणेशितुर्महामन्त्रं मन्त्रं सेनाधिपस्य सा।

मन्त्रं श्रीदक्षिणामूर्तेर्मालामन्त्रं मनोभुवः।

त्रिष्टुभं वनवासिन्या अघोराख्यं महामनुम्।

मन्त्रं सा देवकीसूनोर्मन्त्रं श्रीपुरुषोत्तमम्।

श्रीगोपालमनुं भूर्ममनुं तारामनुं क्रमात्।

महामन्त्रं महालक्ष्म्या मन्त्रं भूतेश्वरस्य सा।

क्षेत्रपालात्मकं मन्त्रं मन्त्रमापन्निवारकम्।

सूते मातङ्गिनीं विद्यां सिद्धिविद्यां शुभोद्याम्।

अनेन क्रमयोगेन गुणिता शिववल्लभा।

षड्विंशत्पञ्चतत्त्वानि शैवानि रचयत्यसौ।

अन्यान्मन्त्रांश्च यन्त्राणि शुभदानि प्रसूयते।

p. 81) अत्र प्रकरणे सूते अजीजनदित्यादि यदुक्तं तत् प्रकाशकत्वाभिप्रायेण प्रतीत्यभिप्रायेण वा।

अन्यथा सर्ववेदमयीत्यादि प्रागुक्तमनुपपन्नं स्यात्।

सर्वेषां मातृकारूपकुण्डल्यवयवात्मकत्वेन जन्मादि विरुद्धमिति सुधीभिः सुनिपुणेन मानसेन विवेचनीयम्।

अक्षरोत्पत्तिक्रममाहुः शारदायामाचार्याः॥

द्विचत्वारिंशता मूले गुणिता विश्वनायिकाः।

सा प्रसूते कुण्डलिनी शब्दब्रह्ममयी विभुः।

शक्तिं ततो ध्वनिस्तस्मान्नादस्तस्मान्निबोधिका।

ततोऽर्द्धेन्दुस्ततो बिन्दुस्तस्मादासीत् परा ततः॥

मूले मूलाधारे द्विचत्वारिंशता गुणिता विश्वनायिका कुण्डलिनी अनेन क्रमेण अकारादिसकारान्तां द्विचत्वारिंशदात्मिकां भूतलिपिमन्त्रात्मिकां वर्णमालिकां सूते इत्यन्वयः।

क्रममाह शक्तिमिति।

सा कुण्डलिनी शक्तिं सूते ततः शक्तेर्ध्वनिरासीदिति योजना।

ततो ध्वनेरित्यादि ज्ञेयम्।

अयञ्च क्रमः सर्वाक्षरोत्पत्तौ सैव सत्त्वप्रविष्टा रजोऽनुविद्धा सती ध्वनिशब्दवाच्या अक्षरावस्था सैव तमोऽनुविद्धा नादशब्दवाच्या अव्यक्तावस्था सैव तमःप्राचुर्यान्निबोधिकिकाशब्दवाच्या सैव तत्त्वभयप्राचुर्यादर्द्धेन्दुशब्दवाच्या उक्तञ्च पदार्थादर्शे।

इच्छाशक्तिबलोद्धुष्टो ज्ञानशक्तिप्रदीपकः।

पुंरूपिणी च सा शक्तिः क्रियाख्या सृजति प्रभुः।

असावेव बिन्दुः स्थानान्तरगतः पराद्याख्यो भवति।

पश्यन्ती मध्यमा वाची वैखरी शब्दजन्मभूः॥

तत्र परा मूले पश्यन्ती स्वाधिष्ठाने मध्यमा हृदये वैखरी मुखे।

तदुक्तं पदार्थादर्शे॥

सुक्ष्मा कुण्डलिनी मध्ये ज्योतिर्मात्रास्वरूपिणी।

अश्रोत्रविषया तस्मादुद्गच्छत्यूर्द्धगामिनी।

स्वयंप्रकाशा पश्यन्ती सुषुम्नामाश्रिता भवेत्।

सैव हृत्पङ्कजं प्राप्य मध्यमा नादरूपिणी।

p. 82) ततः सङ्कल्पमात्रा स्यादविभक्तोर्द्धगामिनी।

सैवोरः कण्ठतालूस्था शिराघ्राणवदस्थिता।

जिह्वामूलोष्ठनिर्धूतसर्ववर्णपरिग्रहा।

शब्दप्रपञ्चजननी श्रोत्रग्राह्या तु वैखरी।

इच्छाज्ञानक्रियात्मासौ तेजोरूपा गुणात्मिका।

क्रमेणानेन सृजति कुण्डली वर्णमालिकाम्।

अकारादिसकारान्तां द्विचत्वारिंशदात्मिकाम्।

पञ्चाशद्वारगुणिता पञ्चाशद्वर्णमालिकाम्।

सूते तद्वर्णतो भिन्नाः कला रुद्रादिकान् क्रमात्।

कला रुद्राश्च पूर्वोक्ताः।

आदिशब्देन पञ्चाशत्कामाः कामशक्तयो गणेशास्तच्छक्तयः क्षेत्रपालाश्चोक्ताः
।

कामनामानि राघवभट्टधृतानि यथा॥

कामकामदकान्ताश्च कान्तिमान् कामगस्तथा।

कामचारश्च कामी च कामुकः कामवर्द्धनः।

रामो रमश्च रमणो रतिनाथो रतिप्रियः।

रात्रिनाथो रमाकान्तो रममाणो निशाचरः।

नन्दको नन्दनश्चैव नन्दी नन्दयिता पुनः।

पञ्चवाणो रतिसखः पुष्पधन्वा महाधनुः।

भ्रामणो भ्रमणश्चैव भ्रममाणो भ्रमोऽपरः।

भ्रान्तश्च भ्रामको भृङ्गी भ्रान्ताचारो भ्रमावहः।

मोहनो मोहको मोहो मोहवर्द्धन एव च।

मदनी मन्मथश्चैव मातङ्गी भृङ्गनायकः।

गायनी गीतिजश्चैव नर्तकः खेलकस्तथा।

उन्मत्तो मत्तकश्चैव विलासो लोभवर्द्धनः।

दाडीमीकुसुमाभश्च वामार्द्धे शक्तिसंयुतः।

सौम्या रक्ताम्बराः सर्वे पुष्पवाणाक्षकार्मुके।

विभ्राणाः सर्वभूषाढ्याः कामाः पञ्चाशदीरिताः॥

तच्छक्तिनामानि च तत्रैव॥

रतिः प्रीतिः कामिनी च मोहिनी कमलप्रिया।

विलासिनी कल्पलता श्यामला च शुचिस्मिता।

विस्मिताक्षी विशालाक्षी लेलिहाना दिगम्बरी।

वामा कुब्जाधरा नित्या कल्याणी मोहिनी तथा।

मदना च सुरश्रेष्ठा लापिनी मर्दिनी तथा।

कलहप्रिया तथैवकाक्षी सुमुखी नलिनी ततः।

जयिनी पालिनी चैव शिवा मुग्धा सविभ्रमा।

p. 83) चारुनेत्रा सुलोला च दीर्घजिह्वा रतिप्रिया।

लोलाक्षी शृङ्गिणी चैव पावना मादना तथा।

माला च हंसिनी विश्वतोमुखी नन्दिनी तथा।

रमणी च तथा कान्तिः कलकण्ठी वृकोदरी।

मेघश्यामा रुषोन्मत्ता एकपञ्चादशीरिताः।

शक्तयः कुङ्कुमनिभाः सर्वाभरणभूषिताः।

नीलोत्परकरा ध्येयास्त्रैलोक्याकर्षणक्षमा इति॥

पञ्चाशद्गणेशास्तच्छक्तयश्च तत्रैव।

विघ्नेशो विघ्नराजश्च विनायकशिवोत्तमौ।

विघ्नहृद्विघ्नकर्ता च गणैकद्विसुदन्तकाः।

॥ श्रीः ॥

ईशानशिवगुरुदेवपद्धतिः ।

श्रीमदीशानशिवगुरुदेवमिश्रविरचिता ।

(तुरीयो योगपादः)

अथ प्रथमः पटलः ।

अथ मोक्षस्तु संसिध्येत् सम्यग् ज्ञानेन देहिनः ।
ज्ञानं जायेत वैराग्याद् वैराग्यं च स्वभावतः ॥ १ ॥
स्वभावो नाम संसारस्वरूपस्य निरूपणम् ।
संसारस्त्वात्मबुद्धिः स्याद् देहे स्वत्वेन वस्तुषु ॥ २ ॥
देहोऽपि द्विविधो ज्ञेयः स्थूलसूक्ष्मप्रभेदतः ।
पृथिव्यादीनि भूतानि श्रोत्राद्याधारकान्यपि ॥ ३ ॥
वागादिकर्मेन्द्रियाणि वातपित्तकफास्तथा ।
त्वगसृङ्मांसमेदोऽस्थिमज्जाशुक्लैश्च नाडिभिः ॥ ४ ॥
मूलाधारे कुण्डलिन्यां नाभिहृत्कण्ठमूर्धसु ।
चतुष्षडष्टजगतीविकाराक्षिच्छदाम्बुजैः ॥ ५ ॥
युक्तं स्थूलशरीरं स्यात् सूक्ष्मं पुर्यष्टकात्मकम् ।
तत्तच्छब्दादयः पञ्च मनो बुद्धिरहङ्कृतिः ॥ ६ ॥
देहद्वयं तु साध्यात्मं साधिभूताधिदैवतम् ।

तद्यथा —

श्रोत्रादयश्च वागाद्यास्तथाध्यात्मानि वै पृथक् ॥ ७ ॥
शब्दादिवक्तव्यादीनामधिभूतत्वमिष्यते ।
खवायुतेजांसि जलं पृथिवी च तथानलः ॥ ८ ॥
इन्द्रो विष्णुश्च मित्रश्च प्र (दे ? जे) शश्चाधिदैवतम् ।
अध्यात्मानि मनो बुद्धिरहंकारश्च तत्रयम् ॥ ९ ॥

मन्तव्यं चैव बोद्धव्यं मानश्चैवाधिभूतकम् ।
चन्द्रो जीवो विरिञ्चश्चाप्यधिदैवान्यनुक्रमात् ॥ १० ॥
गुणत्रयमयी या सा प्रकृतिः पुरुषस्तथा ।
रागो विद्यादितत्त्वानि मायान्तान्यखिलानि तु ॥ ११ ॥
मलं कर्म च माया च सर्वमस्य प्रवर्तकम् ।
जाग्रत् स्वप्नः सुषुप्तिश्चेत्यवस्थात्रितयं तथा ॥ १२ ॥
कामः क्रोधश्च लोभश्च मोहश्च मदमत्सरौ ।
षडूर्मय इमे व्याप्ये मोहाब्धौ व्यापकाः स्मृताः ॥ १३ ॥
एवम्भूतं शरीरं यदाममृत्कुम्भसन्निभम् ।
जन्मादिभिः षड्विकारैरध्यस्तमतिनश्वरम् ॥ १४ ॥
अस्वतन्त्रं कर्मवशात् प्रविशन् निर्विशन्नपि ।
प्रवसन्नपि संसारे भ्रमत्यात्मा ह्यलक्षितः ॥ १५ ॥
शरीराणि तथैतानि पञ्चधा मानसानि च ।
जरायुजान्यण्डजानि स्वेदजान्युद्भिदान्यपि ॥ १६ ॥
तत्र देवादिदेहाः स्युर्मानसाश्चाजरायुजाः ।
जरायुजा मनुष्याणां पशूनां च भवन्ति हि ॥ १७ ॥
सरीसृपाहिविहगशरीराण्यण्डजानि तु ।
जरायुजाश्चाण्डजाश्च देहाः स्युर्जलचारिणम् ॥ १८ ॥
स्वेदजाः क्रिमयः प्रोक्ताः स्थावराश्चोद्भिदा मताः ।
सर्वे स्वकर्मवशगा भवन्ति न भवन्ति च ॥ १९ ॥
मृतिजन्मजले घोरे सुखदुःखझषाकुले ।
शोकमोहादिकलिले त्वगाधे भवसागरे ॥ २० ॥
उन्मज्जन्तो निमज्जन्तः पुण्यपापैकबन्धनैः ।
निबद्धा देहिनः सर्वे स्वर्गभूनरकादिषु ॥ २१ ॥
मांसासृक्पूयविण्मूत्रस्नायुमज्जास्थिपञ्जरे ।
त्वचावृते शरीरेऽस्मिन् सौन्दर्यं स्मर्यते कुतः ॥ २२ ॥
अस्थिपञ्जरसारेऽस्मिन् मूत्रश्लेष्ममलाशये ।
मांसकेशनखस्नायुरुधिरत्वक्समावृते ॥ २३ ॥

देहे चेत् प्रीयते कश्चित् प्रीयते नरकेऽपि सः ।
यद्वाप्यज्ञानिभिर्देहे सुखबुद्ध्यात्र भण्यते ॥ २४ ॥

शब्दादीन्द्रियसौख्यान्यप्यन्वयव्यतिरेकतः ।
असाराणि यथागीतं मत्तोन्मत्तप्रलापवत् ॥ २५ ॥

वादयन्तश्च दृश्यन्ते यथोन्मत्ता विकुर्वते ।
स्पर्शसौख्यं तथोपाधेरुपाध्यन्तरसङ्गमात् ॥ २६ ॥

व्रणादेस्तु यथापूयमूत्रादेर्निर्गमात् सुखम् ।
पामकण्डूतिसौख्यं वा तत्तुल्यं सुरते सुखम् ॥ २७ ॥

चक्षुरिन्द्रियसौख्यं यन्नृत्तकान्तादिदर्शने ।
उन्मत्तचेष्टितान्नृत्तं न किञ्चिदपि हीयते ॥ २८ ॥

स्वक्षी सुनासा सुमुखी सुदतीत्यादिदर्शने ।
सौख्यं त्वगस्थिमांसादौ कतरत् स्यान्मनोहरम् ॥ २९ ॥

आस्वाद्येषु पदार्थेषु रसनेन्द्रियचापलात् ।
क्षुत्तृण्णिवृत्त्या सौहित्यं दुःखापायो न तत् सुखम् ॥ ३० ॥

निद्रादुःखं यदि लगेत् सौख्यं स्वापे सुखं यथा ।
तदात्मसुखभुद्दिष्टं करणानां तु संहृतौ ॥ ३१ ॥

घ्रेयेष्वपि सुगन्धेषु यत्नात् प्राप्येषु दृश्यते ।
अयत्नेन वनादौ च प्राप्तुं तच्छक्यते सुखम् ॥ ३२ ॥

गर्भवासे च जनने बाल्ये वास्य कुतः सुखम् ।
अस्वतन्त्रस्येव परैर्यन्त्रितस्येव पक्षिणः ॥ ३३ ॥

यौवनेऽनिष्टसंयोगादिष्टलाभे वियोगतः ।
रागाद्याक्रान्तचित्तस्य कुतः सौख्यं शरीरिणः ॥ ३४

वार्धक्येऽप्यसमर्थस्य विषयांस्तु बुभुत्सतः ।
प्रक्षीणेन्द्रियवृत्तेस्तु रोगरागाद्युपद्रवैः ॥ ३५ ॥

पीड्यमानस्य तत्सौख्यं कुतो वास्य मरिष्यतः ।
म्रियमाणस्य यद् दुःखे नरकेऽपि न तद् भवेत् ॥ ३६ ॥

ततः पापकृतां दुःखं यमलोकाय गच्छताम् ।
तद्दर्शनेन पततां पतितानां पतिष्यताम् ॥ ३७ ॥

नरकेषु प्रसिद्धं हि दुःखं तस्मान्न भण्यते ।
यदि पुण्यकृदेव स्यात् स्वर्गे देवादिदेहवान् ॥ ३८ ॥
विमानादिषु दिव्येषु भोगेष्वनन्तेष्वपि ।
दृष्ट्वा (पापा ? स्वल्पां) श्रियं दीप्तामन्येषामात्मनोऽधिकाम् ॥ ३९ ॥
सन्तप्त एष विषयान् भुङ्क्ते दुःखं धिया वहन् ।
ततोऽपि क्षीणपुण्यानां पतनाद्यवलोक्य तु ॥ ४० ॥
यादृशं हृदये दुःखं न तद् वर्णयितुं क्षमम् ।
अथ राज्यादिषु सुखं स्याच्चेत् सन्ध्यादिदुःखिनः ॥ ४१ ॥
पुत्रेभ्योऽपि भयं यस्य तस्य सौख्यं कुतो भवेत् ।

अत्र पराशरः —

"यावतः कुरुते जन्तुः संबन्धान् मनसः प्रियान् ।
तावन्तोऽस्य निखन्यन्ते हृदये शोकशङ्कवः ॥
यद् यद् गृहे तन्मनसि यत्रतत्रावतिष्ठतः ।
*नाशव्ययादिभीत्या क परिग्रहवतां सुखम् ॥"

इति ।

तथा चाहुः —

"यतो यतो निवर्तते ततस्ततः सुखी भवेत् ।
निवर्तनाद्धि सर्वतो न वेत्ति दुःखमण्वपि" ॥

इति ।

तथापि तृष्णया जन्तुः पीड्यमानो दिवानिशम् ।
अर्थाद्यार्जनवैतृष्ण्यं न कदाचिन्निगच्छति ॥

तथाचोक्तं —

"जीर्यन्ति जीर्यतः केशा दन्ता जीर्यन्ति जीर्यतः ।
चक्षुश्श्रोत्रे च जीर्येते तृष्णैका निरुपद्रवा ॥
यत् पृथिव्यां व्रीहियवं हिरण्यं पशवः स्त्रियः ।
नालमेकस्य तु यतस्तां तृष्णां दूरतस्त्यजेत् ॥"

---

* 'नाशदाहापहरणं तत् तस्यास्यैव तिष्ठति' इति विष्णुपुराणे पठ्यते ।

अतो न कर्मणा कार्यं प्रजया वा धनेन वा ।
त्यागेनैवामृतत्वं हि प्राप्तुं शक्यं मनीषिभिः ॥ ४२ ॥

तस्माद् धर्मार्थकामेभ्यो मोक्ष एव विशिष्यते ।
अस्थिरत्वात् त्रिवर्गाणां दुस्संपादतयापि च ॥ ४३ ॥

अलमलमतिविस्तरेण । प्रस्तुतमेवानुसन्धीयते ।

इत्थं विज्ञाय संसारमसारं तद्विरागतः ।
मोक्षमार्गः परो योगः साङ्गः साध्यो विपश्चिता ॥ ४४ ॥

स च सन्न्यसनात् सम्यग् योगः प्राप्यो न चान्यथा ।
सन्न्यासो मुण्डनान्न स्याद् दण्डादेर्ग्रहणादपि ॥ ४५ ॥

काषायावरणाद्यं च मुण्डनं दण्डधारणम् ।
यदन्यदप्येवमाद्यं देहस्योक्तं न देहिनः ॥ ४६ ॥

जडस्येह शरीरस्य घटकुड्यादिधर्मणः ।
वेषलक्षणमात्रेण देही मोक्षं कथं व्रजेत् ॥ ४७ ॥

अत एव शरीरस्य कर्तृत्वं नापि भोक्तृता ।
शरीरकर्मणां कर्ता संस्कार्यस्तत्फलार्थिभिः ॥ ४८ ॥

अत एव हि सन्न्यासस्त्यागः स्यात् काम्यकर्मणाम् ।
काम्यानां कर्मणां न्यासं सन्न्यासं कवयो विदुः ॥ ४९ ॥

लोकार्थपुत्रैषणाभ्यो निवृत्तो यः सदैव हि ।
स्ववर्णाश्रमयुक्तानां तथा स्वसमयस्य तु ॥ ५० ॥

विहितानां तु धर्माणां तत्फलेष्वनपेक्षया ।
ईश्वरार्पणबुद्ध्या तु करणं न्यास इष्यते ॥ ५१ ॥

तद्वान् यतिश्च सन्न्यासी न स्यात् केवलमुण्डितः ।
ज्ञेयः स नित्यसन्न्यासी यो न द्वेष्टि न काङ्क्षति ॥ ५२ ॥

ब्रह्मचारी गृहस्थो वा वानप्रस्थोऽथवा यतिः ।
चीरवासा जटी वापि द्विदण्डो वाथ मुण्डितः ॥ ५३ ॥

विवासाः शुक्लवासो वा काषायवसनोऽथवा ।
कर्मसन्न्यासनं कृत्वा साङ्ख्ययोगं समाश्रितः ॥ ५४ ॥

---

१. 'स' ख. पाठः.

शिवानुग्रहमासाद्य योगी मोक्षमवाप्नुयात् ।
विज्ञाय संसारमसारमेवं वैराग्यतोऽनुग्रहतश्च शम्भोः ।
संप्राप्य योगं तु गुरूपदेशाद् योगी विमुक्तिं न चिरादुपैति ॥ ५५ ॥

इति श्रीमदीशानशिवगुरुदेवपद्धतौ सिद्धान्तसारे
उपरिभागे योगपादे योगलक्षणं नाम
प्रथमः पटलः ॥

अथ द्वितीयः पटलः ।

अथ योगस्तु विज्ञेयो गुणैश्वर्यविमुक्तिदः ।
चित्तवृत्तिनिरोधं तु योगमाह पतञ्जलिः ॥ १ ॥
युजेर्धातोः समाधौ तु क्षेत्रज्ञपरमात्मनोः ।
युक्तिर्योगः समुद्दिष्टस्तथाचाह महामुनिः ॥ २ ॥
"मनो हि सर्वभूतानां कारणं बन्धमोक्षयोः ।
वृत्तिहीनं मनः कृत्वा स्वात्मानं परमात्मनि ॥
परमात्मा समायोज्य योगं कु + + + + ।
+ + + + विमुक्तैः स्यान्मुख्योऽयं योग इष्यते ॥"

इति ।

सम्यक् शिवगतं चित्तं यदा न चलति स्थिरम् ।
शिवत्वव्यक्तभावस्य कैवल्यं योग इष्यते ॥ ३ ॥
तच्च रागादिदोषाणां वर्जनेन प्रकाशते ।
ते च नश्यन्ति रागाद्या योगाङ्गानां निषेवणात् ॥ ४ ॥
योगाङ्गानि च तान्यष्टौ प्रवदन्ति हि तद्विदः ।

तद्यथा —

यमाश्च नियमास्तद्वदासनं प्राणसंयमाः ॥ ५ ॥
प्रत्याहारा धारणाश्च ध्यानानि च समाधयः ।
यमाः पञ्चप्रकाराः स्युर्नियमाश्चैव पञ्चधा ॥ ६ ॥
आसनानि च पञ्च स्युः प्राणायामास्तु नैकधा ।
प्रत्याहाराः पञ्चविधा धारणा बहुधा स्मृताः ॥ ७ ॥

---

१. 'नः' ।, २. 'रात्मना स', ३, 'क्तिः' क. पाठः.

ध्यानानि नैकधा त्वेकः समाधिरथवा त्रिधा ।
अहिंसा सत्यमस्तेयं ब्रह्मचर्यापरिग्रहौ ॥ ८ ॥
यमाः पञ्चविधास्तेषां पृथग्भेदा भवन्ति हि ।
मनोवाक्कर्मभिर्हिंसास्त्रिविधाः प्राणिनामिह ॥ ९ ॥
ताभ्यो निवृत्तिं सर्वत्र अहिंसां परिचक्षते ।
सत्यं यथार्थकथनं सर्वभूतहितं च यत् ॥ १० ॥
परपीडाकरं सत्यमेवं सत्यं विदुर्बुधाः ।
असत्यमपि भूतानां हितं चेत् सत्यमेव तत् ॥ ११ ॥
परपीडाकरं सत्यं यदा मौनं तदा भजेत् ।
अन्यैः परिगृहीतानां त्यक्तानां वाश्रमादिषु ॥ १२ ॥
निक्षिप्तानां तृणानां वा कर्मणा मनसा गिरा ।
परार्थानामनादानमस्तेयं परमं स्मृतम् ॥ १३ ॥
ब्रह्मचर्यमिति प्राहुरिन्द्रियाणां तु संयमम् ।
तत्राप्युपस्थविषयनिवृत्तिं तु विशेषतः ॥ १४ ॥

किन्तु,

दर्शनस्पर्शनापेक्षासङ्कल्पाभाषणादिभिः ।
योषित्संभोगवैमुख्यं ब्रह्मचर्यं परं विदुः ॥ १५ ॥
तत्रापि च गृहस्थानां स्वदारानव्यतिक्रमात् ।
ऋतुस्नाताभिगमनं ब्रह्मचर्यं परं स्मृतम् ॥ १६ ॥
अर्जनक्षयसंरक्षाहिंसादोषादिदर्शनात् ।
अस्वीकरणमर्थानां मुख्यः स्यादपरिग्रहः ॥ १७ ॥
भिक्षूणामयमुद्दिष्ट अन्येषामन्यथा स्मृतः ।
ब्रह्मचारी गृहस्थो वा वानप्रस्थोऽथवा मुनिः ॥ १८ ॥
सकुटुम्बस्तु यस्तस्य गुर्वादीनां तु पुष्टये ।
असत्प्रतिग्रहेभ्यस्तु निवृत्तिरपरिग्रहः ॥ १९ ॥

॥ एवं यमाः ॥

नियमाः शौचसन्तोषौ स्वाध्यायस्तप एव च ।
तद्वदीश्वरपूजेति पञ्च भिन्नास्तु ते पुनः ॥ २० ॥

१. 'तत् परपीडाकरं सत्यं यदा', २. 'आ' क. पाठः.

शौचं तु शुद्धिर्विज्ञेया मनोवाक्कायकर्मणाम् ।
अचिन्तनमकृत्यानां यत् तच्छौचं तु मानसम् ॥ २१ ॥

अश्ली(नं? बं) वाचिकं स्यात् तु कायिकं तु मृदा जलैः ।
मलानां क्षालनञ्चान्तःकरणस्य विशोधनम् ॥ २२ ॥

पापानामननुष्ठानं कर्मिणां शौचमिष्यते ।
वर्णाश्रमादिधर्माणामविरोधागतेन तु ॥ २३ ॥

धनधान्यादिना वृत्त्या तृप्तिः सन्तोष उच्यते ।
(ग)तेष्वननुशोकः स्याद् भविष्यार्थेष्वलोलता ॥

वर्तमानेष्वसक्तिश्च सन्तोषः परिपठ्यते ।
हर्षागमेष्वनुत्सेकः शोकस्थानेष्वशोकता ॥ २५ ॥

समता चापि सर्वेषु सोऽपि सन्तोष उच्यते ।
प्रणवस्य तथाभ्यासस्तथोपनिषदामपि ॥ २६ ॥

तत्फलानभिसन्धानात् स्वस्वमन्त्रजपोऽपि च ।
स्वाध्याय इति निर्दिष्टस्त्रिविधोऽपि च योगिनाम् ॥ २७ ॥

तथाचाहुः —

"स्वाध्यायाद् योगमासीत योगात् स्वाध्यायमात्मनि ।
स्वाध्याययोगसम्पत्त्या परमात्मा प्रकाशते ॥

शब्दब्रह्म च तद् ब्रह्म वेदितव्ये उभे अपि ।
शब्दब्रह्मणि निष्णातः परं ब्रह्माधिगच्छति ॥"

इति ।

एकभुक्तोपवासाद्यैः कृच्छ्रचान्द्रायणादिभिः ।
कर्शनं तु शरीरस्य यत्तत्तप उदाहृतम् ॥ २८ ॥

तत्राप्यनशनं नेष्टं नेष्टमत्यशनं तथा ।
व्रतचोदितकालाशी तपस्वी योगभाग् भवेत् ॥ २९ ॥

तथाचाह भगवान् —

"नात्यश्नतस्तु योगोऽस्ति नचैकान्तमनश्नतः ।
नचातिस्वप्नशीलस्य जाग्रतो नापि चार्जुन! ॥

युक्ताहारविहारस्य युक्तचेष्टस्य कर्मसु ।
युक्तस्वप्नावबोधस्य योगो भवति दुःखहा ॥"

इति ।

आभ्यन्तरैस्तथा बाह्यैर्द्रव्यैर्गन्धादिभिः क्रमात् ।
चोदिताराधनं शम्भोर्यत् तदीश्वरपूजनम् ॥ ३० ॥
तत्राप्यनभिसन्धाय फलं भक्त्योपपत्तितः ।
देवस्येष्टस्य यजनं कर्मणा मनसापि च ॥ ३१ ॥
योगिनां योगसिद्ध्यर्थं शस्तमीश्वरपूजनम् ।
याज्ञवल्क्यो वसिष्ठश्च योगाचार्यौ महामुनी ॥ ३२ ॥
पृथग्यमांश्च नियमान् दशभेदानिहोचतुः ।
"अहिंसा सत्यमस्तेयं ब्रह्मचर्यं दयार्जवम् ॥ ३३ ॥
क्षमा धृतिर्मिताहारः शौचं चेति यमादयः ।
तपः सन्तोष आस्तिक्यं दानमीश्वरपूजनम् ॥ ३४ ॥
सिद्धान्तश्रवणं चैव ह्रीर्मतिश्च जपो हुतम् ।
एते तु नियमाः" । इति

॥ नियमाः ॥

आसनान्यपि चोक्तानि बहुधा पूर्वपद्धतौ ॥ ३५ ॥
तेषां पञ्चैव शस्तानि योगसिद्धिकराणि वै ।
स्वस्तिकं पद्मसंज्ञं च भद्रं योगासनं तथा ॥ ३६ ॥
गोमुखं चेति तेषां तु लक्षणं पृथगुच्यते ।

उपविश्य तु विष्टरेऽथ जान्वोर्विवरेऽङ्गुष्ठनिपीडनं विधाय ।
ऋजुमध्यगलक्षणाग्रकायो भवति स्वस्तिकमासनं निविष्टम् ॥ ३७ ॥
चरणाग्रयुगं तथोपरिष्टादधिरोप्योरुयुगस्य मूलदेशे ।
उपविश्य पुरेव पद्मसंज्ञं कथितं तद्विपरीततस्तु भद्रम् ॥ ३८ ॥
अधिरोप्य तु दक्षिणाङ्घ्रिमूरावथ सव्यं चरणं तु दक्षिणोरौ ।
अधिरोप्य पुरेव सूपविष्टो यदि योगासनमिष्टदं तदाहुः ॥ ३९ ॥
वृषणे तु निगृह्य वामजङ्घापदगुल्फे त्वधिरूढसस्फिगूरूः ।
उपरिस्थितदक्षिणोरुजानुः खलु योगी स तु गोमुखासनस्थः ॥ ४० ॥

॥ आसनानि ॥

प्राणस्य धारणं देहे प्राणायाम इतीरितः ॥ ४१ ॥

स च नैकविधः प्रोक्तो योगशास्त्रविशारदैः ।
पूरकः कुम्भकश्चैव रेचकश्चेति ते त्रयः ॥ ४२ ॥

प्राणसंयमनासां तु खात्यान्यङ्गान्यनुक्रमात् । (?)
त्रिभिरङ्गैर्युतस्त्र्यंग स्याकुत्पूरकं विना (?) ॥ ४३ ॥

नासापुटेन वामेन पूरयेदुदरेऽनिलम् ।
निर्दिष्टोद्घातमात्राभिर्विज्ञेयः स तु पूरकः ॥ ४४ ॥

पूरितस्याथवा वायोः केवलस्य निरोधतः ।
संपूर्णकुम्भवत् तिष्ठेद् यदासौ कुम्भकः स्मृतः ॥ ४५ ॥

वामेतरेण घ्राणेन (मा?म)रुतः पूरितस्य तु ।
शनैः क्रमेण यो मोक्षो रेचकः परिपठ्यते ॥ ४६ ॥

तत्र षोडशमात्रस्तु सामान्यः पूरको मतः ।
कुम्भकः षष्टिमात्रः स्यात् पञ्चोद्घातस्तु संस्मृतः ॥ ४७ ॥

युग्मोद्घातो रेचकः स्याच्चतुर्विंशतिमात्रकः ।
प्राणायामो ह्ययं मन्दो मध्योऽस्माद् द्विगुणो भवेत् ॥ ४८ ॥

त्रिगुणस्तूत्तमो ज्ञेयः क्रमेणाभ्यासयोगतः ।
अगर्भाश्च सगर्भाश्च प्राणायामास्तु ते स्मृताः ॥ ४९ ॥

अन्तर्मन्त्रजपोपेताः प्राणायामाः सगर्भकाः ।
अन्तर्जपविहीना ये ते त्वगर्भा इति स्मृताः ॥ ५० ॥

प्राणयामादगर्भात् तु सगर्भः श्रेष्ठ उच्यते ।

तद्यथा —

कुम्भीकृत्योदरे वायुं स्वस्वमन्त्रं धिया जपेत् ॥ ५१ ॥
प्रदीपकलिकाकारां कन्द एव निवेशयेत् ॥ १६९ ॥

कुण्डलिनी का स्वस्थान में निवेश—(साधक जिस मार्ग से कुण्डलिनी को ब्रह्मरन्ध्र तक ले गया था) पुनः उसी मार्ग से कुण्डलिनी को नीचे ले जाय। इस क्रम में वह पश्यन्ती-परा-बैखरी के मार्ग से भी उसे संयुक्त कर लम्बिकामार्ग से तालुमूल से नीचे ले आये। जिह्वा से आकर्षण कर उस विद्या का हृदयकमल में प्रवेश कराये। फिर मूलाधार से लेकर ब्रह्मरन्ध्र तक एकीभूत रूप में ध्यान करे। तत्पश्चात् प्रदीप की कलिकासदृश उसको हृदय और नाड़ीसमूह से निकाल कर कन्द में प्रविष्ट करा दे ॥ १६६-१६९ ॥

[योगाभ्यासस्यास्य माहात्म्याभिधानम्]

एतदभ्यासयोगेन यत्फलं तच्छृणुष्व मे ।
न क्षुत् पिपासा न जरा न मृत्युर्नामयादि च ॥ १७० ॥
पुरीषमूत्रे नैव स्यान्निद्रा तन्द्रा भवेन्न च ।
यावान् दोषः शरीरस्य तेषु कोऽपि न जायते ॥ १७१ ॥
अतीतानागतं वेत्ति वाक्सिद्धिरपि जायते ।
सरस्वती तस्य मुखे स्वयमेत्य वसेत् सदा ॥ १७२ ॥
परार्द्धजीवी च भवेत् कामरूपी भवत्यपि ।
देवानाकर्षयेच्चापि खेचरो जायते तथा ॥ १७३ ॥
वर्णितुं शक्यते नास्य महिमा वर्षकोटिभिः ।
साक्षात् स रुद्रो भवति पाञ्चभौतिकदेहभृत् ॥ १७४ ॥
प्राप्नोति मोक्षमेवासौ षण्मासाभ्यन्तरे नरः ।

इस योगाभ्यास का माहात्म्य—इस अभ्यासरूपी योग से जो फल मिलता है वह मुझसे सुनो। इससे (योगी को) भूख-प्यास जरा मृत्यु रोग नहीं होते। मल-मूत्र

का त्याग और निद्रा-तन्द्रा भी नहीं होती । शरीर के जितने दोष हैं उनमें से कोई भी नहीं होता । (वह साधक) अतीत और अनागत को जान लेता है । उसको वाक्सिद्धि प्राप्त हो जाती है । उसके मुख में सदा सरस्वती निवास करती है । वह कामरूपी और परार्द्धजीवी होता है । देवताओं को आकृष्ट करता और आकाशचारी हो जाता है । उसकी महिमा का वर्णन करोड़ों वर्ष तक नहीं किया जा सकता । पाञ्चभौतिक शरीर धारण किया हुआ भी वह साक्षात् रुद्र हो जाता है । यह मनुष्य छह महीने के भीतर मोक्ष प्राप्त कर लेता है ॥ १७०-१७५ ॥

[मोक्षोत्कर्षस्य सिद्धीनां चापकर्षस्याभिधानम्]

मोक्षैकसाधकस्यास्य विधेरन्यास्तु सिद्धयः ॥ १७५ ॥
केवलं विघ्नकारिण्य इत्येतद् विद्धि पार्वति ।
मूढास्तु केवलं सिद्धीरभिकाङ्क्षन्ति नित्यशः ॥ १७६ ॥
मोक्षार्थमेव यतते धीरः संसारसागरे ।
नाड्यश्चतुर्दश प्रोक्ताः पूर्वं मुख्यतमा हि याः ॥ १७७ ॥
तासु वायुनिरोधेन भूयस्यः स्युर्हि सिद्धयः ।
तेषां प्रकारा नाख्याता विस्तरत्वान् मया प्रिये ॥ १७८ ॥
केवलं सिद्धिहेतुत्वं तेषां नात्रोपयोगिता ।
विधिमेनं विधातुं यो न समर्थो विमूढधीः ॥ १७९ ॥
स चिन्तयेत्तु साकारां तां देवीं हृदयाम्बुजे ।

मोक्ष उत्कृष्ट और सिद्धियाँ अपकृष्ट हैं—मोक्ष के साधक इस (योगी) के लिये सिद्धियाँ विधि से भिन्न प्रकार की होती हैं । हे पार्वति! यह समझ लो कि वे केवल विघ्नकारिणी ही होती हैं । मूर्ख लोग प्रतिदिन केवल सिद्धियों को चाहते हैं किन्तु धीरपुरुष इस संसारसागर में मोक्ष के लिये ही प्रयास करते हैं । पहले जो मुख्य चौदह नाड़ियाँ बतलायी गयीं उनमें प्राणवायु को रोकने से सिद्धियाँ प्राप्त होती हैं । हे प्रिये! विस्तार के भय से मैंने उन (=सिद्धियों) के भेद नहीं बताये । यहाँ उन सिद्धियों की उपयोगिता केवल (सांसारिक वैभव की) हेतु बनने में नहीं है । (वरन् उनकी सहायता से देवी के निराकार चिन्तन का मार्ग प्रशस्त करना चाहिये) । जो मूढ इस विधि का अनुष्ठान करने में समर्थ नहीं है वह अपने हृदयकमल में साकार उसका चिन्तन करे ॥ १७५-१८० ॥

ध्यानं सम्प्रति वक्ष्यामि शृणु देवि समाहिता ॥ १८० ॥
ध्यानमेव हि जन्तूनां कारणं सौख्यमोक्षयोः ।

[देव्याःसाकाररूपध्यानम्]

हृत्पद्माष्टदलोपेते कन्दमूलसमुत्थिते ॥ १८१ ॥
द्वादशाङ्गुलनालेऽस्मिंश्चतुरङ्गुलमुच्छ्रिते ।

प्राणायामैर्विकसिते केशरान्वितकर्णिके ॥ १८२ ॥
हृत्सरोरुहमध्येऽस्मिन् प्रकृत्यात्मिककर्णिके ।
अष्टैश्वर्य्यदलोपेते विद्याकेशरसंयुते ॥ १८३ ॥
ज्ञाननाले महाकन्दे प्राणायामप्रबोधिते ।
विश्वार्च्चिषं महावह्निं वमन्तीं सर्वतोमुखीम् ॥ १८४ ॥
भयङ्करीं जगद्योनिं ललज्जिह्वाकरालिनीम् ।
भासयन्तीं स्वकं देहमापादतलमस्तकम् ॥ १८५ ॥
प्रेतभूतपिशाचादिडाकिनीयोगिनीगणैः ।
भैरवाद्यैः परिवृतां श्मशानतलवासिनीम् ॥ १८६ ॥
ज्वलत्करालज्वलनचितामध्यकृतस्थितिम् ।
शवोपरि समारूढां विमुक्तचिकुरोच्चयाम् ॥ १८७ ॥
निष्क्रान्तरसनाकम्पप्रकम्पितजगत्त्रयाम् ।
दन्तमण्डलनिर्गच्छच्चारुचन्द्रिकया तया ॥ १८८ ॥
द्योतयन्तीं जगत् सर्वं चन्द्रमण्डलवत् सदा ।
तुङ्गपीवरवक्षोजभरनम्रकलेवराम् ॥ १८९ ॥
प्रत्यालीढपदां देवीमट्टहासभयप्रदाम् ।
पार्श्वस्थिताभ्यां फेरुभ्यामतीव विकरालिनीम् ॥ १९० ॥
नृमुण्डमालासन्दोहकृतमालावगुण्ठिनीम् ।
सद्यःकृत्तनृमुण्डाभ्यां कुण्डलद्वयशोभिनीम् ॥ १९१ ॥
कठोरपीवरानीलदोः षोडशविराजिताम् ।
नरान्त्रविहिताबद्धयोगपट्टपरिच्छदाम् ॥ १९२ ॥
दिगम्बरां खर्वतनुं हसन्तीं कामलालसाम् ।
संवर्त्तकालज्वलनदुर्निरीक्ष्यतनुप्रभाम् ॥ १९३ ॥
कल्पान्तघोषमार्तण्डकोटिस्तम्भनकारिणीम् ।
निर्वातदीपवत्तस्मिन् दीपितां हव्यवाहने ॥ १९४ ॥
ततस्तस्य शिखामध्ये संस्थितां जगदम्बिकाम् ।
ध्यात्वा कामकलाकालीं सोऽहमस्मीति भावयेत् ॥ १९५ ॥
तद्रूपतां समासाद्य मुक्तिं तेनैव गच्छति ।

देवी के साकार रूप का ध्यान—हे देवि! अब मैं (उसका) ध्यान बतलाऊँगा। सावधान होकर सुनो। ध्यान ही जीवों के सुख और मोक्ष का कारण है। कन्दरूपी मूल से उठा हुआ हृदयकमल आठ दलों वाला है। उसका नाल बारह अङ्गुल का है (अर्थात् मूलाधार से हृदय तक की दूरी बारह अङ्गुल है)। यह कमल चार अङ्गुल ऊँचा है। इसकी कर्णिका में केशर है और यह प्राणायाम के द्वारा विकसित है। इस हृदयकमल के बीच प्रकृति कर्णिका के रूप में है। अष्ट सिद्धियाँ (उस कमल के) आठ दल हैं। विद्या केशर है। ज्ञान नाल है। ऐसा महाकन्द जब

प्राणायाम से प्रबोधित होता है तो उसमें (कामकलाकाली का ध्यान करना चाहिये। वह काली) विश्वज्वाला वाली महा अग्नि का वमन कर रही है। परिपूर्ण, भयङ्कर, संसार का कारण है। लपलपाती हुई जिह्वा के कारण विकराल है। पैर से लेकर मस्तक तक अपने शरीर को भासित कर रही है। प्रेत, भूत, पिशाच आदि डाकिनी एवं योगिनीगणों तथा भैरव आदि से परिवृत है। जलती हुई विकराल अग्नि की चिता के मध्य में स्थित, शव के ऊपर आरूढ, खुले बालों वाली, (मुँह के अन्दर से बाहर) निकली हुई जीभ के कम्प से तीनों लोकों को कँपा देने वाली, दाँतों से निकलने वाली चारुचन्द्रिका से समस्त संसार को चन्द्रमण्डल के समान सदा प्रकाशित करने वाली है। उनका शरीर ऊँचे-चौड़े स्तनों के भार से नम्र है। पैर आगे की ओर बढ़ा है। अट्टहास से भय देने वाली है। अगल-बगल दो शृगालिने स्थित हैं जिनसे वह अतीव विकराल हैं। नरमुण्डसमूह की माला पहनी है। तत्काल काटे गये दो नरमुण्डों के कुण्डल से शोभायमान हैं। कठोर पुष्ठ नीली सोलह भुजाओं (की करधनी से) शोभायमान हैं। मनुष्य की आँतों से योगपट्ट बाँधी हैं। दिगम्बर, छोटी देहवाली, हँसती हुई, कामासक्त, प्रलय काल की अग्नि की भाँति दुर्निरीक्ष्य शरीर प्रभावाली है। कल्प के अन्त में उत्पन्न हुए शब्द से करोड़ों सूर्यों को स्तम्भित करने वाली तथा उस अग्नि में निर्वातदीप के समान दीपित हैं। उस अग्निशिखा के मध्य स्थित जगदम्बा कामकलाकाली का ध्यान कर 'सोऽहमस्मि' (मैं वहीं कामकला काली हूँ) ऐसी भावना करनी चाहिये। साधक तद्रूपता को प्राप्त कर उसी से मुक्त हो जाता है॥ १८०-१९६॥

[ध्यानविधिना विविधसिद्धिप्राप्त्युपायस्य वर्णनम्]

अथवा सिद्धिलिप्सा चेद् भवत्येव न संशयः॥ १९६॥
ध्यायन् वै पञ्चघटिकाः सर्वरोगैः प्रमुच्यते।
घटिकादशकध्यानात् पृथिव्या जयमाप्नुयात्॥ १९७॥
नाडीपञ्चदशध्यानाद् वह्निनासौ न दह्यते।
घटिकाविंशतिध्यानाद् वायुवद् व्योमगो भवेत्॥ १९८॥
मूत्रं पुरीषं जयति पञ्चविंशतिनाडिभिः।
सम्पूर्णदिवसेनैव सर्वसिद्धिः प्रजायते॥ १९९॥
अहोरात्रेण देवेशि जीवन्मुक्तो भवेन्नरः।
इति योगविधिः सर्वः कथितस्ते मया क्रमात्॥ २००॥

ध्यान से विविध सिद्धियाँ—अथवा यदि (साधक को) सिद्धिलाभ की इच्छा हो तो निःसन्देह वह पाँच घड़ी (=२ घण्टा) ध्यान कर समस्त रोगों से मुक्त हो जाता है। दश घड़ी ध्यान करने से पृथिवी पर विजय प्राप्त करता है। पन्द्रह घड़ी ध्यान करने से वह अग्नि से नहीं जलता। बीस घटिका तक ध्यान करने से वायु के समान व्योमचारी हो जाता है। पच्चीस नाडी तक ध्यान से मल-मूत्र पर नियन्त्रण

प्राप्त करता है । पूरा एक दिन ध्यान करने से सर्वसिद्धि मिलती है । हे देवेशि! एक दिन-रात ध्यान करने से मनुष्य जीवन्मुक्त हो जाता है । इस प्रकार मैंने तुमको क्रम से योगविधि बतलायी ॥ १९६-२०० ॥

[पूजायाः कोटित्रयनिर्देशः]

उत्तमो मध्यमः पक्षस्तथैवाधम एव च ।
उत्तमो योगमार्गेण मध्यमो ध्यानसंश्रयात् ॥ २०१ ॥
पूजाध्यानादिभिर्ज्ञेयोऽप्यधमाराधनक्रमः ।
कृते युगे वा त्रेतायां योग एवोत्तमो विधिः ॥ २०२ ॥
ध्यानमेव द्वापरादौ कलौ न्यासार्चनं खलु ।
अल्पायुषोऽल्पमेधाश्च स्वल्पप्रज्ञा महालसाः ॥ २०३ ॥
दुराचारा नास्तिकाश्च कामलोभपरायणाः ।
ईदृशाश्च नराः सर्वे भविष्यन्ति कलौ युगे ॥ २०४ ॥
नायं योगो महेशानि भविष्यति गुरुं विना ।
केवलं न्यासपूजादि करिष्यन्ति फलार्थिनः ॥ २०५ ॥

योगविधि की श्रेणियाँ—(यह योगविधि) उत्तम मध्यम और अधम (तीन प्रकार की) होती है । उत्तमविधि योगमार्ग की, मध्यम ध्यान का आश्रयण और पूजा ध्यान आदि अधम आराधन का क्रम है । सत्ययुग अथवा त्रेता में योग ही उत्तमविधि थी । द्वापर में ध्यान और कलियुग में न्यास, पूजा (प्रशस्य मानी गयी) है । कलियुग में मनुष्य अल्पायु, मन्दबुद्धि, स्वल्पप्रज्ञा वाले, महाआलसी, दुराचारी, नास्तिक, कामी और लोभी होंगे । हे महेशानि! यह योग गुरु के बिना नहीं किया जा सकता । फल अर्थात् सिद्धि चाहने वाले केवल न्यास.पूजा आदि करेंगे ॥ २०१-२०५ ॥

[विश्वासस्य फलदायकत्वाभिधानम्]

तथाप्यास्थावतां देवि फलं किञ्चित् प्रयच्छति ।
एवं ज्ञात्वा तु यः कुर्याद् ध्यानन्यासार्चनानि हि ॥ २०६ ॥
अवश्यं फलभाग् भूयान्नात्र कार्या विचारणा ।
ध्यानेऽर्चने जपे न्यासे होमे च बलिकर्मणि ॥ २०७ ॥
भावना यादृशी यस्य सिद्धिः स्यादेव तादृशी ।
इति ते कथितो देवि प्रपञ्चः कामकालिकः ॥ २०८ ॥
वद सत्यं पुनर्मत्तः किमन्यच्छ्रोतुमिच्छसि ॥ २०९ ॥

॥ इत्यादिनाथविरचितायां पञ्चशतसाहस्र्यां महाकालसंहितायां सामान्यविशेषप्रयोगो नाम सप्तमः पटलः ॥ ७ ॥

विश्वास फलदायक है—(यद्यपि कलियुग में योगी और ध्यानी नहीं होते) तथापि हे देवि! आस्था वालें को (यह विधि) कुछ फल देती ही है । ऐसा जानकर जो व्यक्ति ध्यान न्यास अर्चन करता है वह अवश्य फल का भागी होता है । इसमें सन्देह नहीं करना चाहिये । ध्यान पूजा जप न्यास होम और बलि-कार्य के विषय में जिसकी जैसी भावना होती है उसको वैसी सिद्धि मिलती है । हे देवि ! यह मैंने तुमको कामकलाकाली का विस्तार बतलाया । सच बताओ कि तुम मुझसे और क्या सुनना चाहती हो ॥ २०६-२०९ ॥

॥ इस प्रकार श्रीमद् आदिनाथविरचित पचास हजार श्लोकों वाली महाकाल-संहिता के कामकलाकाली खण्ड के सामान्यविशेषप्रयोग नामक सप्तम पटल की आचार्य राधेश्याम चतुर्वेदी कृत 'ज्ञानवती' हिन्दी व्याख्या सम्पूर्ण हुई ॥ ७ ॥

षष्ठः प्रकाशः

षट्चक्रनिरूपणम्

[षट्चक्रनिरूपणप्रतिज्ञा]

अथ तन्त्रानुसारेण षट्चक्रादिक्रमोद्गतः ।
उच्यते परमानन्दनिर्वाहप्रथमाङ्कुरः[1] ॥ १ ॥

[इडा-पिङ्गला-सुषुम्णा-वज्रानाडीसंस्थितिः]

मेरोर्बाह्यप्रदेशे शशिमिहिरशिरे सव्यदक्षे निषण्णे
मध्ये नाडी सुषुम्णा त्रितयगुणमयी चन्द्रसूर्य्याग्निरूपा ।
धुस्तूरस्मेरपुष्पग्रथिततमवपुः कन्दमध्याच्छिरःस्था
वज्राख्या मेढ्रदेशाच्छिरसि परिगता[2]
मध्यमेऽस्या ज्वलन्ती ॥ २ ॥

१। पूर्व्वप्रकाशे ततः षट्चक्रविज्ञानं शिष्याय प्रतिबोधयेदित्युक्तम्, तस्यैव षट्चक्रविज्ञानस्य निरूपणाय प्रकाशमिममारभते--अथेत्यादिना । अथेति दीक्षानिरूपणानन्तरम् । षट्चक्रादेर्यः क्रमः मूलाधारस्वाधिष्ठानादिरूपः । आदिशब्देन नाड्यादीनां परिग्रहः । तेन उद्गत आविर्भूतः परमानन्दस्य 'आनन्दं ब्रह्मणो रूपमि'ति श्रुतेनिरञ्जनस्वरूपस्य ब्रह्मणो यो निर्वाहः अवबोधस्तस्य प्रथमाङ्कुर आदिबीजभूतः षट्चक्रविमर्ष इत्यर्थः, उच्यते मयेति शेषः । ननु मानुषवचने का श्रद्धा इत्यत आह—तन्त्रानुसारेणेति । स्वतःप्रमाणभूतशिवोक्ततन्त्रानुसारेणेत्यर्थः । एवञ्च भगवता शिवेन नानातन्त्रेषु यत् षट्चक्रविज्ञानं प्रतिपादितम्, तदेव साधकानां सुखबोधनार्थमेकत्र समाहृत्य स्वरचितपद्यैरुपस्थाप्यत इति तात्पर्य्यम् ।

२। मेरोरिति । मेरोर्मेरुदण्डस्य बाह्यप्रदेशे बहिर्भागे सव्यदक्षे वामदक्षिणभागयोः शशिमिहिरशिरे चन्द्रसूर्य्यनाड्यौ इडा-पिङ्गलाख्ये निषण्णे स्थिते । मेरुदण्डस्य वामभागे इडा चन्द्ररूपा, दक्षभागे पिङ्गला सूर्य्यरूपेत्यर्थः ।

तदुक्तं तन्त्रसारधृतगौतमीये—

---

1. '-रम्' C. 2. '-णता' B.

[चित्रिणीब्रह्मनाड्योः संस्थितिः]

तन्मध्ये चित्रिणी सा प्रणवविलसिता योगिनां योगगम्या लूतातन्तूपमेया सकलसरसिजान् मेरुमध्यान्तरस्थान् ।

इडा वामे स्थिता नाडी शुक्ला तु चन्द्ररूपिणी ।
शक्तिरूपा च सा नाडी साक्षादमृतविग्रहा ।
दक्षिणे पिङ्गलाख्या तु पुंरूपा सूर्य्यविग्रहा ॥ इति ।

मध्य इति मेरुदण्डस्य मध्यभागे त्रितयगुणमयी वज्राचित्रिणीभ्यां मिलिता सती सुषुम्णा त्रितयगुणमयी सूत्रत्रयात्मिका भवतीत्यर्थः । तदुक्तं भूतशुद्धितन्त्रे—

तदन्तर्द्व्यङ्गुलोर्द्ध्वं तु वज्राख्या चित्रिणी तथा ।
अतः सुषुम्णा त्रिगुणा ललन्ती ललना यथा ॥

चन्द्रेति । तथाच सत्त्वगुणात्मिका चित्रिणी चन्द्ररूपा, रजोगुणात्मिका वज्रा सूर्य्यरूपा, तमोगुणात्मिका सुषुम्णा चाग्निरूपेत्यर्थः ।

सत्त्वादित्रिगुणाधारा चन्द्रसूर्य्याग्निरूपिणी ।
मेरुमध्ये स्थिता या तु मूलादाब्रह्मविग्रहा ।
सर्व्वतेजोमयी सा तु सुषुम्णा बहुरूपिणी ॥ इति ।

इति तन्त्रसारधृतगौतमीयवचनेऽपि सर्व्वतेजोमयीति पदेन चन्द्रसूर्य्याग्निरूपत्वं बहुरूपिणीति पदेन च गुणत्रयात्मकं सुषुम्णायाः प्रतिपादितम् ।

कन्देति । कन्दलक्षणमाह भूतशुद्धितन्त्रे—

गुदात्तु द्व्यङ्गुलादूर्द्ध्वं मेढ्रात्तु द्व्यङ्गुलादधः ।
चतुरङ्गुलविस्तारं कन्दमूलं खगाण्डवत् ॥

इति । एवञ्चोक्तलक्षणकन्दमध्याच्छिरःस्था शिरःपद्मपर्य्यन्तस्थिता । तस्या आकारमाह—धुस्तूरेति । धुस्तूरस्य यत् स्मेरं विकसितं पुष्पं तद्वत् प्रथिततमं वपुर्यस्याः तथाभूता विकसितधुस्तूरपुष्पाकारा सुषुम्णेत्यर्थः ।

वज्रे ति । अस्याः सुषुम्णाया मध्यदेशे ज्वलन्ती दीप्तिं कुर्व्वती मेढदेशात् प्रागुक्तकन्दद्व्यङ्गुलोर्द्ध्वाल्लिङ्गदेशात् शिरसि परिगता शिरःपर्य्यन्तगामिनीत्यर्थः । बज्राख्या नाडी वर्त्तेत इत्यर्थ । तदुक्तं शाक्तानन्दतरङ्गिण्याम्—

तन्मध्ये वज्रिणी नाडी द्व्यङ्गुलोर्द्ध्वा ततः प्रिये । इति ।

भित्त्वा देदीप्यते तद्ग्रथनरचनया शुद्धबोधप्रबोधा
[1]तस्यान्तर्ब्रह्मनाडी हरमुखकुहरादादिदेवान्तसंस्था ॥ ३ ॥

[ब्रह्मनाडीस्वरूपम्]

विद्युन्मालाविलासा मुनिमनसि लसत्तन्तुरूपा सुसूक्ष्मा
शुद्धज्ञानप्रबोधा सकल[2]गुणमयी शुद्धबोधस्वभावा ।
ब्रह्मद्वारं तदास्ये प्रविलसति सुधा[3]साररम्यप्रदेशं
ग्रन्थिस्थानं तदेतद् वदनमिति
सुषुम्णाख्यनाड्या लपन्ति ॥ ४ ॥

३। तन्मध्य इति। तन्मध्ये तस्या वज्रायाा मध्ये सा प्रसिद्धा चित्रिणी नाडी विलसति। चित्रिणीं विशेषयति—प्रणवविलसितेति। प्रणवेन आज्ञाचक्रावस्थितेन विलसिता विशेषेण लसिता प्रकाममुद्दीप्यमानेत्यर्थः। गगनधरणीमध्यमिलितमिति ग्रन्थेन प्रणवज्योतिषाज्ञाचक्रान्मूलाधारपर्य्यन्तव्यापकत्वस्य वक्ष्यमाणत्वात्। योगिनां योगगम्या योगमात्रवेद्या, लूतातन्तूपमेया मर्कटसूत्रवदतिसूक्ष्मा। मेरुमध्यान्तरस्थान् मेरुमध्यस्थिते सुषुम्णावज्रानाड्यौ तयोरन्तरस्थान् अभ्यन्तरस्थितान् सकलसरसिजान् मूलाधार-स्वाधिष्ठान-मणिपूरानाहत-विशुद्धाज्ञाख्यषट्पद्मानि भित्त्वा तद्ग्रथनरचनया तेषां षण्णां पद्मानां ग्रथनस्य पतनप्रतिबन्धकीभूतस्य रचनया देदीप्यते। तस्यान्तरिति तस्याश्चित्रिण्या अन्तर्मध्ये शुद्धबोधप्रबोधा शुद्धौ निर्मलौ बोधप्रबोधौ सामान्य-विशेषज्ञाने यस्यास्तथाभूता। शुद्धं बोधं प्रबोधयतीति वा। हरमुखकुहरात् मूला-धारस्थस्वयम्भूलिङ्गच्छिद्रात् आदिदेवान्तसंस्था सहस्रारविलासिपरमशिवपर्य्यन्त-गामिनी ब्रह्मनाडी वर्त्तते। तदुक्तं शान्तानन्दतरङ्गिण्यां चतुर्थोल्लासे चित्रामभिधाय—

तस्या मध्ये ब्रह्मनाडी मृणालतन्तुरूपिणी। इति।

४। प्रागुक्तां ब्रह्मनाडीं विशेषयति—विद्युन्मालेति। विद्युन्मालाविलासा विद्युन्माला विद्युच्छ्रेणी तस्या विलास इव विलासो यस्याः सा विद्युत्पुञ्जसमानदीप्तिशालिनी-त्यर्थः, तथा मुनिमनसि मननशीलानां चित्ते लसद् विलसत् तन्तोर्मृणालसूत्रस्य रूपमिव रूपं यस्यास्तादृशी, अत एव सुसूक्ष्मा। तदुक्तं शाक्तानन्दतरङ्गिण्यां चतुर्थो-ल्लासे चित्रिणीमभिधाय—

1. '-न्मध्ये ब्र-' C 2. '-सखवहा हावभाव-' C. 3. 'सागरस्य' B.

[मूलाधारपद्मस्य स्वरूपम्]

अथाऽऽधारपद्मं सुषुम्णास्यलग्नं ध्वजाधो गुदोर्द्ध्वं चतुःशोणपत्रम् ।
अधोवक्त्रमुद्यत्सुवर्णाभवर्णैर्वकारादिसान्तैर्युतं वेदवर्णैः ॥ ५ ॥

तस्या मध्ये ब्रह्मनाडी मृणालतन्तुरूपिणी ।

इति । एवञ्च ये मननशीलास्त एव मृणालतन्तुतनीयसीमिमां ब्रह्मनाडीमनुभवितुं शक्नुवन्तीत्यर्थः । तथा शुद्धज्ञानप्रबोधा शुद्धस्य संशयविकल्पादिरहितस्य ज्ञानस्य ब्रह्मज्ञानस्य प्रबोधो यस्याः सा । यद्वा शुद्धं निष्कलं ब्रह्म तद्विषयकं ज्ञानम्, प्रबोधयतीति प्रबोधा पचादित्वादच् । ततश्च शुद्धज्ञानस्य प्रबोधा इति षष्ठीतत्पुरुषः । यद्वा शुद्धञ्च तज्ज्ञानञ्चेति शुद्धज्ञानं निष्कलं ज्ञानस्वरूपं ब्रह्म तस्य प्रबोधा समुन्मीलनकारिणीत्यर्थः । सकलगुणमयी त्रिगुणात्मिका । तथा शुद्धबोधस्वभावा निर्मलज्ञानस्वरूपा ब्रह्मनाडी देदीप्यत इति पूर्व्वेणान्वयः ।

तदास्य इति । तदास्ये ब्रह्मनाड्या मुखे ब्रह्मद्वारं विलसति । ब्रह्मद्वारं विशेषयति—सुधेत्यादिना । सुधायाः शिवशक्तिसामरस्यसम्भूतामृतस्य य आसारः स गम्यते यस्मात् तथाभूतः प्रदेशो यत्र तत् । अस्मादेव ब्रह्मद्वाररूपप्रदेशान्मूलाधारस्थितशिवशक्तिभ्यां निरुक्तामृतं पीयत इत्यर्थः । तथा ग्रन्थिस्थानं पद्मानामिति शेषः । तदेतत् सुषुम्णाख्यनाड्या वदनं मुखमिति लपन्ति कथयन्ति योगिन इति शेषः ।

५ । एवं नाडीमभिधाय मूलाधारपद्ममाह—अथेत्यादिनवभिः । अथेति नाडीनिरूपणानन्तरम् आधारपद्मं व्याख्यास्याम इति शेषः । आधारपद्मं मूलाधारपद्मम् अन्येषां पद्मानां मूलरूपतयाधिकरणरूपतया चास्य मूलाधारपद्ममिति संज्ञा । सुषुम्णास्यलग्नं सुषुम्णाया निरुक्तरूपाया आस्ये मुखे लग्नम्, ध्वजाधः लिङ्गमूलादधः गुदोर्द्ध्वं पायुस्थानादूर्द्ध्वम्, तथा चतुःशोणपत्रं चत्वारि शोणानि रक्तवर्णानि पत्राणि यस्य तथाभूतम् । तथा अधोवक्त्रम् । तत्र वर्णानां स्थितिमाह—उद्यदिति । उद्यत्सुवर्णाभवर्णैः उद्यती उद्गच्छन्ती सुवर्णस्य हेम्नः आभेव आभा येभ्यस्तथाभूता वर्णा येषां तादृशैः वकारादिसान्तैः व-श-ष-स-रूपैर्वेदवर्णैश्चतुर्भिर्वर्णैर्युतम् वर्त्तते इति शेषः । तदुक्तं तन्त्रसारधृतगौतमीये—

तद्बाह्ये हेमवर्णाभं व-सवर्णं चतुर्दलम् ।
द्रुतहेमसमप्रख्यं पद्मं तत्र विभावयेत् ॥ इति ।

[तत्र स्वबीजयुक्तपृथिवीमण्डलम्]

अमुष्मिन् धरायाश्चतुष्कोणचक्रं समुद्भासिशूलाष्टकैरावृतं तत् ।
लसत्पीतवर्णं तडित्कोमलाङ्गं तदन्तः [1]समास्ते धरायाः
स्वबीजम् ॥ ६ ॥

[धराबीजस्य स्वरूपं तदङ्के ब्रह्मणोऽवस्थितिश्च]

चतुर्बाहुभूषं गजेन्द्राधिरूढं तदङ्के नवीनार्कतुल्यप्रकाशः ।
शिशुः सृष्टिकारी लसद्वेदबाहुर्मुखाम्भोजलक्ष्मी-
श्चतुर्भागभेदः[2] ॥ ७ ॥

अत्रायं निष्कर्षः,—प्रथमं मूलाधारपद्मं पायुलिङ्गयोर्मध्ये सुषुम्णाया मुखलग्नमधोमुखमवस्थितम् । तस्य चत्वारि रक्तवर्णानि पत्राणि, तेषु च पत्रेषु पूर्व्वादितः प्रादक्षिण्येन व-श-ष-स-रूपं तप्तहेमाभं वर्णचतुष्टयं वर्त्तते इति ।

६ । अमुष्मिन् आधारपद्मे समुद्भासिभिः शूलाष्टकैः अष्टभिः शूलैरावृतं धरायाः पृथिव्याश्चतुष्कोणचक्रं चतुष्कोणं पृथ्वीमण्डलं समास्ते । तदन्तः धरामण्डलस्य मध्ये धरायाः स्वबीजं लम् इति पृथ्वीबीजम् आस्ते । तद् विशेषयति—लसत्पीतवर्णं पीतिम्ना शोभमानम्, तडिदिव कोमलमङ्गं यस्य तदिति स्वबीजमित्यस्य विशेषणम् ।

तथाच मूलाधारपद्मे पृथ्वीदेवताकं चतुष्कोणमण्डलं तस्याष्टदिक्षु शूलाष्टकं मध्ये च पीतोज्ज्वलो लकार इति ।

७ । प्रागुक्तं धराबीजमेव विशेषयति—चतुरित्यादिविशेषणद्वयेन । तत्र चत्वारो बाहवो भूषा अलङ्कारा इव यस्य तत् , अलङ्कारायमाणबाहुचतुष्टयविशिष्टमित्यर्थः । तथा गजेन्द्राधिरूढं गजवराधिष्ठितमित्यर्थः । धराया बीजं समास्ते इति पूर्व्वेणान्वयः । तदुक्तं निर्व्वाणतन्त्रे चतुर्थपटले—

अधोवक्त्रं हि तत् पद्मं धरामध्ये चतुर्द्दलम् ।
पद्ममध्ये बीजकोषे क्षितिचक्रं मनोहरम् ॥
वलयाकाररूपेण समुद्राः सप्त संस्थिताः ।
जम्बूद्वीपं मध्यदेशे चतुष्कोणं मनोहरम् ॥

---

1. 'समन्ते' C. 2. '-वेदः' B.

[मूलाधारपद्मे डाकिनीस्थितिः]

वसेदत्र देवी च डाकिन्यभिख्या लसद्वेदबाहूज्ज्वला रक्तनेत्रा[1] ।
समानोदितानेकसूर्य्यप्रकाशा प्रकाशं वहन्ती सदा शुद्धबुद्धेः ॥८॥

त्रिकोणं मदनागारं कन्दर्पश्चाधिदेवता ।
ऐन्द्ररूपं हि लं-बीजं गजेन्द्रवाहनं शिवे ॥ इति ।

अत्र रामवल्लभकृतटीकायां 'चतुर्बाहुभूषो गजेन्द्राधिरूढ' इति प्रथमान्तमभिधाय पदद्वयमिदं सृष्टिकारीत्यस्य विशेषणत्वेन समयोजयत् ।

तदङ्क इति । तस्य धराबीजस्याङ्के नवीनार्कतुल्यप्रकाशः लसद्वेदबाहुश्चतुर्भुजः मुखाम्भोजलक्ष्मीः मुखेषु अम्भोजलक्ष्मीः पद्मशोभा यस्य तथाभूतः, तथा चतुर्भागभेदः चत्वारो भागभेदा यस्य मुखावच्छेदे इति शेषः, तादृशः सृष्टिकारी ब्रह्मा समास्ते इति पूर्व्वेण सम्बन्धः । अत्र—

ऐन्द्रबीजं वरारोहे लिङ्गस्य वामदेशके ।
सुसिद्धं ब्रह्मसदनं नादोपरि सुसुन्दरम् ।
तत्रैव निवसेद् ब्रह्मा सृष्टिकर्त्ता प्रजापतिः ॥

इति निर्व्वाणतन्त्रचतुर्थपटलवचनेन नादोपरि ब्रह्मसदनस्थितेरभिधानान्नादोर्द्ध्वं बिन्दौ स्थितिरित्यवधेयम् । 'लिङ्गस्य वामदेशक' इति तु न ग्रन्थकारसम्मतं मूले तथाऽनभिधानात्, अत्र तन्त्रेषु मतभेददर्शनाच्च ।

तदङ्के च चतुर्बाहुं रक्तवर्णं शिशुं शिवम् ।
चतुर्वक्त्रं हंसपृष्ठे ब्रह्माणं विद्धि पार्व्वति ॥

इति षट्चक्रटीकाधृतभूतशुद्धितन्त्रवचनदर्शनादत्र हंसपृष्ठे ब्रह्मणः स्थितिरवगन्तव्या ।

अयमत्र निष्कर्षः—पूर्व्वश्लोके यत् पृथ्वीबीजमुक्तं तस्य चत्वारो बाहवः वाहनञ्च गजेन्द्रः । धराबीजान्तर्नादोर्द्ध्वं नवोदयमानरविप्रभाभास्वरश्चतुर्बाहुः कमलोपमचतुराननविशिष्टः शिशुर्ब्रह्मा वर्त्तत इति ।

८। अत्र डाकिनीशक्तेः स्थितिमुपपादयति—वसेदिति । अत्र डाकिन्यभिख्या डाकिनीति संज्ञया प्रसिद्धा देवी द्योतनशीला शक्तिः वसेत् वसतीत्यर्थः । तां विशेषयति—लसदिति । लसन्तः शोभमाना ये वेदबाहवश्चत्वारो बाहवस्तैरुज्ज्वला, ब्रह्मशक्ति-

---

1. '-नेत्रम्' C.

[तत्कर्णिकान्तस्त्रिकोणे कन्दर्पवायोरवस्थितिः]

[1]वज्राख्यावक्त्रदेशे विलसति सततं कर्णिकामध्यसंस्थं
कोणं तत् त्रैपुराख्यं तडिदिव विलसत् कोमलं कामरूपम्।
कन्दर्पो नाम वायु[2]र्विलसति सततं तस्य मध्ये समन्ता-
ज्जीवेशो बन्धुजीवप्रकरमभिहसन् कोटिसूर्य्यप्रकाशः ॥६॥

त्वादस्याश्चतुर्बाहुत्वमित्यर्थः। शुद्धबुद्धेः शुद्धबोधस्य तत्त्वज्ञानस्येत्यर्थः प्रकाशं वहन्ती तत्त्वज्ञानं सम्पादयन्तीत्यर्थः।

तदयं निष्कर्षः—अत्र मूलाधारपद्मे बाहुचतुष्टयैः काञ्चन शोभां वहन्ती रक्तनयना युगपदुदयमानानेकदिनकरसमानप्रकाशशालिनी डाकिनी देवी वसन्ती साधकानां तत्त्वज्ञानं सम्पादयतीति।

६। एतत्पद्मकर्णिकायां त्रिकोणं निरूपयति—वज्राख्येति। वज्राख्यायाः 'वज्राख्या मेढ्रदेशाच्छिरसि परिगते'त्यादिना निरुक्ताया वक्त्रदेशे मुखप्रदेशे कर्णिकामध्यसंस्थं मूलाधारपद्मकर्णिकाया मध्ये वर्त्तमानं तडिदिव विलसत् विद्युदुज्ज्वलं कोमलं स्निग्धं तत् प्रसिद्धं त्रैपुराख्यं त्रिपुरासम्बन्धि कामरूपं मदनागारात्मकं त्रिकोणं विलसति। अत्र कामशब्देन कामप्रधानागारभूता योनिरुच्यते, तथा च कामरूपं त्रिकोणमित्यस्य योन्याकारं त्रिकोणमित्यर्थः। अत्र कामरूपमित्यनेन त्रिकोणेऽस्मिन् कामबीजस्यापि स्थितिः सूच्यते। व्यक्तमाह—शाक्तानन्दतरङ्गिण्यां नवमोल्लासे—

आधारे कन्दमध्यस्थं त्रिकोणमतिसुन्दरम्।
त्रिकोणमध्ये देवेशि कामबीजं सुलक्षणम्॥ इति।

तथा तत्रैव चतुर्थोल्लासे—

कर्णिकायां स्थिता योनिः कामाख्या परमेश्वरी।
तद्योनिः परमेशानि इच्छाज्ञानक्रियात्मिका।
अपराख्यं हि कन्दर्पमाधारे तत्त्रिकोणके॥

इत्यादि। कन्दर्प इति तस्य त्रिकोणस्य मध्ये कन्दर्पो नाम जीवेशो जीवनरक्षाविधायको वायुः समन्तात् त्रिकोणं व्याप्य निवसति। वायोः स्वरूपमाह—बन्धुजीवेति। बन्धुजीवप्रकरं रक्तवर्णबन्धूकपुष्पसमूहं स्वगतरक्तिम्ना अभिहसन् उपहसन्।

1. 'वज्राया' B. 'वक्त्राख्या' C. 2. '-र्नि-' C.

[तत्र स्वयम्भुलिङ्गावस्थितिः]

तन्मध्ये लिङ्गरूपी द्रुतकनककलाकोमलः पश्चिमास्यो
ज्ञानध्यानप्रकाशः प्रथमकिशलयाकाररूपः स्वयम्भुः ।
विद्युत्पूर्णेन्दुबिम्बप्रकरकरचयस्निग्धसन्तानहासी
काशीवासी विलासी विलसति सरिदावर्त्तरूपप्रकारः ॥१०॥

[तदूर्ध्वं कुलकुण्डलिन्याः स्थितिः]

तस्योर्द्ध्वे विसतन्तुसोदरलसत्सूक्ष्मा जगन्मोहिनी
ब्रह्मद्वारमुखं मुखेन मधुरं संछादयन्ती स्वयम् ।

तथा कोटिसूर्य्यप्रकाशः कोटिसंख्यकसूर्य्यसदृशदीप्त्यतिशयशालीत्यर्थः । अत्र कामबीजस्थितेरभिधानात् पूर्व्वोक्तरीत्या कामस्यापि स्थितिरुक्तेत्यवधेयम् ।

एवञ्चायमस्य निष्कर्षः—एतत्पद्मकर्णिकायां विद्युत्समानाकृति स्निग्धं योन्याकारत्रिकोणं तदन्तः कामवायुः कामबीजश्च रक्तवर्णं कोटिसूर्य्यभास्वरं विलसतीति ।

१०। प्रागुक्तत्रिकोणमध्ये स्वयम्भुलिङ्गस्यावस्थितिमाह—तन्मध्य इति । प्रागुक्तत्रिकोणमध्ये लिङ्गरूपी स्वयम्भुः स्वयम्भुलिङ्गं विलसतीति सम्बन्धः । स्वयम्भुवं विशेषयति—द्रुतेत्यादिना । द्रुतकनककलाकोमलः द्रवीभूतसुवर्णकमनीयमूर्त्तिः पश्चिमास्यः अधोमुखः, तथा ज्ञानध्यानप्रकाशः ज्ञानेन तत्त्वज्ञानेन ध्यानेन स्वरूपचिन्तया च प्रकाशो यस्य तादृशः । ज्ञानिनस्तत्त्वज्ञानेन ध्यानशीलाश्च ध्यानप्रभावेण तं पश्यन्तीत्यर्थः । प्रथमं नवोद्गतं यत् किशलयं तदाकारं रूपं यस्य तादृशः । अत्र किशलयशब्देनैव नवोद्गतपत्राभिधानसम्भवे प्रथमपदोपन्यासोऽचिरप्ररूढत्वसूचनाय । विद्युदिति—विद्युत्-पूर्णेन्दुबिम्बयोर्यः प्रकरः समूहः विद्युत्समूहः पूर्णचन्द्रमण्डलसमूहश्चेत्यर्थः । तस्य यः करचयः किरणसमूहः तद्वत् स्निग्धः सन्तानः प्रवाहो यस्य तादृशो हासः प्रकाशोऽस्यास्तीति विद्युत्पूर्णेन्दुबिम्बप्रकरकरचयस्निग्धसन्तानहासी अनेकविद्युच्चन्द्रकिरणसदृशस्निग्धदीप्तिविशिष्ट इत्यर्थः । काशीवासी काश्यां वासशीलः स्वयम्भुः अत्र विलासी कुण्डलिन्या सह विलासशीलः । काशीवासीत्यभिधानात् काश्यां विलासे स्वयम्भोर्यत् सुखमत्रापि तदनुभवतीति सूचितम् । एवञ्चाधारत्रिकोणान्तराधोमुखं नवकिशलयाकारं स्वयम्भुलिङ्गं वर्त्तत इति निष्कर्षः ।

शङ्खावर्त्तनिभा नवीनचपलामालाविलासास्पदा
सुप्ता सर्पसमा शिवोपरिलसत्सार्द्धत्रिवृत्ताकृतिः ॥११॥
कूजन्ती कुलकुण्डली च मधुरं मत्तालिमालास्फुटं
[1]वाचं कोमलकाव्यबन्धरचनाभेदप्रभेदक्रमैः ।
श्वासोच्छ्वासविभञ्जनेन जगतां जीवो यया धार्य्यते
सा मूलाम्बुजगह्वरे विलसति प्रोद्दामदीप्त्यावलिः[2] ॥१२॥

११। स्वयम्भुलिङ्गोर्द्ध्वे कुलकुण्डलीस्थितिमाह—तस्योर्द्ध्वे इत्यादि। तस्य स्वयम्भुलिङ्गस्योर्द्ध्वे कुलकुण्डली विलसतीति परेणान्वयः। कुलकुण्डलीं विशेषयति—विसतन्त्वित्यादिना। विसतन्तुसोदरलसत्सूक्ष्मा मृणालतन्तुतनीयसी। तथा जगन्मोहिनी जगतां मोहजनिका मायारूपिणीत्यर्थः। तथा मधुरं सहस्रारगलितामृतप्रवाहेणेति शेषः, ब्रह्मद्वारमुखं ब्रह्मद्वारं 'ब्रह्मद्वारं तदास्य' इत्यादिना पूर्व्वमुक्तं तस्य मुखं मुखेन स्वमुखेन संछादयन्ती। तदुक्तं शाक्तानन्दतरङ्गिण्यां चतुर्थोल्लासे—

येन मार्गेण गन्तव्यं ब्रह्मद्वारं निरामयम्।
मुखेनाच्छाद्य तद् द्वारं प्रसुप्ता परमेश्वरी॥ इति।

एवञ्च स्वमुखेन ब्रह्मद्वारं संछाद्य सहस्रारगलितामृतधारां पिबतीति गम्यते। शङ्खावर्त्तनिभा शङ्खान्तरालावर्त्तसदृशी। नवीनेति—नवीना वर्षागमे प्रथमाविर्भूता या चपलामाला विद्युत्समूहः तस्या यो विलासो दीप्तिस्तस्य आस्पदा वसतिस्थानभूता नवीनोदितविद्युत्पटलसदृशदीप्तिशालिनीत्यर्थः। सुप्तेति—सुप्ता शिवोपरि स्वयम्भुलिङ्गस्योपरि लसन्ती सार्द्धत्रिवृत्ता आकृतिर्यस्यास्तथाभूता अत एव सर्पसमा। सर्पाः स्वापकाले वलयाकारेण वर्त्तन्त इति सुप्तत्रिवृत्ताकृतेः कुण्डलिन्याः सर्पसमत्वम्। अत्रास्पदेति स्त्रीत्वमार्षम्।

१२। कुण्डलिनीमेव विशेषयति—कूजन्तीति। मत्तालिमालास्फुटं मत्तभ्रमरावलीवदस्फुटमनभिव्यक्तवर्णं मधुरं कूजन्ती एतेन ध्वन्यात्मकशब्दानां कुण्डलिनीतोऽभिव्यक्तिरभिहिता। एवं ध्वन्यात्मकशब्दसृष्टिमभिधाय वर्णात्मकशब्दानामपि कुण्डलिन्या अभिव्यक्तिमाह—वाचमिति। कोमलकाव्यबन्धरचनाभेदप्रभेदक्रमैः—कोमलानि माधुर्य्यव्यञ्जकवर्णमयानि यानि काव्यानि बन्धाः पद्मादिबन्धाश्चित्रकाव्यात्मकाः

1. 'वाचः' B. 2. 'दीप्ता-' B.

[तत्र परशक्तिस्थितिः]

तन्मध्ये परमा कलातिकुशला सूक्ष्मातिसूक्ष्मा परा
नित्यानन्दपरम्परा[1]च चपलामालालसद्दीधितिः ।
ब्रह्माण्डादिकटाहमेव सकलं यद् भासया भासते
सेयं श्रीपरमेश्वरी विजयते नित्यप्रबोधोदया ॥ १३ ॥

तेषां या रचना तत्र ये भेदाः । यद्वा कोमलः माधुर्य्यव्यञ्जकवर्णमयः यः काव्यानां बन्धः रचना तदितरगद्यपद्यादिमयवाक्यनिर्माणं तयोर्यो भेदः विशेषः इति । तथा प्रभेदाः प्रकृष्टभेदविशिष्टाः प्राकृतादिबन्धाः तत्र ये क्रमाः काव्यप्रकर्षाधायकतत्तद्रसानुगुणा रीतयः तैः वाचं कण्ठताल्वाद्यभिघातजन्यवर्णात्मकवाक्यं जनयन्ती कुलकुण्डली विलसतीत्यन्वयः । तदुक्तं शारदायां प्रथमपटले—

भिद्यमानात् पराद् बिन्दोरव्यक्तात्मा रवोऽभवत् । इति ।

तथा—

तत् प्राप्य कुण्डली रूपं प्राणिनां देहमध्यगम् ।
वर्णात्मनाविर्भवति गद्यपद्यादिभेदतः ॥ इति ।

तथा यया कुण्डलिन्या श्वासोच्छ्वासविभञ्जनेन जगतां जीवः प्राणो धार्य्यते देहावच्छेदे स्थाप्यते । तदुक्तं शाक्तानन्दतरङ्गिण्यां नवमोल्लासे—

मूलकन्दे तु या देवी भुजगाकाररूपिणी ।
तद्भ्रमावर्त्तवातो यः प्राण इत्युच्यते बुधैः ॥ इति ।

तथा प्रोद्दामदीप्त्यावलिः । प्रोद्दामा गुर्व्वी दीप्त्यावलिः दीप्तिश्रेणी यस्यास्तथाभूता अतिशयदीप्तिशालिनीत्यर्थः ।

१३ । स्वयम्भुलिङ्गमध्ये कुण्डलिन्यूर्द्ध्वं परशक्तेरवस्थितिमाह—तन्मध्य इति । यद्भासया यस्याः परशक्तेर्दीप्त्या ब्राह्माण्डादिकटाहमाब्रह्मस्तम्भपर्य्यन्तं भासते दीप्यते सेयं नित्यप्रबोधोदया नित्यप्रबोधस्य ब्रह्मज्ञानस्य उदयो यस्याः सा ब्रह्मज्ञानजननीत्यर्थः । तथाभूता श्रीपरमेश्वरी सर्व्वेषामीश्वराणामुपरि वर्त्तमाना परमा कला अनिर्वाच्यस्वरूपा माया विजयते । तां विशेषयति—अतिकुशला दृश्यमानजगन्निर्माणे निरतिशय-

---

1, 'ति' B.

[कुलकुण्डलिनीध्यानफलम्]

ध्यात्वैतन्मूलचक्रान्तरविवरलसत्कोटिसूर्य्यप्रकाशां
[1]वाचामीशो नरेन्द्रः स भवति सहसा सर्व्वविद्याविनोदी।
आरोग्यं तस्य नित्यं निरवधि च महानन्दचित्तान्तरात्मा
वाक्यैः काव्यप्रबन्धैः सकलसुरगुरून् सेवते शुद्धशीलः॥१४॥

सिन्दूरपूररुचिरारुणपद्ममन्यत् सौषुम्णमध्यघटितं ध्वजमूलदेशे।
अङ्गच्छदैः परिवृतं तडिदाभवर्णैर्वाद्यैः सबिन्दुलसितैश्च
पुरन्दरान्तैः॥ १५ ॥

निपुणा। सूक्ष्मातिसूक्ष्मा अतिशयसूक्ष्मेत्यर्थः। परा गुणैरनाक्रान्ता। नित्यानन्दपरम्परा नित्या कालाद्यनवच्छिन्ना आनन्दपरम्परा यस्याः सा सदानन्दरूपिणी। तथा चपला मालालसद्दीधितिः चपलामालेव विद्युच्छ्रेणीरिव लसन्ती दीधितिर्यस्यास्तथाभूता।

एवञ्च स्वयम्भुवो निरुक्तकुण्डलीसार्द्धत्रिवेष्टनादूर्द्ध्वं जगन्निर्माणकुशला सूक्ष्मतमा विद्युद्दीप्ता नादात्मिका परमा कला विलसन्ती स्वतेजसा जगदखिलं भासयतीति फलितम्।

१४। कुण्डलिनीध्यानफलमाह—ध्यात्वेति। एतस्य मूलचक्रस्य मूलाधारचक्रस्य अन्तरे अभ्यन्तरे यद् विवरं गह्वरं तत्र लसन् कोटिसूर्य्याणां प्रकाश इव प्रकाशो यस्यास्तादृशीं कुण्डलिनीं ध्यात्वा सर्व्वविद्याविनोदी वाचामीशः बृहस्पतितुल्यो भवति। तस्य नित्यम् आरोग्यं जायते। तथा महानन्दचित्तान्तरात्मा महानन्द ईश्वरः तत्र चित्तं यस्य तादृशोऽन्तरात्मा यस्य तथाभूतो भवति, ईश्वरध्यानपरायणो भवतीत्यर्थः। तथा शुद्धशीलः सकलमोहापगमात् पवित्रान्तःकरणः सन् अनितरसाधारणैः काव्यप्रबन्धैः काव्यानां प्रकृष्टो बन्धो यत्र तथाभूतैर्वाक्यैः सकलसुरगुरून् सकलान् सुरगुरून् ब्रह्मविष्णुमहेश्वरादीन् सेवते। सारार्थपरिपूर्णस्तोत्राद्यात्मक-प्रबन्धरचनया सुरश्रेष्ठान् तोषयतीत्यर्थः। यद्वा सकलसुरगुरून् बृहस्पतितुल्यानखिलानपि पण्डितान् सुमधुरकाव्यप्रबन्धरचनया प्रीणयतीत्यर्थः।

१५। एवं प्रथमं मूलाधारचक्रं निरूप्य द्वितीयं स्वाधिष्ठानचक्रमाह—सिन्दूरेत्या-

---

1. '-राकाधीशो' C.

[तत्राम्भोजमण्डलं तत्र च वरुणबीजस्थितिः]

तस्यान्तरे प्रविलसद्विशदप्रकाश[1]-
मम्भोजमण्डलमथो वरुणस्य तस्य[2]।
अर्द्धेन्दुरूपलसितं शरदिन्दुशुभ्रं
[3]वङ्कारबीजममलं मकराधिरूढम् ॥१६॥

दिना ज्ञानसन्दोहलक्ष्मीरित्यन्तेन श्लोकपञ्चकेन। स्वाधिष्ठानपदव्युत्पत्तिस्तु गन्धर्व्वतन्त्रे पञ्चमपटले—

स्वशब्देन परं लिङ्गं स्वाधिष्ठानं ततो विदुः।

इत्येवं निरूपिता। तत्र पद्मस्वरूपमाह—सिन्दूरेति। ध्वजमूलदेशे लिङ्गमूले सौषुम्णमध्यघटितं सुषुम्णाया इदं सौषुम्णं यन्मध्यं सुषुम्णानाडीमध्यप्रदेश इत्यर्थः, तत्र घटितं संबद्धम् अङ्गच्छदैः षडभिर्दलैः परिवृतं सिन्दूरपूररुचिरारुणं सिन्दूरपुञ्जवन्मनोहररक्तवर्णं पद्मं वर्त्तत इति शेषः।

छदान् विशेषयति—तडिदित्यादिना। सबिन्दुलसितैः सानुस्वारैः बाद्यैर्बकाराद्यैः पुरन्दरान्तैः लकाररूपेन्द्रबीजान्तैः तडिदाभवर्णैः विद्युत्सदृशप्रभाविशिष्टैः वर्णैः बं भं मं यं रं लं इत्येतैश्च परिवृतम्। एतेन षट्पत्रेषु निरुक्ताः षड् वर्णा वर्त्तन्त इति तात्पर्य्याद्बोध्येयम्।

अयमस्य निष्कर्षः—लिङ्गमूलप्रदेशे सुषुम्णामध्ये सिन्दूरारुणमतिमनोहरं स्वाधिष्ठानपद्मं वर्त्तते, तस्य षट् पत्राणि, तेषु च पत्रेषु क्रमेण विद्युदाकारा वं भं मं यं रं लं इत्येते वर्णा विलसन्तीति।

१६। तस्येति। तस्य स्वाधिष्ठानपद्मस्य अन्तरे मध्ये प्रविलसत् शोभमानं विशदप्रकाशं शुक्लवर्णम् अर्द्धेन्दुरूपलसितम् अर्द्धचन्द्रयुक्तं तस्य जलाधिदैवततया प्रसिद्धस्य वरुणस्य अम्भोजमण्डलम्। तत्र च शरदिन्दुशुभ्रं मकराधिरूढं मकरवाहनम् अमलं वंकारबीजं वर्त्तत इति शेषः। एवञ्च बीजस्य तत्तद्देवतारूपतया अत्र वमिति वरुणबीजस्थित्या वरुणस्यापि स्थितिरवगन्तव्या।

अयमस्य निष्कर्षः—निरुक्तपद्मकर्णिकायाम् अर्द्धचन्द्रयुक्तमम्भोजमण्डलं शुक्लवर्णं तत्र शारदशशधरविशदं मकरवाहनं वरुणबीजमवतिष्ठत इति।

1. '-शा' C. 2. 'तस्याम्' C. 3. 'श-' ? C.

[वरुणबीजस्याङ्के विष्णोरवस्थानम्]

तस्याङ्कदेशलसितो हरिरेव पाया-
न्नीलप्रकाशरुचिर[1]श्रियमादधानः ।
पीताम्बरः प्रथमयौवनगर्वधारी
श्रीवत्सकौस्तुभधरो धृतवेदबाहुः ॥ १७ ॥

[अत्र स्थिताया राकिणीशक्तेः स्वरूपम्]

[2]अत्रैव भाति सततं खलु राकिणी सा
नीलाम्बुजोदरसहोदरकान्तिशोभा ।
नानायुधोद्यतकरैर्लसिताङ्गलक्ष्मी-
र्दिव्याम्बराभरणभूषितमत्तचित्ता ॥ १८ ॥

१७। तस्येति। तस्य वरुणबीजस्य अङ्कदेशे लसितः विलसितः हरिर्विष्णुरेव पायात् त्रिभुवनमिति शेषः। एवकारः पालनकर्तृत्वं हरेरेवेति सूचनार्थः। अत्राङ्कदेशलसित इति स्थितेऽपि—

सुसिद्धं ब्रह्मसदनं नादोपरि सुसुन्दरम् ।

इत्यादिनिर्वाणतन्त्रचतुर्थपटलवचनदर्शनात्नादोर्द्ध्वबिन्दौ ब्रह्मस्थितिवद्दृष्टपरिकल्पनन्यायेनात्रापि वरुणबीजनादोर्द्ध्वबिन्दौ विष्णोः स्थितिरिति केचित्। तथात्वेऽङ्कपदवैयर्थ्यं स्यात्। हरिं विशेषयति—नीलेत्यादिना। नीलश्च प्रकाशश्च नीलप्रकाशौ ताभ्यां नीलवर्णेन तेजसा चेत्यर्थः, रुचिरश्रियं मनोज्ञकान्तिमादधानः धारयन् नीलतेजःपुञ्जशरीरीत्यर्थः। सुगममन्यत्।

१८। पद्मेऽस्मिन् राकिणीशक्तेरवस्थितिमाह—अत्रैवेति। अत्र नीलाम्बुजेत्यादिविशेषणेन वैष्णवीशक्तिरियमित्यवधेयम्। मूलाधारादिषट्पद्मान्तर्गतशक्तीनां स्थितौ—

विशुद्धौ डाकिनी देवी अनाहते तु राकिणी ।
लाकिनी मणिपूरस्था काकिनी लिङ्गगोचरे ॥
आधारे शाकिनी देवी आज्ञायां हाकिनी तथा ।
याकिणी ब्रह्मरन्ध्रस्था सर्वकामफलप्रदा ॥

---

1. '-राश्रय-' C. 2 'तत्रैव' B.

[एतत्पद्मचिन्तनफलम्]

स्वाधिष्ठानाख्यमेतत् सरसिजममलं चिन्तयेद् यो मुनीन्द्र-
स्तस्याहङ्कारदोषादिकसकलरिपुः क्षीयते तत्क्षणेन।
योगीशः सोऽपि मोहाद्भुततिमिरचये भानुतुल्यप्रकाशो
गद्यैः पद्यैः प्रबन्धैर्विरचयति सुधाकाव्यसन्दोहलक्ष्मीः ॥१९॥

[मणिपूरपद्मम्, तत्र त्रिकोणे वह्निबीजस्य स्थितिश्च]

तस्योर्द्ध्वे नाभिमूले दशदललसिते पूर्णमेघप्रकाशे
नीलाम्भोजप्रकाशैरुपहितजठरे डादि-फान्तैः सचन्द्रैः।
ध्यायेद् वैश्वानरस्यारुणमिहिरसमं मण्डलं तत्त्रिकोणं
तद्बाह्ये स्वस्तिकाख्यैस्त्रिभिरभिलसितं तत्र वह्नेः स्वबीजम्॥ २० ॥

इति शाक्तानन्दतरङ्गिणीचतुर्थोल्लासधृतवचनेन तु स्वाधिष्ठाने काकिन्या मूलाधारे शाकिन्या अनाहते राकिण्या विशुद्धौ डाकिन्या अवस्थितिरिति प्रस्थानभेदो दृश्यते।

२०। एवं द्वितीयं स्वाधिष्ठानचक्रं निरूप्य तृतीयं मणिपूरचक्रमाह—तस्योर्द्ध्व इति। तस्य स्वाधिष्ठानस्य ऊर्द्ध्वे नाभिमूलप्रदेशे पूर्णमेघप्रकाशे पूर्णो गाढो यो मेघस्तस्य प्रकाश इव प्रकाशो यस्य तथाभूते गाढकृष्णवर्णे इत्यर्थः, दशदललसिते दशभिर्दलैः शोभमाने तथा नीलाम्भोजप्रकाशैः नीलपद्मकान्तिभिः सचन्द्रैः अत्र चन्द्रशब्देन बिन्दुरपि बोध्यः तेन सचन्द्रैः अर्द्धचन्द्रबिन्दुसहितैः डादि-फान्तैः डकारादिफकारान्तैर्दशभिर्वर्णैरुपहितं जठरं मध्यं यस्य तथाभूते पद्मे इति शेषः। अरुणमिहिरसमम् अरुणवर्णो यो मिहिरः सूर्य्यः बालार्क इत्यर्थः तत्सदृशं रक्तोज्ज्वलं त्रिकोणं तद् वैश्वानरस्य मण्डलं वह्निमण्डलम्, तद्बाह्ये च त्रिभिः स्वस्तिकाख्यैर्द्वारविशेषैरभिलसितं युक्तम् इति त्रिकोणविशेषणम्। तत्रेति वह्निमण्डले वह्नेः स्वबीजं रम् इति ध्यायेदिति परेण सम्बन्धः।

अत्र उपहितजठरे इत्युक्तावपि शाक्तानन्दतरङ्गिण्यां चतुर्थोल्लासे मणिपूरपद्मं प्रकृत्य—

डादि-फान्तान्वितदलैर्वर्णैर्दशभियुतम्।

इत्यभिधानाद् डादि-फान्तवर्णानां स्थितिर्दशसु दलेष्ववगन्तव्या। तथात्र पूर्णमेघ-

[तत्र रुद्रमूर्तेरवस्थितिः]

ध्यायेन्मेषाधिरूढं नवतपननिभं वेदबाहूज्ज्वलाङ्गं
तत्क्रोडे [1]रुद्रमूर्त्तिर्निवसति सततं शुद्धसिन्दूररागः।
भस्माऽऽलिप्ताङ्गभूषाभरणसितवपुर्वृद्धरूपी त्रिनेत्रो
लोकानामिष्टदाताऽभयलसितकरः सृष्टिसंहारकारी[2] ॥२१॥

प्रकाशे इति विशेषणेन पद्मस्य नीलवर्णता प्रतीयते प्रागुक्तशाक्तानन्दतरङ्गिणीवचनेन तु रक्तवर्णत्वं स्पष्टमुक्तम्। गन्धर्व्वतन्त्रे पञ्चमपटले तु—

तदूर्द्ध्वे नाभिदेशे तु मणिपूरं महत् पुरम्।
हेमाभं वैद्युताभञ्च बहुतेजोमयं तथा॥

इत्यनेन हेमाभत्वादिकं पद्मस्य विशेषणत्वेनोपपादितम्। एवञ्च स्थिते स्वरूपभेदे, श्रीनाथस्याज्ञया ध्यानार्थम् एकतरः पक्षः समाश्रयणीय इति तत्त्वम्। मणिपूरपद-व्युत्पत्तिमाह—गन्धर्वतन्त्रे पञ्चमपटले—

मणिमद्भिन्नं तं पूरं मणिपूरं ततो विदुः। इति।

अयमस्य निष्कर्षः—स्वाधिष्ठानोर्द्ध्वे नाभिमूले गाढजलधरप्रभदशदलं मणिपूराख्यं कमलम्। दलानि चोर्द्ध्वनादबिन्दुसहितैर्नीलप्रभाभास्वरैः ड-ढ-ण-त-थ-द-ध-न-प-फ-रूपैर्दशभिर्वर्णैरुपेतानि। पद्मस्य कर्णिकायामरुणारुणप्रभाभास्वरं त्रिकोणं रंबीजगर्भं स्वस्तिकाख्यद्वारत्रययुक्तं वह्निमण्डलमिति।

२१। पूर्व्वश्लोके तत्र वह्नेः स्वबीजमित्युक्तम्, तदेव वह्निबीजं विशेषयति—ध्यायेदित्यादिना। तद् वह्निबीजं कीदृशमित्यत आह—मेषाधिरूढं मेषवाहनम्, तथा नवतपन-निभं तरुणारुणरागं रक्तवर्णमित्यर्थः, तथा वेदबाहूज्ज्वलाङ्गं वेदैश्चतुर्भिर्बाहुभि-रुज्ज्वलं शोभमानमङ्गं यस्य बाहुचतुष्टयेन काञ्चनशोभामावहदित्यर्थः। एवंविधं वह्निबीजं ध्यायेदिति पूर्वेण सम्बन्धः।

अत्र रामवल्लभादिभिर्मेषाधिरूढं छागवाहनमिति व्याख्यातम्। तदसत् "छागस्थः साक्षसूत्रोऽग्नि"रित्यादिनाऽन्यत्र तस्य छागवाहनत्वेऽभिहितेऽपि—

मेषस्थं साक्षसूत्रञ्च शक्तिहस्तं स्मरेत्ततः।

इति कालीचरणकृतषट्चक्रटीकाधृतवचनेन प्रकृते वह्निबीजस्य मेषवाहनत्वेनैव ध्यानस्या-भिधानात् प्रसिद्धार्थपरित्यागेनार्थान्तरकल्पनस्यानौचित्याच्च मेषवाहनत्वेन ध्यान-

1. 'रुद्ररूपो नि-' C. 2. '-रूपी' B.

[अत्र पद्मे लाकिनीशक्तेरवस्थितिरेतत्पद्मचिन्तनफलञ्च]

तत्रास्ते लाकिनी सा सकलशुभकरी वेदबाहूज्ज्वलाङ्गी
श्यामा पीताम्बराद्यैर्विविधविरचनालङ्कृता मत्तचित्ता ।
ध्यात्वैतन्नाभिपद्मं प्रभवति नितरां संहृतौ पालने वा
वाणी तस्याननाब्जे विलसति सततं ज्ञानसन्दोहलक्ष्मीः ॥ २२ ॥

[अनाहतपद्मं तत्कर्णिकायां वायुमण्डलञ्च]

तस्योर्द्ध्वे हृदि पङ्कजं सुललितं बन्धूककान्त्युज्ज्वलं
काद्यैर्द्वादशवर्णकैरुपकृतं सिन्दूररागान्वितैः ।
नाम्नाऽनाहत[1]जीवितं सुरतरुं वाञ्छातिरिक्तप्रदं
वायोर्मण्डलमत्र धूमसदृशं षट्कोणशोभान्वितम् ॥ २३ ॥

मेव समीचीनमिति पश्यामः । अत्र वह्निबीजस्य स्थितेस्तत्र वह्नेरपि स्थितिरित्यवधेयम्, मन्त्रदेवतयोरभेदस्य सर्वतन्त्रसिद्धत्वेन वह्निबीजस्थितिं वदता ग्रन्थकृता वह्निदेवता-स्थितेरप्यभिधानात् । एवं सर्वत्र ।

तत्र रुद्रावस्थितिमाह—तत्क्रोड इति । तस्य वह्निबीजस्य क्रोडे । अत्र लोकाना-मिष्टदाता वरद इत्यर्थः ।

तदयमस्य निष्कर्षः—प्रागुक्तत्रिकोणस्थितं वह्निबीजं मेषवाहनं तरुणारुणशोणं चतुर्भुजञ्च । वह्निबीजमध्ये तु वृद्धो रुद्रो निरुक्तविशेषणविशिष्टो निवसतीति ।

२२ । तत्र लाकिनीशक्तेः स्थितिमाह--तत्रास्त इति । अत्र पद्मकर्णिकायां सा सर्व-तन्त्रप्रसिद्धा लाकिनीशक्तिरास्ते । लाकिनीं विशेषयति—सकलेत्यादिना । पीताम्बराद्यैः पीतवस्त्रादिभिरलङ्करणसाधनैरित्यर्थः, या विविधा विचित्रप्रकारा विरचना वेशविन्यासः तया अलङ्कृता । पीताम्बराद्यैरुपलक्षिता तथा विविधविरचनालङ्कृता इति वा । एतन्मणिपूरचक्रचिन्तनफलमाह—ध्यात्वैतदिति ।

२३ । एवं मणिपूरचक्रं निरूप्याऽनाहतचक्रमाह—तस्योर्द्ध्व इति । तस्य मणिपूर-पद्मस्य ऊर्द्ध्वे हृदि हृदयप्रदेशे नाम्ना अनाहतमीरितम् अनाहतसंज्ञयाभिहितमित्यर्थः पङ्कजं ध्यायेदित्यर्थः । पङ्कजं विशेषयति—सुललितमित्यादिना । सुललितं सुस्निग्धं बन्धूक-

1. '-संज्ञकम्' A-B.

[तत्र वायुबीजं तत्रेशस्थितिश्च]

तन्मध्ये पवनाक्षरञ्च मधुरं धूमावलीधूसरं
ध्यायेत् पाणिचतुष्टयेन लसितं कृष्णाधिरूढं परम् ।
तन्मध्ये करुणानिधानममलं हंसाभमीशाभिधं
पाणिभ्यामभयं [1]वरञ्च दधतं लोकत्रयाणामपि ॥ २४ ॥

कान्त्युज्ज्वलं बन्धूककुसुमवदरुणवर्णम्, तथा सिन्दूररागाञ्चितैः सिन्दूरवद्रक्तवर्णैः कादिः ककारादिभिष्ठकारान्तैः क-ख-ग-घ-ङ-च-छ-ज-झ-ञ-ट-ठ रूपैर्द्वादशवर्णैरुपकृतम् उपकरणविशिष्टं युक्तमित्यर्थः। अत्र उपहितमिति कालीचरणटीकायां उपहृतमिति च रामवल्लभटीकायां पाठो दृश्यते तयोरपि तत्र तत्र युक्तमित्येवार्थः ; तथा वाञ्छातिरिक्तप्रदं सुरतरुम् अन्यः कल्पवृक्षो वाञ्छितमेव वस्तु प्रार्थिनेऽर्पयति एतत्पङ्कजरूपकल्पवृक्षस्तु वाञ्छितादप्यधिकं ददातीति तात्पर्य्यम्। वायोरिति। अत्र पद्मकर्णिकायां धूमसदृशं धूम्रवर्णं वायोर्मण्डलं ध्यायेत्। किम्भूतम्? षट्कोणशोभान्वितम्। एतेन वायुमण्डलं षट्कोणमिति दर्शितम्। व्यक्तमाह निर्वाणतन्त्रे सप्तमपटले—

एतत्पद्मस्योर्द्ध्वदेशे विमलं पद्मसुन्दरम् ।
शोभितं द्वादशैः पत्रैः शोणवर्णसमन्वितम् ॥
पद्ममध्ये बीजकोषे षट्कोणमण्डलं शुभम् ।
मण्डलस्य मध्यदेशे वायुबीजं मनोहरम् ॥ इति ।

एवञ्च बीजकोषान्तःषट्कोणे वायुबीजस्थितिरिति गम्यते। अनाहतपदव्युत्पत्तिमाह तन्त्रसारे—

शब्दब्रह्ममयं शब्दोऽनाहतस्तत्र दृश्यते ।
अनाहताख्यं पद्मं तन्मुनिभिः परिकीर्त्यते ॥ इति ।

अत्र शब्दब्रह्ममयमिति प्रक्रान्तपद्मविशेषणम् ।

अयमस्य निष्कर्षः—मणिपूरोर्द्ध्वे हृदये बन्धूककुसुमशोणं सुस्निग्धं द्वादशदलं चतुर्थमनाहताख्यं पद्मम्, तस्य च दलेषु एकैकशः सिन्दूरसवर्णाः क-ख-ग-घ-ङ-च-च-छ-ज-झ-ञ-ट-ठ-रूपान् द्वादश वर्णान् कर्णिकायां धूमधूम्रं षट्कोणं वायुमण्डलं ध्यायेदिति।

२४। तन्मध्य इति। तस्य वायुमण्डलस्य मध्ये पवनाक्षरं यम् इति वायुबीजं

---

1. 'वरं विदधतं' C.

[एतत्पद्मकर्णिकायां काकिनीशक्तेरवस्थितिः]

अत्रास्ते खलु काकिनी नवतडित्पीता त्रिनेत्रा शुभा
सर्वालङ्करणान्विता हितकरी [1]सम्यग् जनानां मुदा।
हस्तैः पाश[2]कपालशोभनवरान् संबिभ्रती चाभयं
मत्ता पूर्णसुधारसार्द्रहृदया कङ्कालमालाधरा॥ २५॥

ध्यायेदिति शेषः। वायुबीजं विशेषयति—मधुरमित्यादिना। मधुरं माधुर्य्यविशिष्टम् आनन्दमयमित्यर्थः।

अनाहताख्यं पद्मं तन्मुनिभिः परिकीर्त्यते।
आनन्दसदनं तत्तु पुरुषाधिष्ठितं परम्॥

इति तन्त्रसारवचनात्। धूमावलीधूसरमिति धूमपुञ्जधूसरवर्णं पाणिचतुष्टयेन लसितं चतुर्बाहुं कृष्णाधिरूढं कृष्णसारवाहनं परं श्रेष्ठमिति विशेषणचतुष्टयं वायुबीजस्य। अत्र वायुबीजस्थित्या समानवर्णवाहनवायुदैवतस्थितिरपि पूर्ववदुन्नेया।

एवं वायुबीजस्य स्वरूपं निरूप्य तदन्तरीश्वरावस्थितिमाह—तन्मध्य इति। तन्मध्ये वायुबीजमध्ये ईशाभिधम् ईश्वराख्यं शिवं चिन्तयेदित्यर्थः।

ब्रह्मा विष्णुश्च रुद्रश्च ईश्वरश्च सदाशिवः।

इत्यादि ईश्वराख्यस्याऽनाहतपद्माधिष्ठातृत्वावधारणात्। ईशं विशेषयति—हंसाभमित्यादिना। हंसाभं शुक्लवर्णं तथा पाणिभ्यां लोकत्रयाणामपि अभयं वरञ्च दधतं विदधानमित्यर्थः।

तथाचायमस्य निष्कर्षः—प्रागुक्तवायुमण्डलान्तर्धूमधूम्रं कृष्णसारवाहनं चतुर्भुजं वायुबीजम्। तदन्तर्वराभयकरं शुक्लवर्णं करुणामयम् ईश्वराभिधानं शिवं ध्यायेदिति।

२५। अत्र पद्मे पद्मकर्णिकायामित्यर्थः काकिनीशक्तिरास्ते। अत्राविशेषेणोक्तावपि ईशपार्श्वे काकिन्याः स्थितिरवधेया रुद्रजामलोत्तरखण्डे सप्तपञ्चाशत्तमपटले—

ईश्वरं योगिनामीशं ध्यायेद् हृत्पद्ममण्डले।

इत्यनेनेश्वरध्यानमभिधाय—

'तत्पार्श्वे ध्यानमाकुर्य्यात् काकिनीं परमेश्वरीम्'।

इत्यनेन काकिन्या ईश्वरपार्श्ववर्त्तित्वप्रतिपादनादिति ध्येयम्। सा कीदृशीत्याह—नवेत्यादि। पूर्णसुधारसार्द्रहृदया—पूर्णः पूर्णानन्दकरो यः सुधारसः सहस्रारान्तराल-

---

1. 'योगीश्वराणां मुदा' C. 2 '-त्रिशूल-'? C.

[एतत्पद्मकर्णिकन्तस्त्रिकोणाकारा शक्तिर्बाणलिङ्गञ्च]

एतन्नीरजकर्णिकान्तरलसच्छक्तिस्त्रिकोणाभिधा
विद्युत्कोटिसमानकोमलवपुः सास्ते तदन्तर्गता ।
बाणाख्यः शिवलिङ्गकोऽपि कनकाकाराङ्गरागोज्ज्वलो
मौलौ सूक्ष्म[1]विभेदयुङ्मणिरिव प्रोल्लासलक्ष्म्यालयः ॥ २६॥

वर्त्तिशिवशक्तिसामरस्यगलितामृतरसः तेनार्द्रं हृदयं यस्यास्तथाभूता तदुक्तं रुद्रजामलोत्तरे सप्तपञ्चाशत्तमपटले—

त्रैगुण्यललितां सूक्ष्मां वराभयकराम्बुजाम् ।
सुधापानरतां मत्तां परिपूर्णां कुलेश्वरीम् ॥ इति ।

रहस्यमिदं सहस्राख्याख्याने विशदीकरिष्यामः । स्पष्टमन्यत् ।

अयमस्य निष्कर्षः—एतत्पद्मकर्णिकायां त्रिनेत्रा चतुर्भुजा पीतवर्णा शुभकारिणी नानालङ्करणकृतवेशविन्यासा आनन्देन साधकानां हितं सम्पादयन्ती पाशकपालवराभयकरा मदमत्ता सहस्रारगलितामृतरसेनार्द्रीकृतहृदया कङ्कालमालिनी काकिनीशक्तिः शोभत इति ।

२६ । अनाहतपद्मस्यास्य कर्णिकायां त्रिकोणाकारशक्तेर्बाणाख्यलिङ्गस्य चावस्थितिमाह—एतदित्यादिना । एतस्य अनाहताख्यस्य नीरजस्य पद्मस्य या कर्णिका तस्या अन्तरे वायुबीजादधस्तात् लसन्ती या शक्तिः सा त्रिकोणाभिधा त्रिकोणाकारतया त्रिकोणेति नाम्ना प्रसिद्धा आस्ते । अत्र शक्तेस्त्रिकोणाकारत्वाभिधानात् त्रिकोणस्य योनिरूपतया तस्याऽधोमुखत्वमिति सूच्यते । शक्ते रूपमाह—विद्युदिति । विद्युत्कोटिसमानं कोटिकोटिविद्युत्समानतेजःपुञ्जं कोमलञ्च वपुर्यस्यास्तादृशी । तदन्तर्गता तस्य त्रिकोणस्यान्तर्गता इत्यर्थः । अत्र त्रिकोणशक्त्योरभेदेऽपि तदन्तर्गतेति पदमौपचारिकं तदभिन्नेत्यर्थः । रुद्रजामले सप्तपञ्चाशत्तमपटले—

तत्पीठध्याननिकरे त्रिकोणां परिचिन्तयेत् ।
पीठशक्तिं सुवर्णाढ्यां विद्युत्कोटिसमोदयाम् ।
काकिनीसदृशीं मत्तां पूर्णान्तःकरणोद्यताम् ॥

इत्यनेन त्रिकोणशक्त्योरभेदाभिधानात् । यत्तु कालीचरणेन तदन्तर्गत इति पाठं बाणाख्यः शिवलिङ्गक इत्यस्य विशेषणत्वेनाङ्गीकृत्य—

1. '-सरन्ध्रकोमलमिव' C.

[एतदनाहतपद्मचिन्तनफलम्]

ध्यायेद् यो हृदि पङ्कजं सुरतरुं शर्वस्य पीठालयं
देवस्यानिलहीनदीपकलिकाहंसेन संशोभितम् ।
भानोर्मण्डलमण्डितान्तरलसत्किञ्जल्कशोभाकरं[1]
वाचामीश्वर ईश्वरोऽपि जगतां रक्षाविनाशक्षमः[2] ॥ २७ ॥

त्रिकोणान्तर्बाणलिङ्गं कनकाभरणैर्युतम् ।

इत्यादिवचनं स्वमतसमर्थनानुकूलमुदाहृतं तदपि त्रिकोणाकारशक्तिदक्षपार्श्वे बाणाख्य-लिङ्गस्थितिपरत्वेन व्याख्येयम्, रुद्रयामलोत्तरखण्डे सप्तपञ्चाशत्तमपटले त्रिकोणशक्ति-मुपक्रम्य—

तद्दक्षिणे पार्श्वभागे चिन्तयेद् बाणलिङ्गकम् ।
सुवर्णशुद्धसङ्काशं निर्मलं चारुतेजसम् ।
महालक्ष्मीप्रियानन्दं सर्वाकारं निरञ्जनम् ।
ज्ञानयोगोदयं ब्रह्मरूपिणं बहुरूपिणम् ।
प्रदीपकलिकाकारं चिन्तयेदीश्वरं शिवम् ॥

इत्यनेन तद्दक्षे बाणलिङ्गस्थितेरभिधानात् । एवञ्च बाणाख्य इत्यादेरयमर्थः,—निरुक्त-त्रिकोणशक्तिदक्षभागे बाणाख्यः शिवलिङ्गकोऽपि आस्ते । स कीदृशः ? कनका-काराङ्गरागोज्ज्वलः कनकवदुज्ज्वलकान्तिः । तथा मौलौ मस्तके सूक्ष्मविभेदयुक सूक्ष्मच्छिद्रयुक्तो मणिरिव, मणेरुपरि सूक्ष्मं छिद्रमिव बाणशिरसि सूक्ष्मो बिन्दुः प्रकाशत इत्यर्थः । प्रोल्लासेति । प्रकृष्ट उल्लासो यस्यास्तादृशी या लक्ष्मीस्तस्या आश्रयः शोभातिशयविशिष्ट इत्यर्थः । शृङ्गाररसोल्लासवानिति वा ।

तथा चायमस्य निष्कर्षः—निरुक्ताऽनाहतकमलकर्णिकायां वायुबीजादधः कोटिविद्यु-द्दीप्ता कोमला च त्रिकोणाकारा शक्तिः, तद्दक्षिणपार्श्वे कनकोज्ज्वलकान्तिः सार्द्धचन्द्र-बिन्दुशिरस्कः शोभातिशयसम्पन्नो बाणलिङ्गाख्यः शिवो वर्त्तत इति ।

२७ । अथाऽनाहतपद्मस्यावशिष्टं स्वरूपं चिन्तनफलञ्चाह—ध्यायेदिति । यः साधको हृदि पङ्कजमनाहताख्यं ध्यायेत्, स वाचामीश्वरः बृहस्पतितुल्यः सर्व्व-शास्त्रार्थवेत्ता वाक्पटुश्च भवति । तथा जगतां रक्षाविनाशक्षम ईश्वरोऽपि भवति । अत्रापिशब्देन सृष्टेरपि संग्रहः, ततश्च सृष्टिस्थितिसंहारक्षमो भवतीत्यर्थः । यद्वा

---

1. 'तरं' ? C. 2. '-शे' C.

योगीशो भवति प्रियात् प्रियतमः कान्ताकुलस्यानिशं
ज्ञानीशोऽपि कृती जितेन्द्रियगणो ध्यानावधान[1]क्षमः ।
गद्यैः पद्यपदादिभिश्च सततं काव्याम्बुधारावहो
लक्ष्मी रङ्गणदैवतं परपुरे शक्तः प्रवेष्टुं क्षणात् ॥ २८ ॥

न केवलं वाचामीश्वरः जगतामपि ईश्वरः अधिपतिर्भवति, कीदृशः ? रक्षाविनाशक्षमः । एततूपद्मध्यानफलभूतमाधिपत्यमधिगम्य भगवत्सृष्टस्य जगतः पालनं विनाशञ्च कर्त्तुं प्रभवतीत्यर्थः । पद्मं कीदृशमित्यत आह—सुरतरुं कल्पवृक्षस्वरूपम् अभीष्टसम्पादकमित्यर्थः । तथा देवस्य द्योतनशीलस्य शर्वस्य पीठालयं निवासस्थानम् । तथा अनिलहीनदीपकलिकाहंसेन अनिलहीना निर्वाता या दीपकलिका वायुसञ्चाररहितनिष्कम्पदीपशिखा तदाकारेण हंसेन जीवात्मना संशोभितम् । निवातनिष्कम्पदीपशिखानिश्चलो जीवात्मा हृत्पद्मे ऽस्मिन् वर्त्तत इत्यर्थः । तथा भानोर्मण्डलेन सूर्य्यमण्डलेन मण्डितम् अन्तरं येषां तथाभूता अत एव लसन्तः अरुणकिरणसम्पर्केण शोभाविशेषं वहन्तः ये किञ्जल्काः केशराः तेषां या शोभा तस्या आकरम् आधारभूतमित्यर्थः । रुद्रयामलोत्तरखण्डे सप्तपञ्चाशत्तमपटले अनाहतपद्मं प्रकृत्य—

एतेषां ध्यानमाकृत्य वागीशो भवति क्षणात् ।
राज्यसिद्धिं तत्र नाथ चिन्तयेत्तत्प्रसिद्धये ।
तत्र भानोर्मण्डलञ्च चिन्तयेत् साधकाग्रणीः ॥
पद्मकिञ्जल्कमध्ये तु चिन्तयेदरुणायुतम् ।
मासैकसाधनादेव योगी स्याच्छीतलाङ्कभृक् ॥

इत्यादिना पद्मस्य कर्णिकान्तर्भानुमण्डलचिन्तनमुपदिश्य केशरेष्वपि सूर्य्यायुतचिन्तनाभिधानात् प्रकृतेऽपि केशराणां भानुमण्डलमण्डितत्वमुपपद्यत एव ।

एवञ्चायमस्य निष्कर्षः—प्रागुक्तबाणलिङ्गादधो निरुक्तरूपो जीवात्मा, पद्मस्य कर्णिकान्तः सूर्य्यमण्डलं किञ्जल्कानामभ्यन्तरप्रदेशाश्च सौरकिरणनिकरपरिशोभिता इति ।

२८ । श्लोकान्तरेण फलान्तरमाह—योगीश इति । यः साधकः पद्ममिदं प्रागुक्तक्रमेण चिन्तयेत् स योगीशः योगिश्रेष्ठो भवति । तथा अनिशं कान्ताकुलस्य प्रियात्

1, '-ने' B.

[विशुद्धपद्मम् तत्कर्णिकायां नभोमण्डलस्थितिश्च]

विशुद्धाख्यं कण्ठे सरसिजममलं [1]धूमधूम्रावभासं
स्वरैः [2]सर्वैः शोणैर्दलपरिलसितैर्दीपितं दीप्तबुद्धेः ।
समास्ते पूर्णेन्दुप्रथिततमनभोमण्डलं वृत्तरूपं
[3]हिमच्छायानागोपरि लसिततनोः शुक्लवर्णाम्बरस्य ॥ २९ ॥

प्रियतमः अतिशयेन प्रिय इत्यर्थः । ज्ञानीशः ज्ञानिनां श्रेष्ठः । अत्र योगीश-ज्ञानीशपदद्वयेन कर्मज्ञानोभयाधीशत्वं प्रदर्शितम् । अपिशब्दस्तथार्थे । कृती पण्डितः । जितेन्द्रियगणः जितः इन्द्रियगणो येन, एतेन ज्ञानोदयाद् विषयासक्तिराहित्येन बीजरूपेण स्थितानामपि वासनानां सर्वथापगमादिन्द्रियजयः सुतरामेव भवतीत्युक्तम् । तदुक्तं श्रीमद्भगवद्गीतायाम्—

विषया विनिवर्त्तन्ते निराहारस्य देहिनः ।
रसवर्जं रसोऽप्यस्य परं दृष्ट्वा निवर्त्तते ॥ इति ।

तथा ध्यानावधानक्षमः ध्याने ब्रह्मस्वरूपचिन्तने यत् अवधानं सुतरामभिनिवेशस्तत्र क्षमो भवति । काव्याम्बुधारावहः निरन्तरकाव्यामृतरसास्वादनविदग्धः । तथा लक्ष्मी रङ्गणदैवतं लक्ष्म्या रङ्गणस्य क्रीडनस्य दैवतं देवता नारायणस्तत्सदृश इत्यर्थः । वृन्दारका दैवतानि पुंसि वेत्यमरः । दन्त्यनकारवत् पाठे तु तस्य लक्ष्मीः अङ्गनदैवतं भवतीति । स परपुरे परशरीरे क्षणात् प्रवेष्टुं शक्तः । एतच्चिन्तनेन परकायप्रवेशयोग्यतां लभत इत्यर्थः ।

२९ । एवमनाहतपद्मं निरूप्य विशुद्धाख्यं पद्ममाह—विशुद्धेति । पद्मस्यास्य विशुद्धसंज्ञाहेतुमाह शाक्तानन्दतरङ्गिण्यां चतुर्थोल्लासे—

विशुद्धिस्तन्यते यस्माज्जीवस्य हंसलोकनात् ।
विशुद्धपद्ममाख्यातमाकाशाख्यं महाद्भुतम् ॥ इति ।

कण्ठे कण्ठप्रदेशे विशुद्धाख्यं विशुद्धाभिधानं सरसिजं पद्मं समास्ते । सरसिजं विशेषयति—अमलमित्यादिना । अमलं मलरहितम् । तथा धूमधूम्रावभासं धूमवत् धूम्रः अवभासो दीप्तिर्यस्य तथाभूतम् । एतेन धूम्रवर्णमिदं पद्ममित्युक्तं भवति । पत्रेषु वर्णानां संस्थितिं विशेषणप्रदर्शनमुखेनाह—स्वरैरिति । दलपरिलसितैः दलेषु

1. 'धूप-' C. 2. 'शोणैः सर्वैः' B. 3. 'ईषच्छाया-' B.

[तत्र सदाशिवस्थितिः]

भुजैः पाशाभीत्यङ्कुशवरलसितैः शोभिताङ्गस्य तस्य
मनोरङ्के नित्यं निवसति गिरिजाभिन्नदेहो हिमाभः ।
त्रिनेत्रः पञ्चास्यो ललितदशभुजो व्याघ्रचर्माम्बराढ्यः
सदापूर्वो देवः शिव इति च समाख्यानसिद्धिप्रसिद्धः[1] ॥३०॥

षोडशसु परिलसितैः शोभमानैः शोणैः रक्तवर्णैः सर्वैः स्वरैः अकारादिविसर्गान्त-षोडशस्वरैरित्यर्थः दीप्तबुद्धेः अनवरतयोगाभ्यासविशुद्धमतेः साधकस्य सम्बन्धे दीपितम् । निरन्तरयोगानुशीलननिरस्तमलाः समुन्मीलितज्ञानप्रकर्षाः साधका एव रहस्यमिदमवगन्तुं प्रभवेयुरित्यर्थः ।

अत्र दलपरिलसितैरित्येतावन्मात्रेणानुक्तायामपि दलसंख्यायां स्वरैः सर्वैरित्यनेन पत्रेषु षोडशस्वराणां स्थितेरभिधानाद् दलानामपि षोडशसंख्याकत्वमवगम्यते। तेनैकैकस्मिन् दले एकमेकं स्वरं चिन्तयेदित्यर्थः। व्यक्तमाह शाक्तानन्दतरङ्गिण्यां चतुर्थोल्लासे—

कण्ठदेशे विशुद्धाख्यं धूम्रवर्णं मनोहरम् ।
अकारादिस्वरोपेतैर्दलैः षोडशभिर्युतम् ॥ इति ।

कर्णिकायां नभोमण्डलस्थितिमाह—पूर्णेति। पूर्णेन्दुप्रथिततमनभोमण्डलं पूर्णचन्द्र-सदृशभास्वरशुक्लवर्णं नभोमण्डलं समास्ते। मण्डलस्याकारमाह—वृत्तरूपमिति वृत्ताकारमित्यर्थः ।

परश्लोके मनोरङ्के इत्यनेनाभिधास्यमानं मनुं विशेषयति—हिमेत्यादिना। मनोः कीदृशस्य ? हिमच्छायायुक्तो यो नागः श्वेतवर्णहस्ती तस्य उपरि लसिता तनुर्यस्य तादृशस्य, तथा शुक्लाम्बरस्य शुक्लवर्णपरीधानस्येति ।

३०। भुजैरिति। पाशाभीत्यङ्कुशवरलसितैर्भुजैः चतुर्भिरिति शेषः। अत्र पाशादीनां चतुर्णामभिधानाद् भुजानामपि चतुःसंख्याकत्वं बोध्यम्। तथाच निरुक्त-लक्षणैर्भुजैः शोभितमङ्गं यस्य तादृशस्य मनोः 'हं' इत्यात्मकस्य नभोबीजस्य अङ्के क्रोडे सदापूर्वो देवः शिवः सदाशिवो देवः इत्यस्य समाख्यानस्य या सिद्धिस्तया प्रसिद्धः नित्यं कालाद्यनवच्छिन्नं यथा स्यात्तथा निवसति। अत्र नभोबीजस्थितेरभिधानान्नभसोऽपि स्थितिः पूर्ववदुन्नेया। सदाशिवं विशेषयति—त्रिनेत्र इत्यादिना। गिरिजाभिन्नदेहः

1. प्रसिद्धिः B.

[एतत्पद्मकर्णिकायां शाकिनीशक्तेश्चन्द्रमण्डलस्य चावस्थितिः]

सुधासिन्धोः शुद्धा निवसति कमले शाकिनी पीतवस्त्रा[1]
शरं चापं पाशं सृणिमपि दधती हस्तपद्मैश्चतुर्भिः ।
सुधांशोः संपूर्णं शशपरिरहितं मण्डलं कर्णिकायां
महामोक्षद्वारं श्रियमभि मतशीलस्य[2] शुद्धेन्द्रियस्य ॥३१॥

गिरिजया भिन्नः सम्भिन्नः देहो यस्य सः अर्द्धनारीश्वर इत्यर्थः। सदाशिवस्य दशभुजत्वं वृषवाहनत्वञ्चाह महानिर्वाणतन्त्रे चतुर्दशपटले—

"गङ्गाधरं दशभुजं शशिशोभितमस्तकम्" ।

"हिमकुन्देन्दुसङ्काशं वृषासनविराजितम्" ।

इत्यनेन ।

३१। सुधेति। अस्मिन् कमले कर्णिकायां शाकिन्याख्या शक्तिर्निवसति। सा च सुधासिन्धोः सुधासमुद्रादपि शुद्धा शुक्लवर्णा। अनेनामृतादपि साधकानां तृप्तिसम्पादिकेत्यपि सूच्यते। कर्णिकायां चन्द्रमण्डलस्थितिमाह—सुधांशोरिति। कर्णिकायां सुधांशोश्चन्द्रस्य शशपरिरहितं निष्कलङ्कं संपूर्णं मण्डलं विलसतीत्यर्थः। एवञ्च कर्णिकायां नभोमण्डलचन्द्रमण्डलयोरुभयोः स्थितेरभिधानात् कर्णिकान्तर्नभोमण्डलमध्ये चन्द्रमण्डलं तत्र नभोबीजं तत्रार्द्धनारीश्वरः सदाशिवः शाकिनीशक्तिश्चेत्यवधेयम्। मण्डलं विशेषयति—महेति। श्रियं योगलक्ष्मीमभि लक्षीकृत्य मतं प्रशस्तं शीलं यस्य तादृशस्य योगाभ्यासपरायणस्येत्यर्थः अत एव शुद्धेन्द्रियस्य योगाभ्यासविशुद्धमनसः साधकस्य महामोक्षद्वारम् निर्वाणमुक्तिहेतुभूतमित्यर्थः।

अत्र पद्मकर्णिकायां वृत्तरूपनभोमण्डलान्तर्गतनभोबीजान्तः सदाशिवस्थितिमाह। निर्वाणतन्त्रेऽष्टमपटले तु—

पद्ममध्ये वराटे च जनलोकं सुसुन्दरम् ।
महामोहान्ध्यशमनं तद्बाह्ये चन्द्रमण्डलम् ।
तथा—बीजकोषे मणिद्वीपे षट्कोणचक्रमुत्तमम् ।
यन्त्रमध्ये च वृत्ताभं महासिंहासनं ततः ।

---

1. '-वर्णा' B. 2. '-मपि दधच्छील-' B.

[एतत्पद्मचिन्तनफलम्]

इह स्थाने चित्तं निरवधि विनिधायात्मसंपूर्णयोगः
कविर्वाग्मी ज्ञानी स भवति नितरां साधकः शान्तचेताः ।
त्रिलोकानां दर्शी सकलहितकरो रोगशोकप्रमुक्त-
श्चिरञ्जीवी जीवी निरवधिविपदां ध्वंसहंसप्रकाशः ॥ ३२ ॥

[भ्रूमध्ये द्विदलमाज्ञापद्मं तत्कर्णिकायां हाकिनीशक्तेरवस्थितिश्च]

आज्ञा[1]ख्यानाम्बुजं तद्धिमकरसदृशं[2] ध्यानधामप्रकाशं
[3]हक्षाभ्यां वै कलाभ्यां प्रविलसितवपुर्नेत्रपत्रं सु[4]शुभ्रम् ।
तन्मध्ये हाकिनी सा शशिसमधवला वक्त्रषट्कं दधाना
[5]विद्यां मुद्रां कपालं डमरुजपवटीं बिभ्रती [6]शुभ्रचित्ता ॥३३॥

तस्योपरि सदा गौरी दक्षभागे सदाशिवः ।
त्रिनेत्रः पञ्चवक्त्रश्च प्रतिवक्त्रे त्रिलोचनः ।
विभूतिभूषिताङ्गश्च रजताचलसोदरः ।
व्याघ्रचर्म्मधरो देवो मणिमालाविभूषितः ।
तथा—सर्वानन्दकरो देवो अर्द्धनारीश्वरो विभुः ।

इत्यादिना बीजकोषबाह्ये चन्द्रमण्डलं बीजकोषान्तः षट्कोणचक्रं तन्मध्ये वृत्तं तदन्तः सिंहासनं तत्रार्द्धनारीश्वरः सदाशिव इति क्रमो दृश्यते ।

३२। इहेति। आत्मसंपूर्णयोगः आत्मनि संपूर्णो योगो यस्य सः। स्पष्टमन्यत् ।

३३। एवं विशुद्धचक्रमभिधायाज्ञाचक्रमाह—आज्ञेति । तत् प्रसिद्धमाज्ञेत्याख्यानं यस्य तथाभूतं नेत्रपत्रं द्विदलम् अम्बुजं वर्त्तत इति शेषः। अस्याज्ञानामबीजमाह शाक्तानन्दतरङ्गिण्यां चतुर्थोल्लासे—

आज्ञासंक्रमणन्तत्र गुरोराज्ञेति विश्रुतम् । इति ।

अत्र विशेषतोऽनभिधानेऽपि एतदम्बुजस्यावस्थितिर्भ्रूमध्य इति ज्ञेयम् । तदुक्तं शाक्तानन्दतरङ्गिण्यां चतुर्थोल्लासे—

आज्ञा नाम भ्रुवोर्मध्ये चक्रञ्च द्विदलं परम् । इति ।

---

1. '-नामा-' C. 2. '-तुहिनकरसमं', C. 3. 'हस्ताभ्यां' ? C. 4. 'सूक्ष्मम्-' C. 5. 'विद्यामुद्राकपालं' C. 6. 'शुद्ध-' C.

[आज्ञापद्मकर्णिकायां मनसः, कर्णिकान्तस्त्रिकोणे इतराख्यशिवस्य प्रणवस्य च स्थितिः]

एतत्पद्मान्तराले निवसति च मनः सूक्ष्मरूपं [1]प्रसिद्धं
योनौ तत्कर्णिकायां [2]त्वितरशिवपदं लिङ्गचिह्नप्रकाशम् ।
विद्युन्मालाविलासं परमकुलपदं ब्रह्मसूत्रप्रबोधं
वेदानामादिबीजं स्थिरतरहृदयश्चिन्तयेत्तत् क्रमेण ॥३४॥

हिमकरसदृशं शुक्लवर्णम् । तथा ध्यानस्य धाम्ना प्रकाशो यस्य तथाभूतम् । तथा कलाभ्यां हक्षाभ्यां कलाशब्देन देवतोच्यते । अत्र कलाया बीजभूते वर्णे कलात्वोपचारः । तथाच तत्तदुपास्यदेवताकारणीभूताभ्यां हकारक्षकारवर्णाभ्यां प्रविलसिते वपुषी ययोस्तथाभूते नेत्रपत्रे यस्य तादृशम् अत एव सुशुभ्रम् अतिशयेन शुभ्रमित्यर्थः । हिमकरसदृशमित्यनेन पद्मस्य स्वतः शुभ्रत्वम्, सुशुभ्रमित्यनेन च शुभ्रवर्णहकार-क्षकारसंयोगात् शुभ्रत्वस्यातिशय्यमिति सूचितम् ।

एतत्कर्णिकायां हाकिनीशक्तेरवस्थितिमाह—तन्मध्य इति । तस्य पद्मस्य मध्ये कर्णिकायां सा प्रसिद्धा हाकिनीशक्तिर्विलसतीत्यर्थः । तां विशेषयति—शशीत्यादिना । शशिसमधवला एतेनास्याः शीतलकिरणत्वं धावल्यञ्चोक्तम् । विद्यामिति । हस्ते विद्या-मुद्रादिकं दधती । जपवटीं जपमालाम् । तथा शुभ्रचित्ता शुभ्रं चित्तं यस्याः सा ।

तथाच भ्रुवोर्मध्य आज्ञापद्मं शुक्लवर्णं द्विदलं दलयोर्हक्षरूपवर्णद्वयमतिशुभ्रम् । पद्मस्य कर्णिकायां हाकिनीशक्तिः षड्वक्त्रा शुक्लवर्णा विद्यावराभयकपालडमरुजपवटी-समलङ्कृतषड्भुजा विराजत इति फलितम् ।

३४। एतदिति । एतत्पद्मस्य आज्ञाख्यस्य अन्तराले कर्णिकायां मनो निवसति । मनः कीदृशमित्याह—सूक्ष्मरूपमतीन्द्रियम् । अतीन्द्रियञ्चेत्तस्यास्तित्वे किं मानमित्यत आह—प्रसिद्धमिति सर्वशास्त्रप्रसिद्धमित्यर्थः । एतत् कर्णिकान्तस्त्रिकोणे इतराख्य-शिवलिङ्गस्थितिमाह—योनाविति । तत्कर्णिकायां योनौ योन्याकारत्रिकोणे इतरशिवपदं इतराख्यशिवरूपं वस्तु वर्त्तते इतरशिवस्याकारं निरूपयति—लिङ्गेति, लिङ्गाकार-मित्यर्थः ।

अत्र स्थितं प्रणवं निरूपयति—विद्युदिति । इतः प्रभृति सर्वाण्येवादिबीजमित्यस्य विशेषणानि । विद्युन्मालाविलासं विद्युच्छ्रेणीसदृशकान्तिविशिष्टं, परमकुलपदम् अत्र

1, 'त्रि-' B. 2. 'द्वितय-' C,

[एतच्चिन्तनफलम्]

ध्यानात्मा साधकेन्द्रो भवति परपुरे शीघ्रगामी मुनीन्द्रः
सर्वज्ञः सर्वदर्शी सकलहितकरः [1]सर्वशास्त्रार्थवेत्ता ।
अद्वैताचारवादी[2] [3]विलसति परमापूर्वसिद्धिप्रसिद्धो
दीर्घायुः सोऽपि कर्त्ता त्रिभुवनभवने संहृतौ पालने च ॥३५॥

कुलशब्देन त्रिकोणाकारशक्तिरुच्यते। तथाच परमं कुलं शक्त्यात्मकं त्रिकोणं पदं स्थानं यस्य तथाभूतम् एतेन निरुक्तेतरशिवोर्द्ध्वे त्रिकोणे वेदादिबीजस्य स्थितिरभिहिता। तथा ब्रह्मसूत्रप्रबोधं ब्रह्मसूत्रस्य ब्रह्मनाड्याः प्रबोधो यस्मात् तत्। अस्यैव प्रणवस्य तेजसा ब्रह्मनाड्यन्तःस्थितानां ज्ञानमुपजायत इत्यर्थः। स्थिरतरहृदयः साधकः एवंविधं वेदानामादिबीजं प्रणवं तत् निरुक्तं हाकिन्यादिकं क्रमेण चिन्तयेदित्यर्थः।

अत्र यद्यपि तन्मध्ये चित्रिणी सा प्रणवविलसितेत्यादि-तृतीयश्लोके प्रणवविलसितेत्यनेन चित्रिण्या एव प्रणवविलसितत्त्वमुक्तं तथापि आज्ञाचक्रस्थितेन प्रणवेन चित्रिण्यन्तःस्थिताया ब्रह्मनाड्या अपि प्रणवविलसितत्वमुन्नेयम् अतो ब्रह्मसूत्रप्रबोधमिति सुष्ठूपपद्यते। न च ब्रह्मसूत्रपदमत्र चित्रिणीनाडीबोधकमिति वाच्यं तत्साधकप्रमाणाभावात्।

तथाच तस्याज्ञानाम्नः पद्मस्य कर्णिकायां मनः, कर्णिकान्तस्त्रिकोणे इतराख्यं शिवलिङ्गं, तदूर्द्ध्वे त्रिकोणे विद्युन्मालासदृशदीप्तिशाली प्रणवो वर्त्तत इति फलितम्।

३५। एतच्चिन्तनफलमाह—ध्यानात्मेति। ध्यानात्मा एतत्पद्मध्याननिष्ठः साधकेन्द्रः साधकश्रेष्ठः परपुरे शीघ्रगामी भवति, ध्यानप्रभावेण तूर्णं परकायप्रवेशक्षमो भवतीत्यर्थः। तथा मुनीन्द्रो मननशीलानां श्रेष्ठः सर्वज्ञः सर्ववेत्ता सर्वदर्शी एकत्र स्थितोऽपि करतलकलितामलकफलवदखिलजगदवलोकनक्षम इत्यर्थः, सकलहितकरः कायमनोवाग्भिः सर्वेषां हितसाधकः सर्वशास्त्रार्थवेत्ता च भवतीत्यर्थः। अद्वैताचारवादी सर्वं खल्विदं ब्रह्मेत्यादिश्रुतिप्रतिपाद्यं यद् ब्रह्माद्वैतज्ञानं तत्र य आचारः जीवात्मपरमात्मनोरभेदचिन्तनादिरूपो योगस्तं वदतीति। स्वयं ब्रह्माद्वैतमनुभूय तस्यैव पारमार्थिकतां प्रमाणयतीत्यर्थः। परमा प्रकृष्टा अपूर्वा इतरयोगिभिः पूर्वमनधिगता या सिद्धिस्तया प्रसिद्धः तथा दीर्घायुस्त्रिभुवनभवने त्रिभुवनस्य सृष्टौ संहारे पालने च कर्त्ता भवतीत्यर्थः।

1, 'सर्वशास्त्रस्य' C, 2. 'वेदी' C. 3, 'विदलित' C,

[आज्ञाचक्रे प्रणवघटकवर्णानामवस्थितिः]

तदन्तश्चक्रेऽस्मिन्निवसति सततं शुद्धबुद्धान्तरात्मा
प्रदीपाभज्योतिः प्रणवविरचनारूपवर्णप्रकाशः[1] ।
तदूर्द्ध्वे चन्द्रार्द्धस्तदुपरि विलसद्बिन्दुरूपी मकार-
स्तदाद्ये नादोऽसौ [2]रसधवलसुधा[3]धारसन्तानहासी ॥ ३६ ॥

[आज्ञाचक्रे प्रणवस्वरूपचिन्तनफलम्]

इह स्थाने लीने सुसुखसदने चेतसि पुरं[4]
निरालम्बां बद्धा परमगुरुसेवासुविदिताम्[5] ।
सदाऽभ्यासाद् योगी [6]पवनसुहृदां पश्यति कला[7]-
स्ततस्तन्मध्यान्तः प्रविलसितरूपानपि पदान् ॥ ३७ ॥

---

३६ । पूर्वं वेदानामादिबीजमित्यनेन प्रणवस्य चिन्तनमुपदिष्टम्, तमेव प्रणवं विशेषयति—तदन्तरिति । अस्मिन्नाज्ञाचक्रे तदन्तस्तस्य निरुक्तत्रिकोणस्यान्तः प्रणवस्य विरचनारूपेण स्थितो यो वर्णः अकारोकारसङ्घातरूप ओकारस्तस्य प्रकाशो निवसतीति सम्बन्धः तमेव वर्णं विशेषयति । शुद्धबुद्धान्तरात्मस्वरूपः तथा प्रदीपाभ-ज्योतिः प्रदीपाभं ज्योतिर्यस्य सः प्रकाशशील इत्यर्थः । तदूर्द्ध्वे चन्द्रार्द्धः अर्द्धचन्द्राकार-चिह्नम्, तदुपरि अर्द्धचन्द्रोर्द्ध्वे विलसन् शोभमानो यो बिन्दुस्तद्रूपधारी मकारो निवसति मकार एव बिन्दुरूपेण तत्र वर्त्तत इत्यर्थः । तदाद्ये निरुक्तबिन्दुरूपिणो मकारस्याद्ये स्थितोऽसौ नादः रसधवलसुधाधारसन्तानहासी रसधवलः पारदश्वेतः, तथा सुधा-धारश्चन्द्रः तस्य सन्तानो विस्तारः तमुपहसितुं शीलमस्येति तादृशः । ततश्च रसधवल-श्चासौ सुधाधारसन्तानहासी चेति कर्मधारयः । एतेन नादस्यातिशयशुक्लत्वमुक्तम् । एवञ्च निरुक्तः प्रणवोऽकारोकारनादबिन्दुमयः अन्तरात्मस्वरूपः प्रदीपशिखोज्ज्वलः श्वेतवर्णश्चेति फलितम् ।

३७ । इहेति । सुसुखसदने निरवच्छिन्नानन्दधामनि इह स्थाने आज्ञाचक्रस्थित-प्रणवमभितश्चेतसि लीने सति परमगुरुसेवासुविदितां गुरुपरम्परापरिप्राप्तयोगाभ्यास-

---

1. 'वर्णः प्रकारः' C. 2. '-बल-' B. 3. -सार-' B. 4. 'परां' B. 5. '-समुदिताम्' B. 6. 'परम-' C-B. 7. 'कलां' B.

[अत्र वह्निकणावान्तरभेदाः परमशिवस्थितिश्च]

ज्वलद्दीपाकारं तदनु[1] च नवीनार्कबहुल-
प्रकाशं ज्योतिर्वा गगनधरणीमध्यमिलितम् ।
इह स्थाने साक्षाद् भवति भगवान् पूर्णविभवो-
ऽव्ययः साक्षी वह्नेः शशिमिहिरयोर्मण्डल इव ॥ ३८ ॥

कुशलो गुरुः परमगुरुस्तस्य सेवया सुविदितां सम्यगधिगतां निरालम्बां निर्नास्ति आलम्बः विषयसंस्पर्शो यत्र तथाभूतां विषयसम्बन्धोच्छेदकारिणीं पुरं योनिमुद्रां खेचरीमुद्रां वा मनःस्थैर्य्यसम्पादिनीं बद्ध्वा सदाऽभ्यासात् निरन्तरप्रणवानु-शीलनाद् योगी जनः पवनसुहृदां वह्नीनां कलाः अंशान् स्फुलिङ्गानित्यर्थः पश्यति। इह योगं विदधतो योगिन इतस्ततो विसृमरवह्निकणायमानं ज्योतिर्मानसप्रत्यक्षता-मापद्यत इत्यर्थः। तत इति। निरुक्ताभ्यासानन्तरं तन्मध्यान्तः तन्मध्यं पद्ममध्य-स्थितं त्रिकोणं तदन्तः प्रविलसितं प्रकर्षेण शोभमानं रूपं येषां तथाभूतान् पद्मान् प्रणवघटकवर्णानपि पश्यतीत्यर्थः।

३८। पूर्वश्लोके पवनसुहृदां पश्यति कला इत्युक्तं तत्र विशेषमाह—ज्वलदिति। तदनु निरुक्तवह्निकणदर्शनसमनन्तरं ज्योतिः पश्यतीति पूर्वेण सम्बन्धः। कीदृशं तज्ज्योतिरित्याकाङ्क्षायामाह—ज्वलद्दीपाकारमिति। ज्वलतो दीपस्याकार इव आकारो यस्य तथाभूतं ज्योतिरित्यर्थः। तथा नवीनार्कबहुलप्रकाशं नवीनार्कः प्रातःकालीन-सूर्यः तद्वद् बहुलः प्रचुरः प्रकाशो यस्य तादृशं नवोदयमानसूर्यसदृशदीप्तिविशिष्टम्, तथा गगनधरणीमध्यमिलितम्, अत्र गगनशब्देन प्रागुक्तशङ्खिनीनाडूयूर्द्ध्व सहस्राराधःस्थ-शून्यभागो बोध्यः। धरणीशब्देन च 'अमुष्मिन् धरायाश्चतुष्कोणबीजम्' इत्युक्तमूला-धारस्थधरामण्डलं बोध्यम्। एवञ्च गगनधरण्योर्निरुक्तयोर्मध्ये मिलितं सहस्रारा-न्मूलाधारपर्यन्तं परिव्याप्तं तज्ज्योतिरित्यर्थः।

इहेति। इह स्थाने निरुक्तायामाज्ञाचक्रकर्णिकायां वह्नेः अग्नेः शशिमिहिरयो-श्चन्द्रसूर्ययोश्च मण्डले इव भगवान् परमशिवः साक्षाद् भवति स्वयं वर्त्तते। यथा सहस्रारकमलस्थवह्निचन्द्रसूर्य्यमण्डलेषु परमशिवो वर्त्तते तद्वदत्रापीत्यर्थः। परमशिवं विशेषयति—पूर्णेति। पूर्णः सर्वव्यापकः विभवः विभुत्वं सृष्टि-स्थिति-संहारकर्तृत्वं

---

1. 'तदपि' B.

[अत्र प्राणत्यागस्य फलम्]

इह स्थाने विष्णोरतुलपरमामोदमधुरे
समारोप्य [1]प्राणान् प्रमुदितमनाः प्राणनिधने ।
परं नित्यं देवं पुरुषमजमाद्यं त्रिजगतां
पुराणं योगीन्द्रः प्रविशति च वेदान्तविदितम् ॥ ३९ ॥

यस्य सः । अयमेव भगवान् परमशिवः सर्वप्रपञ्चानां सृष्टिस्थितिसंहारान् स्वविभवेन निर्वर्त्तयतीत्यर्थः । तथाऽव्ययः सर्वत्राविकृतरूपः, तथा साक्षी द्रष्टा निर्लेप इत्यर्थः । अत्रेदमवधेयम्, परमार्थतः सृष्ट्यादिकर्त्तृत्वं शक्त्या एव—

तस्याः पुनः पुनः सृष्टिर्जायते लीयते सदा ।

इत्यादि-गन्धर्वतन्त्रतृतीयपटलवचनेन शक्त्या एव सृष्ट्यादिकर्त्तृत्वाभ्युपगमात् । एवञ्च स्वाभिन्नशक्तिकृतप्रपञ्चसृष्ट्यादिकं कूटस्थरूपेण पश्यतीति साक्षीत्यनेन सूचितम् । आज्ञाचक्रेऽपि परमशिवस्थितिमाह निर्वाणतन्त्रे नवमपटले—

एवं हंसो मणिद्वीपे तस्य क्रोडे परः शिवः ।
वामभागे सिद्धकाली सदानन्दस्वरूपिणी ॥ इति ।

३९ । अत्र प्राणत्यागस्य फलमाह—इहेति । योगीन्द्रः प्राणनिधने प्राणत्यागकाले प्रमुदितमनाः ब्रह्मनिर्वाणं मे भविष्यतीति प्रकर्षेण हृष्टमानसः सन् परमामोदमधुरे निरवच्छिन्नानन्दसन्तानरमणीये इह विष्णोर्व्यापकस्य भगवतः स्थाने आज्ञाचक्रे प्राणान् समारोप्य योगानुशासनक्रमेण प्राणानां लयं विधाय परं पुरुषं प्रविशति निर्वाणमुक्तिं लभते इत्यर्थः । पुरुषं विशेषयति—देवमिति । प्रपञ्चादिरूपेण द्योतनशीलम् । अजं नित्यम्, तथा त्रिजगतामाद्यं कारणभूतमित्यर्थः । पुराणं पुराणपुरुष इत्याख्यया सर्वशास्त्रेषु प्रसिद्धम् । तथा वेदान्तविदितम् 'यतो वाचो निवर्त्तन्ते अप्राप्य मनसा सहे'त्यादिश्रुतिभिरवाङ्मनसगोचरत्वनिरूपणात् तदवगमासम्भवेऽपि 'सर्वं खल्विदं ब्रह्म' 'ब्रह्मविद् ब्रह्मैव भवति' इत्यादिश्रुतिभिर्विदितं ब्रह्मप्रतिपादकश्रुतिमात्रगम्यमित्यर्थः ।

अत्र विष्णुशब्देन व्यापको भगवान् परमशिव एव बोध्यः । निर्वाणतन्त्रे नवमपटले

---

1. 'प्राणः' ? C.

[आज्ञाचक्रोर्द्ध्वं शिवशक्तिरूपो महानादस्तद्दर्शनफलञ्च]

लयस्थानं वायोस्तदुपरि च महानादरूपं शिवार्द्धं
शिवाकारं शान्तं वरदमभयं शुद्धबुद्धिप्रकाशम्।
यदा योगी पश्येद् गुरुचरण[1]युगाम्भोजसेवासुशील-
स्तदा वाचां सिद्धिः करतलकमले तस्य भूयात् सदैव ॥४०॥

आज्ञाचक्ररूपे तपोलोके परमशिवस्यैव स्थितेरभिधानात्। अस्य निर्वाणमुक्तिदातृत्वमाह तत्रैव—

सालोक्यं महर्लोके स्यात् सारूप्यं जनलोकके।
सायुज्यं तपोलोकेषु निर्वाणं हि तदूर्द्ध्वके॥ इति।

४०। एवमाज्ञाचक्रं निरूप्य तदूर्द्ध्वे शिरःस्थितसहस्रदलकमलादधो महानादं निरूपयति—लयस्थानमिति। गुरुचरणयुगाम्भोजसेवासुशीलः गुरोर्योगानुशीलनविशुद्धमतेः श्रीगुरुदेवस्य चरणाम्भोजयोः सेवया ततो योगाभ्यासेनेत्यर्थः, शुद्धं दृढतरचित्तैकाग्र्यपरिपूर्णं शीलं स्वभावो यस्य तादृशो योगी तदुपरि निरुक्ताज्ञाचक्रस्योर्द्ध्वे यदा महानादरूपं महानादस्य रूपं स्वरूपं पश्येत्, तदा तस्य करतलकमले सदैव वाचां सिद्धिर्भूयादिति सम्बन्धः। महानादरूपं निरूपयति—लयस्थानमित्यादिना। वायोर्लयस्थानं महानादादेव वायोरुत्पत्तेः कारणभूते महानाद एव तस्य लयसम्भवादित्यर्थः। तथा शिवार्द्धम् अत्र शिवोऽर्द्धनारीश्वरस्तदर्द्धं शक्तिस्तद्रूपं शक्तिरूपमित्यर्थः, तथा शिवाकारं शिवरूपम्। एवञ्च शिवार्द्धंशिवाकारमित्येताभ्यां शिवशक्तिमयोऽयं नाद इत्युक्तं भवति। तदुक्तं शारदायां प्रथमपटले—

विन्दुः शिवात्मको बीजं शक्तिर्नादस्तयोर्मिथः।
समवायः समाख्यातः सर्वागमविशारदैः॥ इति।

राघवभट्टेनापि—

एवमालोक्य सर्गादौ सच्चिदानन्दरूपिणीम्।
समस्ततत्त्वसङ्घातस्फूर्त्त्यधिष्ठानरूपिणीम्।
व्यक्तां करोति नित्यां तां प्रकृतिं परमः पुमान्॥

इति पाञ्चरात्रवचनमुल्लिख्य तस्या एव नादविन्दू सृष्ट्युपयोगावस्थारूपौ इत्यभिधाय,

---

1. '-सेवासु कुशलः' B.

[सहस्रारपद्मम्]

तदूर्द्ध्वं शङ्खिन्या निवसति शिखरे शून्यदेशे[1] प्रकाशं
विसर्गाधः पद्मं दशशत[2] दलं पूर्णपूर्णेन्दुशुभ्रम्।
अधोवक्त्रं कान्तं तरुणरविकलाकान्त[3]-किञ्जल्कपुञ्जं
ललाटाद्यैर्वर्णैः परिलसितव[4]पुःकेवलानन्दरूपम्॥ ४१॥

नादात्मना प्रबुद्धा सा निरामयपदोन्मुखी।
शिवोन्मुखी यदा शक्तिः पुंरूपा सा तदा स्मृता॥

इत्युक्तम्।

सा तत्त्वसंज्ञा चिन्मात्रज्योतिषः सन्निधेस्तदा।
विचिकीर्षुर्घनीभूता क्वचिदभ्येति बिन्दुताम्।

इति राघवभट्टधृतवचनेनापि शिवशक्त्योरभेद एव प्रतिपद्यते। शान्तं सौम्यमूर्त्तिम्, तथा शुद्धबुद्धिप्रकाशं शुद्धाया ज्ञानोज्ज्वलाया बुद्धेः प्रकाशो यस्मात् तथाभूतं ब्रह्मज्ञानसम्पादकमित्यर्थः।

४१। अथ शिरसि स्थितं सहस्रदलकमलं निरूपयति—तदूर्द्ध्वं इति। निरुक्तमहानादोर्द्ध्वं शङ्खिन्यास्तन्नामकनाड्याः शिखरे अग्रभागे शून्यदेशे शून्याकारस्थाने तथा विसर्गाधः ब्रह्मरन्ध्रस्थिताद् विसर्गात् प्रकृतेरधःप्रदेशे दशशतदलं सहस्रदलं पद्मं निवसतीति सम्बन्धः। विसर्गस्य ब्रह्मरन्ध्रे स्थितिमाह कङ्कालमालिनीतन्त्रे द्वितीयपटले—

ततो वायुर्महानादो ब्रह्मरन्ध्रं ततः परम्।
तस्मिन् रन्ध्रे विसर्गञ्च नित्यानन्दं निरञ्जनम्॥ इति।

विसर्गस्य प्रकृतिवाचकत्वन्तु—

बिन्दुः पुरुष इत्युक्तो विसर्गः प्रकृतिः स्मृतः।

इत्यनेन पूर्वमेव [१।१।टी०] प्रदर्शितम्।

पद्मं विशेषयति—प्रकाशमित्यादिभिः। प्रकाशं प्रकाशस्वरूपम्। शून्यदेशप्रकाशमिति पाठे तु शून्यदेशे प्रकाशो यस्य तथाभूतमित्यर्थः। तथा पूर्णपूर्णेन्दु-

---

1. '-श-' B. 2. '-दलसंपूर्णपूर्णेन्दु-' C. 3. '-कान्ति-' C. 4. '-तनु'? B.

[तत्कर्णिकायां चन्द्रमण्डलं तदन्तस्त्रिकोणं तदन्तः परं बिन्दुश्च]

समास्ते तस्यान्तः शशपरिरहितः शुद्धसम्पूर्णचन्द्रः
स्फुरज्ज्योत्स्नाजालः परमरसचयस्निग्धसन्तानहासः ।
त्रिकोणं तस्यान्तः स्फुरति च सततं विद्युदाकाररूपं
तदन्तः शून्यं तत् सकलसुरगणैः सेवितञ्चातिगुह्यम् ॥ ४२ ॥

शुभ्रं परिपूर्णचन्द्रवदतिशयशुक्लवर्णम् । तदुक्तं कङ्कालमालिनीतन्त्रे द्वितीयपटले—

सहस्रारं नित्यपद्मं शुक्लवर्णमधोमुखम् ॥ इति ।

निर्वाणतन्त्रे दशमपटले तु सहस्रारं प्रकृत्य—

शुक्लं रक्तं तथा पीतं कृष्णं हरितमेव च ।
नानाविचित्ररूपेण नानावर्णेन शोभितम् ॥
शुक्लं क्षणे क्षणे रक्तं क्षणे पीतं सुशोभनम् ।
कस्मिन् क्षणे कृष्णवर्णं हरितं वर्णमुत्तमम् ॥
चित्ररूपञ्च चार्वङ्गि धत्ते कस्मिन् क्षणे प्रिये ।
एवं नानाविधैर्देवि तत् पद्मं शोभितं सदा ॥

इत्यादिना तस्य क्षणभेदेन वर्णभेदानाह । अधोवक्त्रमधोमुखम् । कान्तं कमनीयाकृतिम् । तथा तरुणरविकलाकान्तकिञ्जल्कपुञ्जम्, तरुणस्य रवेर्याः कलाः प्रातःकालीनसूर्य्यमरीचयः तद्वत् कान्तः कमनीयो रक्तभास्वर इत्यर्थः किञ्जल्कपुञ्जः केशरसमूहो यस्य तथाभूतम्, तथा ललाटाद्यैः ललाटादिषु विन्यस्तैरकारादिक्षकारान्तैः पञ्चाशद्वर्णैः प्रविलसितं वपुर्यस्य तादृशम् । मातृकान्यासे ललाटे अं नम इत्यादिक्रमदर्शनाल्ललाटाद्यैरित्यनेनाकाराद्यैरित्यर्थो लभ्यते । व्यक्तमाह कङ्कालमालिनीतन्त्रे द्वितीयपटले सहस्रारं प्रकृत्य—

अकारादिक्षकारान्तैः स्फुरद्वर्णैर्विराजितम् । इति ।

तथा शाक्तानन्दतरङ्गिण्यां चतुर्थोल्लासे—

मातृकाक्षरसम्भूतं सहस्रारं सरोरुहम् । इति ।

तथा केवलानन्दरूपं निरवच्छिन्नानन्दस्वरूपं तत् पद्ममित्यर्थः ।

अत्रेदमवधेयम्—पद्मेऽस्मिन् पत्राणां विंशतिरावर्त्तनानि, प्रत्यावर्त्तनञ्च पञ्चाशत् पत्राणि, तेषु प्रतिपञ्चाशत्पत्रेषु अकारादिक्षकारान्ताः पञ्चाशद्वर्णाः शोभन्त इति ।

४२ । एतत्पद्मकर्णिकायां चन्द्रमण्डलावस्थितिमाह—समास्त इति । तस्य

[परंबिन्दोर्गोप्यत्वं परमशिवस्थितिश्च]

सुगोप्यं तद् यत्नादतिशयपरमामोदसन्तानराशेः
परं कन्दं सूक्ष्मं सकलशशिकलाशुद्धरूपप्रकाशम् ।
इह स्थाने देवः परमशिवसमाख्यानसिद्धिप्रसिद्धः
स्वरूपी सर्वात्मा रसविरसमितोऽज्ञानमोहान्धहंसः ॥४३॥

पद्मस्यान्तर्मध्ये कर्णिकायामित्यर्थः । शशपरिरहितः अत एव शुद्धो निर्मलः संपूर्णचन्द्रः चन्द्रमण्डलं समास्ते । चन्द्रं विशेषयति—स्फुरदिति । स्फुरज्ज्योत्स्नाजालः स्फुरन्ति ज्योत्स्नाजालानि यस्मात् तथाभूतः । तथा परमरसचयस्निग्धसन्तानहासः परमरसचयेन परमामृतसमूहेन स्निग्धः सन्तानो विस्तारो यस्य तथाभूतो हासो विकाशो यस्य तादृशः परमरमणीयामृतप्रवाहेणानन्दं जनयन्नित्यर्थः ।

निरुक्तचन्द्रमण्डलाभ्यन्तरे ध्येयं त्रिकोणमाह—त्रिकोणमिति । तस्यान्तश्चन्द्रमण्डलमध्ये विद्युदाकाररूपं विद्युत्सदृशदीतिमत् त्रिकोणं समास्ते । तदन्तरिति तस्य त्रिकोणस्यान्तर्मध्ये अतिगुह्यं यथा स्यात्तथा सकलसुरगुणैः सेवितं शून्यं परंबिन्दुरूपं स्फुरतीति सम्बन्धः ।

४३। सुगोप्यमिति। तन्निरुक्तं शून्यं यत्नात् सुगोप्यं साधकैर्यस्मै कस्मैचिन्न प्रकाशनीयमित्यर्थः। शून्यं विशेषयति—अतिशयेति । अतिशयपरमामोदसन्तानराशेः अतिशयः परमामोदसन्तानराशिर्यत्र तस्य महामोदस्येत्यर्थः, परं कन्दं प्रधानमूलभूतम् । सूक्ष्मं दुर्लक्ष्यम्, तथा सकलशशिकलाशुद्धरूपप्रकाशम्, अत्र कलाशब्देन वक्ष्यमाणा निर्वाणकला गृह्यते, तथाच कलया निर्वाणकलया सह वर्त्तमाना या शशिकला तया शुद्धरूपः प्रकाशो यस्य तथाभूतम् । सूक्ष्मतमस्यापि निरुक्तपरंबिन्दुरूपस्य प्रागुक्तत्रिकोणान्तःस्थिताभ्याममाकलानिर्वाणकलाभ्यां प्रकाशो भवतीत्यर्थः ।

एतत्कर्णिकायां परमशिवस्य स्थितिमाह—इहेति। इह स्थाने एतत्पद्मकर्णिकान्तःस्थितचन्द्रमण्डलमध्यवर्त्तिनो हंसपीठापरनाम्नोऽन्तरात्मन उपरि इत्यर्थः, परमशिवसमाख्यानसिद्धिप्रसिद्धः परमशिव इति यत् समाख्यानं तस्य या सिद्धिः सर्वतन्त्रेषु निष्पत्तिः तया प्रसिद्धः परमशिव इति नाम्ना ख्यात इत्यर्थः। देवः यतेः स्वात्मज्ञानं दिशतीति परेण सम्बन्धः। परमशिवं विशेषयति—स्वरूपीत्यादिना।

स्वरूपी परब्रह्मरूपः, सर्वात्मा सर्वेषामात्मा जीवात्मस्वरूपः। अत्र स्वरूपी सर्वात्मेति पदद्वयेन सर्वजीवात्मस्वरूपोऽपि परमात्मस्वरूपं न जहातीति प्रतिपादितम्। तथा रसविरसमितः रसं परमानन्दरसं विरसं तद्विलक्षणं शिवशक्तिसामरस्यानन्दरसञ्च इतः प्राप्तः। स्वरूपेणावस्थितोऽपि शक्तिसमागमरसमनुभवतीत्यर्थः। अयमेव परशिवः श्रीगुरुस्वरूप इति प्रथमश्लोकव्याख्याने प्रतिपादितं परश्लोके च प्रतिपादयिष्यते।

अत्र शाक्तानन्दतरङ्गिण्यां चतुर्थोल्लासे आज्ञाचक्रमभिधाय—

तदूर्द्ध्वे तु महेशानि पद्ममूर्द्ध्वमुखं सदा।
तस्योपरि महेशानि ध्यायेत् सदाशिवं प्रभुम्।

इति वचनमभिधाय ऊर्द्ध्वमुखमिति अधोमुखसहस्रदलपद्मान्तर्गतोर्द्ध्वमुखद्वादशदलपद्मोपरि सदाशिवं ध्यायेदित्युक्तम्। पादुकापञ्चकस्तोत्रेऽपि—

ब्रह्मरन्ध्रसरसीरुहोदरे नित्यलग्नमवदातमद्भुतम्।

इत्यादिना,

तस्य कन्दलितकर्णिकापुटे कॢप्तरेखमकथादिरेखया।

इत्यादिना चाधोमुखसहस्रदलकमलस्याधस्तादू र्द्ध्वमुखद्वादशदलकमलकर्णिकान्तरकथादित्रिकोणे श्रीगुरुरूपस्य परमशिवस्य स्थितिमाह। परन्तु शाक्तानन्दतरङ्गिण्यां चतुर्थोल्लासेऽन्यत्र—

सहस्रारं महापद्मं नादविन्दुत्रयान्वितम्।
अकथादित्रिरेखासु हलक्षत्रयकोणके॥
तन्मध्ये परविन्दुञ्च सृष्टिस्थितिलयात्मकम्।
वामावर्त्तेन विलिखेदकथादि त्रिकोणकम्॥

इत्यादिना,

सहस्रारान्तरे शून्ये दिव्यतोरणशोभिते।

इत्यादि-पूर्वोपदर्शितमहाकालीतन्त्रप्रथमपटलवचनेन च सहस्रारपद्म एव परमशिवस्य स्थितिरुक्ता। एवञ्च विभिन्नतन्त्रपर्यालोचनया प्रस्थानद्वयावगतेः स्वस्वगुरुसम्प्रदायानुसारेणैकतरः कल्पः समाश्रयणीय इति सिद्धान्तः। श्रीभगवत्पूर्णानन्दपरमहंसपादानान्तु सहस्रार एव परमशिवस्य स्थितिरभिमता, मूले द्वादशदलकमलस्य लेशतोऽप्यनभिधानादित्यवधेयम्।

सुधाधारासारं निरवधि विमुञ्चन्नतितरां
[1]यतः स्वात्मज्ञानं दिशति भगवान् निर्मलमतेः[2] ।
समास्ते सर्वेशः सकलसुखसन्तानलहरी-
परीवाहो हंसः परम इति नाम्ना परिचितः ॥४४॥

४४। सुधाधारासारमिति। निरुक्तः परमशिवः सुधाधारासारं सुधाधारा अमृतप्रवाहः तद्वत् सारं श्रेष्ठं मन्त्रात्मकवाक्यमित्यर्थः। एवञ्च सुधाधारासारम् अमृतवदानन्दविधायकं वाक्यं मन्त्रात्मकं निरवधि सर्वदा अतितरां साधकानां पुरुषार्थलाभाय विमुञ्चन् श्रीगुरुरूपेणोच्चरन् निर्मलमतेः परमानुरक्तिसहकृतश्रीगुरुचरणसेवाविशुद्धचेतसो यतेः साध्यदेवतायां नियतमनसः साधकस्य स्वात्मज्ञानं स्वं जीवात्मा, आत्मा परमात्मा तयोर्ज्ञानं तत्त्वमसीत्यादिश्रुतिसिद्धं जीवात्मपरमात्मनोरभेदज्ञानं दिशति उपदिशतीत्यर्थः। अत्रेदमवधेयम्—निरुक्तः परशिव एव श्रीगुरुरूपो दीक्षागुरुरूपेण धरायामवतीर्यामृतमयतत्तदुपास्यदेवतातत्तन्मन्त्रदीक्षया साधकानां परमपुरुषार्थं निर्वर्त्तयतीति। एतच्च—

मनुष्यचर्मणा नद्धः साक्षात् परशिवः स्वयम्।

इत्यादि-कुलार्णवत्रयोदशपटलोक्तैरन्यैश्च प्रमाणैर्विस्तरतः प्रतिपादितं 'दशशतदलपद्मप्रोल्लसत्पूर्णचन्द्र' इत्यादि-प्रथमप्रकाशप्रथमश्लोकटीकायामस्माभिरिति नेह प्रपञ्च्यते।

समास्त इति। परमशिवस्याधस्तात् सर्वेशः सर्वेषामीश्वरः हंसः पुंप्रकृत्यात्मकोऽन्तरात्मा समास्ते। पुंप्रकृत्यात्मकान्तरात्मनो हंसत्वन्तु एतद्ग्रन्थप्रथमश्लोकव्याख्याने—

हंकारो बिन्दुरित्युक्तो विसर्गः स इति स्मृतः।

इत्यादि-प्रपञ्चसारवचनेनोपपादितम्। हंसः कीदृश इत्यत आह—सकलसुखसन्तानलहरीपरीवाहः सकलसुखानां यः सन्तानो विस्तारः तस्य या लहरी श्रेणी तस्याः परीवाहो निःसरणं यस्मात् तथाभूतः निरवच्छिन्नप्रचुरसुखसम्पादक इत्यर्थः। एतेन तत एव विलक्षणसुखपरीवाहस्योदयात्तस्यापि तादृशसुखमयत्वमुन्नेयम्, धनधातुः प्रचुरतरधनशालित्ववत्। तथा परम इति नाम्ना परिचितः। परम इति तस्य नामान्तरं परमहंस इति वा।

1 'यतेरात्म-' B. 2. '-मतिः' C,

[एतत्पद्मकर्णिकायां सर्वेषां देवानामवस्थितिः]

शिवस्थानं शैवाः परमपुरुषं वैष्णवगणा
लपन्तीति प्रायो हरिहरपदं केचिदपरे[1] ।
पदं देव्या देवीचरणयुगलानन्दरसिका
मुनीन्द्रा अप्यन्ये प्रकृतिपुरुषस्थानममलम् ॥४५॥

[एतत्पद्मज्ञानफलम्]

इह स्थानं ज्ञात्वा नियतनिजचित्तो नरवरो
न भूयात् संसारे पुनरपि न बद्धस्त्रिभुवने ।
समग्रा शक्तिः स्यान्नियत[2]मनसस्तस्य कृतिनः
सदा कर्त्तुं हर्त्तुं [3]खगतिरपि वाणी सुविमला ॥४६॥

४५। एतदेव सर्वदेवतानिवासस्थानमित्याह—शिवस्थानमिति। शैवाः शिवोपासका एतत् शिवस्थानमिति लपन्ति, वैष्णवगणाः परमपुरुषस्य विष्णोः स्थानमिति लपन्ति। अपरे हरिहरोभयोपासका हरिहरपदमेतदिति लपन्ति, देवीचरणयुगलानन्दरसिकाः शाक्ता इत्यर्थः, देव्याः पदं स्थानमिति लपन्ति, अन्ये मुनीन्द्रा योगिश्रेष्ठा अपि एतदमलं प्रकृतिपुरुषस्थानमेतदिति लपन्तीत्यर्थः। एतेन स्वस्वोपास्यानां सर्वेषामेव देवानां स्थानमेतदित्यवगन्तव्यम्।

४६। एतत्पद्मज्ञानफलमाह—इहेति। इह अस्मिन् सहस्रदलकमले स्थानम् इष्टदेवतावस्थितिं ज्ञात्वा, स्वेष्टदेवतावस्थितिरत्रैवेति विदित्वेत्यर्थः। अत्र 'इदं स्थानं ज्ञात्वे'ति कालीचरणधृतः पाठः। नियतनिजचित्तः नियतं स्वस्वाभीष्टदेवे नियुक्तं निजचित्तं येन तादृशो नरवरः साधकश्रेष्ठः न भूयात् संसारे पुनर्जन्मपरिग्रहं न करोतीत्यर्थः, तत्र हेतुमाह बद्धस्त्रिभुवने इति स्वर्गे मर्त्त्ये पाताले वा बद्धो न भवति शुभाशुभसकलकर्मक्षयाद् भोगहेतुभूतकर्मान्तरानुदयाच्चेति भावः। तथा तस्य कृतिनः सदा कर्त्तुं स्वाभीष्टकार्याणि सम्पादयितुं हर्त्तुमनभीष्टानि परिहर्त्तुञ्च समग्रा सकलकार्यसम्पादिका शक्तिः स्यात्। तथा तस्य खगतिराकाशगमनं सुविमला वाणी च स्यादिति सम्बन्धः।

1. 'क्वचिदपि' C. 2. 'नियम-' ? C. 3. 'भुवनमपि' B.

[एतत्पद्मकर्णिकान्तस्त्रिकोणे चन्द्रकलायाः स्थितिः]

अत्रास्ते शिशुसूर्यसोदरकला चन्द्रस्य सा षोडशी
शुद्धा नीरजसूक्ष्मतन्तुशतधाभागैकरूपा परा ।
विद्युद्दामसमानकोमलतनुर्नित्योदिताधोमुखी
पूर्णानन्दपरम्परातिविगलत्[1]पीयूषधाराधरा ॥ ४७ ॥

[तच्चन्द्रकलान्तर्निर्वाणकलायाः स्थितिः]

निर्वाणाख्यकला परात् परतरा साऽऽस्ते तदन्तर्गता
केशाग्रस्य[2] सहस्रधा विभजितस्यैकांशरूपा सती ।
भूतानामधिदैवतं भगवती नित्यप्रबोधोदया
चन्द्रार्द्धाङ्गसमानभङ्गुरवती सर्वार्कतुल्यप्रभा ॥ ४८ ॥

४७। निरुक्तसहस्रदलकमलान्तर्वर्त्तित्रिकोणे अमाकलावस्थितिमाह—अत्रास्त इति। अत्र कर्णिकान्तस्त्रिकोणे सा प्रसिद्धा चन्द्रस्य षोडशभागैकभागरूपा शिशुसूर्यसोदरकला प्रातःकालीनसूर्यसदृशी रक्तवर्णेत्यर्थः, अमानाम्नी कला आस्ते। अमाकलास्वरूपमाह तिथितत्त्वधृतस्कन्दपुराणीयप्रभासखण्डे—

अमा षोडशभागेन देवि प्रोक्ता महाकला ।
संस्थिता परमा माया देहिनां देहधारिणी ॥ इति ।

कलां विशेषयति—शुद्धेति । शुद्धा कलङ्करहिता । नीरजेति । नीरजसूक्ष्मतन्तोरतिसूक्ष्ममृणालसूत्रस्य शतधाभागैकरूपा शतभागैकभागरूपा, तथा परा परशक्तिरूपा । विद्युद्दामसमानकोमलतनुः विद्युन्मालासदृशकोमलोज्ज्वलकान्तिविशिष्टा। नित्योदिता क्षयोदयरहितत्वान्नित्यप्रकाशशालिनीत्यर्थः। अधोमुखी अधोवक्त्रा। पूर्णा व्यापिनी आनन्दपरम्परा अविच्छिन्नानन्दधारा यस्याः सा । तथा अतिविगलन्तीं पीयूषधारां धरतीति तथाभूता प्रचुरामृतस्राविणीत्यर्थः। एवंभूता अमानाम्नी कला सहस्रदलकमलकर्णिकान्तस्त्रिकोणे वर्त्तत इत्यर्थः।

४८। अमाकलान्तर्वर्त्तिनीं निर्वाणकलामाह—निर्वाणेति। तदन्तर्गता तस्या अमाकलाया अन्तर्गता सा मुक्तिदातृत्वेन प्रसिद्धा निर्वाणकला आस्ते। निर्वाण-

---

1. '-विलस-'-B. 2. '-ग्रैक-'-B.

[तदन्तर्बिन्दुस्वरूपाया निर्वाणशक्तेरवस्थितिः]

एतस्या मध्यदेशे विलसति परमापूर्वा[1] निर्वाणशक्तिः
कोट्यादित्यप्रकाशा त्रिभुवनजननी कोटिभागैकरूपा ।
केशाग्रस्यातिगुह्या निरवधि[2] विगलत्प्रेमधाराधरा सा
सर्वेषां जीवभूता मुनिमनसि मुदा तत्त्वबोधं वहन्ती ॥४९॥

दायिनी कला प्रकृतिरिति निर्वाणकलाशब्दनिरुक्तिः । तां विशेषयति । परादिति, परात् परतरा श्रेष्ठा । 'परा परतरे'ति कालीचरणधृतः पाठः । तत्र तु परा अमाकला ततः परतरा निर्वाणकलेत्यर्थः । सहस्रधाविभजितस्य केशाग्रस्य एकांशरूपा केशाग्र-सहस्रभागैकभागरूपा अतिशयसूक्ष्मेत्यर्थः । अत्र विभजितस्येति छन्दोऽनुरोधा-दाकारलोप आर्षः । सती अतिसूक्ष्मतया दुर्विज्ञेयत्वेऽपि सर्वतत्त्वसिद्धत्वात् सद्रूपा । भूतानां प्राणिनामधिदैवतं चैतन्यस्वरूपा । नित्यप्रबोधोदया नित्यप्रबोधो ब्रह्मज्ञानं तस्य उदयो यस्या ब्रह्मज्ञानदायिनीत्यर्थः । चन्द्रार्द्धाङ्गसमानभङ्गुरवती अर्द्धचन्द्रवत् कुटिलाकारा । तथा सर्वार्कतुल्यप्रभा द्वादशादित्यसदृशप्रकाशशालिनीत्यर्थः । अमाकला-निर्वाणकलयोः स्वरूपमाह कङ्कालमालिनीतन्त्रे द्वितीयपटले—

अत्र नित्योदिता वृद्धिक्षयहीना अमाकला ।
तन्मध्ये कुटिला निर्वाणाख्या सप्तदशी कला ॥ इति ।

४९ । निर्वाणकलान्तर्निर्वाणशक्तेरवस्थितिमाह—एतस्या इति । एतस्या निर्वाण-कलाया मध्यदेशे परमा परब्रह्मस्वरूपा तथा अपूर्वा नास्ति पूर्वं यस्याः सा निखिलप्रपञ्चसृष्टेरादौ वर्त्तमानत्वादित्यर्थः, निर्वाणशक्तिः विलसतीति सम्बन्धः । निर्वाणशक्तिं विशेषयति—कोट्यादित्यप्रकाशा अनन्तादित्यसदृशदीप्तिशालिनी, तथा त्रिभुवनजननी स्वर्गमर्त्यपातालरूपभुवनत्रयप्रसविनी । तथा केशाग्रस्य कोटिभागैकरूपा सूक्ष्मतमेत्यर्थः । अत एवातिगुह्या सूक्ष्मतया दुर्विज्ञेया । निरवधिविगलत्प्रेमधाराधरा निरवधि अनवरतं विगलन्ती स्रवन्ती या प्रेमधारा सामरस्यानन्दजनिता परमामृत-धारा तां धरतीति तथाभूता । सर्वेषामिति, सर्वेषां प्राणिनां जीवभूता जीवात्म-स्वरूपा । तथा मुदा हर्षेण मुनिमनसि योगिनां हृदये तत्त्वबोधं वहन्ती परं बिन्दुरूपा निर्वाणशक्तिर्विलसतीत्यन्वयः ।

---

1. -'पूर्ण'-C. 2. '-लसत्-' B.

[निर्वाणशक्तेरन्तः परब्रह्मस्थानम्]

तस्या मध्यान्तराले शिवपदममलं शाश्वतं योगगम्यं
नित्यानन्दाभिधानं [1]सकलसुखमयं शुद्धबोधप्रकाशम् ।
केचिद् ब्रह्माभिधानं पदमिति सुधियो वैष्णवं[2] तल्लपन्ति
केचिद्धंसाख्यमेतत् किमपि सुकृतिनो मोक्षवर्त्मप्रबोधम् ॥५०॥

[कुण्डलिन्युत्थापनक्रमः]

हूङ्कारेणैव देवीं यमनियम[3]समभ्यासशीलः सुशीलो
ज्ञात्वा श्रीनाथवक्त्रात् क्रममपि च महामोक्षवर्त्मप्रकाशम् ।

अत्र एतस्या मध्यदेशे इत्यनेन निर्वाणकलान्तर्निर्वाणशक्तिस्थितेरभिधानेऽपि नादोपरि तस्याः स्थितिरित्यवधेयम् । तदुक्तं कङ्कालमालिनीतन्त्रे द्वितीयपटले—

निर्वाणाख्यान्तरगता वह्निरूपा निबोधिका ।
नादोऽव्यक्तस्तदुपरि कोट्यादित्यसमप्रभा ।
निर्वाणशक्तिः परमा सर्वेषां योनिरूपिणी ॥ इति ।

५० । निरुक्तनिर्वाणशक्त्यन्तः शिवस्थानमाह—तस्या इति । तस्या निर्वाणशक्त्या मध्यान्तराले अभ्यन्तरस्थशून्ये अमलं निर्मलं मायामलरहितमित्यर्थः, शिवपदं परब्रह्मस्थानं वर्त्तते । तस्य स्वरूपमाह शाश्वतं नित्यस्वरूपम्, योगिगम्यं योगिभिः स्वनुष्ठितयोगमात्रवेद्यं नित्यानन्दाभिधानं नित्यश्चासावानन्दश्चेति नित्यानन्दः तत्स्वरूपत्वान्नित्यानन्द इत्यभिधानं लोकव्यवहारो यस्य तत्, 'सच्चिदानन्दं ब्रह्मे'त्यादिश्रुतेर्नित्यानन्द इति नाम्नैव साधकास्तं कीर्त्तयन्तीत्यर्थः । तथा सकलसुखमयं सकलानां सुखमयं सर्वे साधकाः सुखमयत्वेनैव तदनुभवन्तीत्यर्थः । तथा शुद्धबोधप्रकाशं शुद्धबोधस्य तत्त्वज्ञानस्य प्रकाशो यस्मात् तत्, शुद्धं बोधं प्रकाशयतीति शुद्धबोधप्रकाशमिति वा ।

सम्प्रदायभेदेनास्य संज्ञाभेदानाह—केचिदिति । केचित् सुधियो वैदान्तिकाः तत् शिवपदं परब्रह्माभिधानं लपन्ति कथयन्ति । अपरे वैष्णवाः तद्वैष्णवं पदं लपन्ति । केचिद् योगिनस्तत् हंसाख्यं हंसनामकं लपन्ति । अन्ये तु किमपि अनिर्वचनीयम् आत्मप्रबोधम् आत्मसाक्षात्कारस्थानं मोक्षरूपमालपन्तीत्यर्थः । एवञ्च सम्प्रदायभेदेन संज्ञाभेदेऽपि शैवशाक्तवैष्णवादीनां सर्वेषामेवोपासकानां चरमलक्ष्यभूतं पदमिदमित्यवधेयम् ।

---

1. 'परमकुलपदं' B. 2. '-वस्त-' B. 3. '-समा-' B.

ब्रह्मद्वारस्य मध्ये विरचयति[1] सतां शुद्धबुद्धस्वभावो[2]
भित्त्वा तल्लिङ्गरूपं पवनदहनयोरा[3]क्रमेणैव तप्ताम् ॥ ५१ ॥

५१। एवं सहस्रदलकमलपर्यन्तमभिधाय सहस्रारे कुण्डलिन्या उत्थापनस्य क्रममुपदिशति—हुङ्कारेणेति। यमनियमसमभ्यासशीलः यमानां "अहिंसा सत्यास्तेय-ब्रह्मचर्यापरिग्रहा यमा" इत्युक्तलक्षणानां, नियमानां "शौचसन्तोषतपःस्वाध्यायेश्वर-प्रणिधानानि नियमा" इत्युक्तलक्षणानाञ्च योगाङ्गानां यः समभ्यासः सम्यग् दीर्घकाला-दरनैरन्तर्यसत्कारपूर्वकमनुष्ठानं तदेव शीलं यस्य तथाभूतः, अनवरतकठोरतर-योगाभ्यासपरायण इत्यर्थः, सुशीलः योगप्रतिबन्धकीभूतानुष्ठानपरित्यागेन शिष्टतया प्रसिद्धयोगी श्रीनाथवक्त्राद् गुरुमुखान् महामोक्षवर्त्मप्रकाशं महामोक्षवर्त्मनो निर्वाण-मुक्तिमार्गस्य प्रकाशो यस्मात् तादृशं क्रमं मुलाधारतः सहस्रारे कुण्डलिन्युत्थापनस्येति-कर्त्तव्यतां ज्ञात्वा शुद्धबोधस्वभावः शुद्धबोधे केवलज्ञानस्वरूपे परे ब्रह्मणि स्वो भावो यस्य तथाभूतः श्रीगुरुकृपया स्वयं ब्रह्मरूपतामापन्न इत्यर्थः। तां प्रसिद्धां देवीं कुण्डलिनीं पवनदहनयोराक्रमेणैव पवनः पूरकयोगेण देहाभ्यन्तरे समाहृतः कुम्भकयोगेन धृतश्च, दहनः निरुक्तपवनोद्दीप्तो मूलाधारकर्णिकान्तर्गतत्रिकोणस्थः कामाग्निः, तयोराक्रमणेन तप्तां तां प्रसिद्धां देवीं मूलाधारस्थितां कुण्डलिनीं स्वयम्भूलिङ्गं वेष्टयित्वा स्थितां सार्द्धत्रिवलयाकारां प्रसुप्तभुजगरूपिणीं जागरयित्वेत्यर्थः तल्लिङ्गरूपं स्वयम्भूलिङ्गच्छिद्रं भित्त्वा ब्रह्मद्वारस्य 'ब्रह्मद्वारं तदास्ये प्रविलसति सुधासाररम्यप्रदेशम्' इत्येतत्प्रकाशीय-तृतीयश्लोकोक्तस्य ब्रह्मनाडीमुखस्थितस्य मध्ये विरचयति स्थापयतीत्यर्थः। ब्रह्मनाडी तु तृतीयश्लोकेऽभिहिता। यत्तु केनचित् टीकाकारेण नड् गताविति धातोर्नाडीति पदं निष्पाद्य ब्रह्मनाडीशब्दस्य कुण्डलिन्याः परमशिवसन्निधिगमनपथरूप-चित्रिणीनाड्यन्तर्गतशून्यभाग इत्यर्थममूलकं कल्पयित्वा 'न तु चित्रिणीमध्ये नाड्यन्तरमस्तीति निष्कर्ष' इत्युक्तम्, तन्न—

ईडा च पिङ्गला चैव सुषुम्णा चित्रिणी तथा।
ब्रह्मनाडी च तन्मध्ये पञ्च नाड्यः प्रकीर्त्तिताः ॥

इति तोडलतन्त्राष्टमोल्लासवचनेन निरुक्तानां पञ्चानामन्यतमत्वेन ब्रह्मनाड्या निरूपणात्। कुण्डलिन्याः स्वरूपन्तु पूर्वमेवोपदर्शितम्। श्लोकेनानेन मूलाधाराद् ब्रह्मद्वारपर्यन्तं कुण्डलिन्या उत्थापनक्रमो दर्शितः। हुङ्कारेण कुण्डलिन्या उत्थापनस्य क्रममाह—शाक्तानन्दतरङ्गिण्यां चतुर्थोल्लासे—

1. '-तु' B. 2. '-बोधप्रभावाम्' B. 3. '-श्वा-' C.

[कुण्डलिनीयोगप्रकारः]

भित्त्वा लिङ्गत्रयं तत् परमरसशिवे सूक्ष्मधाम्नि प्रदीप्ते
सा देवी शुद्धसत्त्वा तडिदिव विलसत्तन्तुरूपा[1] सुसूक्ष्मा ।
ब्रह्माख्यायाः शिरायाः सकलसरसिजं प्राप्य देदीप्यते तन्-
मोक्षाख्यानन्दरूपं घटयति सहसा[2] सूक्ष्मतालक्षणेन ॥५२॥

हूङ्कारवर्णसम्भूता कुण्डली परदेवता ।
विभर्त्ति कुण्डली देहमात्मानं हंसमन्त्रतः ॥
प्रवृद्धवह्निसंयोगे मनसा मारुतैः सह ।
ऊर्द्ध्वं नयेत् कुण्डलिनीं जीवात्मसहितां पराम् ॥ इति ।

तथा—

षट्चक्रसन्धिमार्गेण सुषुम्णावर्त्मना तथा ।
हंसेन मनुना देवीं सहस्रारं समानयेत् ॥ इति ।

अत्र हूङ्कारेणैवेत्यादिपूर्ववचनेन हूङ्कारेण कुण्डलिन्या उत्थापनमभिहितम् । षट्चक्रसन्धिमार्गेणेत्याद्युत्तरवचनेन तु हंसमन्त्रेणेति क्रमभेदो दृश्यते । कङ्कालमालिनीतन्त्रे द्वितीयपटले—

आकृष्य प्रणवेनैव जीवात्मानं नगेन्द्रजे ।
कुण्डलिन्या सह प्राणं गन्धमादाय साधकः ।
सोऽहन्तु मनुना देवीं स्वाधिष्ठानं समानयेत् ॥

इत्यनेन हृदयाज्जीवात्मानं प्रणवेन मूलाधारे नीत्वा हंसमन्त्रेण जीवात्मना सह कुण्डलिन्या उत्थापनमुपदिष्टम् ।

हृदयाद्धंसमनुना नीत्वा जीवं मुखाम्बुजे ।
हूङ्कारेण समुत्थाप्य कुण्डलीं परदेवतात् ॥

इति कालीकुलामृतवचनेन तु हंसमनुना जीवात्मनो मूलाधारनयनं हूङ्कारेण जीवात्मसहितायाः कुण्डलिन्या उत्थापनमिति लभ्यते । एवञ्च पूर्वपूर्वप्रमाणपर्यालोचनया प्रणवेन जीवात्मानं कुण्डलिन्यां नीत्वा हंसमन्त्रेणोत्थापनमित्येकः कल्पः, हंसमन्त्रेण जीवात्मानं तत्र नीत्वा हूङ्कारेणोत्थापनमित्यपर इत्यवगम्यते । ग्रन्थकृता तु हूङ्कारेणैवेत्येवकारेण द्वितीय एव कल्पः स्वाभिमतत्वेनोपदर्शित इति सिद्धान्तः ।

५२ । अथ सहस्रारे कुन्डलिनीयोजनक्रममाह—भित्त्वेति । सा देवी निरुक्त-

---

1. 'स्वरूपा' C. 2. 'सूक्ष्मतां' B.

[प्रागुक्तबिन्दुमयशिवे कुलकुण्डलीयोजनक्रमः]

नीत्वा तां कुलकुण्डलीं लयवशाज्जीवेन सार्द्धं सुधी-
र्मोक्षे धामनि शुद्धपद्मसदने शैवे परे स्वामिनि ।
ध्यायेदिष्टफलप्रदां भगवतीं चैतन्यरूपां परां
[1]योगीशो गुरुपादपद्मयुगलालम्बी समाधौ यतः[2] ॥ ५३ ॥

लक्षणा कुण्डलिनी तल्लिङ्गत्रयं मूलाधारचक्रस्थितं स्वयम्भूलिङ्गम्, अनाहतचक्रस्थं बाणाख्यलिङ्गम्, आज्ञाचक्रस्थम् इतराख्यलिङ्गञ्चेति त्रितयमित्यर्थः, भित्त्वा लिङ्गैरेतैः कृतं सहस्रारगमनपथसंरोधमपाकृत्य ब्रह्माख्यायाः शिराया निरुक्तब्रह्मनाड्याः सम्बन्धि सकलसरसिजं प्राप्य मूलाधारतः स्वाधिष्ठानं ततो मणिपूरं ततोऽनाहतमित्येवं-क्रमेण निरुक्तपद्मानि गत्वा शुद्धसत्त्वा तुरीयचैतन्यस्वरूपा तथा तडिदिव विद्युत्सदृश-दीप्तिशालिनी सूक्ष्मतालक्षणेन सूक्ष्मतास्वरूपेण विलसत्तन्तुरूपस्वरूपा विलसतः शोभमानस्य तन्तोर्मृणालसूत्रस्य रूपमिव स्वरूपं यस्याः तथाभूता सा देवी कुण्डलिनी प्रदीप्ते प्रकृष्टदीप्तिशालिनि, तथा सूक्ष्मधाम्नि सूक्ष्मं धाम तेजो यस्य तादृशे परमरसशिवे 'तस्या मध्यान्तराले शिवपदममलं शाश्वतं योगिगम्यम्' इत्युक्तपरंबिन्दुरूपे शिवे परमशिवे इति वा। क्रमेण गत्वेत्यर्थः। सहसा मोक्षाख्यानन्दरूपं साधकानां निरवच्छिन्नानन्दरूपां मुक्तिं घटयति निर्वर्त्तयतीत्यर्थः ।

५३। अथ निरुक्तपरंबिन्दुरूपशिवे कुण्डलिनीयोजनस्य क्रममाह—नीत्वेति। गुरुपादपद्मयुगलालम्बी श्रीगुरुचरणसरोरुहैकशरणः समाधौ चित्तवृत्तिनिरोधलक्षणे योगे यतः तदेकनिष्ठ इत्यर्थः, योगीशः योगिश्रेष्ठः तां निरुक्तलक्षणां कुलकुण्डलीं जीवेन सार्द्धं—

हृदयाद्धंसमनुना नीत्वा जीवं मुखाम्बुजे ।

इत्यादि पूर्वोपदर्शितकालीकुलामृतवचनानुसारेण अनाहतचक्रात् मूलाधारे नीतेन जीवेन जीवात्मना सार्द्धं शैवे परंबिन्दुरूपे परे श्रेष्ठे स्वामिनि स्वामिसमीपे। यद्वा परे शैवे परशिवरूपे स्वामिनि तत्सन्निधाने लयवशात् लयक्रमेण नीत्वा। स्वामिनः स्थानं विशेषणप्रदर्शनमुखेनाह—शुद्धेति। शुद्धं पद्मं सहस्रारपद्मं सदनं यस्य तथाभूते सहस्रारवर्त्तिनीत्यर्थः, तथा मोक्षे धामनि मुक्तिसम्पादके स्थाने इत्यर्थः। जीवात्मना सह कुण्डलिन्या उन्नयनमाह—शाक्तानन्दतरङ्गिण्यां चतुर्थोल्लासे—

1. 'योगीन्द्रो' C. 2. 'युतः' B.

प्रवृद्धवह्निसंयोगे मनसा मारुतैः सह ।
ऊर्द्ध्वं नयेत् कुण्डलिनीं जीवात्मसहितां पराम् ॥ इति ।

एवं सहस्रारे कुण्डलिनीयोगमभिधाय तस्या ध्यानप्रकारमाह—ध्यायेदिति । इष्टफलप्रदां स्वाभीष्टफलदायिनीमिष्टदेवतारूपामित्यर्थः, परां परंबिन्दुरूपां परशिवरूपां वा, तथा चैतन्यरूपाम्, एतेनास्याः परंबिन्दुरूपत्वचैतन्यरूपत्वयोः तद्रूपेण शिवेनाभिन्नरूपतां चिन्तयेदित्यर्थादुक्तं भवति । व्यक्तमाह शाक्तानन्दतरङ्गिण्यां चतुर्थोल्लासे कुण्डलिनीं प्रकृत्य—

मूलाधारान्महेशानि सहस्रारे समानयेत् ।
शम्भुगतां परां शक्तिमेकीभावं विचिन्तयेत् ।
ध्यायेत् कुण्डलिनीं तत्र इष्टदेवस्वरूपिणीम् ॥ इति ।

अत्र मूले लयवशादित्युक्तम् । लयक्रमेणोन्नयनप्रकारस्तु—मूलाधारकमलकर्णिकान्तर्गतत्रिकोणगह्वरस्थितायां कुण्डलिन्यामनाहतचक्राज्जीवात्मानं हंसमन्त्रेण समानीय निरुक्तत्रिकोणस्थितानामैन्द्रबीजब्रह्मकामदेवादीनां पृथिव्यां पृथिव्याश्च स्वकारणभूते गन्धतत्वे विलयं विधाय जीवात्मानं कुण्डलिनीं गन्धतत्त्वञ्च हुङ्कारेण स्वाधिष्ठाने विलापयेत् । तदुक्तं कङ्कालमालिनीतन्त्रे द्वितीयपटले मूलाधारपद्मं प्रकृत्य—

तत्कर्णिकायां देवेशि त्रिकोणमतिसुन्दरम् ।
तथा—त्रिकोणाख्ये तु देवेशि लङ्कारं चिन्तयेत्तथा ।
ब्रह्माणं तत्र सञ्चिन्त्य कामदेवञ्च चिन्तयेत् ॥

इत्याद्यभिधाय

एतानि गिरिजे मातः पृथ्वीं नीत्वा गणेश्वरि ।
तन्मध्ये लिङ्गरूपन्तु कुण्डलीवेष्टितं प्रिये ॥

इत्यादिना स्वयम्भूलिङ्गकुण्डलिन्योः स्वरूपं निर्णीय

पूर्वोक्तां पृथिवीं धन्यां गन्धे नीत्वा महेश्वरि ।
आकृष्य प्रणवेनैव जीवात्मानं नगेन्द्रजे ॥
कुण्डलिन्या सह प्राणं गन्धमादाय साधकः ।
सोऽहन्तु मनुना देवि स्वाधिष्ठाने प्रवेशयेत् ॥ इति ।

अत्र वचने यत् प्रणवेनाकर्षणं सोऽहमित्यनेनोत्थापनमुपदिष्टं तन्मतान्तरम्, नेदं पूर्णानन्दसम्मतमिति विस्तरतः प्रतिपादितं 'हुङ्कारेणैव देवी'मित्याद्येकपञ्चाशत्तमश्लोकटीकायाम् । इति कुण्डलिन्याः स्वाधिष्ठानोन्नयनप्रक्रिया ।

ततश्च तत्र कर्णिकान्तःस्थितवारुणबीजविष्णुशक्त्यादीनां जले जलस्य च स्वकारणभूते रसतत्त्वे लयं विधाय तद्रसतत्त्वं जीवात्मानं कुण्डलिनीञ्च हूङ्कारेण मणिपूरे विलापयेत्। तदुक्तं तत्रैव—

तत्कर्णिकायां वरुणं तत्रापि भावयेद्धरिम्।
युवानं राकिणीं शक्तिं चिन्तयित्वा वरानने॥
रसनेन्द्रियपूपस्थं जलञ्च कामलालसे।
एतानि गन्धञ्च शिवे रसे नीत्वा वरानने॥
जीवात्मानं कुण्डलिनीं रसञ्च मणिपूरके।
नीत्वा परमयोगेण तत् पद्मं दिग्भवं प्रिये॥

इति मणिपूरोन्नयनप्रक्रिया।

ततश्च तत्कर्णिकान्तर्विलसद्वह्निबीजरुद्रलाकिनीशक्त्यादीनां तेजसि तेजसश्च स्वकारणभूते रूपतत्त्वे लयं विधाय तद्रूपतत्त्वं जीवात्मानं कुण्डलिनीञ्च अनाहतचक्रे विलापयेत्। तदुक्तं तत्रैवानाहतपद्मं प्रकृत्य—

तत्कर्णिकायां सुश्रोणि वह्निं सञ्चिन्त्य साधकः।
तत्र रुद्रः स्वयं कर्त्ता संहारे सकलस्य च॥
लाकिनीशक्तिसंयुक्तं भावयेत्तं मनोहरम्।
तत्र चक्षुरिन्द्रियञ्च ध्यात्वा तेजोमयं शिवे॥
एतद्रसञ्च सुभगे रूपे नीत्वा महाभगे।
जीवात्मानं कुण्डलिनीं रूपञ्चानाहते नयेत्॥ इति।

इति अनाहतोन्नयनप्रक्रिया।

ततश्चानाहतचक्रकर्णिकान्तरालस्थवायुबीजेश्वरकाकिनीशक्त्यादीनां वायौ वायोश्च स्पर्शतत्त्वे लयं विधाय तत् स्पर्शतत्त्वं जीवात्मानं कुण्डलिनीञ्च निरुक्तविशुद्धचक्रे विलापयेत्। तदुक्तं तत्रैव अनाहतचक्रं प्रकृत्य—

तत्कर्णिकायां वायुञ्च जीवस्थाननिवासिनम्।
तत्र योनेर्मण्डलञ्च बाणलिङ्गविराजितम्॥
काकिनीशक्तिसंयुक्तं तत्र वायुं त्वगिन्द्रियम्।
एतानि रूपं संयोज्य स्पर्शे त्वमलकारिणि।
जीवं कुण्डलिनीं स्पर्शं विशुद्धे स्थापयेत्ततः॥ इति।

इति विशुद्धचक्रोन्नयनप्रक्रिया।

ततश्चैतत् षोडशदलकमलकर्णिकान्तरालस्थितानामाकाशबीजसदाशिवशाकिनी-

[पुनः कुण्डलिन्या मूलाधारप्रापणममृतधारया स्वेष्टदैवततर्पणञ्च]

लाक्षाभं परमामृतं परशिवात् पीत्वा ततः कुण्डली
पूर्णानन्दमहोदयात् कुलपथान्मूले विशेत् सुन्दरी ।
तद्दिव्यामृतधारया स्थिरमतिः सन्तर्पयेद्दैवतं
योगी योगपरम्पराविदितया ब्रह्माण्डभाण्डे स्थितम् ॥५४॥

शक्त्यादीनाम् आकाशे आकाशस्य च शब्दतत्त्वे लयं विधाय तच्छब्दतन्मात्रं जीवात्मानं कुण्डलिनीञ्च निरुक्ताज्ञाचक्रे विलापयेत् । तदुक्तं तत्रैव विशुद्धं प्रकृत्य—

तत्कर्णिकायामाकाशं शिवञ्च शाकिनीयुतम् ।
वाचं श्रोत्रञ्च आकाशे संस्थाप्य नगनन्दिनि ॥
एतानि स्पर्शं शब्दे वै नीत्वा शङ्करि मत्प्रिये ।
जीवं कुण्डलिनीं शब्दमाज्ञाचक्रे निधापयेत् ॥ इति ।

इत्याज्ञाचक्रोन्नयनप्रक्रिया ।

ततश्चाज्ञाचक्रकर्णिकान्तःस्थितानामितरशिवहाकिनीशक्त्यादीनां सर्वेषां मनसि लयं विधाय जीवात्मानं कुण्डलिनीं मनश्च सहस्रारे नयेत् ।

तदुक्तं तत्रैव—जीवात्मानं कुण्डलिनीं मनश्चापि महेश्वरि ।
सहस्रारे महापद्मे मनश्चापि (?) नियोजयेत् ॥ इति ।

अत्र निरुक्तशब्दतत्त्वस्याहङ्कारेऽहङ्कारस्य महत्तत्त्वे महत्तत्त्वस्य हिरण्यगर्भाख्य-सूक्ष्मप्रकृतौ तस्याश्च परबिन्दौ विलापनं कर्त्तव्यमिति लयक्रमः । तदुक्तं कालीचरण-कृतषट्चक्रटीकाधृतमन्त्रतन्त्रप्रकाशे—

अहङ्कारे हरेद् व्योम सशब्दं तन्महत्यपि ।
महच्च सर्वशक्तीनामव्यक्ते कारणे परे ॥
सच्चिदानन्दरूपं यद् वैष्णवं कारणं परम् ।
पृथिव्यादिक्रमात् सर्वं तत्र लीनं विचिन्तयेत् ॥ इति ।

एवञ्च सर्वेषामेव पृथिव्यादीनां तदाश्रितानाञ्च स्वस्वकारणे लय इति फलितम् ।

५४। पुनः कुण्डलिन्याः सहस्रारान्मूलाधारप्रापणमाह—लाक्षाभमिति । ततः सा कुण्डलिनी परशिवात् लाक्षाभं लाक्षासदृशवर्णविशिष्टं परमामृतं परशिवसामरस्या-मृतं पीत्वा नित्यानन्दमहोदयात् नित्यानन्दस्य महान् उदयो यत्र तथाभूतात् तस्मात्, कुलपथादिति ल्यब्लोपे पञ्चमी । निरुक्तसहस्रारगमनपथं प्राप्य पुनर्मूले मूलाधारचक्र-

रूपस्वावासस्थाने विशेत् प्रविशति। येन क्रमेण पूर्वं सहस्रारं गता तेनैव क्रमेण प्रत्यावृत्य पुनः सार्द्धत्रिवलयाकारेण स्वयम्भूलिङ्गं वेष्टयित्वा तिष्ठतीत्यर्थः। व्यक्तमाह शाक्तानन्दतरङ्गिण्यां चतुर्थपटले सहस्रारं प्रकृत्य—

सदाशिवो महादेवो यत्रास्ते परमेश्वरि।
तत्र गत्वा महादेवी कुण्डली परदेवता॥
देवीं रूपवतीं कामसमुल्लासविहारिणीम्।
मुखारविन्दगन्धेन मोदितं परमं शिवम्॥
प्रबोध्य परमेशानि तत्रोपरि वसेत् प्रिये।
शिवस्य मुखपद्मं हि चुचुम्बे कुण्डली शिवे॥
सदाशिवेन देवेशि क्षणमात्रं रमेत् प्रिये।
अमृतं जायते देवि तत्क्षणात् परमेश्वरि॥
तदुद्भवामृतं देवि लाक्षारससमोपमम्।
तेनामृतेन देवेशि तर्पयेत् परदेवताम्॥
षट्चक्रदेवतास्तत्र सन्तर्प्यामृतधारया।
आनयेत्तेन मार्गेण मूलाधारं पुनः सुधीः॥

इति। सहस्रारान्मूलाधारे कुण्डलिन्या अवतरणस्य क्रमोऽपि स्फुटं प्रदर्शितस्तत्रैव—

सदा षोडशवर्षीयां पीनोन्नतपयोधराम्।

इत्यादि कुण्डलीध्यानमभिधाय—

एवं ध्यात्वा जपेन्मन्त्रं शतमष्टोत्तरं शिवे।
मातृकामालया जप्त्वा आज्ञाचक्रं समानयेत्॥
तत्रेतरशिवलिङ्गेन योजयेत् कुण्डलीं पराम्।
ध्यात्वा ब्रह्ममयीं तत्र शतमष्टोत्तरं जपेत्॥
ततो विशुद्धौ तां नीत्वा शिवेन सह योजयेत्।
तामिष्टदेवतां ध्यात्वा जपेदष्टशतं प्रिये॥
हृत्पद्मे तां ततो नीत्वा बाणेन सह योजयेत्।
देवीरूपाञ्च तां ध्यात्वा जपेदष्टोत्तरं शतम्॥
मणिपूरे तु तां नीत्वा शिवेन सह योजयेत्।
देवीरूपान्तु तां ध्यात्वा शतमष्टोत्तरं जपेत्॥
स्वाधिष्ठाने तु तां नीत्वा शिवेन सह योजयेत्।
योजयित्वा जपेन्मन्त्रं देवीं ध्यात्वा प्रियंवदे॥

[षट्चक्रक्रमज्ञानफलम्]

ज्ञात्वैतत् क्रममुत्तमं यतमना योगी समाधौ[1] युतः
श्रीदीक्षागुरुपादपद्मयुगलामोदप्रवाहोदयात् ।
संसारे न हि जन्यते न हि कदा संक्षीयते संक्षये
पूर्णानन्दपरम्पराप्रमुदितः शान्तः सतामग्रणीः ॥ ५५ ॥

[एतत्षट्चक्रप्रकरणाध्ययनफलम्]

योऽधीते निशि सन्ध्ययोरथ दिवा[1] योगी स्वभावस्थितो
मोक्षद्वार[2]निदानमेतदमलं शुद्धं सुगुप्तक्रमम् ।
श्रीमच्छ्रीगुरुपादपद्मयुगलालम्बी यतान्तर्मना-
स्तस्यावश्यमभीष्टदैवतपदे चेतो नरीनृत्यते ॥ ५६ ॥

इति श्रीपूर्णानन्दपरमहंसविरचिते श्रीतत्त्वचिन्तामणौ
योगविवरणं नाम षष्ठः प्रकाशः ॥ ६ ॥

शतमष्टोत्तरं जप्त्वा मूलाधारे तु तां नयेत् ।
तत्र लिङ्गं स्वयम्भूञ्च ध्यायेत् कुन्दसमप्रभम् ॥ इत्यादि ।

निरुक्तामृतधाराकरणकेष्टदेवतातर्पणमाह—तदिति । स्थिरमतिर्निरुक्तयोगानुष्ठाने दृढप्रत्ययविशिष्टो योगी योगपरम्पराविदितया निरन्तरयोगाभ्यासानुभूतस्वरूपया तद्दिव्यामृतधारया पूर्वमभिहितयेत्यर्थः । दैवतम् इष्टदेवीं सन्तर्पयेत् । दैवतं विशेषयति—ब्रह्माण्डभाण्डे स्थितमिति । ब्रह्माण्डस्य भाण्डं पात्रं योनिरूपमित्यर्थः कुण्डलिनी तत्र स्थितमित्यर्थः ।

५५ । एवं षट्चक्रप्रक्रियामभिधाय तज्ज्ञानफलमाह—ज्ञात्वेति । समाधौ युतः समाधिनिष्ठो योगी एतत् श्रीदीक्षागुरोः पादपद्मयुगले य आमोदप्रवाहः तत्सेवयाधिगता ब्रह्मज्ञानानन्दपरम्परा तस्य उदयात् एतत्क्रमं प्रागुक्तप्रक्रियां ज्ञात्वा संसारे न जन्यते नोत्पद्यते, संक्षयेऽपि प्रलयकालेऽपि न संक्षीयते । स नित्यानन्दपरम्परया धारावाहिकब्रह्मस्वरूपानन्दानुभवेन शान्तः सतामग्रणीश्च भवति ।

५६ । एतत्षट्चक्रप्रकरणाध्ययनफलमाह—योऽधीत इति । यः श्रीमत् श्रीगुरु-

---

1. 'यमादौ' C.

1. 'योगित्व'-C. 2. 'ज्ञान-' C

पादपद्मयुगलम् आलम्बितुं शीलमस्य सः तथा यतान्तर्मना यतम् अन्तरात्मनि मना यस्य तथाभूतः योगी स्वभावस्थितः स्वस्मिन् आत्मनि भावो यस्य तादृशः सन्, निशि रात्रौ सन्ध्ययोः प्रातः सायञ्च, अथवा दिवा मोक्षद्वारनिदानमेतद् योगविवरणं अधीते तस्य योगिनः अभीष्टदैवतपदे स्वेष्टदेवताचरणे चेतो नरीनृत्यते। एतद्योगप्रभावेण स्वेष्टदेवतास्वरूपावलोकनात् तत्र चित्तमतिमात्रमुल्लासमधिगच्छतीत्यर्थः।

अथैकत्रिंशोऽध्यायः

योगाङ्गयमनियमासननिरूपणम्

ध्यातं सकृद्भवानेककोट्यघौघं हरत्यरम् ।
सुदर्शनस्य तद् दिव्यं भर्गो देवस्य धीमहि ॥

जिसका अरा एक वार ध्यान करने से अनेक जन्म के करोड़ों समूहों के पाप को नष्ट करता है, हम उस सुदर्शन देव के तेज का ध्यान करते हैं ।

हृद्यागस्वरूपप्रश्नः

नारदः—

प्रथमं बाह्ययागस्य हृदयाराधनं परम् ।
उक्तं त्वया तत्स्वरूपं यथावद्वक्तुमर्हसि ॥ १ ॥

श्रीनारद ने कहा—हे भगवन् ! आप ने पहले कहा था कि बाह्य याग से पहले हृदय याग करना आवश्यक है (द्र० २८-२९) इसलिए उसका स्वरूप मुझसे कहिये ॥ १ ॥

तदुत्तरकथनारम्भः

अहिर्बुध्न्यः—

साधु पृष्टं त्वया तस्य स्वरूपं शृणु नारद ।
येन प्रीणाति भगवान् सर्वलोकनमस्कृतः ॥ २ ॥

अहिर्बुध्न्य ने कहा—हे नारद ! आपने अच्छी बात मुझसे पूछी । अब उसका स्वरूप सुनिए जिसके करने से सर्वलोक से नमस्कृत भगवान् प्रसन्न हो जाते हैं ॥ २ ॥

हृद्यागलक्षणम्

यैर्बाह्ययागः क्रियते साधनैस्त्रिविधैरिह ।
सङ्कल्पसिद्धैस्तैरेव देवं प्रति समर्चनम् ॥ ३ ॥
हृदयाराधनं प्रोक्तमेतत् सर्वार्थसाधनम् ।

जिन तीन प्रकार के साधनों से इस लोक में बाह्य याग किया जाता है उन्हीं साधनों से अपने सङ्कल्प के द्वारा देवाधिदेव का अर्चन करना सर्वोत्कृष्ट हृदयाराधन नामक यज्ञ है, जिससे सारे अर्थों की सिद्धि होती है ॥ ३-४ ॥

आत्मसमर्पणस्य हृद्यागतुल्यत्वम्

यद्वा भगवते तस्मै स्वकीयात्मसमर्पणम् ॥ ४ ॥
वियुक्तं प्रकृतेः शुद्धं दद्यादात्महविः स्वयम् ।
विशिष्टदैवतायास्मै चक्ररूपाय मन्त्रतः ॥ ५ ॥

उन भगवान् को अपना सर्वस्व समर्पण करना ही हृद्याग है, जिस हृद्याग में अपनी प्रकृति से वियुक्त हुये विशुद्ध आत्मा की चक्ररूप विशिष्ट देवता के लिए मन्त्र द्वारा और स्वयं के द्वारा आहुति दी जाती है ॥ ४-५ ॥

प्रकृतिवियुक्तात्मस्वरूपविषयकः प्रश्नः

नारदः—

वियुक्तं प्रकृते रूपमात्मनो वक्तुमर्हसि ।
केनोपायेन तत्प्राप्तिस्तन्मे ब्रूहि सुनिश्चितम् ॥ ६ ॥

श्रीनारद ने कहा—हे भगवन् ! अपनी प्रकृति से विच्युत आत्मा किस उपाय से अपने प्रकृति को प्राप्त करता है, उसे निश्चयपूर्वक कहिए ॥ ६ ॥

तदुत्तरकथनारम्भः

अहिर्बुध्न्यः—

शृणु तत् परमं सूक्ष्मं सर्वगं सर्वभृत् तथा ।
ज्ञानरूपमनाद्यन्तमविकारि निरामयम् ॥ ७ ॥
अचक्षुःश्रोत्रमस्पर्शमपाणिचरणं ध्रुवम् ।
नामजात्यादिरहितमवर्णमगुणं त्वपि ॥ ८ ॥
विश्वश्रवो विश्वचक्षुर्विश्वपाणिपदं परम् ।
असक्तमचरं शान्तं स्वयंज्योतिरनौपमम् ॥ ९ ॥
दूरस्थमन्तिकचरं ज्ञानगम्यं निरञ्जनम् ।
भूतभर्तृ समज्योतिर्ज्योतिषां तमसः परम् ॥ १० ॥
अक्षरं सर्वभूतस्थं तद्विष्णोः परमं पदम् ।

योगकर्मणोर्विविक्तात्मस्वरूपप्राप्तिसाधनता

तत्प्राप्तिसाधनं योगः कर्म च श्रुतिचोदितम् ॥ ११ ॥

अहिर्बुध्न्य ने कहा—हे नारद ! आप आत्मा के प्रकृति प्राप्ति का उपाय सुनिए—

परम, सूक्ष्म, सर्वग, सर्वभृत, ज्ञानरूप, आदि अन्त से रहित, अविकारी, निर्भय, अचक्षुः, अश्रोत्र, अस्पर्श, अपाणिपाद एवं नामजाति से रहित अवर्ण अगुण विश्वश्रव, विश्वचक्षु, विश्वपाणि पाद, सबसे परे, असक्त, अचर, शान्त स्वयंज्योति अनुपम दूर तथा अन्तिम सर्वत्र व्याप्त ज्योतियों की ज्ञानगम्य, मायारहित, प्राणियों का पोषण करने वाला समज्योति, तम से परे, अक्षर एवं सर्व भूतस्थ ऐसी प्रकृति वाले आत्मरूप विष्णु के

परम पद स्वरूप को प्राप्त करने के साधन को योग कहा जाता है । वह कर्म वेद में विहित है ॥ ७-११ ॥

तद्विषयकः प्रश्नः

नारदः—

कीदृशं कर्म विज्ञेयं योगः कीदृश उच्यते ।
याभ्यां सम्प्राप्यते चात्मा केवलं प्रकृतेः परः ॥ १२ ॥

श्रीनारद ने कहा—हे भगवन् ! वह कर्म कैसा है? किसे योग कहते हैं? जिससे प्रकृति से परे आत्मतत्त्व की प्राप्ति होती है ॥ १२ ॥

तदुत्तरकथनारम्भः

अहिर्बुध्न्यः—

शृणुष्व प्रथमं कर्म द्विविधं तदिहोच्यते ।

कर्मणां द्वैविध्यम्

एकं प्रवर्तकं प्रोक्तं निवर्तकमथापरम् ॥ १३ ॥

अहिर्बुध्न्य ने कहा—हे नारद ! सर्वप्रथम कर्म किसे कहते हैं? उसे सुनिए । यह दो प्रकार का कहा गया है, प्रथम प्रवर्त्तक तथा दूसरा निवर्त्तक ॥ १३ ॥

प्रवर्तकनिवर्तककर्मणोः क्रमादभ्युदय-निःश्रेयससाधनत्वम्

प्रवर्तकं च स्वर्गादिफलसाधनमुच्यते ।
निवर्तकाख्यं देवर्षे विज्ञेयं मोक्षसाधनम् ॥ १४ ॥

हे देवर्षे ! स्वर्गादि फल उत्पन्न करने वाला साधन प्रवर्त्तक कर्म है और मोक्ष का साधनभूत निवर्त्तक कर्म कहा जाता है, ऐसा समझना चाहिए ॥ १४ ॥

जीवपरसंयोगस्याष्टाङ्गयोगशब्दार्थता

संयोगो योग इत्युक्तो जीवात्मपरमात्मनोः ।
अष्टाङ्ग एष कथितो येनात्मा दृश्यतां गतः ॥ १५ ॥

जीवात्मा तथा परमात्मा का संयोग योग कहा जाता है । इस योग के आठ अङ्ग हैं, जिनसे आत्मा का साक्षात्कार होता है ॥ १५ ॥

योगाङ्गपरिगणनम्

अष्टाङ्गान्यस्य वक्ष्यामि पृथक् तानि निशामय ।
यमश्च नियमश्चैवमासनं तदनन्तरम् ॥ १६ ॥
प्राणायामस्ततः प्रोक्तः प्रत्याहारश्च धारणा ।
ध्यानं तथा समाधिश्चाप्यङ्गान्येतानि नारद ॥ १७ ॥

अव मैं उस योग के आठ अङ्गों का पृथक्-पृथक् वर्णन करता हूँ, आप उसे सुनिए। यम, नियम, आसन, उसके वाद प्राणायाम, फिर प्रत्याहार, धारणा, ध्यान तथा समाधि, हे नारद ! यही योग के आठ अङ्ग है ॥ १६-१७ ॥

यमस्वरूपनिरूपणम्

सत्यं दया धृतिः शौचं ब्रह्मचर्यं क्षमार्जवम् ।
मिताहारस्तथास्तेयमहिंसेति यमा दश ॥ १८ ॥

सत्य, दया, धैर्य, शौच, ब्रह्मचर्य, क्षमा, आर्जव, मिताहार, अस्तेय और अहिंसा—ये दश यम कहे जाते है ॥ १८ ॥

सत्यादीनां स्वरूपनिरूपणम्

हितरूपं वचः सत्यं यथादृष्टार्थगोचरम् ।
दया दुःखासहिष्णुत्वं सर्वभूतेषु सर्वदा ॥ १९ ॥
आपद्यपि स्वकार्येषु कर्तव्यत्वस्थितिर्धृतिः ।
शौचं सर्वेन्द्रियाणां च वैधकर्मसु योग्यता ॥ २० ॥
ब्रह्मचर्यं स्वयोषित्सु भोग्यताबुद्धिवर्जनम् ।
अविकारमनस्त्वं तु क्षमा विकृतिहेतुषु ॥ २१ ॥
वाङ्मनःकायवृत्तीनामेकरूपत्वमार्जवम् ।
मिताहारस्त्वाश्रमिणां श्रुतिचोदितभोजनम् ॥ २२ ॥
अस्तेयमस्पृहान्येषां वित्ते वाक्कायमानसैः ।
अहिंसा वाङ्मनःकायैः परपीडानिवर्तनम् ॥ २३ ॥

सत्यादि यमों का लक्षण—प्राणियों का जिससे हित हो ऐसे वचन को सत्य कहते हैं। अथवा जैसा देखा या सुना हो उसे उसी रूप में कहना **सत्य** है—सर्वदा सभी प्राणियों के दुःख को न सह सकने का नाम **दया** है। आपत्ति आने पर भी अपने कर्त्तव्य कार्य से विचलित न होने का नाम **धृति** है। वैध कर्म के लिए सभी इन्द्रियों में योग्यता सम्पादन का नाम **शौच** है। अन्यों की तो क्या अपनी स्त्री में भी भोग्यता बुद्धि का न होना **ब्रह्मचर्य** है। विकार हेतु के उपस्थित होने पर भी मन में विकार न होने का नाम **क्षमा** है। जो वाणी, मन तथा शरीर की एक रूपता का नाम **आर्जव** है। आश्रमियों के लिए वेदविहित भोजन का नाम **मिताहार** है। दूसरों के द्वारा अर्जित धन में वाणी, शरीर तथा मन के द्वारा किसी भी प्रकार अपनी इच्छा को उत्पन्न न होने देना **अस्तेय** है। वाणी मन तथा शरीर से दूसरे को पीड़ा उत्पन्न न करना **अहिंसा** है। ये दश यम के लक्षण कहे गए ॥ १९-२३ ॥

नियमस्वरूपनिरूपणम्

सिद्धान्तश्रवणं दानं मतिरीश्वरपूजनम् ।
सन्तोषस्तप आस्तिक्यं ह्रीर्जपश्च तथा व्रतम् ॥ २४ ॥

एते तु नियमाः प्रोक्ता दश योगस्य साधकाः ।

सिद्धान्त श्रवण, दान, मति, ईश्वर पूजन, सन्तोष, तप, आस्तिक्य, ह्री (लज्जा) जप तथा व्रत ये दश नियम कहे गए हैं जो योग के साधक हैं ॥ २४ ॥

सिद्धान्तश्रवणादीनां स्वरूपनिरूपणम्

सिद्धान्तश्रवणं प्रोक्तं वेदान्तश्रवणं बुधैः ॥ २५ ॥
दानं न्यायार्जितार्थस्य सत्पात्रे प्रतिपादनम् ।
विहिते कर्मणि श्रद्धा मतिरित्यभिधीयते ॥ २६ ॥
यथाशक्त्यर्चनं भक्त्या विष्णोरीश्वरपूजनम् ।
सन्तोषोऽलमनेनेति प्रीतिर्यादृच्छिकेन वै ॥ २७ ॥
कृच्छ्रचान्द्रायणाद्यैश्च तपो देहविशोषणम् ।
आस्तिक्यमस्ति वेदैकगम्यं वस्त्विति निश्चयः ॥ २८ ॥
निषिद्धकर्मकरणे व्रीडा ह्रीः प्रोच्यते बुधैः ।
गुरूपदिष्टस्वाध्यायमन्त्राभ्यासो जपः स्मृतः ॥ २९ ॥
सदाचार्योपदिष्टेषूपायत्वप्रग्रहो व्रतम् ।

बुद्धिमानों ने वेदान्तश्रवण को **सिद्धान्त श्रवण** कहा है । न्यायपूर्वक अर्जित धन का सत्पात्र में प्रतिपादन **दान** कहा है । वेदविहित कर्म में श्रद्धा रखना **मति** है । विष्णु की भक्तिपूर्वक यथाशक्ति अर्चना करना **ईश्वर पूजन** है, यदृच्छा से प्राप्त होने वाले धन में प्रीति रखना और जो प्राप्त हुआ है उसे अधिक न चाहने का नाम **सन्तोष** है । कृच्छ्र चान्द्रायणादि के द्वारा देह का शोषण करना **तप** है । वेद में ऐसी बात कही गई है, इसलिए उस पर श्रद्धा रखना **आस्तिक्य** है और निषिद्ध कर्म करने में लज्जा करना इसी को बुद्धिमानों ने **ह्री** कहा है । गुरु के द्वारा उपदिष्ट स्वाध्याय तथा मन्त्राभ्यास **जप** है । सर्वदा आचार्य से उपदिष्ट उपाय का अवलम्बन करते रहना **व्रत** है ॥ २५-३० ॥

अथासनानां स्वास्थ्यहेतुत्वम्

आसनानि प्रवक्ष्यामि मुख्यानि विविधानि च ॥ ३० ॥
आस्थायैषामन्यतमं योगिनो यान्ति निर्वृतिम् ।

मुख्यासनपरिगणनम्

चक्रं पद्मासनं कूर्मं मायूरं कौक्कुटं तथा ॥ ३१ ॥
वीरासनं स्वस्तिकं च भद्रं सिंहासनं तथा ।
मुक्तासनं गोमुखं च मुख्यान्येतानि नारद ॥ ३२ ॥

हे नारद ! अब मैं मुख्य मुख्य आसन, जो अनेक प्रकार के हैं, उनका वर्णन करता हूँ । उनमें से किसी एक आसन का अभ्यास करने से योगी जन सुख प्राप्त करते हैं । चक्र, पद्मासन, कूर्म, मायूर, कौक्कुट, वीरासन, स्वस्तिक, भद्र, सिंहासन, मुक्तासन तथा गोमुख, हे नारद ! मुख्य रूप से इतने आसन कहे गए हैं ॥ ३०-३२ ॥

चक्रासनम्

सव्योरुं दक्षिणे गुल्फे दक्षिणं दक्षिणेतरे ।
निदध्यादृजुकायस्तु चक्रासनमिदं परम् ॥ ३३ ॥

वायें ऊरु को दाहिने गुल्फ पर और दाहिने ऊरु को वायें गुल्फ पर रख कर मेरुदण्ड को सीधे कर बैठने से **चक्रासन** होता है ॥ ३३ ॥

पद्मासनम्

ऊर्वोरुपरि संस्थाप्य उभे पादतले सुखम् ।
पद्मासनमिदं प्रोक्तं सर्वकिल्बिषनाशनम् ॥ २९ ॥

दोनों ऊरु तलों पर दोनो पादतल सुखपूर्वक स्थापित करे तो इसे **पद्मासन** कहते हैं, जो सारे पापों को नष्ट कर देता है ॥ ३४ ॥

कूर्मासनम्

गुदं निपीड्य गुल्फाभ्यां व्युत्क्रमेण समाहितः ।
एतत् कूर्मासनं प्रोक्तं योगसिद्धिकरं परम् ॥ ३५ ॥

व्युत्क्रम से (उल्टे क्रम से अर्थात् बायें से दायाँ और दायें से बायाँ) एकाग्र-चित्त होकर दाहिने गुल्फ से गुदा का बायाँ भाग तथा बायें गुल्फ से गुदा का दाहिना भाग दबा कर स्थापित करे तो इसे **कूर्मासन** कहते हैं । यह सर्वोत्कृष्ट योग-सिद्धिकारक आसन है ॥ ३५ ॥

मयूरासनम्

निवेश्य कूर्परौ सम्यङ् नाभिमण्डलपार्श्वयोः ।
अवष्टभ्य भुवं पाणितलाभ्यां व्योम्नि दण्डवत् ॥ ३६ ॥
समोन्नतशिरःपादो मायूरासनमिष्यते ।
एतत् सर्वविषघ्नं च सर्वव्याधिनिवारणम् ॥ ३७ ॥

दोनों कूर्परों को नाभिमण्डल के पार्श्वभाग में अच्छी प्रकार से स्थापित कर दोनों हाथ के तलवों से जमीन का आश्रय ले कर आकाश में दण्ड के समान शिर और पैर को ऊपर रखे तो इसे **मायूरासन** कहते हैं । इस आसन के करने से मलरूप विष का नाश हो जाता है और सारे रोग एवं शोक दूर हो जाते हैं ॥ ३६-३७ ॥

कुक्कुटासनम्

पद्मासनमधिष्ठाय जान्वन्तरविनिःसृतौ ।
करौ भूमौ निवेश्यैतद्व्योमस्थं कुक्कुटासनम् ॥ ३८ ॥

पद्मासन से बैठ कर जानु के भीतर से निकले हुये दोनों हाथों से पृथ्वी को थाम कर ऊपर उठ जाने का नाम **कुक्कुटासन** है ॥ ३८ ॥

वीरासनम्

एकत्रोरौ तु संस्थाप्य पादमेकमथेतरम् ।

ऊरुं पादे निवेश्यैतद्वीरासनमुदाहृतम् ॥ ३९ ॥

एक ऊरु पर एक पैर रखे, फिर दूसरे ऊरु को दूसरे पैर पर रखे तो इसे **वीरासन** कहा जाता है ॥ ३९ ॥

स्वस्तिकासनम्

उभे पादतले कृत्वा जानूर्वोरन्तरे दृढम् ।
ऋजुकायः समासीत स्वस्तिकं तत् प्रचक्षते ॥ ४० ॥

दोनो पैर के तलवों को दोनों जानु के भीतर भली प्रकार रख कर सीधे-सीधे बैठे तो उस आसन को **स्वास्तिकासन** कहते हैं ॥ ४० ॥

भद्रासनम्

सीवन्याः पार्श्वयोर्गुल्फौ निवेश्याग्रपदे दृढम् ।
बद्ध्वा कराभ्यां तत् प्रोक्तं भद्रासनमघापहम् ॥ ४१ ॥

सीवनी के दोनों पार्श्वभाग में दोनों गुल्फों को स्थापित कर दोनों पैर के अग्रभाग को दोनों हाथों से भली प्रकार बाँधे तो उसे **भद्रासन** कहते हैं । यह समस्त पापों को दूर करने वाला है ॥ ४१ ॥

सिंहासनम्

सीवन्याः पार्श्वयोर्गुल्फौ व्युत्क्रमेण निवेश्य च ।
करौ जान्वोर्निधायोभौ प्रसार्य निखिलाङ्गुलीः ॥ ४२ ॥
नासाग्रन्यस्तनयनो व्यात्तवक्त्र ऋजुः सुधीः ।
एतत् सिंहासनं प्रोक्तं सर्वदेवाभिपूजितम् ॥ ४३ ॥

सीवनी के पार्श्वभाग में व्युत्क्रम से (दाहिने से बायाँ और बायें से दाहिना) दोनों गुल्फ स्थापित कर दोनों हाथों को, जिसमें अङ्गुलियाँ फैली रहे, दोनों जानुओं पर स्थापित करे । नासाग्र भाग में नेत्र स्थापित कर सिंह के समान मुख खोलकर सीधे-सीधे बैठना यह **सिंहासन** कहा गया है । सभी देवगण इस आसन की प्रशंसा करते हैं ॥ ४२-४३ ॥

मुक्तासनम्

मेढ्रादुपरि विन्यस्य सव्यगुल्फमिहेतरम् ।
गुल्फं विन्यस्य पाणी चाप्यङ्गमध्ये निवेश्य च ॥ ४४ ॥
मुक्तासनमिदं प्रोक्तं स्थिता यत्र मुमुक्षवः ।

दाहिने अण्डकोश पर बायाँ गुल्फ और बायें पर दाहिना गुल्फ स्थापित कर दोनों हाथों को ठीक अपने अङ्गमध्य में स्थापित करे तो उसे **मुक्तासन** कहते हैं । मुमुक्षु लोग इसी आसन से बैठते हैं ॥ ४४-४५ ॥

गोमुखासनम्

उभयोर्गुल्फयोः कृत्वा पृष्ठपार्श्वावुभावपि ॥ ४५ ॥

व्युत्क्रमेणाथ पाणिभ्यां विन्यस्ताभ्यां विगृह्य च ।
पृष्ठगाभ्यां पदाङ्गुष्ठावेतद् गोमुखमुच्यते ॥ ४६ ॥

दोनों गुल्फों पर दोनों पृष्ठ और पार्श्वभाग स्थापित कर दोनों हाथों को व्युत्क्रम के अनुसार फैला कर पीछे रहने वाले पादाङ्गुष्ठ को पकड़ना इसे **गोमुख आसन** कहते हैं ॥ ४५-४६ ॥

प्राणायामसिद्धये नाडीशुद्ध्यावश्यकता

प्राणायामप्रसिद्ध्यर्थं नाडीशुद्धिमनन्तरम् ।
देहस्थवायुभिः कुर्यात् साग्निभिश्च तपोधन ॥ ४७ ॥

॥ इति श्रीपाञ्चरात्रे तन्त्ररहस्ये अहिर्बुध्न्यसंहितायां योगाङ्गयमनियमासन-
निरूपणं नामैकत्रिंशोऽध्यायः ॥ ३१ ॥

॥ आदितः श्लोकाः १८७२ ॥

प्राणायाम की सिद्धि के लिए प्रथम नाड़ी शुद्धि कर ले । फिर साधक देह अग्नि के सहित देहस्थ वायु के द्वारा प्राणायाम करे ॥ ४७ ॥

॥ इस प्रकार श्रीपाञ्चरात्र आगम के तन्त्ररहस्य में अहिर्बुध्न्यसंहिता के योगाङ्ग यम नियम आसन निरूपण नामक इकतीसवें अध्याय की शैवागमावतार महाकवि पं० रामकुबेर मालवीय के द्वितीय आत्मज डॉ० सुधाकर मालवीय कृत हिन्दी पूर्ण हुई ॥ ३१ ॥

अथ द्वात्रिंशोऽध्यायः

नाडीशुद्धिवायुजययोगाङ्गप्राणायामादिनिरूपणम्

ध्यातं सकृद्भवानेककोट्यघौघं हरत्यरम् ।
सुदर्शनस्य तद् दिव्यं भर्गो देवस्य धीमहि ॥

जिसका अरा एक बार भी ध्यान करने पर संसार के करोड़ों पापसमूहों को नष्ट करता है, हम उस चक्र सुदर्शन देव के दिव्य तेज का ध्यान करते हैं ।

नाडीसङ्ख्यास्थानादिप्रश्नः

नारदः—

नाडयः कति तिष्ठन्ति कीदृश्यः किंप्रमाणकाः ।
क्व वर्तन्ते शरीरेऽस्मिन् कथमासां विशोधनम् ॥ १ ॥

श्रीनारद ने कहा—हे भगवन् कितनी नाड़ियाँ हैं । उनका स्वरूप कैसा है ? तथा उनका प्रमाण क्या है? इस शरीर में वे कहाँ-कहाँ रहती हैं और किस प्रकार उनकी शुद्धि की जाती है ॥ १ ॥

वायुसङ्ख्यादिप्रश्नः

तासां तिसृणां कथयति । इडेति इडा पिङ्गला सुषुम्ना चेति तास्वपि तिसृषु मध्ये सुषुम्नैव प्रधानीभूता । चतुर्दशनाडीनां नामानि यथा । इडा च पिङ्गला चैव सुषुम्ना च सरस्वती । गान्धारी हस्तिजिह्वा च सुपूषा च यशस्विनी ॥ अलम्बुषा कुहूश्चैव शङ्खिनी चित्रिणी तथा । विश्वोदरी विश्वमुखी व्याप्ता ह्येता चतुर्दश ॥ एतास्वपि तिस्रो मुख्याः यास्वपि योगः प्रतिष्ठितः तास्वपि सुषुम्नैव मुख्या सा च द्वादशान्तं पृष्ठवंशं समाश्रित्य सकलाधारत्वेनाधोमुखी ऋजुभूतातिष्ठति । आधारो नाम पद्मस्थानात् द्व्यगुलादूर्ध्वं मेढ्राद्द्व्यंगुलादधोभागे चतुरंगुलायामविस्तारं अंगुलोन्नतं त्वगादिधातुभिर्वेष्टितं चतुर्दलात्मकं पण्डराकारं पद्मं तत्कर्णिकामध्ये त्रिकोणायोनिः तन्मध्ये सकलप्रपञ्चनिमित्तोपादानभूता कुण्डल्याख्या चिन्मयी शक्तिः त्रिगुणितादिरूपेण सूर्येन्दु वैश्वानराणां मूलभूता भ्रमति या त्रिकोणमुत्थिता सुषुम्ना नाम नाड़ी वीणादण्डाख्यपृष्ठवंशस्य पुरोभागमवलम्ब्य ब्रह्मरन्ध्रपर्यन्तम् ऊर्ध्वाकारा तिष्ठति । तथात्र तन्त्रचूड़ामणिः । मेरुदण्डे वहिः पार्श्वे चन्द्रसूर्याग्निमस्तके । किम्वा मध्ये-- सुषुम्ना सन्निविष्टा च तन्मध्ये चित्ररूपिणी । तत्रैव ग्रथितं पद्मं मूलादिपद्म-

ब्रह्मसूत्रमिदमेव देहिनां जीवभूतममृतैककारणम् ।
यद्वदन्ति मुनयः पुरातना दिव्यमार्ग इति भव्यचेतसः ॥ ६ ॥

पञ्चकम् । कलिकाकाररूपेण डाकिन्याद्यावलम्बितम् । मूलद्वारं समाच्छाद्य स्थिता नागस्वरूपिणी । वायुना भिद्यते मुक्तं दृढं चित्रा नयेत्ततः । तच्छ्वासोज्वलकामस्य शिखयाऽतिसमुज्ज्वला । प्रतिचक्रप्रबुद्धा सा जीवात्मानं परे कुले । नियोजयति तद्योगादमृतं क्षरते चिरम् । व्योम प्रोद्भिद्य नासाग्रे गतौ चन्द्रदिवाकरौ । अधोचक्रं महापद्मं क्रोडीकृत्य सुषुम्नया । व्याघुट्य नासिकामध्यं गतं चित्रा तु तद्गता । ऊर्ध्वं भित्त्वा तु लिङ्गं वै इतरान् पुष्करान् ततः । वहीरुद्धमनाकांक्षाकांक्षिणी मोक्षदायिनी । जीवनांहष्टसम्बद्धा स्थिरा परमसन्निधौ एतद्भेदं विजानाति भित्त्वा याति परं पदम् । इत्यादि बहुशः । योगार्णवेऽपि । सुरशृङ्गाटपार्श्वेन तेजैव सव्यतः क्रमात् सूर्याचन्द्रमसौ नाड्यो गते नासाद्वयावधि । तन्मध्ये द्वितीयं भित्त्वा सुषुम्ना पद्मकोटरे । ब्रह्मरन्ध्रावधिर्याता भित्त्वा व्योम सुरालयम् । सुखेनाच्छाद्य तद्द्वारं कुण्डलीशक्तिरुज्ज्वला । निद्रावशगता देवी प्रसुप्तभुजगोपमा । तत्त्रिकोणस्थ वामदक्षिणकोणयोः सम्भूते सुषुम्नाया वामदक्षिणभागे इडापिङ्गले स्थिते । तयोर्मध्ये इडा नाम नाडी चापाकृतिर्भूत्वा लिङ्गमूलस्थाने सुषुम्नामाश्लिष्य दक्षिणभागं गता तदाकारां पुनरपि नाभिस्थाने वामभागं गता । तदा पुनरपि हृदयस्थानमाश्लिष्य दक्षिणभागं गता । तदा करौ पुनरपि जानुमूलमाश्लिष्य वामनासापुटं गच्छति । एवं दक्षिणभागसम्भूता पिङ्गला सुषुम्नामाश्लिष्य दक्षिणनासाविवरं गच्छति । सुषुम्नामूलपुरोभागादुत्थिता आजिह्वान्तं सरस्वती नाम नाडी स्थिता । केचित्तु त्रयं वर्णतति । एताः सुषुम्नास्तिस्रश्च यासु योगः प्रतिष्ठितः । ताश्च नासापुटद्वन्द्वब्रह्मरन्ध्रविनिर्गताः । सरस्वत्यादिचत्वारो मुखरन्ध्रविनिर्गताः । तास्वेका शब्दजननी अन्या स्वरसवाहिनी । अपरा रसनाधारा परा तोयवहा शिवा । अन्याः षट्नेत्रकर्माङ्गमेदोद्वारविनिर्गताः । शङ्खिनी नाभिसम्बन्धा या मांतुर्हृदि रुध्यते । यया

इडायां चरत्येषं शीतांशुमाली
अतो वामभागेऽमृतं सम्प्रदिष्टम् ।
रविः पिङ्गलायां चरत्येष तस्माद्
विषं दक्षिणो भाग उक्तो मुनीन्द्रैः ॥ ७ ॥

जानीयादुदयं बुधः स्वजठरे कन्देऽशरीरे नृणाम्
घ्राणात्तिग्मकराङ्गुले खलु लयं सन्ध्ये च पूर्वापरे ।
उत्पत्तिश्च लयश्च सन्ततमधोवृत्ति निशां वासरम्
चोर्ध्वां वृत्तिमधस्तथा हिमकर चोर्ध्वां दिनेशं गतिम् ॥८॥

गर्भगतः पिण्डः पुष्यतेऽन्नरसादिभिः । एताभ्य एवं नाडीभ्यः शाखोपशाख-प्रकारेण सार्द्धलक्षत्रयसंख्यानां नाडीनां सम्भवः । कुत्र का नाडी तिष्ठति इति शिष्याकांक्षायमाह इडेति शरीरस्य वामांशमाश्रित्य इडा नाम नाडी दक्षिणभागं पिङ्गला तयोर्नाड्योर्मध्ये देहस्य पृष्ठवंशमाश्रित्य ब्रह्मरन्ध्रपर्यन्तं सुषुम्ना अवस्थितेति । सुषुम्नाया अभ्यन्तरे चित्रा नाडी स्थिता पञ्चभिर्वर्णैः श्वेतरक्तादिभिरुज्ज्वला पञ्चभिर्देवैर्ब्रह्माविष्णुरुद्रेश्वरसदाशिवैः संयुक्ता । तदुक्तम् । ब्रह्मा जनार्दनो रुद्र ईश्वरश्च सदाशिवः चित्राख्यनाड्यन्तःस्थाश्च पञ्चभूताधिदेवताः ॥ ४-५ ॥

ब्रह्मेति । इदमेव ब्रह्मसूत्रं शरीरिणां प्राणभृतां जीवभूतम् अमृतैककारणम् अस्मिन्नेव ज्ञायते मरणं न चरतीत्यर्थः । यद्ब्रह्मसूत्रं प्राचीनां मुनयो दिव्यमार्ग इति कथयन्ति निर्वाणोपयोगी स एव मार्ग इत्यर्थः ॥ ६ ॥

इडायामिति । एष शिशिरकिरणो वामे इडासंज्ञायां नाड्यां चरति तेन वामभागेऽमृतमुक्तं पिङ्गला वामादिभ्यश्चरति सा च दक्षिणभागमाश्रितेति स भागो विषसंज्ञकः आदित्यस्य खेचरत्वात् वायुनियमेन सिध्यतीति ॥ ७ ॥

तस्योत्पत्तिविनाशज्ञानमाह जानीयादिति । बुधः अशरीरे वायोर्नृणां कन्दे मूलभूते आधारे चक्रे उदयम् उद्भवं जानीयात् । तथा आधारचक्रे

तुषारांशुनाडी प्रपन्ने तु देवे तदा शान्तिकादीनि कर्माणि कुर्यात् ।
बुधो रौद्रकर्माणि मार्त्तण्डनाडीमुभे मिश्रकर्माणि नाड्यौ प्रपन्ने ॥ ९ ॥
भूतानमुदयं द्वयोरपि बुधः संलक्षयेत् पक्षयो-
स्तत्राधो वसुधोदयं निशितधीर्घ्राणस्य दण्डस्पृशि ।
देवेऽधःस्पृशि वारिणो हुतवहस्योर्ध्वं गते तूक्देयम्
तिर्यक्संस्पृशि मारुतस्य परितः स्पृष्टे मरुद्वत्मनः ॥ १० ॥
वश्यस्तम्भनयोः प्रशस्त उदयो भूमेर्जलस्योदयः
शस्तः शान्तिकपौष्टिकादिषु शुभेष्वह्नाय वह्नेः पुनः ।
शत्रोर्मारणदारणादिकरणेषूच्चाटनोच्छासयोर्वायोः
शान्तिकनिर्विषीकरणयोर्व्योम्नो हितश्चोदयः ॥ ११ ॥

गुदोपरिलिङ्गाधःस्थिते वायुरुत्तिष्ठति घ्राणाद्वहिर्द्वादशांगुले विनश्यतीत्यर्थः । तदेव स्थानद्वयं पूर्वापरे सन्ध्ये कन्दात् पूर्वसंख्या घ्राणे द्वादशांगुलं वहिर्याति । पश्चादेतीति स्थानद्वयम् उत्पत्ति लयं विनाशं च ते एव ज्ञातव्ये । आधारेति । वायोरधोगमनं निशां जानीयात् ऊर्ध्वगमनं वासरं दिवसं जानीयात् । उक्तं हि अहरेव प्राणो रात्रिरपान इति तथाधोवृत्ति चन्द्रं जानीयात् ऊर्ध्वं गमनमिति । अतएव योगार्णवे वर्षत्यधोमुखश्चन्द्रः शोषेत्यूर्ध्वमुखोरविरिति ॥ ८ ॥

केन वायौ कानि कर्माणि कर्त्तव्यानीत्याह तुषारांशुनाडीमिति तुषारांशुनाडीं इडां गते वायौ शान्तिजनकानि कर्माणि कुर्यात् । सूर्यनाडीं पिङ्गलां गते रात्रौ रौद्राणि दारुणानि कर्माणि कुर्यात् । चन्द्रमसः शीतलांशुत्वात् सूर्यस्य खरकरत्वादिति भावः । उभयनाडीस्थे वायौ शशिकानि रौद्राणि च कर्माणि कुर्यात् ॥ ९ ॥

भूतानामिति । द्वयोरपि पक्षयोः शुक्लकृष्णायोर्भूतानां पृथिव्यप्तेतेजीवाय्वाकाशानाम् उद्भूयं सलक्षयेत् अवधारयेत् । तत्र भूतेषु मध्ये पृथिव्या उदयं घ्राणमध्यदण्डते वायौ यदा प्रशस्यते दण्डाकारगतिर्भवति तदा

धरणेरुदयो गदार्दितानाम्
यदि दूतः समुपेत्य पृच्छतीह ।
सहसा नहि रोगजा प्रबाधा
प्रशमं याति चिकित्सितापि सम्यक् ॥ १२ ॥
जलोदये व्याधिरुपैति शान्तिं मृत्युर्भवत्येव वसूदये च ।
तथोदये चापि समीरणस्य व्योम्नोऽचिरेणैव रुजां विनाशः ॥१३॥
देवे दक्षिणभागगेऽथ पुरुषो रोगातुरो दक्षिणे
स्थित्वा पृच्छति पृच्छकः स पुरुषो जीवत्यरोगश्चिरम् ।
वामायां तु रुजाकुलीकृततनौ वामाश्रिते चेश्वरे
वामा पृच्छति चेत् स्थिता गतगदा वामाचिरं जीवति ॥ १४ ॥

भूमेरुदयं जानीयात् । देवे वायौ अधःस्पृशि सति वारिणो जलस्य उदयं जानीयात् ऊर्ध्वं गते वायौ हुतवहस्याग्नेरुदयं जानीयात् । तिर्यक् पार्श्वद्वयं संस्पृशि वायोरुदयं जानीयात् । समस्तनासारन्ध्रे व्यापके वायौ वहति सति मरुद्वर्त्मन आकाशस्य उदयं जानीयात् ॥ १० ॥

एतज्ज्ञानफलमाह वश्येति । भूमेरुदये वश्यजनकं स्तम्भजनकञ्च कर्म कुर्यात् । जलभूतस्योदये सति शान्तिजनकं तुष्टिजनकञ्च कर्म कुर्यात् । झटिति स तु मारणादिजनके कर्मणि वह्नेरुदयः प्रशस्तः । शत्रोर्देशोन्मूलने नगरोच्छेदे च वायोरुदयः प्रशस्तः । निर्विषीकरणसान्त्वने च आकाशस्योदयः प्रशस्तः ॥ ११ ॥

प्रश्नमाह धरणेरिति । पृथिव्या उदये सति नैरुज्यममुकस्य भविष्यति दूत आगत्य पृच्छति तदा रोगजा पीडा सद्यः कृतप्रतिक्रियापि हठेन शान्तिं नयतीति वक्तव्यमित्यर्थः । जलस्योदये सति यदि पृच्छति तदा व्याधिः शान्तिं याति । वसूदयेऽग्नेरुदये यदि पृच्छति तदा रोगार्त्तस्य मृत्युर्भवति । वसुहुताशनमिति विश्वः । वायोरुदये यदि पृच्छति तदा मृत्यु-

देवे गते पृच्छति वामभागं स्थित्वा नरो दक्षिणतो यदीह ।
व्यत्यासतोऽस्मादपि कृच्छ्रसाध्यं वदन्ति सन्तः खलु रोगजातम् १५
अन्तर्गते पृच्छति पृच्छकश्चेद्देवे नरो जीवति वीतरोगः ।
तेनैव रोगेण बहिर्गतेऽस्मिन् परेतराजस्य पुरं प्रयाति ॥१६॥
सर्वेषु कार्येषु यदीश्वरेऽस्मिन् अन्तर्गते वाञ्छितसिद्धयः स्युः ।
बहिर्गतेऽमङ्गलमीश्वरेऽपि शुभाशुभं कर्मफलं तु विद्यात् ॥१७॥
आरभ्य दर्शप्रथमामुदेति वामे पुटे त्रीणि दिनानि देवः ।
वामेतरे त्रीणि ततो दिनानि पूर्णा तिथिर्यावदथैवमेव ॥१८॥
अथारभ्य शुक्लान्यपक्षादिभूताम् तिथिं त्रीणि देवो दिनान्यभ्युदेति ।
पुटे दक्षिणे त्रीणि वामे तु यावत् कुहूरेवमेवं समालक्षयेन्ना ॥१९॥

रित्यर्थः । आकाशोदये यदि आगत्य पृच्छति तदा त्वरयैव रोगाणा विनाशो भवति ॥ १२-१४ ॥

प्रकारान्तरमाह । देवे वायौ दक्षिणां सङ्गते सति तत्रैव स्थित्वा दूतो यदि पृच्छति तदा रोगार्त्तो जनो नीरोगः सन् बहुशतत्रयं जीवति। स्त्रियां रोगगतायां वामभागगतो वायुर्भवति तत्राश्रितो दूतः पृच्छति तदानीं रोगात् सा चिरं जीवति इति ॥ १५ ॥

देव इति । वामप्रदेशं गते वायौ दक्षिणांशं गत्वा दूतो यदि पृच्छति तदा कष्टसाध्यं नैरुज्यं वक्तव्यम् । दक्षिणगे वायौ वामभागगः पृच्छति तदा कष्टसाध्यं नैरुज्यं वदेत् । अन्तर्गत इति । अभ्यन्तरं गते वायौ यदि पृच्छकः पृच्छति तदा नीरोगी जीवति । घ्राणाद्बहिर्द्वादशांगुलाद्बहिर्गते वायौ यदि पृच्छति तदा तेनैव रोगेण यमालयं रोगी यातीति । कार्यान्तरे तत् प्रयोजनं कथयति । यदीश्वरे वायौ अन्तर्गते अत कार्ये आकांक्षितसिद्धिर्भवति बहिर्गते द्वादशांगुलादधिकं गते सर्वकार्याणि नश्यन्तीति । कति दिनानि कुत्र तिष्ठतीति कथयति ॥ १६-१७ ॥

एकस्य पक्षस्य विपर्ययेण रोगाभिभूतिर्भवतीह पुंसाम् ।
तयोर्द्वयोर्बन्धुसुहृद्विपत्तिः पक्षत्रये व्यत्ययतो मृतिः स्यात् ॥२०॥

यदात्मनः कालवशात् समीरणो
विपर्युदेति प्रकृतिं विहाय सः ।
तदा निरुध्य श्वसनं निपीडयेद्
यथा स्थितं पक्षमुपैति चात्मनः ॥ २१ ॥

द्वावेव धत्तः सकलश्च कालं दिवाकरः कैरवबान्धवश्च ।
भोक्त्री सुषुम्ना सकलस्य चास्य कालस्य दोषादिवसात्मकस्य २२

आरभ्येति । दर्श एव प्रथमा तिथिर्यस्याः प्रतिपदः सा दर्शप्रथमा प्रतिपत् तेन शुक्लप्रतिपदादितिथित्रये वामे चतुर्थ्यादि दक्षिणे सप्तम्यादि वामे दशम्यादि दक्षिणे त्रयोदश्यादि वामे कृष्णप्रतिपदादि दक्षिणे चतुर्थ्यादि वामे सप्तम्यादि दक्षिणे दशम्यादि वामे त्रयोदश्यादि दक्षिणे । अथेत्यनन्तरं शुक्लान्यपक्षादिभूतां कृष्णप्रतिपत्तिथिमुपक्रम्य त्रीणि दिनानि दक्षिणभागे वायुरुदेतीत्यादिसंख्या उक्ता एवं ना पुरुष उदरं लक्षयेत् ॥ १८-१९ ॥

एकस्येति यद्येकत्र पक्षे वायोर्वैपरीत्यं भवति तदा तस्य पुरुषस्य रोगजनितोऽभिभवो भवति । शुक्लप्रतिपदादिनत्रयं यावद्वायुर्वामपुटे सञ्चरति तत्र यदि दक्षिणपुटे भवति एवं पंचदशदिनपर्यन्त यदि व्यत्ययो भवति तदा रोगाभिभूतिर्भवति मासमात्रं वैपरीत्येन सुहृदां विपत्तिः पंचचत्वारिंशद्दिनानि यावद्व्यत्ययो तस्य पुरुषस्य मरणं भवतीति वायोर्वैपरीत्ये रोगादिकं भवतीति स्वाभाविकी गतिः ॥ २० ॥

विपरीतोदये शुभोदयः कथं स्यादित्याह यदेति । स्वकीयादृष्टवशाद्वायुर्वैपरीत्ये उदेति तदादिबोधं कृत्वा श्वासं पीडयेत् यथा पुटान्तरं गच्छति ॥ २१ ॥

द्वावेवेति । कुमुदबन्धुश्चन्द्रः सूर्यश्चासौ सकलं कालं धत्तः दिवारात्रिरसात्मकस्य रात्रिन्दिवोपलक्षितस्य कालस्य भोक्त्री भक्षिका सुषुम्ना परं

ततः क्रमेणैव विशुद्धनाडीपथान्तरः प्राणसमीरणस्य ।
शनैः शनैः संयमने प्रयत्नं यथाविधानं विदधीत धीरः ॥२३॥
शीतांशुमार्गेण शनैः समीरमापूरयेत् स्वोदरमादरेण ।
विकारमात्राभिरपेततन्द्रः कालाग्निमूलार्पितचित्तवृत्तिः ॥२४॥
ततो धारयेन्मारुतं शुद्धचेताश्चतुः षष्टिमात्राः समापूरितं तम् ।
बहिर्भास्वता रेचयेन्मन्दमेनं तदर्द्धाभिरन्तर्निरुद्धं तु ताभिः ॥ २५ ॥
विपरीतमतो विदधीत बुधः पुनरप्यथ तद्विपरीतमिति ।
अमुना विधिना सुमनाः सततं मरुतो विदधीत सुसंयमनम् ॥२६॥
प्रस्वेदं जनयति यः प्राणायामेषु सोऽधमः प्रोक्तः
कल्पोमध्यः पुंसां भूमित्यागं तनोस्तनोति परः ॥ २७ ॥

मान्या नाडीभोक्तृत्वं नाम चित्कलासमवेतस्य तस्योपाधितया रूपत्वमापाद्य सर्वस्वामिभावकत्वमित्यर्थः ॥ २२ ॥

तत इति । सुषुम्नैव भोक्त्री तदा क्रमेण विशोधितनाडीमार्गान्तरः सन् प्राणवायोः शनैः शनैः संयमने नियमे प्रयत्नं यथा कथितप्रकारेण कुर्वीत ॥ २३ ॥

तमेव प्रकारं कथयति शीतांशुमार्ग इति । शीतांशोश्चन्द्रस्य वर्त्मना वामनाड्या वायुभिः स्वकीयमुदरं विकारमात्रया षोडशमात्रया पूरयेत् । अपेता तन्द्रा निद्रा यस्य सः कालाग्निमूलाग्निमूलार्पितचित्तवृत्तिः । कालाग्नि-मूले मूलाधारेऽर्पिता चित्तवृत्तिर्व्यापारो येन ॥ २४ ॥

तत इति । पूरितं वायुं चतुष्षष्टिमात्रापर्यन्तं धारयेत् तस्य गतागतं विरोधयेत् भास्वता सूर्यमार्गेण दक्षिणया शनैस्तदर्द्धाभिर्द्वात्रिंशन्मात्रा-भिरभ्यन्तरे निरुद्धं तं वायुं रेचयेत् त्यजेत् ॥ २५ ॥

विपरीतमिति । अतः प्रकृताद्विपरीतं विदधीत कुर्यात् । पुनरपि तद्विपरीतं प्रकृतक्रमेणादिकं पुनरपि तद्विपरीतम् एवमभ्यसेत् अमुना प्रकारेण मरुतो वायोर्नियमं न कुर्यात ॥ २६ ॥

तावद्विदधीत बुधः प्राणायामं समाहितो विधिवत् ।
यावत् सम्भवति भुवि प्राणायामस्योत्तमस्य गुणः ॥ २८ ॥

अयं प्राणायामः सकलदुरितध्वंसनकरो
विगर्भः प्रोक्तोऽसौ शतगुणफलो गर्भकलितः ।
जपध्यानापेतः स तु निगदितो गर्वरहितः
स गर्भस्तून्मुक्तो मुनिपरिवृतैर्योगनिरतैः ॥ २९ ॥

शुचिः प्राणायामान् प्रणवसहितान् षोडश वशी
प्रभाते सायञ्च प्रतिदिवसमेवं वितनुते ।
द्विजो यस्तं भ्रूणप्रहरणकृतांह्योऽभिकलितम्
पुनन्त्येते माजादिह दुरिततूलौघदहनाः ॥ ३० ॥

त्रायन्त्यमी षड्भिरपीह मासैर्जन्मान्तरोपार्जितपापपुञ्जान् ।
संवत्सराद्ब्रह्मपदं तदेकं प्रकाशयन्त्येव यदच्युताख्यम् ॥३१॥
इह रेचकपूरकौ विहाय स्थिरधीः कुम्भकमेव केवलं यः ।
सततं कुरुते मनोजवत्वं लभते वीतजरामयः स मर्त्यः ॥३२॥
न हि तस्य सुदुर्लभं त्रिलोक्यामिह यः केवलं कुम्भके निषण्णः ।
अणिमादिगुणाष्टकं करस्थम् ननु तस्यैव निरस्तमृत्यु भीतेः ॥३३॥
राजदन्तयुगलादिमस्पृशन् सन्निधाप्य रसनां तदन्तिके ।
काकचंचुपुटमारुतं पिबेत् प्राणसंयमनमेतदुत्तमम् ॥ ३४ ॥

प्रस्वेदमिति । अयं सुगमः ॥ २७-२८ ॥

अयमिति । गर्भो गर्भशून्यः प्राणायाम उक्तः सन् सकलदुरितानि विनाशयति गर्भेण सहितोऽयं शतगुणफलसहितः कथितः विगर्भापेक्षया को विगर्भः कः सगर्भः इत्याकांक्षायामाह जपेति । जपैर्ध्यानैश्च शून्यो यः गर्भरहितः ताभ्यां युक्तो यः सगर्भः कथितः ॥ २९ ॥

शुचिरित्यादि । चतुष्टयं सुगमम् ॥ ३०-३३ ॥

द्विकचंचुसमीरकं शनर्धयतः सम्परिकृत्य सन्ध्ययोः ।
श्रमदाहगरोदरामयज्वरगुल्माः प्रशमं प्रयान्ति च ॥ ३५ ॥
उभयोरपि सन्ध्ययोर्मुहूर्त्ते पिकधातुर्धयतस्त्रिमासमात्रम् ।
सरसं द्विकचंचुगन्धवाहं भुवि सारस्वतसिद्धिरुत्तमा स्यात् ॥३६॥
विषमुग्रमुदग्रवीर्यभाजां प्रविनाशं समुपैति पन्नगानाम् ।
किमु वृश्चिककीटलूतकानामिह काकोलमुखानिलस्य पानात् ॥३७॥
द्विकचंचुसमीररगं नरः सरसं यः परिकृष्य सन्ध्ययोः
कुरुते निजकुण्डलीमुखे क्षयरोगं स विमुच्य जीवति ॥ ३८ ॥
द्विकचंचुसमीरणं नरो यः पिवतीहानिशमेव वीततन्त्रः ।
भवति ध्रुवमेव तस्य वर्षाच्छ्रवणं दर्शनमप्यतीव दूरात् ॥ ३९ ॥
बहुधा कथितैर्मुहुः किमेभिर्द्विकचञ्चवा तु समीरणस्य पानात् ।
जरसा सह नाशमाशु याति प्रबलं मृत्युकृतं भयं नराणाम् ॥४०॥

राजदन्तेति। राजदन्तयुगलद्वयस्यादिमस्पृशन् तेषाम् अन्तिके समीपे जिह्वां सन्निधाप्य काकचंचुपुटेन वायुं पिवेत्। काकचंचुपुटवन्मुखं कृत्वा पिवेदित्यर्थः। मध्यभूतदन्तचतुष्टयं राजदन्ताः एतदुत्कृष्टं वायोर्नियमनमिति ॥ ३४ ॥

द्विकेति। द्विकचंचुभ्यां समीरणं वायुं धयतः पिवतः धेट् पा पाने। द्वाभ्यां ककाराभ्यां लक्षितो द्विकः काकः श्रमदाहं गरोविषम् उदरामयम् उदररोगः ज्वरः गुल्म इत्याद्याः प्रशमं प्रयान्ति ॥ ३५ ॥

उभयोरिति। उभयोः प्रातः सायं सन्ध्ययोर्मुहूर्त्ते दण्डद्वयं यावत् प्रहरत्रयमात्रं वा कं श्मश्रु तस्य धातुः धर्त्तुः पुंसः काकचंचुपुटमारुतं पिवतः सारस्वतसिद्धिर्भवति सन्ध्यामुहूर्त्तमात्रं प्रहरत्रयं वेत्ति व्यवस्थितविकल्पार्थः ॥ ३६ ॥

विषमिति। काकोलः त्रयं सुगमम् ॥३७-४०॥

जिह्वां कृत्वाऽनाकुलस्तालुमूले दन्तैर्दन्तान् गाढमापीडयित्वा ।
मन्दं मन्दं यः पिबेद्गन्धवाहं सौधैः पूरैः साकमन्तः स्पृशद्भिः ॥४१॥
षण्मासाभ्यासेन रोगैरशेषैः पातेभ्योऽसौ मुच्यते साधकेन्द्रः ।
अब्दादेकाद्विश्रसां मृत्युदूतीं जित्वा भूमौ दीर्घकालं स जीवेत् ॥४२॥
वर्षत्रयाभ्यासवशादतीतमनागतं वेत्त्यलिनीलकेशः ।
विषं न देहे क्रमते तदीये दष्टे सुघोरैरपि पन्नगेन्द्रैः ॥ ४३ ॥
न कृत्रिमं स्थावरजङ्गमं वा विषं किमन्यैरपि कालकूटैः ।
गुणाष्टकं कालवशादुपेत्य महीतले क्रीडति भैरवो वा ॥ ४४ ॥
या मुण्डाधारदण्डान्तरविवरगताहारनीहारगौरी
सौधीं धारां नभोऽम्भोरुहकुहरविधोः संस्रवन्तीं वहन्ती ।
तस्या वज्राख्यनाड्याः खगमुदरदरीमध्यगं या विदध्यात्
तस्या ब्रह्माण्डभाण्डप्रलयमपघनं स्याद्घनं मृत्युमृत्योः ॥ ४५ ॥

जिह्वामिति । तालुप्रदेशे जिह्वां योजयित्वा उपरिस्थदन्तपङ्क्त्याऽधो दन्तावलि आपीड्य सौधैः पूर्वमुखावस्थितैः सह गन्धवाहं वायु पिबेत् अन्यत् सुगमम् । प्रकारान्तरमाह जिह्वामिति । सौधैर्मुखान्तर्गतरसैः विस्रसां जरां कृत्रिमविषं नारिकेलमिश्रितकर्पूरं स्थावरं हिमशैलजादिकं जङ्गमं पार्वतीयं व्याघ्रनाभिजन्यं गुणाष्टकम् अष्टसिद्धिर्भैरवावतारार्थे वाशब्दः ॥ ४१-४४ ॥

या मुण्डेति । सुषुम्नान्तर्गताया वज्राख्यनाड्या उदरमेव दरी कन्दरा तन्मध्यवर्त्तिनं खगं वायुं यो विधानं करोति तस्य पवनं शरीरं मृत्युमृत्योर्घनं मुद्गरं भवति । मृत्युर्यमः तस्य मृत्युर्नाशकः तस्य लोहमुद्गरो भवति । घनः स्याल्लोहमुद्गर इत्यमरः । सा का मुण्डाधारदण्डाधारदण्डान्तरविवरगर्त्ता मुण्डस्याधारभूतो दण्डः पृष्ठवंशात्मकः तदन्तर्गतसुषुम्ना तन्मध्यवर्त्तिनमित्यर्थः । कीदृशाह्वे हिमवच्छुभ्रामृतधारां वहन्ती धारयन्ती आकाशदेशावस्थितपद्मा-

मूर्च्छां गतो हरति रोगसमूहमध्यारुद्धः
करोति गगने गमनं नराणाम् ।
वातो मृतो वितनुतेऽमरतां समस्त-
मभ्यासतः सुलभमेव समीरणस्य ॥ ४६ ॥

अथ पार्ष्णिनरुद्धकम्बुर्ना ध्वजमूलस्थितसव्यपादपार्ष्णिः ।
ऋजुकायशिरोधरो यतात्मा विषयेभ्यो विनिवर्त्तितेन्द्रियाश्वः ॥४७॥

काकीचञ्चवग्रहृष्टैर्मुहुरुदरदरीं पूरयित्वा समीरैरस्तुष्टा-
भ्यामुभ्यां नररिपुविवरे तर्जनीभ्यां च नेत्रे ।
नासारन्ध्रं निरुध्य स्थिरविमलमतिर्मध्यमाभ्यामथास्य-
मन्याभिर्नातिगाढं कमलजनिलये स्थापयेन्मानसं स्वम् ॥४८॥

म्बन्तरवर्त्तिनोविधोश्चन्द्रस्य क्षरन्तीम् तथाच यः सुषुम्नान्तर्गतवायुं निरोध-यति तस्य मरणं न भवतीत्यर्थः ॥ ४५ ॥

मूर्च्छामिति । मूर्च्छा निश्चेष्टत्वे सति इति यावत् । अद्धा तत्रेन रोग-संघातं निवारयति । बद्धः सन् नाद्यन्तरे निरुद्धः आयत्तः सन् मनुष्याणाम् आकाशगमनं निराधारसंचारं करोति मृतः मनसा सह याति स्वाभीष्टदेशं तथा विलीनः अमरताम् अमरणं नयति । तथाच मूर्च्छितो हरति व्याधिं निहन्यान्मरणं मृतः । बद्धः खेचरतां कुर्यात् वशो वायुश्च भैरवि ॥ ४६ ॥

प्रकारान्तरमाह तथेति । ना पुरुषः स्वीयमानसं कमलजन्मनो ब्रह्मणो निलये आधारकमलेऽवस्थापयेत् । कीदृक्पार्ष्णिना एकपादगुल्फेन निरुद्धः कम्बुनिरुद्धः कम्बुनिरुद्धगुदमार्गो येन सः ध्वजमूले लिङ्गमूलेऽवस्थापिता अपरपादपार्ष्णियेन सः । ऋजुकायः अवक्रशरीरः यतात्मा इन्द्रियमेव दुर्द्धरत्वादश्व इवाश्वः ॥ ४७ ॥

काकीति । काकवधूमुखेनाकृष्टैर्वायुभिरुदरदरीं पूरयित्वा करद्वयस्यांगु-ष्ठाभ्यां नररिपुविवरे वक्ष्यमाणं नरो अर्जुनः तस्य रिपुः कर्णः कर्णविवर

यथाशक्त्याभ्यासं प्रतिदिवस मेवं विदधतः
सुषुम्नान्तश्चायं प्रवरति शनैर्देहपवनः ।
तदा नादो नैजो भवति सहसानन्दजननः
क्रमाद्वीणावादिप्रहतमृदुवीणारवशयः ॥ ४९ ॥

आदौ मत्तालिमालागलपथविगलत्तारझङ्कारहारी
नादोऽसौ वंशिकांस्यानिलभरितलसद्वंशनिस्वानतुल्यः ।
घण्टानादानुकारी तदनु जलनिधिध्वानधीरो गभीरो
गर्जं पर्जन्यघोषः पर इह कुहरे वर्त्तते ब्रह्मनाड्याः ॥ ५० ॥

विजिते भवतीह तेन वायुः सहजो यस्य समुत्थितप्रणादः ।
अणिमादिगुणा भवन्ति तस्यामितपुण्यस्य महासुखास्पदस्य ॥५१॥

सुरराजतनुजवैरिरन्ध्रे विनिरुध्य स्वकाङ्गुलीद्वयेन ।
जलधेरिव धीरनादमन्तः प्रसवन्तं सहसा शृणोति मर्त्यः ॥५२॥

परिभावयतोऽपि नादमेनं त्रिदशाधीशतनूजवैरिजातम् ।
सततं भवतीह तस्य जन्तोर्गुणसम्पत्तिरपेतकल्मषस्य ॥ ५३ ॥

शृङ्गाण्यङ्गुलिभिर्निरुध्य विधिवत्कोदण्डयोः पण्डितो
मध्ये बद्धमरुन्निरुध्य वृषभश्रेष्ठश्च षष्ठेन्द्रियम् ।

इत्यर्थः । तर्जनीद्वयेन नेत्रद्वयं मध्यमाभ्याम् अंगुलीभ्यां नासापुटं निरुध्य अन्याभिश्चतुर्भिर्मुखं निरुध्य ॥ ४८ ॥

यथेति । एवमनेन कथितप्रकारेण प्रतिदिनमभ्यसतः पुंसः सुषुम्नाभ्यन्तरे अथं वायुः संचरति यदि तदा सततानन्दजनको ब्रह्मप्रदो नाद उत्पद्यते क्रमेण पुनर्वीणासमरवो भवति वीणावादिप्रकृतत्वेनातिशयमधुरध्वनिरिति । द्वयं सुगमम् ॥ ४९-५१ ॥

सुरराजेति । सुरराज इन्द्रः तत्तनुजोऽर्जुनः तद्वैरी कर्णः तत्र स्वहस्तद्वयांगुलिद्वेन निरुध्य समुद्रस्येव गभीरं शब्दमभ्यन्तरे प्रसरन्तं शृणोति मर्त्यः तस्यापगतपाप्मनः गुणावाप्तिर्भवति मोक्षप्राप्तिर्भवतीत्यर्थः ॥ ५२-५३ ॥

साक्षात्तत्क्षणमेव पश्यति शनैस्त्रयन्तगीतं परम्
ज्योतिस्त्रैपुरमङ्कमुक्तशशभृल्लक्षाभलक्षप्रभम् ॥५४॥

इति श्रीनागभट्टविरचिते त्रिपुरासारसमुच्चये
तृतीयः पटलः ॥

चतुर्थः पटलः

अथ पूरकयोगयोजितान्तः पृषदश्वो निजमूलचक्रदेशे ।
विदधीत बुधः समाहितोऽजोपपदग्रन्थिविभेदने प्रयत्नम् ॥ १ ॥
शकृत् समुत्सृज्य यथा शनैः एवं सङ्कोचयेत्कम्बुनि मार्गमर्वा ।
बुधस्तथाधारनियोजितात्मा सङ्कोचयेत्कम्बुनि मार्गमुच्चैः ॥ २ ॥

शृङ्गाणीति । शृङ्गाणीन्द्रियाणि तान्यंगुलीभिः प्रतिरुध्य कीदण्डयोर्भ्रुवोर्मध्ये निरुद्धपवनः वृषभश्रेष्ठः । वृषो विषयः तं भजत इति वृषभः वृषभाणीन्द्रियाणि तच्छ्रेष्ठं षष्ठेन्द्रियं मनः तन्निरुध्य इत्यर्थः । त्रयन्तर्गीतं वेदांतवेद्यं अंकमुक्तशशभृल्लक्षाभलक्षप्रभम् एककालोदितनिष्कलङ्कानेकचंद्रप्रभम् । अयमर्थः । इन्द्रियाणि स्वकरांगुलीभिर्निरुध्य भ्रुवोर्मध्ये स्वान्तसम्मिन्नवायुं स्वप्रभावक्रमेण यो नियमयति स शशिप्रभं वेदान्तवेद्यं परं ज्योतिःस्वरूपमात्मानम् अनुभवतीत्यर्थः ५४ ॥

इति त्रिपुरासारटीकायां पदार्थादर्शे तृतीयः पटलः ।

एवं प्राणायामेन पवनजययोगविशेषांश्चोक्त्वा जितामरतामविकाराणामभ्युदयनिःश्रेयसप्राप्त्युपायभूतं मन्त्राणां छिन्नादिदोषपरिहारार्थं योनिमुद्राबन्धनप्रकारं वक्तुमुपक्रमते अथ पूरकयोग इत्यादिना । आदौ पूरकादियोगाभ्यासेन निजमूलचक्रदेशे मनः संयोज्य अजोपपदग्रन्थिविभेदने यत्नं प्रकुर्वीत अजो ब्रह्मा स एव उपपत्तिर्यस्य ग्रन्थिशब्दस्य तेन ब्रह्मग्रन्थिरित्यर्थः । समाहिताभ्यासध्यानः ॥ १ ॥

ग्रन्थिभेदप्रकारमाह शकृदिति । अर्वा अश्वः शकृद्विष्ठां समुत्सृज्य

विद्धीत मुहुर्मुहुर्गुरूक्तक्रमतो हुंकृतिमङ्कलग्नपाणिः ।
दृढरुद्धगुदध्वजान्तरालस्थिततेजोमयपुष्कराग्रयोनिः ॥ ३ ॥
अथ कम्बुनि मारुतं जितात्मा प्रतिलोमेन शनैः प्रवेशयेत्तम् ।
कमलासनपङ्कजस्य मूलं स्वगुरुप्रोक्तविधानतो दुरापम् ॥ ४ ॥
अमुना विधिना मुहुः कृतेन क्रमशः कम्बुनि मारुतस्ततोऽसौ ।
अजपङ्कजमूलदेशमार्गप्रणयी ग्रन्थिविभेदनं करोति ॥ ५ ॥
परिहृत्य खगाधिपस्ततोऽसौ सरणिं चन्द्रमसो नभोमणेः ।
कमलं कमलासनस्य पश्चाद्विदधीतोर्द्ध्वमुखं प्रविश्य सम्यक् ॥६॥
प्रतिभानमथाद्भुतं प्रविष्टे भवनान्तः परमेष्ठिनः खगेशे ।
लघुता वपुषो भवत्युदग्रा जठरान्तर्ज्वलस्य चापि दीप्तिः ॥७॥

त्यक्त्वा येन प्रकारेण कम्बुनि मार्गं गुदमार्गं सङ्कोचयेत् तेन प्रकारेणाधारचक्रे संयुक्तात्मा पुरुषः । स्वीयं कम्बुनि मार्गं सङ्कोचं नयेत् ॥ २ ॥

विदधीतेति । मुहुर्मुहुर्वारंवारं गुरूपदिष्टप्रकारेण करकमलद्वयं नाभेरधःस्थिततेजोमयपद्माग्रस्य योनिश्च यत्नेन निरुध्य गुदलिङ्गमध्यतेजोमयपुष्कराग्रे योनिर्येन निरुद्धमूलाधार इत्यर्थः । असमर्थः गुदध्वजयोर्मध्ये स्थितं यच्चतुष्पत्रं पद्मं तन्मध्ये त्रिकोणाकारा योनिरिति ॥ ३ ॥

अथेति । कम्बुनि मारुतमपानवायुं देशिकोक्तक्रमेणाकुञ्च्य शनैरूर्ध्वं नीत्वा कमलासनपङ्कजाख्यं सुषुम्नामूलं प्रवेशयेत् ॥ ४ ॥

अमुना विधिनेति एवं मुहुर्मुहुरभ्यासेन अधोवृत्तं निरुध्य तदन्तर्ब्रह्ममार्गः स्थितग्रन्थिभेदनं करोतीत्यर्थः ॥ ५ ॥

परिहृत्येति । अपानश्च ऊर्ध्ववृत्तित्वेन प्राणात्मकत्वात् खगाधिपत्याख्यां लभते । एवमूर्ध्वगमनाय प्रवृत्तोऽपानवायुः सोमसूर्यात्मकेडापिङ्गलामार्गौ परिहृत्य कमलमूलं सुषुम्नामूलम् उपविश्य ऊर्ध्वमुखं करोति ॥ ६ ॥

प्रतिभानमिति । खगेशेऽपानवायौ ब्रह्मणो भवनाभ्यन्तरं प्रविष्टे सन्ति अद्भुतम् आश्चर्यजनकं प्रतिभानं भवति वपुषः उदग्रा लघुता भवति ॥ ७ ॥

तडित्कोटिप्रख्यं सुरुचिजितकालानलरुचिम्
सहस्रादित्यांशुप्रकरसदृशोद्योतकलितम् ।
अमन्तं योन्यन्तः स्थुरदरुणबन्धूककुसुमप्रभं
कामं ध्यायेज्जठरशशभृत्कोटिशिखरम् ॥ ८ ॥

तस्योर्द्ध्वेऽग्निशिखा चिरद्युतिलतापुञ्जप्रभाभास्वरा
सूक्ष्मा ब्रह्मपथान्तराम्बरगता चैतन्यमात्रा कला ।
एकीभूतमनन्तरं सह तया ध्यायेद्धिया निश्चलम्
आत्मानञ्च निवातदीपनिभया हंसस्वरूपं बुधः ॥ ९ ॥

शक्तिः कुण्डलिनीति या निगदिता आईमसंज्ञा
जगन्निर्माणे सततोद्यता प्रविलसत्सौदामिनीसन्निभा ।
शङ्खावर्त्तनिभां प्रसुप्तभुजगाकारां जगन्मोहिनीम्
तन्मध्ये परिभावयेद्विषलतातन्तूपमेयाकृतिम् ॥ १० ॥

तडित्कोटिप्रख्यमिति । कामशरीराग्नि ध्यायेत् । कीदृशं विद्युदग्रतुल्यम् । स्वतेजसा पितिजा कालानलस्य रुचिर्येन तादृशं सहस्रसंख्यादित्यतेजः समूहतुल्येन उद्योतेन कलितं सम्बद्धं योन्यन्तराधारचक्रस्याभ्यन्तरे भासमानं बन्धूकशब्देन रक्तवर्णाभं शशभृल्लक्षशिशिरम् । एतेन साधकानामानन्दजनकत्वं बोध्यते । काममिति कामशब्दोरहस्यागमे शरीरवैश्वानरे रूढः । एवं तेजोमयं कामं स्वाधारगमनं भावयेत् । तथाच्चोक्तं रुद्रयामले--भ्रमं योनिगतं ध्यायेत् कामं बन्धूकसन्निभम् । ज्वलत्कालानलप्रख्यं तडित्कोटिसमप्रभम् । इति ॥ ८ ॥

तस्येति । तस्य कामराजाख्यजातवेदस उपरि शिखारूपातिसूक्ष्मा विद्युत्सहस्रसन्निभा चिद्रूपा या कला सा ब्रह्मेति । केचित्तु विद्युत्सहस्रसन्निभा चिद्रूपात्मकला निष्कला ध्येया इत्यनुषज्यते । परमहंसस्वरूपात्मानं तया कलया एकीकृत्य चिन्तयेदिति ॥ ९ ॥

हूङ्कारेण गुरूपदिष्टविधिना प्रोत्थाप्य सुप्तां ततः
कृत्वा तां कलया तया परमया चिद्रूपया सङ्गताम् ।
मायां कुण्डलिनीं समाहितमनास्तामुच्चरेत् कौशिकीम्
शक्तिं ब्रह्ममहापथेन सहितामाधारतः स्वात्मना ॥ ११ ॥
भित्त्वा लिङ्गत्रयमथ बुधो ब्रह्मनाड्येह चोर्ध्वम्
गच्छन्तीं तां कमलजपदात्प्रापयेदात्मशक्तिम् ।
व्योमाम्भोजप्रणयिपरमानन्दकन्दं विसर्गस्थानं
चन्द्रोपरि परिगलद्रक्तपीयूषधारम् ॥१२॥
पीत्वा कुलामृतरसं पुनरेव दिव्यम् मध्यं विशेदपघनस्यं समाहितात्मा।
यायात्कुलादकुलमेव पुनश्च मात्रायोगेन देशिकवरप्रतिपादितेन ।१३

शक्तिरिति तया कलया चिद्रूपा कला कुण्डलिनीशक्तिरिति कथिता पूर्वोक्तशिखामध्यगां परिभावयेत् । अन्तर्व्याप्य स्थितां ध्यायेदित्यर्थः ॥ १० ॥

उक्तमर्थं संक्षिप्य दर्शयति हूङ्कारेति । हूङ्कारेण मन्त्रसहितेन गुरूक्तप्रकारेण तां कुण्डलिनीं आधारकमले सुप्तमुत्थाप्य प्रबोध्य अनन्तरं तया परमया चैतन्यरूपया मिलितां कुण्डलिनीं मायां कुलं मूलाधारः तत्रस्थां शरीरस्य देवतां चिन्तयेत् । अकुल शिव इत्युक्तः कुलं शक्तिः प्रकीर्त्तिता । कौलं तेजो विकारः स्यादिति त्रितयनिर्णय इति ॥ ११ ॥

भित्त्वेति । अग्रे कथितं लिङ्गत्रयं विभिद्य ब्रह्मनाड्या सुषुम्नयां ब्रह्मणः स्थानादूर्ध्वं तां कुण्डलिनीं शक्तिम् आकाशाम्भोरुहप्रणयित्वम् आकाशाम्भोजस्थपरमानन्दस्थविसर्गस्थानं प्रापयेत् ध्यायेत् ॥ १२ ॥

पीत्वा कुलामृतरसमिति । एवं तां सहस्रारपर्यन्तं नीत्वा तत्रस्थं दिव्यं सुधारसं पीत्वा तेनैव मार्गेण विरोहक्रमेण अपघनस्य मध्यं कुलाख्यं योन्याधारं प्रापयेत् शरीरमध्यं मूलाधारमित्यर्थः । कथं ग्राहयेदित्याह मात्रायोगेन गुरूक्तमात्रायोगक्रमेण गतागतं विदधीत । मात्रातु -विन्दु-

सा शक्तिः सकलशरीरजीवभूता
प्राणोऽसाविति गदितात्र तन्त्रिमुख्यैः।
उद्घातः स तु परिपठ्यते मुनीन्द्रैः
प्राणोऽन्तः स्पृशति यदा क्रमेण नीतः॥ १४॥
अमुं स्वाधारस्थं प्रतिदिवसमभ्यासनिरतः
करोति श्रद्धावान् सततमवधूताखिलमलः।
स मुक्तो दुःखौघैरगयतजराक्लेशमरणो
गुणग्रामोपेतः सुर इव चिरं जीवति भुवि॥ १५॥
चतुर्विधा या कथितेह सृष्टिः प्रवर्त्तते सा सकलापि यस्याम्।
प्रलीयते चापि जगत्समस्तं कालाग्निरुद्रादिशिवान्तमेतत्॥१६॥
सेयं मयोक्ता खलु योनिमुद्रा बन्धस्तु देवैरपि दुर्लभः स्यात्।
अनेन बन्धेन न साध्यते यन्नास्त्येव तत् साधकपुङ्गवस्य॥ १७॥

नादस्तथा शक्तिर्मात्रात्रयमुदाहृतमिति। तथा हि मात्रापदेन पीठत्रयं विधीयते। आज्ञास्थानगतो बिन्दुः तत्त्वाज्ञा प्रकाशकस्वरूपं पूर्णाख्यं पीठं तदुपरि ललाटमध्ये बिन्द्वात्मकप्रकाशरूपस्य शिवात्मकस्फुरद्रूपनादात्मकस्य नादाख्यं द्वितीयं पीठं तदुपरि शिखा विश्वात्मिका शक्तिरूपं मया उक्ता खलु निश्चये अस्या मुद्राया बन्धनं देवैरपि दुर्लभञ्च। योनिमुद्राया अनेन बन्धनप्रकारेण यन्न साध्यते तदा स्मरणम् तथा सर्वमेवानया मुद्रया साध्यत इत्यर्थः। इयं का इह जगति या चतुःप्रकारा सृष्टिरुक्ता यस्यां प्रवर्त्तते यतो भवतीत्यर्थः। उद्भिदस्तरुगुल्माद्याः स्वेदजाः कृमिदशाद्याः जरायुजा मनुष्याद्याः अण्डजाः पक्षिसर्पादयः। केचित्तु शब्दसृष्टिः शब्दार्थसृष्टिः प्रकृतिपुरुषसृष्टिरिति मन्यते। अथवा नैयायिकमते पुरुषसृष्टिः सांख्यमते प्रकृतिपुरुषयोगात् पातञ्जमलते केवलप्रकृतेः मीमांसकमतेऽदृष्टादिति। चतुर्विधा सृष्टिः समस्तं जगदपि यस्यां कालाग्निरुद्रादिरूपां यस्यामेव लयं याति पूर्वोक्तध्यानविशेष एव मुद्रा॥ १३-१७॥

छत्त्वा रुद्धाः स्तम्भिताः कीलिता ये सुप्ता मत्ता मूर्च्छिता हीनवीर्याः।
दग्धाः श्रस्ताः शत्रुपक्षस्थिता ये बाला वृद्धा गर्विता यौवनेन ।१८
ये निर्जीवा ये च सत्त्वेन हीनाः षण्डीभूताश्चाङ्गमन्त्रैर्विहीनाः ।
एते मुद्राबन्धनेनापि येऽन्ये मन्त्राः सर्वे वीर्यवन्तो भवन्ति ॥१९॥

छित्त्वेति । युग्मकम् । एते सर्वे मन्त्रा यानिमुद्राया ध्यानविशेषेण वीर्ययुक्ता भवन्ति एतंरुच्छिन्ना मनोर्यस्यादिमध्यान्ते खामिनं वीजमुच्यते । संयुक्तं वारियुक्तं वायुनाकान्तं त्रिधा पुनः । चतुर्धा पञ्चधा वाथ स मन्त्र श्छिन्नसंज्ञकः आदिमध्यावसानेषु भूवीजद्वन्द्वलांछितः रुद्धमन्त्रः स विज्ञेयो भुक्त्रिमुक्तिविवर्जितः । ये च कीलिताः-आदिमध्यावसानेषु हंसः प्रासाद-वाग्भवौ । हकारो विन्दुवान् जीवो वाग्भवश्च चतुष्कलः । माया नामामि च पदं नास्ति यस्य स कीलितः । ये स्तम्भिताः । एकं मध्ये स्वयं मूर्ध्नि यस्मिन्निन्द्रपुरन्दरौ । न विद्यते स मन्त्रः स्यात् स्तम्भितः सिद्धिबोधनः । ये च सुप्ताः । त्रिवर्णो हंसहीनो यः स सुप्तश्च उदाहृतः । वे च मत्ताः । मन्त्रा वाप्यथवा विद्या सप्ताधिकदशाक्षरः । फट्कारः पञ्चाकादिर्यो मन्दोमत्त उदीरितः । ये च मूर्च्छिताः पञ्चधास्त्रं स्थितां मध्ये यस्य मन्त्रः स मूर्च्छितः । ये हीनवीर्याः । विरामस्थानगं यस्य हीनवीर्यः स कथ्यते । ये च दग्धाः । वह्निवायुसमायुक्तो यस्य मन्त्रस्य मूर्ध्वनि । सप्तधा दृश्यते तन्तु दग्धं मन्नीतमन्त्रवित् । ये च श्रस्ताः । अस्त्रं द्वाभ्यां त्रिभिः षड्भिरष्टा-भिर्दृश्यतेऽक्षरैः । स्तम्भः सोहऽभिहितो मन्त्रः । ये च शत्रुपक्षे स्थिताः । तारादिभिरननुकूलाः । ये च बालाः । सप्तार्णोमनुर्बालः । ये च वृद्धाः । त्रिंशद्वर्णश्चतुः पष्टिवर्णो मन्त्रः शताक्षरः । चतुःशताक्षरश्चापि वृद्ध इत्यभि-धीयते ॥ ये च युवानः । षोडशार्णो युवा प्रोक्तः । ये च जीवहीनाः । षष्टाक्षरो जीवहीनः । ये च सत्त्वहीनाः । द्विवर्णः सत्त्वहीनः स्यात् । ये अङ्गहीनाः । षड्विंशत्यक्षरो मन्त्रः षट्त्रिंशद्वर्णकस्तथा । एकोनविंशद्वर्णो-

गुरुतल्पनिषेवणञ्च पानं द्विजहत्या मधुनः सुवर्णचौर्यम् ।
अमुना विलयं प्रयान्ति सम्यक् सकृदप्याचरितेन बन्धनेन ॥ २० ॥
स तु मन्त्रिवरः स एव योगी गुणसिद्धेः पदमास्थितः स एव ।
अमुना चरतीह बन्धनं यः सततं स्वोचितधर्मकर्मनिष्ठः ॥ २१ ॥
अमुना भवतीह देहभाजां सतताभ्यासकृतेन बन्धनेन
न जरा पितृराजवैजयन्ती न च मृत्युप्रतिपादिता च भीतिः ॥ २२ ॥
एतस्यैव हि बन्धनस्य मनुजः प्राप्नोति शश्वत्कृताद-
भ्यासादणिमादिसिद्धिमतुलां संवित्तिमप्यूर्जिताम् ।
योगञ्चाप्रतिमं जयञ्च मरुतः कालस्य वा वञ्चनम्
तद्विष्णोः परमं पदन्तु सततं पश्यन्ति यत्सूरयः ॥ २३ ॥

इति श्रीनागभट्टविरचिते त्रिपुरासारसमुच्चये चतुर्थः पटलः ॥

पंचमः पटलः

अथाधारपङ्केरुहाण्यत्र वक्ष्ये सुषुम्नान्तरस्थानि संक्षेपतोऽहम् ।
तदम्भोजपत्रस्थितांश्चापि देवांस्तदम्भोजवर्णान् षडाधारदेवीः ॥१॥

वाप्यङ्गहीन उदाहृतः । इत्यादिदोषदुष्टा अपि मन्त्रा अनेन ध्यानेन विशुद्धा भवन्तीत्यर्थः ॥ १८-१९ ॥

गुरुतल्पनिषेवणमिति । सकृदाचरितेनापि योनिमुद्राबन्धनेन पुरुषो महापातकान्मुक्तो भवतीत्यर्थः । अमुना इति । देहिनाम् अमुना योनिमुद्राबन्धनेन सर्वदा कृतेन ध्रुवा भवति । कीदृशी पितृराजस्य यमस्य बन्धनस्य सतताभ्यासात् मनुष्योऽणिमाद्यष्टविधगुणान् प्राप्नोति उत्तमां प्रतिपत्ति ज्ञानञ्च प्राप्नोति । योगाभ्यासञ्च प्राप्नोति वायो विजयमाप्नोति कालस्य वा वञ्चनं सकलस्य च प्रेरणम् । वा स्यात् विकल्पोपमयोरेवार्थे च समुच्चये । विष्णोश्च तत्पदं स्थानं पश्यन्ति सूरयः ॥ २०-२३ ॥

इति त्रिपुरासारटीकायां पदार्थदर्शने चतुर्थः पटलः ।

अजग्रन्थिपद्मं पुरा यन्मयोक्तं तदाधारमाद्यं वदन्तीह शम्भुः ।
सुवर्णाभवर्णैश्चतुर्भिः समेतं दलैर्योगिगम्यं महाश्चर्यभूतम् ॥२॥
चतुष्वब्जपत्रेषु देवीनिरुद्धान् जलाद्यब्धिवर्णान् न्यसेत्केवलान् वा ।
सबिन्दूनमन्दप्रभावान् समिद्धस्फुरज्ज्योतिषो डाकिनी देवतात्र ॥३
मूलाधरे सततं ध्यानयोगात् स्तम्भक्षोभावुत्प्लुतिर्दार्दुरीव ।
भूमित्यागः खेचरत्वं क्रमेण नृणामेते षड्गुणाः सम्भवन्ति ॥ ४ ॥

एवमधिकारिणामभ्युदयनिश्रेयसप्राप्त्युपायभूतां योनिमुद्रामुक्त्वा अनन्तरं षडाधारेषु योगविशेषान् वक्तुमुपक्रमते अथाधारपङ्केरुहाणीत्यादि । सुषुम्नान्तरस्थानीति या पूर्वोक्ता सुषुम्नान्तरेऽवस्थिता या चित्रा नाडी तदन्तर्मूलाधारादिषट्पर्वाणि सन्ति तान्येव षडाधाराणीत्यर्थः । तेषामम्भोजानां पत्रावस्थितान् देवान् ब्रह्मादीन् अम्भोजालौवर्णान् शुक्लादीन् अक्षराणि च आधारभूतान् षडदेवांश्च वक्ष्ये इति सम्बन्धः ॥ १ ॥

अम्भोजानि कथयति अजेति । योनिमुद्रारक्षणप्रकारेण यदुक्तं चतुर्दलात्मकं पद्मं तदेवाधारमाद्यं ते योगिनः देवीनिरुद्धान् जलाद्यब्धिवर्णान् वशषसान् पूर्वादिक्रमेण न्यसेत् जलेन्द्राग्निवायूनिति पाठे जलं वकारः इन्द्राग्निरिन्द्रद्वितीयं शकारः । एवमग्नेस्तृतीयं षकारः मध्यवर्ण उक्तः । एवं वायोर्यकारस्य चतुर्थो दन्त्यसकारः । तेन वं शं षं सं इति वर्णान् प्रथमाद्यं वीजं ततो वकारः तत आद्यं वीजं एवं क्रमेण चतुर्दलेषु चत्वारो वर्णा न्यस्तव्या इत्यर्थः । केवलान् वा केवलं विन्दुयुक्तं न्यसेत् । तत्र चतुर्दले डाकिनीरूपा देवी एतत्सकलप्रपञ्चमूलभूतत्वात् मूलाधारमिति योगिनो वदन्ति । अस्मिन् मूलाधारे ध्यानाचरणात् पुंसः स्तम्भक्षाभीभवतः । निष्क्रियत्वं भवति । उत्प्लुतिः उत्पतनं दर्दुरी दार्दुरो मण्डूकस्तसम्बन्धिनी प्लुतिरिति । यावत् भूमित्यागश्च भवति तदनु खेचरत्वं भवति । आकाशेऽपि स्वेच्छाविहारित्वं भवति क्रमेण एते षड्गुणा भवन्ति ॥ २-४ ॥

कान्तिप्रकर्षो वपुषोऽपि नादव्यक्तिः प्रदीप्तिर्जठरानलस्य ।
लघुत्वभङ्गस्य निजेन्द्रियाणां पटुत्वमारोग्यमदीनता च ॥ ५ ॥
कृत्वा मनोनिश्चलमूलचक्रमध्ये नराः केवलमादरेण ।
भूतं भवच्चापि भविष्यदर्थं वदन्ति शास्त्राण्यपि वा श्रुतानि ॥६॥
विहाय सद्यः कमलासनस्य वक्त्राम्बुजं प्रीतितरङ्गसङ्गात् ।
तदीयवक्त्राम्बुरुहोदरान्तः सरस्वती नृत्यति दिव्यरूपिणी ॥ ७ ॥
अधिगम्य रसेन्द्रमन्त्रसिद्धी अपि कालञ्च विजित्य दुर्निवारम् ।
अजरामरतामवाप्य चान्ते परमानन्दपदे मुदा रमन्ते ॥ ८ ॥

एकीभूतार्णवाम्भः प्लुतमखिलजगत्पूर्वमासीदपूर्व-
ज्योतिर्मूर्त्तिस्तदन्तर्महितमहिमभूर्लिङ्गरूपी बभूव ।

अन्यान् गुणान् दर्शयति कान्तीति । शरीरस्य कान्तेरुत्कर्षो भवति । नादव्यक्तिः नादो ध्वनिविशेषः । जठरानलस्य उद्दीपनः इन्द्रियाणां चतुरादीनामकपटत्वं भवति । योगिनो हि इन्द्रियासन्निकृष्टमप्यर्थं पश्यन्ति । नैरुज्यञ्च भवति दुःखराहित्यञ्च भवति एतत् सर्वं वायोर्धारणाद् भवति ॥५॥

अन्य दपि प्रयोजनं दर्शयति कृत्वेति । अत्रमूलचक्रमध्ये आधारकमले आदरेण मनः स्थिर कृत्वा भूत वर्त्तमानं भविष्यदपि वदन्ति । अतीतानागतान् बदन्ति अश्रुतान्यनधीतान्यपि शस्त्राणि वदन्ति व्याख्यान्ति ॥ ६ ॥

प्रयोजनान्तरमाह विहायेति । कमलासनस्य ब्रह्मणो मुखाम्बुजं प्रीतिरेव तरङ्गस्तत्सम्बन्धात् त्यक्त्वा तदीयवक्त्राम्बुरुहोदरान्ते वायुधारणात् कर्त्तुर्मुखाम्भोरुहाभ्यन्तरे दिव्यरूपा सरस्वती नृत्यति अभिरमति ॥ ७ ॥

प्रयोजनान्तरमाह अधिगम्येति । रसेन्द्रमन्त्रसिद्धी अधिगम्य दुर्निवारञ्च कालं जित्वा अजरामरतामवाप्य अवसानकाले परमानन्दपदे मोक्षपदे रमन्ते । तस्मान् स्थानयोगात् जीवन्मुक्तो भवति । अवसाने परमात्मनि लीनो भवतीत्यर्थः ॥ ८ ॥

षट्सिद्धाधिष्ठितात्मा सकलसुरनुतः षड्भिरास्यैरुपेतः
षड्भिः कोषैश्च देवो भवभयतिमिरध्वं सहंसो महेशः ॥ ९ ॥
आद्यं लिङ्गवपुर्भृतो भगवतो देवोहिरण्डोऽभव-
द्वाली पूर्वमुखं शिवस्य तु महाकालस्तदूर्द्धाननम् ।
वक्त्रं दक्षिणमाशुशुक्षणिरसौ देवः पिनाकी पुनः
पाश्चात्यं छगलाण्ड एष भगवान् वामास्यमस्याभवत् ॥१०॥
स्वाधिष्ठानसमाह्वयं रसदलमूले ध्वजस्याम्बुजम्
बालादित्यनिभं दलोपरिगतैः पृष्ठादितर्काक्षरैः ।
विन्दूद्भासितमस्तकैर्भगवतोलिङ्गात्मनः शूलिनः
स्थानं योगिवरेण्यगोचरमिदं चास्याधिपा राकिणी ॥११॥
इह स्वाधिष्ठाने निहितनिजचेतो लयवशा-
दमन्दानन्दौघस्तिमितहृदयः साधकवरः ।

एकीभूतेति । पूर्वमखिलं जगत् एकीभूतं समुद्राम्भःप्लुतमासीत् । तस्याभ्यन्तरे महेशो देवो लिङ्गरूपो बभूव कीदृशः अपूर्वज्योतिःस्वरूपः अपूर्वतेज एव लिङ्गरूपत्वेन परिणाममगमदित्यर्थः । कीदृशः षड्भिः सिद्धैर्हिरण्डादिभिरधिष्ठितात्मा तस्य लिङ्गवपुर्भृतो भगवत आद्यम् ऊर्ध्वं मुखं हिरण्यनामा सिद्धपुरुषः त्रातीत् । पूर्वमुखं बासी नामा ऊर्ध्वाननम् अधआननमित्यर्थः । दक्षिणं वायुः पिनाकी पश्चिमास्यं उत्तरं युगलगण्डः तथा आधारात्मा हिरण्डः स्वाधिष्ठानात्मा बासी मणिपूरात्मा महाकालः अनाहतात्मा वह्निः विशुद्धात्मा पिनाकी पाश्चात्मा छगलण्डः । तल्लिङ्गम् एषु स्थानेषु चिन्तनीयम् ॥ ९-१० ॥

स्वाधिष्ठानमिति तदूर्ध्वे रसदलैः स्वकुलैः पृष्ठादितर्काक्षरैः पृष्ठं वकारः तदादितः मयवलः एभिर्विन्दुभूषितमस्तकैः सविन्दुकैर्युक्तबालादित्यनिभं प्रातःकालीनसूर्यतुल्यम् अस्य चक्रस्याधिपा राकिणी ॥ ११ ॥

समेताङ्गोऽनङ्गः क्षितितलगतो वा मृगदृशाम्
स्मरस्मेरापाङ्गं रमयति गणं कान्तिकलितम् ॥ १२ ॥
इह वेत्ति निधाय मानसं स्वं विविधं चाश्रुतशास्त्रजालमुच्चैः
अवधूतजरामयः स मर्त्यः सुचिरं जीवति वीतमृत्युभीतिः ॥१३॥
वपुषोऽशुचिता जनस्य शश्वत् परमां शुद्धिमिहातनोति पुंसाम् ।
शरदम्बुजपेलवस्य देहे दृढरुद्धो घनताञ्च शीतरश्मिः ॥ १४ ॥
चलितं सहसा महारसेन्द्रं कमलालोकनतो वियत्सरोजात् ।
इह ये विनिधारयन्ति सन्तो ननु धीराः पुरुषोत्तमास्त एव ॥१५॥
मदधौतकटो महागजेन्द्रो वशतामेति यथा शनैरुपायात् ।
बलवानिह वै सुधाकरोऽसौ क्रमरुद्धः स्ववशो भवत्यवश्यम् ॥१६॥
एतस्मिन् कुलिशाब्जयोगनिरतादादौ लयो जायते
रागादिन्द्रियदन्तिनां लयवशात्संवित्तिरप्यूर्जिता ।
अन्तर्नीलमहारसद्रवजुषां नृणान्तु चेतो यदा
आविर्भावमुपैत्यमन्दसहजानन्दच्छलेन्दूदयः ॥ १७ ॥

इह किल समलक्ष्याणां नियमितमरुतां योगिनीकलातिशयं दर्शयति इह स्वाधिष्ठान इति । लयवशात् पद्मोदरनिवेशवशात् समेताङ्गोऽनङ्गः मृगदृशीगणं रमयति । तथा स्मर स्मेरापाङ्गं स्मरेण स्मरेमलपप्रकाशम् अपाङ्गं नेत्रयोरन्तं यस्य गणस्य तम् । तथा कान्त्या लावण्येन कलितं संरब्धम् ॥१२॥

विशेषफलमाह इहेति । विगतजरामयः स मर्त्यः इह पद्मे स्वं मानसं निधाय अर्पयित्वा अश्रुतशास्त्रसमूहं विविधं नानाप्रकारं वेत्ति वीतमृत्युभीतिः त्यक्तयमभयः । अन्यपद्मस्य दर्शनात् अशुचिता जनस्य शरीरस्य नित्यं शुद्धिं तनोति पुंसः शीतरश्मिः शुक्रः दृढबन्धः घनतां निविडतां यातीति शरदम्बुरुहवत् पेलवः सुन्दरः ॥ १३-१४ ॥

चलितमिति सहस्रदलाच्चलितं रसेन्द्रं शुक्रम् एतत्कमलालोकनतो ये विनिधारयन्ति ते पुरुषोत्तमाः एतत्पद्मभावनयोगशक्ताः ॥ १५-१६ ॥

नाभिस्थं मणिपूरकं दशदलैर्नीलाञ्जनाभैर्युतम्
तड्डाद्यैश्च दशाक्षरैर्दलगतैर्विन्दूल्लसन्मस्तकैः ।
लाकिन्या समधिष्ठितञ्च सततं ध्यानैर्नराः केवलम्
वश्याकर्षणनिर्विषीकरणपूःक्षोभादिकं कुर्वते ॥ १८ ॥
स्थानेऽस्मिन्निहितात्मनः सुकृतिनः पातालसिद्धिं पराम्
खड्गस्याप्रतिमस्य साधनमपि स्यादीप्सितञ्च क्षितौ ।
रूपं भूमिविसर्जनं परपुरे शक्तः प्रवेष्टुं जराहानिश्चा-
खिलदुःखरोगशमनं कालस्य वा वञ्चनम् ॥ १९ ॥
हृदये रसेन्द्रगोपसन्ध्याघनसिन्दूरसुवर्णमब्जम् ।
यदनाहतमित्युशन्ति सन्तो रविसंख्यैपरुपशोभितं दलैः ॥२०

एतस्मिन् कुलिशांचेति । तदेव योगः तस्मिन् रतात् रागादिन्द्रियदन्तिनां लयो भवति अतएव कुलिशत्वेन निरूपितम् । संवित्तः ऊर्जिता । अन्तर्नीलमिति । अन्तर्नीलं यन्महाबलं शुक्रं तदेव रसं तत्सेवितानां नृणां चेतो यदा आविर्भावं प्राप्नोति तदा अमन्दं महत् यत् सहजानन्दं तच्छलेन अविद्याध्वं साद्यभ्युदयात् इन्दुत्वेन निरूपितः ॥ १७ ॥

मणिपूरकमाह नाभिस्थमिति । नीलाञ्जनतुल्यैर्दशदलैर्युतम् इष्टैर्ड ढ ण त थ द ध न प फ एतैर्दलगतैः विन्दूल्लसन्मस्तकैः सविन्दुकैर्युक्तं लाकिन्या समधिष्ठितञ्च एतद्ध्यानात् वश्याकर्षणनिर्विषीकरणं परपुरक्षोभकरणं परपुरप्रवेशं तिरस्करणी लुकीविद्या इति यस्य प्रसिद्धिः । ननु रत्नात् मणिपूरकमिति वचनात् कथं नीलरत्तमिति चेत् नीलरत्तस्यापि रत्नत्वान्न दोषः । पातालसिद्धिः अधो विवरकरणं मूकजरादिना खड्गसाधनमपि तान् ईप्सितसाधनं रूपञ्च केचित् परपुरे मृतशरीरे प्रवेष्टुं शक्तिमिति वदन्ति ॥ १८-१९ ॥

अनाहतचक्रमाह हृदय इति । इन्द्रगोपो रक्तवर्णकीटविशेषः क्रोधीशाद्यैः

क्रोधीशाद्यैर्भैरवैर्भानुसंख्यैर्दण्डोपेतं मण्डितं चण्डवीर्यैः ।
तत् काकिन्याधिष्ठितं दिव्यशक्त्या देव्या हंसेनापि देवेन शश्वत् २१

एतस्मिन् सततं निविष्टमनसः स्थाने विमानस्थिताः
क्षुभ्यन्त्यद्भुतरूपकान्तिकलिता दिव्यस्त्रियो योगिनः ।
ज्ञानञ्चाप्रतिमं त्रिकालविषयं क्षोभः पुरस्य श्रुतिर्दूरादेव
च दर्शनञ्च खगतिः स्याद्योगिनां मेलनम् ॥ २२ ॥

विशुद्धाख्यं कण्ठे नलिनमथ धूम्रानलछवि-
युतं श्रीकण्ठादिस्वरपरिगतैः षोडशदलैः ।
इह स्थाने शाकिन्यतुलनिजशक्तिर्भगवती
स्थिता नित्यं देवी शरणगमनार्त्तिप्रशमनी ॥ २३ ॥

अभ्यासयोगादिह सन्निविष्टस्वान्तस्य शश्वन्नरपुङ्गवस्य ।
समर्थता स्यादनधीतशास्त्रसद्भावभावे वसुधातलेऽस्मिन् ॥ २४ ॥
स्थानेऽत्र संसक्तमना मनुष्यस्त्रिकालदर्शी विगताधिरोगः ।
चित्वा जरामञ्जननीलकेशः क्षितौ चिरं जीवति वीतमृत्युः ॥ २५ ॥

इह स्थाने चित्तं सततमवधायात्तपवनो
यदि क्रुद्धो योगी चलयति समस्तं त्रिभुवनम् ।
न च ब्रह्मा विष्णुर्न च हरिहरो नैव खमणि-
स्तदीयं सामर्थ्यं शमयितुमलं नापि गणपः ॥ २६ ॥

ककाराद्यैः ठकारान्तैः क ख ग घ ङ च छ ज झ ञ ट ठ इति क्रोधी-शद्वादशभैरवसहितैर्द्वादशाक्षरैर्युक्तं द्वादशदलात्मकं कर्णिकान्तर्गतं मूलमन्त्र-शक्त्या काकिन्या चाधिष्ठितं हंसेन चात्मना च दण्डोपेतैः सबिन्दुभिर्मण्डितम् ॥ २०-२१ ॥

एतस्मिन्निति । एतस्मिन् स्थाने निविष्टमनसो योगिनः । कर्त्तृभूताः विमानस्थिताः दिव्यस्त्रियः कर्मभूताः अद्भुतरूपकान्त्या कलितम् ।

आज्ञानाम भ्रूयुगमध्ये दलयुग्मोपेतं पद्मं शारदचन्द्रमयूखाभम् ।
हाकिन्युक्तात्रापि च देवीदलयुग्मे वर्णावन्त्यौ बिन्दुयुतौ संस्मरणीयौ
ध्यानयोगनिरतस्य जायते पूर्वजन्मकृतकर्मणां स्मृतिः ।
क्षेत्रबिन्दुनिलये च दूरतो दर्शनश्रवणयोः समर्थता ॥ २८ ॥
इह सन्निहितस्वचित्तवृत्तिः प्रतिमायाः प्रतिजल्पनं करोति ।
गमनञ्च पुरे परेषां पुनरुत्थानमप्यहो मृतस्य ॥ २९ ॥

निरालम्बां मुद्रां निजगुरुमुखेनैव विदितामिह
स्थाने कृत्वा स्थिरनिशितधीः साधकवरः ।
सदाभ्यासोऽपश्यत्यमरनिलयानन्तरखिलानुडु-
श्रेणीं विष्णोरपि पदमुडूनामपि पतिम् ॥ ३० ॥

अन्यञ्च त्रिकालविषयज्ञानञ्च अतुल्यं दुरात् श्रवणं दर्शनञ्च योगिनां सम्मेलनञ्च ॥ २२ ॥

विशुद्धचक्रमाह विशुद्धेति । श्रीकण्ठादिस्वरपरिगतैः आकारादिस्वरैर्दलपरिगतैर्युतं तद्यथा—अं आं इं उं ऊं ऋं ॠं लृं लॄं एं ऐं ओं औं अं अः इति षोडशस्वरैर्युक्तं धूमसमानवर्णं शाकिनीदेवताधिष्ठितं विशुद्धाख्यं पद्मं शरणगमनार्तिप्रशमनी जन्ममरणदुःखप्रशमनी अनधीतशास्त्रसद्भावे सद्भावत्वे इह स्थाने चित्तमेवावधाय अवधानं कृत्वा आत्तपवनो गृहीतपवनो योगी ॥ २३-२६ ॥

आज्ञाचक्रमाह आज्ञानामेति । दलयुग्मोपेतं द्विदलयुक्तं अन्त्यौ वर्णौ हकारक्षकारौ एतदुक्तं भवति भ्रुवोर्मध्ये सबिन्दुकाभ्यां हकारक्षकाराभ्यां युक्तं द्विदलात्मकं शरदम्बुजसङ्काशं हाकिनीदेवताधिष्ठितम् आज्ञाकमलं मृतस्य पुनरावृत्तिर्न विद्यते जन्माभावात् ॥ २७-२९ ॥

निरालम्बामिति । इह बिन्दुनिलये आज्ञास्थाने निरालम्बां खेचरीं मुद्रां बद्ध्वा अमरनिलयः स्वर्गः तदूर्ध्वम् अखिलाम् उडुश्रेणीं नक्षत्रश्रेणीं पश्यति विष्णोः पद्माकाशम् । अह्नां प्रभुं सूर्यम् उल्लासिचिल्लियुगलं भ्रूयुगलम् ।

ब्रह्माणं सुरवृन्दवन्दितपदद्वन्द्वं मुकुन्दं तथा
देवं देवनिकायनायमपि प्रेताधिपं वारिपम् ।
अह्नां वह्निमपि प्रभुञ्च पवनं तार्क्ष्यञ्च यक्षेश्वरम्
गन्धर्वानपि किन्नरानपि गुणैः सिद्धान्प्रसिद्धानपि ॥३१॥
यक्षान् राक्षसपुङ्गवानपि मुनीन्दिव्यांश्च भव्याकृतीनन्तः
कान्तिकलाकलापकलितान्विद्याधरान्मातृकाम् ।
रक्षोत्तुङ्गतरङ्गसङ्गतजलां स्वर्लोककल्लोलिनीम्
योगी पश्यति शश्वदश्चितरुचिं तत्रापि हेमाचलम् ॥३२॥
उत्तुङ्गपीवरपयोधरभारनम्रकम्राङ्गमङ्गजमतङ्गजमन्दयातम् ।
उल्लासिचिल्लियुगलं चकितैणशावलोलेक्षणं विसरमप्सरसां तथैव
समुत्तुङ्गैः शृङ्गैः स्थगितगगनाभोगककुभो
लसन्नानारत्नाकलितकटकान्भूधरवरान् ।
कुरङ्गैः सारङ्गैरपि च रमणीयां वनभुवम्
तथा गुर्वीमुर्वीं महितविविधक्षेत्रसहिताम् ॥ ३४ ॥
तरङ्गैरुत्तुङ्गैरहिमकरमातङ्गनिकरैः
करालानाभीरैरपि जलधरैर्भूधरवरैः ।
तथा पारावारानमलसरितो वारिभरिताः
सहंसालीमालीमपि च सरसां सारसजुषाम् ॥३५॥
लसन्मरालं वककोटिमालं ताडित्करालान्तरवारिलीनम् ।
कलापिकान्तं सधवानुकूलं प्रवासिकालं नवमेघजालम् ॥३६॥

अप्सरसः विसरं समूहं पश्यति भूधरानपि पश्यति तान् कीदृशान् बृहच्छृङ्गैः स्थगितं गगनमण्डलं दिक् च यैस्तान् । कुरङ्गादिभी रमणीयां वनभुवञ्च पश्यति । मतङ्गोऽत्र जलहस्ती सरसां आलीं समूहं मरालं राजहंसम् । वककोटिः वकं इति मयूरप्रियकालं प्रीतिजनकत्वात् । सधवाः पतिसहिताः तासाम् अनुकूलं प्रवासिकालं प्रवासिनीनां कालं यमस्वरूपं नवमेघजालं नूतनमेघ-

एतस्मिन्परमाद्भुताव्ययमहानन्दैककन्दे परे
स्थानेमानसमात्मनः स्थिरमतिः संयोजयेन्मुद्रया ।
योगी तन्मयतामुपैति शहकैश्चेतो निरालम्बया
पश्चान्निजमहासुखं लयवशादाविर्भवत्यन्तरम् ॥ ३७ ॥
लीने चेतसि तत्र विन्दुनिलये वह्नेरिवादौ कला
दृश्यन्ते तदनन्तरञ्च विलसद्रूपाः प्रदीपांकुराः ।
बालस्येव दिवाकरस्य बहलद्योतिस्ततो द्योतते
यद्वा भूगगनान्तरालविलसज्ज्योत्स्नासपत्नं महः ॥ ३८ ॥
नित्यानन्द इति श्रियः पतिरिति श्रीवासुदेवः पुमान्
आत्मेत्यच्युत इत्यचिन्त्यमहिमा यो गीयते योगिभिः ।
स्थानेऽस्मिन् परमेश एष भगवान् व्यक्तो भवत्यव्ययः
साक्षी राहुरिवाम्बरान्तरगतश्चन्द्रार्कयोर्मण्डले ॥ ३९ ॥

समूहो यत्र तं कीदृशम् इति तडित्करालान्तरवारिलीनं तडिता सौदामिन्या करालं भयानकं यदन्तर्वारि तत्र लीनं निमग्नम् ॥ ३०-३६ ॥

एतस्मिन्निति । परमम् अद्भुतम् अव्ययं यन्महानन्दं तस्यैककन्दे मूलस्वरूपे परे स्थाने आत्मनो मानसं मुद्रया निरालम्बया स्थापयेत् । तदा योगी तन्मयतां ब्रह्ममयताम् उपैति । वाकारऽ समुच्चये। इति निरालम्बया मुद्रया निजं महासुखं ब्रह्मानन्दसुखम् अन्तरं अन्तर्गतं लयवशादाविर्भवति प्रकाशते । अस्मिन् चेतसि लीने सति आदौ वह्नेः किरणस्था लिङ्गा दृश्यन्ते । तदनन्तरञ्च प्रदीपांकुराः अपरश्च बालस्य सूर्यस्य उद्योतः प्रकाशः ततो द्योतते प्रकाशते । यद्वा तन्महस्तेजः प्रकाशते आविर्भवति कीदृशम् आकाशमध्ये विलसत् यत् ज्योत्स्नारश्मयस्तत्तुल्यम् । अस्मिन् स्थाने अव्ययः परमेश्वरः साक्षाद्व्यक्तः साक्षिस्वरूपो भवति ॥ ३७-३८ ॥

स एव क इत्याह नित्यानन्द इत्यादि । यथा अम्बरान्तरगतो राहुश्च-न्द्रार्कयोर्मण्डले इति दृष्टान्तच्छलेन पिङ्गलायाश्चन्द्रसूर्यात्मकत्वात् ।

विश्वस्यायतनं महद्भगवतः स्थाने तदेतत्परम्
यत्रारोप्य समीरणं सुकृतिनः प्राणप्रयाणे नराः ।
दीव्यन्तं परमं पुराणपुरुषं वेदान्तवेद्यं कविम्
विश्वाद्यं प्रविशन्ति सन्ततमहानन्दैककन्दं विभुम् ॥ ४० ॥

सहस्रारपद्मं विसर्गादधस्तादधो वक्त्रामारक्तकिञ्जल्कपुञ्जम् ।
कुरङ्गेण हीनस्त्रिशृङ्गस्तदन्तः स्फुरद्रश्मिजालः सुधांशुः समास्ते
तदन्तर्गतं ब्रह्मरन्ध्रं सुसूक्ष्मं यदाधारभूतं सुषुम्नाख्यनाड्याः ।
तदेतत् पदं दिव्यमत्यन्तगुह्यं सुरैरप्यगम्यं सुगोप्यं सुयत्नात् ॥४२

एतत्कैलाससंज्ञं परमकुलपदं विन्दुरूपी स्वरूपी
यत्रास्ते देवदेवो भवभयतिमिरध्वंसहंसो महेशः ।
भूतानामादिदेवो रसविसरसितां सन्ततामन्तरङ्गे
सौधीं धारां विमुञ्चन्नभिमतफलदो योगिनां योगगम्यः ॥४३॥

ईडापिङ्गलयोर्मध्ये सुषुम्नाया भोक्तृत्वात् सुषुम्ना राहुरिति प्रतिपादिता ॥ ३९ ॥

विश्वस्येति । विश्वस्य प्रपञ्चस्वरूपस्यायतनं तदेव भगवतः स्थानं यत्र स्थाने आज्ञास्थाने समीरणमारोप्य प्रापय्य सुकृतिनो नराः दीव्यन्तं क्रीडन्तं पुरुषं प्रविशन्ति इति । अतएव पुरा अजरामरं जरामृत्युविहीनं वेदान्तेन वेद्यं विश्वाद्यं विश्वादौ भवं जन्म यस्य तं प्रविशन्ति । महानन्दस्यैकमूलप्रभवं विभुम् ॥ ४० ॥

सहस्रदलपद्ममाह सहस्रारपद्ममिति । आवरणदलं सहस्रदलपङ्कजमित्यर्थः । विसर्गस्व रूपातीतस्य कुलादिपदस्यावाग्भव्या इत्यर्थः । अधोमुखे आरक्तकिञ्जल्कपुञ्जे यत्र रक्तकेशरमित्यर्थः । कुरङ्गेण हीनः विनाशितकलङ्कः त्रिशृंगेण युक्तः त्रिकोणाकारः स्फुरद्रश्मिजालः स्फुरत्प्रभासमूहः सुधांशुरमृतकरः समास्ते ॥ ४१ ॥

स्थानस्यास्य ज्ञानमात्रेण पुंसां संसारेऽस्मिन् सम्भवो नैव भूयः ।
भूतग्राम्यं सन्ततन्यासयोगात्कर्तुं हर्त्तुं स्याच्च शक्तिः समग्रा ॥४४
स्थाने परे हंसनिवासभूते कैलासनाम्नीह विधाय चेतः ।
योगी गतव्याधिरधः कृताधिबाधश्चिरं जीवति मृत्युमुक्तः ॥४५॥
स्थानेऽस्मिन्क्षयवृद्धिभावरहिता नित्योदिताधोमुखी
बालादित्यनिभप्रभा शशभृतः सास्ते कला षोडशी ।
बालाग्रस्य विखण्डितस्य शतधा चैकेन भागेन या
सूक्ष्मत्वात्सदृशी निरन्तरगलत्पीयूषधाराधरा ॥ ४६ ॥

तदन्तर्गतमिति । तन्मध्ये ब्रह्मरन्ध्रं सूक्ष्माकारं सुषुम्नाख्यनाड्या आधार-भूतायाः सुषुम्नैव निष्कलचैतन्यात्मकपरमेश्वरस्योपाधिभूतचित्कला इन्दु-मण्डलमध्यवर्त्तिनी ब्रह्मरन्ध्रमाधारीकृत्य देहमनुगता इत्यर्थः । तथाचोक्तं योगार्णवे--शक्तिर्यत्र स्वयं याति तदेवाधारमण्डलमिति । यदेतद्विसर्गस्त्रि-मङ्गलपदं तदेव कैलासाख्यविन्दुरूपी पुम्प्रकृत्यात्मकः विसर्गः । प्रकृतिर्मात्रा विन्दुसर्गात्मिका हंसः । तदात्मकमिदं जगदिति । कीदृक् भूतानामादिभूतः आदिस्वरूपः । सौंधीं धारां अन्तरंगे अभ्यन्तरे मुञ्चन् । धारां कीदृशीं रसविसरसितां रसो द्रव्यविशेषः । तत्र सितां शुक्लां योगगम्यो भगवान् योगिनामभिमतफलप्रदः । अत्र कैलासस्थाने नियमितमयता इत्युपरतः ॥ ४२-४३ ॥

अतिशयं दर्शयति स्थानस्यास्येति । इत्यादि सुगमम् ॥ ४४ ॥

स्थाने परि इति । स्वस्य परमहंसस्य निवासभूते गता व्याध्यो यस्य सः । अधिकृता आध्रयोव्राधयश्च येन सा । बालादित्यसमप्रभा शशभृतश्चन्द्रस्य षोडशी कला अतिसूक्ष्मा । शशभृतः कीदृशस्य बालाग्रस्य शतशो विखण्डि-तस्य एकैकभागेन् सूक्ष्मत्वात् । कीदृशी निरन्तरगलत्पीयूषधाराधरेव भाति पीयूषधारा पीयूषवर्षमेघतुल्या ॥ ४५-४६ ॥

एतस्याः परतः स्थिता भगवती भूताधिदेवाधिपा
निर्वाणाख्यकलार्द्धचन्द्रकुटिला सा षोडशान्तर्गता ।
बालाग्रस्य सहस्रधा विगलितस्यैकेन भागेन या
सूक्ष्मत्वात्सदृशी त्रिलोकजननी या द्वादशार्कप्रभा ॥४७॥
निर्वाणख्यकलापदोपरिगता निर्वाणशक्तिः परा
कोट्यादित्यसमप्रभातिगहना बालाग्रभागस्य या ।
कोट्यंशेन समा समस्तजननी नित्योदिता निर्मला
नित्यानन्दपदस्थलोरुविगलद्धारा निरालम्बना ॥ ४८ ॥
एतस्याः परतः परात्परतरं निर्वाणशक्तेः पदम्
शैवं शाश्वतमप्रमेयममलं नित्योदितः निष्क्रियम् ।
तद्विष्णोः पदमित्युशन्ति सुधियः केचित्पदं ब्रह्मणः
केचिद्धंस पदं निरञ्जनपदं केचिन्निरालम्बनम् ॥ ४९ ॥
आरोप्यारोप्य शक्तिं कमलजनिलयादात्मना साकमेषु
स्थानेष्वाज्ञावसानेष्ववहितहृदयश्चिन्तयित्वा क्रमेण ।
नीत्वा नादावसानं खगतकुलमहापद्मसद्मान्तरस्थाम्
ध्यायेच्चैतन्यरूपामभिमतफलदां प्राप्तये शक्तिमाद्याम् ॥ ५० ॥

एतस्या इति । एतस्याः षोडशकलायाः परतः परस्मिन् भूतानामधिपो महेश्वरस्तस्याधिपा भगवती स्थिता निर्वाणसंज्ञाकला निर्वाणषोडशीकला तां गता । कीदृशी बालाग्रस्य सहस्रधा विभक्तस्य दलितस्य एकेन भागेन सूक्ष्मत्वात् सदृशी द्वादशार्कतुल्या प्रभा कान्तिर्यस्याः ॥ ४७ ॥

निर्वाणेति । निर्वाणाख्यकलापदं स्थानं तस्योपरि अधोगता निर्वाणशक्तिः स्थिता । कोट्यादित्यसमा प्रभा यस्याः सा अतएवातिगहना कीदृशी बालाग्रभागस्य शशभृतः कोट्यंशेन समा नित्यानन्दपदस्थानं शैवपदम् । तत्र उरुर्महती विगलद्धारा यस्याः निरालम्बना अवलम्बनरहिता ॥ ४८-४९ ॥

साक्षाल्लाक्षारसाभं गगनगतमहापद्मसद्मस्थहंसाम्
पीत्वा दिव्यामृतौघं पुनरपि च विशेन्मध्यदेशं कुलस्य ।
चक्रे चक्रे क्रमेणामृतरसविसरैस्तर्पयेद्देवतास्ता
डाकिन्याद्याः समस्ताः कमलजपदगां तर्पयेत्कुण्डलीं ताम् ॥ ५१ ॥

इति श्रीनागभट्टविरचिते त्रिपुरासारसमुच्चये
पञ्चमः पटलः ॥

षष्ठः पटलः

स्वयम्भुलिङ्गं निजयोनिमध्यवक्त्रान्तरे हृत्सरसीरुहान्तः ।

आरोप्येति । कमलजनिलयात् मूलाधारात् शक्तिम् आरोप्य आत्मना साकम् एषु स्थानेषु शक्तिं चिन्तयित्वा क्रमेण नादावसानं नीत्वा आकाशगतब्रह्म महापद्ममेव सद्म गृहं तस्यान्तरस्थां चैतन्यरूपां ध्यायेत् ॥ ५० ॥

साक्षादिति । दिव्यामृतौघं पीत्वा गगनगतमहापद्मस्थितहंसां कुलस्य शरीरस्य मध्यदेशं मूलाधारं विशेत् । ततः प्रतिचक्रे स्थिता डाकिन्याद्याः यदि समन्तादेव ततोऽमृतरससमूहैस्तर्पयेत् । ततः कमलजपदगां मूलाधारस्थां कुण्डलिनीञ्च तर्पयेत् ॥ ४१ ॥

इति त्रिपुरासारटोकायां पदार्थादर्शे पञ्चमः पटलः ॥

एवञ्चाधारेषु योगविशेषानुक्त्वा मूलाधाराद्याधारेषु स्वयम्भुलिङ्गबाणादिविशेषान् वक्तुमुपक्रमते स्वयम्भुलिङ्गमिति । योनिब्रह्मरन्ध्रान्तरानिति शृङ्गाकारे प्रागुक्तस्थाने स्वयम्भुलिंगं याति लयं यत्र जपेदिति तल्लिंगं लिङ्गञ्च चराचरमिति हृत्सरोजवान् लिङ्गमिति । इतरं लिगं परमलिङ्गमित्यर्थः । अन्तरालभ्रुवोर्मध्ये इति । अन्ये तु इतरपदम् एवं वर्णयन्ति । अन्तराले बिन्दौ स्थितं तदितरं लिङ्गम् अन्ये तु गगनाम्बुजे विसर्गाख्ये परबिन्दुनिर्मलपदे इत्यर्थः ॥ १ ॥

चतुर्थ पुष्प

रुद्रयामल उत्तरतन्त्र और योगदर्शन

प्रथम पटल

योग-रहस्य

योग :—

योग शब्द की निष्पत्ति "युजिर् योगे" तथा "युज् समाधौ" दो प्रकार से मानी जाती है।[1] "युजिर् योगे" से निष्पन्न "योग" पद "संयोग" अर्थ में प्रयुक्त माना जाता है। पातञ्जल योग दर्शन में "योग" पद से जो अर्थ अभिप्रेत है, वह "युज् समाधौ" से निष्पन्न "योग" पद का वाच्य है।[2] भाष्यकार व्यास की दृष्टि में "योग" और "समाधि" परस्पर पर्यायवाची हैं।[3] वस्तुस्थिति यह है कि योग की परिपक्वावस्था ही समाधि का रूप धारण करती है, जो आगे चलकर सम्प्रज्ञात और असम्प्रज्ञात भेद से दो प्रकार की कही गयी है। कुछ आचार्य ऐसी चित्त की वृत्ति के निरोध को "योग" कहते हैं, जो योग के विरोधी तत्त्वों क्लेश, कर्म तथा विपाकाशय को उत्पन्न करने वाली होती है,[4] किन्तु किसी के मत में चित्त की वृत्ति का वह निरोध "योग" कहलाता है, जो द्रष्टा (साधक) को वास्तविक स्वरूप में अवस्थित कराने का हेतु बने।[5]

जीव और आत्मा के मिलन या ऐक्य को योग कहा जाता है—योगो जीवात्मनोरैक्यम्।[6] "योग" शब्द को जर्मन भाषा में "जाश", लैटिन में "इंगून", अरबी में "सुलूक" कहते हैं।[7] ऐसा विश्वास है कि योग की प्रथम दीक्षा श्री हिरण्यगर्भ को शिव ने प्रदान की थी।[8]

वस्तुतः "योग" जीवात्मा और परमात्मा के साक्षात्कार का मार्ग है—

---

१. धातुपाठ, ७/७।
२. तत्त्ववैशारिदी, पृ०-३।
३. व्यासभाष्य, पृ०-१।
४. क्लेशकर्मविपाकाशयपरिपन्थाचित्तवृत्तिनिरोधः।—त० वै०, पृ०-१०।
५. द्रष्टास्वरूपावस्थितिहेतुश्चित्तवृत्तिनिरोधः।—योगवार्तिक, पृ०-११३।
६. महानिर्वाणतन्त्र, १४/१२३।
७. कुण्डलिनी योगतत्त्व, पृ०-१९।
८. महाभारत, १२/२४२/६६, श्रीमद्भागवत, ५/१६/१३।

यथा जले जलं क्षिप्तं क्षीरे क्षीरं घृते घृतम् ।
अविशेषो भवेत्तद्वज्जीवात्मपरमात्मनोः ॥[1]

आगमवादी शक्ति के ज्ञान को योग कहते हैं तथा प्रकृतिवादी शिव और शक्ति के ऐक्य को योग नाम से अभिव्यक्त करते हैं।[2] कुलार्णव तन्त्र भी इसी तथ्य की पुष्टि करता है—

न पद्मासनतो योगी न नासाग्रनिरीक्षणम् ।
ऐक्यं जीवात्मनोराहुर्योगं योगविशारदाः ॥[3]

महर्षि पतञ्जलि ने तो चित्त की वृत्तियों के निरोध को योग कहा है—"योगश्चित्तवृत्तिनिरोधः"[4] चित्तवृत्तियों के निरोध से साधक की स्वरूप में अवस्थिति हो जाती है। चित्तवृत्तियों के निरोध के लिये ही योग साधनों की आवश्यकता पड़ती है। चित्त वृत्तियों का निरोध न होने से साधक अपना स्वरूप चित्त की वृत्ति के अनुरूप ही समझता रहता है, उसे अपने सहज रूप का ज्ञान नहीं होता है।

योग के प्रमुख विभाग :

योग के अन्तर्गत मन्त्रयोग, हठयोग, राजयोग, लययोग को स्वीकार किया जाता है—

(१) मन्त्रयोग :—

जब साधक अपनी मुक्ति हेतु अपने इष्ट देव का नाम जपते-जपते उसके रूप में लीन होकर अपने आप को भूलकर समाधिस्थ हो जाता है, तो यह स्थिति "महाभाव" कहलाती है। यही मन्त्रयोग है। इस प्रथम योग के आचार्य नारद, पुलस्त्य, गर्ग, वाल्मीकि, भृगु, बृहस्पति आदि माने जाते हैं।[5]

(२) हठयोग :—

जब साधक स्थूल शरीर के माध्यम से कठोर यौगिक क्रियाओं का अभ्यास करता हुआ प्राणायाम (वायुनिरोध) द्वारा सूक्ष्म शरीर पर अधिकार कर ज्योतिर्मय

---

१. कुलार्णवतन्त्र, ६/१५।
२. वही, पृ० १८४।
३. वही, ६/३०।
४. पातञ्जल योगदर्शन, १/२।
५. कुण्डलिनी योगतत्त्व, पृ० २२।

रूप में समाधि लाभ करता है, तो इस अवस्था को "महाबोध" कहा जाता है। इस योग के आचार्य के रूप में मार्कण्डेय, भारद्वाज, मरीचि, जैमिनि, पाराशर, विश्वामित्र, मन्थान, भैरव, कंथड़ि, सिद्धिपाद, गोरक्षनाथ आदि महर्षियों का उल्लेख किया जाता है।[1]

(३) राजयोग :—

विवेक की पूर्णता के द्वारा मन, बुद्धि, अहङ्कार और चित्त पर विजय करके स्वरूप का प्रकाशबोध करना "राजयोग" है। इस योग के चार पाद और सोलह अङ्ग हैं। इसकी समाधि के चार अङ्ग हैं—२ सविचार, २ निर्विचार।

(४) लययोग :—

लययोग को "कुण्डलिनीयोग", "शिव-शक्तियोग" या "महाराजाधिराज-योग" कहते हैं। जब साधक षट्चक्र-भेदन की साधना का अभ्यास करता हुआ कुण्डलिनी शक्ति को सहस्रार स्थित परमात्मा के साथ सुषुम्णा मार्ग से मिलन कराता है, तो यही "लययोग" कहलाता है। इसे "महायोग" भी कहते हैं। इस योग में स्थूल और क्रमशः सूक्ष्म क्रियाओं द्वारा कुण्डलिनी-जागरण, षट्चक्रभेद, व्योमवञ्चकजय, बिन्दु ध्यान सिद्धि, महालयसमाधि, सिद्धि तथा आत्मसाक्षात्कार होता है।[2]

लययोग संहिता में लययोग के ९ अङ्ग बताये गये हैं—यम, नियम, स्थूलक्रिया (आसन), सूक्ष्मक्रिया (प्राणायाम), प्रत्याहार (नादानुसन्धान), धारणा (षट्चक्रभेदन), ध्यान, लय-क्रिया और समाधि।[3]

योग का अधिकारी :

योगशास्त्र षट्चक्र-भेदन की साधना को प्रायः गुह्य या अप्रकाश्य कहते हैं।[1] इसका कारण यह है कि अधिकारी साधक चक्र-भेदन से प्राप्त सिद्धियों का दुरुपयोग नहीं कर सकता है। सर्वसामान्य को सिद्धियों की प्राप्ति होने पर उनका सदुपयोग कम, दुरुपयोग अधिक होता है। वस्तुतः चक्र-भेदन जीवन्मुक्ति तथा अष्ट सिद्धियों को प्रदान करने वाला है। इस साधना से जीव सर्वशास्त्रविद् हो जाता है।[2] षट्चक्रों के भेदन की प्रायोगिक पद्धति पर कुण्डलिनी-जागरण के प्रकरण में सविस्तार विवेचन विया जा चुका है। पुनरुक्तता के भय से यहाँ हम षट्चक्र-भेदन के सामान्य स्वरूप पर चर्चा कर रहे हैं। षट्चक्र-भेदन या कुण्डलिनी-जागरण की कोई निश्चित या विशेष पद्धति नहीं है। योग, मनन, निःस्वार्थ-सेवा, पूजा, स्तोत्र आदि सभी परम लक्ष्य की ओर साधक को अग्रेषित करते हैं। केवल भक्ति और निष्ठा की अपरिहार्यता होनी चाहिये।[3] मूलाधारादि आज्ञा-पर्यन्त षट्चक्रों के जागरण के बाद कुण्डलिनी सहस्रार में परम शिव से मिलन करती है, इसलिये सर्वप्रथम यहाँ हम "सहस्रार" के स्वरूप पर प्रकाश डालना चाह रहे हैं।

सहस्रार (सहस्रदलपद्म)

मूलाधार, स्वाधिष्ठान, मणिपूर, अनाहत, विशुद्ध और आज्ञाचक्र के ऊपर परम व्योम में शङ्खिनी नाड़ी के शिखर में ब्रह्मरन्ध्र के ऊर्ध्व भाग में स्थित विसर्ग के नीचे सहस्रदलकमल की अवस्थिति मानी गई हैं, जो प्रकाशमान तथा पूर्णचंद्रमा से भी अति शुभ्र है तथा अधोमुखी है। यह अति शोभन है तथा इसके केसर-पुञ्ज तरुण रवि की आभा के समान हैं। यह केवलानन्दरूप है।

इस पद्म की कर्णिका के त्रिकोण में चन्द्रमा की अरुणिम अमा-कला की अवस्थिति है, जो अति शुद्ध है तथा कमल के सूक्ष्म तन्तु के शत भाग के समान सूक्ष्म है। वह कोटि विद्युत् के समान कोमल शरीर वाली है तथा अधोमुखी है। वह ब्रह्मपरम्परोत्पन्ना है तथा अतिशय अमृत का स्रावण करने वाली है।[4] अमा-कला के मध्य निर्वाण कला है, जो पर से भी पर है तथा केशाग्र के सहस्रभाग के समान

---

१. रुद्रयामल उ० त०, ४८/२।

२. वही, ४८/२,३।

३. कुण्डलिनी इन टाइम एण्ड स्पेस, पृ० ४१-४२।

४. षट्चक्र०, श्लोक ४६।

सूक्ष्म है। वह अर्धचन्द्र के समान वक्राकार है, सभी सूर्यों की प्रभा वाली, नित्य बोध का उदय करने वाली तथा सभी प्राणियों का हृदय-चैतन्यरूप है।[1] निर्वाण-कला के मध्य में परम अपूर्व निर्वाण शक्ति का विलास है, जो कोटि सूर्य के प्रकाश वाली, त्रिलोक की उत्पत्ति करने वाली, केशाग्र के कोटि भाग से भी सूक्ष्म, निरन्तर प्रेमधारा को धारण करने वाली, सभी जीवों का जीवनभूत तथा मुनियों के चित्त में सदा तत्त्वबोध को प्रवाहित करने वाली है।[2] वह परम शक्ति परम शिव के समान सर्वविद्यमान है। मानव शरीर उसी शक्ति की सृष्टि है।[3] इस निर्वाण कला के मध्यस्थ शून्य में अति निर्मल शिव-पद है, जो शाश्वत, योगिगम्य, नित्यानन्दरूप, सकलसुखमय तथा शुद्धबोधस्वरूप है। इसे कुछ आचार्य ब्रह्म-पद, विष्णु-पद, हंस-पद, आत्मप्रबोध पदरूप तथा मोक्ष-पद के रूप में अभिहित करते हैं।

षट्चक्र-भेदन

संरुद्धमार्ग में मार्ग को प्रशस्त करना "भेदन" कहा जाता है—"संरुद्ध-वर्त्मनि वर्त्मकरणं भेदः।"[4] षट्चक्र-भेद का अर्थ है—हमारे देह के मेरुमार्ग में स्थित छः यन्त्रों के भीतर के स्रोत का अस्वाभाविक वक्र भाव दूर कर उनके भीतर सरल अबाधित मन तथा प्राण की गतिलाभ करना।[5]

मूलाधार से लेकर आज्ञाचक्र पर्यन्त दलों के वर्ण, देव, देवी, मण्डल, बीज-मन्त्र, इन्द्रिय, लोक आदि का विधिपूर्वक ध्यान षट्चक्र-भेदन की साधना-पद्धति का प्रमुख अङ्ग है। ध्यान के पूर्व यथानिर्दिष्ट आसन, मुद्रा तथा प्राणायाम का अभ्यास आवश्यक है। यह साधना आज्ञाचक्र, मूलाधार, स्वाधिष्ठान, मणिपूर, अनाहत, विशुद्ध, पुनः आज्ञा और अन्त में सहस्रार के क्रम में सम्पन्न की जानी चाहिये। कुछ आचार्य मूलाधार से ही साधना का प्रारम्भ बताते हैं। आज्ञाचक्र से साधना को प्रारम्भ करने का प्रयोजन है। इस चक्र के जागरण से मनुष्य के संस्कार उद्बुद्ध हो जाते हैं। संस्कारों का जागरण प्रत्येक व्यक्ति के द्वारा सह्य नहीं होता। इसलिये मन को शुद्धीकृत करने के लिए आज्ञाचक्रस्थ त्रिवेणी में मन का विलय किया जा सकता है।[6] षट्चक्रों को पद्म रूप में कल्पना करने का एक

---

१. षट्चक्र०, श्लोक ४७ तथा चक्रकौमुदी, ७/१२।

२. वही, श्लोक ४८।

३. कुण्डलिनी इन टाइम एण्ड स्पेस, पृ० २२।

४. षट्चक्रविवरण, पृ० ८२।

५. पूजातत्त्व, पृ० १६३।

६. तन्त्र आफ कुण्डलिनीयोग, पृ० २४।

प्रयोजन भी है। पद्म शुद्धता तथा दिव्यता के प्रतीक माने जाते रहे हैं।[1] साधक का चिन्तन शुद्ध तथा दिव्य हो, इस आशय से पद्मों पर ध्यान किये जाने का निर्देश शास्त्रों में किया गया है। यहाँ हम अति संक्षेप में प्रत्येक चक्र के तत्त्वों का संङ्केत कर रहे हैं—

१. मूलाधारचक्र

दल ४, वर्ण वं शं षं सं, मण्डल-पृथिवी, बीज-पृथिवी (लं), लोक-भू, देवी डाकिनी, देवता-गणेश, ग्रन्थि-ब्रह्म, तन्मात्रा-गन्ध. कर्मेन्द्रिय-पायु, ज्ञानेन्द्रिय-प्राण, तत्त्व-पृथिवी, स्थान-कन्द, लिङ्ग-स्वयम्भू।

२. स्वाधिष्ठानचक्र

छः दल, वं भं मं यं रं लं वर्ण, जल मण्डल, वं जल बीज, भुवःलोक, राकिणी देवी, ब्रह्मा-देव, रस तन्मात्रा, लिङ्ग कर्मेन्द्रिय, रसना ज्ञानेन्द्रिय, जल तत्त्व, लिङ्ग-मूल स्थान।

३. मणिपूरचक्र

दश दल, डं ढं णं तं थं दं धं नं पं फं-वर्ण, अग्नि मण्डल, रं-अग्नि बीज, स्वःलोक, लाकिनी-देवी, विष्णु-देव, रूप-तन्मात्रा, पाद कर्मेन्द्रिय, चक्षु ज्ञानेन्द्रिय, तेज तत्त्व, नाभिमूल स्थान।

४. अनाहतचक्र

१२ दल, कं खं गं घं ङं चं छं जं झं ञं टं ठं—१२ वर्ण, वायुमण्डल, यं—वायु बीज, महः लोक, काकिनी शक्ति, ईश या रुद्र-देव, स्पर्श-तन्मात्रा- हस्त कर्मेन्द्रिय, त्वक् ज्ञानेन्द्रिय, वायुतत्त्व, विष्णु-ग्रन्थि, हृदय स्थान, बाण लिङ्ग।

५. विशुद्धचक्र

१६ वर्ण, १६ स्वर—अं आं इं ईं उं ऊं ऋं ॠं लृं लॄं एं ऐं ओं औं अं अः, नभ-मण्डल. हं-नभ बीज, जनः लोक, शाकिनी देवी, सदाशिव देव, शब्द तन्मात्रा, वाक् कर्मेन्द्रिय, श्रोत्र ज्ञानेन्द्रिय, आकाश तत्त्व, कण्ठ-स्थान।

६. आज्ञाचक्र

दो दल, हं क्षं वर्ण, चन्द्र मण्डल, ॐ प्रणव बीज, तपः लोक, हाकिनी शक्ति, परमशिव देव, सभी तन्मात्रायें, सभी ज्ञानेन्द्रियाँ, मन अन्तःकरण, रुद्रग्रन्थि, भ्रूमध्य स्थान, इतर लिङ्ग।

७. सहस्रार

१००० दल, अ से ळ पर्यन्त सभी ५० वर्ण (अकार या विकल्प से लकार

---

१. कुण्डलिनी इन टाइम एण्ड स्पेस, पृ० ४०।

को छोड़कर) कर्णिका के मध्य चन्द्र मण्डल, चन्द्र मण्डल में त्रिकोण, त्रिकोण के मध्यशून्य या पर विन्दु, शून्यस्थ सर्वेश, तत्रस्थ अमाकला, उसके मध्य निर्वाण कला, उसके मध्य शिवपद।

सोलह स्वर मायानुविद्ध शिव के प्रतीक हैं, क से म तक पाँच वर्ग पञ्च-तत्त्वों के प्रतीक तथा य र ल व चित् शक्ति के प्रतीक हैं। प्रत्येक वर्ण वैखरी के क्षेत्र में आने पर शिव-शक्ति का सम्मिलित रूप प्राप्त करता है।[1]

कुण्डलिनी-उत्थापन :—

षट्चक्रों का भेद कुण्डलिनी के माध्यम से होता है। क्षुब्ध कुण्डलिनी का जागरण षट्चक्र-भेदन का उपक्रम बनता है। कुण्डलिनी भी अधः और ऊर्ध्व भेद से दो प्रकार की है। अधः कुण्डलिनी ही ऊर्ध्व कुण्डलिनी को जागृत करती है।[2] किन्तु सत्य बात यह है कि प्रसुप्त अवस्था में वही शक्ति कुलकुण्डलिनी तथा सहस्रार में पहुंचने पर ऊर्ध्व कुण्डलिनी कहलाती है।

यम, नियम, आसन आदि के अभ्यास से युक्त साधक गुरु-मुख से महा-मोक्ष मार्ग के प्रकाश-क्रम को जानकर "हूँ" बीज मन्त्र के द्वारा स्वयम्भू लिङ्ग का भेदन करके ब्रह्मद्वार के मध्य विचरण करता है। साधक पवन-योग से अग्नि-रूपा कुण्डलिनी को ऊर्ध्वगामी करता है।[3] इस समय ब्रह्मद्वार, जिसे प्रसुप्त कुण्डलिनी अपने मुख से आच्छादित किये रहती है, उद्घाटित हो जाता है। "हंस" मन्त्र के द्वारा श्वास-प्रच्छ्वास के माध्यम से गुदा का शनैःशनै आकुञ्चन करने से ब्रह्मद्वार का उद्घाटन होता है। "हंस" मन्त्र का अनुस्मरण करते हुये हृदय में दीपशिखा के समान जीव को मूलाधारचक्र में ले जाकर उसके साथ कुण्डलिनी को गतिशील करना चाहिये। साधक को काम, क्रोध, लोभ, मोह, मद, मत्सर से रहित होना चाहिये। गुरु के उपदेश से ही कुण्डलिनी-उत्थान-विधि का ज्ञान प्राप्त करना चाहिये—

गुरूपदेशतो ज्ञेयं न तु शास्त्रार्थकोटिभिः।[4]

— : ० :—

---

१. तन्त्रविज्ञान, पृ० ११०।

२. वही, पृ० १०९।

३. षट्चक्र०, श्लोक ५०।

४. वही, विवरण में उद्धृत।

मन्त्ररूपमिदमीरितं मया सर्वथा गुरुमुखेन लभ्यते।
गुर्वनुग्रहमृते महीतले मन्त्र एष न हि सिद्धिदायकः ॥ ३९ ॥

इति श्रीनागभट्टविरचिते त्रिपुरासारसमुच्चये
द्वितीयः पटलः ॥

तृतीयः पटलः

अथेदं शरीरं स्वकीयाङ्गुलीभिर्बुधैः षणवत्यङ्गुलायाममुक्तम्।
दिनेशाङ्गुलीभिः शरीरात् समीरोऽधिकः प्राणसंज्ञो मतो योगविद्भिः १
इह प्राणवायुं सदाभ्यासतो यो नरो न्यूनभावं नयत्येनमङ्गात्।
समत्वं शरीरेण वा भूतलेऽस्मिन् स पूज्यो बुधैरुत्तमो योगवित्सु २

न्यासेषु दीपनीयोगमाह विद्येति। विद्यान्यासषडङ्गन्यासवदनन्यासेषु योजनीयेति। एवं कृते विद्या प्रबुद्धा भवति। एवं प्रकारेण मूलविद्या मन्त्रस्याङ्गं स्वशरीरे न्यसतः पुंसः लोकत्रयं वशमेति पापानि शाम्यन्ति सद्यः सह ॥ ३८ ॥

इदं मायामन्त्रस्वरूपं कथितं गुरुणा वा यदि लभ्यते तदा परं सिध्यति अन्यथा गुरुप्रसादमन्तरेण एष मन्त्रो न सिध्यतीति ॥ ३९ ॥

इति त्रिपुरासारसमुच्चयटीकायां द्वितीयः पटलः।

एवं साधकानां सकलपुरुषार्थसारभूतं मन्त्रस्वरूपमुक्त्वा पुरुषार्थान्तराय परिहाराय योगाङ्गभूतप्राणायामप्रकारान् तद्विषांश्च वक्तुमुपक्रमते अथेदं शरीरमित्यादिना। इदं शरीरं पण्डितैः षडधिकनवत्यंगुलदैर्घ्यम् उक्तं यस्य शरीरस्य परिमाणं तस्यैवांगुलिमानेन। प्राणसंज्ञकोवायुः शरीराग्निर्गमस्थानाद्द्वादशांगुलीभिरधिको मतः द्वादशांगुलपर्यन्तं सञ्चरति ॥१॥

इहेति। इह भुवि यो नरः सदाभ्यासतः सदाभ्यासेन एनं प्राणवायुं शरीरान्न्यूनभावं सकलाङ्गव्यापकत्वं नयति। शरीरेण समाङ्गत्वं तौल्यं वा

चतुर्दशात्रापघने प्रधाना नाड्यः स्मृतास्तास्वपि तिस्र एव ।
इडा सुषुम्नापि च पिङ्गलाख्या मुख्या सुषुम्नैव च तासु नाडी ॥३॥
इडा नाम नाडी स्थिता वामभागे तनोर्दक्षिणे पिङ्गला नाम नाडी ।
तयोः पृष्ठवंशं समाश्रित्य मध्ये सुषुम्ना स्थिता ब्रह्मरन्ध्रन्तु याश्च ४
सुषुम्नान्तराले स्थिता चित्रनाडी युता पञ्चवर्णोज्ज्वला पञ्चदेवैः ।
तदन्तर्गतं ब्रह्मरन्ध्रं सुसूक्ष्मम मृणालान्तरालोल्लसत्तन्तुतुल्यम् ॥५

आसनाङ्गव्यापकत्वं वा करोति स योगवतां मध्येऽस्मिन् भूतले पूज्यते इति ॥ २ ॥

प्राणाश्रयभूता नाडीर्दर्शयति चतुर्दशेति । तदुक्तं नाडीनामाश्रयः पिण्डो नाड्यः प्राणस्य आश्रय इति । अस्मिन् शरीरे चतुर्दश नाड्यः प्रधानीभूताः सन्ति अपि चतुर्दशसु मध्ये चतस्रः प्रधानाः स्मृताः ॥ ३ ॥

तासां तिसृणां कथयति । इडेति इडा पिङ्गला सुषुम्ना चेति तास्वपि तिसृषु मध्ये सुषुम्नैव प्रधानीभूता । चतुर्दशनाडीनां नामानि यथा । इडाच पिङ्गला चैव सुषुम्ना च सरस्वती । गान्धारी हस्तिजिह्वा च सुपूषा च यशस्विनी ॥ अलम्बुषा कुहूश्चैव शङ्खिनी चित्रिणी तथा । विश्वोदरी विश्वमुखी व्याप्ता ह्येता चतुर्दश ॥ एतास्वपि तिस्रो मुख्याः यास्वपि योगः प्रतिष्ठितः तास्वपि सुषुम्नैव मुख्या सा च द्वादशान्तं पृष्ठवंशं समाश्रित्य सकलाधारत्वेनाधोमुखी ऋजुभूतातिष्ठति । आधारो नाम पद्मस्थानात् द्वागुलादूर्ध्वं मेढ्राद्द्व्यंगुलादधोभागे चतुरंगुलायामविस्तारं अंगुलोन्नतं त्वगादिधातुभिर्वेष्टितं चतुर्दलात्मकं पण्डराकारं पद्मं तत्कर्णिकामध्ये त्रिकोणायोनिः तन्मध्ये सकलप्रपञ्चनिमित्तोपादानभूता कुण्डल्याख्या चिन्मयी शक्तिः त्रिगुणितादिरूपेण सूर्येन्दु वैश्वानराणां मूलभूता भ्रमति या त्रिकोणमुत्थिता सुषुम्ना नाम नाड़ी वीणादण्डाख्यपृष्ठवंशस्य पुरोभागमवलम्ब्य ब्रह्मरन्ध्रपर्यन्तम् ऊर्ध्वाकारा तिष्ठति । तथात्र तन्त्रचूड़ामणिः । मेरुदण्डे वहिः पार्श्वे चन्द्रसूर्यातिमस्तके । किम्वा मध्ये--सुषुम्ना सन्निविष्टा च तन्मध्ये चित्ररूपिणी । तत्रैव ग्रथितं पद्मं मूलादिपद्म-

ब्रह्मसूत्रमिदमेव देहिनां जीवभूतममृतैककारणम् ।
यद्वदन्ति मुनयः पुरातना दिव्यमार्ग इति भव्यचेतसः ॥ ६ ॥

पञ्चकम् । कलिकाकाररूपेण डाकिन्याद्यावलम्बितम् । मूलद्वारं समाच्छाद्य स्थिता नागस्वरूपिणी । वायुना भिद्यते मुक्तं दृढं चित्रा नयेत्ततः । तच्छ्वासोज्ज्वलकामस्य शिखयाऽतिसमुज्ज्वला । प्रतिचक्रप्रबुद्धा सा जीवात्मानं परे कुले । नियोजयति तद्योगादमृतं क्षरते चिरम् । व्योम प्रोद्भिद्य नासाग्रे गतौ चन्द्रदिवाकरौ । अधोचक्रं महापद्मं क्रोडीकृत्य सुषुम्नया । व्याघुट्य नासिकामध्यं गतं चित्रा तु तद्गता । ऊर्ध्वं भित्त्वा तु लिङ्गं वै इतरान् पुष्करान् ततः । वहीरुद्धमनाकांक्षाकांक्षिणी मोक्षदायिनी । जीवनांह्रष्टसम्बद्धा स्थिरा परमसन्निधौ एतद्भेदं विजानाति भित्त्वा याति परं पदम् । इत्यादि वहुशः । योगार्णवेऽपि । सुरशृङ्गाटपार्श्वेन तेजैव सव्यतः क्रमात् सूर्याचन्द्रमसौ नाड्यो गते नासाद्वयावधि । तन्मध्ये द्वितीयं भित्त्वा सुषुम्ना पद्मकोटरे । ब्रह्मरन्ध्रावधिर्याता भित्त्वा व्योम सुरालयम् । सुखेनाच्छाद्य तद्द्वारं कुण्डलीशक्तिरुज्ज्वला । निद्रावशगता देवी प्रसुप्तभुजगोपमा । तत्त्रिकोणस्थ वामदक्षिणकोणयोः सम्भूते सुषुम्नाया वामदक्षिणभागे इडापिङ्गले स्थिते । तयोर्मध्ये इडा नाम नाडी चापाकृतिर्भूत्वा लिङ्गमूलस्थाने सुषुम्नामाश्लिष्य दक्षिणभागं गता तदाकारां पुनरपि नाभिस्थाने वामभागं गता । तदा पुनरपि हृदयस्थानमाश्लिष्य दक्षिणभागं गता । तदा करौ पुनरपि जानुमूलमाश्लिष्य वामनासापुटं गच्छति । एवं दक्षिणभागसम्भूता पिङ्गला सुषुम्नामाश्लिष्य दक्षिणनासाविवरं गच्छति । सुषुम्नामूलपुरोभागादुत्थिता आजिह्वान्तं सरस्वती नाम नाडी स्थिता । केचित्तु त्रयं वर्णतति । एताः सुषुम्नास्तिस्रश्च यासु योगः प्रतिष्ठितः । ताश्च नासापुटद्वन्द्वब्रह्मरन्ध्रविनिर्गताः । सरस्वत्यादिचत्वारो मुखरन्ध्रविनिर्गताः । तास्वेका शब्दजननी अन्या स्वरसवाहिनी । अपरा रसनाधारा परा तोयवहा शिवा । अन्याः षट्नेत्रकर्माङ्गमेदोद्वारविनिर्गताः । शङ्खिनी नाभिसम्बन्धा या मांतुर्हृदि रुध्यते । यया

इडायां चरत्येषं शीतांशुमाली
अतो वामभागेऽमृतं सम्प्रदिष्टम् ।
रविः पिङ्गलायां चरत्येष तस्माद्
विषं दक्षिणो भाग उक्तो मुनीन्द्रैः ॥ ७ ॥

जानीयादुदयं बुधः स्वजठरे कन्देऽशरीरे नृणाम्
घ्राणात्तिग्मकराङ्गुले खलु लयं सन्ध्ये च पूर्वापरे ।
उत्पत्तिश्च लयश्च सन्ततमधोवृत्तिं निशां वासरम्
चोर्ध्वां वृत्तिमधस्तथा हिमकर चोर्ध्वां दिनेशं गतिम् ॥८॥

गर्भगतः पिण्डः पुष्यतेऽन्नरसादिभिः । एताभ्य एवं नाडीभ्यः शाखोपशाख-प्रकारेण सार्द्धलक्षत्रयसंख्यानां नाडीनां सम्भवः । कुत्र का नाडी तिष्ठति इति शिष्याकांक्षायमाह इडेति शरीरस्य वामांशमाश्रित्य इडा नाम नाडी दक्षिणभागं पिङ्गला तयोर्नाड्योर्मध्ये देहस्य पृष्ठवंशमाश्रित्य ब्रह्मरन्ध्रपर्यन्तं सुषुम्ना अवस्थितेति । सुषुम्नाया अभ्यन्तरे चित्रा नाडी स्थिता पञ्चभिर्वर्णैः श्वेतरक्तादिभिरुज्ज्वला पञ्चभिर्देवैर्ब्रह्माविष्णुरुद्रेश्वरसदाशिवैः संयुक्ता । तदुक्तम् । ब्रह्मा जनार्दनो रुद्र ईश्वरश्च सदाशिवः चित्राख्यनाड्यन्तःस्थाश्च पञ्चभूताधिदेवताः ॥ ४-५ ॥

ब्रह्मेति । इदमेव ब्रह्मसूत्रं शरीरिणां प्राणभृतां जीवभूतम् अमृतं-ककारणम् अस्मिन्नेव ज्ञायते मरणं न चरतीत्यर्थः । यद्ब्रह्मसूत्रं प्राचीनां मुनयो दिव्यमार्ग इति कथयन्ति निर्वाणोपयोगी स एव मार्ग इत्यर्थः ॥ ६ ॥

इडायामिति । एष शिशिरकिरणो वामे इडासंज्ञायां नाड्यां चरति तेन वामभागेऽमृतमुक्तं पिङ्गला वामादिभ्यश्चरति सा च दक्षिणभागमाश्रितेति स भागो विषसंज्ञकः आदित्यस्य खेचरत्वात् वायुनियमेन सिध्यतीति ॥ ७ ॥

तस्योत्पत्तिविनाशज्ञानमाह जानीयादिति । बुधः अशरीरे वायोर्नृणां कन्दे मूलभूते आधारे चक्रे उदयम् उद्भवं जानीयात् । तथा आधारचक्रे

तुषारांशुनाडी प्रपन्ने तु देवे तदा शान्तिकादीनि कर्माणि कुर्यात् ।
बुधो रौद्रकर्माणि मार्त्तण्डनाडीमुभे मिश्रकर्माणि नाड्यौ प्रपन्ने ॥ ९ ॥
भूतानमुदयं द्वयोरपि बुधः संलक्षयेत् पक्षयो-
स्तत्राधो वसुधोदयं निशितधीर्घ्राणस्य दण्डस्पृशि ।
देवेऽधःस्पृशि वारिणो हुतवहस्योर्ध्वं गते तूक्ष्देयम्
तिर्यक्संस्पृशि मारुतस्य परितः स्पृष्टे मरुद्वत्मनः ॥ १० ॥
वश्यस्तम्भनयोः प्रशस्त उदयो भूमेर्जलस्योदयः
शस्तः शान्तिकपौष्टिकादिषु शुभेष्वह्नाय वह्नेः पुनः ।
शत्रोर्मारणदारणादिकरणेषूच्चाटनोच्छासयोर्वायोः
शान्तिकनिर्विषीकरणयोर्व्योम्नो हितश्चोदयः ॥ ११ ॥

गुदोपरिलिङ्गाधःस्थिते वायुरुत्तिष्ठति घ्राणाद्बहिर्द्वादशांगुले विनश्यतीत्यर्थः । तदेव स्थानद्वयं पूर्वापरे सन्ध्ये कन्दात् पूर्वसंख्या घ्राणे द्वादशांगुलं वहिर्याति । पश्चादेतीति स्थानद्वयम् उत्पत्ति लयं विनाशं च ते एव ज्ञातव्ये । आधारेति । वायोरधोगमनं निशां जानीयात् ऊर्ध्वगमनं वासरं दिवसं जानीयात् । उक्तं हि अहरेव प्राणो रात्रिरपान इति तथाधोवृत्ति चन्द्रं जानीयात् ऊर्ध्वं गमनमिति । अतएव योगार्णवे वर्षत्यधोमुखश्चन्द्रः शोषेत्यूर्ध्वमुखोरविरिति ॥ ८ ॥

केन वायौ कानि कर्माणि कर्त्तव्यानीत्याह तुषारांशुनाडीमिति तुषारांशुनाडीं इडां गते वायौ शान्तिजनकानि कर्माणि कुर्यात् । सूर्यनाडीं पिङ्गलां गते रात्रौ रौद्राणि दारुणानि कर्माणि कुर्यात् । चन्द्रमसः शीतलांशुत्वात् सूर्यस्य खरकरत्वादिति भावः । उभयनाडीस्थे वायौ शशिकानि रौद्राणि च कर्माणि कुर्यात् ॥ ९ ॥

भूतानामिति । द्वयोरपि पक्षगोः शुक्लकृष्णायोर्भूतानां पृथिव्यस्तेजोवाय्वाकाशानाम् उद्भूयं सलक्षयेत् अवधारयेत् । तत्र भूतेषु मध्ये पृथिव्या उदयं घ्राणमध्यदण्डते वायौ यदा प्रशस्यते दण्डाकारगतिर्भवति तदा

धरणेरुदयो गदार्दितानाम्
यदि दूतः समुपेत्य पृच्छतीह ।
सहसा नहि रोगजा प्रबाधा
प्रशमं याति चिकित्सितापि सम्यक् ॥ १२ ॥
जलोदये व्याधिरुपैति शान्तिं मृत्युर्भवत्येव वसूदये च ।
तथोदये चापि समीरणस्य व्योम्नोऽचिरेणैव रुजां विनाशः ॥१३॥
देवे दक्षिणभागगेऽथ पुरुषो रोगातुरो दक्षिणे
स्थित्वा पृच्छति पृच्छकः स पुरुषो जीवत्यरोगश्चिरम् ।
वामायां तु रुजाकुलीकृततनौ वामाश्रिते चेश्वरे
वामा पृच्छति चेत् स्थिता गतगदा वामाचिरं जीवति ॥ १४ ॥

भूमेरुदयं जानीयात् । देवे वायौ अधःस्पृशि सति वारिणो जलस्य उदयं जानीयात् ऊर्ध्वं गते वायौ हुतवहस्याग्नेरुदयं जानीयात् । तिर्यक् पार्श्वद्वयं संस्पृशि वायोरुदयं जानीयात् । समस्तनासारन्ध्रे व्यापके वायौ वहति सति मरुद्वर्त्मन आकाशस्य उदयं जानीयात् ॥ १० ॥

एतज्ज्ञानफलमाह वश्येति । भूमेरुदये वश्यजनकं स्तम्भजनकञ्च कर्म कुर्यात् । जलभूतस्योदये सति शान्तिजनकं तुष्टिजनकञ्च कर्म कुर्यात् । झटिति स तु मारणादिजनके कर्मणि वह्नेरुदयः प्रशस्तः । शत्रोर्देशोन्मूलने नगरोच्छेदे च वायोरुदयः प्रशस्तः । निर्विषीकरणसान्त्वने च आकाशस्योदयः प्रशस्तः ॥ ११ ॥

प्रश्नमाह धरणेरिति । पृथिव्या उदये सति नैरुज्यममुकस्य भविष्यति दूत आगत्य पृच्छति तदा रोगजा पीडा सद्यः कृतप्रतिक्रियापि हठेन शान्तिं नयतीति वक्तव्यमित्यर्थः । जलस्योदये सति यदि पृच्छति तदा व्याधिः शान्तिं याति । वसूदयेऽग्रेरुदये यदि पृच्छति तदा रोगार्त्तस्य मृत्युर्भवति । वसुहुताशनमिति विश्वः । वायोरुदये यदि पृच्छति तदा मृत्यु-

देवे गते पृच्छति वामभागं स्थित्वा नरो दक्षिणतो यदीह ।
व्यत्यासतोऽस्मादपि कृच्छ्रसाध्यं वदन्ति सन्तः खलु रोगजातम् १५
अन्तर्गते पृच्छति पृच्छकश्चेद्देवे नरो जीवति वीतरोगः ।
तेनैव रोगेण बहिर्गतेऽस्मिन् परेतराजस्य पुरं प्रयाति ॥१६॥
सर्वेषु कार्येषु यदीश्वरेऽस्मिन् अन्तर्गते वाञ्छितसिद्धयः स्युः ।
बहिर्गतेऽमङ्गलमीश्वरेऽपि शुभाशुभं कर्मफलं तु विद्यात् ॥१७॥
आरभ्य दर्शप्रथमामुदेति वामे पुटे त्रीणि दिनानि देवः ।
वामेतरे त्रीणि ततो दिनानि पूर्णा तिथिर्यावदथैवमेव ॥१८॥
अथारभ्य शुक्लान्यपक्षादिभूताम् तिथिं त्रीणि देवो दिनान्यभ्युदेति ।
पुटे दक्षिणे त्रीणि वामे तु यावत् कुहूरेवमेवं समालक्षयेन्ना ॥१९॥

रित्यर्थः । आकाशोदये यदि आगत्य पृच्छति तदा त्वरयैव रोगाणा विनाशो भवति ॥ १२-१४ ॥

प्रकारान्तरमाह । देवे वायौ दक्षिणां सङ्गते सति तत्रैव स्थित्वा दूतो यदि पृच्छति तदा रोगार्त्तो जनो नीरोगः सन् बहुशतत्रयं जीवति । स्त्रियां रोगगतायां वामभागगतो वायुर्भवति तत्राश्रितो दूतः पृच्छति तदानीं रोगात् सा चिरं जीवति इति ॥ १५ ॥

देव इति । वामप्रदेशं गते वायौ दक्षिणांशं गत्वा दूतो यदि पृच्छति तदा कष्टसाध्यं नैरुज्यं वक्तव्यम् । दक्षिणगे वायौ वामभागगः पृच्छति तदा कष्टसाध्यं नैरुज्यं वदेत् । अन्तर्गत इति । अभ्यन्तरं गते वायौ यदि पृच्छकः पृच्छति तदा नीरोगी जीवति । घ्राणाद्बहिर्द्वादशांगुलाद्बहिर्गते वायौ यदि पृच्छति तदा तेनैव रोगेण यमालयं रोगी यातीति । कार्यान्तरे तत् प्रयोजनं कथयति । यदीश्वरे वायौ अन्तर्गते अत कार्ये आकांक्षितसिद्धिर्भवति बहिर्गते द्वादशांगुलादधिकं गते सर्वकार्याणि नश्यन्तीति । कति दिनानि कुत्र तिष्ठतीति कथयति ॥ १६-१७ ॥

एकस्य पक्षस्य विपर्ययेण रोगाभिभूतिर्भवतीह पुंसाम् ।
तयोर्द्वयोर्बन्धुसुहृद्विपत्तिः पक्षत्रये व्यत्ययतो मृतिः स्यात् ॥२०॥

यदात्मनः कालवशात् समीरणो
विपर्युदेति प्रकृतिं विहाय सः ।
तदा निरुध्य श्वसनं निपीडयेद्
यथा स्थितं पक्षमुपैति चात्मनः ॥ २१ ॥

द्वावेव धत्तः सकलश्च कालं दिवाकरः कैरवबान्धवश्च ।
भोक्त्री सुषुम्ना सकलस्य चास्य कालस्य दोषादिवसात्मकस्य २२

आरभ्येति । दर्श एव प्रथमा तिथिर्यस्याः प्रतिपदः सा दर्शप्रथमा प्रतिपत् तेन शुक्लप्रतिपदादितिथित्रये वामे चतुर्थ्यादि दक्षिणे सप्तम्यादि वामे दशम्यादि दक्षिणे त्रयोदश्यादि वामे कृष्णप्रतिपदादि दक्षिणे चतुर्थ्यादि वामे सप्तम्यादि दक्षिणे दशम्यादि वामे त्रयोदश्यादि दक्षिणे। अथेत्यनन्तरं शुक्लान्यपक्षादिभूतां कृष्णप्रतिपत्तिथिमुपक्रम्य त्रीणि दिनानि दक्षिणभागे वायुरुदेतीत्यादिसंख्या उक्ता एवं ना पुरुष उदरं लक्षयेत् ॥ १८-१९ ॥

एकस्येति यद्येकत्र पक्षे वायोर्वैपरीत्यं भवति तदा तस्य पुरुषस्य रोगजनितोऽभिभवो भवति। शुक्लप्रतिपदादिनित्रयं यावद्वायुर्वामपुटे सञ्चरति तत्र यदि दक्षिणपुटे भवति एवं पंचदशदिनपर्यन्त यदि व्यत्ययो भवति तदा रोगाभिभूतिर्भवति मासमात्रं वैपरीत्येन सुहृदां विपत्तिः पंचचत्वारिंशद्दिनानि यावद्व्यत्ययो तस्य पुरुषस्य मरणं भवतीति वायोर्वैपरीत्ये रोगादिकं भवतीति स्वाभाविकी गतिः ॥ २० ॥

विपरीतोदये शुभोदयः कथं स्यादित्याह यदेति। स्वकीयादृष्टवशाद्वायुर्वैपरीत्ये उदेति तदादिबोधं कृत्वा श्वासं पीडयेत् यथा पुटान्तरं गच्छति ॥ २१ ॥

द्वावेवेति। कुमुदबन्धुश्चन्द्रः सूर्यश्चासौ सकलं कालं धत्तः दिवारात्रिरसात्मकस्य रात्रिन्दिवोपलक्षितस्य कालस्य भोक्त्री भक्षिका सुषुम्ना परं

ततः क्रमेणैव विशुद्धनाडीपथान्तरः प्राणसमीरणस्य ।
शनैः शनैः संयमने प्रयत्नं यथाविधानं विदधीत धीरः ॥२३॥
शीतांशुमार्गेण शनैः समीरमापूरयेत् स्वोदरमादरेण ।
विकारमात्राभिरपेततन्द्रः कालाग्निमूलार्पितचित्तवृत्तिः ॥२४॥
ततो धारयेन्मारुतं शुद्धचेताश्चतुः षष्टिमात्राः समापूरितं तम् ।
बहिर्भास्वता रेचयेन्मन्दमेनं तदर्द्धाभिरन्तर्निरुद्धं तु ताभिः ॥ २५ ॥
विपरीतमतो विदधीत बुधः पुनरप्यथ तद्विपरीतमिति ।
अमुना विधिना सुमनाः सततं मरुतो विदधीत सुसंयमनम् ॥२६॥
प्रस्वेदं जनयति यः प्राणायामेषु सोऽधमः प्रोक्तः
कल्पोमध्यः पुंसां भूमित्यागं तनोस्तनोति परः ॥ २७ ॥

मान्या नाडीभोक्तृत्वं नाम चित्कलासमवेतस्य तस्योपाधितया रूपत्वमापाद्य सर्वस्वामिभावकत्वमित्यर्थः ॥ २२ ॥

तत इति । सुषुम्नैव भोक्त्री तदा क्रमेण विशोधितनाडीमार्गान्तरः सन् प्राणवायोः शनैः शनैः संयमने नियमे प्रयत्नं यथा कथितप्रकारेण कुर्वीत ॥ २३ ॥

तमेव प्रकारं कथयति शीतांशुमार्ग इति । शीतांशोश्चन्द्रस्य वर्त्मना वामनाड्या वायुभिः स्वकीयमुदरं विकारमात्रया षोडशमात्रया पूरयेत् । अपेता तन्द्रा निद्रा यस्य सः कालाग्निमूलाग्निमूलार्पितचित्तवृत्तिः । कालाग्निमूले मूलाधारेऽर्पिता चित्तवृत्तिर्व्यापारो येन ॥ २४ ॥

तत इति । पूरितं वायुं चतुःषष्टिमात्रापर्यन्तं धारयेत् तस्य गतागतं विरोधयेत् भास्वता सूर्यमार्गेण दक्षिणया शनैस्तदर्द्धाभिर्द्वात्रिंशन्मात्राभिरभ्यन्तरे निरुद्धं तं वायुं रेचयेत् त्यजेत् ॥ २५ ॥

विपरीतमिति । अतः प्रकृताद्विपरीतं विदधीत कुर्यात् । पुनरपि तद्विपरीतं प्रकृतक्रमेणादिकं पुनरपि तद्विपरीतम् एवमभ्यसेत् अमुना प्रकारेण मरुतो वायोर्नियमं न कुर्यात ॥ २६ ॥

तावद्विदधीत बुधः प्राणायामं समाहितो विधिवत् ।
यावत् सम्भवति भुवि प्राणायामस्योत्तमस्य गुणः ॥ २८ ॥

अयं प्राणायामः सकलदुरितध्वंसनकरो
विगर्भः प्रोक्तोऽसौ शतगुणफलो गर्भकलितः ।
जपध्यानापेतः स तु निगदितो गर्वरहितः
स गर्भस्तून्मुक्तो मुनिपरिवृतैर्योगनिरतैः ॥ २९ ॥
शुचिः प्राणायामान् प्रणवसहितान् षोडश वशी
प्रभाते सायञ्च प्रतिदिवसमेवं वितनुते ।
द्विजो यस्तं भ्रूणप्रहरणकृतांघ्रोऽभिकलितम्
पुनन्त्येते माजादिह दुरिततूलौघदहनाः ॥ ३० ॥

त्रायन्त्यमी षड्भिरपीह मासैर्जन्मान्तरोपार्जितपापपुञ्जान् ।
संवत्सराद्ब्रह्मपदं तदेकं प्रकाशयन्त्येव यदच्युताख्यम् ॥३१॥
इह रेचकपूरकौ विहाय स्थिरधीः कुम्भकमेव केवलं यः ।
सततं कुरुते मनोजवत्वं लभते वीतजरामयः स मर्त्यः ॥३२॥
न हि तस्य सुदुर्लभं त्रिलोक्यामिह यः केवलं कुम्भके निषणः ।
अणिमादिगुणाष्टकं करस्थम् ननु तस्यैव निरस्तमृत्यु भीतेः ॥३३॥
राजदन्तयुगलादिमस्पृशन् सन्निधाप्य रसनां तदन्तिके ।
काकचंचुपुटमारुतं पिबेत् प्राणसंयमनमेतदुत्तमम् ॥ ३४ ॥

प्रस्वेदमिति । अयं सुगमः ॥ २७-२८ ॥

अयमिति । गर्भो गर्भशून्यः प्राणायाम उक्तः सन् सकलदुरितानि विनाशयति गर्भेण सहितोऽयं शतगुणफलसहितः कथितः विगर्भापेक्षया को विगर्भः कः सगर्भः इत्याकांक्षायामाह जपेति । जपैर्ध्यानैश्च शून्यो यः गर्भरहितः ताभ्यां युक्तो यः सगर्भः कथितः ॥ २९ ॥

शुचिरित्यादि । चतुष्टयं सुगमम् ॥ ३०-३३ ॥

द्विकचंचुसमीरकं शनर्धयतः सम्परिक्रुत्य सन्ध्ययोः ।
श्रमदाहगरोदरामयज्वरगुल्माः प्रशमं प्रयान्ति च ॥ ३५ ॥
उभयोरपि सन्ध्ययोर्मुहूर्त्ते पिकधातुर्धयतस्त्रिमासमात्रम् ।
सरसं द्विकचंचुगन्धवाहं भुवि सारस्वतसिद्धिरुत्तमा स्यात् ॥३६॥
विषमुग्रमुदग्रवीर्यभाजां प्रविनाशं समुपैति पन्नगानाम् ।
किमु वृश्चिककीटलूतकानामिह काकोलमुखानिलस्य पानात् ॥३७॥
द्विकचंचुसमीररगं नरः सरसं यः परिकृष्य सन्ध्ययोः
कुरुते निजकुण्डलीमुखे क्षयरोगं स विमुच्य जीवति ॥ ३८ ॥
द्विकचंचुसमीरणं नरो यः पिवतीहानिशमेव वीततन्त्रः ।
भवति ध्रुवमेव तस्य वर्षाच्छ्रवणं दर्शनमप्यतीव दूरात् ॥ ३९ ॥
बहुधा कथितेर्मुहुः किमेभिर्द्विकचञ्चवा तु समीरणस्य पानात् ।
जरसा सह नाशमाशु याति प्रबलं मृत्युकृतं भयं नराणाम् ॥४०॥

राजदन्तेति। राजदन्तयुगलद्वयस्यादिमस्पृशन् तेषाम् अन्तिके समीपे जिह्वां सन्निधाप्य काकचंचुपुटेन वायुं पिवेत्। काकचंचुपुटवन्मुखं कृत्वा पिवेदित्यर्थः। मध्यभूतदन्तचतुष्टयं राजदन्ताः एतदुत्कृष्टं वायोर्नियमनमिति ॥ ३४ ॥

द्विकेति। द्विकचंचुभ्यां समीरणं वायुं धयतः पिवतः धेट् पा पाने। द्वाभ्यां ककाराभ्यां लक्षितो द्विकः काकः श्रमदाहं गरोविषम् उदरामयम् उदररोगः ज्वरः गुल्म इत्याद्याः प्रशमं प्रयान्ति ॥ ३५ ॥

उभयोरिति। उभयोः प्रातः सायं सन्ध्ययोर्मूहूर्त्ते दण्डद्वयं यावत् प्रहरत्रयमात्रं वा कं श्मश्रुं तस्य धातुः धर्त्तुः पुंसः काकचंचुपुटमारुतं पिवतः सारस्वतसिद्धिर्भवति सन्ध्यामुहूर्त्तमात्रं प्रहरत्रयं वेत्ति व्यवस्थितविकल्पार्थः ॥ ३६ ॥

विषमिति। काकोलः त्रयं सुगमम् ॥३७-४०॥

जिह्वां कृत्वाऽनाकुलस्तालुमूले दन्तैर्दन्तान् गाढमापीडयित्वा ।
मन्दं मन्दं यः पिबेद्गन्धवाहं सौधैः पूरैः साकमन्तः स्पृशद्भिः ॥४१॥
षण्मासाभ्यासेन रोगैरशेषैः पातेभ्योऽसौ मुच्यते साधकेन्द्रः ।
अब्दादेकाद्विश्रसां मृत्युदूतीं जित्वा भूमौ दीर्घकालं स जीवेत् ॥४२॥
वर्षत्रयाभ्यासवशादतीतमनागतं वेत्त्यलिनीलकेशः ।
विषं न देहे क्रमते तदीये दष्टे सुघोरैरपि पन्नगेन्द्रैः ॥ ४३ ॥
न कृत्रिमं स्थावरजङ्गमं वा विषं किमन्यैरपि कालकूटैः ।
गुणाष्टकं कालवशादुपेत्य महीतले क्रीडति भैरवो वा ॥ ४४ ॥
या मुण्डाधारदण्डान्तरविवरगताहारनीहारगौरी
सौधीं धारां नभोऽम्भोरुहकुहरविधोः संस्रवन्तीं वहन्ती ।
तस्या वज्राख्यनाड्याः खगमुदरदरीमध्यगं या विदध्यात्
तस्या ब्रह्माण्डभाण्डप्रलयमपघनं स्याद्घनं मृत्युमृत्योः ॥ ४५ ॥

जिह्वामिति । तालुप्रदेशे जिह्वां योजयित्वा उपरिस्थदन्तपङ्क्त्याऽधो दन्तावलि आपीड्य सौधैः पूर्वमुखावस्थितैः सह गन्धवाहं वायु पिवेत् अन्यत् सुगमम् । प्रकारान्तरमाह जिह्वामिति । सौधैर्मुखान्तर्गतरसैः विस्रसां जरां कृत्रिमविषं नारिकेलमिश्रितकर्पूरं स्थावरं हिमशैलजादिकं जङ्गमं पार्वतीयं व्याघ्रनाभिजन्यं गुणाष्टकम् अष्टसिद्धिर्भैरवावतारार्थे वाशब्दः ॥ ४१-४४ ॥

या मुण्डेति । सुषुम्नान्तर्गताया वज्राख्यनाड्या उदरमेव दरी कन्दरा तन्मध्यवर्त्तिनं खगं वायुं यो विधानं करोति तस्य पवनं शरीरं मृत्युमृत्योर्धनं मुद्गरं भवति । मृत्युर्यमः तस्य मृत्युर्नाशकः तस्य लोहमुद्गरो भवति । घनः स्याल्लोहमुद्गर इत्यमरः । सा का मुण्डाधारदण्डाधारदण्डान्तरविवरगर्त्ता मुण्डस्याधारभूतो दण्डः पृष्ठवंशात्मकः तदन्तर्गतसुषुम्ना तन्मध्यवर्त्तिनमित्यर्थः । कीदृशाहृवे हिमवच्छुभ्रामृतधारां वहन्ती धारयन्ती आकाशदेशावस्थितपद्मा-

मूर्च्छां गतो हरति रोगसमूहमध्यारुद्धः
करोति गगने गमनं नराणाम् ।
वातो मृतो वितनुतेऽमरतां समस्त-
मभ्यासतः सुलभमेव समीरणस्य ।। ४६ ॥

अथ पार्ष्णिनिरुद्धकम्बुर्ना ध्वजमूलस्थितसव्यपादपार्ष्णिः ।
ऋजुकायशिरोधरो यतात्मा विषयेभ्यो विनिवर्त्तितेन्द्रियाश्वः ॥४७॥

काकीवक्त्रग्रहृष्टैर्मुहुरुदरदरीं पूरयित्वा समीरैरस्तुष्टा-
भ्यामुभ्यां नररिपुविवरे तर्जनीभ्यां च नेत्रे ।
नासारन्ध्रं निरुध्य स्थिरविमलमतिर्मध्यमाभ्यामथास्व-
मन्याभिर्नातिगाढं कमलजनिलये स्थापयेन्मानसं स्वम् ।।४८॥

म्बन्तरवर्त्तिनोविधोश्चन्द्रस्य क्षरन्तीम् तथाच यः सुषुम्नान्तर्गतवायुं निरोध-यति तस्य मरणं न भवतीत्यर्थः ॥ ४५ ॥

मूर्च्छामिति । मूर्च्छा निश्चेष्टत्वे सति इति यावत् । अद्धा तत्तेन रोग-संघातं निवारयति । बद्धः सन् नाड्यन्तरे निरुद्धः आयत्तः सन् मनुष्याणाम् आकाशगमनं निराधारसंचारं करोति मृतः मनसा सह याति स्वाभीष्टदेशं तथा विलीनः अमरताम् अमरणं नयति । तथाच मूर्च्छितो हरति व्याधिं निहन्यान्मरणं मृतः । बद्धः खेचरतां कुर्यात् वशो वायुश्च भैरवि ॥ ४६ ॥

प्रकारान्तरमाह तथेति । ना पुरुषः स्वीयमानसं कमलजन्मनो ब्रह्मणो निलये आधारकमलेऽवस्थापयेत् । कीदृक्पार्ष्णिना एकपादगुल्फेन निरुद्धः कम्बुनिरुद्धः कम्बुनिरुद्धगुदमार्गो येन सः ध्वजमूले लिङ्गमूलेऽवस्थापिता अपरपादपार्ष्णियेन सः । ऋमुकायः अवक्रशरीरः यतात्मा इन्द्रियमेव दुर्द्धरत्वादश्व इवाश्वः ॥ ४७ ॥

काकीति । काकवधूमुखेनाकृष्टैर्वायुभिरुदरदरीं पूरयित्वा करद्वयस्यांगु-ष्ठाभ्यां नररिपुविवरे वक्ष्यमाणं नरो अर्जुनः तस्य रिपुः कर्णः कर्णविवर

यथाशक्त्याभ्यासं प्रतिदिवस मेवं विदधतः
सुषुम्नान्तश्चायं प्रवरति शनैर्देहपवनः ।
तदा नादो नैजो भवति सहसानन्दजननः
क्रमाद्वीणावादिप्रहतमृदुवीणारवशयः ॥ ४९ ॥

आदौ मत्तालिमालागलपथविगलत्तारझङ्कारहारी
नादोऽसौ वंशिकांस्यांनिलभरितलसद्वंशनिस्वानतुल्यः ।
घण्टानादानुकारी तदनु जलनिधिध्वानधीरो गभीरो
गर्जं पर्जन्यघोषः पर इह कुहरे वर्त्तते ब्रह्मनाड्याः ॥ ५० ॥

विजिते भवतीह तेन वायुः सहजो यस्य समुत्थितप्रणादः ।
अणिमादिगुणा भवन्ति तस्यामितपुण्यस्य महासुखास्पदस्य ॥५१॥

सुरराजतनुजवैरिरन्ध्रे विनिरुध्य स्वकाङ्गुलीद्वयेन ।
जलधेरिव धीरनादमन्तः प्रसवन्तं सहसा शृणोति मर्त्यः ॥५२॥

परिभावयतोऽपि नादमेनं त्रिदशाधीशतनूजवैरिजातम् ।
सततं भवतीह तस्य जन्तोर्गुणसम्पत्तिरपेतकल्मषस्य ॥ ५३ ॥

शृङ्गाण्यङ्गुलिभिर्निरुध्य विधिवत्कोदण्डयोः पण्डितो
मध्ये बद्धमरुन्निरुध्य वृषभश्रेष्ठश्च षष्ठेन्द्रियम् ।

इत्यर्थः । तर्जनीद्वयेन नेत्रद्वयं मध्यमाभ्याम् अंगुलीभ्यां नासापुटं निरुध्य अन्याभिश्चतुर्भिर्मुखं निरुध्य ॥ ४८ ॥

यथेति । एवमनेन कथितप्रकारेण प्रतिदिनमभ्यसतः पुंसः सुषुम्नाभ्यन्तरे अयं वायुः संचरति यदि तदा सततानन्दजनको ब्रह्मप्रदो नाद उत्पद्यते क्रमेण पुनर्वीणासमरवो भवति वीणावादिप्रकृतत्वेनातिशयमधुरध्वनिरिति । द्वयं सुगमम् ॥ ४९-५१ ॥

सुरराजेति । सुरराज इन्द्रः तत्तनुजोऽर्जुनः तद्वैरी कर्णः तत्र स्वहस्तद्वयांगुलिद्वेन निरुध्य समुद्रस्येव गभीरं शब्दमभ्यन्तरे प्रसरन्तं शृणोति मर्त्यः तस्यापगतपाप्मनः गुणावाप्तिर्भवति मोक्षप्राप्तिर्भवतीत्यर्थः ॥ ५२-५३ ॥

साक्षात्तत्क्षणमेव पश्यति शनैस्त्रयन्तगीतं परम्
ज्योतिस्त्रैपुरमङ्कमुक्तशशभृल्लक्षाभलक्षप्रभम् ॥५४॥

इति श्रीनागभट्टविरचिते त्रिपुरासारसमुच्चये
तृतीयः पटलः ॥

चतुर्थः पटलः

अथ पूरकयोगयोजितान्तः पृषदश्वो निजमूलचक्रदेशे ।
विदधीत बुधः समाहितोऽजोपपदग्रन्थिविभेदने प्रयत्नम् ॥ १ ॥
शकृत् समुत्सृज्य यथा शनैः एवं सङ्कोचयेत्कम्बुनि मार्गमर्वा ।
बुधस्तथाधारनियोजितात्मा सङ्कोचयेत्कम्बुनि मार्गमुच्चैः ॥ २ ॥

शृङ्गाणीति । शृङ्गाणीन्द्रियाणि तान्यंगुलीभिः प्रतिरुध्य कीदण्डयोर्भ्रुवोर्मध्ये निरुद्धपवनः वृषभश्रेष्ठः । वृषो विषयः तं भजत इति वृषभः वृषभाणीन्द्रियाणि तच्छ्रेष्ठं षष्ठेन्द्रियं मनः तन्निरुध्य इत्यर्थः । त्रयन्तर्गीतं वेदांतवेद्यं अंकमुक्तशशभृल्लक्षाभलक्षप्रभम् एककालोदितनिष्कलङ्कानेकचंद्रप्रभम् । अयमर्थः । इन्द्रियाणि स्वकरांगुलीभिर्निरुध्य भ्रुवोर्मध्ये स्वान्तसम्भिन्नवायुं स्वप्रभावक्रमेण यो नियमयति स शशिप्रभं वेदान्तवेद्यं परं ज्योतिःस्वरूपमात्मानम् अनुभवतीत्यर्थः ५४ ॥

इति त्रिपुरासारटीकायां पदार्थादर्शे तृतीयः पटलः ।

एवं प्राणायामेन पवनजययोगविशेषांश्चोक्त्वा जितामरतामविकाराणामभ्युदयनिःश्रेयसप्राप्त्युपायभूतं मन्त्राणां छिन्नादिदोषपरिहारार्थं योनिमुद्राबन्धनप्रकारं वक्तुमुपक्रमते अथ पूरकयोग इत्यादिना । आदौ पूरकादियोगाभ्यासेन निजमूलचक्रदेशे मनः संयोज्य अजोपपदग्रन्थिविभेदने यत्नं प्रकुर्वीत अजो ब्रह्मा स एव उपपत्तिर्यस्य ग्रन्थिशब्दस्य तेन ब्रह्मग्रन्थिरित्यर्थः । समाहिताभ्यासध्यानः ॥ १ ॥

ग्रन्थिभेदप्रकारमाह शकृदिति । अर्वा अश्वः शकृद्विष्ठां समुत्सृज्य

विद्धीत मुहुर्मुहुर्गुरूक्तक्रमतो हुंकृतिमङ्कलग्नपाणिः ।
दृढरुद्धगुदध्वजान्तरालस्थिततेजोमयपुष्कराग्रयोनिः ॥ ३ ॥
अथ कम्बुनि मारुतं जितात्मा प्रतिलोमेन शनैः प्रवेशयेत्तम् ।
कमलासनपङ्कजस्य मूलं स्वगुरुप्रोक्तविधानतो दुरापम् ॥ ४ ॥
अमुना विधिना मुहुः कृतेन क्रमशः कम्बुनि मारुतस्ततोऽसौ ।
अजपङ्कजमूलदेशमार्गप्रणयी ग्रन्थिविभेदनं करोति ॥ ५ ॥
परिहृत्य खगाधिपस्ततोऽसौ सरणिं चन्द्रमसो नभोमणेः ।
कमलं कमलासनस्य पश्चाद्विदधीतोर्द्धमुखं प्रविश्य सम्यक् ॥६॥
प्रतिभानमथाद्भुतं प्रविष्टे भवनान्तः परमेष्ठिनः खगेशे ।
लघुता वपुषो भवत्युदग्रा जठरान्तर्ज्वलस्य चापि दीप्तिः ॥७॥

त्यक्त्वा येन प्रकारेण कम्बुनि मार्गं गुदमार्गं सङ्कोचयेत् तेन प्रकारेणाधारचक्रे संयुक्तात्मा पुरुषः । स्वीयं कम्बुनि मार्गं सङ्कोचं नयेत् ॥ २ ॥

विदधीतेति । मुहुर्मुहुर्वारंवारं गुरूपदिष्टप्रकारेण करकमलद्वयं नाभेरधःस्थिततेजोमयपद्माग्रस्य योनिश्च यत्नेन निरुध्य गुदलिङ्गमध्यतेजोमयपुष्कराग्रे योनिर्येन निरुद्धमूलाधार इत्यर्थः । असमर्थः गुदध्वजयोर्मध्ये स्थितं यच्चतुष्पत्रं पद्मं तन्मध्ये त्रिकोणाकारा योनिरिति ॥ ३ ॥

अथेति । कम्बुनि मारुतमपानवायुं देशिकोक्तक्रमेणाकुञ्चा शनैरुर्ध्वं नीत्वा कमलासनपङ्कजाख्यं सुषुम्नामूलं प्रवेशयेत् ॥ ४ ॥

अमुना विधिनेति एवं मुहुर्मुहुरभ्यासेन अधोवृत्तं निरुध्य तदन्तर्ब्रह्ममार्गः स्थितग्रन्थिभेदनं करोतीत्यर्थः ॥ ५ ॥

परिहृत्येति । अपानश्च ऊर्ध्ववृत्तित्वेन प्राणात्मकत्वात् खगाधिपत्याख्यां लभते । एवमूर्ध्वगमनाय प्रवृत्तोऽपानवायुः सोमसूर्यात्मकेडापिङ्गलामार्गौ परिहृत्य कमलमूलं सुषुम्नामूलम् उपविश्य ऊर्ध्वमुखं करोति ॥ ६ ॥

प्रतिभानमिति । खगेशेऽपानवायौ ब्रह्मणो भवनाभ्यन्तरं प्रविष्टे सन्ति अद्भुतम् आश्चर्यजनकं प्रतिभानं भवति वपुषः उदग्रा लघुता भवति ॥ ७ ॥

तडित्कोटिप्रख्यं सुरुचिजितकालानलरुचिम्
सहस्रादित्यांशुप्रकरसदृशोद्योतकलितम् ।
अमन्तं योन्यन्तः स्थुरदरुणबन्धूककुसुमप्रभं
कामं ध्यायेज्जठरशशभृत्कोटिशिखरम् ॥ ८ ॥

तस्योर्द्धेऽग्निशिखा चिरद्युतिलतापुञ्जप्रभाभास्वरा
सूक्ष्मा ब्रह्मपथान्तराम्बरगता चैतन्यमात्रा कला ।
एकीभूतमनन्तरं सह तथा ध्यायेद्धिया निश्चलम्
आत्मानञ्च निवातदीपनिभया हंसस्वरूपं बुधः ॥ ९ ॥

शक्तिः कुण्डलिनीति या निगदिता आईमसंज्ञा
जगन्निर्माणे सततोद्यता प्रविलसत्सौदामिनीसन्निभा ।
शङ्खावर्त्तनिभां प्रसुप्तभुजगाकारां जगन्मोहिनीम्
तन्मध्ये परिभावयेद्बिषलतातन्तूपमेयाकृतिम् ॥ १० ॥

तडित्कोटिप्रख्यमिति । कामशरीराग्नि ध्यायेत् । कीदृशं विद्युदग्रतुल्म् । स्वतेजसा पितिजा कालानलस्य रुचिर्येन नादृशं सहस्रसंख्यादित्यतेजः समूहतुल्येन उद्योतेन कलितं सम्बद्धं योन्यन्तराधारचक्रस्याभ्यन्तरे भासमानं बन्धूकशब्देन रक्तवर्णाभं शशभृल्लक्षशिशिरम् । एतेन साधकानामानन्दजनकत्वं बोध्यते । काममिति कामशब्दोरहस्यागमे शरीरवैश्वानरे रूढः । एवं तेजोमयं कामं स्वाधारगमनं भावयेत् । तथाचोक्तं रुद्रयामले--भ्रमं योनिगतं ध्यायेत् कामं बन्धूकसन्निभम् । ज्वलत्कालानलप्रख्यं तडित्कोटिसमप्रभम् । इति ॥ ८ ॥

तस्येति । तस्य कामराजाख्यजातवेदस उपरि शिखारूपातिसूक्ष्मा विद्युत्सहस्रसन्निभा चिद्रूपा या कला सा ब्रह्मेति । केचित्तु विद्युत्सहस्रसन्निभा चिद्रूपात्मकला निष्कला ध्येया इत्यनुषज्यते । परमहंसस्वरूपात्मानं तया कलया एकीकृत्य चिन्तयेदिति ॥ ९ ॥

हूङ्कारेण गुरूपदिष्टविधिना प्रोत्थाप्य सुप्तां ततः
कृत्वा तां कलया तया परमया चिद्रूपया सङ्गताम् ।
मायां कुण्डलिनीं समाहितमनास्तामुच्चरेत् कौशिकीम्
शक्तिं ब्रह्ममहापथेन सहितामाधारतः स्वात्मना ॥ ११ ॥
भित्त्वा लिङ्गत्रयमथ बुधो ब्रह्मनाड्येह चोर्ध्वम्
गच्छन्तीं तां कमलजपदात्प्रापयेदात्मशक्तिम् ।
व्योमाम्भोजप्रणयिपरमानन्दकन्दं विसर्गस्थानं
चन्द्रोपरि परिगलद्रक्तपीयूषधारम् ॥१२॥
पीत्वा कुलामृतरसं पुनरेव दिव्यम् मध्यं विशेदपघनस्यं समाहितात्मा।
यायात्कुलादकुलमेव पुनश्च मात्रायोगेन देशिकवरप्रतिपादितेन ।१३

शक्तिरिति तया कलया चिद्रूपा कला कुण्डलिनीशक्तिरिति कथिता पूर्वोक्तशिखामध्यगां परिभावयेत् । अन्तर्व्याप्य स्थितां ध्यायेदित्यर्थः ॥ १० ॥

उक्तमर्थं संक्षिप्य दर्शयति हूङ्कारेति । हूङ्कारेण मन्त्रसहितेन गुरूक्तप्रकारेण तां कुण्डलिनीं आधारकमले सुप्तमुत्थाप्य प्रबोध्य अनन्तरं तया परमया चैतन्यरूपया मिलितां कुण्डलिनीं मायां कुलं मूलाधारः तत्रस्थां शरीरस्य देवतां चिन्तयेत् । अकुल शिव इत्युक्तः कुलं शक्तिः प्रकीर्त्तिता । कौलं तेजो विकारः स्यादिति त्रितयनिर्णय इति ॥ ११ ॥

भित्त्वेति । अग्रे कथितं लिङ्गत्रयं विभिद्य ब्रह्मनाड्या सुषुम्नयां ब्रह्मणः स्थानादूर्ध्वं तां कुण्डलिनीं शक्तिम् आकाशाम्भोरुहप्रणयित्वम् आकाशाम्भोजस्थपरमानन्दस्थविसर्गस्थानं प्रापयेत् ध्यायेत् ॥ १२ ॥

पीत्वा कुलामृतरसमिति । एवं तां सहस्रारपर्यन्तं नीत्वा तत्रस्थं दिव्यं सुधारसं पीत्वा तेनैव मार्गेण विरोहक्रमेण अपघनस्य मध्यं कुलाख्यं योन्याधारं प्रापयेत् शरीरमध्यं मूलाधारमित्यर्थः । कथं ग्राहयेदित्याह मात्रायोगेन गुरूक्तमात्रायोगक्रमेण गतागतं विदधीत । मात्रातु -विन्दु-

सा शक्तिः सकलशरीरजीवभूता
प्राणोऽसाविति गदितात्र तन्त्रिमुख्यैः ।
उद्घातः स तु परिपठ्यते मुनीन्द्रैः
प्राणोऽन्तः स्पृशति यदा क्रमेण नीतः ॥ १४ ॥
अमुं स्वाधारस्थं प्रतिदिवसमभ्यासनिरतः
करोति श्रद्धावान् सततमवधूताखिलमलः ।
स मुक्तो दुःखौघैरगयतजराक्लेशमरणो
गुणग्रामोपेतः सुर इव चिरं जीवति भुवि ॥ १५ ॥
चतुर्विधा या कथितेह सृष्टिः प्रवर्त्तते सा सकलापि यस्याम् ।
प्रलीयते चापि जगत्समस्तं कालाग्निरुद्रादिशिवान्तमेतत् ॥१६॥
सेयं मयोक्ता खलु योनिमुद्रा बन्धस्तु देवैरपि दुर्लभः स्यात् ।
अनेन बन्धेन न साध्यते यन्नास्त्येव तत् साधकपुङ्गवस्य ॥ १७ ॥

नादस्तथा शक्तिर्मात्रात्रयमुदाहृतमिति । तथा हि मात्रापदेन पीठत्रयं विधीयते । आज्ञास्थानगतो विन्दुः तत्त्वाज्ञा प्रकाशकस्वरूपं पूर्णाख्यं पीठं तदुपरि ललाटमध्ये विन्द्वात्मकप्रकाशरूपस्य शिवात्मकस्फुरद्रूपनादात्मकस्य नादाख्यं द्वितीयं पीठं तदुपरि शिखा विश्वात्मिका शक्तिरूपं मया उक्ता खलु निश्चये अस्या मुद्राया बन्धनं देवैरपि दुर्लभञ्च । योनिमुद्राया अनेन बन्धनप्रकारेण यन्न साध्यते तदा स्मरणम् तथा सर्वमेवानया मुद्रया साध्यत इत्यर्थः । इयं का इह जगति या चतुःप्रकारा सृष्टिरुक्ता यस्यां प्रवर्त्तते यतो भवतीत्यर्थः । उद्भिदस्तरुगुल्माद्याः स्वेदजाः कृमिदशाद्याः जरायुजा मनुष्याद्याः अण्डजाः पक्षिसर्पादयः । केचित्तु शब्दसृष्टिः शब्दार्थसृष्टिः प्रकृतिपुरुषसृष्टिरिति मन्यते । अथवा नैयायिकमते पुरुषसृष्टिः सांख्यमते प्रकृतिपुरुषयोगात् पातञ्जमलते केवलप्रकृतेः मीमांसकमतेऽदृष्टादिति । चतुर्विधा सृष्टिः समस्तं जगदपि यस्यां कालाग्निरुद्रादिरूपां यस्यामेव लयं याति पूर्वोक्तध्यानविशेष एव मुद्रा ॥ १३-१७ ॥

छन्ना रुद्धाः स्तम्भिताः कीलिता ये सुप्ता मत्ता मूर्च्छिता हीनवीर्याः।
दग्धाः त्रस्ताः शत्रुपक्षस्थिता ये बाला वृद्धा गर्विता यौवनेन ।२८
ये निर्जीवा ये च सत्त्वेन हीनाः षण्डीभूताश्चाङ्गमन्त्रैर्विहीनाः ।
एते मुद्राबन्धनेनापि येऽन्ये मन्त्राः सर्वे वीर्यवन्तो भवन्ति ॥२९॥

छित्त्वेति । युग्मकम् । एते सर्वे मन्त्रा यानिमुद्राया ध्यानविशेषेण वीर्ययुक्ता भवन्ति एतंरुच्छिन्ना मनोर्यस्यादिमध्यान्ते स्वामिनं बीजमुच्यते । संयुक्तं वारियुक्तं वायुनाकान्तं त्रिधा पुनः । चतुर्धा पञ्चधा वाथ स मन्त्र श्छिन्नसंज्ञकः आदिमध्यावसानेषु भूबीजद्वन्द्वलांछितः रुद्धमन्त्रः स विज्ञेयो भुक्तिमुक्तिविवर्जितः । ये च कीलिताः-आदिमध्यावसानेषु हंसः प्रासाद-वाग्भवौ । हकारो बिन्दुवान् जीवो वाग्भवश्च चतुष्कलः । माया नामापि च पदं नास्ति यस्य स कीलितः । ये स्तम्भिताः । एकं मध्ये स्वयं मूर्ध्नि यस्मिन्निन्द्रपुरन्दरौ । न विद्यते स मन्त्रः स्यात् स्तम्भितः सिद्धिरोधनः । ये च सुप्ताः । त्रिवर्णो हंसहीनो यः स सुप्तश्च उदाहृतः । ये च मत्ताः । मन्त्रो वाप्यथवा विद्या सप्ताधिकदशाक्षरः । फट्कारः पञ्चाकादिर्यो मन्दोमत्त उदीरितः । ये च मूर्च्छिताः पञ्चधास्त्रं स्थितं मध्ये यस्य मन्त्रः स मूर्च्छितः । ये हीनवीर्याः । विरामस्थानगं यस्य हीनवीर्यः स कथ्यते । ये च दग्धाः । वह्निवायुसमायुक्तो यस्य मन्त्रस्य मूर्ध्वनि । सप्तधा दृश्यते तन्तु दग्धं मन्नीतमन्त्रवित् । ये च त्रस्ताः । अस्त्रं द्वाभ्यां त्रिभिः षड्भिरष्टा-भिर्दृश्यतेऽक्षरैः । स्तम्भः सोहऽभिहितो मन्त्रः । ये च शत्रुपक्षे स्थिताः । तारादिभिरननुकूलाः । ये च बालाः । सप्तार्णोमनुर्बालः । ये च वृद्धाः । त्रिंशद्वर्णश्चतुः षष्टिवर्णो मन्त्रः शताक्षरः । चतुःशताक्षरश्चापि वृद्ध इत्यभि-धीयते ॥ ये च युवानः । षोडशार्णो युवा प्रोक्तः । ये च जीवहीनाः । षष्ठाक्षरो जीवहीनः । ये च सत्त्वहीनाः । द्विवर्णः सत्त्वहीनः स्यात् । ये अङ्गहीनाः । षड्विंशत्यक्षरो मन्त्रः षट्त्रिंशद्वर्णकस्तथा । एकोनविंशद्वर्णो-

गुरुतल्पनिषेवणञ्च पानं द्विजहत्या मधुनः सुवर्णचौर्यम् ।
अमुना विलयं प्रयान्ति सम्यक् सकृदप्याचरितेन बन्धनेन ॥ २० ॥
स तु मन्त्रिवरः स एव योगी गुणसिद्धेः पदमास्थितः स एव ।
अमुना चरतीह बन्धनं यः सततं स्वोचितधर्मकर्मनिष्ठः ॥ २१ ॥
अमुना भवतीह देहभाजां सतताभ्यासकृतेन बन्धनेन
न जरा पितृराजवैजयन्ती न च मृत्युप्रतिपादिता च भीतिः ॥ २२ ॥
एतस्यैव हि बन्धनस्य मनुजः प्राप्नोति शश्वत्कृताद-
भ्यासादणिमादिसिद्धिमतुलां संवित्तिमप्यूर्जिताम् ।
योगञ्चाप्रतिमं जयञ्च मरुतः कालस्य वा वञ्चनम्
तद्विष्णोः परमं पदन्तु सततं पश्यन्ति यत्सूरयः ॥ २३ ॥

इति श्रीनागभट्टविरचिते त्रिपुरासारसमुच्चये चतुर्थः पटलः ॥

पंचमः पटलः

अथाधारपङ्केरुहाण्यत्र वक्ष्ये सुषुम्नान्तरस्थानि संक्षेपतोऽहम् ।
तदम्भोजपत्रस्थितांश्चापि देवांस्तदम्भोजवर्णान् षडाधारदेवीः ॥१॥

वाप्यङ्गहीन उदाहृतः । इत्यादिदोषदुष्टा अपि मन्त्रा अनेन ध्यानेन विशुद्धा भवन्तीत्यर्थः ॥ १८-१९ ॥

गुरुतल्पनिषेवणमिति । सकृदाचरितेनापि योनिमुद्राबन्धनेन पुरुषो महापातकान्मुक्तो भवतीत्यर्थः । अमुना इति । देहिनाम् अमुना योनिमुद्राबन्धनेन सर्वदा कृतेन ध्रुवा भवति । कीदृशी पितृराजस्य यमस्य बन्धनस्य सतताभ्यासात् मनुष्योऽणिमाद्यष्टविधगुणान् प्राप्नोति उत्तमां प्रतिपत्तिं ज्ञानञ्च प्राप्नोति । योगाभ्यासञ्च प्राप्नोति वायो विजयमाप्नोति कालस्य वा वञ्चनं सकलस्य च प्रेरणम् । वा स्यात् विकल्पोपमयोरेवार्थे च समुच्चये । विष्णोश्च तत्पदं स्थानं पश्यन्ति सूरयः ॥ २०-२३ ॥

इति त्रिपुरासारटीकायां पदार्थदर्शने चतुर्थः पटलः ।

अजग्रन्थिपद्मं पुरा यन्मयोक्तं तदाधारमाद्यं वदन्तीह शम्भुः ।
सुवर्णाभवर्णैश्चतुर्भिः समेतं दलैर्योगिगम्यं महाश्चर्यभूतम् ॥२॥
चतुर्ष्वब्जपत्रेषु देवीनिरुद्धान् जलाद्यब्धिवर्णात् न्यसेत्केवलान् वा ।
सबिन्दूनमन्दप्रभावान् समिद्धस्फुरज्ज्योतिषो डाकिनी देवतात्र ॥३
मूलाधरे सततं ध्यानयोगात् स्तम्भक्षोभावुत्प्लुतिर्दार्दुरीव ।
भूमित्यागः खेचरत्वं क्रमेण नृणामेते षड्गुणाः सम्भवन्ति ॥ ४ ॥

एवमधिकारिणामभ्युदयनिश्रेयसप्राप्त्युपायभूतां योनिमुद्रामुक्त्वा अनन्तरं षडाधारेषु योगविशेषान् वक्तुमुपक्रमते अथाधारपङ्केरुहाणीत्यादि । सुषुम्नान्तरस्थानीति या पूर्वोक्ता सुषुम्नान्तरेऽवस्थिता या चित्रा नाडी तदन्तर्मूलाधारादिषट्पर्वाणि सन्ति तान्येव षडाधाराणीत्यर्थः । तेषामम्भोजानां पत्रावस्थितान् देवान् ब्रह्मादीन् अम्भोजालौवर्णान् शुक्लादीन् अक्षराणि च आधारभूतान् षडदेवांश्च वक्ष्ये इति सम्बन्धः ॥ १ ॥

अम्भोजानि कथयति अजेति । योनिमुद्रारक्षणप्रकारेण यदुक्तं चतुर्दलात्मकं पद्मं तदेवाधारमाद्यं ते यागिनः देवीनिरुद्धान् जलाद्यब्धिवर्णान् वशषसान् पूर्वादिक्रमेण न्यसेत् जलेन्द्राग्निवायूनिति पाठे जलं वकारः इन्द्राग्निरिन्द्रद्वितीयं शकारः । एवमग्नेस्तृतीयं षकारः मध्यवर्ण उक्तः । एवं वायोर्यकारस्य चतुर्थो दन्त्यसकारः । तेन वं शं षं सं इति वर्णान् प्रथमाद्यं वीजं ततो वकारः तत आद्यं वीजं एवं क्रमेण चतुर्दलेषु चत्वारो वर्णा न्यस्तव्या इत्यर्थः । केवलान् वा केवलं विन्दुयुक्तं न्यसेत् । तत्र चतुर्दले डाकिनीरूपा देवी एतत्सकलप्रपञ्चमूलभूतत्वात् मूलाधारमिति योगिनो वदन्ति । अस्मिन् मूलाधारे ध्यानाचरणात् पुंसः स्तम्भक्षाभौभवतः । निष्क्रियत्वं भवति । उत्प्लुतिः उत्पतनं दर्दुरी दार्दुरो मण्डूकस्तत्सम्बन्धिनी प्लुतिरिति । यावत् भूमित्यागश्च भवति तदनु खेचरत्वं भवति । आकाशेऽपि स्वेच्छाविहारित्वं भवति क्रमेण एते षड्गुणा भवन्ति ॥ २-४ ॥

कान्तिप्रकर्षो वपुषोऽपि नादव्यक्तिः प्रदीप्तिर्जठरानलस्य ।
लघुत्वभङ्गस्य निजेन्द्रियाणां पटुत्वमारोग्यमदीनता च ॥ ५ ॥
कृत्वा मनोनिश्चलमूलचक्रमध्ये नराः केवलमादरेण ।
भूतं भवच्चापि भविष्यदर्थं वदन्ति शास्त्राण्यपि वा श्रुतानि ॥६॥
विहाय सद्यः कमलासनस्य वक्त्राम्बुजं प्रीतितरङ्गसङ्गात् ।
तदीयवक्त्राम्बुरुहोदरान्तः सरस्वती नृत्यति दिव्यरूपिणी ॥ ७ ॥
अधिगम्य रसेन्द्रमन्त्रसिद्धी अपि कालञ्च विजित्य दुर्निवारम् ।
अजरामरतामवाप्य चान्ते परमानन्दपदे मुदा रमन्ते ॥ ८ ॥

एकीभूतार्णवाम्भः प्लुतमखिलजगत्पूर्वमासीदपूर्व-
ज्योतिर्मूर्त्तिस्तदन्तर्महितमहिमभूर्लिङ्गरूपी बभूव ।

अन्यान् गुणान् दर्शयति कान्तीति । शरीरस्य कान्तेरुत्कर्षो भवति । नादव्यक्तिः नादो ध्वनिविशेषः । जठरानलस्य उद्दीपनः इन्द्रियाणां चतुरादीनामकपटत्वं भवति । योगिनो हि इन्द्रियासन्निकृष्टमप्यर्थं पश्यन्ति । नैरुज्यञ्च भवति दुःखराहित्यञ्च भवति एतत् सर्वं वायोर्धारणाद् भवति ॥५॥

अन्य दपि प्रयोजनं दर्शयति कृत्वेति । अत्रमूलचक्रमध्ये आधारकमले आदरेण मनः स्थिर कृत्वा भूत वर्त्तमानं भविष्यदपि वदन्ति । आतीतानागतान् बदन्ति अश्रुतान्यनधीतान्यपि शस्त्राणि वदन्ति व्याख्यान्ति ॥ ६ ॥

प्रयोजनान्तरमाह विहायेति । कमलासनस्य ब्रह्मणो मुखाम्बुजं प्रीतिरेव तरङ्गस्तत्सम्बन्धात् त्यक्त्वा तदीयवक्त्राम्बुरुहोदरान्ते वायुधारणात् कर्त्तुर्मुखाम्भोरुहाभ्यन्तरे दिव्यरूपा सरस्वती नृत्यति अभिरमति ॥ ७ ॥

प्रयोजनान्तरमाह अधिगम्येति । रसेन्द्रमन्त्रसिद्धी अधिगम्य दुर्निवारञ्च कालं जित्वा अजरामरतामवाप्य अवसानकाले परमानन्दपदे मोक्षपदे रमन्ते । तस्मान् स्थानयोगात् जीवन्मुक्तो भवति । अवसाने परमात्मनि लीनो भवतीत्यर्थः ॥ ८ ॥

षट्सिद्धाधिष्ठितात्मा सकलसुरनुतः षड्भिरास्यैरुपेतः
षड्भिः कोषैश्च देवो भवभयतिमिरध्वं सहंसो महेशः ॥ ९ ॥
आद्यं लिङ्गवपुर्भृतो भगवतो देवोहिरण्डोऽभव-
द्वाली पूर्वमुखं शिवस्य तु महाकालस्तदूर्द्धाननम् ।
वक्त्रं दक्षिणमाशुशुक्षणिरसौ देवः पिनाकी पुनः
पाश्चात्यं छगलाण्ड एष भगवान् वामास्यमस्याभवत् ॥१०॥
स्वाधिष्ठानसमाह्वयं रसदलमूले ध्वजस्याम्बुजम्
बालादित्यनिभं दलोपरिगतैः पृष्ठादितर्काक्षरैः ।
विन्दूद्भासितमस्तकैर्भगवतोलिङ्गात्मनः शूलिनः
स्थानं योगिवरेण्यगोचरमिदं चास्याधिपा राकिणी ॥११॥
इह स्वाधिष्ठाने निहितनिजचेतो लयवशा-
दमन्दानन्दौघस्तिमितहृदयः साधकवरः ।

एकीभूतेति । पूर्वमखिलं जगत् एकीभूतं समुद्राम्भःप्लुतमासीत् । तस्याभ्यन्तरे महेशो देवो लिङ्गरूपो वभूव कीदृशः अपूर्वज्योतिःस्वरूपः अपूर्वतेज एव लिङ्गरूपत्वेन परिणाममगमदित्यर्थः । कीदृशः षड्भिः सिद्धैर्हिरण्डादिभिरधिष्ठितात्मा तस्य लिङ्गवपुर्भृतो भगवत आद्यम् ऊर्ध्वं मुखं हिरण्यनामा सिद्धपुरुषः त्रातीत् । पूर्वमुखं वासी नामा ऊर्ध्वाननम् अधआननमित्यर्थः । दक्षिणं वायुः पिनाकी पश्चिमास्यं उत्तरं युगलगण्डः तथा आधारात्मा हिरण्डः स्वाधिष्ठानात्मा वासी मणिपूरात्मा महाकालः अनाहतात्मा वह्निः विशुद्धात्मा पिनाकी पाश्चात्मा छगलण्डः । तल्लिङ्गम् एषु स्थानेषु चिन्तनीयम् ॥ ९-१० ॥

स्वाधिष्ठानमिति तदूर्ध्वे रसदलैः स्वकुलैः पृष्ठादितर्काक्षरैः पृष्ठं वकारः तदादितः मयवलः एभिर्विन्दुभूषितमस्तकैः सविन्दुकैर्युक्तबालादित्यनिभं प्रातःकालीनसूर्यतुल्यम् अस्य चक्रस्याधिपा राकिणी ॥ ११ ॥

समेताङ्गोऽनङ्गः क्षितितलगतो वा मृगदृशाम्
स्मरस्मेरापाङ्गं रमयति गणं कान्तिकलितम् ॥ १२ ॥
इह वेत्ति निधाय मानसं स्वं विविधं चाश्रुतशास्त्रजालमुच्चैः
अवधूतजरामयः स मर्त्यः सुचिरं जीवति वीतमृत्युभीतिः ॥१३॥
वपुषोऽशुचिता जनस्य शश्वत् परमां शुद्धिमिहातनोति पुंसाम् ।
शरदम्बुजपेलवस्य देहे दृढरुद्धो घनताञ्च शीतरश्मिः ॥ १४ ॥
चलितं सहसा महारसेन्द्रं कमलालोकनतो वियत्सरोजात् ।
इह ये विनिधारयन्ति सन्तो ननु धीराः पुरुषोत्तमास्त एव ॥१५॥
मदधौतकटो महागजेन्द्रो वशतामेति यथा शनैरुपायात् ।
बलवानिह वै सुधाकरोऽसौ क्रमरुद्धः स्ववशो भवत्यवश्यम् ॥१६॥
एतस्मिन् कुलिशाब्जयोगनिरतादादौ लयो जायते
रागादिन्द्रियदन्तिनां लयवशात्संवित्तिरप्यूर्जिता ।
अन्तर्नीलमहारसद्रवजुषां नृणान्तु चेतो यदा
आविर्भावमुपैत्यमन्दसहजानन्दच्छलेन्दूदयः ॥ १७ ॥

इह किल समलक्ष्याणां नियमितमरुतां योगिनीकलातिशयं दर्शयति इह स्वाधिष्ठान इति । लयवशात् पद्मोदरनिवेशवशात् समेताङ्गोऽनङ्गः मृगदृशीगणं रमयति । तथा स्मर स्मेरापाङ्गं स्मरेण स्मरेमलपप्रकाशम् अपाङ्ग नेत्रयोरन्तं यस्य गणस्य तम् । तथा कान्त्या लावण्येन कलितं संरब्धम् ॥१२॥

विशेषफलमाह इहेति । विगतजरामयः स मर्त्यः इह पद्मे स्वं मानसं निधाय अर्पयित्वा अश्रुतशास्त्रसमूहं विविधं नानाप्रकारं वेत्ति वीतमृत्युभीतिः त्यक्तयमभयः । अन्यपद्मस्य दर्शनात् अशुचिता जनस्य शरीरस्य नित्यं शुद्धिं तनोति पुंसः शीतरश्मिः शुक्रः दृढबन्धः घनतां निविडतां यातीति शरदम्बुरुहवत् पेलवः सुन्दरः ॥ १३-१४ ॥

चलितमिति सहस्रदलाच्चलितं रसेन्द्रं शुक्रम् एतत्कमलालोकनतो ये विनिधारयन्ति ते पुरुषोत्तमाः एतत्पद्मभावनयोगशक्ताः ॥ १५-१६ ॥

नाभिस्थं मणिपूरकं दशदलैर्नीलाञ्जनाभैर्युतम्
तड्डाद्यैश्च दशाक्षरैर्दलगतैर्विन्दूल्लसन्मस्तकैः ।
लाकिन्या समधिष्ठितञ्च सततं ध्यानैर्नराः केवलम्
वश्याकर्षणनिर्विषीकरणपूःक्षोभादिकं कुर्वते ॥ १८ ॥
स्थानेऽस्मिन्निहितात्मनः सुकृतिनः पातालसिद्धिं पराम्
खड्गस्याप्रतिमस्य साधनमपि स्यादीप्सितञ्च क्षितौ ।
रूपं भूमिविसर्जनं परपुरे शक्तः प्रवेष्टुं जराहानिश्चा-
खिलदुःखरोगशमनं कालस्य वा वञ्चनम् ॥ १९ ॥
हृदये रसेन्द्रगोपसन्ध्याघनसिन्दूरसुवर्णमब्जम् ।
यदनाहतमित्युशन्ति सन्तो रविसंख्यैपरुपशोभितं दलैः ॥२०

एतस्मिन् कुलिशांचेति । तदेव योगः तस्मिन् रतात् रागादिन्द्रियदन्तिनां लयो भवति अतएव कुलिशत्वेन निरूपितम् । संवित्तः ऊर्जिता । अन्तर्नील-मिति । अन्तर्नीलं यन्महाबलं शुक्रं तदेव रसं तत्सेवितानां नृणां चेतो यदा आविर्भावं प्राप्नोति तदा अमन्दं महत् यत् सहजानन्दं तच्छलेन अविद्याध्वं साद्यभ्युदयात् इन्दुत्वेन निरूपितः ॥ १७ ॥

मणिपूरकमाह नाभिस्थमिति । नीलाञ्जनतुल्यैर्दशदलैर्युतम् इष्टैर्ड ढ ण त थ द ध न प फ एतैर्दलगतैः विन्दूल्लसन्मस्तकैः सविन्दुकैर्युक्तं लाकिन्या समधिष्ठितञ्च एतद्ध्यानात् वश्याकर्षणनिर्विषीकरणं परपुरक्षोभकरणं परपुर-प्रवेशं तिरस्करणी लुकीविद्या इति यस्य प्रसिद्धिः । ननु रत्नात् मणिपूरक-मिति वचनात् कथं नीलरत्नमिति चेत् नीलरत्नस्यापि रत्नत्वान्न दोषः । पातालसिद्धिः अधो विवरकरणं मृकजरादिना खड्गसाधनमपि तान् ईप्सितसाधनं रूपञ्च केचित् परपुरे मृतशरीरे प्रवेष्टुं शक्तिमिति वदन्ति ॥ १८-१९ ॥

अनाहतचक्रमाह हृदय इति । इन्द्रगोपो रक्तवर्णकीटविशेषः क्रोधीशाद्यैः

क्रोधीशाद्यैर्भैरवैर्भानुसंख्यैर्दण्डोपेतं मण्डितं चण्डवीर्यैः ।
तत् काकिन्याधिष्ठितं दिव्यशक्त्या देव्या हंसेनापि देवेन शश्वत् २१

एतस्मिन् सततं निविष्टमनसः स्थाने विमानस्थिताः
क्षुभ्यन्त्यद्भुतरूपकान्तिकलिता दिव्यस्त्रियो योगिनः ।
ज्ञानञ्चाप्रतिमं त्रिकालविषयं क्षोभः पुरस्य श्रुतिर्दूरादेव
च दर्शनञ्च खगतिः स्याद्योगिनां मेलनम् ॥ २२ ॥

विशुद्धाख्यं कण्ठे नलिनमथ धूम्रानलछवि-
युतं श्रीकण्ठादिस्वरपरिगतैः षोडशदलैः ।
इह स्थाने शाकिन्यतुलनिजशक्तिर्भगवती
स्थिता नित्यं देवी शरणगमनार्त्तिप्रशमनी ॥ २३ ॥

अभ्यासयोगादिह सन्निविष्टस्वान्तस्य शश्वन्नरपुङ्गवस्य ।
समर्थता स्यादनधीतशास्त्रसद्भावभावे वसुधातलेऽस्मिन् ॥ २४ ॥
स्थानेऽत्र संसक्तमना मनुष्यस्त्रिकालदर्शी विगताधिरोगः ।
जित्वा जरामञ्जननीलकेशः क्षितौ चिरं जीवति वीतमृत्युः ॥ २५ ॥

इह स्थाने चित्तं सततमवधायात्तपवनो
यदि क्रुद्धो योगी चलयति समस्तं त्रिभुवनम् ।
न च ब्रह्मा विष्णुर्न च हरिहरो नैव खमणि-
स्तदीयं सामर्थ्यं शमयितुमलं नापि गणपः ॥ २६ ॥

ककाराद्यैः ठकारान्तैः क ख ग घ ङ च छ ज झ ञ ट ठ इति क्रोधी-शद्वादशभैरवसहितैर्द्वादशाक्षरैर्युक्तं द्वादशदलात्मकं कर्णिकान्तर्गतं मूलमन्त्र-शक्त्या काकिन्या चाधिष्ठितं हंसेन चात्मना च दण्डोपेतैः सबिन्दुभिर्मण्डितम् ॥ २०-२१ ॥

एतस्मिन्निति । एतस्मिन् स्थाने निविष्टमनसो योगिनः । कर्तृभूताः विमानस्थिताः दिव्यस्त्रियः कर्मभूताः अद्भुतरूपकान्त्या कलितम् ।

आज्ञानाम भ्रूयुगमध्ये दलयुग्मोपेतं पद्मं शारदचन्द्रमयूखाभम्।
हाकिन्युक्तात्रापि च देवीदलयुग्मे वर्णावन्त्यौ बिन्दुयुतौ संस्मरणीयौ
ध्यानयोगनिरतस्य जायते पूर्वजन्मकृतकर्मणां स्मृतिः।
क्षेत्रबिन्दुनिलये च दूरतो दर्शनश्रवणयोः समर्थता ॥ २८ ॥
इह सन्निहितस्वचित्तवृत्तिः प्रतिमायाः प्रतिजल्पनं करोति।
गमनञ्च पुरे परेषां पुनरुत्थानमप्यहो मृतस्य ॥ २९ ॥

निरालम्बां मुद्रां निजगुरुमुखेनैव विदितामिह
स्थाने कृत्वा स्थिरनिशितधीः साधकवरः।
सदाभ्यासोऽपश्यत्यमरनिलयानन्तरखिलानुडु-
श्रेणीं विष्णोरपि पदमुडूनामपि पतिम् ॥ ३० ॥

अन्यञ्च त्रिकालविषयज्ञानञ्च अतुल्यं दुरात् श्रवणं दर्शनञ्च योगिनां सम्मेलनञ्च ॥ २२ ॥

विशुद्धचक्रमाह विशुद्धेति। श्रीकण्ठादिस्वरपरिगतैः आकारादिस्वरैर्दलपरिगतैर्युतं तद्यथा—अं आं इं उं ऊं ॠं ॠं लृं लॄं एं ऐं ओं औं अं अः इति षोडशस्वरैर्युक्तं धूमसमानवर्णं शाकिनीदेवताधिष्ठितं विशुद्धाख्यं पद्मं शरणगमनार्तिप्रशमनी जन्ममरणदुःखप्रशमनी अनधीतशास्त्रसद्भावे सद्भावत्वे इह स्थाने चित्तमेवावधाय अवधानं कृत्वा आत्तपवनो गृहीतपवनो योगी ॥ २३-२६ ॥

आज्ञाचक्रमाह आज्ञानामेति। दलयुग्मोपेतं द्विदलयुक्तं अन्त्यौ वर्णौ हकारक्षकारौ एतदुक्तं भवति भ्रुवोर्मध्ये सबिन्दुकाभ्यां हकारक्षकाराभ्यां युक्तं द्विदलात्मकं शरदम्बुजसङ्काशं हाकिनीदेवताधिष्ठितम् आज्ञाकमलं मृतस्य पुनरावृत्तिर्न विद्यते जन्माभावात् ॥ २७-२९ ॥

निरालम्बामिति। इह बिन्दुनिलये आज्ञास्थाने निरालम्बां खेचरीं मुद्रां बद्ध्वा अमरनिलयः स्वर्गः तदूर्ध्वम् अखिलाम् उडुश्रेणीं नक्षत्रश्रेणीं पश्यति विष्णोः पदमाकाशम्। अद्धां प्रभुं सूर्यम् उल्लासिचिल्लियुगलं भ्रूयुगलम्।

ब्रह्माणं सुरवृन्दवन्दितपदद्वन्द्वं मुकुन्दं तथा
देवं देवनिकायनायमपि प्रेताधिपं वारिपम् ।
अह्नां वह्निमपि प्रभुञ्च पवनं ताक्ष्यञ्च यक्षेश्वरम्
गन्धर्वानपि किन्नरानपि गुणैः सिद्धान्प्रसिद्धानपि ॥३१॥
यक्षान् राक्षसपुङ्गवानपि मुनीन्दिव्यांश्च भव्याकृतीनन्तः
कान्तिकलाकलापकलितान्विद्याधरान्मातृकाम् ।
रक्षोत्तुङ्गतरङ्गसङ्गतजलां स्वर्लोककल्लोलिनीम्
योगी पश्यति शश्वदञ्चितरुचिं तत्रापि हेमाचलम् ॥३२॥
उत्तुङ्गपीवरपयोधरभारनम्रकम्राङ्गमङ्गजमतङ्गजमन्दयातम् ।
उल्लासिचिल्लियुगलं चकितैणशावलोलेक्षणं विसरमप्सरसां तथैव
समुत्तुङ्गैः शृङ्गैः स्थगितगगनाभोगककुभो
लसन्नानारत्नाकलितकटकान्भूधरवरान् ।
कुरङ्गैः सारङ्गैरपि च रमणीयां वनभुवम्
तथा गुर्वीमुर्वीं महितविविधक्षेत्रसहिताम् ॥ ३४ ॥
तरङ्गैरुत्तुङ्गैरहिमकरमातङ्गनिकरैः
करालानाभीरैरपि जलधरैर्भूधरवरैः ।
तथा पारावारानमलसरितो वारिभरिताः
सहंसालीमालीमपि च सरसां सारसजुषाम् ॥३५॥
लसन्मरालं वककोटिमालं ताडित्करालान्तरवारिलीनम् ।
कलापिकान्तं सधवानुकूलं प्रवासिकालं नवमेघजालम् ॥३६॥

अप्सरसः विसरं समूहं पश्यति भूधरानपि पश्यति तान् कीदृशान् बृहच्छृङ्गैः स्थगितं गगनमण्डलं दिक् च यैस्तान् । कुरङ्गादिभी रमणीयां वनभुवञ्च पश्यति । मतङ्गोऽत्र जलहस्ती सरसां आलीं समूहं मरालं राजहंसम् । वककोटिः वकं इति मयूरप्रियकालं प्रीतिजनकत्वात् । सधवाः पतिसहिताः तासाम् अनुकूलं प्रवासिकालं प्रवासिनीनां कालं यमस्वरूपं नवमेघजालं नूतनमेघ-

एतस्मिन्परमाद्भुताव्ययमहानन्दैककन्दे परे
स्थानेमानसमात्मनः स्थिरमतिः संयोजयेन्मुद्रया ।
योगी तन्मयतामुपैति शहकैश्चेतो निरालम्बया
पश्चान्नैजमहासुखं लयवशादाविर्भवत्यन्तरम् ॥ ३७ ॥
लीने चेतसि तत्र बिन्दुनिलये वह्नेरिवादौ कला
दृश्यन्ते तदनन्तरञ्च विलसद्रूपाः प्रदीपांकुराः ।
बालस्येव दिवाकरस्य बहलद्योतिस्ततो द्योतते
यद्वा भूगगनान्तरालविलसज्ज्योत्स्नासपत्नं महः ॥ ३८ ॥
नित्यानन्द इति श्रियः पतिरिति श्रीवासुदेवः पुमान्
आत्मेत्यच्युत इत्यचिन्त्यमहिमा यो गीयते योगिभिः ।
स्थानेऽस्मिन् परमेश एष भगवान् व्यक्तो भवत्यव्ययः
साक्षी राहुरिवाम्बरान्तरगतश्चन्द्रार्कयोर्मण्डले ॥ ३९ ॥

समूहो यत्र तं कीदृशम् इति तडित्करालान्तरवारिलीनं तडिता सौदामिन्या करालं भयानकं यदन्तर्वारि तत्र लीनं निमग्नम् ॥ ३०-३६ ॥

एतस्मिन्निति । परमम् अद्भुतम् अव्ययं यन्महानन्दं तस्यैककन्दे मूलस्वरूपे परे स्थाने आत्मनो मानसं मुद्रया निरालम्बया स्थापयेत् । तदा योगी तन्मयतां ब्रह्ममयताम् उपैति । वाकारऽ समुच्चये । इति निरालम्बया मुद्रया निजं महासुखं ब्रह्मानन्दसुखम् अन्तरं अन्तर्गतं लयवशादाविर्भवति प्रकाशते । अस्मिन् चेतसि लीने सति आदौ वह्नेः किरणस्था लिङ्गा दृश्यन्ते । तदनन्तरञ्च प्रदीपांकुराः अपरश्च बालस्य सूर्यस्य उद्योतः प्रकाशः ततो द्योतते प्रकाशते । यद्वा तन्महस्तेजः प्रकाशते आविर्भवति कीदृशम् आकाशमध्ये विलसत् यत् ज्योत्स्नारश्मयस्तत्तुल्यम् । अस्मिन् स्थाने अव्ययः परमेश्वरः साक्षाद्व्यक्तः साक्षिस्वरूपो भवति ॥ ३७-३८ ॥

स एव क इत्याह नित्यानन्द इत्यादि । यथा अम्बरान्तरगतो राहुश्च-न्द्रार्कयोर्मण्डले इति दृष्टान्तच्छलेन पिङ्गलायाश्चन्द्रसूर्यात्मकत्वात् ।

विश्वस्यायतनं महद्भगवतः स्थाने तदेतत्परम्
यत्रारोप्य समीरणं सुकृतिनः प्राणप्रयाणे नराः।
दीव्यन्तं परमं पुराणपुरुषं वेदान्तवेद्यं कविम्
विश्वाद्यं प्रविशन्ति सन्ततमहानन्दैककन्दं विभुम् ॥ ४० ॥
सहस्रारपद्मं विसर्गादधस्तादधो वक्त्रामारक्तकिञ्जल्कपुञ्जम्।
कुरङ्गेण हीनस्त्रिश्टङ्गस्तदन्तः स्फुरद्रश्मिजालः सुधांशुः समास्ते
तदन्तर्गतं ब्रह्मरन्ध्रं सुसूक्ष्मं यदाधारभूतं सुषुम्नाख्यनाड्याः।
मानसश्च तथोपांशोः सहस्रगुण उच्यते ॥ २२ ॥

वाचिकोपांशुरिति । संधिश्छान्दसः ॥ २१ ॥ २२ ॥

उच्चैर्जपस्तु सर्वेषां यथोक्तफलदो भवेत् ॥
नीचैः श्रुतो न चेत्सोऽपि श्रुतश्चेन्निष्फलो भवेत् ॥ २३ ॥

उच्चैर्जपादुपांशुजपः फलेन सहस्रगुण उक्त[1] उच्चैर्जपस्तु कियत्फल इत्यत आह—उच्चैर्जपस्तु सर्वेषामिति । यो मन्त्रजपो यावतः[2] फलस्य साधनत्वेन शास्त्रे कथितः स तावत्फलस्तत्सहस्रगुणस्तन्मन्त्रोपांशुजप इत्यर्थः । उच्चैर्जपोऽपि यथा नीचैर्म्लेच्छैर्न श्रूयते तथाऽरण्यादौ विविक्तदेशे क्रियते चेदुक्तफलो भवति । प्रमादात्तैः श्रुतश्चेत्तस्य[3] यथोक्तमपि फलं नास्तीत्याह—नीचैरिति ॥ २३ ॥

ऋषिं छन्दोऽधिदैवं च ध्यायमानो जपेन्नरः ॥
प्रसन्नगुरुणा पूर्वमुपदिष्टं त्वनुज्ञया ॥ २४ ॥

दशमं नियमव्रतमाह—प्रसन्नेति । प्रतिबन्धकपापनिरासद्वारा चित्तशुद्धये पुण्योपचयद्वारा फलानुकूल्याय च गुर्वनुज्ञया क्रियमाणमुपवासादिकं व्रतमित्यर्थः ॥ २४ ॥

धर्मार्थमात्मशुद्ध्यर्थमुपायग्रहणं व्रतम् ॥
अथवाऽऽथर्वणैर्मन्त्रैर्गृहीत्वा भस्म पाण्डुरम् ॥ २५ ॥

---

१ क. ख. ग. घ. 'गुणोऽस्तूक्त'। २ ङ. यावत्फल'। ३ घ. श्रुतस्यैतस्य

व्रतशब्दस्यार्थान्तरमाह—अथवेति ॥ २५ ॥

सर्वाङ्गोद्धूलनं यत्तद्व्रतं प्रोक्तं मनीषिभिः ॥
एतद्वेदशिरोनिष्ठाः प्राहुः पाशुपतं मुने ॥ २६ ॥

एतद्वेदेति । अथर्वशिरसि—"अग्निरित्यादिना भस्म गृहीत्वा निमृज्याङ्गानि संस्पृशेद्व्रतमेतत्पाशुपतम्" इत्युक्तमित्यर्थः ॥ २६ ॥

केचिच्छिरोव्रतं प्राहुः केचिदत्याश्रमं विदुः ॥
केचित्तद्व्रतमित्यूचुः केचिच्छांभवमैश्वरम् ॥ २७ ॥

व्रतपदस्य मतभेदेनार्थान्तराण्याह—केचिदिति । "शिरोव्रतं विधिवद्यैस्तु चीर्णम्" इत्याथर्वणिका आहुरित्यर्थः । केचिदिति । "अत्याश्रमिभ्यः परमं पवित्रम्" इति श्वेताश्वतरशाखिनो व्यवहरन्तीत्यर्थः । व्रतं नाम शांभवमित्यन्ये, ऐश्वरमित्यपरे कथयन्तीत्यर्थः । अथवा यथोक्तपाशुपतव्रतमेव शिरोव्रतात्याश्रमशांभवैश्वरशब्दैराथर्वणिकादिभिरभिधीयत इत्यर्थः ॥ २७ ॥

अस्य व्रतस्य माहात्म्यमागमान्तेषु संस्थितम् ॥
सर्वपापहरं पुण्यं सम्यग्ज्ञानप्रकाशकम् ॥ २८ ॥

आगमान्तेष्वपरेष्वपि बहुषु वेदान्तेषु ॥ २८ ॥

यः पशुस्तत्पशुत्वं च व्रतेनानेन न त्यजेत् ॥
तं हत्वा न स पापीयानिति वेदान्तनिश्चयः ॥ २९ ॥

यः पशुरिति । सुकरसर्वभोगोपकरणं परमपुरुषार्थसाधनं चैतत्पाशुपतव्रतम् । अमुना व्रतेन यः पशुः स्वात्मनः पशुत्वं न जहाति स आत्मघातकत्वादाततायी । अतः—

"आततायिवधे दोषो हन्तुर्नास्त्येव कश्चन"

इति वेदविदः स्मरन्तीत्यर्थः ॥ २९ ॥

सर्वमुक्तं समानेन नियमं मुनिसत्तम ॥
अनेन विधिना युक्तो भस्मज्योतिर्भविष्यति ॥ ३० ॥

---

१ ग. 'त्याद्याश्र' । २ ङ. 'मान्तरेषु । ३ च. 'नान्येन' ।

इति श्रीस्कन्दपुराणे सूतसंहितायां ज्ञानयोगखण्डे नियमविधिकथनं नाम चतुर्दशोऽध्यायः ॥ १४ ॥

भस्मज्योतिरिति । भस्मैवोक्तरीत्या तत्त्वावबोधहेतुत्वाज्ज्योतिर्यस्य स तथोक्तः ॥ ३० ॥

इति श्रीसूतसंहितातात्पर्यदीपिकायां ज्ञानयोगखण्डे नियमविधिकथनं नाम चतुर्दशोऽध्यायः ॥ १४ ॥

(अथ पञ्चदशोऽध्यायः)

ईश्वर उवाच—

आसनानि पृथग्वक्ष्ये शृणु वाचस्पतेऽधुना ॥
स्वस्तिकं गोमुखं पद्मं वीरं सिंहासनं तथा ॥ १ ॥
भद्रं मुक्तासनं चैव मयूरासनमेव च ॥
सुखासनसमाख्यं च नवमं मुनिपुंगव ॥ २ ॥

यमनियमानुक्त्वा क्रमप्राप्तमासनं बृहस्पतिं प्रति वक्तुमीश्वरः प्रतिजानीते—आसनानीति । तानि नव तावदुद्दिशति—स्वस्तिकमिति ॥ १ ॥ २ ॥

जानूर्वोरन्तरे विप्र कृत्वा पादतले उभे ॥
समग्रीवशिरस्कस्य स्वस्तिकं परिचक्षते ॥ ३ ॥

स्वस्तिकस्य लक्षणमाह—जानूर्वोरिति । दक्षिणजानूरुमध्ये वामपादतलं वामजानूरुमध्ये दक्षिणपादतलं च विन्यस्य ऋजुकाय उपविशेदेतत्स्वस्तिकासनमित्यर्थः ॥ ३ ॥

सव्ये दक्षिणगुल्फं तु पृष्ठपार्श्वे निवेशयेत् ॥
दक्षिणेऽपि तथा सव्यं गोमुखं तत्प्रचक्षते ॥ ४ ॥

सव्ये वामे तस्मिन्पृष्ठपार्श्वे दक्षिणगुल्फं दक्षिणे च पृष्ठपार्श्वे सव्यं वामं विन्यसेदेतद्गोमुखासनम् ॥ ४ ॥

---

१ घ. °नि ता° । २ घ. ङ. वामगुल्फं वि° ।

अङ्गुष्ठावपि गृह्णीयाद्धस्ताभ्यां व्युत्क्रमेण तु ॥
ऊर्वोरुपरि विप्रेन्द्र कृत्वा पादतलद्वयम् ॥
पद्मासनं भवेदेतत्पापरोगभयापहम् ॥ ५ ॥

अङ्गुष्ठावपीति । दक्षिणस्योरोरुपरि वामपादतलं विन्यस्य तदीयमङ्गुष्ठं पश्चिमपथा गतेन वामहस्तेन गृह्णीयात् । एवं वामस्योरोरुपरि न्यस्तस्य दक्षिणपादतलस्याङ्गुष्ठं पश्चिमपथा गतेन दक्षिणहस्तेनेत्येतत्पद्मासनमुक्तफलमित्यर्थः ॥ ५ ॥

दक्षिणोत्तरपादं तु सव्य ऊरुणि विन्यसेत् ॥
ऋजुकायः सुखासीनो वीरासनमुदाहृतम् ॥ ६ ॥

दक्षिणमुत्तरपादं नाम पादाग्रं सव्ये वाम ऊरौ विन्यसेत् । एतच्चोपलक्षणम् । सव्यं वामं दक्षिण ऊरावेतद्वीरासनमित्यर्थः । दक्षिणोत्तरपादं तु दक्षिणोरुणि विन्यसेदिति पाठान्तरम् । आगमे चोभयमुक्तम्—ऊर्वोरुपरि कुर्वीत पादौ वीरं चेति ॥ ६ ॥

गुल्फौ च वृषणस्याधः सीवन्याः पार्श्वयोः क्षिपेत् ॥
दक्षिणं सव्यगुल्फेन वामं दक्षिणगुल्फतः ॥ ७ ॥
हस्तौ च जान्वोः संस्थाप्य स्वाङ्गुलीश्च प्रसार्य च ॥
नासाग्रं च निरीक्षेत भवेत्सिंहासनं हि तत् ॥ ८ ॥

सीवन्या वामपार्श्वे दक्षिणगुल्फं दक्षिणपार्श्वे च वामगुल्फं प्रसारिताङ्गुलिहस्तौ जानुमूर्ध्नोर्विन्यस्य नासाग्रदर्शनं सिंहासनम् ॥ ७ ॥ ८ ॥

गुल्फौ च वृषणस्याधः सीवन्याः पार्श्वयोः क्षिपेत् ॥९॥
पार्श्वपादौ च पाणिभ्यां दृढं बद्ध्वा सुनिश्चलः ॥
भद्रासनं भवेदेतद्विषरोगविनाशनम् ॥ १० ॥

भद्रासनमाह—गुल्फौ चेति । सीवन्या वामपार्श्वे वामगुल्फो दक्षिणपार्श्वे दक्षिणगुल्फो यथा भवति तथा पादतले परस्पराभिमुखे सीवन्या अधस्ताद्विनिवेश्य दक्षिणोरुं दक्षिणपाणिना वामोरुं च वामपाणिना सम्यङ्निष्पीड्यावस्थानं भद्रासनमित्यर्थः ॥ ९ ॥ १० ॥

---

१ घ. 'दं वामपादा' । २ क. ङ. निरीक्षेत ।

निपीड्य सीवनीं सूक्ष्मां दक्षिणोत्तरगुल्फतः ॥
वामं याम्येन गुल्फेन मुक्तासनमिदं भवेत् ॥ ११ ॥
मेढ्रोपरि विनिक्षिप्य सव्यगुल्फं ततोपरि ॥
गुल्फान्तरं च संक्षिप्य मुक्तासनमिदं भवेत् ॥ १२ ॥

सीवन्या अधस्ताद्वामो गुल्फस्तस्याधस्ताद्दक्षिणः । अथवा मेढ्रस्योपरि सव्यो गुल्फस्तस्योपरि दक्षिण इति द्वेधा मुक्तासनमित्याह—निपीड्य सीवनीमिति ॥ ११ ॥ १२ ॥

कूर्पराग्रौ मुनिश्रेष्ठ निःक्षिपेन्नाभिपार्श्वयोः ॥
भूम्यां पाणितलद्वंद्वं निःक्षिप्यैकाग्रमानसः ॥ १३ ॥
समुन्नतशिरःपादो दण्डवद्व्योम्नि संस्थितः ॥
मयूरासनमेतत्स्यात्सर्वपापप्रणाशनम् ॥ १४ ॥

कूर्पराग्राविति । तथा चाऽऽगमे—

"भुवि पाणितले कृत्वा कूर्परौ नाभिपार्श्वगौ ।
समुन्नतशिरःपादं दण्डवद्व्योमसंश्रयम् ॥
कुर्याद्देहमिति प्रोक्तं मायूरं पापनाशनम्" इति ॥ १३ ॥ १४ ॥

येन केन प्रकारेण सुखं धैर्यं च जायते ॥
तत्सुखासनमित्युक्तमशक्तस्तत्समाश्रयेत् ॥ १५ ॥

येन केनेति । तथा च पातञ्जलं सूत्रम्—"स्थिरसुखमासनम्" इति ॥ १५ ॥

आसनं विजितं येन जितं तेन जगत्त्रयम् ॥
आसनं सकलं प्रोक्तं मुने वेदविदां वर ॥ १६ ॥

जगत्त्रयमिति । आसनजयस्य चित्तैकाग्र्यहेतुत्वात् । शीतोष्णादिद्वंद्वैरनुपघाताच्च । आह पतञ्जलिः—"ततो द्वंद्वानभिघातः" इति ॥ १६ ॥

अनेन विधिना युक्तः प्राणायामं सदा कुरु ॥ १७ ॥

इति श्रीस्कन्दपुराणे सूतसंहितायां ज्ञानयोगखण्डे आसनविधिनिरूपणं नाम पञ्चदशोऽध्यायः ॥ १५ ॥

---

१ ग. ङ. वामेन । २ ग. पादतल° । ३ ङ. सफलं ।

अनेनेति । आसनवतैव हि प्राणायामः कर्तव्य इत्याह—विधिनेति । श्वासप्रश्वासयोर्गतिविच्छेदः प्राणायाम इति ॥ १७ ॥

इति श्रीसूतसंहितातात्पर्यदीपिकायां ज्ञानयोगखण्डे, आसनविधिनिरूपणं नाम पञ्चदशोऽध्यायः ॥ १५ ॥

(अथ षोडशोऽध्यायः)

ईश्वर उवाच—

अथातः संप्रवक्ष्यामि प्राणायामं यथाविधि ॥
प्राणायाम इति प्रोक्तो रेचपूरककुम्भकैः ॥ १ ॥
वर्णत्रयात्मकाः प्रोक्ता रेचपूरककुम्भकाः ॥
स एव प्रणवः प्रोक्तः प्राणायामश्च तन्मयः ॥ २ ॥

यतो जितासनस्यैव प्राणायामो निरुपद्रवः सिध्यति, अतस्तदनन्तरं तत्प्रतिजानीते । अथात इति ॥ १ ॥ २ ॥

इडया वायुमाकृष्य पूरयित्वोदरस्थितम् ॥
शनैः षोडशभिर्मात्रैरकारं तत्र संस्मरेत् ॥ ३ ॥

उक्तं वर्णात्मकत्वं विवृणोति—इडयेति । मात्रैर्मात्राभिः । तल्लक्षणमुक्तम्—

'कालेन यावता स्वीयो हस्तः स्वजानुमण्डलम् ।
पर्येति मात्रा सा तुल्या स्वयैकश्वासमात्रया' इति ।

अकारं ब्रह्मात्मकम् ॥ ३ ॥

पूरितं धारयेत्पश्चाच्चतुःषष्ट्या तु मात्रया ॥
उकारमूर्तिमत्रापि संस्मरन्प्रणवं जपेत् ॥ ४ ॥
यावद्वा शक्यते तावद्धारयञ्जपसंयुतम् ॥
पूरितं रेचयेत्पश्चान्मकारेणानिलं बुधः ॥ ५ ॥
शनैः पिङ्गलया विप्र द्वात्रिंशन्मात्रया पुनः ॥
प्राणायामो भवेदेष ततश्चैवं समभ्यसेत् ॥ ६ ॥

१ क. °सनिःश्वा° । २ घ. °त्रादिभिः । ३ ग. घ. °र्तिमात्रा° ।

उकारमूर्तिं विष्णुमूर्तिम् ॥ ४ ॥ ५ ॥ ६ ॥

पुनः पिङ्गलयाऽऽपूर्य मात्रैः षोडशभिस्तथा ॥
मकारमूर्तिमत्रापि स्मरेदेकाग्रमानसः ॥ ७ ॥
धारयेत्पूरितं विद्वान्प्रणवं विंशतिद्वयम् ॥
जपेदत्र स्मरेन्मूर्तिमुकाराख्यां तु वैष्णवीम् ॥ ८ ॥
अकारं तु स्मरेत्पश्चाद्रेचयेदिडयाऽनिलम् ॥
एवमेव पुनः कुर्यादिडयाऽऽपूर्य बुद्धिमान् ॥ ९ ॥

मकारमूर्तिं रुद्रम् ॥ ७ ॥ ८ ॥ ९ ॥

एवं समभ्यसेन्नित्यं प्राणायामं यतीश्वरः ॥
अथवा प्राणमारोप्य पूरयित्वोदरस्थितम् ॥ १० ॥
प्रणवेन समायुक्तां व्याहृतीभिश्च संयुताम् ॥
गायत्रीं संजपेच्छुद्धः प्राणसंयमने त्रयम् ॥ ११ ॥
पुनश्चैवं त्रिभिः कुर्याद्गृहस्थश्च त्रिसंधिषु ॥
ब्रह्मचर्याश्रमस्थानां वनस्थानां महामुने ॥ १२ ॥

प्रणवव्याहृतिपूर्विकां गायत्रीं वा कुम्भके जपित्वेत्याह—अथवेति ॥१०॥ ॥ ११ ॥ १२ ॥

प्राणायामो विकल्पेन प्रोक्तो वेदान्तवेदिभिः ॥
द्विजवत्क्षत्रियस्योक्तः प्राणायामो महामुने ॥ १३ ॥

विकल्पेनेति । उक्तविकल्पेनेत्यर्थः । क्षत्रियवैश्ययोरपि वैदिकमन्त्राधिकाराद्विप्रवदेव प्रणवगायत्रीभ्यां प्राणायाम इत्याह—द्विजवदिति ॥ १३ ॥

विरक्तानां प्रबुद्धानां वैश्यानां च तथैव च ॥
शूद्राणां च तथा स्त्रीणां प्राणसंयमनं मुने ॥ १४ ॥
नमोन्तं शिवमन्त्रं वा वैष्णवं वा न चान्यथा ॥
नित्यमेवं प्रकुर्वीत प्राणायामांस्तु षोडश ॥ १५ ॥

---

१ ङ. 'कारं वि' । २ ग. घ. 'र्तिमात्रा' । ३ ख. तु ।

ब्रह्महत्यादिभिः पापैर्मुच्यते मासमात्रतः ॥
षण्मासाभ्यासतो विप्रा वेदनेच्छामवाप्नुयात् ॥१६॥

शूद्राणामिति। वेदानधिकारात् ॥ १४ ॥ १५ ॥ १६ ॥

वत्सराद्ब्रह्म विद्वान्स्यात्तस्मान्नित्यं समभ्यसेत् ॥
योगाभ्यासरतो नित्यं स्वधर्मनिरतश्च यः ॥ १७ ॥
प्राणसंयमनेनैव ज्ञानान्मुक्तो भविष्यति ॥
बाह्यादापूरणं वायोरुदरे पूरको हि सः ॥ १८ ॥
संपूर्णकुम्भवद्वायोर्धारणं कुम्भको भवेत् ॥
बहिर्विरेचनं वायोरुदराद्रेचकः स्मृतः ॥ १९ ॥
प्रस्वेदजनको यस्तु प्राणायामेषु सोऽधमः ॥
कम्पनं मध्यमं विद्यादुत्थानं चोत्तमं तथा ॥२०॥
पूर्वं पूर्वं प्रकुर्वीत यावदुत्तमसंभवः ॥
संभवत्युत्तमे प्राज्ञः प्राणायामे सुखी भवेत् ॥ २१ ॥

योगाभ्यासेति। यः स्वधर्मनिरतः सन्योगाभ्यासरतो भवति तस्य प्राणायाम एवोक्तरीत्या ज्ञानद्वारा मोक्षसाधनमित्यर्थः ॥ १७ ॥ १८ ॥ १९ ॥ ॥ २० ॥ २१ ॥

प्राणायामेन चित्तं तु शुद्धं भवति सुव्रत ॥
चित्ते शुद्धे मनः साक्षात्प्रत्यग्ज्योतिष्यवस्थितम् ॥२२॥
प्राणश्चित्तेन संयुक्तः परमात्मनि तिष्ठति ॥
प्राणायामपरस्यास्य पुरुषस्य महात्मनः ॥ २३ ॥

प्राणायामेन चित्तमिति। आह—पतञ्जलिः "ततः क्षीयते प्रकाशावरणं धारणासु योग्यता मनसः" इति ॥ २२ ॥ २३ ॥

देहश्चोत्तिष्ठते तेन किंचिज्ज्ञानाद्विमुक्तता ॥
रेचकं पूरकं मुक्त्वा कुम्भकं नित्यमभ्यसेत् ॥ २४ ॥

---

१ घ. 'साभ्यासतो विप्र वे' ।

सर्वपापविनिर्मुक्तः सम्यग्ज्ञानमवाप्नुयात् ॥
मनोजयत्वमाप्नोति पलितादि च नश्यति ॥ २५ ॥
प्राणायामैकनिष्ठस्य न किंचिदपि दुर्लभम् ॥
तस्मात्सर्वप्रयत्नेन प्राणायामं समभ्यसेत् ॥ २६ ॥
विनियोगान्प्रवक्ष्यामि प्राणायामस्य सुव्रत ॥
संध्ययोर्ब्राह्मकाले वा मध्याह्ने वाऽथवा सदा ॥ २७ ॥

किंचिज्ज्ञानादिति। प्राणायामो हि सत्त्वशुद्धिं जनयति। तया ज्ञानं भवति। श्रूयते हि—"ज्ञानप्रसादेन विशुद्धसत्त्वस्ततस्तु तं पश्यते निष्कलं ध्यायमानः" इति ॥ २४ ॥ २५ ॥ २६ ॥ २७ ॥

बाह्यप्राणं समाकृष्य पूरयित्वोदरेऽनघ ॥
नासाग्रे नाभिमध्ये च पादाङ्गुष्ठे च धारयेत् ॥ २८ ॥

नासाग्रं नाभिमध्यं पादाङ्गुष्ठं च चिन्तयतस्तत्र चित्तं धृतं भवति तेन च प्राणो जीयत इत्यर्थः। एतद्योगप्रकारः सविशेषमन्यत्रोक्तः—

"इडया वायुमाकृष्य पूरयित्वोदरे दृढम् ।
वामाङ्घ्र्यङ्गुष्ठके नाभौ नासाग्रे धारयेत्स्थिरम् ॥
पुनः पिङ्गलयाऽऽपूर्य दक्षाङ्घ्र्यङ्गुष्ठकेऽनिलम् ।
नाभौ नासाग्रके प्राग्वद्धारयेद्ध्यानसंयुतः ॥
पुटाभ्यामथवा वायुं पूरितं धारयेत्स्थिरम् ।
अनेनाभ्यासयोगेन प्राणवायुर्जितो भवेत्' इति ॥ २८॥

सर्वरोगविनिर्मुक्तो जीवेद्वर्षशतं नरः ॥
नासाग्रधारणाद्वायुर्जितो भवति सुव्रत ॥ २९ ॥
सर्वरोगविनाशः स्यान्नाभिमध्ये च धारणात् ॥
शरीरलघुता विप्र पादाङ्गुष्ठनिरोधनात् ॥ ३० ॥
जिह्वया वायुमाकृष्य यः पिबेत्सततं नरः ॥
श्रमदाहविनिर्मुक्तो भवेन्नीरोगतामियात् ॥ ३१ ॥

धारणात्रयस्य पृथक्फलमाह—नासाग्रेति ॥ २९ ॥ ३० ॥ ३१ ॥

जिह्वया वायुमाकृष्य जिह्वामूले निरोधयेत् ॥
पिबेदमृतमव्यग्रं सकलं सुखमाप्नुयात् ॥ ३२ ॥
इडया वायु माकृष्य भ्रुवोर्मध्ये निरोधयेत् ॥
यः पिबेदमृतं शुद्धं व्याधिभिर्मुच्यते हि सः ॥ ३३ ॥
इडया वेदतत्त्वज्ञ तथा पिङ्गलयाऽपि च ॥
नाभौ निरोधयेत्तेन व्याधिभिर्मुच्यते नरः ॥ ३४ ॥

जिह्वामूले निरोधयेच्चित्तं धारयेत् । तमेवात्यन्तशीतलममृतमयं वायुमव्यग्रं शनैः पिबेत् ॥ ३२ ॥ ३३ ॥ ३४ ॥

मासमात्रं त्रिसंध्यायां जिह्वयाऽऽरोप्य मारुतम् ॥
अमृतं च पिबेन्नाभौ मन्दं मन्दं निरोधयेत् ॥ ३५ ॥
वातपित्तादिजा दोषा नश्यन्त्येव न संशयः ॥
नाडीभ्यां वायुमाकृष्य नेत्रद्वंद्वे निरोधयेत् ॥ ३६ ॥
नेत्ररोगा विनश्यन्ति तथा श्रोत्रनिरोधनात् ॥
तथा वायुं समारोप्य धारयेच्छिरसि स्थिरम् ॥ ३७ ॥

जिह्वयाऽऽरोप्येति । जिह्वाग्रसंस्पर्शी यथा वायुर्भवति तथा काकचञ्चुवदोष्ठौ कृत्वा मन्दं मन्दं पवनमाकर्षन्नाभौ चित्तं धारयेदित्यर्थः ॥ ३५ ॥ ३६ ॥ ३७ ॥

शिरोरोगा विनश्यन्ति सत्यमुक्तं बृहस्पते ॥
स्वस्तिकासनमास्थाय समाहितमनास्तथा ॥ ३८ ॥

संमुखीकरणयोगमाह—स्वस्तिकासनमित्यादि ॥ ३८ ॥

अपानमूर्ध्वमाकृष्य प्रणवेन शनैः शनैः ॥
हस्ताभ्यां बन्धयेत्सम्यक्कर्णादिकरणानि वै ॥ ३९ ॥

ऊर्ध्वमाकृष्याऽऽकुञ्च्य शनैः शनैः । त्वरया हि कृते नाड्यन्तरप्रविष्टः पवनो व्यथयेत् ॥ ३९ ॥

अङ्गुष्ठाभ्यामुभे श्रोत्रे तर्जनीभ्यां तु चक्षुषी ॥
नासापुटावथान्याभ्यां प्रच्छाद्य करणानि वै ॥ ४० ॥

---

१ ख. °या पुनः ॥ ना° । २ ग. घ. ङ. वायुपि° । ३ ग. °माकृष्य नाभौ ।

आनन्दाविर्भवं यावत्तावन्मूर्धनि धारयेत् ॥
प्राणः प्रयात्यनेनैव ब्रह्मरन्ध्रं महामुने ॥ ४१ ॥

वामदक्षिणहस्ताङ्गुष्ठाभ्यां श्रोत्रे । तर्जनीभ्यां चक्षुषी । मध्यमाभ्यां च नासापुटौ च निरुध्य यावदानन्दाविर्भावो भवति तावद्ब्रह्मरन्ध्रे चित्तं धारयतः प्राणः सुषुम्नां प्रविशतीत्यर्थः ॥ ४० ॥ ४१ ॥

ब्रह्मरन्ध्रे गते वायौ नादश्चोत्पद्यतेऽनघ ॥
शङ्खध्वनिनिभश्चाऽऽदौ मध्ये मेघध्वनिर्यथा ॥४२॥
शिरोमध्यगते वायौ गिरिप्रस्रवणं यथा ॥
पश्चाच्चित्तं महाप्राज्ञ साक्षादात्मोन्मुखं भवेत् ॥४३॥

नादश्चोत्पद्यत इति । तद्भेदा हंसोपनिषदि दशधा कथिताः । चिणीति प्रथमः । चिणिचिणीति द्वितीयः । घण्टानादस्तृतीयः । शङ्खनादश्चतुर्थः । पञ्चमस्तन्त्रीनादः । षष्ठस्तालनादः । सप्तमो वेणुनादः । अष्टमो भेरीनादः । नवमो मृदङ्गनादः । दशमो मेघनाद इति ॥ ४२ ॥ ४३ ॥

पुनस्तज्ज्ञाननिष्पत्तिस्तया संसारनिह्नुतिः ॥
दक्षिणोत्तरगुल्फेन सीवनीं पीडयेच्छिराम् ॥ ४४ ॥
सव्येतरेण गुल्फेन पीडयेद्बुद्धिमान्नरः ॥
जान्वोरधःस्थितं संधिं स्मृत्वा देवं च त्र्यम्बकम् ॥४५॥
विनायकं च संस्मृत्य तथा वागीश्वरीं पुनः ॥
लिङ्गनालात्समाकृष्य वायुमव्यग्रतो मुने ॥ ४६ ॥
प्रणवेनाग्नियुक्तेन बिन्दुयुक्तेन बुद्धिमान् ॥
मूलाधारस्य विप्रेन्द्र मध्यमे तु निरोधयेत् ॥ ४७ ॥
निरुद्धवायुना दीप्तो वह्निर्दहति कुण्डलीम् ॥
पुनः सुषुम्नया वायुर्वह्निना सह गच्छति ॥ ४८ ॥
एव मभ्यसतस्तस्य जितो वायुर्भवेद्ध्रुवम् ॥
प्रस्वेदः प्रथमः पश्चात्कम्पनं मुनिसत्तम ॥ ४९ ॥

---

१ ङ. धापयेत् । २ घ. 'श्चासौ म' । ३ ग. 'धने ॥ ४७ ॥

उत्थानं च शरीरस्य चिह्नमेतज्जितेऽनिले ॥
एवमभ्यसतस्तस्य मूलरोगो विनश्यति ॥ ५० ॥
भगंदरं च नष्टं स्यात्तथाऽन्ये व्याधयो मुने ॥
पातकानि विनश्यन्ति क्षुद्राणि च महान्ति च ॥५१॥

उत्कर्षप्राणायाममाह—दक्षिणोत्तरेति । वामेन गुल्फेन पीडयित्वा जान्वोरधः स्थितं तमेव वामगुल्फसंधिं दक्षिणगुल्फेन पीडयित्वा शिवविनायकवागीशान्स्मरल्लिँङ्गनालं समाकृष्य निरुद्धस्य पवनस्य नाड्यन्तरप्रवेशपरिहारार्थमाकुञ्चितोल्वणबन्धं कृत्वा रेफबिन्दुयुक्तं प्रणवमनुस्मरन्मूलाधारपवनं निरोधयेत् । मूलाधाराकुञ्चनलक्षणं मूलबन्धं कुर्यादित्यर्थः ।

अयमुत्कर्षप्राणायामयोग आगमे सविशेषो दर्शितः—

"अथोत्कर्षाभिधानस्य प्राणायामस्य संयमः ।
इडाधः सीवनीं सूक्ष्मां पीडयेद्वामगुल्फतः ॥
तद्गुल्फोपरि निक्षिप्य दक्षगुल्फं समं स्थिरम् ।
जङ्घोरुसंधिं निच्छिद्रां बद्ध्वाऽऽसीत समाहितः ॥
मूलाधारे चतुष्पत्रे रक्तकिञ्जल्कशोभिते ।
मनसा प्रणवं ध्यायन्दक्षगुल्फं विलोकयन् ॥
यावन्मनोलयस्तस्मिंस्तावद्वायुं निरोधयेत् ।
अपानोऽनेन योगेन वह्निस्थानं व्रजेत्तदा ॥
आग्नेये मण्डले रक्ते त्रिकोणे देहधारकः ।
वैश्वानरो वसत्यग्निरन्नपानादिपाचकः ॥
अपानमग्निना सार्धं प्राणं तत्रैव निश्चलम् ।
धारयेत्प्रणवं ध्यायन्यावदग्निर्जितो भवेत् ॥
जातेऽग्निविजये सम्यगूर्ध्वं तद्वह्निमण्डलात् ।
कन्दनाभेरधस्ताच्च स्वाधिष्ठाने च षड्दले ॥
प्राणापानौ समारोप्य निश्चलं वह्निना सह ।
नाभिं विलोकयन्दृष्ट्या मनसा प्रणवं स्मरन् ॥
यावन्मनोलयस्तस्मिंस्तावद्वायुं निरोधयेत् ।
ततोऽग्निनाऽभ्यावर्तेन प्रबोधं याति कुण्डली ॥

---

१ ग. ङ. 'तेऽनले । २ ग. 'थाऽन्या व्या' ।

प्रबुद्धा कुण्डली कन्दनाभिरन्ध्रात्फणं स्वकम् ।
अपाकरोति तेनैतत्सुषुम्नामूलरन्ध्रकम् ॥
विवृतं भवति क्षिप्रं तस्मिन्वायुं प्रपूरयेत् ।
शनैः साग्निं सुषुम्नायामा मूर्ध्नः प्रणवं स्मरेत् ॥
धारयेन्मारुतं साग्निं सुषुम्नारन्ध्रमूर्धनि ।
मरुताऽऽपूरिते देहे सुसर्वाङ्गे सवह्निना ॥
तदात्मा दृश्यते मूर्ध्नि यथाऽऽकाशे प्रभाकरः" इति ॥ ४४ ॥

॥ ४५ ॥ ४६ ॥ ४७ ॥ ४८ ॥ ४९ ॥ ५० ॥ ५१ ॥

नष्टे पापे विशुद्धं स्याच्चित्तदर्पणमुत्तमम् ॥
पुनर्ब्रह्मादिलोकेभ्यो वैराग्यं जायते हृदि ॥ ५२ ॥

अनेन योगेन न केवलमारोग्यं किंतु समाधानं ज्ञानमप्यपवर्गफलं भवतीत्याह—पुनर्ब्रह्मादीति ॥ ५२ ॥

विरक्तस्य तु संसाराज्ज्ञानं कैवल्यसाधनम् ॥
तेन पाशापहानिः स्याज्ज्ञात्वा देवमिति श्रुतिः॥५३॥
अहो ज्ञानामृतं मुक्त्वा मायया परिमोहिताः ॥
परिभ्रमन्ति संसारे सदाऽसारे नराधमाः ॥ ५४ ॥

ज्ञात्वा देवमिति ।

"ज्ञात्वा देवं सर्वपाशापहानिः क्षीणैः क्लेशैर्जन्ममृत्युप्रहाणिः"

इति श्वेताश्वतरोपनिषदित्यर्थः ॥ ५३ ॥ ५४ ॥

ज्ञानामृतरसो येन सकृदास्वादितो भवेत् ॥
स सर्वकार्यमुत्सृज्य तत्रैव परिधावति ॥ ५५ ॥
ज्ञानामृतरसः प्रायस्तेन नाऽऽस्वादितो भवेत् ॥
यो वाऽन्यत्रापि रमते तद्विहायैव दुर्मतिः ॥ ५६ ॥

असारसंसारपरिभ्रमणं ज्ञानामृतरसापरिज्ञानादित्युक्तम् । तत्परिज्ञानवतस्तु तद्विरहमाह—ज्ञानामृतेति ॥ ५५ ॥ ५६ ॥

ज्ञानस्वरूपमेवाऽऽहुर्जगदेतद्विचक्षणाः ॥
अर्थस्वरूपमज्ञानात्पश्यन्त्यन्ये कुदृष्टयः ॥ ५७ ॥

---

१ ग. 'येन्मरुतः सा' ।

यज्ञैर्देवत्वमाप्नोति तपोभिर्ब्रह्मणः पदम् ॥
दानैर्भोगानवाप्नोति ज्ञानाद्ब्रह्माधिगच्छति ॥ ५८ ॥

चराचरजगज्जातस्य परशिवपरिकल्पितत्वेन वस्तुतस्तन्मयतां तत्त्वविदः पश्यन्तीत्याह—ज्ञानस्वरूपमिति। "सद्धीदं सर्वं सत्सदिति। चिद्धीदं सर्वं काशते काशते च" इति तापनीयश्रुतिः। ज्ञानात्पृथगर्थस्य पारमार्थिकत्वाभिमानस्त्वविद्यैकनिबन्धन इत्याह—अर्थेति ॥ ५७ ॥ ५८ ॥

कर्मणा केचिदिच्छन्ति कैवल्यं मुनिसत्तम ॥
ते मूढा मुनिशार्दूल प्लवा ह्येत इति श्रुतिः ॥ ५९ ॥
आत्मैवेदं जगत्सर्वमिति जानन्ति पण्डिताः ॥
अज्ञानेनाऽऽवृता मर्त्या न विजानन्ति शंकरम् ॥६०॥
अज्ञानपाशबद्धत्वादमुक्तः पुरुषः स्मृतः ॥
ज्ञानात्तस्य निवृत्तिः स्यात्प्रकाशात्तमसो यथा ॥६१॥

प्लवा ह्येत इति ॥

"प्लवा ह्येते अदृढा यज्ञरूपा अष्टादशोक्तमवरं येषु कर्म।
एतच्छ्रेयो येऽभिनन्दन्ति मूढा जरामृत्युं ते पुनरेवापियन्ति"

इति मुण्डकश्रुतिरपवर्गस्य कर्मसाध्यतां प्रतिक्षिपतीत्यर्थः॥५९॥६०॥६१॥

आत्मस्वरूपविज्ञानादज्ञानस्य परीक्षया ॥
क्षीणेऽज्ञाने महाप्राज्ञ रागादीनां परिक्षयः ॥ ६२ ॥
रागाद्यसंभवे प्राज्ञ पुण्यपापोपमर्दनम् ॥
तयोर्नाशे शरीरेण न पुनः संप्रयुज्यते ॥ ६३ ॥
अशरीरो महानात्मा सुखदुःखैर्न बाध्यते ॥
क्लेशमुक्तः प्रसन्नात्मा मुक्त इत्युच्यते बुधैः ॥ ६४ ॥
तस्मादज्ञानमूलानि सर्वदुःखानि देहिनाम् ॥
ज्ञानेनैव निवृत्तिः स्यादज्ञानस्य न कर्मभिः ॥ ६५ ॥
नास्ति ज्ञानात्परं किंचित्पवित्रं पापनाशनम् ॥
तदभ्यासादृते नास्ति संसारच्छेदकारणम् ॥ ६६ ॥

ज्ञानान्मिथ्याज्ञाननिवृत्तौ तन्निबन्धनरागाद्यभावेन धर्माधर्मप्रवृत्तिविरहे तदुभयफलभोगनिमित्तस्य शरीरपरिग्रहस्याभावाद्दुःखात्यन्तनिवृत्तिरपवर्गो भवतीत्याह--आत्मस्वरूपेति। तथा च गौतमसूत्रम्—"दुःखजन्मप्रवृत्तिदोषमिथ्याज्ञानानामुत्तरोत्तरापाये तदनन्तरापायादपवर्गः" इति ॥ ६२ ॥ ६३ ॥ ॥ ६४ ॥ ६५ ॥ ६६ ॥

सर्वमुक्तं समासेन तव स्नेहान्महामुने ॥
गोपनीयं त्वयैवैष वेदान्तार्थो महामुने ॥ ६७ ॥

इति श्रीस्कन्दपुराणे सूतसंहितायां ज्ञानयोगखण्डे प्राणायामविधिनिरूपणं नाम षोडशोऽध्यायः ॥ १६ ॥

गोपनीयमिति। ज्ञानस्यैव हेतुत्वं कर्मणामहेतुत्वं च यद्यपि सकलवेदान्तार्थस्तथाऽपि मूर्खेषु न प्रकाशनीयम्।

"न बुद्धिभेदं जनयेदज्ञानां कर्मसङ्गिनाम्।
जोषयेत्सर्वकर्माणि विद्वान्युक्तः समाचरन्"

इति गीतासु भगवतोक्तमित्यर्थः ॥ ६७ ॥

इति श्रीसूतसंहितातात्पर्यदीपिकायां ज्ञानयोगखण्डे प्राणायामविधिनिरूपणं नाम षोडशोऽध्यायः ॥ १६ ॥

(अथ सप्तदशोऽध्यायः)

ईश्वर उवाच—

अथातः संप्रवक्ष्यामि प्रत्याहारं महामुने ॥
इन्द्रियाणां विचरतां विषयेषु स्वभावतः ॥ १ ॥

यतो जितप्राणस्यैवेन्द्रियनियमनहेतुप्रत्याहारसंभवः, अतस्तदनन्तरं स उच्यत इत्याह—अथात इति। लक्षणमाह—इन्द्रियाणामिति। आह—पतञ्जलिः—"स्वविषयासंप्रयोगे चित्तस्वरूपानुकार इवेन्द्रियाणां प्रत्याहारः" इति ॥ १ ॥

---

१ ख. घ. 'नीयस्त्वयै'। २ ख. 'नीय इति। ३ घ. 'संयो'।

बलादाहरणं तेषां प्रत्याहारः स उच्यते ॥
यद्यत्पश्यति तत्सर्वं ब्रह्म पश्येत्समाहितः ॥ २ ॥

ज्ञेयप्रपञ्चस्य सर्वस्य ज्ञानादव्यतिरेकानुसंधानमिन्द्रियनियमनादपि प्रशस्तः प्रत्याहार इत्याह—यद्यदिति ।

"ब्रह्मैवेदममृतं पुरस्ताद्ब्रह्म पश्चाद्ब्रह्म दक्षिणतश्चोत्तरेण ।
अधश्चोर्ध्वं च प्रसृतं ब्रह्मैवेदं विश्वमिदं वरिष्ठम्"

इति हि मुण्डकोपनिषत् ॥ २ ॥

प्रत्याहारो भवत्येष ब्रह्मविद्भिः पुरोदितः ॥
यदि शुद्धमशुद्धं वा करोत्यामरणान्तिकम् ॥ ३ ॥

सर्वव्यापारजातस्य ब्रह्मणि समर्पणलक्षणमपरं प्रत्याहारमाह—यदि शुद्धमिति ।

"यत्करोषि यदश्नासि यज्जुहोषि ददासि यत् ।
यत्तपस्यसि कौन्तेय तत्कुरुष्व मदर्पणम् ॥
शुभाशुभफलैरेवं मोक्ष्यसे कर्मबन्धनैः"

इति हि गीतासु ॥ ३ ॥

तत्सर्वं ब्रह्मणे कुर्यात्प्रत्याहारोऽयमुच्यते ॥
अथवा नित्यकर्माणि ब्रह्माराधनबुद्धितः ॥ ४ ॥

निषिद्धानि वर्जयित्वा नित्यानां काम्यानां च फलानभिसंधानेन भगवदाराधनबुद्ध्याऽनुष्ठानलक्षणमपरं प्रत्याहारमाह—अथवा नित्येति ॥ ४ ॥

काम्यानि च तथा कुर्यात्प्रत्याहारः स उच्यते ॥
अथवा वायुमाकृष्य तत्तत्स्थाने निरोधयेत् ॥ ५ ॥

दन्तमूलात्पादाङ्गुष्ठपर्यन्तं प्राणस्यापकर्षणरूपमपरं प्रत्याहारमाह—अथवा वायुमिति । पूर्वस्थानादपरं स्थानं प्रति वायुमाकृष्यैकैकत्र स्थाने यावदखिलोऽपि प्राण आगत्य स्थिरो भवति तावच्चित्तं धारयेत् । अनन्तरमवस्थानान्तरं नयेदित्यर्थः ॥ ५ ॥

---

१ घ. प्रसृतं । ङ प्रसिद्धं । २ ङ. ततः । ३ ग. घ. °व्य स्थानात्स्थानं नि° । ङ. °व्य स्थानान्तरस्थं नि° । ४ घ. °कस्था° । ५ घ. °रमेव स्था° ।

दन्तमूलात्तथा कण्ठे कण्ठादुरसि मारुतम् ॥
उरोदेशात्समाकृष्य नाभिकन्दे निरोधयेत् ॥ ६ ॥
नाभिकन्दात्समाकृष्य कुण्डल्यां तु निरोधयेत् ॥
कुण्डलीदेशतो विद्वान्मूलाधारे निरोधयेत् ॥ ७ ॥
तथाऽपाने कटिद्वंद्वे तथोरुद्वयमध्यमे ॥
तथा जानुद्वये जङ्घे पादाङ्गुष्ठे निरोधयेत्[1] ॥ ८ ॥

तानि धारणास्थानान्यवरोहेणाऽऽह—दन्तमूलादिति ॥ ६ ॥ ७ ॥ ८ ॥

प्रत्याहारोऽयमित्युक्तः प्रत्याहारपरैः पुरा ॥
एवमभ्यासयुक्तस्य पुरुषस्य महात्मनः ॥ ९ ॥

प्रत्याहारोऽयमिति । दन्तमूलमारभ्योक्तस्थानक्रमेण प्राणस्य पादाङ्गुष्ठप्रत्याहरणं प्रत्याहारः ॥ ९ ॥

सर्वपापानि नश्यन्ति भवरोगाश्च सुव्रत ॥
अथवा तव वक्ष्यामि प्रत्याहारान्तरं मुने ॥ १० ॥
नाडीभ्यां वायुमाकृष्य निश्चलः स्वस्तिकासनः ॥
पूरयेदनिलं विद्वानापादतलमस्तकम् ॥ ११ ॥
पश्चात्पादद्वये तद्वन्मूलाधारे तथैव च ॥
नाभिकंदे च हृन्मध्ये कण्ठकूपे च तालुके ॥ १२ ॥
भ्रुवोर्मध्ये ललाटे च तथा मूर्धनि रोधयेत् ॥
अकारं च तथोकारं मकारं च तथैव च ॥ १३ ॥
नकारं च मकारं च शिकारं च वकारकम् ॥
यकारं च तथोङ्कारं जपेद्बुद्धिमतां वर ॥ १४ ॥

पवनस्य पादद्वयमारभ्याऽऽरोहरूपं प्रत्याहारान्तरमाह—अथवा तवेति । पादद्वयादिस्थाननवके पूर्वपूर्वस्थानजयानन्तरमुत्तरोत्तरस्थानक्रमेणाकारादिवर्णनवकेन सह चित्तस्य धारणमित्यर्थः । एष च पवनधारणरूपः प्रत्याहार आगमे दर्शितः—

1 क. ख. ग. घ. धारयेत् ।

"चित्तात्म्यैकपधृतस्य प्राणस्य स्थानसंहतिः स्थानात् ।
प्रत्याहारो ज्ञेयश्चैतन्ययुतस्य सम्यगनिलस्य" इति ।

धारणास्थानानि तु तत्र कानिचिदधिकानि—

"अङ्गुष्ठगुल्फजानुद्वितयानि गुदं च सीवनी मेढ्रम् ।
नाभिर्हृदयं ग्रीवासलम्बिकाग्रं तथैव नासा च ।
भ्रूमध्यललाटाग्रं सुषुम्नाद्वादशान्तमित्येवम् ॥
उत्क्रान्तौ परकायप्रवेशने चाऽऽगतौ पुनः स्वतनौ ॥
स्थानानि धारणायाः प्रोक्तानि मरुत्प्रयोगविधिनिपुणैः"

इति ॥ १० ॥ ११ ॥ १२ ॥ १३ ॥ १४ ॥

प्रत्याहारोऽयमित्युक्तः पण्डितैः पण्डितोत्तम ॥
अथवा मुनिशार्दूल प्रत्याहारं वदामि ते ॥ १५ ॥

विषयादिभ्यः प्रत्याहृत्य बुद्धेरात्मनि धारणरूपं प्रत्याहारान्तरमाह—अथवा मुनिशार्दूलेति ॥ १५ ॥

देहाद्यात्ममतिं विद्वान्समाकृष्य समाहितः ॥
आत्मनाऽऽत्मनि निर्द्वंद्वे निर्विकल्पे निरोधयेत् ॥ १६ ॥
प्रत्याहारः समाख्यातः साक्षाद्वेदान्तवेदिभिः ॥
एवमभ्यसतस्तस्य न किंचिदपि दुर्लभम् ॥ १७ ॥

आत्मना बुद्ध्या ॥ १६ ॥ १७ ॥

तस्य पुण्यं च पापं च नहि सत्यं बृहस्पते ॥
अयं ब्रह्मविदां श्रेष्ठः साक्षाद्देवेश्वरः पुमान् ॥ १८ ॥

तस्य पुण्यं चेति । पापवद्भोगकारणं पुण्यमपि संसारावहतया हेयमेव । "तदा विद्वान्पुण्यपापे विधूय निरञ्जनः परमं साम्यमुपैति" इति मुण्डकश्रुतिः ॥ १८ ॥

प्रत्याहारः समाख्यातः संक्षेपेण महामुने ॥
गोपनीयस्त्वया नित्यं गुह्याद्गुह्यतरो ह्ययम् ॥ १९ ॥

इति श्रीस्कन्दपुराणे सूतसंहितायां ज्ञानयोगखण्डे प्रत्याहारविधाननिरूपणं नाम सप्तदशोऽध्यायः ॥ १७ ॥

गुह्यात्पवनप्रत्याहारादपि विमर्शरूपस्य प्रत्याहारस्य विशेषमाह—गोपनीय इति ॥ १९ ॥

इति श्रीसूतसंहितातात्पर्यदीपिकायां ज्ञानयोगखण्डे प्रत्याहारविधाननिरूपणं नाम सप्तदशोऽध्यायः ॥ १७ ॥

(अथाष्टादशोऽध्यायः)

ईश्वर उवाच—

अथातः संप्रवक्ष्यामि धारणाः पञ्च सुव्रत ॥
देहमध्यगते व्योम्नि बाह्याकाशं तु धारयेत् ॥ १ ॥
प्राणे बाह्यानिलं तद्वज्ज्वलने चाग्निमौदरे ॥
तोयं तोयांशके भूमिं भूमिभागे महामुने ॥ २ ॥
हयवरलकाराख्यं मन्त्रमुच्चारयेत्क्रमात् ॥
धारणैषा मया प्रोक्ता सर्वपापविशोधिनी ॥ ३ ॥

यतः प्रत्याहारेण वशीकृतस्य चित्तस्य धारणासु योग्यता, अतस्तदनन्तरं ता उच्यन्त इति प्रतिजानीते—अथात इति । तत्र शरीरान्तर्वर्तिषु वियदादिषु[4] हयवरलवर्णैर्भूतबीजैः सह बाह्यविषयादितादात्म्येन बुद्धिर्धारयितव्या । एषा च धारणा सह फलेन श्वेताश्वतरोपनिषदि वर्णिता—

"पृथ्व्यप्तेजोनिलखे समुत्थिते पञ्चात्मके योगगुणे प्रवृत्ते ।
न तस्य रोगो न जरा न मृत्युः प्राप्तस्य योगाग्निमयं शरीरम्" इति
॥ १ ॥ २ ॥ ३ ॥

जान्वन्तः पृथिवीभागो ह्यपां पाय्वन्त उच्यते ॥
हृदयान्तस्तथाऽग्न्यंशो भ्रूमध्यान्तोऽनिलांशकः ॥४॥
आकाशान्तस्तथा प्राज्ञ मूर्धान्तः परिकीर्तितः ॥
ब्रह्माणं पृथिवीभागे विष्णुं तोयांशके तथा ॥ ५ ॥

---

१ घ. हयरवल॰ । २ ग. ॰शोषिणी ॥ ३ ॥ ३ घ. हयरवल॰ । ४ ख. ॰वियदादि॰ । ५ ख. क. ॰ध्यांशोऽनि॰ ।

उक्तानां वियदादीनां शरीरे धारणावस्थानविशेषात्सह तत्तद्देवताभिराह—जान्वन्त इति ॥ ४ ॥ ५ ॥

अग्न्यंशे च महेशानमीश्वरं चानिलांशके ॥
आकाशांशे महाप्राज्ञ धारयेत्तु सदाशिवम् ॥ ६ ॥

महेशानं रुद्रं पञ्चधा विभक्तेषु पादादिषु शरीरप्रदेशेषु पृथिव्यादिपञ्चभूतात्मकतां तेषु च ब्रह्मविष्णुरुद्रेश्वरसदाशिवरूपतां च सदा भावयेदित्यर्थः ॥६॥

अथवा तव वक्ष्यामि धारणां मुनिपुंगव ॥
मनसीन्दुं दिशः श्रोत्रे क्रान्ते विष्णुं बले हरिम् ॥७॥

अथवा तवेति। मनःप्रभृत्याध्यात्मिकशरीरभागेषु चन्द्रादीन्याधिदैविकरूपाणि तादात्म्येन भावयेत्। क्रान्ते क्रमणेनोपलक्षिते पादे। हरिमिन्द्रम् ॥७॥

वाच्यग्निं मित्रमुत्सर्गे तथोपस्थे प्रजापतिम् ॥
त्वचि वायुं तथा नेत्रे सूर्यमूर्तिं तथैव च ॥ ८ ॥

उत्सृजत्यनेनेत्युत्सर्गोऽपानं तत्र ॥ ८ ॥

जिह्वायां वरुणं घ्राणे भूमिदेवीं तथैव च ॥
पुरुषे सर्वशास्तारं बोधानन्दमयं शिवम् ॥ ९ ॥
धारयेद्बुद्धिमान्नित्यं सर्वपापविशुद्धये ॥
एषा च धारणा प्रोक्ता[1] योगशास्त्रार्थवेदिभिः ॥ १० ॥

पुरुषे जीवे। सर्वशास्तारं परमात्मानम्। "अन्तः प्रविष्टः शास्ता जनानां सर्वात्मा" इति श्रुतेः ॥ ९ ॥ १० ॥

ब्रह्मादिकार्यरूपाणि स्वे स्वे संहृत्य कारणे ॥
सर्वकारणमव्यक्तमनिरूप्यमचेतनम् ॥ ११ ॥
साक्षादात्मनि संपूर्णे धारयेत्प्रयतो नरः ॥
धारणैषा परा प्रोक्ता धार्मिकैर्वेदपारगैः ॥ १२ ॥

धारणान्तरमाह—ब्रह्मादीति। ब्रह्मादीनामपि[2] चिदंशाः स्वस्वकारणपरंपरया मायायां लीयन्ते। माया च परमात्मनि। ब्रह्मादयस्तु परमात्मरूपेणैव न्यवति-

---

१ ग. °क्ता वेदशा°। २ क. ख. ग. °मपि°।

ष्ठन्त इति भावयेदित्यर्थः । अव्यक्तमनभिव्यक्तम् । नामरूपानिरूप्यमनिर्वचनीयम् । अचेतनं जडम् ॥ ११ ॥ १२ ॥

इन्द्रियाणि समाहृत्य मनसाऽऽत्मनि धारयेत् ॥
कंचित्कालं महाप्राज्ञ धारणैषा च पूजिता ॥ १३ ॥

धारणान्तरमाह—इन्द्रियाणीति । मनसैव विषयेभ्य इन्द्रियाणि व्यावृत्य मन आत्मनि धारयेदित्यर्थः । इयं च कठवल्लीषु सविशेषं दर्शिता—
"यच्छेद्वाङ्मनसी प्राज्ञस्तद्यच्छेज्ज्ञान आत्मनि ।
ज्ञानमात्मनि महति नियच्छेत्तद्यच्छेच्छान्त आत्मनि" इति ॥ १३ ॥

वेदादेवं सदा देवा वेदादेव सदा नराः ॥
वेदादेव सदा लोका वेदादेव महेश्वरः ॥ १४ ॥

वेदादेवेति । देवादयः सर्वे वेदशब्देभ्य एव सृष्टाः । "एते असृग्रमिन्दवस्तिरःपवित्रमाशवः" इति । अत्र मन्त्र एत इति वै प्रजापतिर्देवानसृजत । असृग्रमिति मनुष्यान् । इन्दव इति पितॄन् । तिरःपवित्रमित्यन्याः प्रजा इति श्रुतेः ।

"ऋषीणां नामधेयानि कर्माणि च पृथक्पृथक् ॥
वेदशब्देभ्य एवाऽऽदौ निर्ममे स महेश्वरः"

इति स्मृतावपि ऋषिपदस्य सर्वस्रष्टव्योपलक्षणार्थत्वात् । महेश्वरोऽपि वेदादेव ज्ञातव्यः "नावेदविन्मनुते तं बृहन्तं सर्वानुभवमात्मानं संपराये" इति॥१४॥

इति चित्तव्यवस्था या धारणा सा प्रकीर्तिता ॥
ब्रह्मैवाहं सदा नाहं देवो यक्षोऽथवा नरः ॥ १५ ॥
न देहेन्द्रियबुद्ध्यादिर्न माया नान्यदेवता ॥
इति बुद्धिव्यवस्थाऽपि धारणा सेति हि श्रुतिः ॥१६॥
सर्वं संक्षेपतः प्रोक्तं सर्वशास्त्रविशारद ॥
आगमान्तैकसंसिद्धमास्थेयं भवता सदा ॥ १७ ॥

इति श्रीस्कन्दपुराणे सूतसंहितायां ज्ञानयोगखण्डे धारणाविधिनिरूपणं नामाष्टादशोऽध्यायः ॥ १८ ॥

---

१ घ. °व महादेव वे° । २ क. ख. °नुभव° । ३ ख. देहेन्द्रियमनोबुद्धिर्न । ४ घ. °णा चेति ।

ब्रह्मैवाहमिति । "अयमात्मा ब्रह्म" इति श्रुतावात्मनः परमात्मतादात्म्याभिधानेनैव तदितरसमस्तवस्त्वात्मकत्वावगमादित्यर्थः ॥ १५ ॥ १६ ॥ १७ ॥

इति श्रीसूतसंहितातात्पर्यदीपिकायां ज्ञानयोगखण्डे धारणाविधिनिरूपणं नामाष्टादशोऽध्यायः ॥ १८ ॥

(अथैकोनविंशोऽध्यायः)

ईश्वर उवाच—

अथातः संप्रवक्ष्यामि ध्यानं संसारनाशनम् ॥
आकाशे निर्मलं शुद्धं भासमानं सुशीतलम् ॥ १ ॥
सोममण्डलमापूर्णमचलं दृष्टिगोचरम् ॥
ध्यात्वा मध्ये महादेवं परमानन्दविग्रहम् ॥ २ ॥
उमार्धदेहं वरदमुत्पत्तिस्थितिवर्जितम् ॥
शुद्धस्फटिकसंकाशं चन्द्ररेखावतंसकम् ॥ ३ ॥
त्रिलोचनं चतुर्बाहुं नीलग्रीवं परात्परम् ॥
ध्यायेन्नित्यं सदा सोऽहमिति ब्रह्मविदां वर ॥ ४ ॥

यतो धारणाभ्यासेन परित्यक्तचापलस्य मनसो ध्यानयोग्यता, अतस्तदनन्तरं तदुच्यत इत्याह—अथात इति । तच्च सगुणनिर्गुणलक्षणविषयभेदेन द्विविधम् । तत्र सगुणध्यानान्याह—आकाश इत्यादि । आकाशे वर्तमानमुक्तलक्षणं सकललोकदृष्टिगोचरं चन्द्रमण्डलं प्रथमतो ध्यात्वा तन्मध्ये "विज्ञानमानन्दं ब्रह्म" इति श्रुत्युक्तं सच्चिदानन्दैकरसं परमेव ब्रह्मोमासहायत्वादियथोक्तलक्षणं स्वीकृतलीलावतारं शिवमात्मत्वेन ध्यायेदित्यर्थः । तथा च वाजसनेयके—बालाक्यजातशत्रुसंवादे—"य एवासौ चन्द्रे पुरुष एतमेवाहं ब्रह्मोपासे" इति बालाकिनोक्ते नैतन्निष्कलशिवस्वरूपं किंतु स्वीकृतलीलावतारं सकलमिदं रूपमित्यभिप्रायवताऽजातशत्रुणोक्तम् "मा मैतस्मिन्संवदिष्ठा बृहन्पाण्डरवासाः सोमो राजेति वा अहमेतमुपासे" इति ॥ १ ॥ २ ॥ ३ ॥ ४ ॥

---

१ ङ. बालस्याजा° । २ घ. °पासते" इ° ।

अथवाऽऽकाशमध्यस्थे भ्राजमाने सुशोभने ॥
आदित्यमण्डले पूर्णे लक्षयोजनविस्तृते ॥ ५ ॥

चन्द्रमण्डलवदादित्यमण्डलमप्याकाशे ध्यात्वा तत्र स्वीकृतदिव्यावतारं परशिवमेवं ध्यायेदित्याह—अथवाऽऽकाशेति ॥ ५ ॥

सर्वलोकविधातारमीश्वरं हेमरूपिणम् ॥
हिरण्मयं श्मश्रुकेशं हिरण्मयनखं तथा ॥ ६ ॥

हेमरूपिणमिति । उद्गीथविद्यायामादित्यस्थस्य पुरुषस्य कतिचिदिहोक्ता हेमरूपत्वादिगुणाः श्रूयन्ते—"य एषोऽन्तरादित्ये हिरण्मयः पुरुषो दृश्यते । हिरण्यश्मश्रुर्हिरण्यकेश आ प्रणखात्सर्व एव सुवर्णस्तस्य यथा कप्यासं पुण्डरीकमेवमक्षिणि" इति ॥ ६ ॥

कप्यास्यासनवद्वक्त्रं नीलग्रीवं विलोहितम् ॥
आगोपालप्रसिद्धं तमम्बिकार्धशरीरिणम् ॥ ७ ॥

कप्यास्यासनवदिति । कपीनां हि केषांचिदास्यमासनं च रक्तवर्णं तथा रक्तवर्णं मुखमित्यर्थः । आगोपालमिति । श्रूयते हि रुद्राध्याये—

"उतैनं गोपा अदृशन्नदृशन्नुदहार्यः ।
उतैनं विश्वा भूतानि स दृष्टो मृडयाति नः" इति ॥ ७ ॥

सोऽहमित्यनिशं ध्यायेत्संध्याकालेषु वा नरः ॥
अथवा वैदिके शुद्धेऽप्यग्निहोत्रादिमध्यगे ॥ ८ ॥
आत्मानं जगदाधारमानन्दानुभवं सदा ॥
गङ्गाधरं विरूपाक्षं विश्वरूपं वृषध्वजम् ॥ ९ ॥
चतुर्भुजं समासीनं चन्द्रमौलिं कपर्दिनम् ॥
रुद्राक्षमालाभरणमुमायाः पतिमीश्वरम् ॥ १० ॥
गोक्षीरधवलाकारं गुह्याद्गुह्यतरं सदा ॥
अत्यद्भुतमनिर्देश्यमहंबुद्ध्या विचिन्तयेत् ॥ ११ ॥

---

१ क. ग. आ प्रनखा° । घ. आ नखा° । २ ङ. °वद्रक्तं नी° ।

उक्तलक्षणं परशिवमग्नौ वा स्वीकृतवक्ष्यमाणदिव्यावतारं ध्यायेदित्याह—अथवा वैदिक इति। परब्रह्म सगुणमग्नावुपास्यत्वेनोक्तं हि बालाकिनैव—"य एवायमग्नौ पुरुष एतमेवाहं ब्रह्मोपासे" इति। उक्ताश्चन्द्रादित्याग्नयः शिवमूर्तित्वेनाऽऽगमेष्वपि प्रसिद्धाः—

"क्ष्मावह्नियजमानार्कजलवातेन्दुखानि च॥
कीर्तिता मूर्तयो ह्यष्टौ" इति॥ ८॥ ९॥ १०॥ ११॥

अथवाऽहं हरिः साक्षात्सर्वज्ञः पुरुषोत्तमः॥
सहस्रशीर्षा पुरुषः सहस्राक्षः सहस्रपात्॥ १२॥

आदित्यमूर्तिवद्विष्णुमूर्तावपि परशिवस्य वक्ष्यमाणलीलावतारस्य स्वात्म्यतादात्म्येन ध्यानमाह—अथवेति। तत्र प्रथमतो विष्णुमूर्तेरपि स्वात्मतादात्म्यानुसंधानमाह—अहं हरिरिति। सहस्रशीर्षा ब्रह्मादिपिपीलिकान्तसर्वप्राणिषु वर्तमानानि सहस्राण्यनन्तानि शीर्षाणि शिरांसि यस्येति स तथोक्तः। पुरुषः पूर्णः। सहस्राक्षः सहस्राण्यनन्तानि प्रजासंबन्धीन्यक्षीणीन्द्रियाणीति सहस्राक्षः। एवं सहस्रपादिति॥ १२॥

विश्वो नारायणो देवः अक्षरः परमः प्रभुः॥
इति ध्यात्वा पुनस्तस्य हृदयाम्भोजमध्यमे॥ १३॥

विश्वो विश्वत्वेन स्थितः। नारायणः 'नॄ नये' पचाद्यच्। नरो नेता सर्वस्य स्वामी। तस्यापत्यानि नाराः सर्वे चेतना अचेतनाश्च। अपत्येऽण्।[1] तेषामयनमधिष्ठानत्वेनाऽऽश्रयभूतं जलचन्द्राणां बिम्बचन्द्रवत्कलधौतादीनां शुक्तिकादिवदिति। नारायणः पूर्वपदात्संज्ञायामिति णत्वम्। देवो देवनशीलः। अक्षरो न क्षरतीति सर्वमश्नुत इति वाऽक्षरः। अशेः सरप्रत्ययेऽक्षरम्। परमः सर्वोत्कृष्टः। यद्वाऽक्षरः परमः परमाक्षरः परमव्यापको व्यापकानामपि व्यापकः। प्रभुः सर्वेषां प्रकर्षेण भरणक्षमः। तदात्मकस्य स्वात्मनो हृदयाम्भोजमध्ये "पद्मकोशप्रतीकाशं हृदयं चाप्यधोमुखम्" इतिश्रुत्युक्ते॥ १३॥

प्राणायामैर्विकासिते परमेश्वरमन्दिरे॥
अष्टैश्वर्यदलोपेते विद्याकेसरसंयुते॥ १४॥

रेचकप्राणायामेन विकासीकृत्य, ऊर्ध्वमुखीकृतपरमेश्वरमन्दिरे। तत्र हि परमे-

---

१ ख. 'न्यक्षाणी'। २ क. ग. घ. ऋष्यण्। ३ घ. 'कादीनां शुक्तिकावदि'। ४ क. ख. 'ति चाक्ष'।

श्वरो ध्यातव्यत्वेन वक्ष्यते । अणिमादीन्यष्टैश्वर्याणि दलानि तैरुपेते तत्त्वविद्यारूपैः केसरैर्युते ॥ १४ ॥

ज्ञाननालमहत्कन्दे प्रणवेन प्रबोधिते ॥
विश्वार्चिषं महावह्निं ज्वलन्तं विश्वतोमुखम् ॥ १५ ॥

शास्त्रविषयं ज्ञानं नालं यस्य तस्मिन्महत्तत्त्वमेव कन्दो यस्य तस्मिन्प्रणवेन प्रबोधिते प्रागुक्तविकासे प्रणवदिवाकरस्य कारणतोच्यते । उक्तहृदयकमलमध्यगतसुषुम्नायामन्तर्वक्ष्यमाणवह्निशिखायाः कारणभूतं मूलाधारस्थं वैश्वानरमाह—विश्वार्चिषमिति । विश्वार्चिषं सर्वतःप्रसरज्ज्वालम् । विश्वतोमुखं विश्वावकाशोदीर्णमुखसामर्थ्यम् ॥ १५ ॥

वैश्वानरं जगद्योनिं शिखातन्विनमीश्वरम् ॥
तापयन्तं स्वकं देहमापादतलमस्तकम् ॥ १६ ॥
निर्वातदीपवत्तस्मिन्दीपितं हव्यवाहनम् ॥
नीलतोयदमध्यस्थं विद्युल्लेखेव भास्वरम् ॥ १७ ॥

जगद्योनिम् । यद्धि जगदुपादानं परमात्मज्योतिस्तत्प्रतीकत्वेन तदात्मकमिदं मूलाधारस्थं ज्योतिस्तेन जगद्योनिरित्युच्यते । तत्प्रतीकत्वं च श्रूयते छान्दोग्ये—"अथ यदतः परो दिवो ज्योतिर्दीप्यते" इत्यारभ्य "इदं वाव तद्यदिदमन्तः पुरुषे ज्योतिः" इति । शिखां तनोतीति शिखतन्विनम् । औणादिको विनिप्रत्ययः । तापयन्तमिति । श्रूयते च तैत्तिरीयोपनिषदि—"संतापयन्ति स्वं देहमापादतलमस्तकम्" इति ॥ १६ ॥ १७ ॥

नीवारशुकवद्रूपं पीताभासं विचिन्तयेत् ॥
तस्य वह्नेः शिखायां तु मध्ये परमकारणम् ॥ १८ ॥
परमात्मानमानन्दं परमाकाशमीश्वरम् ॥
ऋतं सत्यं परं ब्रह्म साम्बं संसारभेषजम् ॥ १९ ॥
ऊर्ध्वरेतं विरूपाक्षं विश्वरूपं महेश्वरम् ॥
नीलग्रीवं स्वमात्मानं पश्यन्तं पापनाशनम् ॥ २० ॥

तस्य वह्नेरिति । श्रूयते च—तस्याः शिखाया मध्ये तु परमात्मा व्यवस्थित इति ॥ १८ ॥ १९ ॥ २० ॥

१ घ. 'न्यष्टावैश्व' । २ क. ग. 'न्वितमी' । ३ क. ग. ङ. 'न्वितम्' । ४ ग. 'वह्निशि' ।

ब्रह्मविष्णुमहेशानैर्ध्येयं ध्येयविवर्जितम् ॥
सोहमित्यादरेणैव ध्यायेद्योगी महेश्वरम् ॥ २१ ॥

स्वयं ब्रह्मादिभिर्ध्येयं स्वात्मना ध्यातव्येनान्येन वर्जितम् ॥ २१ ॥

अयं मुक्तेर्महामार्ग आगमान्तैकसंस्थितः ॥
अथवाऽहं मुनिश्रेष्ठ ब्रह्मा लोकपितामहः ॥ २२ ॥

इति स्मृत्वा स्वहृन्मध्ये शिवं परमकारणम् ॥
साक्षाद्वेदान्तसंवेद्यं साम्बं संसारभेषजम् ॥ २३ ॥

ध्यानस्य मोक्षहेतुत्वे श्रुतिः प्रमाणमित्याह—आगमान्तेति। "ओमित्येवं ध्यायथ आत्मानं स्वस्ति वः पाराय तमसः परस्तात्" इति श्रूयते। विष्णुमूर्तिरिव स्वयं ब्रह्ममूर्तिर्भूत्वा स्वहृदये शिवं ध्यायेदित्याह—अथवाऽहमिति ॥ २२ ॥ २३ ॥

अहंबुद्ध्या विमुक्त्यर्थं ध्यायेदीशानमव्ययम् ॥
अथवा सत्यमीशानं ज्ञानमानन्दमद्वयम् ॥ २४ ॥

अनन्तममलं नित्यमादिमध्यान्तवर्जितम् ॥
तथाऽस्थूलमनाकाशमसंस्पृश्यमचक्षुषम् ॥ २५ ॥

सर्वाधारत्वजगत्कारणत्वादिविशिष्टवाचकस्य स इति पदस्य बुद्ध्यादिविशिष्टप्रत्यक्चैतन्यवाचकस्याहंपदस्य च सामानाधिकरण्ये सत्यखण्डैकरसे लक्ष्ये यत्र वाक्यार्थे पर्यवसानमतः सोहमिति महावाक्येनानुसंदध्यादिति। निष्कलविषयं ध्यानमाह—अथवा सत्यमिति ॥ २४ ॥ २५ ॥

न रसं न च गन्धाख्यमप्रमेयमनूपमम् ॥
सर्वाधारं जगद्रूपममूर्तं मूर्तमव्ययम् ॥ २६ ॥

तत्राहंपदवाच्यस्य बुद्ध्यादिविशिष्टप्रत्यक्चैतन्यस्य सकललोकप्रत्यक्षत्वेऽपि स इत्येतत्पदवाच्यस्य परोक्षत्वेनाप्रसिद्धत्वात्सर्वाधारमित्यादिना पदजातेन तन्निर्देशः। ततः प्राक्तनेन च सत्यमित्यादिना लक्ष्यस्याखण्डैकरसप्रदर्शनं सोऽहमिति च लक्षणाबीजस्य सामानाधिकरण्यनिर्देश इति विभागः। तत्राद्ध-

१ ध. 'र्महामाग आ'।

यमस्थूलमनाकाशमित्यादयोऽद्वैतादिनिषेधमुखेन लक्ष्ये पर्यवस्यन्ति । सत्यादयस्तु स्वार्थार्पणप्रणाड्येति विशेषः । तदुक्तमाचार्यैः—

"तत्रानन्तोऽन्तवद्वस्तुव्यावृत्त्यैव विशेषणम् ।
स्वार्थार्पणप्रणाड्या तु परिशिष्टे विशेषणम्" इति ।

वाजसनेयश्रुतिरप्यतद्व्यावृत्तिमुखेनैवैतदेव लक्ष्यं निर्दिशति "एतद्वै तदक्षरं गार्गि ब्राह्मणा अभिवदन्त्यस्थूलमनण्वह्रस्वमदीर्घमलोहितमस्नेहमच्छायमतमोऽवाय्वनाकाशमसङ्गमस्पर्शमगन्धमरसमचक्षुष्कमश्रोत्रम्" इत्यादि । प्रकृत्याऽमूर्तमपि मायया मूर्तम् ॥ २६ ॥

अदृश्यं दृश्यमन्तस्थं बहिष्ठं सर्वतोमुखम् ॥
सर्वतःपाणिपादं च सर्वकारणकारणम् ॥ २७ ॥
सर्वज्ञानादिसंयुक्तमहामित्येव चिन्तयेत् ॥
अयं पन्था मुनिश्रेष्ठ साक्षात्संसारनाशने ॥ २८ ॥

एवमदृश्यं दृश्यमव्ययं तत्त्वावबोधपर्यन्तमनिवृत्तोपाधिकम् । अन्तस्थमिति ।

"अन्तर्बहिश्च तत्सर्वं व्याप्य नारायणः स्थितः" इति हि श्रुतिः ॥ २७ ॥ ॥ २८ ॥

अथवा सच्चिदानन्दमनन्तं ब्रह्म सुव्रत ॥
अहमस्मीत्यभिध्यायेद्ध्येयातीतं विमुक्तये ॥ २९ ॥

उक्ते वाच्यार्थपूर्वकलक्ष्यानुसंधानेक्षणे सति वाच्यानुसंधानमपि त्यक्त्वा लक्ष्य एवार्थोऽनुसंधेय इत्याह—अथवा सच्चिदिति । सच्चिदानन्दादयः शब्दा लक्षणयाऽखण्डैकरसमेव स्वरूपं समर्थयन्ति[4] ॥ २९ ॥

इदंतया न देवेशमभिध्यायेन्मनागपि ॥
ब्रह्मणः साक्षिरूपत्वान्नेदं यदिति हि श्रुतिः ॥ ३० ॥
एवं ध्यानपरः साक्षाच्छिव एव न चान्यथा ॥
अनेन सदृशो लोके नहि वेदविदां वर ॥ ३१ ॥
प्रक्षीणाशेषपापस्य ज्ञाने ध्याने भवेन्मतिः ॥
पापोपहतबुद्धीनां तद्वार्ताऽपि सुदुर्लभा ॥ ३२ ॥

१ घ. 'शिष्ये वि' । २ क. घ. ङ. 'रप्येत' । ३ घ. निर्देशयति । ४ ख. घ. ङ. समर्पयन्ति ।

प्रत्यक्तादात्म्येनैवानुसंधाननियमे कारणमाह—इदंतयेति। नेदं यदिति हि श्रुतिरिति।

"यच्चक्षुषा न पश्यति येन चक्षूंषि पश्यति।
तदेव ब्रह्म त्वं विद्धि नेदं यदिदमुपासते"

इति तलवकारोपनिषत्परात्त्वेन ब्रह्मणोऽनुसंधानं प्रत्याचष्ट इत्यर्थः ॥३०॥ ॥ ३१ ॥ ३२ ॥

अथवा विष्णुमव्यक्तमाधारं देवनायकम् ॥
शङ्खचक्रधरं देवं पद्महस्तं सुलोचनम् ॥ ३३ ॥
किरीटकेयूरधरं पीताम्बरधरं हरिम् ॥
श्रीवत्सवक्षसं विष्णुं पूर्णचन्द्रनिभाननम् ॥ ३४ ॥
पद्मपुष्पदलाभोष्ठं सुप्रसन्नं शुचिस्मितम् ॥
शुद्धस्फटिकसंकाशमहमित्येव चिन्तयेत् ॥ ३५ ॥
एतच्च दुर्लभं प्रोक्तं योगशास्त्रविशारदैः ॥
अथवा देवदेवेशं ब्रह्माणं परमेष्ठिनम् ॥ ३६ ॥
अक्षमालाधरं देवं कमण्डलुकराम्बुजम् ॥
वरदाभयहस्तं च वाग्देव्या सहितं सदा ॥ ३७ ॥
कुन्देन्दुसदृशाकारमहमित्येव चिन्तयेत् ॥
अथवाऽग्निं तथाऽऽदित्यं चन्द्रं वा देवतान्तरम् ॥३८॥

सकलनिष्कलात्मकस्य शिवस्य तादात्म्यानु[3]ध्यानान्युक्त्वा विष्ण्वादीनामपि सकलध्यानान्याह—अथवा विष्णुमित्यादि। निष्कलं तु विशेषाभावात्तदेव भविष्यतीति न पृथगुक्तम् ॥ ३३ ॥ ३४ ॥ ३५ ॥ ३६ ॥ ३७ ॥ ३८ ॥

वेदोक्तेनैव मार्गेण सदाऽहमिति चिन्तयेत् ॥
एवमभ्यासयुक्तस्य पुरुषस्य महात्मनः ॥ ३९ ॥
क्रमाद्वेदान्तविज्ञानं विजायेत न संशयः ॥
ज्ञानादज्ञानविच्छित्तिः सैव तस्य [4]विमुक्तता ॥ ४० ॥

---

१ ङ. प्रत्यगात्म्ये॰। २ क. पश्यन्ति। ३ घ. ॰नुसंधाना॰। ४ ङ. विविक्तता।

सर्वमुक्तं समासेन मया वेदान्तसंग्रहम् ॥
मत्प्रसादाद्विजानीहि मा शङ्किष्ठाः कदाचन ॥ ४१ ॥
इति श्रीस्कन्दपुराणे सूतसंहितायां ज्ञानयोगखण्डे ध्यानविधिनिरूपणं नामैकोनविंशोऽध्यायः ॥१९॥

अत्र सगुणध्यानानि चित्तैकाग्र्यद्वारा पापक्षयद्वारा वा निष्कलसाक्षात्कारे कारणम्। निष्कलं ध्यानं त्वव्यवधानेनेत्याह—एवमभ्यासेति ॥ ३९॥ ४०॥ ॥ ४१ ॥

इति श्रीसूतसंहितातात्पर्यदीपिकायां ज्ञानयोगखण्डे ध्यानविधिनिरूपणं नामैकोनविंशोऽध्यायः ॥ १९ ॥

(अथ विंशोऽध्यायः)

ईश्वर उवाच—

अथातः संप्रवक्ष्यामि समाधिं भवनाशनम् ॥
समाधिः संविदुत्पत्तिः परजीवैक्यतामतिः ॥ १ ॥

यतः साधनभूतध्यानस्वरूपज्ञानार्यत्ता तत्फलसंविदः समाधिपर्यायाया उत्पत्तिः। अतस्तदनन्तरं तदभिधानमिति प्रतिजानीते—अथात इति। महावाक्यलक्ष्यस्वरूपसाक्षात्कार एव समाधिरिह विवक्षित इत्यर्थः ॥ १ ॥

यदि जीवः पराद्भिन्नः कार्यतामेति सुव्रत ॥
अचित्त्वं च प्रसज्येत घटवत्पण्डितोत्तम ॥ २ ॥
विनाशित्वं भयं च स्याद्द्वितीयाद्वा इति श्रुतिः ॥
नित्यः सर्वगतो ह्यात्मा कूटस्थो दोषवर्जितः ॥ ३ ॥

ध्यानफलभूततत्त्वविमर्शस्वरूपफलमाह—यदि जीव इति। "कस्मान्न्वहं बिभेम्यद्वितीयाद्वै भयं भवति" इति वाजसनेयश्रुतिरित्यर्थः ॥ २ ॥ ३ ॥

एकः स भिद्यते भ्रान्त्या मायया न स्वरूपतः ॥
तस्मादद्वैतमेवास्ति न प्रपञ्चो न संसृतिः ॥ ४ ॥

---

१ क. ख. 'वैकता'। २ ङ. 'य तत्तत्फ'। ३ क. 'यानुत्प'। ४ घ. 'तत्व'। ५ ग. 'स्माद्ध्यभे'।

यथाऽऽकाशो घटाकाशो महाकाश इतीरितः ॥
तथा भ्रान्तैर्द्विधा प्रोक्तो ह्यात्मा जीवेश्वरात्मना ॥५॥

स भिद्यत इति । माययाऽज्ञानेन जनिता या भ्रान्तिर्विपरीतज्ञानं तया भेदो गृह्यते । प्रमेयभेदग्रहणस्य "नेह नानास्ति" इतिश्रुतिबाधितत्वेन भ्रान्तित्वादित्यर्थः ॥ ४ ॥ ५ ॥

नाहं देहो न च प्राणो नेन्द्रियाणि तथैव च ॥
न मनोऽहं न बुद्धिश्च नैव चित्तमहंकृतिः ॥ ६ ॥

अविद्ययाऽऽत्मतादात्म्येनाध्यस्तंस्य देहेन्द्रियमनःप्राणादेर्विमर्शजनितेन विवेकज्ञानेन निरासमभिनैयेन दर्शयति—नाहं देह इति ॥ ६ ॥

नाहं पृथ्वी न सलिलं न च वह्निर्न चानिलः ॥
न चाऽऽकाशो न शब्दश्च न च स्पर्शस्तथा रसः ॥७॥
नाहं गन्धो न रूपं च न मायाऽहं न संसृतिः ॥
सदा साक्षिस्वरूपत्वाच्छिव एवास्मि केवलः ॥ ८ ॥

यथा भूतकार्यस्य देहादेर्विवेक एवं तत्कारणस्य पृथिव्यादिभूतजातस्य चेत्याह—नाहं पृथ्वीति ॥ ७ ॥ ८ ॥

इति धीर्या मुनिश्रेष्ठ सा समाधिरिहोच्यते ॥
अथवा पञ्चभूतेभ्यो जातमण्डं महामुने ॥ ९ ॥
भूतमात्रतया दग्ध्वा विवेकेनैव वह्निना ॥
पुनः स्थूलादिभूतानि सूक्ष्मभूतात्मना तथा ॥ १० ॥

सकारणाद्भूतभौतिकप्रपञ्चादात्मानं बुद्ध्यैव विविच्य विविक्ते तस्मिन्समाधिरुक्तः । अधुना तं प्रपञ्चं बुद्ध्यैव प्रविलाप्य परिशिष्टे तस्मिन्नद्वितीये समाधिमाह—अथवा पञ्चेति । "तदनन्यत्वमारम्भणशब्दादिभ्यः" इति न्यायेन भौतिकं ब्रह्माण्डं पञ्चीकृतभूतात्मना तानि च भूतान्यपञ्चीकृतभूतात्मना ॥ ९ ॥ १० ॥

[3]विलाप्यैवं विवेकेन ततस्तान्यपि बुद्धिमान् ॥
मायामात्रतया दग्ध्वा मायां च प्रत्यगात्मना ॥ ११ ॥

१ घ. ङ. °स्तदे° । २ घ. °नयत्वेन । ३ घ. विनाऽप्येवं ।

सोऽहं ब्रह्म न संसारी न मत्तोऽन्यत्कदाचन ॥
इति विद्यात्स्वमात्मानं स समाधिः प्रकीर्तितः ॥१२॥

तान्यपीति । "पर्यायेणानुक्रमोऽत उपपद्यते च" इति न्यायेन पृथिव्यादिक्रमेण मायायां तामप्यात्मनि बुद्ध्यैव प्रविलाप्य परिशिष्टेऽद्वितीये केवलमात्मनि स्वात्मतादात्म्येनानुसंधानं समाधिरित्यर्थः ॥ ११ ॥ १२ ॥

अथवा योगिनां श्रेष्ठ प्रणवात्मानमीश्वरम् ॥
वर्णत्रयात्मना विद्यादकारादिक्रमेण तु ॥ १३ ॥

वाच्यवाचकप्रपञ्चस्य ब्रह्मणि परिकल्पितत्वात्प्रणववाच्यस्थूलसूक्ष्मप्रपञ्चस्य सकारणस्योपसंहारद्वारा निष्कलब्रह्मणि समाधिमभिधाय वाचकप्रणवावयवानामकारोकारमकारार्धमात्रारूपाणां सकारणानां प्रविलापनं ब्रह्मणि समाधिमिदानीमाह—अथवा योगिनामिति ।

"प्रणवो ह्यपरं ब्रह्म प्रणवश्च परं स्मृतम् ।
एवं हि प्रणवं ज्ञात्वा व्यश्नुते तदनन्तरम्" इति ह्युक्तम् ॥ १३ ॥

ऋग्वेदोऽयमकाराख्य उकारो यजुरुच्यते ॥
मकारः सामवेदाख्यो नादस्त्वाथर्वणी श्रुतिः ॥ १४ ॥

अकारोकारमकारनादानां वेदचतुष्टयात्मकत्वमाह—ऋग्वेद इति ॥ १४ ॥

अकारो भगवान्ब्रह्मा तथोङ्कारो हरिः स्वयम् ॥
मकारो भगवान्रुद्रस्तथा नादस्तु कारणम् ॥ १५ ॥

तेषामेव ब्रह्मविष्णुरुद्रतत्कारणात्मकतामाह—अकार इति ॥ १५ ॥

अग्नयश्च तथा लोका अवस्थावसथास्त्रयः ॥
उदात्तादिस्वराः कालाश्चैते वर्णत्रयात्मकाः ॥ १६ ॥

तेषामेव गार्हपत्यदक्षिणाहवनीयसंवर्तकाग्निरूपात्मकतामाह—अग्नय इति । लोका इति तु पृथिव्यन्तरिक्षद्युसोमलोकात्मकतां दर्शयति । अवस्था इति जाग्रत्स्वप्नसुषुप्ततुरीयात्मकतामाह । आवसथा इति नाभिहृदयकण्ठमूर्धात्मकतामाह । त्रय इति संवर्तकादीनां चतुर्थानामप्युपलक्षणम् । उदात्तादीति,

१ ग. घ. °ति । विपर्ययेण तु क्र° । ङ. °ति । विपर्ययेणानुक्रमो नोप° । २ ङ °त्मका वि° । ३ क. ख. घ. °च्यप्र° । ४ ग. °त्वात्प्राणवा° । ५ ङ. °जुरेव च । म° । ६ क. °रूपक° । । ७ क. °तुर्यात्म° ।

उदात्तानुदात्तस्वरितैकश्रुत्यात्मकतामाह । काला इति भूतभविष्यद्वर्तमानसाधारणकालतामाह । वर्णत्रयेति नादस्याप्युपलक्षणम् । ऋग्वेदाद्यात्मकता चाकारादीनां श्रूयते—"तस्य ह वै प्रणवस्य या पूर्वा मात्रा पृथिव्यकारः स ऋग्भिर्ऋग्वेदो ब्रह्मा वसवो गायत्री गार्हपत्यः। द्वितीयाऽन्तरिक्षं स उकारः स यजुर्भिर्यजुर्वेदो विष्णुरुद्रास्त्रिष्टुब्दक्षिणाग्निः। तृतीया द्यौः स मकारः स सामभिः सामवेदो रुद्रा आदित्या जगत्याहवनीयो याऽवसानेऽस्य चतुर्थ्यर्धमात्रा सा सोमलोक ॐकारः साऽऽथर्वणैर्मन्त्रैरथर्ववेदः संवर्तकोऽग्निर्मरुतो विराडेक ऋषिः" इति। तथा—"जागरिते ब्रह्मा स्वप्ने विष्णुः सुषुप्तौ रुद्रस्तुरीयमक्षरम्" इति च। तथाऽन्यत्र—नाभिर्हृदयं[1] कण्ठो मूर्धा चेति ॥ १६ ॥

इति ज्ञात्वा पुनः सर्वमक्षरत्रयमात्रतः ॥
विलाप्याकारमद्वंद्वमुकाराख्ये विलापयेत् ॥ १७ ॥
उकारं च मकाराख्ये महानादे मकारकम् ॥
तथा मायात्मना नादं मायां जीवात्मरूपतः ॥ १८ ॥
जीवमीश्वरभावेन विद्यात्सोऽहमिति ध्रुवम् ॥
एषा बुद्धिश्च विद्वद्भिः समाधिरिति कीर्तिता ॥ १९ ॥
यथा फेनतरङ्गादि समुद्रादुत्थितं पुनः ॥
समुद्रे लीयते तद्वज्जगन्मय्येव लीयते ॥ २० ॥

उक्तरूपोपेतमकारं तथाविध उकारे तं च तथाविधे मकारे तं नादे तं मायायां तां च तदुपाधिके जीवे तं च परमात्मनैकीकृत्य तद्रूपेणावतिष्ठत इत्यर्थः ॥ १७ ॥ १८ ॥ १९ ॥ २० ॥

तस्मान्मत्तः पृथङ्नास्ति जगन्माया च सर्वदा ॥
इति बुद्धिः समाधिः स्यात्समाधिरिति हि श्रुतिः ॥ २१ ॥

इति हि श्रुतिरिति । "इदं सर्वं यदयमात्मा" इति हि श्रूयते ॥ २१ ॥

यस्यैवं परमात्माऽयं प्रत्यग्भूतः प्रकाशितः ॥
स याति परमं भावं स्वकं साक्षात्परामृतम् ॥ २२ ॥

---

[1] क. ख. °भिर्हृदयकण्ठं मू°। ग. °भिर्हृदयं कण्ठमू°।

उक्तसमाधिनिष्ठस्य फलमाह—यस्यैवमिति । परमं भावमित्येतद्व्रतखण्डतृतीयाध्याये निरूपितम् ॥ २२ ॥

यदा मनसि चैतन्यं भाति सर्वत्रगं सदा ॥
योगिनोऽव्यवधानेन तदा संपद्यते स्वयम् ॥ २३ ॥
यदा सर्वाणि भूतानि स्वात्मन्येवाभिपश्यति ॥
सर्वभूतेषु चाऽऽत्मानं ब्रह्म संपद्यते तदा ॥ २४ ॥
यदा सर्वाणि भूतानि समाधिस्थो न पश्यति ॥
एकीभूतः परेणासौ तदा भवति केवलः ॥ २५ ॥

योगिन इति । व्यवधायकस्याज्ञानस्य निरासात्स्वयं ब्रह्म संपद्यत इत्यर्थः ॥ २३ ॥ २४ ॥ २५ ॥

यदा सर्वे प्रमुच्यन्ते कामा येऽस्य हृदि स्थिताः ॥
तदाऽसावमृतीभूतः[1] क्षेमं गच्छति पण्डितः ॥ २६ ॥

यदा सर्व इति । तज्ज्ञानेनाज्ञाननिरासात्तत्कार्यनिवृत्तौ "योऽकामो निष्काम आप्तकाम आत्मकामो न तस्य प्राणा उत्क्रामन्त्यत्रैव समवनीयन्ते" "ब्रह्मैव सन्ब्रह्माप्येति" इतिश्रुत्युक्तं ब्रह्म संपद्यत इत्यर्थः ॥ २६ ॥

यदा भूतपृथग्भावमेकस्थमनुपश्यति ॥
तत एव च विस्तारं ब्रह्म संपद्यते तदा ॥ २७ ॥

यदा भूतेति । भूतानां पृथिव्यादीनां यः पृथग्भावो भेदः स सर्व एकस्मिन्नेव ब्रह्मणि प्रलयदशायां तादात्म्येन स्थित्वा पुनः सृष्टौ तत एव विस्तारं प्रतिपद्यत इति यः पश्यति स ब्रह्म संपद्यत इत्यर्थः । श्रुतिपुराणयोरयं समानः पाठः ॥ २७ ॥

यदा पश्यति चाऽऽत्मानं केवलं परमार्थतः ॥
मायामात्रं जगत्कृत्स्नं तदा भवति [4]निर्वृतः ॥ २८ ॥
यदा जन्मजरादुःखव्याधीनामेकभेषजम् ॥
केवलं ब्रह्मविज्ञानं जायतेऽसौ तदा शिवः ॥ २९ ॥

---

१ क. ख. ग. घ. °तीभावः क्षे° । २ क. ख. घ. °वलीय° । ३ ग. ङ. स्थितः । ४ घ. निर्वृतिः । ५ ङ. °तेऽस्मै त° ।

तस्माद्विज्ञानतो मुक्तिर्नान्यथा कर्मकोटिभिः ॥
कर्मसाध्यस्य नित्यत्वं न सिध्यति कदाचन ॥ ३० ॥
ज्ञानं वेदान्तविज्ञानमज्ञानमितरन्मुने ॥
अहो ज्ञानस्य माहात्म्यं मया वक्तुं न शक्यते ॥३१॥
अत्यल्पोऽपि यथा वह्निः सुमहन्नाशयेत्तमः ॥
ज्ञानाभ्यासस्तथाऽल्पोऽपि महत्पापं विनाशयेत् ॥३२॥

निर्वृतस्तृप्तो मुक्त इत्यर्थः ॥ २८ ॥ २९ ॥ ३० ॥ ३१ ॥ ३२ ॥

यथा वह्निर्महादीप्तः शुष्कमार्द्रं च निर्दहेत् ॥
तथा शुभाशुभं कर्म ज्ञानाग्निर्दहति क्षणात् ॥ ३३ ॥
पद्मपत्रं यथा तोयैः स्वस्थैरपि न लिप्यते ॥
तथा शब्दादिभिर्ज्ञानी विषयैर्न हि लिप्यते ॥ ३४ ॥
मन्त्रौषधिबलैर्यद्वज्जीर्यते भक्षितं विषम् ॥
तद्वत्सर्वाणि पापानि जीर्यन्ते ज्ञानिनः क्षणात् ॥३५॥
पश्यञ्शृण्वन्स्पृशञ्जिघ्रन्नश्नन्गच्छन्स्वपन्श्वसन् ॥
प्रलपन्विसृजन्गृह्णन्नुन्मिषन्निमिषन्नपि ॥ ३६ ॥
अकर्ताऽहमभोक्ताऽहमसङ्गः परमेश्वरः ॥
सदा मत्संनिधानेन चेष्टते सर्वमिन्द्रियम् ॥ ३७ ॥
इतिविज्ञानसंपन्नः सङ्गं त्यक्त्वा करोति यः ॥
लिप्यते न स पापेन पद्मपत्रमिवाम्भसा ॥ ३८ ॥
ये द्विषन्ति महात्मानं ज्ञानवन्तं नराधमाः ॥
पच्यन्ते रौरवे कल्पमेकान्ते नरके सदा ॥ ३९ ॥

शुष्कमार्द्रं चेति । परस्परविरोधिनोः शुभाशुभयोरेकरूपेण ज्ञानेन दाहे निदर्शनम् ॥ ३३ ॥ ३४ ॥ ३५ ॥ ३६ ॥ ३७ ॥ ३८ ॥ ३९ ॥

दुर्वृत्तो वा सुवृत्तो वा मूर्खः पण्डित एव वा ॥
ज्ञानाभ्यासपरः पूज्यः किं पुनर्ज्ञानवान्नरः ॥ ४० ॥

---

१ घ. "ज्ञानं विज्ञा°।

ज्ञानाभ्यासपर इति । ज्ञानसाधनयोगाङ्गयमाद्यभ्यासवानपि पूज्यः किं पुनर्ज्ञानीत्यर्थः ॥ ४० ॥

निरपेक्षं मुनिं शान्तं निर्वैरं समदर्शिनम् ॥
अनुव्रजाम्यहं नित्यं पूयेयेत्यङ्घ्रिरेणुभिः ॥ ४१ ॥
यथा राजा जनैः सर्वैः पूज्यते मुनिसत्तम ॥
तथा ज्ञानी सदा देवैर्मुनिभिः पूज्य एव हि ॥ ४२ ॥
यस्य गेहं समुद्दिश्य ज्ञानी गच्छति सुव्रत ॥
तस्य क्रीडन्ति पितरो यास्यामः परमां गतिम् ॥४३॥
यस्यानुभवपर्यन्ता बुद्धिस्तत्त्वे प्रवर्तते ॥
तद्दृष्टिगोचराः सर्वे मुच्यन्ते सर्वकिल्बिषैः ॥ ४४ ॥
कुलं पवित्रं जननी कृतार्था
विश्वंभरा पुण्यवती च तेन ॥
अपारसच्चित्सुखसागरे सदा
विलीयते यस्य मनःप्रचारः ॥ ४५ ॥

निरपेक्षमिति । विवेकविज्ञानातिरिक्तस्य निष्कलत्वावधारणाद्विवेकविज्ञानस्य मामत्वात्कंचिदप्यपेक्षारहितमित्यर्थः । समदर्शिनमिति । तथाच भगवतोक्तम्—

"सुहृन्मित्रार्युदासीनमध्यस्थद्वेष्यबन्धुषु ।
साधुष्वपि च पापेषु समबुद्धिर्विशिष्यते" इति

॥ ४१ ॥ ४२ ॥ ४३ ॥ ४४ ॥ ४५ ॥

महात्मनो ज्ञानवतः प्रदर्शनात्सुरेश्वरत्वं झटिति प्रयाति ॥
विहाय संसारमहोदधौ नरा रमन्ति ते पापबलादहो मुने॥४६॥
महानिधिं प्राप्य विहाय तं वृथा
विचेष्टते मोहबलेन बालकः ॥
यथा तथा ज्ञानिनमीश्वरेश्वरं
विहाय मोहेन चरन्ति मानवाः ॥ ४७ ॥

१ ग. 'दर्शन'। २ ग. ङ. पूजयेत्य'। ३ ङ. 'हारसं'।

अहो महान्तं परमार्थदर्शिनं
विहाय मायापरिमोहिता नराः ॥
हिताय लोके विचरन्ति ते मुने
विषं पिबन्त्येव महामृतं विना ॥ ४८ ॥
बहुनोक्तेन किं सर्वं संग्रहेणोपपादितम् ॥
श्रद्धया गुरुभक्त्या त्वं विद्धि वेदान्तसंग्रहम् ॥ ४९ ॥

महात्मन इति। श्रूयते हि मुण्डकोपनिषदि—
"यं यं लोकं मनसा संविभाति विशुद्धसत्त्वः कामयते यांश्च कामान्।
तं तं लोकं जयते तांश्च कामांस्तस्मादात्मज्ञं ह्यर्चयेद्भूतिकामः" इति।
इत्थं सकलश्रेयोमूलस्य तस्य परित्यागेनान्यत्र प्रवृत्तिः संचितदुरितैकहेतु-केत्याह—विहायेति ॥ ४६ ॥ ४७ ॥ ४८ ॥ ४९ ॥

यस्य देवे परा भक्तिर्यथा देवे तथा गुरौ ॥
तस्यैते कथिता ह्यर्थाः प्रकाशन्ते न संशयः ॥ ५० ॥

गुरुभक्तेस्तत्र कारणत्वे श्वेताश्वतरश्रुतिमुदाहरति—यस्य देव इति ॥५०॥

सूत उवाच—
इत्येवमुक्त्वा भगवांस्तूष्णीमास्ते महेश्वरः ॥
वक्तव्याभावमालोक्य मुनयः करुणानिधिः ॥ ५१ ॥
बृहस्पतिश्च मुनयो वेदान्तश्रवणात्पुनः ॥
आनन्दाक्लिन्नसर्वाङ्ग आत्मानन्दवशोऽभवत् ॥ ५२ ॥
भवन्तोऽपि महाप्राज्ञा मत्तःप्राप्तात्मवेदनाः ॥
अभवन्कृतकृत्याश्च मा शंकध्वं कदाचन ॥ ५३ ॥
स्थापयध्वमिमं मार्गं प्रयत्नेनापि हे द्विजाः ॥
स्थापिते वैदिके मार्गे सकलं सुस्थितं भवेत् ॥ ५४ ॥

सूतो मुनीन्संबोध्याऽऽह—इत्येवमुक्त्वेति ॥ ५१ ॥ ५२ ॥ ५३ ॥ ५४ ॥

यो हि स्थापयितुं शक्तो न कुर्यान्मोहतो नरः ॥
तस्य हन्ता न पापीयानिति वेदान्तनिर्णयः ॥ ५५ ॥

य: स्थापयितुमुद्युक्तः श्रद्धयैवाक्षमोऽपि सः ॥
सर्वपापविनिर्मुक्तः साक्षाज्ज्ञानमवाप्नुयात् ॥ ५६ ॥
यः स्वविद्याभिमानेन वेदमार्गप्रवर्तकम् ॥
छलजात्यादिभिर्जीयात्स महापातकी भवेत् ॥ ५७ ॥
य इमं ज्ञानयोगाख्यं खण्डं श्रद्धापुरःसरम् ॥
पठते सुमुहूर्तेषु न स भूयोऽभिजायते ॥ ५८ ॥
ज्ञानार्थी ज्ञानमाप्नोति सुखार्थी सुखमाप्नुयात् ॥
वेदकामी लभेद्वेदं विजयार्थी जयं लभेत् ॥ ५९ ॥
राज्यकामो लभेद्राज्यं क्षमाकामः क्षमी भवेत् ॥
तस्मात्सर्वेषु कालेषु पठितव्यो मनीषिभिः ॥ ६० ॥

इति श्रीस्कन्दपुराणे सूतसंहितायां ज्ञानयोगखण्डे
समाधिर्नाम विंशोऽध्यायः ॥ २० ॥

कृतकृत्यस्य किं स्थापनप्रवृत्त्याऽपीत्यत आह—योहि स्थापयितुमिति । स्वयं कृतकृत्येनापि परमकारुणिकेन शत्रोरपि भवदल्पमप्यनिष्टं न सोढव्यं किमुत सकललोकस्य प्राप्तं विद्यासंप्रदायोच्छेदलक्षणं महत्तरमनिष्टमित्यर्थः ॥ ५५ ॥ ॥ ५६ ॥ ५७ ॥ ५८ ॥ ५९ ॥ ६० ॥

संहितायाश्च सूतस्य व्याख्यां तात्पर्यदीपिकाम् ॥
सुस्थिरामनुगृह्णातु विद्यातीर्थमहेश्वरः ॥ १ ॥

इति श्रीमत्काशीविलासश्रीक्रियाशक्तिपरमभक्तश्रीमत्र्यम्बकपादाब्जसेवापरायणेनोपनिषन्मार्गप्रवर्तकेन श्रीमाधवाचार्येण विरचितायां श्रीसूतसंहितातात्पर्यदीपिकायां ज्ञानयोगखण्डे समाधिनिरूपणं नाम विंशोऽध्यायः ॥ २० ॥

समाप्तमिदं ज्ञानयोगखण्डम् ।

रेकात्मकं जगुः ॥१६॥ अनश्चित्तलयेनैवाऽहं गणेशो न संशयः । चित्तपंचकमुत्सृज्य पूर्णयोगमवाप्नुयात् ॥१७॥ तत्र समाधिजं सौख्यं वदामि युक्तिभावतः । गणेशोऽहं तदाकारो भवामि यदि योगतः ॥१८॥ तदा संयोगजः प्रोक्तोऽनुभवो योगिनां हृदि । यदाऽहं गणनाथश्चैवागतो न गतः कदा ॥१९॥ तदा ह्ययोगजः प्रोक्तोऽनुभवः शांतिदायकः । अतोऽयोगमयो योगः कथं तत्र प्रवर्तते ॥२०॥ चित्तं नानाविधं दक्ष संयोगायोगधारकम् । योगे योगात्मकोऽहं च तदा शांतिः प्रलभ्यते ॥२१॥ शांतीनां शांतिरूपा सा योगशांतिः प्रजायते । तस्मात् परं विद्यते न ब्रह्म योगात् सुनिश्चितम् ॥२२॥ अतोऽयं गणनाथस्तु ब्रह्मणस्पतिरुच्यते । संयोगाऽयोगकादीनां ब्रह्मणां पातृभावतः ॥२३॥ एतत् सर्वं समाख्यातं रहस्यं परमाद्भुतम् । गजाननस्य ते दक्ष प्रकृतं शृणु सांप्रतम् ॥२४॥

॥ ॐमिति श्रीमदान्त्ये पुराणोपनिषदि श्रीमन्मौद्गले महापुराणे नवमे खंडे योगचरित्रे गणेशस्वरूपवर्णनं नाम तृतीयोऽध्यायः ॥

॥ श्रीगणेशाय नमः ॥ तपसा भक्तिभावेनागतं दृष्ट्वा गजाननम् । अयोगो हर्षितोऽत्यंतमुत्थाय प्रणनाम तम् ॥ १ ॥ ततः पूज्य गणेशानं प्रभुं नानोपचारकैः । पुनः प्रणम्य विघ्नेशं तुष्टाव करसंपुटः ॥२॥ अयोग उवाच । शांतिस्वरूपाय सुशांतिदाय वाणीमनोहीनतमाय ढुंढे । वाणीमनोयुक्तविचारिणे वै योगाय योगाधिपते नमस्ते ॥३॥ वाणीमनोयुक्तमयं वदामि नो विश्वरूपोऽसि कथं स्तवीमि । नित्यं गणेशाय नमो महात्मन् योगाय योगाधिपते नमस्ते ॥४॥ वाणीमनोहीनमयं कथं त्वां ब्रुवेऽद्य संयोगमयं कदा च । नो योगरूपं त्वथ ते नमो वै योगाय योगाधिपते नमस्ते ॥५॥ त्वत्तः प्रसूतानि महानुभाव ब्रह्माणि विश्वानि पराणि भूयः । त्वय्येव लीनानि ह्यभिन्नभावाद्योगाय योगाधिपते नमस्ते ॥६॥ नित्यं ह्ययोगाय निवृत्तिदाय मायाविहीनाय गणाधिपाय । वाणीमनोहीनतया सुलभ्य योगाय योगाधिपते नमस्ते ॥७॥ स्वानंदरूपाय सुशांतिदाय सिद्ध्या च बुद्ध्या सह खेलकाय । वाणीमनोहीन निजात्मलभ्य योगाय योगाधिपते नमस्ते ॥८॥ अव्यक्तरूपाय च साहजाय मोहेन हीनाय सदा शिवाय । त्रैविध्यनाथाय च नेति कर्त्रे योगाय योगाधिपते नमस्ते ॥९॥ सामान्यरूपाय त्रयीमयाय द्वंद्वप्रकाशाय च विष्णवे ते । आनंदनाथाय सुखेलकाय योगाय योगाधिपते नमस्ते

॥१०॥ आत्मस्वरूपाय सदाऽमृतस्थयोगेन संलभ्यतमाय भानो। भेदैर्विहीनाय च जीवनाय योगाय योगाधिपते नमस्ते ॥११॥ नानाप्रभेदेषु च तन्मयाय सर्वस्वरूपाय च शक्तये ते। आनंत्यभावैश्च सुमोहदाय योगाय योगाधिपते नमस्ते ॥१२॥ साक्षिस्वरूपाय च सांख्ययोगलभ्यस्वरूपाय सदात्मसंस्थ। बोधेन हीनाय परात्पराय योगाय योगाधिपते नमस्ते ॥१३॥ बोधस्वरूपाय संख्याविहारकर्त्रे सदा पालकभावधारिन्। त्रैविध्यनाथाय महोदराय योगाय योगाधिपते नमस्ते ॥१४॥ सोहंस्वरूपाय च चिन्मयाय मोहेन युक्ताय च हीनकाय। देहिस्वरूपेण विहारकर्त्रे योगाय योगाधिपते नमस्ते ॥१५॥ बिंदुप्रचुराय चतुष्पदाय चतुर्विधेषु प्रभवाय तुभ्यम्। आनंत्यतत्त्वाय च देहभोक्त्रे योगाय योगाधिपते नमस्ते ॥१६॥ तुर्यात्मदेहाय लयात्मकाय कालस्वरूपाय गणेश्वराय। नादात्मकायाऽथ त्रिदेहगाय योगाय योगाधिपते नमस्ते ॥१७॥ आनंदकोशात्मकसंस्थिताय प्राज्ञाय सौषुप्तमयाय तुभ्यम्। नित्येश्वरायैव तयोः प्रचारिन् योगाय योगाधिपते नमस्ते ॥१८॥ सर्वांतरस्थाय च सूक्ष्मकाय स्वप्नप्रचुराय च तैजसाय। हिरण्यगर्भाय तयोः प्रचारिन् योगाय योगाधिपते नमस्ते ॥१९॥ बाह्यस्थितायान्नमयाय विश्ववैश्वानरायैव तयोः प्रचारिन्। स्थूलस्वरूपाय च जागृदास्थ योगाय योगाधिपते नमस्ते ॥२०॥ विश्वस्य द्वैविध्यमयाय तुभ्यं नानांडरूपाय च खेलकाय। शक्ते च धात्रे हरये शिवाय योगाय योगाधिपते नमस्ते ॥२१॥ एते गणेशाधिपते कलांशा विघ्नेश्वरास्ते गणनायकाय। न त्वं सदैतैः सहितो हि तुभ्यं योगाय योगाधिपते नमस्ते ॥२२॥ स्तुमः कथं नाथ गणेशरूपं संयोगहीनं च ह्ययोगहीनम्। तादात्म्यरूपं भव तुष्टचित्तं योगाय योगाधिपते नमस्ते ॥२३॥ मुद्गल उवाच। एवं स्तुत्वा गणेशानं प्रणनाम कृतांजलिः। अयोगस्तं गणाधीशो जगाद घननिःस्वनः ॥२४॥ गणेश उवाच। वरान् वृणु महाभाग मनसीप्सितरूपकान्। दास्यामि भक्तितुष्टोऽहं स्तोत्रेणानेन योगप ॥२५॥ त्वया कृतमिदं स्तोत्रं योगशांतिपदप्रदम्। पठतां शृण्वतां नित्यं नानासिद्धिप्रदं भवेत् ॥२६॥ यं यमिच्छसि तं तं वै दास्यामि स्तोत्रपाठतः। मयि प्रीतिकरं चास्तु भक्तिभावप्रदं तथा ॥२७॥ एकविंशतिवारं चैकविंशति दिनावधि। पठेत् तस्य सर्वं च दास्यामि दुर्लभं हि यत् ॥२८॥ एवमुक्त्वा गणेशानः सस्वजे तं गणाधिपम्। अयोगरूपिणं हर्षसंयुक्तं प्रचकार ह ॥२९॥ ततोऽयोगो गणाध्यक्षं प्रणम्य च पुनः पुनः। जगाद भक्तिसंयुक्तो हृष्टरोमा सुहर्षितः ॥३०॥ अयोग उवाच। यदि ढुंढे वरान् मे त्वं दास्यसि भक्तिमोहितः। तदा ते पादयुग्मे मे भक्तिं देहि दृढां पराम् ॥३१॥ पूर्णयोगस्वरूपस्थं मां

कुरुष्व गजानन । सुखं मुक्तस्वरूपस्थं नाथ नेच्छामि ते नमः ॥३२॥ मुद्गल उवाच । अयोगगणराजस्य श्रुत्वा वचनमुत्तमम् । जगाद तं गणेशानस्तथेत्यंतर्हितोऽभवत् ॥३३॥ अयोगस्तं हृदि स्थाप्य भजतेऽनन्यमानसः । अंते योगमयः सोऽपि बभूव मोक्षदायकः ॥३४॥ इति ते सर्वमाख्यातं चरितं गणपस्य यत् । पूर्णयोगधरस्यापि समासेन प्रजापते ॥३५॥ अतस्त्वं गणराजं तं भजस्व भक्तिसंयुतः । तेन यज्ञमिमं पूर्णं करिष्यसि न संशयः ॥३६॥ अंते योगयुतश्चैव ब्रह्मभूतो भविष्यसि । आज्ञां देहि गमिष्यामि त्वदातिथ्यसुतोषितः ॥३७॥ रहस्यं गणनाथस्य कथितं सकलं मया । नान्यत् किंचिदतो दक्ष परं वेदादिसंमतम् ॥३८॥ शृणुयाद्यः पठेद्वाऽपि स सर्वं प्राप्नुयाच्छुभम् । अंते योगमयो भूत्वा संतिष्ठेत् गणपात्मकः ॥३९॥

॥ ओमिति श्रीमदान्त्ये पुराणोपनिषदि श्रीमन्मौद्गले महापुराणे योगचरिते नवमे खंडे पूर्णयोगचरितवर्णनं नाम चतुर्थोऽध्यायः ॥

॥ श्रीगणेशाय नमः ॥ दक्ष उवाच । धन्योऽहं कृतकृत्योऽहं कृतस्त्वया महामुने । येन गणेशमाहात्म्यं श्रावितं योगदायकम् ॥१॥ गणेशगीतासारादि कथितं तु विशेषतः । ज्ञानं योगप्रदं पूर्णं संक्षेपेण त्वया परम् ॥२॥ तत्र बुद्धं मया सर्वमतः सौलभ्यतो वद । योगं क्रमयुतं पूर्णं येन योगी नरो भवेत् ॥३॥ सूत उवाच । एवं पृष्टो महायोगी मुद्गलस्तमुवाच यत् । हर्षेण महता युक्तस्तत्तेऽहं कथयामि तु ॥४॥ मुद्गल उवाच । धन्योऽसि कृतकृत्योऽसि साक्षाद्गणपतेः किल । विभूतिवाचकस्तत्र न चित्रमिदमुत्तमम् ॥५॥ त्वया पृष्टं महाभाग लोकोपकारकारकम् । सर्वेषां सुलभत्वेन योगशांतिपदप्रदम् ॥६॥ कथयामि च ते प्रीत्या गुह्यं वेदरहस्यकम् । शृणुष्वैकमना दक्ष योगं शांतिप्रदायकम् ॥७॥ चित्तं पंचविधं प्रोक्तं तेषु पंचविधो रसः । सरसं चित्तमुत्सृज्य योगी भवति मानवः ॥८॥ क्षिप्तं मूढं च विक्षिप्तमेकाग्रं च निरोधकम् । चित्तं पंचविधं विद्धि जगत्सु ब्रह्मसु स्थितम् ॥९॥ व्यष्टिभावे स्थिता ये तु जंतवो विविधात्मकाः । लक्षचतुरशीतिषु योनिषु संभवाः किल ॥१०॥ देहभोगादिमार्गेषु कुशलाः संभवंति ये । तेषु स्वस्वप्रपंचेषु नानाकार्यपरायणाः ॥११॥ तैः क्षिप्तं कार्यसिद्ध्यर्थं चित्तं कार्येषु नित्यदा । तत्तत्कार्यप्रकाशेन प्रकाशयति तान् हृदि ॥१२॥ तेन कार्येषु दक्षास्ते भवंत्यत्र न

संशयः । तदेव क्षिप्रसंज्ञं त्वं चित्तं जानीहि मानद ॥१३॥ केचित् स्वल्पज्ञकास्तेषु केचिज्ज्ञानाधिका मताः । मध्यमाः केचिदेवं तु नानाभेदाश्रिता नराः ॥१४॥ त्रिविधेषु विभागेषु स्थिता नानाविभेदतः । नानाज्ञानयुतास्तेषां रूपं न कथितुं क्षमम् ॥१५॥ लक्षचतुरशीतिषु जंतवो विविधात्मकाः । व्यष्टिस्थाः सर्वकार्येषु ज्ञानहीना भवंति ये ॥१६॥ ते मूढाः कथ्यते लोकैर्विषये चतुरैः सदा । तेषु नानाविधा भेदा अल्पाधिकसुमध्यमाः ॥१७॥ तेषां प्रकाशकं चित्तं नानामूढ-स्वभावगम् । तदेव मूढसंज्ञाख्यं चित्तं ज्ञानव्यसंजसा ॥१८॥ परैः संबोधितो जंतुर्न बुबोध विचारतः । कार्यं नानाविधं तस्य चित्तं मूढं प्रकीर्तितम् ॥१९॥ व्यष्टिस्था ये नरा दक्ष स्वधर्मनिरताः सदा । नानातपःपरा भूत्वा मुक्तिमिच्छंति शाश्वतीम् ॥२०॥ विषयेषु विरज्यैव सदा ब्रह्मपरायणाः । कुर्वंति विविधं कर्माऽहर्निशं मुक्तिकारणात् ॥२१॥ तदपि ब्रह्म हृदये न दृष्टं तैर्महात्मभिः । न संसारसुखे चित्तं तेषां रमति कर्हिचित् ॥२२॥ अतो विक्षिप्तचित्तास्ते मता योगि-जनैः पुरा । ब्रह्मार्पणक्रियाः सर्वाः कुर्वन्त्यंतरबाह्यजाः ॥२३॥ विशेषेणैव क्षिप्तोऽहं संसारे मायया सदा । विगतक्षेपणं सर्वं नानासाधनभावतः ॥२४॥ तेषां मुक्त्यर्थमत्यंतं प्रकाशयति भावनाम् । चित्तं क्रियात्मिकां तेन विक्षिप्तं तत्प्रकीर्ति-तम् ॥२५॥ तत्र नानाक्रियायाश्च सामर्थ्येन विमोहितः । जानाति देवतां तुष्टां ममोपरि न संशयः ॥२६॥ कदा देव-प्रसादादि गृह्य विक्षेपसंयुतः । अनाचारां क्रियां कुर्याद्देवाज्ञावशगो मुधा ॥२७॥ स्वप्नेषु विविधान् भावान् पश्यति तद्गतचेतसा । सत्यं स्वप्नं मदीयं तु मान्यं नादृशजं चरेत् ॥२८॥ एवं विक्षिप्तभावेन मोहितः स कदाचन । अनाचारं करोत्येव नानातपःप्रभावतः ॥२९॥ समष्टिव्यष्टिसंस्थं यच्चित्तं वैराटरं परम् । तेन व्यष्टिं समाव्याप्य भुंक्ते स विविधं सुखम् ॥३०॥ वैराटस्य क्रिया प्रोक्ता व्यापिका शास्त्रसंमते । तत्र व्यापकभावस्य चित्तं प्रकाशदं मतम् ॥३१॥ तत्त्वेषु विविधेष्वेव स्थूलसूक्ष्मादिरेषु च । व्यापकभावकाशत्वाच्चित्तं तेषु स्थितं मतम् ॥३२॥ समष्टिव्यष्टिसंयोगेऽन्नं ब्रह्म स्थूलगं परम् । तथा स्वप्नगतं सूक्ष्मं सौषुप्तं समसंस्थितम् ॥३३॥ चेतनाभावगं पूर्णं तद्ब्रह्मादात्मकं मतम् । अस्मिताख्यं परं ब्रह्म तेषु चित्तं प्रकीर्तितम् ॥३४॥ समष्टिव्यष्टिभागस्य तयोरैक्यस्य च प्रभो । प्रकाशकारकं विद्धि चित्तमेकाग्रसंज्ञितम् ॥३५॥ समष्टिव्यष्टिभावेषु न भिन्नं भवतीत्यहो । तेनैकाग्रं समाख्यातं चित्तं तज्ज्ञानकारकम् ॥३६॥ देहश्चतुर्विधः प्रोक्तः स्थूलः सूक्ष्मः समात्मकः । अस्मिताख्यश्चतुर्थश्च तेषु देही स्थितो मतः ॥३७॥ देहेषु मोहितो देही जीव इत्यभिधीयते ।

मोहहीनः स एवाऽपि शिवः प्रोक्तो मनीषिभिः ॥३८॥ जीवशिवात्मिका संज्ञा देहिनो भ्रममात्रतः । सदैकात्मस्वभावत्वात्तत्र भेदो न विद्यते ॥३९॥ तत्र जीवशिवाकारभावप्रकाशकारकम् । चित्तमेकाग्रसंज्ञाख्यं तिष्ठति देहिसंश्रितम् ॥४०॥ सास्मिताच्च परं चित्तमेकाग्रं विद्यते न वै । देहदेहिमयं चित्तमेकाग्रं योगिनां मते ॥४१॥ चतुर्णां वपुषां यत्र ब्रह्माकारेण जायते । संयोगो बिंदुरूपं तज्ज्ञातव्यं ब्रह्म सर्वगम् ॥४२॥ चतुष्पदं बुधैः प्रोक्तं चतुर्भिर्वर्जितं सदा । देहानां ब्रह्म विख्यातं नानादेहस्वभावगम् ॥४३॥ तत्र चतुष्पदाकारभावप्रकाशकारकम् । चतुर्भिर्वर्जितस्यैव चित्तं तिष्ठति तद्गतम् ॥४४॥ देहेषु न भवेद्भिन्नं सर्वगमात्मभावतः । निरोधं कथ्यते चित्तं बिंदुधर्मप्रकाशकम् ॥४५॥ जीवशिवात्मभावस्थं मोहहीनं सदात्मगम् । ब्रह्म सोऽहं समाख्यातं सदा भ्रांतिविवर्जितम् ॥४६॥ तत्र जीवशिवाकारमोहहीनप्रकाशकम् । चित्तमात्मस्वरूपस्थं निरोधं कथ्यते बुधैः ॥४७॥ देहदेहिसमायोगे स्वत उत्थानमुच्यते । बोधाख्यं द्वंद्वभावेन ब्रह्म खेलकरं सदा ॥४८॥ तत्र निरोधकं चित्तं तस्य रूपं वदाम्यहम् । संक्षेपेण प्रजानाथ शृणु भावसमन्वितः ॥४९॥ बाह्यं स्थूलं समाख्यातमांतरं सूक्ष्मगं मतम् । बाह्यांतरैकभावस्थमानंददेहगं परम् ॥५०॥ त्रिभिर्हीनं त्रयाणां च चालकं ह्यस्मितात्मकम् । अहमानुभवेनैतज्ज्ञातव्यं योगिनां हृदि ॥५१॥ तेषां संयोगभावे यच्चतुर्णां वपुषां परम् । सर्वात्मकं भवेद्ब्रह्म पंचमं बिंदुसंज्ञितम् ॥५२॥ चतुर्विधा नरस्यैव कल्पना हृदि संस्थिता । अतः परं न भेदोऽस्ति भवेद्येनास्य कल्पना ॥५३॥ बिंदुत्यागे निरालंबं चित्तं भवति सर्वदा । सततं तत् समाख्यातं ब्रह्म ध्यातृविहीनतः ॥५४॥ न किंचिज्ज्ञायते यत्र भेदहीनप्रभावतः । सोहं मात्रात्मकं चित्तं निरालंबसमाधिदम् ॥५५॥ अवलंबनगं चित्तं चतुर्धा देहिसंश्रितम् । अवलंबनहीनं तद्देहिगं चिन्मयं भवेत् ॥५६॥ निरालंबपरित्यागेऽधिकसंरोधनं भवेत् । चित्तस्य देहदेहिभ्यां हीनत्वान्नात्र संशयः ॥५७॥ मनोवाणीविहीनं तच्चित्तं ज्ञातव्यमादरात् । अस्तिनास्तिविहीनत्वादाधाराधेययोगतः ॥५८॥ अवलंबनयोगो न पंचधा योगिनां हृदि । निरालंबनकं तस्मात् मनोवाणीविवर्जितम् ॥५९॥ बोधेन बुद्ध्यते सर्वं निरालंबं समाधिना । अवलंबनकं तद्वद्बोधबोधो न विद्यते ॥६०॥ एवं बोधात्मकं ब्रह्म देहदेहिसमाधिदम् । देहदेहिसमायोगप्रकाशं चित्तमुच्यते ॥६१॥ देहसौख्यं प्रजानाति देहिसौख्यं निरंतरम् । तयोर्योगे च यत् सौख्यं जानाति ब्रह्म बोधगम् ॥६२॥ पदानां बोधभावेन पदार्थानां विशेषतः । उत्थानं जायते तस्मात् स्वत उत्थानमुच्यते ॥६३॥ सुखं ज्ञात्वा समुत्थानं स्वयमेव करोति यः । देहदेहि च सृष्ट्वा स खेलति ब्रह्म-

तत्परः ॥६४॥ तत्रोत्थानप्रकाशाख्यं चित्तं निरोधसंज्ञकम् । तिष्ठत्यत्र न संदेहो ज्ञातव्यं योगिनां हृदि ॥६५॥ बोधत्यागे समाख्यातं ब्रह्म सांख्यं प्रजापते । कः संख्यां कुरुते तस्य बोधनाशप्रभावतः ॥६६॥ उत्थानवर्जितं ब्रह्म सांख्यं साक्षिस्वभावगम् । बोधहीनात् कदा तत्रोत्थानं नैव प्रजापते ॥६७॥ प्रकृतिसंभवं बोधं तयोः पुरुषसंभवम् । योगसौख्यं न जानाति सांख्यं बोधविहीनतः ॥६८॥ बुद्ध्वा सुखं नरस्यैवोत्थानं यथा प्रजापते । तथा मायासुखं ज्ञात्वा ब्रह्मणोत्थानकं भवेत् ॥६९॥ तथा परत उत्थानं सांख्ये नित्यं प्रतिष्ठितम् । तत्र योगं प्रवक्ष्यामि येन योगी नरो भवेत् ॥७०॥ यद्युत्थानसमायुक्तं भवति चेत्तदा भवेत् । उत्थानवर्जितं दक्ष तदेवं बीजमात्मकम् ॥७१॥ उत्थानहीनभावेन सदा सांख्यं विराजति । स्वयं च स्वत उत्थानं निःसृतं तत् प्रभावतः ॥७२॥ सांख्येन न कृतं चैतत्तथाप्युत्थानहीनतः । स्वयं च स्वत उत्थानं जायते नात्र संशयः ॥७३॥ यदाऽमृतं भवेद्दक्ष तदा सत्यं प्रकीर्त्यते । एकं ब्रह्म यदा तिष्ठेत सत्यं तत केन कथ्यते ॥७४॥ न दृष्टमनृतं येन न जानाति स सत्यकम् । सदा तादृशरूपत्वादेकभावप्रदर्शनात् ॥७५॥ अत उत्थानहीनत्वं धृतं तेन विशेषतः । स्वत उत्थानभावाख्यं स्वयमेवोपजायते ॥७६॥ न कृतं तेन सांख्येन स्वयमेव विनिःसृतम् । अतः परत उत्थानं प्राप्तं तत्र न संशयः ॥७७॥ संख्याहीनप्रकाशाख्यं चित्तं तत्र प्रवर्तते । बोधहीनप्रकाशेन जायते तन्निरोधकम् ॥७८॥ उत्थानेन युतं ब्रह्म बोधमयं प्रकीर्तितम् । सांख्यमुत्थानहीनं च तयोर्योगे निजात्मकम् ॥७९॥ स्वतः परत उत्थानं तत्र नैव प्रजापते । जगतां ब्रह्मणां योगे भवति स्वस्वरूपकम् ॥८०॥ स्वस्वरूपात् परो नास्ति संयोगः तन्मयः कदा । स समाधिः समाख्यातो ब्रह्मणस्यात्वयात्मकः ॥८१॥ स्वकीयाभेदभावस्य तत्र प्रकाशकारकम् । चित्तं निरोधसंज्ञं तु तिष्ठत्यत्र न संशयः ॥८२॥ संयोगः पंचधा दक्ष भवति शृणु रूपकम् । तस्य भिन्नं प्रवक्ष्यामि लोकानां हितकारणात् ॥८३॥ एते भेदाः समाख्याता योगेन लयतां ययुः । स्वसंवेद्येन संदेहस्तेन सृष्टाश्च पालिताः ॥८४॥ एतेषां रूपमास्थाय खेलति स्वस्वरूपकम् । नानालीलाकरं प्रोक्तं तदेवं वेदवादिभिः ॥८५॥ उत्पत्तिनाशसंयुक्ता भेदा एते मनीषिभिः । तेषां निजस्वभावत्वादसत्त्वानंद उच्यते ॥८६॥ तद्ब्रह्म शक्तिरूपाख्यं ज्ञातव्यं भेदधारणात् । तत्रासत्काशभावेन चित्तं तिष्ठति निश्चितम् ॥८७॥ एतैर्भेदैर्विहीनं यदमृतं ब्रह्म कथ्यते । एतेषां जीवनं नित्यं तच्च सत्स्वस्वरूपकम् ॥८८॥ तद्ब्रह्म सौरमाख्यातं भेदहीनप्रभावतः । तत्र

निग्यस्य काशाख्यं चित्तं निरोधकं मतम् ॥८९॥ असत् सत् द्विविधं प्रोक्तं तयोर्योगे समात्मकम् । स्वसंवेद्यं परं ब्रह्म विष्णु-द्वंद्वप्रवेशनात् ॥९०॥ तत्रानंदप्रकाशाख्यं चित्तं निरोधसंज्ञितम् । तिष्ठते तेन योगींद्रास्तं गच्छंति समाधिना ॥९१॥ त्रिभिर्हीनं त्रिभिर्युक्तमव्यक्तं नेति कारकम् । मोहहीनप्रभावेण तुरीयं ब्रह्म कथ्यते ॥९२॥ तदेव शिवसंज्ञाख्यं ज्ञानख्यं योगसेवया । तत्र नेति प्रकाशाख्यं चित्तं तिष्ठति तद्गतम् ॥९३॥ त्रिविधं मोहसंयुक्तं मोहहीनं चतुर्थकम् । तेषां संयोग-भावे वै स्वसंवेद्यं प्रकीर्तितम् ॥९४॥ पूर्णसंयोगभावाख्यं पंचमं ब्रह्म तत् स्मृतम् । तस्मात् परो न संयोगः कथ्यते योगिभिः सदा ॥९५॥ स एव गणनाथस्तु स्वानंदाख्यः प्रकीर्तितः । तत्र निजप्रकाशाख्यं चित्तं तिष्ठति सर्वगम् ॥९६॥ अतः परमयोगाख्यं ब्रह्म मायाविवर्जितम् । तदेव योगिभिः प्रोक्तं निवृत्तिसुखदायकम् ॥९७॥ न तत्र जगतां दक्ष ब्रह्मणां योग उच्यते । तस्याऽपि तेषु तद्रूप तेनायोग इति स्मृतः ॥९८॥ ब्रह्मणि तन्मयत्वेन स्वस्य संयोग उच्यते । तस्मान्नि-वृत्तिरापन्ना तेन निवृत्तिसंज्ञकम् ॥९९॥ स्वसंवेद्यस्य नाशेन लभ्यते व्यसमाधिना । नाऽगतं न गतं ब्रह्म संयोगः कुत्र जायते ॥१००॥ तत्रायोगप्रकाशाख्यं चित्तं निरोधसंज्ञितम् । तिष्ठति चापवादेषु निवृत्तिसुखदायकम् ॥१॥ इदं पंचविधं चित्तं कथितं ते प्रजापते । जगत्सु ब्रह्मसु तज्ज्ञं नानाप्रकाशदायकम् ॥२॥ भूमयः पंच विख्यातािश्चित्तस्य विविधात्मनः । भूमीनां त्यागभावे तच्चित्तं ब्रह्ममयं भवेत् ॥३॥ अतः पंचविधं चित्तं त्यज त्वं योगसेवया । योगी भविष्यसि दक्ष चिंतामणौ न संशयः ॥४॥ संयोगायोगसंज्ञस्थं निरोधाख्यं मतं बुधैः । अतः परो निरोधो न विद्यते सर्वसंमते ॥५॥ सार्वभौमात्मधर्मेण योगी भवति मानवः । तत्र शांतिं लभेच्चित्तं त्यक्त्वा भूमिभवं भ्रमम् ॥६॥ योगरूपे सुखं यद्वै योगिनां हृदि वर्तते । तदेव कथितुं दक्ष शक्यते न कदाचन ॥७॥ मनोवाणीमयं चित्तं चतुर्विधं प्रकीर्तितम् । मनोवाणी-विहीनं तु निरोधसंज्ञकं मतम् ॥८॥ अतो योगः समाख्यातो मनोवाणीमयो न च । मनोवाणीविहीनोऽपि कथ्यते नैव योगिभिः ॥९॥ कीदृशं ब्रह्म तत्राहं योगेन कीदृशेन च । ब्रह्मभूतः स्वयं जात एभ्यः शांतिं लभेन्नरः ॥११०॥ योगे योगी नरो जानस्तत्र न ज्ञायते कदा । ब्रह्म वा साधनं किंचिद्ब्रह्मभूतस्य कारकम् ॥११॥ तन्मयत्वं ब्रह्मणि न न च तन्मयवर्जनम् । अतः शांतिं समागृह्य शांतियोगपरो भवेत् ॥१२॥ पंचविधेषु चित्तेषु दृश्यते जगतां परम् । ब्रह्मणामैश्वरं सौख्यं रसं तत्र न धारयेत् ॥१३॥ नानारसविहीनं तु चित्तं कृत्वा प्रजापते । तत्त्यक्त्वा स भवेद्योगी शांत्या शांतिमवाप्नुयात् ॥१४॥

लोतमोर्णवमानंदाद्व्रजंत्यप्रेरितान्यपि । प्रारब्धेन तथा कामान् भुनक्ति योगिसत्तमः ॥१५॥ नानाद्वंद्वविहारेषु समभावपरायणः । योगी भवति शांत्या च सदा योगसुखे रतः ॥१६॥

॥ ॐ तत्सदिति श्रीमदांत्ये पुराणोपनिषदि श्रीमन्मौद्गले महापुराणे नवमे खंडे योगचरिते मुद्गलदक्षसंवादे योगामृतार्थशास्त्रे चित्तभूमिनिरोधने सार्वभौमयोगो नाम पंचमोऽध्यायः ॥

॥ इति योगगीतासूपनिषत्सु समासात् प्रथमोऽध्यायः ॥

॥ श्रीगणेशाय नमः ॥ दक्ष उवाच । योगस्यानुभवं ब्रूहि यत्र शांतिं लभेत मनः । इमं त्यक्त्वा सुशांत्या तद्युक्तः तिष्ठेत् महामुने ॥१॥ मुद्गल उवाच । न तत्र दृश्यते दक्ष जगद्ब्रह्मभवं सुखम् । तन्मायामयगं दृष्ट्वा तस्मान्निर्वृत्तिगो भवेत् ॥२॥ नाहं देहो न मे देहो नाहं नानाश्रमान्वितः । चराचरमयो नैव ताभ्यां संवर्जितो न च ॥३॥ न समष्टिसमायुक्तो व्यष्टिगो न कदाचन । ब्रह्माऽहमखिलेष्वेव तत्तद्भावविवर्जितः ॥४॥ न बाह्यसुखभोक्ताऽहं नांतरस्थपरायणः । न समानगतोऽहं तु नात्मप्रतीतिधारकः ॥५॥ न स्थूलो नैव सूक्ष्मोऽहं नानंदगः कदाचन । न नादेहसंस्थश्च सर्वाकारः सदा मतः ॥६॥ चतुष्पादाः सति मे चेत मायया संधृता मया । मायाहीनप्रभावेण पादहीनोऽहमंजसा ॥७॥ मायायुक्तवियुक्तत्वं मयि नैव प्रतिष्ठितम् । मायासंस्थापितं द्वंद्वं तदप्याश्चर्यमुत्तमम् ॥८॥ अनेनानुभवेनैव योगी विदुरतो भवेत् । तत्र लीन-स्वभावेन सदा शांत्या प्रवर्तते ॥९॥ अथाहं भेदहीनश्च न भेदो मयि वर्तते । सदा संततभावेन संस्थितोऽत्र निरंतरम् ॥१०॥ न सृजामि हरामेव पालयामि न निश्चितम् । स्वयमेव जगद्भाति यथा मयि ध्रुतं भवेत् ॥११॥ उत्पन्नं स्वस्वभावेन स्थितं नष्टं तथा किल । विश्वं तत्र न मे हानिर्वृद्धिर्भवति कर्हिचित् ॥१२॥ न विश्वस्मिन्नहं जीवो न शिवः साक्षिभावगः । भ्रांत्या मायायुतं हीनं वदंत्ययोगिनः सदा ॥१३॥ यथाऽऽकाशभवं मेघपटलं सर्वतः स्थितम् । तत्र सूर्यस्य किं दक्षाच्छादनं संभवेत् कदा ॥१४॥ नष्टेऽभ्रे किं रविः साक्षाच्छादनेन विवर्जितः । तथा मोहविमोहौ च मयि भ्रांत्या वदंति ये ॥१५॥

तदैकात्मस्वरूपाख्ये मयि मोहविमोहकौ । कथं भेदौ प्रवर्तेते पश्य मायाप्रभावजौ ॥१६॥ तथापि विश्वसंयुक्तो मोहितो-
ऽहं न संशयः । ज्ञात्वाऽऽत्मानं विमोहोऽहं सदा साक्षी न संशयः ॥१७॥ मायया जीवसंज्ञोऽहं तथा शिवो न संशयः ।
मयि ब्रह्मणि विश्वं तत् दृश्यते नैव दृश्यते ॥१८॥ एवं ज्ञात्वा स्वयं योगी सदा शांत्या प्रवर्तते । द्वंद्वभावं परित्यज्य
योऽहं ब्रह्मणि संस्थितः ॥१९॥ अतः परं प्रवक्ष्यामि ब्रह्मानुभवरूपकम् । न देही नैव देहस्थोऽहं भवामि कदाचन ॥२०॥
संततं मयि नास्त्येव विश्वं मयि न विद्यते । भेदाभेदविहीनत्वाद्ब्रह्म ब्रह्मण्यहं रतः ॥२१॥ विश्वरूपोऽहमेवेदं मयि सर्वं
प्रतिष्ठितम् । विश्वहीनो न संदेहः सदैकरूपधारकः ॥२२॥ न सृष्टं पाल्यते नैव ह्रियते न मया कदा । विश्वं सृष्टं हृतं
नित्यं पालितं सर्वदा मया ॥२३॥ मयि संततभावश्च दृश्यते न विनिश्चितम् । न विश्वं विविधाकारं नानादेहपरायणम् ॥२४॥
सदा बोधमयोऽहं तु देहदेहियुतस्तथा । मम तत्र न भो दक्ष बंधाऽबंधौ प्रकीर्तितौ ॥२५॥ मायया संयुतो नित्यं देहदेहिमयो
रतः । मायाहीनप्रभावेण देहदेहिविवर्जितः ॥२६॥ मायायुक्तवियुक्तत्वं मयि कुत्र प्रदृश्यते । सदाऽहं बोधरूपाख्यो
ब्रह्मणि ब्रह्मभावितः ॥२७॥ एवं बोधात्मकेनैवानुभवेन प्रजायते । योगी योगसमायुक्तः सदा शांत्या प्रवर्तते ॥२८॥
अतः परं विबोधाख्यं वक्ष्यामि ब्रह्मभूतकम् । प्रकृतिर्न तथा दक्ष पुरुषोऽहं न निश्चितम् ॥२९॥ तयोर्योगेन बोधोऽहं
ब्रह्माऽहं भोगवर्जितः । सदा ब्रह्मणि संस्थश्च खेलहीनप्रभावतः ॥३०॥ मिथ्यारूपं जगत् सर्वं जगदात्मा तथा मतः ।
तयोर्योगकरं ब्रह्म मिथ्यामूलप्रकाशकम् ॥३१॥ मयि ब्रह्मणि नास्त्येव प्रकृतिर्वा पुमान् क्वचित् । तयोर्योगो भ्रमाकारः
सदा खेलपरायणः ॥३२॥ बोधेनोत्थानभावश्च जायते ब्रह्मणः सदा । मिथ्याभूतं तदेवाऽपि कथं मयि प्रवर्तते ॥३३॥
सत्यं ब्रह्म इति प्रोक्तं वेदेषु वेदवादिभिः । तत्र खेलोऽनृताकारः कुतस्तिष्ठति भ्रांतिदः ॥३४॥ सदा ब्रह्मसुखे सक्तो
ब्रह्मणि ब्रह्मभावितः । तत्र भेदादिकं नास्ति स्त्रीपुंभावमयं कदा ॥३५॥ मायया रचितं सर्वमनृताख्यं न संशयः । सा
मयि न स्थिता दक्ष निराधारा भ्रमान्विता ॥३६॥ ब्रह्मरूपं च मां दृष्ट्वा स्वयमेव विनश्यति । माया ततः स्वयं साक्षात्
सत्यरूपो भविष्यति ॥३७॥ यद्यहं मायया युक्तस्तया स्त्रीपुंमयं जगत् । सृजामि चेत्तदा सत्यं मयि कुतः प्रतिष्ठति ॥३८॥
यत्रानृतस्वरूपं तु नास्त्येव वेदवादतः । तदेव सत्यमाख्यातमतो बोधो न दृश्यते ॥३९॥ अनृतं विश्वमखिलं प्रकृतिपुरुषा-
त्मकम् । तस्माद्भिन्नोऽहमेकश्च सत्यरूपो न संशयः ॥४०॥ योगेनैतादृशेनैव शांतियुक्तो भवेन्नरः । संख्यां त्यक्त्वा स

विविधां ब्रह्मभूतस्वभावतः ॥४१॥ अथ स्वानंदयोगं तु वदिष्यामि हिताय ते । तं शृणुष्व प्रजानाथ सावधानेन चेतसा ॥४२॥ सत्यमुत्थानहीनं चानृतमुत्थानसंयुतम् । ब्रह्मणि द्विविधं नास्ति स्वस्वरूपिणि नित्यदा ॥४३॥ योगयुक्तं स्वतोत्थानं सांख्यमुत्थानवर्जितम् । तयोर्योगं परं ब्रह्माऽसत्स्वानंदमयं भवेत् ॥४४॥ उत्थानवर्जितोऽहं नोत्थानयुक्तोऽपि तांजसा । उत्थानयुक्तहीनोऽहं पश्य मे योगमुत्तमम् ॥४५॥ मयि ब्रह्मणि सर्वं तत् स्वस्वरूपमयं भवेत् । तत्रोत्थानेन युक्तत्वं हीनत्वं नैव दृश्यते ॥४६॥ अहो मायाप्रभावेण मां वदंति विमोहिताः । उत्थानेन युतं हीनं स्वस्वरूपं निजं स्तम् ॥४७॥ उत्थानसंयुतं ब्रह्मोत्थानहीनं प्रकीर्तितम् । ब्रह्मणि तन्मयं सर्वं संयोगायोगभावतः ॥४८॥ मयि ब्रह्मणि संयोगो जायते योगिनां यदा । उत्थानेन युतं हीनं कः पश्यति ततः परम् ॥४९॥ समाधिहीनभावेन पश्यंति विविधं सदा । अयोगिनो न संदेहो योगिनां वै न विद्यते ॥५०॥ सर्वं ब्रह्मेति वेदेषु कथ्यते वेदवादिभिः । अतो मायां परित्यज्य ब्रह्माकारो भवेन्नरः ॥५१॥ अनेन विधिना योगं साधयेद्यः समाधिना । ब्रह्मणि ब्रह्मभूतः स शांतिं प्राप्नोति शाश्वतीम् ॥५२॥ अथ सत्स्वस्वरूपस्य विधियोगं वदामि भोः । तं ज्ञात्वा योगमार्गेण योगी भवति मानवः ॥५३॥ सर्वं ब्रह्मेति वेदेषु कथितं नात्र संशयः । तदेवोपाधिसंयुक्तं सर्वं मायाप्रभावतः ॥५४॥ एकमेवाद्वितीयं यद्ब्रह्म वेदविवादतः । तत्र सर्वं कुतो भाति नानाभावपरायणम् ॥५५॥ नाहमुत्थानसंयुक्तो नाहमुत्थानवर्जितः । तयोर्योगमयोऽहं नाद्वितीयेऽस्मिन् स्थितः सदा ॥५६॥ न सत्यं मयि नास्त्येवानृतं तत् संयुतं परम् । ब्रह्म संयोगदं नास्ति सदाऽहं ब्रह्मसंज्ञकः ॥५७॥ न मया सत्यरूपं तु सृष्टं नानृतरूपकम् । तयोर्योगमयं नैवामृतोऽहं चात्मभावतः ॥५८॥ आदिमध्यांतभावाश्च कुतो मयि भवंति ते । सदामृतमयं संस्थोऽहमात्मा ब्रह्मभावितः ॥५९॥ मायया संयुताः सर्वे सर्वेषां जीवनं परम् । मां वदंति विशेषेण मयि सर्वं न विद्यते ॥६०॥ सर्वात्मकं परं ब्रह्म नानात्वेत्युतं भवेत् । खेलहीनं भवति च तदेवापि तयोः परम् ॥६१॥ तत्राहं नागतो दक्ष न गतोऽपि कदाचन । स्वयमेव भवेत् पश्य जीवनं मे प्रभावतः ॥६२॥ तत्र किं मयि सर्वात्मविकारो दृश्यते कदा । भ्रांतियुक्ता मां वदंति जीवनं ब्रह्मणां परम् ॥६३॥ ब्रह्मणां जगतां नैव जीवनं संधृतं मया । स्वयमेव प्रभावेण मयि तत् दृश्यते वृथा ॥६४॥ सदा ब्रह्मणि संस्थोऽहं भेदाभेदादिवर्जितः । अद्वितीयप्रभावेणात्माऽहं पूर्णस्वभावतः ॥६५॥ अनेन योगमुख्येन योगी संजायते नरः । ब्रह्मणिब्रह्मभूतत्वाच्छांतियुक्तो भवेत् सदा ॥६६॥ अतः परं समाख्यं यद्ब्रह्मानु-

भवरूपकम् । कथयामि महाप्रीत्या येन योगी भवेन्नरः ॥६७॥ नाहं सर्वात्मको दक्ष नाहमात्मात्मकः कदा । आनंदोऽहं तयोः साम्ये ब्रह्मणि ब्रह्मभावतः ॥६८॥ मया मायाबलेनैव सर्वात्मकं प्रतिष्ठितम् । एकमेवाद्वितीयाख्यं तयोः साम्येऽहमास्थितः ॥६९॥ ब्रह्मणि सर्वभावश्च भावहीनं कुतो भवेत् । अमृतं मृतमूलं यन्नास्त्येव मयि सर्वदा ॥७०॥ अनंतलीलया युक्तं लीलाहीनं न विद्यते । मयि लीलायुतं हीनं वर्तते पश्य मे महः ॥७१॥ अखंडरूपभावेन संस्थितोऽहं सदाऽमलः । नानाविकारहीनत्वाद् द्वाभ्यां हीनोऽहमंजसा ॥७२॥ ब्रह्मणि सर्वभावश्च वर्तते नात्र संशयः । सदात्मभावस्तत्रैव साम्यं वेद ततः स्मृतम् ॥७३॥ यद्यत् संकथ्यते वेदे तेषु ब्रह्म स्थितं मतम् । न वर्ण्यते तथा तत्र न तद्ब्रह्ममयं किल ॥७४॥ अतः समं समाख्यातं ब्रह्म वेदविवादतः । आनंदमुभयानंदादात्मसंतादृद्विचार्य ॥७५॥ आनंदोऽहं न संदेहो ब्रह्म ब्रह्मसु संस्थितम् । अनेनानुभवेनैव शांतियुक्तो नरो भवेत् ॥७६॥ अतस्ते व्यक्तसंज्ञस्थं कथयामि प्रजापते । ब्रह्मानुभवमाहात्म्यं येन योगी भवेन्नरः ॥७७॥ अहमव्यक्तरूपश्च त्रिभिर्हीनः सदा मतः । त्रिषु मोहविहीनोऽहं त्रितनिकारकः परः ॥७८॥ सर्वात्मकं मयि नास्ति तथाऽमृतमयं न च । साम्यं स्वाधीनसंज्ञऽस्थ ब्रह्मणि तंदनात्मकम् ॥७९॥ उत्थानयुक्तहीनाख्यो मोहः सर्वमये स्थितः । सदाऽमृतमयो मोहोऽखंडब्रह्मणि कथ्यते ॥८०॥ तंदनं सर्वभावेषु समत्वात्मोहरूपकम् । सदा स्वाधीनता तेषु कुतस्त्रिषु भवेत् किल ॥८१॥ त्रिभिर्युक्तोऽहमत्यंतं तदपि त्रिविमोहनः । भिन्नः सदा त्रयाणां तु नेति कर्ताहऽमंजसा ॥८२॥ नानाभावसमायुक्तं भावहीनं ततः परम् । साम्यमुभयगं तेभ्यः परोऽव्यक्तस्ततः स्मृतः ॥८३॥ सृष्ट्वाऽहं त्रिविधां मायां तत्र खेलकरो मुदा । मोहहीनोऽहं तदपि मायायाः स्वप्रभावतः ॥८४॥ मदाज्ञया त्रयं नित्यं चलत्यत्र न संशयः । स्वस्वव्यापारसंयुक्तं स्वाधीनोऽहं प्रभावतः ॥८५॥ त्रयाणामंतरे प्रज्ञस्तिष्ठाम्यत्र न संशयः । ममांतरे कोऽपि न वै प्रेरकः साधुसत्तम ॥८६॥ स्वस्वभावेषु नित्यं तु प्रेरकस्त्रिषु संस्थितः । तथापि नैव मे मोहो नाहं प्रेरक उच्यते ॥८७॥ अहमव्यक्तरूपश्च वेदे संकथितो मतः । नेह नानास्तिभावाख्यः सदा नानात्रिवर्जितः ॥८८॥ नेह नानाप्रमाणेनाऽव्यक्तं ब्रह्म सनातनम् । तदेवाहं सुखे सक्तः सदा ब्रह्मणि योगतः ॥८९॥ सर्वेषां नेति कर्ताऽहं महादंडधरः प्रभुः । नेति कर्ता नास्ति मे कस्तेनाव्यक्तोऽहमंजसा ॥९०॥ मनोवाणीविहीनोऽहमव्यक्तः परमो मतः । अनेनानुभवेनैव शांतिं प्राप्नोति मानवः ॥९१॥ अथ पूर्णनिजानंदानुभवं श्रृणु सौख्यदम् । येन स्वानंदसंयुक्तो भविष्यसि महामते ॥९२॥ अहं ब्रह्ममयः

साक्षात् मयि मोहविवर्जितम् । कुतो मोहयुतं ब्रह्म निजरूपं भवेत् कदा ॥९३॥ महावाक्ययुता वेदा यदा लीनाः समाधिना । तदा स्वानंदगाः प्रोक्ताः पश्य वेद महात्मभिः ॥९४॥ अहंभावयुतो जंतुर्माययया तुर्यभावया । मोहहीनश्च युक्तश्च भवति भ्रमभावतः ॥९५॥ चतुर्विधं मया सृष्टं नानाभावपरायणम् । भावहीनं समानं चाव्ययं तेषु स्थितेन वै ॥९६॥ ब्रह्मदोषविहीनं तु दोषयुक्तं प्रकीर्तितम् । साम्यं नेतिमयं वेद चतुर्हीनपरं भवेत् ॥९७॥ स्वानंदे तन्मयो योगी भवते यः समाधिना । न पश्यति पुनर्भ्रांत्र चतुर्षु मोहितात्मसु ॥९८॥ समाधिना युतो योगी निजरूपे लयं गतः । न पुनर्दर्शनं तस्य तेषां तत्र प्रवर्तते ॥९९॥ कीदृशोऽहमिमां मायां यस्त्यक्त्वा योगसंयुतः । ब्रह्मणि ब्रह्मभूतः स भवति स्वस्वरूपिणि ॥१००॥ यदा ब्रह्मणि योगेन तन्मयो भवति स्वयम् । स्वपरादिकमेवेदं पुनर्वद कुतः प्रभो ॥१॥ अहं ब्रह्मेति यत् प्रोक्तं पश्य वेद विचारतः । तेनैव कृतकृत्यः स भवति योगसेवया ॥२॥ एवं संयोगयोगेन भवेत् ब्रह्मणि तन्मयः । शांतियुक्तः स वै साक्षात् वर्तते शांतिधारकः ॥३॥ अतः परमयोगाख्यं वदामि योगमुत्तमम् । तत्रानुभवमात्रेण शांतियुक्तो नरो भवेत् ॥४॥ अहं ब्रह्मेति यत् प्रोक्तं कुतस्तत्र भवेदिदम् । तत्सयत्वं प्रजानाथ ब्रह्म ब्रह्मणि संस्थितम् ॥५॥ ब्रह्म वार्ताविहीनं च सतोगतिविवर्जितम् । तदेव नागतं कुत्र न ब्रह्मणि गतं पुनः ॥६॥ यदा भिन्नं विहारेषु संसक्तं जायते परम् । तदा योगेन स्वानंदयुक्तं भवति नान्यथा ॥७॥ ब्रह्म ब्रह्मणि संस्थं च नागतं न गतं सतम् । कुतो योगेन तत्रैव तन्मयो जायते नरः ॥८॥ सदाऽहं ब्रह्मरूपश्च न मायासंयुतः कदा । भ्रांत्या मां नैव जानंति स्वमहिम्नि स्थितं परम् ॥९॥ सर्वसंयोगयोगाख्या माया नानाभ्रमात्मिका । मयि ब्रह्मणि सा कुत्र तिष्ठति ब्रह्मवर्जिता ॥१०॥ यथा मरीचिसंस्थं च तोयं व्यर्थभ्रमप्रदम् । तथा मयि महामाया व्यर्था संयोगधारिका ॥११॥ ब्रह्मदोषविहीनं तु वेद संकथितं पुरा । तदेव मायया युक्तं कथं भवति मोहितम् ॥१२॥ भ्रांतियुक्तं सुयोगेन भ्रांतिहीनं भवेत् कथम् । ब्रह्ममायायुता मूर्खा वदंति ब्रह्मवर्जिताः ॥१३॥ अतोऽहं नागतः पश्य जगत्सु ब्रह्मसु प्रभुः । न ब्रह्मणि गतस्तत्र पुनर्योगस्य सेवया ॥१४॥ ब्रह्मणि विविधाकारा माया नैव प्रतिष्ठति । मायायां नैव तद्ब्रह्म ह्यपवादप्रभावतः ॥१५॥ अयोगस्त्रिविधः प्रोक्तो मृदुमध्याधिमात्रतः । तेषां भेदं प्रवक्ष्यामि मायामूलनिकृंतनम् ॥१६॥ स्वतोत्थानभ्रमं त्यक्त्वाऽहं ब्रह्म ह्यपवादतः । यस्तिष्ठति नरः सोऽपि मृदुयोगयुतो सतः ॥१७॥ परतोत्थानजं दक्ष भ्रमं त्यक्त्वा ह्ययोगतः । तिष्ठति

मध्यगः सोऽपि मतो योगस्य सेवया ॥१८॥ स्वतः परत उत्थानहीनं संयोगधारकम्। ब्रह्म तस्य भ्रमं त्यक्त्वा तिष्ठति
सोऽस्मिमात्रगः ॥१९॥ नाऽऽगतोऽहं यदा भ्रांत्या जगत्सु ब्रह्मसु भ्रमत। तदा मे गमनं कुत्र योगेनैव भविष्यति ॥१२०॥
ब्रह्मभूतस्वभावेन स तिष्ठति नरोत्तमः। निवृत्तियोगमाश्रित्य सदा शांत्या प्रवर्तते ॥२१॥ अधुना पूर्णयोगस्यानुभवं ते
वदाम्यहम्। योगी येन नरो भूत्वा तिष्ठति गणपप्रियः ॥२२॥ नाहं न ब्रह्म वेदेषु कथितं भेदभ्रांतिदम्। ब्रह्मणि द्विविधं
दक्ष कुतो भवति चित्तगम् ॥२३॥ अहं चित्तमयश्चैव ब्रह्म चित्तमयं तथा। चित्तं पंचविधं त्यक्त्वा योगी भवति
मानवः ॥२४॥ जगद्रूपं महच्चित्तं ब्रह्मरूपं तथा मतम्। जगतां ब्रह्मणां संयोगायोगं चित्तमुच्यते ॥२५॥ भ्रांतियुक्तं
भवेच्चित्तं नानामायाविमोहितम्। योगमेवापरं चित्तं भ्रांतिहीनं तथा भवेत् ॥२६॥ अहं कुतस्तथा ब्रह्म कुतस्तयोश्च
योगतः। अभेदः सर्वगं चित्तं क्रीडत्यत्र न संशयः ॥२७॥ नाहं सर्वत्र योगेन संयोगाभेदभावतः। तिष्ठामि चित्तमोहेन
वदंत्ययोगिनो मुधा ॥२८॥ ब्रह्म ब्रह्मणि संस्थं यत्नागतं न गतं कदा। अयोगधारकोऽहं न चित्तं तदेव संमतम् ॥२९॥
धर्ममिच्छति चित्तं च भ्रमयुक्तं तथार्थकम्। कामं मोक्षं ब्रह्मभूतं पंचभूमिप्रभावतः ॥१३०॥ चित्तं त्यक्त्वा महायोगी पंच-
रूपं सुशांतिगः। ब्रह्मभूतो भवेन्नूनं चिंतामणिः प्रकथ्यते ॥३१॥ चित्तरूपा महाबुद्धिस्तत्र भ्रांतिप्रदायिका। सिद्धिस्तयोः
पतिः साक्षात् क्रीडति स्वेच्छयाऽपरः ॥३२॥ तं ज्ञात्वा ब्रह्मभूतश्च भवत्यत्र न संशयः। सिद्धिबुद्धिमयं सर्वं त्यक्त्वा योगी
प्रजापते ॥३३॥ नैव ब्रह्मणि संयोगो नायोगो वर्तते कदा। सिद्धिबुद्धिभ्रमेणैव परं वाञ्छति तत्पतिः ॥३४॥ गणेशोऽहं न
संदेहो कुतो मयि भवेदिदम्। सिद्धिबुद्धिकृतं सर्वं तेन योगी स जायते ॥३५॥ सिद्धिबुद्धिसमायुक्तो ब्रह्मभूतो नरो
भवेत्। शांतियोगेन शांतिस्थो वर्तते नित्यमादरात् ॥३६॥ ब्रह्मणि योगभावेन मायायुक्तविहीनता। शांतिं प्राप्तः स्वयं
त्यक्त्वा योगं योगी स जायते ॥३७॥ एतादृशभवेनैवानुभवेन युतं परम्। चित्तं भ्रांतिभवं सर्वं रसं त्यक्त्वा सुतिष्ठति ॥३८॥
योगे रससमायुक्तं सदा भवति तत्परम्। निश्चलं शांतिसंयुक्तं मायामलविवर्जितम् ॥३९॥ एतत्ते कथितं सर्वमनुभवभवं

सुखम् । यज्ज्ञात्वा ब्रह्मभूतः स तिष्ठत्यत्र न संशयः ॥१४०॥ शृणुयाद्यः पठेद्वाऽपि योगानुभवरूपगम् । माहात्म्यं स लभेत् सर्वं वाञ्छितं शांतिमाप्नुयात् ॥१४१॥

॥ ॐ तत्सदिति श्रीमदांत्ये पुराणोपनिषदि श्रीमौद्गले महापुराणे नवमे खंडे योगचरिते मुद्गलदक्षसंवादे योगामृतार्थशास्त्रे चित्तभूमिनिरोधेन योगिचिन्तानुभवशांतिसुखवर्णनयोगो नाम षष्ठोऽध्यायः ॥

॥ इति योगगीतासूपनिषत्सु सुगमासु द्वितीयोऽध्यायः ॥

॥ श्रीगणेशाय नमः ॥ दक्ष उवाच । स्थितिं वद महायोगिन जीवन्मुक्तस्य सौख्यदाम । शुभाशुभकृतं तेन कुत्र गच्छति तत्परम् ॥१॥ कायिकं वाचिकं मानसिकं सांसार्गिकं प्रभो । कर्म योगिकृतं सर्वं कीदृशं तस्य का गतिः ॥२॥ मुद्गल उवाच । जीवन्मुक्तः स्वयं योगी स्वेच्छाचारी भवेत सदा । प्रारब्धप्रेरितः साक्षाद् वर्तते नित्यमादरात ॥३॥ स्वयं ब्रह्मणि संस्थश्च विंबं चित्ते प्रतिष्ठति । योगिनस्तत्कृतं सर्वं न कदा बंधदं भवेत ॥४॥ नरवत सर्वकर्ताऽपि तथाऽपि दोषवर्जितः । ब्रह्मणि ब्रह्मभूतत्वाच्छुभाशुभविवर्जितः ॥५॥ प्रारब्धेन स्वयं योगी प्रेरितः पुण्यमाचरेत । तीर्थयात्रादिकं सर्वं यज्ञदेवार्चना-दिकम ॥६॥ सदा शौचसमायुक्तो नित्यं धर्मपरायणः । तथापि पुण्यजं भोगं भुनक्ति नैव निश्चितम ॥७॥ अथवा पूर्वजेनैव प्रारब्धेन नियंत्रितः । पापानि नित्यमानंदात प्रकुर्याद्विविधानि सः ॥८॥ ब्रह्महत्यादिकं सर्वं मातृगमनकादिकम । मद्य-पानादिकं चौर्यं प्रकुर्याद् दैवयोगतः ॥९॥ एवं पापसमाचारो यदि तिष्ठति मानवः । योगी पापफलं नैव भुनक्ति नरवत कदा ॥१०॥ पूर्वजन्मार्जितेनैव प्रारब्धेन प्रजापते । कारितं योगिना तत्र तेन किंचित कृतं न च ॥११॥ मरणे या मतिः प्राप्ता तादृशीं लभते गतिम् । नरो योगयुक्तो यो योगी ब्रह्मैव जायते ॥१२॥ इदं संशयनाशार्थं कथितं ब्रह्मणः सुत । योगिनां कर्मजं सर्वं माहात्म्यं लेशतो मया ॥१३॥ योगी योगसमायुक्तो न पापानि कदाचन । चरति धर्मनिष्ठः स भवत्यत्र न संशयः ॥१४॥ लोकोद्धारकराः सर्वे योगिनः परिकीर्तिताः । नाचरंति कदा पापमहिंसादिसमन्विताः ॥१५॥

फलहीनस्वभावेन धर्मं चरति नित्यदा। योगी लोकोपकारार्थं स्वयं ब्रह्मपरायणः ॥१६॥ कदाचित् पूर्वसंस्कारात् पापं तेन कृतं परम्। न तत्र पापयुक्तोऽसौ तदर्थं वर्णितः पुरा ॥१७॥ किमर्थं प्राणिनां योगी दुःखदायकमाचरेत्। पापं पापसमायुक्तो न भवेन्निश्चितं पुरा ॥१८॥ सर्वत्र गणनाथं स पश्यत्यनन्यचक्षुषा। पुण्येन सुखसंयुक्तं विश्वं भवति तच्चरेत् ॥१९॥ प्रारब्धं योगिनां दक्ष न भवेत् पापकारकम्। पुण्यचेष्टासमायुक्तं तेषां प्रारब्धमंजसा ॥२०॥ योगार्थं धर्मसंयुक्तो ब्रह्मार्पणविधानतः। यतते जन्मसु प्राज्ञस्तदा योगी भवेन्नरः ॥२१॥ तस्य प्रारब्धकं दक्ष कुतो दुर्बुद्धिदायकम्। भवति च महायोगी धर्मयुक्तो भवेत् सदा ॥२२॥ अथ योगिजनानां ते स्थितिं वदामि सर्वदा। क्रमयुक्तो यथा योगी भ्रांतो नैव भवेत् कदा ॥२३॥ साधयित्वा महायोगं चित्तनिरोधकारकम्। पंचविधं परित्यज्य चित्तं योगी भवेन्नरः ॥२४॥ चित्तं चिंतामणिं ज्ञात्वा सचित्तः सहसा गतः। तदाकारः स वै योगी तत्र ब्रह्मणि संरतः ॥२५॥ प्रारब्धं योगिनां नास्ति भोगदं शास्त्रसंमतम्। यदा हठयुतो योगी भवेत् प्रारब्धचालकः ॥२६॥ देहपातं प्रकुर्याच्चेदात्महत्यां लभेन्न च। आयुषा संयुतो वाऽपि देहं त्यजति निश्चितम् ॥२७॥ तथापि योगसंयुक्तो न देहं त्यजति प्रभुः। न प्रारब्धमतिक्रम्य करोति किंचिदंजसा ॥२८॥ शांतियुक्तस्वभावेन निष्ठत्यत्र न संशयः। यद्भावि तद्भवत्येव मायामोहविवर्जितः ॥२९॥ देहपातेन किं प्राप्यं देहरक्षणतस्तथा। रचितं गणनाथेन सदा भवतु तादृशम् ॥३०॥ एवं निश्चित्य चित्तेन शांतियुक्तस्वभावतः। आचरेद्योगसंयुक्तः स्वधर्मे संस्थितां क्रियाम् ॥३१॥ वर्णाश्रमयुतो योगी भवेद्यदि स सर्वदा। तदा स्वधर्मजं कुर्यात् कर्म निःसंगभावतः ॥३२॥ देहः कर्ममयः प्रोक्तस्तस्थोऽकर्मी कुतो भवेत्। व्यवस्थासंभवं कर्म कृतं भवति न ह्यपि ॥३३॥ यदि कर्म परित्यज्य निष्ठेद्योगपरायणः। तदा देहनिपातेन युक्तो भवेन्न संशयः ॥३४॥ अन्नभक्षणरूपं यद्भवति कर्म निश्चितम्। जागृत्स्वप्नादिकं सर्वं त्यक्त्वा जीवति तत्कथम् ॥३५॥ क्रियतेऽनेन यत्किंचित् सा क्रिया परिकीर्तिता। अतः कर्ममयो देहस्तेन धर्मं समाचरेत् ॥३६॥ देहत्यागे समुद्युक्तो यदि योगी भवेत् प्रभो। सहने द्वंद्वभावस्य न समर्थः स वै स्मृतः ॥३७॥ अशांतिसंयुतः सोऽपि योगहीनो यथा नरः। तथा द्वंद्वं समालोक्य सहने न समर्थकः ॥३८॥ गणेशेन कृतं तस्येच्छया सर्वं च यद्भवेत्। भवतु तादृशं सर्वं सहे नित्यं सुशांतिगः ॥३९॥ स योगी शांतिहीनो न प्रभवेत् क्वचिदंजसा। ब्रह्मभूतो महाश्रेष्ठः पावनः सर्वदेहिनाम् ॥४०॥ अतो वर्णाश्रमस्थो यो योगी भवेत् स तत् क्रियाम्।

ब्रह्मार्पणतया कुर्याद् हृदि ध्यात्वा गजाननम् ॥४१॥ यदि स्वधर्मसंयुक्तं कर्म नैव समाचरेत्। तमक्रियं समालोक्यान्ये त्यजेयुः स्वधर्मकम् ॥४२॥ अतो लोकोपकारार्थं योगी कर्म समाचरेत्। अन्यान् कर्मयुतान् कुर्यात् स्ववशान् धर्मपालकः ॥४३॥ सर्वेभ्यश्चाधिको योगी कुर्यात् सत्कर्म धर्मदम्। तादृशं कर्म सर्वेऽपि करिष्यंति विशेषतः ॥४४॥ तेन प्रामाण्यमानंदात् कृतं कर्म प्रजापते। तदेव सर्वलोकाश्च मान्यं कुर्वंति निश्चितम् ॥४५॥ ब्रह्मार्पणतया कर्म बंधदं न भवेत् कदा। ब्रह्मप्राप्तिकरं तस्य फलं प्रोक्तं मनीषिभिः ॥४६॥ योगिभिश्च कृतं कर्म लोकसंग्रहकारणात्। असक्तमनसा नित्यं नैमित्तिकं न बंधदम् ॥४७॥ सदा ब्रह्ममयत्वेन तेन किंचित् कृतं न च। देहस्वभावजो भावो भवेदस्य निरंतरम् ॥४८॥ अन्यं मार्गं प्रवक्ष्यामि ये निंदंति स्तुवंति तम्। योगिनं पापभोक्तारो भवंति पुण्यभोगिनः ॥४९॥ योगिना यत् कृतं पापं तत् स्प्रष्टुं न क्षमं कदा। निंदकांस्तत् समाश्रित्य प्रतिष्ठेत्तस्य नित्यदा ॥५०॥ योगिना यत् कृतं पुण्यं तदेव तं न संस्पृशेत्। स्तुवतस्तान् समाश्रित्य नित्यं तिष्ठेत् स्वभावजम् ॥५१॥ अतो न योगिनां निंदां कदा कुर्याद्विचक्षणः। सेवां समाचरेत्तेषां तेन सौख्ययुतो भवेत् ॥५२॥ वने यदि स्थितो योगी प्रारब्धेन नियंत्रितः। फलादिकं तत्र भुंजन् शांत्या तिष्ठेत् स नित्यदा ॥५३॥ तत्र निंदाकरास्तस्य तथा सेवाकरा न च। एक एव महायोगी शुभाशुभं समाचरेत् ॥५४॥ तदेव देहपातेऽस्य योगिनश्च मृतं भवेत्। शुभाशुभं निराधारमुपोषणसमन्वितम् ॥५५॥ एतत्ते कथितं दक्ष ब्रह्मीभूतस्य चेष्टितम्। कर्म योगमयं पूर्णं श्रवणाच्छुभदं भवेत् ॥५६॥ अथ योगं प्रवक्ष्यामि ज्ञानात्मकमहं परम्। योगिभ्यः सुखदं पूर्णं शांतियुक्तं विशेषतः ॥५७॥ देहः कर्मात्मकः प्रोक्तस्तत्र योगं समाचरेत्। ब्रह्मार्पणतया कर्म चाचरन् शांतिधारकः ॥५८॥ ज्ञानं स्फूर्तिमयं प्रोक्तं हृदि तिष्ठति सर्वदा। विवेकात्ममयं तत्र ज्ञानयोगं समाचरेत् ॥५९॥ हृदि यस्माद् भवेज्ज्ञानं नानायोगार्थसौख्यदम्। अथवा विषयार्थानां बोधकं तत् स संत्यजेत् ॥६०॥ उत्पत्तिनाशसंयुक्तं ज्ञानं विषयबोधकम्। ब्रह्म सौख्यप्रदं ज्ञानं योगभूमिप्रभावजम् ॥६१॥ उपाधिसंयुतं चैकमनुपाधियुतं परम्। तत्त्यक्त्वा योगसंयुक्तो भवेद्योगी महायशाः ॥६२॥ ज्ञानानां सकलानां च योगे ज्ञानमयः स्मृतः। योगस्तत्र भवेल्लीनो ब्रह्मीभूतस्वभावतः ॥६३॥ ब्रह्मणि ब्रह्मीभूतोऽहं मम ज्ञानं कुतो भवेत्। नानाभ्रांतिकरं हृत्स्थं त्यक्त्वा ब्रह्मपरो भवेत् ॥६४॥ अनेन विधिना सर्वं ज्ञानं त्यक्त्वा हृदि स्थितम्। शांतियुक्तः स्वयं योगी तिष्ठेद्ब्रह्मपरायणः ॥६५॥ न कर्ताऽहं कदाचिद्धि कारयिता

न निश्चितम् । मायामोहयुता मां ते वदंति कर्मकारिणम् ॥६६॥ अहं साक्षी शरीरस्य यद्देहेन कृतं भवेत् । तन्मया न कृतं क्वापि ब्रह्माहं परतः परः ॥६७॥ यस्मात् स्फूर्तिर्भवेत् मे वै सा माया भ्रांतिदायिका । न तस्यां संस्थितो जीवः सदा साक्षिस्वभावतः ॥६८॥ न मोहेन समायुक्तो न कदा मोहवर्जितः । मायया मां वदंत्येव ह्ययोगिनो न संशयः ॥६९॥ एवं सदा महायोगी साक्षिवत्संस्थितो भवेत् । हृदयज्ञानयोगस्थस्त्यक्त्वा स्फूर्तिभवं भ्रमम् ॥७०॥ सर्वत्र रसहीनं यत् मनस्तस्य महात्मनः । शांत्या युक्तं भवेद्दक्ष ब्रह्मीभूतस्य नित्यदा ॥७१॥ एष ते कथितो योगो ज्ञानात्मको विशेषदः । साक्षिवद्देहसंस्थः स मया तिष्ठति लेशतः ॥७२॥ अतः परं समं योगं शृणु स्थितिपरायण । यं ज्ञात्वा ब्रह्मभूतो यः शांतिहीनो भवेन्न सः ॥७३॥ देहः कर्मत्रयस्तत्र कर्मयोगं समाचरेत् । मनो विवेकरूपं तु साक्षित्वं तत्र संचरेत् ॥७४॥ अहं ब्रह्म यदा दक्ष कृतस्तत्र भवेदिदम् । द्वंद्वरूपं विशेषेण तस्य वक्ष्यामि रूपकम् ॥७५॥ देहः कर्ममयः प्रोक्तो विवेकः कर्मवर्जितः । द्वंद्वं ज्ञात्वा महायोगी समयोगं समाचरेत् ॥७६॥ देहे कर्ममयोऽहं तु हृदि साक्षी तथाऽमलः । उभयोर्योगभावेन भवति किंचिदंजसा ॥७७॥ यदा विवेकहीनश्चेत् देहः किं तु करिष्यति । देहहीनं मनस्तद्वज्ज्ञानदं कस्य वा भवेत् ॥७८॥ आनंदमयभावेन संस्थितोऽहं तदात्मकः । उभयत्र ततः स्वस्वव्यापारं कुरुतः परौ ॥७९॥ देहे कर्ममयोऽहं वै हृदि विवेकधारकः । द्विविधां रचयतां मायां सदानंदनधर्मगः ॥८०॥ तयोः समानभावेन संस्थितोऽहं न संशयः । अनुपाधेरुपाधेश्च वर्जितो ब्रह्मसंज्ञितः ॥८१॥ अतः समं समाश्रित्य बाह्यांतरैकभावतः । यादृशं संस्थितं ब्रह्म तादृशं तत्र चाचरेत् ॥८२॥ देहे कर्मकरो भूत्वा हृदि साक्षिमयो भवेत् । उभयं तत् परित्यज्यानंदावस्थां समाचरेत् ॥८३॥ यद्यदुभयभावाख्यं नानाभेदमयं परम् । तत्र योगमयो भूत्वा तिष्ठदानंदसंयुतः ॥८४॥ आनंदानां समायोगे ब्रह्मानंदः प्रकीर्तितः । उभयेषां प्रजानाथ तादृशं चाचरेद्बुधः ॥८५॥ मदीयसंगयोगेनोभयं प्रवर्तते सदा । उभयं चाचरेत् सर्वसुभाभ्यां वर्जितोऽपि सः ॥८६॥ इयमानंदरूपाख्या कथिता योगिभिः पुरा । ब्रह्मीभूतः समास्थाय तिष्ठेत्तां शांतिसंयुतः ॥८७॥ अतः परं प्रजानाथावस्थां श्रृणु सुखप्रदाम् । सहजाख्यां महायोगी चाचरेत्तां विशेषतः ॥८८॥ देहः कर्ममयः प्रोक्तस्तत्र योगं समाचरेत् । ब्रह्मार्पणतया नित्यं कर्मणां योगिसत्तमः ॥८९॥ हृदि साक्षिस्वभावेन तिष्ठेत्तयोः परे ततः । समभावं समाश्रित्य त्रिषु त्रैधं प्रकीर्तितम् ॥९०॥ तेषु विस्मृतिभावेन भ्रांत्या वा विस्मृतं भवेत् । विपरीतं

भवेद्वाऽपि ततः खेदं न धारयेत् ॥९१॥ त्रिविधं मायया युक्तं पराधीनं प्रकीर्तितम् । तुर्यं स्वाधीनरूपाख्यं प्रोक्तं शास्त्रेषु सर्वदा ॥९२॥ तुर्येच्छया त्रिधा भूतं चलत्यत्र न संशयः । स्वस्वप्रारब्धसंयुक्तं सदा भ्रांतमिव स्थितम् ॥९३॥ न कस्याहंकृतिस्तस्य तुरीयस्य कदाचन । यादृशं कुरुते कर्म तादृशं फलमश्नुते ॥९४॥ अतः प्रारब्धयोगेन विस्मृतोऽहं स्थितिं पराम् । योगरूपां च तुर्येण प्रेरितः सर्वधारिणा ॥९५॥ अथवा ज्ञानमोहेन विपरीतं कृतं मया । त्यक्त्वा योगस्थितिं पूर्णां प्रारब्धं तत्र मुख्यकम् ॥९६॥ प्रारब्धधारकं प्रोक्तं तुरीयं नात्र संशयः । तस्येच्छया च यज्जातं तदेवं योगदं भवेत् ॥९७॥ पराधीनोऽहमत्यंतं तुर्येच्छया समन्वितः । करोमि कर्म साक्षित्वमानंदं वा न संशयः ॥९८॥ सदा स्वाधीनभावेन तिष्ठति ब्रह्म तुर्यगम् । तुरीयैः खेलकं प्रोक्तं तस्य किं बंधनं भवेत् ॥९९॥ यज्जातं तत्कृतं तेन तुरीयेण न संशयः । तत्र कुत्र स्थितोऽहं तु स्वेच्छया क्रीडति प्रभुः ॥१००॥ इयं तु सहजावस्था कथिता ते प्रजापते । यज्जातं तत्र सा प्रोक्ता न कृता तदपि ध्रुवं ॥१॥ यत्कृतं सह जातेन स्वयमेव प्रवर्तते । योगस्तेन समाख्याता सहजा तुर्यसंज्ञिता ॥२॥ अतः परं ब्रह्मभूतं स्वानंदाख्यं प्रकीर्तितम् । तत्र योगस्वरूपाख्यां स्थितिं शृणु सुखप्रदाम् ॥३॥ स्वाधीनं तुर्यभावाख्यं पराधीनं त्रिधा मतम् । तेषां योगे निजात्मस्थो भवेद्योगी निजात्मसु ॥४॥ त्रिविधं खेलरूपं तु तुर्यः खेलक उच्यते । तयोर्योगे प्रजानाथ स्वानंदस्थो भवेन्नरः ॥५॥ ब्रह्मणि ब्रह्मभूतस्य योगिनश्च कुतो भवेत् । स्वाधीनं तु पराधीनं मायायुक्तं न संशयः ॥६॥ योगस्थितिं समाश्रित्य बुधश्चत्वारि चाचरेत् । तेषां संयोगरूपेण तिष्ठेत्तेषु महात्मवान् ॥७॥ कर्मयोगं समाश्रित्य देहचेष्टां समाचरेत् । ज्ञानयोगं तथाऽऽश्रित्य साक्षित्वं चाचरेत् बुधः ॥८॥ समयोगं समाश्रित्य आनंदं आचरेत् परम् । सहजं स समाश्रित्य विपरीतेन शोकभाक् ॥९॥ चतुर्भिः संयुतो भूत्वा चतुर्भिर्वर्जितस्तथा । तिष्ठेद्योगमयीं दक्षावस्थामाश्रित्य सर्वदा ॥११०॥ अवस्था निजरूपे तु कुतोऽवस्थाप्रधारकः । तयोर्योगे योगमयी व्यवस्था ते प्रकीर्तिता ॥११॥ चतुर्मयी चतुर्हीना योगावस्था प्रकीर्तिता । योगिभिस्तां समाश्रित्य शांतिहीनो भवेन्न सः ॥१२॥ अधुना शृणु योगस्थामवस्थां द्वितीयां पराम् । अयोगधारिकां पूर्णां सदा निवृत्तिदायिकाम् ॥१३॥ ब्रह्मणि ब्रह्मभूतो यो योगी तां संश्रयेत् पराम् । यदा निवृत्तिसंयुक्तः शांतिहीनो भवेन्न सः ॥१४॥ ब्रह्मणि ब्रह्मसंस्थं तन्नागतं न गतं पुनः । मायायां ब्रह्मभूतो योऽवस्थाया धारकः कुतः ॥१५॥ यत् कुर्यात् कारयेच्च तत्र नैवावलोकयेत् ।

मायामयं विनिश्चित्य पंचकं पंचकेषु गम् ॥१६॥ नाहं पंचकगश्चैव ततस्तत्कुतमंजसा । कुतो मयि प्रद्द्वयेनाधार्यनिवृत्तिगो भवेत् ॥१७॥ जीवनं मरणं जन्म योगो योगात्मिका परा । अवस्था मे कुतो मायामोहयुक्तं स्मृतं बुधैः ॥१८॥ अथ योगमयीं पूर्णामवस्थां शृणु मानद । संयोगायोगहीनां तां यया शांतो भवेन्न सः ॥१९॥ ब्रह्मणि ब्रह्मभूतोऽहं मयि मायामयं परम् । पंचकं च कुतो भाति मायाहीनमयोगकम् ॥१२०॥ विधिनिषेधसंयुक्तं चित्तं भवति सर्वदा । विधिनिषेधहीनं तु तदेवं जायते मुधा ॥२१॥ देहेन कर्मयोगश्च ज्ञानगो हृदि जायते । उभयत्र समश्चैव तुर्येषु सहजात्मकः ॥२२॥ सर्वसंयोगभावेषु स्वानंदाख्यः प्रवर्तते । निवृत्तिषु ह्ययोगाख्यो योगेषु शांतियोगकः ॥२३॥ एवं नानाविधं योगं समास्थाय महामतिः । योगी शांत्या समानिष्ठेद्ब्रह्मीभूतोऽपि निश्चितम् ॥२४॥ योगस्थितिः समाख्याता ब्रह्मीभूतसुखप्रदा । अनेन विधिना देहनिर्वाहो योगिनां भवेत् ॥२५॥ वर्णाश्रमस्थितो योगी चाचरेत् स्थितिमुत्तमाम् । लोकसंग्रहकार्यार्थमसक्तस्तत्फलादिषु ॥२६॥ यदा वर्णाश्रमं त्यक्त्वा पंचमाश्रमधारकः । न तस्य स्थितिरूपं तु कदाचिन्नात्र संशयः ॥२७॥ विधिनिषेधहीनोऽयं विनायको भवेत् सदा । यद्यत् कुर्यात् स तत् सर्वं योगरूपं भवेत् सदा ॥२८॥ यदि स्थितिसमायुक्तो वेदादिषु प्रमाणतः । तदा विधियुतः सोऽपि भवेत् पश्य प्रजापते ॥२९॥ यदा स्थितिविहीनोऽयं तिष्ठेत् संकथितं परम् । वेदेषु स निषेधेन तदा युक्तो भवेत् परः ॥१३०॥ अतः स्थितियुतो योगी स्थितिहीनो यथारुचि । वर्णाश्रमान् परित्यज्य तिष्ठेद्विनायको यथा ॥३१॥ शांत्या नित्यं चरेत् सर्वं मनसीप्सितमंजसा । विधिनिषेधहीनश्च ब्रह्मणि रसधारकः ॥३२॥ एतत् सर्वं समाख्यातं योगिनां चेष्टितं महत् । ब्रह्मभूतात् परं पूर्णं चरेदेवं निरंतरम् ॥३३॥ शृणुयाद्यः पठेद्वाऽपि स सर्वं हीप्सितं लभेत् । अंते योगमयो भूत्वा तिष्ठेत् स गणपे रतः ॥१३४॥

॥ ॐ तत्सदिति श्रीमदांत्ये पुराणोपनिषदि श्रीमन्मौद्गले महापुराणे नवमे खंडे योगचरिते मुद्गलदक्षसंवादे योगामृतार्थशास्त्रे योगस्थितिवर्णनयोगो नाम सप्तमोऽध्यायः

॥ इति योगगीतासूपनिषत्सु सुगमासु तृतीयोऽध्यायः ॥

॥ श्रीगणेशाय नमः ॥ दक्ष उवाच । योगशांतिं समाश्रित्य योगमभ्यस्य नित्यदा । ब्रह्मणि ब्रह्मभूतः स योगभ्रष्टः कथं भवेत् ॥१॥ मायामयं जगत् सर्वं नानाभ्रमसमन्वितम् । ज्ञात्वा स्वयं पुनर्भ्रष्टः कौतुकं वद मे मुने ॥२॥ मुद्गल उवाच । ब्रह्मणि ब्रह्मभूतस्य योगिनो बिंबसंस्थितम् । बुद्धौ तस्यां विमोहेन मोहयुक्तं प्रजायते ॥३॥ दृष्ट्वा नानाविधान् भोगान् स्वयं मोहेन मोहितः । तेषु भूत्वा रसयुतो नातिच्छति निरंतरम् ॥४॥ तत्र तस्य हृदि दक्ष विवेकः संस्थितो भवेत् । तस्य रूपं प्रवक्ष्यामि शृणु बुद्धिविशारद ॥५॥ अहं ब्रह्मणि योगेन ब्रह्मीभूतो न संशयः । पापपुण्यादिकं मे न शुभाशुभकृतं भवेत् ॥६॥ यदा भोगं परित्यज्य तिष्ठामि नित्यमादरात् । तदा योगस्य वृद्धिर्मे न भविष्यति निश्चितम् ॥७॥ यदा नित्यं प्रभुंजाने भोगान्नानाविधान् परान् । पापपुण्यमनादृत्य तदा योगक्षयो न च ॥८॥ अतोऽहं योगमुत्सृज्य किमर्थं दुःखसंयुतः । तिष्ठामि शांतिमाश्रित्य विधिनिषेधसंयुतः ॥९॥ एवं मनसि संधार्य योगी भोगेषु लालसः । विविधेष्वेव भवति रसयुक्तः क्रमेण सः ॥१०॥ अयं मोहः समाख्यातो योगिहृच्छांतिदायकः । तेन शांतिं परित्यज्य पापपुण्यपरो भवेत् ॥११॥ ततः कामं समाश्रित्य देहसौख्यप्रदायकम् । इच्छेत् स विविधान् भोगान् पुण्यपापपरायणः ॥१२॥ भोगार्थं यतमानस्य योगिनः कामभावतः । तत्र विघ्नः कृतः केन ततः क्रोधयुतो भवेत् ॥१३॥ येन विघ्नः कृतस्तेषु भोगेषु तस्य भोगिनः । तं शत्रुं स हि जानाति भिन्नभावपरायणः ॥१४॥ ततो ह्यज्ञानसंभूतिः क्रमेणोत्पद्यते परा । योगिनश्च तया युक्तो हंतुं तं यतते सदा ॥१५॥ शत्रुशिक्षार्थमर्थान् स नानाभावसमन्वितः । संपाद्य तं तु निर्जित्य भोगान् भुंक्ते प्रयत्नतः ॥१६॥ स्वपरज्ञानहीनत्वं गतं तस्य प्रजायते । तदेवाज्ञानसंभूतिः शत्रुमित्रप्रदर्शिनी ॥१७॥ ततः शांतिः क्रमेणास्य विस्मृतिर्जायते परा । तया युतः स्वयं देहं मन्यते सत्यरूपकम् ॥१८॥ देहे संतोषमापन्नः कृतकृत्यमिव स्थितम् । मन्यते विपरीतः स आत्मानं भाग्यवर्जितम् ॥१९॥ ततो योगं परित्यज्य स्वयं बिंबी प्रजायते । बिंबं तन्मयभावेनागमिष्यति न संशयः ॥२०॥ एवं क्रमेण योगी स शांतिहीनस्वभावतः । सदा तिष्ठति तं योगं नाश्रयते कदाचन ॥२१॥ सुखयुक्ते शरीरे स सुखयुक्तो भवेत् स्वयम् । दुःखयुक्ते तथा दुःखी नानाभावपरायणः ॥२२॥ लेशमात्रमयं शांतिं लभते न कदाचन । असंतोषयुतो नित्यं भ्रमते भोगलिप्सया ॥२३॥ भोगार्थं विविधान्येव नित्यं पापानि चादरात् । चरते सर्वपुण्यानि विधिनिषेधवर्जितः ॥२४॥ वर्णाश्रमयुतो योगी स्वधर्मं त्यज्य नित्यदा । पापं चरति वा पुण्यं स्वधर्मैः संयुतः कदा ॥२५॥

योगान् भुंक्ते विशेषेण मोहयुक्तो निरंतरम् । योगभ्रष्टोऽयमाख्यातस्त्यक्त्वा योगं नरो भवेत् ॥२६॥ हृदि तस्य विवेकश्च सदा तिष्ठति मोहदः । पुण्यपापविहीनोऽहं ब्रह्मैव ब्रह्मभावितः ॥२७॥ अंते स नरकान् गच्छेद् द्वंद्वदुःखप्रदायकान् । यातनां घोररूपां तु पतेद्भुक्त्वा भयानके ॥२८॥ दक्ष उवाच । योगभ्रष्टगतिं ब्रूहि योगींद्र दयया परम् । कथं नरकगो भूत्वा यातनां प्राप्नुयात् परम् ॥२९॥ कर्मफलपरित्यागादिहजन्मधरः कथम् । संभवेद्विस्मयो भाति चेष्टितं योगिनः परम् ॥३०॥ मुद्गल उवाच । ब्रह्मणि ब्रह्मभूतस्य पुनर्विषयसेवनात् । ब्रह्मणो भक्तिहीनस्यांते स्थानं न भवेत् किल ॥३१॥ अपारपुण्ययोगेन ब्रह्मणि देहिनः कदा । रसोत्पत्तिर्भवेद्दक्ष सर्वश्रेष्ठस्य योगदा ॥३२॥ देहविषयसंयोगाद् द्वंद्वभावपरात्मनः । नानापापादियोगेन पुण्यं स्वल्पं प्रक्षीयते ॥३३॥ मृतोऽयं शिवलोके वै वैकुंठे सौरशाक्तयोः । ब्रह्मणः इंद्रलोके वा पतेदंते न संशयः ॥३४॥ शोकहर्षप्रदं विश्वं नानाद्वंद्वसमन्वितम् । नरको नात्र संदेहो योगिनां शास्त्रसंमतम् ॥३५॥ उत्पत्तिनाशसंयुक्तं त्यक्त्वा ब्रह्मपरायणः । ब्रह्मणि ब्रह्मभूतः स पुनर्द्वंद्वपरो यतः ॥३६॥ वैकुंठादिपदे संस्थो द्वंद्वं भुंक्ते निरंतरम् । उत्पत्तिनाशसंयुक्तं नानाभोगपरायणः ॥३७॥ अतो योगी प्रजानाथ स्वर्गादिस्थाननरकान् परान् । भुक्त्वा द्वंद्वमयान् पश्चादिह जन्मधरो भवेत् ॥३८॥ भवेद्योगिकुले तस्य जन्म वा तापसे कुले । ऋद्धिमतां स तत्रापि पुनर्योगं चरिष्यति ॥३९॥ पूर्वसंस्कारयोगेन न भोगे स रमेत् कदा । चित्तं तस्य महायोगी प्रभवेत् स्वल्पयोगतः ॥४०॥ पुनर्न योगभ्रष्टः स संभवेद्ब्रह्मणः सुत । शांत्यायुक्तस्वभावेन शरीरं पोषयेत् मुदा ॥४१॥ अंते ब्रह्मणि योगी स तदाकारो भवेत् परम् । योगसंस्कारपुण्येन स्थितिं लब्ध्वा महामतिः ॥४२॥ एतत्ते कथितं पूर्णं योगभ्रष्टस्य चेष्टितम् । किं पुनः श्रोतुमिच्छा ते वद धातर्वदाम्यहम् ॥४३॥

॥ ॐ तत्सदिति श्रीमदांत्ये पुराणोपनिषदि श्रीमन्मौद्गले महापुराणे नवमे खंडे योगचरिते मुद्गलदक्षसंवादे योगामृतार्थशास्त्रे योगभ्रष्टचरितनिरूपणं नाम अष्टमोऽध्यायः ॥

॥ इति योगगीतासूपनिषत्सु सुगमासु चतुर्थोऽध्यायः ॥

॥ श्रीगणेशाय नमः ॥ दक्ष उवाच । चित्तं चंचलमत्यंतं विषयेषु परायणम् । दुर्ग्रहं शांतिसंयुक्तं न भवेत मुनिसत्तम ॥१॥
अतो योगस्य प्राप्त्यर्थं सिद्ध्यर्थं सुगमं ततः । उपायं वद चित्तस्य जयार्थं वाऽपरं प्रभो ॥२॥ मुद्गल उवाच । पंचचित्तेषु
यद्बिंबं स्थितं भ्रांत्या समन्वितम् । चिंतामणेः समाख्यातं तस्यैव भजनं चरेत् ॥३॥ तेन चित्तं जयेद्योगी नान्यं पश्यामि
भो विधे । विना चित्तजयं योगदायकं नात्र संशयः ॥४॥ दक्ष उवाच । सुगमं वद मार्गं मे सर्वेभ्यो ब्रह्मदायकम् । संसेव्य
जंतवः सर्वे ब्रह्मीभूता भवंति वै ॥५॥ मुद्गल उवाच । अज्ञानेन समायुक्तो नरो विषयलंपटः । शिश्नोदरपरो नित्यं योगं
नेच्छति कर्हिचित् ॥६॥ तस्य सकामिकं कर्म सुखदं बोधयेत् परम् । अलभ्यप्रापकं ह्यमाचरेल्लोभसंयुतः ॥७॥
अलभ्यलभ्यलोभेन त्यक्त्वा पापं महाखलः । सत्कर्मनिरतो भूत्वा चरेत् पुण्यं निरंतरम् ॥८॥ ततस्तेनैकभावेन पापं
नश्येन्निरंतरम् । शुद्धोऽत्यंतं नरः कुर्यात् कर्म कामयुतं परम् ॥९॥ समाप्नुयात्ततोऽलभ्यं हृद्यं चेत् पुनरेव सः । विश्वासेन
समायुक्तः कुर्यात् कर्म विशेषतः ॥१०॥ अथवा नैव संप्राप्तमलभ्यं तेन तं तदा । उपादिशेद्विशेषेणाधिकं सत्कर्म चाचर ॥११॥
अनंतजन्मभिः पापं त्वया कृतमसंशयम् । अपारसंतरो भवति ते तद्विघातकम् ॥१२॥ एवं कर्मपरः सोऽपि दुःखितो-
ऽत्यंतमाचरेत् । पापनाशार्थमानंदात्तेन शुद्धांतरो भवेत् ॥१३॥ सत्कामिकपरस्यास्य कर्मात्यंतप्रभावतः । तस्य बुद्धिर्भवेत्
दक्ष निःकामिकपरायणा ॥१४॥ जन्ममृत्युप्रदा भोगा भुक्ता विविधजन्मसु । अपारसुखदं ब्रह्म न प्राप्तं देहधारिणा ॥१५॥
अलभ्यं न मया प्राप्तं प्रारब्धाधीनतोऽथवा । प्रारब्धं चालितुं कोऽपि न समर्थो भविष्यति ॥१६॥ अतो निःकामिकं कर्म
करोमि नित्यमादरात् । जन्ममृत्युविहीनोऽहं भविष्यामि न संशयः ॥१७॥ ब्रह्मसुखमपारं यल्लब्ध्वा ब्रह्मपरायणः ।
ब्रह्मीभूतो भविष्यामि यत्नं करोमि तत्परः ॥१८॥ एवं धार्यं परित्यज्य कामान् सेवेत स पंचकान् । देवान् गणेशमुख्यांश्च
मुक्तिमार्गपरायणः ॥१९॥ सालोक्यादिभवं सौख्यमिच्छति नित्यमादरात् । क्रमेण तपसा युक्तो प्रभवेत मानवस्ततः ॥२०॥
विभूतिर्ब्रह्मणः प्रोक्ता नानारूपा प्रजापते । तत्र तस्य रमेच्चित्तमैश्वर्यैर्युक्तभावतः ॥२१॥ इमे समर्थरूपा वै ब्रह्मणः
परमात्मनः । अंशतेजोधरास्तस्य सर्वाधीशा भवंत्यतः ॥२२॥ एवं सर्वत्र संचिंत्य तेषां पूजापरो भवेत् । लभेत्तत्
कृपया दक्ष चित्तशुद्धिं नरोत्तमः ॥२३॥ विचारेण गणेशानं ज्ञात्वा संपूर्णमंजसा । सर्वपूज्यादिचिह्नैस्तं श्रेष्ठं तत्र रतो
भवेत् ॥२४॥ ज्ञात्वा स्वानंदनाथं तं स्वानंदार्थं विशेषतः । प्रभजेद्गणराजं स निष्कामभक्तिसंयुतः ॥२५॥ ततोऽहर्निशमत्यंतं

भजेत्तत्परमो युतः । मोक्षार्थं सर्वभावेन विरक्तो विषयादिषु ॥२६॥ गणेशकृपया तस्य चित्तशुद्धिर्भवेत् परा । तया सर्वस्वभावेन भजेत्तं गणनायकम् ॥२७॥ विश्वं चराचरं सर्वं जानीयात्तत्स्वरूपकम् । सर्वेषां हितभावेन भजेत्तं द्विरदाननम् ॥२८॥ कस्यापि संभवेन्न दुःखं तादृशं प्रचरेन्न सः । सहेत सत द्वंद्वजं भावमार्जवेन समन्वितः ॥२९॥ देवकार्यं विना साधुर्न हिंस्यात स कदाचन । पत्रादिकं विशेषेण विश्वरूपपरायणः ॥३०॥ एकांते निर्जने स्थाने स्थित्वा ध्यात्वा गजाननम् । पूजयेद्भक्तिसंयुक्तो ध्यानं कुर्याद्विशेषतः ॥३१॥ अनन्यमनसा देवं भजेत्तं भावधारकः । शमदमपरो भूत्वा चित्तनिग्रहमाचरेत् ॥३२॥ दुर्जयं चित्तमत्यंतं ज्ञात्वा वायुनिबंधनः । प्राणायामपरो भूत्वा जयेत्तन्नात्र संशयः ॥३३॥ अथ वायुनिरोधस्य वदामि मार्गमुत्तमम् । येन पापं परित्यज्य शुद्धचित्तो नरो भवेत् ॥३४॥ पूरयेद्वामनासायां वायुं तस्माद्यनुगुणम् । धारणं तस्य कुर्यात् स स्वोदरे नियतो भवेत् ॥३५॥ पूरकाद् द्विगुणं कुर्याद्रेचकं च प्रजापते । पुनर्नसा दक्षिणया पूरयेत् कुंभकं चरेत् ॥३६॥ वामया रेचकं चैव पुनः पुनर्निरंतरम् । प्राणायामं चरेद् धीमान् पापहीनो नरो भवेत् ॥३७॥ एवं त्रैकालिकं कुर्यात् प्राणायामं विशेषतः । नातिनिरोधसंयुक्तं वायुं हठसमन्वितः ॥३८॥ अतिहठेन संरुद्धो वायू रोमभ्य एव च । निःसृत्य कुष्ठसंयुक्तं तं करोति न संशयः ॥३९॥ नाभिमूलस्थिता नाडी इडा च पिंगलाऽपरा । सुषुम्णा तत्र रोधेन मार्गो भवति निर्मलः ॥४०॥ अपानो नाभिमूलस्थो ह्यधो गच्छति सर्वदा । प्राण ऊर्द्ध्वं तथा जन्तोर्नाडीभिः प्रेरितः सदा ॥४१॥ मार्गरोधनभावेन नाड्यां मार्गो भविष्यति । वायुर्मूलं समाश्रित्य तिष्ठति क्रमतस्ततः ॥४२॥ तत्र लघ्वक्षराण्येव द्वादशापि प्रतिष्ठति । वायुश्चेत् स लघुः प्रोक्तः प्राणायामश्च योगिभिः ॥४३॥ ततो द्विगुणतस्तिष्ठेद्यदा वायुः सुरोधितः । मध्यमः स समाख्यातस्त्रिगुणादुत्तमोत्तमः ॥४४॥ एवं प्राणमपानं च स्वमूले संनयेद् बुधः । तयो रोधनभावेन मूलगौ तौ भविष्यतः ॥४५॥ एवं क्रमेण मूलेऽयं वायुर्मुहूर्तं संस्थितः । तदा समानगा नाडी भिद्यते तत्र संस्थिता ॥४६॥ सा सुषुम्णा समाख्याता तत्र संमिलितौ क्रमात् । प्राणापानौ समौ भूत्वा तद्रूपौ तौ भविष्यतः ॥४७॥ त्रिकालज्ञः स्वयं सिद्धो भविष्यति नरोत्तमः । वायुसाधनपात्रत्वं प्राप्य तेजःसमन्वितः ॥४८॥ ततः स्वाधीनतां यातौ प्राणापानौ विशेषतः । स नयिष्यति तौ यत्र क्रमात्तत्र गमिष्यतः ॥४९॥ ततो ध्यानपरो भूत्वा षट्चक्रभेदने रतः । चक्रस्थं स्वस्वरूपं स पश्येत्तद्वायुना गतः ॥५०॥ एवं क्रमेण योगींद्रो गच्छेद्भेद्य प्रजापते । सहस्रारे स

चक्राणि तत्र पश्येद्गजाननम् ॥५१॥ तत्र क्रमेण वायुं संस्थापयेत सुसमाधिना। वायुना संयुतस्तिष्ठेत पश्यन विघ्नेश्वरं परम् ॥५२॥ क्रमाद्वायुबलेनैवं शुद्धचित्तो भविष्यति। पश्येत सर्वत्र भावेषु स्थितं ब्रह्म सनातनम् ॥५३॥ ततः स्वाधीनतायुक्तः प्रभवेत स्वेन तेजसा। यं यमिच्छेत स तं तं तु सद्यो वै सफलं भवेत ॥५४॥ किंचिदिच्छेन्न यो योगी तदा योगमवाप्नुयात। नो चेच्छंदरतो भूत्वा भोगयुक्तः पुनः पतेत ॥५५॥ साधनं द्विविधं प्रोक्तं क्रियारूपं प्रजापते। बाह्यं कर्मस्वरूपाख्यं तपोयुक्तं स्वधर्मजम् ॥५६॥ आंतरं वायुरोधाख्यं सर्वसिद्धिप्रदायकम्। नाभ्यां चित्तं विनिगृह्य स्ववशं कारयेन्नरः ॥५७॥ बाह्यकर्मस्ताज्जंतोरांतरं शीघ्रसिद्धिदम्। सहस्राधिकभावाख्यं प्रोक्तं योगींद्रमुख्यकैः ॥५८॥ अतः परं तृतीयं ते साधनं कथयाम्यहम्। येन योगींद्रसत्यः स ध्रुवं भवति मानवः ॥५९॥ चित्तशुद्धेश्च कार्यार्थं कर्म द्विविधमुच्यते। शुद्धचित्तो नरः पश्चात संपश्येद्ब्रह्म शाश्वतम् ॥६०॥ सर्वत्र पूर्णभावेन संस्थितं परमव्ययम्। अवयवादिभिर्हीनं तत्र लीनो भवेत स्वयम् ॥६१॥ एतावान फलादानाऽयं क्रियायोगः प्रकीर्तितः। बाह्यांतरात्मकः पूर्णस्ततोऽन्यत साधनं चरेत ॥६२॥ चित्तं स्मयुतं कुत्र जायते योगिनः परम्। तज्जयेद्ब्रह्मभावेन शमदमपरायणः ॥६३॥ स्वधर्मसंयुतो भूत्वा देहनिर्वाहकं चरेत्। देहस्य शमनं तत्र जायते स दमः स्मृतः ॥६४॥ विषयार्थं मनस्तस्य संकल्पं यत समाचरेत। तन्निरुद्धेचित्तमागृह्य कुर्याद्ब्रह्मपरायणम् ॥६५॥ अयं शमः समाख्यातस्तेन चित्तं भवेत परम्। स्वाधीनं सर्वभावं च त्यक्त्वा ब्रह्मपरं भवेत ॥६६॥ शनैः शनैरुपरमेद्विषयेभ्यो महात्मवान। धृतिं योगमयीं धृत्वा भवेद्योगी स मानवः ॥६७॥ कर्ममार्गं परित्यज्य द्विविधं योगिसत्तमः। ध्यानयोगपरो भूत्वा तिष्ठत्तित्यं वदामि तत ॥६८॥ मनोवाणीविहीनं यद्ब्रह्म तत्र समाचरेत। ध्यानं संकल्पत्यागाख्यं विषयेषु निरंतरम् ॥६९॥ यो यश्चित्तेन संकल्पः क्रियते विषयेषु च। तत्तत्संकल्पहीनं स कारयेद्योगतत्परः ॥७०॥ एवं चित्तं नरस्यैव स्वाधीनं जायते सदा। यदा धर्तुं स नो शक्तस्तदान्यदाचरेद्बुधः ॥७१॥ देहेंद्रियाणि संगृह्य तिष्ठद्भूमौ महायशाः। न चलेत स्थाणुवत सोऽपि क्रियां नैव समाचरेत ॥७२॥ तत्र यत्मिलितं चान्नं जलपानादिकं चरेत। परेच्छया समायुक्तः सदा तिष्ठेत महायशाः ॥७३॥ केनापि जलपानादि न दत्तं तादृशो वसेत। न तदर्थं भ्रमेत सोऽपि नेच्छेत प्रारब्धधारकः ॥७४॥ सर्पवृश्चिकव्याघ्राद्यैः पीडितो यदि मानवः। नानाप्रहारयोगैश्च मानवादिभिरेव वा ॥७५॥ तथापि न चलेत् सोऽपि स्वस्थानाज्जडवत्परः। देहप्रारब्धमाश्रित्य न तेषु क्रोधमाचरेत् ॥७६॥ पूर्वजन्मकृतं कर्म

मया तेन प्रबोधितः । इमं संपीडयंत्येवमेषां दोषो न विद्यते ॥७७॥ अथवा सात्त्विकैस्तत्र पूजितः सर्वभावतः । नित्यं नानाजनैः सोऽपि सेवितो न चलेत्तदा ॥७८॥ पूर्वजन्मकृतं कर्म प्रेरितास्तेन मानवाः । मया मां पूजयंत्येव गुण एषां न विद्यते ॥७९॥ एवं मनसि संधार्य तेषां नेच्छेच्छुभं कदा । द्वंद्वमेवं परिगृह्य तिष्ठेन्नित्यं महायशाः ॥८०॥ अनेन विधिना सोऽपि स्वल्पकालेन भो विभो । चित्तं जयेन्न संदेहः शांतिं पूर्णामवाप्नुयात् ॥८१॥ नान्यत् किंचिच्चरेत् कर्म न ध्यानादिकमाचरेत् । एवं शमदमौ धृत्वा भवेद्योगी स मानवः ॥८२॥ विचारं ब्रह्मणस्तत्र कुर्यान्नित्यं विशेषतः । कीदृशं ब्रह्म इत्यर्थं स वेदाद्यैः प्रतिपादितम् ॥८३॥ पंचभूमिमतिक्रम्य तिष्ठेत क्रमेण मानवः । नानाब्रह्मणि पश्यन् सन्तेन शांतिमवाप्नुयात् ॥८४॥ शांतियुक्तो नरः पश्चात् संत्यजेत्तां महाद्भुताम् । जडावस्थां पुनः सोऽपि यथेच्छाचारगो भवेत् ॥८५॥ हृदि चिंतामणिं दृष्ट्वा पंचभूमिप्रचालकम् । शांत्या युक्तो भवेन्नित्यं स्वाधीनहृदयः परः ॥८६॥ दृष्ट्वा ब्रह्म स्वयं योगी रसहीनो भवेत् मुदा । सर्वत्र नात्र संदेहः शांत्या सर्वं समाचरेत् ॥८७॥ अनेन विधिना दक्ष ज्ञानी पापपरायणः । क्रमेण साधयेद्योगं स योगी संभवेत् परः ॥८८॥ एवं कर्तुमशक्तश्चेत्तदा श्रुत्वा महामतिः । इमं योगं स्वयं तत्र निष्ठायुक्तो भवेत् सदा ॥८९॥ स्वधर्मनिरतो भूत्वा योगमिच्छेन्निरंतरम् । निंद्यभोगान् प्रभुंजन् सन्तेन स्वानंदगो भवेत् ॥९०॥ गणेश्वरं तत्र दृष्ट्वा योगयुक्तो भविष्यति । ज्योतिर्देहधरो भूत्वा प्रभजेद्गणनायकम् ॥९१॥ ब्रह्मकल्पमयं स्थित्वा कालं तत्र महामतिः । तद्देहलीनतां प्राप्य ब्रह्मभूतो भविष्यति ॥९२॥ एवं कर्तुमशक्तश्चेत्तदा स धर्मसंयुतः । कर्माचरेत् प्रजानाथ ब्रह्मार्पणविधानतः ॥९३॥ तेनैव शुक्लगत्या स ब्रह्मीभूतो नरो भवेत् । निःकामयोगमार्गेण सदा ब्रह्मणि तत्परः ॥९४॥ एवं कर्तुमशक्तश्चेत्तदाऽहं ब्रह्मभावतः । त्रिविधं फलमुत्सृज्य कर्मजं योगमाप्नुयात् ॥९५॥ कर्मत्यागबलेनैवाहं ब्रह्म निश्चयेन सः । क्रमेण कर्मसंयुक्तो भविष्यत्यन्यजन्मनि ॥९६॥ निःकामकर्मकर्ता स पुनरन्यभवे नरः । योगरससमायुक्तो भवेद्विषयनिंदकः ॥९७॥ एवं क्रमेण शांतिं स लभेत् पूर्णां न संशयः । क्रमार्थं रचितं सर्वं नानामतसमन्वितम् ॥९८॥ सुगमं सर्वभावेषु गणेशभजनं परम् । तेन योगी भवेन्नूनं सर्वशास्त्रेषु संमतम् ॥९९॥ यत्किंचिद् गणराजस्य व्रतपूजादिकं प्रभोः । कीर्तनश्रवणाद्यं तु ब्रह्मीभूतप्रदायकम् ॥१००॥ नानाविषयसंयुक्तो नरः स्मरेद्गणाधिपम् । अहर्निशं तदास्यांते गणेशस्मरणं भवेत् ॥१॥ तेन स्वानंदगो भूत्वा योगमभ्यस्य तन्मयः । ब्रह्मकल्पांत-

भावे स भविष्यति न संशयः ॥२॥ स्मरणं गणराजस्य प्रकुर्यान्नित्यमादरात् । तस्यांते गणराजस्य स्मृतिं दद्यात्नराय सः ॥३॥ अतोऽहर्निशमेकं तं संस्मरेत् मानवः परम् । नानायोगादिकं सर्वं साध्य योगिसमो भवेत् ॥४॥ आयासेन विहीनोऽपि सदा विषयलंपटः । गणेशस्मरणे सक्तः सः शुकसमतां व्रजेत् ॥५॥ शिवविष्णुमुखादीनां नरो यः स्मरणं चरेत् । अंते तेषां स्मृतिं तस्मै स दयाचित्तगः प्रभुः ॥६॥ तेषां लोकं समासाद्य भुक्त्वा भोगान् मनोहरान् । प्रपतेन्नाऽत्र संदेहो मृत्युलोके विशेषतः ॥७॥ पुराणेषु प्रपश्यंते त्रिगुणानां लयाः सदा । अतः स जन्ममृत्युभ्यां युक्तो भवति तद्रतः ॥८॥ अतः सारं समाख्यातं गणेशभजनं परम् । तेनाज्ञानसमायुक्तो नरो ब्रह्ममयो भवेत् ॥९॥ एतत्ते कथितं दक्ष योगप्राप्त्यर्थमादरात् । अज्ञानसंयुतस्यापि ब्रह्मीभूतप्रदायकम् ॥१०॥

ॐ तत्सदिति श्रीमदांत्ये पुराणोपनिषदि श्रीमन्मौद्गले महापुराणे नवमे खंडे योगचरिते मुद्गलदक्षसंवादे योगामृतार्थशास्त्रे अज्ञानिनां स्मरयोगवर्णनं नाम नवमोऽध्यायः ॥

॥ इति योगगीतामृतार्णवस्तु सुगमास्तु पंचमोऽध्यायः ॥

॥ श्रीगणेशाय नमः ॥ दक्ष उवाच । विभूतीर्वद योगीश गणेशस्य महात्मनः । या ज्ञात्वा ताः समाराध्य गणेशज्ञो भवेन्नरः ॥१॥ मुद्गल उवाच । अपारा गणनाथस्य विभूतयो न संशयः । ता न शक्ताः कथयितुं भवंति शंकरादयः ॥२॥ क्षणे क्षणे गणेशानो नानास्वल्पपरायणः । विभूतिभिर्जगत्सर्वं भावयति परात्परः ॥३॥ लोकेषु तत्त्वमुख्येषु जगत्सु ब्रह्मसु प्रभोः । ये श्रेष्ठास्तस्य ते सर्वे विभूतिपदधारकाः ॥४॥ कल्पे कल्पे विभूतीनामवतारा असंख्यकाः । गणेशस्य तथा दक्ष तान वक्तुं कः क्षमो भवेत् ॥५॥ अतः संक्षेपतस्तुभ्यं कथयिष्यामि ताः शृणु । विभूतीर्गणनाथस्य नानासिद्धि-प्रदायिनीः ॥६॥ जगत्सु ब्रह्मसु प्राज्ञ योगरूपो गजाननः । कथं न भिन्नभावाख्यं वर्तते वर्णयाम्यहम् ॥७॥ मायाभ्यां संयुतः सोऽपि नानावेषप्रधारकः । अयोगिनामिदं हृद्यं सत्यं संभासते सदा ॥८॥ मायायुक्तप्रभावेण किं किं गजाननस्य

च । न संभवदहं मायां समाश्रित्य वदामि ते ॥९॥ कलांशाः कलया युक्ताः कलांशांशाः कलात्मकाः । तेषामंशधरा ये ते सर्वे विभूतिधारकाः ॥१०॥ एवमेव गणेशानः पृष्टश्च नारदेन सः । जगाद तां शृणुष्व त्वं विभूतीः परमाद्भुताः ॥११॥ श्रीगणेश उवाच । पूर्णो योगेषु सर्वेषु चित्तरोधमयः परः । मायाहीनप्रभावाणामयोगोऽहं महामुने ॥१२॥ स्वानंदो निजभूतेषु तुर्येष्वव्यक्तसंज्ञितः । आनंदसमभावेषु जीवेष्वात्माहमंजसा ॥१३॥ नानाभेदेषु ब्रह्माहमसद्रूपप्रधारकम् । सत्येषु सांख्यरूपोऽहं बोधः स्वल्पकेषु च ॥१४॥ देहाभिमानयुक्तेषु सदैकोऽहं महामते । देहेषु बिंदुरूपोऽहं चेतनासु गुणेश्वरः ॥१५॥ कोशेष्वानंदकोशोऽहं विज्ञानं सूक्ष्मजातिषु । विवेकेषु मनश्चाहं चालकेषु समीरणः ॥१६॥ स्थूलेष्वन्नस्वरूपोऽहं समष्टिषु तथेश्वरः । व्यष्टिषु प्राज्ञरूपोऽहमणुषु च महाविराट् ॥१७॥ इंद्रियेषु मनश्चाहं भूतेष्वाकाशसंज्ञितः । तन्मात्राणामहं शब्दो ज्ञानाहं देवतासु च ॥१८॥ तत्त्वेषु विविधेष्वेव महत्तत्त्वमहं परम् । गुणेषु गुणपोऽहं तु पालकेषु जनार्दनः ॥१९॥ हरः संहारकर्तॄणां स्रष्टॄणां प्रपितामहः । कर्मणामर्यमाऽऽत्माऽहं मोहकानां च शक्तिका ॥२०॥ देवानां मघवाऽहं तु आदित्यानां विनायकः । तेजसां भानुरूपोऽहममृतेषु विधुः परः ॥२१॥ अग्निः प्रतापदेष्वेव धर्मः समप्रवृत्तिषु । यमो यमवतां चाहं रक्षसां निर्ऋतिः स्वयम् ॥२२॥ जलेषु वरुणोऽहं तु बलवत्सु समीरणः । निधीनां धनदाताऽहं रुद्राणां शंकरः प्रभुः ॥२३॥ कामो धनुर्धराणां च रतिर्भोगेषु भोगदा । नागेशानामहं शेषः सर्पाणां तक्षकः स्वयम् ॥२४॥ नागानां वासुकिर्नाम जंबुर्द्वीपेषु सर्वदः । स्वादूदकः समुद्राणां पर्वतेषु हि मेरुकः ॥२५॥ पितॄणां यमरूपोऽहं वृक्षेषु शमिका मता । देववृक्षेषु मंदारस्तरूणां कामदायकः ॥२६॥ धेनूनां कामधेनुर्या दूर्वा चौषधिषु प्रभुः । पक्षिषु तु मयूरोऽहं मृगाणां सिंहरूपधृक् ॥२७॥ मासानां श्रावणश्चाहं चौराणां मूषकाधिपः । वाहनेष्वश्ववाहोऽहं सिद्धिरैश्वर्यदेषु च ॥२८॥ विद्यासु बुद्धिरूपोऽहं चित्तं प्रकाशकारिणाम् । अहं मनश्च वेगानां मोहदेष्वभिमानकः ॥२९॥ नराधिपो नराणां तु वर्णेषु ब्राह्मणोऽप्यहम् । आश्रमेषु तुरीयोऽहं पोषकेषु गृहस्थकः ॥३०॥ त्यागिनामवधूतोऽहं तिथीनां च चतुर्थिका । प्रजापतिषु दक्षोऽहं ब्रह्मर्षिषु भृगुस्तथा ॥३१॥ नारदो दैवतर्षीणां दत्तोऽवधूतरूपिणाम् । कपिलस्तत्त्वविज्ञानां योगिनां शुक एव यः ॥३२॥ जनकोऽहं विदेहानां निःसंगेषु महामुने । सनकादय एवाऽहं ज्ञानिनां बादरायणः ॥३३॥ वसिष्ठः कर्मकर्तॄणां गाणपत्येषु मुद्गलः । भृशुंडी चैकनिष्ठेषु ब्रह्मिष्ठानां बृहस्पतिः ॥३४॥ अन्नानां तिलरूपोऽहं गव्यानां घृतमंजसा । मधु सर्वरसानां च

मकरो जलजात्मनाम् ॥३५॥ कौमंडली नदीनां च तीर्थेषु गाणपं परम् । क्षेत्राणां मयूरक्षेत्रं काशिराजः सुबुद्धिषु ॥३६॥ मयूरेशोऽवताराणां गार्ग्य उपासकात्मनाम् । ध्याननिष्ठेषु सर्वेषु गृत्समदोऽहमेव च ॥३७॥ सुबोधौ दैत्यजातीनां ज्ञानारिर्दूषकारिणाम् । दुर्जयेषु मनश्चाहं वर्णेष्वोंकार एव सः ॥३८॥ शुक्रोऽहं भाविकेष्वेव त्रिशिराः शुद्धचेतसाम् । उपदेशप्रदातॄणां याज्ञवल्क्यः प्रतापवान् ॥३९॥ पौराणिकेषु सूतोऽहं श्रोतॄणां शौनको मुनिः । सेनानीनामहं स्कंदो विष्णुर्यशस्विनामहम् ॥४०॥ पापेष्वनृतरूपोऽहं कलहो भेदधारिणाम् । प्राप्तिषु लोभरूपोऽहं मणीनां चिंतितार्थदः ॥४१॥ ज्ञानं पवित्रं भावानां सामगायकधर्मिणाम् । वेदेष्वथर्वसंज्ञोऽहं शस्त्रेषु परशुः परः ॥४२॥ निर्लेपानामहं साक्षी राजश्रीषु राजस्तथा । विषयो भ्रांतिदानां च रंभा ह्यप्सरसामहम् ॥४३॥ गंधर्वाणां चित्ररथो वैद्यानां वैद्यनायकः । धन्वंतरिस्तु भिषजां समुद्रः सरसात्मनाम् ॥४४॥ स्रोतसां जाह्नवी विप्र मंत्राणामेकवर्णजः । सूक्तेषु ब्राह्मणस्पत्यं यज्ञेषु ज्ञानरूपधृक् ॥४५॥ प्राणेषु तु समानोऽहं शक्तिः शक्तिमतामहम् । बृहदारण्यकं विद्धि नानोपनिषदां परम् ॥४६॥ शास्त्रेषु योगशास्त्रं च पुराणेषु च मौद्गलम् । अरण्यानां महारण्यं दंडकाख्यमहं परम् ॥४७॥ नियंतॄणामहं दंडो मायाऽहं भावकारिणाम् । स्मृतीनां याज्ञवल्क्यस्य स्मृतिरेव परा मता ॥४८॥ गायत्री छंदसां विप्र स्वानंदो नगरात्मनाम् । व्याकरणमंगभूतेषु कलासु योगदा ह्यहम् ॥४९॥ नीतिज्ञेषु तथा काव्यो वृषभो भूमिधारिणाम् । नंदिकेशो गवां चाहं नग्नो भैरवभाविनाम् ॥५०॥ एवं नानाविधाऽऽकारा विभूतीर्गणपस्य या । कथितुं नैव शक्या सा सारं संकथिता मया ॥५१॥ यद्यदुत्कृष्टतमं विप्र सा विभूतिर्न संशयः । लोकेषु गणराजस्य तां भावय विशेषतः ॥५२॥ मुद्गल उवाच । एवमुक्त्वा गणेशानो विरराम प्रजापते । नारदस्तं प्रणम्यैव जगाम ताद‍ृशोऽभवत् ॥५३॥ य इमां श्रावयेद्दक्ष शृणुयाद्वा प्रयत्नतः । न मोहं स लभेत क्वापि ज्ञात्वा मामत्र्यजं महः ॥५४॥ अपारमहिमायुक्ता जीवाश्च परमेश्वराः । न सर्वे विघ्नराजस्य विभूतिपदधारकाः ॥५५॥ एवं ज्ञात्वा गणेशानं ये भजंति मनीषिणः । न सर्वे ब्रह्मभूताश्च भविष्यंति प्रजापते ॥५६॥

॥ ॐ तत्सदिति श्रीमदांत्ये पुराणोपनिषदि श्रीमन्मौद्गले महापुराणे नवमे खंडे योगचरिते मुद्गलदक्षसंवादे योगामृतार्थशास्त्रे चित्तभूमिनिरोधने विभूतियोगो नाम दशमोऽध्यायः ॥

॥ इति योगगीतासूपनिषत्सु सुगमासु षष्ठोऽध्यायः ॥

॥ श्रीगणेशाय नमः ॥ दक्ष उवाच । त्वया प्रोक्तः पुरा विप्र विचारो ब्रह्मणः परः । तं कृत्वा योगमाप्नोति तद्वदस्व हितावहम् ॥१॥ क्रियया शुद्धचित्तो यो नरो ब्रह्मपरायणः । सर्वत्र ब्रह्मरूपं यद्विधिना केन पश्यति ॥२॥ मुद्गल उवाच । बाह्यांतरां क्रियां कृत्वा शुद्धचित्तो नरोत्तमः । तत्त्वविचारमार्गेण पश्यति ब्रह्म शाश्वतम् ॥३॥ तत्तेऽहं कथयिष्यामि तत्त्वज्ञानं प्रजापते । आदौ योगिजनानां यत् साधनं योगदायकम् ॥४॥ पृथ्वी जलं तथा तेजो वायुराकाशमेव यत् । पंचभूतमयो देहः प्रकृतिः सा च पंचधा ॥५॥ क्रियारूपा महाभागा नानाभेदपरायणा । विभज्यात्मानमेवं सा क्रीडति विविधं रता ॥६॥ भूतानामेकभावाख्या पंचानां ज्ञानरूपिणी । प्रकृतिर्हृदि संस्था सा जीवभावधरा परा ॥७॥ तया ज्ञानं भवेत् सर्वं नानाविवेकदायकम् । तदाधारं जगत् सर्वमेकरूपा प्रकीर्तिता ॥८॥ तयोर्योगे प्रजानाथ ब्रह्मैवमभिधीयते । क्रियाज्ञानस्वरूपाख्यं द्वंद्वहीनं परात्परम् ॥९॥ तदेव पंचधा ज्ञानं शृणु तद्योगदायकम् । स्थूलं सूक्ष्मं समं चात्मप्रतीतं बिंदुसंज्ञितम् ॥१०॥ समष्टिव्यष्टिभावेन द्विविधं ब्रह्म कथ्यते । पृथक्त्वेन स्वयं भाति पंचसु पंचभेदतः ॥११॥ स्थूलं जागृन्मयं ब्रह्म तदेव द्विविधं मतम् । विश्वाख्यं व्यष्टिरूपेण वैश्वानरं समष्टिगम् ॥१२॥ अंडेषु विविधा रूपा जंतवो दृष्टिगोचराः । जागृद्भावधराः सर्वे विश्वात्मका उदाहृताः ॥१३॥ तस्य बोधं प्रवक्ष्यामि सुगमार्थप्रकाशकम् । क्रियात्मकेषु देहेषु क्रियारूपा भवंति ते ॥१४॥ ज्ञानात्मकेषु देहेषु ज्ञानरूपधरा मताः । उभयोर्योगभावेन विश्वाख्यास्ते प्रकीर्तिताः ॥१५॥ बाह्यदेहस्य भो दक्ष वितस्तिर्यादृशी भवेत् । तावन्मानेन सर्वेषां ज्ञानदेहो हृदि स्थितः ॥१६॥ विराट् जागृत् स्वरूपस्थो वैश्वानर इति स्मृतः । व्यापकात्मकदेहेन तिष्ठति विश्वभाविषु ॥१७॥ तस्यापि द्विविधो देहः क्रियाज्ञानप्रभेदतः । तयोर्योगे समाख्यातो वैश्वानरश्च तन्मयः ॥१८॥ विश्ववैश्वानरयोश्च योगे ब्रह्म प्रकीर्तितम् । जागृद्भावधरं पूर्णं स्थूलभूतप्रकाशकम् ॥१९॥ एतत् स्थूलस्य तत्त्वं ते कथितं तु समासतः । तत्र तत्त्वविधिं भिन्नं शृणु योगसमाधिदम् ॥२०॥ जन्ममृत्युयुतं यच्च नानाभावपरायणम् । त्वंपदाख्यं प्रजानाथ विद्धि तत् सर्वभावगम् ॥२१॥ जन्ममृत्युविहीनं यदेकरूपं प्रकीर्तितम् । तत्पदाख्यं च तद्विद्धि परं सर्वात्मधारकम् ॥२२॥ तयोर्योगे भवेत्तत्वं तदेवासिपदं परम् । द्वंद्वभावविहीनं यद् द्वंद्वरूपप्रकाशकम् ॥२३॥ त्वंपदं क्रियया युक्तं ज्ञानाख्यं तत्पदं भवेत् । तयोर्योगे भवेद्विश्वं तत्त्वरूपं न संशयः ॥२४॥ एवं वैश्वानराख्यं त्वं जानीहि तत्त्वसंज्ञितम् । क्रियाज्ञानसमायोगे तयोः प्रकाशकारकम् ॥२५॥ अथान्यच्छृणु दक्ष त्वं तत्त्वरूपं पुरातनम् । विश्वाख्या

जंतवः सर्वे नानाभावात्मका बुधैः ॥२६॥ जन्ममृत्युयुताः प्रोक्तास्त्वंपदधारका मताः । वैश्वानरस्त्वंपदश्चैकरूपाद्व्यापको मतः ॥२७॥ तयोरभेदभावे यद्ब्रह्मतत्त्वं प्रकीर्त्यते । जागृद्भावधरं पूर्णं स्थूलभावपरायणम् ॥२८॥ एवं नानाविभागेषु ज्ञातव्यं तत्त्वरूपकम् । सूक्ष्मादिषु प्रजानाथ ब्रह्मसौख्यप्रदायकम् ॥२९॥ अथ सूक्ष्मं प्रवक्ष्यामि योगमार्गप्रसिद्धये । शुद्धचित्तप्रभावेण तज्ज्ञानं तन्मयं भवेत् ॥३०॥ बाह्यं स्थूलं विशेषेण जागृदस्तमयं परम् । आंतरं स्वप्नभावाख्यं सूक्ष्मं जानीहि मानद ॥३१॥ प्राणो दशविधः प्रोक्तः सूक्ष्मरूपोऽन्तरे स्थितः । तस्मात् सूक्ष्मं मनः प्रोक्तं प्राणांतः संव्यवस्थितम् ॥३२॥ तस्मात् सूक्ष्मं च विज्ञानं देहद्वंद्वजमुत्तमम् । मनोऽन्तरे स्थितं पूर्णं तदंतरे च विद्यते ॥३३॥ त्रिविधं कोशसंयुक्तं स्वप्नं सूक्ष्मस्वरूपकम् । सर्वांतरे स्थितं ब्रह्म द्वंद्वमायाप्रचालकम् ॥३४॥ क्रियारूपस्तथा देहः सूक्ष्मभूतमयः स्मृतः । सर्वांतरे समास्थाय कल्पिताभोगकारकः ॥३५॥ ज्ञानदेहः समाख्यातः सदैकभावधारकः । पूर्ववत् सर्वं विज्ञेयं सूक्ष्ममायाप्रकाशकम् ॥३६॥ भिन्नभावधराः सर्वे जंतवः स्वप्नगाः पराः । तैजसास्ते मताः शास्त्रे क्रियाज्ञानप्रकाशकाः ॥३७॥ विराट् तत्र समाख्यातो हिरण्यगर्भसंज्ञितः । व्यापकः स्वप्नभावेषु नानाजंतुप्रचालकः ॥३८॥ तयोरभेदभावे यद्ब्रह्म स्वप्नात्मकं परम् । सूक्ष्ममायाप्रकाशत्वात् सूक्ष्मं तत कथ्यते बुधैः ॥३९॥ पूर्ववत्तत्त्वभावश्च विज्ञेयः सूक्ष्मगः परः । शुद्धचित्तप्रभावेण साक्षात्कारं करोति सः ॥४०॥ अतः परं समाख्यं यद्ब्रह्म सुषुप्तिसंज्ञितम् । कथयामि महाप्रीत्या लोकानामुपकारकम् ॥४१॥ बाह्यं जागृन्मयं दक्ष वपुः सर्वत्र पठ्यते । आंतरं स्वप्नमित्युक्तं तयोर्योगे समात्मकम् ॥४२॥ बाह्यांतरैकभावाख्यं बाह्यांतरविवर्जितम् । आनंदकोशगं साम्यं कृतं भूतैर्गुणात्मकैः ॥४३॥ जागृत्त्यक्त्वा नरो यस्तु स्वप्नं गच्छति तत्र सः । तयोः संधिं समाश्रित्य सुषुप्तिर्जायते परा ॥४४॥ तथा स्वप्नं परित्यज्य जागृतिं गच्छति स्वयम् । तयोः संधिं समास्थाय तिष्ठति सा सुषुप्तिका ॥४५॥ यत्र सुप्तो नरो दक्ष ज्ञानयुक्तो भवत्यसौ । न जानाति स्वकं चान्यं स्वप्नं नैव प्रपश्यति ॥४६॥ सा सुषुप्तिः समाख्याता निद्रां संश्रित्य तिष्ठति । जागृतिस्वप्नबोधं या करोति सा सुषुप्तिका ॥४७॥ सा द्विधा मायया युक्ता प्राज्ञेश्वरस्वभावतः । भिन्नदेहधराणां तु प्रज्ञाख्या सा प्रकीर्तिता ॥४८॥ विराड्रूपधरा नित्या सेश्वराख्या प्रकथ्यते । ब्रह्मरूपा तयोर्योगे तत्त्वसंज्ञा यथा पुरा ॥४९॥ अथ तुरीयरूपं ते कथयामि समासतः । नादरूपधरं भूततन्मात्राभेदमंजसा ॥५०॥ व्यवस्थासंश्रितं पूर्णं त्रिषु साक्षिवदुच्यते । तस्यानुभवमाहात्म्यं कथयामि हिताय ते ॥५१॥ मया जागृन्मयं भुक्तं मया स्वप्नं विलोकितम् । निद्रायां न मया

किंचिज्ज्ञानं वदति यः स वै ॥५२॥ यदा जागर्ति विश्वस्थस्तदा द्वाभ्यां विवर्जितः। यदा स्वपिति स द्वाभ्यां हीनस्तिष्ठति निश्चितम् ॥५३॥ यदा सुषुप्तिसंस्थोऽयं तदा द्वाभ्यां विवर्जितः। एवं भेदप्रकारैः स व्यवस्थासंयुतो मतः ॥५४॥ तस्य तत्त्वं प्रवक्ष्यामि वैश्वतैजसप्राज्ञगः। त्वंपदाख्यः समाख्यातो नादरूपधरः प्रभुः ॥५५॥ त्रिविगणमय एवासौ तत्पदाख्यः प्रकीर्त्यते। तयोरभेदभावे स तत्त्वरूपोऽस्मितामयः ॥५६॥ अवस्थानां समायोगो नादस्तुरीयधारकः। सदैकभावसंयुक्तः सर्वत्राऽसौ विराजति ॥५७॥ न बाह्यो नाऽऽन्तरस्थोऽयं नोभयात्मक उच्यते। अहमित्येव कोशात्माऽस्मिताख्यः परमेश्वरः ॥५८॥ अतः परं प्रवक्ष्यामि बिंदुतत्त्वं सुसौख्यदम्। पंचमं ब्रह्मसंज्ञं तत् देहानां देहगं परम् ॥५९॥ व्यवस्थामयसंस्थं यत्त्वंपदस्थं प्रकथ्यते। तुरीयसंज्ञितं देहं तत्पदाख्यं प्रकीर्तितम् ॥६०॥ तयोरभेदभावे यत्तत्त्वं योगमयं परम्। चतुर्षु संस्थितं पूर्णं चतुर्भिर्वर्जितं सदा ॥६१॥ एवं तत्त्वविचारेण शमदमपरायणः। संकल्पजान् सदा कामांस्त्यक्त्वा योगमयो भवेत् ॥६२॥ सर्वत्र ब्रह्मसंस्थं यत् पश्येत्तन्नात्र संशयः। तत्त्वरूपधरं पूर्णं तत्त्वविचारतः सदा ॥६३॥ अथान्यत्तत्त्वमार्गं ते कथयिष्यामि सर्वदम्। बिंदुस्त्वंपदसंज्ञस्थः सोऽहं तत्पदगं मतम् ॥६४॥ तयोर्योगे प्रजानाथ बोधस्तत्त्वमयः स्मृतः। मनोवाणीविहीनत्वात् दृश्यते योगिना परः ॥६५॥ बोधस्त्वंपदरूपश्च विबोधस्तत्पदात्मकः। तयोर्योगे स्वसंवेद्यं तत्त्वं वेदे प्रकीर्तितम् ॥६६॥ असत्त्वंपदरूपं सत्तत्पदस्थमुदुच्यते। तयोर्योगे समं ब्रह्म तत्त्वं योगप्रदं मतम् ॥६७॥ समं त्वंपदसंज्ञस्थमव्यक्तं तत्पदस्थितम्। तयोर्योगे तथा तत्त्वं स्वानंदाख्यं प्रकीर्तितम् ॥६८॥ स्वानंदस्त्वंपदाख्यश्चायोगस्तत्पदमुच्यते। तयोर्योगे परं तत्त्वं पूर्णयोगमयं मतम् ॥६९॥ सिद्धिस्त्वंपदगा प्रोक्ता बुद्धिस्तत्पदगा मता। तयोर्योगे गणेशानस्तत्त्वरूपः प्रकथ्यते ॥७०॥ एवं नानामतैर्युक्ता वेदांतार्थविचक्षणाः। तत्त्वं वदंति दक्ष त्वं जानीहि नात्र संशयः ॥७१॥ अनंतभावसंयुक्तं त्वंपदं विद्धि सर्वदा। अकल्पितं तत्पदाख्यं तयोर्योगे परं भवेत् ॥७२॥ इदं सारं रहस्यं ते कथितं योगदं परम्। येन सर्वत्र योगं स संपश्येज्ज्ञानचक्षुषा ॥७३॥

॥ ॐ तत्सदिति श्रीमदांत्ये पुराणोपनिषदि श्रीमन्मौद्गले महापुराणे नवमे खंडे योगचरिते मुद्गलदक्षसंवादे
योगामृतार्थशास्त्रे चित्तभूमिनिरोधेन तत्त्वविचारयोगो नाम एकादशोऽध्यायः ॥
॥ इति योगगीतासूपनिषत्सु सुगमासु सप्तमोऽध्यायः ॥

॥ श्रीगणेशाय नमः ॥ दक्ष उवाच । शुक्लां कृष्णां गतिं ब्रूहि याभ्यां मुक्तिमवाप्नुयात् । संसारं च तथा योगिन् दयया
सर्वतारक ॥१॥ गुरुरुवाच । कर्मत्वं त्रिविधं विद्धि कर्माकर्मविकर्मगम् । स्वधर्मवर्जितं सर्वं कर्म विकर्मसंज्ञकम् ॥२॥
स्वधर्मसंयुतं कर्म भोगवासनया युतम् । कर्मसंज्ञं विजानीहि कृष्णगतिपदप्रदम् ॥३॥ ब्रह्मार्पणतया कर्म स्वधर्मस्थं भवेत्
परम् । शुक्लगतिमयं विद्धि मुक्तिदं तदकर्मकम् ॥४॥ आग्नेयं ज्योतिरयनमुत्तराख्यं दिवा तथा । शुक्लगतिमयं सर्वं जानीहि
मुक्तिदायकम् ॥५॥ चांद्रं ज्योतिर्धूमरात्री दक्षिणायनमेव यत् । कृष्णगतिस्वरूपं तज्जानीहि जनिमृत्युदम् ॥६॥ तयोर्भेदं
प्रवक्ष्यामि लोकानां हितकाम्यया । येन द्वैधं परित्यज्य ब्रह्मणि निरतो भवेत् ॥७॥ निष्कामिकं कर्म कृत्वा मृतो नरो
यदा भवेत् । रात्रौ स दक्षिणायां वा न तं गृह्णन्ति देवताः ॥८॥ देवभोगांस्तिरस्कृत्य ब्रह्मार्पणपरायणम् । नरं तं किं
करिष्यन्ति देवाः स्वर्गसुखप्रदाः ॥९॥ अतो दाहे स वै दक्ष अग्निज्योतिःस्थगो भवेत् । दिवसे समनुप्राप्ते दिवा देवतरा-
स्तथा ॥१०॥ उत्तरायणसंभूते स गच्छेद्भानुमंडले । प्रलये मंडलस्यैव नाशे पुरुषगो भवेत् ॥११॥ महाप्रलयवेलायां
प्रकृतेः पुरुषस्य च । नाशे ब्रह्मणि गच्छेत स ब्रह्मभूतो भवेत्ततः ॥१२॥ सकामकं कर्म कृत्वा दिवसे उत्तरायणे । मृतं
नरं न तं भानुर्गृह्णाति कामनायुतम् ॥१३॥ सदाय धूमसंस्थश्च यदा रात्रिः समागता । तदा तस्यां समाश्रित्य तथा तिष्ठेत्
प्रजापते ॥१४॥ दक्षिणायनमानंदादागतं वीक्ष्य तत्क्षणात् । विमानवरमारुह्य गच्छेत स्वर्गं विहायसा ॥१५॥ चांद्रं
ज्योतिः समाश्रित्य भोगान् भुंक्ते स्वकर्मजान् । कर्मप्रमाणमार्गेण नानास्वर्गपरायणः ॥१६॥ विधिं तत्र प्रवक्ष्यामि चंद्र-
कलासमुद्भवम् । अमृतं देवलोकेषु स्वर्गेषु भोगदं परम् ॥१७॥ इह कर्म कृतं पूर्णं नरैस्तदमृतात्मकम् । भवति चंद्रगं
सर्वं तेन कलायुतो भवेत् ॥१८॥ शुक्लपक्षे क्रमेणायमेकैककलया प्रभुः । वृद्धियुक्तः स्वयंपूर्णः पूर्णिमायां प्रदृश्यते ॥१९॥
कृष्णपक्षे सुराः सर्वे क्रमेणामृतभोजिनः । पिबंति चंद्रसंस्थं तदमृतं तृप्तिकारकम् ॥२०॥ तेन तृप्तियुताः सर्वे भवंति
मासमानतः । अमायां पतितश्चंद्र ओषधीषु न संशयः ॥२१॥ अत ओषधयश्छेद्या नरेण नैव निश्चितम् । अमायां
चंद्रसंयोगयुक्ताः सुखपरायणाः ॥२२॥ अतश्चंद्रभवं सर्वममृतं देवभूमिषु । चांद्रः स्वर्ग इति प्रोक्तस्तेनैव वेदवादिभिः ॥२३॥
देवानां विविधानां स कर्म कृत्वा सकामकम् । कर्मांगदेवमभ्यर्च्य गच्छेत् समर्प्य तत्क्रियाम् ॥२४॥ तत्तल्लोकसुखं
भुक्त्वा नानाभोगसमन्वितम् । भोगांते पुनरेवाऽसौ मेघमंडलगो भवेत् ॥२५॥ तत्र जलमयो भूत्वा पतेद् वृष्ट्या स भूमिषु ।

तत ओषधिगो भूत्वा भवेदन्नमयस्ततः ॥२६॥ ततो वीर्यं समाश्रित्य गच्छेत स जठरे स्त्रियः । तत्र तत्त्वानि तं दक्ष आविशंति न संशयः ॥२७॥ क्षेत्रज्ञः संस्थितस्तत्र तत्त्वैः क्षेत्रं विनिर्ममे । विधिं तस्य प्रवक्ष्यामि गर्भोपनिषदि भवम् ॥२८॥ तत्रैकदिवसेनैव स्त्रीवीर्यं रक्तसंश्रितं । तस्मिन संमिलनं कृत्वा तदाकारो भवेन्नरः ॥२९॥ ततस्त्रिदिवसैः सोऽपि फेनरूपो भवेन्नरः । बुद्बुदः पंचदिवसैः पेशी सप्तदिनैस्तथा ॥३०॥ ततश्चतुर्दशैः सोऽपि दिवसैः फुल्लतां गतः । पंचविंशतिभिस्तत्र मांसरूपो भवेत् स्वयम् ॥३१॥ मासेन कठिनत्वं स प्रगच्छेत्तत्र संस्थितः । द्विमासाभ्यां शिरो युक्तो भवेत्तत्र प्रजापते ॥३२॥ त्रिमासैः कंठसंयुक्तश्चतुर्मासैस्त्वचा युतः । पंचमासैर्भवेज्जंतुरिंद्रियैः संयुतः क्रमात् ॥३३॥ अवयवादिसंयुक्तो नखरोमसमन्वितः । भवेत् सुखेन संयुक्तो मासैः षड्भिर्न संशयः ॥३४॥ तत इंद्रियसंभूतं ज्ञानं भवेत् क्रमेण वै । षण्मासैः परिपूर्णश्चाऽऽकृतिः पूर्णा भवेत् परा ॥३५॥ पूर्वकर्मानुसारेण यादृशी योनिराभवेत् । तादृशाकृतिसंयुक्त इंद्रियैश्च समन्वितः ॥३६॥ सप्तमासैर्भवेज्जंतुश्चेतनया समन्वितः । उदरे प्रचरेत् सोऽपि मातुर्दुःखसमन्वितः ॥३७॥ अवकाशविहीनः स पीडितो जंतुभिः सदा । मूर्च्छां गच्छेत् पुनः संज्ञां कोमलोऽतीव मानवः ॥३८॥ अष्टमासैस्ततस्तत्र बुद्धियुक्तो भवेन्नरः । सांख्ययोगपरो भूत्वा ध्यायेद्ब्रह्म सनातनम् ॥३९॥ अतिसंकोचभावेन पीडितो जंतुभिस्तथा । मातुर्भक्ष्यान्नदोषैः स वेदनासंयुतो भवेत् ॥४०॥ गर्भदुःखं स विज्ञाय तन्निवृत्त्यर्थमादरात् । सांख्ययोगपरो भूत्वा भजेत्तं गणनायकम् ॥४१॥ ततस्तत्र भवेत्तस्य ज्ञानं परमसौख्यदम् । तेनानंतभवानां स दृष्ट्वा दुःखं निवृत्तिगः ॥४२॥ अनन्यमनसा देवं स्तुयात् स्तोत्रैर्महामतिः । गर्भवासप्रशांत्यर्थं ब्रह्म भूयार्थमादरात् ॥४३॥ गर्भ उवाच । नमस्ते गणनाथाय ब्रह्मणे ब्रह्मरूपिणे । अनाथानां प्रणाथाय विघ्नेशाय नमो नमः ॥४४॥ ज्येष्ठराजाय देवाय देवदेवेशमूर्तये । अनादये परेशाय चादिपूज्याय ते नमः ॥४५॥ सर्वपूज्याय सर्वेषां सर्वरूपाय ते नमः । सर्वादये परब्रह्मन् सर्वेशाय नमो नमः ॥४६॥ गजाकारस्वरूपाय गजाकारमयाय ते । गजमस्तकधाराय गजेशाय नमो नमः ॥४७॥ आदिमध्यांतभावाय स्वानंदपतये नमः । आदिमध्यांतहीनाय त्वादिमध्यांतगाय ते ॥४८॥ सिद्धिबुद्धिप्रदात्रे च सिद्धिबुद्धिविहारिणे । सिद्धिबुद्धिमयायैव ब्रह्मेशाय नमो नमः ॥४९॥ शिवाय शक्तये चैव विष्णवे भानुरूपिणे । मायिनां मायया नाथ मोहदाय नमो नमः ॥५०॥ किं स्तौमि त्वां गणाधीश यत्र वेदादयोऽपरे । योगिनः शांतिमापन्ना अतस्त्वां प्रणमाम्यहम् ॥५१॥ रक्ष मां गर्भदुःखात्त्वं त्वामेव

शरणागतम्। जन्ममृत्युविहीनं वै कुरुष्व ते पदप्रियम् ॥५२॥ एवं संस्तुवतं तं नवमासादनंतरम्। प्रसूतिजो महा-
वायुर्बहिः कुर्यात्तरं क्षणात् ॥५३॥ वायुना चालितः सोऽपि मुमूर्च्छ दुःखसंयुतः। संकीर्णांगः पतेज्जंतुर्धरण्यां योनि-
मार्गतः ॥५४॥ भवेत् स सावधानोऽत्र विस्मृतो ज्ञानमुत्तमम्। बालभावधरः कुर्याद्रोदनं धरणीतले ॥५५॥ फलहीनं
भवेत् सर्वं गर्भागारकृतं महत्। ज्ञानादिकमतो भूमौ साधयेत् सर्वमंजसा ॥५६॥ न साधितं नरेणात्र कर्मभूमौ प्रजापते।
ज्ञानादिकं तदा सोऽपि गर्भजं दुःखमश्नुते ॥५७॥ एवं कृष्णा गतिश्चैव कथिता ते विशेषतः। जन्ममृत्युकरी जंतोः
सुखदुःखप्रदायिनी ॥५८॥ इदं गर्भकृतं स्तोत्रं यः पठिष्यति मानवः। स भुक्त्वा सकलान् भोगानंते स्वानंदगो भवेत् ॥५९॥
न कदाचिल्लभेत् सोऽपि गर्भवासं प्रजापते। अतो विशेषतो जंतुर्निरंतरमिदं जपेत् ॥६०॥ अधुना कथयिष्यामि
अन्यमर्थं सुखप्रदम्। शुक्लकृष्णगतिसंस्थं येन ज्ञानं तयोर्भवेत् ॥६१॥ भक्तिमुक्तिफलोभार्थं नरः कुर्यान्निरंतरम्। कर्म
स्वधर्मसंयुक्तो नानादेवं स योगवित् ॥६२॥ उत्तरायणगे भानौ दिवसे वा मृतो भवेत्। स चाग्निलोकमासाद्य तपो-
युक्तो भवेत् सदा ॥६३॥ तत्र भोगप्सुतां त्यक्त्वा गच्छेच्छक्ति महामतिः। तत्राभिमानमुत्सृज्य गच्छेत् दिवं
दिवाकरम् ॥६४॥ अतिध्यानेन संयुक्तस्तत्रात्मानं स चिंतयेत्। अंतरात्मानमुत्सृज्य गच्छेद्वैकुंठमेव च ॥६५॥ तत्रानंदं
परित्यज्य शिवं गच्छेन्न संशयः। तत्र साक्षित्वमुत्सृज्य गच्छेत् स्वानंदमंजसा ॥६६॥ तत्र गणेश्वरं दृष्ट्वा ब्रह्मीभूतो
नरो भवेत्। शुक्लगतिप्रभावेण कथितं ते प्रजापते ॥६७॥ यदा दक्षिणगे भानौ रात्रौ वा स मृतो भवेत्। भुक्तिमुक्तिपरः
सोऽपि गच्छेत् स्वर्गं ततो नरः ॥६८॥ नानास्वर्गफलं भुक्त्वा स्वकर्मनिर्मितं नरः। पुनः पतेद्द्विधे भूमौ तत्र मोक्षरुचि-
र्भवेत् ॥६९॥ ततः शुक्लां समाश्रित्य मोक्षं गच्छेत् स योगवित्। एवं जानीहि भो दक्ष गत्योर्मार्गं पुरातनम् ॥७०॥
यदैकदेवतां श्रित्वा तद्भक्तस्तत्परः सदा। उपासनाविधानेन स्वधर्मस्थो भजेत् स ताम् ॥७१॥ स मृतः स्वेष्टदेवस्य लोकं
गच्छेन्न संशयः। तत्क्षणाचंद्रसूर्याख्यौ मार्गौ नैव प्रकीर्तितौ ॥७२॥ तत्र भोगान् प्रभुंजानः स पतेदिह निश्चितम्।
त्रिगुणात्ममया देवास्तेषां नाशे प्रजापते ॥७३॥ यदा गणेश्वरं सोऽपि भजेदत्रैव मानवः। अंते स्वानंदगो भूत्वा ब्रह्मीभूतो
भविष्यति ॥७४॥ स्वानंदो नाशहीनश्च सदा ब्रह्मसुखप्रदः। अतः स्वानंदमाश्रित्य ब्रह्मीभूतो भविष्यति ॥७५॥ मरणे
दाघहीनश्चेत्तेजस्तत्त्वं समाश्रितः। अथवा धूम्रतत्त्वं स शुक्लकृष्णगतिश्रितः ॥७६॥ पूर्ववत् सर्वमाख्यातं तस्य सर्वं

प्रजापते। एवं विस्तरतो गत्योः कथितं ते प्रजापते ॥७७॥ अतो गणेश्वरं दक्ष समाश्रय हितप्रदम्। योगक्षेमं स ते कुर्यादनन्यचेतसः सदा ॥७८॥ न शुक्ला नैव कृष्णा ते भविष्यति गतिः कदा। ब्रह्मभूयमयं भावं प्राप्स्यसे नात्र संशयः ॥७९॥

॥ ॐ तत्सदिति श्रीमदांत्ये पुराणोपनिषदि श्रीमन्मौद्गले महापुराणे नवमे खण्डे योगचरिते मुद्गलदक्षसंवादे योगामृतार्थशास्त्रे चित्तभूमिनिरोधने शुक्लकृष्णगतियोगो नाम द्वादशोऽध्यायः ॥

॥ इति योगगीतासूपनिषत्सु सुगमासु अष्टमोऽध्यायः ॥

॥ श्रीगणेशाय नमः ॥ दक्ष उवाच। क्षेत्रं वद महाभाग क्षेत्रज्ञं च तयोः परम्। सर्वगं ब्रह्म यत् प्रोक्तं येन ज्ञानं तयोर्भवेत् ॥१॥ मुद्गल उवाच। देहं क्षेत्रमयं विद्धि देही क्षेत्रज्ञमंजसा। तयोर्योगे महद्ब्रह्म स्वत उत्थानसंज्ञितम् ॥२॥ भूतानि पंचतन्मात्राः पंच ज्ञानेंद्रियाणि तु। कर्मेंद्रियाणि पंचैव वायवः पंच देवताः ॥३॥ इंद्रियाणां दशैवाऽपि द्वेष इच्छा धृतिस्तथा। अव्यक्तं चेतना दुःखं सुखं मोहनमेव च ॥४॥ चित्तं बुद्धिः स्थूलसूक्ष्मे कारणं च तुरीयकम्। एतेषां योगभावे यत् क्षेत्रं तत् कथितं बुधैः ॥५॥ सदैकभावरूपश्च भेदैः संवर्जितः परः। क्षेत्रज्ञः क्षेत्रमास्थाय सर्वांतर्यामितां दधे ॥६॥ तयोर्योगे परं ब्रह्म दृश्यादृश्य-विवर्जितम्। दृश्यादृश्यमयं पूर्णं बोधरूपं प्रजापते ॥७॥ स्थूलसूक्ष्मसमात्माख्यैर्भावैर्माया विशेषतः। क्षेत्रज्ञं मोह्यस्वाधीनं करोति नित्यमादरात् ॥८॥ चतुर्भेदैर्विशेषेण मोहितोऽत्यंतमेव सः। अहं देहस्वरूपाख्यो मन्यते सततं मुधा ॥९॥ ततः क्षेत्रस्य भोगार्थं नानाकर्मपरायणः। त्रिगुणेषु भ्रमेणैव भ्रमतेऽहंममात्मकः ॥१०॥ ततस्तमोगुणं त्यक्त्वा राजसं धारयेन्नरः। राजसं च ततस्त्यक्त्वा सात्त्विकः संभवेत् क्रमात् ॥११॥ ततस्तुरीयमाश्रित्य गणेशं स भजेत् परम्। सर्वगं पंचमं साध्यं ब्रह्मीभूतो भवेन्नरः ॥१२॥ इह सौख्यप्रदं यच्च कर्म संजायते सदा। पापरूपमयं तेन ज्ञायते न कदाचन ॥१३॥ देहभोग-करं पूर्णं शिश्नोदरपरायणम्। तामसं तद्विजानीहि चांते नरकदं भवेत् ॥१४॥ तत्र तामससंयुक्ता भुक्त्वा दुःखं महाद्भुतम्।

पुना रोगादिसंयुक्ता भवंति नीचयोनिषु ॥१५॥ काणमूकादिदोषैस्ते संयुक्ताः पापचेतसः । दरिद्रादिसमायुक्ता भोगैर्हीना
भवंत्यपि ॥१६॥ पुनः पापसमाचारा भवंति यदि मानवाः । अंते यमस्य गेहे ते नरकस्थाः पुनः पुनः ॥१७॥ अतस्तमो-
गुणस्थं स्वभावं त्यक्त्वा च मानवाः । धर्मार्थधृतिसंयुक्ता यत्नेन दैवयोगतः ॥१८॥ विद्धि राजसगं भावं नरा भुवि
सकामकम् । सततं कर्म कुर्वंति भोगदं धर्मसंयुताः ॥१९॥ वासनासंयुतं कर्म स्वधर्मस्थं भवेत्किल । तदेव राजसं विद्धि
नानाभावगतं परम् ॥२०॥ राजसाः सर्वभोगं तु भुक्त्वा पुनः पतंत्यपि । इह ये यादृशं कर्म कुर्वते तादृशं फलम् ॥२१॥
अथवा स्वल्पभावेन कृतं राजससंभवम् । कर्म तेन नरा भूमौ भवंते तत्क्षणात् पुनः ॥२२॥ अथवा विविधास्ते ते योनिषु
संभवंत्यपि । नीचोचासु विशेषेण जन्ममृत्युपरायणाः ॥२३॥ राजसानां प्रजानाथ नरको नैव विद्यते । स्थावरं जंगमं
भित्वा भवंते जन्मसंयुताः ॥२४॥ तत्र दुःखं सुखं नाना भुंजते नात्र संशयः । एवं राजसगं सर्वं कथितं ते समासतः ॥२५॥
अतः परं प्रवक्ष्यामि सात्त्विकं कामवर्जितम् । स्वधर्मस्था जना विद्धि तत्कुर्वंति निरंतरम् ॥२६॥ ब्रह्मार्पणतया यद्यद्भवति
कर्म धर्मजम् । नानाविधं परं तत्तत् सात्त्विकं विद्धि मानद ॥२७॥ तेन शुक्लगतिं भित्त्य गच्छंति मोक्षसंज्ञता । अतः
सत्त्वगुणेनैव युक्ता भवंति मानवाः ॥२८॥ अतःपरं तुरीयं ते कथयामि समासतः । रसहीनस्वभावेन चित्तं देह-
समन्वितम् ॥२९॥ तदा भवति चेत्तुर्यं कर्म संजायते परम् । नानाविधं जगत् सर्वं ब्रह्माकारं न संशयः ॥३०॥ यद्यत्तेन
कृतं कर्म तदेव ब्रह्मदं भवेत् । स्तुतिनिंदादिकं किंचिन्नैव तत्र प्रकीर्तितम् ॥३१॥ देवभक्तादिकं दक्ष नैव तुर्ये प्रतिष्ठितम् ।
ब्रह्मणि समभावेन वर्तते सर्वदा स्वयम् ॥३२॥ अंतरे सर्वभावेषु पश्यति विश्वरूपिणम् । तदा तुरीयगं कर्म क्वचिद्भवति
नान्यथा ॥३३॥ एवं सर्वसमन्वेन यद्भवेत्तत्तुरीयकम् । कर्म प्रारब्धयोगेन ब्रह्मणो रसभावतः ॥३४॥ अंतेऽस्मिन्नामये तेन
लीनो भवति मानवः । महाकारणभावेन भवेत् त्रिगुणचालकः ॥३५॥ अतः परमहं कर्म कैवल्यं कथयामि ते । निषेध-
विधिहीनं यद्भवेत् कर्म स्वेच्छया ॥३६॥ ब्रह्मभूयमयं विद्धि पंचमं योगिसंमतम् । कर्ता देहो न संदेहस्तुरीयं प्रेरकं
मतम् ॥३७॥ कुतस्तत्र व्यवस्थाख्यं तुरीयं वर्तते परे । चतुर्विधं येन सृष्टमिदं सर्वं स्वलीलया ॥३८॥ स एव कर्तृभावेन
कारयितृप्रभावतः । तत्र तिष्ठति कोऽहं तु कुतो ब्रह्मविचारतः ॥३९॥ नाहं नरो न वै ब्रह्म मया साध्यं निरंतरम् । भ्रांत्या
सर्वं न संदेहो दृश्यते मायया मयि ॥४०॥ स्वेच्छया खेलति ब्रह्म चतुर्भेदमयं परम् । शुभाशुभं तस्य नास्ति वृथाऽहंतां

त्यजेन्नरः ॥४१॥ अनेनानुभवेनैव शांत्या संवर्तेत नरः । रमं सर्वत्र संत्यज्य ब्रह्मणो रसधारकः ॥४२॥ एवं चतुर्विधं भाव
स्थितं देहिस्वरूपकम् । देहभ्रांतिविहीनं तत्कृत्वा सोऽहंपरो भवेत् ॥४३॥ एवं क्रमेण योगींद्रा भवद्योगान्नरोत्तमः ।
कथितं विस्तरात् सर्वं क्षेत्रक्षेत्रज्ञसाधनम् ॥४४॥ अथ वर्णाश्रमाचारं शृणु सर्वसुखप्रदम् । येन धर्मार्थकामांश्च लभेत् मोक्षं
नरोत्तमः ॥४५॥ चित्तेंद्रियाणि वश्यानि क्षमार्जवतपांसि च । शौचं श्रुतिस्मृतीनां वै ज्ञानं यत्र प्रतिष्ठति ॥४६॥ वेदाधार-
विहीनं यन्न करोति कदाचन । सदा ब्रह्मपरो यस्माद्ब्राह्मणः स च संस्मृतः ॥४७॥ शौर्यं दाक्ष्यं तथा दार्ढ्यं युद्धे संमुखता
सदा । शरण्यरक्षणं नित्यं प्रभुत्वं दंडधारणम् ॥४८॥ धृतिः क्षात्रं सदा तेजश्चित्तमौदार्यसंयुतम् । सुनीत्या पालनं पंच
कर्मयुक्तः स बाहुजः ॥४९॥ क्रयविक्रयकौ नित्यं वस्तूनां भूमिकर्षणम् । गवां पालनकं त्रेधा कर्मयुक्तः स वैश्यकः ॥५०॥
त्रिवर्णसेवनं दानं नाममंत्रं जपेत् परम् । पुराणश्रवणं शौद्रं कर्म पौराणिकं द्विजात् ॥५१॥ अंत्यजानां पुराणोक्तं कर्म
विप्रमुखोद्गतम् । नैव शूद्रसमं चान्यदस्पर्शत्वं द्विजादिषु ॥५२॥ कृतोपवीतको विप्रः क्षत्रियो वैश्य एव यः । वेदादिकं
समभ्यस्यन् ब्रह्मचर्ययुतो भवेत् ॥५३॥ भिक्षाशनो भवेन्नित्यं गुरोराज्ञावशानुगः । गायत्रीं संजपेन्नित्यं त्रिकालेषु च
रोमधृक् ॥५४॥ सायं प्रातश्च जुहुयात् हविर्नित्यं जितेंद्रियः । षोडशाब्दं द्वादशाब्दं ब्रह्मचर्यं चरेत् परम् ॥५५॥ पंचयज्ञपरो
नित्यं नैमित्तं स समाचरेत् । कृतदारः प्रजार्थं स ऋतुगामी भवेद् गृही ॥५६॥ स्त्रीसंगं संपरित्यज्य स्त्रिया युक्तो वसेद्वनम् ।
वन्येन सर्वकर्माणि कुर्यान्नित्यं तपः परम् ॥५७॥ नखलोमयुतश्चैव न ग्रामेषु प्रवेशयेत् । कुर्यादेवं वानप्रस्थो वायुभक्ष्यादिकं
चरेत् ॥५८॥ मनसाऽपि स्मरेन्नैव स्त्रीसंगं न्याससंयुतः । चित्तनिग्रहसंयुक्तो भिक्षाशी सततं नरः ॥५९॥ कपर्दिकादिकं
किंचिन्न स्पृशेत् स कदाचन । ब्रह्मणि ब्रह्मभूतत्वं तदर्थं श्रमयेत् सदा ॥६०॥ साक्षिवद् देहसंस्थोऽपि मौनादिदंडधारकः ।
अथवा दंडहीनः स ज्ञानदंडधरो भवेत् ॥६१॥ एवं संन्यासकं कृत्वा सदा तिष्ठेद्यतात्मवान् । मुक्तिमार्गमयं शास्त्रं
स्पृशेन्नान्यद्विनिश्चितम् ॥६२॥ वर्णाश्रमविहीनश्चेद्योगी पंचमगः स्मृतः । विधिनिषेधहीनः स यथा विनायको भवेत् ॥६३॥
एतत्ते सर्वमाख्यातं स्वधर्माचरणादिकम् । येनैव प्राप्यते योगो नरेण ब्रह्मदायकः ॥६४॥ दक्ष उवाच । धर्मार्थकाममोक्षाणां
स्वरूपं वद मानद । ब्रह्मीभूतस्य भिन्नं मे भ्रमनाशकरं परम् ॥६५॥ केचिद्धर्मं महाश्रेष्ठमर्थं कामं तु मोक्षकम् । परात्परं
वदंत्येव ब्रह्मभूयं तथाऽपरे ॥६६॥ मुद्गल उवाच । धर्मेण ब्रह्मलोकश्च लभ्यते मानवैः परः । ब्रह्मा सर्वसमानश्च स्वधर्माख्यः

प्रकीर्तितः ॥६७॥ अर्थः समर्थभावाख्य ईशलोकप्रदायकः । ईश्वरात्र समर्थोऽन्यः पश्य ब्रह्मांडमंडले ॥६८॥ कामो भोगात्मकः प्रोक्तो विष्णुलोकप्रदायकः । स लक्ष्मीपतिराख्यातो नानाकामप्रदः प्रभुः ॥६९॥ मुक्तिः सौरात्मिका प्रोक्ता सूर्यः पुरुष उच्यते । शुक्लमार्गधरः पूर्णः साक्षात साक्षी विभावसुः ॥७०॥ ब्रह्मीभूतमयः प्रोक्तः स्वानंदः पूर्णयोगदः । वदंति न परं लोकं स्वानंदाद्वेदवादिनः ॥७१॥ अन्यच्छृणु प्रजानाथ पंचैते योगदायकाः । योगार्थवाचकाः सर्वे तत्र भेदं वदाम्यहम् ॥७२॥ योगधर्मेण योगश्च लभ्यते मानवैः परः । न योगादपरः श्रेष्ठस्तेनार्थोऽयं प्रकीर्त्यते ॥७३॥ योगकामेन योगोऽयं लभ्यते सर्वभावतः । मायाया वरणं त्यक्त्वा मोक्षयोगः प्रकीर्त्यते ॥७४॥ ब्रह्म ब्रह्मणि वेदेषु कथितं नात्र संशयः । तत्र योगेन योगी यो ब्रह्मीभूतः स वै स्मृतः ॥७५॥ धर्मार्थकाममोक्षाख्या योगशास्त्रे विशेषतः । भिन्ना मायामयाः प्रोक्ता ब्रह्मीभूतस्तु पंचमः ॥७६॥ ब्रह्मणि ब्रह्मभूतो यो योगी एव स उच्यते । न भिन्नः सर्वथा तस्माद्ब्रह्मणो ब्रह्मगः परः ॥७७॥

॥ ॐ तत्सदिति श्रीमदन्त्ये पुराणोपनिषदि श्रीमन्मौद्गले महापुराणे नवमे खंडे योगचरिते मुद्गलदक्षसंवादे योगामृतार्थशास्त्रे चित्तभूमिनिरोधन श्रेयःश्रेयज्ञानयोगो नाम त्रयोदशोऽध्यायः ॥

॥ इति योगगीतामृतार्थनिरूपणं सुगमास्तु नवमोऽध्यायः ॥

॥ श्रीगणेशाय नमः ॥ मुद्गल उवाच । वक्ष्यामि भावनां चैकां वेदशास्त्रार्थसंयुताम् । नानामतभयं त्यक्त्वा तया योगी भवेत्परः ॥१॥ चैतन्यं न्यायशास्त्रज्ञा वदंति ब्रह्ममुख्यकम । चैतन्येन युताः सर्वे स्वस्वकार्यपरायणाः ॥२॥ सर्वप्रकाशकत्वात्तचैतन्यं ब्रह्मसंज्ञितम । चैतन्येन यदा त्यक्तं तदा नाशमुपैष्यति ॥३॥ पंचचित्तात्मयोगेन चैतन्यं ब्रह्मसंज्ञितम् । भवत्यत्र न संदेहः शब्दार्थानामनेकतः ॥४॥ तार्किकाः प्रवदंत्येव सर्वाभेदं परं मतम् । ब्रह्मवेदांतवादेषु विद्यते शास्त्रसंमतौ ॥५॥ पंचचित्तमया भेदा अभेदा योगिना कृताः । योग एकार्थभावाख्यो भवत्यर्थप्रमाणतः ॥६॥ धर्मशास्त्र-

विदः सर्वे बोधात्मैव परं पदम्। ब्रह्म बोधमयं मुख्यं भावाभावविवर्जितम् ॥७॥ पंचचित्तगतो धर्मस्त्यक्तव्यस्तेन योगकः। धर्मो भवेन्न संदेहो ब्रह्मधर्मधरः प्रभुः ॥८॥ सांख्या वदंति सांख्यं यद्ब्रह्म संख्याविवर्जितम्। विबोधान्न परं ब्रह्म खेलहीनप्रभावतः ॥९॥ तत्र पंचविधं चित्तं परं योगेन संख्यया। हीनं तदेव भवति योगाख्यं शब्दमानतः ॥१०॥ मीमांसका वदंत्येव स्वसंवेद्यं परं मतम्। कारणं ब्रह्म तत्रान्यन्नास्ति ब्रह्मणि संस्थितम् ॥११॥ पंचचित्तं परित्यज्य ब्रह्मरूपं करोति तत्। मीमांसया स्वयं योगी योगवाच्यं भवेत् परम् ॥१२॥ एवं नानामतैर्युक्ता वदंति शास्त्रभेदतः। ब्रह्म नानाविधं दक्ष तदेवं योगगं भवेत् ॥१३॥ शक्तिर्ब्रह्मेति शाक्ता वै न वदंति न तत्परम्। संयोगो द्वंद्वयोर्यत्र तदेवं योगगं भवेत् ॥१४॥ शक्तिः पंचमचित्तगा सा ब्रह्मणि समागता। परिगृह्य निरोधाख्यं चित्तं देवी ततः स्मृता ॥१५॥ सौरं ब्रह्मेति सौराश्च वदंति तु परात्परम्। तस्मात्परं न विद्येत सर्वाधारप्रमाणतः ॥१६॥ भेदात्मकं स संजीव्य नित्यं तिष्ठति चादरात्। तेन योगमयः सूर्यो भवत्यत्र न संशयः ॥१७॥ वदंति विष्णुर्ब्रह्मेति मुख्यं यद्वैष्णवा जनाः। तस्मात् परं पदं नास्ति सदानंदप्रमाणतः ॥१८॥ चित्तं यत् पंचमं तत्र मोहं त्यक्त्वा तदात्मकम्। ब्रह्मयोगे भवेद्योग आनंदो नात्र संशयः ॥१९॥ शैवाः शैवं परं ब्रह्म वदंति मुख्यभावतः। वेद तस्मात् परं नास्ति किंचिन् मोहविहीनकम् ॥२०॥ निरोधं त्रिविधं दक्ष पराधीनं न संशयः। तत्रस्थं योगरूपाख्यं स्वाधीनं योगगं भवेत् ॥२१॥ एवं नानामतैर्युक्ता स्वस्वदेवपरायणाः। वदंति तत् प्रमाणं वै शब्दानामर्थभावतः ॥२२॥ अनेकार्थमयाः शब्दास्तेषु किं किं न संभवेत्। सर्वे योगार्थवाच्या वै जायंते योगिनः क्रमात् ॥२३॥ अन्नप्राणादिकाः शब्दा एवं ब्रह्मप्रवाचकाः। ते सर्वे योगदा दक्ष भवंति ब्रह्मधारणात् ॥२४॥ वेदांतमथ वक्ष्यामि सर्वमान्यं विशेषतः। शास्त्राणि च तदंगानि तत्प्रमाणानि सर्वदा ॥२५॥ यः सर्व सर्वभावेषु युतो जानाति मायया। मायाहीनप्रभावेण योगस्तिष्ठति नित्यदा ॥२६॥ तदेव ब्रह्ममुख्यं तु सर्वेभ्यो नात्र संशयः। ब्रह्मभ्य ऋग्जगादैव प्रज्ञानं योगगं स्मृतम् ॥२७॥ पंचचित्तभवं सर्वं यो जानाति तदेव सः। योगस्तद्गतभावैः संवर्जितो भवति प्रभुः ॥२८॥ अहं ब्रह्मेति यद्ब्रह्म सर्वदोषविवर्जितम्। सदैवं यजुषा प्रोक्तं मुख्यं वै परतः परम् ॥२९॥ पंचचित्तभवा भेदास्तेष्वेवं भेदवर्जितम्। योगं विद्धि प्रजानाथ योगशास्त्रप्रमाणतः ॥३०॥ मायामोहयुतं यच्च मायामोहविवर्जितम्। तयोर्योगे परं ब्रह्म साम्ना संकथितं किल ॥३१॥ मायामोहयुतं ब्रह्म स्वानंदाख्यं ततः परम्। अयोगं मायया

हीनं तयोर्योगे तु योगगम् ॥३२॥ ब्रह्म ब्रह्मणि संस्थं यन्मनोवाणीमयं न तत् । मनोवाणीविहीनं नाथर्ववेदो जगाद ह ॥३३॥ मनोवाणीमयः प्रोक्तः संप्रज्ञातो न संशयः । असंप्रज्ञातकस्ताभ्यां हीनो योगस्तयोः परः ॥३४॥ एवं वेदार्थयुक्तानि महावाक्यानि मानद । योगाख्यानि विशेषेण जानीया योगसेवया ॥३५॥ कर्मादयः समाख्याताः शब्दा ब्रह्ममया बुधैः । भवंति योगसंज्ञस्तास्ते सर्वे योगिनां मते ॥३६॥ सर्वशास्त्रमनैक्यं तु कथितं शब्दधारणात् । तज्ज्ञात्वा मोहहीनः स सदा भवति मानवः ॥३७॥

॥ ॐ तत्सदिति श्रीमदान्त्ये पुराणोपनिषदि श्रीमन्मौद्गले महापुराणे नवमे खण्डे योगचरिते मुद्गलदक्षसंवादे योगामृतार्थशास्त्रे चित्तभूमिनिरोधेन नानात्मैक्ययोगो नाम चतुर्दशोऽध्यायः ॥

॥ इति योगगीतामृतनिषत्सु सुगमासु दशमोऽध्यायः ॥

॥ श्रीगणेशाय नमः ॥ मुद्गल उवाच । अथो लयं प्रवक्ष्यामि येन चित्तं लयं व्रजेत् । ब्रह्मण्यास्थाय योगं च ज्ञात्वा योगं प्रजापते ॥१॥ लयश्चतुर्विधः प्रोक्तो नित्यो नैमित्तिकः परः । तृतीयः प्राकृतो विप्रैः सारस्वतश्चतुर्थकः ॥२॥ कर्माकर्मविकर्माख्यो नित्यः प्रोक्तो बुधैः पुरा । कर्मानुकूलभावेन जनानां जननादिकम् ॥३॥ क्षणक्रमादिमाख्यायुषामंतः समास्थितः । गर्भाधानाद्यवस्थानां प्रकाशश्च प्रकथ्यते ॥४॥ ब्रह्मणो दिवसांते स कुंठितो नात्र संशयः । नैमित्तिकलयेनैव त्रिलोकलयकारिणा ॥५॥ शुभाशुभयुताः सर्वे जंतवो लयमाययुः । शुभाशुभफलैर्हीना बभूवुः कर्मकुंठनात् ॥६॥ स्वर्गमंडलपर्यंतं त्रैलोक्यं प्रलयं गतम् । तावता स प्रमाणेन नित्यः संकथितो बुधैः ॥७॥ अथो नैमित्तिकं दक्ष कथयामि समासतः । चतुर्युगसहस्राणि ब्रह्मणो दिनमुच्यते ॥८॥ नैमित्तिको दिनांतो यस्तदाख्यं वर्तते लयः । तेन नैमित्तिकः प्रोक्तो नाम्ना सर्वार्थकोविदैः ॥९॥ अधुना प्राकृतं वच्मि व्यवस्थाभिर्युतं लयम् । महाकारणगं चेदं स प्राकृत उदाहृतः ॥१०॥ तत्त्वानामेकभावोऽयं स्थूलसूक्ष्मसमात्मनाम् । प्राकृतः प्रकृतिस्थत्वात् कथ्यते विबुधैः परः ॥११॥ सारस्वतं परं पूर्णं शृणु योगप्रदं प्रभो । निरोधचित्तभावेन पंचचित्तलयात्मकम् ॥१२॥ मनोवाणीमयं सर्वं

विश्वं नानास्वभावगम् । मनोवाणीविहीनं त्वसंप्रज्ञातं विदुर्बुधाः ॥१३॥ वाण्या संकथ्यते भावो मनस्तत्र प्रगच्छति । नानापदार्थभिन्नत्वात् सर्वेषां प्राणिनां प्रभो ॥१४॥ वाण्या वाणीविहीनं यत् कथितं ब्रह्म हृद्गतम् । चित्तं समाधिना तत्र सदा तिष्ठति तादृशम् ॥१५॥ वाणी सा द्विविधा प्रोक्ता ब्रह्माकारा जगन्मयी । तयोर्नाशे लयः प्रोक्तः परः सारस्वतो बुधैः ॥१६॥ सरस्वतीलयं यत्र योगभावात् प्रगच्छति । महावाक्यादिसंयुक्ता स सारस्वत उच्यते ॥१७॥ सारस्वतलयेनैव चित्तं पंचविधं प्रभो । चिंतामणौ लयं कृत्वा तिष्ठ त्वं योगिसंमतः ॥१८॥ एतत् सर्वं समाख्यातं योगदं ते समासतः । गोपयैनं महायोगं ततो योगी भविष्यसि ॥१९॥ मा योगं कथयस्व त्वमिमं कस्मै प्रजापते । पात्रहीन-प्रभावेण भ्रंशदस्ते भविष्यति ॥२०॥ वासनाहीनभावेन गणेशज्ञानलालसान् । तान् बोधय विशेषेण तदाऽयं शुभदो भवेत् ॥२१॥ अत्र ते कारणं दक्ष कथयामि समासतः । तस्य श्रवणमात्रेण संशयस्तु लयं व्रजेत् ॥२२॥ योगाकारो गणेशानो यदा खेलपरोऽभवत् । तदा तं वचनं माये सिद्धिबुद्धी समूचतुः ॥२३॥ सिद्धिबुद्धी ऊचतुः । यदि खेलं करोषि त्वमावाभ्यां गणनायक । आवां त्वां छादयिष्यावो नानाभावप्रदर्शनात् ॥२४॥ वेदादिभिस्तत्र वाणीमयी गाथा गजानन । स्वरूपं ते यथातथ्यं कथयिष्यति मानवान् ॥२५॥ तेन त्वां ब्रह्मणां नाथं ज्ञास्यंते मानवादयः । त्वदुपासन-मात्रेण भवेयुर्ब्रह्मभूतकाः ॥२६॥ न त्वां छादयितुं शक्ते वाणीस्थं गणनायक । अतस्तदर्थमानंदात् कुरु किंचिद्गजानन ॥२७॥ एवं तयोर्वचः श्रुत्वा ते जगाद गजाननः । मा खेदं कुरुतं देव्यौ वाणीं संमोहयाम्यहम् ॥२८॥ मोहिता सा मया वाणी वर्णनं भ्रांतिदं च मे । करिष्यति प्रगूढार्थयुतं सत्यार्थभाषितम् ॥२९॥ गूढार्थं नैव देवेशा योगीशास्तत्त्वदर्शिनः । ज्ञास्यंति तेन मां सर्वे न भजिष्यंति भावतः ॥३०॥ सिद्धिबुद्धियुतं ब्रह्म वाणी प्रकटयिष्यति । न गणेशमयीं गाथां कथयिष्यति योगदाम् ॥३१॥ सिद्धिबुद्धिमयं सर्वं जगद्ब्रह्म प्रसेव्य यः । यदा शुद्धो नरो भावी तदा मां ज्ञास्यति प्रिये ॥३२॥ परं सिद्धियुतं ब्रह्म कथितं सिद्धिदायकम् । स एव गणनाथोऽयं पतिः सिद्धेः प्रमाणतः ॥३३॥ परं बुद्धियुतं ब्रह्म परं बुद्धेः प्रकथ्यते । गणेश एव संप्रोक्तः पतिर्बुद्धेः प्रमाणतः ॥३४॥ एवं त्रैविध्यगं वाणी वदिष्यति सदा तु माम् । सिद्धिदं बुद्धिगं ब्रह्म शास्त्रेष्वेतत् त्रयं मतम् ॥३५॥ एवमुक्त्वा गणेशानः पुनस्तूष्णीं बभूव तम् । उवाच प्रणनामादौ भक्तिः परम-दुःखिता ॥३६॥ भक्तिरुवाच । वरो दत्तस्त्वया नाथ सिद्ध्यै बुद्ध्यै गजानन । तेन भक्तिविहीनाश्च भविष्यंति सदा नराः ॥३७॥

अतोऽहं दुःखसंयुक्ता चरिष्यामि निरंतरम् । मां पालय गणाध्यक्ष भक्तियुक्तान् जनान् कुरु ॥३८॥ एवमुक्तो गणाध्यक्ष-
स्तामुवाच सुदुःखिनाम् । भक्तिं भक्तिप्रियः पूर्णः स्मयमानः प्रजापते ॥३९॥ श्रीगणेश उवाच । मा शोकं कुरु कल्याणि नरा
मद्भक्तिकारकाः । देवनागासुराद्याश्च भविष्यंति न संशयः ॥४०॥ नानादेवपरा ये तु भक्त्या जन्मनि जन्मनि । संतुष्टा
अमरास्तेभ्यो दास्यंत्यप्रिरुचिं मुदा ॥४१॥ ततस्तेऽपि समागम्य भक्तियुक्ता निरंतरम् । तुष्टं तं वै करिष्यंति नानायज्ञ-
परायणाः ॥४२॥ ततस्तस्य कृपायोगात देवीभक्तियुता नराः । भविष्यंति च ते सर्वे तां भजिष्यंति संयताः ॥४३॥ एवं
बहौ गते काले संतुष्टा सा प्रदास्यति । तेभ्यः सौरीं महाभक्तिं भजिष्यंति तया रविम् ॥४४॥ ततो बहौ गते काले
सूर्यस्तोषसमन्वितः । उग्रां दास्यति भक्तिं तु वैष्णवीं तेभ्य आदरात् ॥४५॥ तया युक्ता भजिष्यंति विष्णुं भावसम-
न्विताः । नरास्ततः स संतुष्टो बहुकाले भविष्यति ॥४६॥ तुष्टो विष्णुः स्वयं तेभ्यो दाता स्याद्भक्तिमुत्तमाम् । शैवीं
तया ततस्ते तं भजिष्यंति सदाशिवम् ॥४७॥ ततो बहौ गते काले तुष्टः शंभुः प्रदास्यति । भक्तिं गाणेश्वरीं तेभ्यो भजिष्यंति
तया च माम् ॥४८॥ नराः शांतिं समालभ्य सत्तो योगपरायणाः । ब्रह्मीभूता भविष्यंति भजिष्यंति तथाऽपि ते ॥४९॥
एवं क्रमेण मद्भक्ता भविष्यंति नरादयः । त्वद्युक्ता मां भजिष्यंति तेषां वश्यो भवाम्यहम् ॥५०॥ न भक्ते
ते समं मे वै प्रियं किंचिद्भविष्यति । यत्र भक्तिर्गता तत्र यथा स्यास्यामि किंकरः ॥५१॥ स्वानंदं लक्षलाभौ
च सिद्धिं बुद्धिं मदीयकम् । सर्वं तेभ्यः प्रदास्यामि भक्तेभ्यो नात्र संशयः ॥५२॥ अयं मदीयदेहश्च भक्त्यधीनो
भविष्यति । भक्ताग्रे भक्तरूपेण सदा स्यास्यामि दासवत् ॥५३॥ कर्मभ्यश्चाधिकं भक्ते तपः परमदुश्चरम् ।
तपोभ्यश्चाधिकं ज्ञानं निःसंगपददायकम् ॥५४॥ ज्ञानाद्योगः समाख्यातोऽधिकः शांतिप्रदायकः । तस्माच्च त्वं महाभक्ते
भविष्यस्यधिका प्रिया ॥५५॥ भक्तेः परं न किंचित् मे ह्यधिकं शास्त्रसंमतम् । भविष्यति महाभागे मा चिंतां कुरु
सर्वथा ॥५६॥ अन्यद्वाणी मदीयं यद् गूढं रूपं वदिष्यति । तदर्थं ते प्रियं भक्ते करोमि शृणु मे वचः ॥५७॥ मदीयभुज-
संस्थोऽयं मुद्गलः सर्वदर्पहा । स एव ब्राह्मणो भूत्वा चरिष्यति निरंतरम् ॥५८॥ कृतं तेन मदीयं वै पुराणं वेदबृंहितम् ।
गूढार्थद्योतनं भावि सर्वेभ्यो भक्तिदायकम् ॥५९॥ स्वरूपं तत्र मे भक्ते प्रकटं पश्यतां नृणाम् । शृण्वतां तत्तदा पूर्णं
भविष्यति न संशयः ॥६०॥ तथापि दुर्लभा भक्तिर्मदीया त्वं भविष्यसि । अतोऽल्पप्रज्ञा न मां देवि भजिष्यंति कदा-

चन ॥६१॥ विघ्नं मौद्गलशास्त्रेऽहं करिष्यामि भ्रमप्रदम् । अश्रद्धं तेन नष्टं तद्भविष्यति कदा कदा ॥६२॥ तव भावस्य रक्षार्थं मौद्गलं निर्मितं मया । अतः परं महाभक्त वद किं ते करोम्यहम् ॥६३॥ एवं तस्य वचः श्रुत्वा हर्षिता सा ननाम तम् । गणेशं भावगंभीरा न किंचित् पुनरब्रवीत ॥६४॥ एतत्ते कथितं दक्ष गुह्यं विघ्नेश्वरस्य यत् । अतो गुप्तं प्रकर्षेण शास्त्रं कुरु मदीयकम् ॥६५॥ त्वं दक्षः सर्वभावेषु दक्षाद्दक्षो न विद्यते । अतस्तुभ्यं मया सर्वं कथितं शास्त्रमुत्तमम् ॥६६॥ हृदिस्थेन गणेशेन प्रेरितोऽहं प्रजापते । तदाज्ञया हृदिस्थं मे कथितं शास्त्रमुत्तमम् ॥६७॥ अनेन विधिना दक्ष भज त्वं गणनायकम् । तेनेप्सितं समासाद्य गाणपत्यो भविष्यसि ॥६८॥

॥ ॐ तत्सदिति श्रीमदांत्ये पुराणोपनिषदि श्रीमन्मौद्गले महापुराणे नवमे खंडे योगचरिते मुद्गलदक्षसंवादे योगामृतार्थशास्त्रे चित्तभूमिनिरोधनं गणेशरहस्ययोगो नाम पंचदशोऽध्यायः ॥

॥ इति योगगीतासूपनिषत्सु सुगमासु एकादशोऽध्यायः

॥ श्रीगणेशाय नमः ॥ दक्ष उवाच । धन्योऽहं कृतकृत्योऽहं कृतस्त्वया महामते । त्वदाज्ञावशगः स्वामिन् गुप्तं ग्रंथं करोमि ते ॥१॥ अधुना वद मे भक्तिं गणेशस्य तया परम् । भजिष्यामि विशेषेण सदा भक्तिपरायणः ॥२॥ मुद्गल उवाच । सांख्ययोगौ प्रजानाथ शृणु ते कथयाम्यहम् । ताभ्यां युक्तस्ततो भक्तिं करिष्यसि परां मुदा ॥३॥ चित्तं पंचविधं प्रोक्तं पंचसंख्याविवर्जितम् । कुरु चिंतामणौ लीनभावेन त्वं सुयोगतः ॥४॥ एतत् सांख्यं समाख्यातं गणेशाभेददायकम् । तेन योगी भवेत् सद्यः शांतियुक्तो विशेषतः ॥५॥ पंचचित्तोद्भवेषु त्वं भोगेष्वसि सुसंस्थितः । बिंबरूपेण तान् भुंक्ष्व शांत्या रससमन्वितः ॥६॥ चित्तेषु चित्तभूतेषु कर्म ज्ञानादिकं भवेत् । तद्गणेशार्पणं सर्वं कुरु त्वं नित्यमादरात् ॥७॥ स्वधर्मसंस्थितं देहं चित्तं शांतिसमन्वितम् । कुरुष्व सततं दक्ष ब्रह्मभावपरायणः ॥८॥ अयं योगः समाख्यातः शास्त्रे वै सर्वसंमतः । वेदेषु च पुराणेषु ब्रह्मभूयप्रदायकः ॥९॥ सांख्ययोगौ समाराध्य भजस्व गणनायकम् । योगाकारं समाध्याय तन्निष्ठस्तत्परायणः ॥१०॥ श्रवणं गणनाथस्य गुणानां नित्यमादरात् । कीर्तनं तस्य तद्भक्त्वं कुरुष्वैतद्रसैर्युतम् ॥११॥

गाणेशस्य च भावस्य विस्मृतिं मा कुरु प्रभो । गणेशापादजं मोहं धारयेः सत्यभावनः ॥१२॥ मार्गं गणेश्वरस्यैव कुरु सर्वं विशेषतः । गणेशात्र परं श्रेष्ठं तस्मात्तन्निष्ठको भव ॥१३॥ गाणपत्यस्य मार्गस्य सेवनं कुरु सर्वदा । साक्षिरूपं गणेशानं ज्ञात्वा हृत्स्थं भजस्व च ॥१४॥ गणेशात्रैव भिन्नोऽहं भावयस्व निरंतरम् । एवं नवप्रकारैस्त्वं भज त्वं भक्तिसंयुतः ॥१५॥ बाह्यांतरं गणेशार्थं कुरु त्वं कर्म चादरात् । तथा स्वदेहभावेन पूर्णभक्तो भविष्यसि ॥१६॥ अथो चतुर्विधां भक्तिं कथयामि शृणुष्व ताम् । कायिकां वाचिकां पूर्णां मानसीं नित्यदा कुरु ॥१७॥ तथा सांसर्गिकीं दक्ष तस्याश्चिह्नं वदाम्यहम् । गणेशार्थं सदा देहश्रमं कुरु महामते ॥१८॥ गणेशभावहीनां यां वाचं मा त्वं वदस्व ताम् । गणेशचिंतनं तद्वद्गणेशे भावकस्य वा ॥१९॥ गणेशभक्तियुक्तानां संगतिं कुरु सर्वदा । एवं भजस्व भक्त्या त्वं भक्तराजो भविष्यसि ॥२०॥ भक्तिः सा द्विविधा दक्ष मानवैः क्रियते परा । पाखंडसंयुता पूर्णा देवप्रीत्यर्थमेव वा ॥२१॥ देहे विषयभोगार्थं भजनं संप्रवर्तनं । पाखंडिनां सदा दक्ष लोकमोहकरं परम् ॥२२॥ पाखंडभजनस्यैव चिह्नं मुख्यं वदाम्यहम् । तच्छृणु त्वं हितार्थाय लोकानां लोकनायक ॥२३॥ सर्वालंकारनिर्मुक्तः पाखंडी दृश्यते जनैः । जना मोहयुता येन भवंति भजनं यतः ॥२४॥ यत्र येषां रुचिर्दक्ष यादृशी तादृशं सदा । करोति तत्र यत्नेन सर्वभावं प्रदर्शयन् ॥२५॥ येनैव विषयाणां च प्राप्तिः संजायते परा । तादृशं भजनं तस्य परं भवति सर्वदा ॥२६॥ अथवा चैकनिष्ठः स भवति देवतत्परः । स्वदेवभक्तान् संमोह्य भुंक्ते दुष्टोऽर्थलालसः ॥२७॥ स्वदेवभजने सक्ता जनाः स्वल्पमतो बहु । तेषां रुचिप्रमाणेन भवति भजनं यतः ॥२८॥ जनानां मोहदा भक्तिः कथिता ते प्रजापते । पाखंडिभिः सदा पूर्णा सेव्यते सा रुचिप्रदा ॥२९॥ पाखंडसंयुता नित्यं भक्तिं कुर्वंति शाश्वतीम् । चांडालास्ते मताः शास्त्रे देवानां दुःखदायकाः ॥३०॥ सत्यसंकल्पसिद्ध्या ते संयुतं देवमुत्तमम् । संगृह्य भिक्षुकं दुष्टाः कुर्वतेऽधः प्रगामिनः ॥३१॥ अथ देवप्रियां भक्तिं शृणुष्व सुसमाहितः । विचार्य हृदये भक्तिं कुरुते देवतुष्टये ॥३२॥ सदा देवपरो भूत्वा भजतेऽनन्यमानसः । लोकानां तत्र संभूयाद्रुचिर्वा ह्यरुचिः कदा ॥३३॥ लोका निंदंति तं भक्तमुत्तमाश्च स्तुवंति वा । नाननादृत्य देवस्य प्रीत्यर्थं भजते सदा ॥३४॥ स्वकीये हृदये सोऽपि विचार्य कुरुते सदा । भक्तिं यां तां प्रजानाति देवस्तस्य हृदि स्थितः ॥३५॥ यदा देवस्य मार्गस्यापमानं वा ह्यनादरम् । कुर्वंति तान् परित्यज्य तदा भजति सर्वदा ॥३६॥ लोकानां रुचिदं तस्य भजनं जायते कदा । कदा तेषां विरुद्धं वा भक्त्या

नद्देवतुष्टिदम् ॥३७॥ अनेन विधिना दक्ष भजस्व गणनायकम् । गाणपत्यो न संदेहो भविष्यसि परात् परः ॥३८॥ पंच चित्तेषु यज्ज्ञानं तद्बुद्धि विषयात्मकम् । तत्र रुचिविहीनस्त्वं भजस्व गणनायकम् ॥३९॥ सदा गणेश्वरे दक्ष रसोत्पत्तिः प्रजायते । चित्तस्य नान्यभावेषु यस्य भक्तः स उच्यते ॥४०॥ एतद्भक्तिरहस्यं ते कथितं भक्तिदायकम् । समासेन भजस्वैव गणेशं ब्रह्मनायकम ॥४१॥ इमं योगं नरो यस्तु शृणुयाच्छ्रावयेत् परम् । योगिभ्यो वाऽन्यजंतुभ्यः स ईप्सितमवाप्नुयात् ॥४२॥ नानेन सदृशं किंचिद्योगदं शास्त्रसंमतम् । अस्य श्रवणमात्रेण ब्रह्मीभूतो भवेन्नरः ॥४३॥ महापापोपपापेभ्यो मुच्यते पठनात् किल । श्रवणादस्य योगस्यांते ब्रह्म प्राप्नुयात् परम् ॥४४॥ पुत्रपौत्रादिसंयुक्तो धनधान्यसमन्वितः । आरोग्यादिसमायुक्तो लभेदंते परं पदम् ॥४५॥ सकामको लभेद्भोगान् पठनादस्य निश्चितम् । अंते ब्रह्ममयो भावी श्रवणान्नात्र संशयः ॥४६॥ योगगीतां पठेद्यस्तु निष्कामः शृणुयादथो । स विघ्नहीनतां प्राप्य ब्रह्मीभूतो भविष्यति ॥४७॥ योगगीतां पठेद्यस्तु स भवेत् शांतिसंयुतः । शृणुयाद्ब्रह्मभूतश्च ज्ञानवान् स्थितिसंयुतः ॥४८॥ कर्मनिष्ठैरियं सेव्या तपोनिष्ठैः प्रजापते । तत्तत्सिद्धिसमायुक्तैरिहांते ब्रह्म चाप्यते ॥४९॥ नित्यं पठेदिमां गीतां स गणेशो धरातले । दर्शनात् पावनो नृणां सर्वसिद्धिप्रदायकः ॥५०॥ एककालं द्विकालं वा त्रिकालं यः पठेदिमाम् । कृत्वाऽवश्यं गणेशानं स भवेत् सर्वदायकः ॥५१॥ शुक्लकृष्णचतुर्थ्योस्तु पठेदेतां नरोत्तमः । स भुक्त्वा सकलान् भोगानंते ब्रह्म लभेत् परम् ॥५२॥ अथवा शुक्लजायां स चतुर्थ्यां भाद्रमाघयोः । ज्येष्ठे माघे च कृष्णायां पठेदीप्सितमाप्नुयात् ॥५३॥ अथवा गणराजस्य तीर्थक्षेत्रादिके गतः । पठेदिमां सुभावेन स ईप्सितमवाप्नुयात् ॥५४॥ वेदशास्त्रपुराणेषु यत् सारं समुदाहृतम् । योगगीतामयं तुभ्यं सर्वसिद्धिप्रदायकम् ॥५५॥

॥ ॐ तत्सदिति श्रीमदान्त्ये पुराणोपनिषदि श्रीमन्मौद्गले महापुराणे नवमे खण्डे योगचरिते मुद्गलदक्षसंवादे योगामृतार्थशास्त्रे चित्तभूमिनिरोधेन भक्तिरहस्यवर्णनयोगो नाम षोडशोऽध्यायः ॥

॥ इति योगगीतासूपनिषत्सु सुगमासु द्वादशोऽध्यायः ॥

॥ श्रीगजाननार्पणमस्तु ॥

॥ गीताश्लोकसंख्या ॥ ९९८ ॥

॥ श्रीगणेशाय नमः ॥ मुद्गल उवाच । एतत्ते कथितं सर्वं रहस्यं परमं मया । गणेशस्य प्रजानाथ समासेन शुभप्रदम् ॥१॥
अतो भज गणाध्यक्षं सर्वेप्सितमवाप्स्यसि । मा शोकं कुरु दक्ष त्वं यज्ञध्वंसभवं परम् ॥२॥ सूत उवाच । एवमुक्त्वा ददौ
तस्मै मंत्रमेकाक्षरं परम् । विधियुक्तं विधानेन मुनिर्दक्षाय मुद्गलः ॥३॥ तेन संपूजितो योगी ह्यभवद्दंतमुख्यतः । तस्मिन्
काले गणाध्यक्षः प्रकटोऽभूच्छुभप्रदः ॥४॥ मूषकोपरिसंस्थं तं सिद्धिबुद्धिसमन्वितम् । पाशांकुशवरैर्युक्तमभयं धारकं
प्रभुम् ॥५॥ गजास्यं रक्तवस्त्रैः संछादितं भूषणैर्युतम् । नाभिशेषं गणैर्युक्तं प्रमोदाद्यैः सुसेवितम् ॥६॥ त्रिनेत्रमेकदंतं
च महाकुक्षिं परात्परम् । दृष्ट्वा समागतं दक्षो मुद्गलो हर्षितोऽभवत् ॥७॥ उत्थाय सर्वसंयुक्तो ननाम द्विरदाननम् । दक्षश्च
मुद्गलो विप्रो दंडवत् पृथिवीतले ॥८॥ ततोऽतिहर्षसंयुक्तो दक्षस्तं प्रजगाद ह । गणेशं भक्तिसंयुक्तः सरोमांचोऽश्रुसंयुतः ॥९॥
दक्ष उवाच । धन्योऽहं सर्वभावैश्च दर्शनात्ते गजानन । वेदानामगोचरोऽसि त्वं ब्रह्मरूपः समागतः ॥१०॥ धन्योऽयं मुद्गलो
योगी पुराणं धन्यमुत्तमम् । मौद्गलं येन विघ्नेशो मया प्राप्तः परात्परः ॥११॥ मुद्गलेन समाख्यातं भक्त्याधीनो गजाननः ।
तदद्य सत्यरूपं यत् मया ज्ञातं प्रमाणतः ॥१२॥ मुद्गलस्यैव भक्त्या त्वं मोहितः सहसाऽऽगतः । त्वत्तः श्रेष्ठो गणेशान
मुद्गलो नात्र संशयः ॥१३॥ एवं प्रवदतस्तस्य दक्षस्यासीत् महात्मनः । भक्ते रसः समुत्पन्नो ननर्त स हि विह्वलः ॥१४॥
भ्रांतस्तत्र स्म जानाति कृत्यं विघ्नेश्वरस्य सः । जय हेरंब विघ्नेश गणेश मूषकध्वज ॥१५॥ गजानन परेशान जय लंबोदर
प्रभो । उच्चरन् साश्रुनेत्रश्च देहातीत इवाऽभवत् ॥१६॥ एतस्मिन्नंतरे सर्वे समाजग्मुः सुरेश्वराः । शिवविष्णुमुखास्तत्रागतं
ज्ञात्वा गजाननम् ॥१७॥ मुनयो भृगुमुख्याश्च नारदाद्याः सुरर्षयः । शुकाद्याः सनकाद्याश्च कपिलाद्या महामुने ॥१८॥
वसवः साध्यरुद्राश्च गंधर्वाप्सरसस्तथा । अश्विनौ शेषमुख्याश्च नागाः पर्वतनायकाः ॥१९॥ सिद्धाश्चारणमुख्याद्या असुरा
धर्मपालकाः । विद्याधराः कामदुघा गावो विप्रा अनेकशः ॥२०॥ प्रणेमुर्गणराजं ते हर्षयुक्ताः प्रतुष्टुवुः । भक्तियुक्ता
विशेषेणात्मानं धन्यं च मेनिरे ॥२१॥ ततः स मुद्गलो योगी विस्मितः प्रबभूव ह । पुराणश्रवणस्यैतत् दृष्ट्वा
फलमनंतकम् ॥२२॥ बोधयामास दक्षं स ततो दक्षोऽतिहर्षितः । हर्षं नियम्य विघ्नेशं यथाविधि पुपूज ह ॥२३॥ ततो
देवेश्वरान् देवान् विप्रादीन् योगिमुख्यकान् । पूजयित्वा पुनः सोऽपि प्रणनाम गजाननम् ॥२४॥ साश्रुनेत्रः प्रतुष्टाव
भक्तिनम्रात्मकंधरः । अनु तं देवविप्राद्यास्तुष्टुवुस्तं परेश्वरम् ॥२५॥ सदेवर्षिर्दक्ष उवाच । नमस्ते गणेशाय सर्वात्मने ते सदा

भक्तिमोहन मोहात्मकाय । महेशादिदेवैः शुकाद्यैः स्तुताय अयोगाय संयोगधारिन्नमस्ते ॥२६॥ गजाननाय वै तुभ्यं नमः परशुपाणये । गदाधराय शंखं वै धारिणे ते नमो नमः ॥२७॥ विघ्नेशाय परेशाय महाविघ्नविदारिणे । अनाथाय सनाथाय हेरंबाय नमो नमः ॥२८॥ नमो नमस्तेऽस्तु महोदराय स्वभक्तसंरक्षणतत्पराय । अभक्तकामान् विनिहंतृकाय सदा सुशांतिप्रद ते नमो वै ॥२९॥ ब्रह्मेशाय नमस्तुभ्यं सदा स्वानंदवासिने । सिद्धिबुद्धिवरायैव मूषकध्वजिने नमः ॥३०॥ दैत्यमस्तकधाराय दितिपुत्राय ते नमः । कंठाभो देवकायाय नमो सुरसुराय ते ॥३१॥ योगाय सर्वात्मकसर्वपूज्य मायाविनां मोहकराय तुभ्यम् । मायाप्रचालाय तु सिद्धिदाय धर्मस्यपालाय तु शूलपाणे ॥३२॥ अनंतलीलया नाथ स्वयं खेलसि मायया । तत्र किं वर्णयाम्येवाऽतो ब्रवीमि नमो नमः ॥३३॥ सदा योगस्वरूपाय भक्तिभावप्रदाय ते । भक्तिप्रियाय पूर्णाय भक्तवत्सल ते नमः ॥३४॥ प्रसीद पाहि विघ्नेश दासं ते भक्तिलालसम् । मां मुद्गलस्य शिष्यं वै भक्तराजस्य मानद ॥३५॥ एवमुक्त्वा गणेशानं प्रणनाम प्रजापतिः । अनु तं देवविप्राद्याः प्रणेमुस्तं परात्परम् ॥३६॥ तमुत्थाप्य गणाधीशो जगाद वच उत्तमम् । दक्षं मुद्गलमालोक्य स्वभक्तं भक्तपालकः ॥३७॥ श्रीगणेश उवाच । वरान् वृणु प्रजानाथ दास्ये ते तुष्टिमागतः । श्रवणेन पुराणस्य स्तोत्रेण मनसीप्सितान् ॥३८॥ त्वया कृतमिदं स्तोत्रं भुक्तिमुक्तिप्रदं भवेत् । यं यमिच्छति तं तं वै दास्यामि स्तोत्रपाठतः ॥३९॥ ब्रह्मप्रदं सुशांतेश्च दायकं भक्तिवर्धनम् । भविष्यति महाप्राज्ञ परं मत्प्रीतिवर्धनम् ॥४०॥ गणेशवचनं श्रुत्वा दक्षो हर्षसमन्वितः । प्रणम्य तं जगादाऽथ भक्तिनम्रात्मकंधरः ॥४१॥ दक्ष उवाच । वरदोऽसि गणाध्यक्ष तदा ते भक्तिमुत्तमाम् । देहि मे यच्च कृत्यं तदादिशेः करवाणि किम् ॥४२॥ तच्छ्रुत्वा गणनाथस्तं जगाद वच उत्तमम् । ज्ञात्वा भक्तिप्रियं दक्षं हृष्टरोमा महामुने ॥४३॥ श्रीगणेश उवाच । मदीयां भक्तिमत्यंतं करिष्यसि महामते । दक्षाऽद्यप्रभृति प्राज्ञो भविष्यसि यथार्थगः ॥४४॥ यज्ञं कुरु महेशेन मया ध्वस्तं समन्वितः । किंचित् कष्टं प्रदत्तं ते शापैः शैवैः सुखी भव ॥४५॥ योगशांतियुतो नित्यं मां भजिष्यसि सर्वदा । सर्वमान्यः सर्वमुख्यो भविष्यसि प्रजापतिः ॥४६॥ एवमुक्त्वा गणेशानो विरराम च शौनक । दक्षो हृष्टमना भूत्वा स चक्रे यज्ञमुत्तमम् ॥४७॥ संपूज्यादौ गणाध्यक्षं ततः शंभुमुखान् सुरान् । मुनीन्नागादिकान् सर्वान् विससर्ज सुहर्षितः ॥४८॥ ततो मुद्गलविप्रेशं पूजयन् भक्तिसंयुतः । उवाच तं सरोमांचो दक्षो दक्षगणाग्रणीः ॥४९॥ दक्ष उवाच । किं ददामि महायोगिन् शिष्योऽहं ते नमाम्यतः । शरीरं पादपद्मे ते समर्पितमिदं

प्रभो ॥५०॥ ततो दक्षं समानंद्य मुद्गलः प्रययौ मुने । स्वाश्रमं गाणपत्यैः संसेवितं गणपप्रियः ॥५१॥ इदं दक्षस्य माहात्म्यं कथितं ते समासतः । मुद्गलस्य तथा श्रेष्ठं सर्वसिद्धिप्रदायकम् ॥५२॥ पुराणं मौद्गलं पूर्णं कथितं योगभावितम् । सर्वमान्यं विशेषेण सर्वसंशयनाशनम् ॥५३॥ पुराणश्रवणस्यापि फलं प्रोक्तं मया परम् । श्रवणेन प्रजानाथो दक्षो दक्षो बभूव ह ॥५४॥ अधुनाऽहं गमिष्यामि स्वाश्रमं विप्रनायक । त्वदाज्ञया वद स्वामिन् किं करोमि हितं पुनः ॥५५॥

॥ ॐमिति श्रीमदान्त्ये पुराणोपनिषदि श्रीमन्मौद्गले महापुराणे नवमे खंडे योगचरिते दक्षसिद्धिप्राप्तिवर्णनं नाम सप्तदशोऽध्यायः ॥

सव्येतरेण गुल्फेन पीडयेद्बुद्धिमान्नरः ।

जान्वोरधः स्थितं संधिं स्मृत्वा देवं च त्र्यम्बकम् ॥ ४५ ॥

विनायकं च संस्मृत्य तथा वागीश्वरीं पुनः ।

लिङ्गनालात्समाकृष्य वायुमव्यग्रतो मुने ॥ ४६ ॥

प्रणवेनाग्नियुक्तेन बिन्दुयुक्तेन बुद्धिमान् । मूलाधारस्य विप्रेन्द्र मध्यमे तु निरोधयेत्[3] ॥ ४७ ॥

निरुद्धवायुना दीप्तो वह्निर्दहति कुण्डलीम् ।

पुनः सुषुम्नया वायुर्वह्निना सह गच्छति ॥ ४८ ॥

एवमभ्यसतस्तस्य जितो वायुर्भवेद् ध्रुवम् । प्रस्वेदः प्रथमः पश्चात्कम्पनं मुनिसत्तम ॥ ४९ ॥

उत्थानं च शरीरस्य चिह्नमेतज्जितेऽनिले[4] । एवमभ्यसतस्तस्य मूलरोगो विनश्यति ॥ ५० ॥

भगंदरं च नष्टं स्यात्तथा[5]ऽन्ये व्याधयो मुने ।

पातकानि विनश्यन्ति क्षुद्राणि च महान्ति च ॥ ५१ ॥

वामदक्षिणहस्ताङ्गुष्ठाभ्यां श्रोत्रे । तर्जनीभ्यां चक्षुषी । मध्यमाभ्यां नासापुटौ च निरुध्य यावदानन्दाविर्भावो भवति तावद् ब्रह्मरन्ध्रे चित्तं धारयतः प्राणः सुषुम्नां प्रविशतीत्यर्थः ॥ ४० ॥ ४१ ॥ **नादश्चोत्पद्यत** इति । तद्भेदा हंसोपनिषदि दशधा कथिताः । चिणीति प्रथमः । चिणिचिणीति द्वितीयः । घण्टानादस्तृतीयः । शङ्खनादश्चतुर्थः । पञ्चमस्तन्त्रीनादः। षष्ठस्तालनादः । सप्तमो वेणुनादः । अष्टमो भेरीनादः । नवमो मृदङ्गनादः । दशमो मेघनाद इति ॥ ४२ ॥ ४३ ॥ उत्कर्षप्राणायाममाह—**दक्षिणोत्तरेति** । वामेन गुल्फेन पीडयित्वा जान्वोरधः स्थितं तमेव वामगुल्फसंधिं दक्षिणगुल्फेन पीडयित्वा शिवविनायकवागीशान्स्मरल्लिँङ्गनालं समाकृष्य निरुद्धस्य पवनस्य नाड्यन्तरप्रवेशपरिहारार्थमाकुञ्चितोल्बणबन्धं कृत्वा रेफबिन्दुयुक्तं प्रणवमनुस्मरन्मूलाधारपवनं निरोधयेत् । मूलाधाराकुञ्चनलक्षणं मूलबन्धं कुर्यादित्यर्थः । अयमुत्कर्षप्राणायामयोग आगमे सविशेषो दर्शितः— 'अथोत्कर्षाभिधानस्य प्राणायामस्य संयमः । इडाधः सीवनीं सूक्ष्मां पीडयेद्वामगुल्फतः ॥ तद्गुल्फोपरि निक्षिप्य दक्षगुल्फं समं स्थिरम् । जङ्घोरुसंधिं निश्छिद्रां बद्ध्वाऽऽसीत समाहितः ॥ मूलाधारे चतुष्पत्रे रक्तकिञ्जल्कशोभिते । मनसा प्रणवं ध्यायन्दक्षगुल्फं विलोकयन् ॥

कर ले । दोनों अंगूठों से दोनों कान, तर्जनियों से आँखें, मध्यमाओं से नाक (और शेष चारों से मुँह) बंद करे । मूर्धा में मन को एकाग्र करना चाहिये । जब तक आनन्द प्रकट न हो तब तक यों ध्यान करे । इससे प्राण ब्रह्मरन्ध्र में प्रवेश करता है ॥ ३८—४१ ॥ जब वायु ब्रह्मरंध्र में घुसती है तब अंदर ही विभिन्न नाद उत्पन्न होते हैं । पहले शंखध्वनि की तरह तथा अंत में मेघध्वनि की तरह शरीर के अंदर ही ध्वनि अनुभव में आती है । ॥ ४२ ॥ जब सिर के मध्य प्राण पहुँचता है तो ब्रह्मरन्ध्र से

---

१. ङ. धापयेत् । २. घ. °श्चासौ म° । ३. ग. °धने° ॥ ४७ ॥ ४. ग. ङ. °तेऽनले° । ५. ग. °थाऽन्या व्या° ।

नष्टे पापे विशुद्धं स्याच्चित्तदर्पणमुत्तमम् । पुनर्ब्रह्मादिलोकेभ्यो वैराग्यं जायते हृदि ॥ ५२ ॥

विरक्तस्य तु संसाराज्ज्ञानं कैवल्यसाधनम् ।

तेन पाशापहानिः स्याज्ज्ञात्वा देवमिति श्रुतिः ॥ ५३ ॥

अहो ज्ञानामृतं मुक्त्वा मायया परिमोहिताः ।

परिभ्रमन्ति संसारे सदाऽसारे नराधमाः ॥ ५४ ॥

यावन्मनोलयस्तस्मिंस्तावद्वायुं निरोधयेत् । अपानोऽनेन योगेन वह्निस्थानं व्रजेत्तदा ॥ आग्नेये मण्डले रक्ते त्रिकोणे देहधारकः । वैश्वानरो वसत्यग्निरन्नपानादिपाचकः ॥ अपानमग्निना सार्धं प्राणं तत्रैव निश्चलम् । धारयेत्प्रणवं ध्यायन्यावदग्निर्जितो भवेत् ॥ जातेऽग्निविजये सम्यगूर्ध्वं तद्वह्निमण्डलात् । कन्दनाभेरधस्ताच्च स्वाधिष्ठाने च षड्दले ॥ प्राणापानौ समारोप्य निश्चलं वह्निना सह । नाभिं विलोकयन्दृष्ट्या मनसा प्रणवं स्मरन् ॥ यावन्मनोलयस्तस्मिंस्तावद्वायुं निरोधयेत्। ततोऽग्निना ऽभ्यावर्तेन[1] प्रबोधं याति कुण्डली ॥ प्रबुद्धा कुण्डली कन्दनाभिरन्ध्रात्फणं स्वकम् । अपाकरोति तेनैतत्सुषुम्नामूलरन्ध्रकम् ॥ विवृतं भवति क्षिप्रं तस्मिन्वायुं प्रपूरयेत् । शनैः साग्निं सुषुम्नायामा मूर्ध्नः प्रणवं स्मरेत् ॥ धारयेन्मारुतं[2] साग्निं सुषुम्नारन्ध्रमूर्धनि । मरुताऽऽपूरिते देहे सुखवह्नि सवह्निना ॥ तदात्मा दृश्यते मूर्ध्नि यथाऽऽकाशे प्रभाकरः' इति ॥ ४४–५१ ॥ अनेन योगेन न केवलमारोग्यं किं तु समाधानं ज्ञानमप्यपवर्गफलं भवतीत्याह–**पुनर्ब्रह्मादीति** ॥ ५२ ॥ ज्ञात्वा देवमिति 'ज्ञात्वा देवं सर्वपाशापहानिः क्षीणैः क्लेशैर्जन्ममृत्युप्रहाणिः' इति श्वेताश्वतरोपनिषदित्यर्थः ॥ ५३–५४ ॥

मानो प्रस्राव होता है । तदनन्तर चित्त आत्मोन्मुखी हो जाता है ॥ ४३ ॥ इस अवस्था वाले को सरलता से आत्मज्ञान होता है जिससे संसारनिवृत्ति होती है । बायें टखने से सीवनी को दबाये और दायें टखने से बायें टखने के जोड़ को दबा कर बैठ जाये । शिव, गणेश और सरस्वती का स्मरण करे । लिंगनाल से वायु का शनैःशनैः समाकर्षण कर रेफ-बिन्दुयुक्त प्रणव का जप करते हुए उसे मूलाधार में निरुद्ध करे । इससे कुण्डली उद्दीप्त होती है और वह्नि समेत वायु सुषुम्ना में प्रवेश कर जाती है। यह अभ्यास वायु पर विजय दिलाता है । पहले पसीना, फिर कंपन होता है और यों वायुजय होने पर शरीर का उत्थान हो जाता है । यों अभ्यास करने वाले को मूलरोग, भगन्दर व अन्य व्याधियों से छुटकारा मिलता है । क्षुद्र व महान् पाप भी नष्ट हो जाते हैं ॥ ४४–५१ ॥ पापनिवृत्ति से चित्तशुद्धि व ब्रह्मलोकपर्यन्त वैराग्य हो जाता है । संसार से जिसे वैराग्य है उसके मोक्ष का साधन शिवात्मज्ञान है । ज्ञान से ही बंधन कटते हैं । श्रुति ने भी कहा है कि महादेव को जानने से पाशों से छुटकारा मिलता है । अहो खेद है ! रागी नराधम माया से मुग्ध हुए ज्ञानरूप अमृत को छोड़ संसार में भटकते रहते हैं ॥ ५२–५४ ॥

---

१. ०ना सवातेन प्र० इति वाल. पाठः । २. ग. °येन्मरुतः सा° ।

ज्ञानामृतरसो येन सकृदास्वादितो भवेत् । स सर्वकार्यमुत्सृज्य तत्रैव परिधावति ॥ ५५ ॥

ज्ञानामृतरसः प्रायस्तेन नाऽऽस्वादितो भवेत् ।

यो वाऽन्यत्रापि रमते तद्विहायैव दुर्मतिः ॥ ५६ ॥

ज्ञानस्वरूपमेवाऽऽहुर्जगदेतद्विचक्षणाः । अर्थस्वरूपमज्ञानात्पश्यन्त्यन्ये कुदृष्टयः ॥ ५७ ॥

यज्ञैर्देवत्वमाप्नोति तपोभिर्ब्रह्मणः पदम् । दानैर्भोगानवाप्नोति ज्ञानाद् ब्रह्माधिगच्छति ॥ ५८ ॥

कर्मणा केचिदिच्छन्ति कैवल्यं मुनिसत्तम ।

ते मूढा मुनिशार्दूल प्लवा ह्येत इति श्रुतिः ॥ ५९ ॥

आत्मैवेदं जगत्सर्वमिति जानन्ति पण्डिताः ।

अज्ञानेनाऽऽवृता मर्त्या न विजानन्ति शंकरम् ॥ ६० ॥

अज्ञानपाशबद्धत्वादमुक्तः पुरुषः स्मृतः । ज्ञानात्तस्य निवृत्तिः स्यात्प्रकाशात्तमसो यथा ॥ ६१ ॥

असारसंसारपरिभ्रमणं ज्ञानामृतरसापरिज्ञानादित्युक्तम् । तत्परिज्ञानवतस्तु तद्विरहमाह–**ज्ञानामृतेति** ॥ ५५–५६ ॥ चराचरजगज्जातस्य परशिवपरिकल्पितत्वेन वस्तुतस्तन्मयतां तत्त्वविदः पश्यन्तीत्याह–**ज्ञानस्वरूपमिति** । 'सद्धीदं सर्वं सत्सदिति । चिद्धीदं सर्वं काशते काशते च' इति तापनीयश्रुतिः । ज्ञानात्पृथगर्थस्य पारमार्थिकत्वाभिमानस्त्वविद्यैकनिबन्धन इत्याह–**अर्थेति** ॥ ५७–५८ ॥ **प्लवा ह्येत** इति ॥ 'प्लवा ह्येते अदृढा यज्ञरूपा अष्टादशोक्तमवरं येषु कर्म । एतच्छ्रेयो येऽभिनन्दन्ति मूढा जरामृत्युं ते पुनरेवापियन्ति' इति मुण्डकश्रुतिरपवर्गस्य कर्मसाध्यतां प्रतिक्षिपतीत्यर्थः ॥ ५९–६१ ॥

जिसने एक बार भी ज्ञानामृत का रस चख लिया वह तो सब काम छोड़ उसी ओर दोड़ता है ॥ ५५ ॥ जो अन्यत्र रमण करता है उसने निश्चित ही ज्ञान का स्वाद नहीं जाना है ॥ ५६ ॥ विद्वान् तो जगत् को ज्ञानस्वरूप ही बताते हैं । जो विद्वान् नहीं गलत दृष्टि वाले हैं वे अर्थस्वरूप का दर्शन करते हैं। (जैसे सर्पादि रज्जुस्वरूप ही अधिष्ठानतत्त्ववेत्ता को प्रतीत होते हैं क्योंकि रज्जुसे अतिरिक्त उनका अपना कोई अस्तित्व नहीं वैसे शिवात्मवेत्ता संसार को शिवमात्रस्वरूप देखता है । भ्रमकाल तक सर्पादि स्वस्वरूप से अवस्थित प्रतीत होते हैं । ऐसे ही पदार्थ भी हमें अज्ञानवेला में निजी स्वरूप वाले लगते हैं ।) ॥ ५७ ॥ यज्ञों से देवतापद, तप से ब्रह्मापद तथा दान से भोग मिलते हैं, किंतु ज्ञान से ब्रह्मरूप मोक्ष ही प्राप्त हो जाता है ॥ ५८ ॥ कुछ विचारक समझते हैं कि कर्मों से मोक्ष मिलता है । वे मूर्ख हैं क्योंकि स्वयं वेद ने कर्मों को अदृढ नौका बता कर उनकी मोक्षसाधनता का निषेध कर दिया है ॥ ५९ ॥ यह सारा जगत् आत्मा ही है ऐसा पण्डित लोग जानते हैं (जैसे सर्पादि रज्जु ही है ऐसा रज्जुज्ञ जानता है) । इस कल्याणकारी तत्त्व को वे मर्त्य नहीं जानते जो अज्ञानपंक में निमग्न हैं ॥ ६० ॥ अज्ञानपाश से बँधा पुरुष ही अमुक्त कहा जाता है । अज्ञान की निवृत्ति ज्ञान से होती है जैसे अँधेरे की निवृत्ति प्रकाश से ही होती है ॥ ६१ ॥ अज्ञान के स्वरूप का विचार कर निश्चय होता है यह मिथ्या ही है । यों इसके

आत्मस्वरूपविज्ञानादज्ञानस्य परीक्षया[1] । क्षीणेऽज्ञाने महाप्राज्ञ रागादीनां परिक्षयः ॥ ६२ ॥

रागाद्यसंभवे प्राज्ञ पुण्यपापोपमर्दनम् । तयोर्नाशे शरीरेण न पुनः संप्रयुज्यते ॥ ६३ ॥

अशरीरो महानात्मा सुखदुःखैर्न बाध्यते । क्लेशमुक्तः प्रसन्नात्मा मुक्त इत्युच्यते बुधैः ॥ ६४ ॥

तस्मादज्ञानमूलानि सर्वदुःखानि देहिनाम् ।

ज्ञानेनैव निवृत्तिः स्यादज्ञानस्य न कर्मभिः ॥ ६५ ॥

नास्ति ज्ञानात्परं किंचित्पवित्रं पापनाशनम् । तदभ्यासादृते नास्ति संसारच्छेदकारणम् ॥ ६६ ॥

सर्वमुक्तं समासेन तव स्नेहान्महामुने । गोपनीयं[2] त्वयैवैष वेदान्तार्थो महामुने ॥ ६७ ॥

इति श्रीस्कन्दपुराणे सूतसंहितायां ज्ञानयोगखण्डे प्राणायामविधिनिरूपणं नाम षोडशोऽध्यायः ॥ १६ ॥

ज्ञानान्मिथ्याज्ञाननिवृत्तौ तन्निबन्धनरागाद्यभावेन धर्माधर्मप्रवृत्तिविरहे तदुभयफलभोगनिमित्तस्य शरीरपरिग्रहस्याभावाद्दुःखात्यन्तनिवृत्तिरपवर्गो भवतीत्याह–**आत्मस्वरूपेति** । तथा च गौतमसूत्रम्–'दुःखजन्मप्रवृत्तिदोषमिथ्याज्ञानानामुत्तरोत्तरापाये तदनन्तरापायादपवर्गः' इति ॥ ६२–६६ ॥ **गोपनीयमिति**[3] । ज्ञानस्यैव हेतुत्वं कर्मणामहेतुत्वं च यद्यपि सकलवेदान्तार्थस्तथाऽपि मूर्खेषु न प्रकाशनीयम् । 'न बुद्धिभेदं जनयेदज्ञानां कर्मसङ्गिनाम् । जोषयेत्सर्वकर्माणि विद्वान्युक्तः समाचरन्' ॥ इति गीतासु भगवतोक्तमित्यर्थः ॥ ६७ ॥

इति श्रीसूतसंहितातात्पर्यदीपिकायां ज्ञानयोगखण्डे प्राणायामविधिनिरूपणं नाम षोडशोऽध्यायः ॥ १६ ॥

आग्रह से छूटने पर आत्मस्वरूप का अनुभव होता है जिससे अज्ञान क्षीण हो जाने पर रागादि समाप्त हो जाते हैं ॥ ६२ ॥ रागादि न रहने पर पुण्य-पाप नहीं रह जाते । (अज्ञान व राग-द्वेष से युक्त पुरुष ने ही कर्मों को किया है, अतः वे उसे तभी तक फल दे सकते हैं जब तक वह अज्ञान और राग-द्वेष से युक्त रहे । अज्ञानादि से युक्त न रह जाने पर पुण्य-पाप उसके लिये कोई फल उपस्थित नहीं कर सकते ।) पुण्य-पाप न रह जाने से वह व्यक्ति पुनः शरीर से सम्बद्ध नहीं होता ॥ ६३ ॥ शरीर बिना व्यापक आत्मा सुख-दुःख से परेशान नहीं हो सकता । (सुख भी प्राप्ति आदि आयासों से व समाप्त हो कर परेशान ही करता है ।) यों अविद्यादि पाँचों क्लेशों से छूटा हुआ प्रसन्न आत्मा मुक्त कहा जाता है ॥ ६४ ॥ अतः देहधारियों के सारे कष्टों का मूल है अज्ञान । अज्ञान की निवृत्ति ज्ञान से ही हो सकती है, कर्मों से नहीं ॥ ६५ ॥ ज्ञान से पवित्र कुछ नहीं है जो सब पापों को नष्ट करे । ज्ञानाभ्यास से भिन्न कोई साधन नहीं है जो संसारबंधन को छिन्न-भिन्न करे ॥ ६६ ॥ हे महामुनि ! मैंने साधनाविषयक प्रायः सारी बातें तुम्हें प्रेमपूर्वक समझा दी हैं । वेदान्त के इस रहस्य को अनधिकारियों से छिपाये रखना (ताकि वे इससे दिग्भ्रान्त हो अनर्थ को प्राप्त न हों ।) ॥ ६७ ॥

---

१. परस्यात्मनईक्षा दर्शनं ज्ञानं तयेत्यर्थः । हानादिति शेषः । यद्वाऽज्ञानस्यैव परीक्षणं वास्तवत्वनिर्धारणं–नेदं तत्त्वतो नाम किंचदस्तीति । २. ख. घ. °नीयस्त्वयै° । ३. ख. °नीय इति° ।

सप्तदशोऽध्यायः

ईश्वर उवाच–अथातः संप्रवक्ष्यामि प्रत्याहारं महामुने ।
इन्द्रियाणां विचरतां विषयेषु स्वभावतः ॥ १ ॥
बलादाहरणं तेषां प्रत्याहारः स उच्यते । यद्यत्पश्यति तत्सर्वं ब्रह्म पश्येत्समाहितः ॥ २ ॥
प्रत्याहारो भवत्येष ब्रह्मविद्भिः[१] पुरोदितः । यदि शुद्धमशुद्धं वा करोत्यामरणान्तिकम् ॥ ३ ॥
तत्सर्वं ब्रह्मणे कुर्यात्प्रत्याहारोऽयमुच्यते । अथवा नित्यकर्माणि ब्रह्माराधनबुद्धितः ॥ ४ ॥
काम्यानि च [२]तथा कुर्यात्प्रत्याहारः स उच्यते ।
अथवा वायुमाकृष्य[३] तत्तत्स्थाने निरोधयेत् ॥ ५ ॥

यतो जितप्राणस्यैवेन्द्रियनियमनहेतुप्रत्याहारसंभवः, अतस्तदनन्तरं स उच्यत इत्याह–**अथात** इति । लक्षणमाह–**इन्द्रियाणामि**ति । आह पतञ्जलिः–'स्वविषयासंप्रयोगे चित्तस्वरूपानुकार इवेन्द्रियाणां प्रत्याहारः' इति ॥ १ ॥ ज्ञेयप्रपञ्चस्य सर्वस्य ज्ञानादव्यतिरेकानुसंधानमिन्द्रियनियमनादपि प्रशस्तः प्रत्याहार इत्याह–**यद्यदि**ति । 'ब्रह्मैवेदममृतं पुरस्ताद् ब्रह्म पश्चाद्ब्रह्म दक्षिणतश्चोत्तरेण । अधश्चोर्ध्वं च प्रसृतं ब्रह्मैवेदं विश्वमिदं वरिष्ठम्' इति हि मुण्डकोपनिषत् ॥ २ ॥ सर्वव्यापारजातस्य ब्रह्मणि समर्पणलक्षणमपरं प्रत्याहारमाह–**यदि शुद्धमि**ति । 'यत्करोषि यदश्नासि यज्जुहोषि ददासि यत् । यत्तपस्यसि कौन्तेय तत्कुरुष्व मदर्पणम् ॥ शुभाशुभफलैरेवं मोक्ष्यसे कर्मबन्धनैः' इति हि गीतासु ॥ ३ ॥ निषिद्धानि वर्जयित्वा नित्यानां काम्यानां च फलानभिसंधानेन भगवदाराधनबुद्ध्याऽनुष्ठानलक्षणमपरं प्रत्याहारमाह–**अथवा नित्येति** ॥ ४ ॥ दन्तमूलात्पादाङ्गुष्ठपर्यन्तं प्राणस्यापकर्षणरूपमपरं प्रत्याहारमाह**अथवा वायुमि**ति । पूर्वस्थानादपरं स्थानं प्रति वायुमाकृष्यैकैकत्र स्थाने यावदखिलोऽपि प्राण आगत्य स्थिरो भवति तावच्चित्तं धारयेत् । अनन्तरमवस्थानान्तरं[४] नयेदित्यर्थः ॥ ५ ॥

प्रत्याहार-विधाननिरूपण नामक सत्रहवाँ अध्याय

भगवान् बोले–हे महामुनि ! अब मैं प्रत्याहार बताऊँगा । इन्द्रियाँ स्वभाव से विषयों की ओर भागती हैं । उन्हें बलपूर्वक वहाँ से हटाना प्रत्याहार है । (पतंजलि ने स्पष्ट किया है कि क्योंकि इन्द्रियाँ चित्त का अनुकरण करती हैं, इसलिये चित्त का पहले यमादि से नियमन कर लेना चाहिये । जब चित्त अन्तर्मुखी होगा तो इंद्रियों को वैसा बनाना सरल हो जाता है । यद्यपि यमादि में भी इंद्रियनिग्रह है ही तथापि अब उनका सर्वथा नियंत्रण इष्ट है क्योंकि संयम का निकटतम प्रत्याहार है । अतः प्रत्याहार का फल इतना ही नहीं कहा कि इंद्रियाँ वशीभूत होती हैं किन्तु कहा कि उनकी परम वश्यता होती है–'ततः परमा वश्यतेन्द्रियाणाम्' (यो. सू. साधन ५५) ।) ब्रह्मवेत्ताओं ने तो माना है कि हम जिस किसी का अनुभव करते हैं उसे ब्रह्म जानें–यह प्रत्याहार है ॥ १–२½ ॥ शुभ या अशुभ जो कुछ भी जीवनभर हम

---

१ तदाहापरोक्षानुभूतिप्रकरण आचार्यः 'विषयेष्वात्मतां दृष्ट्वा मनसश्चिति मज्जनम् । प्रत्याहारः स विज्ञेयोऽभ्यसनीयो मुमुक्षुभिः' ॥ १२१ ॥ इति । २ ङ. ततः । ३ ग. घ. "ष्य स्थानात्स्थानं नि" । ङ. "ष्य स्थानान्तस्थं नि" । ४ घ. "रमेव स्था" ।

दन्तमूलात्तथा कण्ठे कण्ठादुरसि मारुतम् । उरोदेशात्समाकृष्य नाभिकन्दे निरोधयेत् ॥ ६ ॥
नाभिकन्दात्समाकृष्य कुण्डल्यां तु निरोधयेत् । कुण्डलीदेशतो विद्वान्मूलाधारे निरोधयेत् ॥ ७ ॥
तथाऽपाने कटिद्वंद्वे तथोरुद्वयमध्यमे । तथा जानुद्वये जङ्घे पादाङ्गुष्ठे निरोधयेत् ॥ ८ ॥
प्रत्याहारोऽयमित्युक्तः प्रत्याहारपरैः पुरा । एवमभ्यासयुक्तस्य पुरुषस्य महात्मनः ॥ ९ ॥
सर्वपापानि नश्यन्ति भवरोगाश्च सुव्रत । अथवा तव वक्ष्यामि प्रत्याहारान्तरं मुने ॥ १० ॥
नाडीभ्यां वायुमाकृष्य निश्चलः स्वस्तिकासनः । पूरयेदनिलं विद्वानापादतलमस्तकम् ॥ ११ ॥
पश्चात्पादद्वये तद्वन्मूलाधारे तथैव च । नाभिकंदे च हृन्मध्ये कण्ठकूपे च तालुके ॥ १२ ॥
भ्रुवोर्मध्ये ललाटे च तथा मूर्धनि रोधयेत्[1] ।
अकारं च तथोकारं मकारं च तथैव च ॥ १३ ॥
नकारं च मकारं च शिकारं च वकारकम् ।
यकारं च तथोङ्कारं जपेद्बुद्धिमतां वर ॥ १४ ॥

तानि धारणास्थानान्यवरोहेणाऽऽह–**दन्तमूलादिति** ॥ ६–८ ॥ **प्रत्याहारोऽयमिति** । दन्तमूलमारभ्योक्तस्थानक्रमेण प्राणस्य पादाङ्गुष्ठप्रत्याहरणं प्रत्याहारः ॥ ९ ॥ पवनस्य पादद्वयमारभ्याऽऽरोहरूपं प्रत्याहारान्तरमाह–**अथवा तवेति** । पादद्वयादिस्थाननवके पूर्वपूर्वस्थानजयानन्तरमुत्तरोत्तरस्थानक्रमेणाकारादिवर्णनवकेन सह चित्तस्य धारणमित्यर्थः । एष च पवनधारणरूपः प्रत्याहार आगमे दर्शितः–'चित्तात्मैक्यधृतस्य प्राणस्य स्थानसंहतिः स्थानात् । प्रत्याहारो ज्ञेयश्चैतन्ययुतस्य सम्यगनिलस्य' इति । धारणास्थानानि तु तत्र कानिचिदधिकानि–'अङ्गुष्ठगुल्फजानुद्वितयानि गुदं च सीवनी मेढ्रम् । नाभिर्हृदयं ग्रीवा सलम्बिकाग्रं तथैव नासा च । भ्रूमध्यललाटाग्रं सुषुम्नाद्वादशान्तमित्येवम् ॥ उत्क्रान्तौ परकायप्रवेशने चाऽऽगतौ पुनः स्वतनौ । स्थानानि धारणायाः प्रोक्तानि मरुत्प्रयोगविधिनिपुणैः' इति ॥ १०–१४ ॥

करते हैं उस सबको ब्रह्मार्पण करना प्रत्याहार है ॥ ३½ ॥ अथवा नित्य व काम्य कर्मों को इस दृष्टि से करना कि हम परमात्मा की आराधना कर रहे हैं, प्रत्याहार है ॥ ४½ ॥ अथवा वायु को खींच कर इन स्थानों पर निरुद्ध करना चाहिये : दन्तमूल में, वहाँ से कण्ठ में, वहाँ से सीने में, वहाँ से नाभिकन्द में, वहाँ से कुण्डली में, वहाँ से मूलाधार में, वहाँ से गुदद्वार में, वहाँ से नितम्बों में, वहाँ से जाँघ के बीच, वहाँ से घुटनों में, वहाँ से पिण्डलियों में और अंत में पादांगुष्ठ में । यह प्राण का अपकर्षण रूप प्रत्याहार बताया गया है । इस प्रकार अभ्यास करने वाले महात्मा के पाप कटते हैं और सांसारिक रोग दूर होते हैं ॥ ५–९½ ॥ अथवा तुम्हें एक अन्य प्रत्याहार बताता हूँ : स्वस्तिकासन से बैठकर दोनों नासिकाओं से वायु खींच कर पैर के तले से मस्तकपर्यन्त उसे भर ले । फिर दोनों पैरों में, मूलाधार में, नाभिकन्द

---

१ क. ख. ग. घ. धारयेत् ।

प्रत्याहारोऽयमित्युक्तः पण्डितैः पण्डितोत्तम । अथवा मुनिशार्दूल प्रत्याहारं वदामि ते ॥ १५ ॥

देहाद्यात्ममतिं विद्वान्समाकृष्य समाहितः ।

आत्मनाऽऽत्मनि निर्द्वंद्वे निर्विकल्पे निरोधयेत् ॥ १६ ॥

प्रत्याहारः समाख्यातः साक्षाद्वेदान्तवेदिभिः । एवमभ्यसतस्तस्य न किंचिदपि दुर्लभम् ॥ १७ ॥

तस्य पुण्यं च पापं च न हि सत्यं बृहस्पते ।

अयं ब्रह्मविदां श्रेष्ठः साक्षाद्देवेश्वरः पुमान् ॥ १८ ॥

प्रत्याहारः समाख्यातः संक्षेपेण महामुने । गोपनीयस्त्वया नित्यं गुह्याद् गुह्यतरो ह्ययम् ॥ १९ ॥

इति श्रीस्कन्दपुराणे सूतसंहितायां ज्ञानयोगखण्डे प्रत्याहारविधाननिरूपणं नाम सप्तदशोऽध्यायः ॥ १७ ॥

अष्टादशोऽध्यायः

ईश्वर उवाच–अथातः संप्रवक्ष्यामि धारणाः[1] पञ्च सुव्रत ।

देहमध्यगते व्योम्नि बाह्याकाशं तु धारयेत् ॥ १ ॥

विषयादिभ्यः प्रत्याहृत्य बुद्धेरात्मनि धारणरूपं प्रत्याहारान्तरमाह–**अथवा मुनिशार्दूलेति** ॥ १५ ॥ **आत्मना** बुद्ध्या ॥ १६ ॥ १७ ॥ **तस्य पुण्यं चेति** । पापवद्भोगकारणं पुण्यमपि संसारावहतया हेयमेव । 'तदा विद्वान्पुण्यपापे विधूय निरञ्जनः परमं साम्यमुपैति' इति मुण्डकश्रुतिः ॥ १८ ॥ गुह्यात्पवनप्रत्याहारादपि विमर्शरूपस्य प्रत्याहारस्य विशेषमाह–**गोपनीय इति** ॥ १९ ॥

इति श्रीसूतसंहितातात्पर्यदीपिकायां ज्ञानयोगखण्डे प्रत्याहारविधाननिरूपणं नाम सप्तदशोऽध्यायः ॥ १७ ॥

में, हृदय में, कण्ठकूप में, तालु में, भ्रूमध्य में, ललाट में और मूर्धा में क्रमशः उसका निरोध करे । इन नौ स्थानों पर निरोध करते हुए क्रमशः इन अक्षरों का जप करे : अ, उ, म, न, म, शि, व, य, ॐ । पण्डितों ने इसे आरोहरूप प्रत्याहार बताया है ॥ १०–१४½ ॥ अथवा हे मुनिश्रेष्ठ ! तुम्हें अन्य प्रत्याहार बताता हूँ । एकाग्रतापूर्वक देहादि से आत्मबुद्धि को हटाकर निश्चयपूर्वक सुख-दुःखादि द्वन्द्वों से न बदलने वाले, सभी विशेषताओं से रहित प्रत्यङ्मात्र आत्मतत्त्व में उसे स्थापित करे । (अर्थात् 'मैं शरीरादि हूँ' ऐसा न सोच 'मैं शरीरादिरहित आत्ममात्र हूँ' ऐसा चिन्तन करे ।) यह वेदान्तियों ने प्रत्याहार बताया है । इस प्रकार अभ्यास करने वाले के लिये कुछ भी दुर्लभ नहीं है । वह पुण्य-पाप से अतीत हो जाता है । वह स्वयं शिवरूप हो जाता है ॥ १५–१८ ॥ यों संक्षेप से प्रत्याहार समझा दिया । इस प्रत्याहार को गोपनीय रखना क्योंकि यह गुह्य से भी अधिक गुह्य है । (अनधिकारी को इन अभ्यासों से लाभ नहीं, हानि भले ही हो । अतः इन्हें गोपनीय बताया है । आसन से प्रारम्भ होने वाले सभी योगांग श्री गुरु के निर्देश से ही ग्रहण कर उनकी संनिधि में ही अभ्यास करने चाहिये अन्यथा नानाविध आपत्तियाँ संभव हैं ।) ॥ १९ ॥

धारणाविधि-निरूपण नामक अठारहवा अध्याय

महादेव बोले–अब मैं तुम्हें पाँच धारणायें बताऊँगा । (चित्तवृत्ति को किसी स्थान पर स्थिर करने का अभ्यास 'धारणा' शब्द का अर्थ है ।) देहान्तर्वर्ती आकाश में बाह्याकाश के तादात्म्य की बुद्धि हकार के जप सहित करे । प्राण में बाह्यवायु के तादात्म्य की दृष्टि यकार-जप सहित करे । इसी प्रकार उदर-

---

१ पातंजलन्तु सूत्रं 'देशबन्धश्चित्तस्य धारणे'ति । नाभ्याद्यान्तरस्थाने चन्द्रादिबहिर्देशे वा चित्तवृत्तेः स्थिरीकरणं धारणेत्यर्थः ।

प्राणे बाह्यानिलं तद्वज्ज्वलने चाग्निमौदरे । तोयं तोयांशके भूमिं भूमिभागे महामुने ॥ २ ॥

[१]हयवरलकाराख्यं मन्त्रमुच्चारयेत्क्रमात् । धारणैषा मया प्रोक्ता सर्वपापविशोधिनी[२] ॥ ३ ॥

जान्वन्तः पृथिवीभागो ह्यपां पाय्वन्त उच्यते ।
हृदयान्तस्तथाऽग्न्यंशो भ्रूमध्यान्तोऽनिलांशकः[३] ॥ ४ ॥

आकाशान्तस्तथा प्राज्ञ मूर्धान्तः परिकीर्तितः ।
ब्रह्माणं पृथिवीभागे विष्णुं तोयांशके तथा ॥ ५ ॥

अग्न्यंशे च महेशानमीश्वरं चानिलांशके । आकाशांशे महाप्राज्ञ धारयेत्तु सदाशिवम् ॥ ६ ॥

अथवा तव वक्ष्यामि धारणां मुनिपुंगव ।
मनसीन्दुं दिशः श्रोत्रे क्रान्ते विष्णुं बले हरिम् ॥ ७ ॥

यतः प्रत्याहारेण वशीकृतस्य चित्तस्य धारणासु योग्यता, अतस्तदनन्तरं ता उच्यन्त इति प्रतिजानीते–**अथात** इति । तत्र शरीरान्तर्वर्तिषु वियदादिषु[४] हयवरलवर्णैर्भूतबीजैः सह बाह्यविषयादितादात्म्येन[५] बुद्धिर्धारयितव्या । एषा च धारणा सह फलेन श्वेताश्वतरोपनिषदि वर्णिता–'पृथ्व्यप्तेजोनिलखे समुत्थिते पञ्चात्मके योगगुणे प्रवृत्ते । न तस्य रोगो न जरा न मृत्युः प्राप्तस्य योगाग्निमयं शरीरम्' इति ॥ १–३ ॥ उक्तानां वियदादीनां शरीरे धारणावस्थानविशेषात्सह तत्तद्देवताभिराह–**जान्वन्त** इति ॥ ४–५ ॥ **महेशानं** रुद्रं; पञ्चधा विभक्तेषु पादादिषु शरीरप्रदेशेषु पृथिव्यादिपञ्चभूतात्मकतां, तेषु च ब्रह्मविष्णुरुद्रेश्वरसदाशिवरूपतां च सदा भावयेदित्यर्थः ॥ ६ ॥ **अथवा तवेति** । मनःप्रभृत्याध्यात्मिक-शरीरभागेषु चन्द्रादीन्याधिदैविकरूपाणि तादात्म्येन भावयेत् । **क्रान्ते** क्रमणेनोपलक्षिते पादे । हरिमिन्द्रम्[६] ॥ ७ ॥

स्थित अग्नि और बाह्य अग्नि के तादात्म्य की बुद्धि वकारजप सहित करे । शरीरान्तःस्थ जलभाग में बाह्यजल-तादात्म्य-दृष्टि रेफजप सहित करे। देहवर्ती पृथ्वी भाग में बाह्य पृथिवी के तादात्म्य की बुद्धि लकारजप सहित करे । यह धारणा सब पापों को निवृत्त करती है ॥ १–३ ॥ पादतल से घुटने तक के देहभाग में पृथ्वी-दृष्टि और उसमें पुनः ब्रह्मा-दृष्टि करनी चाहिये। (अपने घुटने तक के पैरों को पृथ्वी समझे और उसे–पृथ्वी को–ब्रह्मा समझे । ऐसे ही आगे भी जानना चाहिये ।) घुटने से पायु तक के देहभाग में जल-दृष्टि और उसमें विष्णु-दृष्टि करे । हृदयपर्यन्त अग्नि-दृष्टि और उसमें रुद्रदृष्टि करनी चाहिये । भ्रूमध्य तक के देहभाग में वायुदृष्टि और उसमें ईश्वरदृष्टि करे । मूर्धा-पर्यन्त भाग में आकाशदृष्टि और उसमें सदाशिवदृष्टि करे ॥ ४–६ ॥ अथवा यह धारणा करनी चाहिये–मन में चन्द्रतादात्म्यदृष्टि, कानों में दिक्-तादात्म्यदृष्टि, पैरों में विष्णुतादात्मयदृष्टि, हाथों में इन्द्रतादात्म्यदृष्टि, वाणी में अग्नितादात्म्य-दृष्टि, अपान में मित्रदेवतादात्म्यदृष्टि, उपस्थ में प्रजापतितादात्म्यदृष्टि, त्वचा में वायुतादात्म्यदृष्टि, नेत्रों में

---

१. घ. हयरवल" । २ ग. "शोषिणी ॥ ३ ॥ ३ ख. ङ. "ध्यांशोऽनि" । ४ घ. "हयरवल" । ५ ख. "वियदादि" ।
६. 'अर्कमर्कटमण्डूकविष्णुवासववायवः । तुरंगसिंहशीतांशुयमाश्च हरयो दश ॥' हलायुधे ।

वाच्यग्निं मित्रमुत्सर्गे तथोपस्थे प्रजापतिम् । त्वचि वायुं तथा नेत्रे सूर्यमूर्तिं तथैव च ॥ ८ ॥

जिह्वायां[1] वरुणं घ्राणे भूमिदेवीं तथैव च । पुरुषे सर्वशास्तारं बोधानन्दमयं शिवम् ॥ ९ ॥

धारयेद् बुद्धिमान्नित्यं सर्वपापविशुद्धये । एषा च धारणा प्रोक्ता[2] योगशास्त्रार्थवेदिभिः ॥ १० ॥

ब्रह्मादिकार्यरूपाणि स्वे स्वे संहृत्य कारणे । सर्वकारणमव्यक्तमनिरूप्यमचेतनम् ॥ ११ ॥

साक्षादात्मनि संपूर्णे धारयेत्प्रयतो नरः । धारणैषा परा प्रोक्ता धार्मिकैर्वेदपारगैः ॥ १२ ॥

इन्द्रियाणि समाहृत्य मनसाऽऽत्मनि धारयेत् ।

कंचित्कालं महाप्राज्ञ धारणैषा च पूजिता ॥ १३ ॥

वेदादेव सदा देवा वेदादेव सदा नराः । वेदादेव सदा लोका वेदादेव महेश्वरः ॥ १४ ॥

उत्सृजत्यनेनेत्युत्सर्गोऽपानं तत्र ॥ ८ ॥ **पुरुषे** जीवे **सर्वशास्तारं** परमात्मानम् । 'अन्तः प्रविष्टः शास्ता जनानां सर्वात्मा' इति श्रुतेः ॥ ९–१० ॥ धारणान्तरमाह–**ब्रह्मादीति** । ब्रह्मादीनामचिदंशाः स्वस्वकारण-परम्परया मायायां लीयन्ते । माया च परमात्मनि । ब्रह्मादयस्तु परमात्मरूपेणैव न्यवतिष्ठन्त इति भावयेदित्यर्थः । **अव्यक्त**मनभिव्यक्तम् । नामरूपानिरूप्यमनिर्वचनीयम् । **अचेतनं** जडम् ॥ ११–१२ ॥ धारणान्तरमाह–**इन्द्रियाणीति** । मनसैव विषयेभ्य इन्द्रियाणि व्यावृत्त्य मन **आत्मनि धारये**दित्यर्थः । इयं च कठवल्लीषु सविशेषं दर्शिता–'यच्छेद्वाङ्मनसी प्राज्ञस्तद्यच्छेज्ज्ञान आत्मनि । ज्ञानमात्मनि महति नियच्छेत्तद्यच्छेच्छान्त आत्मनि' इति ॥ १३ ॥ **वेदादेवेति** । देवादयः सर्वे वेदशब्देभ्य एव सृष्टाः । 'एते असृग्रमिन्दवस्तिरःपवित्रमाशवः' इति अत्र मन्त्रः, 'एत इति वै प्रजापतिर्देवानसृजत । असृग्रमिति मनुष्यान् । इन्दव इति पितॄन् । तिरःपवित्रमित्यन्याः प्रजा' इति श्रुतेः । 'ऋषीणां नामधेयानि कर्माणि च पृथक्पृथक् वेदशब्देभ्य एवाऽऽदौ निर्ममे स महेश्वरः' इति स्मृतावपि ऋषिपदस्य सर्वस्रष्टव्यो-पलक्षणार्थत्वात् । महेश्वरोऽपि वेदादेव ज्ञातव्यः 'नावेदविन्मनुते तं बृहन्तं सर्वानुभवमात्मानं संपराये' इति ॥ १४ ॥

सूर्यतादात्म्यदृष्टि, जिह्वा में वरुणतादात्म्यदृष्टि, घ्राण में पृथ्वीतादात्म्यदृष्टि तथा जीव में सर्वशासक ज्ञान-आनन्दमय शिव की दृष्टि करे । यह धारणा योगियों ने सब पापों के शोधन के लिये बतायी है ॥ ७–१० ॥ अथवा यह धारणा करे–ब्रह्मा आदि की उपाधियों को अपने अपने कारण में विलीन कर मायापर्यन्त विलय करे । वह माया व्यक्त नहीं है, अनिर्वचनीय है और जड है । उसे परमात्मा में लीन करे । यह धारणा श्रेष्ठ है ॥ ११–१२ ॥ अथवा इन्द्रियों को विषयों से व्यावृत्त कर मन सहित उनको आत्मा में धारण करे । (अर्थात् आत्मेतर कोई वृत्ति न बनावे । अथवा इंद्रियों को मनसे और मन को आत्मा से अभिन्न चिंतित करे ।) यह भी उत्तम धारणा है ॥ १३ ॥ अथवा पाँचवीं धारणा यह चिंतन करना है कि देव, नर और लोक वेद से ही उपजे हैं तथा महेश्वर भी वेद से ही जाना जा सकता है ॥ १४ ॥ इनसे अतिरिक्त यह निश्चय रखना भी धारणा है कि मैं देव, यक्ष, नर, देह, इंद्रिय, बुद्धि

---

१ वाचीति कर्मेन्द्रियग्रहणं जिह्वेति ज्ञानेन्द्रियग्रहणम् । २ ग. "क्ता वेदशा" ।

इति चित्तव्यवस्था या धारणा सा प्रकीर्तिता ।
ब्रह्मैवाहं सदा नाहं देवो यक्षोऽथवा नरः ॥ १५ ॥
न [1]देहेन्द्रियबुद्ध्यादिर्न माया नान्यदेवता[2] ।
इति बुद्धिव्यवस्थाऽपि धारणा सेति हि श्रुतिः १६ ॥
सर्वं संक्षेपतः प्रोक्तं सर्वशास्त्रविशारद । आगमान्तैकसंसिद्धमास्थेयं भवता सदा ॥ १७ ॥
इति श्रीस्कन्दपुराणे सूतसंहितायां ज्ञानयोगखण्डे धारणाविधिनिरूपणं नामाष्टादशोऽध्यायः ॥ १८ ॥

एकोनविंशोऽध्यायः

ईश्वर उवाच—अथातः संप्रवक्ष्यामि ध्यानं[3] संसारनाशनम् ।
आकाशे निर्मलं शुद्धं भासमानं सुशीतलम् । १ ॥
सोममण्डलमापूर्णमचलं दृष्टिगोचरम् । ध्यात्वा मध्ये महादेवं परमानन्दविग्रहम् ॥ २ ॥

ब्रह्मैवाहमिति । 'अयमात्मा ब्रह्म' इति श्रुतावात्मनः परमात्मतादात्म्याभिधानेनैव तदितरसमस्तवस्त्वात्मकत्वावगमादित्यर्थः ॥ १५ ॥ १६ ॥ १७ ॥

इति श्रीसूतसंहितातात्पर्यदीपिकायां ज्ञानयोगखण्डे धारणाविधिनिरूपणं नामाष्टादशोऽध्यायः ॥ १८ ॥

यतो धारणाभ्यासेन परित्यक्तचापलस्य मनसो ध्यानयोग्यता, अतस्तदनन्तरं तदुच्यत इत्याह—**अथात** इति । तच्च सगुणनिर्गुणलक्षणविषयभेदेन द्विविधम् । तत्र सगुणध्यानान्याह—**आकाश** इत्यादि । आकाशे वर्तमानमुक्तलक्षणं सकललोकदृष्टिगोचरं चन्द्रमण्डलं प्रथमतो ध्यात्वा, तन्मध्ये 'विज्ञानमानन्दं ब्रह्म' इति श्रुत्युक्तं सच्चिदानन्दैकरसं परमेव ब्रह्मोमासहायत्वादि-यथोक्तलक्षणं स्वीकृतलीलावतरं शिवमात्मत्वेन ध्यायेदित्यर्थः । तथा च वाजसनेयके—बालाक्यजातशत्रुसंवादे—'य एवासौ चन्द्रे पुरुष एतमेवाहं ब्रह्मोपासे' इति बालाकिनोक्ते, नैतन्निष्कलशिवस्वरूपं किं तु स्वीकृतलीलावतारं सकलमिदं रूपमित्य-भिप्रायवताऽजातशत्रुणोक्तम्' मा मैतस्मिन्संवदिष्ठा बृहन्पाण्डरवासाः सोमो राजेति वा अहमेतमुपासे' इति ॥ १-४ ॥

आदि, माया या अन्य कोई देवता नहीं हूँ, केवल ब्रह्म हूँ ॥ १५-१६ ॥ इस प्रकार धारणा के विषय में भी संक्षेप से सब बता दिया । उपनिषदों में बतायी इन धारणाओं का तुम्हें अभ्यास करना चाहिये ॥ १७ ॥

ध्यानविधि-निरूपण नामक उन्नीसवा अध्याय

भगवान् ने आगे कहा—अब मैं संसारचक्र में परिभ्रमण की निवृत्ति के उपायभूत ध्यान के विषय में कहूँगा । आकाश में सुशीतल शुद्ध चमकते हुए चन्द्रमण्डल का ध्यान कर उस चन्द्रबिम्ब के मध्य महादेव का ध्यान करे । आनन्द से उल्लसित अर्धनारीश्वर रूप का चिन्तन करना चाहिये । शुद्ध स्फटिक की तरह उनका शरीर है, द्वितीया के चन्द्र का शिरोभूषण है, तीन आँखें हैं, चार भुजायें हैं, नीली ग्रीवा है,

१. ख. देहेन्द्रियमनोबुद्धिर्न । २. विष्ण्वादेरंशोऽहमित्यादिधीरिहापोद्यते । यद्वा देवोहमिति तु मिथ्याधी र्देवयोनिवतामुक्ता, देवतेति चास्माकं गौणी धीरुच्यते । ३ धारणाध्यानसमाधयो न जात्या पृथक् । स्थैर्याधिक्यमेव विशेषः । अतः संयमनाम्ना त्रयाणां बोधो योगिनामिष्टः ।

उमार्धदेहं वरदमुत्पत्तिस्थितिवर्जितम्[1] । शुद्धस्फटिकसंकाशं चन्द्ररेखावतंसकम् ॥ ३ ॥
त्रिलोचनं चतुर्बाहुं नीलग्रीवं परात्परम् । ध्यायेन्नित्यं सदा सोऽहमिति ब्रह्मविदां वर ॥ ४ ॥
अथवाऽऽकाशमध्यस्थे भ्राजमाने सुशोभने । आदित्यमण्डले पूर्णे लक्षयोजनविस्तृते ॥ ५ ॥
सर्वलोकविधातारमीश्वरं हेमरूपिणम् । हिरण्मयं श्मश्रुकेशं हिरण्मयनखं तथा ॥ ६ ॥
कप्यास्यासनवद्वक्त्रं[2] नीलग्रीवं विलोहितम् । आगोपालप्रसिद्धं तमम्बिकार्धशरीरिणम् ॥ ७ ॥
सोऽहमित्यनिशं ध्यायेत्संध्याकालेषु वा नरः । अथवा वैदिके शुद्धेऽप्यग्निहोत्रादिमध्यगे ॥ ८ ॥
आत्मानं जगदाधारमानन्दानुभवं सदा । गङ्गाधरं विरूपाक्षं विश्वरूपं वृषध्वजम् ॥ ९ ॥
चतुर्भुजं समासीनं चन्द्रमौलिं कपर्दिनम् । रुद्राक्षमालाभरणमुमायाः पतिमीश्वरम् ॥ १० ॥
गोक्षीरधवलाकारं गुह्याद् गुह्यतरं सदा । अत्यद्भुतमनिर्द्वंद्वमहंबुद्ध्या विचिन्तयेत् ॥ ११ ॥

चन्द्रमण्डलवदादित्यमण्डलमप्याकाशे ध्यात्वा तत्र स्वीकृतदिव्यावतारं परशिवमेवं ध्यायेदित्याह—**अथवाऽऽकाशेति** ॥ ५ ॥ **हेमरूपिणमिति** । उद्गीथविद्यायामादित्यस्थस्य पुरुषस्य कतिचिदिहोक्ता हेमरूपत्वादिगुणाः श्रूयन्ते—'य एषोऽन्तरादित्ये हिरण्मयः पुरुषो दृश्यते । हिरण्यश्मश्रुर्हिरण्यकेश आ[3] प्रणखात्सर्व एव सुवर्णस्तस्य यथा कप्यासं पुण्डरीकमेवमक्षिणी' इति ॥ ६ ॥ **कप्यास्यासनवदिति** । कपीनां हि केषांचिदास्यमासनं च रक्तवर्णं तथा रक्तवर्णं मुखमित्यर्थः । **आगोपालमिति** । श्रूयते हि रुद्राध्याये—'उतैनं गोपा अदृशन्नदृशन्नुदहार्यः । उतैनं विश्वा भूतानि स दृष्टो मृडयाति नः' इति ॥ ७ ॥ उक्तलक्षणं परशिवमग्नौ वा स्वीकृतवक्ष्यमाणदिव्यावतारं ध्यायेदित्याह-**अथवा वैदिक** इति । परब्रह्म सगुणमग्नावुपास्यत्वेनोक्तं हि बालाकिनैव—'य एवायमग्नौ पुरुष एतमेवाहं ब्रह्मोपासे' इति । उक्ताश्चन्द्रादित्याग्नयः शिवमूर्तित्वेनाऽऽगमेष्वपि प्रसिद्धाः—'क्ष्मावह्नियजमानार्कजलवातेन्दुखानि च । कीर्तिता मूर्तयो ह्यष्टौ' इति ॥ ८–११ ॥

वर प्रदान कर रहे हैं, जन्मादि विकार से शून्य हैं तथा सबसे परम हैं—इस तरह के महादेव को अपने से अभिन्न रूप से सोचना चाहिये—'ऐसे महादेव मैं हूँ' यों ध्यान करना चाहिये ॥ १–४ ॥ अथवा आकाश के मध्य चमकते हुए तथा एक लाख योजन विस्तार वाले सुशोभन पूर्ण आदित्यमण्डल में समस्त लोकों के विधाता ईश्वर का ध्यान करे । उनका ध्येयरूप सोने की तरह है । दाढ़ी बाल व नख—सभी स्वर्णमय हैं । उनका मुख वैसा गुलाबी है जैसे वानर का नितम्ब होता है । ग्रीवा के मध्य में नीलिमा है व चारों ओर लालिमा । गोपालकों पर्यंत सभी उनके रूप से परिचित हैं । ऐसे अर्धनारीश्वर महादेव का अपने से अभिन्न रूप से ध्यान करना चाहिये ॥ ५–७½ ॥ अथवा अग्निहोत्रादि की शुद्ध अग्नि के मध्य स्थित उमापति का ध्यान करे । वे चेतन हैं, जगत् के आधार हैं, आनन्द का सदा अनुभव कर रहे हैं, उनकी जटा में गंगा है, तीन आँखें हैं, चार भुजायें हैं, चन्द्र मुकुट है, उन्नत जटाये हैं, रुद्राक्ष मालाओं

१ विकाररूपस्थितिरहितमित्यर्थः । या हि जन्मानन्तरं स्थितिः सैव विकारः, नित्यस्थितिस्तु शिवरूपमेवेति । २ ङ. °वद्वक्तं नी° । ३ क. ग. आ प्रनखा° । घ. आ नखा° ।

अथवाऽहं हरिः साक्षात्सर्वज्ञः पुरुषोत्तमः । सहस्रशीर्षा पुरुषः सहस्राक्षः सहस्रपात् ॥ १२ ॥

विश्वो नारायणो देवः अक्षरः परमः प्रभुः । इति ध्यात्वा पुनस्तस्य हृदयाम्भोजमध्यमे ॥ १३ ॥

प्राणायामैर्विकसिते परमेश्वरमन्दिरे । अष्टैश्वर्यदलोपेते विद्याकेसरसंयुते ॥ १४ ॥

ज्ञाननालमहत्कन्दे प्रणवेन प्रबोधिते । विश्वार्चिषं महावह्निं ज्वलन्तं विश्वतोमुखम् ॥ १५ ॥

आदित्यमूर्तिवद्विष्णुमूर्तावपि परशिवस्य वक्ष्यमाणलीलावतारस्य स्वात्मतादात्म्येन ध्यानमाह–**अथवेति** । तत्र प्रथमतो विष्णुमूर्तेरपि स्वात्मतादात्म्यानुसंधानमाह–**अहं हरिरिति** । **सहस्रशीर्षा** ब्रह्मादिपिपीलिकान्तसर्वप्राणिषु वर्तमानानि सहस्राण्यनन्तानि शीर्षाणि शिरांसि यस्येति स तथोक्तः । **पुरुषः** पूर्णः । **सहस्राक्षः** सहस्राण्यनन्तानि प्रजासंवन्धीन्यक्षीणीन्द्रियाणीति सहस्राक्षः । एवं **सहस्रपादिति** ॥ १२ ॥ **विश्वो** विश्वत्वेन स्थितः । **नारायणः** 'नृ नये' पचाद्यच् । नरो नेता सर्वस्य स्वामी । तस्यापत्यानि नाराः सर्वे चेतना अचेतनाश्च । अपत्येऽण् । तेषामयनमधिष्ठानत्वेनाऽऽश्रयभूतं जलचन्द्राणां बिम्वचन्द्रवत्कलधौतादीनां शुक्तिकादिवदिति नारायणः 'पूर्वपदात्संज्ञायामि'ति णत्वम् । देवो देवनशीलः । **अक्षरो** न क्षरतीति सर्वमश्नुत इति[१] वाऽक्षरः । अशेः सरप्रत्ययेऽक्षरम् । **परमः** सर्वोत्कृष्टः । यद्वाऽक्षरः **परमः** परमाक्षरः परमव्यापको व्यापकानामपि व्यापकः । **प्रभुः** सर्वेषां प्रकर्षेण भरणक्षमः । तदात्मकस्य स्वात्मनो हृदयाम्भोजमध्ये "पद्मकोशप्रतीकाशं हृदयं चाप्यधोमुखम्" इतिश्रुत्युक्ते ॥ १३ ॥ रेचकप्राणायामेन विकासीकृत्य, ऊर्ध्वमुखीकृतपरमेश्वरमन्दिरे । तत्र हि परमेश्वरो ध्यातव्यत्वेन वक्ष्यते । अणिमादीन्यष्टैश्वर्याणि[२] दलानि तैरुपेते तत्त्वविद्यारूपैः केसरैर्युते ॥ १४ ॥ शास्त्रविषयं ज्ञानं नालं यस्य तस्मिन्, महत्तत्त्वमेव कन्दो यस्य तस्मिन्, **प्रणवेन प्रबोधिते** प्रागुक्तविकासे प्रणवदिवाकरस्य कारणतोच्यते । उक्तहृदयकमलमध्यगतसुषुम्नायामन्तर्वक्ष्यमाणवह्निशिखायाः कारणभूतं मूलाधारस्थं वैश्वानरमाह–**विश्वार्चिषमिति** । विश्वार्चिषं सर्वतःप्रसरज्ज्वालम् । **विश्वतोमुखं** विश्वावकाशोदीर्णमुखसामर्थ्यम् ॥ १५ ॥

से सज्जित हैं, गाय के दूध के समान गौरवर्ण हैं । उनकी ध्वजा में वृषभ अंकित है । सारा संसार उन्हीं का रूप है । इस प्रकार सब द्वन्द्वों से रहित अद्भुत शान्तरूप से बैठे महादेव का अपने से अभिन्न रूप से –ऐसे महादेव मैं हूँ–ध्यान करना चाहिये ॥ ८–११ ॥ अथवा यों ध्यान करे–पहले विष्णुमूर्ति का अपने से अभिन्नरूप से ध्यान करे–'मैं हरि हूँ' । हरिरूप की इन विशेषताओं का चिन्तन करे–वे सर्वज्ञ हैं, सब पुरुषों में उत्तम हैं, संसार के समस्त सिर उन्हीं के होने से वे हजारों सिरों वाले हैं । पूर्ण हैं । हजारों ही उनकी आँखे व हजारों ही उनके चरण हैं । व्यापक हैं। सब जीवों के अधिष्ठान हैं । ज्ञानशील हैं । क्षरित होने वाले नहीं हैं । सब से उत्कृष्ट हैं । सबका भरण करते हैं । (क्योंकि स्वतादात्म्येन चिंतन विधित्सित है इसलिये– 'ऐसे विष्णु मैं हूँ'–यह ध्यान का पर्यवसित रूप होगा ।) इस प्रकार के विष्णु से अभिन्नतया ध्यात अपने हृदयकमल के मध्य शिव का ध्यान करना है । पहले रेचक प्राणायाम द्वारा उस कमल का विकास करना चाहिये–खिले हुए कमल का ध्यान करना चाहिये । वही परमेश्वर का स्थान है । अणिमादि आठ ऐश्वर्यरूप उसकी पंखुड़ियाँ हैं । तत्त्वविद्या उसमें केसर है । शास्त्रविषयक ज्ञान उस कमल की नाल है । उसका कन्द (गाँठ) महत्तत्त्व है। प्रणवरूप सूर्य से वह विकसित हुआ है । ऐसे कमल के बीचों-बीच

---

१ क. ख. "ति चाक्ष" । २ घ. "न्यष्टावैश्व" ।

वैश्वानरं जगद्योनिं शिखातन्विनमीश्वरम् । तापयन्तं स्वकं देहमापादतलमस्तकम् ॥ १६ ॥
निर्वातदीपवत्तस्मिन्दीपितं हव्यवाहनम् । नीलतोयदमध्यस्थं विद्युल्लेखेव भास्वरम् ॥ १७ ॥
नीवारशुकवद्रूपं पीताभासं विचिन्तयेत् ।
तस्य वह्नेः[1] शिखायां तु मध्ये परमकारणम् ॥ १८ ॥
परमात्मानमानन्दं परमाकाशमीश्वरम् । ऋतं सत्यं परं ब्रह्म साम्बं संसारभेषजम् ॥ १९ ॥
ऊर्ध्वरेतं विरूपाक्षं विश्वरूपं महेश्वरम् । नीलग्रीवं स्वमात्मानं पश्यन्तं पापनाशनम् ॥ २० ॥
ब्रह्मविष्णुमहेशानैर्ध्येयं ध्येयविवर्जितम् । सोऽहमित्यादरेणैव ध्यायेद्योगी महेश्वरम् ॥ २१ ॥
अयं मुक्ते[2]र्महामार्ग आगमान्तैकसंस्थितः । अथवाऽहं मुनिश्रेष्ठ ब्रह्मा लोकपितामहः ॥ २२ ॥

जगद्योनिम् । यद्धि जगदुपादानं परमात्मज्योतिस्तत्प्रतीकत्वेन तदात्मकमिदं मूलाधारस्थं ज्योतिस्तेन जगद्योनिरित्युच्यते । तत्प्रतीकत्वं च श्रूयते छान्दोग्ये–'अथ यदतः परो दिवो ज्योतिर्दीप्यते' इत्यारभ्य 'इदं वाव तद्यदिदमन्तः पुरुषे ज्योतिः' इति । शिखां तनोतीति **शिखातन्विनम्** । औणादिको विनिप्रत्ययः । **तापयन्तमिति** । श्रूयते च तैत्तिरीयोपनिषदि–'संतापयति स्वं देहमापादतलमस्तकम्' इति ॥ १६–१७ ॥ **तस्य वह्नेरिति** । श्रूयते च–'तस्याः शिखाया मध्ये तु परमात्मा व्यवस्थितः' इति ॥ १८–२० ॥ स्वयं ब्रह्मादिभिर्ध्येयं स्वात्मना ध्यातव्येनान्येन वर्जितम् ॥ २१ ॥ ध्यानस्य मोक्षहेतुत्वे श्रुतिः प्रमाणमित्याह–**आगमान्तेति** । 'ओमित्येवं ध्यायथ आत्मानं स्वस्ति वः पाराय तमसः परस्तात्' इति श्रूयते । विष्णुमूर्तिरिव स्वयं ब्रह्ममूर्तिर्भूत्वा स्वहृदये शिवं ध्यायेदित्याह–**अथवाऽहमिति** ॥ २२–२३ ॥

एक महान् वह्नि का ध्यान करे । उस वह्नि से सब ओर लपटें निकल रही हैं । अतः वह सब ओर फैलने में समर्थ है । वही वैश्वानराग्नि है (जठराग्नि है) । जगत् के कारणभूत परमात्मा का प्रतीक होने से यह भी जगत्कारण कही जाती है । लौ निकालने वाली होने से यही 'शिखातन्वी' है । ईश्वरोपलब्धि का स्थान होने से यही ईश्वर है । यह अपने पूरे शरीर को तपा रही है । जहाँ हवा बह न रही हो ऐसी जगह रखे दिये की तरह निश्चल भाव से कमलस्थित वह प्रदीप्त अग्नि जल रही है। नीले बादल में जैसे बिजली चमकती है वैसी इसकी चमक है । नीवारशुक की तरह (एक प्रकार का धान नीवार कहा जाता है) उसका रूप और पीत वर्ण है । उस वह्नि की ज्वाला के बीच महेश्वर का ध्यान करे । वे महेश्वर परम कारण हैं । वे ही परमात्मा हैं, परमानंद हैं, परमाकाश हैं (परम व्यापक तथा प्रकाशशील हैं), ईश्वर हैं, ऋत (नियम) हैं, सत्य हैं, परब्रह्म हैं, अम्बा समेत हैं, संसाररोग की औषध हैं, किसी को उत्पन्न नहीं करते हैं, त्रिनेत्र हैं, सर्वरूप हैं, महान् शासक हैं, नीलकण्ठ हैं, मानो अपने आपको

---

१ ग. °वह्निशि° । २ घ. °र्महाभाग आ° ।

इति स्मृत्वा स्वहृन्मध्ये शिवं परमकारणम् । साक्षाद्वेदान्तसंवेद्यं साम्बं संसारभेषजम् ॥ २३ ॥

अहंबुद्ध्या विमुक्त्यर्थं ध्यायेदीशानमव्ययम् । अथवा सत्यमीशानं ज्ञानमानन्दमद्वयम् ॥ २४ ॥

अनन्तममलं नित्यमादिमध्यान्तवर्जितम् । तथाऽस्थूलमनाकाशमसंस्पृश्यमचक्षुषम् ॥ २५ ॥

न रसं न च गन्धाख्यमप्रमेयमनूपमम् । सर्वाधारं जगद्रूपममूर्तं मूर्तमव्ययम् ॥ २६ ॥

अदृश्यं दृश्यमन्तस्थं बहिष्ठं सर्वतोमुखम् । सर्वतः पाणिपादं च सर्वकारणकारणम् ॥ २७ ॥

सर्वज्ञानादिसंयुक्तमहमित्येव चिन्तयेत् । अयं पन्था मुनिश्रेष्ठ साक्षात्संसारनाशने ॥ २८ ॥

सर्वाधारत्वजगत्कारणत्वादिविशिष्टवाचकस्य स इति पदस्य बुद्ध्यादिविशिष्टप्रत्यक्चैतन्यवाचकस्याहंपदस्य च सामानाधिकरण्ये सत्यखण्डैकरसे लक्ष्ये यत्र वाक्यार्थे पर्यवसानमतः सोऽहमिति महावाक्येनानुसंदध्यादिति । निष्कलविषयं ध्यानमाह– **अथवा सत्यमिति** ॥ २४ ॥ २५ ॥ तत्राहंपदवाच्यस्य बुद्ध्यादिविशिष्टप्रत्यक्चैतन्यस्य सकललोकप्रत्यक्षत्वेऽपि स इत्येतत्पदवाच्यस्य परोक्षत्वेनाप्रसिद्धत्वात्**सर्वाधार**मित्यादिना पदजातेन तन्निर्देशः । ततः प्राक्तनेन च **सत्य**मित्यादिना लक्ष्यस्याखण्डैकरसप्रदर्शनं, **सोऽहमिति** च लक्षणाबीजस्य सामानाधिकरण्यनिर्देश इति विभागः । तत्रा**द्वयमस्थूलमनाकाश**मित्यादयो द्वैतादिनिषेधमुखेन लक्ष्ये पर्यवस्यन्ति । सत्यादयस्तु स्वार्थार्पणप्रणाड्येति विशेषः । तदुक्तमाचार्यैः–'तत्रानन्तोऽन्तवद्वस्तुव्यावृत्त्यैव विशेषणम् । स्वार्थार्पणप्रणाड्या तु परिशिष्टे[१] विशेषणम्' इति । वाजसनेयश्रुतिरप्येतद्व्यावृत्तिमुखेनैवैतदेव लक्ष्यं निर्दिशति 'एतद्वै तदक्षरं गार्गि ब्राह्मणा अभिवदन्त्यस्थूलमनण्वह्रस्वमदीर्घमलोहितमस्नेहमच्छायमतमोऽवाय्वनाकाशमसङ्गमस्पर्शमगन्ध-मरसमचक्षुष्कमश्रोत्रम्' इत्यादि । प्रकृत्याऽ**मूर्त**मपि मायया **मूर्तम्** ॥ २६ ॥ एवमदृश्यं; **दृश्यमव्ययं** तत्त्वावबोधपर्यन्तम-निवृत्तोपाधिकम् । **अन्तस्थमिति** । 'अन्तर्बहिश्च तत्सर्वं व्याप्य नारायणः स्थितः' इति हि श्रुतिः ॥ २७–२८ ॥

देख रहे हैं, पापनाशक हैं, ब्रह्मा-विष्णु-महेश के ध्येय हैं, स्वयं उनका और कोई ध्येय नहीं । ऐसे महेश्वर का अपने से अभिन्न रूप से ध्यान करना चाहिये । यह ध्यान मोक्षप्राप्ति के लिये उत्तम मार्ग है ॥ १२–२१½ ॥ अथवा यों ध्यान करना चाहिये कि मैं सर्वलोक-जनक ब्रह्मा हूँ । फिर अपने हृदय में परम-कारण शिव का ध्यान करे । वे शिव वेदान्तों से जाने जा सकते हैं । माता पार्वती से युक्त हैं, संसाररोग की भेषज हैं । ऐसे अव्यय ईशान का अपने से अभिन्न रूप से ध्यान करे ॥ २२–२३½ ॥ अथवा (निष्कल तत्त्व का) यों ध्यान करे : ईशान शिव मैं हूँ–ऐसा चिन्तन करना चाहिये । ईशान की ये विशेषतायें हैं– वे त्रिकालाबाध्य हैं, ज्ञानरूप व आनंदरूप हैं, उनसे दूसरा कुछ नहीं है । वे निःसीम हैं, निर्मल हैं, जन्मादि नाशान्त विकारों से वर्जित हैं, स्थूल नहीं हैं, आकाश से भी सूक्ष्म हैं, संसर्ग के अयोग्य हैं । वे न चक्षु हैं न रस हैं और न गन्ध नामक गुण ही हैं । सर्वप्रमेयविलक्षण हैं, अपने लिये दी जाने वाली उपमाओं के अनुरूप हैं, सब के आधार हैं, जगत् उन्हीं का रूप है, स्वयं वे अमूर्तिमान् हैं किन्तु अपने वशीभूत मायाबल से मूर्तिमान् भी हैं, अव्यय हैं, दृष्टि की विषयता से रहित हैं पर वृत्ति से व्याप्त होते हैं, अन्दर बाहर सर्वत्र हैं, सभी ओर उन्हीं के मुँह, हाथ व पैर हैं, सबके कारणभूत आकाशान्त तत्त्वों के भी वे कारण हैं तथा समस्त विषयों के ज्ञान, नियंत्रण आदि करने वाले हैं। ऐसे 'ईशान मैं हूँ'–इस

अथवा सच्चिदानन्दमनन्तं ब्रह्म सुव्रत । अहमस्मीत्यभिध्यायेद्ध्येयातीतं विमुक्तये ॥ २९ ॥

इदंतया न देवेशमभिध्यायेन्मनागपि । ब्रह्मणः साक्षिरूपत्वान्नेदं यदिति हि श्रुतिः ॥ ३० ॥

एवं ध्यानपरः साक्षाच्छिव एव न चान्यथा ।

अनेन सदृशो लोके न हि वेदविदां वर ॥ ३१ ॥

प्रक्षीणाशेषपापस्य ज्ञाने ध्याने भवेन्मतिः । पापोपहतबुद्धीनां तद्वार्ताऽपि सुदुर्लभा ॥ ३२ ॥

अथवा विष्णुमव्यक्तमाधारं देवनायकम् । शङ्खचक्रधरं देवं पद्महस्तं सुलोचनम् ॥ ३३ ॥

किरीटकेयूरधरं पीताम्बरधरं हरिम् । श्रीवत्सवक्षसं विष्णुं पूर्णचन्द्रनिभाननम् ॥ ३४ ॥

पद्मपुष्पदलाभोष्ठं सुप्रसन्नं शुचिस्मितम् । शुद्धस्फटिकसंकाशमहमित्येव चिन्तयेत् ॥ ३५ ॥

एतच्च दुर्लभं प्रोक्तं योगशास्त्रविशारदैः । अथवा देवदेवेशं ब्रह्माणं परमेष्ठिनम् ॥ ३६ ॥

अक्षमालाधरं देवं कमण्डलुकराम्बुजम् । वरदाभयहस्तं च वाग्देव्या सहितं सदा ॥ ३७ ॥

कुन्देन्दुसदृशाकारमहमित्येव चिन्तयेत् ।

अथवाऽग्निं तथाऽऽदित्यं चन्द्रं वा देवतान्तरम् ॥ ३८ ॥

उक्ते वाच्यार्थपूर्वकलक्ष्यानुसंधानेक्षणे सति वाच्यानुसंधानमपि त्यक्त्वा लक्ष्य एवार्थोऽनुसंधेय इत्याह–**अथवा सच्चिदिति** । सच्चिदानन्दादयः शब्दा लक्षणयाऽखण्डैकरसमेव स्वरूपं [१]समर्थयन्ति ॥ २९ ॥ [२]प्रत्यक्तादात्म्येनैवानुसंधाननियमे कारणमाह–**इदंतयेति** । **नेदं यदिति हि श्रुतिरिति** । 'यच्चक्षुषा न पश्यति येन चक्षूंषि [३]पश्यति । तदेव ब्रह्म त्वं विद्धि नेदं यदिदमुपासते ॥' इति तलवकारोपनिषत्पराक्त्वेन ब्रह्मणोऽनुसंधानं[४] प्रत्याचष्ट इत्यर्थः ॥ ३०–३२ ॥ सकलनिष्कलात्मकस्य शिवस्य तादात्म्यानुध्यानान्युक्त्वा विष्ण्वादीनामपि सकलध्यानान्याह–**अथवा विष्णुमित्यादि** । निष्कलं तु विशेषाभावात्तदेव भविष्यतीति न पृथगुक्तम् ॥ ३३–३८ ॥

प्रकार ध्यान करे । संसारबंधन की निवृत्ति का यह उपाय है ॥ २४–२८ ॥ अथवा 'ध्येय से अतीत सच्चिदानन्द अनन्त ब्रह्म मैं हूँ' ऐसा ध्यान करना चाहिये । यह मोक्षफलक ध्यान है । परमेश्वर का 'मैं' इस तरह ही ध्यान करना चाहिये, 'यह' इस तरह अपने से भिन्न रूप से नहीं क्योंकि परमशिव ही साक्षी होने से प्रत्यक्तम हैं । श्रुति ने भी बताया है कि 'यह' इस रूप से जिसकी उपासना की जाती है वह ब्रह्म नहीं । यों आत्मरूप से ध्यान करने वाला साक्षात् शिव ही है । इसके तुल्य संसार में कोई नहीं । ज्ञान व ध्यान में उन्हीं का मन लगता है जिनके पाप क्षीण हो चुके हैं । जिनके मन मलिन हैं उन्हें इनकी बात भी रुचती नहीं ॥ २९–३२ ॥ अथवा 'विष्णु मैं हूँ' ऐसा ध्यान करे । विष्णु अव्यक्त हैं, सर्वाधार हैं, देवनेता हैं, हाथों में शंख, चक्र व पद्म लिये हैं, द्युति वाले हैं, सुंदर नेत्रों वाले हैं, मुकुट व बाजूबन्ध से अलंकृत हैं, पीताम्बर धारण किये हैं, पापहर्ता हैं, उनके सीने पर घुँघराले रोम हैं, वे व्यापक हैं, पूर्ण चन्द्र की तरह आह्लाददायक मुख वाले हैं, पद्म की पंखुड़ियों की तरह गुलाबी ओष्ठ वाले हैं, सुप्रसन्न हैं, शुद्ध मुस्कान वाले हैं, तथा शुद्ध स्फटिक की तरह चमकदार हैं । यह एक दुर्लभ ध्यान है ॥ ३३–३५½ ॥ अथवा 'ब्रह्मा मैं हूँ' ऐसा ध्यान करे । ब्रह्मा सब देवताओं का नियमन करने वाले हैं, परमतम

---

१. ख. घ. समर्पयन्ति । २. ङ. प्रत्यगात्म्ये° । ३. क. पश्यन्ति । ४. °नुसंधाना° ।

वेदोक्तेनैव मार्गेण सदाऽहमिति चिन्तयेत् । एवमभ्यासयुक्तस्य पुरुषस्य महात्मनः ॥ ३९ ॥
क्रमाद्वेदान्तविज्ञानं विजायेत न संशयः । ज्ञानादज्ञानविच्छित्तिः सैव तस्य [1]विमुक्तता ॥ ४० ॥
सर्वमुक्तं समासेन मया वेदान्तसंग्रहम् । मत्प्रसादाद्विजानीहि मा शङ्किष्ठाः कदाचन ॥ ४१ ॥

इति श्रीस्कन्दपुराणे सूतसंहितायां ज्ञानयोगखण्डे ध्यानविधिनिरूपणं नामैकोनविंशोऽध्यायः ॥ १९ ॥

विंशोऽध्यायः

ईश्वर उवाच—अथातः संप्रवक्ष्यामि समाधिं[2] भवनाशनम् ।
समाधिः संविदुत्पत्तिः परजीवैक्यतामतिः[3] ॥ १ ॥
यदि जीवः पराद्भिन्नः कार्यतामेति सुव्रत । अचित्त्वं च प्रसज्येत घटवत्पण्डितोत्तम ॥ २ ॥
विनाशित्वं भयं च स्याद् द्वितीयाद्वा इति श्रुतिः ।
नित्यः सर्वगतो ह्यात्मा कूटस्थो दोषवर्जितः ॥ ३ ॥

अत्र सगुणध्यानानि चित्तैकाग्र्यद्वारा पापक्षयद्वारा या निष्कलसाक्षात्कारे कारणम् । निष्कलं ध्यानं त्वव्यवधानेनेत्याह—**एवमभ्यासेति** ॥ ३९–४१ ॥

इति श्रीसूतसंहितातात्पर्यदीपिकायां ज्ञानयोगखण्डे ध्यानविधिनिरूपणं नामैकोनविंशोऽध्यायः ॥ १९ ॥

यतः साधनभूतध्यानस्वरूपज्ञानायत्ता[4] तत्फलसंविदः समाधिपर्यायाया उत्पत्तिः अतस्तदनन्तरं तदभिधानमिति प्रतिजानीते—**अथात इति** । महावाक्यलक्ष्यस्वरूपसाक्षात्कार एव समाधिरिह विवक्षित इत्यर्थः ॥ १ ॥ ध्यानफलभूततत्त्वविमर्शस्वरूपफलमाह—**यदि जीव इति** । 'कस्माद्ध्यभेष्यद् द्वितीयाद्वै भयं भवति' इति वाजसनेयश्रुतिरित्यर्थः ॥ २–३ ॥

(सबसे परम) हैं, रुद्राक्ष माला पहने हैं, हाथ में कमण्डलु लिये हैं, उनके हाथ वरद और अभय मुद्रा में हैं, वाग्देवी समेत हैं, कुन्द (मोतिया पुष्प) या चन्द्र के समान शुभ्र हैं । इस प्रकार के ब्रह्मा मैं हूँ ऐसा चिंतन करना चाहिये ॥ ३६–३७½ ॥

अथवा वेदोक्त विशेषताओं वाले अग्नि, सूर्य, चन्द्र या किसी देवता का आत्मरूप से ध्यान करना चाहिये ॥ ३८½ ॥ यों अभ्यास करते रहने वाले महात्मा को क्रमशः वेदान्त का बोध—अपनी ब्रह्मरूपता का निश्चय—हो जाता है इसमें संदेह नहीं । ज्ञान से अज्ञान विनष्ट होता है। अज्ञाननाश ही उस साधक का मोक्ष होना है ॥ ३९–४० ॥ ध्यानविषयक सारी जानकारी संक्षेप में दे दी । मेरी कृपा से इसे तुम समझ लोगे । इस विषय में शंकायें न करना ॥ ४१ ॥

समाधिनिरूपण नामक बीसवा अध्याय

भगवान् बोले—अब मैं भवबंध-निवारक समाधि बताता हूँ । परमेश्वर और जीव के ऐक्य के ज्ञान की उत्पत्ति का नाम समाधि है ॥ १ ॥ यदि जीव परमेश्वर से भिन्न हो तो कार्य (जन्य) तथा घट की तरह जड होगा । साथ ही वह विनाशवान् और सदा भयग्रस्त होगा (अर्थात् मोक्ष असंभव होगा) । किन्तु ये सब जीव के स्वरूप हैं नहीं अतः वह परमेश्वर से भिन्न नहीं है ॥ २½ ॥ एकमात्र नित्य, व्यापक, कूटस्थ आत्मा समस्त दोषरहित रहता हुआ ही अज्ञानवश हुए भ्रम से जीवादिरूप से बँट जाता है । वस्तुतः भेद है नहीं । सत्य अद्वैत ही है । न यह प्रपंच है और न संसरण ॥ ३–४ ॥ जैसे अखण्ड

---

१. ङ. विविक्तता । २. अत्र कैवल्यपादोक्तः क्लेशकर्मनिवर्तकः समाधिर्विवक्षितः । सूत्रे तु 'प्रसंख्यानेऽप्यकुसीदस्य सर्वथा विवेकख्यातेः धर्ममेघः समाधि' रिति । विभूतिपादोक्तोप्यस्यैवोपायः । तस्य लक्षणम् 'तदेवार्थमात्रनिर्भासं स्वरूपशून्यमिव समाधि' रिति । तदेवेति ध्यानमेव । यदा ध्याने नान्यद्भासतेऽर्थएव भासते तदा ध्यानस्य यत् त्रिपुटीघटितं स्वरूपं तदविद्यमानसममास्ते, सावस्था समाधिरिति सूत्रार्थः । ३. क. ख. °वैकता° । ४. ङ. °य तत्तफ° ।

एकः स भिद्यते भ्रान्त्या मायया न स्वरूपतः ।
तस्मादद्वैतमेवास्ति न प्रपञ्चो न संसृतिः ॥ ४ ॥
यथाऽऽकाशो घटाकाशो महाकाश इतीरितः ।
तथा भ्रान्तैर्द्विधा प्रोक्तो ह्यात्मा जीवेश्वरात्मना ॥ ५ ॥
नाहं देहो न च प्राणो नेन्द्रियाणि तथैव च ॥
न मानोऽहं[1] न बुद्धिश्च नैव चित्तमहंकृतिः ॥ ६ ॥
नाहं पृथ्वी न सलिलं न च वह्निर्न चानिलः ।
न चाऽऽकाशो न शब्दश्च न च स्पर्शस्तथा रसः ॥ ७ ॥
नाहं गन्धो न रूपं च न मायाऽहं न संसृतिः ।
सदा साक्षिस्वरूपत्वाच्छिव एवास्मि केवलः ॥ ८ ॥
इति धीर्या मुनिश्रेष्ठ सा समाधिरिहोच्यते । अथवा पञ्चभूतेभ्यो जातमण्डं महामुने ॥ ९ ॥
भूतमात्रतया दग्ध्वा विवेकेनैव वह्निना । पुनः स्थूलादिभूतानि सूक्ष्मभूतात्मना तथा ॥ १० ॥

स भिद्यत इति । **मायया**ऽज्ञानेन जनिता या भ्रान्तिर्विपरीतज्ञानं तया भेदो गृह्यते । प्रमेयभेदग्रहणस्य 'नेह नानाऽस्ति' इति श्रुतिबाधितत्वेन भ्रान्तित्वादित्यर्थः ॥ ४ ॥ ५ ॥ अविद्ययाऽऽत्मतादात्म्येनाध्यस्तस्य[2] देहेन्द्रियमनःप्राणादेर्विमर्शजनितेन विवेकज्ञानेन निरासमभिनयेन[3] दर्शयति—**नाहं देह** इति ॥ ६ ॥ यथा भूतकार्यस्य देहादेर्विवेक एवं तत्कारणस्य पृथिव्यादिभूतजातस्य चेत्याह—**नाहं पृथ्वीति** ॥ ७–८ ॥ सकारणाद्भूतभौतिकप्रपञ्चादात्मानं बुद्ध्यैव विविच्य विविक्ते तस्मिन्समाधिरुक्तः। अधुना तं प्रपञ्चं बुद्ध्यैव प्रविलाप्य परिशिष्टे तस्मिन्नद्वितीये समाधिमाह—**अथवा पञ्चेति** । 'तदनन्यत्वमारम्भण-शब्दादिभ्यः' इति न्यायेन भौतिकं ब्रह्माण्डं पञ्चीकृतभूतात्मना तानि च भूतान्यपञ्चीकृतभूतात्मना ॥ ९–१० ॥

आकाश में महाकाश और घटाकाश की कल्पना हो जाती है वैसे भ्रान्ति वालों द्वारा जीव और ईश्वर विभिन्न समझे जाते हैं ॥ ५ ॥ मैं—आत्मा—देह, प्राण, इंद्रियाँ, मन, बुद्धि, अहंकार नहीं हूँ । ऐसे ही इनके कारणभूत पाँचों महाभूत व उनके गुण मैं नहीं हूँ । न मैं माया हूँ न संसरण । सदा साक्षात् द्रष्टा होने से केवल शिव ही हूँ ॥ ६–८ ॥ यह निश्चय समाधि है ।

अथवा विवेकात्मक विचार से पांचभौतिक इस अपने शरीर को तथा समस्त ब्रह्माण्ड को पंचभूतरूप ही समझना चाहिये क्योंकि कारण से कार्य अनन्य ही होता है । जैसे मिट्टी से भिन्न घट कोई वस्तु नहीं—केवल नाम और रूप ही हैं, ऐसे पाँच भूतों से अतिरिक्त ब्रह्माण्ड या पिण्ड कोई वस्तु नहीं, यह निश्चय करना चाहिये । आगे स्थूल भूत भी सूक्ष्मभूतरूप ही हैं । वे भी स्वकारण मायामात्र हैं । माया भी स्वाधिष्ठान प्रत्यगात्मा से अतिरिक्त नहीं । वह प्रत्यगात्मा ब्रह्म मैं हूँ । संसारी नहीं हूँ । मुझसे अन्य कभी कुछ नहीं है । यों अपने वास्तविक स्वरूप का निश्चय

---

१. मन्यतेऽनेनेति घञि मानो मनएवोच्यते । २. घ. ङ. °स्तदे° । ३. घ. °नयत्वेन ।

विलाप्यैवं विवेकेन ततस्तान्यपि बुद्धिमान् ।
मायामात्रतया दग्ध्वा मायां च प्रत्यगात्मना ॥ ११ ॥
सोऽहं ब्रह्म न संसारी न मत्तोऽन्यत्कदाचन ।
इति विद्यात्स्वमात्मानं स समाधिः प्रकीर्तितः ॥ १२ ॥
अथवा योगिनां श्रेष्ठ प्रणवात्मानमीश्वरम् । वर्णत्रयात्मना विद्यादकारादिक्रमेण तु ॥ १३ ॥
ऋग्वेदोऽयमकाराख्य उकारो यजुरुच्यते[1] *।*
मकारः सामवेदाख्यो नादस्त्वाथर्वणी श्रुतिः ॥ १४ ॥
अकारो भगवान्ब्रह्मा तथोकारो हरिः स्वयम् ।
मकारो भगवान्रुद्रस्तथा नादस्तु कारणम् ॥ १५ ॥

तान्यपीति[2] । 'पर्ययेणानुक्रमोऽत उपपद्यते च' इति न्यायेन पृथिव्यादिक्रमेण मायायां, तामप्यात्मनि बुद्ध्यैव प्रविलाप्य परिशिष्टेऽद्वितीये केवलमात्मनि स्वात्मतादात्म्येनानुसंधानं समाधिरित्यर्थः ॥ ११ ॥ १२ ॥ वाच्यवाचकप्रपञ्चस्य[3] ब्रह्मणि परिकल्पितत्वात्[4] प्रणववाच्यस्थूलसूक्ष्मप्रपञ्चस्य सकारणस्योपसंहारद्वारा निष्कलब्रह्मणि समाधिमभिधाय, वाचक-प्रणवावयवानामकारोकारमकारार्धमात्रारूपाणां सकारणानां प्रविलापनं ब्रह्मणि समाधिमिदानीमाह–**अथवा योगिनामिति** । 'प्रणवो ह्यपरं ब्रह्म प्रणवश्च परं स्मृतम् । एवं हि प्रणवं ज्ञात्वा व्यश्नुते तदनन्तरम्' इति ह्युक्तम् ॥ १३ ॥ अकारोकारमकारनादानां वेदचतुष्टयात्मकत्वमाह–**ऋग्वेद** इति ॥ १४ ॥ तेषामेव ब्रह्मविष्णुरुद्रतत्कारणात्मकतामाह–**अकार** इति ॥ १५ ॥

रूप समाधि करनी चाहिये ॥ ९–१२ ॥

अथवा ॐकार के सहारे सारे भेद निवृत्त कर आत्मस्थिति रूप समाधि करे । ईश्वरप्रतीक प्रणव को अकारादि क्रम से तीन वर्णों में (तथा नाद में) बँटा जान लो । प्रपंच इन अक्षरों में व नाद में सिमट जाता है । ऋग्वेद, ब्रह्मा, गार्हपत्याग्नि, पृथ्वी, जाग्रदवस्था, नाभिदेश, उदात्तस्वर और भूत काल–ये सब अकार हैं । यजुर्वेद, हरि, दक्षिणाग्नि, अंतरिक्षलोक, स्वप्नावस्था, हृदयदेश, अनुदात्त स्वर और भविष्य काल–ये सब उकार हैं । सामवेद, रुद्र, आहवनीयाग्नि, द्युलोक, सुषुप्ति अवस्था, कण्ठदेश, स्वरित स्वर और वर्तमान काल–ये सब मकार हैं । अथर्ववेद, कारण ब्रह्म, संवर्तकाग्नि (प्रलयाग्नि), सोमलोक, तुरीय अवस्था, मूर्धा देश, सर्वसाधारण स्वर और साधारण काल–ये सब नाद हैं । यह समझ कर सारे संसार को इन अक्षरों से अभिन्न जानना चाहिये । तदनंतर स्वभिन्न प्रपंचरूप द्वन्द्व से रहित अकार को उकार से अभिन्न जाने । उकार को मकार से और मकार को महान् नाद से अभिन्न जाने । नाद को माया से अभिन्न और माया को जीवरूप समझना चाहिये । जीव को ईश्वर ही जानना चाहिये– जो ईश्वर है वह मैं ही हूँ । यह निश्चय विद्वानों द्वारा समाधि कहा गया है ॥ १३–१९ ॥

---

१ ङ. °जुरेव च । म° । २ ग. घ. °ति । विपर्ययेण तु क्रा । ङ. °ति । विपर्ययेणानुक्रमो नोप° । ब्रह्मसूत्रेषु तु 'विपर्ययेण तु क्रमोत उपपद्यते च' (२.३.१४) इत्युपलभ्यते । ३ क. ख. घ. °च्यप्र° । ४ घ. °त्वात्प्रणवा° ।

अग्नयश्च तथा लोका अवस्थावसथास्त्रयः ।
उदात्तादिस्वराः कालाश्चैते वर्णत्रयात्मकाः ॥ १६ ॥
इति ज्ञात्वा पुनः [1]*सर्वमक्षरत्रयमात्रतः । विलाप्याकारमद्वंद्वमुकाराख्ये विलापयेत् ॥ १७ ॥*
उकारं च मकाराख्ये महानादे मकारकम् ।
तथा मायात्मना नादं मायां जीवात्मरूपतः ॥ १८ ॥
जीवमीश्वरभावेन विद्यात्सोऽहमिति ध्रुवम् ।
एषा बुद्धिश्च विद्वद्भिः समाधिरिति कीर्तिता ॥ १९॥
यथा फेनतरङ्गादि समुद्रादुत्थितं पुनः । समुद्रे लीयते तद्वज्जगन्मय्येव लीयते ॥ २० ॥
तस्मान्मत्तः पृथङ्नास्ति जगन्माया च सर्वदा ।
इति बुद्धिः समाधिः स्यात्समाधिरिति हि श्रुतिः ॥ २१ ॥
यस्यैवं परमात्माऽयं प्रत्यग्भूतः प्रकाशितः ।
स याति परमं भावं स्वकं साक्षात्परामृतम् ॥ २२ ॥

तेषामेव गार्हपत्यदक्षिणाहवनीयसंवर्तकाग्निरू[2]पात्मकतामाह–**अग्नय** इति । **लोका** इति तु पृथिव्यन्तरिक्षद्युसोमलोकात्मकतां दर्शयति । **अवस्था** इति जाग्रत्स्वप्नसुषुप्ततुरीयात्मकतामाह । **आवसथा** इति नाभिहृदयकण्ठमूर्धात्मकतामाह । **त्रय** इति संवर्तकादीनां चतुर्थानामप्युपलक्षणम् । **उदात्तादी**ति, उदात्तानुदात्तस्वरितैकश्रुत्यात्मकतामाह । **काला** इति भूतभविष्यद्वर्तमानसाधारणकालतामाह । **वर्णत्रये**ति नादस्याप्युपलक्षणम् । ऋग्वेदाद्यात्मकता चाकारादीनां श्रूयते–'तस्य ह वै प्रणवस्य या पूर्वा मात्रा पृथिव्यकारः स ऋग्भिर्ऋग्वेदो ब्रह्मा वसवो गायत्री गार्हपत्यः । द्वितीयाऽन्तरिक्षं स उकारः स यजुर्भिर्यजुर्वेदो विष्णू रुद्रास्त्रिष्टुब्दक्षिणाग्निः । तृतीया द्यौः स मकारः स सामभिः सामवेदो रुद्र आदित्या जगत्याहवनीयो याऽवसानेऽस्य चतुर्थ्यर्धमात्रा सा सोमलोक ओँकारः साऽऽथर्वणैर्मन्त्रैरथर्ववेदः संवर्तकोऽग्निर्मरुतो विराडेकऋषिः' इति । तथा–'जागरिते ब्रह्मा स्वप्ने विष्णुः सुषुप्तौ रुद्रस्तुरीयमक्षरम्' इति च । तथाऽन्यत्र–'नाभिर्हृदयं कण्ठो मूर्धा चे'ति ॥ १६ ॥ उक्तरूपोपेतमकारं तथाविध उकारे तं च तथाविधे मकारे तं नादे तं मायायां तां च तदुपाधिके जीवे तं च परमात्मनैकीकृत्य तद्रूपेणावतिष्ठत इत्यर्थः ॥ १७–२० ॥ **इति हि श्रुतिरि**ति । 'इदं सर्वं यदयमात्मा' इति हि श्रूयते ॥ २१ ॥ उक्तसमाधिनिष्ठस्य फलमाह–**यस्यैव**मिति । **परमं भाव**मित्येतद् गतखण्डतृतीयाध्याये[3] निरूपितम् ॥ २२ ॥

जैसे फेन, तरंग आदि समुद्र से उठते और उसी में लीन हो जाते हैं (क्योंकि समुद्र से भिन्न वे कुछ नहीं है) ऐसे सारा जगत् मुझमें ही उठा है और मुझमें ही लीन हो रहा है, अतः जगत् व माया मुझसे पृथक् नहीं है । यह निश्चय ही वेदोक्त समाधि है ॥ २०–२१ ॥ प्रत्यगात्मरूप परमात्मा को जिसने इस तरह समझ लिया वह अपने परम भाव अर्थात् मुक्तस्वरूप में प्रतिष्ठित हो जाता है । ॥ २२ ॥ जब मन में व्यापक अखण्ड चैतन्य का सर्वदा भान होता है तब व्यवधायक अज्ञान न रहने

---

१. वाच्यस्य वाचकाभेदो यथा वनादिशब्दभिन्नो वनादिपदार्थो नास्ति वृक्षाणामेव तत्त्वात् तथा च संसारः शब्द एव सर्वश्च शब्दः प्रणव एव स्थूलादित्रितयस्याकारादिवाच्यत्वात् प्रणवः पुनरात्मैव तमन्तरा सत्त्वशून्यत्वाद् इत्यादिविचारप्रकारो माण्डूक्यविवरणादौ दर्शितः । पञ्चीकरण-प्रकरणमत्र महदुपयोगीति प्रसिद्धमेव । २. क. ॰रूपक॰ । ३ द्वादशश्लोकव्याख्याने ! स्वाभिन्ने मुक्तस्वरूपे प्रतिष्ठत् इति सारार्थः ।

यदा मनसि चैतन्यं भाति सर्वत्रगं सदा । योगिनोऽव्यवधानेन तदा संपद्यते स्वयम् ॥ २३ ॥

यदा सर्वाणि भूतानि स्वात्मन्येवाभिपश्यति ।

सर्वभूतेषु चाऽऽत्मानं ब्रह्म संपद्यते तदा ॥ २४ ॥

यदा सर्वाणि भूतानि समाधिस्थो न पश्यति ।

एकीभूतः परेणासौ तदा भवति केवलः ॥ २५ ॥

यदा सर्वे प्रमुच्यन्ते कामा येऽस्य हृदि स्थिताः ।

तदाऽसावमृतीभूतः[1] क्षेमं गच्छति पण्डितः ॥ २६ ॥

यदा भूतपृथग्भावमेकस्थमनुपश्यति । तत एव च विस्तारं ब्रह्म संपद्यते तदा ॥ २७ ॥

यदा पश्यति चाऽऽत्मानं केवलं परमार्थतः ।

मायामात्रं जगत्कृत्स्नं तदा भवति [2]निर्वृतः ॥ २८ ॥

यदा जन्मजरादुःखव्याधीनामेकभेषजम् । केवलं ब्रह्मविज्ञानं जायते[3]ऽसौ तदा शिवः ॥ २९ ॥

सम्मुखीकरणं मुने॥ ७॥

मानसस्यान्तस्संजल्परूपस्योपांशुसंज्ञस्य च
स्वसंवेद्यलघुध्वनेर्भाष्यस्य च श्रूयमाणस्य मन्त्रस्य
ध्येयसम्मुखीकरणाय १आवर्तनं जप इत्युक्तम्॥ ७॥

१। प्रत्ययादिप्रकरणे द्वाविंसश्लोकः।

ऊहमिदानीं लक्षयितुमाह -

ऊहोऽभिवीक्षणं वस्तु
विकल्पानन्तरोदितः॥ ८॥

यत्तदूहं मतिः पुंसां भ्रमत्यन्धेव मार्गति। तत्कुर्वन्नुच्यते
प्राण इत्यनेन विद्यापादे प्राणाख्यस्य वायोस्सौक्ष्म्याच्च
तक्ष्यन्नुदन्नूहन् यदुक्तं तथा च श्रीमत्स्वायम्भुवे तदनूहःप्रवर्तते।
इति स ऊहो वीक्षणात्मकः तत्तद्भूमिकावाप्तितो लब्धे वस्तुनि

असन्तोषकृताद्विकल्पात्समनन्तरमुदित उद्भूतो ज्ञेयः॥ ८॥

अथ कस्मिन्नूहोऽसौ कार्ये योगिन उपयोगीत्याह।

यदा वेत्ति पदं हेय
मुपादेयं च तत्स्थितेः।
तत्पोषकं विपक्षं च
यच्च तत्पोषकं परम्॥ ९॥

तस्योहस्य स्थितिरवस्थानं ततो हेतोः क्रमेण यदेति यस्मादर्थे यस्मात्कारणाद्योगी समुत्पद्यमानः यथावस्थितसकलवस्त्ववभास-नया हेयं पदं तस्य च पोषकं तद्विपक्षकं विपक्षपोषकं च वेत्ति। यथा उपादेयं तत्पोषकं विपक्षकं विपक्षपोषकं च जानाति अत एव प्रकृष्टं योगाङ्गम्। यथोक्तं मालिनीविजये योगाङ्गत्वे समानेऽपि तर्को योगाङ्गमुत्तमम्। हेयाद्यालोचनायेति श्रीमत्स्वायम्भुवेऽपि अनेन लक्षयेद्योगी योगसिद्धिप्रवर्तकम्। निरोधकं च यद्वस्तु बहुधा संव्यवस्थितम् इति॥ ९॥

इत्थं योगाङ्गान्युक्त्वा फलमेषामभिधातुमाह।

येषु व्यस्तसमस्तेषु

कृतयत्नस्य योगिनः।

विभान्ति शक्तयो विश्वं

व्याप्य भानोरिव त्विषः॥ १०॥

न तमीष्टे नरः कश्चित्

न रक्षोदानवामराः।

रोरुचानमतीत्यैतान्

दृक्क्रियाप्राणरोचिषा॥ ११॥

येषु प्राणायामादिष्वङ्गेषु व्यस्तसमस्तेषु कृताभ्यासस्य योगिनः सर्वाश्शक्तयो विवस्वत इव दीप्तयो विश्वं व्याप्य भान्ति भ्राजन्ते। सर्वकार्येषु अयमव्याहतसामर्थ्यस्स्यादित्यर्थः। नच तं अत्युग्रतेजस्त्वात् देदीप्यमानं संतं राक्षसदानवत्रिदशमनुजेभ्यः कश्चिदप्याक्रामति । प्रकृष्टैर्ज्ञानक्रियावीर्यतेजोभिरेतान् अतीत्यातिक्रम्य स्थितत्वादिति। रोरुचानमिति विशेषणद्वारेण हेतुः॥ १० - ११॥

अत्र मुनिः प्रश्नयति -

निवृत्तेर्मनसो हेतुः

संसर्गात्प्राणखेदनम्।

निवृत्तिर्धारणादीनां

मूलं सर्वस्य तत्ततः॥

विस्तरेण सुरश्रेष्ठ

विप्रकृष्टं च यत्स्थितम्।

यदन्यत्साधनं किञ्चित्

योगसिद्धेश्च कथ्यताम्॥ १२ - १३॥

इन्द्रियार्थसंसर्गान्मनसो या निवृत्तिः तस्याः किल प्राणायामाः कारणत्वेनेष्यन्ते। प्राणादिजयाद्धि मनसो वश्यता भवति। सा च मनस इन्द्रियार्थेभ्यो निवृत्तिः धारणादीनां हेतुः ततश्च हेतोस्तत्प्राणखेदनं सर्वस्य धारणादेर्मूलमिति कृत्वा विस्तरेणोच्यताम्। यच्चान्यद्योगसिद्धेर्विप्रकृष्टं अङ्गाङ्गितया साधनं स्थितं हितमितजीर्णाशननिर्बाधस्थानासनादि शौचादि वा तदपि भगवन्नमरेश्वरास्मभ्यमभिधीयतामिति मुनेः प्रश्नः॥ १२ - १३॥

अथात्रोत्तरम् -

न शक्यं विस्तराद्वक्तुं

तत्प्रसंगभयाद्विधेः।

प्रश्नस्यावश्यवाच्यत्वात्

तथाप्युद्देश उच्यते॥ १४॥

विधिप्रकाशकत्वेनोपचारात् शास्त्रेऽपि विधिव्यपदेशः। विस्तरेण वक्तव्येऽभिधीयमाने शास्त्रयातिविस्तरप्रसङ्गस्स्यात् इति विस्तरेण तावदभिधेयं वक्तुमयुक्तं यथायथं विस्तरभीरवो हि श्रोतारः तथापि अवश्यवक्तव्यत्वात्प्रश्नस्योद्देशस्संक्षिप्तसकलविधिनिरू-पणं क्रियते॥ १४॥

तत्रादितस्तदङ्गतया स्थितं शौचं संक्षेपतो वक्तुमाह।

मूत्राद्युत्सृज्य विधिव
देकार्धदशसप्तभिः।
मृद्भिर्लिंगगुदासव्य
हस्तयुग्मानि शौचयेत्॥ १५॥
द्विर्व्रती त्रिरपः पीत्वा
द्विर्विमृज्याननं स्पृशेत्।
खबाहुनाभिहृत्कानि
द्विस्त्रिर्वा शौचिताधरः॥ १६॥

विण्मूत्रोत्सर्गं विधिवदिति सामान्यशास्त्रविध्यनतिक्रमेण कृत्वा।

यथोक्तं वासिष्ठे अवकुण्ठितशिराः भूमिमयज्ञीयैस्तृणैरन्तरितां कृत्वा मूत्रपुरीषे कुर्यात्। उदङ्मुखोऽहनि नक्तं दक्षिणाभिमुख इति ततः एकपञ्चदशसप्तसंख्याभिर्मृद्भिः यथासंख्यं शिश्नं पायुं वामहस्तं उभौ च पाणी शौचयेत्। द्विर्व्रतीति। समयिपुत्रकादीनां चतुर्णामपि चर्यापादे व्रतित्वं वक्ष्यति। ततश्चायमव्रतिविषयश्शौचविधिः। व्रतीतु तदेव द्विगुणमाचरेत् त्रिरपः पीत्वेति आचम्य द्विश्चास्यं परिमृज्य खानि इन्द्रियच्छिद्राणि बाहुनाभिहृच्छिरांसि च स्पृशेत्। द्वौ वारौ त्रीन् वारान् वाऽधरोष्ठौ क्षालयेत्॥ १५ - १६॥

तदनन्तरं च -

हितजीर्णाशनस्वस्थः
त्रिकुड्यावेष्टिते गृहे।
बाधाशून्ये वनादौ वा
स्वासनस्थ उदङ्मुखः॥ १७॥
नमस्कृत्य महेशानं
उमास्कन्दगणाधिपान्।
ऋजुग्रीवशिरोवक्षाः।
नासाग्राहितदृग्द्वयः॥ १८॥

पार्ष्णिभ्यां वृषणौ रक्षन्

दन्तैर्दन्तानसंस्पृशन्।

विष्टब्धदेहो दन्ताग्रे

जिह्वामादाय सुस्थितः॥

रेचयेच्छक्तिपर्यन्तं

नासापुटेन मारुतम्॥ १९॥

हितं पीडारहितं जीर्णे परिणामप्राप्तौ अशनं यस्य स एवम्। स्वस्थः अत एव धातुसाम्यादिना। त्रिभिः कुड्यैः प्राकारैः आवृते निश्शब्दे गृहे निर्बाधे वा वने गिरिगुहादौ वा सुखावस्थितिहेतुत्वात् सुष्ठु शोभने चेलाजिनाद्युत्तरे आसने पीठपट्टादौ स्थितः यद्वा अभ्यासवशात् सुष्ठु स्थैर्यसुखहेतौ आगमान्तरेषूपदिष्टलक्षणे पद्मस्वस्तिकार्धचन्द्रादिके योगासने तिष्ठतीति स्वासनस्थः। उत्तरदिङ्मुखः। परमेश्वरं देवीं गुहं गणेशं च नत्वा। सुस्पष्टकण्ठशिरोवक्षाः स्वनासिकाप्रान्तनिहितदृष्टिः व्यवहितोत्तराधरदन्तपङ्क्तिः। पार्ष्णिभ्यां मुष्कपीडं उद्घातवशात् उत्प्लुतौ वारयन् अकुञ्चितशरीरः सुस्थितो दन्तप्रान्तनिहितजिह्वस्सन् यथशक्ति दक्षिणेन नासापुटेन वायुं शरीरान्तस्थनाडीसंशोधनार्थं रेचयेत् बहिः क्षिपेत्॥ १९॥

स रेचकस्तदभ्यासात्

वेधविक्षिप्तकर्मसु।
क्रमशश्शक्ततामेति
विकृष्टविषयेष्वपि॥ २०॥

उक्तलक्षणस्य रेचकस्याभ्यासात् क्रमेण व्यवहित विषयेष्वपि वेधकर्मसु विक्षिप्तकर्मसु च विशरारुताकारणरूपेषु योगी शक्ततां प्राप्नोति॥ २०॥

अथ पूरकलक्षणम् -

बाह्येन वायुना मूर्तेः
यथाशक्तिप्रपूरणम्।
पूरकस्सतदभ्यासा -
त्सुगुर्वपि विकर्षयेत्॥ २१॥

बहिष्ठेन मारुतेन यथाशक्ति मूर्तेः प्रकर्षेण पूरणं पूरकः। तस्मिन्नभ्यस्ते सुष्ठु गरिष्ठमपि शिलाद्याकर्षणशक्तो भवेत्॥ २१॥

कुम्भकं कथयितुमाह -

त्यागसंग्रहणे हित्वा
निरोधः कुम्भकस्स्मृतः।
रोधशक्तिस्तदभ्यासात्
व्यक्तिमेत्यनिवारिता॥ २२॥

रेचनात्मकं त्यागं पूरणरूपं सङ्ग्रहणं त्यक्त्वाऽन्तस्थस्य वायोर्निरोधात् कुम्भकः। तदभ्यासात् अव्याहतरोधशक्तिः अभिमतवस्तुस्तम्भनसामर्थ्यं व्यज्यते॥ २२॥

तथास्य चरतो विद्वान्
सोमसूर्येशवर्त्मसु।
तद्धर्मयोग्यतां बुद्ध्वा
योगी संसाधयेन्मतम्॥ २३॥

तदभ्यासात् विधेयत्वेनास्य वायोः चरतः प्रचारज्ञो योगी मध्यवामदक्षिणनाडीचारेषु चिकीर्षितवस्त्वानुगुण्यं निश्चित्य यथाऽस्मिन् कर्मणि दक्षिणश्चरन् श्रेष्ठः अमुष्मिन् मध्यमः एतस्मिंस्तु सौम्यः प्रशस्तः इत्येवं मत्वाऽभीष्टं योगी साधयेत्॥ २३॥

तथाहि -

पूरकं कुम्भकं वाऽपि
भजेच्चन्द्रपथि स्थिते।
पुष्टिं मृत्युंजयाद्यर्थं
स्वात्मनोऽन्यस्य रेचकम्॥ २४॥
अनग्निज्वलने वृक्ष
शोषणे बीजनाशने।
स्तोभोन्मादविषोद्दीप्ति
मुखेषु॥ ॥ ॥ टु रेचकम्॥ २५॥
ध्यानार्चनजपाद्येषु
देहत्यागे च शांकरे।
कुम्भको रेचकश्रेष्टा
दीक्षा संस्थापनेषु च॥ २६॥

वामनाड्यवस्थिते मरुति कुम्भकपूरकौ पुष्ट्यर्थं आत्मन
आप्यायनार्थं मृत्युञ्जयाद्यर्थमित्यादिग्रहणात्॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ च कुर्यात्।
(यदुक्तं) परस्य पुष्ट्याद्यर्थं वा वामस्थं रेचकं भजेत्। इति।
यदात्वनग्निज्वलनवृक्षशोषणनिर्बीजीकरणस्तोभोन्मादविषोद्दीपन-
प्रमुखकार्याणि कर्तुमिष्टानि तदानीं सौरमार्गस्थेन चारेण रेचकं
कुर्यात्। स्थोभः स्वल्पस्य विषज्वालादेर्बहलीकरणं शाङ्कर इति

शिवाश्रयसौषुम्नमार्गस्थविषुवति कर्तव्यतयोक्तं यत्तद्ध्यानार्चनजपादिकार्यं उत्क्रान्तिर्वा तद्विषये दीक्षासंस्थापने कुम्भकरेचकाविष्टौ। संस्थापनं प्रतिष्ठापनम्॥ २६॥

अथैषां रेचकादीनां अभ्यासाय कालपरिमाणं प्रति नियमं वक्तुमाह।

यवीयान् मध्यमो ज्येष्ठ
स्सतालैर्द्वादशादिभिः।
तालो द्वादशभिर्जानु
परिणाहपरिभ्रमैः॥ २७॥

हस्तेन जानुमण्डलपरिभ्रमणं यावत्या कालमात्रया क्रियते तावतीभिर्द्वादशभिः तालाख्यः कालांशो ज्ञेयः। तैश्च तालैर्द्वादशभिः कनिष्ठः प्राणायामः। चतुर्विंशत्यामध्यमः अष्टाचत्वारिंशताश्रेष्ठः। तथोक्तं श्रीसर्वज्ञानोत्तरे तालद्वादशको ज्ञेयः प्राणायामस्तु कन्यसः। मध्यश्चतुर्भिर्विंशत्या श्रेस्ठस्तद्विगुणो भवेत्। इति॥ २७॥

इत्थं प्रतिनियमप्राणरेचककुम्भकपूरकसमुदायरूपो यः

प्राणायामः।

सोऽपि ध्यानजपोपेत

स्सगर्भोऽन्यस्तदुज्झितः।

यथा सगर्भस्स्थैर्याय

मनसो न तथेतरः॥ २८॥

सोऽप्ययं प्राणायामो ध्यानेन जपेन युक्तः। सगर्भाख्यया ज्ञेयः। यस्तु विनैव ध्यानजपाभ्यां क्रियते स निर्गर्भः। यथा च मनसस्स्थैर्यहेतुत्वं सगर्भस्य न तथा निर्गर्भस्येति सगर्भप्राणायामार्थं अभ्यासः कार्य इति तात्पर्यं॥ २८॥

प्रातर्निशाकृतं पापं

दिनान्ते च दिवाकृतम्॥ २९॥

प्रभाते कृतोऽयं सगर्भप्राणायामः निशाकृतं पापं हन्ति। दिनान्ते तु कृतः स दिवाकृतं हन्ति ग्रहस्थेनेति सम्बन्धः॥ २९॥

एवं च किञ्चिन्निर्गर्भेण प्राणायामेन प्रयोजनम्। अतः किं तेनेत्याह।

हन्त्यगर्भोऽपि देवानां
प्रचलत्वं प्रधावताम्॥ २९॥

देवानां मनस्सहितानामिन्द्रियाणां विषयेषु अनाद्यविद्यावशात् प्रकर्षेण धावतां एष निर्गर्भः प्राणायामः सातत्येन क्रियमाणः प्रचलत्वं प्रकृष्टवेगवत्वं हन्ति। इन्द्रियजयकारीत्यर्थः॥ २९॥

किं च -

स्नातो भवति तीर्थेषु
सर्वक्रतुषु दीक्षितः।
पोतः पितॄणां पश्शश्वत्
सगर्भमिममाचरेत्॥ ३०॥

यस्तु नियुक्तत्वेन इमं जपध्यानयुक्तं सगर्भमभ्यस्यति स सर्वतीर्थेषु स्नातस्य समस्ताध्वरेषु दीक्षितस्य च फलं लभते। पितॄणां च संसारोत्तरणे पोतः प्लवो भवति। तत्प्रसादात्तेऽपि भवाब्धिं समुत्तरन्तीत्यर्थः॥ ३०॥

सगर्भतामेव वक्तुमाह -

ध्यायेदध्वान्तकं देवं
जपेत्तद्वाचकं सदा।
क्षित्यादीन्यथ तत्वानि
तद्रूपाणि कृतानि वा॥ ३१॥

सर्वाधिष्ठातृत्वेन हेतुनाऽध्वनः पर्यन्तवर्तिनं परमेश्वरं सकलकारणातीतं परमार्थत्वेन ध्यायेत्। तस्य च वाचकमन्त्रं जपेच्छब्दार्थरूपाववियुक्तौ प्राणायामसमये कुर्यादित्यर्थः। यदि वा धारणाफलं लिप्सुः पृथिव्यादीनि परमेश्वरस्वरूपाश्रयत्वेन च ध्यायेत् । सकलचिदचिद्भावाधिष्ठातृत्वेन तथा भगवतस्सर्वदा सर्वत्रावस्थितेः॥ ३१॥

अथ पृथिव्यादितत्वध्याने किं भगवद्भावनयेत्याह -

यस्मान्नाचेतनं तत्वं
सिद्धमप्युपकारकम्।
शैवं वपुरिति ध्याये
दतो यद्यत्समीहितम्॥ ३२॥

यतः किल स्वभावजडं पृथिव्यादिवस्तुजातं शिवस्वरूपाधिष्ठानं विना कृतध्यानाभ्यासतस्सिद्धमपि नोपकारकं अतः पारमेश्वरमेवैतत्सर्वं वपुरिति ध्यायेत्। अतः यद्यत्किमप्यभिप्रेतं अचिद्रूपमपि वस्तु ध्यायेत्॥ ३२॥

यतश्चैवमतः -

सिद्धये धारणादीनां
वृत्तीनामनिलस्य च।
सगर्भं कुम्भकं विद्वान्
आतिष्ठेदविखिन्नधीः॥ ३३॥

धारणादीनां योगाङ्गानां प्राणादिवृत्तीनां च प्रागुक्तानां प्रणयनाद्यर्थानां सिद्ध्यर्थं सगर्भं कुम्भकाभ्यासं अनुद्विग्नबुद्धिस्सन्नातिष्ठेत् आचरेत्॥ ३३॥

अयमर्कगुणं कालं
कृतचित्तव्यवस्थितिः।
प्राप्नोति धारणाशब्दं

धारणासिद्धिदानतः॥ ३४॥

अयं सगर्भः कुम्भकः द्वादशगुणं कालं चित्तवृत्तिनिरोधेन
कृतस्सन् धारणाव्यपदेशं लभते। कुत इत्याह धारणासिद्धिदानतः
धारणासम्बन्धिनीं सिद्धिं तथाऽभ्यस्यमानो ददाति॥ ३४॥

स्थित्यर्थो धारणाशब्दः
स्थानार्थोप्युपचारतः॥ ३५॥
स्थानं प्राथमिकस्येमा -
न्यवन्यादीनि नेतरत्॥ ३५॥

प्राथमिकस्य प्रथमाभ्यासवृत्तस्याऽऽरुरुक्षोः पृथिव्यादीनि तत्वानि
अभ्यासस्य स्थानं नत्वन्यदप्रत्यक्षमहदहङ्कारादितत्व-
जातमुपलभ्यमानपृथ्व्यादितत्वाभ्यासपूर्वस्तु तत्तदभ्यासस्सुगम एवेति
सर्वयोगशास्त्रेषूपदेशक्रमः॥ ३५॥

अथैषामेव रूपाकृतिप्रयोजनलांछनान्यभिधत्ते -

तानि हेमहिमज्योतिः
कृष्णस्वछानि रूपतः।

वेद्यर्धमण्डलत्र्यश्र
वृत्तपद्माकृतीनि तु॥ ३६॥
स्थैर्याप्यायनविप्लोष
प्रेरणाशून्यताप्तये।
भवन्ति वज्रकज्वाला
बिन्दुशून्यान्वितानि तु॥ ३७॥

तानि पृथिव्यादीनि पञ्चतत्वानि यथासंख्यं रूपतः पीतसितो-ज्वलकृष्णस्वच्छानि संस्थानाच्चतुरश्रार्धेन्दुत्रिकोणपरिवर्तुल-पद्माकाराणि क्रमाच्च वज्रेण वारिजेन ज्वालया बिन्दुना शून्येन च लांछितानि स्थैर्याद्यर्थं भवन्ति। तत्साधकानि सम्पद्यन्त इत्यर्थः॥ ३७॥

तानि च -

बाधकान्यनुवर्तीनि
मध्यस्थान्यवगत्य च।
योगी व्यस्तसमस्तानि
बिभृयादिष्टसिद्धये॥ ३८॥

पृथिव्यादीन्येव मित्रामित्रमध्यस्थत्वेन व्यस्तसमस्तानि बुद्ध्वा तेषु

कार्येष्विष्टसिद्ध्यर्थं योगी धारयेत्॥ ३८॥

अथ धारणरूपतत्फलजिज्ञासया मुनिः प्रश्नयति।

क्व देशे धारणारूपं
चिन्तनीयं विपश्चिता।
किञ्च व्यस्तसमस्तानां
फलं ब्रूहि सुरेश्वर॥ ३९॥

धारणासु यदेतद्रूपं हेमहिमज्योतिःकृष्णस्वच्छत्वादिनोप-
दिष्टं तत् कस्मिंस्थाने तद्विदा चिन्त्यम्। आसां च धारणानां
व्यस्तसमस्तानां फलं सुराधिनाथास्मभ्यमादिशेति प्रश्नार्थः॥ ३९॥

अर प्रतिवचनम् -

हृदि चेतसि विक्षिप्ते
धारयेत्क्षितिमर्थवित्।
जलं पिपासितः कण्ठे
मन्देग्नौ जठरेऽनलम्॥ ४०॥
प्राणादिवृत्तिसिद्ध्यर्थं

हृत्कण्ठादिषु मारुतम्।

विषाद्यभिभवे व्योम

तेषु यत्रोपयोगवत्॥ ४१॥

चेतसो यदा विक्षिप्तता स्यात् तदा प्रयोजनज्ञो योगी हृत्प्रदेशे पार्थिवीं धारणां स्थैर्यकारणत्वेनोक्तां धारयेत्। दुर्वारया तृषा तु यदा बाधितस्स्यात् तदा वारुणीं धारणां कण्ठे बिभृयात्। आप्यायनार्थं तस्याः प्रोक्तत्वात्। जाठरस्याग्नेर्मान्द्ये सति तत्सन्धुक्षणार्थं जठरे प्रागुक्ताम् आग्नेयीं बध्नीयात्। प्राणादिवृत्तीनां प्रागभिहितानां प्रणयनाद्यानां सिद्ध्यर्थं स्वाधीनत्वे सति तत्तत्फलसम्पादकत्वाय पूर्वोक्तेष्वेव हृत्कण्ठादिषु स्थानेषु वायवीं धारयेत्। विषोन्मादव्याध्याद्यभिभूयमानस्तु तेष्वेव हृदयादिषु मध्यात् अन्यतमे स्थाने व्योमधारणां बध्नीयात्। यत्र वा विषाद्युपघातवत्यङ्गे तथा धारणाद्युपयोगवत् सप्रयोजनं तस्मिन् धारयेत्॥ ४१॥

इदानीं परस्परमेषां पृथिव्यादीनां मध्यस्थारातिमित्रत्वं विवेचयन् सर्वसाधारणत्वमाकाशस्य तावत्प्रथममभिधात्तुमाह।

खं समस्तेषु भूतेषु

वायुवारी शिखिक्षिती।

वार्यग्नी भूमिपवनौ

वारिक्ष्मे चाऽनलानिलौ॥ ४२॥

मध्यस्थारातिमित्राणि

चतुष्के युग्मयुग्मशः।

परिज्ञायेति मतिमान्

योजयेदिष्टसिद्धये॥ ४३॥

आकाशस्तावद्व्यापकत्वात् अन्तर्वर्तित्वेन सर्वेषामवकाशदायि-त्वेन च मित्रमेषां ज्ञेयम्। वायुवारीशिखिक्षितीत्यादेश्चतुष्कत्रया-देकैकस्मिन् चतुष्के यथाक्रमं (युग्मयुग्मश इति। द्वयं द्वयं क्रमान्मध्यस्थारातिमित्राणि एतानि बोद्धव्यानि। तथाहि वायुवारी शिखिक्षितीत्याद्ये चतुष्के जलपवनयोः क्षित्यग्न्योश्च परस्परं न मित्रत्वं व शत्रुभावः इति मध्यस्थत्वमेषां बोद्धव्यम्। वार्यग्नी भूमिपवनाविति अत्राऽपि मध्यमचतुष्के बाध्यबाधकभावेन परस्परमेषाञ्चतुर्णाम् अवस्थितेः अरातित्वं शत्रुता। वारिक्ष्मे - चानलानिलावित्यत्र तु तृतीयेऽस्मिन् चतुष्के भूजलयोर्वाय्वग्न्योश्चान्यो-न्यपोषकत्वान्मित्रत्वमित्येवं परिज्ञाय बुध्वा प्राज्ञो योगी तथातथा साधकत्वेन वा यथावसरमिष्टसिद्ध्यर्थे एतान् प्रयुञ्जीत॥ ४२ - ४३॥

अथ विद्यापादान्तर्गतप्रत्ययादिविचारप्रकरणे प्राणादिवायूनां स्वरूपोक्तौ स्थानं यद्यस्य धारणे। जयः फलं वाच्यशेषं पत्या स्कन्धे समीरितम् इति यदुक्तं ततः प्राणादिवृत्तीनां स्थानं साधारणं फलं च ज्ञातुं मुनिः प्रश्नयति।

कानि प्राणादिवृत्तीनां
स्थानान्यस्मिन् शरीरके।
जितासु तासु किं वा स्यात्
इति ब्रूहि सुरोत्तम॥ ४४॥

प्राणापानादिवृत्तीनां प्रणयनापनयनाद्यानां कानि स्थानानि येषु तज्जयः कार्यः। तासु च प्राणादिवृत्तिषु जितास्वस्मिन् शरीरे किं फलिष्यतीति भगवन्निन्द्राऽस्माकमाचक्ष्वेति प्रश्नार्थः। व्यापकस्याप्यात्मनः तत्कृतमव्यापकत्वं कुत्सितत्वं वा द्योतयितुं कप्रत्ययः॥ ४४॥

अत्रोत्तरम्।

तस्य हृत्कण्ठनाभ्यङ्ग
पृष्ठदेशेषु धारणात्।

जयः प्रणयनादीनां
वृत्तीनां योगिनो भवेत्॥ ४५॥

तस्य प्रागुक्तस्य प्राणादिरूपतया स्थितस्य वायोः हृदादिपृष्ठान्तेषु पञ्चसु स्थानेषु रोधात्प्रणयनादीनां प्राणादिवृत्तीनां जयो भवति योगिनः॥ ४५॥

जितप्रणयनो धत्ते
स्वेच्छया देहमात्मनः।
जितापनयनोऽश्नाति
शकृदादिजहाति न॥ ४६॥
विजितोन्नयनोऽभ्येति
वाग्वशित्वादिकान् गुणान्।
समानवृत्तिविजयात्
भवेत्त्यक्तजरो वशी॥ ४७॥
वपुर्विहारवशिता
भवेद्विनमने जिते।
पंकाम्बुकण्टकासङ्गो
वीर्यमक्षयमद्भुतम्॥ ४८॥

जिता प्रणयनाख्या प्राणवृत्तिर्येन स एवंविधो योगी यावद्रुचि स्वेच्छया स्वदेहं धारयति। वृत्तिः प्रणयनं नाम यत्तज्जीवनमुच्यत इति प्रणयनस्य जीवनरूपत्वेनोक्तत्वात्। जितात्वपनयनाख्यापानवृत्तिर्येन सताद्दग्विधो योगी अश्नन्नपि निर्मलदेहो भवति। अपानजयाद्धि विण्मूत्रादिमलभावेन नास्य पानाशनादि परिणमति। अपि तु रसधातुभावेनैव। अन्तश्शकृदादिमलोज्झित एवैष सम्पद्यते। सर्वदेहिनां हि रसमलधातुभावेनान्नपानपरिणतिर्भवति। विजिता चोन्नयनाख्योदानवृत्तिर्येन असौ कवित्ववक्तृत्वरूपवाक्स्वातन्त्र्यप्रभृतीन् गुणान् प्राप्नोति। येन तु समानवृत्तिर्विजिता स सर्वदा जरावर्जितस्सर्वसहः सर्वस्वदेहो भवति। विनमनाख्यव्यानवृत्तिव्यापारे कृतजयः स्वेच्छया वपुषि विहरति। ब्रह्मरन्ध्रेण श्रवणच्छिद्रादिना वा मरुत्प्रेषणाकर्षणादौ शक्तस्स्यादित्यर्थः। तथा कर्दमजलकण्टकाद्युपविष्टोपि तैरसम्पर्काश्रयरूपः अविनश्वरं चास्य बलं सञ्जायते॥ ४८॥

एवमानुषङ्गिकप्रश्नप्रतिवचनादनन्तरं प्रकृतमभिधीयते।

धारणाद्वादश ध्यानं

दिव्यालोकप्रवृत्तिदम्।

समाधिरणिमादीना

द्वादशैतानि कारणम्॥ ४९॥

द्वादशभिः सगर्भैः कुम्भकैः धारणा पूर्वमुक्ता। ताश्च द्वादश ध्यानं ज्ञेयम्। तच्च दिव्यामलौकिकीमालोकप्रवृत्तिं प्रकाशाविर्भूतिं ददातीति दिव्यालोकप्रवृत्तिदमिति तदभ्यासस्य फलमुक्तम्। एतानि च द्वादश ध्यानानि समाधिरित्युच्यते। सत्वणिमादिदिव्यसिद्धिकारणम्। अन्यस्तैवंविधसमाधेरणिमाद्याविर्भावस्स्यात्॥ ४९॥

प्राणायामं विनाप्येवं
वश्यात्मा चेतसि स्थितः।
समभ्यस्यन्नवाप्नोति
गुणानुक्ताननन्तरम्॥ ५०॥

एवमनेन प्रकारेणाऽऽत्मनि नित्ययुक्ततया वश्यात्मा योगी विनापि प्राणायामेन क्वचिदपि देशे कृतिनिरोधायां चित्तवृत्तौ स्थित एव तदभ्यस्यन् स आनन्तर्येणैतान् गुणान् अणिमादीन् लभते॥ ५०॥

किञ्च -

यद्यद्वस्तु यथोद्दिष्ट

क्रमयोगात्प्रपद्यते।

तत्र तत्रास्य चिद्व्यक्तिः

तद्व्याप्तिविषया भवेत्॥ ५१॥

इति बाह्ये स्थिते सर्व -

माकलय्येव चक्षुषा।

सर्वान् पदार्थान् सन्त्यज्य

शिवतत्त्वं समभ्यसेत्॥ ५२॥

यथोक्तक्रमाभ्यासात् यद्यत्पृथिव्यादिशिवान्ततत्वं प्रतिपद्यते धारणादिना स्वात्मीकरोति तत्रतत्रास्य योगिनः तद्व्याप्तिविषया स्वसंविद्व्यक्तिर्भवति। तथाहि आदौ पृथिव्यादितत्वानां शिवमन्त्रमहेश्वरमन्त्रेश्वरमन्त्रविज्ञानाकलप्रलयाकलसकलैः सप्तभिश्शक्तिमद्भिरेतावतीभिरवैतच्छक्तिभिस्स्वरूपेण पृथिव्यादीनां सहैकैकस्य पञ्चदशप्रकारतया जाग्रदादिपिण्डस्थादिरूपतया च यावती व्याप्तिः यथोक्तं - श्रीमच्चिच्छक्तिभेदेन धरातत्वं विभिद्यते। स्वरूपसहितं तच्च विज्ञेयं दश पञ्च च। शिवादिसकलात्मानश्शक्तिमन्तः प्रकीर्तिताः। तच्छक्तयश्च विज्ञेयाः तद्वदेव विचक्षणैः। एवं जलादिमूलान्तं तत्त्वव्रातमिदं महत्। पृथक्भेदैरिमैर्भिन्नमित्यादि। तदेवं तद्व्याप्तिकस्य योगिनः

संवित्तावतीत्येवं श्रीमत्कामिकतन्त्रे श्रुतम्। यद्वाह्यं तस्मिं स्थिते सर्वं वस्तु स्वदृग्गोचरतां प्राप्तं बुध्वा शिवव्यतिरिक्तान् सर्वानेव तान् पदार्थान् सर्वाध्वपर्यन्तवर्तिशिवपदप्राप्तिहेतुत्वात् विद्याप्रभृतींस्त्यक्त्वा शिवतत्वमभ्यस्येत् तदेकनिष्ठस्स्यात्। हेयान् पदार्थान् सन्त्यज्येति पाठे स्पष्ट एवार्थः॥ ५२॥

शिवगर्भान् समातिष्ठन्
प्राणायामादिकानपि।
जहाति जन्तुर्यः प्राणान्
स शिवत्वं प्रपद्यते॥ ५३॥

आस्तां तावद्याप्तिविषया विद्यक्तिर्वक्ष्यमाणैकान्तविधिं विनाऽपि परमेश्वरध्यानजपगर्भान् प्राणायामान् कुर्वन्यो जन्तुः प्राणान् त्यजति स शिवतामेति अपवृज्यत इत्यर्थः॥ ५३॥

अथाऽत्र मुनिः -

रूपं परं महेशस्य
ध्यातुं शक्यं न जातुचित्।
वैचित्र्यात्कल्पितं भ्रान्त्यै

तत्रास्था चेतसः कथम्॥ ५४॥

निष्कलस्वरूपस्य तावत् भगवतस्स्वरूपं निराकारत्वे सति नीरूपत्वात् ध्यातुं न शक्यम्। यदाहुः आकारवांस्त्वं नियमादुपास्यः न वस्त्वनाकारमुपैति बुद्धिः। अथास्य परमार्थतो रूपासम्भवेऽपि ध्यायिनां चित्तवृत्तिनिबन्धनाकारविशेषकल्पना तस्यैतत्कल्पितं रूपं श्वेतपीतरक्तादिवैचित्र्यात् भ्रान्त्यै स्यात्। कथं तत्र चेतस आस्था स्थितिः कल्पितत्वेनासत्यरूपविषये स्वभावचञ्चलस्य चेतसः कथं नियमनमिति प्रश्नः॥ ५४॥

अथात्र समाधिः -

पार्थिवाप्ये विचित्रांके
न ध्येये धारणे तदा।
तथाप्याभासतस्सिद्धाः
श्रूयन्ते योगिनस्तयोः॥ ५५॥

सत्यं अरूपस्य भगवतस्स्वरूपं उक्तेन क्रमेण ध्यातुमशक्यं तत्र तु निरालम्बनोपदेशक्रमेण तत्स्वरूपावाप्तिर्भविष्यति। यत्तु - वैचित्र्यात्कल्पितं भ्रान्त्यै इत्युक्तं न तावद्युक्तं आगमोपदिष्टस्य

ध्यानस्य परमार्थत्वेन वैकल्पिकत्वानुपपत्तेः।
तदुपदिष्टतत्तद्विविधविध्यनुष्ठानस्य वैकल्पिकत्वाभ्युपगमे सति दीक्षादेरप्यसत्यत्वात् आनर्थक्यमिति कृतमागमेन किञ्च वैचित्र्यात् ध्येयं प्रति ध्यानमशक्यमिति यदुच्यते तदास्तां तावत्। परमेश्वराकृतिचिन्तनमयेऽप्येते सुस्पष्टपार्थिववारुणाख्ये द्वे धारणे सकलसामान्ययोगशास्त्रप्रसिद्धे। ते अपि विचित्ररूपवज्राङ्कितत्वात् सितसलिलोत्पललांच्छितत्वाच्च न ध्येये ध्यातुं न शक्ये। न चैवमत्राभ्युपगमो युक्तः यतस्तयोः पार्थिवाप्ययोः धारणयोस्तथातथा रूपवैचित्र्ये सत्यपि साभ्यासानां योगिनां अनेकास्सिद्धयश्श्रूयन्ते तथैवमागमोपदिष्टस्य धारणाफलस्यानेकसास्त्राभ्यासयोगिलब्धस्याऽपि येयं प्रतीतिः तस्यां सत्यामपि॥ ५५॥

भोगविप्लुतचित्तस्य
कथं स्याच्चित्तसंस्थितिः।
नाधिकृत्याधिरक्ताणून्
प्राहेदं साधनं हरः॥ ५६॥

अथोच्यते जन्मसहस्राङ्गीकृतविविधभोगाभ्यासविक्षिप्तचेतसां कथमतिचञ्चलस्य चेतसः संस्थितिः

सम्यङ्निरुद्धसकलवृत्तित्वेनावस्थानं स्यात्। यथोक्तं श्रीमद्भगवद्गीतायां - चञ्चलं हि मनः कृष्ण प्रमाथि बलवद्दृढम् । तस्याहं निग्रहं मन्ये वायोरिव सुदुष्करम्। तथा - अपि चण्डानलोद्भूततरङ्गस्य महोदधेः। शक्यते प्रसरो रोद्धुं विषयेभ्यो न चेतस इति। नैतद्युक्त। यतो नेदं योगाख्यं साधनमविरक्तान् जन्तूनधिकृत्य परमेश्वर आदिदेश अपि तु प्रचुरवैराग्यनिर्झरनिर्धूतभवभोगस्पृहाकलङ्काः तेष्वेवं सुचिरसञ्जातनिस्सारसंसारभोगविजुगुप्साः परमत्रेति। न चाभ्यासवतां किमपि दुष्प्रापं दृष्टेऽपि सम्भवति॥ ५६॥

अतश्च -

शक्यते विषयं कर्तुं
जगदप्यखिलं शनैः।
किमु चित्रं वपुर्दान्तैः
वैराग्याभ्यासशालिभिः॥ ५७॥

वैराग्येण नैस्पृह्येणाभ्यासेन च पुनः पुनस्तदासेवनात्मकेन शलन्ते शोभन्त इति वैराग्याभ्यासशालिनः दान्ताश्चोपशमयुक्ताः एवंविधैर्योगिभिश्शनैश्शनैः निखिलमपि जगत् धारणाव्याप्तिक्रमेण

गोचरीकर्तुं शक्यते। किंपुनर्ध्येयं चित्रं पारमेश्वरं वपुरिति॥ ५७॥

इत्येवं सालम्बनयोगमुपदिश्य प्रकृष्टमनालम्बनमुपदेष्टुं भूमिकां विरचयति -

केयं वा रूपकेयत्ता
सर्वाधिष्ठानयोगिनः।
सर्वदा सर्वभूतानां
सर्वाकारोपकारिणः॥ ५८॥
स्थानरूपप्रमाणानि
परिकल्प्य स्वचेतसा।
यत्रोपरमते चित्तं
तत्तद्ध्येयं पुनः पुनः॥ ५९॥

यद्वा सर्वाधिष्ठानयोगिनः परमेश्वरस्येयमेव श्वेतादि-वर्णा दशभुजा पञ्चवक्त्राद्याकृतिर्ध्यातव्येति कोऽयमेवंविधं रूपं प्रति नियमः न कश्चिदित्यर्थः। विततवैभवविजृभवतः परिमितस्थानोपासनमसमीचीनमेव किल भगवतः। अतश्च बहिरन्तर्-वाऽविचलितचेतसा स्थानरूपप्रमाणाकृत्यादि परिकल्प्य यत्र यत्र भावशरीरे भूतशरीरे वा चित्तमुपशाम्यति तत्र तत्र भूयोभूयः

प्रयत्नवता गुरूपदेशसमधिगतयुक्तिना ध्यातव्यम्। उक्तञ्च पारमेश्वरे नेन्द्रियाणि न च प्राणो न मनो धिषणेषणा। नाहमस्मि न चान्योऽस्मि चित्तस्य प्रलयस्ततः। चित्तक्षयः परावाप्तिरिति सत्यं गणाम्बिके। इति॥ ५८ - ५९॥

अथास्यैव फलमाह -

तेनास्य चेतसस्स्थैर्यं
सविशेषगुणं शनैः।
उन्मील्य योगसंस्कारं
हतविघ्नस्य जायते॥ ६०॥

तत्राऽऽस्था चेतसः कथमिति यत् प्राक् पर्यनुयुक्तं। तदर्थमिदम्। तेनामुना प्रागुक्तेन योगेनास्य योगिनो निर्विघ्नस्य सतश्चेतसस्स्थैर्यमचाञ्चल्यं पररूपविश्रान्तेरतिविलक्षणं जायते। कीदृशं तत्स्थैर्यमित्याह सविशेषगुणं सविशेषास्सातिशया गुणाः प्रागुक्ता अणिमादयो यत्र। तत्तथा। किं कृत्वैतत्तूत्पाद्यत इत्याह शनैर्योगसंस्कारं तत्स्वरूपं प्रकाश्य तद्वासनाधिष्ठितत्वात् तद्व्यवहारावस्थितस्यास्थ निर्विघ्नस्य सतस्तत्रैव चित्तस्थैर्यं जायत इत्यर्थः॥

एवमातिष्ठतस्सम्यक्

विनैवाऽऽकारकल्पनाम्।

अकिञ्चिच्चित्तकस्याऽस्य

रूपमुन्मीलति स्वकम्॥ ६१॥

सर्वार्थदृक्क्रियारूप -

मानन्दमयमव्ययम्।

यत्प्राप्य न पुनर्दुःख

योगमेत्यशिवावहम्॥ ६२॥

एवमेनं प्रागुक्तं योगविधिं सम्यक्

शुद्धाभ्यासाद्यतिशयवशेनाऽऽकारकल्पनां विनाप्यनुतिष्ठतो

योगिनोऽकिञ्चिच्चित्तकस्य किञ्चिदप्यचिन्तयतः चित्तक्षयात्स्वात्मन्येव

निस्तरङ्गमहोदधिप्रशान्तेऽवस्थितस्य स्वकं निजरूपमुन्मीलति विकसति

अपरिमितं सम्पद्यते प्रसरन्निरावरणनिजस्वरूपो भवतीत्यर्थः। कीदृक्

स्वकं रूपन्मुन्मीलतीत्याह सर्वार्थदृक्क्रियारूपमित्यादि सर्वार्था

सर्वविषया दृक् ज्ञानं क्रिया च व्यापाररूपा ते एव रूपं यस्य यतः।

ज्ञानक्रिये शिवे प्रोक्ते सर्वार्थे निर्मले परे इति

यच्छिवरूपमागमेषूपदिष्टं अनुरूपमाह्लादसुन्दरमव्ययं

चाविनश्वरं अस्य योगिनो एवमभ्यस्यतोऽभिव्यज्यते यत्प्राप्ते

जन्ममरणाद्यशिवमश्रेय आवहतीत्यशिवावहं संसारलक्षणं

दुःखयोगं नैति न प्राप्नोति। उक्तं च श्रीमदवधूतगुरुणा। यथा नीता रसेन्द्रेण घातवश्शात-कुम्भताम्। पुनरावृत्तये न स्युः तद्वत्तन्मतचोदिताः। इति॥ ६२॥

अत्र स्वरूपप्रशंसापूर्वकं अतिरहस्यतया सर्वान् प्रत्यप्रकाश्यत्वमभिधातुमाह।

एतत्समस्तगुह्यानां
गुह्यं सिद्धामरस्तुतम्।
साक्षादालोचनं शम्भो -
रत्युत्पादनमुत्तमम्॥ ६३॥
नाल्पकालोषितायैतत्
देयं नातिप्रमादिने।
नामेधिने नातपसे
यश्च नाभ्यर्चयेच्छिवम्॥ ६४॥

यत एतत्सर्वेषां रहस्यानामप्यतिशयेन गूहनीयं निरतिशयनिश्रेयसावाप्तिहेतुत्वात् अत एव च सिद्धैरमरैश्चाभिष्टुतम्। साक्षात्परमेश्वरतेजसः प्रकाशकत्वादत्युत्कृष्टं पावनं पवित्रताहेतुः तस्मादेतन्नाल्पकालोषिताय। अनतिचिरोपसन्नत्वात्

अविज्ञातनिरतिशयश्रद्धाक्तियोगाय शिष्याय नातिप्रमादिने सप्रमादाय नचाप्रज्ञाय ज्ञानयोगयोरपिरक्षितुमशक्यत्वात् नाप्यतपसे नियमरहिताय न च यः परमेश्वरार्चनं करोति एतयोरप्रमादित्वाजडत्वे सत्यपि तपोविरहात् भक्त्ययोगतश्चानधिकृतत्वम्॥ ६४॥

तदेवं अस्याऽपि योगविधेः भुक्तिमुक्तिलक्षणं फलमवगन्तव्यं इत्येतदुपसंहाराय परस्तादभिधास्यमानचर्यापादोपक्षेपायचायं श्लोकः।

अस्याभ्यासाद्दिव्यसिद्ध्यंशुजालै
रिष्टान् लोकान् रोरुचानो विहृत्य।
काले हित्वाऽपास्रवं देहमास्ते
स्वात्मन्येवाश्चर्यचर्याधिवासः॥ ६५॥

अस्य निरालम्बनस्य योगस्याभ्यासः पुनः पुनः सेवनं तस्माद्दिव्या अलौकिक्यः चतुष्षष्टिगुणा अणिमादिसिद्धयः येषां ते दिव्यसिद्धयः अंशुजालाः शक्तिप्रसराः तैरोरुचानः विततततेजःपुञ्जत्वाद्देदीप्यमानस्सन् अभिप्रेतान् लोकान् यथेच्छं विहृत्येति तेषु स्वर्गादिलोकेषु विहरणं क्रीडालक्षणं निर्वर्त्यापगतानि बाह्यविषयैकग्रहणप्रवणानि अन्तरात्मोपलम्भपराङ्मुखानि आस्रवन्ति बहिस्स्वातन्त्र्येण गच्छन्तीति

आस्रवशब्दवाच्यनीन्द्रियाणि यस्मात्तमपास्रवं परिहृतबहिर्वृत्तित्वेन सर्वदान्तर्मुखसमग्रेन्द्रियग्रामं दिव्यमपि देहं यथाभिमते कस्मिंश्चिदपि काले हित्वा सन्त्यज्य स्वस्वरूपे एवाऽऽस्ते निर्वृतो भवतीत्यर्थः। कीदृशस्सन्नित्याह आश्चर्यचर्याधिवास इति आश्चर्यप्रधाना सा आश्चर्यचर्या अत्यद्भुतत्वात्प्रमेयं स्थित्यादिपञ्चविधकृत्य कर्तृत्वं तस्या अधिवास उपाश्रयः परमेश्वरवदिच्छामात्रसम्पाद्ये पञ्चविधे स्थित्यादिव्यापरे शक्तोऽपि स्वात्मन्येवाऽऽस्ते। करणीयस्याभावादित्येतद्विवेचितप्रायं विद्यापाद एवेति॥

संक्षिप्तोक्तिस्स्फुरति विततं स्फारयन्ती प्रमेयं
पौर्वापर्यक्रमविमृशनात्पौनरुक्त्यं न किञ्चित्।
नातिव्याप्तिः प्रकृतकथनान्नैवचाव्याप्तिरित्थं
योगस्साङ्गो जयति गदितश्श्रीमृगेन्द्रागमेऽस्मिन्॥

इति श्रीभट्टविद्याकण्ठात्मजश्रीभट्टनारायणकण्ठविरचितायां मृगेन्द्रवृत्तौ योगपादस्समाप्तः।

॥ शुभम्॥

राक्षसं मानषं लिङ्गं शयनं तद्द्वयं भवेत् २२
स्वयम्भुवालयं चैव गाणवादिस्थितिर्भवेत्
अथवान्यप्रकारेण शयनं समखण्डकम् २३
वर्धमानं स्थितं चैव आसीनं तु शिवाधिकम्
यानं त्रैराशिकं लिङ्गं कलयेत्तु विचक्षणः २४
सुखासीनं स्थितं नृत्तं शयनं च चतुर्विधम्
पूजाकाले सुखासीनं अन्यकाले तु पूर्ववत् २५
भवादि पञ्चविंशच्च शिवसोहोद्विशेषतः
तेषु विंशति संयोज्य शिवव्योमार्कमण्डले २६
पञ्चसोहं तु लिङ्गेभ्य ---सततं वसेत्
शिवार्चनमिदं प्रोक्तं सायरक्षाविधिं शृणु २७
इति चिन्त्यशास्त्रे शिवार्चनविधिर्नाम सप्तदश पटलः

नित्यार्चनविधिः

शिवार्चनं विधिं वक्ष्ये सर्वसिद्धिकरं परम्
पञ्चशुद्धिक्रमेणैव पूजयेच्छिवमव्ययम् १
शौचमाचमनं स्नानं पादप्रक्षालनं तथा
पूजास्थाने स्थितः कुर्यादासनोपरि देशिकः २
मण्डलं कारयेत्तत्र -----
-------------वृत्तं तन्मध्ये तु त्रिमण्डलम्
चतुरश्रमर्धचन्द्रं त्रिकोणं च षडश्रकम् ३
सुवृत्तं च पृथिव्यादिमण्डलाकृतयः क्रमात्
पृथिव्यादीनि बीजानि शृणु प्रज्ञाहिताय वै ४
मण्डले चतुरश्रे तु लकारं वज्रलाञ्चितम्
ध्यायेत्तद्धेमवर्णाभं -----
अर्धचन्द्रनिभं पद्मलाञ्चनेन तु लाञ्छितम् ५

वकारं पूजितं वारि योनिमन्त्रं सदा प्रतम्
त्रिकोणं रक्तवर्णाभं कालानलशतोपमम् ६
स्वस्तिकेन तु संछन्नं रकारेणोज्ज्वलं शुभम्
षडश्र चैव रक्ताभं यकारेणैव लक्षितम् ७
आकाशमण्डलयुतं वृत्तं लाञ्छनबिन्दुकम्
लंकूळीशं महाबीजं हकारेणोज्ज्वलं हि नत् ८
ध्यायेत्सदाशिवाभासं ममले देवताः पृथक्
चन्द्रवारुणवह्नीश सदाशिवमयं पृथक् ९
ब्रह्मविष्णुमण्डलेशानं पृथङ्मूर्तिशिवस्तथा
सदाशिवगतो बिन्दुनादं ततोपरिक्रमात् १०
नादोपरि स्थिता शक्तिः शक्तिमध्ये शिवःपरः
शिवो ब्रह्म परं धाम परमात्मा सनातनः
तत्त्वं सूक्ष्मं परेशानं मुक्तिस्थानं निरञ्जनम् ११
----------------------महत्पदम्
पश्यन्ति सूरयः सर्वे सर्वसङ्कल्पवर्जिताः १२
पर्याय वाचकं नाम परब्रह्म इति त्रिधा
विष्णुर्ब्रह्मा शिवः साक्षात् वासुदेवस्सनातनः १३
आमनन्ति परं तत्त्वं पठन्ति मुनिसत्तमाः १४
एक एव महादेवः परमात्मा निरञ्जनः १४
गुरुप्रसादमार्गेण सिद्धान्तोक्तेन वर्त्मना
तस्मात्संछास्त्र सिद्ध्यर्थं गुरुवन्दनपूर्वकम् १५
सिद्धान्ते सर्व कर्माणि भूतशुद्धिं ततः कुरु
दहनाप्लावनं कुर्यान्नाडीशोधनकर्मणा १६
प्राणस्थितिः प्रकर्तव्यं प्राणापानेन सुव्रत
---------------------- तत्त्ववित् १७
निक्षिप्य ब्रह्मकमले शिवं हंसेन योगवित्

योगेन वायुनासाद्य नाडीशोधनमारभेत् १८
ध्यायेम्महेशतो ग्राह्यं पीताभासमनोपमम्
स्फटिकाभाङ्गमाभासज्वालया बिन्दुतोपमम् १९
हृत्पद्मनिलयं --------
---------ममलमहंकारं स तत्परम्
त्वं शब्दनिलयं योगि असिशब्दे व्यवस्थितम् २०
तत्त्वमस्यापि वाक्यार्थं साधनं सनकादिभिः
सब्रह्म सशिवस्सेन्द्रस्सोऽक्षरः परमस्वराट् २१
ऋतं सत्यमिति ख्यातं परं ब्रह्म परात्परम्
ऊर्ध्वरेतं विरूपाक्षं विश्वरूपमुमापतिम् २२
एवं सदाशिवं ध्यायेत् खे ब्रह्मपङ्कजं ततः
सदाशिवमजं ध्यात्वा प्राणायामं सदारभेत् २३
दहनाप्लावनार्थाय नाडीयजनमारभेत्
इडा च पिङ्गला चैव सुषुम्ना च त्रिधा भवेत् २४
विश्वस्याधारमत्यन्तं नाडीनां नायकत्रयम्
तस्मात्त्रयेण कर्तव्यं नाडी शुद्धिर्यथाक्रमम् २५
सूक्ष्मानन्दामृता चैव पिङ्गला माइडागुह
सूर्याग्निसोमसंयुक्ता पुनस्तत्त्रिविधा मता २६
रजस्तमस्सत्वमिति ब्रह्मरुद्रहरिस्तथा
ऋग्यजुस्साम च त्रीणि तस्मात्-------
-------------छुद्धिः प्रचक्षते २७
अकारं च उकारं च मकारं च त्रिधा भवेत्
बिन्दु चान्तर्गतो नाडी तुरीयं मुक्तिकारणम् २८
अकारो दक्षिणे भागे उकारो वामभागिकः
मकारो मध्यसंयुक्तस्तस्मात्त्रिः प्रदक्षिणम् २९
हकारो दक्षिणः पक्षः सकारो वामसंस्थितः

मध्ये नादमयस्थाने तस्मादन्तर्गतश्शिवः ३०
अविना दक्षिणं सव्यमुत्तरं वामसंयुतम्
विषुवद्वयोदयं मध्ये पुंस्त्री चैव नपुंसकम् ३१
शङ्करं दक्षिणं भागं वामभागमुमामयम्
सूक्ष्मं शिवमयं मध्ये त्रिःप्रकारं शिवामृतम् ३२
दक्षिणं बिन्दुसंयुक्तं वामं नादकलाकुलम्
मध्ये समरसं प्रोक्तं तदूर्ध्वे परमं पदम् ३३
तत्परं ब्रह्म परमं सर्वभूतेषु संस्थितम्
तेषां मध्ये महाशक्तिरन्तर्वेदि मनोन्मनीम् ३४
वागीशी परमानन्दज्योत्स्नादि ब्रह्मवारिणी
चैवकी वैखरी सूक्ष्मा पश्यन्ति मध्यमा सुधा ३५
स्वाहाकारी जगद्धात्री शब्दसंकुल---------
------------प्रणवं सङ्गीतं वादिनी स्थिता
श्रीमती च दयां सत्या विकल्परहिता शिवा ३६
योनिमध्ये गता नारी नारीनारायणस्थिता
स्थितिप्रलयसंयुक्ता सृष्टिमूला शिवप्रिया ३७
एभिर्नामयुता शक्तिरनन्ता नामकोटिका
तस्य मध्ये शिवस्थित्वा प्राणायामेन शोषयेत् ३८
उभाभ्यां तु बिपेद्वायुं संयम्य मनुना त्रिधा
गुदादनिलमुद्धृत्य प्रासादप्रणवेन तु ३९
दक्षिणेन पिबेत्पूर्वं कलामात्रेण मन्त्रवित्
कलाभिष्षोडशदशद्वादशाभिस्त्रिधोच्यते ४०
सूर्यसोमाग्निदैवत्यं निष्कलं शिवमव्ययम्
दक्षिणेऽर्ककलास्थानं वामे चन्द्रकला स्थितम् ४१
सकला सा समायुक्तं मध्ये वह्निसुषुम्नया
तस्य भेदमतो वक्ष्ये शृणु सर्वार्थसिद्धये ४२

अकारश्च इकारश्च उकारश्च तथैव च
ए ओ अमिति पुंलिङ्ग दक्षिणे वायुगोचरम् ४३
आ ई ऐ औ अः स्थिता वामतो वायुगोचरम्
एताश्चन्द्रकला ज्ञेया अमृताश्चन्द्र संयुता ४४
ऋ लृ लॄ सुषुम्नायां प्राणमध्ये विषुद्वयाम्
दक्षिणस्थानमन्त्रेण धारयेद्वायुमात्मनि ४५
वह्निमण्डलमार्गेण तद्बीजेन समाधिना
वामेन विसृजेत्तत्र चन्द्रमध्येन बीजयुक् ४६
युवां मनसाम -------- कलायुतम्
चन्द्रमण्डलमध्येन ज्योत्स्नाध्यानेन मुख्यधीः ४७
नाभिचक्रगतं वायुं सुषुम्नाख्येन पूरयेत्
प्रणवध्यानमार्गेण हंसहंसेति कौदिता ४८
औकारान्तमिदं मन्त्रं षण्णादमिति पठ्यते
रहस्यमेतद्विज्ञानं गोपनीयं प्रयत्नतः
परकाय प्रवेशस्य साधनं विषनाशनम् ४९
एवं मृत्युञ्जयं मन्त्रं ओं जुं सः ओमिति स्मृतम्
मात्रा षोडशकेनैव पूरयेद्विधि चोदनात् ५०
चतुष्षष्टि कृतं कुम्भं द्वात्रिंशन्मात्रया स्पृशेत्
एवं षोडशकेनैव प्राणायामेन शोधयेत् ५१
नाडीशुद्धिमवाप्नोति सर्वपापैः प्रमुच्यते
प्रातः काले शुचिस्नात्वा हविष्याशी जितेन्द्रियः ५२
धारयेन्मासमात्रेण पञ्चपातकनाशनम्
-------------पैः ५३
ऋषिभिस्सततं योगं मयातीतं सनातनम्
आयुष्करं बलकरं यौवनं सजरापहम् ५४
काशश्वासहरं पुच्छव्याधिनाशं सुखप्रदम्

वन्ध्यानां पुत्रजनकं वायस्थापनमुत्तमम् ५५
समाधियोगस्यारम्भं वैदिकैरपि पूजितम्
क्षयकासापस्माराणां संपर्कव्याधि नाशनम् ५६
कुष्ठघ्नं गौरवालस्याद्देहलाघवकारणम्
तस्मात्सर्वप्रयत्नेन प्राणायामं समभ्यसेत् ५७
पश्चादाकाशगमनं ब्रह्मयोगस्य कारणम्
निर्वाण निर्गुणं व्योमव्यापि प्रसाधकं च तत् ५८
एवं क्रमेण गुरुणा आज्ञायुक्तस्य सिद्ध्यति
प्लावयेदमृतेनैव स्वधामन्त्रेण मन्त्रवित् ५९
अकारादि क्षकारान्तान्यक्षराणि क्रमान्न्यसेत्
अकारं मूर्ध्नि विन्यस्य आकारं तु ललाटके ६०
इकारं दक्षिणे नेत्रे ईकारं वामनेत्रके
उकारं दक्षिणे कर्णे ऊकारं वामकर्णके ६१
ऋकारं दक्षिणे घ्राणे ॠकारं वामघ्राणके
ऌकारं दक्षिणे गण्डे ॡकारं वामगण्डके ६२
एकारमुत्तरौष्ठे च ऐकारमधरौष्ठके
ओकारमूर्ध्वदन्तेषु औकारमधोदन्तके ६३
अंकारं चैव जिह्वायां अःकारं तालुमध्यमे
एवं विधि क्रमेणैव विन्यसेत्षोडश स्वरान् ६४
कवर्गं दक्षिणे हस्ते चवर्गं वामहस्तके
टवर्गं दक्षिणे पादे तवर्गं वामपादके ६५
पफौ दक्षिणे पार्श्वे तु वामपार्श्वे बभौ न्यसेत्
नाभौ मकारं तस्योर्ध्वे यादिसान्तन्तु विन्यसेत् ६६
कक्षकुक्षौ त्रिकेन्यस्य हकारं हृदि विन्यसेत्
ळकारं गुदमूले तु क्षकारं गुह्यके न्यसेत् ६७
एवं विन्यस्य बीजानि शक्तिबीजं समुच्चरन्

शरीरान्ते ज तस्यान्ते तथैवं नन्दिकेश्वरः १५१
सप्तषड्वासनाकार्यं मनोवाक्कायकर्मसु
व्याप्यावृत्तिं करोत्येव तत्त्ववृत्तिं न मन्यते १५२
वासनाया विनाशेन शिवज्ञानं विशेषतः
नैवास्ति किञ्चित्कर्तव्यं वासनायुक्तकर्मसु १५३
वासना रागसंप्राप्तिरस्ति चेन्न स तत्त्ववित्
देशिकस्तत्वविज्ञानं ज्ञात्वा चैव प्रकाशकम् १५४
एवं तु तत्त्वज्ञानी स्यान्मूर्तितो मुक्त एव सः १५५
इति चिन्त्यशास्त्रे तत्त्वनिर्णयं अष्टत्रिंशत्पटलः

तत्त्वनिर्णयम्

अथ वक्ष्ये विशेषेण तत्त्वनिर्णयमुत्तमम्
आधाराधेयकं युक्तं कल्पना भावकं विदुः १
कल्पनारहितं तत्र सन्मार्गज्ञानमुत्तमम्
श्रीनन्दिकेश्वर उवाच
हे भगवन् किमाधेयं सम्यक् वक्तुं त्वमर्हसि २
श्री भगवानुवाच
आधारं गुदमित्याहुः स्वाधिष्ठानं तु गुह्यकम्
मणिपूरकं नाभि सत्व मनाहतं हृदयं तथा ३
विशुद्धिः कण्ठदेशे तु आज्ञा भ्रूमध्यमेव च
षडाधारमिति ज्ञेय धारयेत्तु षडक्षरम् ४
तत्तज्ज्योति स्वरूपेण भावयेत्तन्त्रवन्तकम्
शब्दादीनि प्रवर्तन्ते श्रोत्रादि स्थानके क्रमात् ५
वागादि स्थानके सम्यग्वचनादि प्रवर्तते
प्राणस्त्वपानो व्यानश्चोदानस्समान एव च ६
नागः कूर्मश्च कृकरो देवदत्तो धनञ्जयः

प्राणाख्याज्ञायते हंसे इडापिङ्गलमध्यमे ७
चरे शरीरे संरक्ष्यं मध्यस्थं प्राणपादनम्
तत्प्राणाज्ञायतेऽपानो अपानान्तं चरेत्क्रमात् ८
मूत्रादिन्विसृजेत्तत्र कायं रक्षतु प्राणवत्
अपानाज्ञायते व्यानः कृत्स्नं कायमवाप्य च ९
सरोमपुलकां कृत्वा स्पर्शज्ञानस्य कारणम्
तद्व्यानाज्ञायते दानः कण्ठादधः स्थितो भवेत् १०
विज्ञाप्य षड्रसं तत्र तस्य वार्तासु कारणम्
समानो जायते दाना कण्डादधः समीपतः ११
तत्र स्थित्वान्नपानादि तथाग्नौ जुहुयात्क्रमात्
प्राणार्गो नाग एवा दक्षिणो संस्थितो भवेत् १२
हिक्का कर्म प्रकुर्वीत नागास्तत्र प्रकीर्तिताः
उपानाशेत्कर्म एको नेत्रद्वय समाश्रितम् १३
निमिषोन्मिषाभ्यां वै नेत्रे द्वाभ्यां स रक्षति
व्यानाच्च कृकरस्तत्र नासिकाभ्यन्तरे स्थितः १४
क्षुतं तत्र प्रकुर्वीत कृकराख्यः प्रकीर्तितः
उदानाद्देवदत्तख्यः व्याप्य पृष्ठं च पार्श्वके १५
व्याप्य तत्रैव कायं च कुरुते गमनागमौ
धनञ्जयः समानांशः कायस्थूलनकंपकृत् १६
प्राणादि दशवायुस्तु सुक्षेपाद्वक्ष्यतेऽधुना
एतेषां चैव सर्वेषां मनोभेद इति स्मृतः १७
एतन्मात्रा मनोवृत्ति मनोऽहंकारजं भवेत्
बुद्धिस्सोऽप्यहङ्कारश्चित्तं च क्रमशो भवेत् १८
चतुष्कारणसंयुक्ते विषये हूयते क्रमात्
विषयान्जनते येन तस्मात्तस्य तु लक्षणम् १९
शून्यचित्तविनिर्मुक्तमन्तरात्मा तथैव च

सुख चैतन्यमेवं तु परमात्मान लक्षणम् २०
लक्ष्यलक्षणनिर्मुक्तचिन्त्याचिन्त्यविवर्जितम्
द्वैताद्वैतविनिर्मुक्तं चिन्त्या चिन्त्य विवर्जितम् २१
द्वैताद्वैतविनिर्मुक्तं तत्त्वमित्थं गुरोर्मुखात् २२
तत्त्वनिर्णयमेवोक्तं शृणु सन्मार्गलक्षणम्
इति चिन्त्यशास्त्रे तत्त्वनिर्णय एकोनचत्वारिंशत्पटलः

सन्मार्गम्

अथ वक्ष्ये विशेषेण सन्मार्गचक्रमुत्तमम्
मण्डलं चाद्य भवनं चक्रपर्यायवाचकम् १
भूमिशुद्धिं पुरा कृत्वा कुट्टिमोच्चाङ्गुलाङ्गुलम्
त्रिहस्तविस्तृतं प्रोक्तं दर्पणोदरसन्निभम् २
गोमयेनोपलिप्याथ प्रोक्षयेद्धृदयेन तु
तच्चक्रं पद्मसंकाशं कर्णिकाकेसरान्वितम् ३
दलं पञ्चविधिज्ञेयं मृदुवृत्तसमायुतम्
पञ्चदशशतं स्यात्तु दलं संख्याक्रमेण वै ४
पञ्चविंशच्चतुर्विंशत्रिविंशद्वयविंशकम्
त्रिसप्तकं तु विज्ञेयं बाह्यादि क्रममेव हि ५
कर्णिकोपरि बीजानां भूतसंख्या प्रकीर्तितम्
भूतादिज्ञानपर्यन्तं देवतैस्सह वक्ष्यते ६
यत्कठिननं तत्पृथिवी यद्द्रवोऽप्याय उच्यते
यदुष्णयुक्तं तद्वह्नि वायुस्सञ्चरतिर्वतने ७
यत्सोषियुक्तं आकाशं महाभूतगणास्ततः
अस्थि त्वङ्मांसकायाश्च नाडयस्तु परिकीर्तिताः ८
पृथिव्यंशास्तथा ज्ञेयास्त्वम्बांशानि ततश्शृणु
मूत्रशोणितभेदाश्च मज्जा शुक्लं तथैव च ९

जलांशमिति विज्ञेयं सर्वप्राणिषु संस्थितम्
क्षुधा तृष्णा च निद्रा च आलस्यं मैथुनं तथा १०
एते पञ्च गुणाः प्रोक्तास्तेजसोंशा इति स्मृताः
आस्ते शेतेऽध्वगमनं प्रसारणं निरोधनम् ११
इति पञ्च पशूनां वै वायोरंशाः प्रकीर्तिताः
लज्ञा क्रोधा लोभश्च भयो क्रोधस्तथैव च १२
इति पञ्चगुणाश्चैव व्योमांश्च प्रकीर्तिताः
प्रोक्तं भूतगणास्त्वेवं गुणं त्वेषां तु पञ्चकम् १३
व्योम श्रोत्रं त्वक्च वायो स्यादक्षाग्नय्प्सु जिह्विका
घ्राणो भू शब्द आकाशो वायो स्पर्शाग्निरूपकम् १४
रसोऽप्सु पृथिव्यां गन्ध एकद्वित्रिचतुश्शराः
आकाशादिषु वर्तन्ते पृथिव्या चैव पाणिकाः १५
पादोऽग्नौ वायुवाक्चैव सोपस्थौ गमनं भवेत्
पृथिव्यां वचनमादानमप्सुग्नौ गमां भवेत् १६
वायौ विसर्ग आनन्दो मनो भूमौ जले तु धीः
अहङ्कारो नलैर्यन्तु चित्ताख्यं वायुसम्भवम् १७
आत्मानुभवविज्ञेयं पञ्चभूतिक विस्तरम्
एतत्प्राकृतमुत्सृज्य शिवोऽहमिति भावयेत् १८
अथवान्यक्रमो भावो ह्यहं ब्रह्मेति कथ्यते
पञ्च शक्त्यात्मिकाशक्तिर्देवतां पञ्चमूर्तयः १९
पृथ्व्यिा ब्रह्म अपां विष्णुरग्रे रुद्र इति स्मृतः
वायोर्महेश्वरश्चैव आकाशस्य सदाशिवः २०
सरस्वती श्रीर्भवानि तथा गौरी मनोन्मनी
पदमेकद्वयोर्मध्ये पञ्चमूर्तिः प्रकाशते २१
पीतं शुक्लं तथा रक्तं कृष्णं धूम्रं च वर्णकम्
ब्रह्मादीनां च वर्णानि भावयेन्मण्डलोपरि २२

चतुरश्रं अर्धचन्द्रं च त्रिकोणं च षडश्रकम्
सुवृत्तमिति विज्ञेयं मणडलाकृतयः क्रमात्
ल व र य ह कारं तु ब्रह्मादीनां तु बीजकम् २३
तद्बीज सम्भवादेव देवता योगतस्सुखः
बीजानामधिपश्चन्द्रश्चन्द्रो बिन्दुस्वरूपकः २४
बिन्दुर्नादश्च शक्तिश्च परश्चैव परात्परम्
पञ्चज्ञानप्रदेशा हि ब्रह्मादीनां विशुद्धये २५
अभेदलयमेरेयमेरेयमुभयात्मकम्
इदं पञ्चविधं लद्दयं स परानन्दसाधनम् २६
विसूर्मिश्च विचित्रश्च विरतिश्च विपातकम्
विलद्वणं च पञ्चैते द्वणभूतं विनिर्दिशेत् २७
निद्रासौख्यं सुतानन्दं सुरतानन्दमेव च
परं परात्परानन्दं पञ्चानन्दं विभावयेत् २८
त्रिमात्रं च द्विमात्रं च एकमात्रं तथैव च
अर्धमात्रं परं सूद्दमं तस्यार्धं तु परात्परम् २९
मात्रादैर्घ्यं भवेत्स्थूलं मात्रासूद्दमं महोदयम्
एतदभ्यासयोगेन सदोयमणिडतं ---- ३०
सहजज्ञानमेवं तु स्मरणं सर्वसिद्धिदम्
जन्मनीं चैव सन्मार्गो निस्सन्देहः प्रवर्तते ३१
इति चिन्त्यशास्त्रे सहस्रग्रन्थे सन्मार्गचक्र चत्वारिंशत्पटलः

समाधि

समाधिमधुना वद्दये सर्वद्वन्द्वविवर्जितम्
ज्ञानमेव समाधिः स्यात्तत्त्वशुद्धिस्तथोच्यते १
जाग्रत्स्वप्नसुषुप्तिश्च तत्सम्बन्धमनित्यतः
एतत्तुरीयातीतं तु आत्मनो नित्यमेव हि २

जाग्रादि द्विविधं ज्ञेयं भवमोक्षगतं मतम्
सन्मार्गमध्यमं ज्ञेयं भवमार्गमधो भवेत् ३
तत्तु कर्मानुसारेण जाग्राद्यधोमुखं भवेत्
मुखं जाग्रमिति ज्ञेयं तस्मात्स्वप्नं हृदन्तकम् ४
हृदयादि समारभ्य नाभ्यतं तु सुषुप्तिकम्
तस्मादधस्तुरीयं तु तुर्यातीतं तु लिङ्गकम् ५
जाग्रादिस्थानमेवं हि प्रवर्तकमिहोच्यते
श्रोत्रत्वक् चक्षुजिह्वा च घ्राणं चैव तु पञ्चमम् ६
शब्दस्पर्शश्च रूपश्च रसोगन्धश्च पञ्चकम्
वाक्पाणिपादपायुश्च उपस्थं चैव पञ्चकम् ७
वचनादानगमनविसर्गानन्दपञ्चकम्
प्राणस्त्वपानो व्यानश्च उदानस्समान एव च ८
नागः कूर्मश्च कृकरो देवदत्तो धनञ्जयः
मनोबुद्धिरहङ्कारश्चित्तं क्षेत्रज्ञ एव च ९
पञ्चत्रिंशति वर्तन्ते जाग्रे तानि विनिर्दिशेत्
शब्दादि विषयादीनि प्राणादीनि मनादिकम् १०
एते चरन्ति वै स्वप्ने शेषाण्येव तु वर्जयेत्
जाग्रेद्विषयभुक्तिश्च प्रतिभा स्वप्न एव च ११
अयसोऽग्निसमायोगा वियोगेऽग्निरिवायसम्
तद्वच्चैतन्ययोगश्च वियोगकरणान्वितम्
प्राणयुक्तो मनश्चैव क्षेत्रज्ञश्च सुषुप्तिकम् १२
आत्मा प्राणस्तुरीयं तु तुर्यातीतं तु सर्वगम्
किन्तु गुह्यमिदं वक्ष्ये शृणु त्वं नन्दिकेश्वर १३
आत्मनो विषयो भोक्तुं प्रकृतिस्तस्य वर्धनम्
प्रकृत्या नियमानस्य सावस्था जाग्रदुच्यते १४
विना करणदेहानां व्यापारैरात्मनः क्वचित्

प्रवृत्तिर्मनसः स्वप्नस्तत्वभावेषु केवलम् १५
स्व स्वद्विषय संभोगस्वेदखिन्नेयमात्मनि
मनः प्रकृतिनिश्चेष्टा सुषुप्तिर्नन्दिकेश्वर १६
मनोव्यापारहीने तु चित्तभूतिगमागमे
तुरीयत्वं परावस्था तुरीयादि निरञ्जनम् १७
दृष्टदर्शनदृश्यानां नष्टे यो दृष्टदर्शयोः
स्वसंवेद्यंवेद्यं परं ज्योति ज्ञप्तिरूपो महत्प्रभुः १८
स्थूलसूक्ष्मसु सूक्ष्मं च अतिसूक्ष्मं तदाधिकम्
स्थूलं जाग्रामिति ज्ञेयं सूक्ष्मं स्वप्नमिहोच्यते १९
सुषुप्तिस्तु सुसूक्ष्मं स्यात् अतिसूक्ष्मं तुरीयकम्
अधिकं तुरियातीतं एवं पञ्चविधं स्मृतम् २०
स्वप्नं चैव सुषुप्तिश्च तुर्यं चाधिकमेव च
जाग्रास्थाने प्रदृश्यन्ते योगमभ्यस्यतः क्रमात् २१
जाग्रे च दृश्यवृत्तिस्तु प्रत्याहारेण शाम्यति
धारणायां त्यजेत्स्वप्नं ध्यानेनैव सुषुप्तिकम् २२
समाधिना तुरीयं तु तुर्यातीतं शिवेन तु
जाग्रादि पञ्चावस्थायामतीतज्ञानरूपकम् २३
सद्गुरोरुपदेशेन स्वप्रकाशेन निश्चयः
एवं ज्ञात्वा विशेषेण समाधिं कारयेद्बुधः २४
रूपशून्यमिति ज्ञेयं समाधिरभिधीयते
चित्तशुद्धिं स्थिरीकृत्वा शिवलक्षणमेव हि २५
आनन्दशिवयोगस्तु शिवयोगं सदाभ्यसेत्
आनन्दो ब्रह्ममितिज्ञेयं जायते स्माच्चयमा चिरम् २६
आनन्दाद्वर्धति तद्वा तस्मादानन्दमुच्यते
स्वरूपरहितं शून्यं न वर्णावर्णभावितम् २७
ज्ञानादिरहितं बुद्धिश्चित्ताहङ्कारनाशनम्

भावनाशः परामुक्तिर्यत्तत्संसारनाशनम्
चिन्तया रहितं यच्च तन्नाशानमुक्तिरेव हि २८
आनन्दान्तर्गता मुक्ताः केचिदानन्द एव हि
आनन्दो ब्रह्म एवेति शिववाक्यश्रुतिक्रमात् ३०
आनन्दानन्द इत्युक्तं त्रैलोक्यं ज्ञानरूपकम्
योगं वक्ष्येऽन्यरूपं तु रूपयोगमरूपकम् ३१
अरूपरूपनाशं तु रूपयोगं सुदर्शनम्
सुदर्शनस्पृशेल्लिङ्गं स्पर्शलक्षणमारभेत् ३२

इति चिन्त्यशास्त्रे समाधिलक्षण एकचत्वारिंशत्पटलः

समाधिराजन्

अथ वक्ष्ये विशेषेण समाधिराजमुत्तमम्
सन्ध्याकालेऽथवा काले सन्ध्यावन्दनपूर्वकम् १
लिङ्गार्चनस्य काले तु लिङ्गार्चनमथाचरेत्
पश्चाद्योगं समभ्यस्य तत्काले योगमेव तु २
योगिभिस्सर्वकालं स्याच्चन्द्रस्याङ्कं स्वनाशनम्
गुरोस्समीपदेशे तु वसेद्योगीसमीपतः ३
सद्गुणोपेतशिष्येण सहितो वासमाचरेत्
सन्तानिकेन सहितो लिङ्गार्चनयुतेन च ४
समाधिमभ्यस्यादायाद्योगी द्विविधिनाद्व्यधिकं यदिति
सहायो लिङ्गपूजां चाचार्यस्यावियोगिता ५
शौचमाचमनं चैव प्रथमं च द्वितीयकम्
आसनं च तृतीयं च चोत्तराभिमुखस्थितिः ६
चतुर्थं भस्मना स्नानं पञ्चमं रसभस्मकम्
षष्ठं रुद्राक्षमालाभिरुपवीतादि भूषणम् ७

सप्तमं तु गुरुध्यानमष्टमं नाभिशोधनम्
नवमं दहनं चैव दशमं प्लावनं तथा ८
एकादशं प्राणायामं सन्यासं द्वादशं भवेत्
मन्त्रन्यासं तु नन्दीश षडङ्गन्यासपूर्वकम् ९
त्रयोदशं नाडिसंधानं सुषुम्ना च चतुर्दश
मूलाधारं पञ्चदशं षोडशं ब्रह्मनाडि वै १०
अधिष्ठानं सप्तदशमष्टादशं मणिपूरकम्
एकोनविंशद्धृदयं विंशं चैव विशुद्धिकम् ११
एकविंशच्च वा भूमिर्ज्ञानदेशमतः परम्
त्रयोविंशच्चन्द्रबिम्बं च चतुर्विंशं शिवपरम् १२
स्थाणुलिङ्गं पञ्चविंशत् समाधिस्तदनन्तरम्
आनन्दं सप्तविंशच्च तद्भेदं च ततः शृणु १३
पूर्वोक्तं च विना त्वस्य रत्नगर्भ शृणुष्व तत्
शिवाख्यं गुरुरूपं तु भावयेत्तु प्रयत्नतः १४
रूपं च रूपवक्त्रं च आनन्दं गुरुरेव हि
प्रभावाद्वहते यस्तु सर्वदोषनिबर्हणम् १५
मन्त्रध्यानं प्रकुर्वीत सदाशिववपुःस्वयम्
दद्याच्छिवमयं रूपं शिष्यो ध्यायन्समाहितः १६
तत्तत्परतरं ज्ञेयं शिवाख्यं गुरुरूपकम्
एवं ध्यात्वा सदायोगी निश्चलेन समाहितः १७
निवृत्तिं च प्रतिष्ठां च विद्यां शान्तिं तथैव च
शान्त्यतीतां क्रियां शक्तिं ज्ञानशक्तिं तथैव च १८
इच्छाशक्तिं पराशक्तिं नवाधारेषु भावयेत्
आत्मतत्त्वं च विद्यां च शिवतत्त्वमनन्तरम् १९
महेश्वरं च सादाख्यं बिन्दुं च तदनन्तरम्
नादं तु शक्ति शान्तं च क्रमादेतानि भावयेत् २०

सरस्वतीं च गौरीं च लक्ष्मीं चैव भवानिकाम्
मनोन्मनीं च पूर्वोक्तां पश्चादेताश्च भावयेत् २१
सृष्ट्यादि सकला भूमौ अवधिं दश वारुणाः
तामसी मोहिनीत्यादि दश वा द्विकलाः स्मृताः २२
हृदि पादादिकां चैव भवेद्वायोश्चतुष्टयम्
रौरवाश्च दशान्तं च तापिन्यादि कलाः स्मरन् २३
शुद्धिकान्या व्योमकला शुद्धिश्शैवीं च भावयेत्
तत्र वामादि नवकं ध्यायेद्वै नन्दिकेश्वर २४
बिन्दुस्थाने तु जीविन्याद्याश्च षोडश भावयेत्
आज्ञास्थानेऽनया युक्ते कलाषोडशकं स्मरेत् २५
आनन्दिनी महानन्दीत्यादि सम्भावयेत्क्रमात्
चन्द्रस्थानेऽमृतता नादपष्पाश्च षोडश २६
रतिप्रीत्यादिनवकं तस्य मध्ये तु भावयेत्
मूलाधारे वसन्ताद्यास्तदूर्ध्वे बालषरामुखम् २७
ड फ पदाक्षरं चैव कराठान्तद्वादशं भवेत्
अकारादि क्षकारान्तं कर्णदेशे च पूर्ववत् २८
ह क्षवर्णद्वयं चापि तालुमूले विभावयेत्
स्वरांस्तत्रैव भ्रूमध्ये चन्द्रबिम्बे तु षोडश २९
एवं क्रमेण सञ्चिन्त्य प्रत्येकं षोडश स्वरान्
वाङ्मनोतीत मन्त्रैश्च ब्रह्मरन्ध्रं च भावयेत् ३०
मूलाधारं गुदं प्रोक्तं आधेयं परमं विदुः
हंसमन्त्रसमायुक्तं शक्तिबीज समन्वितम् ३१
प्रासादं च तदूर्ध्वे तु सञ्चिन्त्य तदनन्तरम्
अधिष्ठाने च प्रणवं नाभौ चिन्तमणिर्भवेत् ३२
मृत्युञ्जयं च हृदये शिवमन्त्रं च बिन्दुके
त्रिब्रह्मरूप ताल्वादि त्रिस्थानेषु च भावयेत् ३३

शिवबीजं तदूर्ध्वे तु शक्तिबीजं तु भावयेत्
न शिवेन विना शक्तिर्न शक्तिरहितश्शिवः ३४
स्थानं प्रति च यत्प्रोक्तं तेजोरूपं च भावयेत्
सकलीकृत्य च ध्यायेच्छिवयोगी सुनिर्मलः ३५
साधेयमेवं प्रोक्तं स्यात् ज्ञानदेशं तथोच्यते
ज्ञानदेशं तु ज्ञानाति त्रिदशैरपि दुर्लभम् ३६
नेत्रमध्ये ततश्चित्तं स्वकीयं सन्निवेशयेत्
सन्निवेश्य ततस्तिष्ठेदेकचित्तः प्रसन्नधीः ३७
ज्योतिराकारमेवं तु यावदास्ते प्रयत्नतः
तावन्निगत्य भूतात्मा देहादूर्ध्वे व्यवस्थितः ३८
पश्यते च जगत्कृत्स्नं स्वकायस्योपरि स्थितम्
सप्तलोकांश्च तत्रैव पश्यते योगचक्षुषा ३९
ज्ञानदेशस्य सार्धं तु स्थाणुलिङ्गं प्रकीर्तितम्
मूलाधारं समारभ्य ब्रह्मरन्ध्रावसानकम् ४०
समस्ततेजसां तेजः प्रदाने च प्रवीणकम्
षट्त्रिंशत्तत्त्वविज्ञानं तत्त्वनामादिकं स्वयम् ४१
अप्रमेयमसादृश्यं परं धाम महोदयम्
शान्तं तत्त्वमयं चैव तत्तत्त्वं जीवरूपकम् ४२
चिद्घनं सर्वगं सूक्ष्ममानन्दमचलं ध्रुवम्
विश्वाक्षं सर्वतो वक्त्रं सर्वाक्षं सर्व बाहुकम् ४३
सर्वस्पर्शं सर्वपादं सर्वशीर्षं सदोदयम्
सर्वज्ञानं सर्वकार्यं परं परतरं शिवम् ४४
बिन्दुस्तन्तुनिभं ज्योतिर्भावयेद्योगसत्तमः
कुण्डली जगदाधारः प्रथुनामर्धरूपिणी ४५
ज्योतिरूपान्नाद नाद नाद शक्तियुता वरः
नवकूटाक्षरेणैव ब्रह्मरन्ध्रान्तमुच्यते ४६

नीवारशूकवत्तन्वी पिङ्गरूपा तथैव च
तत्तदाधार पद्मानि सुभीत्या ब्रह्मरन्ध्रगाः ४७
अम्बुजं मुकुलं चैव तद्बोध्यामृतधारया
कलिन्दी च शिवं तत्र पूजयन्ती च कुण्डली ४८
क्रमुकादूर्ध्वदधश्चैव प्लावयन्ती च भावयेत्
कुर्यान्निपद्मचैतन्यं कर्तव्यमध योजयेत् ४९
एवं ध्यात्वा समाध्यन्तं कदा तत्रैव च चिन्तयेत्
समाधिर्वक्ष्यते सूक्ष्मो ह्याधाराधेयवर्जितम् ५०
जलान्तरगते रश्मौ ह्यणीयो दृश्यते रजः
तत्परं परमाणूनां परिमाणं प्रचक्षते ५१
रूपाणां चैव सर्वेषां परिमाण समूहकम्
एकैकं तु व्यपोह्यं तु कस्मिन् चित्तं नयेत्तदा ५२
शिवशक्त्यात्मकं सर्वं ज्ञानस्थाने लयं नयेत्
निरालम्बे मनस्तस्मिन् शैवं तेजश्च दृश्यते ५३
शिवबिम्बस्य तन्मध्ये मनोन्मीलितलोचनः
क्रमेणैवाग्रबलतः शैवज्योतिश्च दृश्यते ५४
अनाहते सुतच्छून्ये सुखितं च गतात्मनः
आद्यन्तशून्यरहितः शिवतेजः प्रकाशते ५५
प्रासादपञ्चनादेन प्लुतमुच्चारयेत्क्रमात्
ध्यातव्यं तु पराशक्त्या शान्त्यतीता प्रकाशते ५६
चक्रद्विषट्के सावर्ते नाभो दिष्वङ्गमुत्सरैः
स्थलादि क्रमशो मुक्तेष्वन्तं तस्यां मनोदयः ५७
चापल्यादि घ्नते हृद्यैः क्रमाद्दीर्घैर्निवेशितः
अन्येन विषयश्चैतत्तुल्लये लीयते शिवे ५८
द्वादशान्ते च हृदये घट्टनात्प्राणवायुना
दिनेऽन्यो भाविते योगे सर्वानन्दत्वमश्नुते ५९

अाधारे वापि शक्तौ वा प्रोन्यास्मिन्नात्मनो लये
शक्त्याभीष्टस्य कंपादि क्षेपशान्तौ परस्थितः ६०
अाशिरः प्राणमापूर्य ब्रह्मनाड्यवसानकम्
सविकल्पस्सदा योगात् परा शान्तिः शिवो भवेत् ६१
सूक्ष्मक्रमोत् क्रमं शान्तिमामूलात् ज्योतिरूपिणम्
ब्रह्मरन्ध्रे प्रशान्त्यन्तं ध्यायेत्तस्य शिवोदयः ६२
त्रिकुण्डलानष्टवक्त्रानारुह्योद्बोधना रुजम्
शक्तिकोशत्रयं भित्त्वा खेचरस्य तदूर्ध्वकम् ६३
महाश्रुतिगते व्योम्नि चन्द्रार्कादेर्निरम्बुदे
संयम्य चक्षुरेकाग्रयो योगी पश्येत्स्वयं नभः ६४
शिवेकाख्य वनौषध्यागादो बद्धो मनो रसः
स्तम्भकुम्भादिसंक्षिप्तं कुर्याच्छिवसुकाञ्चनम् ६५
अध्यानं च समादाय स्थित्वा भुवि विशिष्यते
अानन्दश्च भवेद्योगी सर्वदा नन्दिकेश्वर ६६
अणिमाद्यष्टसिद्धिश्च सिद्ध्यत्येव न संशयः
अाकाशगमनादीनि सर्वज्ञानसमृद्धयः ६७
भवन्ति सर्वभुवनं करामलकवद्वदेत्
योगदृष्ट्या तु सकलं पश्यते नु चराचरम् ६८
येषां वृष्टिनारानन्दं अानन्दं भवति ध्रुवम्
अानन्दलक्षणं वक्ष्ये शृणु त्वं नन्दिकेश्वरः ६९
दाराणां पुत्र संप्रोक्तं अपरं परमित्यपि
अपरं जीवितं प्रोक्तं मोहजीवितसंज्ञकम् ७०
लोकं च बीभदेवं च मोहानन्दमथोच्यते
दाराणां पुत्र पौत्रादि लब्ध्वा चानन्दनो जनः ७१
भक्ष्यभोज्यादिजनितं जीवितानन्दसंज्ञकम्
स्तुतिकीर्त्युदितानन्दं लौकीकानन्दमुच्यते ७२

सकलानां च सर्वेषां मोहानन्दस्थितं परम्
एतत्कारणरूपं तु प्रियाङ्गं लक्षणान्वितम् ७३
उत्तमं षोडशांशं स्यात् चतुर्विंशति मध्यमम्
द्वाविंशं त्वधमं ज्ञेयं शक्तिलक्षणसंयुतम् ७४
पञ्चविंशतिरानन्दमपरानन्दजं भवेत्
सर्वावयव संपूर्णं सर्वलक्षणसंयुता
सर्व शोभन संयुक्ता गुणशील समन्विता ७५
सर्वाभरण संयुक्ता सर्व गन्धानुलेपना
सुगन्ध पुष्प संयुक्ता प्रसन्नवदना सदा ७६
नाना लक्षण संयुक्ता क्षणवेदकरा परा
मोहानन्दस्य मूलं च जीविताद्याश्च लब्धवात् ७७
अपादेनन्दसंप्रतिस्सिद्धिरत्यैव चोच्यते
शब्दस्पर्शं च रूपं च रसो गन्धश्च पञ्चमः ७८
एकैक पञ्चधा ज्ञेया शब्दं पञ्चकमुच्यते
प्रियाणां गुप्तवचनं संयोग श्रवणं भवेत् ७९
गन्धश्छोद्याहतं तस्य श्रवणं च तदुद्भवम्
मितं च रागजनकं स्वात्मस्तुतिरतो भवेत् ८०
शब्दपञ्चकमेवं हि स्पर्श पञ्चकमुच्यते
प्रियाया स्पर्शनं चैव पुत्र सप्तं तथैव च ८१
सुहृदालिङ्गनं चैव गन्धवाह --- श्मितम्
यथेष्टकालशीतोष्ण स्पर्शनं चैव तु पञ्चकम् ८२
प्रियदर्शनमेवं तु प्रियां वीक्ष्या दिगम्बरम्
नृत्तादि दर्शनं चैव स्व हिरण्यादि दर्शनाम् ८३
पित्रादि दर्शनं चैव स्पर्शपञ्चकमीरितम्
भक्ष्यं भोज्यं च लेह्यं च पेर्हियं शोष्य पञ्चधा ८४
रसपञ्चकमेवं स्यात् रसकाले समुद्भवम्

मदगन्धञ्चोमञ्चामञ्च चन्दनादि सुगन्धकम् ८५
पुष्पगन्ध सुधाघ्राण ---- पञ्चकमुच्यते
रागं वर्धति मूर्खाणां रागमुञ्चति पण्डिताः ८६
समुपाय समोपेतं क्रीडान् सर्पैर्न दृश्यते
ज्ञानयोग समायुक्तस्तत्वादीय पञ्चगैः ८७
पञ्चविंशतिरानन्दं अपरानन्दजं भवेत्
एवं बुध्यस्व नन्दीश परानन्दमथोच्यते ८८
त्रिविधं तत्परानन्दं मोक्षकारणकं भवेत्
एतत्रयं परानन्द मोक्षकारणकं भवेत् ८९
अगम श्रवणाज्ञानां गुरोस्तुतिपरं तथा
गुरो प्रियवचश्रावमुपतेश शतं तथा ९०
एवं पञ्चकसंयुक्तं श्रवणानन्दजं भवेत्
लिङ्गस्पर्शनकं चैव भूत्यादि स्पर्शनं तथा ९१
गुरुपादाम्बुजं दृष्ट्वा गुरोस्संस्पर्शनं तथा
ज्ञानदेशस्य संस्पर्शः स्पर्शपञ्चकमीरितम् ९२
दर्शनं शिव लिङ्गस्य शिवयज्ञादि दर्शनम्
योगदृष्ट्यावलोकं च रूपपञ्चकसम्भवम् ९३
गुरुप्रसादभक्ष्यादि गुरुपादाब्जजं जलम्
योगामृतरसास्वादं त्रिविधं रसमुच्यते ९४
योगात्समुत्थितं गन्धं दिव्यगन्धमनौपमम्
ब्रह्मेन्द्रादिसुराणां च सर्वेषां जन्मकोटिभिः ९५
अलब्धं मोक्षदं दिव्यं बोधानन्दमवाच्यकम्
कदा किञ्चिन्नकस्यापि दत्तवान् विदिशस्थिताम् ९६
तत्स्मृत्वा जननी व्यालं परमानन्दजं परम्
एवं परात्परं ज्ञेयं वर्जनायीतभोजनम् ९७
एतानि स्थूलसूक्ष्माणि सुसूक्ष्माणि भवन्ति वै

परात्परतं गुह्यं ग्राह्यग्राहकवर्जितम् ९८
रागारागविनिर्मुक्तं द्वैताद्वैतविवर्जितम्
चिन्त्याचिन्त्यविनिर्मुक्तं वाच्यवाचकवर्जितम् ९९
एवमानन्दसंप्राप्तौ मुक्तिरेव न संशयः
गुरुवक्त्रेण तत्सिद्धिरानन्दस्तु न संशयः १००
आनन्दं भावयेद्योगी सर्वक्लेशनिबर्हणम्

इति चिन्त्यशास्त्रे सहस्त्रग्रन्थे सादाख्यमखि समाधिराज
द्विचत्वारिंशत्पटलः

स्थूपि स्थापनम्

अथ वक्ष्ये विशेषेण मूर्तीनामष्टविधं परम्
शिखरस्तु शिला हर्म्ये इष्टिकाष्टविधं चैव १
दारुभिर्दारुहर्म्ये तु कथितः शुभमिष्यमिति
एकाद्यनेक भूमानां हर्म्याणां तु विशेषतः २
प्रासादस्याग्र ईशे च सौम्ये च वायुगोचरे
नवाष्ट सप्तकं पञ्च हस्तं वा --- मण्डपहस्तकम् ३
तद्विस्तारं समायामं चतुरश्रं समं गुरु
मण्टपं वा प्रपां वाथ षोडश स्तम्भ संयुतम् ४
चतुर्द्वारसमायुक्तं चतुस्तोरण संयुतम् ५
तरङ्ग वेष्टनं चैव वितानध्वजसमायुतम्
मुक्ता सृत् मालादिभिरलंकृत्य विशेषतः ६
मण्टपस्य त्रिभागैकं मध्यभागे तु वेदिका
वेदाङ्गुलोन्नतं वेदि उपवेदि स्युगाश्रयम् ७
शेषवेदि विशालं तु अङ्गुलं भानुमात्मकम्
भानुद्वयाङ्गुलोच्छ्रं तु दर्पणोदर सन्निभम् ८
महेश स्वग्निकुण्डानि चतुरश्राणि कल्पयेत्

दुःस्वप्ने दुर्जनस्पर्शे रुद्रवेश्मनि भोजने ।

इति कालोत्तरे पञ्चगव्यपटलः षष्टितमः ॥ ६० ॥

॥ श्रीः ॥

ईश्वर उवाच-

सर्वज्ञता तृप्तिरनादि बोधः स्वतन्त्रता नित्यमलुप्तशक्तिः ।
अनन्तशक्तिश्च विभोर्विधिज्ञाः षडाहुरेताश्च महेश्वरस्य ॥ १ ॥

वज्रकवाटस्य विधि प्रवक्ष्याम्यनुपूर्वतः ।
मृत्युञ्जयपरं ह्येतत्सूक्ष्मात्सूक्ष्मतरं परम् ॥ २ ॥

p. 319)

गुह्याद्गुह्यतरं गुह्यं गृहीतव्यं प्रयत्नतः ।
नाख्यातं ब्रह्मणे पूर्वं नाख्यातं विष्णवेपि च ॥ ३ ॥

नाख्यातं सर्वदेवानां नाख्यातं स्वसुताय च ।
वज्रकवाटोपदेशं नाख्यातं यस्य कस्यचित् ॥ ४ ॥

तव स्नेहान्मया दिव्यं उपदेशं परं महत् ।
धाताखगपतिद्वयं कवाटस्तम्भ उच्यते ॥ ५ ॥

ऊर्ध्वोत्तरं गणनाथं यतोत्तरं वृषभमुच्यते ।
योनिभ्रमरो वत्स ते कौलौ परिकीर्तितौ ॥ ६ ॥

काख्यामूकाश्चतुर्थं तु जगद्धयोनिलमूर्ध्वसौ ।
विष्णुरुद्रशिखाक्रान्तं कवाटं वामनासके ॥ ७ ॥

पटकोशं प्रवक्ष्यामि सांप्रतं शृणु षण्मुख ।
षोडशं पञ्चपुटकोशौ प्रकीर्तितौ ॥ ८ ॥

बिन्दुनादं च सहितं विसर्गादिमुदाहृतम् ।
सविसर्गं विजानीयात्कोशमन्तः प्रकीर्तितम् ॥ ९ ॥

हरस्य मे तदाख्यातं एकवक्रं कवाटकम् ।
भद्रकालीं परं बीजं दक्षिणस्तम्भ उच्यते ॥ १० ॥

रौद्री काली परं बीजं वामस्तम्भमुदाहृतम् ।
जपाकुसुम सप्रख्यं दक्षिणस्तम्भमुच्यते ॥ ११ ॥

विद्युत्पतनसंकाशं वामस्तम्भमुदाहृतम् ।
प्रथमं दक्षिणस्तम्भं तुषाररजतप्रभम् ॥ १२ ॥

प्रथमं सव्य * * * किञ्जल्क सदृशप्रभम्।

द्रुतजाम्बूनदप्रख्यं वज्रकवाटवर्णकम्॥ १३॥

p. 320)

पुटं किञ्जल्कसंकाशं कोशं पञ्चदलप्रभम्।

काश्मीरसदृशप्रख्यं योनिबीजस्य वर्णकम्॥ १४॥

भ्रमरं बीजवर्णं तु भ्रमरं सदृशप्रभम्।

द्वितीयं दक्षिणस्तम्भ महारजतसप्रभम्॥ १५॥

द्वितीययोनि भ्रमरं बीजं स्वर्णमिहोच्यते।

सन्ध्याम्बदनिभप्रख्यं योनिबीजं मुदाहृतम्॥ १६॥

भ्रमरबीजमिदं वत्स शुद्धचामीकरप्रभम्।

पुटवर्णं पावकनिभं जपानिभं कोशमुच्यते॥ १७॥

व * * * रमाख्यातं वामनासापुटे त्विह।

दक्षिणे दक्षिणे नासापुटे तु वज्रकवाटमुच्यते॥ १८॥

इडा च पिङ्गला चैव प्रोक्तं वज्रकवाटकम्।

सुषुम्नाकवाटं वक्ष्यामि मृत्युनाशनमुत्तमम्॥ १९॥

सुषिरं गृह्यं महासेन एकारस्वरसंयुतम् ।
बिन्दुमस्तकमाक्रान्तं वामस्तम्भमुदाहृतम् ॥ २० ॥

पुनर्वै सुषिरं गृह्य एकारस्वर संयुतम् ।
बिन्दुमस्तकमाक्रान्तं दक्षिणस्तम्भमेव हि ॥ २१ ॥

त्रयोदशेन संयुक्तं बिन्दुमस्तकभूषितम् ।
स्वबीजेन महासेन ऊर्ध्वोत्तरमुदाहृतम् ॥ २२ ॥

गगनत्रयोदशान्तं च बिन्दुमूर्तिविभूषितम् ।
अथोत्तरं विजानीयात्प्रयत्नेन तु कारयेत् ॥ २३ ॥

श्वेतं कृष्णं तथा रक्तं हरितं वर्णमेव हि ।
भवशर्वतथेशान पशुपतिर्नामदेवता ॥ २४ ॥

p. 321)

रुद्रो देवस्तथा भीमो महादेवः सदाशिवः ।
इडायामधिदैवं हि प्रोक्तं वज्रकवाटके ॥ २५ ॥

महादेवो हरोरुद्रः शंकरो नीललोहितः ।
शूलपाणिः कृत्तिवासाः कपर्दी मेघवाहनः ॥ २६ ॥

पिङ्गलायाधिदेवं हि मया प्रोक्तं षडानन ।
गङ्गाधरो विरुपाक्षो नीलग्रीवो वृषध्वजः ॥ २७ ॥

श्रीकण्ठो नीलकण्ठश्च कालकण्ठः कपालधृत् ।
उमापतिश्च नवमः सुषुम्नावज्रशिष्टके ॥ २८ ॥

चतुर्थं च तृतीयं च मायानलसमन्वितम् ।
पिङ्गलावज्रकवाटं रहस्यमिदमुत्तमम् ॥ २९ ॥

गोक्षीरसदृशप्रख्यं शुद्धस्फटिकसन्निभम् ।
महेश वरदं ह्येतद्रहस्यं वज्रकवाटकम् ॥ ३० ॥

कुब्जकान्तं चतुर्थं संवर्तदग्निमथोयुतम् ।
मायोर्ध्वं तु संस्थितं च बिन्दुनादसमन्वितम् ॥ ३१ ॥

गान्धार्या वज्रकवाटं तु तवस्नेहात्प्रकाशितम् ।
त्रयोदशं वामस्तम्भं शक्रचापसमप्रभम् ॥ ३२ ॥

कुब्जकन्तु द्वितीयं तु दक्षिणं स्तम्भमेव हि ।
सन्ध्याम्बुद समप्रख्यमीषच्छशि समप्रभम् ॥ ३३ ॥

योनिमण्डनिभं पञ्च पञ्चमस्वरमेव हि ।

भ्रमरं षष्ठमेवं तु तव पोर(ट?) समप्रभम्॥ ३४॥

कुब्जकोटप्रभं विद्यादेकारस्वरभूषितम्।
भिन्नाञ्जनसमप्रख्यं सर्वसिद्धिकरं परम्॥ ३५॥

p. 322)

कुब्जकान्तं द्वितीयं तु मायानलसमन्वितम्।
बिन्दुमस्तकमाक्रान्तमतसी कुसुमप्रभम्॥ ३६॥

पितृपादो ह्येकपादोऽनेकपादेकनेत्रकम्।
उग्रः शान्तः सुशान्तश्च पिनाकी त्रिदशेश्वरः॥ ३७॥

वज्रकवाटगन्धार्थं तव स्नेहादुदाहृतम्।

इति कालोत्तरे कज्रकवाटलक्षणपटलः एकषष्टितमः॥ ६१॥

॥ श्रीः॥

ईश्वर उवाच-

हस्तिजिह्वाकवाटं तु प्रवक्ष्यामि समासतः।
चतुर्थस्य चतुर्थं तु जातवेदसमन्वितम्॥ १॥

उपरिष्टाच्चतुर्थोनि भूषितं बिन्दुसंयुतम्।

वज्रकवाटमेकं तु यत्सुरैरपि दुर्लभम्॥ २॥

चतुर्थस्य प्रथमं वत्स बिन्दुशेखरभूषितम्।

कवाटस्तम्भवामे तु इन्द्रक्रोपकसन्निभम्॥ ३॥

मार्ताण्डोदयसंकाशं कवाटबीजं सुदुर्लभम्।

चतुर्थस्य द्वितीयं तु बिन्दुशेखरभूषितम्॥ ४॥

सिन्दूरसदृशप्रख्यं दक्षिणस्तम्भमुच्यते।

भ्रमरयोनी इमौ वत्स ते च द्वौ परिकीर्तितौ॥ ५॥

अशोकबन्धूकनिभौ तेऽथ द्वौ वर्णितावुभौ।

अथ वै पुटबीजन्तु बिन्दुशेखरभूषितम्॥ ६॥

गोक्षीरधवलप्रख्यं वर्णितं परिकीर्तितम्।

चतुर्थादि प्रयोक्तव्यं त्रयोदशसमन्वितम्॥ ७॥

p. 323)

बिन्दुशेखरमारूढं रक्तबुद्बुदसन्निभम्।

कोशं वै हस्तिजिह्वायाः कवाटस्य हि षण्मुख॥ ८॥

अथोत्तरं तु तो तौ तु विद्युत्पावकसन्निभौ ।
पूषाकवाटं वक्ष्यामि येन मृत्युञ्जयं भवेत्॥ ९॥

पञ्चमस्य चतुर्थं तु अथ वह्निसमायुतम्।
ऊर्ध्वं वै प्रभुशक्तिस्तु बिन्दुनाद समन्वितम्॥ १०॥

सूर्यकोटिसमप्रख्यं सर्वमन्त्राग्रनायकम्।
वज्रकवाटमेवं तु सर्वमृत्युविनाशनम्॥ ११॥

पञ्चमस्य प्रथमं च मध्ये बिन्दुविभूषितम्।
पूषाया वामस्तम्भः स्याद्विसिनीपत्रसन्निभम्॥ १२॥

पञ्चमस्य तृतीयं तु बिन्दुशेखरभूषितम्।
दक्षिणस्तम्भमित्याहुः शुद्धं मरतकप्रभम्॥ १३॥

उत्तरोर्ध्वं तु यो विद्यादथोत्तरं तु होमयेत्।
रक्तोत्पलनिभप्रख्यं मितं नीलोत्पलस्य तु॥ १४॥

भ्रमरयोनिनिभौ द्वौ तु भिन्नाञ्जनसमप्रभम्।
फं फट् तौ द्वौ पटकोशौ तुषाररजतप्रभौ॥ १५॥

वज्रकवाटमाख्यातं वै लोचने यशस्विनी।

विधानं तु प्रवक्ष्यामि वत्स त्वं शृणु सांप्रतम्॥ १६ ॥

कवाटस्तम्भं समाख्यातं वामस्तम्भमुदाहृतम्।
जारं बिन्दुशिखाक्रान्तं तृतीयस्वरसंयुतम्॥ १७ ॥

बिन्दुशेखरपीठं वा रजपाकरथ प्रभम्।
ललै भ्रमरयोनी द्वौ अतसी भृङ्गसन्निभम्॥ १८ ॥

p. 324)

पञ्चदशं षोडशं च शङ्खशुद्धिसमप्रभम्।
पुटकोशौ समाख्यातौ महदग्रौ च सिद्धिदौ॥ १९ ॥

अलं वज्रकवाटं तु प्रवक्ष्यामि समासतः।
अनिलाच्चतुर्थं संगृह्य हुताशनसमन्वितम्॥ २० ॥

उपरिञ्जनशक्तिस्तु शिवनारायणान्वितम्।
सूर्यायुत समप्रख्यं अलंवज्रकवाटकम्॥ २१ ॥

वरुणं बिन्दुसमाख्यातं वामस्तम्भमुदाहृतम्।
शुद्धस्फटिकसंकाशं धूमज्योतिस्वरूपिणम्॥ २२ ॥

अमृताद्द्वितीयं बीजं तु शङ्खकुन्देन्दु सन्निभम्।

बिन्दुमस्तकमाक्रान्तं दक्षिणस्तम्भमुच्यते ॥ २३ ॥

अमृतं गर्भसंयुक्तं उत्तरोत्तरमुच्यते ।
द्वादशस्वरसंयुक्तं अथोत्तरमेव च ॥ २४ ॥

शङ्खकुन्दसमप्रख्यं उभौ वर्णौ च कीर्तितौ ।
त्रयोदशान्तदन्तश्च भ्रमरयोनी प्रकीर्तितौ ॥ २५ ॥

मृणालं गोक्षीरवर्णौ वाग्बीजं तु प्रकीर्तितौ ।
विसर्गकोशमाख्यातं तदूर्ध्वं कोकिलोद्भवम् ॥ २६ ॥

विसर्गममृतं ज्ञेयं मृत्युवञ्जनमुत्तमम् ।
वरुण रूपं तु * * अमृताधारमुच्यते ॥ २७ ॥

मुक्तानीहारनिभौ द्वौ बीजस्य च षण्मुख ।
वज्रकवाटमाख्यातं अलंबुषायाः प्रकीर्तिताः ॥ २८ ॥

कुहवज्रकवाटं तु सांप्रतं शृणु षण्मुख ।
विचित्रं विस्तरं सूक्ष्मं परं विश्वस्य साधनम् ॥ २९ ॥

p. 325)

संप्रदायं परह्येतन्मृत्युवञ्जनमुत्तमम् ।

षष्टमं नारसिंहस्य त्रैलोक्यं विस्मयं परम् ॥ ३० ॥

शडबालमथो युक्तं मयाचोपरि भूषितम् ।
शिखाहरि हराचोक्तन्द्रुतचामीकरप्रभम् ॥ ३१ ॥

सप्तमस्य कवाटं तु यत्पुरैरपि दुर्लभम् ।
पान्तं बिन्दुसमायुक्तं किञ्जल्कसदृशप्रभम् ॥ ३२ ॥

वामे कवाटस्तम्भं तु हरिद्रारससन्निभम् ।
लान्तान्तं वा विजानीयात्सर्वमृत्युविनाशनम् ॥ ३३ ॥

राकारस्वरसंयुक्तं सौभाग्येन समन्वितम् ।
उत्तरोत्तरमेवाहुः अङ्गुष्ठसदृशप्रभम् ॥ ३४ ॥

एकारस्वरसंयुक्तं षट्चत्वारिंश एव वा ।
पिण्डारकसमप्रख्यं अधरोत्तरमुच्यते ॥ ३५ ॥

भ्रमरयोनिं बिन्दुमस्तक एव च ।
मञ्जिष्ठा कर्णिकाराभौ रक्तौ बीजस्य सन्निभौ ॥ ३६ ॥

विसर्गादि विसर्गं च पुरकोशौ प्रकीर्तितौ ।
गोरोचनानिशाभौ च समासात्परिकीर्तिता ॥ ३७ ॥

कुहवज्रकवाटं तु आख्यातमसुवरावृतम् ।
शङ्खिनीवज्रकवाटं शृणु षण्मुख तत्त्वतः ॥ ३८ ॥

अतिगुह्यं परं सूक्ष्मं रहस्यं स्वप्रकाशितम् ।
ईशवर्गद्वितीयं तु कृशानुभयसंयुतम् ॥ ३९ ॥

मिथ्याचोर्ध्वं तु संवेष्ट्यं प्रलयस्थिति संयुतम् ।

p. 326)

श्वेतपङ्कजसंकाशं हिमकुन्देन्दुसप्रभम् ॥ ४० ॥

मेढ्रस्यैव तु मूले तु घटयेत्सुसमाहितः ।
जीवबिन्दुसमायुक्तं वामस्तम्भमुदाहृतम् ॥ ४१ ॥

जीवदीर्घ समायुक्तं दक्षिणस्तम्भमुच्यते ।
* * * * निभौ द्वौ तु वर्णतः परिकीर्तितौ ॥ ४२ ॥

एकादशस्वरसंयुक्तं शुक्लवर्णौ प्रकीर्तितौ ।
जीवो वा द्वादशोपेत शशिवर्णः प्रकीर्तितः ॥ ४३ ॥

ऊर्ध्वोत्तरं पूर्वं स्यात् परश्चाधरोत्तरम् ।

योनिभ्रमरबीजन्तु त्रयोदश चतुर्दश ॥ ४४ ॥

इन्द्रायुधसमप्रख्यौ उभौ तौ वर्णकीर्तितौ ।
शं शं पुटहो हं शं हि शङ्खकुन्दसमप्रभौ ॥ ४५ ॥

शङ्खिनीवज्रकवाटमाख्यातं तव षण्मुख ।
संघट्य च विधानेन पूर्वं संवत्सरं गुह ॥ ४६ ॥

पश्चान्मृत्युञ्जयं योगं अभ्यसेद्वत्स राष्ट्रकम् ।
अजरामरत्वमाप्नोति इति सत्यं षडानन ॥ ४७ ॥

इति कालोत्तरे वज्रकवाटलक्षणपटलो द्विषष्टितमः ॥ ६२ ॥

॥ श्रीः ॥

ईश्वर उवाच-

वज्रकवाटैः संघट्य दशद्वारेषु धीमतः ।
कवाटस्तम्भैरुत्तरैर्योनिभ्रमरमेव च ॥ १ ॥

पटकोशैः समस्तैश्च अव्यग्रेण षडानन ।

p. 327)

पश्चान्मृत्युञ्जयं योगमभ्यसेदेकमानसः ॥ २ ॥

एकान्ते निर्जने देशे वातातपविवर्जिते ।
न दंशमशकाकीर्णे सर्वोपद्रववर्जिते ॥ ३ ॥

सुदृढे मालिकायां तु प्रासादभवनेषु वा ।
अपवर्गे शुभे श्लिष्टे संकटे सुमनोहरे ॥ ४ ॥

पूषैकशयने शुभ्रे दिव्ये समदिने शुभे ।
आस्तीर्यास्तरणे दिव्ये हस्तमात्रायते शुभे ॥ ५ ॥

विस्तारं रत्निमात्रं तु पुरुषैकसुखासने ।
पूर्वाह्णे प्राङ्मुखो भूत्वा मध्याह्ने चोत्तरामुखः ॥ ६ ॥

अपराह्णे पश्चिममुखो भूत्वा योगं समभ्यसेत् ।
स्वस्तिकं चासनं बद्ध्वा पद्मासनमथापि वा ॥ ७ ॥

समग्रीवशिरो भूत्वा समोदरहृदि स्थितिः ।
समपार्श्वोभ्युरश्चैव दन्तैर्दन्तान्न संस्पृशेत् ॥ ८ ॥

गजजिह्वां तु कृत्वा तु नासाग्रमवलोकयेत् ।
कपालाङ्गद्व्यङ्गुलत्वादधस्ताच्चक्रमुत्तमम् ॥ ९ ॥

इदं चक्रं न जानन्ति विष्णुब्रह्मादयः सुराः।
ऋषिविद्याधरैः सिद्धैः किं पुनः क्षुद्रमानसैः॥ १० ॥

श्वेतपद्मं परं शुद्धं षोडशैर्दलशोभितम्।
कर्णिकाकेसरोपेतं वितस्तिमात्रं तु विस्तरम्॥ ११ ॥

कर्णिकाचतुरङ्गुल्यं अङ्गुलोत्सेधमुत्तमम्।
अतिगुह्यं परं सूक्ष्मं मृत्युनाशनबीजकम्॥ १२ ॥

प्रवक्ष्यामि सुखोपायं शृणु षण्मुख तत्त्वतः।

p. 328)

अष्टादशमहाबीजं शङ्खकुन्देन्दुसन्निभम्॥ १३ ॥

प्रलयानलसंयुक्तं प्रलयोदरसंयुतम्।
त्रयोदशान्तसंयुक्तं षष्ठेन तु समन्वितम्॥ १४ ॥

बिन्दुनादसमायुक्तं मृत्युनाशनमुत्तमम्।
एतदेव परं ब्रह्म एतदेव परं शिवम्॥ १५ ॥

एतन्मृत्युञ्जयं बीजं रहस्यं परमद्भुतम्।

तस्य सारं प्रवक्ष्यामि मृत्युनाशनमेव च ॥ १६ ॥

द्वात्रिंशदुद्धृतं वत्स प्रतिलोमं षडानन ।
संहाररुद्रसंयुक्तं कृशानुन्तत्सुखायतम् ॥ १७ ॥

प्रलयोदकसंयुक्तं त्रयोदशान्तेन संयुतम् ।
बिन्दुनादशिखायुक्तं तस्याधारमुदाहृतम् ॥ १८ ॥

खगौ पूर्वदले न्यस्य खागभ्रशदले न्यसेत् ।
खिङ्गिं चाग्निदले न्यस्य खीगी च वितयैर्न्यसेत् ॥ १९ ॥

खुगुद्वे वैवस्वतदले खुगूद्वे भृङ्गराजके ।
खृगृद्वे तु निर्-ऋतदले खृगृसुग्रीवगोचरे ॥ २० ॥

ख्लृग्लृद्वौ बाण-इवे ख्लृग्लृ शेषदले न्यसेत् ।
खे गे वायुदले न्यस्य खै गै वा मुख्यदले न्यसेत् ॥ २१ ॥

खो गो सोमदले न्यस्य खौ गौ अतिथिगोचरे ।
खं गं ईशदले न्यस्य खः गः जयदले न्यसेत् ॥ २२ ॥

सर्वे बिन्दुसमायुक्ताः सर्वे नादसमन्विताः ।
विसर्गौ विसर्जनीयौ स राजा देशिकोत्तमः ॥ २३ ॥

सर्वे भृङ्गनिभा वत्स आधाराधेयमेव तु ।

p. 329)

अतसीकुसुमप्रख्यं विशेषं बीजमीश्वरम् ॥ २४ ॥

मृत्युञ्जयं श्वेतवर्णं उच्चारे श्वेतवर्णकम् ।
ह्रस्वाश्वेति निभा वत्स दीर्घा मरतकप्रभाः ॥ २५ ॥

विसर्गं गोक्षीरधवलं शङ्खकुन्देन्दुसप्रभम् ।
शशिनी संपुटी कृत्य बिन्दुयुक्तेन षण्मुख ॥ २६ ॥

यवर्गस्य चतुर्थं तु कालानलसमन्वितम् ।
श्वेतपद्मोपरिस्थं तु पूर्णचन्द्रसुशोभनम् ॥ २७ ॥

अथ पद्मोपरिष्टात्तु षट्पदं श्यामवर्णकम् ।
अतिकृष्णं रोमकूपे तु मृत्युं पलितनाशनम् ॥ २८ ॥

मन्त्रोदरं तु क्षेत्रज्ञं मृत्युं पलितनाशनम् ।
मन्त्रोदरं तु क्षेत्रज्ञं नयेद्धृल्लेखया बुधः ॥ २९ ॥

पद्मकोटरमध्ये तु बीजकोटरमध्यमे ।

श्वेतं समुद्रफेनाभं सततं चिन्तयेद्बुधः ॥ ३० ॥

त्रिसन्ध्यमेकं चतुर्यामे चतुर्घटिकमभ्यसेत् ।
* * चतुष्टये जीवे वलीपलितवर्जितः ॥ ३१ ॥

द्विरष्टवर्षाकृतिर्भूत्वा विचरेत्कामदेववत् ।
घटिकाद्वयं त्रिसन्ध्यं तु ध्यायेन्मरतकप्रभम् ॥ ३२ ॥

आत्मानं त्रयसंवेश्य संपुटीकृत्य चेन्दुना ।
पुनर्वै रोमकूपे तु मयूरगलवद्भवेत् ॥ ३३ ॥

अमृतेन रोमकूपे तु पूरयेद्देशिकोत्तमः ।
त्रिसन्ध्यायां द्विनाडीं तु चतुर्थामे षडानन ॥ ३४ ॥

* * * घटिकान्यसेन् मृत्युनाशनमुत्तमम् ।

p. 330)

वज्रकवाटे घट्टयित्वा दशवारं समा भवेत् ॥ ३५ ॥

हृत्सरोरुहमध्ये तु पुरुषं पञ्चविंशकम् ।
कपालपात्रे चानीय वर्णिके * * * * * ॥ ३६ ॥?

अमृताख्ये परिजीने उदरे मृत्युनाशने ।

निक्षिप्य संपुटे धीमान् पूरयित्वा समाहितः ॥ ३७ ॥

तत्रैव स्पर्शनं जीर्णं मन्त्रमुद्धार्य वै गुह ।
चतुर्थे * * * * * मायाग्निर्बिन्दुसंयुतम् ॥ ३८ ॥

मयूरगुलिकप्रख्यं नीलजीमूत सप्रभम् ।
युगपत्क्रमशो वापि पलीपलितनाशनम् ॥ ३९ ॥

स जीवेत् पञ्चसहस्रं तु द्विरष्टवर्षाकृतिः ।

इति कालोत्तरे वज्रकवाटलक्षणे कवाटरन्ध्रधारणपटलः त्रिषष्टि नमः ॥ ६३ ॥

॥ श्रीः ॥

ईश्वर उवाच-

भ्रुवोर्मध्ये महापद्मं महारजतसप्रभम् ।
दलैः षोडशभिर्युक्तं प्रलयाग्निसमन्वितम् ॥ १ ॥

कल्पान्तानलसंयुक्तं कल्पान्तादित्यसंयुतम् ।
चतुर्दशसमोपेतं षष्ठेन तु समन्वितम् ॥ २ ॥

हरिहरसमायुक्तं कूटं वै मृत्युनाशनम् ।
कोटिसूर्यसमप्रख्यं महामाणिक्यसन्निभम् ॥ ३ ॥

कर्णिकायां न्यसेद्देवं परमादित्यरूपकम् ।
विष्णुं ब्रह्मागमेवाहुः शिवमाहुर्मनीषिणः ॥ ४ ॥

p. 331)

अतिरहस्यं परं गुह्यं परमात्मस्वरूपकम् ।
आर्य आत्मा जगतः तस्थुषश्च परं महत् ॥ ५ ॥

सर्वेषामिडादिदेवानां आदित्यादित्य उच्यते ।
सर्वं माहेश्वरं रूपं हितमादित्यरूपकम् ॥ ६ ॥

वाञ्छितं चाभ्यसेद्वत्स मृत्युनाशनमुत्तमम् ।
प्रजापतिरष्टमं बीजं हुतभुग्बिन्दुसंयुतम् ॥ ७ ॥

अगस्त्योदकसंयुक्तं स्थितिसंहारसंयुतम् ।
अनाधारमिदं बीजं सर्वदुःखविनाशनम् ॥ ८ ॥

संपुटीकृत्य शशिना यच्चतुर्थेन धीमता ।
मायाग्निबिन्दुसंयुक्तं संपुटीकृत्य चिन्तयेत् ॥ ९ ॥

षडब्दमभ्यसेद्वत्स त्रिकालं नित्यमेव च ।
षष्टिर्घटिकयोगीन्द्रः कालस्तदवलम्ब्य तु ॥ १० ॥

दलेषु बीजान् वक्ष्यामि समासाच्छृणु षण्मुख ।
पूर्वादारभ्य विधिना न्यसेत्सर्वान्समाहितः ॥ ११ ॥

द्वौ द्वौ चैकदले न्यस्य अव्यग्रेण तु सुव्रत ।
अभिमुखं मन्त्रराजस्य स्थाप्य च ध्याययेद्गुह ॥ १२ ॥

चजन्यसेद्विन्दुदले मार्ताण्डोदय सप्रभम् ।
चाजान्यसेद्भृङ्गदले किञ्जल्कसदृशप्रभौ ॥ १३ ॥

चिजिन्यसेदग्निदले काश्मीरसदृशप्रभौ ।
चीजीन्यसेद्वितथे तु बालार्कसदृशप्रभौ ॥ १४ ॥

छुजु वरुणदले न्यस्य बन्धूककुसुमप्रभौ ।
छूजू शेषे तु विन्यस्य काकवर्णसमप्रभौ ॥ १५ ॥

p. 332)

छे जे वायुदले न्यस्य भृङ्गवर्णसमप्रभौ ।
छै जै बल्लाटके न्यस्य कुजवर्णसमप्रभौ ॥ १६ ॥

छोजो सोमे तु विन्यस्य नन्द्या वर्तसमप्रभौ ।
छौ जौ अदितौ विन्यस्य नीवारसदृशप्रभौ ॥ १७ ॥

छं जमीशे तु विन्यस्य मुक्ताफलसमप्रभौ ।
छः जः जटेन्यसेद्द्वौ तु शुद्धस्फटिकसन्निभौः ॥ १८ ॥

एतत्सर्वं न्यसेन्मनाङ्न्यस्य ध्यायेन्मुहुर्मुहुः ।
इन्द्रं नासापुटीकृत्य ध्यायेन्नित्यमतन्त्रितः ॥ १९ ॥

पूरयित्वा तु विधिवत् कुम्भकेन तु भावयेत् ।
भावयेत्तु पृथङ्मन्त्री मृत्युं जीयान्न संशयः ॥ २० ॥

तद्बीजममृतं ध्यात्वा रोमकूपेषु भृङ्गवत् ।
सम्यग्गं यं दशद्वारं वापितान् संयह्लुं प्रति ॥ २१ ॥

मयूरगलकप्रख्यं अमृतं भृङ्गसन्निभम् ।
रोमकूपेषु सर्वेषु पूरयित्वा तु चिन्तयेत् ॥ २२ ॥

त्रिसन्ध्यं षट्च षण्णाडीं चतुर्थं वामके गुह ।
अव्यग्रेणैव मनसा भावयेद्वत्सराष्ट्रकम् ॥ २३ ॥

पलितस्तम्भयोगन्तु रहस्यं न प्रकाशितम् ।

रविचन्द्राग्निमध्यस्थं पद्मस्योपरिकर्णिके ॥ २४ ॥

जीवेशं धारयेन्नित्यं घटिका सप्त एव च ।
घटिकाद्वयं दलं बीजैः क्रमाद्वर्णं सदैवतम् ॥ २५ ॥

रुद्रांश्चैकादश चैव द्वादशादित्या एव च ।
वसवश्चाष्टभिश्चैव अश्विनौ द्वौ यथाक्रमम् ॥ २६ ॥

p. 333)

अतिशुक्रं परं सूक्ष्मं आत्मतन्त्रं निवेशयेत् ।
सर्वे ते धवलप्रख्यां मृत्युनाशनकर्मणि ॥ २७ ॥

सर्वे ते भृङ्गवर्णास्तु पलितस्तम्भे षडानन ।
शङ्खकुन्देन्दुधवलं मोक्षार्थं चिन्तयेत्सदा ॥ २८ ॥

वश्ये तु रक्तवर्णं स्यादाकर्षेण तुश्यामकम् ।
विद्वेषणे धूम्रवर्णं उच्चाटे कृष्णवर्णकम् ॥ २९ ॥

स्तम्भे तु पीतवर्णं स्यात् मोहने कालवर्णकम् ।
छेदने शिक्रोशिनिभं चाष्टवर्णं तु भेदने ॥ ३० ॥

आवेश्यामवर्णकं तु सेनास्तम्भे तु रक्तकम् ।

ज्वालामालासहस्रैश्च दाभश्चन्त्रुंमाहवे ॥ ३१ ॥

कालाग्नीव संचिन्त्य शत्रुसेनाविनाशिनी ।

मस्तके शास्त्रोभ्यशिखाबन्धन्तु रज्जुना ? ॥ ३२ ॥

घृंक्षेन्नाशेन वै वत्स सदाक्रान्ते हृदि स्थितिः ।

आकर्षणे प्रयोगोयं वश्ये वादेन घट्टयेत् ॥ ३३ ॥

आग्नेयेन तु वश्यं स्यादाकर्षो वायुवह्निना ।

उच्चाटने विशेषेण वायव्येन षडानन ॥ ३४ ॥

वायुवह्निसमायोगाद्विद्वेषो याति निश्चयम् ।

स्तम्भे माहेन्द्रमेवोक्तं मोहे वायव्येशानतः ॥ ३५ ॥

वह्निमाहेन्द्रसंयोगादाहवे जयमाप्नुयात् ।

अग्निमण्डलमध्यस्थं तन्मध्येशक्रमण्डलम् ॥ ३६ ॥

त्रैलोक्यबीजं तन्मध्ये परिवारैश्च संयुतम् ।

ज्वालामालासहस्रैश्च दहेत्परचमूं गुह ॥ ३७ ॥

p. 334)

दशगुणं महासेन रथवाजिगजानपि ।

विजित्वा परसेनां तु सुपुरे सुखमेधते ॥ ३८ ॥

इति कालोत्तरे वज्रकवाटलक्षणे भ्रुवोर्मध्यधारणसेनास्तम्भपटलश्चतुः षष्टितमः ॥ ६४ ॥

॥ श्रीः ॥

ईश्वर उवाच-

तालुरन्ध्ररुतं चाब्जं षोडशैर्दलशोभितम् ।
कर्णिकाकेसरोपेतं तुषाररजतप्रभम् ॥ १ ॥

वितस्तिमात्रविस्तारं कर्णिकाचतुरङ्गुलम् ।
उत्सेधं कर्णिकायां तु ईषच्चामीकरप्रभम् ॥ २ ॥

तत्रमध्ये स्थितं देवं शङ्खचक्रगदाधरम् ।
ध्यायेन्नारायणं देवं शङ्खगोक्षीरसन्निभम् ॥ ३ ॥

अङ्गुष्ठमात्रमचलं निर्विकल्पं निरञ्जनम् ।
सर्वज्ञं सर्वगं शान्तं सर्वतोक्षिशिरोमुखम् ॥ ४ ॥

प्राजापतेर्द्वादशं गृह्य कल्पान्तेन समन्वितम् ।
कल्पोदकसमायुक्तं स्थितिसंहार संयुतम् ॥ ५ ॥

साक्षादमृतरूपं तु नारायणमनामयम् ।
स्थितिं रूपं परं ह्येतत् सोमरूपमिदं परम् ॥ ६ ॥

कर्णिकायां न्यसेद्देवं सर्वकारणकारणम् ।
मृत्युञ्जयमिदं वत्स सतताभ्यासयोगतः ॥ ७ ॥

तस्याधारं प्रवक्ष्यामि तत्त्वतः शृणु षण्मुख ।
प्रजापतेस्त्रयोदशं गृह्य द्विमात्रेण च संयुतम् ॥ ८ ॥

p. 335)

अत्युष्णेन समोपेतं महारोगसमन्वितम् ।
अतिशीतेन संयुक्तं रुद्रविष्णुसमन्वितम् ॥ ९ ॥

अमृताधारमेवं तु साक्षाद्गरुडरूपिणम् ।
विषसंहरणं बीजं स्थावरं जङ्गमं च यत् ॥ १० ॥

कृत्रिमं चोपवीतं च अन्नपानादियोजितम् ।
द्वौ कूटेन महासेन वासुकेर्विषनाशनम् ॥ ११ ॥

मूर्ध्नि च हृदि नाभौ च रेण्यै विषनाशनम् ।
कूटमुच्चार्य मतिमान् तिस्त्रोरेखास्तु कारयेत् ॥ १२ ॥

ओष्ठकेनादिविक्रम्य निर्विषं भवति क्षणात् ।
रात्रौ चाष्टोत्तरशतं जप्त्वा निश्शङ्कया जपेत् ॥ १३ ॥

विषान्तन्नाकृते देहे पिशाचभूतग्रहादिभिः ।
अभिमन्त्र्यान्नेन भोक्तव्यं पादं चैवोचिदंशकम् ॥ १४ ॥

सप्ताभिमन्त्रितं कृत्वा सुखजीर्णकृतं विषम् ।
परिवारं तस्य वक्ष्यामि सांप्रतं शृणु षण्मुख ॥ १५ ॥

ठड न्यसेदिन्द्रदले गोक्षीरसदृशप्रभौ ।
ठाडान्यसेद्भृङ्गवत्स बन्धूककुसुमप्रभौ ॥ १६ ॥

ठि डि न्यसेदग्निदले अशोककुसुमप्रभौ ।
ठी डी वितथे न्यसेद्भद्र अतसीकुसुमप्रभौ ॥ १७ ॥

ठु डु न्यसेद्याम्यदले विष्णुक्रान्तिसमप्रभौ ।
ठू डू न्यसेद्भृङ्गराज भृङ्गवर्णसमप्रभौ ॥ १८ ॥

ठृ डृ न्यसेन्नैर्-ऋत्यां तु नीलजीमूत सप्रभौ ।
ठॄ डॄ न्यसेत्कर्णिकार समप्रभौ ? ॥ १९ ॥

p. 336)

ठ्लृ ड्लृ न्यसेद्वारुण्यां तु गोक्षीरसदृशप्रभौ ।
ठ्लृ ड्लृ न्यसेच्च शेषे तु माञ्जिष्ठ सदृशप्रभौ ॥ २० ॥

ठे डे न्यसेन्मारुते तु नीलोत्पल समप्रभौ ।
ठै डै न्यसेन्मुख्ये तु पाटलीकुसुमप्रभौ ॥ २१ ॥

ठो डो न्यसेद्वै सोमे तु कुन्दपुष्प समप्रभौ ।
ठौ डौ न्यसेदेदि तौ तु जपाया कुसुमप्रभौ ॥ २२ ॥

ठं डं न्यसेदीशे तु नन्द्यावर्त समप्रभौ ।
ठः डः द्वे द्विन्यसेज्जये जपाकुसुम सप्रभौ ॥ २३ ॥

च सप्तमं वरं बीजं मृत्युवञ्चनकरं परम् ।
सुपूर्णं चन्द्रवत्साक्षाल्लसच्चन्द्रं षडानन ॥ २४ ॥

आदित्यबिम्बबीजा हि प्रशंसन्ति मनीषिणः ।
तस्माद्वै वर्तुलाकारं च शब्दस्य षडानन ॥ २५ ॥

ऋग्यजुः सामाथर्वमयं बिम्बं बीजं षडानन ।
तत्रस्थं पुरुषो यजुर्भासस्समुदाहृतम् ॥ २६ ॥

शुचोरग्नि समुद्दिष्टं तद्बीजं परमेश्वरीम्।
ब्रह्मा हरिर्हरश्चैव त्रयस्त्रयोऽस्त्रं योजयेत्॥ २७॥

अग्नित्रयं समुद्दिष्टं भूर्भुवस्स्वर्लोक हि।
सवनत्रयं त्रिसन्ध्यं च त्रिगुणं च त्रिवर्गकम्॥ २८॥

अग्निष्टोमादिकं सर्वं जगत्स्थावरजङ्गमम्।
तस्मात्सर्वप्रयत्नेन तद्बीजं चाभ्यसेत्सदा॥ २९॥

संवत्सरान्तकं वत्स अभ्यसेदजरामरम्।
जपं यानं प्रकर्तव्यं त्रिसन्ध्यं घटिकात्रयम्॥ ३०॥

p. 337)

संपूर्णकुम्भवत्तिष्ठेन्निर्वाणस्पर्शजीर्णकम्।
एतद्द्वादशवद्वत्सरानभ्यसेच्च समाहितः॥ ३१॥

लक्षद्वादशकं जीवेनात्र कार्या विचारणा।
षोडशाब्दं चार्धरात्रे घटिकाष्टकमभ्यसेत्॥ ३२॥

पूरकं कुम्भकं कृत्वा * चैकन्तु विसर्जयेत्।
शाश्वते स्पर्शनं जीर्णं शनैश्शनैर्देशिकोत्तमः॥ ३३॥

एवं शाश्वतयोगं तु संप्रदायेन विन्दति ।

इति कालोत्तरे पञ्चषष्टितमः पटलः ॥ ६५ ॥

॥ श्रीः ॥

ईश्वर उवाच-

कर्णरूपं महारूपं मृत्युनाशनमुत्तमम् ।
देवासुरमुनीन्द्राश्च यक्षविद्याधरादयः ॥ १ ॥

चारणाप्सरसः सिद्धाः गन्धर्वाः पन्नगादयः ।
सर्वे मृत्युं जयिष्यन्ति जपध्यानेन नित्यशः ॥ २ ॥

तत्र युक्तेन पद्मेन सदा कुम्भकपूरणात् ।
शङ्खकुन्दनिभप्रख्यं षोडशैर्दलकैर्युतम् ॥ ३ ॥

द्वादशाङ्गुलमात्रं तु विस्तारं पङ्कजस्य तु ।
नालं अष्टाङ्गुलं विद्यात् कर्णिका चतुरङ्गुलम् ॥ ४ ॥

कर्णिका केसरश्चैव द्रुतचामीकरप्रभम् ।
तस्य मध्ये महादेवं चतुर्वक्त्रं चतुर्भुजम् ॥ ५ ॥

त्रिनेत्रं शङ्खवर्णं तु चतुरङ्गुलमायतम् ।
पद्मकोटरमध्ये तु आसीनं परमेश्वरम् ॥ ६ ॥

p. 338)

अमृतरूपं परं दिव्यं सकलस्य हृदि स्थितम् ।
प्रजापतेः षोडशं गृह्य चण्डरुद्रसमन्वितम् ॥ ७ ॥

महाचण्डामलयुतं चण्डमारुतसंयुतम् ।
चण्डवारियुतं दिव्यं त्रयोदशान्त * * * ॥ ८ ॥

षष्ठेन तु समायुक्तं बिन्दुनादसमन्वितम् ।
अमृतकूटमिदं वत्स मृत्युनाशनमुत्तमम् ॥ ९ ॥

जपध्यानेन नित्यं हि श्रद्धाभक्तिसमन्वितम् ।
मृत्युंजयमवाप्नोति नात्र कार्याविचारणा ॥ १० ॥

आलस्यन्नरपशुभिः मृत्युं सर्वे जिघांसति ।
तस्मात्सर्वप्रयत्नेन कृतकूटं समभ्यसेत् ॥ ११ ॥

अमृतकूटबीजेन सर्वो मृत्युं जयिष्यति ।
तस्याधारं प्रवक्ष्यामि मृत्युवञ्चनकाम्यया ॥ १२ ॥

प्रजापतेः सप्तदशं संहारेण समन्वितम् ।
प्रलयानलसंयुक्तं प्रलयानलसप्रभम् ॥ १३ ॥

महासन समायुक्तं त्रयोदशान्त समन्वितम् ।
षष्ठं त्रयोदशान्तं च सर्वकूटेषु योजयेत् ॥ १४ ॥

वज्रकवाटलक्षणेषूक्तानुक्तेषु चैव हि ।
बिन्दुनादं च षष्ठं च त्रयोदशान्तं तथैव च ॥ १५ ॥

* लं वह्निं चलुलं च वारुणं योजयेद्बुधः ।
शुद्धस्फटिकसंकाशं समु * * समन्वितम् ॥ १६ ॥

अमृतबीजनिभं वत्स सर्वकालेषु चिन्तयेत् ।
परिवारान् प्रवक्ष्यामि मृत्युनाशनकाङ्क्षया ॥ १७ ॥

p. 339)

तथा चैन्द्रे दले * * * * * * * * प्रभौ ।
तयोर्द्वयं भृशं न्यस्य सदा भद्र समप्रभम् ॥ १८ ॥

तिथिविन्यसद्द्यौ तथेषु किणिहीकुमुदप्रभौ ।
क्रतुद्वयं यजेद्भृत्ये भृङ्गराजसमप्रभौ ॥ १९ ॥

तॄ थॄ द्वयं याम्यं तु अतसी कुसुमप्रभौ ।
तृ थृ भृङ्गदले चैव विन्यसेच्चैव सन्निभौ ॥ २० ॥

तॄ थॄ द्वयकं चैव नैर्-ऋत्यां वा त्लृ थ्लृ ।
वारुण्यां तुर्हन्यस्य हंसवर्ण समप्रभौ ॥ २१ ॥

त्लॄ थ्लॄ शेषं तु विन्यस्य कुमुदाभौ प्रकीर्तितौ ।
ते थे वायुदले न्यस्य मयूरग्रीवसन्निभौ ॥ २२ ॥

तै थै मुखदले न्यस्य चणपुष्पसमप्रभौ ।
तो थो सोमदले न्यस्य श्वेतधुर्धूरसन्निभौ ॥ २३ ॥

तौ थौ अतिथिदले न्यस्य निर्गुण्डी कुसुम प्रभौ ।
तं थं ऐशानदले न्यस्य माधवीकुसुमप्रभौ ॥ २४ ॥

तः थः जलदले न्यस्य वनमालानिभप्रभौ ।
एवं सम्यङ्न्यसित्वा तु मानसेन समाहितः ॥ २५ ॥

हंसकुन्देन्दुधवलं मन्त्रराजमनुस्मरन् ।
कवाटान् सम्यग्घट्टयित्वा संपुटीकृत्य चेन्दुना ॥ २६ ॥

त्रिकाले तु स्मरेन्नित्यं घटिका षट्षडानन ।
अर्धरात्रेण घटिकान्तं नयेत्सुसमाहितः ॥ २७ ॥

निच्छिद्रं संपुटीकृत्य सूर्यकुम्भं तु कुण्ठयेत् ।
अन्यद्भृङ्गनिभं ध्यात्वा सकृष्णेन तु धूपयेत् ॥ २८ ॥

p. 340)

रोमकूपेषु सर्वेषु अमृतेनैव प्लावयेत् ।
पठित स्तम्भभोगन्तु त्रिदशैरपि दुर्लभम् ॥ २९ ॥

अष्टादशसंवत्सरानेकभागेन भावयेत् ।
लक्षमष्टादश संवत्सरं जीवति नात्र संशयः ॥ ३० ॥

नागबलं लभेद्धीमान् द्विरष्टवर्षमयं त्विति ।
बिन्दुना संपुटीकृत्य मन्त्रराजमनुस्मरेत् ॥ ३१ ॥

गोक्षीरधवलं सौम्यं प्रत्यहं तु त्रिकालतः ।
नासिकाभ्यां पूरयेत्तु कुम्भकं कर्णरूपके ॥ ३२ ॥

निर्वाणे जीर्णं सततं स्पर्शं सर्वं षडानन ।
सुषुम्नान्तर्गतं नित्यं शाश्वतं जीर्णयेद्गुह ॥ ३३ ॥

शिवयोगमिदं दिव्यं रहस्यं न प्रकाशितम्।
क्षुद्दाहं नश्यते शीघ्रं श्रमं तस्य न विद्यते॥ ३४॥

कुम्भवत्तिष्ठते * * * * र्णेषु न विद्यते।
वामायामभ्यसेद्देवं अमृतमग्नेस्तु स्रावयेत्॥ ३५॥

यामं यामार्धमेवं तु मन्त्रराजमनुस्मरेत्।
सुभुक्तवत्तिष्ठते वत्स अष्टभासन्न संशयः॥ ३६॥

क्षुत्प्रीतिकारयोगं तु योगिना संप्रकीर्तितम्।
इडायां पूरयेत्कूपे मन्त्रराजेन धीमतः॥ ३७॥

अमृतं स्रावयेदग्नौ कुण्डल्यान्ते तु सुव्रत।
मासमेकं प्रयोगेण क्षुत्तृष्णानां तु नाशयेत्॥ ३८॥

अष्टौ तु चिन्तयेत्सत्यं मन्त्रराजेन संयुतम्।
आत्मा वै संपुटीकृत्य ज्योतिर्मण्डलमध्यमे॥ ३९॥

p. 341)

सर्व सूर्य इव ध्यायेन्निद्रानिर्वृतिमाप्नुयात्।
राजसं तामसं त्यज्य सत्य(त्त्व?) मेकेन वर्तते॥ ४०॥

अक्ष्णोर्वै मन्त्रराजे तु घटिकाः पञ्च भावयेत्।
अक्षिमण्डल मध्ये तु भास्करं परमं स्मरेत्॥ ४१॥

जाग्रमेतद्भवेत्सर्वं स्वप्नं सुषुप्तिनाशनम्।
निद्रांनिर्वृतियोगोयं पुरुषात्ममिदं परम्॥ ४२॥

क्षुन्निद्रापायते नित्यं योगविघ्नकरौ हितौ।
स्वप्नेन्द्रियं प्रवर्तेत तस्मिन्निद्रां निरोधयेत्॥ ४३॥

प्रधानेन्द्रियं हि रक्षेत यस्मात्तस्मिन्निरोधयेत्॥
निद्रामूलं सर्वदुःखं क्षुन्मूलं सर्वदुःखकम्॥ ४४॥

काममूलं विनाशं हि कामाद्द्वेषो भविष्यति।
द्वेषात्क्रोधात्समुत्पन्नं तस्मान्नष्टौ न संशयः॥ ४५॥

सत्यं यशस्तपोदानं बलं शौचं शिवार्चनम्।
ध्यानं जपः समाधिश्च क्रोधान्नश्यति तत्क्षणात्॥ ४६॥

कामक्रोधं * * * * * मोण्डभंतथैव च।
आक्रोशालस्यमसत्यं हि रक्षा वै शून्यमेव च॥ ४७॥

क्षुधा निद्रा च मात्सर्यं मोहाद्द्वेष्यश्च स्नेहिताः।

तर्कं च सर्वकालेषु वर्जयेत् षोडश गुह ॥ ४८ ॥

इति कालोत्तरे वज्रकवाटलक्षणे कर्णरूपधारणाक्षुत्पिपासानिद्रानिवृत्तिपटलः षष्टितमः ॥ ६६ ॥

p. 342)

॥ श्रीः ॥

ईश्वर उवाच-

हृत्सरोरुहमध्ये तु भावयेदमृतनायकम् ।
हृदये सर्वमर्त्यानां क्षेत्रज्ञस्तत्र तिष्ठति ॥ १ ॥

पुर्यष्टकसमायुक्त मधश्चोर्ध्वं च गच्छति ।
शब्दः स्पर्शश्च रूपं च रसोगन्धस्तथैव च ॥ २ ॥

मनोहंकारबुद्धिश्च पुर्यष्टकमिति स्मृतम् ।
पुर्यष्टके शरीरं तु क्षेत्रज्ञस्य षडानन ॥ ३ ॥

चतुर्विंशतितत्त्वानां पुरुषो नायको भवेत् ।
पञ्चविंशतिमेवाहुः सर्वशास्त्रेषु पण्डितः ॥ ४ ॥

पुरुषः पुद्गलो धीमान् पशुर्यज्ञपंचविंशकम् ।

क्षेत्रज्ञो भोगभोक्तात्मा चेतनो देहिलिङ्गकः ॥ ५ ॥

तथा लिङ्गशरीरेण हृदयेश्वर एव च ।
जङ्घादि प्रकृतेर्नायकस्सुखदुःखात्मकः स्मृतः ॥ ६ ॥

वायुनाम ततः सप्तविंशत्क्षेत्रं षडानन ।
दश प्राणैः समोपेतः दशद्वारेषु संचरेत् ॥ ७ ॥

भ्रुवोर्मध्ये मूर्ध्नि मध्ये कण्ठे चैवोरसी तथा ।
हृदये नाभिमध्ये तु गुदेवृषणयोरपि ॥ ८ ॥

सं * * * * वृष्णे ऊरौ त्रिकटिकेषु च ।
जङ्घे त्रिकटिके चैव गुल्पयोश्च पदान्तरे ॥ ९ ॥

तर्जनीपादाङ्गुष्ठयोर्मलमध्ये च मर्मिका ।
सद्यो मरणमेवाहुः शास्त्रज्ञैः समुदाहृतः ॥ १० ॥

p. 343)

मर्माश्रयं कालान्तरे मरणन्नात्र संशयः ।
कण्टकैर्वा प्रहरे * * * * मुष्टिभिर्नरान् ॥ ११ ॥

बाहुकूर्परयोर्मध्ये त्रिकटि मर्ममुदाहृतम् ।

हस्तिजिह्वायां मूले तु स * * त मुदाहृतम् ॥ १२ ॥

तत्र तत्र * * * * * * * * * * ।

अमृतबीजं तत्र तत्र स्मरेदेकाग्रमानसः ॥ १३ ॥

समे मृत्युंजयं ह्येतत् हंसहंसेति कीर्तितम् ।

देहात्क्षेत्रज्ञो निष्क्रान्तः बहिराकाशमाश्रितः ॥ १४ ॥

पुनर्न प्रविशेच्चान्ते मरगान्तं विदुर्बुधाः ।

वज्रकवाटैः संघट्य सर्वद्वारेषु पण्डितः ॥ १५ ॥

पुनर्निष्क्रमणं नास्ति क्षेत्रज्ञस्तत्र तिष्ठति ।

तत्रैव संपुटीकृत्य हृत्सरोरुहकर्णिके ॥ १६ ॥

अमृतकोटरमध्ये तु क्षेत्रज्ञं क्षिप्त (प्र?) संपुटे ।

मृत्युस्तत्र न प्रविशेत् द्वारा भावात् षडानन ॥ १७ ॥

कवाटैः संछाद्य नवद्वारं तस्मान्मृत्युं न याति च ।

कवाटाच्छादनादेव संपुटादेव नित्यशः ॥ १८ ॥

तत्र मृत्युर्न प्रविशेत् पुन्निष्कामणं न च ।

मृत्युं पाशेन बद्ध्वा तु पुरुषस्य गले गुह ॥ १९ ॥

नयेद्यमस्य सदनं वर्म प्राणि सदा नरात् ।
तस्मात्सर्वप्रयत्नेन गृहेद्वज्रकवाटकैः ॥ २० ॥

गुरुप्रसादेन मतिमान् कवाटैश्चारयेत्सदा ।
अपवर्गे तु सुदृढे नरः कश्चित्स तिष्ठति ॥ २१ ॥

p. 344)

शत्रुचौरैर्भयं तत्र यमभयं च न विद्यते ।
तद्वज्रकवाटैराच्छाद्य तस्य मृत्युर्न विद्यते ॥ २२ ॥

तस्मात्मृत्युंजयं योगं हृदये सम्यगाचरेत् ।
सुश्वेतपङ्कजं दिव्यं षोडशदलशोभितम् ॥ २३ ॥

वितस्तिमात्रं विस्तारं हृदयं सर्वदेहिनाम् ।
कमलं प्रादेशमात्रं तु चतुरङ्गुलं कर्णिका ॥ २४ ॥

नालमष्टाङ्गुलं विद्यात् कर्णिकोत्सेधमङ्गलम् ।
सत्त्वं रजस्तमश्चैव सोमसूर्याग्निमण्डले ॥ २५ ॥

तेषु तु मध्ये स्थितं पुरुषं कराङ्गुष्ठस्य मात्रकम् ।
क्रियाशक्त्यधिष्ठितात्मा पुरुषं पञ्चविंशकम् ॥ २६ ॥

एकविंशत्परं बीजं अमृतं मृत्युनाशनम् ।
महासंहारसंयुक्तं महानलसमन्वितम् ॥ २७ ॥

महानीलसमायुक्तं महावारिसमन्वितम् ।
त्रयोदशान्तसंयुक्तं षष्ठस्वरसमन्वितम् ॥ २८ ॥

बिन्दुनादसमोपेतं अमृतकूटमिदं परम् ।
आत्मानं विन्यसेत्स्कन्दकूटबीजस्य कोटरे ॥ २९ ॥

संपुटीकृत्यशशिना चतुर्थं हंस संयुतम् ।
* * * जे * * * न पश्चाद्धंसेन संपुटे ॥ ३० ॥

वज्रकवाटैः संघटय्य दशद्वारसमन्वितम् ।
हितं त्रिसन्ध्यं षड्घटिकैः समाधिं कारयेद्बुधः ॥ ३१ ॥

मृत्युञ्जयाख्यमन्त्रस्य सिद्धिः पूवापरेण तु ।
षड्विंशद्वत्सरं धायेत्परयामं समस्तकम् ॥ ३२ ॥

p. 345)

षड्विंशल्लक्षं जीवेत इति शास्त्रस्य निश्चयः ।
हृत्सरोरुहमध्ये तु गुणत्रयाख्यमण्डले ॥ ३३ ॥

तेषां चोपरि शक्तिस्तु शक्तिमध्ये तु कूटकम् ।
कूटमध्ये तु चात्मानं प्राणैः संयमं मन्त्रवित् ॥ ३४ ॥

संपुटीकृत्य चन्द्रेण पश्चाद्धंसेन संपुटेत् ।
वज्रकवाटैर्दशद्वारान् पिधाय सम्यग्विधानतः ॥ ३५ ॥

समाधिं कारयेत्पश्चात्समरसीकृत विग्रहः ।
देवानां मृत्युञ्जयमिदं उपायं चात्र वर्णितम् ॥ ३६ ॥

त्रिंशत्संवत्सरं वत्स चतुःसन्ध्यं सप्तनाडिकम् ।
अभ्यसेदेकचित्तेन अर्धरात्रे तु वै दश ॥ ३७ ॥

त्रिंशल्लक्षं भवेदायुर्नात्र कार्या विचारणा ।
परिवारान्प्रवक्ष्यामि सर्वकामार्थसाधनम् ॥ ३८ ॥

फ फ ऐन्द्रदले न्यस्य रक्तपुद्घ?जसन्निभौ ।
फा फा न्यसेद्भ्रमरदले किञ्जल्कसदृशप्रभौ ॥ ३९ ॥

फि फि न्यसेत्तु नल्ले तु अशोककुसुमप्रभौ ।
फी फी न्यसेद्वितथे मञ्जिष्ठ सदृशप्रभौ ॥ ४० ॥

फु फु न्यसेद्वै याम्ये तु कालमेघसमद्युति ।
फू फू द्वयेऽर्कन्न्यसेद्भृङ्गे भृङ्गवर्णनिभावुभौ ॥ ४१ ॥

फृ फृ द्वये नैर्-ऋत्यां तु कृष्णलोहनिभावुभौ ।
फॄ फॄ न्यसेत्सुग्रीवे नीलाम्बुज समप्रभौ ॥ ४२ ॥

फ्लृ फ्लृ द्वये वै वारुण्यां शुद्धस्फटिक सन्निभौ ।
फ्लॄ फ्लॄ शेषे तु विन्यस्य बिसिनी पत्रसन्निभौ ॥ ४३ ॥

p. 346)

फे फे वायुदले न्यस्य पीनवक्षौ समप्रभौ ।
फै फै मुख्ये तु विन्यस्य पिशाचपुष्पसमप्रभौ ॥ ४४ ॥

फो फो सोमे तु विन्यस्य मुक्ताफलसमप्रभौ ।
फौ फौ अदिते तु विन्यस्य दधिमण्डलसप्रभौ ॥ ४५ ॥

फं फं न्यसेद्वत्स ऐशान्ये तु समाहितः ।
फः फः द्वये न्यसेज्जये सिन्दूरसदृशप्रभौ ॥ ४६ ॥

एवं संस्थाप्य विधिना पश्चादमृतधारिणम् ।
धारणां प्रथमं कुर्यात् ध्यानं वै त * * * * ॥ ४७ ॥

समाधिं च ततः कुर्यात् शनैः शनैः सुसमाहितः ।
रेचकं पूरकं चैव कुम्भकं सममाचरेत् ॥ ४८ ॥

सिद्धं योगमिदं वत्स स्पर्शयोगं तु धारणम् ।
पूरकं कुम्भकं चैव रेचकं तु विसर्जयेत् ॥ ४९ ॥

शाश्वते स्पर्शं जीर्णं स्यात् ध्यानमेतदुदाहृतम् ।
रेचकं पूरकं त्यज्य कुम्भकं तु परित्यजेत् ॥ ५० ॥

शिवमेव स्वयं भाव्य समाधिस्तेन उच्यते ।
प्राकृतं भावमुत्सृज्य शिवोऽहमिति भावयेत् ॥ ५७ ॥

एतत् समाधिरुद्दिष्टः * * * * मनीषिणाम् ।
शिवमेव स्वयं भाव्य स्वयमेव शिवो भवेत् ॥ ५२ ॥

समरसीभाव योगेन तत्समाधिरिहोच्यते ।
स्वरूपशून्यमिति भाव्यं शिव एव सदा भवेत् ॥ ५३ ॥

समाधिरेतत्विज्ञेयं शास्त्रविद्भिरुदाहृतम् ।
तदर्धमात्रं निश्वासं स्वरूपं शून्यं भावयेत् ॥ ५४ ॥

p. 347)

समाधिमेतच्छंसन्ति योगशास्त्रविशारदाः ।

साक्षान्मृत्युंजयोपायं तव स्नेहादुदाहृतम् ॥ ५५ ॥

अजरामरत्वमाप्नोति सत्यं सत्यं षडानन ।

शिवस्य मरणं नास्ति जननं च जरादयः ॥ ५६ ॥

साधकस्य भवेद्वत्स तद्ध्यानं नित्यमेव हि ।

शिव एव भवेत्साक्षाज्जरामरणवर्जितः ॥ ५७ ॥

शिवसंप्रदायमेवोक्तं न देयं यस्य कस्यचित् ।

इति कालोत्तरे वज्रकवाटलक्षणे हृदयधारणाध्यानसमाधिपटलः सप्तषष्टितमः ॥ ६७ ॥

॥ श्रीः ॥

ईश्वर उवाच-

नाभिमध्ये महापद्मं सर्वमृत्युविनाशनम् ।

सर्वशान्तिकरं बीजमाधिव्याधिविनाशनम् ॥ १ ॥

महामारीप्रशमनं महाक्षयविनाशनम् ।

प्रमोहान् विंशतिशमनं कुष्ठाष्ठकदशाहरम् ॥ २ ॥

पञ्चगुल्मान् पञ्चव्यूहानष्ठीलान्पञ्चनाशनम् ।
भगन्धरान् पञ्चहरं रा * * * न्हरन्दश ॥ ३ ॥

पाण्डुरोगानष्टहरं स्वसात्पञ्चशरं हरम् ।
प्रत्यश्यायान् पञ्चहरं कासान्पञ्चहरं परम् ॥ ४ ॥

अशीतिवातजान् रोगान्नाशनं कूटधारणात् ।
षट्सप्ततिश्चाक्षिरोगा * * * * * * गकान् ॥ ५ ॥

p. 348)

पञ्चाशच्चहृद्रोगान् * * * * नष्टविंशतिः ।
अष्टादशपित्तरोगान्रोगान्वै दशश्लेष्मवान् ॥ ६ ॥

नाभिसन्धारणाद्ध्यानात् * * * * * * क्षणान् ।
मूत्रकृच्छ्रान् षोडशविधान्मूत्ररोगान्दशैव तम् ॥ ७ ॥

मूत्रातिसारान्पञ्चैव सोमरोगांश्चतुरोऽपि वा ।
तुनिः परितुनिश्चैव अर्शान्निषट्त्रिधानपि ॥ ८ ॥

महाज्वराष्टकं चैव * * * * * * * * ।
अष्टादश सहस्राणि * * चान्नाशयेत्क्षणात् ॥ ९ ॥

कुमारगृहा द्वादश सहस्राच्छशनिषट्सहस्रकान् ।
पूतनां पञ्च सहस्रं अपस्माराष्टसहस्रकान् ॥ १० ॥

दशकोटिरक्षः संधानसुरान् शतकोटि च ।
महासंहारदेवं च धारणान्नाशयन्ति च ॥ ११ ॥

मार्ताण्डोदयसंकाशं षोडशैर्दलशोभितम् ।
वितस्तिमात्रं पञ्चकर्णिका चतुरङ्गुलम् ॥ १२ ॥

नालमष्टाङ्गुलं विद्यात् कर्णिकोत्सेधमङ्गुलम् ।
पञ्चविंशत्परं बीजं जगद्योनिं परात्परम् ॥ १३ ॥

प्रलयस्थिति सृष्टीनां कर्तारं परमेश्वरम् ।
सर्वमन्त्राणि बीजांश्च वेदाश्चोपनिषदस्तथा ॥ १४ ॥

मूर्ध्नि स्थितं परं बीजं सर्वमन्त्रप्रशोधनम् ।
प्रलयद्वयं ततोद्धृत्य प्रलयाग्निं ततोद्धरेत् ॥ १५ ॥

प्रलयानलं ततोद्धृत्य प्रलयाम्बुदं ततोद्धृतम् ।
त्रयोदशान्तं संगृह्य षष्ठस्वरसमन्वितम् ॥ १६ ॥

p. 349)

शिवनारायणोपेतं मन्त्रराजमिदं परम्।
संख्यातं सर्वशास्त्रेषु कर्णात्कर्णगतं परम्॥ १७॥

तस्याधारं परं सूक्ष्मं ह तृतीयं सुदुर्लभम्।
तदादिबीजं संयुक्तं तदन्तेन समन्वितम्॥ १८॥

तदेतद्योज्य पुनर्वत्स तच्चतुर्थेन संयुतम्।
वाग्भवाच्चतुर्दशं योज्य वाग्भवात्षष्टमेव च॥ १९॥

स्मृतिसंहार संयुक्तं तस्याधारमुदाहृतम्।
परिवारान् प्रवक्ष्यामि दलैः षोडशसंस्थितान्॥ २०॥

मधद्वयं च कदले सुरचापार्कसन्निभौ।
माद्या भृङ्गदले न्यस्य कुन्दस्य कुसुमप्रभौ॥ २१॥

मिधिद्वयं न्यसेन्नीले हेमनीलोत्पलप्रभौ।
मीधीद्वयं वितथे तु जपापाञ्जन स प्रभौ॥ २२॥

मधुद्वयं न्यसेद्याम्ये इन्द्रकोपकसन्निभौ।
मधूद्वयं भृङ्गराजे चम्पकाभृङ्गसन्निभौ॥ २३॥

मृधृद्वयं निर्-ऋत्यां तु अशोकाल समप्रभौ ।
मृधृद्वयं सुग्रीवे रक्तकोकिलसन्निभौ ॥ २४ ॥

म्लृ ध्लृ द्वयं वारुण्यां तु बन्धूकाङ्गार स प्रभौ ।
म्लॄ ध्लॄ द्वयं शोषे तु विद्युच्चस्तासमप्रभौ ॥ २५ ॥

मेधे वायुदले न्यस्य कपोते चटकप्रभौ ।
मैधै मुख्ये न्यसेद्द्वौ तु तित्तिरीयकसन्निभौ ॥ २६ ॥

मो धो सोमे नसेद्द्वौ तु श्येनमाषसमप्रभौ ।
मौ धौ अदिते विन्यसेत् तु पिङ्गलौ कौशिकप्रभौ ।

p. 350)

मं धं ईशे तु विन्यस्य न्यासग्रन्थसमन्वितम् ॥ २७ ॥

मः धः द्वये न्यस्य वराटकोटरसन्निभौ ।
मन्त्रराजस्य वर्णं हि महामेरुसमप्रभम् ॥ २८ ॥

आकाशबीजं सेनानि कृष्णाञ्जनं धराधरम् ।
जुंसहंसेन संपुट्य ध्यायेत्कनकपर्वतम् ॥ २९ ॥

त्रिंशत्संवत्सरं वत्स त्रिसन्ध्यं घटिकाष्टकान् ।

अर्धरात्रे ध्यायेत्तु घटिका द्वादशं गुह ॥ ३० ॥

अमरत्वमवाप्नोति कोटि षट्कं स जीवति ।
येन येन हि भावेन युज्यते यत्र वाहकः ॥ ३१ ॥

तेन तन्मयतां याति ह्रस्वरूपो मणिस्तथा ।
शरीरं यत्र इत्याहुः शरीरस्थो महेश्वरः ॥ ३२ ॥

महेश्वरात्परं नास्ति सिद्ध्यते सृतिसागरे ।
लाकुलै पाञ्चरात्रे च गारुडे भूततन्त्रके ॥ ३३ ॥

भैरवे मातृतन्त्रे च योगशास्त्रे च कामिके ।
एतद्बीजसमं नास्ति पञ्चाङ्के च प्रपञ्चके ॥ ३४ ॥

शैवसिद्धान्तमार्गेण दशाष्टादशसागरे ।
तस्मात्सर्व प्रयत्नेन कूटराजमनुस्मरेत् ॥ ३५ ॥

मृत्युनाशं पुरा पुण्यहंसं वै संपुटेत्पुनः ।
पुनः सोमेन संपुट्य समरसी भावमाश्रयेत् ॥ ३६ ॥

रहस्यमेतत्संप्रदायं न कथं यस्य कस्यचित् ।
नाभौ हंसेन वै वत्स जपाकुसुमसन्निभौ ॥ ३७ ॥

पञ्चगुल्मानपोहन्ति मासार्धेन षडानन ।

p. 351)

नाभेरधस्तात्कूटेन बालार्कसदृशेन च ॥ ३८ ॥

अष्ठीलान्पञ्चदशं स्यात्षोडशाहेन धीमता ।
नाभौ चोत्तरपश्चिमे च अभ्यसेदिन्द्रकोपवत् ॥ ३९ ॥

पञ्च प्लीहान् विनश्यन्ति पञ्चविंशद्दिनेन च ।
मासमेकं चाभ्यसेत्क्षुधा नागं च नाशयेत् ॥ ४० ॥

सुपुष्टः सुभगः श्रीमान् विचरेत्कामदेववत् ।
भानुमण्डलमध्यस्थं मन्त्रराजं सदा न्यसेत् ॥ ४१ ॥

मार्ताण्डोदयवर्णाभं मण्डलैकं समभ्यसेत् ।
* * * ष्टादशाह्नन्ति साक्षान्मार्ताण्डवत्स्थितः ॥ ४२ ॥

कैलासमपि वै वत्स षण्मासाभ्यासयोगतः ।
आदित्य इव वै देहं भवते मन्त्रतेजसा ॥ ४३ ॥

ऊरुप्रदेशे देवेश जल * द्वह्नि देशिके ।

चित्तेन * * * * * मासमेकन्निरन्तरम् ॥ ४४ ॥

ऊरुस्तम्भविनाशाय वह्निमण्डलमध्यकम् ।

जानुप्रदेशे देवेशमग्निमण्डलमध्यगम् ॥ ४५ ॥

सप्तविंशद्दिनं ध्यायेत् सप्तवातप्रणाशनम् ।

माहेन्द्रं वह्निमध्यस्थं * * योर्नाभिमूलतः ॥ ४६ ॥

वं क्षणे त्रिकटे चैव कण्ठे वै कक्षयोरपि ।

ध्यायेद्वै मन्त्रराजानं बाह्यायामविनाशनम् ॥ ४७ ॥

इडायां पिङ्गलायां च सुषुम्नायां तथैव च ।

गान्धारहरिजिह्वा च पूषा चैव यशस्विनी ॥ ४८ ॥

अलंपूषा कुहूश्चैव शङ्खिनी दशमी च वा ।

p. 352)

ध्यायेत्तन्मन्त्रराजानं बाह्यायामविनाशनम् ॥ ४९ ॥

आक्षिप्तं स्वप्नवातं च मन्त्रराजेन नाशनम् ।

द्वादशारं तु संघट्य भृङ्गं चानलवारुणम् ॥ ५० ॥

तन्मध्ये मन्त्रराजानं चिन्तयेत्सप्त वै घटिः ।
सोमो रोगविनाशाय योगमेतं समभ्यसेत् ॥ ५१ ॥

वायव्याग्नेयमाहेन्द्र वारुणे च स्थितं प्रभुम् ।
चिन्तयेन्मेढ्रमूले तु मूत्रकृच्छ्रविनाशनम् ॥ ५२ ॥

माहेन्द्रे वारुणे वत्स मन्त्रराजं तु मध्यगम् ।
मेढ्रमूले तु पार्श्वे तु मूत्रमस्थिषु चिन्तयेत् ॥ ५३ ॥

मूत्रसारं मूत्रदोषं दशाहा नाशयेद्गुह ।
सोमसूर्याग्निमध्यस्थं मन्त्रराजं जपाप्रभम् ॥ ५४ ॥

जठरे चिन्तयेद्वत्स सप्ताष्टदिनमेव वा ।
अतिसारं विषूचीं च नाशयेत्सन्निपातजान् ॥ ५५ ॥

इति कालोत्तरे वज्रकवाटलक्षणे मन्त्रराजनाभिध्यान पटलः सर्वव्याधि
निवारणपटलश्चाष्टषष्टितमः ॥ ६८ ॥

॥ श्रीः ॥

ईश्वर उवाच-

नाभेरधस्ताद्द्व्यङ्गुल्यं(ल्यें) नाडीकन्दं प्रतिष्ठितम्।
तन्मध्ये संस्थितं पद्मं चतुरङ्गुलमात्रतः॥ १॥

द्व्यङ्गुलं कर्णिकामात्रं ज्वलत्कनकसन्निभम्।
तस्य मध्ये परं देवं देवेशं भुवनेश्वरम्॥ २॥

सर्वज्ञं सर्वगं शान्तं सर्वतो क्षिशिरो मुखम्।

p. 353)

सकलं निष्कलं देव मनौपम्यसुरेश्वरम्॥ ३॥

ब्रह्मादिस्तम्भपर्यन्तं सृष्टिस्थितिलयात्मकम्।
उद्भिदः स्वेदजाश्चैव अण्डजाश्च जरायुजाः॥ ४॥

चतुर्विधमभूद्ग्रामं चराचरमिदं जगत्।
लक्षञ्चतुरभीतिश्च पृथग्योनिषु तिष्ठति॥ ५॥

समस्तेषु पदार्थेषु तिष्ठतेन च लिप्यते।
तदुत्पन्नं जगत्सर्वं तमसश्च चराचरम्॥ ६॥

अमृतेशं प्रवक्ष्यामि मृत्युनाशनमुत्तमम्।
धर्मार्थकाममोक्षं च त्रैलोक्यं चैव साधनम्॥ ७॥

चतुश्चत्वारिंशतितमः माहेशं तत्र जायते।
सर्वसंहारबीजं तु सर्वसव्यूहनं युतम्॥ ८॥

सर्वं सद्योनिसंयुक्तं सर्वोदकसमायुतम्।
स्थितिसंहारसंयुक्तं त्रैलोक्य नायकं परम्॥ ९॥

द्रुतचामीकरप्रख्यं महारजतसप्रभम्।
तस्य ध्यानं प्रवक्ष्यामि सद्योमृत्युविनाशनम्॥ १०॥

पञ्चचत्वारिं * * * य सप्तेन समन्वितम्।
हुतभुक्पवनः सोमषष्ठश्चैव चतुर्दशम्॥ ११॥

हरिहरसमायुक्तं भुवनेश्वरकूटकम्।
समरे त्रैलोक्यसिद्धिस्तु किंपुनर्मृत्युनाशनम्॥ १२॥

यौ बीजौ सर्वलोके वा शान्तिः पुष्टिः प्रवर्तते।
वैश्यमाकर्षणं चैव सेनास्तम्भं च षणमुख॥ १३॥

महासेनजयश्चैव महासौभाग्यवर्धनम्।

p. 354)

जपो योगश्च ध्यानं च समाधिश्च चतुर्विधम् ॥ १४ ॥

चतुष्टयं येन वै वत्स मृत्युनाशनमाप्नुयात् ।
जपोयोगो गुणध्यानं ध्यानान्मृत्युं जयिष्यति ॥ १५ ॥

ध्यानाच्छतगुणं वत्सस्समाधिः शाश्वतं पदम् ।
समाधिनिष्ठस्तस्य तस्य तिष्ठति वै शिवः ॥ १६ ॥

आहूतं संप्लवं यावतावत्तिष्ठति भूतले ।
अक्षयो ह्यजरे देवस्सर्वज्ञः सर्वगः प्रभुः ॥ १७ ॥

समाधिस्थो नरो लोके तस्य मृत्युर्न विद्यते ।
परिवारान् प्रवक्ष्यामि मन्त्रराजस्य षण्मुख ॥ १८ ॥

लयद्वयं न्यसेदैन्द्रे कुब्जकुन्दसमप्रभम् ।
लावाद्वयं भ्रंशे न्यसेड्डाडिमि कुमुदप्रभम् ॥ १९ ॥

लिविद्वयं न्यसेदग्नौ करवीरार्कसन्निभौ ।
लीवीद्वयं न्यसेद्वितथे शङ्खाशोकसमप्रभौ ॥ २० ॥

लुवुद्वयं न्यसेद्याम्ये सिन्दूरस्फटिकप्रभम् ।
लूवूद्वयं न्यसेद्भृङ्गे पक्षिमुक्ताफलप्रभौ ॥ २१ ॥

ऌ वृ द्वयं निर्-ऋत्यां तु बन्धूककुन्दसन्निभौ ।
ॡ वॄ द्वयं तु सुग्रीवे द्रुतरजतसप्रभौ ॥ २२ ॥

ॢ व्लृ द्वये दले गैरिकस्फटिकप्रभौ ।
ॣ व्लॄ द्वौ शेषे न्यसेत् धीमान् माक्षीर सन्निभौ ॥ २३ ॥

लेवे पायौ न्यसेद्वत्स * * * * * सन्निभौ ।
लै वै मुख्य न्यसे * * * * * कुसुमप्रभौ ॥ २४ ॥

लो वो द्वन्द्वं न्यसेद्वत्स सोमे तु जपासन्निभौ ।

p. 355)

लौ वौ न्यसेदतीते तु विद्रुमस्फटिकप्रभौ ॥ २५ ॥

लं वं न्यसेदथेशाने मार्ताण्डसदृशप्रभौ ।
लः वः क्षिप्रं जयेद्वत्स क * रन्द्रसमप्रभौ ॥ २६ ॥

मूलबीजचयो लोके महाश्चर्यफलप्रभौ ।
सूर्यकोटि समप्रख्यौ चन्द्रकोटिसमप्रभौ ॥ २७ ॥

शिवशक्तिमयौ द्वौ * * * कामार्थसाधकौ ।

मृत्युञ्जयो प्रयोक्तव्यो जपादिषु चतुष्टये ॥ २८ ॥

मृत्युञ्जयत्रयेणैव हंसबीजेन षण्मुख ।
संपुटीकृत्य मतिमान् प्रासादं गर्भे तु निक्षिपेत् ॥ २९ ॥

सर्वकूटे तु वै वत्स प्रासादगर्भे विनिक्षिपेत् ।
प्रासादगर्भे चात्मानं शक्त्या कृष्णेन योजयेत् ॥ ३० ॥

दशस्थानेषु सर्वेषु दशप्राणयुतेन तु ।
प्रासादगर्भे संयोज्य पश्चात्संपुटमारभेत् ॥ ३१ ॥

रेचकं कुम्भकं त्यज्य कुम्भकं तु विसर्जयेत् ।
समरसीभावयोगेन नित्यमेवं सदाभ्यसेत् ॥ ३२ ॥

अथ च द्वै चतुःसन्ध्यं घटिकाष्टौ पृथक् पृथक् ।
विशेषमर्धरात्रेषु घटिका द्वादशैव तु ॥ ३३ ॥

समरसी भावयोगेन समाधिं सम्यगाचरेत् ।
त्रिंशद्वत्सरं नित्यं अभ्यसेत्सुसमाहितः ॥ ३४ ॥

आभूतसंप्लवं यावत्तावद्वै शिववद्भवत् ।
बलिपलितनिर्मुक्तौ द्विरष्टवर्षकाकृतिः ॥ ३५ ॥

गोक्षीरसदृशप्रख्यं प्राणदं चामरेचकम्।

शशिना पार्श्वयोः पुष्या अतश्चोर्ध्वं त्रियक्षकैः॥ ३६॥

p. 356)

हंसेन तस्य बाह्ये तु संपुटीकृत्य चान्तयेत्।

आत्मानं शिवशक्त्या तु हृदयादाकृष्य तत्र तु॥ ३७॥

प्रासादगर्भं संयोज्यं प्रासादं वहनगर्भके।

समरसीभावयोगेन मृत्युनाशनमाप्नुयात्॥ ३८॥

प्रासादगर्भे चात्मानं प्रासादं भवनगर्भके।

त्र्यक्षरं संपुटं विद्यात् त्र्यक्षरं चेन्दुना पुटेत्॥ ३९॥

पुनर्जीवेन मुख्येन हृल्लेखामनुसंपुटेत्।

बीजमुख्येन संपुट्य संपुटेदेकपादतः॥ ४०॥

संपुटेद्धंसबीजेन चतुर्दिक्षु समाहितः।

बहिरन्तः प्रसादेन संपुटेत्तत्र वित्तमः।

संपुच्चैकादशं चैवं सर्वं मृत्युञ्जयं भवेत्॥ ४१॥

उदरे सर्वकार्याणि महामृत्युविनाशनम्।

मन्त्रस्य नाभिदेशे तु आयु * मृत्युनाशनम् ॥ ४२ ॥

मन्त्रस्य शाश्वतस्थाने संहारं मृत्युनाशनम् ।
मन्त्रस्य मेढ्रदेशे तु प्रजालाभं तथावधि ॥ ४३ ॥

जानुस्थाने मनुशक्त्या शक्त्याधारमिहोच्यते ।
मन्त्रं हि देवतारूपं देवरूपं च मन्त्रकम् ॥ ४४ ॥

मन्त्रदेवस्य ऊर्ध्वौ तु आत्मानं नाममेव वा ।
विशेषमृत्युर्वै वत्स नास्ति चोरभयं सदा ॥ ४५ ॥

मन्त्रस्य मन्त्रके घने * * * * * * * * ।
आत्मानं प्रक्षिपेत्तत्र नाम वा तत्र निक्षिपेत् ॥ ४६ ॥

p. 357)

महामृत्युविनाशाय पार्श्वयोर्मन्त्रसंयुतम् ।
पतत्स्थानेषु वै वत्स अन्ते मृत्युभयं भवेत् ॥ ४७ ॥

मन्त्रस्य बाह्यस्थानेषु अपमृत्युविनाशनम् ।
संपुटा वेष्टितं चैव विदर्भं क्षिप्तमेव च ॥ ४८ ॥

प्रक्षिप्तं गोलसंश्लिष्टं विशिकग्रष्टाक्रान्तसंयुतम् ।

संघट्टं बन्धनं चैव बाह्याभ्यन्तरव्यापकम् ॥ ४९ ॥

एवं च दशमार्गं तु आत्माज्ञानार्थं संज्ञितम् ।
बीजकूटाक्षरेणैव बलं मन्त्रेषु यन्त्रके ॥ ५० ॥

पद्मे चक्रे च मतिमान् योजयेन्मन्त्रपारगान् ।

इति कालोत्तरे द्वादशसहस्रसंहितायां वज्रकवाटलक्षणे नाभेरस्ताद्धारणपद्मविधान मृत्युञ्जयपटलस्सप्तषष्टितमः ? ॥

॥ श्रीः ॥

ईश्वर उवाच-

तस्य च द्व्यङ्गुलाधस्तान्महापद्मं सुशोभनम् ।
समाधिश्च परं दिव्यं सर्वदेवेश्वरेश्वरम् ॥ १ ॥

सर्वज्ञं सर्वगं शान्तं सर्वात्मा सर्वतोमुखम् ।
तत्पद्मकर्णिकामध्ये आसीनं हि सदाशिवम् ॥ २ ॥

प्रादेशमात्रकं पद्मं सुदृढेन समप्रभम् ।
कर्णिकाचतुरङ्गुल्यं केशरोमनखप्रभम् ॥ ३ ॥

षट्चत्वारिंशदुद्धृत्य त्रैलोक्यनायकं परम् ।
त्रैलोक्यमोहनं देवं त्रैलोक्यस्य च स्थापनम् ॥ ४ ॥

* * * * * रूपं तु त्रैलोक्यस्य च जीवनम् ।
त्रैलोक्यसंहारबीजं महासौभाग्यवर्धनम् ॥ ५ ॥

p. 358)

महालक्ष्मीस्वरूपं तु महासौभाग्यवर्धनम् ।
स्त्रीरूपं हि परं * * * * * * नौपमम् ॥ ६ ॥

ब्रह्मादिस्तम्भ पर्यन्तं जीवनं तस्य तेजसा ।
अधः प्रलयानलोपेतं महासंहारसंयुतम् ॥ ७ ॥

महागभस्तिसंयुक्तं महावारिसमन्वितम् ।
*ष्ठेन तु पुनर्युक्तं मिथ्या सम्यक्समन्वितम् ॥ ८ ॥

सदाशिवस्य रूपं हि सद्योमृत्युविनाशनम् ।
तस्याधारं प्रवक्ष्यामि सद्यः प्रत्ययकारकम् ॥ ९ ॥

विद्याशक्तिस्वरूपं तु सद्यो मृत्युविनाशनम् ।
सप्तचत्वारिंशद्बीजं द्वादशादित्यरूपकम् ॥ १० ॥

तद्बीजात्कोटिशक्तिस्तु वामाद्या जायते तु तत्।
बडबानलं रुद्ररूपं बडवानलसंयुतम्॥ ११ ॥

कल्पान्तानलसंयुक्तं कल्पान्तोदक संयुतम्।
विसर्गा तृतीय संयुक्तं * * * * * * * ॥ १२ ॥

विसर्गादिकादशोपेतं मन्मथानलसंयुतम्।
मुरारिचोर्ध्व संयुक्तं तस्याधारमुदाहृतम्॥ १३ ॥

अभ्यासं चैव कूटाभ्यां अभ्यासान्मृत्युनाशनम्।
दशद्वारं सम्यक्संघट्य वज्रकवाटैर्दशभिरपि ॥ १४ ॥

मृत्युञ्जयत्रयेणैव ओं जुं स चैव संपुटेत्।
ततो हंसेन संपुट्य ततो वै बीजमुख्यतः॥ १५ ॥

ततो वै चैकपादेन हृल्लेखा च ततः पुटेत्।
आधाराधेयकूटेषु प्रासादातेषु विन्यसेत्॥ १६ ॥

p. 359)

प्रासादान्तेषु क्षेत्रज्ञः शक्त्या कूटेन विन्यसेत्।
उपायमेतत् परं गुह्यं रहस्यं न प्रकाशयेत्॥ १७ ॥

मृत्युञ्जये प्रधानं हि संप्रदायेषु चोत्तमम्।
जाम्बूनदसमप्रख्यं बन्धूककुसुमप्रभम्॥ १८ ॥

क्वचिन्नीहार सप्रख्यं क्वचिदग्नि समप्रभम्।
क्वचित्तटित्समप्रख्यं क्वचिन्माणिक्यसप्रभम्॥ १९ ॥

क्वचिन्मरतक प्रख्यं क्वचिद्वज्र समप्रभम्।
क्वचिज्ज्योति समप्रख्यं क्वचिन्मुक्ताफलप्रभम्॥ २० ॥

क्वचिन्मार्ताण्ड संकाशं क्वचिदिन्दु समप्रभम्।
क्वचिदिन्द्रायुध प्रख्यं इन्द्रकोपकसन्निभम्॥ २१ ॥

क्वचिज्जपानिभप्रख्यं क्वचित्पद्मसमप्रभम्।
महारजतसप्रख्यं मध्याह्नरवि स प्रभम्॥ २२ ॥

क्वचित्सिन्दूर संप्रख्यं क्वचित्स्फटिकसन्निभम्।
एवं सदाशिवं रूपं अनुभवस्य तु भासते॥ २३ ॥

शिवशक्तिनिपातस्य श्रद्धाभक्तिसमन्वितः।
गुरुभक्ति प्रसादेन स्वानुभवं हि जायते॥ २४ ॥

जपसिद्धिः धारणासिद्धिः ध्यानसिद्धिः षडानन ।

गुरुप्रसादाल्लभते समाधिर्ध्यानमेव च ॥ २५ ॥

मृत्युञ्जयो भवेत्क्षिप्रं गुरुप्रसादेन षण्मुख ।

धर्मार्थकाममोक्षांश्च गुरुप्रसादेन साधयेत् ॥ २६ ॥

पिता कोटिसहस्राणि माता शतसह्स्रकैः ।

पुत्रभ्रातृकलत्रैश्च खर्वकोटिशतानि च ॥ २७ ॥
p. 360)

शिवाधिकः स वै वत्स गुरुरेको विशिष्यते ।

तस्मात्सर्वप्रयत्नेन प्रथमं पूजयेद्गुरुम् ॥ २८ ॥

हैमाभरणवस्त्रैश्च गोभूमिकाञ्चनादिभिः ।

अलंकृता गजाश्चैव दासीदासैश्च पूजयेत् ॥ २९ ॥

मिकत्र बहुनोक्तेन किं बह्वक्षरमालया ।

गुरुं शिवं च विद्यां च पूजयेत्त्रयमादरात् ॥ ३० ॥

तेषु सर्वेषु वै वत्स प्रधानं गुरुमेव हि ।

सदाशिवस्य स्थाने तु संपुटीकृत्य भावयेत् ॥ ३१ ॥

अजरामरत्वमाप्नोति शिववद्विचरेन्महिम्।
विंशत्संवत्सरं भद्र त्रिसन्ध्यं सप्तनाडिकम्॥ ३२॥

पलूपलित निर्मुक्तो द्विरष्टवर्षकाकृतिः।
दशहस्तिबलं प्राप्य अनङ्ग इव क्रीडते॥ ३३॥

त्रिंशद्वर्षं त्रिगुणं च चत्वारिंशच्चतुर्गुणम्।
पञ्चाशद्वत्सात्पञ्चगुणं भवति योगिनः॥ ३४॥

यावत्समाश्चाभ्यधिकं तावत्कल्पान्तं जीवति।
परिवारान् प्रवक्ष्यामि मन्त्रराजस्य सांप्रतम्॥ ३५॥

पूर्वादारभ्य सेनादि विन्यसेत्सुसमाहितः।
श्लृ ष्लृ श्लॄ ष्लॄ शे षे चैव तान्यन्तरेषु कल्पयेत्॥ ३६॥

शै षै शो षो चैव पश्चात्कल्पयित्वा तु सुव्रत।
शौ षौ शं षं शः षः चैव कल्पयित्वा तु भावयेत्॥ ३७॥

सर्वे कुन्देन्दुनिभाः शङ्खगोक्षीरसन्निभाः।
भावयेद्विधिवद्वत्स मृत्युं जित्वा न संशयः॥ ३८॥

एतच्चक्रं महासेन उत्तमं परमं महत्।

देवासुरा न जानन्ति तव स्नेहात्प्रकाशितम् ॥ ३९ ॥

महच्छ्रियमवाप्नोति महत्सौभाग्यमाप्नुयात् ।
अयुतं जपेत्पश्चिमद्वारे लोके वश्यमवाप्नुयात् ॥ ४० ॥

* * * येन स्त्रीवश्यं भवते नात्र संशयः ।
जपेदयुतत्रयेणैव राजवश्यं भवेद्गुह ॥ ४१ ॥

पुरुषवश्यं भवेत् क्षिप्रं * * * श्च शतेन च ।
नागवश्यं शतैः षष्टिहस्तिवश्यं त्रिधाशितिः ॥ ४२ ॥

ग्रामवश्यं भवेद्वत्स लक्षजापेन साधकः ।
नगराणां शतं वत्स भवेत्पश्यन्ति लक्षकैः ॥ ४३ ॥

इति कालोत्तरे द्वादशसहस्रसंहितायां वज्रकवाटलक्षणे सदाध्यात्मपटलोऽष्टषष्टितमः ॥

॥ श्रीः ॥

ईश्वर उवाच-

नाभेरधस्थादङ्गुल्यादष्टाङ्गुलमुदाहृतम् ।
शाश्वतं स्थानमेवाहुः * * * * * * हृतम् ॥ १ ॥

ब्रह्माविष्णुसुराः सर्वे लोकपालादयः स्मृताः ।
इन्द्राग्नियमनिर्-ऋतिवरुणा वायुरेव च ॥ २ ॥

सोमेशान गुहाश्चैव न जानन्ति स्थानमुत्तमम् ।
रुद्रैकादशकाः सर्वे द्वादशादित्या एव च ॥ ३ ॥

अष्टौ तु वसवश्चैव न जानन्ति हि शाश्वतम् ।
मनुर्दक्षो वसुश्चैव काश्यपो नारदस्तथा ॥ ४ ॥

p. 362)

विश्वामित्रो वसिष्ठश्च गौतमो भार्गवस्तथा ।
वाल्मीकी वामदेवश्च पराशरव्यासभार्गवाः ॥ ५ ॥

अङ्गिरा अत्रिर्दक्षश्च कृ * स्यलिखिनश्च च ।
शाश्वतं स्थानमेते हि न जानन्ति कदाचन ॥ ६ ॥

अतिगुह्यं परं सूक्ष्मं सूक्ष्मात्सूक्ष्मतरं परम् ।
अधस्तान्मेढ्रमूलं तु ऊर्ध्वाधस्तान्महानलः ॥ ७ ॥

दक्षिणा कटिफलका * * राकठिपीठकात् ।
हिन्द्रकाद्दक्षिणं पूर्वा पश्चिमोत्तरकङ्कटात् ॥ ८ ॥

धिष्णीयं दक्षिणं पश्चिमात् यात्पूर्वोत्तरं गुह ।
एते चैवाष्टसीमान्ते तत्स्थानं चतुरङ्गुलम् ॥ ९ ॥

कदम्बगोलकाकारं शाश्वत स्थानमेव च ।
नाभेरधस्तादष्टाङ्गुलं त्रिकोणाकारमुत्तमम् ॥ १० ॥

तत्स्थानं कौलकाबाहु * * * शुद्धकोजनाः ।
सर्वज्ञः परिपूर्णश्च सर्वात्मा सर्वतोमुखः ॥ ११ ॥

शिवस्य परिपूर्णस्य ज्ञानं शाश्वतमुत्तमम् ।
निष्कलं निर्मलं नित्यं निष्प्रपञ्चमलक्षणम् ॥ १२ ॥

अपृथक्यन्निरालम्ब्यमानन्दमचलं ध्रुवम् ।
कल्पनारहितं शून्यं मनसोतीतगोचरम् ॥ १३ ॥

हेयोपादेयरहितं सर्वाङ्गं च विवर्जितम् ।
* * * * * * * * बाह्याभ्यन्तर संस्थितम् ॥ १४ ॥

अस्तिनास्तित्वरहितं स्वस्ववेद्यं परं महत् ।
गुरुप्रसादेन वत्सः परतत्त्वं हि वन्दति ॥ १५ ॥

तत्र स्थितं महापद्मं सूर्यकोटिसमप्रभम्।
द्वात्रिंशद्दलसंयुक्तं कर्णिकाकेसरान्वितम्॥ १६॥

तस्य मध्ये स्थितं शान्तं शिवं परमकारणम्।
जीवन्तं सुषिरं गृह्य अथ संहारसंयुतम्॥ १७॥

शान्तं वह्निसमायुक्तं युगान्तानिल संयुतम्।
सुशान्ताम्बु समायुक्तं त्रयोदशान्तेन संयुतम्॥ १८॥

षष्ठस्वरसमायुक्तं शिवनारायणात्मकम्।
महामायोर्ध्व संयुक्तमूर्ध्ववह्नि समायुतम्॥ १९॥

एतद्वै शिवकूटं तत्तव स्नेहादुदाहृतम्।
श्वेतं कृष्णं तथारक्तं हरितं पारावतप्रभम्॥ २०॥

श्यामं मञ्जिष्ठसंकाशं तुषाररजतप्रभम्।
शुद्धकुन्देन्दु संकाशं कूटमेकादशात्मकम्॥ २१॥

एकादशं महावर्णश्वेतादिक्रमं शोधयेत्।
अनुच्चार्यं त्रिशकैर्वत्स ब्रह्मविष्णुपुरन्दरैः॥ २२॥

गुरुप्रसादेन चोच्चार्य अन्यथा शतवर्षकैः।

आधार मध्ये पद्मेतु चिन्तयेत् सुसमाहितः ॥ २३ ॥

तस्याधारं प्रवक्ष्यामि तत्त्वतः शृणु षण्मुख ।
शान्तं दान्तं समुद्धृत्य कालानलसमन्वितम् ॥ २४ ॥

मरुद्वारिसमायुक्तं विसर्गाद्यदि संयुतम्
वाद्भवात्षष्ठमं बीजं सृष्टिप्रलयसंयुतम् ॥ २५ ॥

सत्याधारमिदं वत्स मृत्युवञ्चनकारकम् ।
सत्त्वं रजस्तमश्चैव सोमसूर्याग्निमेव च ॥ २६ ॥

p. 364)

आत्मानश्चान्तरात्मानं परमात्मानमेव च ।
पृथिव्यापस्तथा तेजो वायुराकाशमेव च ॥ २७ ॥

श्रोत्रं त्वक्चक्षुर्जिह्वा च घ्राणश्चैव तु पञ्चमम् ।
वाक्पादपाणिपायूपस्थं चैव तु पञ्चमम् ॥ २८ ॥

शब्दः स्पर्शश्च रूपं च रसोगन्धश्च पञ्चमः ।
मनोहंकारश्च महान् प्रकृतिः पुरुषस्तथा ॥ २९ ॥

रागो माया च विद्या च कालो नियति विग्रहे ।

शुद्धमाया शुद्धकला सदाशिवशिवस्तथा ॥ ३० ॥

चतुश्चत्वारिंशत्कला कर्णिकोपरि कल्पयेत् ।
तेषां मध्ये महाशक्तिः हृल्लेखा परमेश्वरी ॥ ३१ ॥

तस्योपरि न्यसेद्देवं शिवकूटमनामयम् ।
हण्डरूपं ह क्षेत्रज्ञं कूटमध्ये तु निक्षिपेत् ॥ ३२ ॥

* * ना पूर्वं संपुटय्य त्र्यक्षरेण पुनः पुटेत् ।
पुनर्वै बीज मुख्येन पुनर्वै चैकपादतः ॥ ३३ ॥

पुनर्वै मल्लबीजेन पुनर्वै झल्लबीजतः ।
पुनर्वै घट्टबीजेन पुनर्वैधारबीजतः ॥ ३४ ॥

पुनर्वै योक्तबीजेन * * * * * * * * ।
पुनर्वै संहारबीजेन इन्द्रेण वरुणेन च ॥ ३५ ॥

श्रिया पुरुषजीवेन धरण्या केशवेन च ।
मायानलसमायुक्तं बिन्दुनादसमन्वितम् ॥ ३६ ॥

एकैकेन तु बीजं हि अग्निमायासमन्वितम् ।
बिन्दुनादसमाक्रान्तं सर्वबीजेषु सुव्रत ॥ ३७ ॥

p. 365)

दशवज्रकवाटैश्च सम्यग्घट्टविधानवित्।
चिन्तयेदमृतं बीजं समरसीकृतविग्रहम्॥ ३८॥

साक्षान्मृत्युञ्जयोपायं तव स्नेहात्प्रकाशितम्।
अजरामरत्वमाप्नोति वत्सरत्रयकालतः॥ ३९॥

न जपेन न हीमेन न च मन्त्रैर्न पूजया।
सर्वदा चिन्तयेत्कूटं कल्पकोटिं स जीवति॥ ४०॥

न नियमं यमन्नैव आसनन्नास्ति षण्मुख।
प्राणायामं तत्र नास्ति प्रत्याहारं च वर्जयेत्॥ ४१॥

ध्यानधोरणको नास्ति समाधिर्नास्ति तत्त्वतः।
रेचकं पूरकं नास्ति कुम्भकं नास्ति वस्तुतः॥ ४२॥

समस्तप्राणसंज्ञिकान्नास्ति सत्यं षडानन।
सत्यमेकं परञ्चैव आलम्बं चैवमेव तत्॥ ४३॥

समसीभावतत्त्वं च समाधिं चैकवस्तुतः।
एक एव शिवः सर्वं जगत्स्थावरजङ्गमम्॥ ४४॥

अभ्यसेदेकचित्तेन महाकल्पं स जीवति ।
शिवकूटरहस्यं तु मृत्युवञ्चनकं परम् ॥ ४५ ॥

अष्टधा शिवभेदं तु शिवकूटे प्रदर्शितम् ।
सकलं निष्कलं शून्यं कलाढ्यं समलङ्कृतम् ॥ ४६ ॥

क्षपणं क्षयमन्तस्थं कर्णोष्टं चाष्टमं स्मृतम् ।
सदाशिवस्वरूपं हि प्रासादं परिकीर्तितम् ॥ ४७ ॥

शिवकूटं शिवमेवाहुः तत्त्वज्ञैः समुदाहृतम् ।
अष्टाविंशद्देवकोटिश्शिवकूटे तु संस्थिताः ॥ ४८ ॥

p. 366)

अष्टाविंशच्छक्तिकोटिश्शिवकूटे तु संस्थिताः ।
अष्टाविकल्पदेवं तु तिर्यग्योनिं च पञ्चमम् ॥ ४९ ॥

मानुषं चैकधातुश्चतुर्दश भुवनं भवेत् ।
जरायुजाण्डजेभ्यस्तु तथा च स्वेदजोद्भिजैः ॥ ५० ॥

योनिश्चतुर्विधान्तेषु शक्तिकूटे तु संस्थिताः ।
तेषां सर्वेषु भूतेषु चतुराशीतिलक्षके ॥ ५१ ॥

पशवश्च मृगाश्चैव नराश्च पक्षिणो गजाः ।
व्यालाश्चैव तु वै वत्सं जरायुजास्तु कीर्तिताः ॥ ५२ ॥

वायसा हंसकारण्डाश्येन गन्धाश्च यूषकाः ।
कृकला सर्वगौरादि गोधाश्चैव तु कोकिलाः ॥ ५३ ॥

अङ्गजा खगजारण्या पक्षिणश्चापि सर्वशः ।
कृमिः कुन्दः पिपीलिका यूकामत्कुणमक्षिकाः ॥ ५४ ॥

क्षुद्रदंशाश्च मशकाः सरीसृपाश्च स्वेदजाः ।
वृक्षावल्यश्च गुल्माश्च तृणसंघाश्च चोद्भिजाः ॥ ५५ ॥

एतानि सर्वभूतानि सकलं परिपठ्यते ।
निवृत्तिश्च प्रतिष्ठा च विद्याशान्तिस्तथैव च ॥ ५६ ॥

केचिच्छंसन्ति वै वत्स सकलं परिपठ्यते ।
श्रुतिस्मृतिविधानं तु करपादादिरूपकम् ॥ ५७ ॥

तद्वै सकलमित्याहुः वेदिकाश्च मनीषिणः ।
ब्रह्मादि स्तम्भपर्यन्तं सर्वभूत हृदि स्थितम् ॥ ५८ ॥

सकलं सर्वदेहस्थं शिवतत्त्वं प्रकीर्तितम्।
केचित्सिद्धान्तिका ऊचुः प्राप्तिरेकं शिवः स्मृतम्॥ ५९॥

p. 367)

* * * तदुत्पत्तिस्तदात्मकं सर्वमेव हि।
मदभिप्रायमेवं हि ओतं प्रोतं च सर्वतः॥ ६०॥

सकलं तद्विजानीयादिति सत्यं षडानन।
त्वया निष्क्रमते देही देह * * * * * तः॥ ६१॥

अतश्चोर्ध्वं च तिर्यक् च वक्तव्या पञ्च ते जगत्।
निष्कलं तं विजानीयाः षड्वर्णरहितः शिवः॥ ६२॥

निश्वासो श्वासनं हुत्वा स्वयं देहन्तु * * *।
ऊर्ध्वशून्यमधःशून्यं मध्यशून्यं निरामयम्॥ ६३॥

ख शून्यं बिन्दुशून्यं च नादशक्तिं च शून्यकम्।
सर्वशून्यं निरालम्बं अन्धकारमिवस्थितम्॥ ६४॥

शून्यं तं तु विजानीयात् शिवतत्त्वमुदाहृतम्।
शब्दस्पर्शरूपं च रसो गन्धश्च शून्यकम्॥ ६५॥

अहंकारं मनः शून्यं महानपि सुशून्यकम् ।
सत्त्वं रजस्तमः शून्यः नादबिन्दुकलामयम् ॥ ६६ ॥

कलास्यन्तं विजानीयाच्छिवतत्त्वमुदाहृतम् ।
भूताकाशं चिदाकाशं हीनन्तत्त्वस्थ संहितम् ॥ ६७ ॥

खमलंकृतं विजानीयाच्छिवतत्त्वं प्रकीर्तितम् ।
शक्त्याकाशमनाकाशं बिन्द्वाकाश * * * * ॥ ६८ ॥

क्षपणं तं विजानीयाच्छिव तत्त्वं प्रकीर्तितम् ।
रुद्रस्सदाशिवाकाशं हीनावै तं तुरीयकम् ॥ ६९ ॥

p. 368)

क्षयान्तस्थं विजानीयाच्छिवतत्त्वं प्रकीर्तितम् ।
शिवाकाशविनिर्मुक्तं गहनं मूलनाशनम् ॥ ७० ॥

कण्ठोष्ठं तं विजानीयाच्छिवतत्त्वं प्रकीर्तितम् ।
शिवकूटे चाष्टतत्त्वं हि तव स्नेहात्प्रकाशितम् ॥ ७१ ॥

परिवारान् प्रवक्ष्यामि सर्वसिद्धिकरान् परान् ।
हसलक्षं न्यसेत्प्रथमे हासालाक्षं न्यसेत्ततः ॥ ७२ ॥

हिंसि * * न्यसेत्तदनु ही सी ली न्यसेत्ततः।
हु सु लु क्षु न्यसेत्पश्चात् हूसूलूक्षू न्यसेत्ततः॥ ७३॥

हृ सृ लृ क्षृ न्यसेद्वत्स हॄ सॄ लॄ क्षॄ न्यसेत्पुनः।
ह्लृ स्लृ ल्लृ क्ष्लृ पुनर्न्यसेत् ह्लॄ स्लॄ ल्लॄ क्ष्लॄ ततो न्यसेत्॥ ७४॥

पश्चात् है सै लै क्षै ततो न्यसेत्।
हो सो लो क्षो न्यसेत् तदनु हौ सौ लौ क्षौ पुनन्यसेत्॥ ७५॥

हं सं लं क्षं न्यसेत्पश्चात् हः सः लः क्षः ततो न्यसेत्।
एवं वै सर्वबीजानां द्वात्रिंशद्दलके न्यसेत्॥ ७६॥

न्यस्त्वा तु विधिवत्सम्यक् सर्वं समरसी भवेत्।
समरसीभावयोगेन मृत्युंजित्वा न संशयः॥ ७७॥

गृहस्थो ब्रह्मचारी च वानप्रस्थोऽथ भिक्षुकः।
यत्र तत्र स्थितो वत्स अभ्यसेच्छिवमादरात्॥ ७८॥

समरसीभावयोगेन सर्वसंपुटमेव च।
शुद्धो वापि अशुद्धो वा स्नातो वाऽस्नात एव वा॥ ७९॥

क्षेत्रे वा विग्रहे वापि सभायां देववेश्मनि।

आसीने गमने वापि अभुक्ते वापि भुक्तके ॥ ८० ॥

p. 369)

पश्यञ्च्छृण्वन् स्पृशञ्जिघ्रमनुदानं तु लेह्यकान् ।
शोष्यन् नृत्यन् क्रीडन् हि स्वपन्सन्निमिषोन्मिषन् ॥ ८१ ॥

तावत्स्थागतो वापि * * * * * * * * * ।
शाश्वते शिवकूटं हि चिन्तयेत्समरसीबुधः ॥ ८२ ॥

तस्य मृत्युर्न विद्येते कृशान्तः कालयमेन च ।

इति कालोत्तरे वज्रकवाटलक्षणे शाश्वतस्थान शिवकूट * * * * एकोनषष्टितमः ॥

॥ श्रीः ॥

ईश्वर उवाच-

लभ्यते शाश्वतं ज्ञानं गुरुप्रसादेन षण्मुख ।
यमं नियमं चासनं प्राणायामन्त * * * ॥ १ ॥

प्रत्याहारो धारणा च समाधिर्ध्यानमेव च ।
गुरुप्रसादेन लभते दिव्यं योगं षडानन ॥ २ ॥

सत्यं यज्ञं तपोदानं नित्यमिन्द्रियनिग्रहम्।
गुरुप्रसादाल्लभते राज्यं चैव षडानन॥ ३॥

आकाशगमनं चैव परकायप्रवेशनम्।
मनोजवत्वं तु ज्ञानं गुरुप्रसादेन लभ्यते॥ ४॥

अणिमा लघिमा चैव महिमा गरिमा तथा।
प्राप्तिः का प्राकाम्यमीशत्वं वशित्वं चाष्टसिद्धयः॥ ५॥

गुरुप्रसादेन लभते सर्वमृत्युञ्जयानपि।
धर्ममर्थं च कामं च मोक्षं चैव षडानन॥ ६॥

गुरुप्रसादेन लभ्यते श्रद्धाभक्तियुतश्च हि।
देवत्वं ब्रह्मविष्णुत्वं रुद्रत्वं च षडानन॥ ७॥

p. 370)

साक्षात्सदाशिवत्वं च गुरुप्रसादेन लभ्यते।
गुरुर्माता पिता भार्या गुरुः पुत्रः पिता सखा॥ ८॥

गुरु * * * * * * * * * * * * * * ।
* * * जाधनभूमि * * * * * * * मथापि वा॥ ९॥

ओमिके स्वास्थिता भक्तिस्त व्यक्तुं प्रग् * * * * ।
प्रमादाच्छिवलोपं स्याद्गुरुलोपं न कारयेत् ॥ १० ॥

गुरुलोपात्तुरक * यावदाभूतसंप्लवम् ।
शिवलोपे निष्कृतिः स्याद्गुरुलोपेन निष्कृतिः ॥ ११ ॥

शिवलोपं सत्यलोपं च महापातकपञ्चसु ।
पितृहा मातृहा चैव भ्रूणहा मातृहापि च ॥ १२ ॥

प्रायश्चित्तं तु विहितं * * * सर्वपण्डितैः ।
गुरुलोपी कृतघ्नश्च प्रायश्चित्तन्न विद्यते ॥ १३ ॥

तस्मात्सर्व प्रयत्नेन गुरुद्रव्यं न लोपयेत् ।
लङ्घनं भक्षणं लोपं वञ्चनं च न कारयेत् ॥ १४ ॥

ज्ञानार्चनवद्दं दीपं नृत्तगीतोत्सवादिषु ।
तद्भोजनं समस्तं हि विष्ठामेव तु भोजनम् ॥ १५ ॥

सद्यः पतति सेनानिः नरकन्नैव गच्छति ।
तस्मात्सर्वप्रयत्नेन गुरुभोज्यं सदाश्नुते ॥ १६ ॥

गुरोस्तुशेषममृतं शास्त्रज्ञैः समुदीरितम् ।

परोक्षे निवेद्य भुञ्जीयाच्चतुरा ग्रामसंस्थिता ॥ १७ ॥

तैः पूर्वं गुरोर्नमस्कृत्वा पश्चादेवं हि वन्दयेत् ।
देवालयो गुरुर्यत्र तिष्ठते वै षडानन ॥ १८ ॥

p. 371)

पूर्वं गुरुं वन्दयित्वा पश्चाद्देवं वन्दयेत् ।
देवदिव्यगुरोर्दिव्यं दिव्यं चण्डेश्वरस्य च ॥ १९ ॥

त्रिविधं पतनं दुष्टं दानलङ्घनभक्षणम् ।
न निन्द्यात्कारणं देवं न शास्त्रं तेन भाषितम् ॥ २० ॥

न गुरुं साधकं चैव समयं च न लङ्घयेत् ।
न लङ्घयेत निर्माल्यं स्फुतिष्ठेन्न तु नग्न?गः ॥ २१ ॥

नोदत्याया हि भाषेत न च नग्नस्स्वपेन्नरः ।
ना कार्यं न खले भूमिं न चिरं पर्वते वसेत् ॥ २२ ॥

(ईन्चोम्प्लेते यावन्मातृकं लिखितम् ।)

(कालोत्तरम् शिवागम)

आचार्याय प्रदातव्यं भक्तिपूर्वं नृपेण तु ।

इति कालोत्तरे राजाभिषेकपटलः एकोनविंशतिः पटलः ॥ १९ ॥

॥ श्रीः ॥

ईश्वर उवाच-

p. 93)

नाभिचक्रमिदं सूक्ष्मं प्रवक्ष्याम्यनुपूर्वशः ।
नाभेरधस्तात्कन्दं तु अङ्कुरास्तत्र निर्गताः ॥ १ ॥

द्विसप्तति सहस्राणि नाभिमध्येऽप्यव स्थिताः ।
तिर्यगूर्ध्वमधश्चैव व्यापितं तैस्तु सर्वतः ॥ २ ॥

चक्रवत् संस्थिता ह्येताः प्रधाना त्रात्रिंशनाड्यधः ।
इडा च पिङ्गला चैव सुषुम्ना च तथैव च ॥ ३ ॥

गान्धारि हस्तिजिह्वा च पूषा चैव यशस्विनी ।
अलम्बुषा कुहूश्चैव शङ्खिनी पालिनी तथा ॥ ४ ॥

ह्लादिनी मोहिनी चैव कम्पिनी पुनिनी शुभा ।
विकृतिर्विषमा मान्या हंसिनी विश्वमालिनी ॥ ५ ॥

अङ्गिनी घोषिणी चैव तेजिनी रसवाहिनी ।

वाहिनी धरणी चैव रसभैमी रसक्रिया ॥ ६ ॥

शीतवीर्याश्चौष्ण वीर्या * * * * * * * * ।

स्पर्शनावशिका चैव प्रोक्ता द्वात्रिंशनाडिका ॥ ७ ॥

प्राणोपानः समानश्च उदानो व्यान एव च ।

नागः कूर्मश्च कृकरो देवदत्तो धनञ्जयः ॥ ८ ॥

दश प्राणवहा नाड्यो द्वात्रिंशत्तु षडानन ।

अष्टाविंशतिकोटयस्तु नाड्यस्तु वहते सदा ॥ ९ ॥

सर्वेषामपि वायूनां प्रधानैर्दशवायुभिः ।

प्राणापानमयो प्राणा विस * * * * पूरणं प्रति ॥ १० ॥

नित्यमापूरयत्येषः प्राणिनामुरसि स्थितम् ।

निश्वासोच्छ्वास कार्शैश्च प्राणो जीवं समाश्रितः ॥ ११ ॥

p. 94)

प्रयाणं कुरुते यस्मात् तस्मात्प्राणः प्रकीर्तितः ।

वायुस्तेजस्तथाकाशं तृतीयं जीव संस्थितम् ॥ १२ ॥

पुर्यष्टकसमायुक्तं पुरुषो हृदि संस्थितः ।
पुरुषो जीवः प्राणं च त्रिविधा देहपारगाः ॥ १३ ॥

जीवतत्त्वसमायुक्तं धर्मज्ञानं प्रवर्तते ।
रजसा सहसंयुक्तं भुञ्जते विषयान् प्रति ॥ १४ ॥

तमसा सह संयुक्तं ततः पापं प्रवर्तते ।
जपध्यानं समाधिश्च ज्ञानदेवार्चनं तथा ॥ १५ ॥

इष्टां पूर्तां च विविधां दानानि विविधानि च ।
वेदसिद्धान्ताध्ययनं योगशास्त्राणि चैव हि ॥ १६ ॥

यमनियमादि शौचं च देवालयसहादि च ।
तटाक मुदकप्रयागोभिर्वस्त्रादि दानकम् ॥ १७ ॥

भूमिरत्नं गजाश्वौ च तिलकन्यादिदानकम् ।
पुरुषः सत्त्वस्संयुक्तो धर्मज्ञानं प्रवर्तते ॥ १८ ॥

गीतं नृत्तं च वाद्यं च हिरण्यगोभूमिसंग्रहम् ।
दासीदासमनड्वाहमजं महिषमेव च ॥ १९ ॥

शब्दादिविषयान् भोगान् स्त्रीसंग्रहणमेव च ।
वज्रं मरतकं पद्मरागं मौक्तिकविद्रुमौ ॥ २० ॥

गन्धपुष्पादिधूपं च वस्त्रशय्यादिरेव च ।
गृहोपस्करणान्यानि कटाहोलूखलादिभिः ॥ २१ ॥

रजोगुणसमायुक्तः पुरुषः सर्वसंग्रहः ।
रजतो? गुणमेवं तु समासात्कथितं तव ॥ २२ ॥

p. 95)

आलस्य काममिश्रा च अतिनिद्रा च मैथुनम् ।
चौर्यं पिशुनता चैव तस्करोपाधमेव च ॥ २३ ॥

अज्ञानमतिधूर्तं च परस्वहरणं तथा ।
सदा चानृतवादित्वं गोधान्यं भूमिचोरता ॥ २४ ॥

सदा हिंसा परक्षुद्रं वार्धरुष्यं मृगघातकम् ।
निष्ठुरः सर्वभूतानां देवब्राह्मणदूष?णम् ॥ २५ ॥

तामसैश्च गुणैर्युक्तं पुरुषः कुरुते सदा ।

ब्रह्मविष्णु महेशाश्च शक्रायाः सर्वदेवताः ॥ २६ ॥

आदित्त्या वसवो रुद्राः सत्त्वेनैवाव संस्थितः ।
गन्धर्वाश्चारणा यक्षा सिद्धविद्याधरादयः ॥ २७ ॥

नागाश्च गरुडाश्चैव किन्नराश्च महर्षिका ।
पिशाचभूतवेताला शबराश्च पुलिन्दकाः ॥ २८ ॥

तमोगुणेन संयुक्ताः पुरुषाः पूर्वतोमुखाः ।
सगोत्रसिद्धा मुनयः सिद्धा वै संशितव्रताः ॥ २९ ॥

पुरुषायत्तजीवं तु इन्द्रनीलमणिप्रभम् ।
अङ्गुष्ठमात्रं पुरुषं मण्डलत्रयमध्यगम् ॥ ३० ॥

अङ्गुष्ठार्धार्धजीवं तु अधस्तात्पुरुषस्य तु ।
तदर्धं तु प्रमाणं तु तस्यार्धं प्रमाणसंस्थितम् ॥ ३१ ॥

जीवमध्ये प्रमाणं तु राजावर्तमणिप्रभम् ।
तस्य मध्ये ह्यपानस्तु इन्द्रकोपक संनिभः ॥ ३२ ॥

व्यानस्तस्य च मध्ये तु गोक्षीरसदृशप्रभः ।
उदानस्तस्य मध्ये तु तुषाररजतप्रभः ॥ ३३ ॥

p. 96)

समानस्तस्य मध्ये तु शरदिन्दुसमप्रभः।
नागस्तस्य च मध्ये तु मार्ताण्डोदयसप्रभः॥ ३४॥

कूर्मस्तस्य च मध्ये तु अतसीकुसुमप्रभः।
कृकरस्तस्य मध्ये तु किञ्जल्कसदृशप्रभः॥ ३५॥

तस्य मध्ये देवदत्तो जपाकुसुमसन्निभः।
धनञ्जयस्तस्य मध्ये गोक्षीरसदृशप्रभः॥ ३६॥

प्राणो हृन्नाभिनासाग्रं पादाङ्गुष्ठान्तमाश्रितः।
अपानो मेढ्रगुदयोः मुण्डल्यादौ च संस्थिताः॥ ३७॥

व्यानस्तु सर्वसिद्धौ तु जान्वो गुल्फैश्च बाहुषु।
कृकरस्तु ललाटे तु गलकूर्परपाणिषु॥ ३८॥

उदानः पार्श्वयोश्चैव कटीवक्षसिसन्धिषु।
वृषणौ ऊरुजानू च जङ्घे पृष्ठे च बाहुषु॥ ३९॥

समानः सर्वमङ्गेषु श्रोत्रनासौ तु चक्षुषी।
जिह्वायां तालुरन्ध्रे च जठरे नाभिपादयोः॥ ४०॥

हस्तयोरुभयोश्चैव अङ्गुलीषु च सर्वशः ।

समानः सर्वमङ्गेषु व्याप्यते च * * * * ॥ ४१ ॥

* * * न्यत्य पानस्तु आहारमनुजाघमः ।

वैश्वानरसुपाकं तु अन्नपानाद्यभक्ष्यकैः ॥ ४२ ॥

विष्ठा शुक्लं च मूत्रं च वायुक्षोभं च सर्वशः ।

अधोनयति सर्वं तु अपानस्तेन कीर्तितः ॥ ४३ ॥

व्यानो व्यानोशयं इ* * ने व्याधिप्रकोपकः ।

वातं पित्तं च श्लेष्माणं त्रिकोपसान्निपातकम् ॥ ४४ ॥

p. 97)

प्रमेहकुष्ठगुल्मैश्च ज्वरशोष भगन्धरान् ।

आरोपां बाह्ययागं च महोदरं पाण्डुरोगकम् ॥ ४५ ॥

सर्वव्याधिप्ररोहं च यतस्तस्माद्विनार्थितम् ।

स्वनयत्यधरं वज्रं (क्रं) गोत्रतेत्र प्रकोपनम् ॥ ४६ ॥

श्रोत्रा घ्राणं च रसनं त्वचं पादौ च पाणी च ।

पादको पायूपस्थत्वापूरकं रेचकं तथा ॥ ४७ ॥

उद्वेदयति मर्माणि उदानो नाम मारुतः ।
प्रीतिर्विनाशकथनं जार्धक्यं च जराश्च हि ॥ ४८ ॥

पीतं भक्षितमाघ्रातं रक्तपित्तकफानि च ।
समस्तगतिगात्राणि ज्वरकुष्ठप्रमेहकान् ॥ ४९ ॥

क्षयगुल्मोदराणी च सर्वव्याधिजरानपि ।
अधिकं न कुरुते वायुः सर्वभूत हितेषु च ॥ ५० ॥

समं नयति गात्राणि समानो नाम मारुतः ।
उद्गारो नाग इत्युक्तः कूर्म उन्मीलने स्थितः ॥ ५१ ॥

कृकरस्तु क्षुते चैव देवदत्तो विजृम्भते ।
धनञ्जयस्थितो वाक्षो मृतस्यापि न मुञ्चति ॥ ५२ ॥

दश प्राणवहा नाड्यो द्वात्रिंशत्परिकीर्तिताः ।
जीवः प्राणः सुषुम्नायां चलतो सर्वकालिके ॥ ५३ ॥

इडायां पिङ्गले वत्स समानोदानचारकौ ।
अल्पवृक्षे या कुम्बां चापान एव तु सञ्चरेत् ॥ ५४ ॥

व्यानो वै चक्षुषोः कण्ठे नासास्ये चापि सञ्चरेत् ।

मुखे नासे च नेत्रे च नागः कूर्मस्तु सञ्चरेत्॥ ५५॥

p. 98)

कूर्मः कृकरो देवदत्तो श्रोत्रयोः सञ्चरेत्सदा।
देवदत्तो धनञ्जय पादमेढ्रे च सञ्चरेत्॥ ५६॥

शेषेषु सर्वनाडीषु दश प्राणे वहेत्सदा।
चक्रवत्संस्थिता नाड्यः तेषु मध्येषु चानिलः॥ ५७॥

दशारं चक्रमेतत्तु अष्टदिग्द्वारकारका।
ऊर्ध्वाधश्च द्वयोद्वारं नाडीचक्रं प्रकीर्तितम्॥ ५८॥

सौर्यः कलाः षोडशैताः तथा चन्द्रकला भवेत्।
द्वे द्वे कटी भवेद्वत्स इडा पिङ्गलकावपि॥ ५९॥

द्वेचार्धक घटिका वत्स वामदक्षिणतश्चरेत्।
दक्षिणे पञ्चघटिका वामके पञ्च चैव च॥ ६०॥

चक्रे तु पटले वत्स * * * * प्रवक्ष्यते।

(ग्रन्थपातः)

इदानीमुद्देशमात्रं तु कथितं हि षडानन।

दशारपङ्कजे नित्यं पुरुषा घटिकाद्वयम्॥ ६१ ॥

वामे पञ्चदले वह्निः दक्षिणे पञ्च वै पुनः।
उत्तरं दक्षिणे चैव वामदक्षिणसंस्थितम्॥ ६२ ॥

मध्ये तु विषुवं प्रोक्तं पुटद्वयविनिःसृतम्।
संक्रान्तिर्विषुवं चैव अहोरात्राध(य)नानि च ॥ ६३ ॥

अधिमासमृणं चैव औमत्रात्रं धनं तया।
* * * त्रं भवेद्धिक्का अधिमासो विजृम्भिका ॥ ६४ ॥

ऋणं च जायते कासं निश्वासो धनमुच्यते।
संक्रान्तिः पुनरध्यैव संस्थानात् स्थानमेव तु ॥ ६५ ॥

p. 99)

इडा चैव सुषुम्ना च अमा चैव समन्विता।
सुषुम्नामध्येष्वेषङ्गे एषा संक्रान्तिरुच्यते ॥ ६६ ॥

कटीमूलाद्विनिष्क्रान्ते इडा वै पिङ्गला उभे।
नाभिग्रन्थिं समाश्रित्य वा दक्षिणसंस्थितौ ॥ ६७ ॥

पुनर्भूग्रन्थिमाश्रित्य गलगन्धौ तु संगतौ।

मूर्ध्निग्रन्थिं समाश्रित्य नासापुटविनिःसृतौ ॥ ६८ ॥

द्वादशाङ्गुलं संविश्य नासाग्रात्कौतुकं पिबेत्।
परवेदिकदेहे तु परमात्मनि संविशेत्॥ ६९ ॥

कालाग्निरुद्रं निष्ठान्ते सुषुम्ना षोडशान्तका।
मध्यमे उभयोश्चैव ब्रह्मरन्ध्रे तु विश्रिता ॥ ७० ॥

गान्धारी हस्तिनी चैव मूला चैव समारभेत्।
समाहृतौ नाभिग्रन्थौ तु पुनर्भूग्रन्थिसंगतौ ॥ ७१ ॥

गलग्रन्थिं पुनर्गत्वा कं पीत्वा द्वादशाङ्गुलात्।
दर्शनं सर्ववस्तूनां पुनर्वै मध्यसंविशेत्॥ ७२ ॥

पूषा यशस्विनी चैव शूल * * * * * *।
विनिर्ग * * स * * पुनर्भूग्रन्थिसंगतौ ॥ ७३ ॥

गलग्रन्थिं समाश्रित्य मूर्ध्नि ग्रन्थौ तु संगतौ।
पुनःश्रोत्रद्वये चैव गत्वा चैव तु संविशेत्॥ ७४ ॥

खं पीत्वा द्वादशान्ते तु तन्मार्गे पुनराविशेत्।
मध्ये देहं तु संविश्य सर्वशब्दं शृणोति तम्। ७५ ॥

अलंपुरुषा कुहूश्चैव मेढ्रपायुविनिर्गता ।
शङ्खिनी द्वौ मालिनी तु कन्दमूलौ समाश्रितौ ॥ ७६ ॥

p. 100)

अधस्ताद्गतौ तु तौ वत्सालम्बुषा च कुहूस्तथा ।
शङ्खिन्मूर्ध्वमधश्चैव ऊर्ध्वं नाभेर्विनिर्गता ॥ ७७ ॥

अधस्ताद्वायुमेढ्रा तु शङ्खिनी तु विनिर्गता ।
ह्लादिनी मोहिनी चैव कम्पिनी मेघनी शुभा ॥ ७८ ॥

नाभिमूलाद्विनिष्क्रान्तात् दक्षिणं पादमागता ।
कटिग्रन्थिं समावेश्य जानुग्रन्थिं तु संगतौ ॥ ७९ ॥

गुल्फग्रन्थिं तु संगत्य पञ्चाङ्गुलिषु निर्गता ।
विकृतिर्विषमामात्या हंसिनी विश्वमालिनी ॥ ८० ॥

वामपादे विनिष्क्रान्तात् कन्दमूलात्समागता ।
कटिग्रन्थौ तु वाश्लिष्य जानुग्रन्थिं समाश्रिता ॥ ८१ ॥

गुल्फग्रन्थिं तु संगत्य पञ्चाङ्गुलिषु निर्गता ।
गगिनी घोषणी चैव तेजिनी रसवाहिनी ॥ ८२ ॥

धरणी चेति पञ्चैते कन्दाच्चैव तु निर्गता ।
नाभिग्रन्थौ तु संगत्य हृदयग्रन्थिसंगता ॥ ८३ ॥

गलग्रन्थिं समाश्रित्य कक्षग्रन्थिं समाश्रिता ।
दक्षिणे तु करे सन्धिकूर्परग्रन्थिसंगताः ॥ ८४ ॥

मणिग्रन्थिं पुनश्श्लिष्य पञ्चाङ्गुलिषु निर्गताः ।
धरणी रसभोजी च संक्रियाशीतवीर्यका ॥ ८५ ॥

उष्णवीर्या तु पञ्चैते कन्दाच्चैव विनिर्गताः ।
नाभिग्रन्थिं समाश्रित्य हृदयग्रन्थिमाश्रिता ॥ ८६ ॥

गलग्रन्थिं समाश्रित्य वामबाहुर्विनिर्गता ।
बाहुकूर्परग्रन्थिं तु मणिग्रन्थिं समाश्रिता ॥ ८७ ॥

p. 101)

पञ्चाङ्गुलीषु वै वत्स निर्गताः पञ्चनाडिकाः ।
स्पर्शावकाशिका चैव वामदक्षिण पार्श्वगाः ॥ ८८ ॥

द्वात्रिंशन्नाडिका वत्स प्राणाद्या वायुवारकाः ।
महानाडी महाबद्धा द्वात्रिंशन्नाडिकाः पराः ॥ ८९ ॥

द्विसप्तति सहस्राणां मध्यमानाडिका शुभाः ।
अष्टाविंशतिकोटिस्तु प्रधानास्ते प्रकीर्तिताः ॥ ९० ॥

जीर्णे पिप्पलपत्रे वा तिर्यगूर्ध्वमधः स्थिताः ।
रोमकूपेषु सर्वेषु नाड्यस्तेषु प्रकीर्तिताः ॥ ९१ ॥

सर्वं सञ्चरते जीवः प्राणैस्तु सहिताश्च तु ।
क्षेत्रज्ञः पुरुषः स्वस्थः अज्ञो भोगसमन्वितः ॥ ९२ ॥

सुखप्रियो दुःखद्वेषी हृत्सरोरुहकोटरे ।
क्षेत्रज्ञो जीवप्राणैश्च सर्वप्राणिषु सर्वदा ॥ ९३ ॥

ब्रह्मादिस्तम्भपर्यन्तं क्रीडते भगवान् शिवः ।
शुष्क पत्रमिवाकाशे नीयते वायुना यथा ॥ ९४ ॥

तथा भ्राम्यति जीवोऽसौ प्राणाद्यु(द्धृ)त्पङ्कजे शिवगुह ।
पतन्त्युत्पतते शान्तो विग्रहे च पुनः पुनः ॥ ९५ ॥

साक्षाद्वै मध्यदेहस्तु सर्वकार्यविवर्जितः ।
शाश्वतः पुरुषः सूक्ष्मो निरालम्बः परः शिवः ॥ ९६ ॥

हृत्पङ्कजे स्थितपुरुषो जीवप्राणः सुसङ्गतः ।

* * * * चन्द्रदले आग्नेये तु तथैव च ॥ ९७ ॥

चतुष्करो याम्यदले नैर्-ऋते तु तथैव च ।

वरुणे दिग्दले चैव वायव्ये तु तथैव च ॥ ९८ ॥

p. 102)

सौम्ये चतुर्घटिका ऐशान्ये तु तथैव च ।

एवं द्वात्रिंशद्घटिका संचरेत्पुरुषो महान् ॥ ९९ ॥

करणत्रयेण वै वत्स नवद्वारेषु संचरेत् ।

अष्टभागैकभागं तु द्वात्रिंशच्चरतोः सदा ॥ १०० ॥

शतभागैकभागं तु द्विसप्तति सहस्रकाः ।

परते तव महासेन सेन्द्राश्चैव? पलभ्यते ॥ १०१ ॥

अष्टाविंशतिकोटिस्तु नाभिषु संचरेद्गुह ।

नवनाड्यः सहस्रांशं चरते तेषु नाडिषु ॥ १०२ ॥

मध्यदेहे स्थितो देवो निर्विकारो निरञ्जनः ।

सर्वज्ञः सर्वगः शान्तः सर्वदा सर्वतोमुखः ॥ १०३ ॥

परं ब्रह्म स विज्ञेयो व्योमव्यापी सदाशिवः ।

परमात्मा महाहेतु क्षेत्रज्ञो हृदि संस्थितः ॥ १०४ ॥

अन्तरात्मा द्वादशान्तः सर्वभूते व्यवस्थितः ।

मरणकाले तु वै वत्स नाडीमध्ये तु संस्थितः ॥ १०५ ॥

पुनर्हृदयमात्मेषु संविदा सर्वमेव हि ।

इत्येतद्वायवं बृन्दं हितचक्रे प्रतिष्ठितम् ॥ १०६ ॥

निश्वासोश्वासकाशैश्च * * * * * * सनमुरमथः कम्पते वायुतश्च ।

नित्यानित्यानि जन्म व्यसनयति तरमथोवने बाल्याभावादा * * * न्तेव * * * *

जननमरणजैः* * * * * क्रीडते सर्वतत्त्वैः ॥ १०७ ॥

नीडीचक्रं यथावस्थं कथयामि तवाखिलम् ।

ऊर्ध्वः प्राणोऽप्यधः प्रोक्त अपानो रात्रिरेव च ॥ १०८ ॥

p. 103)

ऐन्द्राद्वारुणसंगे तु दक्षिणायनमुच्यते ।

दक्षिणे चाश्वयुग्मेषु उत्तरे चैत्रके विषु ॥ १०९ ॥

त्रिंशद्दिवसं महासेन सूर्यश्चान्ये तु मासके ।

सम्यक्संक्रमते देव संक्रान्तिस्तेन मु(उ)च्यते ॥ ११० ॥

चन्द्रक्षयममावास्थां वृद्धिस्तु पूर्णमासिकः ।
अमावास्यादितो दोमावासी तेन उच्यते ॥ १११ ॥

चन्द्रस्य षोडशकलो देवैरापीयते गुह ।
पञ्चदश * सौ नित्यं कलापूर्णस्तु चन्द्रमाः ॥ ११२ ॥

पञ्चदशपूर्वपक्षैककला एकैका वर्धते ।
कलापूर्णे पौर्णमासी तन्त्र विद्भिरुदाहृता ॥ ११३ ॥

अमावास्यासिनी वाली ऊर्ध्वे वै पौर्णमासिके ।
चन्द्रादित्यौ पौर्णसेवी व * * * * * स्यं तु ॥ ११४ ॥

चन्द्रादित्य समायोगममावास्यां विदुर्बुधाः ।
सर्वं संहृत्य मतिमान् प्राणानां हृदये गुह ॥ ११५ ॥

प्रासादे नैव बीजेन कण्ठतालुश्च रन्ध्रकः ।
भ्रुवोर्मध्ये तु मूर्धौ तु नयेत्प्राणं तु बुद्धिमान् ॥ ११६ ॥

हित्वार्गलकपालं तु जीव ऊर्ध्वं तु गच्छति ।
सदाशिवपदं गत्वा न भूयो जन्मचाप्नुयात् ॥ ११७ ॥

इति कालोत्तरे नाडिचक्रपटलः विंशतिः ॥ २० ॥

॥ श्रीः ॥

ईश्वर उवाच-

p. 104)

कलाचक्रं प्रवक्ष्यामि कालज्ञानं परं शुभम् ।

स्वस्थानराक्षनीमेषश्चतुर्भागोपलक्षितः ॥ १ ॥

कालस्त्रुटिरिति वदन्ति तज्ज्ञानात् निष्क्रमस्थितः ।

त्रिटिद्वयं क्षणं प्रोक्तं तृतीयं क्षणिकं भवेत् ॥ २ ॥

त्रुटिचतुष्कं निमेषं तु निमेषार्धं च तच्छृणु ।

त्रुटिर्द्वात्रिंशत्कला ज्ञेया कलाष्टं करणं भवेत् ॥ ३ ॥

करणाष्टकृतं वासि विधिरेषा प्रचोदिता ।

अतीतानागतं चैव वर्तमानं तथैव च ॥ ४ ॥

लाभालाभं सुखं दुःखं * * * * * * * * ।

* * मस्ति ज्ञानविज्ञानं मृत्युपञ्चकं तथा ॥ ५ ॥

दशारं चक्रमाख्यातं सर्वप्राणिषु वर्तते ।

ऐन्द्रमाग्नेययाम्यं च नैर्-ऋतं वारुणं तथा ॥ ६ ॥

वायव्यस्याथ सौम्यं च ऐशान्यमष्टकं भवेत्।
ऊर्ध्वं च नवमं प्रोक्तं अधाश्च दशमं भवेत्॥ ७ ॥

पुष्यमासे तु संप्राप्ते मार्गशीर्षक उच्यते।
तत्संक्रान्तौ परिक्षेतश्वासं चैव षडानन ॥ ८ ॥

सामं तु पञ्चघटिका दक्षिणं पञ्च एव हि।
षष्ठ्युच्छ्वासो भवेत्प्राणः षट्प्राणो घटिका भवेत्॥ ९ ॥

षष्टिघटिकाहोरात्रं जपसंख्यां करोति सः।
पञ्चघटिका भवेद्वामे सर्वारिष्टविवर्जितम्॥ १० ॥

सप्तघटिका चरेद्वामे किञ्चिदुष्ण समन्वितः।
अशीत्यायुर्हवत्येव सम्यक् ज्ञानेन वै बुधः ॥ ११ ॥

p. 105)

अष्टघटिका भवेद्वामे परुषयुक्तं सुखोष्णतः।
सप्तति चैव आयुष्यं शिवेन परिभाषितम्॥ १२ ॥

नवघटिका वामे तु उष्णमीषत्समन्वितः।

चरते मुहुर्मुहुर्वत्स समाः षष्टिं स जीवति ॥ १३ ॥

दशघटिका इडायां तु चरते च मुहुर्मुहुः ।
पञ्चत्रिंशत्स जीवेत्तु इति शास्त्रस्य निश्चयः ॥ १४ ॥

चतुर्दशघटिकायामेव देहं स एव हि ।
त्रिंशत्संवत्सरं जीवेत् हृन्नाभिजठराश्रितः ॥ १५ ॥

चतुर्दशार्धघटिका वहते वाममेव हि ।
सप्तविंशत्संवत्सरं जीवतीति षडानन ॥ १६ ॥

पादहीनं चतुर्दशघटिका वहते इडाम् ।
षड्विंशत्संवत्सरं तस्य जीवितं वै नरस्य तु ॥ १७ ॥

दिनार्धं दिवसं चैव अहोरात्रं तथैव च ।
सार्धयुग्मगुणां वतानादित्यवसुषोडशान् ॥ १८ ॥

पञ्चम्यः पञ्चविंशद्दिवसगति रूपारोहते पञ्चवृद्धः
तस्यादेकोत्तरेण त्रिगुणितदशकं त्र्यक्तरं यावदेव ।
काले पौषे समाप्ते त्रिनयनशशिना षट्त्रियुग्मे कलेशा-
स्तास्ते हानिशेषास्तिशिदिगुषु गुणर्धेन्दवो जीवितस्या ॥ १९ ॥

पुनरन्यत्प्रवक्ष्यामि कालचक्रं समासतः ।
उत्तरायणवामे तु तस्य ज्योतिर्न दृश्यते ॥ २० ॥

संवत्सरत्रयं कृत्वा जीवत्येव षडानन ।
दक्षिणायनवामे च ऊर्ध्वज्योतिस्तु दृश्यते ॥ २१ ॥

p. 106)

संवत्सद्वयामृत्युः प्राप्यते नात्र संशयः ।
वामे चैव अधोज्योतिर्न दृश्यते चार्ध * * के ॥ २२ ॥

वत्सरैकं स जीवेत कालविद्भिरुदाहृतः ।
वामदक्षिणतज्ज्योतिर्दृश्यते ब्राह्मिके यदा ॥ २३ ॥

षण्मासं तस्य वै जीव ईश्वरेण प्रभाषितम् ।
दक्षिणे दक्षिणे ज्योतिर्दृश्यते नार्धरात्रके ॥ २४ ॥

त्रिमासा मृत्युमाप्नोति वायुना नात्र संशयः ।
दक्षिणे चोत्तरे ज्योतिर्बाह्ये चैव न दृश्यते ॥ २५ ॥

मासान्मरणमाप्नोति सर्वे न तु षडानन ।
गुल्फाज्जीवो न दृश्येत पादयोस्तु यदा नरः ॥ २६ ॥

घर्घरावयुतं तस्य नात्र कार्या विचारणा ।

कूर्परस्य अधोभागे जपं यस्य न विद्यते ॥ २७ ॥

दशाहान्मरणं तस्य कालविद्भिरुदाहृतः ।

समुद्रघोणोन श्राव्यो यत्र बिन्दुं न पश्यति ॥ २८ ॥

पञ्च * * * * * * * * * * * * * * ।

वायसो लीयते मूर्ध्नि श्वानो वा यदि लीयते ॥ २९ ॥

त्रयस्त्रिंशत्सजीवोऽसौ चरते च इला मुहुः ।

पञ्चत्रिंशच्च घटिका स जीवति न संशयः ॥ ३० ॥

करीषगलेरन्त्री रक्तवस्त्रयुतेन * * च ।

दण्डेन प्रहरेत्पुरुषः सप्ताहान्मरणं भवेत् ॥ ३१ ॥

रक्ताम्बरधरा नारी रक्तमाल्यानुलेपना ।

आलिङ्गनं भवेत्स्वप्ने जाग्रे वा यदि पश्यति ॥ ३२ ॥

p. 107)

दशाहान्मरणं तस्य नात्र कार्या विचारणा ।

रजस्वला चोष्ट्ररूढा विधवामुण्डितश्शिरः ॥ ३३ ॥

आश्लिष्यते वै स्वप्ने च जाग्रे वा यदि पश्यति ।
अष्टहानि स जीवेत इति शास्त्रस्य निश्चयः ॥ ३४ ॥

शाक्यं शपणकं वापि स्वप्ने वा जापातेऽपि वा ।
आलिङ्गनं भवेद्यस्य तस्य मृत्युर्न संशयः ॥ ३५ ॥

खरूरूढस्तु वै स्वप्ने मार्गं वा दक्षिणं नयेत् ।
रक्ताम्बरधर भूत्वा रक्तमाल्यानुलेपनः ॥ ३६ ॥

ज्वरेण मृत्युमाप्नोति नात्र कार्या विचारणा ।
ऊर्ध्वदीपं च पश्येत चञ्चलं वापि शाम्यति ॥ ३७ ॥

मासान्मरणमाप्नोति इति सत्यं षडानन ।
अधोज्योतिर्न पश्येत मध्यदेहे तु वै बुधः ॥ ३८ ॥

सप्तविंशद्दिनान्मृत्युरिति सद्भिरुदाहृतम् ।
याम्यादिदिग्दले ज्योतिरतसीकुसुमप्रभम् ॥ ३९ ॥

त्रयस्त्रिंशद्दिनान्मृत्युवतिरोगेण नित्यशः ।
नैर्-ऋत्यां दिग्दले ज्योतिः राजावर्तमणिप्रभम् ॥ ४० ॥

दृश्यते चार्धरात्रे च मृत्युर्मासं न संशयः ।

वारुणे दिग्दले ज्योतिर्दृश्यते स्फटिकप्रभम् ॥ ४१ ॥

चत्वारिंशद्दिनान्मृत्युः शास्त्रज्ञैः समुदाहृतः ।
वायव्यां दिग्दले ज्योतिः हरिद्रारससन्निभम् ॥ ४२ ॥

न दृश्यते यदा रात्रौ पञ्चाहान्मरणं भवेत् ।
मध्याह्ने तु अमावास्यां महद्भाण्डे जले गुह ॥ ४३ ॥

p. 108)

सुषिरा सूर्यबिम्बे तु दृश्यते घटिकैकतः ।
तस्य मृत्युर्ध्रुवं नित्यं त्रिपक्षान्निश्चयं भवेत् ॥ ४४ ॥

अमावास्यां घृते मायां चक्षुरूपं न पश्यति ।
तस्य मृत्युर्न संदेहो नात्र कार्या विचारणा ॥ ४५ ॥

गङ्गायमुनाभ्यां च घटिकात् घटिकां वहेत् ।
अष्टादशदिनान्मृत्युरिति शास्त्रस्य नित्यशः ॥ ४६ ॥

महत्सु तापे मध्याह्ने गगने दशपादतः ।
ध्वयापुरुषमापश्येत् त्रिमासान्मरणं भवेत् ॥ ४७ ॥

पुरुषः पाण्डराकारो दृश्यते गगने महत् ।

षण्मासान्मृत्युमाप्नोति सशिवस्तं न पश्यति ॥ ४८ ॥

पूर्वाह्ने चाष्टमपदे पुरुषं वै न पश्यति ।
कबन्धं दृश्यते तस्य त्रिमासान्मरणं भवेत् ॥ ४९ ॥

वामहस्ता कृष्णवर्णा गगने दृश्यते महत् ।
जाग्रे वा यदि वा स्वप्न त्रिमासं तस्य जीवितम् ॥ ५० ॥

खड्गहस्ता कृष्णवर्णा पाशहस्ता सुदारुणा ।
शिरस्युपरि गगने दृश्यते नररूपका ॥ ५१ ॥

द्विप * * * * प्नोति इति प्राहुर्मनीषिणः ।
छिन्ननासा कृष्णवर्णा पाशखड्गधरा महत् ॥ ५२ ॥

रक्ताम्बरधरा नारी रक्तमाल्यानुलेपना ।
गगने दृश्यते वत्स पाशेनैव तु बध्यते ॥ ५३ ॥

खड्गेन प्रहरेच्छासौ पञ्चाहान्मरणं भवेत् ।
कृष्णश्वा तु सुषुम्नाग्रे प्रविशेद्गृहमेव वा ॥ ५४ ॥

p. 109)

त्र्यहान्मरणमाप्नोति इति सत्यं षडानन ।

* * * * वालिपानं भवेच्चैव मुहुर्मुहुः ॥ ५५ ॥

पक्षान्मरणमाप्नोति इति शास्त्रस्य निश्चयः ।
रथेन करयुक्तेन रक्तवस्त्रवृतेन च ॥ ५६ ॥

रक्तमाल्याम्बरधरो दक्षिणायनमाश्रितः ।
यदि वा यदि वा स्वप्ने स पक्षान्मरणं भवेत् ॥ ५७ ॥

महोल्कापतितं मध्याह्ने चन्द्रादित्यमथापि वा ।
अकामो भूमिकम्पं वा दशाहान्मरणं भवेत् ॥ ५८ ॥

झनझन घनघनस्तनवाथ अशनिर्वा तटिध्वनिः ।
यदि पश्येन्मध्यदेहे द्विदिनेन स जीवति ॥ ५९ ॥

कौशिकं पिङ्गलं वापि बिलाव(डाल)ध्वनिमेव वा ।
मध्यदेहे यदा पश्येत् विशे * * * * * * ॥ ६० ॥

दशाहामध्यमाप्नोति मधुमेहेन वै ध्रुवम् ।
शास्ता स्वरं वा शास्तारं हृदये मध्यदेहके ॥ ६१ ॥

मुहुर्मुहुर्विरोत्तत्र भूलोकान्मरणं दश ।
कृष्णां गवां शृङ्गयोर्द्वे गृहीत्वा धावते यदि ॥ ६२ ॥

जठरेशूलं मुहुस्तत्र आक्षेपान्मरणं भवेत् ।
कोदण्डे शाश्वतस्थाने मूर्धान्ते द्वादशाङ्गुले ॥ ६३ ॥

बिन्दुदेशेन दृश्येत दिनानि त्रीणि जीवति ।
मृत्युनाश्रितं ध्यानं च सांप्रतं शृणु षण्मुख ॥ ६४ ॥

मध्यदेहे सपत्नी तु कर्णिकायां * * * * ।
प्रासादं चन्द्रबिम्बेन संपुटीकृत्य बुद्धिमान् ॥ ६५ ॥

p. 110)

आत्मप्रासादकबलं सदा ध्यायेत्समाहित ।
विवत्सरेण वै वत्स मृत्युनाशनमुत्तमम् ॥ ६६ ॥

ध्यायेद्वै द्वादशाब्दं तु सहस्राब्दं सजीवति ।
इन्द्रकोपनिभं ध्यायेत् प्रासादं शशिबिम्बकम् ॥ ६७ ॥

आत्मानं संपुटीकृत्य चतुर्थेन तु पण्डितः ।
बिन्दुनादशिखाक्रान्तं घटिका सप्तमा भवेत् ॥ ६८ ॥

वत्सरानेकविंशं तु पञ्चसहस्रं स जीवति ।
शङ्खकुन्देन्दुधवलं प्रासादं मध्यदेहके ॥ ६९ ॥

इन्दुना संपुटीकृत्य घटिका दश प्रत्यहम् ।
द्वात्रिंशद्वत्सरं ध्यायेत् षट्सहस्रं स जीवति ॥ ७० ॥

गोक्षीरधवलप्रख्यं प्रासादं मध्यदेहके ।
तस्य मध्ये तु चात्मानं चन्द्रबिम्बेन संपुटेत् ॥ ७१ ॥

द्वादशं घटिका वत्स त्रयोविंशत्तु वत्सरान् ।
स जीवेत्सप्तसाहस्रं वत्सरं तु षडानन ॥ ७२ ॥

द्रुतचामीकरप्रख्यं प्रासादान्मध्यदेहके ।
अधोर्ध्वं चन्द्रबिम्बेन सम्पुटीकृत्य बुद्धिमान् ॥ ७३ ॥

हृत्पिण्डं शातकुम्भेन घटिका पञ्चदशो भवेत् ।
चतुर्विंशद्वत्सरं तु सहस्राष्टौ स जीवति ॥ ७४ ॥

हृत्पद्मकोटरे धीमान् प्रासादं शङ्खसन्निभम् ।
तस्य मध्ये तु चात्मानं चतुर्थेन तु संपुटेत् ॥ ७५ ॥

पञ्चविंशद्वत्सरांस्तु घटिका षोडशो भवेत् ।
नव सहस्रं स जीवेत इति सत्यं षडानन ॥ ७६ ॥

p. 111)

प्रासादं चिन्तयेन्नित्यं हिमकुन्देन्दुसन्निभम्।
स चतुर्थेन वै हन्त बिन्दुनादसमन्वितम्॥ ७७ ॥

अमृतेन प्लावयेत्तत्र प्रासादं शशिना युतम्।
सप्तदश घटिका ध्यायेत् षड्विंशति तु वत्सरान्॥ ७८ ॥

अयुतं जीवति वै तत्र मन्त्रवीर्यप्रभावतः।
हृत्पद्मे मण्डले तत्र क्षेत्रज्ञं संपुटेन्नरः॥ ७९ ॥

प्रासादं मध्ये भावयेत् चतुर्थेन तु धीमता।
बिन्दुयुक्तो तु मेधावी सप्तविंशतिवत्सरान्॥ ८० ॥

अष्टादश घटिकासु एकचित्तेन भावयेत्।
अयुतं द्विसहस्रं तु स जीवेन्नात्र संशयः॥ ८१ ॥

कोदण्डद्वयमध्ये तु चन्द्राग्निरविमध्यगम्।
प्रासादं चिन्तयेद्वत्स हृदये सव्यमध्यगम्॥ ८२ ॥

प्रजापतेर्द्वादशेनैव बिन्दुयुक्तेन संपुटेत्।
जपासुमसमप्रख्यं नित्यमेव विचिन्तयेत्॥ ८३ ॥

प्रासादमुच्चरेद्धीमान् मात्राषोडशमेव च ।
* * * * * * * * एकचित्तेन बुद्धिमान् ॥ ८४ ॥

एकोनविंशद्घटिकामात्रे चैव सदा न्यसेत् ।
पञ्चदश सहस्रं तु स जीवति षडानन ॥ ८५ ॥

सुषुम्नाग्रे चिन्तयेत्पद्मं अष्टपत्रं सकर्णिकम् ।
प्रासादं चिन्तयेत्तत्र षोडशस्वरभूषितम् ॥ ८६ ॥

ध्यायेद्भृङ्गनिभं वत्स शशिना संपुटेत्सदा ।
बिन्दुयुक्तेन वै वत्स चतुर्थेन समन्वितम् ॥ ८७ ॥

p. 112)

प्लावयेदमृतेनैव आपूर्य तु समाहितः ।
होमकूपेषु सर्वेषु कृष्णरूपं विचिन्तयेत् ॥ ८८ ॥

मूर्धादितलपर्यन्तमिति कृष्णममृतं स्मरेत् ।
पलितस्तम्भनं ह्येतत् वत्सरैकोनविंशति ॥ ८९ ॥

विंशद्घटिका नित्यं तु अभ्यसेत्प्रयतो नरः ।
अयुतद्वयं स जीवेत ब्रह्मचर्यव्राते स्थितम् ॥ ९० ॥

सुषुम्नान्ते चतुरङ्गुल्ये श्वेतपद्मं सुशोभनम् ।
शतदलं चन्द्रबिम्बेन संपुटीकृत्य बुद्धिमान् ॥ ९१ ॥

प्रासादं चिन्तयेन्मध्ये अमृतेनैव प्लावयेत् ।
कालाग्निशिवपर्यन्तमिति श्वेतं विचिन्तयेत् ॥ ९२ ॥

मृत्युञ्जयमिदं योगं त्रिंशद्वत्सरमभ्यसेत् ।
जरामरण निमुक्तमयुतत्रयं स जीवति ॥ ९३ ॥

शङ्खगोक्षीरधवलं सहस्रदलपद्मकम् ।
आत्मानं तत्र मध्ये तु प्रासादाग्रे विचिन्तयेत् ॥ ९४ ॥

सप्तवर्गचतुर्थेन बिन्दुनाद समन्वितम् ।
चन्द्रबिम्बामृतेनैव विग्रहं प्लावयेत्ततः ॥ ९५ ॥

पञ्चत्रिंशत्समा वत्स द्वात्रिंशद्धटिका स्मरेत् ।
अयुतं चतुर्थकं जीवेत् द्विरष्टवर्णकृतिः ॥ ९६ ॥

तस्योर्ध्वं चतुरङ्गुल्यं अयुतं दलशोभितम् ।
तस्य मध्ये तु प्रासादं शशिना संपुटीकृतम् ॥ ९७ ॥

स्रवन्तममृतं ध्यायेत् सुषुम्ना भिन्नमस्तकम् ।

तेन प्लावितमात्मानं आपूर्यन्तं विचिन्तयेत् ॥ ९८ ॥

p. 113)

द्वात्रिंशद्वत्सरं ध्यायेत् द्वात्रिंशद्घटिका (भवेत्त्) भवेत् ।
अयुतं पञ्चकं जीवेन्नात्र कार्य विचारणा ॥ ९९ ॥

शतस्सहस्त्रदलं पद्ममतिश्वेतं तु निर्मलम् ।
प्रासादं चिन्तयेद्विद्वान् आत्मानं तस्य मध्यगम् ॥ १०० ॥

शशिना संपुटीकृत्य योगपीठमधोमुखम् ।
स्त्रवन्तममृतं ध्यायेत् आपूर्य प्लावयेद्बुधः ॥ १०१ ॥

पञ्चत्रिंशद्वत्सरं ध्यायेत् घटिका तावदेव तु ।
गोक्षीरधवलं सौम्यमापादतलमध्यगम् ॥ १०२ ॥

आपूर्यं चिन्तयेद्योगी लक्षमेकं स जीवति ।
रेचकं तु परित्यज्य पूरकं तु सदाभ्यसेत् ॥ १०३ ॥

किञ्चिन्निर्व्याण मायान्तमथ सा मृत्युनाशनम् ।
आत्मनासिकयाभ्यन्तं जठराभ्यन्तरान्तकम् ॥ १०४ ॥

स्फटिक प्रथमं सूक्ष्ममाधारं चिन्तयेद्बुधः ।

तस्य मध्ये तु चात्मानं शशिना संपुटीकृतम् ॥ १०५ ॥

समरसं भावयेत्तत्र मृत्युनाशनमुत्तमम् ।

खमध्ये कुरुचात्मानं आत्ममध्ये तु खं कुरु ॥ १०६ ॥

अशरीरात्मकः कृत्वा न किञ्चित् विचिन्तयेत् ।

साक्षान्मृत्युञ्जयो योगो महाप्रलयं स जीवति ॥ १०७ ॥

रक्तबुद्बुदसंकाशमाकाशं बिन्दुदैवकम् ।

समरसी भावयेद्योगी तेन मृत्युविनाशनम् ॥ १०८ ॥

* * * * * * * * उत्तरे नर?सन्निभम् ।

समरसं भावयोगी मृत्युनाशनम् ॥ १०९ ॥

p. 114)

कदम्बगोलकाकारं रक्तबुद्बुदसन्निभम् ।

तस्य मध्ये तु चात्मानं सततं भावयेद्बुधः ॥ ११० ॥

* * * * * * * * * * न किञ्चिदपि चिन्तयेत् ।

मृत्युञ्जयं परं ह्येतत् अम्बरत्वमवाप्नुयात् ॥ १११ ॥

अच्छस्फटिक संकाशं बिन्दुरी(रू)पमनौपमम् ।

समरसीभावयोगेन मृत्युनाशनमुत्तमम्॥ ११२॥

गोक्षीर धवल प्रख्यं बिन्दुरूपं सुनिर्मलम्।
मध्यदेहे तु सततं समरसं भावयेद्बुधः॥ ११३॥

एषमृत्युञ्जयो योगमजराजरमाप्नुयात्।
चुलुकां वा पिबेत्प्रातः सोमामृतजलोषितम्॥ ११४॥

ध्यात्वा प्रासादममृतं मृत्युं जित्वा न संशयः।
स्वरेण पेषयेच्चन्द्रः चन्द्रमध्ये शिवं भवेत्॥ ११५॥

शिवमध्येन? चात्मानमभ्यसेन्मध्य शुके?।
रेचकं पूरकं त्यज्य कुम्भकं तु समभ्यसेत्?॥ ११६॥

स्मरसीन्द्रमवस्थाय मृत्युनाशनमुत्तमम्।
अकारं मूर्ध्नि विन्यस्य आकारं तु ललाटको॥ ११७॥

इ ई च क्षुद्वये न्यस्य उ ऊ श्र * *? योन्र्यसेत्।
ऋ ॠ सा?माद्वये न्यस्य ऌ ॡ गण्डंद्वये न्यसेत्॥ ११८॥

ए ऐ लोलुद्वये न्यस्य ओ औ ओष्ठद्वये न्यसेत्।
अं अः दन्तद्वये न्यस्य * *? तं विन्यसेद्बुधः॥ ११९॥

कवर्गं दक्षिणहस्ते चवर्गं वामके न्यसेत्।
टवर्गं दक्षिणे पार्श्वे?मवर्गं वामपादके ॥ १२० ॥

p. 115)

पपौ दक्षिणपार्श्वे तु बभौ वै वामपार्श्वके।
हकारं हृदये न्यस्य मकारं नाभिदेशतः ॥ १२१ ॥

यकारं त्वक्प्रदेशेषु रेफं रुधिरदेशतः।
लकारं मांसदेशे तु वकारं मेददेशके ॥ १२२ ॥

शकारमस्थिदेशे तु षकारं मज्जदेशतः।
सकारं शुक्लमित्युक्तं हकारं मेढ्रदेशतः ॥ १२३ ॥

लकारं वृषणयोर्न्यस्य वकारं पादमध्यगे।
बिन्दुयुक्तेन सर्वं तु न्यसेदेता ननुक्रमात्॥ १२४ ॥

एवं त्यक्त्वा विधानेन पश्चाद्ध्यानं समारभेत्।
सर्वकर्मसु मेधावी मातृकां न्यस्य तत्त्वतः ॥ १२५ ॥

अर्चनं जपनं ध्यानसमाधिं हुतमेव च।

इति कालोत्तरे अयुतक्षयसंहितायां कालचक्रपटलः एकविंशतिः ॥ २१ ॥

॥ श्रीः ॥

ईश्वर उवाच-

स्पर्शयोगं प्रवक्ष्यामि भावयोग समाधनम्? ।
सर्वव्यापिवरं? शुभ्रं वयसः स्थापनं परम् ॥ १ ॥

वलीपलीमलाशं च सदा सौम्यायवर्धनम् ।
यद्वयसि स्पर्शाभ्य? वपनबीजः? पद्यनन ॥ २ ॥?

तद्वयसि मेधावि? नात्र कार्या विचारणा ।?
कलियुगे * * *? तु शास्त्रोक्त तु समारभेत् ॥ ३ ॥

p. 116)

षडंशे द्वापरे प्रोक्तं त्रेतायां तु त्रिंशकम् ।
कृतयुगे सिद्धिमाप्नोति शास्त्रोक्तं च न संशयः ॥ ४ ॥

शुभदेशे तु वै वत्स समं कृत्वा प्रयत्नतः ।
नैमिशे पुष्करे वापि कुरुक्षेत्रे सुखप्रदे ॥ ५ ॥

गङ्गाद्वारे प्रयागे वा गङ्गासागरसंगमे ।

अष्टभासे प्रभासे वा देवदारुवनेऽपि वा ॥ ६ ॥

कैलासमन्दरे वापि मेरुपर्वतमस्तके ।
हिमवद्धेमकूटे च निषेधे नीलपर्वते ॥ ७ ॥

महेन्द्रमलये सह्ये विन्ध्यपर्वतमस्तके ।
श्रीशैलेस्वामिशैले वा गोदावर्यां सरस्वतौ ॥ ८ ॥

गोकर्णे शङ्कुकर्णे वा कन्यातीर्थे तु कारयेत् ।
सिन्धुसरस्तीरे वा सरस्वत्यास्तटेपि वा ॥ ९ ॥

* * * * * * * * समाधिस्थानमारभेत् ।
ब्राह्मणस्य महीश्वेता रक्तभूमिस्तु भूपतेः ॥ १० ॥

वैश्यस्य वसुधा पीतां कृष्णभूमिश्चतुर्थके ।
विप्रस्य घृतगन्धातु रक्तगन्धा नृपस्य तु ॥ ११ ॥

वैश्यस्य मूत्रगन्धा तु शूद्रं विष्टेनुगन्धिनी ।
वर्णं गन्धं रसं ज्ञात्वा योगवेश्म समारभेत् ॥ १२ ॥

दीक्षास्थानं शिवस्थानं स्नपनस्थानमेव च ।
योगस्थानानि सर्वाणि विधिरेष प्रकीर्तितः ॥ १३ ॥

प्रासाद् मण्डपं वापि कूटं वा गृहमेव वा ।
त्रिभूमिं वा द्विभूमिं वा एकभूमिमथापि वा ॥ १४ ॥

p. 17)

मृददादृष्ट्या केशैर्वा कारयेद्भवनं शुभम् ।
कवाटार्गलसंयुक्तं प्राकारैर्दीर्घकैर्युतम् ॥ १५ ॥

कुसुमद्रुमसंकीर्णं पनसाम्रादिभिर्युतम् ।
नालिकेरैः कमुकैश्च पुंनागवकुलैर्युतम् ॥ १६ ॥

शमी बिल्वपलाशाद्यैः कुशाकाशादिभिर्युतम् ।
गावो वसेयुः सप्ताहं मपतिर्दशभिर्नव ॥ १७ ॥

लक्ष्मीखचितचैत्यादि अग्रे चोरादिवर्जितम् ।
उत्तरे तु जलग्रामं पश्चिमे पद्ममण्डपम् ॥ १८ ॥

दक्षिणे तु बहिस्थानं सत्यस्थानं तु पूर्वके ।
बर्बरैश्च पुलिन्दैश्च किरातैश्च विवर्जितम् ॥ १९ ॥

कुथचेलाजिनास्तीर्णं प्राङ्मुखो वाप्युदङ्मुखः ।
* स्ति? त्वासनं बद्धा नाडीशोधनमारभेत् ॥ २० ॥

उरुस्थोत्तानचरणः सव्ये न्यस्येतरं करः ।
तालुस्था चलजिह्वा च संवृतास्यः सुनिश्चयः ॥ २१ ॥

नासाग्रदिक्समासीनो दन्तैर्दन्तेन संस्पृशन् ।
प्रणिपत्य शिवं शान्तं योगीन्द्रः शशिशेखरम् ॥ २२ ॥

भवं भवकरं योगमारभेदनुपूर्वशः ।
नासाग्रे शशभृद्बिम्बंवत् ज्योत्स्नाजालवितानितम् ॥ २३ ॥

नीय तुरीयसंयुक्तं चन्द्रमध्ये तु संस्थितम् ।
पञ्चाकृत्याथ निष्क्रम्य इडया वर्मणा सह ॥ २४ ॥

आपूर्यं रेचयेत्पश्चात् पिङ्गाया चाग्निवर्मणा ।
यद्द्वितीयं बिन्दुयुक्तं त्रिकोणे अनलायुते ॥ २५ ॥

p. 18)

पूर्ववत्पुरतो ध्यात्वा ज्वरज्वालावलीयुतम् ।
पूर्ववत्पूरयेन्नाड्या प्राणं दक्षिणया गुह ॥ २६ ॥

तद्वद्विरेचयेत्पश्चात् इडायां शनकैः क्रमात् ।
त्रिचतुः सवनं मासं पक्षं वै मासमभ्यसेत् ॥ २७ ॥

नाडीविशुद्धिमाप्नोति पृथक् चिह्नोपलक्षितम् ।
ईषद्वैशेषिकोपायं मानसप्रणवेन च ॥ २८ ॥

रेचकाद्यांश्च क्रम? पूर्ववत्सततोऽन्यथा ।
मासत्रिकं त्रिषवणेष्वनया शुद्धिरीरिता ॥ २९ ॥

शरीरलघुतादीप्तिः वह्नौ जठरवर्जितः ।
ज्ञानाभिव्यक्तिरित्येतच्छिन्नं तच्छुद्धिसूचकम् ॥ ३० ॥

इ *? शुद्धा लिखान्तस्था नाडीमार्गो जितानसः ।
* * * न? समानस्तु व्यानोऽथोदान एव च ॥ ३१ ॥

कला? कर्मश्च कृकरो देवदत्तो धनञ्जयः ।
एतेषां विजयं वत्स * * * * * * र्णकान् ॥ ३२ ॥

प्राणे ** भिनासाभूपादाङ्गुष्ठान्तगोचरा ।
नीलवर्णप्रतीकाशं रेफादि बिन्दुसंयुतम् ॥ ३३ ॥

हृदादिस्थानयोगेन पादाङ्गुष्ठान्तरेचकम् ।
रेचकं पूर्वकं चैव कुम्भकं तु सदाभ्यसेत् ॥ ३४ ॥

प्रथमं द्वात्रिंशमात्रं तु पूरकं चाभ्यसेद्बुधः ।

कुम्भकस्तु चतुष्षष्टिदिवसः शिव संयुतम् ॥ ३५ ॥

कुम्भकाम् द्विगुणं रेचकं शनैरेव विरेचयेत् ।

* * * * समभ्यस्य द्विगुणं पुनराचरेत् ॥ ३६ ॥

p. 119)

चतुर्थे वत्सरे वत्स द्वात्रिंशद्गुरुराचरेत् ।

पञ्चमे वत्सरेमन्त्री चतुष्षष्टिगुणं भवेत् ॥ ३७ ॥

सर्वप्राणजयोपायं वर्षितं हि षडानन ।

मरूद्विजयमार्गेण विकल्पं केशवेन च ॥ ३८ ॥

अङ्गुष्ठानाभिनासाग्रं स्थानेष्वेष्वपि धारणम् ।

गत्यागतिप्रयोगोऽयं पूर्ववत्क्रमशोऽपरम् ॥ ३९ ॥

पूरकादिविवृद्धया तद्रेचकाग्रास संश्रियान् ।

उक्तः क्रमाद्द्विवर्षोऽयं केशवेनानुवर्णितम् ॥ ४० ॥

कृष्णः कानिष्ठकः पुना?युपार्ष्णिं समाश्रितम् ।

वि * *? जानुगुल्फं च उभौ सन्धिश्च पृष्ठसौ ॥ ४१ ॥

* ? प्रतिलोमस्थः पृष्ठे बिन्दुनियोजितः ।

* *? तु संयुक्तः पूरकादीन् स पूर्ववत् ॥ ४२ ॥

* *? कादिकयाज्ज्ञेयो वालप्रस्थो नियोगतः ।

अ * * कं? शवोऽप्येवमभ्यासः परिगीयते ॥ ४३ ॥

गतात्मनिः? प्रयोगो वा रोगवान् स्थानयोगतः ।

इति रेचकः प्रस्थानः? पूरके हंससंश्रियात् ॥ ४४ ॥

विजयोपाय इत्याहं ईश्वरः शिवसंयुतः ।

हृन्नाभिः सर्वसिद्धिस्थः कटिकूर्परजानुकः ॥ ४५ ॥

द्वात्रिंशत्सन्धिदेशेषु शुक्लवर्णः प्रकीर्तितः ।

सौम्यन्बी?जसमोपेतं प्रासादं बिन्दुसंयुतम् ॥ ४६ ॥

समाधिस्थान संरोधो *? ने विजयवर्णितम् ।

अनारतः क्रियायोगात् रेचकः पूर्वयोः क्रमात् ॥ ४७ ॥

p. 120)

हस्तमात्रद्वयाद्याति विजयं शीघ्रमेव च ।

हृत्कण्ठतालुभ्रूमध्ये कर्णयोरक्षयोरपि ॥ ४८ ॥

मूर्ध्ना तु कार्टिकः पृष्ठः इति संस्थानिलोहितः ।
प्रसादेन तु संयुक्तः अनिलात्तु तृतीयकः ॥ ४९ ॥

पार्श्वयोरुभयोर्वत्स हस्तयोरुभयोरपि ।
करयोरुभयोश्चैव कक्षयोरुभयोरपि ॥ ५० ॥

उदानस्थानमेवं तु वर्णरूपमथा शृणु ।
भृङ्गवर्णं उदानस्तु यकारस्थोत्तरद्वयम् ॥ ५१ ॥

जङ्घोरु मणिबाहू च कण्ठकूपे हृदि स्थितः ।
न? कुक्षिश्च पृष्ठश्च सर्वाङ्गसर्वसन्धिषु ॥ ५२ ॥

इकारं रक्तवर्णं तु शिवेन तु समायुतम् ।
पूर्वत्पूरकं चैव रेचकं कुम्भकं तु वा ॥ ५३ ॥

गत्यागतिप्रयोगेण व्यानोदानजयं भवेत् ।
यकारादिचतुर्थं तु भान्तमेव तु पञ्चमम् ॥ ५४ ॥

प्राणादिबीजसंयुक्तं प्रासादेन न संशयः ।
प्रासादेन तु देवेन नाथादिविजयं कुरु ॥ ५५ ॥

पूरकं कुम्भकं चैव रेचकं च तथा कुरु ।

प्रतिलोमक्रमं कुर्यात् केशवस्य तु धीमतः ॥ ५६ ॥

हृत्कण्ठनाभि चक्षूषि सर्वाङ्गं च धनञ्जयः ।
सर्ववायुजयमिच्छेत् विद्याभ्यासप्रयोगतः ॥ ५७ ॥

प्राणावृत्तिमपानेन संयोज्योत्कृष्य संहृदि ।
उदानमानीय तत्रैव व्यानेन तु समन्वितम् ॥ ५८ ॥

p. 121)

समानं तत्र वानीय नागं कूर्मं तथैव च ।
कृकरं देवदत्तं च धनञ्जय कृष्यतत्त्ववित् ॥ ५९ ॥

* * * * * * * * प्रासादेन समन्वितम् ।
कर्णतालुमुखं * * * * * * * * * * ॥ ६० ॥

नासाग्रनेत्रं भ्रूमध्ये ललाटतटमूर्धनि ।
कृत्वा कुर्यात्तदूर्ध्वं वै सर्वशक्तिं नयेत्पुनः ॥ ६१ ॥

बिन्दुनादं न * * * * * * * * * ।
ततो नयेच्छिवपदं शाश्वतं मोक्षमव्ययम् ॥ ६२ ॥

इत्येवं सर्ववायूनां युगपज्जयमार्गतः ।

पवनं जयमार्गोऽयं तन्त्रेऽस्मिन् विजये परे ॥ ६३ ।

सप्तमार्गप्रकारं तु स्पर्शयोगः प्रवक्ष्यते ।

पूरकं रेचकं चैव कुम्भकोऽप्यधरे परः ॥ ६४ ॥

प्रत्याहारो निरोधश्च स्वभेदास्त्वभिसंमताः ।

नासामुखैर्ब्रह्मरन्ध्रैः यद्वायुं पूरयेदिह ॥ ६५ ॥

कोणस्य पूरकं वायुप्रासादेन समाहितः ।

देशकलाद्यवच्छिन्नं कर्तव्यो विजितात्मना ॥ ६६ ॥

संपूर्णकुम्भवद्वायुः अङ्गुष्ठान्मूर्ध्निदेशतः ।

कुम्भकं तु स विज्ञेयः स्पर्शयोगे तु सप्तमम् ॥ ६७ ॥

मूर्ध्नि ललाटभ्रूमध्य * *? तालुरन्ध्रयोः ।

कर्णहृज्जठर नाभिगलेमेढ्रे च मामुनि? ॥ ६८ ॥

जठरे स्फिचो च चरणाषड्गुष्ठौ रेचयेत्क्रमात् ।

कुम्भकात्त्रिगुणः वत्स षड्गुणं नवगुणं तु वा ॥ ६९ ॥

p. 122)

द्वादशं षोडशं वापि वत्सराद्रेचयेत् क्रमात् ।

अपामात्पूरकस्तद्वत् कुम्भकस्थं तिरोधनात्॥ ७० ॥

नाभिहृत्कण्ठदेशेषु कालसंख्या समन्वितः।
वानप्रस्थश्चार्दनोक्त रूपमकुम्भः प्रकीर्तितः॥ ७१ ॥

रेचितस्य बहिः कुम्भो वायुकुम्भो वनोमतः? ।
अपानादूर्ध्वमाकृष्य हृदयादिषु धारणम्॥ ७२ ॥

उत्तरस्तु स विज्ञेयो विपरीतस्ततोऽधरः।
अङ्गुष्ठादि च मूर्धान्तं पूर्वोक्तस्थानमागतः॥ ७३ ॥

* ?नात्स्थानान्तरोत्कर्षः प्रत्याहारो निगद्यते।
देहं वासान्तरं व्याप्तं निर्वाणे तु लयं गतः॥ ७४ ॥

निरोधस्तु स विज्ञेयो मृत्युनाशनमेव हि।
एवं वै सर्ववायूनां विजयोपायसंग्रहः॥ ७५ ॥

अथवा सर्ववायूनां देहमध्ये तु सर्वभेत्।
प्रासादेन तु कूटेन पूरयित्वा तु कुम्भकम्॥ ७६ ॥

निर्गगे? रेचयेद्वत्स लघूयाय विनिर्णयम्।
समा? प्रच्छदनं पूर्वं अं किंचित्स्पर्शं तु कोष्ठके॥ ७७ ॥

पुनर्वै पूरकं कुर्यात् कुम्भकं तदनन्तरम्।
निर्वाणे जीर्णस्पर्शं तु केशवेन तु वर्णितम्॥ ७८॥

नाभिहृत्कर्णकेशेषु * * * * *? संयुतः।
वानरच्छ * *?मुक्तं * * * * * * * * * तम्? ॥ ७९॥

रेचिकस्य बहिस्तम्भां * * * * * परोमतः।
अपि वोर्ध्वं समुत्कृष्य नाभिदेशे तु धारणम्॥ ८०॥

p. 123)

तवर्गं वरुणाचारे पवर्गं वायुचारके।
यवर्गमुत्तराचारे रवर्गमीशानचारके॥ ८१॥

प्रासादं नाभिचारे तु षकारं न मिरुच्यते।
क्रमात्सञ्चिन्त्य वै वत्स आपूर्य कुम्भकेन च॥ ८२॥

नादं बिन्दुं च शक्तिं च महेशं च सदाशिवम्।
शिवं नयेत्पुनर्वत्स ? निरुपद्रववैभवम्॥ ८३॥

चक्राधारमिदं वत्स स्पर्शनानाजयं परम्।

इति कालोत्तरे स्पर्शयोगे दशवायुचक्रध्यानपटलो द्वाविंशत्तमः ॥ २२ ॥

॥ श्रीः ॥

ईश्वर उवाच-

मन्सालोच्य सर्वं तु संरोध्य प्रतिशर्वरी ।

मध्यदेहे तु चित्तं तु शिवे परमकारणे ॥ १ ॥

ततस्तन्मयतां याति शिव एव न संशयः ।

कपालरन्ध्रे रेच * * * * * गमेव च ॥ २ ॥

अनुमानं प्रवक्ष्यामि बीजं वर्णं च दैवतम् ।

प्रासादं चिन्तयेन्नाभौ नादबिन्दुसमन्वितम् ॥ ३ ॥

निरुद्धसर्ववायुंश्च नाभिमध्ये तु स्थापयेत् ।

पूरकः तु इडायां वा सुषुम्नायां तु पूरयेत् ॥ ४ ॥

हृत्सरोरुहमध्ये तु राजावर्तमणिप्रभम् ।

संचिन्त्य मनसा युक्तं द्वारोद्घाटनमुत्तमम् ॥ ५ ॥

p. 124)

तालुरन्ध्रेण संयोज्य सुषुम्ना तु नयेच्छनैः ।

हृत्कण्ठतालुभ्रूमध्य सुषुम्नायां नयेच्छिवम् ॥ ६ ॥

मनसस्पर्शयुक्तेन पूरावू(पू)रित वै निलः ।
उद्घाटित शिखद्वारः प्रासादेन तु शक्तिः ॥ ७ ॥

आसने तु विते योगे प्राणायामेवमिर्जितः ।
परकायं प्रवेशायोपायं यत्नेन चाभ्यसेत् ॥ ८ ॥

हृत्सरोरुहसंलीनं मण्डलत्रय मध्यगः ।
गुणत्रयसमोपेतो जीवोऽहं स स्वरूपधृक् ॥ ९ ॥

साष्टपद्मापसव्ये तु स वेनोकारलक्षितः ।
मकारं मध्यदेहे तु नादबिन्दुर्विरोधस(तः) ॥ १० ॥

धर्माधर्मेक्षणं पुरुषः पुर्यष्टकसमायुतः ।
चिद्देहं सर्वशुक्लं तु वर्णेनैव समायुतम् ॥ ११ ॥

रजस्तमोस्य वंश्यस्तु मञ्चेदं पङ्कजासनम् ।
ब्रह्मग्रन्थिं विनिर्भिद्य गच्छेद्वायुपुरात्ततः ॥ १२ ॥

पिङ्गलायां विशेद्योगी हृत्सरोरुहकर्णिकाम् ।
तत्र स्थित्वा समस्तानि स्वस्वस्थाने निवेशयेत् ॥ १३ ॥

प्राणापानसमानश्च उदानोव्यान एव च ।

नागः कूर्मस्तथा प्रोक्तः कृकरो देवदत्तकः ॥ १४ ॥

धनञ्जयश्च दशमः स्वस्वस्थाने निवेशयेत् ।

श्रोत्रं त्वक्चक्षुषीजिह्वा घ्राणश्चैव तु पञ्चमः ॥ १५ ॥

बुद्धीन्द्रियाणि पञ्चैव स्वस्वस्थाने निवेशयेत् ।

वाक्पादौ पाणिपायूवा उपस्थश्चैव तु पञ्चमः ॥ १६ ॥

p. 125)

कर्मेन्द्रियाणि पञ्चैव स्वस्वस्थाने निवेशयेत् ।

मनोबुद्धिरहंकारो महानन्तश्चतुष्टयम् ॥ १७ ॥

हृदये निवेदयेद्वत्स उपर्युपरि बुद्धिमान् ।

एतेन देहयोगेन पूर्ववन्मोदते वशीन् ॥ १८ ॥

देहान्त्यराण्यनेकानि विशेदेकोपदेच्छया ।

इति प्रवेशनविधिः मृतदेहस्य षण्मुख ॥ १९ ॥

जीवदेहप्रवेशनं प्रवक्ष्यामि समासतः ।

पूर्वोक्तद्वारं निष्क्रम्य शक्तिबीजपुस्सरम् ॥ २० ॥

वायुद्वारेण चाविश्य नाभिचक्र समाश्रितः ।
महामायेन निर्गच्छेत् पूर्वोक्तपयबीजतः ॥ २१ ॥

नाभिचक्रं ततो गच्छेत् सुषुम्नाया समाहितः ।
मण्डलाश्रयमध्ये तु हृत्सरोरुहकर्णिकम् ॥ २२ ॥

तत्र तत्प्राणसंचारं निरुध्यात्मीयचानिलैः ।
यावद्विगत चेष्टस्तु तावदेव निरोधयेत् ॥ २३ ॥

असौ पतति भूमौ तु तावत्तिष्ठेत्सुधीरतः ।
इन्द्रियाणि समस्तानि प्राणादिकचतुष्टयम् ॥ २४ ॥

आशाक्रियां निरोध्येत स्वस्वस्थाने तु पण्डितः ।
देहान्तेन विनिर्मुक्तो संविभक्तेन्द्रियः क्रमात् ॥ २५ ॥

तिष्ठेत् सर्वेषु कार्येषु पूर्वदेहं यथा परम् ।
* * * * वै वत्स सहस्रदेहं विशेद्बुधः ॥ २६ ॥

स्वदेहजीर्णे तु मतिमान् अन्यदेहं विशेत्सदा ।

इति कालोत्तरे स्पर्शयोगविधाने मृतकार्यजीवकार्यप्रधानं नाम त्रयोविंशतिः पटलः ॥ २३ ॥

p. 126)

॥ श्रीः ॥

ईश्वर उवाच-

अथ वै ज्ञानवैराग्यं संस्कारात्सत्यमेव हि ।
महायोगं प्रवक्ष्यामि सर्वकामार्थसाधनम् ॥ १ ॥

ज्ञानसागरविस्तीर्णाच्छिवस्यैव अनुग्रहात् ।
पद्ममध्ये प्रविश्यैतत्प्रासादाख्यं शिवं पदम् ॥ २ ॥

तत्र स्वं मण्डलं ध्यायेत् कूपैः प्रकृतिरूपकम् ।
शशाङ्कमण्डलं तत्र किञ्चिद्धीनं विचिन्तयेत् ॥ ३ ॥

पुरुषात्मकं तस्योपरि ज्योतिरूपमनौपमम् ।
कृशानुमण्डलं पूर्वं त्रिकोणं बीजमन्त्रतः ॥ ४ ॥

तस्योपरि चन्द्रबिम्बं यच्चतुर्थेन संयुतम् ।
अग्निबिम्बत्रयं हीनं सूर्यमण्डलमुत्तमम् ॥ ५ ॥

सूर्यबिम्बान्मन्त्रयोगी चन्द्रबिम्बमनुत्तमम् ।
तस्योपरिष्टात्पुरुषं पञ्चविंशक संयुतम् ॥ ६ ॥

राजावर्तमणिप्रख्यं अतसीकुसुमप्रभम् ।
माणिक्कवत्प्रभादिव्यं किञ्चिद्भृङ्ग समप्रभम् ॥ ७ ॥

अङ्गुष्ठमात्रमुत्सेधं बालार्कशतकल्पितम् ।
ईश्वराख्यं तु तत्तत्त्वं तेनेदं प्रेर्यते जगत् ॥ ८ ॥

तन्मध्ये तु शिखा तन्वी स्फुरत्सौदामिनीप्रभा ।
विद्याशक्तिं तु तामाहुः तत्परः परमः शिवः ॥ ९ ॥

एवं क्रमाद्विचिन्त्याथ चेतसा शिव तन्मयः ।
तिष्ठेत्समभ्यसंस्तावं निरुद्धाशेषवृद्धिकान् ॥ १० ॥

p. 127)

चेतस्तन्मयतां याते तावत्तद्भावभावतः ।
इति साक्षात्कृताशेषः सर्गसंहारकारकः ॥ ११ ॥

तत्र त्वं प्राप्य वै सम्यक् ब्रह्मरन्ध्राद्विनिर्गतः ।
रश्म्यहः शुक्लपक्ष षण्मासोत्तरवत्सरान् ॥ १२ ॥

सुरालयसमुद्भाव स्वच्छशाङ्ककलितक्रमः ।
एते द्वादशादित्यास्तु रुद्रैकादश ईश्वरः ॥ १३ ॥

नवशक्ति नवालक्ष्मी सावित्री धरणीति च ।
ईश्वरस्य महाशक्तिर्मनोन्मनी परावरा ॥ १४ ॥

मूर्तिर्द्वादशशक्तिस्तु अधिष्ठित महादशाः ।
तेन नीतं शिवं गच्छेद्विगताशेष कल्मषः ॥ १५ ॥

नित्यं विशुद्धं संतृप्तमानन्दमनिलं ध्रुवम् ।
सर्वज्ञं सत्यसंकल्पं सर्वकारणकारणम् ॥ १६ ॥

शिवरूपं परं प्राप्य सर्वसंक्लेशनाशनम् ।
जिताशेषामरुद्वृत्तैः मोक्षोपायस्तु वर्णितः ॥ १७ ॥

पूर्वतत्त्वकृताभ्यासादन्यदेव तु देशिकः ।
अनेन याति निर्वाणं मृत्युर्देहे व्यवस्थितः ॥ १८ ॥

उक्तसमासक्तचित्तो तेन वायुजयं विना ।
स्वेच्छयानिर्गतो देहात् मुक्तिं याति यथानरः ॥ १९ ॥

दिव्योपायं प्रवक्ष्यामि बीजसारसमन्वितम् ।
तृतीयवर्गमन्त्रस्थमथो वह्निमरुद्धृतम् ॥ २० ॥

दशषष्ठस्वरोपेतं बिन्दुशेखरभूषितम्।
विन्यस्य नाभौ बीजेशं हृदिन्यस्य तथा परम्॥ २१॥

p. 128)

यत्तृतीयसुसंयुक्तं पूर्ववर्णेन संयुतम्।
वर्णं वर्णेश्वरं पश्चादर्वाक् शिरसि विन्यसेत्॥ २२॥

पूर्ववर्ण समायुक्तं हृदयादि क्रमान्न्यसेत्।
प्रासादेन तु संयुक्तं पवित्रैरङ्गसंयुतम्॥ २३॥

मध्यदेहे न्यसेद्वत्स समरसं भावमाश्रयेत्।
मनोयात्यमहीभावं ततो निर्वाणमाप्नुयात्॥ २४॥

निर्वाणं मृत्युनाशं तु अयं वै एकमेव तु।
मृत्युञ्जयमिदं योगं मध्ये देहे तु भावयेत्॥ २५॥

पूर्वं हृदयनाभिं तु तत्तो गच्छेत्तु मध्यगम्।
शिवस्य परतो ध्यायेत् पश्चिमद्वारमुत्तमम्॥ २६॥

संपूज्य विधिवद्देवं ध्यायेन्नित्यमतन्द्रितः।
सर्वज्ञं सर्वकर्तारं सर्वतोऽक्षि शिरोमुखम्॥ २७॥

सकलीकृत्य चात्मानं ध्यायेच्छिवमनामयम् ।
ज्योतिरूपं परं दिव्यमष्टदिगीशसंयुतम् ॥ २८ ॥

ध्यायेद्यामस्तन्त्रित्वात् पूरकादिविवर्जितम् ।
मृत्युञ्जयं परं ह्येतत् षण्मासाभ्यासयोगतः ॥ २९ ॥

अष्ट प्रत्ययमाप्नोति त्रिमासान्नात्र संशयः ।
अथवा * * * * * * * ब्रह्मणः पदम् ॥ ३० ॥

तत्त्वान्तर्गतवित्तः सन् जपेदष्टोत्तरं शतम् ।
क्षणात्प्राप्नोति तत्स्थानं यत्तन्निर्वाण संज्ञितम् ॥ ३१ ॥

परमं ध्येयमेवं हि तन्मार्गस्येन * * * ।
* * * * * रामन्त्री शिवं तत्स्थैक मानसः ॥ ३२ ॥

p. 129)

एवं वशीकृतप्राणो धारणादिसमभ्यसेत् ।
धारणा शिवतत्त्वादौ वृत्तिरोधं चरेषु तत् ॥ ३३ ॥

तद्वृत्तिसन्ततध्यानं तदर्थाभासमात्रकम् ।
स्वरूपेणैव शून्यं तत् समाधिर्योग उच्यते ॥ ३४ ॥

इति तृतीय निवृत्तिरेकस्मिन् द्विजोत्तम (?) ।
उक्तस्थि * सनासीनो विरेच्य पवनं शनैः ॥ ३५ ॥

पूरयेद्वै इडायां तु पादाङ्गुष्ठान्तमादितः ।
पादाङ्गुष्ठे चिरं रुद्ध्वा मनस्तत्रैव संस्थितः ॥ ३६ ॥

पार्ष्णिदेशे तथा गुल्फे जङ्घाजानुद्वये क्रमात् ।
ऊरौ च मेढ्रे नाभौ च इति कर्णे तु धारयेत् ॥ ३७ ॥

तालुरन्ध्रे भ्रुवोर्मध्ये सुषुम्नान्ते द्वादशे स्थितः ।
घटिकार्धं क्रमादूर्ध्वं शिवे यामस्तु संस्थितः ॥ ३८ ॥

मृत्युञ्जयमिदं वत्स साक्षान्निर्वाणमृच्छति ।
अभ्यसेद्वत्सरं चैक मयुतायुर्भविष्यति ॥ ३९ ॥

यावद्ब्रह्मपुरं तस्मात् नयेदुक्तेन वर्त्मना ।
पादाङ्गुष्ठान्तमानीय मध्यदेहे तु संस्थितः ॥ ४० ॥

ततो विरेचयेद्वायुं प्राणसंस्थेन वर्त्मना ।
पूर्वोक्तस्थानयोगेन धारणा घटिका भवेत् ॥ ४१ ॥

यामं निरुद्ध्य ऊर्ध्वाधस्ततो मृत्युं जयिष्यति ।

इत्युक्ता धारणा दिव्या मृत्युनाशनमेव हि ॥ ४२ ॥

याममभ्यस्य चिद्योगी प्राप्नोति परमं शिवम् ।
अतः परं प्रवक्ष्यामि धारणां मोक्षदायिनीम् ॥ ४३ ॥

p. 130)

अणिमादिगुणैश्वर्यं षड्भिमासैर्न संशयः ।
ऊर्ध्वाधस्तिर्यगप्येव जगद्व्याप्तं चराचरम् ॥ ४४ ॥

प्रक्षिपेत्क्रमयोगेन मनसा भुवनत्रयम् ।
भुवनानां सप्तकं वापि प्रक्षिपेत्पिण्डमध्यमे ॥ ४५ ॥

त्रिमण्डले तु वै वत्स प्रासादं बीजसंयुतम् ।
आनीय शनकैश्चित्तद्वीपार्णवनगैर्युतम् ॥ ४६ ॥

जम्बूद्वीपेन संक्षिप्य तत्प्राप्तिं प्राप्य योगतः ।
आनीय तं क्षिपेच्चेतः पिण्डस्ये परमात्मनि ॥ ४७ ॥

सर्वकालेषु वै वत्स सर्वलोकस्य मूर्धनि ।
मण्डलत्रयमध्ये तु मनस्पर्शं तु तत्र तु ॥ ४८ ॥

सप्तलोकसमस्तं च षण्मासात्तत्र पश्यति ।

सर्वज्ञत्वमवाप्नोति सर्वगं शिवमाप्नुयात् ॥ ४९ ॥

मृत्युञ्जयं भवेत्तस्य वत्सरान्नियतं भवेत् ।
ब्रह्मा विष्णुश्च रुद्रश्च ईश्वरः शिव एव च ॥ ५० ॥

अमापञ्चकधाराणां तत्तदेव भविष्यति ।
हृत्सरोरुहमध्यस्थो ब्रह्मा ध्यातश्चतुर्मुखः ॥ ५१ ॥

बुद्धितत्त्वात्मको रक्तः प्रणवेन स्वबीजतः ।
चतुर्मुखश्चतुर्बाहुः सृष्टिकारणमुत्तमम् ॥ ५२ ॥

ज्ञानेनाप्रतीपे नैव वैराग्येन च संयुतः ।
ऐश्वर्येणा धर्मेण वरदाभयपाणिना ॥ ५३ ॥

बिभ्रत्कमण्डलं सव्येऽपसव्ये चाक्षसूत्रकम् ।
हंसारूढस्तथा राधं मृत्ज्ञानग्रन्थिभेदनम् ॥ ५४ ॥

p. 131)

तारकज्ञान निर्वृत्तिं ऐश्वर्यमखिलं तथा ।
विशेषयोगसंसिद्धिर्विविधा योगसंभवम् ॥ ५५ ॥

अभिमानात्मकश्यामा चतुर्वक्रोऽष्टबाहुकः ।

बिन्दुमत्पृष्ठनादेन हृदि ध्यातस्त्रिशूलधृक् ॥ ५६ ॥

कालाग्निं सर्वहस्तेन बिभ्रदाजगवं शरम् ।
खड्गं परशुं कालाग्निं सभुजङ्गसमानगः ॥ ५७ ॥

शशाङ्कधारिणं देवं कृत्तिवासं त्रिलोचनम् ।
ऐश्वर्यादिगुणोपेतं हृदि ध्यानगुणाष्टकम् ॥ ५८ ॥

ध्यानमात्रेण वै वत्स प्रकृतिर्वश्यकं तथा ।
मृत्युञ्जयमवाप्नोति सदा सद्भावभावितः ॥ ५९ ॥

यथाभिमतसिद्धिश्च सर्ववस्तुषु योगिनः ।
संवत्सरकृतात्पापात् शिवलोकमवाप्नुयात् ॥ ६० ॥

इति कालोत्तरे स्पर्शयोग धारणामार्गे कालाग्निरुद्रब्रह्मध्यानश्चतुर्विंशति पटलः ॥ २४ ॥

॥ श्रीः ॥

ईश्वर उवाच-

अष्टाङ्गस्पर्शयोगश्च शृणु वक्ष्यामि संप्रतम् ।
यमनियमौ चासनं प्राणायामस्तथैव च ॥ १ ॥

प्रत्याहारं धारणा च ध्यानं समाधिरेव च ।
एतदष्टाङ्गमुद्दिष्टं स्पर्शयोगं विदुर्बुधाः ॥ २ ॥

p. 132)

यमादिप्राणयामान्तं बहिरङ्गं चतुष्टयम् ।
प्रत्याहारात्समाध्यन्तमन्तरङ्गमुदाहृतम् ॥ ३ ॥

अहिंसा सत्यमस्तेयं ब्रह्मचर्यं क्षमाधृतिः ।
दया ज्ञानं स्वरूपाणां अन्तरङ्गं विभागतः ॥ ४ ॥

यमाश्च दर्शया प्रोक्तास्तन्त्रेऽस्मिन् विजये शुभे ।
शौचं सन्तोषश्च तपःस्वाध्यायेश्वरपूजने ॥ ५ ॥

सिद्धान्तश्रवणं चैव जपं हुतं च श्रीमति ।
नियमं दशधा प्रोक्तं सर्वशास्त्रेषु पूजितम् ॥ ६ ॥

यावत्सिद्धिस्पर्शयोगं जयं तावदनुष्ठितम् ।
आसनं विंशति प्रोक्तं तन्त्रेऽस्मिन् विजये शुभे ॥ ७ ॥

पद्मकं स्वस्तिकं चैव गोमुखं विकटं तथा ।
सूचिं वै एकपादं तु कुक्कुटं वीरमेव च ॥ ८ ॥

पद्मासनं चैकपृष्ठं कूर्मं विमलमेव च ।
दण्डं विदण्डं गोकर्णं सिंहासनमतः परम् ॥ ९ ॥

वृत्तं चोत्कुटिकं चैव गजास्यं गजकर्णकम् ।
आसनं विंशतिः प्रोक्तं वाञ्छितैकं समभ्यसेत् ॥ १० ॥

स्थिरं सुखासनं प्रोक्तं सर्वतन्त्रेषु पूजितम् ।
यथा काकादिभाण्डानां त्रिपादे सम्यगास्थिता ॥ ११ ॥

समाधिं चिरकालस्थ सुखासुखमाश्रितः ।
तस्मात्सर्वप्रयत्नेन आसनं सर्वमभ्यसेत् ॥ १२ ॥

स्वर्गापवर्गफलदं प्राणायामेन वै गुह ।
सर्ववेदफलं चैव सर्वयज्ञफलं च यत् ॥ १३ ॥

p. 133)

सर्वदानफलं चैव सर्वतीर्थफलं च यत् ।
प्राणायामेन वै वत्स शिवार्चनफलं भवेत् ॥ १४ ॥

मृद्वासरोपरि कुशं प्रावरणाजिनं ततः ।
तस्योपरि सुखासीनः प्राङ्मुखो वाप्युदङ्मुखः ॥ १५ ॥

अतिभुक्तिमभुक्तिं च वर्जयित्वा समासतः ।
निवाते निर्भये गेहे कृमिकीटादिवर्जिते ॥ १६ ॥

समग्रीवाशिरो भूत्वा दन्तैर्दन्तान संस्पृशन् ।
नासाग्रदृक्समासीना दिशश्चा नवलोकयन् ॥ १७ ॥

नाडीनां शोधनं कृत्वा मद्वितीयेन मन्दिरे ।
दक्षिणं पूरयित्वा तु वामेनैव तु रेचयेत् ॥ १८ ॥

वारुणं मण्डलं वत्सं ल द्वितीयेन संयुतम् ।
पूर्ववत्पूरयेद्धीमान् वामेन तु समाहितः ॥ १९ ॥

पादाङ्ष्ठात्समारभ्य यावत्प्राणमिडैव तु ।
दक्षिणे पिङ्गले चैव रेचयेत्सर्वमेव हि ॥ २० ॥

एवं वै पञ्च षट्सप्त षण्मासं वत्सरं तु वा ।
नाडीशुद्धिमवाप्नोति ग्रन्थिस्त्रिदोष वर्जितम् ॥ २१ ॥

प्राणायामं भवेत्पश्चात् प्रासादेन तु षण्मुख ।
पूर्वं षोडशमात्रं तु पूरयेदुदराद्बुधः ॥ २२ ॥

चतुष्षष्टिमात्रं कुम्भकं संपूर्णं कुम्भवद्भवेत् ।
रेचयेन्मूर्ध्निवायुं च द्वात्रिंशं मात्रया गुह ॥ २३ ॥

एवं प्राणायाममस्तु रेचपूरककुम्भकः ।
षोडश प्राणायामैस्तु नित्यं षोडशमेव च ॥ २४ ॥

p. 134)

परां गतिं समाप्नोति प्राणायामेन वै गुह ।
प्राणादिविजयं पश्चात् बीजं वर्णं च सारगम् ॥ २५ ॥

यकारं प्राणबीजं तु नीलजीमूतसप्रभम् ।
रकारं चापानमेवं तु स्फुरद्धृदयसप्रभम् ॥ २६ ॥

लकारंमपान इत्युक्तं शाकं बन्धूकसन्निभम् ।
पकारं उदान इत्युक्तं वारुणं शङ्खसन्निभम् ॥ २७ ॥

भकारं समानं इत्युक्तं स्फटिकाभं शिवं भवेत् ।
हृन्नाभिनासिकर्णश्च पादाङ्गुष्ठं तु संस्थितम् ॥ २८ ॥

प्राणस्य स्थानमित्युक्तं ब्रह्मग्रन्थिमुरस्तथा ।
अपानमेढ्रपायू च ऊरू वं क्षणजानुनी ॥ २९ ॥

उद्रे जङ्घयोश्चैव कटिदेशे नाभिमूलके ।
व्यानश्रोत्रौ च चक्षुश्च ध्यानयोर्गलदेशतः ॥ ३० ॥

पार्श्वयोश्च कुकाट्यश्च स्थितेश्च गुल्फयोरपि ।
उदानः सर्वसिद्धिस्थः पादौ हस्तौ च चाङ्गुली ॥ ३१ ॥

समानः सर्वदेहे तु पादाङ्गुष्ठादिकान्तकम् ।
द्वासप्तति सहस्राणि नाडिमार्गेषु संस्थितः ॥ ३२ ॥

अष्टाविंशति कोटीषु रोमकूपेषु संस्थितः ।
समानप्राण एकं तु जीवस्तौ * * मेव हि ॥ ३३ ॥

शनैःसमस्तमाकृष्य हृत्सरोरुहकोटरे ।
पूर्ववत्पूरयित्वातु कुम्भकं पूर्ववद्भवेत् ॥ ३४ ॥

रेचकं पूर्ववत्कृत्वा कर्णे वै तालुरन्ध्रके ।
कोदण्ड द्वयमध्ये तु ब्रह्मरन्ध्रे तु शक्तिमत् ॥ ३५ ॥

p. 135)

रश्मिर्नज्योत्स्नानादं च बिन्दुं माहेश्वरं पदम् ।
सदाशिवं शिवं पश्चात् तयोर्देवेन देशिकः ॥ ३६ ॥

ततो निर्वाणमायाति मृत्युं जित्वा न संशयः।
सृष्टिमार्गं नयेत्पश्चात् शिवश्चैव तु यामके॥ ३७॥

सदाशिवे षट् घटिका * श घटिकापञ्चकम्।
बिन्दोर्वै चतुर्घटिका नादे चैव त्रयं भवेत्॥ ३८॥

ज्योत्स्नायां तु द्विघटिका अशरेकेन संस्थितः।
रश्मिरर्धघटिकेन तदर्धं शक्तिगोचरे॥ ३९॥

भ्रूमध्ये तालुरन्ध्रे च * * * * नस्थिर्गुह।
हृदये शिवार्धं कुर्वीत प्राणायामेन देशिकः॥ ४०॥

संवत्सरत्रयं ह्येवं प्रासादेन तु सोऽभ्यसेत्।
बहिरङ्गे प्रसादं तु प्राणायामं तु षण्मुख॥ ४१॥

मृत्युञ्जयमवाप्नोति ततो वायुजयं भवेत्।
प्रसरं तु प्रवक्ष्यामि सोपानं धारणस्य तु॥ ४२॥

मनो मारुतयुक्तेन सर्वमाकृष्य मन्त्रवित्।
पादाङ्गुष्ठे चिरं रुध्य घटिकात्रयमेव हि॥ ४३॥

सर्वाङ्गुष्ठेन द्विगुणं प्रासादेनैव दण्डतः।

ततो गुल्फं तु सव्ये तु सव्यं चैवापसव्यके ॥ ४४ ॥

घटिकाषट्कमेकैकं निरुध्य कुम्भकमेव तु ।
जङ्घयोश्चैव मध्ये तु उपविन्मूले तु रोधयेत् ॥ ४५ ॥

यावन्निरोधयेत्तत्र सर्वमाकृष्य चानिलम् ।
घटिकाष्टकं निरोद्धव्यं परकुम्भकसंस्थितम् ॥ ४६ ॥

p. 136)

पुनरूरुद्वये वत्स स्पर्शमाकृष्य रोधयेत् ।
द्वारसंख्यां निरोद्धव्यं प्रासादेन तु देशिकः ॥ ४७ ॥

पायुमूले मेढ्रमूले आकृष्य स्पर्शनाद्गुह ।
सम्यङ्निरोधयेन्नित्यं मनोमारुतसक्तया ॥ ४८ ॥

पायुमूले मेढ्रमूलं तत्क्षणं नश्यते गुह ।
पुनर्वै कुण्डलीमध्ये नाभिमध्ये तु कुण्डली ॥ ४९ ॥

दिक्संख्यां घटिका रोध्य स्पर्शमाकृष्य मन्त्रवित् ।
प्रासादेन तु बीजेन रोधयेत् * * नन्ततः ॥ ५० ॥

प्रत्याहारे प्रधानं तु कुण्डलीस्थानमुत्तमम् ।

अष्मीलं प्लहगुल्फं च वातरोगांश्च नाशयेत्॥ ५१॥

बाह्यायामं विद्रुधिं च आक्षेपं च धनुर्गुह ।
अशीतिर्वातजाद्रोगात् प्रत्याहारेण नाशयेत्॥ ५२॥

पुनर्वै हृदये मन्त्री * * * * * * * * ।
प्रासादयेत्समस्तं च घटिकैकादशे स्थितः॥ ५३॥

बलीपलितनाशं च मृत्युनाशनमेव च ।
कण्ठ(र्ण)कूपं निरुध्याथ सर्वमाकृष्य योगवान्॥ ५४॥

इडायां पूरयित्वा तु * * * * * * * * ।
द्वादशं घटिकं वापि तदर्धं वा निरोधयेत्॥ ५५॥

क्षुत्पिपासे विनश्यन्ति तृष्णां उष्णज्वरं तथा ।
तालुरन्ध्रे निरोद्धव्यमनिलं मरुता युतम्॥ ५६॥

त्रयोदशं घटिकां वाथ योधशक्तिमथापि वा ।
सर्वद्वार प्रधानस्तु प्रासादं च तृतीयकम्॥ ५७॥

p. 137)

सविसर्गेण वै वत्स सर्ववृत्तिं निरोधयेत्।

सर्वव्याधिहरं ह्येतत् पित्तं श्लेष्मं च वातजम्॥ ५८॥

मृत्युञ्जयं परं ह्येतत् तालुरन्ध्रे च बुद्धिमान्।
सदा तत्सर्वमाकृष्य कोदण्डद्वयमध्यगम्॥ ५९॥

प्रासादं हंससंवृत्तं आकृष्य स्पर्शनः सुखी।
चतुर्दशघटिकां वत्स तदहूर्दं वा निरोधयेत्॥ ६०॥

रेच्यरेचकशक्तिश्चेत् सततं रोधयेद्गुह।
सर्वज्ञत्वमवाप्नोति वेदशास्त्राणि विन्दति॥ ६१॥

सप्तलोकाश्च तत्रैव पश्यते योगचक्षुषा।
सुषुम्नाग्रे रोधयेत्पश्चात् आकृष्य स्पर्शनं ततः॥ ६२॥

प्रासादे चन्द्रबिम्बेन मनोमारुतयुक्तया।
यामत्रयं निरोध्यं तु आकृष्याकृष्य मन्त्रवित्॥ ६३॥

कृष्णभृङ्गनिभेनैव रोमकूपेषु प्लावयेत्।
सपत्नस्तम्भमेवं तु मृत्युनाशनमेव च॥ ६४॥

सर्वस्पर्शनं तत्रैव मनसा तु निरोधयेत्।
निरोध्य प्लावयेदमृतैश्शनैश्शनैः शिवचन्द्रकौ॥ ६५॥

रत्यग्निज्योत्स्नायां पश्चादाकृष्य वायुभिः ।
निरोधयेत्ततः सर्वान् शिवचन्द्रेण संयमी ॥ ६६ ॥

षोडश सप्तदशे चैव ततोऽष्टादश वै घटी ।
सर्वं निरुद्धय मतिमान् अमृतत्वेन प्लावयेत् ॥ ६७ ॥

घटिकां सहस्रं आयुष्यं लभते नात्र संशयः ।
रहस्यमेतदाख्यातं प्रत्याहारं सुदुर्लभम् ॥ ६८ ॥

p. 138)

अग्रवायुजयाद्वत्स परकायप्रवेशनम् ।
मृते जीवे च सर्वं तु तज्जनात्संप्रवेशनम् ॥ ६९ ॥

एकोनविंशद्घटिका प्रासादं हंसचन्द्रकम् ।
आपादतलपर्यन्तं कादिनादित्रयेन तु ॥ ७० ॥

प्लावयेदमृतेनैव अयुतायुर्भवेन्नरः ।
नादस्थाने चरं रोध्य घटिका चैक विंशतिः ॥ ७१ ॥

अनिलं समस्तं वै वत्स आकृष्यं तत्र रोधयेत् ।
महानादशिवेनैव शशिना च समन्वितम् ॥ ७२ ॥

प्लावयेत्खादिपादान्तं अयुतद्वयं स जीवति ।

पुनः सदा च वै वत्स आयुष्यं सर्ववायुभिः ॥ ७३ ॥

धिया संरोधयेत्तत्र घटिकात्रिंशतिं गुह ।

पुनराप्याययेद्वत्स शिवश्चक्रेण हंसदः ॥ ७४ ॥

लक्षकोटिं स जीवेत प्लावयेत्सर्वविग्रहम् ।

एवं पूर्वे प्रत्याहारं सुखं वायुजयं भवेत् ॥ ७५ ॥

आरोहं अवरोहं च स्थानात्स्थानं तु वै गुह ।

इडया पिङ्गला चैव पूरकं तु क्रमेण तत् ॥ ७६ ॥

रोपयेत पुनर्धीमान् सगुणं दुर्गमात्रयम् ।

इति कालोत्तरे प्रत्याहारपटलः पञ्चविंशतितमः ॥ २५ ॥

॥ श्रीः ॥

ईश्वर उवाच-

p. 139)

धारणां वायुजां वक्ष्ये भुक्तिमुक्तिफलप्रदाम् ।

सह सौभाग्यमाप्नोति धनमायुर्बलं श्रियम्॥ १॥

एकान्ते निर्जने स्थाने वातातपविवर्जिते।
चत्वारिं बहिरङ्गानि अत्यज्य च यथाविधि॥ २॥

प्रत्याहाराजि न स्पर्शधारणा च समभ्यसेत्।
पृथिव्यादिपञ्चवक्रं धारयेत्पूर्वमेव हि॥ ३॥

महच्चक्रं धारयेत्पश्चादीश्वरादि पुनर्भवेत्।
पृथिवीं धारयेद्वत्स त्रिकालं वा द्विकालकम्॥ ४॥

पृथिवी सिद्ध्यते योगी सार्वभौमत्वमाप्नुयात्।
शब्दस्पर्शं च रूपं च रसो गन्धश्च पञ्चमः॥ ५॥

पञ्चभिस्तु गुणैर्युक्तं ध्यायेत्पृथिविमण्डलम्।
मृत्युञ्जयमवाप्नोति सर्वैश्वर्यसमृद्धिदम्॥ ६॥

एवं ध्यायेद्विधिवत् अर्धचन्द्राब्जसंस्थितम्।
गोक्षीरं धवलं सौम्यं शङ्खकुन्दसमप्रभम्॥ ७॥

हृषष्ठ बिन्दुसंयुक्तं ब्रह्मरन्ध्रं तु ध्याययेत्।
अधोमुखममृतं ध्यायेत् ध्यायेच्चैवं ततो गुह॥ ८॥

तेन प्लावितमात्मानं आपूर्यकुम्भके स्थितम्।
पूर्वात्तु द्विगुणं वत्स ध्यानं सम्यग्व्यवस्थितम्॥ ९॥

मृत्युञ्जयमवाप्नोति सर्वव्याधिविवर्जितम्।
स्थावरं जङ्गमं चैव कृत्तिमं विमताशमम्॥ १० ॥

अजरामृतत्वमाप्नोति ध्यानं वारुणं मण्डलम्।
शब्दस्पर्शं च रूपं च रसं चैव चतुर्गुणम्॥ ११ ॥

p. 140)

चतुर्गुणयुतं भद्रं वारुणं मण्डलं स्मरेत्।
आग्नेयं मण्डलं ध्यायेत् त्रिकोणं स्वस्तिकैर्युतम्॥ १२ ॥

ज्वाला मालासहस्रैश्च रक्तवर्णं हुताशनम्।
षष्टमे दशसंयुक्तं बिन्दुयुक्तं षडानन ॥ १३ ॥

उदाराग्निं चिन्तयेद्देव त्रिगुणेनानु संयुतम्।
शब्दस्पर्शं च रूपं च अग्निबिम्बं विचिन्तयेत्॥ १४ ॥

पूर्ववत्कुम्भकं कुर्यात् कुम्भकं चैव पूर्ववत्।
रेचकं पूर्ववत्कुर्यात् अनिलं मनसा जयेत्॥ १५ ॥

अशीतिर्वातजान् रोगान् श्लेष्मजान् सप्तसप्ततिम् ।
तत्क्षणान्नश्यते वत्स सिंहस्येव यथा गजः ॥ १६ ॥

वर्तुलं कृष्णवर्णं च बिन्दुलाञ्छनलाञ्छितम् ।
गभस्ति दैवतं वत्स द्विगुणेन समन्वितम् ॥ १७ ॥

शब्दस्पर्शसमायुक्तं द्वितीयेन समन्वितम् ।
बिन्दुशेखरमारूढं कण्ठकूपे तु ध्याययेत् ॥ १८ ॥

सर्ववायुं तत्रैव युगपद्ध्याययेद्गुह ।
इडायां पिङ्गलायां तु सुषुम्नायां च पूरयेत् ॥ १९ ॥

कुम्भकं पूर्ववत्कृत्वा रेचकं तु शनैर्भवेत् ।
एवं वै ध्याययेद्वत्स सर्ववायुजयं भवेत् ॥ २० ॥

मनोजयत्वमाप्नोति सर्वगत्वं च जायते ।
हृत्सरोरुहजं ये तु आकाशं मेचकप्रभम् ॥ २१ ॥

शुद्धस्फटिकसंकाशं शब्दैकगुणसंयुतम् ।
परमेश्वरं चाधिदैवं सर्वकारणकारणम् ॥ २२ ॥

p. 141)

अष्टवर्गं चतुर्थं तु बिन्दुशेखरभूषितम् ।

ध्यायेद्व्योमं शिरोमध्ये शिवाधारं सुनिर्मलम् ॥ २३ ॥

समस्तवायुं तत्रैवाधिया चैव निरोधयेत् ।

पूर्ववत्पूरकं कुर्यात् कुम्भकं रेचकं तथा ॥ २४ ॥

सर्वज्ञत्वमवाप्नोति सर्ववायुजयं भवेत् ।

महाचक्रं पुनर्ध्यायेत् सर्वदेवैरनुष्ठितम् ॥ २५ ॥

षट्त्रिंशद्दलसंयुक्तं कर्णिकाकेसरान्वितम् ।

महापद्ममिदं वत्स शिवपद्मं सुशोभनम् ॥ २६ ॥

प्रासादं कर्णिकायां तु सर्वविद्येश्वरेश्वरम् ।

केसराष्टोत्तरशतं पृथग्देवं प्रकल्पयेत् ॥ २७ ॥

विद्येश्वराष्टभिश्चैव द्वादशादित्यकाश्च वै ।

वसवश्चाष्ट ते चैव अष्टौ चैव गणेश्वरान् ॥ २८ ॥

लोकपालान् दश चैव अस्त्राणां च तथैव च ।

रुद्रमातृगणानां च यक्षविद्याधरास्तथा ॥ २९ ॥

गन्धर्वाश्चारणास्सिद्धा किं पुरुषा गरुडास्तथा ।
मरुद्गणाः पितृगणाः किन्नराप्सरसस्तथा ॥ ३० ॥

ऋषिराक्षसा सुराश्च यातुधानाश्च पन्नगाः ।
नागाश्च विविधाश्चैव नक्षत्रग्रहराशयः ॥ ३१ ॥

देवपत्न्यः ऋषिपन्त्यश्च तथा देवकुमारकाः ।
देवकन्या ऋषिकन्या भूता वै क्षेत्रपालकाः ॥ ३२ ॥

एते षट्त्रिंशत्पत्रेषु कल्पयित्वा यथा क्रमम् ।
महाबाह्येन विन्यस्य त्रिगुणीकृत्य वेष्टयेत् ॥ ३३ ॥

p. 142)

बिन्दुयुक्तेन वै सर्वं बिन्दुशेखरभूषितम् ।
व्यञ्जनानि च सर्वं तु गम्यकं * * * * * * ॥ ३४ ॥

श्रुत्वा मात्रेण लभ्येत गुरुप्रसादात्तु लभ्यते ।
* * * * * * सूक्ष्म बाह्याभ्यन्तर संस्थितम् ॥ ३५ ॥

प्रासादं सकलं विद्या महेशश्चात्र दृश्यते ।
सकलं निष्कलं सुप्तं सुषुप्तं तु सदाशिवम् ॥ ३६ ॥

प्रासादे बिन्दुदेवं तु * * * * * * * * ।
बिन्दुं तु वै शिवं विद्यात् तुरीयं परिकीर्तितम् ॥ ३७ ॥

तदेव सर्वव्यापीनि निष्कलं निर्मलं शिवम् ।
वाच्यवाचकरहितं हेयोपादेनशून्यकम् ॥ ३८ ॥

नित्यं सर्वगतं ब्रह्म स्वसंवेद्यं शिवं पदम् ।
कारणं सर्वदेवानां अक्षरक्षरवर्जितम् ॥ ३९ ॥

आधारे चिन्तयेद्देवं समाधिस्थस्य योगिनः ।
सुसंवेद्यहितं ब्रह्म कुमारी स्त्रीसुखं सदा ॥ ४० ॥

अयोगी नैव जानाति जात्यन्धो हि यथा घटम् ।
घटो नियतिनाकाशं तद्वज्जीवो नभोपमम् ॥ ४१ ॥

श्रोत्रं विना शृणोत्यन्यश्चक्षुर्नास्ति स पश्यति ।
प्राणं विना स जीवेति त्वग्विना स्पर्शं तु विन्दति ॥ ४२ ॥

जिह्वां विना रसं विन्देत् वह्निना प्रलपन्ति च ।
पाणिर्नास्ति सगृह्णाति पादो नास्ति स गच्छति ॥ ४३ ॥

वायुं विनापि चोत्सर्गं सर्वकालेषु वै गुह ।

मेढ्रं विनापि चानन्दं सर्वमेव हि नित्यशः ॥ ४४ ॥

p. 143)

मनो नास्ति ससंकल्पे त्रैलोक्ये सचराचरम् ।
अहंकारं विना वत्स अहंकृतः स्वयमेव च ॥ ४५ ॥

महानासि महत्त्वं च तस्थुषा रूपमव्ययम् ।
प्रकृतिं विना महादेवो जगत्सर्वं प्रजायते ॥ ४६ ॥

पुर्यष्टकसमायुक्तं पुरुषो नास्ति चेष्टक ।
चर * * * दे सर्वं जोषते भुञ्जतेऽपि च ॥ ४७ ॥

पिबते गृह्णते चैव पश्यते स्पृशतेऽपि च ।
गच्छति स्वं नृत्यति च गायते प्लवतेऽपि सः ॥ ४८ ॥

त्रिलक्षाशीति साहस्रं ब्रह्मादिस्तम्भसंज्ञितम् ।
ओत प्रोतेन वै वत्स परिपूर्णेन वै सदा ॥ ४९ ॥

शून्यं शून्येन भावेन इति त्वं भावयिष्यसि ।
देहे शून्यपदं ध्यात्वा मोक्षयिष्यसि षण्मुख ॥ ५० ॥

ऊर्ध्वशून्यमधश्शून्यमध्यशून्यं निरामयम् ।

खशून्यं शक्तिशून्यं च नास्तिशून्यं च वै गुह ॥ ५१ ॥

मातृशून्यं बिन्दुशून्यं महेशं च सदाशिवम् ।
ब्रह्मा विष्णुश्च रुद्रश्च सर्वशून्यं च भावयेत् ॥ ५२ ॥

षट्त्रिंशत्तत्त्वशून्यं च आधाराधेयशून्यकम् ।
त्वमहं शून्यमेवं हि सर्वां नास्तीति भावतः ॥ ५३ ॥

स्वयं वेद्यसमाधीना ग्राह्यो देवः शिवः परः ।
निर्बीजमिदं समाधिर्दृश्यते तु षडानन ॥ ५४ ॥

मध्यदेहं परं ब्रह्म बाह्याभ्यन्तरसंस्थितः ।
पुष्पेषु गन्धवन्नित्यं तिले तैलमिव स्थितम् ॥ ५५ ॥

p. 144)

दध्नो घृतमिव ज्योतिः काष्ठे वह्निरिव स्थितः ।
गुरुवक्त्रप्रसादेन लभ्यते सर्वतोमुख ॥ ५६ ॥

इति कालोत्तरे धारणाविधिः षड्विंशतिः पटलः ।

॥ श्रीः ॥

ईश्वर उवाच-

भावयोगं प्रवक्ष्यामि * * योगं सुदुर्लभम् ।
ध्यानं धारणरहितं जपहोमविवर्जितम् ॥ १ ॥

तिथिर्न राशिर्नक्षत्रं नियमो नोपवासकम् ।
यस्य कालश्च स्थानं च आसनानि च षण्मुख ॥ २ ॥

धारणाप्रत्याहारं च कुलक्षादिविवर्जितम् ।
* * * * श्च तीर्थं च न स्नानं शौचमेव च ॥ ३ ॥

रेचकं पूरकं चैव कुम्भकं च विवर्जयेत् ।
न वर्णं नवबीजं च सकलं निष्कलं न च ॥ ४ ॥

हृत्पीडा नावनाभिं च न भ्रवोर्मध्य एव तु ।
इडा च पिङ्गला चैव सुषुम्नाप्राणिरेव च ॥ ५ ॥

* * * * * ति पद्म बाह्याभ्यन्तरसंस्थितम् ।
अष्टाविंशत्कोटिरूपकूपे संचरते सदा ॥ ६ ॥

ब्रह्मादि स्तम्भ पर्यन्तं ते पार्थे सचराचरम् ।
योगसूर्य * * * * * * * * * * * * य ॥ ७ ॥

आधारे ग्रन्थिमूले तु व्योमव्यापि परं शिवम् ।
ज्योतिरूपं परं तत्त्वमेतत्प्रोत व्यवस्थितम् ॥ ८ ॥

p. 145)

क्षेत्रज्ञं तत्र संवेश्य शिवक्षेत्रज्ञके क्षिपेत् ।
अशरीरं मनः कृत्वा न किञ्चिदपि चिन्तयेत् ॥ ९ ॥

विद्युद्दामप्रतीकाशं अन्तस्थावोष्ठ एव च ।
अकारादिक्षकारान्तं मन्त्रैः षोडशभिर्युतम् ॥ १० ॥

पृथक् पृथक् न्यसित्त्वा तु सर्वबिन्दुसमन्वितम् ।
अवश्यं पूर्वदले व्यस्य शेषान्वै क्रमशो न्यसेत् ॥ ११ ॥

पञ्चब्रह्म शिवाङ्गं च कर्णिकायां तु मध्यगम् ।
हुतभुङ्मण्डलं वत्स त्रिकोणं यद्द्वितीयकम् ॥ १२ ॥

ज्वालामाला * * * * * * * * * * * * ।
तस्य मध्ये सूर्यबिम्बं जपाकुसुमसन्निभम् ॥ १३ ॥

सान्तं बिन्दु समायुक्तं रजोगुणसमायुतम् ।
किञ्चिद्धीनमग्निबिम्बात् सूर्यमण्डलमुत्तमम् ॥ १४ ॥

ल द्वितीयेन संयुक्तं बिन्दुशेखरभूषितम् ।
सूर्यबिम्बाद्धीनधरं चन्द्रबिम्बमनुत्तमम् ॥ १५ ॥

पूर्णचन्द्रनिभं वत्स श्वेतपद्मोपरि न्यसेत् ।
सत्वेन तु * * * * * * * * क विन्यसेत् ॥ १६ ॥

हे देवेशि ! उसी से विद्या (शक्ति) प्रसन्न होती है। कुलपूजा में जो पहले यह स्तोत्र पाठ नहीं करते हैं, उनकी पूजा निष्फल होती है, वह अभिचार का जनक होता है।

कब्जिका तन्त्रोक्त श्रीगुरु स्तोत्र समाप्त ।

अथ कवचमपि पठेत् । ततस्तु प्रणमेत् ।

श्रीगुरुप्रणाम मन्त्रः

अखण्डमण्डलाकारं व्याप्तं येन चराचरम् ।
तत्पदं दर्शितं येन तस्मै श्रीगुरवे नमः ॥
अज्ञानतिमिरान्धस्य ज्ञानाञ्जन शलाकया ।
चक्षुरुन्मीलितं येन तस्मै श्रीगुरवे नमः ॥

षट्चक्र निरूपणम्

अथ प्रसङ्गात् षट्चक्रव्यवस्था लिख्यते ।
तिस्रः कोटयस्तदर्द्धेन शरीरे नाडयो मताः ।
तासु मुख्या दश प्रोक्तास्तित्रस्तासूत्तमा मताः ॥
प्रधाना मेरुदण्डान्तश्चन्द्रसूर्याग्निरूपिणी ।
शक्तिरूपा तु सा नाडी साक्षादमृतविग्रहा ॥

इसके अनन्तर श्रीगुरु का कवच भी पाठ करना ।

श्रीगुरु का प्रणाम मन्त्र

इसके बाद प्रणाम करना । प्रणाम मन्त्र का अर्थ है—यत् कर्तृक (जिनके द्वारा) अखण्डमण्डलाकार चराचर जगत् व्याप्त तथा जिनके द्वारा तत् पद (ब्रह्मपद मोक्ष) दर्शित होता है (देखा जाता है) उस गुरुदेव को नमस्कार । जिनके द्वारा तत्त्वज्ञानरूप अञ्जन—(काजल), शलाका (काठी) के द्वारा अज्ञानरूप तिमिरान्ध (अन्धकार से अन्धा) शिष्य का चक्षु (आँख) उन्मीलित होता है, (खोलता है) उस श्रीगुरु को नमस्कार ।

षट्चक्र निरूपण

अनन्तर प्रसङ्गतः षट्चक्र व्यवस्था लिखा जा रहा है । शरीर में सार्द्ध तीन कोटि (साढ़े तीन करोड़) नाड़ी निरूपित है । उस नाडी समूहों के मध्य में दस नाड़ी मुख्य कह कर कहा गया है । उन दसों में से तीन नाड़ी श्रेष्ठ कह कर निर्णीत हुआ है । मेरुदण्ड के अभ्यन्तर में चन्द्र, सूर्य, तथा अग्निस्वरूपिणी प्रधान नाड़ी सुषुम्ना अवस्थित है । मेरुदण्ड के बायें तरफ शुक्लवर्णा चन्द्रस्वरूपिणी इड़ा नाड़ी अवस्थित है । वह नाड़ी शक्तिस्वरूपा

पिङ्गलाख्या च या दक्षे पुंरूपा सूर्यविग्रहा।
मेरुमध्यस्थिता या तु मूलादाब्रह्मरन्ध्रगा॥
सर्वतेजोमयी सा तु सुषुम्ना वह्निरूपिणी।
दाडिमीकुसुमप्रख्या शिवाख्या चापरा मता॥
सुषुम्नान्तर्गता चित्रा चन्द्रकोटिसमप्रभा।
सर्वदेवमयी सा तु योगिनां हृदयङ्गमा।
तस्या मध्ये ब्रह्मनाडी मृणालतन्तुरूपिणी॥

मूलाधारचक्र कथनम्

सुषुम्नाग्रन्थिसंस्थानि षट्पद्मानि यथाक्रमम्।
आधाराख्यं मूलचक्रमतिरक्तं चतुर्दलम्।
वादिसान्तार्णसंयुक्तं रक्तवर्णं मनोहरम्॥

तथा साक्षात् चन्द्र उनके देह हैं, अर्थात् वह चन्द्रस्वरूपा है। पिङ्गला नामक जो नाड़ी (मेरुदण्ड के) दक्षिण तरफ अवस्थित है, वह पुरुषरूप तथा सूर्य उनके देहस्वरूप है।

मूलाधार से ब्रह्मरन्ध तक जो नाड़ी मेरुदण्ड के मध्य में अवस्थित है, वही सर्वतेजोमयी वह्निस्वरूपा सुषुम्ना नाड़ी है। दाड़िमी··· ··· पुष्प के समान रक्तवर्ण शिवानाम्नी दूसरी एक नाड़ी (योगिगण द्वारा मेरुदण्ड के अभ्यन्तर) ज्ञात हुआ है। सुषुम्ना के अभ्यन्तर में (भीतर) कोटि चन्द्र तुल्य दीप्तिशालिनी चित्रा नाड़ी अवस्थित हैं। वह चित्रा नाड़ी सर्वदेवमयी तथा योगिगणों के ज्ञानवेद्या अर्थात् योगिगण ही उस चित्रा नाड़ी को देख पाते हैं। उस चित्रा नाड़ी के मध्य में मृणालतन्त्र (कमल के डंठे के भीतर जो धागा) तुल्य सूक्ष्म ब्रह्मनाड़ी (मूलाधार स्थित) स्वयम्भूलिङ्ग का (हर के) मुखविवर से (सहस्रदल पद्मस्थित) सदाशिव पर्यन्त अवस्थित है। उस नाड़ी के मध्य में अर्थात् स्वयम्भूलिङ्ग के मुखविवर के समीप ब्रह्मनाड़ी के मुख देश में ब्रह्मरन्ध्र (कुण्डलिनी के शिवसमीप में गमनागमन के पथरूप ब्रह्मद्वार) अवस्थित है।

मूलाधार चक्र कथन

मूलाधारादि छयटि ६ पद्म यथाक्रम से सुषुम्नाग्रन्थि में अवस्थित है। मूलाधार नामक मूलचक्र गाढ़ारक्तवर्ण है तथा चतुर्द्दल विशिष्ट है। ये दल व, श, ष, स इन चार वर्णों के द्वारा संयुक्त, रक्तवर्ण तथा मनोहर है।

कर्णिकायां स्थिता योनिः कामाख्या परमेश्वरी ।
तद्योनिः परमेशानि इच्छाज्ञानक्रियात्मिका ॥
अपराख्यो हि कन्दर्प आधारे तत्त्रिकोणके ।
स्वयम्भूलिङ्ग तन्मध्ये सरन्ध्रं पश्चिमाननम् ॥
ध्यायेच्च परमेशानि शिवं श्यामल-सुन्दरम् ।
कुण्डली तेन मार्गेण यातायातं करोति हि ॥
भित्वा भित्वा पुरीं याति चायाति कुण्डली सदा ।
तत्र विद्युल्लतारूपा कुण्डली परदेवता ॥
प्रसुप्तभुजगाकारा सार्द्धत्रिवलयान्विता ।
वामावर्तक्रमेर्णव वेष्टिता विषतन्तुवत् ॥
शिवं वेष्ट्य महेशानि सर्वदा परितिष्ठति ।
येन मार्गेण गन्तव्यं परं ब्रह्म निरामयम् ।
मुखेनाच्छाद्य तद्द्वारं प्रसुप्ता परमेश्वरी ॥

मूलाधार पद्म के कर्णिका में परमेश्वरि कामाख्या योनिरूप में अवस्थित है । हे परमेश्वरि ! वह योनि डाकिनी शक्ति है इच्छा ज्ञान तथा क्रियास्वरूपिणी है । मूलाधार पद्म में कर्णिका के धरा बीज के ऊर्ध्व में उस त्रिकोण के ऊपर कन्दर्प नामक वायु अवस्थित है । हे परमेशानि ! उस त्रिकोण के बीच श्यामसुन्दर नीलवर्ण सच्छिद्र अधोमुख स्वयम्भू नामक शिवलिङ्ग का ध्यान करना । कुण्डलिनी उस रास्ते से ब्रह्मनाड़ी के सहायता से यातायात करती हैं । कुण्डलिनी शक्ति बार बार भेद करके अर्थात् स्वयम्भू, बाण तथा इतर नामक लिङ्गत्रय एक एक को भेद करके छः चक्रों के बीच में से सदा-शिवपुर में गमन करते हैं तथा वहाँ से (मूलाधार चक्र में) प्रत्यावर्त्तन करते हैं ।

हे महेश्वरि ! उस पद्म में तडित् माला तुल्य दीप्तिमयी प्रसुप्त सर्प के समान कुण्डलाकृति सार्द्धत्रिवलययुक्ता (साढ़े तीन बलय युक्ता) परदेवता कुण्डलिनी मृणालतन्तु के समान वामावर्त्त में शिव का वेष्टन किया हुआ है । उन्होंने शिव को वेष्टन करके (बांधकर) सदा सर्वदा अवस्थित हैं । जिस पथ से (कुण्डलिनी) परब्रह्म के निकट गमन करते हैं, परमेश्वरी कुण्डलिनी उस रास्ते को मुख के द्वारा आच्छादित करके सोयी हुई रहती है । यह चक्र ६ आधारों का मूल है, इसलिये इसे मूलाधार कहते हैं ।

स्वाधिष्ठान-मणिपूरचक्र विवरणम्

लिङ्गमूले महापद्मं स्वाधिष्ठानन्तु षड्दलम् ।
यादि-लान्तार्ण-संयुक्तं नाभौ तु मणिपूरकम् ।
डादि-फान्तान्वित-दलैररुणैर्दशभिर्युतम् ॥

अनाहतपद्म-विवरणम्

हृदये द्वादशदलमनाहतसरोरुहम् ।
कादि-ठान्तदलैर्देवि तप्तहटकसन्निभम् ॥
तन्मध्ये बाणलिङ्गन्तु सूर्यायुतसमप्रभम् ।
शब्दब्रह्ममयो मन्त्रोऽनाहतस्तत्र दृश्यते ।
तेनाहताख्यं तत्पद्मं योगिभिः परिकीर्तितम् ॥

विशुद्धचक्र-निरूपणम्

कण्ठदेशे विशुद्धाख्यं धूम्रवर्णं मनोहरम् ।
अकारादि-स्वरोपेतैर्दलैः षोडशभिर्युतम् ॥

स्वाधिष्ठान-मणिपुर-चक्र विवरण

लिङ्ग मूल में स्वाधिष्ठान नामक षड्दल महापद्म अवस्थित हैं। उस पद्म के दल समूह व, भ, म, य, र, ल—इन छः वर्णों के द्वारा संयुक्त है। नाभिदेश में मणिपुर नामक पद्म डकारादि फकारान्त दस वर्ण युक्त अरुणवर्ण दस दल के द्वारा संयुक्त होकर अवस्थान कर रहे हैं।

अनाहत-पद्म विवरण

हे देवि ! उत्तप्त (तपा हुआ) स्वर्ण के समान उज्ज्वल द्वादश दल अनाहत पद्म हृदय में अवस्थान करते हैं। उसका दल समूह क कार से ठ कार तक द्वादश १२ वर्णों के द्वारा संयुक्त है। उस पद्म के मध्य में अयुत (संख्यक) सूर्य के समान उज्ज्वल वाणलिङ्ग अवस्थित है। अनाहत शब्द—ब्रह्ममय मन्त्र (हंस मन्त्र) उस पद्म में देखा जाता है, इसलिये योगिगणों के द्वारा वह पद्म अनाहत नाम से कहा गया है।

विशुद्ध चक्र निरूपण

कण्ठदेश में षोडश १६ दल विशुद्ध नामक धूम्रवर्ण मनोहर पद्म है। उस पद्म के सभी दल अकारादि षोलह १६ वर्णों के द्वारा संयुक्त है। जिस कारण (वह) जीव के शब्द ब्रह्ममय हंसबीज के अवलोकन द्वारा विशुद्धि

विशुद्धिस्तन्यते यस्माज्जीवस्य हंसलोकनात् ।
विशुद्धपद्ममाख्यातमाकाशाख्यं महाद्भुतम् ॥

आज्ञाचक्र-विवरणम्

आज्ञानाम भ्रुवोर्मध्ये चक्रञ्च द्विदलं परम् ।
हक्ष-द्वयक्षर-संयुक्तं निर्मलं सुमनोहरम् ॥
इतराख्यं महालिङ्गं तन्मध्ये काञ्चनप्रभम् ।
आज्ञासंक्रमणं तत्र गुरोराज्ञेतिविश्रुतम् ।
कैलासाख्यं तदूर्ध्वं तु बोधिनी तु तदूर्ध्वतः ॥

सहस्रारचक्र-विवरणम्

सहस्रारं महापद्मं नादविन्दुसमन्वितम् ।
शून्यरूपः शिवः साक्षाद् वृत्तं परमकुण्डली ।
सार्द्धत्रिवलयाकारा कोटिविद्युत्समप्रभा ॥

यामले—

वृत्तं कुण्डलिनी शक्तिर्गुणत्रयसमन्विता ।
शून्यभागो महादेवि शिवरूपो महेश्वरः ॥

जन्माता है; उस कारण वह अत्यद्भूत आकाश नामक विशुद्ध पद्म कहकर प्रख्यात हुआ है।

आज्ञा चक्र विवरण

दोनों भौंओं के बीच ह–क्ष यह दोनों वर्ण संयुक्त निर्मल सुमनोहर आज्ञा नामक द्विदल एक चक्र में है। उसके मध्य में काञ्चनतुल्य (सोने के समान) उज्ज्वल इतर नामक महालिङ्ग वर्त्तमान है। उस चक्र में गुरु की आज्ञा का संक्रमण होता है, इसलिये वह 'आज्ञा' इस नाम से प्रसिद्ध है। उसके ऊपर अर्थात् आज्ञाचक्र के ऊपर कैलास नामक शिव (द्वितीय विन्दु) एवं उनके ऊपर अर्द्धमात्राकारा बोधिनी शक्ति अवस्थान करते हैं।

सहस्रार चक्र-विवरण

उसके ऊपर शङ्खिनी नाड़ी के मस्तक पर नादविन्दु समन्वित सहस्रार पद्म वर्त्तमान है, उसके मध्य में शून्यभाग साक्षात् शिव स्वरूप है, तथा वृत्त है सार्द्ध त्रिवलयवेष्टिता कोटि विद्युन्माला के समान उज्ज्वल परमकुण्डलिनी है। यामल तन्त्र में कहा गया है—हे महादेवि ! गुणत्रयान्विता कुण्डलिनी शक्ति ही वृत्त है। और सहस्रार पद्म के शून्यभाग शिवरूप महेश्वर

सर्पाकारा शिवं वेष्टद्य सर्वदा तत्र संस्थिता ।
शिवशक्त्यात्मको विन्दुर्मुक्तिमुक्तिफलप्रदः ।
नादरूपेण सा देवी योनिरूपा सनातनी ॥

भूतशुद्धौ—

शिवविष्णुब्रह्ममयी विन्दुयोनिः शुचिस्मिते ।
सर्वोपरि महेशानि विन्दुर्ब्रह्मस्वरूपकः ॥

गन्धर्वमालिकायां—

भवो विन्दुरिति ख्यातो भवनश्च त्रिकोणकम् ।
भवनं भवसम्बन्धाज्जायते भुवनत्रयम् ॥
पञ्चभूतानि देवेशि षष्ठे मानसमीश्वरि ।
षट्चक्रेषु स्थितान्येव क्रमाद्देवि विचिन्तयेत् ॥
सहस्रारं शिवपुरं रम्यं दुःखविवर्जितम् ।
सर्वतोऽलंकृतैर्दिव्यैर्नित्यपुष्पफलैर्द्रुमैः ॥

पर्सीकारा कुण्डलिनी शिव को वेष्टन करके (बांध) कर सदा उसी स्थान में वर्त्तमान है। शिवशक्ति-स्वरूप विन्दु भोग तथा मोक्ष प्रदान करते हैं। उस सनातनी कुण्डलिनी देवी नादरूप शिव के साथ मिलकर प्रकृति बन जाती है, प्रकृति हो जाती है।

भूतशुद्धि तन्त्र में कहा गया है—हे शुचिस्मिते ! विन्दुरूपिणी प्रकृति शिव, विष्णु तथा ब्रह्मस्वरूप है, हे महेशानि ! इन सभी के ऊपर ब्रह्मस्वरूप विन्दु विराजमन है। गन्धर्वमालिका तन्त्र में कहा गया है—भव (महेश्वर) विन्दु नाम से प्रख्यात है तथा त्रिकोण भवन के रूप में प्रसिद्ध है। भव का सम्बन्ध (अवस्थित) प्रयुक्त वह भवन हुए हैं—तथा उससे ही त्रिभुवन उत्पन्न होता है।

हे ईश्वरि ! हे देवेशि ! (मूलाधारादि पाँचों चक्र में) पञ्च महाभूत तथा षष्ठचक्र में (सहस्रार में) चित्त (मन) अवस्थित है। हे देवि ! यथाक्रम से इन सभी को षट्चक्र में अवस्थित है—ऐसी चिन्ता करना।

सहस्रार पद्म शिवपुर है; वह मनोहर तथा दुःख रहित तथा सर्वदा पुष्प युक्त मनोहर वृक्ष के द्वारा चतुर्दिक शोभित है। वहाँ गन्धर्वमालिका तन्त्र में और भी कहा गया है—सदाशिवपुर परम रमणीय है; उसमें सुशोभित कल्पवृक्ष वर्त्तमान है, वह त्रिगुणात्मक कल्पवृक्ष पञ्चमहाभूत

सदाशिवपुरं रम्यं कल्पवृक्षं सुशोभितम् ।
पञ्चभूतात्मकं तच्च गुणत्रयसमन्वितम् ॥
चतुर्वेदचतुःशाखं नित्यपुष्पफलान्वितम् ।
पीतं कृष्णं तथा श्वेतं रक्तं पुष्पञ्च पार्वति ॥
हरितञ्च विचित्रञ्च नानापुष्पं मनोहरम् ।
एवं कल्पद्रुमं ध्यात्वा तदधो रत्नवेदिकाम् ॥
तत्रोपरि सुपर्यङ्कं नानारत्नो पशोभितम् ।
मन्दारपुष्परचितं नानागन्धानुमोदितम् ॥
तत्रोपरि महादेवः सदा तिष्ठति सुन्दरि ।
ध्यायेत सदाशिवं देवं शुद्धस्फटिकसन्निभम् ॥
बहुरत्नसमाकीर्णं दीर्घबाहु मनोहरम् ।
सुखप्रसन्ननयनं स्मेरास्यं सततं प्रिये ॥
श्रवणे कुण्डलोपेतं रत्नहारेण शोभितम् ।
शोण(गले)पद्मसहस्रस्य मालया शोभितं वपुः ॥

स्वरूप है । ऋक् यजुः, साम तथा अथर्वरूप चारों वेद उनकी चार शाखाएँ है । सदा सर्वदा उसमें फल पुष्प लगे हैं ।

हे पार्वति ! उस वृक्ष में पीत, कृष्णा (काला) पीला, श्वेत (सफेद), रक्त (लाल) हरित (हरा) तथा विचित्र पुष्प—इस प्रकार मनोहर विभिन्न पुष्प लगे हैं । इस प्रकार कल्पवृक्ष का ध्यान करके उसके अधोभाग में रत्नवेदिका का ध्यान करना ।

उस रत्नवेदिका के ऊपर विभिन्न प्रकार के रत्नों से शोभित मन्दार पुष्प युक्त नाना प्रकार के गन्धों से आमोदित एक सुन्दर पर्यङ्क (पलङ्ग) है ।

हे सुन्दरि ! उस (पलङ्ग) के ऊपर महादेव सर्वदा सदा विराजमान हैं । हे प्रिये ! उस पलङ्ग के ऊपर शुद्ध स्फटिक तुल्य शुभ्रवर्ण सदाशिव देव का सतत इसी प्रकार चिन्ता करना—वह सदाशिव बहुरत्नों के द्वारा अलंकृत है; उनका बाहुयुगल दीर्घ तथा मनोहर; नयनद्वय (दोनों आँख) आनन्द से उज्ज्वल तथा प्रसन्न है, मुख स्मित हास्य युक्त है, कानों में कुण्डल है; देह (कण्ठदेश) रत्नहारों के द्वारा तथा सहस्र रत्नपद्म (लाल कमल) युक्त माला के द्वारा शोभित है; उनके आठ बाहु, कमल दल के सदृश प्रशस्त

अष्टबाहुं त्रिनयनं शिवं पद्मदलेक्षणम् ।
पादयोर्नूपुरं रम्यं शब्दब्रह्ममयं वपुः ॥
एवं स्थूलवपुस्तस्य भावयेत् कमलेक्षणे ।
पद्ममध्ये स्थितं देवं निरीहं शब्दरूपिणम् ॥
शब्दरूपे महादेवेकृत्यं नास्ति कदाचन ।
एवं सर्वेषु चक्रेषु शक्तिरूपं विचिन्तयेत् ॥
ब्रह्मा रुद्रश्च विष्णुश्च ईश्वरश्च सदाशिवः ।
ततः परशिवश्चैव षट् शिवाः परिकीर्त्तिताः ॥

शक्तिमाह—

विशुद्धौ डाकिनी देवि अनाहते तु राकिणी ।
लाकिनी मणिपूरस्था काकिनी लिङ्गगोचरे ॥
आधारे शाकिनी देवी आज्ञायां हाकिनी तथा ।
याकिनी ब्रह्मरन्ध्रस्था सर्वकामफलप्रदा ॥
ध्यायेत् कुण्डलिनी देवीं स्वयम्भूलिङ्गसंस्थिताम् ।
श्यामां सूक्ष्मां सृष्टिरूपां सृष्टिस्थितिलयात्मिकम् ।
विश्वातीतां ज्ञानरूपां चिन्तयेदूर्ध्वरूपिणीम् ॥

तथा आयत तीन नेत्र हैं; दोनों पैर में मनोहर नुपूर; उनका देह शब्दब्रह्मरूप है (अर्थात् शब्दमय हैं) ।

हे कमलेक्षणे ! शिव को तथा उनके स्थूल देह की इस प्रकार चिन्ता करना। षट्चक्र पद्म में अवस्थित शब्दरूपी शिव की निश्चेष्ट भावना करना क्योंकि शब्दरूप महादेव के सम्बन्ध में कभी भी कोई कृत्य नहीं है। इस प्रकार मूलाधारादि समस्त चक्र में शक्ति एवं रुद्र की चिन्ता करना।

ब्रह्मा, विष्णु, रुद्र, ईश्वर, सदाशिव तथा उसके बाद परशिव—(षट्चक्र में) ये छः शिव कीर्त्तित हुए हैं। शक्ति कह रही हैं—विशुद्ध चक्र में डाकिनी देवी, अनाहत चक्र में राकिणी, मणिपुर में लाकिनी, स्वाधिष्ठान में काकिनी, मूलाधार में शाकिनी, आज्ञाचक्र में हाकिनी शक्ति अवस्थित हैं। ब्रह्मरन्ध्र स्थिता याकिनी सभी काम्यफल प्रदान करती है।

स्वयम्भूलिङ्ग पर अवस्थित कुण्डलिनी देवी का इस प्रकार ध्यान करना। उन्हें श्यामवर्णा, सूक्ष्मा, सृष्टिस्थित—लयस्वरूपा, विश्वातीता,

रक्तामिति सुन्दरी विषये ज्ञेयम् ।

हुङ्कारवर्णसम्भूता कुण्डली परदेवता ।
विभर्ति कुण्डली देहमात्मानं हंसमन्त्रतः ॥

कुण्डलिनी योगः

प्रवृद्धवह्निसंयोगमनसामारुतैः सह ।
ऊर्ध्वं नयेत् कुण्डलिनीं जीवात्मसहितां परम् ॥
गच्छन्ति ब्रह्मरन्ध्रेण भित्वा ग्रन्थि चतुर्दशः ।
षट्चक्र-सन्धिमार्गेण सुषुम्ना वर्त्मना तथा ।
हंसेन मनुना देवीं सहस्रारं समानयेत् ॥
सदाशिवो महादेवो यत्रास्ते परमेश्वरि ।
तत्रगत्वा महादेवि कुण्डली परदेवता ॥
देवीरूपवती काम-समुल्लासविहारिणी ।
मुखारविन्दगन्धेन मोदितं परमं शिवम् ॥
प्रबोध्य परमेशानि तत्रोपरि वसेत् प्रिये ।

ज्ञानरूपा तथा ऊर्ध्वगामिनी चिन्ता करना। सुन्दरी के विषय में इन्हें रक्तवर्णा जानना अर्थात् सुन्दरी के उपासक गण इन्हें रक्तवर्णा जान कर ध्यान करेंगे। हुङ्कार वर्ण सम्भूता परदेवता कुण्डलिनी हंस मन्त्र के द्वारा अपने कुण्डली सर्पाकार देह पोषण करती है।

कुण्डलिनी योग

वायु के साथ महावह्नि के संयोग से वह जैसे ऊपर गमन करता है उसी प्रकार साधक मन के द्वारा परदेवता कुण्डलिनी शक्ति को जीवात्मा के साथ ऊर्ध्व में (ऊपर) सहस्रार पद्म, में ले जाता है। ब्रह्मरन्ध पथ में (रास्ते में) गमन कारिणी शक्ति को ग्रन्थि (स्वयम्भू, बाण तथा इतराख्य लिङ्गत्रय षट्चक्र तथा पञ्चशिव) भेद करके षट्चक्र सन्धिस्थानस्थित सुषुम्ना पथ में हंस मन्त्र के साथ सहस्रार पद्म में आनयन करना।

हे परमेश्वरि ! यहाँ महादेव सदाशिव अवस्थान करते हैं। हे प्रिये ! हे परमेशानि ! हे महदेवि ! रुपवती परदेवता कुण्डलिनी देवी उसी स्थान में गमन करके कामसमुल्लास विहारिणी होकर मुखपद्म के गन्ध के द्वारा आमोदित (आनन्दित) परम शिव को जगा कर सदाशिव के गोदी में बैठती है।

शिवस्य मुखपद्मं हि चुचुम्बे कुण्डली शिवे ॥
सदाशिवेन देवेशि क्षणमात्रं रमेत् प्रिये।
अमृतं जायते देवि तत्क्षणात् परमेश्वरि ॥
तदुद्भवामृतं देवि लाक्षारस समारुणम्।
तेनामृतेन देवेशि तर्पयेत् परदेवताम् ॥
षट्चक्रदेवतास्तत्र सन्तर्प्याऽमृतधारया।
आनयेत् तेन मार्गेण मूलाधारं पुनः सुधीः ॥
यातायातक्रमेणैव तत्र कुर्यान्मनोलयम्।
एवमभ्यस्यमानस्तु अहन्यहनि पार्वति ॥
जराभरणदुःखाद्यैर्मुच्यते भवबन्धनात्।
इत्युक्तं परमो योगो योनिमुद्रा प्रबन्धनः ॥

यामले—

कुलयोषित् कुलं त्यक्त्वा पुनरेव कुलं विशेत्।
रमते सेयमव्यक्ता पुनरेकाकिनी सती ॥

संकेतपद्धत्याम्—

पिण्डं कुण्डलिनीशक्तिः पदं हंसः प्रकीर्तितः।
रूपं विन्दुरिति ज्ञेयं रूपातीतश्च निष्फलम् ॥

हे प्रिये ! हे शिवे ! हे देवेशि ! (तब) कुण्डलिनी शक्ति शिव के मुखपद्म चुम्बन करते हैं तथा क्षणभर काल शिव के साथ क्रीड़ा करते हैं। हे देवि ; हे परमेश्वरि ! तभी उस क्रीड़ा से अमृत उत्पन्न होता है। हे देवि ! उस क्रीड़ाजात अमृत लाक्षारस के तुल्य समान अरुणवर्ण है।

हे देवेशि ! साधक उस अमृत के द्वारा परदेवता का तर्पण करेंगे। सुधी साधक वहाँ पर अमृत-धारा के द्वारा षट्चक्र देवता का तर्पण करके कुण्डलिनी शक्ति को उस पथ (रास्ते से) से पुनराय मूलाधार में आनयन करेंगे। साधक जाने आने के क्रम से ब्रह्म में मनः स्थिर करेंगे। हे पार्वति ! प्रतिदिन इस प्रकार अभ्यास करने पर जरामरण जनित दुःखादि तथा संसार बन्धन से मुक्तिलाभ करेंगे। यही है योनिमुद्रा प्रबन्धन (जन्मनाशक) इसे परम योग कहा गया है। यामल तन्त्र में कहा गया है—'कुलवधू जिस प्रकार कुल का परित्याग करके पुनः कुल में आगमन करती है' उसी प्रकार अब्यक्ता कुण्डलिनी (मूलाधार से प्रत्यावर्त्तन करके) एकाकिनी (अकेला)

एतेन षट्चक्रभेदक्रमेण कुण्डलिनीं सहस्रदल पद्मे नीत्वा तत्रस्थ सदाशिवेन सङ्गमय्यतदुद्भवामृतेन परदेवतां षट्चक्रस्थशिव-शक्त्यादींश्चाप्लाव्य सोऽहमिति मन्त्रेण पुनः स्वस्थानमानयेदिति तु वाक्यार्थः।

सोऽमिति च मन्त्रेण स्वस्थानमानयेत् सुधीः। इति यामल-वचनात् ॥

देव्युवाच

देवदेव महादेव सृष्टिस्थित्यन्तकारकः।
मूर्ध्नि पद्मं सहस्रारं रक्तवर्णमधोमुखम् ॥
तस्य मध्ये स्थितं ध्यायेद् गुरुं शान्तं सशक्तिकम्।
मूलाधारे महाशक्तिं कुण्डलीरुप-धारिणोम् ॥
अधोवक्त्र क्रमेणैव सर्वपद्मेषु भावना।
तदा कथं भवेत् तत्र चिन्तनं गुरुदेवयोः ॥

अवस्थान करती है। सङ्केत पद्धति में कहा गया है—'कुण्डलिनी शक्ति पिण्ड एवं पद हंस कह कर कीर्त्तित हुए हैं'। रूप को समझ कर एवं रूपातीत को निष्कल ब्रह्म समझना चाहिये।

इस प्रकार षट्चक्र भेद की रीति के अनुसार से कुण्डलिनी शक्ति को सहस्रदल पद्म में लेकर उस सहस्रदल पद्म स्थित सदाशिव के साथ मिला कर उस मिलन जनित अमृत के द्वारा पर देवता तथा षट्चक्र स्थित शिव-शक्ति आदि को आप्लावित करके 'सोऽहं' मन्त्र के द्वारा पुनः स्वस्थान में (मूलाधार) में आनयन करना (लाना)—यही है वाक्यार्थ, क्योंकि यामल तन्त्र में कहा गया है कि 'सुधी' साधक 'सोऽहं' इस मन्त्र के द्वारा कुण्डलिनी का आनयत करेंगे।

देवी कह रही है—हे देव देव! हे महादेव! हे सृष्टिस्थितलयकारिन्। मस्तक पर रक्तवर्ण अधोमुख सहस्रार पद्म अवस्थित है, उस पद्म के मध्य में अवस्थित शक्ति के साथ शान्तस्वभाव गुरु का एवं मूलाधार पद्म में कुण्डली रूपधारिणी महाशक्ति का ध्यान करना। यथाक्रम से समस्त पद्म में अधोमुख में ही ध्यान विहित हुआ है। अतएव वहाँ गुरु तथा देवता इन दोनों का ध्यान किसी प्रकार हो सकता है? आधार पद्म में अवस्थिति

आधारे चेत् स्थितिस्तत्र त्वधोभागे कथं भवेत् ।
अधोवक्त्रे स्थितस्यापि चिन्तनं वा कथं भवेत् ॥

श्रीमहादेव उवाच

यथा युक्तं त्वया देवि कथितं वीरवन्दिते ।
एवमेव तु सन्देहो जायते नात्र संशयः ॥
कथ्यते परमेशानि सन्देहोच्छेदकारणम् ।
तानि पद्मानि देवेशि सुषुम्नान्तः स्थितानि च ॥
परंब्रह्मस्वरूपाणि शब्दब्रह्ममयानि च ।
तत्सर्वं पङ्कजं देवि सर्वतोमुखमेव च ।
प्रवृत्तिश्च निवृत्तिश्च द्वौ भावौजीवसंस्थितौ ॥
प्रवृत्तिमार्गः संसारः निवृत्तिपरमात्मनि ।
प्रवृत्तिभावचिन्तायामधोवक्त्राणि चिन्तयेत् ॥
निवृत्तियोगमार्गेषु सदैवोर्ध्वमुखानि च ।
एवमेव भावभेदादसन्देहोऽभिजायते ॥

यद्यपि सम्भव होता है, परन्तु वहाँ अधोमुख भावना किस प्रकार से हो सकता है ? और अधोमुख में अवस्थित पद्म की चिन्ता किस प्रकार से होगा ।

श्रीमहादेव बोले–हे देवि ! हे वीरवन्दिते ! तुम्हारे द्वारा जिस प्रकार युक्तियुक्त विषय कहा गया है, 'साधारणतः' उसमें इस प्रकार संशय ही पैदा होता है–इसमें संशय नहीं है । हे परमेशानि ! सन्देह निवारण का कारण कह रहा हूँ । हे देवेशि ! शब्द ब्रह्ममय परब्रह्मस्वरूप उस पद्म समूह सुषुम्ना नाड़ी के अभ्यन्तर में अवस्थित है । हे देवि ! वे सभी पद्मसमूह सर्वतोमुख है अर्थात् ऊर्ध्व (ऊपर) तथा अधोमुख (नीचे के तरफ) है । प्रवृत्ति तथा निवृत्ति नामक दोनों भाव जीव हृदय में अवस्थान करते हैं । संसार है प्रवृत्ति मार्ग और परमात्मा गति है निवृत्ति । प्रवृत्ति भाव के चिन्ता से पद्मसमूह का अधोमुख चिन्ता करना । निवृत्तिरूप योगमार्ग में इन पद्म-समूह को सदा सर्वदा ऊर्ध्वमुख चिन्ता करना । इस प्रकार भावों के भेद रहने से सन्देह निवृत्ति उत्पन्न होता है ।

गृहस्थयोगसाधनम्

(अथान्यत् संप्रवक्ष्यामि गृहस्थानाञ्च साधनम् ।
मूलाधारे स्थितां देवीं कुण्डलीं परदेवताम् ॥
भोगकाले महेशानि आजिह्वान्तं विभाव्य च ।
शोधितान मत्स्यमांसादीन् तन्मुखे स्थापयेद् बुधः ॥
मूलमन्त्रं समुच्चार्य जुहोमि कुण्डलीमुखे ।
प्रतिग्रासे महेशानि एवं कुर्याद् विचक्षणः ॥
भोजनेच्छा भवेत् तस्या निर्लिप्तो जीवसंज्ञकः ।)
एवमेव प्रकारेण ऊर्ध्वपद्मं प्रजायते ॥
गुरोः स्थितिश्च चार्वङ्गि तदा सम्यक् प्रजायते ।
भिद्यते हृदयग्रन्थिच्छिद्यते सर्वसंशयः ॥
गुर्वादि भावनाद्देवि तदा सिद्धिः प्रजायते ।
स्वगेहे पायसं त्यक्त्वा भिक्षामटतिदुर्मतिः ॥
अतएव महेशानि वातुलत्वं प्रजायते ।
इत्येतत्कथितं सारं मम ज्ञानविलोकितम् ॥

गृहस्थ-योगसाधन

इसके अनन्तर गृहस्थों के अन्य योग साधन कह रहा हूँ–हे महेश्वरि ! साधक भोगकाल में मूलाधार स्थित परदेवता कुण्डलिनी देवी को जिह्वा तक ध्यान करके उनके मुख में शोधित मत्स्य मांस आदि स्थापन करेंगे । मूलमन्त्र उच्चारण करके "कुण्डलीमुख में जुहोमि" मन्त्र से आहुति देना ।

हे महेश्वरि ! विचक्षण साधक प्रतिग्रास में इस प्रकार करेंगे । इस प्रकार करने से ही ऊर्ध्वमुख पद्म उत्पन्न होगा । हे चार्वङ्गि ! तब उनमें गुरु की स्थिति सम्यक् प्रकार से सम्भव होगा । हे देवि ! गुरु आदि की चिन्ता भावना से जब हृदयग्रन्थि (अविद्या) भिन्न होता है, और समस्त संशय छिन्न होता है; तब सिद्धि उत्पन्न होता है । जो लोग दुर्म्मति (खराब बुद्धि) हैं, वे लोग अपने घर पर खीर छोड़कर भिक्षा को प्राप्त करते हैं अर्थात् जो लोग अपने शरीर मध्य में सिद्धिलाभ का उपायस्वरूप कुण्डलिनी योग को अवलम्बन न करके बाह्य योग अवलम्बन (ग्रहण) करते हैं, उन लोगों को उसके द्वारा सम्यक् सिद्धिलाभ नहीं होता है । हे महेश्वरि ! यह कुण्डलिनी योग से ही वायु तत्व (शिवत्व) लाभ होता है । यही मेरा ज्ञानलब्ध सारतत्व जो तुमसे कह दिया ।

प्रकारान्तर-कुण्डलिनी-योगकथनम्

अथ योगं प्रवक्ष्यामि येन देवमयो भवेत् ।
मूलपद्मे कुण्डलिनी यावन्निद्रामिता प्रिये ॥
तावत् किञ्चिन्न सिध्येत् मन्त्रयन्त्रार्चनादिकम् ।
स्वापकालो वामवाहः प्रबोधो दक्षिणावहः ॥
मन्त्रिणां स्वापकाले तु जपोऽनर्थं फलप्रदः ।
प्रबोधकालं जानीयादुभयोरपि पार्वति: ॥
जागर्त्तियदि सा देवि बहुभिः पुण्यसञ्चयैः ।
तदा प्रसादमायान्ति मन्त्रयन्त्रार्चनादयः ॥
योगयोगाद्भवेन्मुक्तिर्मन्त्रसिद्धिरखण्डिता ।
सिद्धे मनौ परावाप्तिरिति शास्त्रस्य निर्णयः ॥
जीवनमुक्तश्च देहान्ते परं निर्वाणमाप्नुयात् ।
संसारोत्तरणं मुक्तिर्योगशब्देन कथ्यते ॥
प्राणायामैर्जपैर्यागैस्त्यक्तनिद्रा जगन्मयी ।

प्रकारान्तर कुण्डलिनी योग

इसके अनन्तर अन्य लोगों को कहूँगा जिसके द्वारा साधक देवमय हो सकता है। हे प्रिये! मूलाधार पद्म में कुण्डलिनी जब तक निद्रित (सोये हुये) रहती है, जब तक मन्त्र-यन्त्र की अर्चना आदि कुछ भी सिद्ध नहीं होता है। निःश्वास जब वायें नाक से प्रवाहित होता है, तब स्वाप सोया हुआ काल है; और जब दाहिने नाक से निःश्वास प्रवाहित होता है, तब वह जाग्रत काल है। स्वाप काल में साधकों का जप अनर्थ फल प्रदान करता है। हे पार्वति! दोनों का ही अर्थात् साधक तथा कुण्डलिनी का प्रबोधकाल (जाग्रत काल) कल्याणकर जानना। हे देवि! अनेक पुण्य सञ्चय के द्वारा जब कुण्डलिनी देवी जाग्रत होती है, मन्त्र-यन्त्र की अर्चनादि से प्रसन्नता प्राप्त होती है। कुण्डलिनी योग के सम्बन्धवशतः अखण्ड मन्त्रसिद्धि एवं मुक्ति उत्पन्न होता है। मन्त्रसिद्ध होने पर परब्रह्म की प्राप्ति होती है–यहाँ शास्त्रसिद्धान्त है। जीवन्मुक्त साधक देहान्त परम निर्वाण लाभ करता है। योग शब्द के द्वारा संसार निवृत्तिरूप मुक्ति कहा गया है। जगन्मयी कुण्डलिनी प्राणायाम, जप तथा योग यज्ञ के द्वारा निद्रा को त्याग करते हैं।

चतुर्दलं स्यादाधारं स्वाधिष्ठानन्तु षड्दलम् ।
नाभौ दशदलं पद्मं सूर्यसंख्यादलं हृदि ॥
कण्ठे स्यात षोडशदलं भ्रूमध्ये द्विदलं तथा ।
सहस्रदलमाख्यातं ब्रह्मरन्ध्रमहापथे ॥
मातृकाक्षर संयुक्तं सहस्रारं सरोरुहम् ।
अधोवक्त्रं शुक्लवर्णं रक्त किञ्जल्कभूषितम् ॥ इति ॥

(सुन्दरीविषये तु रक्तवर्णं बोध्यम् । समयातन्त्रोक्तत्वात्, अन्यथा । विरोधापत्तेः ॥

ब्रह्मा विष्णुश्च रुद्रश्च ईश्वरश्च सदाशिवः ।
ततः परशिवश्चैव षट् शिवाः परिकीर्त्तिताः ॥
डाकिनी राकिनी चैव शाकिनी लाकिनी तथा ।
काकिनी शाकिनी चैव शक्तयस्ताः परिकीर्त्तिताः ॥
आधारे हृत्प्रदेशे च भ्रुवोर्मध्ये विशेषतः ।
स्वयम्भूसंज्ञो बाणाख्यस्तथैवेतरसंज्ञकः ॥
लिङ्गत्रयं महेशानि प्रधानत्वेन चिन्तयेत् ।
मूलाधारे स्थिताभूमिः स्वाधिष्ठाने जलं प्रिये ॥

आधार (मूलाधार) पद्म चतुर्द्दल, स्वाधिष्ठान षड्दल, नाभि में दशदल पद्म, हृदय में द्वादश दलपद्म, कण्ठ में षोडशदल—इस प्रकार भ्रूमध्य में द्विदल तथा मस्तक में सहस्रदल पद्म कहा गया है। सहस्रदल पद्म मातृकाक्षरों से युक्त, अधोमुख, शुक्लवर्ण तथा रक्त किञ्जल्कशोभित है। (सुन्दरी के विषय में सहस्रदल पद्म को रक्तवर्ण समझना। क्योंकि समयातन्त्र में यही कहा गया है। अन्यथा विरोध की आपत्ति होती है)।

ब्रह्मा, विष्णु, रुद्र, ईश्वर, सदाशिव उसके बाद परशिव—यह छः प्रकार शिव (मूलाधारादि छः पद्म में) स्वीकृत है। डाकिनी, राकिनी, शाकिनी, लाकिनी, काकिनी, हाकिनी—ये सभी मूलाधारादि पद्म में शिव की शक्ति कह कर कीर्त्तित है।

हे महेशानि ! मूलाधार पद्म में हृत्पद्म तथा भ्रू मध्य में (छः शिव के बीच) विशेषरूप से स्वयम्भूलिङ्ग, वाणलिङ्ग तथा इतर नामक लिङ्ग का प्रधानरूप से चिन्ता करना। हे प्रिये ! मूलाधार में भूमि, स्वाधिष्ठान में जल अवस्थित है, मणिपुर में तेज; हृदय में वायु अवस्थित है। हे महेशानि !

मणिपूरे स्थितं तेजो हृदये मारुतस्तथा।
विशुद्धौ तु महेशानि आकाशं कमलेक्षणे॥
आज्ञाचक्रे महेशानि मनः सर्वार्थसाधकम्।
तदूर्ध्वे परमेशानि पद्ममूर्ध्वमुखं सदा।
तस्योपरि महेशानि ध्यायेत् सदा शिवं गुरुम्॥

ऊर्ध्वमुखमिति। अधोमुख सहस्रदल पद्माधोगतेर्ध्वमुखद्वादश-दल-पद्मोपरि शिवरूपिणं श्रीगुरुं ध्यायेदित्यर्थः। तथा-चोक्तं यामले—

ब्रह्मरन्ध्र सरसीरुहोदरे नित्यलग्नमवदातमद्भुतम्।
कुण्डलीविवरकाण्डमण्डितं द्वादशार्णं सरसीरुहं भजे॥

अहं द्वादशार्णं द्वादशदलं सरसीरुहं पद्मं भजे। सरसोरुहं किं विशिष्टम्? कुण्डलीविवर काण्डमण्डितं। कुण्डल्यां विवरं मूलाधारपद्मात् सहस्रदलकमलकर्णिकान्तर्गतविन्दुरूपि-सदाशिव सन्निधौ गमनमार्गः, तस्य काण्डं तदाधारभूतं नालं, चित्रिणीनाडीत्यर्थः।

हे कमलेक्षणे! विशुद्धि चक्र में आकाश अवस्थित है। हे महेशानि! आज्ञा-चक्र में सर्वार्थ साधक मन अवस्थित है। हे परमेशानि! आज्ञा चक्र के ऊपर ऊर्ध्वमुख सहस्रदल पद्म सदा सर्वदा अवस्थित है। हे महेशानि उसके ऊपर सदाशिवरूपी श्रीगुरु का ध्यान करना।

'ऊर्ध्वमूखम्' इस वाक्य का अर्थ है—अधोमुख सहस्रदल पद्म के अधो-भागस्थित ऊर्ध्वमुख द्वादश दलपद्म के ऊपर में शिवरूपी श्रीगुरु का ध्यान करना। यामल तन्त्र में इसी प्रकार कहा गया है—'ब्रह्मरन्ध्र सरसीरु—होदरे' इत्यादि।

(ग्रन्थकार बाद में स्वयं उक्त श्लोक की व्याख्या किये है)—मैं द्वादशार्ण अर्थात् द्वादशदल विशिष्ट-सरसीरुह को अर्थात् पद्म को भजना कारि।

उस सरसी किस विशेषण विशिष्ट? 'कुण्डली विवरकाण्डमण्डितम्' व्याख्या कुण्डली का विवर अर्थात् मूलाधार पद्म से सहस्रदल पद्म के कर्णिका के अन्तर्गत (भीतर) जो विन्दु, उस विन्दू रूपी सदाशिव के समीप में गमन मार्ग है। उस कुण्डली विवर का काण्ड अर्थात् उसका आधार-भूत नाल अर्थात् चित्रिणी नाड़ी है। उस नल के 'मण्रित' अर्थात् पद्मनाल के समान चित्रिणी नाड़ी का शिरोभूषण है। उसके आगे द्वादश दल पद्म के

तस्य मण्डितं पद्मनालवत् चित्रिणीनाड्याः शिरोभूषणमित्यर्थः। तदग्रे द्वादशार्णस्य सरसीरुहस्य स्थितत्वात् भूषणमित्युक्तिः। पुनः किम्भूतम्? ब्रह्मरन्ध्रसरसीरुहोदरे नित्यलग्नम्, सहस्रारपद्म कर्णिकासमीपे तदधोदेशे नित्यमविनाभाव सम्बन्धेन लग्नं स्थितमित्यर्थः। पुनः किम्भूतम्? अवदप्तं गौरम्। पुनः किम्भूतम्? अद्भुतं मनोहरम्। तत्र पूर्वोक्त क्रमेण शिवरूपिणं श्रीगुरं ध्यायेत्॥

षट्चक्रं परमेशानि। सदाशिवपुरं समम्।
शक्तिपुरं महेशानि सदाशिवपुरोपरि॥
स एव निर्वाणाख्य कलोपरिगतः निर्वाणशक्तेः पुरम्।
शिवस्थानं शैवाः परमपुरुषं वैष्णवगणा
लपन्तीति प्रायो हरिहरपदं केचिदपरे॥
पदं देव्या देवीचरणयुगलानन्दरसिका।
मुनीन्द्रा अप्यन्ये प्रकृति पुरुषस्थानममलम्॥

अवस्थान वशतः 'भूषण' यह उक्त हुआ है।

पुनः किम्भूतम्? अर्थात् उस सरसीरूह और किस प्रकार विशेषण विशिष्ट है? 'ब्रह्मरन्ध्र-सरसीरुहोदरे नित्यलग्नं अर्थात् सहस्रार पद्म के कर्णिका के समीप में उसके अधोदेश में नित्य अर्थात् अविनाभाव सम्बन्ध से-लग्न अर्थात् स्थित। 'पुनः किम्भूतं' अर्थात् वह सरसीरूह और क्या विशेषण विशिष्ट है? अवदातम् अर्थात् गौर वर्ण है। पुनः किम्भूतं? अर्थात् वह सरसीरुह और क्या विशेषण विशिष्ट है? 'अद्भूतम्' अर्थात् मनोहर है। उस सरसीरूह में पूर्वोक्तक्रम से शिवरूपी श्रीगुरु का ध्यान करना चाहिये।

हे परमेशानि! षट्चक्र है सदाशिव का पुर हे महेशानि! सदाशिव-पुर के उपरि भाग में उसके तुल्य शक्तिपुर है। वह सदाशिव ही है निर्वाण नामक कला का उपरिस्थित निर्वाणशक्ति का पुर है। शैवगण इस स्थान को (पद्म को) शिवस्थान कहते हैं। वैष्णव गण उसे परम पुरुष विष्णु का स्थान कहते हैं। अनेक हरिहरोपासक तथा अन्यान्य उपासकगण उसे हरिहर पद कहते हैं। देवी के पादपद्म सेवकगण उसे देवी का स्थान कहते हैं। हंस मन्त्रोपासक मुनीन्द्रगण उसे मनोहर प्रकृति पुरुष का स्थान कहते हैं।

कुण्डलिनी प्रत्यावर्त्तन प्रकारः

रमित्वा शम्भुना सार्द्धं कुण्डलीं परदेवताम् ।
मूलाधारं महेशानि सहस्रारात् समानयेत् ॥
शम्भुना तां परां शक्तिमेकीभूतां विचिन्तयेत् ।
ध्यायेत् कुण्डलिनीं तत्र इष्टदेवस्वरूपिणीम् ॥
सदा षोडशवर्षीयां पीनोन्नतपयोधराम् ।
नवयौवनसम्पन्नां सर्वाभरणभूषिताम् ॥
पूर्णचन्द्रनिभां रक्तां सदा चञ्चललोचनाम् ।
नानारत्नयुतां धन्यां पादे नूपुरशोभिताम् ॥
किङ्किनी च तथा कट्यां रत्नकङ्कणमण्डिताम् ।
कन्दर्पकोटि-लावण्यां सदा मधुरहासिनीम् ॥
एवं ध्यात्वा जपेन्मन्त्रं शतमष्टोत्तरं शिवे ।
मातृकामालया जप्त्वा आज्ञाचक्रं समानयेत् ॥
तत्रेतरेण लिङ्गेन योजयेत् कुण्डलीं पराम् ।
ध्यात्वा ब्रह्ममयीं तत्र शतमष्टोतरं जपेत् ॥

कुण्डलिनी-प्रत्यावर्त्तन प्रकार

हे महेशानि ! (साधक) परदेवता कुण्डलिनी को (सहस्रार पद्म में) शिव के साथ मिलाकर सहस्रार पद्म से मूलाधार में आनयन करेगा एवं शम्भू के साथ उस पराशक्ति कुण्डलिनी को अभिन्न भावना करना । उस सहस्रदल पद्म में कुण्डलिनी के इष्टदेवस्वरूपिणी, सर्वदा षोडशवर्षीया (स्थिर यौवना), पीन, तथा उन्नत पयोधर विशिष्टा, नवयौवना, सभी प्रकार के अलङ्कारों से विभूषिता, पूर्णचन्द्र के समान सौन्दर्य विशिष्टा रक्तवर्णा, सर्वदा चञ्चलनयना, नानाविधि रत्नयुक्ता, सौभाग्यवती, पैरों में नूपुर शोभिता, कटिदेश में किङ्किणी युक्ता, रत्नकङ्कण मण्डिता, कोटि कन्दर्प तुल्य सौन्दर्य विशिष्ट सुन्दरी तथा सदा सर्वदा मधुरहास्ययुक्ता का ध्यान करना । हे शिवे ! इस प्रकार ध्यान करके १०८ बार मन्त्र जप करना । मातृकामाला में उक्त मन्त्र का जप करके कुण्डलिनी को आज्ञाचक्र में आनयन करना । उसी स्थान में इतर नामक लिङ्ग के साथ परा कुण्डलिनी को मिलाकर एवं उसी स्थान में कुण्डलिनी का ब्रह्ममयी ध्यान करके

ततो विशुद्धौ तां नीत्वा शिवेन सह योजयेत् ।
तामिष्टदेवतां ध्यात्वा जपेदष्टशतं प्रिये ॥
हृत्पद्मे तां ततो नीत्वा बाणेन सह योजयेत् ।
देवीरूपाञ्च तां ध्यात्वा जपेदष्टोत्तरं शतम् ॥
मणिपूरे तु तां नीत्वा शिवेन सह योजयेत् ।
देवीरूपां च तां ध्यात्वा शतमष्टोत्तरं जपेत् ॥
स्वाधिष्ठाने ततो नीत्वा शिवेन सह योजयेत् ।
योजयित्वा जपेन्मन्त्रं देवीं ध्यात्वा प्रियं वदे ॥
शतमष्टोत्तरं जप्त्वा मूलाधारे तु तां नयेत् ।
तत्र लिङ्गं स्वयम्भूञ्च ध्यायेत्कुन्दसमप्रभम् ॥
शुक्लवर्णं चतुर्बाहुं पञ्चवक्त्रं त्रिलोचनम् ।
नानारत्नयुतं रम्यं सार्द्धत्रिवलयान्वितम् ॥
प्रसन्नवदनं शान्तं नीलकण्ठविराजितम् ।
कपर्दिनं स्फुरत्सर्वभूषं कुन्दसमप्रभम् ॥

---

१०८ बार मन्त्र जप करना। हे प्रिये ! उसके बाद विशुद्धि चक्र में उस कुण्डलिनी को आनयन करके तत्रस्थ शिव के साथ मिलाकर एवं उन्हें इष्ट देवता-स्वरूपा चिन्ता करके १०८ बार मन्त्र जप करना। उसके बाद उन्हें हृत्पद्म में लेकर वाण नाम शिव के साथ मिलाकर एवं उन्हें देवीरूपा चिन्ता करके १०८ बार मन्त्र जप करना। उसके बाद उन्हें मणिपुर में ले जाकर शिव के साथ मिलाकर एवं उन्हें देवीरूपा ध्यान करके १०८ बार मन्त्र जप करना। उसके बाद उन्हें स्वाधिष्ठान चक्र में लेकर शिव के साथ मिलन करना चाहिये।

हे प्रियं वदे ! इस प्रकार देवी को मिलित करके ध्यान करके १०८ बार मन्त्र जप करना। १०८ बार मन्त्र जप करके मूलाधार में उन्हें आनयन करना। उसी स्थान पर स्वयम्भू लिङ्ग के कुन्द पुष्पवत् प्रभाविशिष्ट, शुक्लवर्ण, चतुर्बाहु, पञ्चमुख, तीन आँख विभिन्न रत्नयुक्त, मनोहर सार्द्ध त्रिवलययुक्त कुण्डलिनी के द्वारा आलिङ्गित देह, प्रसन्नवदन, शान्त, नील-कण्ठ, जटाजूटाधारी, अत्युज्ज्वल सर्वविध भूषणों से विभूषित, कुन्दपुष्प के समान सुन्दर ध्यान करना।

षट्चक्रे परमेशानि ध्यायेज्जगन्मयीं शिवाम् ।
भुजङ्गरूपिणीं देवीं नित्यां कुण्डलिनीं पराम् ॥
विषयन्तुमयीं देवीं साक्षादमृतरूपिणीम् ।
अव्यक्तरूपिणीं दिव्यां ध्यानगम्यां वरानने ॥
ध्यात्वा जप्त्वा च देवेशि साक्षाद् ब्रह्ममयो भवेत् ।
एवं द्वादशधा देवि यातायातं करोति यः ॥
स मुक्तः सर्वपापेभ्यो मन्त्रसिद्धो न चान्यथा ।
यत्र तत्र मृतश्चायं गङ्गायां श्वपचालये ।
ब्रह्मविद् ब्रह्मभूयाय कल्पते नान्यथा प्रिय ॥

अथ प्रार्थना—

अहं देवि न चान्योऽस्मि ब्रह्मैवाहं न शोकभाक् ।
सच्चिदानन्दरूपोऽहं नित्यमुक्तः स्वभाववान् ॥
हृदिस्थया परदेव्या प्रेरितश्च करोम्यहम् ।
न मे किञ्चिद् क्वचिद्वापि कृत्यमस्ति जगत्त्रयये ॥

हे वरानने ! हे परमेशानि ! षट्चक्र में परा कुल कुण्डलिनी देवी को जगन्मयी शिवा, शक्तिरूपा, भुजङ्गरूपिणी, नित्या, मृणालतन्तु कमल के नाल के अन्दर धागे के समान सूक्ष्मा दीप्तिमयी, साक्षात् अमृतरूपिणी, अव्यक्तस्वरूपा, दिव्या, ध्यान गम्या ध्यान करना ।

हे देवेशि ! (साधक) ध्यान करके तथा जप करके साक्षात् ब्रह्ममय होता है । जो साधक इस प्रकार द्वादश बार कुण्डलिनी को यातायात करता है अर्थात् कराता है, वह सर्वपाप से मुक्त होकर मन्त्र सिद्ध होता है अन्यथा मन्त्रसिद्ध नहीं हो सकता ।

हे प्रिये ! यह साधक जहाँ तहाँ गङ्गा के तट में अथवा चण्डाल के घर में मृत होने पर भी ब्रह्मविद् होकर ब्रह्मस्वरूप प्राप्ति के योग्यता का लाभ करता है; अन्यथा सम्भव नहीं है ।

अनन्तर प्रार्थना—हे देवि ! हम ब्रह्म से भिन्न नहीं हैं, मैं ब्रह्म ही हूँ (इसलिये) शोकभागी भी नहीं है । सच्चिदानन्दरूप नित्यमुक्त ब्रह्मसत्ता ही मेरी सत्ता है; हृदयस्थित परदेवता कर्तृक प्रेरित होकर ही मैं कर्म करता हूँ । जगत्रय के (स्वर्ग, मर्त्य, तथा पाताल का) किसी स्थान में मेरा किसी प्रकार कुछ भी कृत्य नहीं है । मैं धर्म जानता हूँ, परन्तु मेरी उसमें

जानानि धर्मं न च मे प्रवृत्तिजानाम्यधर्मं न च मे निवृत्तिः ।
त्वया महादेवि हृदिस्थयाऽहं यथा यथानियुक्तोऽस्मि तथा करोमि ॥
त्रैलोक्य चैतन्यमयि त्रिशक्ते श्रीपार्वति त्वच्चरणाज्ञयैव ।
प्रातः समुत्थाय तव प्रियार्थं संसारयात्रामनुवर्त्तयिष्ये ॥
एवं सञ्चिन्त्य मनसा गृहान्निर्गत्य संयतः ।
आचम्य प्रयतोमन्त्री दन्तधावनमाचरेत् ॥

दन्तधावनविधिः

तन्त्रगन्धर्वे—

दन्तकाष्ठमखादित्वा पूजयेद्यस्तु देवताम् ।
तत्पूजा विफला देवि मृते च नरकं व्रजेत् ॥

मन्त्रतन्त्रप्रकाशे—

विधायावश्यकं शौचमाचामं दन्तधावनम् ।
मुखप्रक्षालनादीनि कृत्वा स्नानं समाचरेत् ॥

अथ मुखप्रक्षालनमन्त्रः दक्षिणामूर्त्तौ—क्लीं कामदेवसर्वजन-प्रियाय नमः ।

क्लीमात्मकं कामदेव-सर्वजनमथालिखेत् ।

प्रवृत्ति नहीं है। अधर्म भी जानता हूँ, किन्तु मेरी उससे निवृत्ति नहीं है। हे महादेवि ! तुम मेरे हृदय स्थित होकर जिस प्रकार मुझे नियोग कर रही हो, उसी प्रकार ही मैं कर्म कर रहा हूँ। हे त्रैलोक्य-चैतन्यमयि ! हे त्रिशक्ते ! हे पार्वति ! तुम्हारे श्रीचरण के आज्ञानुसार से ही प्रातःकाल में गात्रोत्थान (उठकर) करके तुम्हारे प्रीति के लिए संसारयात्रा का अनुवर्त्तन करूँगा। संयत साधक मन के द्वारा इस प्रकार चिन्ता करके घर से बाहर होकर नियमपूर्वक आचमन करके दन्तधावन करेंगे।

दन्तधावन-विधि

गन्धर्वतन्त्र में कहा गया है—जो व्यक्ति दन्तकाष्ठ (दन्तधावन) बिना चबाकर देवता का पूजा करते हैं, हे देवि ! उसकी पूजा विफल है। वह पञ्चत्व प्राप्त होने पर नरक में गमन करते हैं। 'मन्त्रतन्त्र प्रकाश में कहा गया है'—अवश्य कर्त्तव्य शौच, आचमन, दन्तधावन करके एवं मुखप्रक्षालन (मुख धोकर) आदि करके स्थान करेंगे।

दक्षिणामूर्त्ति तन्त्र में मुख प्रक्षालन मन्त्र कहा गया है—क्लीं कामदेव सर्वजन प्रियाय नमः' (मन्त्रोद्धार की प्रणाली) पहले क्लीं कामदेव सर्वजन

प्रियाय हृदयान्तोऽयं मनुर्दन्तविशुद्धये ।
चतुर्दशाक्षरैर्वक्त्रं क्षालयेत् सिद्धिहेतवे ॥

स्नानविधिः

यामले—

स्नानमूलाः क्रियाः सर्वाः श्रुतिस्मृत्युदिता नृणाम् ।
तस्मात् स्नानं निषेवेत श्रीपुष्ट्यारोग्यवर्द्धनम् ॥

मन्त्रतन्त्रप्रकाशे—

अरुणेऽनुदितेमन्त्री तीर्थे वा विमले जले ।
वैदिकं स्नानमाचर्य तान्त्रिकं स्नानमाचरेत् ॥

परखाते यत्कर्त्तव्यं तदाह विश्वसारे—

परखाते तु कर्त्तव्यः पञ्चपिण्डोद्धारः सदा ॥

स्नानमन्त्रः

मन्त्रमाह—

उत्तिष्ठोत्तिष्ठ पङ्क त्वं त्यज पुण्यं परस्य च ।
पापानि विलयं यान्तु शान्ति देहि सदा मम ॥

पद लिखना, अनन्तर प्रियाय पद लिखना । दन्त विशुद्धि के लिये यह मन्त्र हृदयान्त होगा अर्थात् अन्त में हृदय (नमः) लिखना । उसमें पूर्वोक्त मन्त्र उधृत होगा । सिद्धिलाभ के लिये (पूर्वोक्त) चतुर्दशाक्षर विशिष्ट मन्त्र के द्वारा मुखप्रक्षालन करना ।

स्नानविधि

यामल तन्त्र में कहा गया है—मनुष्यों के श्रुति स्मृति विहित समस्त क्रिया स्नान-मूल अर्थात् स्नान के बाद अनुष्ठेय; अतएव श्री, पुष्टि तथा आरोग्यवर्धक स्नान (अवश्य) कर्त्तव्य है। मन्त्रतन्त्र प्रकाश में कहा गया है—'साधक अरुणोदय काल में (सूर्योदय के समय) तीर्थ में अथवा निर्मल जल में वैदिक स्नान करके तान्त्रिक स्नान करेंगे । दूसरे के जलाशय में (स्नान के समय) जो कर्त्तव्य है, विश्वसार तन्त्र में वह कह रहे है—(सुधी साधक) दूसरे के जलाशय में किन्तु पाँच मिट्टी के पिण्ड प्रतिदिन उठायेगा ।

स्नानमन्त्र

मृत्पिण्ड (मिट्टी के ठेला) उठाने के समय पाठ्य मन्त्र) कह रहे हैं—"उत्तिष्ठोत्तिष्ठ" इत्यादि "हे पङ्क ! तुम उठो उठो एवं दूसरों के लिये

नीलतन्त्रे—

पुनर्निमज्य पयसि संकल्पश्च समाचरेत् ।
ततः सङ्कल्प्य मतिमान्नाभिमात्रोदके स्थितः ॥
प्रीतये स्वेष्टदेवस्य स्नानं सर्वत्र कारयेत् ।
इष्टदेवतापूजार्थं स्नानं कार्यं जलाशये ॥

मन्त्रतन्त्रप्रकाशे—

अस्त्रेणानीय मृत्स्नां वै त्रिभागं तत्र कारयेत् ।
भागमेकं जले चैव क्षिपेन्मन्त्रं समुच्चरन् ॥
एवं मूर्द्धादि नाभ्यन्तरं पठन् मूलं विलेपयेत् ।
शेषन्तु पादनाभ्यन्तं तथैव परिलेपयेत् ॥
अङ्गे षडङ्गं विन्यस्य प्राणायामपुरःसरम् ।
हृन्मन्त्रां कुशमुद्राभ्यां तीथमावाह्य मण्डलात् ॥

मण्डलात् सूर्यमण्डलात् ॥

तीर्थावाहनमन्त्रः

ब्रह्माण्डेयानि तीर्थानि करैः स्पृष्टानि तेरवे ।

पुण्ड त्याग (अर्पण) करो। समस्त पाप विनाश प्राप्त हो। तुझे सर्वदा शान्ति दो। नीलमन्त्र में कहा गया है—'जल में पुनः अवगाहन करके सङ्कल्प करेंगे। उसके बाद मतिमान् साधक सङ्कल्प करके नाभि परिमाण जल में खड़े होकर अपने इष्ट देव की प्रीति के लिये सर्वत्र स्नान करेंगे। इष्ट देवता के पूजा के निमित्त जलाशय में स्नान (अवश्य) कर्त्तव्य है।

मन्त्रतन्त्र प्रकाश में कहा गया है—"अस्त्र (फट्) मन्त्र के द्वारा जलशाय से मृत्तिका (मिट्टी) लाकर उस मिट्टी का तीन भाग करेंगे। मन्त्र उच्चारण पूर्वक एक भाग मिट्टी जल में ही निक्षेप करेंगे। इस प्रकार मूलमन्त्र का पाठ करके (द्वितीय भाग मिट्टी को अपने शरीर में मस्तक से नाभि तक लेप करें। शेषभाग उसी प्रकार ही अर्थात् मूलमन्त्र पाठ पूर्वक अपने शरीर में पैर से नाभि तक लेप करें। अङ्ग में षडङ्गन्यास करके प्राणायाम पूर्वक हृन्मन्त्र (नमः) द्वारा अङ्कुश मुद्रायोग से मण्डल से ("ब्रह्माण्डे यानि" इत्यादि मन्त्र के द्वारा) तीर्थ आवाहन करेंगे। 'मण्डलात्' पद का अर्थ है—सूर्यमण्डल से।

तीर्थ आवाहनामन्त्र

उक्त आवाहना मन्त्र का अर्थहै—हे सूर्य ! ब्रह्माण्ड में जितने तीर्थ हैं,

तेन सत्येन मे देव तीर्थं देहि दिवाकर ॥
ॐ गङ्गे च यमुने चैव गोदावरि सरस्वति ।
नर्मदे सिन्धु कावेरि जलेऽस्मिन् सन्निधिं कुरु ॥
ॐ आवाहयामि देवि त्वां स्नानार्थमिह सुन्दरि ।
एहि गङ्गे नमस्तुभ्यं सर्वतीर्थ समन्विते ॥
एवमावाह्य विधिवन् मूलमन्त्रेण मन्त्रयेत् ।
आमन्त्र्याऽम्भसि संयोज्य सोमसूर्याग्निमण्डलम् ॥
विचिन्त्य मन्त्री तन्मध्ये निमज्जेन् मूलमुच्चरन् ।
उत्थायाचम्य तत्पश्चात् षडङ्गन्यास संयुतः ॥

अचामन मन्त्रः

यामले—

आत्मविद्या शिवैस्तत्त्वैराचामेत् साधकाग्रणीः ।
वह्निजायां परे दत्त्वा शुद्धेन पाथसा प्रिये । पाथसा जलेन ।

वे सभी ही तुम्हारे किरण के द्वारा स्पृष्ट है। हे देवदिवाकर ! उस सत्य-प्रयुक्त तुम मुझे तीर्थ प्रदान करो। हे गङ्गे ! हे यमुने ! हे गोदावरि ! हे सरस्वति ! हे नर्मदे ! हे सिन्धु ! हे कावेरि ! तुम लोग इस जल में सन्निहित हो जाओ। हे देवि ! हे सुन्दरी ! मैं स्नान के लिये तुम्हें आवाहन कर रहा हूँ। हे गङ्गे ! तुम आओ। हे सर्वतीर्थसमन्विते ! तुम्हें नमस्कार है।

विधिपूर्वक इस प्रकार आवाहन करके मूलमन्त्र के द्वारा जल अभिमन्त्रित करेंगे। साधक जल में (इस प्रकार से तीर्थ) आवाहन करके योग करके तथा सोम, सूर्य तथा अग्निमण्डल सन्निहित चिन्ता करके मूलमन्त्र का उच्चारण करके उस जल में अवगाहन करेंगे। जल में से उठकर आचमन करके उसके बाद षडङ्गन्यासयुक्त होगा अर्थात् षडङ्गन्यास करेंगे।

आचमन मन्त्र

यामल तन्त्र में कहा गया है—हे प्रिये ! साधकाग्रणी शुद्ध जल के द्वारा आत्मतत्त्व, विद्यातत्त्व तथा शिवतत्त्व-परभाग में वह्निजाया (स्वाहा) देकर उसके द्वारा अर्थात् आत्मतत्त्वाय स्वाहा, विद्यातत्त्वाय स्वाहा, शिवतत्त्वाय स्वाहा मन्त्र से आचमन करें। 'पाथसा' अर्थात् जल के द्वारा।

अभिमन्त्र्य ततस्तोयं मूलमन्त्रेण साधकः ।
क्षालयेत् तेन वपुषः कलुषं कुम्भमुद्रया ॥
आत्मानं दशधा सिञ्चेन् मुद्रया कलशाख्यया ।
सप्तकृत्वोऽभिषिञ्चेद्वा मनुना मन्त्रितैर्जलैः ॥

ज्ञानार्णवे—
वामहस्ते कृता मुष्टिर्दक्षहस्तस्य पार्वति ।
कलशाख्या भवेन्मुद्रा सर्वपापहरा शुभा ॥

गौतमीये—
पीडयित्वाऽम्बरं चारु प्रक्षाल्याचम्य वाग्यतः ।
धारयेद्वाससी शुद्धे परीधानोत्तरीयके ॥
अच्छिन्ने सदशे शुक्ले आचामेत् पीठसंस्थितः ।
मोक्षार्थी रक्तवस्त्रे द्वे भोगार्थी श्वेतवाससी ॥

शाक्ततिलकविधिः

तिलकं रक्तगन्धेन चन्दनेन च वा प्रिये ।
देव्यस्त्रं विलिखेद्भाले ताराबीजं ततो हृदि ।
शक्तिं मध्यगतां कुर्यात् साधको नरपुङ्गवः ॥

उसके बाद साधक मूलमन्त्र के द्वारा जल को अभिमन्त्रित करके कुम्भ मुद्रा में उस जल के द्वारा शरीर का पाप क्षालन करेंगे। साधक कलश नामक मुद्रा में अभिमन्त्रित जल के द्वारा आत्मा को देह को दश बार सेचन करें अथवा मन्त्र द्वारा सातबार सेचन करें। ज्ञानार्णव तन्त्र में कहा गया है—हे पार्वति ! वाम हस्त में दक्षिणहस्त की मुट्ठि करने पर ही कलश नामक मुद्रा होती है। वह शुभजनक तथा सर्वपाप विनाशक है। गौतमीय तन्त्र में कहा गया है—'साधक वाग्यत होकर उत्तमरूप से वस्त्र धौत करके (कपड़ा धोकर) तथा निपीड़न करके (निचोड़कर) आचमन करके अच्छिन्न तथा दशायुक्त शुक्लवर्ण (सफेद) दो वस्त्र-पहन कर तथा उत्तरीयधारण करें। उसके बाद आसन में बैठकर आचमन करें। मोक्षार्थी दो रक्तवस्त्र एवं भोगर्थी दो श्वेतवस्त्र धारण करें।

शाक्ततिलकविधि

हे प्रिये ! उसके बाद रक्तचन्दन अथवा चन्दन द्वारा तिलक धारण करें। नरश्रेष्ठ साधक कपाल में देवी का अस्त्र लिखें अर्थात् अस्त्राकार तिलक करें। उसके बाद हृदय में ताराबीज लिखें एवं मध्यस्थल में शक्तिबीज

देव्यस्त्रं स्वस्वोपासित देव्यस्त्रं लिखेदित्यर्थः ।

त्रिपुण्ड्रेणविना कुर्याद् यां काश्चिद्वैदिकी क्रियाम् ।
सा निष्फला भवेद् भूप ब्रह्मणपि कृता यदि ॥

इति भविष्यपुराणवचनात् । कूर्मपुराणे—

वैष्णवो वाथ शैवा वा शाक्तो वा सौर एव वा ।
त्रिपुण्ड्रेण विना पूजां कुर्वाणो यात्यधोगतिम् ॥

शिवधर्मे—

सितेन भस्मना कुर्याल्ललाटे यस्त्रिपुण्ड्रकम् ।
सर्वपापविनिर्मुक्तः शिवलोके महीयते ॥

भस्मेत्युपलक्षणम्, द्रव्यान्तरेणापि त्रिपुण्ड्रं कार्यम् । तथा च भविष्ये—

सर्वस्त्रिपुण्ड्रकं कुर्याद्यज्ञस्य भस्मना सदा ।
तदलाभे चन्दनेन मृदा वा वारिणापि वा ॥
यत्किञ्चित् कुरुते कर्म विना विप्रस्त्रिपुण्ड्रकम् ।
व्यर्थमेव भवेत्सर्वं बन्ध्यास्त्रीसङ्गमो यथा ॥
सच्छिद्रं कुरुते यस्तु पुण्ड्रं पशुमतिर्द्विजः ।

लिखें । 'देव्यस्त्र' पद का अर्थ है—अपने अपने उपासित देवी के अस्त्र लिखें क्योंकि भविष्य पुराण में कहा गया है—'त्रिपुण्ड्र व्यतीत वेदविहित जिस किसी क्रिया यदि ब्रह्मा कर्तृक भी अनुष्ठित होता है, हे महाराज ! तब वह निष्फल है । कूर्मपुराण में कहा गया है—"वैष्णव, शैव, शाक्त एवं सौर (सूर्योपासक) त्रिपुण्ड्र के बिना पूजा करने पर अधोगति को प्राप्त होगा ।

शिवधर्म में कहा गया है—जो व्यक्ति शुभ्रवर्ण भस्म के द्वारा कपाल में त्रिपुण्ड्र करते हैं, वह समस्त पाप से मुक्त होकर शिवलोक को गमन करते हैं । भस्मपद उपलक्षण है अर्थात् भस्मपद अन्यान्य तिलक द्रव्य को लक्षित कर रहे हैं । (भस्म के अभाव में) अन्य द्रव्य के द्वारा भी तिलक कर्त्तव्य है ।

यही भविष्यपुराण में कहा गया है—'समस्त साधक यज्ञभस्म के द्वारा सर्वदा तिलक करेंगे । यज्ञभस्म के अभाव में चन्दन द्वारा अथवा मृत्तिका द्वारा अथवा जल के द्वारा त्रिपुण्ड्र करेंगे । विप्र (ब्राह्मण) त्रिपुण्ड्र व्यतीत जो कोई भी कर्म करता है, वन्ध्या स्त्री के सहवास के समान उसके सभी

धर्मार्थकाममोक्षेषु तस्य छिद्रं प्रजायते ॥
वैदिकीं तान्त्रिकीं सन्ध्यां ततः कुर्यात् समाहितः ।
अशून्यं च करं कुर्यात्सुवर्णरजतैः कुशैः ॥
सुवर्णरजतञ्चैव जपपूजादि कर्मसु ।
एष एव कुशः शाक्ते न दर्भो वनसम्भवः ।
तर्जन्यां रजतं धार्यं स्वर्णं धार्यमनामया ॥

तान्त्रिक-सन्ध्या

अथ सन्ध्या प्रवक्ष्यामि तान्त्रिकीं सर्वसिद्धिदाम् ।
उपविश्याचमेन्मन्त्री पयोभिर्हर्नोबुद्बुदैः ॥
ततश्च आत्मतत्त्वाय विद्यातत्त्वाय तत्परम् ।
शिवतत्त्वाय वै प्रोच्य क्रमेण वह्निवल्लभाम् ॥
मूलान्तैरेभिराचामेत् पूर्वोत्तरमुखः सुधीः ।
आचमनं ततः कृत्वा प्राणायामं समाचरेत् ॥

कर्म व्यर्थ होंगे। जो मूढ़मति ब्राह्मण त्रिपुण्ड्र को सच्छिद्र करता है; उसके धर्म, अर्थ, काम तथा मोक्ष में छिद्र (विघ्न) उत्पन्न होता है।

उसके बाद समाहित होकर वैदिक तथा तान्त्रिक सन्ध्या करें। सुवर्ण, रजत अथवा कुश के द्वारा हस्त को अशून्य करें अर्थात् सुवर्ण, रजत अथवा कुशनिमिति अंगूठी हाथ में धारण करें। शक्ति विषयक जप पूजादि कार्य में स्वर्ण अथवा रजत ही कुश, वनजात दर्भ कुश नहीं है। तर्जनी में रजत एवं अनामिका में स्वर्ण धारण करें।

तान्त्रिक-सन्ध्या

अनन्तर सर्वसिद्धिप्रद तान्त्रिकसन्ध्या विधि कहूँगा। दीक्षित साधक आसन में बैठकर बुद्बुद्हीन जल के द्वारा आचमन करें। उसके बाद सुधी साधक पूर्वमुख अथवा उत्तरमुख होकर आत्मतत्त्वाय एवं विद्यातत्त्वाय कह कर उसके बाद शिवतत्त्वाय कह कर यथाक्रम से वह्निवल्लभा (स्वाहा) कह कर अर्थात् मूल के अन्त में आत्मतत्त्वाय स्वाहा, विद्यातत्त्वाय स्वाहा शिवतत्त्वाय स्वाहा—इस तीन मन्त्र के द्वारा आचमन करें। उसके बाद आचमन करके प्राणायाम करें।

षडङ्गन्यासमाचर्य जले मूलं जपेद् दश।
कुशेन तज्जलं भूमौ त्रिर्मूर्ध्नि सप्त निक्षिपेत्॥
मूलमुच्चार्य देवेशि वामहस्ते जलं ततः।
गृहीत्वा तज्जलं देवि तत्र मूलं समुच्चरन्॥
शिववायुजलपृथ्वीवह्निबीजैस्त्रिधा पुनः।
अभिमन्त्र्य च मूलेन सप्तधा तत्त्वमुद्रया॥
गलिताम्बु क्षिपेन्मूर्ध्नि शेषं दक्षे निधाय च।
इडयाकृष्य देहान्तः क्षालितैः पापसञ्चयैः॥
कृष्णवर्णं तदुदकं दक्षनाडया विरेचयेत्।
दक्षहस्ते तु तन्मन्त्री पापरूपं विचिन्त्य च।
पुरतो वज्रपाषाणे प्रक्षिपेदस्त्रमन्त्रतः॥

तर्पणविधिः

जले यन्त्रं समालिख्य तपयेत् परदेवताम्।
पूजयित्वा तत्र देवीं परिवार-समन्विताम्॥
गुरुपंक्तीः प्रतर्प्याथ तर्पयेदिष्टदेवताम्।

षडङ्गन्यास करके जल में दस बार मूलमन्त्र जप करें। कुशा के द्वारा वह जल भूमि पर तीन बार एवं माथे पर सात बार निक्षेप करें। हे देवि! हे देवेशि! उसके बाद मूलमन्त्र का उच्चारण करके बायें हाथ में जल लेकर उस जल में मूलमन्त्र का जप करके शिवबीज (हँ), वायुबीज (यँ), जलबीज (वँ), पृथिवीबीज (लँ) तथा वह्निबीज (रँ) द्वारा उस जल को तीन बार अभिमन्त्रित करके पुनः मूलमन्त्र के द्वारा अभिमन्त्रित करके तत्त्वमुद्रा के द्वारा (अंगुलिच्छिद्र) गलित उस जल को सात बार मस्तक पर निक्षेप करें। अवशिष्ट (शेष) जल दाहिने हाथ में लेकर इड़ा नाड़ी के द्वारा देह मध्य में आकर्षण करके उस जल से प्रक्षालित पापसमूहों के द्वारा कृष्णवर्ण देह मध्यस्थ उस जल को दक्षनाड़ी (पिङ्गला) के द्वारा दक्षिण हस्त से विरेचन (बाहर) करें। साधक उस विरेचित जल जल को पापरूप चिन्ता करके अस्त्रमन्त्र (फट्) उच्चारण पूर्वक सम्मुखवर्त्ती (कल्पित) व्रज पाषाण में निक्षेप करें।

तर्पणविधि

उसके बाद जल में इष्ट देवता का मन्त्र लिखकर परदेवता एवं इष्ट देवता का तर्पण करना। उ स जल में परिवारगणों के साथ के देवी की पूजा

उत्ताभिमुखो भूत्वा देवीमात्रं प्रतर्पयेत् ॥
तृप्यतां जगतां माता भैरवस्तृप्यतां तथा।
मूलान्ते नाम चोच्चार्य तर्पयामि ततः परम् ॥
स्वाहान्ते तर्पणं त्वेवं पञ्चविंशतिसंख्यया।
तर्पणञ्च प्रकुर्वीत द्वितीयान्तमथोच्चरन् ॥
पञ्चविंशतिसंख्यातं दशधा वा त्रिधापि वा।
एकैकाञ्जलितोयेन परिवारांस्तु तर्पयेत् ॥

सूर्यार्घदानम्

दिनेशाय क्षिपेत्तिष्ठन्वारिणा चाञ्जलित्रयम्।
सूर्यमन्त्रं समुच्चार्य ॐ ह्रीं हंस इत्यपि ॥
मार्तण्डभैरवायेति प्रकाशशक्तिसंयुतम्।
ङेन्तं समुच्चार्य ग्रहराशियुताय ठद्वयम् ॥
त्रिधाञ्जलिं क्षिपेन्मन्त्री सिद्धये साङ्गकर्मणाम्।
तोयाञ्जलिं ततः क्षिप्त्वा सूर्यमण्डलमध्यगाम् ॥
आदित्यमण्डले देवीं ध्यायेत् सूर्यस्वरूपिणीम्।

करके, गुरुपङ्क्ति का तर्पण करके उसके बाद इष्ट देवता का तर्पण करना अथवा उत्तर मुख होकर केवल देवी का ही तर्पण करना।

तर्पण मन्त्र—जगतां माता तृप्यताम्, इसी प्रकार भैरवस्तृप्यताम् इस प्रकार मूलमन्त्र के अन्त में इष्ट देवता का नाम उच्चारण करके 'तर्पयामि' कह कर उसके बाद अन्त में 'स्वाहा' कहना अर्थात् मूल अमुक अमुकीं वा तर्पयामि स्वाहा कह कर एक एकबार जल देना। इस प्रकार तर्पण २५ बार करना। अनन्तर द्वितीयान्त 'इष्ट' नाम उच्चारण करके २५ बार, १० बार अथवा ३ बार तर्पण करना। एक एक अञ्जलि जल द्वारा परिवार गण को तर्पण करना।

सूर्यार्घदान

साधक अङ्गकार्य के साथ प्रधान कार्य के सिद्धि के लिये ॐ ह्रीं हंस इस प्रकार सूर्यमन्त्र उच्चारण करके मार्त्तण्डभैरवाय एवं ङेन्त (चतुर्थी-विभक्त्यन्त) प्रकाशशक्तिसंयुत अर्थात्-प्रकाशशक्तिसंयुताय उच्चारण करके ग्रहराशियुताय तथा ठ द्वय (स्वाहा) उच्चारण करके तीन बार जालाञ्जलि देना। उसके बाद सूर्यमण्डल मध्यवर्त्तिनी देवी को उद्देश्य करके जलाञ्जलि

तत्तद्गायत्रीमुच्चार्य विसृजेदनयाऽर्घकम् ॥
गायत्रीं भावयेद्देवीं सूयासनकृताश्रयाम् ।
प्रातर्मध्याह्न सायाह्ने ध्यानं कृत्वा जपेत्सुधीः ॥
ध्यानं कृत्वेति । बीजत्रयरूपां कुण्डलिनीं ध्यात्वा जपेदित्यर्थः ॥

कुण्डलिनीध्यानम्

कुण्डलिनीं त्रिधा देवि तथा बीजत्रयं त्रिधा ।
तृतीयां कुण्डलीं मूर्ध्नि नित्यानन्द स्वरूपिणीम् ॥
वाग्भवं मूलदेशे च द्रवस्वर्णनिभं स्मरेत् ।
वह्निकुण्डलिनीं नित्यां बालार्कसदृशारुणाम् ॥
हृदये कामबीजञ्च सूर्यकोटिसमप्रभम् ।
सूर्यकुण्डलिनीं तत्र नित्यानन्दस्वरूपिणीम् ॥
भ्रूमध्ये शक्तिबीजञ्च कोटिचन्द्रसमप्रभम् ।
चन्द्रकुण्डलिनीं तत्र स्रवदमृतविग्रहाम् ॥

देकर सूर्यमण्डल मध्यवर्त्तिनी देवी का सूर्यस्वरूपा ध्यान करना । उन उन (इष्ट देवताका) गायत्री उच्चारण करके इसके द्वारा अर्घ्यविसर्जन करना । गायत्री देवी को सूर्यासन कृताश्रया अर्थात् सूर्यमण्डलमध्यवर्त्तिनी चिन्ता करना ।

सुधी साधक प्रातःकाल में, मध्याह्न तथा सायाह्न में देवी का ध्यान करके जप करें । 'ध्यानं कृत्वा' इस वाक्य का अर्थ है—बीजत्रयस्वरूपा कुण्डलिनी को ध्यान करके जप करें ।

कुण्डलिनी ध्यान

हे देवि ! कुण्डलिनी का तीन प्रकार, बीजत्रय का तीन प्रकार तथा मस्तक पर तुरीया कुण्डलिनी का नित्यानन्दस्वरूपा चिन्ता करना । मूलाधार में वाग्भव बीज को (ऐं) गला हुआ स्वर्ण के समान भावना करना । वह्निकुण्डलिनी को नित्या तथा बाल (नवोदिता) सूर्य के समान अरुणवर्णा भावना करना । हृदय में कामबीज (क्लीं) को कोटि सूर्य के समान दीप्तिमान चिन्ता करना । एवं उस स्थान में सूर्य कुण्डलिनी को नित्यानन्दस्वरूपा चिन्ता करना । भ्रूमध्य में शक्तिबीज (ह्रीं) को कोटि चन्द्र तुल्य प्रभायुक्त भावना करके एवं उस स्थान में चन्द्रकुण्डलिनी को गलित अमृतमय शरीर विशिष्ट चिन्ता करना ।

बीजत्रयमयीं विन्दौ तूर्यां विन्दुत्रयात्मिकाम् ।
तूर्यकुण्डलिनीं देवि केवलां ज्ञानविग्रहाम् ॥

प्रातःकाले मूलाधारे—

बालार्कमण्डलाभासां भानुवह्नीन्दुलोचनाम् ।
पाशांकुशौ शरांश्चापं धारयन्तीं शिवां स्मरेत् ॥

मध्याह्ने हृत्पद्मे—

मध्याह्ने चिन्तयेद्देवीं नवयौवन शोभिताम् ।

सायाह्ने भ्रूमध्ये—

सायह्नि चिन्तयेद्देवीं त्रैलोक्यैकप्रभामयीम् ॥
नवयौवनसम्पन्नामुज्वलां परमां कलाम् ।

रात्रौ सहस्रारे—

तामेव चिन्तयेद्रात्रौ भोगी भोगपरायणाम् ॥

गायत्रीजपविधिः

गायत्रीं प्रजपेद् विद्वानष्टाविंशतिसंख्यया ।
मनसा प्रजपेन्मन्त्रं गायत्रीञ्च विशेषतः ॥

हे देवि ! विन्दु में बीजत्रयरूपा तूर्या कुण्डलिनी को विन्दुत्रयस्वरूपा चिन्ता करना । तूर्या कुण्डलिनी का केवल मात्र ज्ञानमय शरीर भावना करना ।

प्रातःकाल में मूलाधार पद्म में—कुण्डलिनी शक्ति को नवोदित सूर्य के समान अरुणवर्णा, रवि, अग्नि तथा चन्द्ररूप नयनत्रय (तीनों आँख) विशिष्टा, हाथ में पाश, अंकुश शर तथा चापधारिणी चिन्ता करना । मध्याह्न में हृदयपद्म में—दोपहर के समय देवी को नवयौवन-शोभिता भावना करना । सायाह्न में भ्रूमध्य में—सायं के समय देवी को त्रिलोक के मिलित प्रभाव के समान प्रभामयी, नवयौवना, दीप्तिमती तथा परमा कला भावना चिन्ता करना । रात्रि में सहस्रार पद्म में—रात्रि को उस कुण्डलिनी के भोगी व्यक्ति भोगपरायणा चिन्ता करना ।

गायत्रीजपविधि

विद्वान् व्यक्ति २८ बार गायत्री जप करें । मनके द्वारा मन्त्र—विशेषतः गायत्री जप करना । गन्धर्व तन्त्र में कहा गया है—'जैसे कि गानकारी को

गान्धर्वे—

गायन्तं गायते यस्माद् गायत्री तेन चोच्यते ।
महापातकयुक्तोऽपि प्रजपेद्दशधा यदि ॥
सत्यं सत्यं महादेवि मुक्तो भवति तत्क्षणात् ।
अष्टोत्तर शतावृत्या गायत्रीं जपते यदि ॥
सर्वपापविनिर्मुक्तो भवेत् पूजाधिकारवान् ।
अष्टोत्तर शतावृत्या मूलमन्त्रञ्च संजपेत् ॥

आर्द्रवस्त्रेण यत्कर्त्तव्यं तदाह यामले—

नाभिमात्रोदके स्थित्वा देवीमर्कगतां स्मरन् ।
जपेदष्टोत्तरशतं लभते महतीं श्रियम् ॥
संहारमुद्रया चैव तीर्थमुद्रास्य वाग्यतः ।
ततोमौनी विशुद्धात्मा हृदि विद्यां परामृशन् ॥
अवहिर्मानसो भूत्वा यागभूमिमथाविशेत् ।
शक्तिसन्ध्या मया प्रोक्ता कर्त्तव्या साधकोत्तमैः ।
सन्ध्यायां पतितायां तु गायत्रीं दशधा जपेत् ॥

(जपकारी को) विपद् से त्राण (रक्षा) करती है इसीलिये वह 'गायत्री' नाम से कथित हुई है। महापातकी व्यक्ति भी यदि दशबार गायत्री जप करता है, हे महादेवि ! सत्य सत्य ही वह तत् क्षणात् पाप से मुक्त होता है। यदि १०८ बार गायत्री जप करता है, तब समस्त पाप से मुक्त होकर पूजा करने का अधिकारी होता है। इष्ट देवता का मूलमन्त्र भी १०८ बार जप करना।

आर्द्रवस्त्र में जो कर्त्तव्य है, यामल तन्त्र में वह कहा गया है—जो व्यक्ति नाभि परिमित (नाभि तक) जल में खड़े होकर गायत्री के सूर्यमण्डल मध्यवर्त्तिनी चिन्ता करते करते १०८ बार जप करेंगे, उससे वह महत् सम्पत् लाभ करेगा। साधक वाग्यत होकर संहार मुद्रा के द्वारा तीर्थ विसर्जन करके उसके बाद मौनी तथा संयतचित्त होकर हृदय में शक्ति की चिन्ता करते करते वह्निर्मुख न होकर अनन्तर यागभूमि (पूजागृह में) प्रवेश करें।

मेरे द्वारा शक्तिसन्ध्या कहा गया; साधक श्रेष्ठों का यह कर्त्तव्य है। सन्ध्या पतित होने पर अर्थात् यथाकाल में सन्ध्या न करने पर १० बार गायत्री जप करें।

सन्ध्याश्च त्रिकालं कुर्यात् । तथा शैवागमे—

प्रातर्मध्याह्ने सायाह्ने सन्ध्यां कुर्याच्च मन्त्रवित् ।

सन्ध्यायास्त्वकरणे दोषमाह च लक्ष्मीकुलार्णवे—

सन्ध्यां तु विहीनो यो न दीक्षाफलमाप्नुयात् ॥

तान्त्रिक सन्ध्यायां शूद्रस्याप्यधिकारः । विशुद्धेश्वरे—

सन्ध्यात्रयं सदा कुर्याद् ब्राह्मणोविधिपूर्वकम् ।
तन्त्रोक्तविधि पूर्वान्तु शूद्रः सन्ध्यां समाचरेत् ॥

इति श्रीपरिव्राजकाचार्य परमहंसतीर्थावधूत श्रीमद्ब्रह्मानन्द-
गिरिकृतायां शाक्तानन्दतरङ्गिण्यां प्रातःकृत्यनिर्णयो
नाम चतुर्थोल्लासः ॥ ४ ॥

सन्ध्या तीन काल में (प्रातःकाल, मध्याह्न तथा सायाह्न) करना । शैवागम तन्त्र में यही कहा गया है–'दीक्षित साधक प्रातःकाल **में,** मध्याह्न में तथा सायाह्न में सन्ध्या करें' । लक्ष्मीकुलार्णव तन्त्र में सन्ध्या न करने का दोष कह रहे हैं–"जो व्यक्ति सन्ध्या नहीं करते हैं वह दीक्षा-फल को प्राप्त नहीं होते" । तान्त्रिक सन्ध्या में शूद्रों का भी अधिकर है । विशुद्धेश्वर तन्त्र में कहा गया है–"ब्राह्मण विधिपूर्वक सभी समय में अर्थात् अशौचादि में भी तीनों सन्ध्या करें । शूद्र तन्त्रोक्तविधि के अनुसार सन्ध्या (तान्त्रिक सन्ध्या) करें ।

श्रीपरिव्राजकाचार्यपरमहंसतीर्थावधूतश्रीमद्ब्रह्मा-
नन्दगिरिकृतं शाक्तानन्दतरङ्गिणी के प्रातःकृत्य-
निर्णय नामक चतुर्थ उल्लासः समाप्त ।

आठवाँ परिच्छेद

गोरक्षनाथ की संस्कृत-रचनाएँ

स्थितः सर्वेषु देहेषु एक एव रवेः करः ।
तस्मिन् करे संनिवेश्य जीवं[1] योगी समाधिना ॥ ९० ॥

[1] जीवः A

विन्यस्य तं भ्रुवोर्मध्ये ध्यायेन्नारायणं प्रभुम् ।
ध्यात्वा चामृतधारायां तन्मध्ये विनिवेश्य च ॥ ९१ ॥

सुषुम्नान्तमतिक्रम्य ऊर्ध्वं वै सूर्यमण्डलम् ।
ततश्चन्द्रमसं गत्वा तन्मध्ये च स्थितः प्रभुः ॥ ९२ ॥

ततः परतरं देवं सदाविष्णुं समाश्रयेत् ।
स एव निष्कलो देवः स च नारायणः प्रभुः ॥ ९३ ॥

वासुदेवं जगद्बीजं कूटस्थमचलं विदुः ।
परात् परतरः सोऽयं स एव तमसः परः[1] ॥ ९४ ॥

तस्मात् परतरं नास्ति स्थूलं वा सूक्ष्ममेव वा ।
तमाहुः पुरुषं नित्यं तद्विष्णोः परमं पदम् ॥ ९५ ॥

तद्विष्णुपदमासाद्य न भूय इह जायते ।
एवं वायुजयं कृत्वा योगी योगविचक्षणः ॥ ९६ ॥

अभ्यासाद्विष्णुसायुज्ये यत्नं परममास्थितः ।
अभ्यासात् प्रत्ययाः सर्वे जायन्ते मुक्तिहेतवः ॥ ९७ ॥

स्वप्ने चैव स्वदेहे च देवे चैवं मनस्यपि ।
इन्द्रियेषु च सर्वेषु जायन्ते प्रत्ययाः पृथक् ॥ ९८ ॥

दर्शनं चैव संयोगः संभाषणमतः परम् ।
अतीतानागतोक्तिश्च तथा तत्त्वनिवेदनम् ॥ ९९ ॥

स्वप्नप्रत्ययकाले तु पञ्चावस्थाः प्रकीर्तिताः ।
केवलं दर्शनं विष्णोः प्रथमा सा दशा स्मृता ॥ १०० ॥

[1] परम् B

Scanned by CamScanner

द्वितीया तेन संयोगस्तृतीया[1] भाषणं भवेत् ।
[2]अतीतानागतोक्तिश्च तुरीया तत्त्वपङ्क्तयः ॥ १०१ ॥

अकाले खे प्रदृश्यन्ते पञ्चमी सा दशा स्मृता ।
प्रथमायां दशायां तु मरणं यदि जायते ॥ १०२ ॥

भयंकरस्तु दैत्यानां भवेद्गरुडवाहनः ।
द्वितीयायां दशायां तु मरणं यदि जायते ॥ १०३ ॥

शङ्खचक्रधरो भूत्वा विष्णुलोके महीयते ।
तृतीयायां दशायां तु मरणं यदि जायते ॥ १०४ ॥

समानैश्वर्ययुक्तस्तु विष्णोर्विष्णुपदं व्रजेत् ।
चतुर्थ्यां च दशायां तु मरणं यदि जायते ॥ १०५ ॥

सर्वलोकाधिपः श्रीमान् सुरैश्वर्यपदं व्रजेत् ।
पञ्चम्यां च दशायां तु मरणं यदि जायते ॥ १०६ ॥

महाविष्णुपुरं प्राप्य द्वारपालो भविष्यति ।
[3]
. . . .
मनःप्रत्ययकालेऽपि पञ्च चैव दशाः स्मृताः ॥ १०७ ॥

परोक्षदर्शनं चैव भविष्यच्चिन्तनं तथा ।
अतीन्द्रियेषु च ज्ञानं सर्वशास्त्रार्थदर्शनम् ॥ १०८ ॥

ऐकाग्र्यं च तथा विष्णौ दशाः पञ्च प्रकीर्तिताः ।
परोक्षे यस्य यत् कर्म शुभं वा यदि वाशुभम् ॥ १०९ ॥

[1] क्रीडानामयुतानि च A B
[2] A B lack this line.
[3] Gap in all MSS.

Scanned by CamScanner

ऋषिरात्रे चतुर्थोऽध्यायः

सनत्कुमारः—

अथातः संप्रवक्ष्यामि तप्यते तु यथा तपः ।
पूर्वं देशं प्रवक्ष्यामि तपोवृद्धिश्च यत्र तु ॥ १ ॥

प्रयागो ब्रह्मदुर्गं च कुरुक्षेत्रं गया तथा ।
ब्रह्मावर्तं भृगुपथं पुरुषोत्तमसंज्ञितम् ॥ २ ॥

देवतीर्थं महातीर्थं चन्द्रपुष्करिणी तथा ।
देवह्रदः पञ्चनदं तथा पञ्चाप्सरःसरः ॥ ३ ॥

तथा [1]श्रीकण्ठकं चैव चन्द्रतीर्थं महाबलम् ।
अगस्त्यतीर्थं श्रीसानुर्ब्रह्मकुण्डं [2]तथैश्वरम् ॥ ४ ॥

गोकर्णं कन्यकातीर्थं ततः सेतुमुखं तथा ।
सालग्रामं सरिद्वीपमग्नितीर्थं तथैव च ॥ ५ ॥

सर्वे पुण्याश्रमाश्चापि पुण्यनद्यस्तथैव च ।
पुण्यारण्यानि सर्वाणि पुण्यतीर्थानि चैव ह ॥ ६ ॥

पुण्याश्चैव तथा शैलाः पुण्यान्यायतनानि च ।
आश्रमाणां तु सर्वेषामुत्तमं बदराश्रमम् ॥ ७ ॥

[1] श्रीकल्कं B [2] तथेश्वरः B

[redacted]

पञ्चप्रत्ययकाले तु एकविंशतिका दशाः ।
नित्यमेव दशाश्चेमाः प्रत्ययेषु पृथक् पृथक् ॥ ११८ ॥

योगिनो यस्य जायन्ते स जीवन्मुक्त उच्यते ।
एत एव भविष्यन्ति सदा वै कर्मयोगिनः ॥ ११९ ॥

तस्माद्योगी भवेन्नित्यं नारायणमनामयम् ।
योगाभ्यासेन यास्यन्ति तद्विष्णोः परमं पदम् ॥ १२० ॥

इति श्रीपाञ्चरात्रे महासंहितायां सनत्कुमारप्रोक्तायाम्
ऋषिरात्रे योगविधिर्नाम तृतीयोऽध्यायः

Scanned by CamScanner

अथ योगपादे-नाडी चक्रविधिपटलः

p. 291) अथातः संप्रवक्ष्यामि योगपादं समासतः।
तस्यपादस्य पूर्वे तु नाडीचक्रक्रमं श‍ृणु॥ १-१॥

द्विसप्तति सहस्राणि नाडयस्तु प्रकीर्तिताः।
नाडीभिर्व्यावृते देहे जीर्णाश्वत्थस्य पत्रवत्॥ १-२॥

अशीतिश्च चतुश्चैव शतसाहस्रभेदकैः।
शरीरे क्रीडते देवाः स्वेच्छया परमेश्वरम्॥ १-३॥

भूतग्रामैश्चतुर्भिश्च सर्वयोनि समुद्भवम्।
अण्डजं स्वेदजञ्चैव उत्बीजञ्च जरायुजम्॥ १-४॥

अण्डजाताश्चये भावास्त्वण्डजास्ते प्रकीर्तिताः।
स्वेदजाताश्चये भावास्वेदजास्तु प्रकीर्तिताः॥ १-५॥

भूमौ तु तोयबीजाभ्यां मुत्भिदाश्चेति कीर्तिताः।

इल्वयुक्ताश्चये जाताः कीर्तितास्ते जरायुजाः॥ १-६॥

भूतग्रामैश्चतुर्भिश्च नराद्याषड्विधो भवेत्।
नरश्चैव मृगश्चैव पशुः पक्षीतथैव च॥ १-७॥

सरीस्रपः स्थावरश्च षड्विधं योनिसंभवम्।
वाचा वदन्ति यद्वाण्या ते नरास्त्विति कीर्तिताः॥ १-८॥

ऊर्ध्वपुच्छन्तु तद्वृद्धिं मृगं विद्याद्विनायक।
अधोदीर्घाश्च ये पुच्छाः पशुजातिरुदीरिता॥ १-९॥

द्विपक्षाः पक्षिरित्याहु सरतीतिसरीस्रपः।
स्थापितं स्थावरं प्रोक्तं षड्विधं भूतमेव च॥ १-१०॥

अथ्यन्ते योनि भेदानि क्षेत्रं स्यात् भूमिकं शृणु।
पृथिव्यादीनि तत्वानि यत्र तिष्ठन्ति तल्लये॥ १-११॥

लयस्थानं तदाख्यातं तत्वातीतं परात्परम्।
तस्माच्छिन्नं समुत्पन्न तस्माच्छक्तिरजायत॥ १-१२॥

p. 292) तस्मान्नादिं समुत्पन्नं तस्मात् बिन्दुसमुद्भवम्।

तस्मात् सदाशिवं प्रोक्तं सृष्ट्यर्थं पञ्चधा भवेत्॥ १-१३

॥

तस्मादात्मा समुत्पन्नं सहजं मलसंयुतम्।

क्षेत्रज्ञन्तं विजानीयाच्छक्तिस्थन्तु तथोच्यते॥ १-१४॥

तस्मादुपरिवेशस्य शुद्धावस्थोनुकीर्तिताः।

शुभाशुभ वरप्राप्तौ तत्र गच्छन्ति जायते॥ १-१५॥

मायाद्यवनि पर्यन्तं देहबद्धोत्र दृश्यते।

कर्मोदये तु जननं कर्मान्ते मरणं स्मृतम्॥ १-१६॥

सुखदुःखनिमित्ताय शरीरग्रहणं कृतम्।

शरीरं द्विविधं प्रोक्तं पुंसत्व स्त्रीत्वमेव च॥ १-१७॥

लिङ्गेन लांच्छितं पुंस्त्वं स्त्रीत्वं योन्याभिलांच्छितम्।

लिङ्गमीशमयं प्रोक्तं योनिः शक्तिमयं स्मृतम्॥ १-१८॥

तस्माद्वै शिवशक्तिस्तु सर्वमेतत् चराचरम्।

तच्छरीरं द्विधाप्रोक्तं स्थूलं वै सूक्ष्ममेव च॥ १-१९॥

पृथिव्यापस्तथा तेजोवायुराकाशमेव च।
शुक्रं बीजां शमित्युक्तं क्षेत्रांशं श्रोणितं स्मृतम्॥
१-२०॥

अस्थि स्नायुश्चमज्जा च पित्रजंस्त्रयमेव तु।
त्वङ्मांसशोणितञ्चैव मातृजं त्रिकमेव च॥ १-२१॥

इत्थं षट्कौशिकं प्रोक्तं शरीरान्तैस्तु जायते।
नखदन्तश्च रोमाणि केशाश्च नाडयस्तथा॥ १-२२॥

शब्दस्पर्शश्च रूपश्च रसोगन्धश्च पञ्चधा।
एतैर्भूतगणैर्युक्तं स्थूलं शरीरकं भवेत्॥ १-२३॥

शूक्ष्मस्य गोलकां विद्धि तच्छुभाशुभसाधनम्।
जननमरणञ्चैव कर्मणा जायते ततः॥ १-२४॥

एवं स्थूलशरीरञ्च संक्षेपाद्वर्णितं मया।
श्रोत्रं त्वक्चक्षुजिह्वा च घ्राणं बुद्धीन्द्रियं विदुः॥ १-२५

॥

वाक्पादपाणि पायुश्चोपस्थं कर्मेन्द्रियं स्मृतम्।

प्राणः समानोदानश्च अपानोव्यान एव च॥ १-२६॥

नागः कूर्मश्चकृकरो देवदत्तोधनञ्जयः।

मनोबुद्धिरहंकारश्चित्तोन्तः करणं स्मृतम्॥ १-२७॥

p. 293) मदमात्सर्यमानादि सूक्ष्मशारीरकं भवेत्।

इदं शरीरं लिङ्गं हि तयोर्जन्म ततः शृणु॥ १-२८॥

शुक्लं रक्तेन संभाव्य जनन्याश्चोदरे स्थितम्।

कर्मादौ सकलं ग्राह्यं प्राप्यते सुषिराशयम्॥ १-२९॥

क्षेत्रांशैश्चैव बीजांशैः शरीरव्याप्रतोगतः।

रक्ताधिक्क्यात् स्त्रीप्रजा च शुक्लाधिक्यात् पुमान् भवेत्॥ १-३०॥

यदिशुक्लसमंरक्तं जायते तु नपुंसकम्।

भजने तु यथा बिदुर्वद्धते तु शनैः शनैः॥ १-३१॥

पुन्नागमुकुलाकारं गर्भाशयगतं तथा।
मरणादीनि कर्माणि निमित्तानि वरेण तु॥ १-३२॥

आयुष्यं विभवं कर्मविद्या च निधनं सुखम्।
षड्कं संप्राप्य तत्रैव ततो गर्भाशयं विशन्॥ १-३३॥

गुणाश्चैव त्रिदोषाश्च जन्तूनान्तत्र संभवाः।
सत्वं रजस्तमश्चैव गुणत्रयमिहोच्यते॥ १-३४॥

सत्यं ज्ञानं तपोमौनं स्मृतिर्मेधाधृतिः क्षमा।
उत्साहो निश्चयन्धैर्यमेवं वै सात्विकं गुणम्॥ १-३५॥

दर्पं महदहंकारं विषादं प्रियवाचकम्।
उद्योगंमात्सरं प्रोक्तं रजसंगुणमुच्यते॥ १-३६॥

आलस्यं मोहनिद्राश्च चापलं ही नवृत्तिकम्।
पापिष्ठं परनिन्दा च तामसं गुणलक्षणम्॥ १-३७॥

गुणानान्तु समावस्था मूलप्रकृतिरुच्यते।
संक्षेपात् त्रिगुणं प्रोक्तं त्रिदोषांश्च श्रृणुष्वमत्॥ १-३८॥

वातं पित्तंकफञ्चैव रोगाणामधिपा स्मृताः।

सर्वजन्तुषु सामान्यं समंवाधिकमेव च॥ १-३९॥

एवमादीनि चान्यानि संविशेत् सुषिराशयम्।

गर्भाशयगते काले वायुनाभिद्यते यथा॥ १-४०॥

तदा रूपद्वयङ्गत्वा वर्धते तु शनैः शनैः।

पञ्चाहे तु दशाहे तु पत्मपत्रस्थतोयवत्॥ १-४१॥

मासान्ते चाक्षफलवद् विमासां मृफलाकृतिः।

त्रिमासेऽष्टाङ्गुलं दीर्घञ्चतुर्मासे शिरोभवेत्॥ १-४२॥

p. 294) हस्तौ चैव तु पादौ च पञ्चमासे प्रकीर्तितम्।

नखाङ्गुल सपादौ च गुल्भौ च नलकौ तथा॥ १-४३॥

जंघेजानु तथा चोरुकटिस्फिक् जघनं तथा।

स्तनपार्श्वोदरारभ्य कक्षौ वक्षाभुजावुभौ॥ १-४४॥

पादयोर्हस्तयोरेखा ह्यंगुष्ठे नखपर्वगाः।

गलः कर्णौ च जिह्वा च ओष्ठौ दन्ताश्च नासिका॥ १-४५॥

नयनं भ्रूर्ललाटश्च शिरः केशादयस्तथा।

एतान्यङ्गानि सर्वाणि जायते षष्ठमासिके॥ १-४६॥

सप्तमासेन्न पानौ च नाभिनालेन भुज्यते।

प्रसूयते वा तन्मासे वायुना न प्रसूयते॥ १-४७॥

अष्टमासे समुत्थाय वीणादण्डं समाश्रितम्।

संप्राप्याष्टगुणैश्वर्य मणिमादिकमत्र वै॥ १-४८॥

त्रिकालन्तु विजानाति ज्ञानात् सर्वं प्रकाशते।

जायते चाष्टमे मासे जातश्चोत्तमजीवती॥ १-४९॥

जायते नवमे मासे दशमासे तु वा पुनः।

ततस्त्वेकादशे मासे मायया प्रेरितो जनः॥ १-५०॥

बोद्धव्यं शक्तिना काचित् श्रमदाहक्षुधादिकान्।

एवमादीनि वर्द्धन्ते क्रमेणैव शनैः शनैः॥ १-५१॥

तत्र भूत्वान्न वीर्येण वर्धन्ते सप्तधातवः।

अन्नद्रवसमुत्पन्न रसाद्वै श्रोणितं स्मृतम्॥ १-५२॥

श्रोणितान्मांसमुत्पन्नं मांसान्मेदः समुत्भवम्।

मेदसोस्थि समुत्पन्नं तस्मात् मज्ज्ञातु संभवम्॥ १-५३॥

मज्ज्ञाशुक्लं समुत्पन्न मित्येते सप्तधातवः।

शरीरन्धातुभिः प्राप्तं धातुभिः शब्दराशयः॥ १-५४॥

शब्दादिविषयं ज्ञानं द्विमासोपरिपूर्णके।

पञ्चविंशति तत्त्वानि वक्ष्यते तु समासतः॥ १-५५॥

भूतानि भूतमात्राणि ततो बुद्धिन्द्रियाणि च।

कर्मेन्द्रियाणि विघ्नेश तथान्तः करणानि च॥ १-५६॥

अव्यक्तेन समायुक्तं पञ्चविंशदुदाहृतम्।

पृथिव्यादीनि तत्वानि प्राप्यते त्वखिलान्तनुम्॥ १-५७॥

p. 295) पृथिव्यापस्तथा तेजोवायुराकाश एव च।

महाभूतानि चोक्तानि तेषां भेदं श्रृणुष्वहि॥ १-५८॥

यत् कठिनं तत्पृथिवी यद्रव्यं ह्याप उच्यते।

यदुष्णश्चेत्ततो वह्निर्वायुः सञ्चरति त्विह॥ १-५९॥

अवकाशं यदा काशं महाभूतगणास्त्विमे।

अस्थित्वङ्मांसकेशाश्च नाडयस्त्विह कीर्तिताः॥ १-६०॥

पृथिव्यं शास्तथा ज्ञेयास्त्वाप्यंशाश्च ततः श्रृणु।

कफः शोणितमूत्राणि मज्जाशुक्लन्तथैव च॥ १-६१॥

द्रव्यांशकमिति ज्ञेयं सर्वप्राणि च संस्थितम्।

क्षुधानिद्रा च कृष्णा च आलस्यं मैथुनं तथा॥ १-६२॥

एते पञ्चगुणा प्रोक्ता तेजोंशा इति संस्थिताः।

आस्ते शेते च गमनं प्रसाराणि निरोधनम्॥ १-६३॥

एते पञ्चगुणा प्रोक्ता वाय्वंशा सुप्रकीर्तिताः।

कामक्रोधश्च लोभश्च भयोमोहसथैव च॥ १-६४॥

पञ्चैतेनुगुणा प्रोक्ता व्योमांशास्तु प्रकीर्तिताः।

प्रोक्तं भूतगुणञ्चैवं गुणन्तेषान्तु वक्ष्यते॥ १-६५॥

शब्दस्पर्शञ्चरुपञ्च रसंगन्धञ्च पञ्चधा।

आकाशस्य गुणं शब्दं वायोस्तु स्पर्शनं गुणम्॥ १-६६॥

तेजसस्तु गुणं रूपं रसमापगुणं स्मृतम्।

पृथिव्यास्तु गुणं गन्धं भूमिकादीनि विन्यसेत्॥ १-६७॥

विषयं त्विति विख्यातं भूतानाङ्गुणमुच्यते।

शब्दादिविषयं पुण्यं भूमौ तु विनिवर्द्धते॥ १-६८॥

चतुर्गुणाः प्रवर्धन्ते त्रिगुणस्त्वथ वह्निके।

वायोश्च द्विगुणं प्रोक्तमाकाशस्यैकमेव तु॥ १-६९॥

विषयाणि तथोक्तानि बुद्धिन्द्रियाणि ततः श्रृणु।

श्रोत्रत्वक्चक्षुजिह्वा च घ्राणं बुद्धिन्द्रियाणि च॥ १-७०॥

शब्दादिविषयाणाञ्च साधनन्ते प्रकीर्तितम्।

बुद्धीन्द्रियाणामेतेषां देवभूतात्मकं श्रृणु॥ १-७१॥

p. 296) श्रोत्रमध्यात्ममित्युक्तं श्रोतव्यमधि भूतता।
शिवहस्ताधि दैवन्तु त्वगेवाध्यात्मकं विदुः॥ १-७२॥

स्पर्शनञ्चाधिभूतः स्याद् वायुस्तत्राधिदैवतम्।
चक्षुरध्यात्ममित्युक्तं द्रष्टव्यमधिभूतता॥ १-७३॥

सूर्यस्तत्राधिदैवत्य जिह्वाचाध्यात्मकं विदुः।
रसज्ञात्वधिभूतन्तु वरुणश्चाधिदेवता॥ १-७४॥

घ्राणमध्यात्ममित्युक्तं घ्रातव्यमधि भूतता।
बृहस्पत्यधिदैवञ्च प्रातः शक्तिरिति स्मृतम्॥ १-७५॥

बुद्धीन्द्रियाणि चोक्तानि शृणु कर्मेन्द्रियाणि च।
वागध्यात्मकमित्युक्तं वक्तव्यमधि भूतता॥ १-७६॥

सरस्वत्यधिदैवत्यं वाणिरध्यात्मकं ततः।
दातव्यमधिभूतश्च शक्रस्तत्राधिदेवता॥ १-७७॥

पादमध्यात्मकं प्रोक्तं गमनञ्चाधि भूतता।
शक्राधिदैवतं प्रोक्तं वायुरध्यात्मकं विदुः॥ १-७८॥

* * * मधिभूतः स्यात् मित्रस्तत्राधि दैवतम्।

उपस्थोध्यात्ममित्युक्तमानन्दमधिभूतता॥ १-७९॥

प्राजापत्याधिदैवत्यं क्रियाशक्तिरिति स्मृता।

कर्मेन्द्रियाणि चोक्तानि ततोन्त करणं श्रृणु॥ १-८०॥

मनोहङ्कारबुद्धि च चित्तोन्तः करणं विदुः।

मनोध्यात्ममिति प्रोक्तमन्तव्यमधिभूतता॥ १-८१॥

सोमाधि दैवमित्युक्तो हङ्कारोध्यात्मकं विदुः।

अधिभूतमहंकारं रुद्रमूर्त्यधिदैवतम्॥ १-८२॥

बुद्धिरध्यात्ममित्युक्तं बोद्धव्यमधिभूतता।

क्षेत्रज्ञस्याधिदैवं स्याच्चित्तमध्यात्मकं स्मृतम्॥ १-८३॥

चैतन्यमधिभूतं हि ईश्वरश्चाधिदैवतम्।

मन्यते तंमनो ज्ञात्वा अहङ्कारमहंकृतम्॥ १-८४॥

बोध्यत्वात् बुद्धिरेवं हि चिन्तत्वाच्चित्तमुच्यते।

मनश्च द्विविधं प्रोक्तं चलाचलमिति स्मृतम्॥ १-८५॥

p. 297) अहङ्कारं त्रिधाज्ञेयं भूतवैकारि तेजसम्।
वक्ष्यते तु समासेन भूतसारसमुद्भवम्॥ १-८६॥

शब्दतन्मात्रमादौ तु गन्धतनात्रमर्थके।
एतानि पञ्चमात्राणि भूतानां सृष्टिरुच्यते॥ १-८७॥

स्यात्तैजस अहंकारे इन्द्रियाणि समुद्भवम्।
वैकारिकमहङ्कारे इन्द्रियाणि समुद्भवम्॥ १-८८॥

वैकारिकमहंकारे अधिदेवाः समुद्भवम्।
बुद्धिरष्टविधा ज्ञेया धर्माधर्मादिरष्टधा॥ १-८९॥

चित्तमेक विधं ज्ञेयं तच्चान्तः करणं विदुः।
चतुर्भिरन्तः करणैश्चतुर्विंशतिरुच्यते॥ १-९०॥

उपादानन्तु तेषां वै चाव्यक्तमिति निन्दितम्।
अव्यक्तस्य तु धर्मः स्यात् त्रिगुणं संप्रकीर्तितम्॥ १-९१॥

तामसं राजसञ्चैव सात्विकञ्च तृतीयकम्।
तामसेयान्ति नरकं राजसे स्वर्गमुच्यते॥ १-९२॥

सात्विके मोक्षमित्युक्तं तस्मात् सात्विकमुच्यते।
सात्विके सर्वकर्माणि एक चित्तस्तु सात्विकम्॥ १-९३॥

तस्मात् सर्वप्रयत्नेन सात्विकङ्गुणमाश्रये।
पञ्चविंशति तत्वानि समासात् कीर्तितानि तु॥ १-९४॥

तेभ्य एकादशं तत्वं समासात् च्छृणु सांप्रतम्।
पुंरागोनियती विद्याकलाकलस्तथैव च॥ १-९५॥

शुद्धविद्याशुद्धकला शुद्धमायान्तथैव च।
आत्मतत्वञ्च विद्याञ्च शिवतत्वमतः परम्॥ १-९६॥

एकादशानि तत्वानि शरीरे संस्थितानि तु।
कञ्चुकत्रयमाविश्य शनैः कालेन वित्तमः॥ १-९७॥

आलिंग्यते नियतिना आत्मवद्भाववर्तकः।
प्रकृतिः पौरुषं यस्मान् तस्मात् पुरुष उच्यते॥ १-९८॥

बालार्कशतसाहस्त्र भागैकं तत्र चिद्विदुः।

सञ्जिव इति विख्यातः संसारी चेति चोच्यते॥ १-९९॥

प्रधानादि विशेषान्तं व्यापं वै परिशक्तिना।

कलाशक्तिरितिख्याता चानमु?क्तैस्तु कारणा॥ १-१००॥

p. 298) धर्माधर्माधिसंबन्धा दाणवं सहजं स्मृतम्।

इत्येवमादि संबन्धाच्छरिरेषु व्यवस्थिताः॥ १-१०१॥

संबन्धास्तस्य जीवस्य दुःखत्रयमिहोच्यते।

आध्यात्ममधिभूतञ्च अधिदैविकमेव च॥ १-१०२॥

त्रिविधं दुःखमाप्नोति तेषामाध्यात्मकं श्णु।

आध्यात्मकं द्विधाप्रोक्ता शरीरं मानसं तथा॥ १-१०३॥

गुल्मारशोति सारञ्च ज्वरशूलाद्यनेकधा।

नरमृगपिशाचैश्च गोपक्षीचोरराक्षसैः॥ १-१०४॥

प्रोक्तं शरीरकं दुःखं मानसं श्णु सुव्रत।

शोकासूयावमानेर्ष्या मासाध्यादिभिरेव च॥ १-१०५॥

एवं मानसमाख्यातमाधिभौतिकमुच्यते।
शीतोष्णवातवर्षैश्च विद्युदाशनिमारुते॥ १-१०६॥

एतैर्भूतैस्तु जन्दुःखमाधिदैविकमुच्यते।
गर्भजन्मजरा ज्ञानमृत्युर्नरकजं तथा॥ १-१०७॥

प्रोक्तं दुःखत्रयं ह्येवमेषु स्थानेषु भूज्यते।
ततोदराग्निना गर्भे मातृशीलेन बाध्यते॥ १-१०८॥

गर्भात् कोटिगुणं दुःखं योनि यंत्रे प्रपिडनम्।
एवमादीनिदुःखानि शरीरीभुज्यते क्रमात्॥ १-१०९॥

जाग्रत् स्वप्नं सुषुप्तिश्च तुर्यावस्था ततः शृणु।
इन्द्रियाणि गताबुद्धिः कृत्वा कर्माण्य शेषतः॥ १-११०॥

करणी यानि सर्वाणि दृश्यन्ते जाग्रदेव तु।
करणानि चेंद्रियाणि बध्वावै वाश्रयं भवेत्॥ १-१११॥

निद्रामाश्रयते बुद्धिर्मन्यते पूर्वकर्मकम्।
एवं स्वप्नं विजानीयात् सुषिपिञ्च ततः श्रृणु॥ १-११२॥

करणानि गृहीत्वा तु बुद्धिश्चैतन्यमागता।
तदाश्रये तु काले तु कर्माण्य प्रतिबुद्ध्यति॥ १-११३॥

सुषिप्तिरिति विख्याता तुरीयं करणं विना।
जाग्रोमुखगतो जीवस्वप्ने कर्णं समाश्रितः॥ १-११४॥

p. 299) सुषुप्तौ हृदमाश्रित्य तुर्ये सर्वगत स्मृतः।
एवं व्यवस्थितो देहे नाडयश्च तत श्रृणु॥ १-११५॥

नाभिमूलन्तु हृन्नाल नाडयश्चक्रवत् तथा।
तिर्यगूर्ध्वमधश्चैव व्याप्तितातैस्तु सर्वतः॥ १-११६॥

चक्रवत्संस्थिता ह्येताः प्रधानश्चाष्टविंशतिः।
तेषु प्रधानभूतास्तु इडादिदशनाडयः॥ १-११७॥

इडयाविमाशोषा पृथिवी आपनी तथा।
तेजोवती वायुवी च गमनीमर्दनी तथा॥ १-११८॥

रोदनीरक्तवागि च मृद्वंगी श्रिंगिणी तथा।

शब्दा स्पर्शा च पूर्णा च सद्रूपारसधारिणी॥ १-११९॥

सर्वाङ्गेषु स्थिता ह्येता प्रधानाश्चाष्ट विंशतिः।

तासुनाडीषु चान्तस्थाः प्राणादि दशवायवः॥ १-१२०॥

प्राणापानस्तथाव्यान उदानश्च समानकः।

नागकूर्माश्चक्रकरो देवदत्तोधनञ्जयः॥ १-१२१॥

दशप्राणा इति प्रोक्ता वायवः समुदहृताः।

वायूनान्तु नवानाञ्च प्रभुः प्राणप्रकीर्तिताः॥ १-१२२॥

निश्वासोछ्वासकासैश्च प्राणीनामुदरे स्थिताः।

इन्द्र निलप्रतिकाशप्राणरूपसुकीर्तिताः॥ १-१२३॥

नादसंयुक्त जीवान्त जीवमाश्रित्य नित्यशः।

स्थान हृन्नाभिनासाग्रं पादाङ्गुष्ठान्तमाश्रितः॥ १-१२४

॥

अपान पृष्ठमाश्रित्य वामदक्षिणनिर्गमम्।

प्राणस्य लक्षणं प्रोक्तमपानञ्च ततः शृणु॥ १-१२५॥

अपानो जीवमाश्रित्य तद्वर्णञ्चैंद्रकोपवत्।

स्थानन्तु मेढ्रमुले तु गुदमूलन्तु निर्गमम्॥ १-१२६॥

नाभेरधस्तात् स्थानन्तु मेढ्रमूले तु निर्गमम्।

पुरीषोत् सर्गमात्रादि प्राणापानाश्च निर्गमम्॥ १-१२७॥

प्राणापानोपहे नित्यं शरीराख्यं महारथम्।

दीपान्तस्थ प्रभु प्राणोरक्षाङ्कृत्वा महामनुम्॥ १-१२८॥

p. 300) व्यानं सकलमाश्रित्य स्पर्शादीनी प्रबोधकः।

गोक्षीरसमवर्णं स्यात् स्थानं सर्वाङ्गसन्धिषु॥ १-१२९॥

उदानच्छक्तिरोगाणामुद्भवन्तत्र कारयेत्।

विद्युत्पावक सङ्काशान्तस्य वर्णं प्रकीर्तितम्॥ १-१३०॥

स्थानं पार्श्वौ च कर्णौ च चक्षुषोर्घ्राणयोस्तथा।

समान वायोर्वर्णन्तु अतसी कुसुमप्रभम्॥ १-१३१॥

स्कन्धे मूर्धनि जिह्वाश्च जंघयोर्गुल्भयोस्तथा।

अन्नपानरसन्नित्वा चा पादतलमस्तकम्॥ १-१३२॥

अशेषानन्नपानादीन्वैश्विनराग्नि संयुतम्।

तत्रा शयाख्य कुण्डे तु हुतं तत्रैव कारयेत्॥ १-१३३॥

तत्र नागसुवर्णन्तु मार्ताण्डोदय सन्निभम्।

हित्काञ्चरोमहर्षादिन् गेयभक्तिञ्च कारयेत्॥ १-१३४॥

उदयञ्च ललाटञ्च स्थानन्नासादि चासनम्।

कुन्दपुष्पसमाकारं कूर्मवायोः प्रकीर्तितम्॥ १-१३५॥

नेत्रपक्षौ तु संप्राप्य निमीलोन्मीलनङ्कुरु।

कृकरस्य तु वर्णं स्यात् भिन्नाञ्जनसमप्रभम्॥ १-१३६॥

क्षुधादिकुरुते नित्यं नासाग्रे तु व्यवस्थितम्।

देवदत्तस्य वर्णं स्यात् शुद्धस्फटिक सप्रभम्॥ १-१३७॥

मुखं पृष्ठञ्च पादञ्च पार्श्वञ्चैव विशेषतः।

उत्थाप्यशयनासीनं विज्रंभणमतः परम्॥ १-१३८॥

धनञ्जयस्य वर्णस्यां नीलाञ्जनसमप्रभम्।
धनञ्जयस्थितो देहममृतस्यापिमुञ्चति॥ १-१३९॥

पश्चात् तु ब्राह्मणं कृत्वा शरीरं भिद्यते गतः।
इत्येते दशवायूनां प्राणादीनां प्रचक्षते॥ १-१४०॥

इडादिनाडयस्तत्र शरीरेव्या प्रतस्तथा।
नाडीमध्ये ततो वायुः सञ्चरेत् क्रमशस्तथा॥ १-१४१॥

कुण्डल्याख्या महानाडी नाभिमध्ये प्रकीर्तिताः।
अष्टवर्तुलमेवन्तु कुण्डलीनाडिसुप्तवत्॥ १-१४२॥

नाभेरूर्ध्वं भवेत् पद्मं तटाकाब्जं तु पुष्पवत्।
तस्य मध्ये स्थितो जीवः सूर्यकोटिसमप्रभः॥ १-१४३॥

p. 301) तस्यान्तस्थं समाख्यातं सूर्यसोमाग्निकुण्डलम्।
तेषां मध्ये स्थितो देवः सूर्यायुतसमप्रभम्॥ १-१४४॥

वामपार्श्वे इडानाडी पिंगलादक्षनाडिका।

सुषुम्ना मध्यमे चैव यावदङ्गुष्ठकान्तका॥ १-१४५॥

गान्धारी दक्षिणे नेत्रे हस्ति जिह्वा च वामके।

पूषा वै दक्षिणे कर्णे वामकर्णे यशस्विनी॥ १-१४६॥

अलंपुष्पन्तु मेढ्रन्तु कुहूश्चैव गुदे स्थिता।

शखिनी नासिमध्ये तु दशनाडी ह्यवस्थिता॥ १-१४७॥

अशेषानाडयः सर्वाश्चक्रवद् व्यावृतस्तनुम्।

चक्रवद् वा वृतोयस्मान् नाडीचक्रमिहोच्यते॥ १-१४८॥

नाडीचक्रमिदं प्रोक्तं कालचक्रमथ श्रृणु॥

इति नाडीचक्रविधिपटलः प्रथमः॥ १॥

अथ कालचक्रविधिपटलः

अथातः संप्रवक्ष्यामि कालचक्रस्यलक्षणम्।

कालञ्च कुरुते यस्मात् कालमेवमुदाहृतम्॥ २-१॥

प्राणीनाञ्चैव देवानां विनाशोत्पत्तिकारणम्।
अमूर्तिं कालमाख्याता दृष्वादष्टन्तु लक्षणम्॥ २-२॥

त्रिविधं कालमाख्यातं शिवेन परिभाषितम्।
सृष्टिकालं स्थितिकालं संहारञ्चेति कीर्तितम्॥ २-३॥

शिवाद्यवनि पर्यन्तं सृष्टिरेवमुदाहृतम्।
या स्थितिः सर्वभूतानां शिवाद्यानन्तक स्थितम्॥ २-४॥

पृथिव्यादि शिवान्ताये लयङ्गच्छेत् परापरम्।
तदा संहारमेवोक्तं त्रिविधं कालनिर्णयम्॥ २-५॥

त्रिषुकालेषु वर्तन्तेतीतानां गमं ततः।
वर्तमानाख्यकं कालमुच्यते वै पृथक् पृथक्॥ २-६॥

p. 302) यदा शेषं समाप्तन्तु तदा तीतमिति स्मृतम्।
सापेक्षकञ्च यत्काले तदा नागतमुच्यते॥ २-७॥

असमाप्तं यदारब्धं वर्तमानमुदाहृतम्।

तत्कालमव बोद्धव्यं देवादीनामुदाहृतम्॥ २-८॥

युगपत् सृष्टि संहारौ स्थितिकाले निवर्तते।

केचित् कालात् सृजन्त्येव केचित् कालात् भ्रमन्ति च॥ २-९॥

मनुष्य पितृदेवानां कालसंख्यान्ततः श्रृणु।

कालञ्च द्विविधं प्रोक्तं स्थूलं सूक्ष्मन्तथैव च॥ २-१०॥

मौक्तिकं (मौकिकं) स्थूलमाख्यातं योगिनां

सूक्ष्ममेव च।

स्थूलञ्च द्विविधंवत्स चंद्रादित्यस्य चारणम्॥ २-११॥

चंद्रस्य वर्तनाकालोमनुष्याणां प्रकीर्तितम्।

सूर्यस्य वर्तनाकालो देवानान्तु प्रकीर्तितम्॥ २-१२॥

कालचक्रे तु वर्तन्ते भास्करादि ग्रहास्थथा।

द्वादशारयुते चक्रे मेषाद्याराशयोरवेः॥ २-१३॥

पट्टिकायाञ्च नाभौ च मध्ये वायुः प्रकीर्तिताः।

मेरुमूर्ध्निगतश्चक्रं ब्रह्माण्डे संव्यवस्थितम्॥ २-१४॥

कुलालचक्रवन्नित्यं भ्रामस्तत्रैव देवताः।
मेरुं प्रदक्षिणं कृत्वा नक्षत्राणि ग्रहाणि च॥ २-१५॥

सूर्योदयास्तमायान्तमहरेवविदुर्बुधाः।
अस्तमयादुदयान्तं निशा चैवमुदाहृतम्॥ २-१६॥

अहर्निशिद्वयोपेतमहोरात्रमिति स्मृतम्।
दिवाप्रातरहश्चैव प्रोक्तः पर्यायवाचकाः॥ २-१७॥

शर्वरीरजनीसायं निशिनक्तन्तु रात्रिकम्।
हायादि देवतानान्तु पितृणां प्रातरादिकम्॥ २-१८॥

मनुष्याणामहोरात्रमितिशास्त्रेसु निश्चितम्।
मनुष्याणां हितार्थाय सर्वसंपत्कराय च॥ २-१९॥

पूर्वाह्ने चैव मध्याह्ने चापराह्नेर्धयामके।
तस्मात् सर्वप्रयत्नेन चतुःसन्धिषु पूजयेत्॥ २-२०॥

यामं प्रतिविशेषेण पूजयेदष्टसन्धिषु।
यामार्धं सन्धिरित्युक्तमहोरात्रन्तु पूजयेत्॥ २-२१॥

p. 303) मनुष्याणां दिनं प्रोक्तं पञ्चपञ्चदशाहकः।
पक्षद्वयिशुक्लपक्षः कृष्णपक्षस्तथैव च॥ २-२२॥

एकराशिगतौ यत्र चन्द्रादित्यौ सहैव तु।
तत्रामावास्याचेत्युक्तं तत्पक्षं शुक्लमुच्यते॥ २-२३॥

सप्तराशिगतश्चंद्रं तत्र पूर्णकलामतः।
पौर्णमासी ततः प्रोक्तः कृष्णः पञ्चदशाहकः॥ २-२४॥

पक्षद्वयं तथा मासोमासाद्वादशवत्सरम्।
वर्षञ्चैवाब्द् पर्याय वाचकाः परिकीर्तिताः॥ २-२५॥

शताब्दन्तु मनुष्याणामायुष्यं समुदीरितम्।
मृगाणां सर्वजातीनां शताब्दायुः प्रकीर्तितम्॥ २-२६॥

नराणाञ्चैव चायुष्यं शतञ्चैव प्रकीर्तितम्।
एवमुक्तं मनुष्याणां पितृकालं ततः शृणु॥ २-२७॥

मनुष्याणामहोरात्रं पितृणां घटिका भवेत्।
त्रिंशत्घटिमहोरात्रं शुक्लपक्षन्तु वासरम्॥ २-२८॥

निशिकृष्णं विजानीयात् पितृणां तदहर्न्निशम्।
पूर्वसन्धिरमावास्या मध्याह्नश्चाष्टमी भवेत्॥ २-२९॥

पौर्णमास्यपराह्नन्तु अष्टमीचार्धयामकम्।
दिवसैर्द्वादशैर्मासं मासैर्द्वादशवत्सरम्॥ २-३०॥

अमावास्यान्तु या पूजा पितृणान्तु प्रसादद।
पितृकालमिदं प्रोक्तं मनुष्याणां हिताय वै॥ २-३१॥

देवानां वक्ष्यते कालस्तुट्यादि प्रलयान्तकम्।
तुटिलवनिमेषाश्च काष्ठा चैव कला तथा॥ २-३२॥

क्षणं मुहूर्तं घटिका सन्धिर्यामस्त्वहर्निशि।
दिवसः पक्षमासौ च ऋतुस्त्वयनवत्सराः॥ २-३३॥

युगमन्वन्तरौ कल्पं महाकल्पप्रलयस्तथा।

तुट्याादिप्रलयान्तञ्च लक्षणं श्रृणु सांप्रतम्॥ २-३४॥

स्वस्थान राक्षिकोन्मील उन्मीलन्तु निमेषकम्।
निमेषस्य चतुर्भागन्तुटीरेवमुदाहृतम्॥ २-३५॥

तुटिद्वयलवं विद्धि लवद्वयनिमेषकम्।
निमिषोदश पञ्चैव काष्ठाः सा त्रिंशतिः कला॥ २-३६॥

p. 304) कलार्धस्तु क्षणं प्रोक्तं क्षणद्वयं मुहूर्तकम्।
तदर्द्धं घटिका प्रोक्ता सर्वकार्यन्तया कृतम्॥ २-३७॥

सत्रिपादत्रिघटिका सन्धिरित्युच्यते बुधैः।
सन्धिद्वयन्तथायाम चतुर्यामन्दिवा स्मृतम्॥ २-३८॥

तदहर्मात्र विज्ञेय महोरात्रं दिनं स्मृतम्।
दिनपञ्चदशः पक्षो मासः पक्षद्वयं तथा॥ २-३९॥

पूर्वपक्षोपरश्चैव तौपक्षद्वयमुच्यते।
मासद्वयं ऋतुः प्रोक्तमयनं वै ऋतुस्त्रयम्॥ २-४०॥

अयनद्वयमब्दं हि अहोरात्रन्तु दैविकम्।
देवानान्तु दिवाप्रोक्तं मकरादि ऋतुस्त्रयम्॥ २-४१॥

ऋतुस्त्रयं कुलीरादि निशि चैवमुदाहृतम्।
संक्रान्ति विषुवे चैव अयने च प्रकीर्तिताः॥ २-४२॥

अन्यराशि गते भानौ राशिमध्ये तु संक्रमः।
तुलामेषगते सूर्ये विषुवे तत्प्रकीर्तितौ॥ २-४३॥

कुलीरेमकरे प्राप्ते दक्षिणश्चोत्तरायणम्।
उत्तरायण संक्रान्तिः पूर्वाह्णमिति कीर्तितम्॥ २-४४॥

चैत्रे विषु च मध्याह्ने अपराह्णे तु दक्षिणे।
अश्वयुक् विषुवं प्रोक्तं देवानामर्धरात्रिकम्॥ २-४५॥

चतुः सन्धिषु तस्माद्वे देवेशेषं प्रपूजयेत्।
नित्यसन्धिर्मनुष्याणां पितृणामाससन्धिकम्॥ २-४६॥

अब्दसन्धिषु देवाश्च पूजयेत् तु यथा विधि।
इत्थं भूतमहोरात्रं देवानां तु प्रकीर्तितम्॥ २-४७॥

प्रोक्तमब्द् क्रमं ह्येवं युगमानन्तु वक्ष्यते।
अण्डजाति युगाद्यैव केचित् शास्त्रे प्रकीर्तिताः॥ २-४८॥

चतुर्युगन्तु शास्त्रे तु शिवेन परिभाषितम्।
तृतयुगन्तु त्रेता च द्वापरन्तु कलिस्तथा॥ २-४९॥

कृतश्चतुः सहस्राब्दं सन्धिरष्टशतं भवेत्।
सन्ध्याशतं तथा ज्ञेयस्त्रेतार्ध पादहीनका॥ २-५०॥

p. 305) चतुःशतः सहस्रो वा द्वापरश्चेति कीर्तिताः।
कलियुगञ्च ऊर्धस्थो वर्धते तु पुनः पुनः॥ २-५१॥

एतैर्द्वादशसाहस्रैरब्दैरैव चतुर्युगाः।
सप्तत्येक समावर्त्यामन्वन्तरमिहोच्यते॥ २-५२॥

अशीति सहस्रैर्वर्षैः पञ्चाशद्विसहस्रकैः।
दिव्यसंवत्सरेणैव ज्ञेयमन्वन्तरं तथा॥ २-५३॥

स्वायंभुवमनुः पूर्वं स्वारोचिषमतः परम्।

उत्तमंरैव तञ्चैव तापसञ्चक्षुषं तथा॥ २-५४॥

वै वस्वतञ्च सा वर्णमेरु सा वर्णमेव च।
दक्ष सा वर्णमेवं हि ब्रह्म सा वर्णमेव च॥ २-५५॥

रुद्र सा वर्णमित्युक्तं रौल्यंभौत्यञ्चतुर्दश।
इत्येवन्तवसं क्षेपात् मनवः परिकीर्तिताः॥ २-५६॥

नाभिकल्पन्तु तत्कालं ब्रह्मणोयदि भावयेत्।
पञ्चैव कालमेवञ्च कल्पं ब्रह्मादि वा भवेत्॥ २-५७॥

कल्पमेवं समाख्यातं महाकल्पं ततः शृणु।
त्रयस्त्रिंशच्च देवाद्यास्त्रिशतं त्रिसहस्रकम्॥ २-५८॥

देवानां लयमित्युक्तं तद्रात्रौ तु प्रकल्पयेत्।
ब्रह्मणस्तदहोरात्रं तदा चेन्द्रालयं भवेत्॥ २-५९॥

शतत्रयं षष्टिदिनं ब्रह्मवर्षमुदाहृतम्।
षष्टित्रिंशच्च चक्राणां लयं तत्र पुनः पुनः॥ २-६०॥

तेन वत्सरमानेन शताब्दं ब्रह्मणोलयम्।

यावत्ब्रह्मलयं तावद् विष्णोस्तु तदहर्न्निशि॥ २-६१॥

ब्रह्मणात्रिशतं षष्टि लयंतत्र पुनः पुनः।

तेनमानेन बोद्धव्या शताब्दमीश्वरस्य तु॥ २-६२॥

ईश्वरस्तु लयं यत्तु निमेषं हि सदाशिवे।

ततो वृघ्याशतं वर्षात् सदाशिवलयं स्मृतम्॥ २-६३॥

बिन्दोर्नादस्य तद्वंशात् लयं तत्रैव चोच्यते।

नादमूर्तिलयं यावच्छक्ताच्छक्तेर्दिनं तथा॥ २-६४॥

p. 306) दिनवृघ्याशतं कान्त तावच्छक्ति स्थितः सदा।

यदा शक्तेर्लयं विद्धि यावत् परदिनं तु यत्॥ २-६५॥

तत्सङ्ख्यानिशताब्दन्तु परस्यैवलयं भवेत्।

प्रथमं शक्तिकं शान्तं शिवः पर्यायवाचकः॥ २-६६॥

परापरस्य तं ज्ञातं विनाशोत्पत्तिकारणम्।

देवानां कालमित्युक्तं तत्वानां कालमुच्यते॥ २-६७॥

पृथिव्यादि शिवान्तञ्च सत्वकालं प्रकीर्तितम्।
ईश्वरस्य लयं यावदात्मनस्तुलयं भवेत्॥ २-६८॥

सदाशिवलयं यावत् नादान्तं लयमेव च।
ततः शक्तेर्लयं यावल्लयङ्गच्छेच्छिवान्तकम्॥ २-६९॥

तत्वानां लयमेवोक्तं सूक्ष्मकालं ततः श्रृणु।
श्वासैस्तु त्रुटिभिः प्राणो घटिका प्राणषड्कके॥ २-७०॥

अहोरात्रं ततः षष्टि घटिकादिर्विशेषतः।
पूर्ववद्दिनवृध्या तु पक्षादीनि विवर्धयेत्॥ २-७१॥

सूक्ष्मकालेन योगेन देव ब्रह्मादिकालयः।
ज्ञानिनां योगिनाञ्चैव सूक्ष्मकालं प्रकीर्तितम्॥ २-७२॥

कालचक्रमिदं प्रोक्तमाधाराधेयकं श्रृणु।

इति कालचक्रविधिपटलल्लो द्वितीयः॥ २॥

अथ आधाराधेयविधिपटलः

अथातः संप्रवक्ष्यामि आधाराधेयलक्षणम्।

आधारं स्थानमित्युक्तमाधेयमधि दैवतम्॥ ३-१॥

आधाराधेय संबन्धाद्योगमित्यभिधीयते।

योगं बहुविधं वत्स आधाराणां बहुत्वतः॥ ३-२॥

योगिनां योगमित्युक्तं ज्ञानिनां ज्ञानमेव च।

वक्ष्येहमधुनायोगं संक्षेपान्नतु विस्तरात्॥ ३-३॥

p. 307) योगिनां साधकं पूर्वं मच्छृणुष्व हि साधके।

प्रथमञ्चासनञ्चैव द्वितीयं योगपट्टिका॥ ३-४॥

तृतीयमक्षमाला च वेणुदण्डश्चतुर्थकम्।

कमण्डद्द विजानीयात् पञ्चमन्तु विशेषतः॥ ३-५॥

तेषान्तु लक्षणं वक्ष्ये चासनं कूर्मवत् कृतम्।

खादिरोदेवदारू च मधुको बिल्व एव च॥ ३-६॥

अथवा याज्ञिकै वृक्षैः कृत्वा कूर्मासनं तथा।
पादोनं वा तदर्द्धं वा त्रिविधं त्वासनं तथा॥ ३-७॥

दर्पणोदरसङ्काशमधस्तादवदं तथा।
आसनं त्वेवमाख्यातं योगाभ्यासे विनायक॥ ३-८॥

व्याघ्राजीनं तु प्रधमा कृष्णाजिनं द्वितीयकाः।
अथवा तन्तुना कार्या त्रिविधायोगपट्टिका॥ ३-९॥

विस्तारन्त्र्यङ्गुलं प्रोक्तं नमानमुपवीतवत्।
जपमालाशिरोमाला हृंमाला बाहुमालका॥ ३-१०॥

कर्णपृष्ठात् तु नाभ्यन्ता उरोमाला इति स्मृताः।
शिरोमाला तु तन्नाहा भुजमालाभुजासमा॥ ३-११॥

जपमालां समानेन संख्यामात्रं शृणुष्व हि।
पञ्चविंशति रुद्राक्षैर्मोक्षार्थिनाञ्जपं स्मृतम्॥ ३-१२॥

षड्विंशति शिवार्थञ्च ज्ञानार्थं शत्रुनाशनम्।

सप्तविंशति इत्यर्थं पुष्ट्यर्थमष्टविंशतिः॥ ३-१३॥

त्रिंशज्जयार्थिनां कार्यं दशपञ्चाभिचारकः।

जपमालासमाख्याता जपमालाविधिं शृणु॥ ३-१४॥

प्रणवं सर्वमन्त्रेषु सर्वमुच्चार्यते यतः।

प्रणवं संप्रवक्ष्यामि संक्षेपान्न तु विस्तरात्॥ ३-१५॥

अकारञ्च उकारञ्च मकारं बिन्दुरूपकम्।

अकारं ब्रह्मदैवत्यमुकारं विष्णु दैवतम्॥ ३-१६॥

मकारं रुद्र दैवत्यं बिन्दोरीश्वर एव हि।

नादं सदाशिवं प्रोक्तमित्येते अधिदेवताः॥ ३-१७॥

p. 308) अकारं तु हृदिस्थानं उकारं कर्णदेशकम्।

तादृ मध्यं मकारं स्यात् बिन्दोश्चैव ललाटकम्॥ ३-१८॥

तस्योपरि च नादस्य स्थानं ह्येवं प्रकीर्तितम्।

अकारादि त्रयोवर्णास्त्वनुस्वार विसर्गकौ॥ ३-१९॥

पञ्चवर्णाः प्रशस्यन्ते अकाराक्षर संभवाः।

* * * * * * * * उकाराह्यापि संभवा॥ ३- २०॥

कादिभामक्षिकारेता यकारान्यस्तु बिन्दुके।

जाताना देशकारान्यास्त्वेते पञ्चाशति स्मृताः॥ ३-२१॥

प्रणवं सर्ववर्णाख्यं सर्वदेवमयं विदुः।

ऋषिः सनत्कुमारस्तु ओंकारः शुक्लवर्णकः॥ ३-२२॥

गायत्रीच्छन्द इत्युक्तं तस्य वै शिवतत्वकः।

ओमित्येकाक्षरं * * * * * * * * वा हिनाम्॥ ३-२३॥

प्रणवन्तु समास्योक्ता स्मृतपञ्चाक्षरं शृणु।

नमःशिवाय पञ्चार्णमेतत् पञ्चाक्षरं स्मृतम्॥ ३-२४॥

वाचिकायस्तु विज्ञेयस्तद्वाच्यस्य शिवः स्मृतः।

जपं शक्तिप्रदंशस्तं मल्लयोमुक्तिरिष्यते॥ ३-२५॥

ऋषिच्छन्दोवर्णतत्वा देवतास्तु शृणु क्रमात्।

काश्यपः कौशिकश्चैव भारद्वाजस्तु गौतमः॥ ३-२६॥

आत्रेयस्तु न कारादि मुनयः क्रमशस्तथा।

अनुष्टुप् त्रिष्टुप् ब्रहति जगत्यति जगत्यपि॥ ३-२७॥

च्छन्दांसिहि समाख्याता वर्णाद्यैश्चक्रमाच्छृणु।

रक्तं कृष्णन्तथा श्यामं पीतं स्फटिकसन्निभम्॥ ३-२८॥

पृथिव्यादीनि तत्वानि तेषां तत्वं प्रकीर्तितम्।

सद्यादि पञ्चवक्त्राणि तेषां देवाः प्रकीर्तिताः॥ ३-२९॥

प्रणवेन समायुक्तं जपकाले तथोच्यते।

तदा षडक्षरं प्रोक्तं स्त्रीशूद्रादैस्तु वर्जितम्॥ ३-३०॥

जपश्चतुर्विधं प्रोक्तं सर्वेषां जपकांक्षिणाम्।

मानसञ्चैव कण्ठेष्यमुपांशु व्यक्तमेव च॥ ३-३१॥

p. 309) व्यक्तंदशगुणोपांशु स्तस्मात् कण्ठेष्यकं शतम्।

सहस्रं मानसं तस्मादङ्गुल्यादि जपं श्रृणु॥ ३-३२॥

अङ्गुल्या जपसंख्यातु तुल्या एकफलं तथा।

पर्वणाष्टगुणं प्रोक्तं दीपेशतगुणाधिकम्॥ ३-३३॥

शतसङ्ख्याकुशग्रन्थी प्रवालैस्तु सहस्रकम्।
मणिभिर्दशसाहस्रं मौक्तिकैर्ल्लक्षमुच्यते॥ ३-३४॥

पद्माक्षैः कोटिगुणितं रुद्राक्षैस्तु न विद्यते।
रुद्राक्षैस्तु ततोत्पत्तिं शृणुत्वं वक्ष्यतेऽधुना॥ ३-३५॥

दिव्यवर्षसहस्रन्तु चक्षुरुन्मीलितं मया।
मुञ्चन्ति मम नेत्राणि श्रितरुद्राक्षमुच्यते॥ ३-३६॥

एकवक्रं शिवः साक्षादनन्तन्धारणे फलम्।
सन्धार्यमृयते यस्तु सयाति परमाङ्गतिम्॥ ३-३७॥

द्विवक्रं शक्तिरित्युक्तं त्रिवक्रं नादमेव च।
चतुर्वक्रन्तु बिन्दु स्यात् पञ्चवक्रं सदाशिवम्॥ ३-३८॥

षड्वक्रमीश्वरं प्रोक्तं रुद्रः सप्तमुखं स्मृतम्।
अष्टवक्रं स्मृतो विष्णुर्नववक्रञ्चतुर्मुखम्॥ ३-३९॥

नववक्त्रैकवक्त्रान्तं फलं शतगुणोत्तरम्।
हस्ते कर्णेशिखेकण्ठे सन्धार्यं सहभस्मना॥ ३-४०॥

सर्वपापात् प्रमुच्यन्ते शिवसायुज्यमाप्नुयात्।
दर्शनं पापनाशन्तु स्पर्शनं सर्वसिद्धिदम्॥ ३-४१॥

सर्वाङ्गधारणात् पुण्यं रुद्राक्षं धारयेत् सदा।
प्रयाणकाले रुद्राक्षं भक्षयित्वा मृयन्ति ये॥ ३-४२॥

ते रुद्र पदमाप्नोति पुनर्जन्म न विद्यते।
तस्मात् सर्वप्रयत्नेन जप्यं रुद्राक्षकैः सदा॥ ३-४३॥

जपकालञ्च देशञ्च वक्ष्यते तु समासतः।
पूर्वाह्ने चैव मध्याह्ने चापराह्नेर्धरात्रिके॥ ३-४४॥

p. 310) चतुष्कालं त्रिकालं वा तद्देशन्तु ततः शृणु।
नदीतटाकतीरे वा गोष्ठे देवालयेपि वा॥ ३-४५॥

वने वाथ गिरौ देशे पुण्यस्थाने ग्रहे जपेत्।
देशमेवं समाख्यातं जपसंख्यां ततः शृणु॥ ३-४६॥

सहस्रं वा तदर्धं वा तदर्धं वा शताष्टकम्।

जपेन् नित्यं सदायोगी सर्वपापविनाशकृत्॥ ३-४७॥

सयाति जपमात्रेण शिवलोकमथाक्षयम्।

जपसंख्या विधिप्रोक्तो वेणुदण्डविधिं शृणु॥ ३-४८॥

विप्राणान्तु शिरोत्सेधं क्षत्रियाणां ललाटके।

वैश्यानां नासिकोत्सेधं शूद्रादीनान्तु वर्जयेत्॥ ३-४९॥

वेणुदण्डमृजुं स्निग्धं वक्रकोटरवर्जितम्।

दण्डस्यैव विधिः प्रोक्ता कमण्डल्लु विधिं शृणु॥ ३-५०॥

पूरितश्चाढकैः श्रेष्ठं मध्यं त्रिप्रस्थपूरितम्।

द्विप्रस्थपूर्णमधमं मानमेवं कमण्डलोः॥ ३-५१॥

सौवर्णं रजतं वापि ताम्रं वा मृण्मयं तु वा।

यदुक्तं शिल्पशास्त्रेषु तत्तदुक्ता तु कारयेत्॥ ३-५२॥

शैवाना साधनं प्रोक्तं पञ्चधा समुदाहृतम्।

योगाष्टकांगौ वक्ष्यामि श्रृणुष्वेकाग्र मानसः॥ ३-५३॥

यमनियमासनञ्च प्राणायामं ततः परम्।
प्रत्याहारञ्च ध्यानञ्च धारणा च समाधिकम्॥ ३-५४॥

अष्टाङ्गमिति विज्ञेयं योगिनां योगसाधनम्।
अहिंसा सत्यमस्तेयं ब्रह्मचर्यपरिग्रहम्॥ ३-५५॥

यमन्तु पञ्चधा प्रोक्तं नियञ्च ततः श्रृणु।
शौच सन्तोषकात्तच्च तपःस्वध्यायमेव च॥ ३-५६॥

ईश्वर प्रणिधानञ्च नियमं पञ्चधा स्मृतम्।
गोमुखं स्वस्तिकञ्चैव पद्मञ्चैवार्धचन्द्रकम्॥ ३-५७॥

वीरयोगासनञ्चैव षड्विधश्चासनं स्मृतम्।
वामजानूपनिन्यस्य दक्षिणज्ञानुमण्डलम्॥ ३-५८॥

p. 311) द्वयोः पादतले चैव न्यसेत् द्वौपृष्ठ पार्श्वयोः।
एवं कृत्वा तु सुस्निग्धं गोमुखीलक्षणान्वितम्॥ ३-५९॥

ऊरूपार्श्वे तलौ न्यस्त्वा जंघामघ्नन्तु स्वस्तिकम्।

ऊरूपरितले न्यस्त्वा पद्मासनमिहोच्यते॥ ३-६०॥

गुल्फत्रयं समं कृत्वा तलेगुह्ये च विन्यसेत्।

अर्द्धचन्द्रं समाख्यातं वीरासनं ततः शृणु॥ ३-६१॥

द्विभुजं पतितं वामपादं दक्षिणतोपरि।

स्थिरं वीरासनं प्रोक्तं योगासनं ततः शृणु॥ ३-६२॥

शरीरञ्जानु संबन्धं योगपट्टिकया वृतम्।

कूर्परौ चैव विन्यस्तं योगासनमिहोच्यते॥ ३-६३॥

कृत्वा चैवैकमेतेषां ततो योगं समाचरेत्।

योगाभ्यासस्य पूर्वे तु प्राणायामत्रयं कुरु॥ ३-६४॥

रेचकं पूरकञ्चैव कुंभकं योगमभ्यसेत्।

योगाभ्यासस्य पूर्वे तु प्राणायामत्रयं कुरु॥ ३-६५॥

रेचकं पूरकञ्चैव कुंभकञ्च द्वितीयकम्।

रेचकं रविबिंबं स्यात् पूरकं चन्द्रमण्डलम्॥ ३-६६॥

आग्नेयं कुंभकं ज्ञेयं सकायोच्चान पूजयेत्।
रेचनाद्रेचकं प्रोक्तं पूरणात्पूरकं ततः॥ ३-६७॥

कुंभकन्तु निरोधेन प्रणवेनाभ्यसेत्त्रयम्।
रेचकात् द्वादशं मात्रं तन्मात्रं पूरकं स्मृतम्॥ ३-६८
॥

कुंभकं द्वादशं मात्रमिहशास्त्रे तु निश्चितम्।
रेचकं ब्रह्मदैवत्यं पूरकं विष्णुदैवतम्॥ ३-६९॥

कुंभकं रुद्रदैवद्यमधि देवास्त्रयं स्मृतम्।
रेचकं पूरकञ्चैव योगिनान्तु अहर्निशि॥ ३-७०॥

सूतकं प्रोतकं मुक्त्वा कुंभकेन तु पूरयेत्।
प्राणायामक्रमं प्रोक्तं प्रत्याहारं ततः श्रृणु॥ ३-७१॥

p. 312) इन्द्रियाणीन्द्रियार्थेषु प्रतिस्थाने व्यवस्थितः।
यावत् तावत् स्थितीभूतः प्रत्याहारः स उच्यते॥ ३-७२॥

आधारेषु च संकल्प्य यथासनं स्वरूपकम्।

ध्यानमेवं विजानीयात् सर्वदुःखनिवारणम्॥ ३-७३॥

आधारलक्षणं वक्ष्ये संक्षेपान्नतु विस्तरात्।

नाभेस्तु चतुरंगुल्य मधस्तादग्निमण्डलम्॥ ३-७४॥

कदंबपुष्पवज्जुष्टं पत्रं जुष्टं त्रिकोणकम्।

मूलाधारमधः प्रोक्तं द्वितीयं नाभिमूलके॥ ३-७५॥

भुजङ्गवलयाकारमष्टवर्तुलमेव च।

कुण्डलाख्या महानाडी भानुमण्डलमुच्यते॥ ३-७६॥

नाभेरूर्ध्वन्तु यत्पद्मं चंद्रमण्डलमुच्यते।

हृदये कर्णमूले तु ताह्व मूले ललाटके॥ ३-७७॥

मूर्ध्निस्थाने तु संकल्प्य ध्यायेत् पद्मकपुष्पवत्।

हृत् पद्मलक्षणं वक्ष्ये यथा वदनुपूर्वशः॥ ३-७८॥

नाभौ तन्नालमूलन्तु ऊर्ध्वनालमधोमुखम्।

कदलीपुष्पवत् पद्ममष्टपत्रं सकर्णिकम्॥ ३-७९॥

इहशास्त्रेन वा धारं हृत्पद्मेन समायुतम्।

आधारलक्षणं प्रोक्तमाधेयञ्च ततः श्रृणु॥ ३-८०॥

आधेयं यत्प्रयुक्तञ्च समाधीत्येवमिश्रितम्।

इडा च पिङ्गला चैव वीणादण्डस्य पार्श्वयोः॥ ३-८१॥

सुषुम्ना मध्यगा तत्र मध्ये तु सुषिरं तथा।

जीवप्राणसमायुक्तास्तेषु मध्येषु सञ्चरेत्॥ ३-८२॥

सञ्चरन्निह तत्काले आधारेषु व्यवस्थितम्।

संयुक्ते योगमाख्यातं योगी खगं समाश्रयेत्॥ ३-८३॥

मूलाधारे ततस्त्वग्नि संयुक्ते योगमभ्यसेत्।

योगाभ्यासेन तद्योगी अग्निलोकन्तु संस्पृशेत्॥ ३-८४॥

तदूर्ध्वे भास्करन्ध्यात्वा रविलोकमवाप्नुयात्।

एवं ध्यात्वा तदूर्ध्वे तु चंद्रलोकं स गच्छति॥ ३-८५॥

p. 313) ब्रह्माणं हृदये स्मृत्वा ब्रह्मलोकमवाप्नुयात्।

विष्णुं ध्यात्वा तदूर्ध्वे तु कण्ठमूले व्यवस्थितम्॥ ३-८६॥

पुरुषं व्यापयेद्योगी योगाभ्यासेन तत्गुणैः।
ताद्द मूले स्मरेद्रुद्रं रुद्रलोकपदेच्छया॥ ३-८७॥

पुरुषोपरिवेशान्तं व्यापकं स्वेन तेजसा।
ललाटे ईश्वरं ध्यात्वा तल्लोकं तदवाप्नुयात्॥ ३-८८॥

सदाशिवन्तु शिरसि ध्यात्वा तत्रैव भूज्यते।
हृत्पद्ममध्यं गत्वा तु बिन्दुनादञ्च शक्ति च॥ ३-८९॥

चतुरङ्गुलमात्रेण दीपाकारं विचिन्तयेत्।
चतुस्थानेषु संपूज्य तत्तत्स्थान स्वरूपकैः॥ ३-९०॥

शिरोपरिन्यसेत् ब्रह्ममव्ययं निष्कलान्वितम्।
तस्माद्योग समायुक्तो योगीयोगफलं लभेत्॥ ३-९१॥

अणुमात्रं लभेद्यस्मादणिमेत्यभिधीयते।
सहस्रैर्वा यथा गत्वा मूलवर्णप्रदेशकम्॥ ३-९२॥

स्वेच्छया लभते यस्मात् तस्मात् सा लघिमा स्मृता।
भूमौ मनो जपं कृत्वा पूज्यते शास्त्रवादिभिः॥ ३-९३॥

सर्वत्र पूजितो यस्मात् तस्मात् सा महिमा भवेत्।
सर्वद्रव्याणि संप्राप्तिः प्राप्तिरेषामुदाहृता॥ ३-९४॥

प्रकाम्येषु शरीरेषु प्रकाशन्तु प्रवेशिता।
सूर्यादिष्वनवाप्तत्वादीशत्वं समुदाहृतम्॥ ३-९५॥

यदीशत्वन्तु तत्रैव तदीशित्वं विधीयते।
शिवसायुज्य सामर्थ्यात्तच्छिवत्वमिति स्मृतम्॥ ३-९६॥

अणिमाद्यष्ट सिद्धिञ्च लभेद्योगी विशेषतः।
सालोक्यादि चतुर्थश्च प्राप्यते योगी लक्षणम्॥ ३-९७॥

p. 314) सालोक्यञ्चैव सामीप्यं सा रूप्यं सा युज्यकं
तथा।
ध्यानलोकन्तु संप्राप्य सा लोक्यन्तद्विधीयते॥ ३-९८॥

तद्देवस्यं समीपत्वात् सामीप्यमिति चोच्यते।

तत्तद्रूपन्तु लब्ध्वा तत् सारूप्यमिति च स्मृतम्॥ ३-९९॥

शिवे संयोजितं रूपं सा युज्यमिति कत्थ्यते।
योगं समासात् संप्रोक्तं ज्ञानपादं ततः श्रृणु॥ ३-१००॥

तद्योगपादं क्रमशः प्रमाणैर्यत्प्रोक्तमत्रैव
समासतस्तत्। नाडी तु चक्रन्त्वथ कालचक्रमाधारयुक्तं
पटलत्रयेण॥ ३-१०१॥

इति आधाराधेय विधिपटलस्तृतीयः॥ ३॥

इति सुप्रभेदेयोगपादः समाप्तः

ॐ

शिवमयम्

सुप्रभेदम्

ॐ

श्रीमत्   सर्वज्ञानोत्तरागमः

योगपादः

SRIMAT   SARVAJNANOTTARA   AGAMA

YOGA PADA

Translation

Dr. S.P.Sabharathnam Sivacharyar

The Himalayan Academy

Kauai Adheenam, Hawaii, US

Introduction

The Sravjnanottara Agama is an exclusively unique Agama, holding a position of being an ultimate source of yoga and knowledge. It is not one among the 28 Primary Agamas from the Kamika to Vatula. ***Sarva*** means all. ***Jnana*** means the Agamas. ***Uttara*** means beyond, superior . The Agama which is beyond the list of 28 Agamas and which is superior to all other Agams is significantly called Sravajnanottara Agama. Whereas all other Agamas have been revealed to the Supreme Souls of the Pure Realm, Sarvajnanottara Agama has been directly revealed by Lord Siva to Lord Skanda from whom the transmissiom of this Agama has been coming down from time immemorial. Traditionally it is held in the lineage of Gurus that all the concepts of the Agamas are to be understood from the standpoint of Sarvajnanottara Agama. This is the methodology of the Saivagamic studies.

The jnana pada of the Savajnanottara Agama is the treasure trove of the philosophical doctrines of Saivism. In this section, Saiva Siddhanta has been presented in its entirety in terms of bhutatma, antaratma, tattvatma, jivatma mantratma and paramatma. Perfectly tuned to the higher principles of the jnana section of this Agama, its yoga section has been formulated.

The efficacy of sagarbha pranayama, agarbha pranayama, employment of siva-astra mantra and kshurika-astra mantra in pranayama, the technique of perceiving all the tattvas from pruthivi tattva to sadasiva tattva and that of cutting asunder the limiting bonds born of these tattvas, installing one`s own self eternally in the highest plane of siva tattva and attainment of oneness with Lord Siva – these are the important matters dealt with in this chapter on yoga.

The Matanga Paramesvara, Mrugendra, Sivadharmottara and many other texts evidently reflect the yoga principles enshrined in this chapter. Highlighting such reflections, Aghora Sivacharya has written a brief commentary on this chapter.

I am thankful to H.H.Bodhinatha Veylan Swamy for providing me with the divine opportunity for translating this important chapter on Sivayoga.

Sabharathnam Sivacharyar

ॐ

श्रीमत् सर्वज्ञानोत्तरागमः

योगप्रकरणम्

SRI'MAT SARVAJN"A'NOTTRA A'GAMA

Treatise on Yoga

एकाकिनस्तु शान्तस्य यतचित्त विरागिणः ।
युक्ताहार विहारस्य युक्तचेष्टस्य कर्मसु ।। १
युक्तस्वप्नावबोधस्य तत्त्वतः श्रुणु षण्मुख ।

eka'kinastu s'a'ntasya yatacitta vira'gin.ah /
yukta'ha'ra viha'rasya yukta ces"t'asya karmasu // 1
yukta svapna'va bodhasya tattvatah s'r'n.u s"an.mukha /

O, S"an.mukha!, I will explain the disciplines of yoga as applicable to the one who is alone keeping himself dissociated from the company of worldly-minded persons, who is with settled mind , who is with deep sense of detachment by keeping his mind under control, who takes moderate food, who limits himself in his routine worldly activities and who sleeps moderately and keeps himself awake sufficiently. Listen to my instructions on yoga.

The term ***eka'kinah*** denotes an ascetic who has his mind completely detached from the worldly activities. ***S'a'ntah*** means one who is not harmful , who is with composed and calm mind. ***Vira'gin.ah*** denotes a person who has controlled his mind and senses , on whom Siva`s Grace has descended and as a result who is deeply intent in the attainment 0f s'ivatva. ***Yatacitta*** means the mind which remains effortlessly settled through breath control and withdrawal of senses.

Two basic disciplines of perfect yoga, ***yama and niyama***, have been indicated in this verse; **The foundation of Yoga** as Gurudeva identifies them.

योो ध्याता यच्च तद् ध्यानं तद्वै ध्यानप्रयोजनम् ।। २
आत्मा ध्याता मनो ध्यानं ध्येय: सूक्ष्मो महेश्वर: ।। ३
यत् परं परमैश्वर्यं एतद् ध्यानप्रयोजनम् ।

yo dhya'ta' yacca tad dhya'nam tadvai dhya'na prayojanam // 2
a'tma' dhya'ta mano dhya'nam dhyeyah su'ks"mo mahes'varah // 3
yatparam paramais'varyam etad dhya'na prayojanam /

Only that person who has known well the nature of meditator, meditation and the fruit of meditation is fit enough to undertake the disciplines of yoga. The individual self is the meditator. Mind is meditation. The Great Lord S'iva is the One to be meditated. The attainment of the supreme qualities of S'iva, superior to which there is nothing, is the fruit of meditation.

By nature, mind is very powerful in deeply and repeatedly contemplating the one and the same thing. So it is identified with meditation itself – ***mano dhya'nam.***

This verse suggests that the disciplines of yoga set forth in this chapter are meant only for those who have already attained sufficient knowledge of the constituent disciplines of yoga such as yama, niyama, pran.a'ya'ma and so forth. The yoga disciplines explained in this chapter are highly advanced and hence the beginners will find it very difficult to understand and to practice them.

The term ***parama ais'varyam*** denotes the essential attributes of S'iva, which are eight in number, as told in ***the jn"a'na pa'da*** of the Savajn"a'nottara Agama.

1. sarvjn"ata' 2. nitya tr'pti 3.ana'di bodha 4.svatantrata'
5. alupta s'akti 6. ananta s'akti 7. nira'mayata' 8. vis'uddha deha

By dhya'ta and dhya'na, the third one dhyeya, the one to be meditated, is also suggested.

मानामानौ समौ कृत्वा सुखदु:खे समे तथा ।। ४
हर्षं भयं विषादं च संत्यज्य योगमभ्यसेत् ।

ma'na'ma'nau samau kr'tva' sukha duhkhe same tatha' // 4
hars"am bhayam vis"a'dam ca samtyajya yogamabhyaset /

Keeping the mind balanced well when honored or abused, and in the same way when delighted or distressed and having completely freed himself from being subject to excessive delight, fearfulness and despondency, the sa'dhaka should repeatedly practice the disciplines of yoga.

शून्यागारे मठे रम्ये देवतायतने शुभे ।। ५
नदीतीरे विविक्ते वा गृहे घोरवनेऽपि वा ।
प्रच्छन्ने च विविक्ते च नि:शब्दे जनवर्जिते ।। ६
योगदोष विनिर्मुक्ते निर्विकल्पे निरातपे ।

s'u'nya'ga're mat'he ramye devata'yane s'ubhe // 5
nadi'ti're vivikte va' gr'he ghora vane pi va' /
pracchanne ca vivikte ca nihs'abde janavarjite // 6
yogados"a vinirmukte nirvikalpe nir'tape /

In the places such as a solitary house, charming monastery, auspicious temple charged with divinity, bank of river not frequented by the people, one`s own house, unapproachable dense forest, sequestered place hidden by the trees, places free from the disturbing sounds and the quite place free from the presence of humans, animals, insects and so forth, in the places free from those which cause hindrances and disturbances to yoga-practice, in the places which are not owned by others and in the places well protected from the scorching heat of the sun, the sadhaka should commence the yoga-practice.

स्नात्वा शुचिरुपस्पृश्य प्रणम्य शिरसा शिवम् ।। ७
योगाचर्यं नमस्कृत्य योगं युञ्जीत मानवः ।

sna'tva' s'uciruspr's'ya pran.amya s'irasa' s'ivam // 7
yoga'ca'ryam namaskr'tya yogam yun"jita ma'navah /

Having taken the usual ceremonial bath, maintaining purity in body and mind, having performed the succeeding rites such as getting besmeared with vibhu'ti and sprinkled with consecrated water, having prostrated before Siva and his A'ca'rya(Guru) who has initiated him into the discipline of yoga, the sa'dhaka should attentively involve himself in the disciplines of yoga.

पद्मकं स्वस्तिकं वाऽपि उपस्थायाञ्जलिं तथा ।। ८
पीठार्धं अर्धचन्द्रं च सर्वतोभद्रमेव वा ।
आसनं रुचिरं बद्ध्वा ऊर्ध्वकायः समं शिरः ।। ९
सर्वसङ्गान् परित्यज्य आत्मसंस्थं मनो गुह ।

padmakam svastikam va'pi upastha'ya'n"jalim tatha' // 8
pi't'ha'rdham ardhacandram ca sarvatobhadram eva va' /
a'sanam ruciram badhva' u'rdhvaka'yah samam s'irah // 9
sarva sanga'n parityajya a'tma samstham mano guha /

There are many postures suitable to yoga-practice such as padmaka, svastika, ardha pi't'ha, ardha candra, sarvatobhadra and so forth. Having assumed a posture compatible to him and folding the hands together to express supplication, and keeping his body upright, having well aligned his head and having abandoned all the negative thoughts from his mind, O, Guha!, the sa'dhaka should practice yoga ,with his mind well established within his own self.

न दन्तै: संस्पृशेद्दन्तान् सृक्किण्यौ च न जिह्वया ।। १०
किञ्चित् कुञ्चित नेत्रस्तु शिवं संयक् तदोच्चरेत् ।

na dantaih samspr's'ed danta'n sr'kvin.yau ca na jihvaya' ।। 10
kin"cit kun"cita netrastu s'ivam samyak tadoccaret ।

Without allowing the upper row of teeth to touch the lower teeth and without allowing the tongue to touch the corners of the mouth, and keeping his eyes half-closed and raised, the sa'dhaka should repeat the mu'lamantra of S'iva in a perfect way as instructed by his Guru.

Even for pra'n.a'ya'ma ans pratya'ha'ra, the repetition of mu'la mantra as instructed by the Guru, is essential. The mantra suggested here is **Om ha'm haum siva'ya namah** or simply **Om ham.**

Pra'n.aya'ma is of two kinds – sagarbha pra'n.a'ya'ma and agarbha pra'n.a'ya'ma. The first one is to be done with the accompaniment of bi'ja mantra or mu'la mantra and dhya'na. The second one is done without such accompaniment. These have been explained in the Matan'ga Pa'rames'vara Agama and the Mr'gendra Agama.

सोद्भासयति तत्त्वानि तन्मात्राद्यानि देहिनाम् ।। ११
पुनर्विनाशकश्चैव अस्त्रयुक्त: षडानन ।

sodbhasayati tattva'ni tanma'tra'dya'ni dehina'm ।। 11
punar vina's'akas'caiva astrayuktah s"ad'a'nana ।

The systematic repetition of mu'lamantra illuminates and makes known all the tattvas such as the subtle elements(tanma'tras) and others to the embodied self. O, S''an.mukha!, the sa'dhaka then becomes capable of severing his bonds born of these tattvas through the particular repetition of astra mantra instructed to him by his Guru.

astra mantra - om hah astra'ya hum phat'

न पृथक् हृदयं तस्य न शिरो न शिखा गुह ।। १२
वर्मास्त्रनेत्रसहितं तस्मादेव प्रवर्तते ।

na pr'thak hr'dayam tasya na s'iro na s'ika' guha // 12
varma'stra netra sahitam tasma'deva pravartate /

The sa'dhaka who practises in this way need not repeat the hr'daya mantra, s'iro mantra, s'ikha' mantra, kavaca mantra and netra mantra separately at the completion of mu'la mantra japa, since all the six an'ga mantras originate from that mu'la mantra.

Normally, when one involves himself in his daily worship of S'iva(a'nma'rtha pu'ja), it has been prescribed that if the sa'dhaka repeats the mu'la mantra for 100 times, he has to repeat 5 brahma mantras and 6 an'ga mantras 10 times. But, here it is directed that he need not repeat the brahma mantras and an'ga mantras separately as far as this particular yoga discipline is concerned. This direction is exclusively for this kind of S'iva yoga.

प्राणापानौ समौ कृत्वा सुषुम्नान्तरचारिणौ ।। १३
तयोर्वृत्तिं निरुद्ध्यात्मा शिवं ध्यायेत् विचक्षण: ।

pra'n.a'pa'nau samau kr'tva' sus''umna'ntara ca'rin.au // 13
tayorvr'ttim niruddhya'tma' s'ivam dhya'yet vicaks''an.ah /

Having equalized the outbreath and inbreath(pra'n.a and apa'na) and having enabled the breath to flow through within the central channel(sus''umna) and having arrested the workings of inbreath and outbreath, the well-skilled sadhaka should deeply meditate on Lord S'iva.

अविनाभाव संयुक्तो ज्योतीरूपं सुनिर्मलम् ।। १४
सुसूक्ष्मं व्यापकं नित्यं निर्विकल्पं सदा बुधः ।

avina'bha'va samyukto jyoti'ru'pam sunirmalam // 14
susu'ks''mam vya'pakam nityam nirvikalpam sada'budhah /

Through the continued practice of such discipline, the sa'dhaka becomes capable of establishing himself in unfailing and inseparable union with the luminous form which is extremely subtle, pervasive, eternal and immutable.

The ultimate benefit of sagarbha pra'n.a'ya'ma is told in this verse.

उत्तमा मध्यमा मन्दास्सगर्भाः त्रिविधाः स्मृताः ।। १५
प्राणायामांश्च तान् कुर्यात् पूरकुम्भकरेचकान् ।

uttama' madhyama' manda's sagarbha'h trividhah smr'ta'h // 15
pran.a'ya'ma'ms'ca ta'n kurya't pu'ra kumbhaka recaka'n /

The specific kind of pra'n.a'ya'ma known as sagarbha pra'n.a'ya'ma is of three kinds – the superior, intermediary and slow. The sa'dhaka should practice the control of breath through pu'raka(inbreath), kumbhaka(retention of breath) and recaka(outbreath).

It is suggested in this verse that even agarbha pra'n.a'ya'ma is of the same three kinds. As explained by Aghora Sivacharya, there is the third one also which is performed in three modes – pu'raka, kumbhaka and recaka.

प्रणायामैर्दहेद्दोषान्धारणाभिस्तु किल्बिषम् ।। १६
प्रत्याहारेण संसर्गान्ध्यानेनानश्वरान् गुणान् ।

pra'n.a'ya'mair dahed dos"a'n dharan.a'bhistu kilbis"am ॥ 16
pratya'ha'ren.a samsarga'n dhya'nena'nas'vara'n gun.a'n ।

By the practice of pra'n.a'ya'ma, the sa'dhaka incinerates all the defilements. By dha'ran.a, he annihilates all of his sinful effects. By pratya'ha'ra, he maintains himself completely free from the negative thoughts and vices. And by dhya'na, he becomes capable of nullifying the effects of even those qualities which do not decay .

The benefits of agarbha pra'n,aya'ma have been mentioned here.

anas'vara'n gu.a'n – The much celebrated eight accomplishments(siddhis) an.ima, garima and others. What is insisted here is that a perfect S'ivayogi should overcome even these great benefits since these would thwart his advancement towards the attainment of S'iva Ais'varyas mentioned earlier.

उदरं पूरयित्वा तु वायुना यावदीप्सितम् ।। १७
प्रणायामो भवेदेवं पूरको देहपूरक: ।
पिधाय सर्वद्वाराणि निश्वासोच्छ्वासवर्जित: ।। १८
सम्पूर्ण कुम्भवतृ तिष्ठेत् प्राणायाम: स कुम्भक: ।
ततोर्ध्वं रेचयेत् वायुं मृदुनिश्वास संयुतम् ।। १९
रेचकस्त्वेष विख्यात: प्राणसंशयकारक: ।

udaram pu'rayitva'tu va'yuna' ya'vadi'psitam // 17
pra'n.a'ya'mo bhavedevam pu'rako deha pu'rakah /
pidha'ya srva dva'ra'n.i nis'vasocchvasa varjitah // 18
sampu'rna kumbhavat tis"t'het pra'n.a'ya'mah sa kumbhakah /
tatordhvam recayet va'yum mr'du nis'vasa samyutam // 19
recakastves"a vikhya'tah pra'n.a sams'aya ka'rakah /

Inhaling the breath deeply to the extent possible and filling up the stomach with the breath taken inside is the mode of pra'n.a'ya'ma known as pu'raka. Closing all the passages meant for the flow of pra'n.a and keeping free from inhalation and exhalation, the sa'dhaka should remain seated like a vessel (kumbha) completely filled up to its mouth.This mode of pra'n.a'ya'ma is known as kumbhaka. The sa'dhaka should empty the stomach by slowly exhaling the pra'n.a. This mode of pra'n.aya'ma is known as recaka which is instrumental in driving the pra'n.a out.

प्रसार्य चाग्रहस्तं तु जानुं कृत्वा प्रदक्षिणम् ।। २०
छोटिकां तु ततो दद्यान् मात्रैषात्वभिधीयते ।
मात्रा द्वादश विज्ञेया: प्रमाणं तालसंज्ञकम् ।। २१

prasa'rya ca'gra hastam tu ja'num kr'tva' pradaks"in.am // 20
chot'ika'm tu tato dadya'n matrais"a'tvabhidhi'yate /
ma'tra' dva'das'a vijn"eaya'h prama'n.am ta'la samjn"akam // 21

Stretching the fore arm , if one encircles his knee once from left to right simultaneously snapping his fingers, the time taken for doing such encircling once is called ma'tra. Twelve ma'tras make one measure known as ta'la.

तालद्वादशकं ज्ञेयं प्राणायामस्तु कन्यस: ।
मध्यमश्च चतुर्विंशज् ज्येष्ठस्तद्विगुणो भवेत् ।। २२

ta'la dva'das'akam jn"eyam pra'n.a'ya'mastu kanyasah ।
madyamas'ca caturvis'aj jyes"t'has taddvigun.o bhavet ।। 22

The pra'n.a'ya'ma done with the duration of 12 ta'las is of lower kind. That which is done with the duration of 24 ta'las is of intermediary type. The supreme kind of pra'n.aya'ma is that which is done with the duration of 48 ta'las.

एकैकां वर्धयेन्मात्राां प्रत्यहं योगवित्तमः ।
न त्वरेण विलम्बेन क्रमेणैव विवर्धयेत् ।। २३

ekaika'm vardhayen ma'tra'm pratyaham yogavittamah ।
na tvren.a vilambena kramen.aiva vivardhayet ।। 23

The sa'dhaka who has known well the system of yoga should increase the duration of pra'n.a'ya'ma by one ta'la day by day . Increasing the duration of pra'n.a'ya'ma should not be done very swiftly or very slowly. He should increase the duration gradually and in due order.

प्राणायामोत्तमो यत्तद्विगुणा धारणा मता ।
धारणाद्विगुणो योगो योगोऽपि द्विगुणीकृतः ।। २४
योगसिद्धिरिति ज्ञेया शिवेन परमात्मना ।

pra'n.a'ya'mottamo yattad dvigun.a' dharan.a' mata' ।
dha'ran.a'd dvigun.o yogo yogopi dvigun.i'kr'tah ।। 24
yogasiddhiriti jn"eya' s'ivena parama'tmana' ।

Twice the supreme kind of pra'n.a'ya'ma is considered as dha'ran.a. Twice the duration of dha'ran.a is considered as yoga. Twice the duration of yoga is significantly known as yogasiddhi exclusively related to Lord S'iva, the Supreme Self.

तदानुपश्यते सूक्ष्मं गन्धतन्मात्रमात्मनि ।। २५
रसं तेजश्च स्पर्शं च शब्दतन्मात्रमेव च ।
पश्यते क्रमयोगेन वर्णभावैः पृथग्विधैः ।। २६

tad'a'nupas'yate su'ks"mam gandha tanma'tram a'tmani // 25
rasam tejas"ca spars'am ca s'abda tanma'trameva ca /
pas'yate krama yogena varn.a bha'vaih pr'thagvidhaih // 26

Then the sa'dhaka becomes capable of perceiving directly the five subtle elements- smell, taste, form, touch and sound(gandha, rasa, ru'pa, spars'a and s'abda). He is able to see each element separately as associated with its associated seed letter and form by means of krama yoga, the yoga practiced step by step in due order.

अहंकारं मनो बुद्धिं गुणमव्यक्तपूरुषम् ।
अभिव्यक्तानि जानीयात् स्वधर्मगुणलक्षणम् ।। २७

ahan'ka'ram mano buddhim gun.am avyakta pu'rus"am /
abhivyakta'ni ja'ni'ya't svadharma gun.a laks"an.am // 27

Then he sees all those tattvas which are above the subtle elements. Ahan'ka'ra manas, buddhi, gun.a, prakr'ti and purus"a – all these tattvas as associated with their respective forms and qualities become evidently manifest to him.

svadharma gun.a laks"an.am also means his own qualities effected in his embodied state by the association of these tattvas. To see one`s own qualities as related to the tattvas is ***a'tma dars'ana***.

विद्यां कलां ततः कालं मायां विद्यां ततः परम्।
दृष्ट्वानुक्रमशः सर्वान् पुनरस्त्रेण भेदयेत्।। २८

vidya'm kala'm tatah ka'lam ma'ya'm vidya'm tatah param।
dr's"t'va'nukamas'ah sarva'n punarastren.a bhedayet।। 28

Then , having seen the tattvas, vidya', kala', ka'la, ma'ya' and suddha vidya' one by one in their due order, the sa'dhaka should dissociate himself from these tattvas by severing them with the mantra of s'iva'astra.

विद्येश्वरं ततस्तत्त्वं ततः सदाशिवं परम्।
भित्वा तु क्षुरिकास्त्रेण ततः सूक्ष्मं शिवं विशेत्।। २९

vidyes'varam tatas tattvam tatah sada's'ivam param।
bhitva'tu ks"urika'stren.a tatah suks"mam s'ivam vis'et।। 29

Then the sa'dhaka is able to see i's'vara tattva , the location of eight Vidyes'varas, and then the supreme sada's'iva tattva. Having severed his bonds connected with these tattvas with the mantra of ks"urika'stra, he should enter the foremost tattva known as s'iva tattva which is subtle and unreachable even to the sages.

Om S'im Chim ks'urika'stra'ya hum phat' - this is ks"urika'stra mantra.

Verses 25 to 29 suggest the advanced system of s'iva yoga known as das'a ka'rya . Ten advanced disciplines **-** tattva ru'pa, tattva dars'ana, tattva s'uddhi, a'tma ru'pa, a'tma dars'ana, a'tama s'uddhi, s'iva ru'pa, s'iva dars'ana, s'iva yoga and s'iva bhoga - go by the name das'a ka'rya.

अमृतात्मा शिवं साक्षात् तस्मिन् विष्टस्तु योगवित् ।
सर्वज्ञः सर्वगः सूक्ष्मः सर्वेशः सर्वकृद्भवेत् ।। ३०

amr'ta'tma' s'ivam sa'ks"a't tasmin vis"t'astu yogavit /
sarvajn"h savagah su'ks"mah sarves'ah sarvakr'dbhavet // 30

The knower of this supreme yoga system , having entered into the highest and subtle s'iva tattva becomes immortalized, evolves into the knower of all, doer of all, indweller of all, seer of all and the lord of all, comparable to S'iva.

सर्वेष्वेव च शास्त्रेषु ज्ञेयं वस्तु चतुष्टयम् ।
पशुः पाशः पतिश्चैव शिवश्चेति यथाक्रमम् ।। ३१

sarves"veva ca s'a'stres"u jn"eyam vastu catus"t'ayam /
pas'uh pa's'ah patis'caiva s'ivas'ceti yatha' kramam // 31

In all the Agamic Scritures, the four eternal existents whish are to be essentially known, have been explained. They are – pas'u, pa's'a. pati and S'iva. These are to be known systematically as set forth in the Agamas.

pas'u – the embodied soul; pa's'a – three bonds, a'na.va, karma and ma'ya'; pati – S'iva associated with form(Sada's'iva); S'iva – The formless and transcendental Lord.

ज्ञात्वा तु तत्त्वसद्भावं तन्त्रसारं तु दुर्लभम् ।
सर्वथा वर्तमानोऽपि गृह्णाति न पुनस्तनुम् ।। ३२

jn"a'tva' tu tattva sadbha'vam tantrasa'ram tu durlabham /
sarvatha' vartama'nopi gr'hn.a'ti na punas tanum // 32

एकोनविंशः पटलः ।

अथ प्रणवसंज्ञकं प्रतिवदामि मन्त्रं परं
सजापमपि सार्चनं सहुतकृष्मि सोपासनम् ।
अशेषदुरितापहं विविधकामकल्पद्रुमं
विमुक्तिफलसिद्धिदं विमलयोगिसंसेवितम् ॥ १
आद्यः स्वरः समेतोऽमरेण सधसप्तमार्णबिन्दुयुतः ।
प्रोक्तः स्यात्प्रणवमनुस्त्रिमात्रकः सर्वमन्त्रसमवायी ॥ २
मन्त्रस्याऽस्य मुनिः प्रजापतिरथ छन्दश्च देव्यादिका
गायत्री गदिता जगत्सु परमात्माख्यस्तथा देवता ।

कामप्रधानं मन्त्रमभिधाय मोक्षप्रधानं मन्त्रमाह—अथ प्रणवेति । परत्वमुपपादयन् विनियोगमाह--अशेषेति । ह्रस्वस्य पापक्षये विनियोगः । स च मकारान्तः । तत्र च केवलाग्निशिखावत् ध्यानम् । स एव ह्रस्वः । कामप्रदो भवति । दीपशिखामध्ये तं तं काममम्रतेनाभिषिञ्चतः स एव त्र्यक्षरात्मको ह्रस्वो मोक्षप्रदोऽपि भवति । समन्युन्मनीपरलक्षणसाक्ष्यसाक्षिब्रह्मार्थत्वे दीर्घप्लुतयोरेवमेव सर्वार्थत्वमगन्तव्यम् । अकारोकारमकारबिन्दुनादान्तो दीर्घः पूर्ववत् पापक्षयकाममोक्षार्थत्वे ध्यानभेदोऽवगन्तव्यः । मकारान्तः समनीवाचकः बिन्दुः साक्षिवाचकः नादो ब्रह्मवाचक इति मोक्षहेतुत्वे स्थितिः । शक्तिशान्तौ प्लुतिः । मकारान्तः समनीवाचकः । बिन्दुनादौ साक्षिवाचकौ शक्तिशान्तौ ब्रह्मण इति मोक्षार्थत्वे प्रतिपत्तिः । अस्य मन्त्रस्य मोक्षप्रधानत्वेन तद्धेतुत्वमुपपादयति —विमलेति ॥ १ ॥

बिन्दुयुत इति । नादादेरपि उपलक्षणार्थः । त्रयीमात्रसिद्धः प्रणवः त्रिमात्रक इत्युक्तः । तस्मिन् पक्षे तिसृष्वेवाऽवशिष्टमात्रान्तर्भावो ज्ञातव्यः । सर्वमन्त्रसमवायीति । सर्वमन्त्राधारत्वं वदन् मन्त्रन्यासमाह । अं अं नमो ब्रह्मणे नमः । आं उं नमो विष्णवे नमः । इं मं नमः शिवाय नमः । ईं अं नमो ब्रह्मणे नमः इत्यादि क्षकारान्तमेवं द्रष्टव्यम् । पुनरेवमेवाऽष्टाक्षरैः द्वादशाक्षरैरन्यैश्च मन्त्रैः संयोज्य मातृकास्थान एव मन्त्रन्यासः कार्यः । अं बीजम् । उं शक्तिः ॥ २ ॥

अक्षीवैर्युगमध्यगध्रुवयुतैरङ्गानि कुर्यात् स्वरै-
र्मन्त्री जातियुतैश्च सत्यरहितैर्वा व्याहृतीभिः क्रमात् ॥ ३
विष्णुं भास्वत्किरीटाङ्गदवलययुगाकल्पहारोदराङ्घ्रि-
श्रोणीभूषं सवक्षोमणिमकरमहाकुण्डलामण्डितांसम् ।
हस्तोद्यच्चक्रशङ्खाम्बुजगदममलं पीतकौशेयमाशा-
विद्योतद्भासमुद्यद्दिनकरसदृशं पद्मसंस्थं नमामि ॥ ४
दीक्षितो मनुमिमं शतलक्षं प्रजपेत्प्रतिहुनेच्च दशांशम् ।
पायसैर्घृतयुतैश्च तदन्ते विप्रभूरुहभवाः समिधो वा ॥ ५
सर्पिःपायसशालीतिलसमिदाज्यैरनेन यो जुहुयात् ।
ऐहिकपारत्रिकमपि स तु लभते वाञ्छितं फलं न चिरात् ॥ ६

अभ्यर्च्य वैष्णवमथो विधिनैव पीठ-
मावाह्य तत्र सकलार्थकरं मुकुन्दम् ।
अङ्गैः समूर्तियुगशक्तियुगैः सुरेन्द्र-
वज्रादिकैर्यजतु मन्त्रितमः क्रमेण ॥ ७
वासुदेवः सङ्कर्षणः प्रद्युम्नश्चाऽनिरुद्धकः ।
स्फटिकस्वर्णदूर्वेन्द्रनीलाकाराश्च वर्णतः ॥ ८
चतुर्भुजाश्चक्रशङ्खगदापङ्कजधारिणः ।
किरीटकेयूरिणश्च पीताम्बरधरा अपि ॥ ९
सशान्ती श्रीसरस्वत्यौ रतिश्चासितलाश्रिताः ।
अच्छपद्मरजोदुग्धदूर्वावर्णाः स्वलङ्कृताः ॥ १०
आत्मान्तरात्मपरमज्ञानात्मानस्तु मूर्तयः ।
निवृत्तिश्च प्रतिष्ठाह्वा विद्या शान्तिश्च शक्तयः ॥ ११
ज्वलज्ज्वालारुचः प्रोक्ता आत्माद्या मूर्तिशक्तयः ।
इति पञ्चावरणकं विधानं प्रणवोद्भवम् ॥ १२

स्वरैर्मन्त्रीति न्यासविशेषैः मन्त्रात्मा सन्नित्यर्थः । सत्यरहितैर्वा व्याहृतिभिरिति । वाशब्देन सत्यसहितैर्वा व्याहृतिभिरिति पञ्चाङ्गपक्षः सूचितः ॥३॥४॥५॥६॥
मन्त्रितमः क्रमेणेत्यावाहनादिमन्त्रैश्च इत्यर्थः ॥ ७॥८॥९॥१०॥११॥१२ ॥

इत्थं मन्त्री तारमनुं जापहुतार्चा-
भेदैरङ्गीकृत्य च युञ्ज्यादपि योगान् ।
यैः संलब्ध्वा चेह समग्रां श्रियमन्ते
शुद्धं विष्णोर्धाम परं प्राप्स्यति योगी ॥ १३

करपादमुखादिविहीनमनारतदृश्यमनन्यगमात्मपदम् ।
यमिहात्मनि पश्यति तत्त्वविदस्तमिमं किल योगमिति ब्रुवते ॥ १४
योगाग्निदूषणपरं त्वथ कामकोपलोभप्रमोहमदमत्सरतेति षट्कम् ।
वैरं जयेत्सपदि योगविदेनमङ्गैर्योगस्य धीरमतिरष्टभिरिष्टदैश्च ॥ १५

यमनियमासनपवनायामाः प्रत्याहृतिश्च धारणया ।
ध्यानञ्चापि समाधिः प्रोक्तान्यङ्गानि योगयोग्यानि ॥ १६
सत्यमहिंसा समता धृतिरस्तेयं क्षमाऽऽर्जवञ्च तथा ।
वैराग्यमिति यमः स्यात् स्वाध्यायतपोऽर्चनाव्रतानि तथा ॥ १७
सन्तोषश्च सशौचो नियमः स्यादासनञ्च पञ्चविधम् ।
पद्मस्वस्तिकभद्रकवज्रकवीराह्वयाः क्रमात्तदपि ॥ १८
रेचकपूरककुम्भकभेदात्त्रिविधः प्रभञ्जनायामः ।
मुञ्चेद्दक्षिणयाऽनिलमथानयेद्वामया च मध्यगया ॥ १९

इत्थं मन्त्रीति । वासुदेवादिद्वादशाक्षराण्युक्तानि । अथवा बिन्दुनादशक्त्यादियुतस्य प्रणवस्य योगशेषत्वमुक्तम् । जपभेदा वाचिकादयः । बाह्याध्यात्मिकभेदात् हुतार्चनयोर्भेदः । योगप्रयोजनमाह—यैरिति ॥ १३॥१४ ॥

स्वशाखाजपः स्वाध्यायः । पद्मस्वस्तिकेति ।

ऊर्वोरुपरि विन्यस्य सम्यक् पादतले उभे ।
अङ्गुष्ठौ च निबध्नीयाद्धस्ताभ्यां व्यत्क्रमेण तु ॥ इदं पद्मासनम् ।
जान्वोरन्तरा सम्यक् कृत्वा पादतले उभे ।
ऋजुकायो विशेदेतदासनं स्वस्तिकं विदुः ॥
सीवन्याः पार्श्वयोर्न्यस्येत् गुल्फयुग्मं सुनिश्चलम् ।
वृषणाधः पार्श्वपादौ पाणिभ्यां परिबन्धयेत् ॥ इदं भद्रासनम् ।
ऊर्वोः पादौ क्रमान्न्यस्येत् जान्वोः प्रत्यङ्मुखाङ्गुलिः ।
करौ निदध्यादाख्यातं वज्रासनमनुत्तमम् ॥

संस्थापयेच्च नाड्येत्येवं प्रोक्तानि रेचकादीनि ।
षोड़शतद्द्विगुणचतुःषष्टिमात्रकाणि तानि च क्रमशः ॥ २०
चित्तात्मैक्यधृतस्य प्राणस्य स्यात् संहृतिः स्थानात् ।
प्रत्याहारो ज्ञेयश्चैतन्ययुतस्य सम्यगनिलस्य ॥ २१
स्थानस्थापनकर्म प्रोक्ता स्याद्धारणेति तत्त्वज्ञैः ।
यो मनसि देवताया भावः स्यादस्य मन्त्रिणः सम्यक् ॥ २२
संस्थापयेच्च तत्रेत्येवं ध्यानं विदन्ति तत्त्वविदः ।
सत्तामात्रं शुद्धं नित्यमपि निरञ्जनञ्च यत्प्रोक्तम् ॥ २३
तत्प्रविचिन्त्य च तस्मिंश्चित्तलयः स्यात् समाधिरुद्दिष्टः ।
अष्टाङ्गैरिति कथितैः पुनराशु निगृह्यतेऽरिरात्मविदा ॥ २४
अथवा शोषणदाहनप्लावनभेदेन शोधिते देहे ।
पञ्चाशद्भिर्मात्राभेदैर्विधिवत् समायमेत्प्राणान् ॥ २५
पञ्चाशदात्मकोऽपि च कलाप्रभेदेन तार उद्दिष्टः ।
तावन्मात्रायमनात्कलाश्च विधृता भवन्ति तत्त्वविदा ॥ २६

एकं पादमधः कृत्वा विन्यस्योरौ तथेतरम् ।
ऋजुकायो विशेद्योगी वीरासनमुदाहृतम् ॥ १५—२० ॥

चैतन्ययुतस्येति । चैतन्यशब्देन पूर्वोक्तौ चित्तात्मानावुच्येते ॥ २१ ॥

अस्य मन्त्रिण इति । समन्त्रकं ध्यानमुक्तम् ॥ २२ ॥

संस्थापयेदिति । निर्मन्त्रकं ध्यानमुक्तम् ॥ २३ ॥

तत् प्रविचिन्त्येति । संप्रज्ञातसमाधिरनायासेन वृत्तिसातत्यलक्षण उक्तः । सायाससातत्यं तु ध्यानमाहुः । तस्मिंश्चित्तलय इत्यसंप्रज्ञातसमाधिरुक्तः ॥ २४ ॥

भूतशुद्ध्यर्थे प्राणायामे पक्षान्तरं दर्शयति—अथवेति । पूर्वोक्तप्राणायामेनापि भूतशुद्धिर्भवति । तत्स्थरेचकादीनां सृष्टिसंहारस्वात्मस्थितिरूपत्वात् । भूतशुद्ध्यनन्तरं संग्रहेण सकलीकरणप्रकारमाह—पञ्चाशद्भिरिति । विधिवदिति । अकारादित्रयं प्रत्येकं दशमात्रं धारयेत् । बिन्दुं चतुर्मात्रम् । नादं षोड़शमात्रमित्यर्थः । तत्र बिन्दुनादावर्तनार्थं तदन्तं प्रणवमावर्तयेत् ॥ २५ ॥

पञ्चाशन्मात्राधारणे प्रतिपत्तिमाह—पञ्चाशदात्मक इति । तत्त्वविदा तत्त्वसंख्यायमनात् तत्त्वानि च विधृतानि भवन्तीति सूचितम् । तत्त्वधारणायां

पूर्वमिडाया वदने विचिन्तयेद्धूम्रमानिलं बीजम् ।
तेनागतेन देहं प्रशोषयेत् सान्तराधिकरचरणाम् ॥ २७
पिङ्गलया प्रतिमुञ्चेत्तथैव कार्शानवेन रक्तरुचा ।
प्रतिदह्य पूर्वविधिना मुञ्चेन्नैशाकरेण सुसितेन ॥ २८
संपूरयेत् सुधामयजलशीकरवर्षिणा तनुं सकलाम् ।
निर्माय मानसेन च परिपूर्णमनाश्चिरं भूयात् ॥ २९
सुजीर्णमितभोजनः सुखसमाप्तनिद्रादिकः
सुशुद्धतलसद्गृहे विरहिते च शीतादिभिः ।
पटाजिनकुशोत्तरे सुविशदे च मृद्वासने
निमीलितविलोचनः प्रतिविशेत्सुखं प्राङ्मुखः ॥ ३०
प्रसारितं वामकरं निजाङ्के निधाय तस्योपरि दक्षिणञ्च ।
ऋजुः प्रसन्नोऽवहितेन्द्रियः सन्नाधारमत्यन्तसमं स्मरेत् स्वम् ॥ ३१
तन्मध्यगतं प्रणवं प्रणवस्थं बिन्दुमपि च बिन्दुगतम् ।
नादं विचिन्त्य तारं यथावदुच्चार्य तन्नयेत् सुषुम्नान्तम् ॥ ३२
तन्मध्यगतं शुद्धं शब्दब्रह्माऽतिसूक्ष्मतन्तुनिभम् ।
तेजः स्मरेच्च तारात्मकमपि मूलं चराचरस्य सदा ॥ ३३

पृथिव्यादिसंबन्धतत्त्वसंख्यानुसारेण अकारादिकमावर्तनीयम् ॥ २६ ॥

शोषणादिप्रकारमाह—पूर्वमिति । तेनागतेनेति । नाभिगतवायुमण्डलं प्राप्तेनेत्यर्थः ॥ २७ ॥

तथैव कार्शानवेनेति । पिङ्गलाद्वारेण हृदयदेशस्याग्निमण्डलं प्राप्तेनेत्यर्थः ।

एवं कुक्षिमध्यगतं महापातकपञ्चाङ्गं पातकोपाङ्गसंयुतम् उपपातकरोमाणं कृष्णवर्णं पापपुरुषं स्वतनुं वा संशोष्य संदह्य वंकारेण प्लावनं कार्यमित्याह—नैशाकरेणेति । इडामार्गेण द्वादशान्तस्यामृतमण्डलेन पूरककाले बीजस्य मण्डलस्य वं बीजस्यैक्यं सञ्चिन्त्य कुम्भककाले प्लावयेदित्यर्थः ॥ २८ ॥ २९ ॥

योगप्रयोगेऽवस्थादेशादिनियममाह—सुजीर्णेति ॥ ३० ॥ ३१ ॥

प्रणवस्थं बिन्दुमिति । दीपशिखाकारं बिन्दुं नादं च तत्प्रभाकारं संचिन्त्येत्यर्थः । यथावदुच्चार्येति । अलिविरुतिवत् उन्मन्यन्तमुच्चार्य इत्यर्थः । सुषुम्नान्तं सुषुम्नाग्रं मध्यं वा सर्वथाप्युत्तरश्लोकः ॥ ३२ ॥

ॐकारो गुणबीजं प्रणवस्तारो ध्रुवश्च वेदादिः ।
आदिरुमध्यो मपरो नामान्यश्च त्रिमात्रकश्च तथा ॥ ३४
अस्य तु वेदादित्वात् सर्वमनूनां प्रयुज्यतेऽथादौ ।
योनिश्च सर्वदेहे भवति च स च ब्रह्म सर्वसंवादः ॥ ३५
ऋक् च तदाद्यादिः स्यात्तन्मध्यान्तं यजुश्च मान्तादिः ।
सामापि तस्य भेदा बहवः प्रोक्ता हि वेदलोकेषु ॥ ३६

सुषुम्नामध्यगतस्य प्रणवस्य ध्यानमाह—तन्मध्येति ॥ ३३ ॥

इदानीं प्रणवविभूतिं वदन्नामन्यासं प्रणवपुटितविन्यासानन्तरं प्रणवपुटितलिपिन्यासस्थान एव विधेयमाह—ओंकार इति । ॐकारादीनि दश नामानि । तत्र वेदादिरिति नामोपपादयन्न्यासमन्त्रान् सूचयति ॥ ३४ ॥

अस्य त्विति । न्यासमन्त्राणामादावन्ते च प्रणवः प्रयोक्तव्य इत्यर्थः । योनिश्चेति । नामचतुष्टयमुक्तम् । सर्वयोनये सर्वदेहाश्रयाय ब्रह्मणे सर्वसंवा[पा]दकायेति नामचतुष्टयमवगन्तव्यम् ॥ ३५ ॥

पूर्वोक्तं वेदादित्वमुपपादयति—ऋक् चेति । अग्निमील इत्यकारः ऋग्वेदादिः । समुद्रो बन्धुरित्युकारो यजुरन्तरः । मान्तादिः सामापीति । मान्तः मकारान्तः आदिः अकारादिश्च सामवेद इत्यर्थः । ज्योतिरुत्तममिति हि सामसमाप्तिः । अग्न आयाहीति च तस्यादिः । अवशिष्टानि नामान्तराणि न्यासाय सूचयति । तस्य भेदा इति । अव रक्षण गति प्रीति तृप्त्यवगम कान्ति प्रवेश श्रवण स्वाम्य सामर्थ्य याचन क्रियेच्छा दीप्त्यवाप्त्यालिङ्गन हिंसा दहन भाव वृद्धिष्विति धातुनिष्पन्नानि लौकिकनामानि य उत्तरतः स ओंकार इत्यादि श्रुतिसिद्धानि वैदिकनामानीति विभागः ।

अयमत्र न्यासक्रमः । ओं अं ब्रह्मणे नमः । ओं आं विष्णवे नमः । ओं इं रुद्राय नमः । ओं ईं ओंकाराय नमः । ओं उं प्रणवाय नमः । इत्यादि क्षकारान्ता ऊह्याः । नाममात्रं तूच्यते । प्रणवः । सर्वव्यापी । अनन्तः । तारम् । सूक्ष्मः । शुक्लः । वैद्युतः । परं ब्रह्म । एकः । एकरुद्रः । ईशानः । भगवान् । महेश्वरः । महादेवः । सदाशिवः । सर्वरक्षिता । सर्वगतः । सर्वप्रियतमः । नित्यतृप्तः । सर्वावगमः । सर्वकान्तः । सर्वप्रविष्टः । सर्वश्रोता । सर्वस्वामी । सर्वसमर्थः । सर्वयाचकः । सर्वक्रियः । सर्वेच्छुः । सर्वदीप्तः । सर्वावाप्तः । सर्वालिङ्गितः । सर्वहिंसकः ।

उच्चार्योच्चार्य च तं क्रमान्नयेदुपरि षड्द्वयान्तान्तम् ।
मनसा स्मृते यदाऽस्मिन्मनो लयं याति तावदभ्यस्येत् ॥ ३७
अथवा बिन्दुं वर्तुलमावर्त्तैस्त्रिभिरुपेतमेवमिव ।
प्रोतं रविबिम्बेन च समभ्यसेत् स्रुतसुधामयं तेजः ॥ ३८
अपमृत्युरोगपाप्मजिदचिरेण नृणां सिद्धिदो योगः ।
अथवा मूलाधारोत्थिता प्रभा बिसविभेदतन्तुनिभा ॥ ३९
वदनामृतकरबिम्बस्रुता ध्याताऽमृताम्बुलवलुलिता ।
स्थावरजङ्गमविषहृद्योगोऽयं नात्रसन्देहः ॥ ४०
अथवा त्रिवलयबिन्दुगधाम प्रणवेन समुन्नयेदूर्ध्वम् ।
प्रीतोर्णातन्तुनिभं सौषुम्नेनैव वर्त्मना योगी ॥ ४१
तस्मिन्निधाय चित्तं विलयं गमयेद्दिनेशसंख्याते ।
पुनरावृत्तिविहीनं निर्वाणपदं व्रजेत् समभ्यासात् ॥ ४२
अथवादिबीजमौ पुनरुमपि विषि तमपि संहरेद्बिन्दौ ।
बिन्दुं नादे तमपि शक्तौ शक्तिं तथैव शान्ताख्ये ॥ ४३

सर्वदाहकः । सर्वभावः । सर्वद्रुहः । गुणबीजम् । ध्रुवः । वेदादिः । उमध्यः । मपरः । त्रिमात्रकः । योनिः । सर्वदेहाश्रयः । सर्वसंवाहकः । सर्वात्मेति नामानीति ॥ ३६ ॥

एवं नामविभेदैः प्रणवविभूतिं स्मृत्वोन्मन्यन्तं क्रमेण तं प्रणवं नयेदित्याह— उच्चार्येति ॥ ३७ ॥

बिन्दोः सूक्ष्मतन्तुनयनात्मकं योगमभिधाय बिन्दुस्वरूपनयनात्मकमप्याह— अथवा बिन्दुं वर्तुलमिति । प्रोतं रविबिम्बेनेति । द्वादशान्तस्थचिदर्क-बिम्बेनेत्यर्थः ॥ ३८ ॥

पाप्मादिजयार्थं सौरं योगमभिधाय विषनिर्हरणाद्यर्थं सौम्यं योगतन्तु-नयनात्मकमाह—अथवा मूलाधारेति । वदनशब्देन कारणमुच्यते । तद्गतेना-मन्दलक्षणेनाऽमृतबिम्बेन स्रुतेत्यर्थः ॥ ३९ ॥ ४० ॥

रक्तसूत्रोन्नयनात्मकमावृत्तिहीनं मोक्षप्रधानं योगमाह—अथवा त्रिवलयेति । ॥ ४१ ॥ ४२ ॥

स्थूल सूक्ष्म कारण सामान्य बीज संविदभाव तद्वाचिकाकारादिमात्राणां च क्रमसंहारलक्षणं मोक्षसाधनयोगमाह—अथवादिबीजमिति ॥ ४३ ॥

तेजस्यनन्यगे चिति निर्द्वन्द्वे निष्कले सदानन्दे ।
सूक्ष्मे च सर्वतोमुखकरपदनयनादिलक्षणेऽलक्ष्ये ॥ ४४

स्वामिनि संहृत्यैवं करणेन्द्रियवर्गनिर्गमापेतः ।
विलीनपुण्यपापो निरुच्छ्वसन् ब्रह्मभूत एव स्यात् ॥ ४५

अथवा योगोपेताः पञ्चावस्थाः क्रमेण विज्ञाय ।
ताभिर्युञ्जीत सदा योगी सद्यः प्रसिद्धये मुक्तेः ॥ ४६

जाग्रत् स्वप्नसुषुप्ती तुरीयतदतीतके च तास्तासु ।
स्वैरिन्द्रियैर्यदात्मा भुङ्क्ते भोगान् स जागरो भवति ॥ ४७

संज्ञारहितैरपि तैरस्याऽनुभवो भवेत् पुनः स्वप्नः ।
आत्मनिरुद्‌युक्ततया नैराकुल्यं भवेत् सुषुप्तिरपि ॥ ४८

इतरतेजसो वैलक्षण्यमाह—अनन्यग इति । अनन्यगत्वे हेतुश्चितीति । ज्ञानत्वेन प्राप्तं विषयजन्मादियोगं निराचष्टे—निर्द्वन्द्व इति । तत्र हेतुर्निष्कल इति । ततः सदानन्दत्वमस्ति चेत् एवंविधमानन्दं कुतो नोपलभ्यते सर्वैरिति । तत्राह—सूक्ष्म इति । कथं तर्हि अस्तित्वसिद्धिरिति । तत्राह—सर्वत इति । एवमप्यविषयत्वमाह—अलक्ष्य इति । करणेन्द्रियवर्गो यस्मादबोधान्निर्गच्छति उत्पद्यते स अपेतः अपगतो यस्य स तथोक्तः । अत एव विलीनपुण्यपापादित्वमपि संभवति ॥ ४४ ॥ ४५ ॥

सर्वव्यवहारेष्वपि कर्तुं बीज बिन्दु नाद शक्ति शान्तात्मक प्रणवसाधनम् उच्चारणादिरहितं स्वाभाविकं योगमाह—अथवा योगेति । योगोपेता समाधानविशेषोपेता इत्यर्थः ॥ ४६ ॥

अवस्था दर्शयति—जाग्रदिति । तासां विविच्य स्वरूपमाह—तास्वित्यादिना । बुद्ध्यादि विषयव्याप्ति बीजरूपा जाग्रदवस्था विषयप्राधान्यपरित्यागेन बुद्धिप्राधान्यावस्था बिन्दुस्वप्नात्मिका सविषयाया बुद्धेः कारणात्मत्वावस्था नादसुषुप्त्यात्मिका कारणात्मिकाया बुद्धेः साक्ष्याकारावस्था शक्तितुरीयात्मिका ततस्तस्याः साक्षिणि लयावस्था शान्ततुरीयातीतेत्यर्थः ॥ ४७ ॥

संज्ञारहितैरिति । संज्ञाशब्देनेन्द्रियाणि उच्यन्ते । संज्ञायन्ते एभिरिति । जाग्रद्विवेकसामर्थ्यरहितैः इन्द्रियैः वासनात्मकैरित्यर्थः । मनोरूपैरिति भावः । आत्मनिरुद्‌युक्ततयेति । आत्मनो मनसो निःसंकल्पतया आत्मनो यन्नैराकुल्यं

पश्यति परं यदात्मा निस्तमसा चेतसा तुरीयं तत् ।
आत्मपरमात्मपदयोरभेदतो व्याप्नुयाद्यदा योगी ॥ ४९
तच्च तुरीयातीतं तस्यापि भवेन्न दूरतो मुक्तिः ।
अथवा सूक्ष्माख्यायां पश्यन्त्यां मध्यमाख्यवैखर्योः ॥ ५०
ससुषुम्नाग्रगयोरपि युञ्ज्याज्जाग्रदादिभिः पवनम् ।
बीजोच्चारो जाग्रद्बिन्दुः स्वप्नः सुषुप्तिरपि नादः ॥ ५१
शक्त्यात्मकं तुरीयं शान्ते लय आत्मनस्तुरीयान्तम् ।
अङ्गुष्ठगुल्फजानुद्वितयं च गुदश्च सीवनी मेढ्रम् ॥ ५२
नाभिर्हृदयं ग्रीवा सलम्बिकाग्रं तथैव नासा च ।
भ्रूमध्यललाटाग्रं सुषुम्नाग्रं द्वादशान्तमित्येवम् ॥ ५३
उत्क्रान्तौ परकायप्रवेशने चाऽऽगतौ च पुनः स्वतनौ ।
स्थानानि धारणायाः प्रोक्तानि मरुत्प्रयोगविधिनिपुणैः ॥ ५४
स्थानेष्वेष्वात्ममनःसंयोगसमीकरकर्मणोऽभ्यासात् ।
अचिरेणोत्क्रान्त्याद्या भवन्ति संसिद्धयः प्रसिद्धतराः ॥ ५५
कण्ठे भ्रूमध्ये हृदि नाभौ सर्वाङ्गके स्मरेत् क्रमशः ।
लवरसमीरहवर्णैरनिलममा कालवञ्चनेयं स्यात् ॥ ५६
अवनिजलानलमारुतविहायसां शक्तिभिश्च तद्बीजैः ।
सारूप्यमात्मनश्च प्रतिनीत्वा तत्तदाशु जयति सुधीः ॥ ५७

तत्सुषुप्तिरित्यर्थः ॥ ४८ ॥ ४९ ॥ ५० ॥

जपकाले प्रतिपत्तव्यं योगमाह—अथवा सूक्ष्माख्यायामिति। तत्र सूक्ष्मशब्देन सूक्ष्मा वागुक्ता। स्वमहिमस्था निश्चला। आख्याशब्देन परा किंचिच्चलिता मूलाधारस्था। पश्यन्ती सामान्यज्ञानरूपिणी नाभिस्था। मध्यमा विशेषज्ञानरूपा हृदि स्थिता। वैखरीशब्दरूपिणी मुखस्था। इति मन्त्रोत्पत्तिक्रमयोगमभिधाय लयक्रमयोगमभिदधाति—ससुषुम्नाग्रगयोरिति। सुषुम्नाया अग्रं सुषुम्नाग्रं तं गच्छन्तीति सुषुम्नाग्रगाः। वैखरीमध्यमापश्यन्तीपरा-सूक्ष्माख्याः। आस्यभ्रूमध्यमूर्ध्वद्वादशान्तषोडशान्तस्थाः वाग्भेदाः। तैः सहितयोः मध्यमाख्यवैखर्योरित्यर्थः। योगक्रममाह—बीजोच्चार इति। सृष्टिसंहारयोः जाग्रदवस्था एकैव अवगन्तव्या। बिन्दुः स्वप्न इति। भ्रूमध्यहृदयस्थमध्यमा-

एवं प्रोक्तैर्योगैरायोजयतोऽन्वहं तथाऽऽत्मानम् ।
अचिरेण भवति सिद्धिः समस्तसंसारमोचनी नित्या ॥ ५८
इति योगमार्गभेदैः प्रतिदिनमारूढयोगयुक्तधिया ।
सिद्धय उपलभ्यन्ते मुक्तिपुरीसंप्रवेशनद्वाराः ॥ ५९
कम्पः पुलकानन्दौ वैमल्यस्थैर्यलाघवानि तथा ।
सकलप्रकाशवित्ते इत्यष्टावस्थाः प्रसूचिकाः सिद्धेः ॥ ६०
त्रैकाल्यज्ञानोद्यौ मनोज्ञता च्छन्दतो मरुद्रोधः ।
नाडीसंक्रमणविधिर्वाक्सिद्धिर्देहतश्च देहाप्तिः ।
ज्योतिःप्रकाशनं चेत्यष्टौ स्युः प्रत्यया युजः सिद्धेः ॥ ६१
अणिमा महिमा च तथा गरिमा लघिमेशिता वशित्वञ्च ।
प्राप्तिः प्राकाम्यञ्चेत्यष्टैश्वर्याणि योगयुक्तस्य ॥ ६२
अष्टैश्वर्यसमेतो जीवन्मुक्तः प्रवच्यते योगी ।
योगानुभवमहामृतरसपानानन्दनिर्भरः सततम् ॥ ६३

इत्येवं प्रणवविधिः समीरितोऽयं
भक्त्या तं प्रभजति यो जपादिभेदैः ।
स प्राप्नोत्यनुततनित्यशुद्धबुद्धं
तद्विष्णोः परमतरं पदं नराग्र्यः ॥ ६४

इति श्रीप्रपञ्चसारे एकोनविंशः पटलः ।

द्वयात्मकबिन्दुद्वयात्मकं स्वप्रद्वयमित्यर्थः । एवमुत्तरत्रापि योज्यम् ॥ ५०—५८ ॥

सकलप्रकाशः सर्वस्य तेजोमयत्वेन प्रकाशः वित्ता वेत्तृता याथात्म्येनेत्यर्थः ॥ ॥ ५९ ॥ ६० ॥

ज्योतिःप्रकाशनमिति । परं प्रत्यपि सर्वस्य ज्योतिर्मयत्वप्रकाशनमित्यर्थः ॥ ॥ ६१ ॥ ६२ ॥ ६३ ॥ ६४ ॥

इति श्रीपद्मपादाचार्यकृते प्रपञ्चसारविवरणे
एकोनविंशः पटलः ।

अस्त्रन्यासेन भूविघ्नान् दिग्बन्धात् खेचरानपि ।
वह्निप्राकारमभितो विभाव्याथात्मशोधनम् ।।३५।।
हंसेन कुम्भकं कुर्वन् मूलाधारस्थितां पराम् ।
कुण्डलीं धातुनाथाभिर्गणनाथादिभिस्तथा ।।३६।।
देहस्थाखिलदेवाद्यैर्ब्रह्मरन्ध्रोपरि स्थिते ।
संयोज्य परतत्त्वे तु स्वदेहं तु विचिन्तयेत् ।।३७।।
तत्त्वाधिष्ठातृदेवानां लयादात्मनि तज्जडम् ।
विभाव्य वामकुक्षौ तु चिन्तयेत् पापपूरुषम् ।।३८।।
अधोमुखं कृष्णवर्णं रक्तश्मश्रुशिरोरुहम् ।
खड्गचर्मधरं क्रूरं महापापोपपातकैः ।।३९।।
उत्पन्नाङ्गं तेन सह स्थूलदेहं तु साधकः ।
शब्दस्पर्शरसैर्बीजैः पूरकुम्भकरेचकम् ।।४०।।

फट् इत्यासनाधो वामपार्ष्णिघातत्रयेण सुदर्शनास्त्रमन्त्रेणास्त्रन्यासेन दिग्बन्धेन क्रमेण तल-भूमि-आकाशस्थविघ्नान् विघ्नकरान् भूतान्निवारयेत् । अथ भूशुद्ध्यनन्तरम् । आत्मशोधनम्, भूतशुद्धिं कुर्यादिति शेषः ॥ ३५ ॥

हंसेन हंसः इति । धातुनाथा डाकिन्याद्याः । गणनाथो गणेशः । आदिना जीवात्मनः संग्रहः ॥ ३६ ॥

देवाद्यैः, देवा भैरवाः, आद्येन ग्रहादि, तैः संयुतां कुण्डलीं परतत्त्वे परशिवे । जडं चिन्तयेदिति सम्बन्धः ॥ ३७ ॥

तत्त्वं पृथिव्यादि । देवानां गणेशादीनाम् आधारादिचक्रेषु पृथिव्याद्यात्मकेष्वधिष्ठातारो गणेशाद्याः । आत्मनि परशिवे लयात् तत् शरीर एवं विभाव्य पापपूरुषं चिन्तयेत् ॥ ३८ ॥

पापपुरुषध्यानमाह — अधोमुखमित्यादि ॥ ३९ ॥

पातकैरुत्पन्नाङ्गमिति सम्बन्धः । तेन पापपुरुषेण । शब्दो य । स्पर्शो र । रसो व । बीजैः बिन्दुयुतैः । यं रं वं इति क्रमेण जपन् पूरकं कुम्भकं रेचकं कुरोतीति सम्बन्धः । अत्र पूरकादिकं यावत् कर्तुं शक्यं तावत् कर्तव्यम् । तदुक्तं त्रिपुरार्णवे—"पूरकुम्भरेचकेषु यावत् स्वाद्वेगरोधनम्" इति ॥ ४० ॥

कुर्वन् वाय्वग्निसलिलैः शोष्य दग्ध्वा निषिच्य च ।
पुना रूपाग्नि सोऽहं च पूरकुम्भकरेचकम् ॥४१॥

घनीकृत्य तु संचेत्य चानये हृदि पूरुषम् ।
उत्पाद्य तस्मादखिलां तत्त्वदेवमयीं तनुम् ॥४२॥

कुण्डल्याद्या देवताश्च स्वस्वस्थाने विचिन्तिताः ।
देवताप्रचुरं देहं गतदोषं विचिन्तयेत् ॥४३॥

भूतशुद्धिं विधायैवं प्राणस्थापनमाचरेत् ।
पाशं मायामङ्कुशश्च शब्दाद् वाय्वन्तसप्तकम् ॥४४॥

अग्निः प्रीतिगतः प्रीतिः पृथ्वी वायुस्तथा जपाः ।
माया प्रीतिः सप्तदश सर्वे बिन्दुयुताः प्रिये ॥४५॥

तत्तन्नाम विलिख्याथ प्राणा इह तथा पुनः ।
प्राणास्ततः सप्तदश नाम जीव इह स्थितः ॥४६॥

तत्तद्बीजोद्भूतैर्वाय्वग्निसलिलैः पुनः । रूप ल । अग्नि ह । सोऽहं स्वरूपम् इति बीजं पठन् इति शेषः । क्रमेण पूरकादि कुर्वन् ॥ ४१ ॥

भस्मीभूतदेहं जलेनाप्लावितं घनीकृत्य संचेत्य । जडात्मकं चेतनीकृत्य अखिलान् पुरुषं जीवं तस्मात्पुरुषात् तत्त्वदेवानुत्पाद्य तन्मयं तत्प्रचुरम्। तनुं शरीरम् । आदौ परशिवे लयं सर्वदेवानामुक्त्वा तस्मात्पृथक्कृत्य हृद्यानीताज्जीवाद्देवतोत्पादनकथनं जीवात्मनः परमात्माभेदद्योतनायेति ज्ञेयम् ॥ ४२ ॥

स्वस्वस्थाने स्थिताः विचिन्तिताः ॥ ४३ ॥

एवमुक्तप्रकारेण । प्राणप्रतिष्ठामन्त्रमाह—पाशेति । पाशः आं । माया ह्रीं । अङ्कुशः क्रों । शब्दात् यकारात् । वाय्वन्तं सकारान्तम् ॥ ४४ ॥

अग्निः ह । प्रीतिः ओ । तेन हो इति जातम् । प्रीतिः ओ । पृथ्वी क्ष । वायुः स । अजपा हंसः । सप्तदश पाशादिप्रीत्यन्तम् । अजपाया एकत्वेन गणनात् सप्तदश । सर्वे पाशादित्रयं अजपां च त्यक्त्वा ॥ ४५ ॥

तत्तन्नाम त्रिपुरसुन्दरीत्यादि । प्राणा इह । प्राणाः स्वरूपम् । सप्तदश । पाशादिप्रीयन्तम् । नाम त्रिपुरसुन्दरीत्यादि । जीव इह स्थितः । स्वरूपम् ॥ ४६ ॥

पुनः सप्तदशाख्या च सर्वं लिख्येन्द्रियाणि च ।
इह स्थितानि तान्येव नाम वाङ्मन आलिखेत् ॥४७॥
श्रोत्रत्वक्चक्षुरथ वै जिह्वा घ्राणं च पाद वै ।
प्राणा इहागत्य सुखं चिरं तिष्ठन्तु वै शिरः ॥४८॥
षट्कं चान्त्यगतं चेति प्राणस्य स्थापने मनुः ।
एकोनत्रिंशदधिकशतवर्णो भवेत् प्रिये ॥४९॥
पाशबीजं बिन्दुयुता प्रतिष्ठा संप्रकीर्तितम् ।
वह्निस्पर्शौ तुष्टिगतौ माया बिन्दुयुता भवेत् ॥५०॥
शक्तिस्पर्शौ प्रीतिगतौ चाङ्कुशं बिन्दुयोगतः ।
अग्निः सबिन्दुः सर्गेण युतो वायुरथो जया ॥५१॥
ब्रह्मादयो वै ऋषयश्छन्दो वेदत्रयं भवेत् ।
प्राणशक्तिः परा देवी देवता संप्रकीर्तिता ॥५२॥
तेजस्पर्शयुतैर्दीर्घबीजैरङ्गानि विन्यसेत् ।
षण्ढस्वरविहीनैस्तु जातयस्ते प्रकीर्तिताः ॥५३॥

आख्या नाम । सर्वं इन्द्रियाणि । इह स्थितानि । स्वरूपम् । तानि । सप्तदश । वाङ्मनः स्वरूपम् ॥ ४७ ॥

श्रोत्रत्वक्चक्षुर्जिह्वाघ्राणपादप्राणा इहागत्य सुखं चिरं तिष्ठन्तु । स्वरूपम् । शिरः स्वाहा ॥ ४८ ॥

अन्त्यगतं षट्कं पृथ्व्यादि षडक्षराणि । अत्राजपाया अक्षरद्वयगणना । इन्द्रियाणि इह इत्यसन्धिः । एकोनत्रिंशदिति । सर्वत्राजपायाः वर्णद्वयगणनम् । आद्ये द्वितीये च कूटे चतुर्विंशतिः, तृतीये अष्टाविंशतिः, चतुर्थे त्रिपञ्चाशत् । सर्वत्र नाम्नो गणनाभावः ॥४६॥

प्रतिष्ठा आ । बह्नि ह । स्पर्श र । तुष्टिः ई ॥ ५० ॥

शक्तिः क । स्पर्शः र । प्रीतिः ओ । अग्निः ह । सर्गः विसर्गः । वायुः स ॥ ५१ ॥

ऋष्यादिन्यासमाह--ब्रह्मादय इति । ब्रह्मविष्णुरुद्रा इत्यर्थः । वेदत्रयम् ऋग्यजुः-सामानि ॥ ५२ ॥

तेजः ह । स्पर्श र । दीर्घबीजैः बिन्दुयुतैर्दीर्घस्वरैः ह्रां ह्रीं इत्यादि ह्रः इत्यन्तैः । षण्ड स्वरः ऋ ऌ इति । एतद्द्वयरहितैः षट्दीर्घबीजैरित्यन्वयः । ते षण्डस्वरहीनाः षट्स्वरा जातय इत्यर्थः । जातिसंज्ञाकरणस्याग्रे उपयोगः ॥ ५३ ॥

शोणसागरमध्यस्थरत्नमाणिक्यपोतके ।
मणिमण्डपसंराजद्रक्तपद्मोपरि स्थिताम् ॥५४॥
जपाकुसुमसच्छायां रक्तस्रग्वस्त्रभूषणाम् ।
सृणिं पाशं तथा चापं पौण्ड्रं तद्वत् त्रिशूलकम् ॥५५॥
असृक्पूर्णकरोटं च पञ्च बाणांश्च बिभ्रतीम् ।
स्मरेत् त्रिनेत्रां स्वसमशक्त्यष्टकसुसेविताम् ॥५६॥
एवं ध्यात्वा स्वहृदये तलं न्यस्य त्रिधा जपेत् ।
ममेति नाम्नि संयोज्य चैवं प्राणस्थितिर्भवेत् ॥५७॥
मातृकाभिस्ततः प्राणायामत्रितयमाचरेत् ।
नृपेण भूतपक्षाभ्यां दिशा स्यात् पूरकादिकम् ॥५८॥
ब्रह्मा ऋषिः स्याच्छन्दस्तु गायत्री कोर्तिता भवेत् ।
जातिह्रस्वगुरुभ्यां तु षड्वर्गैः पुटितैर्न्यसेत् ॥५९॥

ध्यानमाह—शोणेति । शोणसागरः रक्तजलार्णवः । पोतके नौकायाम् ॥ ५४ ॥

सृणिः अङ्कुशः । पौण्ड्रम् पुण्ड्रेक्षुनिर्मितं चापम् ॥ ५५ ॥

करोटं नृकपालम् । दक्षोर्ध्वादिदक्षमध्यान्तं षडायुधानि ॥ ५६ ॥

आं ह्रीं क्रों इति बीजादिन्यासः, "आद्यैस्त्रिभिर्बीजशक्तिकीलकानि प्रविन्यसेत्" इति त्रिपुरार्णववचनात् । देवताप्रीतये प्राणस्थाने विनियोग इति ज्ञेयम् । न्यासस्थानमुद्राबीजयोगपञ्चपूजाः सर्वत्र पूर्ववज्ज्ञेयाः । तलं करतलम् । नाम्नि नामस्थाने मम प्राणा इत्यादि । अत्र पद्धतौ लाघवानुरोधेन ज्ञानार्णवप्रोक्तमनुमुक्त्वा समर्थानां मूलतन्त्रत्यागानौचित्यादथवेति पक्षान्तरमुक्तम् ॥ ५७ ॥

मातृकान्यासाङ्गं प्राणायाममाह—मातृकाभिरिति । ततः प्राणप्रतिष्ठानन्तरम् । तत्प्रकारमाह—नृपेति । नृपेन षोडशभिः स्वरैः । भूतपक्षाभ्यां कादिमान्तैः पञ्चविंशतिसंख्यैः । दिशा यादिक्षान्तैर्दशभिः । क्रमेण पूरकं कुम्भकं रेचकं कुर्यादित्यर्थः ॥ ५८ ॥

मातृकान्यासस्य ऋष्यादिन्यासमाह—ब्रह्मेत्यादि । न्यासस्यापि मन्त्रमयत्वादृष्यादिन्यासो युक्त एव । ऋष्यादितत्त्वमुक्तं त्रिपुरारहस्ये—"आद्यद्रष्टा तु मन्त्राणां ऋषिस्तत्र पृथक् पृथक् । गुरुत्वान्मूर्ध्नि तत्स्थानं मन्त्रवर्णाधिदेवता । छन्दःस्थानं मुखं योग्याद्देवता हृदि संस्थिता । मन्त्रवाच्यात्मिका तेन देवतां हृदि विन्यसेत् ॥ बीजवर्णात्मना दृष्टाः पूर्वं मन्त्रा महर्षिभिः । तेन कारणभूतेन मन्त्रा दृष्टा अनन्तरम् ॥ तस्मात्

ब्रह्मरन्ध्रे स्मरेत् पद्ममष्टपत्रं सुकर्णिकम् ।
भूपुरं तद्बहिर्देवि सर्गयुक्प्रकृतिं स्मरेत् ॥६०॥
कोणेषु रसबीजं वै दिक्षु पत्रेष्टवर्गकम् ।
पञ्च पञ्च चतुर्युग्मद्वितयं चेति कादितः ॥६१॥
स्वरयुग्मं केशरेषु प्रासादपरकर्णिकम् ।
अग्निवाय्वङ्गदासर्गः प्रासादपरसंज्ञितम् ॥६२॥

तन्मन्त्रबीजं वै मन्त्रकारणभावतः । मन्त्रसामर्थ्यरूपेण फलदाने सशक्तिकः ॥ तद्वर्णे मन्त्रशक्तिस्तु तेन शक्तिरितीरितः ।न गच्छेच्छक्तिरन्यत्र चेति शक्तिस्तु कीलिता॥ यस्मिन् वर्णे स वर्णस्तु कीलकं समुदाहृतम् । बीजस्थानं गुह्यमिति तत्र बीजं प्रविन्यसेत् ॥शक्तिस्तु गमने दृष्टा तेन शक्तिस्तु पादयोः । नाभौ प्राणः कीलितो वै तस्मात्तत्र तु कीलकम् ॥ ऋष्यादिन्यासहीनस्तु गुर्वादिद्रोहहेतुतः । बीजादिहीनस्तद्वच्च न फलं विन्दते क्वचित् ॥" इति । जातयः षण्ढस्वरहीनाः षड्दीर्घस्वराः । तेषां ह्रस्वगुरुभ्यां पुटितैर्वर्गैः अं कं. ङं आं इत्यादि । बिन्दुयोगः सम्प्रदायात् । षड्वर्गाः क च ट त प इति पञ्चवर्णात्मकाः पञ्च-वर्गाः । यवर्गो दशवर्णः षष्ठः, "अनुस्वारविसर्गाभ्यां यशवर्गौ ह् ल कौ"इति ज्ञानार्णवोक्तेः । बीजादिन्यासस्तु—"ऋषिर्ब्रह्मा च गायत्री छन्दो देवी सरस्वती । मातृका देवता देवि हलो बीजानि शक्तयः ॥ स्वरास्तु परमेशानि तथा व्यक्तिस्तु कीलकम् ॥" इति दक्षिणा-मूर्तिसंहितायामुक्तः । त्रिपुरार्णवेऽपि--"हलो बीजानि तद्वत्तु स्वराः शक्तय ईरिताः । व्यक्तिश्च कीलकम्" इत्यादि । करादिन्यासे विशेषस्त्रिपुरारहस्ये—"करस्तु न्यासयोगेन मन्त्रात्मत्वाद्विशुद्धयति । ततः पूजाजपादौ तु विनियुक्तः फलप्रदः ॥ अङ्गन्यासमृते विघ्नैर्मूर्तेर्भूयोऽभिभूयते । तस्मादङ्गन्यासयोगाद्रक्षणं सर्वतो भवेत् ॥ युद्धे तु हृदयं चादौ रक्षणीयं प्रयत्नतः ।एवं मूर्धापि तु शिखाशेखरस्थानभावतः॥ तद्भङ्गे मानभङ्गः स्यादत-स्तद्रक्ष्यमेव हि । कवचं चाङ्गसन्त्राणं नेत्रं स्यात् करणोत्तमम् ॥ अस्त्रं च बाह्यकरण-मित्येतन्न्यासयोगतः । संरक्ष्य पश्चाद्दिग्बन्धाद्देशदिग्रक्षणं भवेत् ॥" इति ॥ ५९ ॥

ध्यानमाह—ब्रह्मरन्ध्रेति । भूपुरम् चतुरस्रम् । तच्च तद्बहिः पद्मबहिः । सर्ग-युक्प्रकृतिः ठः । कोणेष्वित्यन्वयः ॥ ६० ॥

रसबीजं वं । दिक्षु चतुरस्रस्य आग्नेयादिकोणेषु ठः । प्रागादिदिक्षु वम् । प्रागाद्यष्टपत्रेष्वष्टवर्गान् । वर्गानाह—पञ्चेति । कादितः ककारादितः । पञ्च पञ्च । पञ्चवर्णात्मकाः पञ्चवर्गाः । चतुर्युग्म चतुर्वर्णात्मकं वर्गद्वयम् । द्वितयं वर्णद्वयात्मक एकः । कं च ट त प य श ला वर्गाद्याः ॥ ६१ ॥

केसरेषु कर्णिकासमीपदलप्रान्तेष्वष्टसु स्वरयुग्मम् । प्रासादपरकर्णिकम् । प्रासाद-परामाह—अग्नीति । अग्नि ह । वायु स । अङ्गदा औ । सर्गो विसर्गः ॥ ६२ ॥

आधारध्वनिमालक्ष्य कुलपद्मनिवासिनीम् ।
सार्धत्रिवलयोपेतसुप्तसर्पनिभाकृतिम् ॥६३॥
तडित्कोटिप्रतीकाशां विसतन्तुतनोयसीम् ।
कालाग्निसदृशाभासां स्मरन् प्राणबलोद्यमाम् ॥६४॥
कुम्भकश्वाससम्पर्कप्रबुद्धां ब्रह्मवर्त्मना ।
तज्ज्वालास्पर्शविगलत्परचन्द्रामृतोद्भवाः ॥६५॥
सबिन्दवो मातृकार्णा ध्यात्वैवं विन्यसेदथ ।
विशुद्धौ षोडशदले स्वरान् कादीननाहते ॥६६॥
रविपत्रेऽथ दिक्पत्रे मणिपूरे तु डादिकान् ।
स्वाधिष्ठानेऽथ षट्पत्रे बाद्यान् वादींश्चतुर्दले ॥६७॥
आधारे हक्षकारौ च आज्ञायां द्विदलेऽम्बुजे ।
चतुस्तारादिकान् देवि हृदन्तान् विन्यसेत् क्रमात् ॥६८॥

एवं ध्यानान्तरं कर्तव्यमाह—आधारेति । आधारध्वनिमालक्ष्य श्रुत्वा । आधारध्वनिर्नाम कर्णपिधाने श्रूयमाण आन्तरः शब्दः । तस्य श्रवणं प्राणायामाद्यभ्यासवतां सुलभम् । अन्येषां कर्णपिधानेन भवति । कुलपद्मम् आधारसहस्रदलकमलम् ॥ ६३ ॥

प्राणः ज्ञानम् । बलम् इच्छा । उद्यमः क्रिया । एतत्त्रयात्मिकाम् । "जडाद्यावर्तकः प्राणो जन्तूनां ज्ञानमेव हि" इत्यत्र प्राणपदस्य ज्ञानार्थत्वम् । साधारणी (स्वाभाविकी) ज्ञानबलक्रिया च" इत्यत्र बलपदस्येच्छार्थत्वं चोक्तम् ॥ ६४ ॥

कुम्भकं कृत्वा तच्छ्वाससम्पर्केण प्रबुद्धां ध्यायेत् । ब्रह्मवर्त्मना सुषुम्णामार्गेण ॥ ६५ ॥

अथ ध्यानानन्तरम् । विशुद्धौ कण्ठे । अनाहते हृदि । कादीन् ठान्तान् ॥ ६६ ॥

अनाहतं रविपत्रं द्वादशपत्रम् । दिक्पत्रं दशपत्रम् । मणिपूरे नाभौ । डादिकान् फान्तान् । स्वाधिष्ठाने लिङ्गे । बाद्यान् लान्तान् । वादीन् सान्तान् ॥ ६७ ॥

आधारे गुदोपरि । हक्षकारौ हकारक्षकारौ । आज्ञायां भ्रूमध्ये । न्यासमन्त्रानाह—चतुस्तारेति । हृत् नमः । हृदन्तान् तत्तन्न्यासमन्त्रानिति शेषः ॥ ६८ ॥

प्रणवो वाग्भवं माया लक्ष्मीस्तारचतुष्टयम् ।
एतत्सर्वत्र कर्मादौ मन्त्रादौ विनियोजयेत् ॥६९॥
मन्त्राणां वीर्यसिद्ध्यर्थं तेषां तेजोमयत्वतः ।
आद्यहीनं त्रितारं वै द्वितारं चान्त्ययुग्मकम् ॥७०॥
गन्धस्पर्शयुता शान्तिर्लक्ष्मीर्बिन्दुयुता भवेत् ।
एवमन्तर्मातृकाया न्यासं कृत्वा बहिर्न्यसेत् ॥७१॥
तत्र स्थूलं मातृकाया ध्यानं शृणु समाहिता ।
अकचाद्यष्टवर्गाङ्गां शुद्धस्फटिकसन्निभाम् ॥७२॥
चन्द्रचूडां त्रिनयनां पद्मस्थामुन्नतस्तनीम् ।
वरदं पुस्तकं चैव सुधाकुम्भं जपस्रजम् ॥७३॥

प्रणवः ॐ। वाग्भवं ऐं। माया ह्रीं। लक्ष्मीः श्रीं। इदमेव चतुस्तारम्। ॐ ऐं ह्रीं श्रीं अं नमः इत्यादि न्यासमन्त्रः। एतत् चतुस्तारम्। सर्वत्र कर्मादौ पठनीयस्य मन्त्रस्यादौ चतुस्तारं योजयेत्। आचमनादिसर्वकर्मसु मन्त्रादौ चतुस्तारयोगः कर्तव्यः। अत्र कर्मादौ इत्यस्य कर्माङ्गभूते इत्यर्थः। तेन कर्माङ्गभूते मन्त्रजपे एव मन्त्रादौ चतुस्तारयोगः। केवलं जपस्य तु स्वस्यैव मुख्यत्वात् कर्माङ्गत्वाभावेन तत्र मन्त्रादौ न चतुस्तारयोगः। अभिमन्त्रणादौ तु कर्माङ्गत्वेन चतुस्तारयोगः कर्तव्य एव। एककर्माङ्गेषु अनेकमन्त्रेषु प्रतिमन्त्रं च पृथक् चतुस्तारयोगः। एककर्मणि मन्त्रावृत्तौ तु सकृदेव तद्योगः। एतदुक्तं योगिनीतन्त्रे—"मन्त्रावृत्तौ सकृद्योगस्ताराणामेककर्मणि। तथा मन्त्रविभेदे तु प्रत्येकं योजयेच्छिवे॥" इति॥ ६९॥

तद्योगप्रयोजनमाह—मन्त्राणामिति। तेषां चतुर्णां बीजानां तेजोमयत्वतो ब्रह्मसूर्याग्नीषोमात्मक तेजोमयत्वात्। एतदुक्तं त्रिपुरारहस्ये—"तारं ब्रह्ममयं तद्वद् वाग्भवं सूर्यमण्डलम्। अग्नीषोमात्मकं माया लक्ष्मीश्चापि क्रमाद्भवेत्॥" इति। चतुस्तारस्य तेजोमयत्वेन तद्योगान्मन्त्राणां वीर्याधिक्यमिति भावः। चतुस्तारादिमन्त्रे तु न चतुस्तारयोगः, "त्रितार्यादिमन्त्रेषु तद्योगो नैव विद्यते" इति योगिनीतन्त्रवचनात्। अत्र त्रितारीपदं चतुस्ताराद्युपलक्षकम्। आद्यः प्रणवः। ऐं ह्रीं श्रीं इतित्रितारम्। ह्रीं श्रीं इत्यन्त्ययुग्मम्॥ ७०॥

गन्धः श। स्पर्शः र। शान्तिः ई। बहिर्मातृकां न्यसेत्॥ ७१॥

मातृकासूक्ष्मध्यानम् अमृतोद्भवा इत्युक्तम्। स्थूलं ध्यानं वक्तुमाह—तत्रेति। बहिर्मातृकान्यासादावित्यर्थः। अष्टवर्गा एवाङ्गानि यस्याः सा॥ ७२॥

जपस्रजं जपमालाम्। दधानामिति शेषः। वामाधःकराद्दक्षाधःकरान्तमाणु धानि॥

अशेषविद्यारूपां वै हृदि ध्यात्वा प्रविन्यसेत् ।
मस्तके मुखवृत्ते च नेत्रयोः श्रोत्रयोर्नसोः ।।७४।।
गण्डौष्ठदन्तयुगले जिह्वायां ब्रह्मरन्ध्रके ।
पाणिद्वये मूलमध्यमणिबन्धेषु वै क्रमात् ।।७५।।
शाखामूले तदग्रे च तद्वत् पदयुगे न्यसेत् ।
पार्श्वद्वये पृष्ठनाभिजठरेषु तथा हृदि ।।७६।।
स्कन्धयोर्गलपृष्ठे च हृदयात् पाणिपादयोः ।
नाभौ मूर्ध्नि च देवेशि क्रमादादींस्तु विन्यसेत् ।।७७।।
प्रसादपरयोर्मध्यगताः सेन्द्वखिलाक्षराः ।
मातृकाया मनुरयं स्यात्त्रिपञ्चाशदक्षरः ।।७८।।
सर्वमन्त्रमयश्चायमनेन तु महेश्वरि ।
बिलादिपादमूलान्तं व्यापकत्रितयं चरेत् ।।७९।।
तलाभ्यां निखिलाङ्गस्य स्पर्शनं व्यापकं भवेत् ।
विद्यान्यासमथो वक्ष्ये अन्तर्बाह्यविभेदतः ।।८०।।

मुखवृत्ते फालमध्याद्दक्षकपोलचिबुकवामकपोलफालमध्यान्तम् । एतदुक्तं योगिनीतन्त्रे—"फालमध्याद्दक्षतस्तु कपोलचिबुकादितः । फालमध्यान्तमेतच्च मुखवृत्तं प्रकीर्तितम् ॥" इति । दक्षादिनेत्रादिषु । नसोः नासिकयोः ॥ ७४ ॥

ओष्ठे दन्ते चोर्ध्वादि । पाणिपादपार्श्वस्कन्धद्वयेऽपि दक्षादि ॥ ७५ ॥

शाखा अङ्गुलिः । तदग्रे शाखाग्रे । तद्वत् पाणिवत् । मूलमध्यगुल्फाङ्गुलिमूलतदग्रेषु ॥ ७६ ॥

गलपृष्ठं ककुत् । हृदयात् हृदयमारभ्य । पाणिपादयोः पूर्वं क्रमेणाङ्गुल्यग्रान्तम् । नाभौ मूर्ध्नि च हृदयादिति सम्बन्धः । आदीन् अकारादीन् ॥ ७७ ॥

मातृकामन्त्रमाह—प्रासादेति । अन्तर्मातृकाध्यानोक्ता प्रासादपराहसौः । सेन्द्वखिलाक्षराः बिन्दुयुता आदिक्षान्ताक्षराणि ॥ ७८ ॥

वक्ष्यमाणव्यापकन्यासमहिमानं द्योतयितुं मन्त्रं स्तौति—सर्वेति । अनेन मातृकामन्त्रेण । बिलं ब्रह्मरन्ध्रम् । पादमूलं पादतलम् ॥ ७९ ॥

व्यापकलक्षणमाह—तलाभ्यामिति । तलं करतलम् । विद्या बालामन्त्रः ॥ ८० ॥

आधारानाहताज्ञासु रोधशक्त्युन्मनासु च ।
अथ बाह्ये पादबाहुशिखासु क्रमशो न्यसेत् ॥८१॥
नवयोनिमथो वक्ष्ये न्यासानामुत्तमोत्तमम् ।
कर्णयोश्चिबुके देवि शङ्खयोर्मुखमण्डले ॥८२॥
नेत्रयोर्नासिकायां च बाहुयुग्मे च वक्षसि ।
कूर्परद्वितये कुक्षौ जान्वोर्नाभौ वरानने ॥८३॥
पादयुग्मे तथोपस्थे पार्श्वयोर्हृदये तथा ।
स्तनद्वये कण्ठदेशे न्यसेद् बीजत्रयं पृथक् ॥८४॥
पञ्चबाणांश्च कामांश्च न्यसेदङ्गुलिषु क्रमात् ।
षडङ्गं च ततः कृत्वा व्यापकत्रितयं चरेत् ॥८५॥
चक्षुस्पर्शौ प्रतिष्ठास्थौ तौ पुनः शान्तिसंस्थितौ ।
कामराजं पादरूपे वामश्रोत्रगते मरुत् ॥८६॥
सर्वत्र बिन्दुयोगः स्यात् सर्गस्त्वन्त्ये प्रकीर्तितः ।
पञ्च बाणाः समाख्यातास्तेषां नाम शृणु प्रिये ॥८७॥

अन्तर्न्यासमाह—आधारेति । रोधो रोधिका । एतत्त्रयम् । भ्रूमध्योर्ध्वे त्रित्र्यङ्गुलान्तेऽन्तःस्थानम् । एवं षट्सु स्थानेषु मूलत्रिबीजद्विरावृत्त्या न्यसेत् ॥ ८१ ॥

शङ्खयोः फालदक्षवामोर्ध्वयोः । मुखमण्डलं वक्त्रच्छिद्रम् ॥ ८२ ॥

बाहुर्भुजमूलम् । कुक्षिर्जठरम् ॥ ८३ ॥

पादयुग्मे चरणयुग्मे बीजत्रयम् । मूलस्य अत्र हृदयवक्षसोः पर्यायत्वेऽपि वक्षसः किञ्चिदूर्ध्वे हृदयमिति सम्प्रदाय इत्युद्योते उक्तम् ॥ ८४ ॥

अत्र न्यासे विशेष उक्तो योगिनीतन्त्रे—"तत्तन्मुद्राविधानेन स्थानं मन्त्रं च देवताम् । एकं विभावयन् यस्य फलानन्तरमवाप्नुयात् ॥ इति । अङ्गुलिषु अङ्गुष्ठादिषु । षडङ्गं व्यापकं च मूलेन" इति ॥ ८५ ॥

पञ्चबाणबीजान्याह—चक्षुरिति । चक्षुः द । स्पर्शः र । प्रतिष्ठा आ । तौ चक्षुस्पर्शौ । शान्तिः ई । कामराजं मूलद्वितीयम् । पादः ब । रूपं ल । वामश्रोत्रम् ऊ । मरुत् स ॥ ८६ ॥

अन्ते सकारे । सर्गः विसर्गः । तेषां पञ्च बाणानाम् ॥ ८७ ॥

क्षोभणो द्रावणो देवि तथाकर्षणवश्यकौ ।
उन्माद इति विख्याता मायामूलद्वितीयकम् ॥८८॥

वाग्भवं तुर्यबाणश्च मरुच्छोत्रमरुद्गुणाः ।
बिन्द्वाढ्यवामनेत्रस्थाः पञ्च कामाः प्रकीर्तिताः ॥८९॥

कामो मन्मथकन्दर्पौमकरध्वज एव च ।
मीनकेतन इत्येवं तेषां नाम प्रकीर्तितम् ॥९०॥

अथ पूर्वोक्तमुद्राणां स्वरूपं क्रमतः शृणु ।
दक्षपाणितलं देवि वामपृष्ठोपरि न्यसेत् ॥९१॥

अङ्गुष्ठद्वितयं पार्श्वेऋजुरूपमधोमुखम् ।
मत्स्यमुद्रेयमाख्याता मण्डलादिप्रकल्पने ॥९२॥

ऊर्ध्वमुष्टौ दक्षहस्ते तर्जनी वक्ररूपिणी ।
मुद्रेयमङ्कुशाख्या स्यात्तीर्थाह्वानादिकर्मणि ॥९३॥

तर्जन्यादिचतुष्कं वै प्रोतं हस्तद्वयस्थितम् ।
दक्षतर्जन्यनामायां वाममध्यकनिष्ठिके ॥९४॥

पञ्चकामानाह—मायेत्यादि । मूलद्वितीयकं कामबीजम् ॥ ८८ ॥

वाग्भवं मूलाद्यम् । तुर्यबाणः ब्लूं । मरुत् स । श्रोत्रं त । मरुद्गुणः र । बिन्द्वाढ्यवामनेत्रम् ईं ॥ ८९ ॥

नामान्याह—काम इति । द्रां संक्षोभणबाणाय नमः । ह्लीं कामाय नम इत्यादि न्यसेत् ॥ ९० ॥

बामपृष्ठोपरि वामपाणिपृष्ठोपरि ॥ ९१ ॥

ऋजुरूपम् अवक्रम् । अधोमुखम् अधोमुखकरतलम् । कल्पने करणे । आदिना प्रदर्शने ॥ ९२ ॥

ऊर्ध्वमुखमुष्टौ मुष्टिनिर्गता तर्जनी वक्ररूपा । आदिः पूर्ववत् ॥ ९३ ॥

दक्षतर्जन्यां वाममध्यमादक्षमध्यमोपरितः वामानामादक्षानामोर्ध्वतः । एतदुक्तं त्रिपुरार्णवे—"वाममध्यानामिके च ऊर्ध्वस्थे दक्षयोस्तयोः" इति ॥ ९४ ॥

वामतर्जन्यनामायां दक्षमध्यकनिष्ठिके ।
अधोमुखी धेनुमुद्रा त्वमृतीकरणे मता ॥९५॥
ऊर्ध्वतो दक्षपृष्ठं तु वामपृष्ठे नियोजयेत् ।
तर्जन्यौ च कनिष्ठे च वेष्टिते तु परस्परम् ॥९६॥
मध्यमानामिके वक्रे चाङ्गुष्ठे चोर्ध्वयोजिते ।
तार्क्ष्यमुद्रेयमाख्याता निर्विषीकरणे शिवे ॥९७॥
अस्त्रं पूर्ववदेवेह रक्षणे संप्रकीर्तितम् ।
हस्तद्वयं मुष्टिरूपं ऋजुरूपा तु तर्जनी ॥९८॥
भ्रामयेद् दक्षवामाभ्यां मुद्रेयमवगुण्ठनी ।
इत्येतत् कथितं देवि द्वारपूजादिकं क्रमात् ।
रहस्यं परमं ह्येतत् किमन्यत् श्रोतुमिच्छसि ॥९९॥

इति श्रीमत्परमानन्दतन्त्रे षष्ठोल्लासः ॥६॥

दक्षमध्यकनिष्ठिके योजयेत् ॥ ९५ ॥

ऊर्ध्वतः वामहस्तयोर्ध्वतः । दक्षमणिपृष्ठम् ॥ ९६ ॥

अङ्गुष्ठे अङ्गुष्ठाग्रे । ऊर्ध्वयोजिते ऊर्ध्वाग्रतया योजिते ॥ ९७ ॥

पूर्ववत् षडङ्गन्यासवत् । इह मुद्राप्रदर्शने ॥ ९८ ॥

दक्षवामाभ्यां दक्षवामावर्तक्रमतः । षट्चरणोऽयं श्लोकः ॥ ९९ ॥

एवं बालायाः प्रातःस्मृत्यादिन्यासान्तविधिरुक्तः । तत्र प्रातःस्मृतौ सन्ध्यायां च विशेषः । पञ्चदशीप्रकरणे पञ्चदश्या उच्यते । मूलविद्यादिन्यासास्तु एते बालाया एव । पञ्चदश्यादिन्यासास्तु तत्प्रकरणे एवोच्यन्ते । स्नानविधिभूंशुध्यादिबहिर्मातृकान्यासान्तस्तु सर्वमन्त्रसाधारणो निरुक्त एवेति ज्ञेयम् ।

सौभाग्यानन्दसन्दोहेऽब्धिधीपद्यार्थबोधकः ।
परमानन्दटिप्पण्यामुल्लासः षष्ठको ह्यगात् ॥ ६ ॥

यथा रज्जूद्भवः सर्प आप्तोक्त्या तु मृषात्मकः।
अदृष्ट्वा चापरोक्ष्येण रज्जुं नैव प्रसीदति ॥८२॥
मनस्तस्माद् गुरूक्त्या वै यावदात्मापरोक्षतः।
नोपलब्धस्तावदिह भवेत् संसरणं पशोः ॥८३॥
प्रमाणेन गुरूक्त्या वा युक्त्या शास्त्रेण वाऽथवा।
सकृदात्मस्वरूपं तु स्वस्मिन् येनोपलभ्यते ॥८४॥

सम्पादकं सम्यग्यथोक्तरीत्या आश्रयेदभ्यसेत्। तद्विज्ञानं प्रवक्ष्यामीत्यादिनैतदन्तेन शाम्भवोपायो निरूपितः। तल्लक्षणमुक्तम्—"अकिञ्चिच्चिन्तकस्यैव गुरुणा प्रतिबोधतः। उत्पद्यते य आवेशः शाम्भवोऽसावुदीरितः॥" इति। गुरुणा महता पूर्णेन प्रतिबोधतो ज्ञानेन द्वैतलेशरहितेन अकिञ्चिच्चिन्तकस्य स्वात्मातिरिक्तं किञ्चिदप्यपश्यत इति तदर्थः। तन्त्रालोकेऽपि—"तेनाविकल्पसंवित्तिर्भावनाद्यनपेक्षिणी। शिवतादात्म्यमापन्ना समावेशोऽत्र शाम्भवः॥" इति ॥८१॥

तत्त्वापरोक्षस्यैवावश्यकत्वं सदृष्टान्तमाह—यथेति। रज्जौ उद्भवो भ्रान्त्याभासो यस्य। मृषात्मकः असत्यभूतः सर्पः। तुरप्यर्थे आप्तस्य यथार्थवक्तुरुक्त्या नायं सर्प इति वचनेन परोक्षतया विदितोऽपीति शेषः। रज्जुम्। अपरोक्षेण प्रत्यक्षेण चादृष्ट्वा मनो नैव प्रसीदतीति सम्बन्धः। तत्रापि जनितभयादिराहित्येन न प्रसन्नं भवतीत्यर्थः ॥८२॥

यस्मादेवं तस्माद् गुरुवाक्यादिना श्रुतस्य मननादिभिर्यावत्कालं वै निश्चयेन संशयविपर्ययराहित्येनापरोक्षेणात्मा नोपलब्धो न प्रत्यभिज्ञातः, तावत्कालम् अविद्यापाशितत्वात् पशोः, इह मनुष्यादियोनिषु सम्यक्सरणं पुनः पुनर्गमनागमनं भवेत् ॥८३॥

अपरोक्षे कारणनियमं व्युदस्य यथा कथञ्चिदपरोक्षेणैव साधिते न पुरुषार्थलाभ इति निरूपयति—प्रमाणेनेत्यादि। अत्यन्तसमाहितचित्तस्य प्रमाणेन निर्विकल्पकज्ञानेन। अत्यन्तदृढविश्वासवतो गुरूक्त्या वा। युक्त्या अति निपुणेन सत्तर्केण वा। अथवा कुतर्करहितेन भूयः परिशीलितेन शास्त्रेण। तुरवधारणे। स्वस्मिन्नेव स्वस्वरूपाभेदेनैव सर्वात्मकं सर्वजगतात्मस्वरूपं निश्चयेन संशयविपर्ययराहित्येन येन साधकेनोपलभ्यते साक्षात् क्रियते, अखिला ध्यानसमाध्यादिक्रियाः पिष्टपेषणतुल्यत्वाद्व्यर्था इति सम्बन्धः। यदुक्तम्—'एकवारं प्रमाणेन शास्त्राद् वा गुरुवाक्यतः। ज्ञाते शिवत्वे सर्वस्थे प्रतिपत्त्या दृढात्मना॥ करणेन नास्ति कृत्यं नास्ति भावनयापि च। सकृज्ज्ञाते सुवर्णे किं भावनाकरणादिना॥' इति ॥८४॥

सर्वात्मकं निश्चयेन व्यर्थास्तस्याखिलाः क्रियाः ।
सर्वदेशे सर्वदेहे सर्वकाले समात्मना ॥८५॥
परित्यक्तक्रमोपाधिसंविदात्मतया शिवः ।
येनोपलब्धस्तस्येह न कार्यमवशिष्यते ॥८६॥
अन्यैर्दृष्टं कृतमिव द्रष्टृणामेव तद् भवेत् ।
अश्वमेधसहस्राणि ब्रह्महत्याशतानि च ॥८७॥
आरूढशिवयोगस्य नेषत्स्पृशति कुत्रचित् ।
शिवात्मरूपं सर्वेषां भासते सर्वदैव हि ॥८८॥

एवंविधात्मस्वरूपं न सकृच्छ्रवणादिना बुद्धिभूवं निष्प्रकम्पत्वेनावतरत्यतोऽत्र भूयोऽभ्यासो विधेय इति द्योतयितुं तमेवार्थमीषद्भङ्ग्यन्तरेण पुनर्निरूपयति—सर्वदेश इति । सर्वदेशादौ । समात्मना अविशेषरूपेण । अद्वितीयसंविदात्मकत्वेनेति यावत् ॥८५॥

एतदेव स्पष्टमाह—परित्यक्तेति । परितस्त्यक्तः सर्वथाऽसंस्पृष्टकालदेशक्रमाद्याधायक उपाधिर्येन । कालादिक्रमसमर्पकविषयच्छायानाच्छुरित इति यावत् । एवंविधशुद्धसंविदात्मत्वेन शिवः परमेश्वरो येनोपसमोपे स्वात्मरूपे लब्धः प्रत्यभिज्ञातः, तस्य प्राप्तपरपुरुषार्थत्वेन कृतकृत्यत्वान्न कार्यमवशिष्यते ॥८६॥

नन्वेवंविधानामपि शारीरमशनशयनगमनादिरूपमन्यच्च कर्म दृश्यते, तत्कथमिति चेदाह—अन्यैरिति । अन्यैरप्राप्तात्मतत्त्वैः पशुभिर्दृष्टं कृतमिव कर्मेव यत्किञ्चित् तद् द्रष्टृणामेव भवेत् । यथा भ्रमन्नेत्रस्य तरुशिखरादिभ्रमणम्, यथा वा रथाद्युपविष्टस्य क्षिप्रतरयायिनस्तरुशिखरादियानं स्वनिष्ठमेवं परयोगिनोऽननुसन्धानेन संस्कारमात्रेण निर्वृत्तकर्मणां तत्फलजननासमर्थानां कृततुल्यत्वमेव । मयेदं कर्म कृतमित्याद्यनुसन्धानाभावात्तदन्तःकरणभूम्यनारोहेण न तत्र योगिनः सम्बन्धः । अनेनेदं कृतमित्यनुसन्धानादयोग्यन्तःकरणारोहादयोगिनस्तत्र सम्बन्ध इति भावः । अत एवाह—अश्वमेधेत्यादि ॥८७॥

आ अभिव्याप्य रूढः रूढिं प्राप्तः विपर्ययेण बाधसम्भावनारहितः । शिवे अद्वयसंवित्स्वभावे योगः समाधिश्चित्तविश्रान्तिर्यस्य, तस्य कुत्रचिद्देशे काले वा अश्वमेधसहस्राद्यात्मकं कर्म ईषत् स्वल्पमपि न स्पृशति फलदानेन न तत्सम्बन्धो भवतीत्यर्थः । अयमाशयः—कर्मकर्तुः स्वोचितं फलम् ईश्वरो नियतिशक्तिनियमितं ददाति । प्रोक्तशिवयोगिनोऽद्वयसंविन्मात्रशरीरत्वेन तथाविधस्य करचरणादिस्पन्दनात्मककर्मणि

न प्रज्ञातं तु पशुभिस्तस्मात् प्रज्ञापको गुरुः ।
शास्त्रादिकं च नित्यात्मज्ञानत्वादेव सुस्फुटम् ॥८९॥
अप्रज्ञातसुवर्णेन पुरुषेणासकृत्तु तत् ।
दृष्टं प्रज्ञायते नैव यथाभूतं सुवर्णकम् ॥९०॥
आप्तोक्त्या तु तदेवाद्धा सम्यक् प्रज्ञायते जनैः ।
तस्मात् प्रज्ञापकं शास्त्रं गुरुर्वा परमेश्वरि ॥९१॥

कर्तृत्वस्यासम्भावना । देहस्य तु जडस्येच्छादिघटितकर्तृत्वं वा सुखाद्यनुभवरूपफलं वा दूरापास्तमिति निरुक्तयोगिकृतं कर्म न तस्य किञ्चित् फलमादधाति । अन्येषां द्रष्टृणां शुभचित्तानां तन्निषिद्धकर्मसूदासीनानां सुकर्मस्वनुमोदकानां "कर्ता कारयिता चैव प्रेरकश्चानुमोदकः" इत्यादिवचनाच्छुभकर्मफलम् । अशुभचित्तानां तच्छुभकर्म- स्वसूयावतामशुभकर्मसु परीवादपराणामशुभफलमिति । यदुक्तम्—"सुहृदः साधु- कृत्यानि दुष्कृत्यानि च दुर्हृदः । विभज्य योगी प्राप्नोति परमं पदमच्युतम् ॥" इति । नन्वेवमभ्यासात् पूर्वमद्वयसंवित्स्वभावः प्रकाशते न वा ? आद्येऽभ्यासादि- वैयर्थ्यम् । द्वितीये तथाविधात्मनः प्रकाशरूपताहानिरित्याशङ्कां निरसितुमुपक्रमते— शिवात्मेति । अद्वयसंवेदनस्वभावशिवात्मकमात्मरूपं हि निश्चयेन सर्वदैव सर्वेषां प्रमातृणां भासत एव ॥८८॥

ननु तर्हि किं साधनैरभियाच्यते इत्याशङ्क्याह—न प्रज्ञातमिति । तुरवधारणे । भातमपि पशुभिरहं सोऽस्मीति न प्रज्ञातमेव । यत एवं तस्माद् गुरुः स्वरूपप्रज्ञापको न तु भासकः । शास्त्रादिकं च प्रज्ञापकमेव । आदिना सद्युक्तिः । अत्र हेतुः—नित्येत्यादि । नित्यम् आत्मभूतत्वाज्ज्ञानरूपत्वाच्च । आत्मत्वेन नित्यसिद्धस्य ज्ञानत्वेन नित्यभातस्य न शास्त्रादिकं साधकं भासकं वेति भावः । सुस्फुटं न प्रज्ञातमित्यन्वयः ॥८९॥

ननु भासते न प्रज्ञातं चेति विप्रतिषिद्धमित्याशङ्कां व्यपोहितुं सदृष्टान्तं तदुप- पादयति—अप्रज्ञातेति । प्रकर्षेण तत्तच्छब्दयोजनेनेदं सुवर्णमिति ज्ञातं प्रज्ञातम् । न प्रज्ञातं सुवर्णं येन स अप्रज्ञातसुवर्णः । एवंविधेन पुरुषेण । तुरप्यर्थे । असकृद् भूयः । इदं किञ्चिदिति दृष्टमपि तत्सुवर्णं यथाभूतं सत्यात्मकं नैव प्रज्ञायते ॥९०॥

तदेव सामान्येन ज्ञातं सुवर्णमेव । आप्तस्य यथार्थवक्तुः । इदं सुवर्णमित्युक्त्या सम्यक्संशयविपर्ययराहित्येन इदं सुवर्णमिति विशेषतः साक्षात् प्रज्ञायते । यस्मादेवं लोके भातस्यापि प्रज्ञातत्वं न, तस्मात् शास्त्रं गुरुर्वा भातस्यैव प्रज्ञाने कारण- मिति ॥९१॥

समानसत्त्वरजसा पुरुषेण गुरूक्तितः ।
न प्रज्ञायते यस्माद्धै तस्माद्योगं समाश्रयेत् ॥९२॥
श्रुतो मनोहरः कान्तो सकृत् प्रज्ञायते न तु ।
यदा तदाऽपूर्णकामा निरानन्दैव सा शिवे ॥९३॥
तमेव सा तदानीं च प्रज्ञाय हितवाक्यतः ।
पूर्णानन्दमयं भावं यथाप्नोति भवेत्तथा ॥९४॥
अद्वयं शिवमात्मानमप्रज्ञाय गुरूक्तितः ।
जनः शोकहतो नित्यं यथा वै विस्मृताकरः ॥९५॥
आत्मानन्दमयः सर्वप्रियहेतुत्वतः शिवे ।
भारादित्यागसुव्यक्तसुस्वात्मत्वाच्च शङ्करि ॥९६॥

एवं सामान्येन भासमानमात्मतत्त्वं गुरूक्त्या समानसत्त्वरजसा प्रागुक्तलक्षणेन पुरुषेण न प्रज्ञायते, अयमहं शिवोऽस्मीति न प्रत्यभिज्ञायते यस्मात्, तस्मात् स योगं वक्ष्यमाणं शास्त्रोपायरूपं सम्यक्फलप्राप्त्यन्तमाश्रयेत् ॥९२॥

ननु सामान्येनात्मनो ज्ञानस्य फलादधिकं प्रज्ञानफलं न किञ्चिदित्याशङ्क्य तद्विशेषफलं सदृष्टान्तं निरूपयति—श्रुत इति । कयाचित् कामिन्या कश्चनातिसुन्दरो मनोहर ईदृशातिसुन्दरस्वरूपवानिति सखीवचनश्रवणेन भूयः परोक्षेण ज्ञातोऽपि यदा न प्रज्ञायत एव अपरोक्षेण न ज्ञात एव । सा कामिनी तद्दर्शनोत्कण्ठितान्तरङ्गा तदा असकृत् परोक्षेणापि तद्दर्शनकाममनवाप्य तत्सुखानुभवविधुरैव भवति ॥९३॥

तमेव कालान्तरेऽकस्माद् दृष्टिगोचरमप्युपलभ्य सा कामिनी तेन सप्रेमभावं भाषिता संस्पृष्टा परिष्वक्तापि विशेषेण तमविदुषी तत्सुखमलभमानैव तदानीमेवाकस्मादयं मनोहरः स यस्त्वया चिराद्दिदृक्षित इति स्वस्यात्यन्तहितवाक्यश्रवणेन तमेव सविधवर्तिनं सोऽयं यो मया द्रष्टुं चिरादभिलषित इति प्रज्ञाय पूर्णानन्दमयं भावं चित्तं सा कामिनी यथाऽऽप्नोति, तथा प्रकृतेऽपि भवेत् ॥९४॥

तदेवं प्रकृते योजयति— अद्वयमिति । अद्वयं शिवं स्वात्मभूतमपि गुरुवचनादिना स एवाहमित्यप्रत्यभिज्ञाय जनो जननमरणधारासमारूढो नित्यमनादिकालादेतत्क्षणावधि शोकेन दुःखेन हतो हिंसितो भवति । अत्र दृष्टान्तः—यथेति । विस्मृतः स्वनिहिताकरो येन । यथा स्वेन निक्षिप्तामूल्यानन्तरत्नविस्मरणेनैकैकवराटकभिक्षणेनातिदुःखितः कश्चिद्दैवहतः ॥९५॥

प्रकृते स्वस्वरूपप्रज्ञानस्य मोक्षरूपं फलमुक्तम् । तच्च वेद्यसुखरूपं चेद्यदि तदनित्यं तर्हि पुनः संसारप्रसक्तिर्यदि नित्यं तर्हि द्वैतप्रसङ्ग इत्याशङ्क्य मोक्षात्मकं

अकारणेन सौषुप्ते सुखरूपोपलम्भतः ।
तथा न दुःखं देवेशि यस्मात् तत्तु सहेतुकम् ॥९७॥

सुखमात्मरूपमेवेत्याह—आत्मेति । आत्मा आनन्दमयः आनन्दैकरूपः । कुत इति चेदाह—सर्वेति । सर्वेषां प्राणिनाम् अन्यत्र प्रियबुद्धौ हेतुत्वात् । आत्मार्थमन्यत्सर्वं प्रियं यस्मादिति यावत् । "आत्मनोऽर्थं प्रियं सर्वं पुत्रमित्रकलत्रकम्" इत्युक्तेः । लोके हि तृप्त्यर्थमोदनं प्रियमिति ओदनात्तृप्तेः प्रियतरत्वम्, तृप्तिरपि स्वात्मसुखाय प्रियमिति स्वात्मसुखं प्रियतमम्, सुखमपि स्वात्मार्थमिति स्वात्मैवातिप्रियतमः । आत्मा न कस्याप्यर्थेऽपेक्ष्यत इति न ततः किञ्चिदधिकं प्रियम् । न चात्रात्मनः सुखमित्यात्मनः सुखस्य भेद इति वाच्यम्, यतस्तत्सुखमनुकूलसंवेदनीयम् । यद्विरागत्मरणमपि क्लेशावहम् । स्पष्टं चैतल्लोके सुखसाधनस्यापि कान्ताकनकादेर्वियोगस्मरणं दुःखावहमिति । नहि कस्यचित् सुखं मे मा भूत संप्राप्तं सुखं वा निवर्ततामित्यभिलाषः । एवं चात्मस्वरूपस्य भवननिषेधो निवृत्तिर्वा न केनचिदिष्यत इति सुखरूपत्वमात्मनः, प्रियेषु पर्यवसानभूतस्यैव सुखरूपत्वौचित्यात् । तस्यैव परमफलत्वादात्मैव सुखरूपः । आत्मनः सुखमिति तु राहोः शिर इत्यादिवन्नेयम् । नन्वात्मनः सुखरूपत्वं नानुभवसिद्धमित्याशङ्क्याऽस्तीत्यनुभवमेव प्रदर्शयति—भारादीति । मस्तकसमूढात्यन्तभारादित्यागेन सुष्ठु संशयादिराहित्येन व्यक्तमनुभूतं सुखात्मत्वं यस्य । आदिना गाढव्यापारादिसंग्रहः । न च भारादित्यागेन सुखमुत्पद्यत इति वाच्यम्, भारत्यागस्याभावत्वेन भावकारणत्वासम्भवात् । न च धननाशेन दुःखोत्पत्तेरानुभविकत्वादभावाद्भावोत्पत्तिः प्रामाणिकीति वाच्यम्, यतस्तत्र धननाशो न दुःखहेतुः, किन्तु तद्धनसाध्यत्वेन संभाविताागामिसुखाभावसंभावनयैव दुःखोत्पत्तेः, अन्यथा धननाशाज्ञानदशायामपि दुःखप्रसक्तेः । न चैवं भारादित्यागस्थले तत्स्मरणादेः सुखहेतुत्वमानुभविकम् । तस्मात्तत्सुखं स्वभावभूतमेव ॥९६॥

तुष्यतु दुर्जन इति न्यायेनाभावस्य हेतुत्वमभ्युपेत्याह—अकारणेनेति । सौषुप्ते सुषुप्त्यवस्थायाम् । अकारणेन कारणं विनैव सुखात्मकस्वरूपोपलम्भात् । तत्र सुखमहमस्वाप्सं न किञ्चिदवेदिषमिति सर्वानुभवः । तत्र न किञ्चिदवेदिषमिति कारणाभिमतस्य न कस्याप्युपलब्धिः । न च ज्ञानसामान्याभावस्यैव तद्धेतुत्वमिति वाच्यम्, पाषाणादावतिव्याप्तेः । न किञ्चिदवेदिषमिति ज्ञानेन ज्ञानसामान्याभावासिद्धेश्च । नन्वेवं दुःखमप्यात्मरूपं कुतो नेत्याशङ्क्याह—तथेति । दुःखं तथा आत्मरूपं न । यस्माद् दुःखं सहेतुकम् अभिघातादिकारणजन्यम् । इदमत्र तात्पर्यम्—सुखं दुःख च प्राणिनां भासते । तत्र सुखं सुषुप्त्यादौ स्वरूपातिरिक्तनिमित्तसामान्याभावे सति भासत इति स्वात्मरूपमेव सुखम् । दुःखं तु स्वातिरिक्तनिमित्तपूर्वकं भासत इति न स्वरूपम् । न

प्रज्ञाततत्त्वस्यानन्दाविर्भावो भवतीश्वरि ।
यावदानन्दमयता नोदेति पुरुषस्य तु ॥९८॥
समसत्त्वरजस्कस्य तावद् योगं समाश्रयेत् ।
योगोऽपि बहुधा प्रोक्तस्तन्त्रभेदेषु शङ्करि ॥९९॥

च यदि सुखं स्वरूपं तर्हि स्वात्मनः संवेदनैकरूपत्वेन सुखस्यापि तावन्मात्रतायां संवेदनस्य सदा भासमानत्ववत् सुखस्य कुतो न भासमानत्वमिति शङ्क्यम् । यथा कामिलारोगहतस्य श्वेतात्मकशङ्खग्रहणेऽपि श्वैत्याग्रहणवत् प्रकृतेऽपि भेदवासनादोषेण संविद्रूपावभासेऽपि सुखात्मतानवभासादिति ॥९७॥

तस्मात् प्रज्ञातशिवात्मतत्त्वस्य प्रमातुरानन्दस्याविर्भावोऽवभासनं भवति, भेदवासनाविगलनात् । तस्मात् समसत्त्वरजस्कस्य पुरुषस्य यावदमन्दमयता नोदेति नावभासते । तुरवधारणे । तावद्योगमेव समाश्रयेदिति सम्बन्धः ॥९८॥

एवं च समसत्त्वरजस्केन आनन्दमयत्वं यावत् स्वात्मनो न भासते तावद्वक्ष्यमाणयोगस्याभ्यासः कर्तव्यः । तदानन्दमयताभासनं नाम भेदाप्रथनपूर्वकस्वरूपप्रथनात्मकाद्वितीयस्वरूपप्रथनमेव । न ततोऽधिकं किञ्चित् । तस्यानन्दरूपत्वं चानुकूलवेदनीयत्वेन सर्वस्पृहणीयत्वात् । एतदुक्तमनुत्तराष्टके—"आनन्दोऽत्र न मद्यवित्तमदवन्नैवाङ्गनासङ्गवद्दीपार्केन्दुकृतप्रभाप्रकरवन्नैव प्रकाशोदयः । हर्षः संभृतभेदमुक्तिसुखभूर्भारावतारोपमः सर्वाद्वैतपदस्य विस्मृतिनिधिप्राप्तिः प्रकाशोदयः ॥" इति । अत एव सर्वद्वैतप्रथाशून्यात्मकसुषुप्तौ तिरश्चामपि प्रवृत्तिः । परिचितसमाध्यवस्थानां तु स्पष्टतरमेवैतत् । ननु प्रियापरिष्वङ्गदशासमुपलब्धसुखं सुषुप्तिसुखादधिकम्, यतस्तदर्थं सुषुप्तिमपि परित्यजतीति विषयसुखमात्मसुखादधिकमिति चेच्छृणु—तदपि सुखं स्वरूपभूतमेव । यथा गाढवटच्छायासमाश्रितपुरुषानुभूयमानतच्छैत्यगुणाद् ग्रीष्मातपसंतप्ततनुः सद्यस्तच्छायासमाक्रमणेन तमेव शैत्यगुणमत्यन्तमधिकतममनुभवति, एवं तदेव सुखमधिकतमत्वेन भासतेऽनङ्गदहनावलीढवपुषः । अत एव वनितालिङ्गनसुखमपि तद्भर्तुः शतगुणोत्तरमनुभवत्यन्यश्चिरकालसंप्रार्थितप्रथमपरीरम्भे । ततः स एव द्वितीयादिपरीरम्भेषु मन्दतरं मन्दतममेव सुखमुपलभते । यदुक्तं गोवर्धनाचार्यैः—"सुरतं तदेव सुरतं कृच्छ्राल्लब्धं यदन्यनारीषु" इति । ननु यदि कान्तालिङ्गनजमपि सुखमात्मसुखं तर्हि मुमुक्षूणां बहुप्रयाससाध्यस्तदनुभवो विषयेणापि सिद्ध्यति कथं विषयिणाम्, सिद्धस्य वा तस्य कुतो न पुरुषार्थरूपत्वम् ? इति चेदुच्यते—पुरुषस्येदं मे स्यादिदं मे स्यादिति सूक्ष्मकामवासनाकण्टकसहस्रसमाविद्धवपुषस्तत्रकतरविषयप्राप्तिसम्भावनासमुदिततत्कामनाप्रौढानलज्वालाप्लुष्टस्य सामान्यवासनाकण्टकवेधव्यथा कृशीभवति, यथा गाढानलदग्धाङ्गस्य पूर्वस्थितकण्टकव्यथा तदा प्रकृतप्रोद्भूततीव्रकामानलस्य विषयप्राप्त्योपशमे

तत्सारमत्र संगृह्य वदामि शृणु संयता ।
यदा सकृत् श्रुता नाथवक्त्रादपि महेश्वरि ॥१००॥
नान्तर्निरूढिमायाति तत्रोपायत्रयं शृणु ।
सत्सङ्गपूर्वकोऽभ्यासो गुरूक्तार्थस्य शङ्करि ॥१०१॥

तत्कालेऽन्यवासनानामभिभूतत्वेन प्रौढतरकामाग्नेरुपशमादर्चि द्युतिद्योतितमाणिक्यवत् क्षणमात्रं तदात्मसुखं भासते। ततः कामान्तरोद्भवेन स्वरूपं पुनराच्छादितं भवति । तत्परिज्ञानाभावेनापुरुषार्थत्वमिति । यदुक्तं स्पन्दे—"निजाशुद्ध्यासमर्थस्य कर्तव्येष्वभिलाषिणः । यदा क्षोभः प्रलीयेत तदा स्यात् परमं पदम् ॥" इति । एवं च सर्ववासनात्यागेनैव सुखात्मस्वरूपोपलब्धिरिति सिद्धम् । तदेतद् गीत भगवतापि—"प्रजहाति यदा कामान् सर्वान् पार्थ मनोगतान् । आत्मन्येवात्मना तुष्टः स्थितप्रज्ञस्तदोच्यते ॥" इति । श्रीभागवतेऽपि—"एवं प्रसन्नमनसो भगवद्भक्तियोगतः । भगवत्तत्त्वविज्ञानं मुक्तसङ्गस्य जायते ॥" इति । वासिष्ठेऽपि—"समाधिमथ कर्माणि मा करोतु करोतु वा । हृदयेनास्तसर्वाशो मुक्त एवोत्तमाशयः ॥" इति । तथा—"यथाऽभ्रलेखा शशिनं सुधालेपं मषी यथा । दूषयत्येवमेवान्तर्नरमाशापिशाचिका ॥" इति । त्रिपुरारहस्येऽपि—"चैतन्यं निहितं चित्तकरण्डेऽतिसुनिर्मले । अनन्तवासनापङ्कमग्नं नैवोपलक्ष्यते ॥" इति । एवं सुखात्मतां प्रसाध्य योगं वक्तुमुपक्रमते—योग इति । कर्मवद्योगोऽपि बहुधेत्यर्थः । योगश्चित्तस्य निग्रहः । तत्साधनमपि प्रकृते योग इत्युच्यते । तन्त्रभेदेषु तन्त्रान्तरेषु ॥९९॥

तेषां तन्त्रान्तरेषु प्रोक्तानां योगानां मध्ये सारभूतम् अल्पायासे शीघ्रफलदम् । अत्रास्मिन् त्वया पृष्टे परमानन्दसंज्ञिते तन्त्रे । संगृह्य संक्षेपरूपेण कृत्वा । एतस्य सारभूतत्वात् संयता समाहितचित्ता शृणु । तमेव योगमागमेषु शाक्तोपायत्वेन प्रसिद्धं वक्तुं तद्विभजनेनोद्देष्टुमारभते—यदेति । तल्लक्षणमुक्तम्—'उच्चाररहितं वस्तु चेतसैव विचिन्तयत् । य समावेशमाप्नोति शाक्तः सोऽत्राभिधीयते ॥" इति । उच्चाररहितं वागविषयं चेतसा चिन्तनं ध्यानमिति तदर्थः । तन्त्रालोकेऽपि—'अभिमानेन संकल्पाध्यवसायक्रमेण यः । शाक्तः समायोपायोऽपि तदन्ते निर्विकल्पकः ॥" इति । अभिमानादिकं मनोमात्रव्यापारः । समायः सभेदो विकल्पभूतः । तस्यान्ते फलभूतो निर्विकल्पक इति तदर्थः । यदा असकृत् श्रुतापि सा संविद्रूपत्ता अन्तर्निरूढिं नायातीति सम्बन्धः ॥१००॥

अन्तः चित्तभूमौ । निरूढिं नायाति अपरोक्षनिश्चयभूमिं नावतरति । तदा तत्रोपायत्रयं क्रमेणापरोक्षनिश्चयसम्पादकं वक्ष्यमाणं शृणु । ते चोपाया अभ्यासमनोनिरोधप्राणनिरोधरूपाः । तत्राद्यमाह—सत्सङ्गेति । सत्सङ्गः पूर्वो यस्य । सतां सेवनादि

पुनः पुनस्तदावृत्तिः स्वीयबुद्ध्या विशुद्धया ।
अभ्यास इति सम्प्रोक्तः क्रमात् सिद्धिमवाप्नुयात् ॥१०२॥
अनेनासंस्थितप्रज्ञो मनोरोधं समाश्रयेत् ।
तत्रोपायास्तु शतशः प्रोक्तास्तन्त्रेषु सर्वतः ॥१०३॥
तीक्ष्णवैराग्ययोगेनाप्यभ्यासेन तु साधयेत् ।
मनसश्चलनं द्वेधा रसात् स्वाभाव्यतोऽपि च ॥१०४॥
मनसश्चञ्चलत्वे तु न प्रज्ञायेत किञ्चन ।
यथा चलज्जलस्थेन्दुबिम्बं प्रज्ञायते न च ॥१०५॥

कुर्वन् तैरुच्यमानमर्थं पुनः पुनरभ्यसेदावर्तयेदिति । सत्सङ्गफलमुक्तं वासिष्ठे—'सदा सन्तोऽभिगन्तव्या यद्यप्युपदिशन्ति नो । या हि स्वैरकथास्तेषामुपदेशा भवन्ति ताः ॥" इति ॥१०१॥

अभ्यासस्वरूपं निरूपयति—पुनः पुनरिति । तस्य सज्जनैरुपदिष्टस्यार्थस्य आवृत्तिर्बुद्ध्या परिशीलनम् । कथंविधया बुद्ध्या ? विशुद्धया अश्रद्धासन्देहादिरहितया । एवमावृत्तिरेवाभ्यासः । एवमभ्यासेन ज्ञानसिद्धिं क्रमेण प्राप्नुयात् ॥१०२॥

एवम् उक्ताभ्यासेन । न संस्थिता सिद्धा प्रज्ञा अपरोक्षरूपा यस्य । मनसो रोधं वक्ष्यमाणक्रमेण सम्यक्फलपर्यन्तमाश्रयेत् । तत्र मनोरोधे । सर्वतः सर्वत्र तन्त्रेषु प्रोक्ताः । अत्र तत्सारं प्रोच्यत इति शेषः ॥१०३॥

तदेवाह—तीक्ष्णेति । वैराग्यलक्षणमुक्तं श्रीपतञ्जलिना—'दृष्टानुश्रविकविषयवितृष्णस्य वशीकारसंज्ञं वैराग्यम्" इति । दृष्टेषु श्रुतेषु विषयेषु तृष्णाराहित्येन विषयतत्परत्वाभावाद्वशीकाराख्यं वैराग्यमिति तदर्थः । एतद्भेद उक्तोऽन्यत्र—"विषयेषु विनष्टेषु तत्काले या विरागता । सा मन्दा मध्यमा सैव स्थिरा यदि विरागता ॥ दोषबुद्ध्या सत्सु तेषु तीव्रा सा स्याद्विरागता ॥" इति । तीक्ष्णं तीव्रं यद्वैराग्यं तस्य योगेन संस्काररूपस्य धारणेन, अविस्मरणेनेति यावत् । अपिः समुच्चये । अभ्यासेन च साधयेदित्यर्थः । पतञ्जलिनाऽप्युक्तम्—"योगश्चित्तवृत्तिनिरोधः", "अभ्यासवैराग्याभ्यां तन्निरोधः" इति । भगवताऽपि—"अभ्यासेन तु कौन्तेय वैराग्येण च गृह्यते" इत्युक्तम् । अभ्यासवैराग्याभ्यां मनोरोध उक्त एव । तत्राभ्यासवैराग्ययोर्मनोरोधे विविच्योपयोगं वक्तुमादौ मनसो निरोधनेन फलजननप्रकारमुपपादयति—मनस इति । द्वेधा द्विप्रकारं चलनम् । रसाद्रागाच्चलति अतिसुन्दरमिदं प्रियावदनमित्यादि प्रीत्या सुखादिविषयेषु प्रवर्तते । स्वाभाव्यतः प्रीतिविषयत्वाभावेऽपि कतीमे पक्षिण आकाशे उत्पतन्तीति गणनायां प्रवर्तते ॥१०४॥

एवं मनसो द्विविधे चञ्चलत्वे स्थिते एव । किञ्चन स्वल्पं शास्त्रार्थादिकमपि

स्थिरे प्रज्ञायते सम्यक् तथैवात्मा मनोभुवि ।
स्वर्भानुः खे यथाऽलक्ष्यो लक्ष्यते विधुमण्डले ॥१०६॥
चित्तादर्शे तथैवात्मा लक्ष्यते निर्मलेऽचले ।
चेत्योन्मुखी तु चिच्छक्तिश्चित्तमित्यभिधीयते ॥१०७॥
चेत्योन्मार्जनयोगेन चित्तं सम्यक् प्रसादयेत् ।
तदेव तत्पदं देवि चित्तं यस्मिन् प्रसीदति ॥१०८॥

न प्रज्ञायत एव किं वक्तव्यमात्मा न प्रज्ञायत इति । अत्र दृष्टान्तमाह—यथेति । इन्दुबिम्बं निजवृत्तादिरूपेण न प्रज्ञायते ॥१०५॥

स्थिरे जले सम्यग् वृत्तादिरूपेण प्रज्ञायते, तथैव स्थिरायां मनोभुवि आत्मा सम्यक् प्रज्ञायते । नन्वात्मनो विभुत्वे सति तस्य प्रज्ञानं मनस्येव कुत इत्याशङ्कां दृष्टान्तनिरूपणेन निवारयति—स्वर्भानुरिति । स्वर्भानुः राहुः । खे केवले आकाशे । अलक्ष्योऽपि यथा विधोश्चन्द्रस्य मण्डले लक्ष्यते ॥१०६॥

तथा निर्मले कामादिरूपमलरहिते अचले वासनाविलयेन स्थिरे आत्मा लक्ष्यते । ननु स्वर्भानोस्तमोमयत्वेन केवलमनुपलब्धस्य प्रकाशरूपचन्द्रमण्डलाश्रयेण तदाच्छादकत्वेनोपलब्धिरुचिता, आत्मनः प्रकाशैकरूपत्वेन कथं मनस्येवोपलब्धिरित्याशङ्कानिरासाय मनस एवादौ स्वरूपमाह—चेत्येति । मनश्चित्तमिति पर्यायः । संविदात्मनो जडव्यावृत्तं स्वरूपस्फुरणात्मकविमर्शनसामर्थ्यं यदस्ति सा चिच्छक्तिः । तस्याः स्वरूपमात्रनिष्ठता पूर्णाहंभाव उच्यते । स्वातन्त्र्याख्यमायाशक्त्या यद्विभिन्नमवभास्यते तच्चेत्यं विषयः । यदा सा चिच्छक्तिर्मायया परिच्छिन्नस्वरूपाश्रिता चेत्यविमर्शनायान्तःक्रियात्मकसंरम्भवती तदा सा संरम्भाख्या क्रियैव चेत्योन्मुखत्वम् । एवं चेत्योन्मुखी चिच्छक्तिरेव चित्तम् । एतदुक्तं वासिष्ठे—'असम्यग्दर्शनं यत् स्यादनात्मन्यात्मभावनम् । यदवस्तुनि वस्तुत्वं तन्मनो विद्धि राघव ॥" इति ॥१०७॥

एव मनसः स्वरूपमभिधाय तन्निरोधप्रकारमाह—चेत्येति । चेत्यस्य नीलसुखादेर्विषयस्य प्रतिबिम्बकल्पतयाऽन्तरुल्लिखितस्योन्मार्जनमनुल्लेखनम् । एतद्रूपेण योगेन मनोनिरोधोपायेन चित्तमुक्तलक्षणं मनः । सम्यग् व्युत्थानसंस्कारहानेन प्रसादयेत् प्रसन्नं स्थिरं चाञ्चल्यरहितं कुर्यात् । एवं क्रियमाणे चित्तं यस्मिन् प्रसीदति, यस्मिन् चाञ्चल्यरहिते स्थिरे रूपे प्रकर्षेण सीदति स्थितं भवति, चाञ्चल्यं परित्यज्य यत्स्थिररूपं प्राप्नोति, तदेव तत्पदम् अपारोक्षाख्यं स्वरूपमित्यर्थः । तदुक्तं वासिष्ठे—"दृश्यं नास्तीति बोधेन मनसो दृश्यमार्जनम् । सम्पन्नं चेत्तदा राम परा निर्वाणनिर्वृतिः ॥"

अप्रसन्नं तु तच्चित्तं संसारतरुकारणम् ।
वासनामलिनाच्चित्तात् संसारतरुरुद्गतः ॥१०९॥
बहुशाखापल्लवोद्यत्पुष्पसंघविराजितः ।
फलामोदसमाहूतेन्द्रियषट्पदमण्डितः ॥११०॥
संशोषयेदादितरुं वैराग्यग्रीष्ममारुतैः ।
दोषदृष्टिद्विजिह्वौघदंशनिर्गतजीवनम् ॥१११॥
विचारशाणनिशितज्ञानखड्गेन खण्डितम् ।
संदह्य विज्ञानाग्निना शुभ्रभस्मावशेषितम् ॥११२॥

इति । एवं च परित्यक्तचाञ्चल्यं यन्मनस्तदेवात्मरूपं सम्पद्यते । चित्तादर्शे आत्मा लक्ष्यत इति तु स्थूलदृशोक्तमिति ॥१०८॥

तच्चित्तमेवाप्रसन्नमस्थिरं बहिर्मुखं सत् संसाराख्यस्य तरोः कारणं बीजभूतम् । यदुक्तं वासिष्ठे—"चित्तं कारणमर्थानां तस्मिन् सति जगत्त्रयम् । यस्मिन् क्षीणे जगत्क्षीणं तच्चिकित्स्यं प्रयत्नतः ॥" इति । एवंविधचित्तकारणकस्य संसारस्य वृक्षरूपकत्वेन तन्निरसनोपायमभिदधाति—वासनेति । शुभाशुभकर्मवासनाभिर्मलिनादनात्माकाराच्चित्तात् संसाररूपतरुरुद्गतो बहिर्निर्गतो विभेदेन भातः ॥१०९॥

तत्र संसारो देहादिदृश्यावभासरूपस्तरुः । बह्व्यो देहप्राणादिष्वहन्तारूपाः शाखाः । मित्रपुत्रादिषु ममतारूपाः प्रवालाः पल्लवाः । तत्रोद्यन्त्युदयं प्राप्तानि तदर्थं सम्पादितगृहपशुधनादिषु ममतारूपाणि पुष्पाणि । तेषां संघैर्विराजितः । गृहादिसुखभोगः फलम् । तद्भोगवासना आमोदः । तेनाहूता आकृष्टा इन्द्रियरूपाः षट्पदास्तैर्मण्डितः ॥११०॥

एवंरूपं संसारतरुम् । आदिभूतमनादिम् । वैराग्यरूपा ये ग्रीष्मकालिका मारुताः, तैः सम्यक् शोषयेत् । वैराग्ये सति दृश्यावभासस्य नीरसत्वे कृशीभावो युक्त एव । एवं वैराग्येन कृशीभूतस्य पुनर्विषयदर्शनवृष्ट्या प्ररोहः सम्भवतीत्यभिप्रायेणाह—दोषेति । अयं देहो रुधिरास्थिचर्ममयो मलमूत्रपूर्णः, पुत्रमित्रधनादिकं नष्टं सन्महादुःखकरं विद्यमानमपि नाशादिभययुतमित्यादिदोषदृष्टय एव द्विजिह्वास्तेषामोघः समुदायः; तेन दंशो दंशनं तेन निर्गतं जीवनं जीवितम् अध्यात्मवायुसम्बन्धो यस्य । दोषदृष्ट्या वैराग्यस्य तीव्रतायां मृतवृक्षवत् संसारावभासो न प्ररोहति न प्रवर्तयतीति भावः ॥१११॥

एवंविधशुष्कवृक्षसत्त्वेऽपि कालान्तरे तल्लग्नशुष्कबीजेन वृक्षान्तरोत्पत्तिशङ्कयाऽऽह—विचारेति । गुरुवाक्यशास्त्रादिजन्यबोधो ज्ञानम् । विचारः युक्तिभिरनुचि-

राजज्जगच्चक्रदेहं स्वात्मारामं महेश्वरम् ।
एवं वैराग्ययोगेन रसानशेन साधयेत् ॥११३॥
चलच्चित्तं स्वभावेन अभ्यासेनैव साधयेत् ।
वासना विविधाः सर्वा वैराग्येण विनाशयेत् ॥११४॥
स्वभावचलनं देवि अभ्यासेनैव साधयेत् ।
सुखे वैषयिके दोषदर्शनात् सततं शिवे ॥११५॥

न्तनरूपं मननम् । स एव शाणः शस्त्रतीक्ष्णीकरणोपलखण्डः, तेन निशितेन तीक्ष्णीकृतेन संशयविपर्ययहीनज्ञानखड्गेन खण्डितं छिन्नं निदिध्यासनेन त्रुटितस्वसम्बन्धम् । विज्ञानमपरोक्षज्ञानं तद्रूपाग्निना सन्दह्य शुभ्रभस्मावशेषितं संसारतरुं कुर्यात् । दग्धपटवत् संसारस्तस्य योगिनो भातीति भावः । भस्मनि शुभ्रेति विशेषणेन दाह्यशेषलेशस्याप्यभावः सूचितः ॥११२॥

एवं भस्मावशेषितमपि जगच्चक्रं दग्धपटवद्भासमानं न पृथक् पश्येत्, किन्तु सितभस्मोद्धूलिताङ्गमहेश्वरमिव राजद् भस्मावशेषितं जगच्चक्रं स्वदेहे यस्य । एवं स्वात्मारामं महेश्वरं पश्येदित्यर्थः । एवं प्रसङ्गागतमभिधाय मनसश्चलनं द्वेधेत्याद्युपक्रान्तं मनोनिरोधं निरूपयति—एवमिति । एवं मनसश्चलनं रसेन स्वाभाव्येन चेत्युक्तम् । तत्र वैराग्यस्य योगेनाभ्यासेन रसस्य नाशेन नाशकरणेन मनः साधयेत् स्थिरीकुर्यात् ॥११३॥

स्वभावेन चलच्चित्तम् । अभ्यासेन वक्ष्यमाणेनैव साधयेत् स्थिरीकुर्यात् । मनसो रसाच्चलनशान्तिर्वैराग्येणोक्ता । तत्र विषयदर्शनोत्तरं रागः समुदयति । रागोत्तरकालं प्रवृत्त्यादिकं भवत्येवेति वैराग्येण किं कर्तव्यमित्याशङ्क्याह—वासनेति । गृहं मे स्याद् धनं मे स्यादित्यादिकामनारूपविविधवासनायुतपुरुषः । गृहादिकं स्वपन्नसाध्यमवलोक्य तत्रानुरागेण युतः सम्पादनाय प्रवर्तते । एवं स्थिते गृहं मे स्यादित्यादिवासना एव वैराग्येण विशेषतो निःशेषेण नाशयेत् । ततश्च वासनायां नष्टायां विषयदर्शनेऽनुरागानुदयात् पुनर्न तत्र प्रवृत्तिं प्राप्नोतीति भावः ॥११४॥

एवं वैराग्येण रागपूर्वकचलनमनिवर्त्य स्वभावचलनं निवर्तयितुमशक्यमिति सूचयितुं पुनः स्वभावचलनमभ्यासेन साधयेदित्याह—स्वभावेति । ननु वासनानामपि कथं वैराग्येण निवृत्तिरिति चेदाह—सुख इति । सर्वेषां विषयजन्ये सुखे एवापेक्षा मुख्या । विषयेषु तु सुखार्थमिति न मुख्यापेक्षा । तथा च तस्मिन् सुखे सततं तत्तद्वासनोत्तरकाले दोषाणामिदं सुखं नश्वरं परिणामे स्ववियोगेन दुःखदं नरकासादिधनं जन्ममरणप्रदं क्लेशसहस्रसम्पादितधनादिसाध्यमित्यादीनां दर्शनमालोचनं तस्मात् वैराग्यम् उप समीपे शीघ्रं जायेत इति सम्बन्धः ॥११५॥

वैराग्यमुपजायेत विपरीतग्रहादपि ।
विविधैरभ्यासयोगैर्नाशयेत्तु स्वभावजम् ॥११६॥
अकिञ्चिच्चिन्तको भूत्वा स्वस्थः स्वात्मनि संस्थितः ।
स्वप्नाद्यं जागरान्त्यं च स्वरूपमनुसन्दधेत् ॥११७॥
अथबोद्यमशक्तिं च सर्वोद्योगस्य कारणम् ।
ध्यायन्निरन्तरं देवि निस्तन्द्रः सिद्धिमाप्नुयात् ॥११८॥
अत्यन्तविस्मितो मर्त्यो यं भावं समुपाश्रयेत् ।
तं भावयन् सदा योगी सिद्धिमाप्नोति सुस्थिराम् ॥११९॥

नैतत्सुखं मम हितं परिणामदुःखदत्वादित्यादिविपरीतग्रहादपि वैराग्यमुपजायेत । अत्र सुखसाधनविषयेषु दोषदर्शनादिकं वासिष्ठत्रिपुरारहस्यायुक्तमनुसन्धेयम् । स्वभावचलननाशकमभ्यासं वक्तुमुपक्रमते—विविधैरिति ॥११६॥

तदेवाभ्यासमनेकप्रकारं क्रमेणाह—अकिञ्चिदिति । न किञ्चिदपि चिन्तयतीत्यकिञ्चिच्चिन्तकः । किञ्चिदपि मनसाऽनुल्लिखन् स्वस्थः क्षुत्तृष्णाद्युपद्रवरहितः । स्वस्यात्मनि शरीरे सम्यगचाञ्चल्येन स्थितः, अचलदेह इति यावत् । स्वप्नस्य सुषुप्तेः । आद्यम् आद्यक्षणोपलक्षितम् । तथा जागरस्य जाग्रद्दशाया अन्त्यम् अन्त्यक्षणोपलक्षितं स्वरूपं देहाद्यभिमानरहितं निद्रानावृतमगृहीतविषयाकारमेवंविधं स्वस्य निर्विकल्परूपमनुसन्दधेत् अहमस्मीत्यनुसन्धानरूपं ध्यानं कुर्यादित्यर्थः ॥११७॥

उपायान्तरमाह—अथवेति । उद्यमशक्तिम् । चिच्छक्तेश्चेत्योन्मुखत्वरूपसंरम्भः प्राक् स्पष्टतरं निरूपितः, ताम् । स एव संरम्भो निखिलोद्योगस्य सर्वदेहेन्द्रियव्यापारस्य कारणम् । एवंविधामुद्यमशक्तिं ध्यायन् । चकारेण पूर्वश्लोकोक्ताऽकिञ्चिच्चिन्तनादि समुच्चितं ज्ञेयम् । निरन्तरं प्रत्ययान्तरेणाऽनन्तरितं यथा तथा । निस्तन्द्रः ध्येयस्वरूपमविस्मरन् । सिद्धिं मनःस्थैर्यं पूर्वकापरोक्षात्मदर्शनम् । एतदुक्तं स्पन्दे—"यथा ह्यर्थो स्फुटो दृष्टः" इत्यादिना "यामवस्थां समालम्ब्य" इत्यादिना च ॥११८॥

तथा अत्यन्तं निरवधित्वेन विस्मितो विस्मयं प्राप्तः । यं भावं स्वरूपस्थितिं समुपाश्रयेत् । एतच्चातिक्रुद्धाद्युपलक्षणम् । यदुक्तं स्पन्दे—"अतिक्रुद्धः प्रहृष्टो वा किं करोमीति वामृशन् । धावन् वा यत्पदं गच्छेत्तत्र स्पन्दः प्रतिष्ठितः ॥" इति । अतिक्रोधादिसमुदये अपरिच्छिन्नसंविन्मात्रस्फूर्तिमयी निर्विकल्पदशा आविर्भवति । तं भावं सदा निरन्तरेण भावयन् । योगीति पूर्वोक्ताकिञ्चिच्चिन्तकत्वादिसंग्रहाय ॥११९॥

ग्राह्यग्राहकमध्यस्थां दशां दीर्घं विभावयन् ।
नैश्चल्ययोगमाप्नोति सततं योगतत्परः ॥१२०॥
एकैकं चिन्तयन् दृश्यं बाह्यादन्तः क्रमेण तु ।
दृश्यं न दृश्यते यत्र तं भावं सर्वदाऽभ्यसेत् ॥१२१॥
अदृश्यं दृश्यमपि च दृश्यते यत्र संस्थितम् ।
तं चिन्तयन् सदा योगी तत्पदं प्रविशेद् द्रुतम् ॥१२२॥
प्रकाशश्चान्धकारश्च यत्प्रकाशे प्रकाशते ।
चिन्तयेत्तत् सदा योगी प्रकाशमयतां व्रजेत् ॥१२३॥

तथा ग्राह्यं घटादि, ग्राहकं चक्षुरादि, तयोर्मध्यस्था संविद् निर्विकल्परूपा । चक्षुषा निर्गतं ज्ञानं सूर्यमण्डलपर्यन्तमभिव्याप्याऽवभासते । तत्र तदेकमेव ज्ञानं देहप्रदेशे देहं सूर्यमण्डलप्रदेशे सूर्यमण्डलं चावभासयति । देहसूर्यमण्डलयोर्मध्ये तु केवलसंविन्मात्ररूपं निर्विकल्पमवभासते । तां मध्यस्थां निर्विकल्पदशाम् । यदुक्तं वासिष्ठे—"देशाद् देशान्तरं दूरं प्राप्तायाः संविदो वपुः । निमेषेणैव यन्मध्ये तद्रूपं परमात्मनः ॥" इति । दीर्घं नैरन्तर्येण । सततं योगतत्पर इति प्रागुक्तसाधनसंग्राहकम् ॥१२०॥

तथा बाह्याद् घटादेः । अन्तःक्रमेण देहप्राणेन्द्रियमनोबुद्धिशून्यक्रमेण । बाह्यघटादिशून्यान्तेषु पूर्वं पूर्वं परित्यजन्नुत्तरोत्तरं मनसा चिन्तयन् शून्यस्य परित्यागे केवलं स्वरूपमात्रं तत्र प्रथत इति यत्र दशायां स्वरूपमात्रप्रथनात्मिकायां दृश्यं न दृश्यते न प्रथते । तं भावं तद्दशास्फुटितनिर्विकल्परूपम् । तुरवधारणे । एकैकमेवेत्यर्थः ॥१२१॥

अदृश्यं दृश्यमपि यत्र संस्थितं दृश्यते । अयं घट इति ज्ञानेन घटो दृश्यभूतो दृश्यते। नास्ति घट इति दृश्याद् घटादिरूपाद् भिन्नात्मकस्तत्तत्तेजःपुञ्जादिरूपो घटाभावो दृश्यते । एवं दृश्यादृश्ययोर्भावाभावयोर्यत्र सम्यक्स्थितयोः सत्तां प्राप्तयोर्दृश्यत्वम् । "प्रागिवार्थो प्रकाशः स्यात् प्रकाशात्मतया विना" इति श्रीप्रत्यभिज्ञोक्तरीत्याऽपरिच्छिन्नसंविदि स्थितानामेवाभासनमिति भावः । तं निखिलज्ञानान्तर्मुखानुस्यूतपूर्णसंविदात्मानम् । तत्पदं प्रविशेत् मनोनैश्चल्यद्वारा निर्विकल्पस्वरूपसाक्षात्कारं प्राप्नुयादिति भावः ॥१२२॥

एतदेवं श्रोतृबुद्ध्युपरोहाय भङ्ग्यन्तरेण पुनः पुनर्निरूपयति—प्रकाश इति । प्रकाशो घटादिज्ञानम् । अन्धकारोऽप्रकाशस्तदभावः । एतज्ज्ञानं मे जातमेतज्ज्ञानं न जातमिति यत्प्रकाशे यस्मिन् ज्ञाने प्रकाशते, तत्पूर्वोक्तं सर्वज्ञानान्तर्मुखानुस्यूतपूर्णसंविद्रूपम् । यश्चिन्तयेत् सप्रकाशमयतां साक्षात्कृतपरसंवित्स्वरूपतां व्रजेत् ॥१२३॥

अशून्यं शून्यमपि च यत्र शून्यात्मतां व्रजेत् ।
महाशून्यं तु तं ध्यायेत् सद्यःप्रत्ययकारकम् ॥१२४॥
एकभावं विमृश्याथो द्वितीयस्य विमर्शने ।
मध्यमार्गः सदा ध्येयः साधकेन शिवात्मना ॥१२५॥
अवश्यं तत्करोमीति यद्बलं संश्रितो वदेत् ।
तद्बलं सर्वदा ध्यायन् लभते सिद्धिमात्मनः ॥१२६॥
चित्तचाञ्चल्यभावेन यद्येकत्र न शक्यते ।
निरोद्धुं तर्हि देवेशि चालयेच्चित्तमेव तु ॥१२७॥

अशून्यं न शून्यं यत्र तज्जाग्रत्स्वप्नदशात्मकबाह्यावभासनम् । शून्यं सुषुप्त्यात्मकोऽनवभासः । एतदुभयमपि यत्र यस्यां दशायां शून्यात्मतां व्रजेत्, यद्दशायां जाग्रदाद्यात्मकबाह्यावभासः सुषुप्त्यात्मकानवभासोऽपि न भासते, तत्तुरीयदशात्मकं महाशून्यम् । देशकालादिपरिच्छेदानवभासान्महत्त्वम् । स्वरूपेतरानवभासाच्छून्यत्वम् । तद् ध्यानं सद्यः तत्काले एव प्रत्ययस्यापरोक्षस्वरूपज्ञानस्य कारकम् । तुरवधारणे । महाशून्यमेव ॥१२४॥

एको घटादिरूपो यो भावः । तं विमृश्य विज्ञाय । अथो तदनन्तरम् । द्वितीयस्य पटादिभावस्य विमर्शने विज्ञाने प्रसक्ते । तयोः पूर्वापरयोर्घटज्ञानपटज्ञानयोर्यो मध्यो मार्गः मध्यदशा । घटज्ञानमतीतं पटज्ञानं चागामि । तन्मध्यक्षणे ज्ञानस्य विषयास्पष्टस्य निर्विकल्पत्वम् । एवंविधनिर्विकल्पात्मकमध्यमार्गः । शिवात्मना स एव शिवः सोऽहमिति ध्येयः । तदुक्तं स्पन्दे—"एकचिन्ताप्रसक्तस्य यतः स्याद-परोदयः । उन्मेषः स तु विज्ञेयः स्वयं तमुपलक्षयेत् ॥" इति ॥१२५॥

एतत्कार्यमहमवश्यं करोमीति यद्बलं प्रागुक्तसंरम्भरूपं संश्रितो वदेत् । आत्मनः सिद्धिमपरोक्षज्ञानम् । एतदुक्तं स्पन्दे—"यामवस्थां समालम्ब्य यदयं मम वक्ष्यति । तदवश्यं करिष्येऽहमिति संकल्प्य तिष्ठति ॥" इत्यादि ॥१२६॥

एवं मनो निरोद्धुं मनस आलम्बनानि बहुधा प्रतिपाद्यात्यन्तराजसचित्तस्यैकत्रा-लम्बने यदि मनःस्थैर्यं नायाति तदोपायमाह—चित्तेति । चित्तस्य चाञ्चल्यभावेन सदा चञ्चलरूपत्वेन स्थित्या । एकत्रालम्बने । चित्तं चालयेदेव । क्षणमात्रमपि नैकत्र विश्रान्तं कुर्यात् ॥१२७॥

प्रतिक्षणं तु भावानामनेकं संस्मरेद्धिया ।
हठादाक्रम्य स्वं चित्तं स्थितिं क्वाप्यजुषन् शिवे ॥१२८॥

यावत् स्थिरीभवेच्चित्तं तावदेवं समभ्यसेत् ।
स्थितं यावत् स्थिरं कुर्याद्भूयश्चामुं विधिं भजेत् ॥१२९॥

स्थिरीभावं समाप्नोति चित्तमत्यन्तचञ्चलम् ।
द्रव्यादिसेवनोदञ्चद्बोधभावं विचिन्तयन् ॥१३०॥

क्रमेण तत्समापत्तिं प्राप्नोत्येव महेश्वरि ।
स्वमनोहारिभावे तु कस्मिंश्चिदपि योजयेत् ॥१३१॥

तत्प्रकारमेवाह—प्रतिक्षणमिति। धिया मनसा प्रतिक्षणं भावानामनेकम् अनेकभावान् सम्यक् तत्तद्गुणक्रियादिसहितं यथा तथा। स्मरेदुल्लिखेत्। प्रतिक्षणमविश्रान्त्या क्रमेण युगपद्वोल्लिखेत्। तेष्वेकत्र कुत्रापि मनः क्षणद्वयं न निवेशयेद् इति भावः। एवमुल्लेखनदशायां चित्तं क्वचित् क्षणद्वयं त्रयं वा उल्लिखितवस्तुनि किञ्चित् कल्पयन् स्थिरीभवेत्तदर्थमाह—हठादिति। बलात्कारेण स्वं चित्तम् आक्रम्य स्वायत्तीकृत्य क्वापि स्थितिम् अजुषन् अजोषयन् संस्मरेत् ॥१२८॥

एवं वेगेन चालितं चित्तं श्रान्तं सद्यावत्कालेन स्थिरीभवेत्तावत्कालम् एवमेवाभ्यसेत्। श्रान्तं सद्यत्र यावत्कालं स्थितं भवेत्तावत्तत्र स्थिरं कुर्यात्। ततश्चलिते पुनरमुं चालनविधिं कुर्यात् ॥१२९॥

एवमभ्यासे क्रियमाणेऽत्यन्तचञ्चलमपि चित्तं स्थिरतां सम्यगाप्नोति। उपायान्तरमाह—द्रव्येति। द्रव्यं प्रथमम्। आदिना संवित्। तस्य सेवनं स्वात्मीकरणं तेनोदञ्चदुन्मिषन् यो बोधभाव उल्लासात्मता। इन्द्रियाणामबहिर्मुखत्वेन मनसः स्वरूपावस्थानम्। तं विचिन्तयन् ध्यायन् ॥१३०॥

तत्समापत्तिं मनोनिरोधद्वारा स्वात्मविज्ञानं प्रत्यहं कालाधिक्यक्रमेण अद्य घटिकामात्रं मनोनिरोधः श्वो घटिकाद्वयमित्यादि क्रमेणैव चिन्तयन्। अतिविषयासक्तचित्तानां यत्र विषये निरोधकाले मनो धावति, तत्रैव मनोनिरोधं कुर्यादित्याह—स्वमन इति। कस्मिंश्चिदपि स्वमनोहारिभावे स्वमनःप्रियवस्तुनि। चित्तं योजयेत् ॥१३१॥

मनस्तेनापि नियतं प्रसादमुपगच्छति ।
ध्याने यत्र मनो याति तत्रैव स्थिरतां नयेत् ॥१३२॥
अथवा प्राणचलनं ध्यायेन्मायामनुस्मरन् ।
अभ्यसन्नपि चैवं तु स्थितिं स्वात्मनि लभ्यते ॥१३३॥
यद्भूतबीजं संस्मृत्य प्राणधारणमभ्यसेत् ।
यद्भूतधारणायोगात् तत्सामर्थ्यमवाप्यते ॥१३४॥
केवलां वापि हृल्लेखां ध्यायन्नपि च सर्वदा ।
क्रमात् सिद्धिमवाप्नोति सत्यमेव न संशयः ॥१३५॥
मदनं घृतकार्पासमेकत्र वटकीकृतम् ।
निक्षिप्य कर्णयोः शृण्वन्नाधारध्वनिमेव च ॥१३६॥

तेनापि प्रियवस्तुध्यानेनापि । नियतं नियमेव । प्रसादं निरोधम् । ध्याने ध्यानकाले । यत्र यस्मिन् विषये प्रियेऽप्रिये वा शत्रौ मित्रे वा । तत्रैव मनसोऽत्यन्तप्रवृत्तिस्थले एव । तथा च योगसूत्रम्—"यथाभिमतध्यानाद्वा" इति ॥१३२॥

एतावता ग्रन्थेनान्तरे परमार्थभूते संविदात्मनि तच्छक्तौ संरम्भरूपायां मनःसंकल्पिते प्रियादिषु ध्यानमुक्त्वा प्रबलदुष्कृतसंस्कारवशादुक्तप्रकारैरप्राप्तमनोनिरोधं प्रति प्राणादिधारणामाह—अथवेति । प्राणस्य बहिरन्तर्गमागमरूपचलनम् । मायां हृल्लेखाम् । गमने आगमने च मायाम् अनु प्राणगमनागमनपृष्ठतः स्मरन्नेवं ध्यायेत् । मनसः स्वात्मनि स्थितिः स्थिरीभावो लभ्यते ॥१३३॥

पञ्चसु भूतबीजेषु मध्ये । यद्भूतबीजं संस्मृत्य सम्यक्पूर्ववत् स्मरन्नित्यर्थः । प्राणधारणं पूर्वोक्तप्राणचलनध्यानम् । तद्भूतबीजस्मृतिसहितत्वात् प्राणधारणस्य तद्भूतधारणात्वम् । एवंविधात्तत्तद्भूतधारणायोगान्मनोनिरोधे सति तद्भूतसामर्थ्यं धारणाप्लावनादिरूपं प्राप्यते ॥१३४॥

केवलां प्राणधारणारहितां हृल्लेखामपि ध्यायंश्च सर्वदा नैरन्तर्येण सिद्धिं मनोनिरोधपूर्वकस्वात्मज्ञानम् ॥१३५॥

मदनं मधूच्छिष्टम् । घृतकार्पासाभ्यामेकत्र संमेल्य वटकीकृतं घुटिकाकारतया कृतम् । अत्र घृतयोगः काठिन्यपरिहाय, कार्पासयोगः कर्णे निहितघुटिकायाः समग्रनिर्गमाय । अन्यथा काठिन्यात् कर्णे व्यथोत्पत्त्यादिरसंश्लिष्टावयवत्वेन कर्णरन्ध्रान्निस्सा-

हृल्लेखामुच्चरन् दीर्घामैक्यं तत्रानुसन्दधेत् ।
नादयोरुभयोर्देवि मनस्तस्माद् विलीयते ॥१३७॥
सम्पूर्णां देवतामूर्तिं ध्यायेदादौ समाहितः ।
स्थिरा यदा भवेन्मूर्तिस्तदैकाङ्गं परित्यजेत् ॥१३८॥
यथा यथा स्थिरीभूतं तथैकैकं परित्यजेत् ।
एवं सम्पूर्णसंत्यागात्तत्पदं समवाप्नुयात् ॥१३९॥
यथा जातो घटो देवि स्वभावाद् गगनान्तरः ।
जलेन पूरितः पश्चाद् गगनं नोपलक्ष्यते ॥१४०॥

रणे च्छिन्नवुटिकाशेषस्य कर्णरन्ध्रान्तःप्रवेशश्च स्यात् । एवं च यावता काठिन्यमसंश्लिष्टावयवत्वं च निवर्तते तावन्मदने घृतकार्पासयोर्योगः कर्तव्यः । तां वटिकाम् । कर्णयोः कर्णकुहरयोः । नितरां बाह्यशब्दाश्रवणमन्तर्नादश्रवणं च यथा भवति तथा क्षिप्त्वा । आधारध्वनिमेव शृण्वंश्च ॥१३६॥

दीर्घां यावत्तदनुसन्धानं न च्छिद्यते तावन्मात्राकालां हृल्लेखामुच्चरन् । हृल्लेखोच्चारनादाधारनादयोरुभयोरैक्यस्यानुसन्धानं कुर्यात् । तस्मादेवमभ्यासान्मनो विलीयते स्थिरीभवति ॥१३७॥

ध्यानोक्तां देवतामूर्तिम् । सम्पूर्णां सकलसर्वावयवाम् । आदौ अभ्यासारम्भे । एवं किञ्चित्कालमभ्यासेन यदा सा मूर्तिर्मनसि स्थिरा भवेत् शीघ्रमन्यविषयोल्लेखेनान्तर्हिता न भवेत्, तदा तस्या मूर्तेरेकमङ्गं हस्तपादादिषु यत्किञ्चित् परित्यजेत् । मूर्तेर्यत्किञ्चिदङ्गं परित्यज्यावशिष्टं ध्यायेत् ॥१३८॥

एवमेकाङ्गन्यूनमूर्तेः स्वरूपं स्थिरीभूतं चेद् द्वितीयमङ्गं परित्यजेत् । एवमेव एकैकाङ्गत्यागक्रमेण चरमीभूतैकाङ्गध्याने स्थिरे सति ततस्तस्यापि परित्यागेन सम्पूर्णमूर्तिपरित्यागे सिद्धे तद्रूपं निर्विकल्पस्वरूपभूतं पदमालम्बनं सम्यग् अविपर्ययेण अवाप्नुयात्, स्वरूपमपरोक्षीकृतं भवतीति यावत् ॥१३९॥

ननु घटत्यागमात्रेण व्यापारान्तरं विना यथा पटो न मनोविषयस्तथा सम्पूर्णमूर्तित्यागमात्रेण व्यापारान्तरं विना कथं तत्पदं समवाप्नुयादित्याशङ्कां शमयितुं दृष्टान्तमाह—यथेति । जात उत्पन्नो घटः स्वभावात् कारणान्तरनैरपेक्ष्यात् । गगनान्तरः गगनमन्तरे उदरे यस्य । घटस्योदरे न गगनं प्रविशति किन्तूत्पत्तिकालात्तथैव वर्तत इति भावः । तदुदरे गगनं जलेन यदा घटः पूरितस्तदा जलपूरणस्य पश्चात् नोपलक्ष्यते न दृश्यते ॥१४०॥

प्रतिबिम्बितमाकाशमन्यदेवोपलभ्यते ।
निःसारणे जलानां तु पुनस्तदुपलभ्यते ॥१४१॥
एवं चैतन्यसम्पूर्णं चित्तमादौ तु जायते ।
वासनौघेन सम्पूर्णं भाति तत्र पुनस्तु तत् ॥१४२॥
प्रतिबिम्बवदेवात्र चैतन्यं जीव एव सः ।
येन केनाप्युपायेन चित्ते निर्वासनात्मके ॥१४३॥
स्वात्मभावः प्रकाशेत घटाकाश इव स्फुटम् ।
यस्यैवमपि चित्तं स्वं निगृहीतुं न शक्यते ॥१४४॥

तत्र घटोदरे जलप्रतिबिम्बितमाकाशम् । अन्यदेव उदरे स्थितादन्यदेव सर्वैरुपलभ्यते । तुरवधारणे । तेषां जलानां घटोदराद् बहिर्निस्सारणे एव पुनस्तदाकाशमुपलभ्यते ॥१४१॥

दृष्टान्तोपपादितमर्थं दार्ष्टान्तिके योजयति—एवमिति । बाह्योन्मुखत्वेन जायमानचितिशक्तिरूपं चित्रम् । आदौ स्वोत्पत्तिकाले एव गगनपूर्णघटवच्चैतन्येन सम्यक्तादात्म्येन पूर्णम् । तच्चित्तं वासनानां कामक्रोधादिसंस्काराणामोघेन समूहेन जलेन घट इव सम्पूर्णम् । तत्र वासनौघसम्पूर्णे चित्ते । तुरवधारणे । तदेव चैतन्यमेव । पुनरन्तःपूर्णातिरिक्तत्वेन । जलप्रतिबिम्बिताकाशवद् भातीति सम्बन्धः । घटान्तर्गताकाशोऽन्तर्बहिरनुस्यूतैकरूपेण भाति । प्रतिबिम्बाकाशस्तु घटान्तर्जले एवेतिवत्प्रकृतेऽपि चित्तान्तर्बहिः शिवरूपं महाचैतन्यम् वासनासु इदं मे स्यादिदं मे न स्यादित्याद्यासु मे मे इति अस्मत्प्रत्ययविषयत्वेन प्रतिबिम्बविधया परिच्छिन्नं चैतन्यं भातीति भावः ॥१४२॥

अत्र चित्ते प्रतिबिम्बवच्चैतन्यं यदुक्तं स एव जीवः । येन केनापि शाम्भवशाक्ताद्यन्यतमेनोपायेन । अथवा प्रकृतयोगप्रकरणेऽन्यत्र वोक्तानेकेष्वन्यतमेनोपायेन । निर्गता वासना यस्मात् स निर्वासनः । एवंविध आत्मा स्वरूपं यस्य । एवंरूपे चित्ते स्थिते सतीति शेषः ॥१४३॥

स्वस्य साधकस्य य आत्मा परिपूर्णसंविदात्मा परशिवः । तस्य भावः सत्ता । अयमहमस्मीति । जले निःसारिते घटाकाशवत् स्फुटमपरोक्षत्वेन प्रकाशते । तत्रोपायत्रयं शृण्वित्युद्दिष्टेषु अभ्यासो मनोनिरोधश्चोक्तः । प्रकृतेऽत्यन्यमलिनचित्तस्य तृतीयमाह—यस्येति । एवमुक्तोपायद्वयेनापि यस्य चित्तं सर्वथा निगृहीतुं न शक्यते ॥१४४॥

तेन प्राणनिरोधस्तु कर्तव्यः क्रमतः शिवे ।
प्राणरोधादपि मनः स्थिरीभवति निश्चितम् ॥१४५॥

मनःखगस्य द्वौ पक्षौ विषयाकाशचारिणः ।
वासनात्मा तथा प्राणस्पन्दश्चेति महेश्वरि ॥१४६॥

भस्मच्छन्नो यथा वह्निर्भस्त्राभ्यां धमितो यदा ।
तदा ज्वलति तेनेद्ध इन्धनानि दहन् शिवे ॥१४७॥

तथाऽज्ञानेन संछन्नं ज्ञानं संयमितं भवेत् ।
प्राणापानप्रचाराभ्यां समिद्धं विषयान् दहेत् ॥१४८॥

ततस्तु सुखदुःखादि भुज्यते मनुजैः शिवे ।
प्राणसंचरणाच्चित्तं वासनायोगतोऽपि च ॥१४९॥

क्रमतः वक्ष्यमाणक्रमेण । अथवा प्रोक्तसाधनैः स्वभ्यस्तैः । फलानुदये सत्येव क्रमतः प्राणनिरोधः कर्तव्यः, नान्यथा । एतेन ज्ञानेऽधिकृतस्य निर्मलचित्तस्य न योगादिष्वधिकार इत्युक्तं भवति । यदुक्तं त्रिपुरारहस्ये—"उपासने तथा योगेऽधिकारो मलचेतसाम्" इति । ननु प्राणनिरोधेन कथं प्रोक्तज्ञानसिद्धिरिति चेदाह—प्राणरोधादपीति । स्थिरीभवतीति विद्वद्भिर्निश्चितम् ॥१४५॥

प्राणरोधान्मनसः स्थिरीभावे उपपत्तिमाह—मन इति । मन एव खगः पक्षी, तस्य विषया इन्द्रियार्थाः शब्दादय एवाकाशोऽनन्तत्वात्, तत्र चरणशीलस्य द्वौ पक्षौ स्तः । कौ तौ पक्षावित्याह—वासनेति । वासना कामक्रोधादिजनकानुभवसंस्कारः । वासनात्मकः प्राणस्पन्दश्चेति द्वौ पक्षौ ॥१४६॥

ताभ्यां पक्षाभ्यां विषयाकाशसञ्चरणक्रममाह—भस्मेति । भस्मना छन्नो वह्निः निक्षिप्तमिन्धनं दग्धुमसमर्थोऽपि यदा भस्त्राभ्यां दृतिभ्यां धमितः ध्मातो भवति, तदा तेन धमनेनेद्धः प्रदीप्तः, इन्धनानि दहन् ज्वलितो भवतीति यथा ॥१४७॥

तथा भस्मस्थानीयेनाज्ञानेनाख्यात्या संच्छन्नमग्निसदृशं ज्ञानं ज्ञायतेऽनेनेति ज्ञानं मनःप्राणापानात्मकाभ्याम् उच्छ्वासनिःश्वासाभ्यां प्राणप्रचाराभ्यां सम्यग् धमितं यदा भवेत्, तदा विषयानिन्धनरूपान् समिद्धं सद् दहेत् । वह्निर्यथेन्धनेष्वन्तर्बहिश्चाविश्य स्वात्मरूपमिन्धनं करोत्येवं मनो विषयेषु बहिरन्तराविश्य स्वात्मैकरूपं प्रकाशमयं करोतीति भावः ॥१४८॥

ततः प्राणचालितस्य मनसो विषयेषु प्रवृत्तेः । तुरवधारणे । तत एवेत्यर्थः । विषयगुणदोषविवेचनद्वारा कामाद्युत्पत्तौ तत्प्राप्त्यप्राप्तिभ्यां सुखदुःखहर्षविषादा

चलत्यनुक्षणं तेन संसारः स्यात् पशोः शिवे ।
प्राणसंचरणाद् देवि वासना वृद्धिमाप्नुयात् ।।१५०।।
वासनावसतः प्राणः स्पन्दते भूय एव तु ।
तस्मादेकनिरोधेऽपि निरुद्धमुभयं भवेत् ।।१५१।।
उपायेन गुरूक्तेन अभ्यासप्राणरोधतः ।
आसनादिसमायोगात् प्राणसंसाधनं भवेत् ।।१५२।।
एतावदेव चित्तस्य रूपं भवति शङ्करि ।
संस्कारवस्तुरूपाभ्यां चिन्तनं यच्च वस्तुनः ।।१५३।।

भुज्यन्ते । ततश्च प्राणसञ्चरणात् । वासनाभिर्युक्तत्वादपि च चित्तमनुक्षणं चलतीति सम्बन्धः ।।१४६।।

तेन एवं चलनेन । संसारः सुखदुःखाद्यनुभवः । प्राणसञ्चरणवासनयोर्मनः-प्रवर्तने परस्पराश्रयत्वमाह—प्राणेति ।।१५०।।

भूयः पुनः पुनः । तुरवधारणे । वासनावशत एव । भूय एवेति विभज्य सम्बन्धः । इदमत्र तत्त्वम्—"मनसश्चलनं द्वेधा रसात् स्वाभाव्यतोऽपि च" इति प्रागुक्तम् । तत्र प्राणसञ्चरणेन प्राणापानमध्ये हृदये स्थितं कमलं मनोऽधिष्ठानं प्रचलति । ततश्च मनश्चलितं सद् यस्मिन् कस्मिंश्चिद्विषये सम्पृक्तं भवति । एतदेव प्राणकृतं मनसः स्वाभाव्यतश्चलनम् । यथा कश्चिद् गृहं दहन्नग्निर्यदा वायुना न चाल्यते तदा तदेकमेव गृहं भस्मावशेषीकृत्योपशाम्यति, यदा तु वायुना प्रचाल्यते तदेतस्ततः प्रचलितः सत्सु गृहादिषु नोपशाम्यति । तथा मनो यावत् प्राणेन चाल्यते तावद्विषया-नुधावन्न विश्राम्यति । निरुद्धे प्राणे न स्वभावात् क्वचित् प्रवर्तते । एवं प्रचलनेन यत्र विषये मनो गच्छति तद्गुणदोषादिकल्पनेन तद्वासनावृद्धिः । कामादिवासना-विष्टस्य काम्यविषयेन्द्रियसम्प्रयोगे द्रुततरं बलाद्विषये मनोऽनुपतति । तदनु तत्प्राप्त्या-द्यर्थं धर्माधर्मसाधनक्रियानुबद्धस्तद्धर्मादिभिः प्राणः प्रचलतीति वासनावशतः प्राणस्य स्पन्दनमिति । यस्मादेवं वासनाप्राणसञ्चारौ परस्परवृद्धिनिमित्तभूतौ तस्मात् । एकस्य वासनाप्राणसञ्चारान्यतरस्य निरोधेऽपि ।।१५१।।

गुरूक्तेनोपायेन प्राणरोधतः प्राणरोधस्याभ्यासात् गुरूक्तेनेति गुरुसम्प्रदाय-रहितस्य न प्रकृतयोगसिद्धिरिति ज्ञेयम् । आसनादीनां वक्ष्यमाणयोगाङ्गानां सम्यग् यथोक्ततया फलपर्यन्तं योगादभ्यासात् प्राणसंरोधनं भवेत् ।।१५२।।

प्रकृते प्राणरोधेनापि निगृहीतचित्तता सम्पादनीया । चित्तस्य निग्रहेन चाञ्चल्ये परिहृते स्वरूपावभासः सम्पद्यते । तत्र चित्तमेव निग्राह्यम् । निगृहीते चित्ते प्राणसञ्चरणेन

प्राणरोधाख्ययोगस्तु तत्राष्टाङ्गः प्रकीर्तितः ।
यमश्च नियमश्चैवासनं प्राणस्य रोधनम् ॥१५४॥
प्रत्याहारो धारणा च ध्यानं चापि समाहितिः ।
अहिंसा सत्यमस्तेयब्रह्मचर्यापरिग्रहाः ॥१५५॥
यमा एते महेशानि नियमानपि संशृणु ।
तपःसंतोषशौचानि स्वाध्यायः शिवसन्नतिः ॥१५६॥

वासनाप्राबल्ये किं भविष्यतीत्याशङ्क्य वासनानां धारैव चित्तस्वरूपमित्युपदिशति—एतावदिति। संस्कारः संवृतवस्त्ववभासः। वस्तुदर्शनकाले वस्त्ववभासस्त्वसंवृत्तः स्फुटः। तादृशः स्फुटोऽवभासः प्रसारितचित्रपटवदिन्द्रियसरणिमासाद्य स्थितः। पश्चात् स एव संवर्तितचित्रपटवद् अन्तश्चित्तभूमौ संवृतः स्फुटमनवभासमानस्तिष्ठति संस्कारः। यथा कश्चनान्येन किमरे त्वया सा प्रेयसी किं भाषितेति पृष्टो बाह्येन्द्रियमनभिगम्यैव क्वचित् स्थापितवस्त्वानयनाय गच्छन् पुरुष इव नष्टमिवासंविदन् झटित्यात्मन्येवासावनुवदति चेत्थं सा मया भाषितेति। अस्थिते च संस्कारे विनष्टमिव संविदन् स्वान्तरेव मृगयतीति संस्कारो वस्तुसूक्ष्मावभासः। एवं संस्कारेण वस्तुनः स्फुटावभासरूपेण च यद्वस्तुचिन्तनम्। सूक्ष्मस्थूलवस्त्ववभासच्छायासमाक्रान्ता चिच्छक्तिरेव चित्तमिति भावः। एवं च वासनात्मकसंस्कारसत्त्वमेव चित्तस्यानिग्रह इति तात्पर्यम्। यदुक्तं वासिष्ठे—“अयं सोऽहमिदं तन्मे एतावन्मात्रकं मनः। तदभावनमात्रेण विचारेण विलीयते ॥”, तथा—“उपादेयानुपतनं हेयैकान्तविवर्जनम्। यदेतन्मनसो रूपं तद्बन्धं विद्धि नेतरत् ॥” इति ॥१५३॥

अत्र मनसो निरोधं प्राणनिरोधद्वारा वक्तुमुपक्रान्तम्। अयमेव प्राणनिरोधद्वारा मनोनिरोधोऽष्टाङ्गयोगः समाधिः पातञ्जले शास्त्रे निरूपितः। तमेव स्पष्टं निरूपयितुमारभते—प्राणेति। प्राणस्य रोधेन आ अभिव्याप्य सामस्त्येन स्वरूपं ख्यायत इति प्राणरोधाख्यो योगो निर्विकल्पसमाधिः कर्मयोगस्तथा ज्ञानमित्यत्रोद्दिष्ट उपायः। प्राणरोधस्तु कर्तव्य इत्यत्र प्राणरोध इति यमादीनां प्रत्याहारादीना चोपलक्षणम्। तेन प्राणनिरोधस्तु कर्तव्य इत्युद्देशानुसारात् प्राणरोधस्य मुख्यत्वेन गणनम्। तुरिति पूर्वोक्तोपायेभ्यो व्यवच्छेदः। तत्र योगप्रधानशास्त्रेषु। अष्टावङ्गानि यस्य। अङ्गान्येवाह—यम इति ॥१५४॥

समाहितिः समाधिः। तथा च पातञ्जलं सूत्रम्—“यमनियमासनप्राणायामप्रत्याहारधारणाध्यानसमाधयोऽष्टावङ्गानि” इति। तत्र यमानाह—अहिंसेति। तथा च सूत्रम्—“अहिंसासत्यमस्तेयब्रह्मचर्यापरिग्रहा यमाः” इति ॥१५५॥

प्रोक्ता यमाः। नियमानाह—तप इति। तथा च सूत्रम्—“शौचसन्तोषतपः-

यमान् सर्वात्मना कुर्यान्नियमानपि शक्तितः ।
फलमेषां प्रवक्ष्यामि क्रमेण शृणु सुन्दरि ॥१५७॥
विद्विष्टस्यापि सान्निध्ये वैरहानिरहिंसया ।
क्रियाफलाश्रयित्वं स्यात् सत्यसेवावशेन तु ॥१५८॥
सर्वरत्नोपसंस्थानं वीर्यलाभस्तथैव च ।
जननादिभयाभावः क्रमादस्तेयकादिषु ॥१५९॥

स्वाध्यायेश्वरप्रणिधानानि नियमाः" इति । अत्र प्रोक्ताष्टाङ्गेषु यमनियमौ न साक्षात् फलभूतसमाध्युपकारकौ, किन्तु तत्प्रतिपक्षहिंसादिनिरसनद्वारा । आसनादिकं तु प्राणायामाद्युत्तरोत्तराङ्गोपकारकत्वेनेति ॥१५६॥

तत्र हिंसादेः प्रबलप्रतिपक्षत्वेन तन्निवर्तकयमस्य मुख्यभूतस्यैवानुष्ठेयत्वमाह—यमानिति । सर्वात्मनेति पूर्णात्मना स्थितानसंकुचितानहिंसादीन् कुर्यादित्यर्थः । अहिंसादीनां संकोचस्तु जातिदेशकालसमयैः । यथा जातितो ब्राह्मणं न हनिष्यामीति । एवं तीर्थे पर्वसु च शरणार्थिनं च न हनिष्यामीति देशादिना संकोचः । एवमसंकुचितान् यमान् कुर्यात् । तथा च सूत्रम्—"एते जातिदेशकालसमयानवच्छिन्ना सार्वभौममहाव्रतम्" इति । शक्तित इति । नियमान् शक्त्यनुसारेण कुर्यात् । यथाऽशक्तेन स्नानप्रसक्तावनुकल्पमन्त्रस्नानादिकमेव कर्तव्यमिति । एषाम् अहिंसादीनाम् ॥१५७॥

तत्राहिंसादीनामभ्यासतारतम्येन परिनिष्ठितत्वे क्रमेण फलं निरूपयति—विद्विष्टेति । प्राणिनः प्राणवियोजनव्यापारादुपरमोऽहिंसा विद्विष्टस्य विशेषत स्वभावेनैव द्विष्टस्य हिंस्रत्वेन द्वेषविषयीभूतस्य व्याघ्रसर्पादेः सान्निध्ये सम्भवेऽपि स्वेनात्यन्ताभ्यस्ताहिंसया वैरस्य हिंस्रत्वस्य हानिर्भवति । तत्सान्निध्ये व्याघ्रादयो हिंस्रत्वं परित्यजन्तीत्यर्थः । तथा च सूत्रम्—"अहिंसाप्रतिष्ठायां तत्सन्निधौ वैरत्यागः" इति । एवं वाङ्मनोभ्यां यथार्थोल्लेखनसत्यस्य स्वभ्यस्तस्य वशेन ज्योतिष्टोमाश्वमेधादिक्रियाणां यत्स्वर्गादिरूपं फलं तदाश्रयित्वं तत्संपत्तिर्भवतीति यावत् । तथा च सूत्रम्—"सत्यप्रतिष्ठायां क्रियाफलाश्रयत्वम्" इति ॥१५८॥

अस्तेयं परस्वानपहरणम् । तदभ्यासे सति सर्वेषां रत्नानामुपसंस्थानं स्वतोऽयत्नेनैव प्राप्तिर्भवति । तथा च सूत्रम्—"अस्तेयप्रतिष्ठायां सर्वरत्नोपस्थानम्" इति । उपस्थेन्द्रियसंयमरूपब्रह्मचर्याभ्यासाच्छरीरेन्द्रियमनसां वीर्यलाभः अपरिमितसामर्थ्यं भवति । तथा च सूत्रम्—"ब्रह्मचर्यप्रतिष्ठायां वीर्यलाभः" इति । अपरिग्रहो भोगसाधनविषयसंग्रहाभावः । तस्याभ्यासाज्जननमरणभयराहित्यम् । अग्रे जननमरणयोरभावं जानातीति भावः । तथा च सूत्रम्—"अपरिग्रहस्थैर्ये जन्म-

शुद्धिः करणवर्गस्य तपसा तु भवेच्छिवे ।
संतोषात् सुखलाभः स्याच्छौचादङ्गे जुगुप्सनम् ॥१६०॥
असंसर्गः परेण स्यात् सौमनस्यमपीश्वरि ।
मन्त्राध्ययनयोगेन देवताप्रीतिमाप्नुयात् ॥१६१॥
समाधिसिद्धिः सन्नत्या कथितं क्रमतः फलम् ।
आसनानि पुरोक्तानि विशेषमधुना शृणु ॥१६२॥

कथन्तासम्बोधः" इति । अस्तेयकादिषु अस्तेयब्रह्मचर्यापरिग्रहेष्वभ्यस्तेषु सर्वरत्नोपसंस्थानादित्रयं क्रमेण फलं ज्ञेयम् ॥१५९॥

एवं यमानां फलमुक्त्वा नियमानां फलमाह—शुद्धिरिति । तपः स्वधर्माचरणम् । करणेत्युपलक्षणं देहेन्द्रियादीनाम् । परिच्छिन्नत्वाशुद्धेस्तपसा क्षये सति शुद्धिरपरिच्छिन्नता दूरव्यवहितदर्शनादियोग्यतारूपा भवति । तथा च सूत्रम्—"कायेन्द्रियशुद्धिरशुद्धिक्षयात्तपसः" इति । सन्तोषोऽकृपणता । तेनोत्तमसुखलाभः स्यात् । तथा च सूत्रम्—"सन्तोषादनुत्तमः सुखलाभः" इति । बाह्याभ्यन्तरभेदेन द्विविधं शौचम् । बाह्यं मृज्जलैर्देहप्रक्षालनम् । आन्तरं क्रोधेर्ष्यादीनां प्रतिपक्षवृत्त्यभ्यसनम् । तेन शौचेन स्वस्याङ्गे जुगुप्सनम् । प्रत्यहं शोधितस्योऽशुद्धिस्वभावो देह इति निन्द्यबुद्धिर्जायते ॥१६०॥

तस्यैव फलान्तराण्यप्याह—असंसर्ग इति । परेण स्त्रीपुत्रादिदेहेनासंसर्गः अस्पर्शनं जुगुप्सनादेव स्यात् । अथान्तरशौचफलमाह—सौमनस्यमिति । सौमनस्यं सुमनस्त्वमखिन्नता । एतच्च सत्त्वशुद्ध्यादीनां सूत्रोक्तानामुपलक्षणम् । तथा च सूत्रम्—"शौचात् स्वाङ्गजुगुप्सा परैरसंसर्गः" इति, "सत्त्वशुद्धिसौमनस्यैकाग्र्येन्द्रियजयात्मदर्शनयोग्यत्वानि च" इति च । मन्त्राध्ययनयोगः स्वाध्यायो मन्त्रजपः । तेन स्वाराध्यदेवता प्रीता भवति । तथा च सूत्रम्—"स्वाध्यायादिष्टदेवतासम्प्रयोगः" इति ॥१६१॥

शिवस्येष्टदेवतायाः सन्नतिराराधनम् । तया सन्नत्या समाधेः फलभूतस्याविघ्नेन सिद्धिर्भवति । तथा च सूत्रम्—"समाधिसिद्धिरीश्वरप्रणिधानात्" इति । एवं यमनियमानां क्रमेण फलं कथितम् । तृतीयमङ्गमाह—आसनानीति । पद्मस्वस्तिकादीनि कम्बलादीनि चासनानि पुरा पुरश्चरणप्रकरणे प्रोक्तानि । विशेषं तेषां योगोपयोगित्वम् ॥१६२॥

स्थिरं सुखं च देवेशि भवेत्तत्सिद्धमुच्यते ।
प्रयत्नशैथिल्ययोगान्मण्डूकाभेदभावनात् ॥१६३॥
उपायद्वययोगेन सिद्धं स्यादासनं शिवे ।
एवं सिद्धे ह्यासने तु द्वन्द्वैर्नैवाभिभूयते ॥१६४॥
संसिद्धासन एवं तु प्राणायामं समभ्यसेत् ।
रथं यथा दुष्टहयाः पातयन्त्यपमार्गके ॥१६५॥
दृढसारथिसंरुद्धरश्मयस्तु तदैव ते ।
विनिवृत्तास्तु सन्मार्गे स्थिरास्तिष्ठन्ति तद्वशे ॥१६६॥
एवं मनोरथस्याश्वौ प्राणापानौ सदैवतम् ।
विषयारण्यमार्गेषु पातयन्ति प्रतिक्षणम् ॥१६७॥

स्थिरं निश्चलम् । सुखमदुःखदं च यदभ्यासवशेन भवेत्तदासनं सिद्धं योगोपयुक्तं भवति । एवमासनसिद्धावुपायमाह—प्रयत्नेति । आसनेनासीनस्य इत उत्थायान्यत्र गन्तव्यमित्याद्यियं प्रयत्नो जायते तस्य शैथिल्यं विपरीतप्रयत्नेनाभिभवः, तस्य योगोऽभ्यासः, तेन । तथा प्रचलिते आसने आदिमण्डूको भगवान् सकलजगद्धारको यः, स एवाहमिति स्वात्माभेदभावनात् सिद्धमप्रचलितं स्यादित्यन्वयः ॥ १६३॥

एवमुपायद्वयस्य योगेनाभ्यासेनासनं सिद्धं स्यात् । तत्फलमाह—द्वन्द्वैरिति । एवं स्थिरसुखत्वेनासने सिद्धे सति द्वन्द्वैः शीतोष्णादिभिर्नैवाभिभूयते पीडितो नैव भवति । तथा च सूत्रम्—"स्थिरसुखमासनम् । प्रयत्नशैथिल्यानन्तसमापत्तिभ्याम् । ततो द्वन्द्वानभिघातः" इति ॥१६४॥

चतुर्थाङ्गं वक्तुमाह—संसिद्धेति । तुरवधारणे । एवं संसिद्धासन एव प्राणायामं सम्यक् फलसाधनयोग्यं वक्ष्यमाणरीत्याऽभ्यसेत् । प्रकृते प्राणायामस्य मुख्यत्वेनोपक्रान्तस्य सदृष्टान्तं मनोरोधहेतुत्वमाह—रथमिति । यथा दुष्टा हयाः, अपगतो मार्गो यस्य स एवंविधे कूपगर्तादौ रथं पातयन्ति ॥१६५॥

तदैव अपमार्गके पातनसमय एव । दृढः अश्वनियन्त्रेण बलवत्तरो यः सारथिर्यन्ता तेन संरुद्धाः संगृहीता रश्मयो येषां ते एवंविधास्त एवाश्वाः अपमार्गाद्विनिवृत्ताः सन्मार्गे एव तस्य सारथेर्वशे आज्ञायां स्थिराश्चाञ्चल्यरहितास्तिष्ठन्ति ॥१६६॥

एवं मनोरूपरथस्य दुष्टाश्वौ प्राणापानौ तं रथं सदैव विषया एवारण्यानि तेषां मार्गेषु इन्द्रियरूपेषु पातयन्ति । बहुवचनमार्षम्, पातयत इत्यर्थः । इन्द्रियमार्गेण सदा

निगृहीतौ यदा स्यातां तदा स्ववशगौ शिवे ।
सोऽपि द्विधा स्थितो देवि सबीजाबीजभेदतः ॥१६८॥
मन्त्रावर्तनयुक्तस्तु सबीजः परिकीर्तितः ।
निर्बीजस्त्वतथाभूतः सबीजः स्यादुपक्रमे ॥१६९॥
पश्चान्निर्बीज एव स्यादन्यथा नैव सिद्ध्यति ।
सोऽपि त्रिधा भवेद् देवि पूरकुम्भकरेचकाः ॥१७०॥
देशकालप्रमाणाभ्यामभ्यसेदधिकं क्रमात् ।
कञ्जकोशाभवक्त्रेण वायुमाकृष्य नासया ॥१७१॥

विषयेषु मनः पातयत इति भावः । प्रतिक्षणं यदा तौ प्राणापानरूपावश्वौ निगृहीतौ नियमितौ स्यातामित्यन्वयः ॥१६७॥

तदा वक्ष्यमाणप्राणायामाभ्यासेन निग्रहे कृते स्वस्य वशगौ स्वाभिमतेषु सद्विषयेष्वेव मनोरथप्रापकौ भवतः । तस्मादसद्विषयेभ्यो मनोनिवर्तने प्राणायाम एव मुख्यसाधनमित्युक्तं भवति । एवंविधोऽपि प्राणायामो बीजेन प्रणवादिना सहितः । नास्ति बीजं यस्मिन् सः । एवं सबीजाबीजभेदेन द्विधा स्थितः ॥१६८॥

तयोः स्वरूपं विविच्याह—मन्त्रेति । प्राणायामकाले मन्त्रावर्तनयुक्तः सबीजः । अतथाभूतः मन्त्रावर्तनरहितो निर्बीजः । उपक्रमे प्राणायामाभ्यासादौ सबीजोऽभ्यसनीयः स्यात् । प्राणायामो नाम श्वासप्रश्वासयोर्गतिविच्छेदः । तथा च सूत्रम्—"तस्मिन् सति श्वासप्रश्वासयोर्गतिविच्छेदः प्राणायामः" इति ॥१६९॥

पश्चात् कश्चित्कालं सबीजप्राणायामाभ्यासानन्तरम् । अन्यथा आदावेव निर्बीजप्राणायामाभ्यासे । अन्तेऽपि सबीजाभ्यासे च । नैव सिद्ध्यति । आदौ निर्बीजाभ्यासेन दुरदृष्टैर्विहतस्य अन्ते सबीजाभ्यासेन प्रत्याहाराद्ययोग्यचित्तस्य समाधिरूपं फलं नैव सिद्ध्यतीत्यर्थः । सोऽपि प्राणायामोऽपि । पूरककुम्भकरेचका इति त्रिधा ॥१७०॥

स त्रिविधः प्राणायामः । देशकालयोः प्रमाणाभ्यां क्रमादधिकमधिकमभ्यसेत् । यथा पूरके अनाहतादिमूलाधारपर्यन्तं वायुगतिः सूक्ष्मानुभवेन, रेचके नासापुटाद् बहिर्द्वादशाङ्गुलादिषट्त्रिंशदङ्गुलपर्यन्तं वायुगतिः संस्थापितसूक्ष्मतूलचलनेन, सबीजे बीजावृत्तिकालेन, निर्बीजे तालाभिहननमात्राकालेन—इति देशकालप्रमाणाभ्यां प्रत्यहमधिकमभ्यसेत् । एतच्च संख्योपलक्षणम् । अद्य प्राणायामानां त्रयं श्वश्चतुष्टयमित्यादि ।

वायुना पूर्णमुदरं पूरकं त्वभिधीयते ।
एवमन्तर्गतं वायुं निःसार्यान्येन वर्त्मना ॥१७२॥
निःशेषमन्तरं शून्यं रेचकं त्वभिधीयते ।
कुम्भकं तु द्विधा देवि बाह्याभ्यन्तरभेदतः ॥१७३॥
रेचकान्ते तु बाह्यं स्यात् पूरकान्ते तथान्तरम् ।
रेचपूरकयोरन्ते स्थिरावस्था तु कुम्भकम् ॥१७४॥
शुचौ तथैकान्तदेशे चैलाजिनकुशोत्तरे ।
निर्वातोपद्रवे देवि दृढासनतया स्थितः ॥१७५॥
गलं प्रवेशयन्नन्तश्चिबुकं चाधरस्थितम् ।
आदौ मेरुं तु संचाल्य भस्त्राशोधितमार्गकः ॥१७६॥

प्राणायामप्रकारमाह—कञ्जेति । कञ्जकोशो मुकुलितकमलं तदाकारवक्त्रेण । प्राणायामकाले यथा मुखाद्वायोर्गमागमौ न स्यातां तथा दृढसंवृतास्येनेति तात्पर्यम् । कञ्जकोशाभं वक्त्रं यस्य साधकस्य ॥१७१॥

एवंविधः साधकः । नासया वायुमाकृष्य तेन वायुनोदरं पूर्णं यत् कुर्यात्तदेव पूरकम् । एवमुदरान्तर्गतं वायुमन्येन पूरितनासापुटादन्येन द्वितीयेन नासामार्गेण बहिर्निसार्य ॥१७२॥

उदरान्तरं निःशेषं यथा तथा वायुना शून्यं यत् कुर्यात्तदेव रेचकम् । बाह्याभ्यन्तरभेदेन कुम्भकं द्विविधम् ॥१७३॥

रेचकान्ते वक्ष्यमाणरीत्या कृतं बाह्यकुम्भकम् । पूरकान्ते तथा वक्ष्यमाणरीत्या कृतमान्तरकुम्भकम् । कुम्भकलक्षणमेवाह—रेचेति । रेचकान्ते पूरकान्ते वा या स्थिरावस्था श्वासधारणरूपा, सा कुम्भकं स्यात् । तथा च सूत्रम्—"स तु बाह्याभ्यन्तरस्तम्भवृत्तिर्देशकालसंख्याभिः परिदृष्टो दीर्घसूक्ष्मः" इति । बाह्याभ्यन्तरस्तम्भेति रेचकपूरककुम्भकाख्यं त्रिविधं प्राणायाममुक्त्वा रेचकपूरकाभ्यां रहितं केवलकुम्भकमपि चतुर्थमुक्तं सूत्रे—"बाह्याभ्यन्तरविषयाक्षेपी चतुर्थः" इति ॥१७४॥

प्राणायामानुष्ठानप्रकारमाह—शुचाविति । शुचौ पावने । एकान्तदेशे जनसंघवर्जिते । वातेति शीतोष्णाद्युपलक्षणम् । निर्गता वाताद्युपद्रवा यस्माद्देशात् । दृढासनेत्यादि पूर्वोक्तासनानुवादः ॥१७५॥

गलम् अन्तःप्रवेशयन् अधोमुखत्वेनावस्थित्यानुन्नम्रगल इत्यर्थः । चिबुकम् अधरस्थितं वक्षोर्ध्वप्रदेशसंलग्नम् । कृत्वा प्राणायामं चरेदिति व्यवहितेनान्वयः ।

रेचयेद् वायुमादौ तु प्राणायामं ततश्चरेत् ।
अभ्यस्य पूरकं तद्वद्रेचकं च ततः परम् ॥१७७॥
कुम्भकं चान्तरं पश्चाद्बाह्यमप्यभ्यसेत् क्रमात् ।
न चालयेत् क्वचिच्चाङ्गं नेत्रयुग्मं निमीलयेत् ॥१७८॥
सकृदापूरयेद् देवि त्रिधा रेचनमाचरेत् ।
कुम्भकेऽपि त्रिधा वेगं नियच्छेत् क्रमतः शिवे ॥१७९॥
बीजावृत्त्या मात्रया च कालाधिक्यं समभ्यसेत् ।
देशाधिक्यं चानुभवात् गुरूक्त्या सर्वमेव तु ॥१८०॥

एवंविधप्राणायामस्यादौ । मेरुं संचाल्य । मेरुचालनं च मस्तकपरिवर्तनम् । मेरोर्मस्तकस्य सम्यक्प्रादक्षिण्याप्रादक्षिण्याभ्यां परिवर्तनं कृत्वा झटिति केवलरेचकपूरककरणं भस्त्रा । तया यन्नासया श्वासः प्रतिरुद्धो निर्गच्छति तच्छोधनम् अप्रतिरोधो यथा स्यात्तथा शोधितमार्गकः ॥१७६॥

प्राणायामादौ रेचकं कृत्वा ततः पूरकम् । ततः प्राणायामं कुम्भकं चाभ्यस्य तद्वत् पूर्ववत् परं द्वितीयरेचकं चरेदिति योजना ॥१७७॥

आदौ आन्तरं कुम्भकमभ्यस्य पश्चात्किञ्चित्कालानन्तरं क्रमाद् बाह्यकुम्भकमप्यभ्यसेत् । प्राणायामकाले क्वचिदप्यङ्गं न चालयेत् । नेत्रयुग्मं दृढं निमीलयेत् ॥१७८॥

पूरकं सकृत् मध्येऽविच्छेदेनैकरूपेण । रेचनं त्रिधा मध्ये विच्छेदद्वयेन खण्डत्रयरूपेण कुर्यात् । कुम्भकदशायां पूरकेण वायुर्हृदयाभिघ्नन्भिहत ऊर्ध्वं निर्गच्छति सवेगः । तं वेगं नियच्छेत् । उन्मज्जन्तं वायुं स्वप्रयत्नेन निमज्जयेत् । एवं वेगत्रयं नियच्छेत् । तदपि क्रमतः आदौ एकवेगनियमनं ततो वेगद्वयनियमनमित्यादि ॥१७९॥

सबीजप्राणयामे बीजावृत्त्या अधिकभूतया । निर्बीजे मात्रयाधिकभूतया कालाधिक्यमभ्यसेत् । देशाधिक्यमन्तरनाहतादिष्वभिघातं सूक्ष्मानुभवात् । बहिः सूक्ष्मतूलस्य सूक्ष्मचलनानुभवात् । अभ्यसेत् एतत्सर्वं गुरूक्त्यैव कुर्यात् न केवलं स्वबुद्ध्या पुस्तकाद्यवलोकनेन । यदुक्तम्—''मन्त्रमार्गो योगमार्गः साध्यः स्याद् गुरुमार्गतः । अन्यथाऽनर्थसम्पत्तिरन्धस्य गिरियानवत् ॥'' इति ॥१८०॥

एवं समभ्यसन् देवि प्राणायामं क्रमेण तु ।
ततश्चाश्चल्यमालस्यं निद्रा चापि क्षयं व्रजेत् ॥१८१॥
शुद्धं चित्तं धारणादियोग्यतां प्रतिपद्यते ।
एवं शुद्धेन चित्तेन प्रत्याहारं समभ्यसेत् ॥१८२॥
विषयेभ्यः स्वकीयेभ्यः परावृत्त्येन्द्रियाणि तु ।
आत्मशक्तिमनोमात्ररूपाणि तु विभावयेत् ॥१८३॥
प्रत्याहारस्तु संप्रोक्तस्तेनेन्द्रियजयो भवेत् ।
आधारानाहताज्ञासु मूर्ध्नि वान्यत्र कुत्रचित् ॥१८४॥
चित्तं तु धारयेदेतद् धारणा परिकीर्तिता ।
देशादिकं परित्यज्य चित्तमात्मनि तिष्ठतु ॥१८५॥

एवमुक्तप्रकारेण क्रमेण सम्यगादरनैरन्तर्यादिनाऽभ्यसन् यः पुरुषोऽस्ति तस्य । ततः अभ्यासात् । मनसः चाञ्चल्यम् । आलस्यं निद्राऽपीत्येतत्सर्वं सत्त्वप्रकाशावरकं क्षयं व्रजेत् । तथा च सूत्रम्—"ततः क्षीयते प्रकाशावरणम्" इति ॥१८१॥

एवं प्राणायामेन शुद्धम् अतिचाञ्चल्यालस्यमूढतादिरहितं धारणाध्यानादियोग्यतां प्राप्नोति । तथा च सूत्रम्—"धारणासु च योग्यता मनसः" इति । प्रति आह्रियन्ते बहिर्मुखानीन्द्रियाणि स्वात्मानं चित्तं प्रति चित्तानुरूपत्वेनाह्रियन्ते यस्मिन् स प्रत्याहारः ॥१८२॥

तमेवाह—विषयेभ्य इति । स्वकीयेभ्यः स्वसम्बन्धिभ्यो रूपादिविषयेभ्यश्चक्षुरादीन्द्रियाणि परावृत्य स्वस्वविषयेभ्यो विमुखीकृत्य । आत्मनो ज्ञानशक्तिभूतं यन्मनस्तन्मात्ररूपाणि मनोमयानीति विषयानिन्द्रियाणि च विभावयेत् ॥१८३॥

अयं प्रत्याहारः । तेन प्रत्याहारेण । इन्द्रियाणां जयः स्वाधीनता भवेत् । तथा च सूत्रम्—"स्वस्वविषयासंप्रयोगे चित्तस्वरूपानुकार इवेन्द्रियाणां प्रत्याहारः । ततः परमा वश्यतेन्द्रियाणाम्" इति । षष्ठाङ्गमाह—आधारेति । अन्यत्र कुत्रचित् नासाग्रभ्रूमध्यादिषु । चित्तं धारयेदित्यन्वयः ॥१८४॥

आधाराद्युक्तस्थानेषु चित्तस्य धारणं तत्तदाकारपरिणतचित्तवृत्तेः पुनः पुनरवष्टम्भो धारणा । तथा च सूत्रम्—"देशबन्धश्चित्तस्य धारणा" इति । सप्तमाङ्गमाह—देशेति । आधाराद्यान्तरं देशं नासाग्रादिकं च परित्यज्य चित्तस्य तदाकारपरिणतिं विहाय आत्मनि संविद्रूपे तिष्ठत्वित्यैवं संकल्प्येत्यन्वयः ॥१८५॥

संकल्प्यैवंविधं चित्तं ध्यानमित्यभिधीयते ।
समाधिर्द्विविधः संज्ञातश्चासंज्ञात एव च ॥१८६॥
अविच्छिन्नमेतदेव समाधिरभिधीयते ।
अष्टानां च पुरोक्तानां समाधिः फलमुच्यते ॥१८७॥
संस्मृतावपि विच्छेदाद् ध्यानं प्रोक्तं महेश्वरि ।
अविच्छेदात् संस्मृतौ तु समाधिः स्याद् गुणात्मकः ॥१८८॥
असंस्मृतावविच्छेदात् समाधिः फलमुच्यते ।
संज्ञातो गुणभूतः स्यादसंज्ञातः फलं भवेत् ॥१८९॥

एवंविधम् आत्मनि तिष्ठत्विति संकल्प्यात्मनि स्थितं चित्तमात्मन्येव चित्तस्यावस्थापनं ध्यानम् । तथा च सूत्रम्—"तत्र प्रत्ययैकतानता ध्यानम्" इति । यद्यपि तत्राधारादिषु प्रत्ययानां चित्तवृत्तीनाम् एकतानता धारणायां यद्विसदृशप्रत्ययेनान्तरितत्वं तदभाव एकाकारप्रत्ययप्रवाहो ध्यानमित्युक्तम्, तथाप्याधारादिषु ध्यानादिकं विविधसिद्धिप्रयोजकत्वेनोक्तम् । प्रकृते आत्मज्ञानस्यैव साध्यत्वे तद्ध्यानादिकमुच्यत इति । अष्टमाङ्गं वक्तुमाह—समाधिरिति । संज्ञातः सम्प्रज्ञातः । असंज्ञातोऽसम्प्रज्ञातः ॥१८६॥

तत्रादौ सम्प्रज्ञातमाह—अविच्छिन्नमिति । एतद्ध्यानमेवाविच्छिन्नं सत् समाधिरुच्यते । एवं यमाद्यष्टाङ्गानां पुरा आदावुक्तानामसंज्ञातः समाधिः फलम् ॥१८७॥

अधुना ध्यानसमाधीनां स्वरूपभेदमाह—संस्मृताविति । इदमत्र तात्पर्यम्—आत्मनि चित्तं तिष्ठतु इति यः संकल्पः कृतः, तत्संकल्पस्य विस्मरणे क्वचिद्देशादौ चित्तं गच्छति । अतोऽविस्मरणेनैव ध्येयं चित्तेनावष्टभ्य स्थेयम् । एवं स्थिते यावन्मध्ये मध्ये तत्संस्मरणविच्छेदेन ध्येयं चित्ताद्विच्छिद्यते तावद् ध्यानमुच्यते । ध्यानाभ्यासप्रकर्षेण स्वाभिमतकालपर्यन्तं संस्मृतेरविच्छेदे सम्प्रज्ञातसमाधिः । सम्प्रज्ञातसमाध्यभ्यासप्रकर्षेण संस्मरणमनपेक्ष्य ध्येयस्याविच्छेदेऽसम्प्रज्ञातसमाधिरिति । अपिना ध्येयस्यापि । संस्मृतावविच्छेदादेव ध्येयाविच्छेदे गुणात्मकः अङ्गभूतः सम्प्रज्ञातः ॥१८८॥

संस्मरणाभावेऽपि ध्येयाविच्छेदात् फलभूतोऽसम्प्रज्ञातः । समाधिद्वये एकमङ्गमेकं फलमिति स्पष्टमाह—संज्ञात इत्यादि । श्रीपतञ्जलिरमुमेवार्थं भङ्ग्यन्तरेणोवाच । तथा च सूत्रम्—"तदेवार्थमात्रनिर्भासं स्वरूपशून्यमिव समाधिः" इति, "वितर्कविचारानन्दास्मितानुगमात् संप्रज्ञातः । विरामप्रत्ययाभ्यासपूर्वः संस्कारशेषोऽन्यः" इति च ॥१८९॥

फलमेषां प्रवक्ष्यामि चतुर्णां क्रमतः शृणु ।
प्रत्याहारेण चित्तस्य भवेदक्षिप्तता द्रुतम् ॥१९०॥

अनेकवासनाजालनिवृत्त्या परमेश्वरि ।
धारणाभ्यासयोगेन चित्ते चैकाग्रतोद्भवः ॥१९१॥

ध्यानेन तस्याः स्थिरता समाध्या निर्विकल्पता ।
संज्ञातया समाध्या तु असंज्ञाता प्रजायते ॥१९२॥

निरोधयत्नबाहुल्याद् व्युत्थानक्षपणेन च ।
चित्तं प्रतिक्षणं शान्तं भवत्यतिसुनिर्मलम् ॥१९३॥

निस्तरङ्गसुधाम्भोधिसन्निभं परमं पदम् ।
निर्वातदीपकलिकाकारमत्यन्तनिश्चलम् ॥१९४॥

प्रत्याहारादीनां फलं वक्तुमाह—फलमिति । क्षिप्तं मूढं विक्षिप्तमेकाग्रं निरुद्धमिति चित्तं पञ्चधाऽवस्थितं भवति । बहिर्विकल्पैकरूपं क्षिप्तम् । क्रोधादिनाऽनुसन्धानरहितं मूढम् । दुःखपरिहारेण सुखमात्रप्रवृत्तं विक्षिप्तम् । एकाग्रता धारणध्यानयोः । निरुद्धं समाधाविति । प्रत्याहारस्य क्षिप्ततानाशः फलम् ॥१९०॥

धारणाभ्यासेनानेककामादिवासनाक्षयादेकाग्रतोत्पद्यते ॥१९१॥

तस्याः एकाग्रतायाः । समाध्या संप्रज्ञातसमाधिना । निर्विकल्पता एकाग्रतायाः प्रकर्षो निरुद्धता । एवंविधनिर्विकल्पत्वमेवासंप्रज्ञातरूपं संप्रज्ञातसमाधेः फलमित्याह—संज्ञातेति । संज्ञातेन समाधिना ॥१९२॥

असम्प्रज्ञातसमाधेरविघ्नेन संपत्तये निरोधपरिणामोपायमाह—निरोधेति । अत्रायमभिप्रायः—अन्यन्न चिन्तनीयमेतदेव चिन्तनीयमिति यदा संकल्प्य समाधौ तिष्ठति, तदा अन्यन्न चिन्तनीयमिति योऽयं निरोधस्तत्संस्कारोऽन्तस्तिष्ठति । तथा अनेकजन्माभ्यस्तस्य व्युत्थानस्य विषयान्तरचिन्तनस्य संस्कारोऽपि तिष्ठति । तत्र निरोधसंस्कारस्य पुनः पुनर्दृढीकरणरूपयत्नबाहुल्याद् व्युत्थानसंस्कारोदयकाल एव तस्य क्षपणं तदनुल्लेखेन नाशनं कर्तव्यमिति । निरोधसंस्कारस्य यत्नबाहुल्याद् व्युत्थानसंस्कारक्षपणं कर्तव्यम् । तेन क्षपणेन चित्तं क्षणे क्षणे शान्तं क्रोधादिसंस्काररहितम्, अत एव सुनिर्मलं क्रोधादिक्षोभरहितं भवति । तथा च सूत्रम्—"व्युत्थाननिरोधसंस्कारयोरभिभवप्रादुर्भावौ निरोधक्षणचित्तान्वयो निरोधपरिणामः" इति ॥१९३॥

एवमभ्यासिनोऽसंप्रज्ञातसमाधावुपलभ्यस्वरूपं वर्णयन् फलमभिदधाति—निस्तरङ्गेति । निर्गतास्तरङ्गाः विकल्परूपा यस्मादेवंविधसुधाम्भोधिसन्निभम्

किञ्चित्पदं समाप्यैवमनिवृत्तिं लभेदसौ ।
एष गुप्तो महापन्थाः सर्वार्थखनिरूपकः ॥१९५॥
गत्वा स निर्भयो देवि यथेच्छं चरतीश्वरि ।
पूज्यं तस्य नेतरत् स्यात्तत्पदं दृढमाश्रितः ॥१९६॥
पिबन् वीथीषु कान्ताभी रमन् स्वैरविहारतः ।
मन्त्रपूजाविहीनोऽपि विचरन् भैरवाश्रयः ॥१९७॥
जनानामनुगृह्णन् वै सर्वां पर्यटते महीम् ।
जीवन् वापि मृतो वापि न मुक्तिं प्राप्नुयात् क्वचित् ॥१९८॥

अपरिच्छिन्नानन्दमयत्वेन सुखामृतसमुद्रकल्पम् । परमं सर्वोत्तमं पदम् आश्रयम् । निर्गतवायुदेशस्थदीपकलिकेव निश्चलप्रकाशैकरूपम् । तदेव स्पष्टमाह—अत्यन्तनिश्चलमिति ॥१९४॥

एवंविधं किञ्चित्पदं वाचा मनसा वा निर्देष्टुमशक्यस्थानं सम्यगपरोक्षेणाप्युपलभ्य अनिवृत्तिं तत्स्वरूपादच्युतिमसौ साधको लभेत् । एवं प्रकरणं समाप्य प्रतिपादितमर्थं स्तौति—एष इति । एष सम्प्रति प्रोक्तो योऽर्थः, स महापन्थाः परपुरुषार्थप्रापकत्वेनोत्तमो मार्गः । गुप्तः परशिवकृपाविधुरैरनासादितगुरुवरणैः पशुभिर्न दृष्टः । सर्वैरर्थ्यमानस्य परमानन्दस्वरूपरत्नपूर्णः खनिरूपकः आकरस्वभावः ॥१९५॥

एवंविधं पन्थानं गत्वा प्राप्य जननमरणादिभयान्निर्गतो यथेच्छं चरति विधिनियन्त्रणरहितो भवति । आद्यप्रश्नस्यैवैतावता ग्रन्थेनोत्तरमुक्तमिति सूचयन्नाह—पूज्यमिति । कुत इति चेदाह—तदिति । यतस्तत्पदं पूज्यस्वरूपं दृढं स्वात्मत्वेनाश्रितः ॥१९६॥

एवंविधयोगिनः किंविधमाचरणादिकमित्याशङ्क्याह--पिबन्निति । स्वैरं स्वेच्छामात्रनिमित्तकः, न तु विधिनिषेधनियन्त्रितः, विहारो विहरणमाचरणं यस्य । विहारत इति भावप्रधानो निर्देशः, विहारत्वादित्यर्थः । वीथीषु राजमार्गेषु पिबन् कान्ताभी रमन् । भैरवः परशिव एवाश्रयो विषयः सर्ववृत्तीनां यस्य, सर्वत्र परशिवदर्शीति यावत् । एवंविधो मन्त्रपूजारहितोऽपि तत्र तत्र विहरन् । जनानामनुगृह्णन्ननुग्रहं कुर्वन् सर्वां महीं यथेच्छं पर्यटत इत्यन्वयः ॥१९७॥

एवंविधस्य योगिनो मुक्तिः कदेत्याशङ्कायामाह—जीवन्निति । जीवन् वापि जीवनक्रियया देहादिचेष्टायुतोऽपि । मृतो वापि तद्रहितोऽपि । क्वचिदपि काले देशे

नित्यमुक्तस्वरूपत्वात् सदाशिवमयत्वतः ।
न बन्धस्तस्य कस्माच्चिदतो मुक्तिर्न विद्यते ॥१९९॥

देव्युवाच—

साधकस्य विधानं तु प्रोक्तं सुबहुविस्तरम् ।
अननुष्ठाय तत्सर्वं दुःखमाप्नोति सर्वथा ॥२००॥
कथमभ्यासनिरतो भवेत् साधकसत्तमः ।
एतन्मे संशयं देव छेत्तुमर्हसि भैरव ॥२०१॥

भैरव उवाच—

साधु पृष्टं महादेवि लोकानां हितकाम्यया ।
वक्ष्यामि तदशेषेण सर्वत्रैव सुगोपितम् ॥२०२॥
प्राग्जन्मार्जितसंपत्त्या साधनानां तु साधकः ।
शक्तिपातवशाद्देवि सकृत्प्रज्ञां समाश्रितः ॥२०३॥

वा मुक्ति न प्राप्नुयात् ॥१९८॥

मुक्त्यर्थमेवं साधितयोगादेः कुतो न मुक्तिरिति चेदाह—नित्येति। एवंविधस्य कस्माच्चिदपि कुतश्चिदपि यतो बन्धो न, अतोऽस्य मुक्तिर्न विद्यते। सति बन्धे मुक्तिरिति भावः। तदुक्तमनुत्तराष्टके—"संसारोऽस्ति न तत्त्वतस्तनुभृतां बन्धस्य वार्तैव का, बन्धो यस्य न जातु तस्य वितथा मुक्तस्य मुक्तिक्रिया" इति। नन्वस्य कुतो न बन्ध इति चेदाह—सदाशिवेति। सदाशिवात्मकत्वात्। नन्वेवमभ्यासात् पूर्वं बन्धः स्थित एवेति चेदाह—नित्येति। नित्यमुक्तस्वस्वरूपे एवामुक्तताभ्रान्ति-निरसनमेवैतावता कृतं नापूर्वं किञ्चित् सम्पन्नमिति भावः ॥१९९॥

ननु एवं सिद्धस्य परशिवात्मनः पूज्यस्यान्यस्याभावात् पूजादिकं मास्तु साधकेन तु सर्वं कर्तव्यमेव। ततश्च नित्यकर्मरतस्य कथं निरुक्तसाधनं संभवेदिति प्रष्टुं देव्यु-वाचेति। साधको दुःखमाप्नोत्येव ॥२००॥

सर्वकर्मकरणाभ्यासयोर्यौगपद्यासंभवात् साधकः कथमभ्यासनिरतो भवेत् ॥२०१॥

उत्तरं भैरव उवाचेति ॥२०२॥

यस्य प्राग्जन्मशतसंपादितसाधनसम्पत्त्या अनुपायेन शाम्भवोपायेन वा सम्य-क्प्रज्ञोदयस्तस्य कर्मकरणेऽकरणे वा न किञ्चिद् बाधकमित्याह—प्राग्जन्मेति।

अथ षष्ठः पटलः

देवी उवाच

पुरा श्रुतं महादेव ! शवसाधनमेव च ।
श्मशानसाधनं नाथ श्रुतं परममादरात् ॥ १ ॥
न स्तोत्रं कवचं नाथ ! श्रुतं न शवसाधने ।
कवचेन महादेव ! स्तोत्रेणैव च शङ्कर ॥
कथं सिद्धिर्भवेद् देव ! कवचं ब्रूहि साम्प्रतम् ॥ २ ॥

श्रीशिव उवाच

शृणु देवि वरारोहे दुर्गे ! परमसुन्दरि ।
सिद्ध्यर्थे विनियोगश्च कवचस्य नियन्त्रणात् ॥ ३ ॥
सिद्धिं सिद्धेश्वरी पातु मस्तकं पातु कालिका ।
कपालं कामिनी भालं पातु नेत्रं नगेश्वरी ॥ ४ ॥
कर्णौ विश्वेश्वरी पातु हृदयं जगदम्बिके ।
काली सदा पातु मुखं जिह्वां नीलसरस्वती ॥ ५ ॥
करौ करालवदना पातु नित्यं सुरेश्वरी ।
दन्तं गुह्यं नखं नाभिं पातु नित्यं हिमात्मजा ॥ ६ ॥
नारायणी कपोलं च गण्डा गण्डं सदैव तु ।
केशं मे भद्रकाली च दुर्गा पातु सुरेश्वरी ॥ ७ ॥
पुमान् रक्षतु मे चण्डी धनं पातु धनेश्वरी ।
स्तनौ विश्वेश्वरी पातु सर्वाङ्गं जगदीश्वरी ॥ ८ ॥
उग्रतारा सदा पातु महानीलसरस्वती ।
पातु जिह्वां महामाया पृष्ठं मे जगदम्बिका ॥ ९ ॥

हरप्रिया पातु नित्यं श्मशाने जगदीश्वरी ।
शवे पातु च शर्वाणी सदा रक्षतु चण्डिका ॥ १० ॥

कात्यायनी कुलं पातु सदा च शववाहिनी ।
घोरदंष्ट्रा करालास्या पार्वती पातु सर्वदा ॥ ११ ॥

कमला पातु राज्यं मे मन्त्रं मन्त्रेश्वरी तथा ।
इत्येवं कवचं देवि ! देवानामपि दुर्लभम् ॥ १२ ॥

यः पठेत् सततं देवि ! सिद्धिमाप्नोति निश्चितम् ।
सिद्धिकाले समुत्पन्ने कवचं प्रपठेद् यदि ॥ १३ ॥

अज्ञात्वा कवचं देवि ! यश्च सिद्धिमुपक्रमः ।
यश्च सिद्धिमवाप्नोति न मुक्तिर्न च सद्गतिः ॥ १४ ॥

अत एव महामाये ! कवचं सिद्धिकारकम् ।
देवानां च नराणां च किन्नराणां च दुर्लभम् ॥ १५ ॥

पठित्वा कवचं चण्डि ! शीघ्रं सिद्धिमवाप्नुयात् ।
महोत्पाते महादुःखे महाविपदि सङ्कटे ॥ १६ ॥

प्रपठेत् कवचं देवि ! पठित्वा मोक्षमाप्नुयात् ।
शून्यागारे श्मशाने वा कामरूपे महाघटे ॥ १७ ॥

स्ववामामन्दिरे कालेऽप्यथवा काममन्दिरे ।
मन्त्रं मन्त्री जपेद् बुद्ध्या भक्त्या परमया युतः ॥ १८ ॥

मूले दले फले वापि नले कालेऽनिले मले ।
जले पठेत् प्राणबुद्ध्या मनसा साधकोत्तमः ॥ १९ ॥

नाडीशुद्धिं ततः कृत्वा भावशुद्धिं महेश्वरि ! ।
विहरेद्धरिमध्ये च सर्वशास्त्रार्थकोविदः ॥ २० ॥

चितामारुह्य सिद्धेशो नीलकण्ठत्वमाप्नुयात् ।
वामे चलति का नाडी दक्षिणे खलु जाह्नवी ॥ २१ ॥

मध्ये कुलाचला नाडी दुर्लभा धरणीतले ।
चित्रिणी पद्मिनी शङ्खा विजृम्भा शोणदा तथा ॥ २२ ॥

कङ्काला कूटजा नाडी कपोला गोलजा खला ।
निजदेहे वसन्त्येता ब्रह्मनाडीं समाश्रिताः ॥ २३ ॥

सर्वासां धरणीमध्ये गौरी सूक्ष्मा च तारिणी ।
घण्टाकर्णा लोलजिह्वा विकटा चन्द्रवल्लभा ॥ २४ ॥

महानीला वीरभद्रा सुलज्जा नखदा शुभा ।
बलाका काकिनी राका कालघण्टा शिवा सिता ॥ २५ ॥

दर्दुरा च दुराराध्या विशोकवदनाऽनघा ।
जम्भिनी पुक्कसा शोणा यशोदा मखदा खदा ॥ २६ ॥

खगा खरवती नाडी कोला हेला हलाहला ।
इडा च पिङ्गला चैव सुषुम्ना प्राणरूपिणी ॥ २७ ॥

गान्धारी कोटराक्षी च कुलजा कुलपण्डिता ।
सव्ये कनखला नाडी दक्षिणे कामपालिका ॥ २८ ॥

विहारं नीलकण्ठस्य देवानामपि दुर्लभम् ।
क्रोडे विश्वम्भरा कामा कराला मेघवाहिनी ॥ २९ ॥

घनभा घनदा चण्डी सुशीला वरपण्डिता ।
विश्वारण्या विश्ववसनी बहुपादा कटाक्षजा ॥ ३० ॥

नन्दिनी शोणदा गङ्गा काशी कमलवासिनी ।
एवं यदि महामाये भावयेत् सुरपूजिताम् ॥ ३१ ॥

तदैव जायते सिद्धिः सत्यं सत्यं न संशयः ।
बहुपादकटा घोरा निर्जिता घनभेदिनी ॥ ३२ ॥

नाडीविहारसम्पर्काज्जीवन्मुक्तो न संशयः ।
शृणु देवेशि ! घोराभे करालाभे दिगम्बरे ॥ ३३ ॥

चिन्तामणिप्रसादेन किं न सिध्यति भूतले।
मूले चतुर्दले पद्मे स्वाधिष्ठाने च षड्दले ॥ ३४ ॥

मणिपूरेऽनाहते च आज्ञाचक्रे महेश्वरि !।
एवं चक्रे परिन्यस्तैर्दशद्वादशषोडशैः ॥ ३५ ॥

दलैस्तु मङ्कुरं वर्णं न्यस्तं गावशतं मतम्।
यत्र कालीपुरं देवि ! ब्रह्माद्यैरपि सेवितम् ॥ ३६ ॥

नीलकण्ठं त्रिलोकेशं सहस्राब्जनिवासिनम्।
कोटीशं कुलकोटीशं साधकेन्द्रैः सुशोभितम् ॥ ३७ ॥

ध्यायेत् परमनिर्विण्णो देवः परमपावनः।
जीवः शिवस्तु विज्ञेयो विश्वेशः सर्वदा रतिः ॥ ३८ ॥

ब्रह्मतत्त्वं वरारोहे ! देवानामपि दुर्लभम्।
स्वरादिनिष्ठितं लिङ्गं स्वरव्यञ्जनभूषितम् ॥ ३९ ॥

वर्णमालापरिन्यस्तं लिङ्गं भुवनशोभितम्।
महाबीजं महोत्साहैर्नादितं परमात्मकम् ॥ ४० ॥

नीलकण्ठं महादेवं सदा शक्तिसमन्वितम्।
ध्यायेत् तु पूजयेद् देवं मनसा वचसा इति ॥ ४१ ॥

तदैव साधको लोके चान्तर्यागपरायणः।
अन्तर्यागं महामाये ! साधकानामगम्यकम् ॥ ४२ ॥

शत्रोर्वा [20]मारणे [21]दाहे [22]श्रेयसे [23]चात्मनः सदा ॥४७॥
[24]तुलारोहविधाने च [25]प्रयोगार्थे बलोत्कटा ॥
[26]वेगवद्भिः [27]करालास्त्रैर्मयूखैः संप्रयोजिता[28] ॥४८॥
करोति [29]विगतक्लेशं दग्धपापतनुं नरम्[30] ।

---

[1] ०स्तटित्पुञ्ज० — ख, घ, छ, ज.

[2] प्रदेहेऽप्यन्ते दी० — ख; प्रदहन्तेन दी० — घ, छ, ज; प्रददाह सुदीप्तात्मा — च.

[3] कारणानि — ख.

[4] यावत्प्रद्योतयद्विश्वं — ख; यावत्प्रद्योतयेद्विश्वं — छ, ज.

[5] 'ख, घ, छ, ज' मातृकासु '४२' चतुर्थपादस्य '४३' प्रथमद्वितीयपादयोश्च स्थाने 'पथाप्तमितविक्रमः' इत्येक एव पादो दृश्यते।

[6] धारयेद्याग० — ख; धारयेन्योग० — घ.

[7] शिखामालाकुलोज्ज्वलाम् — च.

[8] ववरेभ्यः — ख.

[9] स..र्थेभ्यो — ख.

[10] उत्वणात् — ख, घ; उद्वणात् — छ, ज.

[11] तिर्यकच्छासोर्ध्व० — ख; तिर्यक् श्वासोर्ध्व० — घ, छ, ज

[12] प्रयोज्यातीव — ख, घ, छ, ज; प्रयान्त्योऽतीव — च.

[13] विचित्र(न्त ?) येत् साधकेन्द्रो — च.

[14] भस्मभूतं — छ, ज.

[15] स्वं — च.

[16] पापं जितश्लेष्मा० — ख, घ, छ; पापः शीतः श्ले० — च.

[17] विघ्नाश्चोर्ध्वं समा० — ख, घ, छ, ज.

[18] तु — ख.

[19] ०जा..विधा अपि — ख; ०जानि विधा अपि — घ, छ, ज.

[20] मरणे — ख, घ, छ, ज.

[21] दाहःश्रे० — च.

[22] श्रयसे — घ.

[23] वात्मनः — च.

[24] तुलापुरुषविधाने वा — ख, घ; तुल्या पुष्टविधाने वा — छ; तुलापृष्टविधाने वा — ज.

[25] प्रयोगार्धो बलोत्कटः — ख, घ, छ, ज; प्रयोगाध्वगमोत्कटा — च.

[26] वेगवद्भंकरा स्वग्रै० — छ; वेगवद्भंकुराग्रै० — ज.

[27] करास्वाग्रै० — ख, घ.

[28] ०योजितः — ख, घ, च, छ, ज.

[29] लिङ्गतः क्लेदं — ख; लिङ्गतः क्लेशं — घ; लिङ्गतक्लेशं — छ, ज.

[30] तनुर्नरः — ख, घ, छ; पापं तनुर्नरः — ज.

[[1]वारुणी]

[2]प्राक्पदेनामृतं [3]तत्त्वं प्रतिष्ठोत्कृष्टवर्चसम् ॥४९॥
[4]ध्यायेदाविद्धचित्तात्मा[5] पयोभूतेन वर्त्मना[6] ।
संतताभिरमोघाभिरधोवक्त्राभिरादरात् ॥५०॥
[7]स्फुरच्छीकर[8]संपातप्रभूतहिमगादिभिः[9] ।
[10]धाराभिरखिलं विश्व[11]मापूर्य तद्विचिन्तयेत् ॥५१॥
[12]ब्रह्मरन्ध्राब्जसंक्षोभाद्[13]यावद्धृदयगोचरम्[14] ।
सुषुम्नान्तर्गतो भूत्वा संपूर्णेन्दुकृतालयः ॥५२॥
[15]तिष्ठेत्तावत्सुयुक्तात्मा निस्तरङ्गेण[16] वारिणा ।
[17]विप्लाव्य [18]हिम[19]संस्पर्शतोयेनामृतमूर्तिना[20] ॥५३॥

---

[1] 'हृदये धारयेद्विद्वान्सौम्यां सोमसृतां कलाम् ॥
तस्यां वै धार्यमाणायां सर्वत्राप्यायनं भवेत् ॥
(रौरवे विद्या० ७.७);
ओं श्रीं ओं नमः शिवाय प्लावय अमृताया-
मृतयोनये। सत्ये सत्ये शान्तब्रह्मण्ये वरिष्ठयोगं
धर धर प्लावयामृतेन। सौम्यां हृदि धारयेत्।
(रौरवे विद्या० पृ० १८३);
हृदये धारयेत्सौम्यां सदा सोमसमाश्रये।
आप्याययति सर्वाणि यया योगपदस्थितः ॥
(स्वायंभुवे० ३६.३ उ०, ४पू०);
पूर्वोक्तवारिसंयुक्तः सौम्ये बिन्दुयुतः स्वयम्।
तोयमण्डलमध्यस्थः परितस्तेन वेष्टितः ॥
शान्तिपुष्टिकरी चेयमुपसर्गविसर्जनी।
(किरणे योग० १.२२, २३पू०);
शिरो धीरं च कारं च कण्ठं चाधोमुखे स्मरेत्।
ध्यायेदच्छिन्नचित्तात्मा भूयो भूतेन चात्मना ॥
स्फुरच्छीकरसंस्पर्शप्रभूते हिमगामिभिः।
धाराभिरखिलं विश्वमापूर्य भुवि चिन्तयेत् ॥
ब्रह्मरन्ध्राच्च संक्षोभाद्यावदाधारमण्डलम्।
सुषुम्नान्तर्गतो भूत्वा संपूर्णेन्दुकृतालयम् ॥
संप्लाव्य हिमसंस्पर्शतोयेनामृतमूर्तिना।
क्षुत्पिपासाक्रमप्रायः संतापपरिपीडितः ॥
धारयेद्वारुणीं मन्त्री तुष्टचर्थं चाप्यतन्त्रितः।
वारुणी धारणा प्रोक्ता'
(अग्निपु० ३७५.११–१५).

[2] प्राक्पदेन प्रणवेनेत्यर्थः; मतङ्ग० क्रिया.१.६० उ०; प्राक्पदेशामृत तद्वप्रकृष्टो० — छ.
[3] तत्त्वप्रकृष्टो० — ख, घ, ज.
[4] ध्यायेद्वा सिद्धवर्त्मा — ख, घ; ध्यायेध्वा सिद्धवर्त्मा — छ, ज.
[5] आविद्धचित्तः आत्मा=आविद्धचित्त आत्मा ततः संधिरार्षः।
[6] ०भूतेन सिवत्मना — घ; ०भूतेन सवर्त्मना — छ, ज.
[7] सुरः शिखर० — ख; स्फुरः शिखर० — घ; स्फुरच्छिखर० — छ, ज.
[8] ०संपातां — ख, घ, छ, ज.
[9] ०हिमगामिभिः—च, ज; ०हिमगामभिः—छ.
[10] धारिभिरखिलं — च.
[11] ०मापूर्यन्तं विचिन्त० — ख, घ, च, छ, ज.
[12] ब्रह्मरन्ध्रान्नसं० — च.
[13] चित्तं हृदय० — ओ; यायाद्धृदयगोचरे — ख.
[14] ०गोचरे — घ, छ, ज.
[15] तिष्ठत्तावत्सुषुम्नात्मा — ओ; तिष्ठेत्यावत्सु० — छ, ज.
[16] ०रङ्गेन — ख, घ.
[17] प्रह्लाद्य — ओ, ख, घ, छ, ज.
[18] ०भिमसं० — ओ; हिमहृस्पर्श० — ख, घ, छ, ज.
[19] ०संस्पर्शात्तोये० — च.
[20] ०मूर्तिनः — छ, ज.

क्षुत्पि[1]पासाक्लमायाससंतापपरिपीडितः[2] ।
धारयेद्धारणां[3] मन्त्री [4]पुष्टयर्थं वाप्यतन्द्रितः ॥५४॥

[[5]ईशानी]

व्योमरूपाय शब्देन [6]कर्णिकोत्थेन वर्चसा ।
[7]प्रगुणेन सुशुभ्रेण सूक्ष्मेणातिगरीयसा ॥५५॥
मार्गेण ब्रह्मरन्ध्रान्तःसर्पिणा[8] साधकोत्तमः ।
यायाच्छिखाग्र[9]समयं [10]यत्तत्तेजोमयं शुभम् ॥५६॥
[11]तस्मिन्मनः समारोप्य [12]जगद्व्याप्याखिलं सुधीः ।
[13]तिष्ठेत्प्रसन्नचित्तात्मा शिवोऽहमिति [14]भावयेत् ॥५७॥
[15]अस्यां विधार्यमाणायां जगत्यस्मिन्द्विजोत्तम ।

---

[1] ०पासः क्लमः प्रायः . . परि० — ओ; ०पायाक्षक्लमा० — ख; ०पासक्लमायस० — घ; ०पासाक्रमप्रायः सं० — च; ०पासान्माससं० — छ; पांसात्माससं० —ज.

[2] ०परिपीडिताः — ओ; परपीडितः — छ, ज.

[3] ०द्धारणं — ओ; ०द्वारणान् — च; ०ध्वारणं — छ, ज.

[4] पुष्पार्थं चाप्य० — च; पुष्यद्धं – छ; पुष्यर्थं — ज.

[5] 'ऐशानीं धारयेन्मूर्ध्नि सर्वसिद्धिकरीं नृणाम् ।
यया प्रयान्ति वै क्षिप्रं शिवस्य परमं पदम् ॥'
(रौरवे विद्या० ७.८);
'ओं ओं श्रीयोगरूपायानाश्रिताय सर्वप्रभवे ज्योतीरूपाय नमः ठ ठ। ऐशानीं शिरसि धारयेत् ।'
(रौरवे विद्या० पृ० १८३);
'धारयेन्मूर्ध्नि चैशानीं सर्वेशानीं विचक्षणः ।
यया तु योगिनः सर्वे प्रयान्ति परमं पदम् ॥'
(स्वायम्भुवे ३६.४उ०, ५पू०);
'अकारबिन्दुसंयुक्तो नादशक्तिसमन्वितः ।
बिन्दुरक्षितसर्वाङ्गो ललाटस्थानसंश्रितः ॥
तदा तपःस्थितो योगी भवेन्मृत्युबहिष्कृतः ।'
(किरणे योग० १.२५, २६पू०);
'ऐशानीधारणां शृणु ॥
व्योम्नि ब्रह्ममये पद्मे प्राणापाने क्षयं गते ।
प्रसादं चिन्तयेद्विष्णोर्यावच्चिन्ता क्षयं गता ॥
महाभावं जपेत्सर्वं ततो व्यापक ईश्वरः ।
अर्धेन्दुं परमं शान्तं निराभासं निरञ्जनम् ॥
असत्यं सत्यमाभाति तावत्सर्वं चराचरम् ।
यावत्स्वच्छन्दरूपं तु न दृष्टं गुरुवक्त्रतः ॥
दृष्टे तस्मिन्परे तत्त्वे आब्रह्म सचराचरम् ।
प्रमातृमानमेयं च ध्यानहृत्पद्मकल्पनम् ॥
मातृमोदकवत्सर्वं जपहोमार्चनादिकम् ।'
(अग्निपु० ३७५.१५उ०–२०पू०).

[6] कर्णिको येन — ओ; कर्णिकोक्तेन — ख.

[7] प्रागुणेन तु — ओ; प्रागुणेन सु० — ज.

[8] ०रन्ध्रान्तसक्तिना — ख, घ, छ, ज.

[9] समयः=अवधिः.

[10] तत्तत्तेजो० — ज.

[11] तस्मिञ्जनसमा० — ओ.

[12] जगद्व्याप्त्या० — ओ.

[13] तिष्ठेत्प्रसाद०—ख, घ, छ, ज; चिन्तेत्प्रसन्न० — च.

[14] भावयन् — च.

[15] अनया धार्यमाणायाः — ओ; अस्यान्वाहार्यमाणाय — ख, घ; अस्यान्वार्यमाणाय — छ, ज.

[1]संप्राप्नोत्यचिरेणैव [2]प्रभुत्वमजुगुप्सितम् ॥५८॥
धारणेयं सदा [3]धार्या [4]विश्वेशानी शिवंकरी ।

[[5]अमृता]

[6]सकारसंपुटस्थेन सूक्ष्मशब्देन योगयुक् ॥५९॥
कुन्देन्दुशङ्खधवलं[7] सान्द्रमत्युल्बणं[8] शुभम् ।
[9]बिन्दोर्विनिर्गतं शीतं [10]कल्लोलललितालयम् ॥६०॥
संपूर्णमण्डलं व्योम्नि [11]अमृतस्यन्दचनिन्दितम् ।
तज्ज्यो[12]त्स्नाविद्धमात्मानमुदारमनिवारितम् ॥६१॥
संपूर्णेन्दुनिभं ध्याये[13]न्मण्डलं कर्णिकोपरि ।
[14]तत्स्थं सं[15]चिन्त[16]येद्विद्वाञ्शशाङ्कायुतवर्चसम् ॥६२॥

---

[1] संप्रोप्नो० — ओ; संप्राप्तोत्य० — च; संप्रपौत्यचिरे० — छ, ज.

[2] प्रगुप्तमजु० — ख, घ; प्रागुप्तमजु० – छ, ज.

[3] धार्य — ओ.

[4] विश्वेशानि शिवंकर — ख, घ; विश्वेशाना शिवंकरी — च; विश्वेशानिवशंकर — छ; विश्वेशानिवंकर — ज.

[5] 'अमृता धारणा या तु व्यापिनी तु शिवंकरी ।
आप्याययति सर्वत्र सर्वं ज्ञानामृतेन च ॥
ओंकारपूर्विका ह्येता नाभीहृदयसंस्थिताः ।
मूर्धन्या च तथा चान्य' चामृता सर्वगा शुभा ॥'
(रौरवे विद्यापादे ७.९,१०);
'ओं नमः शिवाय अमृताय पशुतत्त्वानुग्रहकरायामृतायामृतरूपिणे अमृतीकुरु स्वाहा । अमृता सर्वव्यापिनी ।'
(रौरवे विद्या० पृ० १८३);
'अमृता धारणा या तु सा सर्वत्र व्यवस्थिता ॥'
(स्वायंभुवे ३६.५उ०);
'स एवामृतसंयुक्तः प्रणवेनोर्ध्वयोजितः ॥
बिन्दुगो बीजदाहादित्रिस्वरेण निवेष्टितः ।
अमृतेयं सदा मूर्ध्नि व्यापिनी जीवकाङ्क्षया ॥'
(किरणे योग० १.२३.उ०, २४);
'विष्णुमन्त्रेण वा कुर्यादमृतां धारणां वदे ।
संपूर्णेन्दुनिभं ध्यायेत् कमलं तन्त्रिमुष्टिगम् ॥
शिरःस्थं चिन्तयेद्यत्नाच्छशाङ्कायुतवर्चसम् ।
संपूर्णमण्डलं व्योम्नि शिवकल्लोलपूर्णितम् ॥
तथा हृत्कमले ध्यायेत्तन्मध्ये स्वतनुं स्मरेत् ।
साधको विगतक्लेशो जायते धारणादिभिः ॥'
(अग्निपु० ३७५.२०उ०–२२).

[6] समानस्य पुट० — ओ.

[7] ०धवला — ओ.

[8] ०मत्युद्रणं — ओ, ख, घ, छ, ज.

[9] बिन्दोर्विनिधरं चित्तं — ओ; बिन्दोविकिञ्छतं — ख; बिन्दोवि . . किञ्चितं — घ; बिन्दोर्विनिर्किचितं — छ, ज.

[10] कल्लोलं ललितो वयम् — ओ; कल्लोलं ललितो लयम् — ख, घ, छ, ज.

[11] सामृतस्य अनिन्दितः — ख; सामृतस्य त्वनिन्दितः — घ, छ, ज; स्वामृतस्थमनिन्दितम् — च.

[12] ०त्स्नाव . . त्मान० — ओ; ०त्स्नापिबिडमात्मामुदवारमनि० — ख, घ; ०त्स्नापि विडमां मदचार निवा० — छ; ०त्स्नापि विद्ध मां मदचारनिवा० — ज.

[13] 'ओ' मातृकायां '६२' श्लोकस्य द्वितीयतृतीयपादौ न स्तः ।

[14] तत्स्थः स — ख, घ, छ, ज.

[15] चिह्नं — ख; चित्तं — घ; चितं — छ, ज.

[16] ०यद्विद्वान्सशिखायुत० — ख; ०यद्विदान् शशांखायुत०–घ, ज; ०यद्विदान् छंखायुत०–छ.

[१]उभयोरप्यमोघेन वीर्येणामृतवह्निना ।
[२]चरताप्लुष्टशोकेन साधुना [३]विरतात्मना ॥६३॥
[४]नष्टव्याधि[५]जरामृत्युः क्षणाद्भवति साधकः ।
चतस्रो [६]धारणाः प्रोक्ता योगि[७]नोऽभ्यस्यतः सदा ॥६४॥
शिवमार्गप्रदायिन्यः[८] स्ववीर्यो[९]द्दामगर्विताः[१०] ।
[११]प्रकाशयन्ति संसिद्धिमार्गं भोगभुजामपि ॥६५॥

[[१२]तर्कः]

लब्ध[१३]भूमेर्विरक्तस्य [१४]तज्जयोपायपेशलः ।
[१५]ऊहो [१६]नाम वितर्कोक्तिः प्रविचारेक्षणात्मकः[१७] ॥६६॥
[१८]यद्यत्सातिशयं स्थायं भोगेन [१९]समधिष्ठितम् ।

---

[१] उभयोरर्व्यंमोघेन — छ; उभयोरर्घ्यंमोघेन — ज.

[२] चरता भ्रष्ट० — ओ.

[३] विरलेन च — ओ; विरतेन च — ख, घ; चिरतेन च — छ, ज.

[४] क्लिष्ट० — ओ; म्लिष्ट० — ख, घ; म्लिष्टा० — छ, ज.

[५] ०जना० — ख.

[६] धारणा प्रोक्ता — ओ, ख, घ, च, छ, ज.

[७] ०नोद्य सतः — ख, घ, छ; . .भ्योभ्यसतः — च; ०नोद्यत्नतः — ज.

[८] ०प्रदायिन्या–ओ; ०प्रदायिन्य०– ख, घ, छ, ज.

[९] ०दाम० — ओ.

[१०] ०गर्विता — ज.

[११] प्रकारन्तिमसंसिद्धि — ओ.

[१२] 'आगमस्याविरोधेन ऊहनं तर्क उच्यते ।'
(अमृतनादोपनिषत् १६पू०);
'ऊहोऽभिवीक्षणं वस्तुविकल्पनान्तरोदितः ॥
यदा वेत्ति पदं हेयमुपादेयं च तत्स्थितेः ।
तत्पोषकं विपक्षं च यच्च तत्पोषकं परम् ॥'
'स ऊहो वीक्षणात्मकः तत्तद्भूमिकावाप्तितो लब्धे वस्तुनि असन्तोषकृताद्विकल्पात् समनन्तरमुदितः उद्भूतो ज्ञेयः । . . यदेति यस्मादर्थे; यस्मात् कारणाद् योगी समुत्पद्यमानो यथावस्थितसकलवस्त्ववभासनया हेयं पदं, तस्य च पोषकं तद्विपक्षकं विपक्षपोषकं च वेत्ति । यथा उपादेयं तत्पोषकं विपक्षकं विपक्षपोषकं च जानाति । अत एव प्रकृष्टं योगाङ्गम् ।'
(मृगेन्द्रे योग० श्लो. ८उ०,९; तदीयवृत्तिश्च);
'योगाङ्गत्वे समानेऽपि तर्को योगाङ्गमुत्तमम् ।
हेयाद्यालोचना तस्मात्तत्र यत्नः प्रशस्यते ।'
(मालिनीविजयोत्तरे १७.१८);
'अनेन लक्षयेद्योगी योगसिद्धिप्रवर्तकम् ॥
निरोधकं च यद्वस्तु बहुधा संव्यवस्थितम् ।'
(स्वायंभुवे ३६.२८उ०, २९पू०);
'योगाङ्गत्वेन मृगेन्द्रमतङ्गविवक्षितवीक्षणतर्कशब्दाभ्यां धारणाध्येयवस्तुस्वरूपे धार्यमाणे हेयोपादेयविचारः कथितः ।' योगसारे पृ० ८०.

[१३] ०भूतेर्वि० — ओ.

[१४] तञ्जयो० — ख, घ; तं जयोपाय० — छ, ज.

[१५] वाहो — ख, घ, छ, ज.

[१६] नामपि तर्कोक्तिः — ओ; नां मचि तर्कोक्तिः — ख.

[१७] ०क्षणात्मकम् — ओ, ख, घ, छ, ज.

[१८] यद्यत्सादिशयोपेतं — ओ; यद्यत्सातिशयोपेत० — ख; यद्यत्सादिशयोपेत० — घ; यद्यस्यातिशयं — च; यद्यत्सदाशिवोपेत० — छ, ज.

[१९] समविष्ठतः—ओ; समधितम्—छ; समयितम् — ज.

[1]विनश्वरेण [2]संदेह[3]बलेन [4]सुमलीमसम् ॥६७॥
किमनेन विकल्पो[5]क्तिव्यवहा[6]रात्मना त्वलम् ।
[7]अस्मादन्यद्विशिष्टेन भोगेन परिपूरितम् ॥६८॥
तस्मिन्मनः समाधाय सवि[8]कल्पाद्विनिर्गतम् ।
व्यक्ते [9]तस्मिन्स योगीन्द्रो निर्वितर्केण चेतसा ॥ ६९॥
समा[10]लिङ्ग्याञ्जसा [11]सिद्धं कालेन प्रविचारतः[12]।
[13]तद्भोगवशसंखेदपरिश्रान्तस्य[14] चेतसः[15] ॥७०॥
[16]ऊहोऽभिव्यक्तिमायाति[17] येन [18]जानाति निश्चितम् ।
अस्मादप्यतिवीर्याढ्यं[19] परमत्यद्भुतोत्तरम्[20] ॥ ७१॥
[21]पदमस्त्यविकल्पो [22]यः सविकल्पात्प्रजायते ।
निर्विकल्पे[23] ततस्तस्मिन्पूर्ववज्जायते मतिः[24] ॥७२॥
[25]यावत्तद्विगतक्लेश[26]मलेनाविचलात्मना ॥
[27]निर्वितर्केण[28] सूक्ष्मेण सर्वदिक्प्रविसर्पिणा ॥ ७३॥
क्षयाति[29]शयसंताप(ा)क्लिष्ट[30]मूर्त्या चिदात्मना ।
पदं पदवतां श्रेष्ठं स्वतेजो[31]गूढगोचरम् ॥७४॥

---

[1] एनश्वरेण — छ.
[2] संदेहं — घ, छ, ज.
[3] ०मलेन — ओ; ०मलिनेन — च.
[4] सुमलीयसम् — ओ; बलीयसा — च.
[5] ०क्तिर्व्यव० — घ, छ, ज.
[6] ०रात्मनोल्बणम् — च; ०रात्मनत्वलम् —छ.
[7] अस्मादन्यविशि० — ओ; अस्माद्यं न विशि० — ख; अस्माद्यन्न विशि० — घ, छ, ज.
[8] ०कल्पा विनि० — ओ; ०कल्पो द्विनि०–च.
[9] ०नास्मि सु० — ओ; न स योगीन्दे — ख; ०नस्मिन्समो यो० — छ; ०नस्मिन्स यो० — ज.
[10] ०लिङ्गोजसा० — ओ, घ; ०लिङ्ग्योजसा० — ख, छ, ज.
[11] विद्धि — ओ; विद्धं — घ, छ, ज; विद्ध-कालेन — च.
[12] ०चारितः — ख, घ, छ, ज.
[13] तद्भेदवशसंदैव — ओ, ख.
[14] ०श्रान्तेन — च.
[15] चेतसा — ओ, च, ज; चेतसम् — छ.
[16] जाहोभि० — ख, घ; ऊहेति व्यक्ति०—च; जाहोभिर्व्यक्ति० — छ, ज.
[17] ०मायान्ति — छ, ज.
[18] जातानि — ओ.
[19] ०वीर्याख्यं — ज.
[20] ०मन्यद्भुवोत्तरम् — ओ.
[21] पदमस्य वि० — ख, छ; पदमस्ति वि० — च; पदमस्य विकल्पोक्तं — ज.
[22] ऽयं — ख, घ, च, छ.
[23] ०कल्पं — ओ, ख, घ, छ, ज; ०कल्पाः–च.
[24] ०ज्जायतेरिति — ओ.
[25] यावत्तदन्तक्लेश० — ख; यावत्तदर्गतक्लेश० — घ, छ, ज.
[26] मलेन वचसात्मना — ओ; मध्येन विचात्मना — ख; मलेन विचात्मना —घ, छ, ज; बलेनावि० — च.
[27] 'ख, घ' मातृकयोः '७३' तमश्लोकोत्तरार्ध-प्रभृति '८०' तमश्लोकान्तो भागः '८६' श्लोकानन्तरं पटलपुष्पिकायाः पूर्वं दृश्यते। 'छ, ज' कोशयोरयं भागः पटलपुष्पिकाया अनन्तरं दृश्यते।
[28] वितर्कैणाक्ष० — ख.
[29] ०शिवसंताप० — ओ.
[30] ०मृत्यूचितात्मना — च.
[31] मूढ० — ओ.

[1]तदेकं निर्विकल्पं स्यात्प्रभोः स्थानमनातुरम्[2]।
[3]शेषाणि [4]सवितर्काणि [5]संत्याज्यानि मुमुक्षुभिः ॥७५॥
[6]निर्वितर्कं विना त्यक्तुं [7]यन्न योगप्रयोक्तृभिः।
[8]शक्यते मुनिशार्दूल [9]तस्मात्तर्कः प्रयुज्यते ॥७६॥
[10]योगिनोऽ[11]ङ्गत्व[12]मापन्नः सोपकाराय चेष्टते।

[[13]समाधिः]

विमलेन [14]दृशा स्पष्टं [15]ध्येयं संसाधितात्मना[16] ॥७७॥

---

[1] तदेतन्निर्वितर्कं स्या० — ओ; तदेतन्निर्वितर्क स्या० — ख, घ, छ, ज.

[2] ०मनातुरः — ख, घ, छ, ज.

[3] मेषाणि — ज.

[4] स्ववितर्काणि — छ, ज.

[5] सन्त्यन्यानि — च.

[6] निर्वितर्कविना त्यक्तं — ओ; न वितर्कं विना तानि — च; न वितर्कं विना त्यक्तुं — छ, ज.

[7] त्यक्तं योग० — ओ; योग योग० — ख, घ, छ, ज; त्यक्तुं योग० — च.

[8] शक्यन्ते — च.

[9] तस्य तर्कोप०–ओ; तस्मात्तर्कोप०–ख, घ, छ, ज.

[10] योगितो० — ओ.

[11] गेत्वमापन्नः — छ, ज.

[12] ०मापन्नस्वोप० — ओ.

[13] 'धारणाद्वादश ध्यानं दिव्यालोकप्रवृत्तिदम्।
समाधिरणिमादीनां द्वादशैतानि कारणम्॥
प्राणायामं विनाप्येवं वश्यात्मा चेतसि स्थितः।
समभ्यस्यन्नवाप्नोति गुणानुक्ताननन्तरम्॥'
'द्वादशभिः सगर्भैः कुम्भकैर्धारणा पूर्वमुक्ता। ताश्च द्वादश ध्यानं ज्ञेयम्। तच्च दिव्यामलौकिकीमालोकप्रवृत्तिं प्रकाशाविर्भूतिं ददातीति दिव्यालोकप्रवृत्तिदमिति तदभ्यासस्य फलमुक्तम्। एतानि च द्वादश ध्यानानि समाधिरित्युच्यते। स तु अणिमादिदिव्यसिद्धिकारणम्। अभ्यस्तैवंविधसमाधेरणिमाद्याविर्भावः स्यात्। एवमनेन प्रकारेणात्मनि नित्ययुक्ततया वश्यात्मा योगी विनापि प्राणायामेन क्वचिदपि देशे कृतनिरोधायां चित्तवृत्तौ स्थित एव तदभ्यस्यन् स आनन्तर्येण एतान् गुणानणिमादीन् लभते॥' (मृगेन्द्रे योग० श्लो. ४९-५०; तदीयवृत्तिः); 'समाधिर्ध्यानस्यैव प्रकर्षावस्था ध्येयाकारस्फुटीभावस्तल्लीनतैव' (मतङ्ग० विद्या०१.५वृत्तिः); समाधिः —
'समाधिर्नाम योगाङ्गमन्तिमं परिकीर्तितम्।
समाधिना च सर्वत्र प्रज्ञालोकः प्रवर्तते॥
यदर्थमात्रनिर्भासं स्तिमितोदधिवत्स्थितम्।
स्वरूपशून्यवद्भानं समाधिरभिधीयते॥
ध्येये मनः समावेश्य पश्येदपि च सुस्थिरम्।
निर्वाणानलवद्योगी समाधिस्थः प्रगीयते॥
न शृणोति न चाघ्राति न जल्पति न पश्यति।
न च स्पर्शं विजानाति न संकल्पयते मनः॥
न चाभिमन्यते किञ्चिद्बुध्यते न च काष्ठवत्।
एवं शिवे विलीनात्मा समाधिस्थ इहोच्यते॥
यथा दीपो निवातस्थः स्पन्दते न कदाचन।
तथा समाधिनिष्ठोऽपि तस्मान्न विचलेत्सुधीः॥
एवमभ्यसतश्चारं योगिनो योगमुत्तमम्।
तदन्तराया नश्यन्ति विघ्नाः सर्वे शनैःशनैः॥'
(शिवपु० वायुसं. उत्तरभागे ३७.६१-६७);
'एकाकारः समाधिः स्याद्देशालम्बनवर्जितः।
प्रत्ययो ह्यर्थमात्रेण योगशासनमुत्तमम्॥'
(कूर्मपुराणे उपरिभागे ११.४१);
'तदेवार्थमात्रनिर्भासं स्वरूपशून्यमिव समाधिः।' 'ध्यानमेव ध्येयाकारनिर्भासं प्रत्ययात्मकेन स्वरूपेण शून्यमिव यदा भवति ध्येयस्वभावावेशात् तदा समाधिरित्युच्यते।'
(योगसू० ३.३ तदीयव्यासभाष्यं च)

[14] सदृशा — छ.

[15] ध्येयसं० — ख, घ, छ, ज.

[16] संसायिकात्मना — ओ; ०तात्मनाम् — च.

[1]अभ्रष्टवपुषा [2]ध्यातमादावेवाविकल्पितम्[3] ।
तदध्यवस्य[4] [5]बलवद्धिया [6]ध्येयं प्रयत्नतः ॥७८॥
समालिङ्ग्य समत्वेन [7]यथा [8]नानात्मचेतसा[9] ।
[10]संस्थितो योग[11]योगीन्द्रो [12]न विभागेन लक्ष्यते ॥७९॥
तद्धर्मधर्मी[13] युक्तात्मा बाह्यस्यार्थस्य[14] गोचरात् ।
[15]व्यतीतोत्पन्न[16]सद्भावः समाधि[17]स्थोऽविकारवान् ॥८०॥
भोगद्वाराण्यशेषाणि [18]पिधाय परमे विधौ ।
[19]तृप्तिदारुसमुत्थेन [20]कवाटयुगलेन च ॥८१॥
पञ्चधा संस्थितेनात्र[21] [22]लक्ष्यशय्याकृतास्पदः[23] ।
[24]शुद्धौजसा समालिङ्ग्य बुद्धि[25]पत्नीं सुलालसाम् ॥८२॥
मनः[26]प्रदीपप्रद्योत[27]वितमस्के स योगिराट् ।
[28]हृन्मन्दिरे [29]सुखोद्दामयोग[30]निद्राकुलेक्षणः ॥८३॥
जित[31]दर्पां मतिं कृत्वा [32]सर्वाङ्गाह्लादितात्मवान् ।

---

[1] अदृष्टवपुषा — ओ, ख, घ; अदृष्टा वपुषा — छ, ज.
[2] ध्यानमाददोर्वापि — ओ; ध्यानमाददेद्वावि० — ख, घ, छ, ज.
[3] ०कल्पितः — ख, घ, च, छ, ज.
[4] तदद्यवस्य — ओ.
[5] फलवान् धिया — ओ.
[6] ध्येयः प्रयत्नधीः — ओ.
[7] यदा — च.
[8] नानात्व० — ख, घ, छ, ज.
[9] ०चेतसि — ओ, ख, घ, च, छ, ज.
[10] संतिष्ठेद् — च.
[11] ०योगीभ्यो — ओ; ०योगेन्द्रो — ख, घ, छ, ज.
[12] नवभागोप० — ओ; न विभागोप० — ख, घ, छ, ज.
[13] धर्म० — ओ; धर्मा — च.
[14] बाह्यस्पर्शन० — ओ; बाह्यार्थशय० — च.
[15] व्यतीतप्राप्त० — च; व्यतीतः + उत्पन्न = व्यतीत उत्पन्न; ततः संधिरार्षः ।
[16] ०सद्भाव० — ओ, ख; ०सद्भावे — घ, छ, ज.
[17] ०ष्ठोविकारकात् — ओ; ०सोऽधिकार० — ख; ०स्थोऽधिकार० — घ, छ, ज.
[18] विधाय — ओ; पीडया — ख, घ, छ, ज; विधायोपरमो — च.
[19] दृप्तदारु० — ओ.
[20] कपाल० — ओ; कपाटयुगलेन तु — च.
[21] संश्रितान्यत्र — ख, घ; संश्रुतान्यत्र — छ, ज.
[22] लक्षशौर्य० — ओ; ०लक्षशय्या० — च, छ; लक्षशर्या० — ज.
[23] ०कृतास्पदम् — ओ, च; ०कृतस्पदः — ख, घ, छ, ज.
[24] शुद्धाञ्जसा — च.
[25] ०पत्तिसु० — ख; ०पत्निसुलालसम् — घ; ०पत्नि० — छ, ज.
[26] ०प्रदीप्तप्रद्योत० — ओ, ख, घ, छ, ज.
[27] ०द्योतमस्तेऽपि योगराट् — ओ; ०वितमस्ते स — ख, घ, छ, ज; ०वितमस्केण — च.
[28] हृन्दिरैः — ख; हृदिरे — छ, ज.
[29] सगोद्दाम० — ओ; सुखेवाददाम० — ख; सुखदोदाम० — छ; सुखदोद्दाम० — ज.
[30] ०निम्नाकुले० — च.
[31] ०दर्पा मतिः — ओ; ०दर्पा मतिं० — छ.
[32] सर्वाङ्गह्लादि० — ओ, ख, घ, छ, ज.

शयीत सुचिरं [1]कालमप्रबुद्धाक्षगोचरः[2] ॥८४॥
असंप्राप्त[3]बहिर्द्वन्द्वसमाधौ [4]संस्थितः सुधीः ।
समाधि[5]लब्धवीर्यस्य योगिनो[6]ऽलुब्धचेतसः ॥
[7]समस्तविषया[8]पीडकषायः [9]परिपच्यते ॥८५॥

[उक्तार्थोपसंहारः वक्ष्यमाणोपक्रमश्च]

[10]पशुपति[11]रश्मिबृन्द[12]विमली[13]कृतवाग्वपुषा
हिमगिरिराजपुत्रीपतिना कथितं[14] मुनये ।
[15]अविचलयोग[16]लब्धकरणोत्तमसाधुविधि[17]
[18]सरभसयोगसार[19]रचनं कथयाम्यधुना ॥८६॥

इति श्रीमतङ्गपारमेश्वरे योगपादे [20]योगाङ्गपटलो द्वितीयः ।

द्वितीयः पटलः

---

[1] कालं प्रबुद्धाक्ष . . . गोचरम् — ख; कालं प्रबुद्धाक्षगोचरम् — घ; कालमप्रबुद्धचाक्ष० — छ, ज.
[2] ०गोचरम् — ओ, छ, ज.
[3] ०बहिर्द्वन्द्वः — च; ०बहिद्वन्धसाधेना — छ; ०बहिः संधसाधेना — ज.
[4] संस्थितं — ओ; उत्थितः सुखी — च.
[5] ०लब्ध्यं — छ, ज.
[6] लुप्त० — ओ; लुंधचेतसम् — छ, ज.
[7] समाप्तविधिया० — ओ; समस्तु विष्टाया० — छ; समस्तु विष्टया० — ज.
[8] ०पीडः कपायः — ओ; ०पीडः क्षमया – ख; ०पीडः क्षायः – घ; ०पीडः क्षाय० — छ, ज.
[9] परिवच्यते — ओ; परिचर्यते — ख, घ, छ, ज; परिपठचते — च.
[10] शुवर्गाश्मिबृन्दप्रकटीकृतपार्श्ववपुषा — ओ.
[11] ०रश्मिर्विद० — च.
[12] पिमलि० — छ; ०विमलि० — ज.
[13] ०कृता — घ, छ.
[14] ०पुत्री पतिं गनाकशितं–ओ; ०पुत्रि त्रिकथिता — ख; ०पुत्रि कथितां — घ, छ, ज; ०पुत्रि पतिना कथितो — च.
[15] अपिचल० — ओ, ख.
[16] ०लब्धीकरणोत्तम०– ख, घ; ०लब्धि० – च; ०लब्ध्यः कर्णोत्तम० – छ; ०लब्ध्याः कर्णोत्तम० — ज.
[17] विधिः — च.
[18] सररस० — च.
[19] ०रचनां — ओ, च; ०रजनं — ख, घ, छ; ०रधनं — ज.
[20] योगोपन्यासपटलः — ख, घ.

तृतीयः पटलः

योगसारसमुच्चयः

अथातः संप्रवक्ष्यामि[1] योगसारसमुच्चयम् ।

[2][योगस्थानम्]

सर्वदोषवि[3]निर्मुक्तं [4]निःशब्दं स्थानमुत्तमम् ॥१॥
सुगुप्तं सुसमं पूतं [5]निराबाध[6]मनाकुलम् ।

[7][नाडीशुद्धिः]

तत्र योगासनं बद्ध्वा [8]स्थिरमेकाग्रमानसः ॥२॥

---

[1] संप्रवक्ष्येत — छ.

[2] शून्यागारे मठे रम्ये देवतायतने शुभे ।
नदीतीरे विविक्ते वा गृहे घोरवनेऽपि वा ॥
प्रच्छन्ने च विविक्ते च निःशब्दे जनवर्जिते ।
योगदोषविनिर्मुक्ते निर्विकल्पे निरातपे ॥
स्नात्वा शुचिरुपस्पृश्य प्रणम्य शिरसा शिवम् ।
योगाचार्यान्नमस्कृत्य योगं युञ्जीत मानवः ॥
(सर्वज्ञानोत्तरे योग० श्लो०. ७–९);
अदेशकाले योगस्य दर्शनं हि न विद्यते ।
अग्न्यभ्यासे जले वापि शुष्कपर्णचये तथा ॥
जन्तुव्याप्ते श्मशाने च जीर्णगोष्ठे चतुष्पथे ।
सशब्दे सभये वापि चैत्यवल्मीकसंचये ॥
अशुभे दुर्जनाक्रान्ते मशकादिसमन्विते ।
नाचरेद्देहबाधायां दौर्मनस्यादिसंभवे ॥
सुगुप्ते तु शुभे रम्ये गुहायां पर्वतस्य तु ।
भवक्षेत्रे सुगुप्ते वा भवारामे वनेऽपि वा ॥
गृहे तु सुशुभे देशे विजने जन्तुवर्जिते ।
अत्यन्तनिर्मले सम्यक्सुप्रलिप्ते विचित्रिते ॥
दर्पणोदरसंकाशे कृष्णागरुसुधूपिते ।
नानापुष्पसमाकीर्णे वितानोपरिशोभिते ॥
फलपल्लवमूलाढ्ये कुशपुष्पसमन्विते ।
समासनस्थो योगाङ्गान्यभ्यसेद्धृषितः स्वयम् ॥
(लिङ्गपु० पूर्वार्धे ८.७८.उ०–८५पू०).

[3] ०निर्मुक्त०— ओ, ख.

[4] निःशब्दस्थान० — ओ.

[5] निरबाध० — ख.

[6] ०समाकुलम् — च.

[7] प्राणं चेदिडया पिबेन्नियमितं भूयोऽन्यथा रेचयेत्
पीत्वा पिङ्गलया समीरणमथो बद्ध्वा त्यजेद्-
वामया ।
सूर्याचन्द्रमसोरनेन विधिना बिन्दुद्वयं ध्यायतः
शुद्धा नाडिगणा भवन्ति यमिनो मासद्वयादूर्ध्वतः ॥
यथेष्टधारणं वायोरनलस्य प्रदीपनम् ।
नादाभिव्यक्तिरारोग्यं जायते नाडिशोधनात् ॥
(योगचूडामण्युपनिषत् ९८, ९९);
'जानु प्रदक्षिणीकृत्य न द्रुतं न विलम्बितम् ।
अङ्गुलिस्फोटनं कुर्यात्सा मात्रा परिगीयते ॥
इडया वायुमापूर्य शनैः षोडशमात्रया ।
कुम्भयेत्पूरितं पश्चाच्चतुःषष्ट्या तु मात्रया ॥
रेचयेत्पिङ्गलानाड्या द्वात्रिंशन्मात्रया पुनः ।
पुनः पिङ्गलयापूर्य पूर्ववत्सुसमाहितः ॥
प्रातर्माध्यंदिने सायमर्धरात्रे च कुम्भकान् ।
शनैरशीतिपर्यन्तं चतुर्वारं समभ्यसेत् ॥
एवं मासत्रयाभ्यासान्नाडीशुद्धिस्ततो भवेत् ।
यदा तु नाडीशुद्धिः स्यात्तदा चिह्नानि बाह्यतः ॥
जायन्ते योगिनो देहे तानि वक्ष्याम्यशेषतः ।
शरीरलघुता दीप्तिर्जाठराग्निविवर्धनम् ॥
कृशत्वं च शरीरस्य तदा जायेत निश्चयम् ।'
(योगतत्त्वोपनिषत् ४०–४६ पू०).

[8] स्थित एकाग्र० — ओ, ख.

[१]वायोर्निष्क्रमणं कृत्वा [२]प्रवेशं च शनैः शनैः।
नासिकाविवराभ्यां तु[३] [४]सम्यक्संशोधयेत्क्रमात् ॥३॥
[५]प्रच्छादनं [६]सारणं च [७]संशुद्ध्यै प्रयतात्मना।
कार्यं [८]विगतरागेण [९]नित्यं योग[१०]युजा मुने ॥४॥

[११][योगाभ्यासफलम्]

प्रवि[१२]शुद्धानिलं चित्तं योक्तव्यं भूम्यनुक्रमात्।
[१३]यावत्पदसमायोगान्नित्ययुक्तस्य [१४]योगिनः ॥५॥
स्थूलायास[१५]समुत्पन्ना [१६]दुःखाशयसमृद्धयः।
[१७]लेशतो हानिमायान्ति [१८]सूक्ष्मज्ञानानुसारतः ॥६॥
[१९]यदालिङ्गच पदं सूक्ष्मं [२०]विचेष्टेत स योगिराट्।
तस्मिंस्तस्मि[२१]स्तदुत्थाभिर्वासनाभिर्वियुज्यते ॥७॥
[२२]वियुक्तः सन् पराभिः [२३]स [२४]सूक्ष्माभिश्चोपबृंह्यते।
तत्समाना[२५]शयावेशाद्बीजं प्राक्संचितं[२६] त्वणोः[२७] ॥८॥

---

[१] वाया निष्क्र० — ओ; वायो निष्क्र०—च.

[२] प्रवेगं च — ख, घ, छ, ज.

[३] ०विवराभावं — ख, घ, छ, ज.

[४] सम्यक्तं शोध० — च.

[५] प्रच्छन्दनं — ख, घ, छ, ज.

[६] धारणं — च, छ, ज.

[७] संशोध्य — ख, घ, छ, ज.

[८] विरागरागेण — च.

[९] नित्ययोग० — ख, घ, छ, ज.

[१०] ०युजान्मुने — ओ.

[११] 'विशोध्य सर्वतत्त्वानि प्रणवेनाथवा पुनः।
संस्थाप्य मयि चात्मानं निर्मले परमे पदे ॥
पावयित्वात्मनो देहं तेनैव ज्ञानवारिणा।
मदात्मा मन्मयो भस्म गृहीत्वा ह्यग्निहोत्रजम्
तेनोद्धृत्य तु सर्वाङ्गमग्निरित्यादिमन्त्रतः।
चिन्तयेत्स्वात्मनीशानं परं ज्योतिःस्वरूपिणम्
एष पाशुपतो योगः पशुपाशविमुक्तये।'
(कूर्मपु० उपरिभागे ११.६४ उ०–६७).

[१२] ०रूढानिलं — ओ; ०शुद्धानिलः—ख, घ, छ, ज; ०शुद्धानिलातीतं — च.

[१३] यावत्पदा समा० — ओ.

[१४] योगिभिः — ओ; योगिना — च.

[१५] ०समुद्भूताः — ख, घ; ०समुद्भूता — च, ज; ०समुद्भूत० — छ.

[१६] दुःखायाससवृत्तये — ओ; ..वा सर्वमुद्धयः — ख; दुःखायासर्वमुद्धयः — घ, छ, ज.

[१७] लेशया भान० — ओ; लेशया हानि० — ख, घ, च; लेशया — छ, ज.

[१८] सूक्ष्मार्थास्थानु० — ख, घ, छ, ज; सुसूक्ष्मस्यानु० — च.

[१९] ..लिङ्गपदं — ओ, च, ज.

[२०] विचेष्टयति योगि० — ओ; चेचेष्टति स योगि० — ख; चेच्चेष्टति स योगि० — घ, छ, ज.

[२१] ०स्तदुत्थोहि प्रासना हि व युज्यते—ख, छ, ज.

[२२] वियुक्तो वासनाभिः सन् — ख, घ, छ, ज; वियुक्तस्तत्पराभिः सं — च.

[२३] सं — ओ.

[२४] त ज्योतीं श्चोपबृंहिते — ओ; तज्जातश्चोप० — ख; तज्जातिश्चोप० — घ; तश्चातिश्चोपबृंहते — छ, ज.

[२५] ०शयवेशा० — ओ.

[२६] प्राक् संशया — ख, घ, छ, ज.

[२७] क्वणोः — ज.

मोहात्मकेन वीर्येण योगिना[1] प्रत्यवारितम्[2] ।
विवर्तते मुनिव्याघ्र येना[3]सावतिभावितः ॥९॥
[4]मोहमायाति तत्रैव न परं [5]वेत्त्यनात्मवान् ।
ततस्तेन प्रकर्तव्यो [6]जपश्चोर्जितचेतसा ॥१०॥
[7]तेजसाजस्रवीर्यस्य [8]मृष्टबाह्याशयस्य च ।
प्रवर्तते मतिः क्षिप्रं [9]यया यात्युन्नतिं पराम्[10] ॥११॥
[11]विशुद्धोन्नतिसामर्थ्यं [12]यत्पदामोदभावितम् ।
योगिनं [13]कारणेशानो नियोजयति सुव्रत ॥ १२॥
तद्भाव[14]भावनामोदविषयेष्वनिवारितम्[15] ।
एवं [16]पदात्पदं [17]याति योगाग्नि[18]परिबृंहणात् ॥१३॥
[19]तत्सटाटोपसंघट्ट[20]पट्टूद्घाटितदिङ्मुखः ।
प्राप्नोत्यभीप्सितं स्थानं क्रमात्कालेन [21]सुव्रत ॥१४॥
[22]तद्गुणाक्षप्रभावेण[23] दिगन्तरविसर्पिणा ।
अतिरस्कृतवीर्येण [24]प्रसन्नेनान्तरात्मना ॥ १५॥
अप्रम्लानमुखे[25]नासावव्ययेनातिभूरिणा ।
[26]विभाति दिवि [27]दीप्ताङ्गतेजोमूर्तिरुदारवान् ॥१६॥
[28]यस्मात्क्लिष्टप्रवाहाभैः [29]प्रधानाक्षैश्च [30]कुत्सितात् ।

---

[1] योगिनं — ख, च; यो हि नः — घ; योगिनः — छ, ज.
[2] ०वारितः — ख, घ, छ, ज.
[3] ०साविति — ख, घ, च, छ, ज.
[4] 'ख, घ, छ, ज' मातृकासु '१०, ११' श्लोकौ '१२' पूर्वार्धं च न दृश्यन्ते ।
[5] वेतनात्मवान् — ओ.
[6] जपं चोर्जितचेतसः — ओ.
[7] तेजसोऽजस्र० — ओ.
[8] म्लिष्ट० — च.
[9] यदा — च.
[10] यायान्त्युन्नतिमः परा — ओ.
[11] विशुद्धेन्द्रियसामर्थ्यं — च.
[12] त्वत्पदा० — च.
[13] करणेशानो — छ, ज.
[14] ०भवनावनामोद० — छ.
[15] ०वारितः — च.
[16] पादात्पदं — ख, घ, छ, ज.
[17] यान्तु — ओ; यातु — ख, घ, छ, ज.
[18] ०पमं प्रहण्यात् — ओ.
[19] तच्छादादोप० — ओ; तच्छेदाटोप० — ख, घ, छ, ज.
[20] ०वधूद्घाटित० – ओ; ०पटुद्घाटित० – ख; ०पटूद्घटित० — ज.
[21] 'सुव्रत' इत्यारभ्य '१६' प्रथमार्धे 'अव्ययेनाति' इत्यन्तो भागः 'छ, ज' मातृकयोर्लुप्तः ।
[22] तद्गुणं कथभावेन — ओ.
[23] ०प्रभावेन — ख, घ.
[24] प्रभावेना० . . ओ; प्रभावेनात्मवेदिना—ख, घ.
[25] ०नास्य पर्यायेणापि — ओ; ०नास्यावन्ध्या येनानि—ख; ०नास्या वन्ध्या येनाति०—घ.
[26] विभावि — ओ.
[27] दीप्तात्मा तेजोमूर्ति० — ओ, ख, घ, छ, ज.
[28] यस्मात्क्लिष्टप्रभा भाक् स्या . . – ओ; यस्मात् क्लिष्टप्रवाहा . . – ख, घ, छ, ज; यस्मात्क्ष्टि-प्रवाहासाः — च.
[29] '१७' श्लोकस्य द्वितीयपादप्रभृति '१९' श्लोकान्तो भागः 'च' मातृकायामेव दृश्यते ।; प्रधानाक्षाश्च — च.
[30] कुत्सिताः — च.

अनित्यविषयायासखेदेन परिपीडितात्[1] ॥१७॥
मृग[2]तृड्लोभविषयाच्छक्रजालप्रविस्तरात् ।
छायाक्रीडन[3]भोगाढचात्तोयबुद्बुदजीवितात्[4] ॥१८॥
तडित्संपद्दिना[5]दाढचमरुच्छ्रीचञ्चलात्मकात्[6] ।
निर्गतो योगसामर्थ्याज्जगद्व्याप्याचलोऽव्ययः ॥१९॥

[उक्तार्थोपसंहारः, वक्ष्यमाणोपक्रमश्च]

[7]समासतोक्त्या कथितं [8]विधानं
[9]सिद्धयै मया ते मुनिराजमुख्य ।
[10]विस्तारयिष्याम्यधुनाध्व[11]संप-
त्क्रमेण मत्तः शृणु [12]तद्विशेषम् ॥२०॥

इति श्रीमतङ्गपारमेश्वरे योगपादे योगसारसमुच्चयपटलस्तृतीयः ॥

तृतीयः पटलः

---

[1] ०पीडितान् — च.
[2] ०तृल्लोभविषयाशक्र० — च.
[3] ०भोगाढचो — च.
[4] ०जीवितान् — च.
[5] ०दाढचामरु० — च.
[6] ०त्मकान् — च.
[7] समासतोक्ता — ख, छ, ज; समासतः + उक्त्या = समासत उक्त्या; ततः संधिरार्षः ।
[8] ०विधान० — ख, घ, छ, ज.
[9] सिद्धे — ओ; सिद्धं — ख, घ, छ, ज.
[10] सदा करिष्या० — ओ.
[11] संयक्क्रमेण — ओ, ख, घ, छ, ज.
[12] तद्विजेन्द्र — ख, घ, छ, ज; ते द्विजेन्द्र — च.

चतुर्थः पटलः

तत्त्वसाधनम्

अथातोऽध्वविधाने[१]ऽस्मिन्नुपायश्चोपवर्ण्यते ।
[२]पृथिव्यादीनि तत्त्वानि [३]शिवान्तान्यनुपूर्वशः ॥१॥
ध्यातव्यानि मुनिव्याघ्र शरीरे योगिना[४] सदा ।

मतङ्ग उवाच—

[५]पार्थिवाणुसमूहस्य विकीर्णस्य पृथक् पृथक् ॥२॥
किं स्वरूपं स्वकं तत्र पृथिव्यास्तत्त्वसंज्ञकम्[६] ।

परमेश्वर उवाच—

[७]मृत्त्वमस्ति [८]मृदस्तत्र [९]येनासौ व्यपदिश्यते ॥३॥
[१०]तत्तेभ्यो ह्यणुसंघेभ्यो[११] विशिष्ट[१२]मविनाश्यथ ।
[१३]यदालम्ब्याणु[१४]संघस्य [१५]द्वित्र्यादेरविखण्डितम्[१६] ॥४॥

---

[१] ०स्मिन्नुपायम् — ओ; ०स्मिन् रूपं य — ख, घ, छ; ०स्मिन् रूप यदुप० — ज.

[२] 'ओ' मातृकायामयं पादो लुप्तः ।;
'क्षित्यादितत्त्वविजयं ध्याता यद्यपि वाञ्छति ।
तत्तत्तत्त्वाधिपामेव मूर्ति स्थूलां विचिन्तयेत् ॥
सदाशिवान्ता ब्रह्माद्या भवाद्याश्चाष्टमूर्तयः ।
शिवस्य मूर्तयः स्थूलाः शिवशास्त्रे विनिश्चिताः॥
घोरा मिश्राः प्रशान्ताश्च मूर्तयस्ता मुनीश्वरैः ।
फलाभिलाषरहितैश्चिन्त्याश्चिन्ताविशारदैः ॥
घोराश्चेच्चिन्तिताः कुर्युः पापरोगपरिक्षयम् ।
चिरेण मिश्रे सौम्ये तु न सद्यो न चिरादपि ॥
सौम्ये मुक्तिर्विशेषेण शान्तिः प्रज्ञा प्रसिध्यति ।
सिध्यन्ति सिद्धयश्चात्र क्रमशो नात्र संशयः ॥
(शिवपु० वायुसं० उत्तरभागे ३८.७३उ०–७८).

[३] शिवाद्याद्यनु० — ओ.

[४] योगिनः — ओ, ख, घ, छ, ज.

[५] पार्थिवाणि० — छ, ज.

[६] ०संज्ञक — ओ.

[७] सत्यमस्ति — ओ; 'ख, घ, छ, ज' कोशेषु पादोऽयं न दृश्यते ।; क्रियापादे ५.१३०–१३३ वृत्तौ 'मृत्त्वमस्ति मृदस्तत्र' इत्युद्धृतत्वादत्र तदनुसारेण पाठः शोधितः ।

[८] मृदस्तस्य — च.

[९] येन सा व्यप० — ओ, ख, घ; येना साप्यपदिश्यन्ते — छ, ज.

[१०] तत्त्वेभ्यो — च.

[११] ०संगेभ्यो — ओ, घ; 'ख' मातृकायां 'संघस्य' इत्यपि पाठो दृश्यते ।; संख्येभ्यो – छ, ज.

[१२] ०मनिवाश्यथ — ओ; ०मविनाश्यद्य — च.

[१३] यमालम्ब्यानु० — ओ; तदालम्ब्याणु० — ख, घ; यमालम्ब्याणु० — च; तदालम्बाणु० — छ, ज.

[१४] ०सर्पस्य — छ, ज.

[१५] द्वितीयादवि० — ओ; द्विचित्रा. . .ण्डितः — ख; द्विचित्रादेर्विखण्डितः — घ; द्विचित्रातेर्विखण्डितः — छ, ज.

[१६] ०खण्डितः — च.

[१]संचयः [२]सुकृतः स्पष्टः [३]सदाधारनिबन्धनात्[४] ।
[५]वस्तुनः प्रकटं यस्माद् द्रव्यादेः परिगीयते ॥५॥
गुणा गुणिनमाश्रित्य [६]विचेष्टन्ते स्वके स्वके ।
[७]विषये न निराधारा [८]ह्याधेयाः कुत्रचित्स्थिताः[९] ॥६॥
सतावलम्बनं[१०] त्यक्त्वा[११] [१२]व्यपदेश्याः कथं मुने ।
[१३]भवन्ति व्यवहारे[१४]ऽस्मिन्व्यक्तास्वर्थक्रियास्वपि ॥७॥

[१५]मतङ्ग उवाच —

[१६]द्रव्यादिभ्यो [१७]विशिष्टार्थसत्ता संपरिभाविता[१८] ।
[१९]तेषामभावान्नेष्टं [२०]स्याददृष्टत्वात् सुरेश्वर ॥८॥

परमेश्वर उवाच —

[२१]नाभावादतिसूक्ष्मत्वादस्तित्वेऽप्यक्षगोचरम्[२२] ।
न [२३]संप्राप्तं [२४]यतो मृत्वं [२५]सति भावे प्रभाष्यते ॥९॥

मतङ्ग उवाच —

[२६]कल्पिता परि[२७]भावेयं व्यापाराय न सद्बलात्[२८] ।

---

[१] संचपं कृतं स्पष्टं — ओ.
[२] सुकृतस्पष्टं — ख, घ, छ, ज.
[३] सुदाधारनिबन्धनम् — ओ.
[४] निबन्धनः — ख, घ, छ, ज.
[५] विकटं यस्माद्द्रव्य . . यते — ओ; द्विकूटत्रयसमादे . . द्रव्याद्रव्यादेः — ख; द्विकूटद्वयं समा द्रव्यादेः — घ; द्विकूटत्रयस्मा . . द्रव्यादेः — छ, ज.
[६] स्वचेष्टन्ति — ओ.
[७] विषयेण निराधार—ओ, छ, ज; वर्ष निराधारा — ख; विषयेन — च; मतङ्ग० विद्या० ३.८ श्लोकवृत्तावुद्धृतपाठमनसृत्यात्र पाठः शोधितः।
[८] ह्याधेयं — ओ; प्याधेयाः — ख; प्येधेयाः — घ, छ, ज.
[९] स्थिताम् — ओ.
[१०] ०सद्भावबलं — ओ.
[११] त्यक्ता — छ; त्यक्त्या — ज .
[१२] ०प्यप० — ओ.
[१३] भवितव्यं व हारे० — ओ; भवस्त्रि व्यवहारे — ख; भवस्ति व्यवहारे — घ; भवन्ति व्यवसाये — च.
[१४] . . स्वार्थक्रिया — ओ; ०स्मिन्व्यत्थाश्चापि क्रिया० — छ; ०स्मिन्यक्ताश्चापि क्रिया० — ज.
[१५] 'ओ' मातृकायां 'मतङ्ग उवाच' इत्यारभ्य '९' श्लोकान्तो भागो नास्ति।
[१६] 'छ, ज' मातृकयोः '८' श्लोको न दृश्यते।
[१७] विशिष्टान्यां सत्ता — च.
[१८] ०भाविता — च.
[१९] तेभ्यो ह्यभावात्तेषां — च.
[२०] स्याद्दृष्टातत्त्वात् — ख; स्यादृष्टतत्त्वात्–घ.
[२१] ना भावादिति० — ख, घ, छ, ज.
[२२] ०त्वे त्वक्षगोचरः — ख, घ; ०त्वेऽप्यक्षिगोचरे — च; ०त्वे त्वक्षगोचरा — छ, ज.
[२३] संप्राप्ता — च.
[२४] यतोऽत्रत्वं — ख.
[२५] स विभावः — च.
[२६] कथिता — ओ.
[२७] ०भाष्येयं — ओ.
[२८] ०य संबलात् — ओ.

[1]कुतोऽन्यद्व्यतिरिक्तं [2]यन्मृत्स्नं येन [3]मृदुच्यते ॥१०॥

परमेश्वर उवाच —

[4]असत्कल्पयता वाच्यो नाङ्गुल्यग्रेण कुत्रचित् ।
तदेव शक्यते [5]स्पष्टं कथं [6]वासत्प्रकल्पना ॥११॥
[7]विद्यते [8]चेत्ततस्तस्माल्लोकाः क्लिश्यन्ति[9] सुव्रत ।
[10]कर्मारम्भे त्वरायास[11]लोभेनाप्राप्ततृप्तयः[12] ॥१२॥
[13]तस्मात्संव्यवहाराय [14]संस्थिता [15]यद्बलात्क्षिता ।
[16]कल्पने[17]यं स्थिता स्पष्टा सा च वस्तुनिबन्धिनी[18] ॥१३॥
प्रत्यक्षमेकमुचितं[19] प्रमाणं [20]भवतो यदा ।
[21]तदा यदनुमानेन [22]साध्यते तदसत्स्फुटम् ॥१४॥
न चैवं[23] स्यान्मुनिव्याघ्र शृणु वक्ष्याम्यतः परम् ।
[24]अनिर्देश्यमसंदिग्धं [25]कल्पनापोढगोचरम् ॥१५॥
प्रत्यक्षं [26]तेन नेष्टं स्याद्व्यवहाराय सुव्रत ।
न [27]चात्र कल्पना काचिन्निश्चि[28]तेयं [29]मतिर्मम ॥१६॥
शेषमर्थक्रियापन्नमनुमा[30]नवशं जगत् ।

---

[1] कुतोऽप्यव्यति० — ओ.
[2] यत् यद्भवं मृदुरुच्यते — ओ; यन्मृत्युं येन — च; य मृत्संयेन — छ, ज.
[3] मृमुच्यते — छ; मुमुच्यते — ज.
[4] असत्कल्पितवाचो — ओ; अस्मिन् कल्पयि . . च्यो — ख; असत्कल्पयिता वाच्यो — घ, छ, ज; असत्कल्पनतावाख्या — च.
[5] स्पृष्टं — ख, घ, छ, ज; स्प्रष्टुं — च.
[6] वा संप्रकल्पना — च.
[7] विद्यन्ते — च.
[8] चोत्तमस्तस्मा० — ओ; चेत्ततः कस्मा० – च.
[9] लोकः क्लिश्यति — ओ, च.
[10] कर्मानुरम्भेरायास० — ओ; कर्मारम्भ . . स० — ख, घ; कर्मारम्भभरायासु — च.
[11] क्षोभना० — ख.
[12] ०दृतयः — घ, छ, ज; ०तृप्तिकः — च.
[13] यस्मा० — ओ.
[14] संस्थिताय बलात्क्षितौ — ओ; स्वसंकेतबलात्क्षितौ — च.
[15] यद्बलाक्षितौ — ख, छ, ज.
[16] कल्पने या — ओ, घ; कल्पिने — ख; कल्पने — छ; कल्पन्न — ज.
[17] यत्स्थितस्पष्टा — ख; यस्थितस्पष्टा — घ, छ, ज.
[18] ०निबन्धनी — ओ, ख, घ, छ; ०निबन्धनात् — च.
[19] मुदितं — च.
[20] भुवितो — ओ.
[21] यदा यदनु० — ख.
[22] तद . . . तत्स्फुटम् — ओ; . . . द्यते सत्स्फुटम् — ख; साध्यते सत्स्फुटम् — घ, छ, ज; साध्यस्य तेन स स्फुटम् — च.
[23] चैव — ओ, ज.
[24] सुनिर्देश्य० — च.
[25] कल्पना वागगो० — ओ; कल्पनावोढ० — घ, छ, ज; कल्पनापाठ० — च.
[26] तच्च — च.
[27] चासां — ख; चास्यां — घ, छ, ज.
[28] ०तोऽयं मुनिर्मम — ओ.
[29] मुने मम — ख, घ; मतिर्यतः — च; मुनिर्मम — छ, ज.
[30] वशाज्जगत् — घ, छ, ज.

[[1]त्रिविधानुमानम्]

[2]तत्त्रिधा भेदमापन्नं विशेषोक्तिनिदर्शनात्[3] ॥१७॥
यथा तथा प्रवक्ष्यामि न चातिपरिविस्तरात् ।
शेषवत्पूर्वव[4]च्चान्यत्सामान्य[5]मपरं मतम् ॥१८॥

[[6]शेषवदनुमानम्]

[7]स्थूलावर्त[8]शकृत्पुञ्जभूयिष्ठं मदगन्धि च ।
स्तम्भ[9]शय्यादिभि[10]श्चिह्नैरत्रासीन्मत्तवारणः[11] ॥१९॥
[12]अतीतोऽप्यनुमानेन साध्यः शेषवता[13] बुधैः ।

[[14]पूर्ववदनुमानम्]

[15]कृष्णाञ्जन[16]निभैश्चोच्चैः [17]साटोपैर्निबिडैर्घनैः[18] ॥२०॥
निर्विघ्नैर्विपुलैः स्निग्धैस्तडिन्निर्घोषसंकुलैः ।
प्रावृट्समय[19]संप्राप्तैर्दृष्टैर्वृष्टिः प्रमीयते ॥२१॥
पूर्वमप्येवमुचितं[20] वृट्पातोऽप्यविखण्डितः[21] ।

---

[1] 'अथ तत्पूर्वकं त्रिविधमनुमानं पूर्ववच्छेषवत् सामान्यतो दृष्टं च' (गौतमन्यायसूत्रम्–१.१.५).

[2] तं त्रिधा — ओ; त त्रिया — छ.

[3] ०पन्नमविशेषोक्तिदर्शनात्—ओ, ख, घ, छ, ज.

[4] ०च्चानुसामान्य० — ओ.

[5] ०मपरं स्मृतम् — ओ; ०परमं मतम् — ख, घ, छ, ज.

[6] 'शेषवत्तद् यत्र कार्येण कारणमनुमीयते। पूर्वोदकविपरीतमुदकं नद्याः पूर्णत्वं शीघ्रत्वं च दृष्ट्वा स्रोतसोऽनुमीयते भूता वृष्टिरिति।' (वात्स्यायनभाष्यम् १.१.५).

[7] शूला० — ख, घ.

[8] ०शकृत्पञ्चभूपृष्ठमद० — ओ; शकृत्पुञ्जं भूपृष्ठमद० — ख, घ; समृत्पुञ्जं भूपृष्ठमद० — च; शकृत्पन्नं जम्भूपृष्ठमद० — छ; शकृत्पन्नं भूपृष्ठमद० — ज.

[9] ०शयादि० — ओ.

[10] ०श्च्छन्नैरत्रासीमत्त० — ओ; ०चित्रैरत्रा० — ख, घ, छ, ज.

[11] ०वारिणाम् — ओ; ०वारणम् — ख, घ; ०वारुणम् — छ, ज; ०न्मनुवारणः — च.

[12] अतश्चाप्यनु०—ओ; ... पुतोऽप्यनु० — ख, घ, छ, ज.

[13] साध्यशेषविधा — ओ; साध्यशेषस्तथा — ख, घ, छ, ज.

[14] 'यत्र कारणेन कार्यमनुमीयते यथा मेघोन्नत्या भविष्यति वृष्टिरिति' (वात्स्यायनभाष्यम् १.१.५).

[15] कृष्णाजिन० — ख, घ.

[16] ०निभाश्चोच्चैः — ओ.

[17] सारोपै० — छ.

[18] निबिडैर्बनैः — छ, ज.

[19] ०संप्राप्तैर्दृष्टैः किमनुमीयते — ओ, च; ०संप्राप्तैर्भ्रष्टैः किमनुमीयते — ख, ज; ०संप्राप्तैर्भृष्टैः किमनुमीयते — घ, छ.

[20] ०मुदितो — च.

[21] मृत्पादो ह्यविखण्डितम् — ओ; वृष्टेः पातो ह्यखण्डितः — च.

[1]दृष्टमासीन्न संदेहो [2]धूम अद्याप्यधोगतः ॥२२॥
[3]आशु[4]वृष्टेरमोघोऽयं [5]न [6]विधार्येत केनचित् ।
एवं पूर्ववता [7]साध्या [8]ह्यनुमानेन [9]वृट् सदा ॥२३॥

[[10]सामान्यमनुमानम्]

[11]दृष्टं [12]ज्योतिष्मतां राशेः स्वरूपं [13]पूर्वतः पुरा ।
[14]पश्चात्पश्चाच्च [15]संपश्यन् गतिमत्त्वं प्रसाधयेत् ॥२४॥
एवं प्राक् पूर्वदेशस्थं[16] देवदत्तं [17]प्रदृश्य तु ।
[18]तमेवापरदेशस्थं दृष्ट्वा किमनुमीयते ॥२५॥
एभ्यो वै गतिमान् [19]साधुर्हस्त्यश्वादेरनिश्चयात् ।
सामान्य[20]गतिमत्त्वं स्यान्न [21]विशिष्टं प्रसिध्यति ॥२६॥
[22]विशेषोऽस्यानुमानस्य [23]त्रिविधस्याप्यनिश्चयात् ।

---

[1] दृष्ट आसीन संदेहो — च.

[2] धूममन्याप्ययोगतः — ओ; धूपमाद्याप्यधोगतम् — ख, घ; ध्रुवमप्यन्यथागमः — च; धूपमान्द्याप्ययोगतम् — छ; धूपमाद्याप्ययोगतम् — ज.

[3] आसु — च.

[4] ०पृष्टेरमोघाय — ख; ०वृष्टेरमोघाय — घ, छ, ज.

[5] नतिवाय्य केनचित् — घ; नतिवीर्य केनचित् — छ, ज.

[6] निवार्य तु — ओ, ख.

[7] साध्यं ह्यनु० — ओ; साध्यमनु० — ख, घ, छ; साध्ययनु० — ज.

[8] अनुमानेन — च.

[9] वृत्सदा — च.

[10] 'सामान्यतो दृष्टम् — व्रज्यापूर्वकमन्यत्र दृष्टस्यान्यत्र दर्शनमिति, तथा चादित्यस्य तस्मादस्त्यप्रत्यक्षाप्यादित्यस्य व्रज्येति ।' (वात्स्यायनभाष्यम् १.१.५).

[11] दृष्ट० — ख, छ.

[12] ज्योतिष्मता रागो स्व० — ओ, ख, घ, छ.

[13] पूर्ववत् — ख, घ, छ, ज.

[14] पश्चाद्वश्याच्च — ओ; पश्याच्च समं पश्य गतिं मलत्वं — ख; पश्चाच्च संपश्य गतिमलत्वं — घ; पश्चाच्च समं पश्य गतिं मलत्वं — छ; पश्चाच्च समं पश्य गतिममलत्वं — ज.

[15] संदृश्य गतिमित्थं — च.

[16] ०देशस्थो देवदत्तः प्रदृश्यते — च.

[17] प्रशस्य — ओ, ख, घ; प्रपश्य — छ, ज.

[18] तमेवोपरि० — ख, घ, छ; तमेव पर० — च; तमेवोपनि० — ज.

[19] साधु हस्तपादैरनिश्चयत् — ओ; साधु हस्त्य० — छ, ज.

[20] ०गतिमित्थं — च.

[21] विविष्टं — ओ.

[22] विशेषे स्यानु० — छ, ज.

[23] त्रिविधःसानु — ओ; त्रिविधस्यात्त० — ख, घ, छ, ज; त्रिविधस्यापि — च.

[[१]आगमप्रमाणम्]

आगमादाप्त[२]वक्त्रोत्थान्नान्यथा मुनिपुङ्गव ॥२७॥
आप्तश्चैवागमात्सिद्धः[३] स चेदानीं विचार्यते ।

[[४]आप्तो महेश्वर एव]

आयुर्वे[५]दात्सगणितान्मन्त्र[६]वादाच्च [७]सस्फुरात् ॥२८॥
रसोप[८]निषदाटोपा[९]दाप्तः स परिगृह्यते ।
[१०]योगमन्त्रौषधीनां तु वीर्यमव्याहतं[११] मुने ॥२९॥
[१२]न [१३]मीमांस्यं विकल्पोक्त्या [१४]मनुष्यैरल्पबुद्धिभिः ।
केचिद्योगबलात्सिद्धाः केचिन्मन्त्रबलान्नराः[१५] ॥३०॥
केचि[१६]दौषधसामर्थ्यात्केचित्तीर्थप्रभावतः ।
त्रिकाल[१७]विषयज्ञान[१८]व्यक्तदेहा महाबलाः ॥३१॥
कारुण्यात्सिद्धयश्चित्राः प्रोक्तास्तैरेव भूतले ।
[१९]तेषामप्यपरैः प्रोक्ताः[२०] [२१]सांसिद्धिकगुणोत्तरैः[२२] ॥३२॥

---

[१] 'आप्तोक्तिरागमः सोऽपि परोक्षार्थैकसाधनम् । प्रत्यक्षेणानुमानेन यदि वार्थं सुनिश्चितम् ॥ यो वक्ति सोऽयमाप्तः स्यात्तस्मादाप्ततरः शिवः। सुप्रसन्नेन्द्रियग्रामः सर्वज्ञः सर्वगोचरः ॥ पक्षपातविनिर्मुक्तो यथार्थग्राहकः सदा । अव्ययः परिपूर्णश्च स्वतन्त्रः पशुपाशहा ॥ प्रमाणमेकं तद्वाक्यं तथ्यं श्रेयोनिधिः सदा ।' (पौष्करे विद्या॰ प्रमाणपटले ६० — ६३पू॰); 'प्रमाणमेकं तद्वाक्यं तथ्यमीश्वरभाषितम् ।' (मतङ्ग॰ विद्या॰ ३.२०पू॰).

[२] ॰वक्त्रोक्तान्नान्यथा — ओ; ॰वक्त्रोत्था नान्यथा — ख, च.

[३] ॰त्सिद्धिः — छ, ज.

[४] आ तोक्तिरत्र सिद्धान्तः शिव एवाप्तिमान्यतः॥ न ताभ्यां सदृशः कश्चिच्छ्रे य आ तविधायकः ॥ सिद्धान्त एव सिद्धान्तः पूर्वपक्षास्ततः परे । आप्तस्तु शिव एवैकः शिवान्ये त्वशिवा मताः ॥ (रत्नत्रये १०, ११).

[५] ॰दात्सगुणिता मन्त्र॰ — ओ; ॰दात्सगणिता मन्त्र॰ — ख;.

[६] ॰वाराच्च — च.

[७] संस्वरात् — ओ.

[८] निषदादर्थादाप्तः सं परि॰ — च.

[९] ॰दाप्तः सन् परि॰—ओ; ॰दाप्तस्य परि॰—ख.

[१०] कालमन्त्रौ॰ — ओ, च; कलामन्त्रौ॰ — ख, घ, छ, ज.

[११] ॰मद्याहतं — ओ; चीर्यमव्याहतं — ज.

[१२] 'न मीमांस्या विचार्या वा मन्त्राः स्वल्पधिया नरैः । प्रमाणमागमं कृत्वा श्रद्धातव्यं हितैषिभिः॥' (रौरवे विद्या॰ ३.२७).

[१३] मीमांसं — ओ; मीमांस्य — ख, घ, छ; मीमांस्यो — च; मीमांसस्य — ज.

[१४] मनुष्यैर्मन्द॰ — ओ, ख, छ, ज; मनुष्यैर्मंद॰ — घ.

[१५] ॰बलं नराः — छ, ज.

[१६] ॰दौषधि॰ — ओ, च.

[१७] ॰विषयं ज्ञानं — ओ, ख, घ, छ, ज.

[१८] ॰व्यक्तं देहा — ओ.

[१९] तेषां मध्यवरैः — ओ; तेषामप्य . . रः — ख.

[२०] प्रोक्त॰ — ख; प्रोक्तः — घ, छ, ज; प्रोक्ता — च.

[२१] संसिद्धिक॰ — च; सामसिद्धि॰ — छ, ज.

[२२] गुणोत्तरे — ओ.

मनुष्याणां च विप्रेन्द्र [1]योगोपायश्च न [2]स्वयम् ।
[3]यतोऽभिव्यक्तिमायाति [4]ह्युपदेशं विना क्वचित् ॥३३॥
ताल्वोष्ठपुटसं[5]योगाद्व्यक्तमाप्तवचो यतः ।
तस्मादाप्तः [6]प्रपत्तव्यः [7]पारंपर्यक्रमागतात्[8] ॥३४॥
अप्रयत्नवतो वापि [9]न चोत्पत्तिमतः सदा ।
ततोऽस्य परतन्त्रत्वमुत्पत्तिविलयात्स्फुटम् ॥३५॥
[10]यस्य यस्य यदायत्तं यद्यद्वस्तु प्रवर्तते ।
तस्य तस्य स वक्तव्यः [11]कर्ता कारणमत्र तु ॥३६॥
अस्याशेषस्य जगतः [12]कारणं स महेश्वरः[13] ।
व्यज्यते यद्बलाविष्टं [14]विलयं [15]चानुगच्छति ॥३७॥
[16]स्थूलं विनश्वरं [17]दृश्यं कृतकं चाप्यचेतनम् ।
[18]परतन्त्रं जगद्यस्मात्तत्कर्तुरखिलं[19] मुने ॥३८॥
[20]प्रत्यक्षेणानु[21]मानेन वक्तासावेव निश्चितः[22] ।
तस्मात्तद्वचना[23]त्सिद्धा पृथिवी साधिदेवता[24] ॥३९॥

---

[1] यः सोपायश्चलः स्वयम् — च; योगोपायाश्च — छ, ज.
[2] स्वनः — ख; स्वनम् — घ, छ, ज.
[3] सतो हि व्यक्ति० — ख, घ; यतोऽपि व्यक्ति० — च; सतोऽभिव्यक्तिः — छ, ज.
[4] उपदेशं — ओ, घ, च, छ, ज; भ्युपदेशं — ख.
[5] ०योगाद्विप्त० — ख.
[6] प्रकर्तव्यः — ओ; प्रवक्तव्यः — ख, घ, छ, ज.
[7] 'ओ' मातृकायां '३४' तमश्लोकस्य चतुर्थपादप्रभृति '३६' तमश्लोकस्य तृतीयपादान्तो भागो लुप्तः ।
[8] ०गतान् — ख, घ, छ, ज; ०क्रमोत्तरम् — च.
[9] नयोत्पत्ति० — ख; नाशोत्पत्ति० — च.
[10] यत्र यत्र — ख, घ, छ, ज.
[11] कर्तृकारण० — ओ.
[12] शरणं — ख, घ, छ, ज.
[13] महेश्वर — ख; 'एवं हि परतन्त्रत्वाज्जगतोऽस्याखिलस्य तु । प्रवृत्तिर्नेष्यते यस्मात्तस्मात् कर्ता महेश्वरः ॥' (मतङ्ग० विद्या० ६.९५)
[14] विषयं — ख, घ, छ, ज.
[15] वानु० — ओ, ख, घ, छ, ज.
[16] मूलं विश्वेश्वरं — ओ.
[17] दृश्यमक्रुतं — ओ; दृश्य क्रुतकं — च.
[18] पूरतन्त्रं — च; परतन्त्रजग० — छ, ज.
[19] ०स्मात्कर्तुमारखिलं — ख, घ, छ, ज.
[20] प्रत्यक्षमनुमानेन — च.
[21] ०मानेनोक्त्या सावेव — ओ.
[22] वक्ता सा . . निश्चयम् — ख, घ; वक्ता सा निश्चयं . . — छ, ज; निश्चितम् — च.
[23] ०त्सिद्धपृथिवी — छ.
[24] ०दैवता — ओ.

[[१]पार्थिवतत्त्वजयः]

द्वीपार्णवगिरिप्राया प्रमाणरचनोज्ज्वला[२] ।
[३]ध्यातव्या योगसिद्ध्यर्थं तत्त्वमार्गव्यवस्थया ॥४०॥
[४]देहे च तत्त्वमा[५]पन्ना; तस्यामारोप्य [६]वै मनः।
[७]कूर्मोऽङ्गानीव संकोच्य तल्लयस्तत्परायणः ॥४१॥
रूपमभ्यस्यतस्तस्य[८] पार्थिवं यत्स्वकं ध्रुवम् ।
व्यक्तिमायात्यसंदेहा[९]त्साधिदेवतयान्विता[१०] ॥४२॥
[११]पीतं [१२]वा गन्ध[१३]तन्मात्रं गुणेन समधिष्ठितम् ।

---

[१] 'यः पुनर्गुरुणैवादौ कृतावेशविधिक्रमः ।
स वासनानुभावेन भूमिकाजयमारभेत् ॥
गणनाथं नमस्कृत्य संस्मृत्य त्रिगुरुक्रमम् ।
सम्यगाविष्टदेहः स्यादिति ध्यायेदनन्यधीः ॥
स्वदेहं हेमसंकाशं तुर्याश्रं वज्रलाञ्छितम् ।
ततो गुरुत्वमायाति सप्तविंशतिभिर्दिनैः ॥
दिवसात्सप्तमादूर्ध्वं जडता चास्य जायते ।
षड्भिर्मासैर्जितव्याधिर्द्रुतहेमनिभो भवेत् ॥
वज्रदेहस्त्रिभिश्चाब्दैर्नवनागपराक्रमः ।
एषा ते पार्थिवी शुद्धा धारणा परिकीर्तिता ॥
आद्या पूर्वोदिते देवि भेदे पञ्चदशात्मके ।
सव्यापारं स्मरेद्देहं द्रुतहेमसमप्रभम् ।
उपविष्टं च तुर्याश्रे मण्डले वज्रभूषिते ॥
सप्ताहाद् गुरुतामेति मासाद्व्याधिविवर्जितः ॥
षड्भिर्मासैर्धरान्तस्थं सर्वं जानाति तत्त्वतः ।
त्रिभिरब्दैर्महीं भुङ्क्ते सप्ताम्भोनिधिमेखलाम् ।
द्वितीयः कथितो भेदस्तृतीयमधुना शृणु ।
तद्वदेव स्मरेद्देहं किं तु व्यापारवर्जितम् ॥
पूर्वोक्तं फलमाप्नोति तद्वत्पातालसंयुतम् ।
चतुर्थे हृद्गतं ध्यायेद् द्वादशाङ्गुलमायतम् ॥
पूर्ववर्णस्वरूपेण सव्यापारमतन्द्रितः ।
प्राप्य पूर्वोदितं सर्वं पातालाधिपतिर्भवेत् ॥
तदेव स्थिरमाप्नोति निर्व्यापारे तु पञ्चमे ।
स्फुरत्सूर्यनिभं पीतं षष्ठे कृष्णं घनावृतम् ॥
निस्तरङ्गं स्मरेत्तद्वत्सप्तमेऽपि विचक्षणः ।
द्वयेऽप्यत्र स्थिरीभूते भूर्भुवःस्वरिति त्रयम् ॥
वेत्ति भुङ्क्ते च लोकानां पुरोक्तैरेव वत्सरैः ।
सकलं हृदयान्तस्थमात्मानं कनकप्रभम् ॥
स्वप्रभाद्योतिताशेषदेहान्तमनुचिन्तयेत् ।
सव्यापारादिभेदेन सप्तलोकीं तु पूर्ववत् ॥
वेत्ति भुङ्क्ते स्थिरीभूते भेदेऽस्मिन्नवमे बुधः ।
रविबिम्बनिभं पीतं पूर्ववद् द्वितयं स्मरेत् ॥
ब्रह्मलोकमवाप्नोति पूर्वोक्तेनैव वर्त्मना ।
अधः प्रकाशितं पीतं द्विरूपं पूर्ववन्महत् ॥
चिन्तयेन्मत्समो भूत्वा मल्लोकमनुगच्छति ।
सबाह्याभ्यन्तरं पीतं तेजः सर्वप्रकाशकम् ॥
चिन्तयेच्छतरुद्राणामधिपत्वमवाप्नुयात् ।
इत्येवं पृथिवीतत्त्वमभ्यस्यं दश पञ्चधा ॥
योगिभिर्योगसिद्ध्यर्थं तत्फलानां बुभुक्षया ।'
(मालिनीविजयोत्तरतन्त्रे १२.२०पू०–३९)

[२] प्रवार्णव . . रचनोज्वलाः — ओ.

[३] 'ओ' मातृकायामिदमर्धं न दृश्यते ।

[४] देहे तत्तत्त्व० — ओ; दहेत तत्त्व० — च; देहो च तत्त्व० — छ, ज.

[५] ०पन्नात्स्वात्मन्यारोप्य — ओ; ०पन्ना तस्य मारप्य – ख, घ; ०मापन्न तस्य मारोप्य–छ, ज.

[६] वे मनः — छ, ज.

[७] कूर्मानीव संयोच्च – ओ; कूमोद्गानीव – ख; कूमोङ्गानीव — घ; कूर्माङ्गानीव — च; कं तु मो गाव — छ; कं तु मों गाव — ज.

[८] ०मभ्यसतस्य — ख; ०मप्यसतस्तस्य — छ; ०मभ्यस्ततस्तस्य — ज.

[९] ०त्सादधिदैवतया० —छ; ०त्सदधीदैवतया–ज.

[१०] ०न्वितम् — च.

[११] चीतं — छ, ज.

[१२] गन्धं च तन्मात्रं — ओ.

[१३] तन्मात्रगुणेन — ख, घ, च, छ, ज.

ध्यायेत्प्रसन्न[1]चित्तात्मा यावत्सा [2]देवतान्विता ॥४३॥
व्यक्तिमायाति [3]सुप्रीता [4]योगेनाभिमुखीकृता ।
योगिनो [5]लब्धवीर्यस्य[6] प्रसन्ना सर्वकामदा ॥४४॥
[7]लब्धभूमिस्तदा [8]योगी वशीकृत्य शनैः शनैः ।
पार्थिवं [9]तत्त्वमेवं स्याद्

[[10]अप्तत्त्वजयः]

[11]आप्यमप्यभ्यसेत्तदा[12] ॥४५॥
तत्राप्युक्तो [13]विधिरयं किं तु [14]तच्छ्वेतमभ्यसेत् ।

---

[1] ०भक्तात्मा — ओ.
[2] देवतान्विधौ — ओ; देवताविधौ — ख, घ, च, छ, ज.
[3] सुप्रीत्या — ओ; सुवृता — ज.
[4] योगेनात्ममुखी० — ख, घ, छ, ज.
[5] ०ल्लब्ध० — ओ.
[6] वीर्येण — ओ, ख, घ, छ, ज.
[7] लब्धा भूमिस्तथा देया — ओ.
[8] योगिरशिकृत्य — छ, ज.
[9] तत्त्वमेव — ओ.
[10] 'अथातः संप्रवक्ष्यामि धारणां वारुणीमिमाम् ।
यया संसिद्धयोगेन जलान्ताधिपतिर्भवेत् ॥
जलान्तःस्थं स्मरेद्देहं सितं शीतं सुवर्तुलम् ।
सबाह्याभ्यन्तरं योगी नान्यदस्तीति चिन्तयेत् ॥
एवमभ्यस्यतस्तस्य सप्ताहात्क्लिन्नता भवेत् ।
पित्तव्याधिपरित्यक्तो मासेन भवति ध्रुवम् ॥
स्निग्धाङ्गः स्निग्धदृष्टिश्च नीलकुञ्चितमूर्धजः।
भवत्यब्देन योगीन्द्रस्त्रिभिर्वर्षति मेघवत् ॥
इत्येषा वारुणी प्रोक्ता प्रथमा शुद्धधारणा ।
अधुना संप्रवक्ष्यामि भेदैर्भिन्नामिमां पुनः ॥
पूर्ववच्चिन्तयेद्देहं सव्यापारं सितं स्वकम् ।
जलोपरि स्थितं देवि तद्गतेनान्तरात्मना ॥
सप्ताहान्मुच्यते रोगैः सर्वैः पित्तसमुद्भवैः ।
षण्मासाज्जायते स्थैर्यं यदि तन्मयतां गतः ॥
जलावरणविज्ञानमब्दैरस्य त्रिभिर्भवेत् ।
निर्व्यापारप्रभेदेऽपि सर्वत्र वरुणोपमः ॥
स याति वारुणं तत्त्वं भूमिकां क्रमशोऽभ्यसेत् ।
पूर्ववत्कण्ठमध्यस्थमात्मानं द्वादशाङ्गुलम् ॥
संस्मरञ्जलतत्त्वेशं प्रपश्यत्यचिराद् ध्रुवम् ।
तद्दृष्टिः स्थिरतामेति स्वरूपे पञ्चमे स्थिरे ॥
द्विभेदेऽपि स्थिरीभूते चन्द्रबिम्बे घनावृते ।
तत्समानत्वमभ्येति ततः सकलरूपिणी ॥
चिन्त्यते देहमापूर्य सितवर्णेन तेजसा ।
तदेव स्थिरतामेति तत्र सुस्थिरतां गते ॥
घनमुक्तेन्दुबिम्बाभस्ततः समनुचिन्तयेत् ।
तत्पतित्वं समभ्येति द्वितीयं स्थिरतां व्रजेत् ॥
अतः प्रकाशकं शुक्लं ततस्तेजो विचिन्तयेत् ।
विद्येश्वरत्वमाप्नोति जलावरणसंभवम् ॥
स्वदेहव्यापिनि ध्याते तत्रस्थे शुक्लतेजसि ।
सर्वाधिपत्यमाप्नोति सुस्थिरे तत्र सुस्थिरम् ॥
ध्येयतत्त्वसमानत्वमवस्थात्रितये स्थिरे ।
द्वितीये च तदीशानसंवित्तिरुपजायते ॥
द्वितीयेऽन्यत्र तत्तुल्यः स्थिरो भवति योगवित् ।
षट्के सर्वेशतामेति द्वितीयेऽन्यत्र तु च्युतिः ॥
इत्ययं सर्वतत्त्वेषु भेदे पञ्चदशात्मके ।
ज्ञेयो विधिर्विधानज्ञैः फलपञ्चकसिद्धिदः ॥
तत्फलान्तरमेतस्मादुक्तं यच्चापि वक्ष्यते ।
अनुषङ्गफलं ज्ञेयं तत्सर्वमविचारतः ॥
इत्येवं वारुणी प्रोक्ता प्रभेदैर्दशपञ्चभिः ।
योगिनां योगसिद्धचर्थम्'
(मालिनीविजयोत्तरे १३.१–२०).
[11] अभ्यास भ्यासयेत्तदा — ओ; आप्यमभ्यप्यसे तदा — छ, ज.
[12] ०त्सदा — च.
[13] विधिरियं — ओ.
[14] तच्छेतं० — ओ; तध्वेत० — ज.

रसतन्मात्र[१]संयुक्तं [२]शेषाश्चास्य गुणा मुने ॥४६॥
[३]पारक्यास्तेन सिद्धस्य नाभिव्यक्ति[४] प्रयान्ति हि[५] ।
[६]पूर्व[७]तत्त्वजयात्तस्य शुभो गन्धः प्रजायते ॥४७॥
शरीरस्य मुनिव्याघ्र [८]विलिप्तस्यापि तत्क्षणात् ।
[९]अणुत्वमप्यनायासं स्वेच्छयैवाप्यथाप्नुयात्[१०] ॥४८॥
[११]योगी योग[१२]जयात्क्षिप्रं [१३]द्रव[१४]द्रव्येष्ववारितः[१५] ।
[१६]क्रीडत्यक्लिष्टवपुषा[१७] [१८]योगजेनातिवर्चसा ॥४९॥
[१९]दर्शनात्स्पर्शनात्तस्य वाचा [२०]चैव विचारतः ।
[२१]भवेद्रसविकारोऽस्य शुभो वाप्यशुभोऽपि वा ॥५०॥
[२२]यदीच्छेत् प्लावितु[२३] सर्वं त्रैलोक्यं सचराचरम् ।
तदम्भसो [२४]जयात् [२५]कुर्यान्नान्यथा मुनिसत्तम ॥५१॥

---

[१] संयुक्तः — छ, ज.
[२] शेषाश्चास्य गुणो मुने — ओ; शेषास्य चरणान्मुने — ख; शेषास्य चरणा मुने — घ, छ, ज.
[३] पारकयास्येंन सिद्धस्य नाभि० — ओ; परक्यास्तेन सिद्धस्य नाभि० — ख, घ; पाराक्यास्तेन सिद्धस्य नाति० — च; परक्यास्तेन सिध्य नाभि० — छ, ज; पारक्याः-परकीयाः; 'स्वाक्याः' इतिवत्, मतङ्ग० विद्या० ४.५ उ० वृत्तौ।
[४] व्यक्ति — च; व्यक्तं — छ, ज.
[५] प्रयान्तिभिः — ओ.
[६] पूर्वं — ख, घ, छ, ज.
[७] ०तत्त्वाजया० — ओ.
[८] विण्मूत्रमपि — ओ, ख, घ; विण्मूत्त्रामपि — छ; विण्मूत्रस्यापि — ज.
[९] अनुक्तमप्यनायासस्वेच्छा वै चाप्ययायात् – ओ.
[१०] ०प्यथानुयत् —छ, ज.
[११] योगिनो यछ्रयात्क्षिप्रं — च; योगियोग० — छ, ज.
[१२] ०जयान्क्षिप्रं — ओ.
[१३] द्रव्यं — ओ.
[१४] ०द्रव्येषु वारितः — घ.
[१५] ०ष्ववारितम् — ओ, च.
[१६] क्रीडन्त्यक्लिष्ट० — ओ, च.
[१७] ०वपुषो — च.
[१८] योजनेनाति — ख, घ, छ, ज.
[१९] दर्शन् स्पर्श० — ओ.
[२०] चैवाविचारतः — ओ; चैवाविचारितः — ख, घ; चैव विचारितः — छ, ज.
[२१] भवेद्रसं विकारस्व० — ओ; भवेद्रवीकारं शुभो —ख; भवेद्रचीकारं शुभो — घ; भवेद्रविकारं शुभो — छ, ज.
[२२] यदिच्छे — छ, ज.
[२३] ०प्लावितं — ओ.
[२४] जयं — ओ, ख, घ, छ, ज.
[२५] कुर्यान्नाथाय मुनि० — ख, घ, छ, ज.

[[1]अग्नितत्त्वजयः]

[2]निर्जित्याम्भो विशेदग्नौ [3]यज्जयाज्ज्वलते क्षणात् ।
[4]रूपाण्यरूपतां यान्ति [5]यान्त्यरूपाणि रूपताम् ॥५२॥
[6]तदिच्छावश[7]वर्तीनि [8]विचित्राण्युत्कटानि च[9] ।
[10]म्लानतेजांसि वा [11]स्पष्टं [12]वीर्येणाग्निगुणात्मना ॥५३॥

---

[1] 'त्रिकोणं चिन्तयेद्देहं रक्तज्वालावलीधरम् ।
सप्तभिर्दिवसैर्देवि तैक्ष्ण्यमस्योपजायते ॥
वातश्लेष्मभवैः सर्वैर्मासान्मुच्यति साधकः ।
निद्राहीनश्च बह्वाशी स्वल्पविण्मूत्रकृद्भवेत् ॥
इच्छया निर्दहत्यन्यत्स्पृष्टवस्तु ऋतुक्षयात् ।
त्र्यब्दादग्निसमो भूत्वा क्रीडत्यग्निर्यथेच्छया ॥
सर्वं निर्दहति क्रुद्धः सशैलवनकाननम् ।
त्रिकोणमण्डलारूढमात्मानमनुचिन्तयेत् ॥
सव्यापारादिभेदेन सर्वत्रापि विचक्षणः ।
सप्ताहाद्व्याधिभिर्हीनः षण्मासादग्निवद्भवेत् ॥
त्रिभिरब्दैः स संपूर्णं तेजस्तत्त्वं प्रपश्यति ।
यच्छक्तिभेदे यद्दृष्टं तत्तद्भेदे स्थिरीभवेत् ॥
पूर्ववत्तालुमध्यस्थमात्मानं ज्वलनप्रभम् ।
ध्यायन्प्रपश्यते तेजस्तत्त्वेशानखिलान्क्रमात् ॥
धूमाक्रान्ताग्निसंकाशं रविबिम्बसमाकृतिम् ।
ध्यायंस्तन्मध्यतस्तेजस्तत्त्वेशसमतां व्रजेत ॥
प्रभाहततमोजालं विधूमाग्निसमप्रभम ।
तत्रैव सकलं ध्यायेत्तत्पतित्वमवाप्नुयात् ॥
दिवसाग्निप्रभाकारं तत्र तेजो विचिन्तयेत् ।
तन्मन्त्रेश्वरतामेति तत्र सुस्थिरतां गते ॥
मणिप्रदीपसंकाशं तेजस्तत्र प्रकाशयेत् ।
मन्त्रेशेशत्वमभ्येति योगी तन्मयतां गतः ॥
सबाह्याभ्यन्तरं तेजो ध्यायन्सर्वत्र तद्गतम् ।
तस्मान्न च्यवते स्थानादासंहारमखण्डितः ॥
संहारे तु परं शान्तं पदमभ्येति शाङ्करम् ।
इत्येषा पञ्चदशधा कथिता वह्निधारणा ॥'
(मालिनीविजयोत्तरे १३.२१–३३)

[2] निर्जनाम्भो — ओ; मज्जत्यम्भो — ख, घ, छ, ज.

[3] यज्जयाज्जलते — ओ; लज्जलाज्वलिते — ख; लज्जया ज्वलिते — घ, छ, ज.

[4] रूपस्य रूपतां याति — ओ; रूपाप्यरूपतां — छ.

[5] यान्त्ये रूपाणि — ओ; रूयद्यरूपाणि — ख; यत्यरूपाणि — घ, छ, ज.

[6] तदिष्टवश० — ख; तदिच्छवश० — घ, छ, ज.

[7] ०वर्तीन — छ, ज.

[8] वि. . क्त्राण्यु० — ओ.

[9] वा — ओ, ख, घ, छ, ज.

[10] म्लानं तेजां शिवा — ओ; म्लानं तेजसि वा — ख, घ, छ, ज.

[11] स्पष्टां — च; स्पृष्ट० — छ; स्पृष्टं — ज.

[12] वीर्येणातिगु० — ख, घ; वीर्येणदि० — छ, ज.

[[१]वायुतत्त्वजयः]

[२]जिताग्नेर्व्यज्यते योक्तुर्वायुः[३] स्वेनैव[४] तेजसा[५] ।
प्रभूतबलवीर्येण [६]चलच्चण्डेन साधुना ॥५४॥
[७]तन्मयस्य [८]सदोद्युक्तचेतसाविद्धतेजसः[९] ।
[१०]अनानात्वगुणोपेत[११]शरीरस्यामितद्युतेः ॥५५॥
योगीन्द्रस्य [१२]गुणा वायोः [१३]स्वाक्या व्यज्यन्त्यनिन्दिताः ।
[१४]तदुन्मीलित[१५]सामर्थ्याच्छीतोष्णमृदुकर्कशान्[१६] ॥५६॥
प्रकरोतीच्छया [१७]सर्वान्भावान्नात्र विचारणा ।
उत्पूय वा जगत्सर्वं संहरेल्लीलयैव हि ॥५७॥

---

[१] 'स्वदेहं चिन्तयेत्कृष्णं वृत्तं षड्बिन्दुलाञ्छितम् ।
चलं सचूचूशब्दं च वायवीं धारणां श्रितः ॥
चलत्वं कफजव्याधिविच्छेदाद्वायुवद्भवेत् ।
षण्मासमभ्यसेद्योगी तद्गतेनान्तरात्मना ॥
योजनानां शतं गत्वा मुहूर्तादित्यखेदतः ।
वत्सरैस्तु त्रिभिः साक्षाद्वायुरूपधरो भवेत् ॥
चूर्णयत्यद्रिसंघातं वृक्षानुन्मूलयत्यपि ।
क्रुद्धश्चानयते शक्रं सभृत्यबलवाहनम् ॥
नीलाञ्जननिभं देहमात्मीयमनुचिन्तयेत् ।
पूर्वोक्तं सर्वमाप्नोति षण्मासान्नात्र संशयः ॥
त्र्यब्दात्प्रपश्यते वायुतत्त्वं तन्मयतां गतः ।
भ्रुवोर्मध्ये स्मरेद् रूपमात्मनोऽञ्जनसंनिभम् ॥
पश्यते वायुतत्त्वेशानाशुगानखिलानपि ।
घनावृतेन्द्रनीलाभो रविबिम्बसमाकृतिम् ॥
ध्यायंस्तत्समतामेति तत्संलीनो यदा भवेत् ।
भिन्नेन्द्रनीलसंकाशं सकलं तत्र चिन्तयेत् ॥
तन्मन्त्रेशत्वमाप्नोति ततस्तस्येशतामपि ।
सर्वव्यापिनि तद्वर्णे ध्याते तेजस्यवाप्नुयात् ॥
तदाप्रधृष्यतामेति तत्रोर्ध्वाधोविसर्पिणि ।
इत्येवं कथिता दिव्या धारणा वायुसंभवा ॥'
(मालिनीविजयोत्तरे १३.३४–४३).

[२] जिताग्नौ व्य० — ओ, ख, घ, छ, ज.

[३] योक्तुर्वाय — घ, छ, ज.

[४] स्वेनेव — छ.

[५] तेजसः — ओ, घ.

[६] चलच्छन्धेन — ओ; चलचण्डेन — ख, घ, छ, ज; वलच्चण्डेन — च.

[७] तन्मयो सततोद्युक्तः — ख.

[८] सतोद्युक्तस्तेज० — ओ, घ, छ, ज; सदोद्युक्तश्चेतसो — च.

[९] ०वेतसः — ओ; ०चेतसः — ख, घ, छ, ज.

[१०] अनानालगुणोपेत० — ओ; अनानात्मगुणोपेतः — ख, घ, छ, ज.

[११] शरीरस्यापि तद्विते — ओ; शरीसस्यामितद्वितेः — घ, छ, ज.

[१२] 'घ' मातृकायां मध्ये तालपत्राणामदर्शनाद् 'गुणा वायोः' इत्यारभ्य १२८ पूर्वार्धान्तो भागो न दृश्यते ।; गुणोपायो सवाक्या त्यज्य निन्दिता — ओ; गुणोपायो स्वाक्या वर्जन्त्यनिन्दिता — ख; गुणोपायो स्वात्या वर्जतनिन्दिता — छ; गुणोपायो स्वत्या वर्जत्यनिन्दिता — ज.

[१३] स्वाक्त्या — च.

[१४] तन्निमीलित० — ओ.

[१५] ०सामर्थ्या शीतोष्ण० — ख, च; सामर्थ्यः शीतोष्णी — छ, ज.

[१६] ०कर्कशाः — ओ, ख; कर्कशः — छ, ज.

[१७] सर्वाण्यावान्तत्र वि० — ओ; सर्वन्यवा तन्त्रविचारणाः — ख, छ; सर्वान्यवा तन्त्रविचारणा — ज.

[[1]व्योमतत्त्वजयः]

व्योम्नि चित्तं समारोप्य यदि [2]सम्यङ्गनिलीयते ।
व्योम[3]रूपस्तदा योगी जगत्यस्मिन्विचेष्टते[4] ॥५८॥

मतङ्ग उवाच —

यदमूर्तमनाधारमवि[5]कारितकारणम्[6] ।
[7]अनाद्यकारणं यस्मात्तत्कथं साध्यते विभो ॥५९॥

परमेश्वर उवाच —

[8]अवकाशेन धर्मेण शब्देनात्मगुणेन च ।

---

[1] 'स्वदेहं वायुवद्ध्यात्वा तदभावमनुस्मरन् ।
दिवसैः सप्तभिर्योगी शून्यतां प्रतिपद्यते ॥
मासमात्रेण भोगीन्द्रैरपि दष्टो न मुह्यति ।
सर्वव्याधिपरित्यक्तो वलीपलितवर्जितः ॥
षण्मासाद्गगनाकारः सूक्ष्मरन्ध्रैरपि व्रजेत् ।
वत्सरत्रितयात् सार्धाद् व्योमवच्च भविष्यति ॥
इच्छयैव महाकायः सूक्ष्मदेहस्तथेच्छया ।
अच्छेद्यश्चाप्यभेद्यश्च छिद्रां पश्यति मेदिनीम् ॥
शतपुष्परसोच्छिष्टमूषागर्भखवन्निजम् ।
देहं चिन्तयतस्त्र्यब्दाद् व्योमज्ञानं प्रजायते ॥
पूर्वोक्तं च फलं सर्वं सप्ताहादिकमाप्नुयात् ।
ललाटे चिन्तयेत्तद्वद्द्वादशाङ्गुलमायतम् ॥
तत्तत्त्वेशान्क्रमात्सर्वान्प्रपश्यत्यग्रतःस्थितान् ।
राहुग्रस्तेन्दुबिम्बाभं ध्यायंस्तत्समतां व्रजेत् ॥
सकलं चन्द्रबिम्बाभं तत्रस्थमनुचिन्तयेत् ।
तन्मन्त्रेशत्वमाप्नोति ज्योत्स्नया चन्द्रतामपि ॥
तयैवाधोविसर्पिण्या सबाह्याभ्यन्तरं बुधः ।
मन्त्रेश्वरेशतामाप्य विज्ञानमतुलं लभेत् ॥
तया चोर्ध्वविसर्पिण्या ज्योत्स्नयामृतरूपया ।
स्वतन्त्रत्वमनुप्राप्य न क्वचित्प्रतिहन्यते ॥'
(मालिनीविजयोत्तरे १३.४४–५३).

[2] सम्यग् विलीयते — ओ.

[3] ०रूपास्तथा — ओ.

[4] विचेष्टिता — ओ.

[5] कारि न कारणम् — ओ.

[6] ०कारिणम् — छ.

[7] अनाद्यकार्यं कारणं तत्कथं — ओ, ख; अनाद्यकार्यकरणं तत्कथं — छ, ज.

[8] 'गमागमादिव्यापारो यस्मिन्सति नृणां भवेत् ।
तद्धेतुभूतमाकाशमिष्यतां मुनिपुङ्गवाः ॥
नो चेत्तदवकाशाख्यं विचरेयुः क्व जन्तवः ।
न हि भूम्यन्तरादृष्टौ प्राणिनां तु गमागमौ ॥
यस्मादाकाशमेष्टव्यमवकाशस्य कारणम् ।
किं च तीव्रादयः शब्दा गुण्यपेक्षा गुणत्वतः ॥
गुणी चाकाशमित्युक्तं तच्च नृणामतीन्द्रियम्''
(पौष्करे विद्या० पुंस्तत्त्वपटले २८१-२८३);
'आकाशं शब्दतन्मात्रादवकाशत्वलक्षणम् ॥
व्यक्तं व्यक्तिकरं विप्र पृथक्संस्थानसिद्धये ।
भूतानां भुवनानां च गत्यर्थं चाध्वसन्ततौ ॥
तच्छब्दगुणसाधर्म्यात्सिद्धं यस्मात्तदाश्रितः ।
शब्दोऽभिव्यक्तिमायाति नान्यथा मुनिपुङ्गव ॥
'स्थाण्वभावाद्यथा चित्रं न क्वचित्संप्रदृश्यते ॥
शब्दस्यापि ततोऽस्तित्वादाकाशं गुणवत्सदा ।
तच्चापि शब्दतन्मात्राद्व्यक्तं संप्रति लक्ष्यते ॥
संहारे तु प्रणष्टं स्याद्भोगिनं प्रति निश्चितम् ।
येनावकाशकं वस्तु न किंचिदपि विद्यते ॥
ध्वस्ते व्यापारनिलये प्रलीनस्य तदात्मनः ।
न चास्यात्यन्तिकोऽभावो न चोत्पत्तिरिहेष्यते ॥
नित्यत्वान्मुनिशार्दूल स तथाप्युपचर्यते ।'
(मतङ्ग विद्या० १९–६उ०–८, ९उ०–१३पू०)

संज्ञया च मुनिव्याघ्र किमर्थं भेदवानपि ॥६०॥
[1]नेच्छसे [2]वस्तुमार्गेऽस्मिन्प्रविचारात्सुपुष्कलात्[3] ।
गुणवा[4]न्भेदवान्संज्ञी[5] [6]त्रिरवस्थानदर्शनात् ॥६१॥
[7]विलयोत्पत्तिरेतेषां [8]यस्मात् [9]सोऽप्युपचर्यते ।
व्यक्तो [10]वाप्यथ नष्टो वा[11] भावैरात्मन्यवस्थितैः[12] ॥६२॥
न [13]विनाशोऽस्ति भावानां [14]नित्यानाममितात्मनाम् ।
न चैवोत्पत्तिरित्येवं नित्यत्वाद्युज्यते[15] मुने ॥६३॥
[16]द्वे रूपे [17]वस्तुनः प्रोक्ते सृष्टिसंहाररवर्त्मनि ।
प्रलये शक्ति[18]रूपं स्याद्व्यक्तिरूपमतोऽन्यथा ॥६४॥
तेनाकाशमिति [19]प्रोक्तमुपचारा[द्]यथा मुने ।
खपुष्पकूर्म[20]लोमादेर्या संज्ञा वस्तुसंहतौ[21] ॥६५॥
तयोर्योगादृतेऽसंज्ञा[22] नाभावः[23] [24]शशशृङ्गयोः ।
स्थाने [25]सत्यपि [26]नास्त्यत्र यो [27]भावो यस्य वस्तुनः ॥६६॥
शक्ति[28]रूपं स्थितं तद्धि बोद्धव्यमथवा क्वचित् ।
किंचिद्व्यक्तिमवाप्नोति जातिभेदात्पृथक् पृथक् ॥६७॥
संज्ञा [29]सद्वस्तुनः प्रोक्ता [30]व्यवहाराध्वगोचरे[31] ।
असत्प्रलपितं[32] शेषमथवाक्षरसंहतेः[33] ॥६८॥

---

[1] नेच्छा स वस्तु० — ओ; नेच्छते — च.
[2] वस . . स्मिन् विचारात् — ख; प्रविचरान्–च.
[3] ०पुष्कलान् — ख, च, छ, ज.
[4] ०न्भेदवानज्ञसर्त्युवस्थान० — छ; ०न्भेदवान-ज्ञसत्र्यवस्थान० — च.
[5] संज्ञं — ओ.
[6] त्र्यवस्थान० — ख.
[7] विषयोत्पत्तिरित्येषा — ओ; विलयोत्पत्ति-रित्येषा — ख, छ, ज; विलयः+उत्पत्तिः= विलय उत्पत्ति; ततः संधिरार्षः ।
[8] या तु — ओ, ख; धातु — छ, ज.
[9] साद्युप० — ओ; साप्युप० — ख, छ, ज.
[10] वाप्यथवा नष्टो — च; वाप्यथवा नष्टौ–छ, ज.
[11] व्यक्तोऽप्यथवानषौ — ख.
[12] ०व्यवस्थितः — ओ.
[13] विवायोऽस्ति — ओ.
[14] नित्यताममि० — ओ; नित्यानां निर्मितात्मनाम् — छ, ज.
[15] ०त्वान्मुच्यते—ओ; ०त्वादुच्यते — ख, छ, ज.
[16] 'ख, छ, ज' मातृकासु '६४' तमश्लोकः '६५' तमश्लोकस्य पूर्वार्धं च न स्तः ।
[17] वस्तुनि — च.
[18] ०रूप स्या० — ओ.
[19] प्रोक्ता उपचारा — ओ; प्रोक्तमुपचारं—च.
[20] ०लोमाद्ये या — ओ.
[21] ०संहते — ओ; ०सङ्गते — ख; ०संतते — च; ०संज्ञते — छ, ज.
[22] यो योगादृते ते संज्ञा — ओ.
[23] नाभावं — ओ; न भाव — छ; नाभाव—ज.
[24] खरशृङ्गयोः — ओ; खरशृङ्गया — ख; खर-शृंगया — छ; ख . . गया — ज.
[25] सत्यविनास्तत्र — ओ.
[26] नस्त्यत्र — ख.
[27] भावे — ओ.
[28] ०रूपस्थितं — ओ, ख, छ, ज.
[29] सा वस्तुनः — ओ.
[30] व्यापारे दग्धगोचरे — ओ; व्यापारादध्व०–च.
[31] ०गोचरः — छ, ज.
[32] ०लपितः — ख, छ, ज.
[33] करसंहते — ओ; ०क्षरसंहतैः — ख, छ, ज; ०क्षरसंहते — च.

[1]एकद्वित्र्यादिसंयोगा[2]न्नामभेदो ह्यनेकधा ।
सोऽक्षराणां प्रपत्तव्यो न [3]चान्यस्य [4]च वस्तुनः[5] ॥६९॥
वाच्यवाचकभेदो यः[6]सुप्रसिद्धो महीतले ।
तस्माद् व्योम तु[7] [8]मन्तव्यं [9]तच्चाभ्यस्यं [10]महात्मना ॥७०॥
[11]यल्लयाद्योगयुक् सूक्ष्मो [12]देवैरपि न दृश्यते ।
[13]यस्य यस्य [14]समभ्यासात्पदमाप्नोति [15]तात्त्विकम् ॥७१॥
[16]तद्वीर्योर्जितसामर्थ्यो[17] [18]भोगांस्तद्भुवनेष्वपि ।
प्राप्य भुङ्क्ते द्विजव्याघ्र [19]स्वमदोद्दामगर्वितः ॥७२॥

[[20]तन्मात्राणि]

तन्मात्राणि सुसूक्ष्माणि [21]यान्यवाप्य स योगिराट् ।
करोति [22]भूतरचनां विचित्रभुवनोज्ज्वलाम्[23] ॥७३॥
[24]क्ष्मादीनां ये गुणाः [25]प्रोक्ता भूतानां गन्धपूर्वकाः[26] ।

---

[1] एवं द्वित्र्योदि० — ख, ज; एवं द्वित्र्यादि०–छ.
[2] ०न्नाभदोऽप्यनेकधा — ख; ०न्नामभेदा — च; न्नामभेदोऽप्यनेकथा — छ, ज.
[3] चान्य स त वस्तुनः — ओ.
[4] स वस्तुनः — च; च वस्तुना — छ, ज.
[5] 'शक्तिरूपस्थितं तद्धि बोद्धव्यमथवा क्वचित्' इतीदमर्धम् 'ओ' मातृकायां '६९' श्लोकानन्तरमधिकं दृश्यते ।
[6] स्व प्रसिद्धो — च.
[7] यस्मात्तद्व्योम . . — ओ; तस्माल्लब्धो म — च; तस्माद्वचम तु — छ; तस्मादृवमतु–ज.
[8] मत्तव्यं — च.
[9] तच्चान्यस्य — ओ, ख, छ; तच्चाभ्यस्य — च; तच्चान्यस्म — ज.
[10] महात्मनः — ख, छ, ज.
[11] तल्लया० — ओ; यल्लवाद्योग० — छ; यल्लवाग्योग० — ज.
[12] दैवैरपि — ओ.
[13] तस्याभ्यासादवाप्नोति तात्त्विकं पदमुत्तमम्–च.
[14] समाभ्यासा० — ओ.
[15] तापिकम् — ओ.
[16] तद्वीर्योज्झित० — ख, च, छ, ज.
[17] ०सामर्थ्ये — ओ.
[18] भोगं तद्भुवने — ओ; भोगान्तभवने० —ख; भोगांस्तडुवने० — च; भोगान्न भुवने– छ, ज.
[19] स्वमदो मदगर्वितः — ओ; स्वमद्योद्दाम० — ख, छ, ज; सुमदोद्दाम० — च.
[20] 'तन्मात्राण्यपि वर्ण्यन्ते क्रमप्राप्तानि संप्रति ।
बाह्येन्द्रियपरिच्छेद्यगुणत्वाद्भूतसंहतिः ॥
प्रत्यक्षत्वेऽस्मदादीनां स्थिता कारणपूर्विका ।
यत्तत्र कारणं विप्राः सा तु तन्मात्रसंहतिः ॥
विशेषवत्वाच्छब्दादेस्ते च सामान्यपूर्वकाः ।
यत्तत्रापि च सामान्यं तन्मात्रमिति भावयेत् ॥
एकद्वित्रिचतुःपञ्चगुणा तन्मात्रसंहतिः ।
अत एव हि भूतानामभियोगो गुणैः क्रमात् ॥'
'शब्दादिगुणवन्तीह तन्मात्राण्युदितानि हि ।'
(पौष्करे विद्या० पुंस्तत्वपटले २४१–२४४, २५४पू०).
[21] यान्य चास्य स — ओ; यान्यवाप स — ख; धान्यवाप स — छ, ज.
[22] भूतिरचनाद्वि० — ओ.
[23] ०ज्वलम् — ओ; भुवने ज्वलाम् — छ, ज.
[24] सुसूक्ष्मादीनां गुणाः — ओ; क्ष्मादिका ये गुणाः — ख; आदीनां ये गुणाः — च; क्ष्मादिनामगुणा — छ, ज.
[25] प्रोक्तं — ज.
[26] गन्धपूर्विकाः — च; गसपूर्वंका — छ, ज.

[1]एकापायेन पञ्चानां तेन[2] [3]स्वाक्यो महामुने ॥७४॥
योऽवष्टम्भः प्रधानाख्यः[4] स्वगुणः[5] पार्थिवो मतः ।
गन्धतन्मात्र[6]जस्तस्याः सत्यस्मिन्व्यपदिश्यते[7] ॥७५॥
[8]व्यक्तेयं गन्धतन्मात्रा[9]त्तच्च तन्मात्रपञ्चकम् ।
[10]प्रागेव [11]कथितं युक्त्या पञ्चानामपि कारणम् ॥७६॥
[12]परमाणुसमूहेऽस्मिन् ये गुणाः समवस्थिताः ।
सहजोत्पन्न[13]सद्भावा [14]न ते मुनिवरोत्तम ॥७७॥
[15]हृतेष् समवायित्वात्केवलानां पृथक् पृथक् ।
निराधारा[16] विचेष्टन्ते वाक्यमेतदयुक्तिमत्[17] ॥७८॥
तन्मात्र[18]पञ्चकात्क्षुब्धात्स्वगुणोत्कृष्ट[19]चेतसः ।
व्यक्तिमायान्ति भूतानि तन्मात्रगुणदर्शनात् ॥७९॥

---

[1] एकोपायेन — ओ.
[2] तर्थे — ओ; तत्ते — ख, ज; तत्त्वं — छ.
[3] स्वाक्यं — ओ, ख; स्वात्म नहा मुने — च; स्वात्यं — छ, ज.
[4] . . भोपतानाख्य – ओ; ०म्भोपधानाख्यः – ख; ०म्भोपधाताख्यः — छ; ०म्भोपयाताख्यः — ज.
[5] सगुणं — ओ; सगुणः — ख, छ, ज.
[6] ०जस्तस्य सन्त्यस्मिन् — ख, ज; जस्तस्य सत्यस्मिन् — छ.
[7] व्युपदिश्यते — च.
[8] व्यक्तोऽयं — च, छ.
[9] ०त्तद्वत्त० — च.
[10] मतङ्ग० विद्या० १८.१०१–१०५ पू०
[11] गदिता युक्ता — ओ; गदितं युक्त्या — च.
[12] परमाणुसमूहेषु ते गुणाः — च;
'पृथ्व्यादिकारणत्वेन प्रोक्ता तन्मात्रसंहतिः ।
परिमाणविवक्षातः परमाणोः कथं न वा ॥
कारणं जगतो नाणुरविभुत्वाद्घटादिवत् ।
सति मृत्त्वे यवीयान् यः पार्थिवः स घटो यथा ॥
यवीयान् परमाणुश्च तस्माद्भौतिक इष्यताम् ।
ये मूर्ता ये च विश्लिष्टा मूर्तात्कुम्भादिवस्तुनः ॥
ते कार्याण्येव दृश्यन्ते ग्रीवाद्यवयवा यथा ।
किं चाणवः सावयवाः परेषां स्थित्यदर्शनात् ॥
नहि धर्मस्थितिर्दृष्टादृष्टे धर्मिणि कुत्रचित् ।
तन्नावयवमात्राणोर्न हि युक्ता कदाचन ॥"
'ततो न परमाणूनां हेतुत्वं युक्तिभिर्मतम् ।
महाभूतानि जायन्ते क्रमात्तन्मात्रपञ्चकात् ॥
आकाशं पवनस्तेजस्तोयं भूरिति संज्ञया ।'
(पौष्करे विद्या० पुंस्तत्त्वपटले २५८–२६२; २७९, २८० पू०).
[13] ०सद्भावं — ओ.
[14] नाते मुनिवरो भयम् — ओ.
[15] भूतेषु — ओ, च.
[16] ०धारान् — ओ; ०धाराद् — ख, छ, ज.
[17] ०मान् — ख, छ, ज.
[18] ०पश्चात्संक्षुब्धा० — ओ.
[19] ०वे . . — ओ.

[[1]तन्मात्राणां जयः]

तन्मात्राण्यपि सिद्धानि ध्यातव्यानि [2]मुमुक्षुणा ।

---

[1] 'अथ गन्धादिपूर्वाणां तन्मात्राणामनुक्रमात् ।
धारणाः संप्रवक्ष्यामि तत्फलानां प्रसिद्धये ॥
पीतकं गन्धतन्मात्रं तुर्याश्रं पर्वसंमितम् ।
नासारन्ध्राग्रगं ध्यायेद्वज्रलाञ्छनलाञ्छितम् ॥
दशमाद्दिवसादूर्ध्वं योगिनोऽनन्यचेतसः ।
कोऽपि गन्धः समायाति द्विधाभूतोऽप्यनेकधा॥
ततोऽस्य ऋतुमात्रेण शुद्धो गन्धः स्थिरीभवेत् ।
षड्भिर्मासैः स्वयं गन्धमय एव भविष्यति ॥
यो यत्र रोचते गन्धस्तं तत्र कुरुते भृशम् ।
त्र्यब्दात्सिद्धिमवाप्नोति प्रेरितां पाञ्चभौतिकीम्॥
तदूर्ध्वमात्मनो रूपं तत्र संचिन्तयेद्धृदि ।
गन्धावरणविज्ञानं त्रिभिरब्दैरवाप्नुयात् ॥'
(मालिनीविजयोत्तरे १४.१–६);
'रसरूपमतो वक्ष्ये धारणां योगिसेविताम् ।
यया सर्वरसावाप्तिर्योगिनः संप्रजायते ॥
जलबुद्बुदसंकाशं जिह्वायां चाग्रतः स्थितम् ।
चिन्तयेद्रसतन्मात्रं जिह्वाग्राधारमात्मनः ॥
सुशीतं षड्रसं चिन्त्यं तद्गतेनान्तरात्मना ।
ततोऽस्य मासमात्रेण रसास्वादः प्रवर्तते ॥
लवणादीन् परित्यज्य यदा मधुरतां गतः ।
तदा तन्निगिरन् योगी षण्मासान्मृत्युजिद्भवेत् ॥
जराव्याधिविनिर्मुक्तः कृष्णकेशोऽच्युतद्युतिः ।
जीवेदाचन्द्रतारार्कमभ्यस्यंश्च क्वचित्क्वचित् ॥
(मालिनीविजयोत्तरे १४.११–१५);
'अतो रूपवतीं वक्ष्ये दिव्यदृष्टिप्रदां शुभाम् ।
धारणां सर्वसिद्ध्यर्थं रूपतन्मात्रमाश्रिताम् ॥
एकान्तस्थो यदा योगी विनिमीलितलोचनः ।
शरत्संध्याभ्रसंकाशं यत्तु किंचित्प्रपश्यति ॥
तत्र चेतः समाधाय यावदास्ते दशाहकम् ।
तावत्प्रपश्यते तत्र बिन्दून् सूक्ष्मतमानपि ॥
केचित्तत्र सिता रक्ताः पीता नीलास्तथा परे ।
तान् दृष्ट्वा तत्र संदध्यान्मनोऽत्यन्तमनन्यधीः ॥
षण्मासात्पश्यते तेषु रूपाणि सुबहून्यपि ।
त्र्यब्दात्तान्येव तेजोभिः प्रदीप्तानि स्थिराणि च॥
तान्यभ्यस्यंस्ततो द्व्यब्दाद्बिम्बाकाराणि पश्यति ।
ततोऽब्दात्पश्यते तेजः षण्मासात्पुरुषाकृति ॥
त्रिमासाद्व्यापकं तेजो मासात्सर्वं विसर्पितम् ।
कालक्रमाच्च पूर्वोक्तं रूपावरणमाश्रितम् ॥
तत्सर्वं फलमाप्नोति दिव्यदृष्टिश्च जायते ।'
(मालिनीविजयोत्तरे १४.१९–२६पू०);
'अतः स्पर्शवतीमन्यां कथयामि तवाधुना ।
धारणां तु यया योगी वज्रदेहः प्रजायते ॥
षट्कोणमण्डलान्तःस्थमात्मानं परिभावयेत् ।
रूक्षमञ्जनसंकाशं प्रत्यक्षं स्फुरिताकुलम् ॥
ततोऽस्य दशभिर्देवि दिवसैस्त्वचि सर्वतः ।
भवेत्पिपीलिकास्पर्शस्ततस्तमनुचिन्तयन् ॥
वज्रदेहत्वमासाद्य पूर्वोक्तं पूर्ववल्लभेत् ।
पूर्वोक्तमण्डलाकारं पूर्वरूपं विचिन्तयन् ॥
स्पर्शतत्त्वावृतिज्ञानं लभन् केन निवार्यते ।'
(मालिनीविजयोत्तरे १४.२८–३२पू०);
'कर्णौ पिधाय यत्नेन निमीलितविलोचनः ॥
यं शृणोति महाघोषं चेतस्तत्रानुसंधयेत् ।
दीप्यते जाठरो वह्निस्ततोऽस्य दशभिर्दिनैः ॥
दूराच्छ्रवणविज्ञानं षण्मासादुपजायते ।
यस्तस्यान्ते ध्वनिर्मन्दः किंचित्किंचिद्विभाव्यते ॥
सकलात्मा स विज्ञेयस्तदभ्यासादनन्यधीः ।
शब्दावरणविज्ञानमाप्नोति स्थिरतां गतम् ॥
यः पुनः श्रूयते शब्दस्तदन्ते शङ्खनादवत् ।
प्रलयाकलरूपं तदभ्यस्यं तत्फलेप्सुभिः ॥
स एवातितरामन्यशब्दप्रच्छादको यदा ।
विज्ञानाकल इत्युक्तस्तदासावपराजिते ॥
मनोह्लादकरो योऽन्यस्तदन्ते संविभाव्यते ।
स मन्त्र इति विज्ञेयो योगिभिर्योगकाङ्क्षिभिः॥
ततस्तु श्रूयते योऽन्यः शान्तघण्टानिनादवत् ।
स मन्त्रेश इति प्रोक्तः सर्वसिद्धिफलप्रदः ॥
घण्टानादविरामान्ते यः शब्दः संप्रजायते ।
मन्त्रेशेशपदं तद्धि सिद्धीनां कारणं महत् ॥
अनिलेनाहता वीणा यादृङ्नादं विमुञ्चति ।
तादृशो यो ध्वनिस्तत्र तं विद्याच्छाम्भवं पदम् ॥

[3]यज्जयात्तद्विकारैस्तु[4] क्रीडते [5]मुदितात्मवान् ॥८०॥
[6]तामसीयं [7]मया प्रोक्ता [8]सिद्धिर्योगयुजेऽत्र[9] तु।
ईषद्रजः समाविद्धा[10] सत्त्व[11]तन्मात्रगोचरा[12] ॥८१॥
[13]उपस्थमभ्यसन्योगी तदधि[14]ष्ठातृगोचरम्।
[15]व्यक्तं [16]जानाति येनासौ [17]प्रजाः पालयितुं क्षमः ॥८२॥
[18]प्राकाम्यगुणमाहात्म्यं व्यक्तमाप्नोत्यनुत्तमम्[19]।
प्रजापतिसमो भूत्वा [20]क्रीडते [21]विगतक्लमः[22] ॥८३॥
[23]मित्रविष्ण्वन्द्रशर्वाणां क्रमात्तत्तुल्य एव सः।

पृथग्वा क्रमशो वापि सर्वानेतान् समभ्यसेत्।
प्राप्नोति सर्ववित्सिद्धीः शब्दावरणमाश्रिताः॥
इत्येताः कथिताः पञ्च तन्मात्राणां तु धारणाः।'
(मालिनीविजयोत्तरे १४.३३उ०–४३).

[2] ययुः सदा—ओ; युयुत् . . . — ख; युयुत्सुना — छ, ज.

[3] यन्मया — ओ, न . . वा तद्वि० — ख.

[4] तद्विवेकैस्तु — ओ.

[5] मुनिरात्म० — ख; मुनितात्म० — छ, ज.

[6] तामसीये — ओ.

[7] यथा—ओ, ख, छ, ज.

[8] सिद्धयोग० — ख.

[9] ०युजोऽत्र — च.

[10] ०विद्धात् — च; ०समन्विद्धा — छ; ०समः सिद्धा — ज.

[11] ०सन्मात्र० — ख.

[12] ०गोचरात् — च.

[13] उपास्थिमभ्यसेद्योभि — ओ; उपस्थं महसन्त्यो हि — ख, छ, ज.

[14] ०ष्ठातृतो वम् — ख.

[15] व्यक्ति — ख.

[16] जायति — ओ; जायाति — ख, छ, ज.

[17] प्रजां — च; प्रजापाल० — छ, ज.

[18] प्राहम्य गुणमार्हातं — ओ; प्राक्रम्य गुरु० — ख.

[19] ०नुत्तमाम् — ओ.

[20] क्रीडेत्स — च.

[21] विगतं ग . . — ओ.

[22] ०क्रमः — छ, ज.

[23] . . . सर्वाणां — ओ; . . विष्ण्वीन्द्रशर्वाणां—ख; विष्णु दृश . . प्राणां — छ; विष्णुंदृ . . प्राणां — ज.

[[1]कर्मेन्द्रियजयः]

[2]कर्मेन्द्रियजयान्मन्त्री [3]विजिताक्षश्च जायते ॥८४॥
प्रत्यक्षाणि च सर्वाणि कर्माण्यस्मिन्सितासिते[4] ।
[5]जगत्यलुप्तवीर्याणि [6]प्रवर्तन्तेऽमितानि च[7] ॥८५॥
[8]प्रवृत्ति[9]र्यावता दृष्टा [10]रजसः सर्वदा मुने ॥
[11]सर्वस्मिन्नेव मार्गेऽस्मिंस्तथापि द्विविधा मता[12] ॥८६॥
[13]सृष्टिस्तन्मात्र[14]पूर्वा या [15]तामसी सा प्रकीर्तिता ।
दशधा कार्यभावेन[16] संस्थिता[17] भोगसिद्धये ॥८७॥
[18]भोक्तृत्वसिद्धये [19]चान्या सात्त्विकी [20]तामसीं विना ।

---

[1] 'वदनान्तं नमःशब्दमात्मनश्चिन्तयेद्बुधः ।
गृहीतवाक्त्वमभ्येति मौनेन मधुसूदनि ॥
सर्वत्रास्खलिता वाणी षड्भिर्मासैः प्रवर्तते ।
सर्वशास्त्रार्थवेत्तृत्वं वत्सरादुपजायते ॥
वागेवास्य प्रवर्तेत काव्यालङ्कारभूषिता ।
त्रिभिरब्दैः स्वयं कर्ता शास्त्राणां संप्रजायते ॥
तत्रैव चिन्तयेद्देहं स्वकीयमनुरूपतः ।
भूयस्तमेव धवलमीषत्तेजोऽवभासितम् ॥
रसान्तःसोमबिम्बादितेजोऽन्तं तमनुस्मरेत् ।
सर्वं फलमवाप्नोति वागावरणजं क्रमात् ॥
पाणौ च तं समादाय षण्मासाद्दूरसंस्थितम् ।
वस्तु गृह्णात्यसंदेहात्त्र्यब्दात्पारेऽपि वारिधेः ॥
तत्रात्मदेहं पूर्वं तु पद्माभमनुचिन्तयन् ।
सव्यापारादिभेदेन चतुर्दशकमादरात् ॥
पूर्वोक्तकालनियमात्पूर्वोक्तेनैव वर्त्मना ।
सर्वं फलमवाप्नोति हस्तावृतिसमाश्रितम् ॥
पादावेवंविधो ध्यायन् वत्सरत्रयमादरात् ।
मुहूर्तेन समुद्रान्तामश्रान्तो भ्रमति क्षितिम् ॥
चतुर्दश समभ्यर्च्य स्वदेहादिकमभ्यसन् ।
प्राप्नोति पूर्ववत्सर्वं फलं पादावृतिस्थितम् ॥
पायावपि मनस्तत्त्वं स्थिरीकुर्वन्नवाप्स्यति ।
मासेन तद्भवव्याधिविमुक्तिमविलम्बतः ॥
पुण्यश्लोकत्वमाप्नोति त्रिभिरब्दैरनादरात् ।
चतुर्दशविधं चात्र पूर्ववत्फलमाप्स्यति ॥
स्वरूपतः स्मरेल्लिङ्गं मासमात्राज्जितेन्द्रियः ।
षड्भिर्मासैरनायासादिच्छासिद्धिमवाप्नुयात् ॥
चतुर्दशविधे भेदे तत्राभ्यस्ते महामतिः ।
लिङ्गावरणजं सर्वं पूर्ववल्लभते फलम् ॥'
(मालिनीविजयोत्तरे १५.२–१५).

[2] कामेन्द्रिय० — च.

[3] निर्मिताक्षश्च — च; विधाताक्षश्च — छ; विधिनाक्षश्च — ज.

[4] सितेऽसिते — ख.

[5] जयत्यलुप्त० – ओ, ख, छ, ज; जगत्प्रलुप्त० — च.

[6] प्रवर्तन्त्यमि० — ख, छ, ज.

[7] सितानि च — च.

[8] प्रपत्तिर्याप . . . — ओ; प्रवृत्तवतो — ख.

[9] ०र्यावती वृष्टया — च; ०र्यावतो दृष्टा — छ, ज.

[10] रजतः — ओ; राजसः — ज.

[11] सर्वस्मिन्येव मार्गेन् —ओ; सर्वस्मिंस्तथापि–ख.

[12] मताः — च.

[13] सृष्टितन्मात्र० — ओ, ख, छ, ज.

[14] ०पूजायां — ख, छ, ज.

[15] तामसीयं — ओ, ख, छ, ज.

[16] कार्यभेदेन — ओ, ख, छ, ज.

[17] संस्थितो — ओ.

[18] भोक्तृत्वं सिद्धये — ओ; केनात्र सिद्धये — ख; केनत्र सिद्धये — छ, ज.

[19] वाद्य साक्षात्परिकीर्तिता — ख; वाद्य साक्षा क्लि परिकीर्तिता — छ; वाद्य साक्षाक्ली परिकीर्तिता — ज.

[20] परिकीर्तिता — ओ.

यस्मादुन्मील्यते भोगः[१] [२]प्रभूतत्वेन [३]संस्थितः ॥८८॥
तस्मा[४]त्साक्षित्वमापन्ना[५] वीर्येणैक दशात्मना ।
सत्त्वमुन्मीलकं[६] नित्यं तस्मात्सा सात्त्विकी मता ॥८९॥
उभयोरपि बोद्धव्यं [७]रजः कारणचोदनात्[८] ।
[९]प्रवृत्तिकुशलं सिद्धं[१०] [११]न प्रसूयेत कर्हिचित् ॥९०॥
त संयोगाद्यथा पुंसः [१२]प्रसूतिर्वनिताश्रयात् ।
[१३]तथापि स्त्री [१४]प्रसूयेत न च पुं गर्भमर्हति ॥९१॥
द्वे [१५]पत्नी सत्वतमसी रजसः परिकीर्तिते[१६] ।
[१७]तथाप्येकं [१८]विनान्यस्मात्प्रवृत्तिर्मुनि[१९]पुङ्गव ॥९२॥
तथापि प्रेरकत्वात्तु[२०] [२१]रजः पुंस्युपचर्यते[२२] ।

---

[१] . . ने भोगान् — ओ; दुन्मीलिते भोगात् — ख, छ, ज.
[२] प्रभूतेन च — ख, छ, ज.
[३] संस्थितान् — ओ; संस्थिता — ख, छ, ज.
[४] ०त्साक्षत्व० — ओ, च; ०त्साक्षीत्व० — ख.
[५] ०मापन्नाद् — ओ.
[६] ०मुन्मीलितं — ख, छ; ०मुन्मीलिताद् — ज.
[७] रधः — ज.
[८] ०चोदनम् — ख, छ, ज.
[९] प्रवृद्धि० — च.
[१०] सिद्धे — ओ.
[११] प्रसूचयति — ओ; न प्रसूयति — ख, छ, ज.
[१२] प्रसूतिर्वैतिता० — ख; प्रसूतिर्वतिता० — छ, ज.
[१३] तथाह — ओ.
[१४] प्रसूयेन — ओ; प्रसून . . — ख, छ, ज.
[१५] पत्तिरत्त्वतमसी — ख; पत्ति स्त्व . . परि० — छ; पतिस्वत्वतमसि — ज.
[१६] ०कीर्तितः — ओ; ०कीर्त्यते — ख, छ, ज.
[१७] यथाप्येकं — ओ, च; तथाप्येवं — ख, छ, ज.
[१८] विना न स्यात् — ओ; विजात स्यात् — ख, छ, ज.
[१९] ०त्प्रवृत्ति मुनि० — छ, ज.
[२०] प्रेरकत्वाच्च — ओ, ख, छ, ज.
[२१] रजसः पुंवचर्यते — ओ; रजसामुपचर्यते — ख, छ, ज.
[२२] ०चीर्यते — च.

[[1]बुद्धीन्द्रियजयः]

बुद्धीन्द्रिय[2]समभ्यासात्क्रमात्सर्वाक्षवृत्तिषु[3] ॥९३॥
[4]दूरादप्यवि[5]घातात्मपटुना ज्ञानजेन च ।
सुप्रसन्नेन वीर्येण [6]प्रवर्तन्तेऽविचारतः ॥९४॥
श्रोत्रादीनि यथा भोक्तु[7]र्भोगान्संपादयन्ति हि ।
कर्मेन्द्रियाण्यपि तथा विशेषेणात्र सुव्रत ॥९५॥
[8]विकुर्वन्ति स्वसामर्थ्याद्भोक्तुर्भोगाय सादरम्[9] ।

---

[1] 'स्वजिह्वामिन्दुवर्णाभां चिन्तयेद्दशभिर्दिनैः ।
प्राप्नोत्यनुभवं योगी जिह्वाभवमिवात्मनः ॥
आस्वादयति दूरस्थं षण्मासादेकमानसः ।
वत्सरैस्तु त्रिभिः साक्षाल्लेढ्यसौ परमामृतम् ॥
येनासौ भवति योगी जरामरणवर्जितः ।
अपेयादिप्रसक्तोऽपि न पापैः परिभूयते ॥
पूर्ववत्सर्वमन्यच्च स्वदेहाद्यनुचिन्तयन् ।
फलमाप्नोत्यसंदेहाद्रसनावृतिसंभवम् ॥
कनकाभं स्वकं घ्राणमनुचिन्तयतः शनैः ।
दिवसैर्दशभिर्घ्राणशून्यतानुभवो भवेत् ॥
षण्मासाद्गन्धमाघ्राति दूरस्थस्यापि वस्तुनः ।
घातयेद्गन्धमाघ्राय यस्य दुष्टो भविष्यति ॥
वत्सैरस्तु त्रिभिर्दिव्यं गन्धमासाद्य योगवित् ।
जरामरणनैर्गुण्ययुक्तो दिव्यत्वमर्हति ॥
सर्वमन्यद्यथोद्दिष्टं तथैव च विचिन्तयेत् ।
क्रमिकं फलमाप्नोति घ्राणावरणमास्थितम् ॥
उदयादित्यसंकाशे चिन्तयंश्चक्षुषी निजे ।
दशाहाच्चक्षुषो रक्तस्रावानुभवमाप्स्यति ॥
वेदना महती चास्य ललाटे संप्रजायते ।
न भेतव्यं महादेवि न चाभ्यासं परित्यजेत् ॥
संत्यजन्नन्धतामेति तेन यत्नात्समभ्यसेत् ।
षड्भिर्मासैर्महायोगी दिव्यदृष्टिः प्रजायते ॥
छिद्रां प्रपश्यते भूमिं कटाहान्तामतन्द्रितः ।
आध्रुवान्तमथोर्ध्वं च करामलकवद्बुधः ॥
वत्सरैस्तु त्रिभिर्योगी ब्रह्माण्डान्तं प्रपश्यति ।
तदन्तर्योगिनीज्ञानं शरीरस्थं प्रजायते ॥
स्वदेहादिकमन्यच्च पूर्वोक्तं पूर्ववत्स्मरन् ।
नयनावृतिजं सर्वमाप्नोतीति किमद्भुतम् ॥
सर्वत्राञ्जनपत्राभां निस्तरङ्गां त्वचं स्मरन् ।
शस्त्रैरपि न मासेन हन्तुं शक्यो भविष्यति ॥
षण्मासादतितीव्रेण नाग्निनाप्येष दह्यते ।
वत्सरत्रितयाद्योगी वज्रोपलविषादिभिः ॥
पीड्यते न कदाचित्स्यादजरामरतां गतः ।
स्पर्शावृतिजविज्ञानगीतवच्च चतुर्दश ॥
भेदाः सह फलैर्ज्ञेयाः पूर्वकालानुसारतः ।
किं त्वत्र चिन्तयेद्देहं स्वदेहादिभिरावृतम् ॥
संदधानः स्वकं चेतः श्रोत्राकाशे विचक्षणः ।
दूराच्छ्रवणविज्ञानं षण्मासादुपजायते ॥
त्रिभिः संवत्सरैर्देवि ब्रह्माण्डान्तरुदीरितम् ।
शृणोति स स्फुटं सर्वं जरामरणवर्जितः ॥
तत्राकाशोक्तवत्सर्वं स्वदेहाद्यनुचिन्तयेत् ।
श्रोत्रावरणजं सर्वं फलमाप्नोति पूर्ववत् ॥'
(मालिनीविजयोत्तरे १५.१६–३६)

[2] ०समाभ्या० — च, छ.

[3] सर्वार्थसिद्धिषु — ओ; ०त्सर्वत्र वृत्तिषु — ख, छ, ज.

[4] दूरादप्यभिघातात्मा — ख.

[5] ०घातात्मा पठना — ओ; घातात्मा पटुना — ख, च, छ, ज.

[6] प्रवृत्तिरविचारतः — ओ, ख; प्रवृत्तिरपिचारतः — छ; प्रवृत्तिरपिचारत — ज.

[7] ०र्भोगानापादयन्न हि — ओ; ०र्भोगानापादयन्ति हि — ख, ज; ०र्भोगानां पादयन्ति हि — छ.

[8] विकुर्वन् विश्वसामर्थ्या० — च.

[9] सादरात् — ज.

[1]सामान्ये स्थितिसाधर्म्ये किमर्थं नाभिमन्यसे ॥९६॥
[2]भोक्तुमभ्युद्यत[3]स्यैव [4]भोक्तुर्भोगान् महामुने ।
[5]संरम्भाकुलितानि स्युः सर्वाण्येकमुखानि[6] तु ॥९७॥
भोगं प्रत्युद्यतान्यत्र किं न [7]पश्यसि दुर्मते[8] ।

[[9]मनोजयः]

मनोजयाज्जगत्यस्मिंस्त्रि[10]कालज्ञानमाप्नुयात् ॥९८॥
परचित्तं [11]च जानाति स्पष्टमत्यद्भुतं ध्रुवम् ।
यद्यत्संकल्पते[12] योगी[13] मनसा योगतेजसा ॥९९॥
तत्तत्सर्वमवाप्नोति नात्र कार्या विचारणा ।

[[14]अहंकारजयः]

[15]एषां [16]योनिः [17]समभ्यस्या यज्जयादखिलं जगत् ॥१००॥

---

[1] सामान्यस्थिति० — ओ, ख, छ, ज.

[2] भोक्तुमभ्युदितस्यास्य–ओ; भोक्तुमभ्युद्यते–ख.

[3] 'ख, छ, ज' मातृकासु 'स्यैव' इत्यारभ्य '९९' तमश्लोकस्य तृतीयपादे 'यद्यत्संकल्पते' इत्यन्तो भागो न दृश्यते ।

[4] भोक्तुभो. . महा० — ओ.

[5] संरहाकुलितानि स्य — ओ.

[6] ०सुखानि — च.

[7] पश्यति — ओ.

[8] दुर्गतेः — च.

[9] 'मनोवतीमतो वक्ष्ये धारणां सर्वसिद्धिदाम् ।
यया संसिद्धया देवि सर्वसिद्धिफलं लभेत् ॥
मन एव मनुष्याणां कारणं बन्धमोक्षयोः ।
तस्मात्तदभ्यसेन्मन्त्री यदीच्छेन्मोक्षमव्ययम् ॥
तदर्धचन्द्रसंकाशमधोवक्त्रं हृदि स्थितम् ।
चिन्तयन् मासमात्रेण प्रतिभां प्रतिपत्स्यते ॥
अकस्मात्पश्यते किंचिदकस्माच्छृणुते तथा ।
सर्वेन्द्रियात्मकं ज्ञानमकस्माच्च क्वचित्क्वचित् ॥
स्वस्वकेन्द्रियविज्ञानं संपश्येद्वत्सरत्रयात् ।
भवते योगयुक्तस्य योगिनः सुपरिस्फुटम् ॥
स्वदेहादिकमप्यत्र पूर्वोक्तवदनुस्मरन् ।
चित्तावरणविज्ञानं प्राप्य सोमगुणं लभेत् ॥'
(मालिनीविजयोत्तरे १५. ३७–४२)

[10] ०कालं ज्ञान० — च.

[11] न जानाति — च.

[12] संकल्पयन् — च.

[13] योगि० — छ, ज.

[14] 'अथ गर्वमयीं दिव्यां धारणां धारणोत्तमाम् ।
महागर्वकरीं वक्ष्ये योगिनां योगवन्दिते ॥
षोडशारं स्मरेच्चक्रमात्मदेहमनन्यधीः ।
एषोऽहमिति संचिन्त्य स्वकार्यपरिवारितम् ॥
अप्रधृष्यो भवेद्योगी वत्सरत्रितयेन तु ।
ममत्वमच्युतं तस्य भवेत्सर्वत्र कुत्रचित् ॥
तादृग्रूपस्य चक्रस्य नाभिं मूर्तिं स्वकां स्मरन् ।
चिन्तयेत्सर्वमेवाहं मयि सर्वमवस्थितम् ॥
ततोऽहंकारविज्ञानं प्राप्नोतीति किमद्भुतम् ।
हृच्चक्रे समनुध्यायन् मत्स्वरूपमतन्द्रितः ॥
अर्कलोकमवाप्नोति गर्वावरणजं फलम् ।
बिम्बादिकं क्रमात्सर्वं चिन्तयन् नीललोहितम् ॥
तद्भवं सर्वमाप्नोति दशावस्थाप्रचोदितम् ।
इति गर्वमयी प्रोक्ता प्रजापतिगुणप्रदा ॥
(मालनीविजयोत्तरे १६.१–७)

[15] येभ्यो — ओ, ख, छ, ज; एभ्यो — च.

[16] योनिं — च.

[17] समभ्यस्य — ओ, ख, च, छ, ज.

[1]जितं भवति विप्रेन्द्र प्रचण्ड[2]बलविक्रमात्[3]।
[4]यतः संरम्भमाहात्म्यादहमिप्रत्ययात्मकात्[5] ॥१०१॥
[6]वीर्येणोद्भूतवीर्याणि [7]प्रवर्तन्ते स्ववृत्तिषु।
परार्थमुदितो न्यायो[8] न स्वतस्तेन सुव्रत ॥१०२॥
[9]मन्यामहे तदुत्थानि तद्धर्मा[10]मोदगोचरात्।
[11]बाह्यार्थमपि गृह्णन्ति स्फुटीकृत्य सुनिश्चयात् ॥१०३॥
कार्यकारणभावो यः सोभयोरपि[12] तत्कृतः[13]।
अक्षार्थयोः समायोगाद्विज्ञानं नान्यथा स्फुटम् ॥१०४॥
[14]तस्माद्ध्रुवमहंकाराद्व्यक्ती[15]भूतानि भूतये।
[16]तत्तन्त्राणि यतो [17]नित्यं स्वकार्याण्यपि[18] कारणम्[19] ॥१०५॥
[20]नाभिभूय प्रवर्तन्ते [21]तस्मान्मे निश्चितं मनः।

[[22]बुद्धितत्त्वजयः]

बुद्धिरप्यत्र [23]पूर्वोक्ता तद्ध्यानाद्ध्यातुरादरात् ॥१०६॥

---

[1] स्थितं — ओ.
[2] ०बलि० — ख.
[3] ०विभ्रमात् — च.
[4] यत्संरम्भं च मा० – ओ; . . तः संरम्भमा०–ख.
[5] ०दहंप्रत्ययथात्मकम्—ओ; ०दहमिप्रत्ययात्मकः — ख, छ, ज; प्रहसन्प्रत्ययात्मकात् — च.
[6] वीर्येणाद्भुत० — ओ, ख, छ, ज.
[7] प्रवृत्तं निस्ववृत्तिषु — ओ; प्रवृत्तं तिसृषु वृत्तिषु — ख; प्रवृतंति स्ववृत्तिषु — छ, ज.
[8] ०मुचितं न्यायं — ओ; ०मुचितं ध्यायन् — ख, छ, ज; मुदितो न्याय्यो — च.
[9] मन्यामह तदुद्धानि — ओ; सव्यामहे तदु० — च; मन्यामहे तदुद्धानि — छ.
[10] ०मोह० — ओ; ०भेद० — च.
[11] बाह्यार्थानि विगृह्णान्ति — ओ; बाह्याद्वनेऽपि गृह्णाति — ख; बाह्याद्वन्येऽपि गृह्णाति — छ, ज.
[12] सोनयोद्वित — ओ; सभेयोरपि — ख; सहयोरपि — छ, ज.
[13] तत्कृतम् — ओ, च.
[14] तस्मा ध्रुवमलंकाराद्वचक्ति० — ख, छ, ज.
[15] ०भूताद्विभूतये — ओ.
[16] तत्तन्द्राणि — ओ; तन्मन्त्राणि — ख; तत् तत्रानि — च; तन्मात्राणि — छ, ज.
[17] नित्यस्व० — ओ.
[18] ०कार्याण्यवि० — ओ.
[19] कारणा — ओ, ख.
[20] नाभिभूयः प्रवर्तंत — ओ; न हि भूयः प्र० — ख; न हि भूय प्र० — छ; न हि भूयप्रवर्तन्त–ज.
[21] तस्मात्तन्निश्चितं — ख.
[22] 'उद्यदादित्यबिम्बाभं हृदि पद्ममनुस्मरन्।
धर्मादिभावसंयुक्तमष्टपत्रं सकर्णिकम् ॥
मासेन स्थिरबुद्धिः स्यात्षड्भिः श्रुतिधरो भवेत्।
त्रिभिरब्दैः स्वयं कर्ता शास्त्राणां संप्रजायते ॥
स्वां तत्र चिन्तयेन्मूर्तिं बुद्धितत्त्वं प्रपश्यति।
तदीशज्ञानमाप्नोति ब्रह्माणमनुचिन्तयन् ॥
वेदानुद्गिरते सप्त [सुप्तः] समाधिस्थोऽथवा मुनिः।
सुस्थिरास्ते सदाभ्यासादनधीता अपि स्फुटम् ॥
बिम्बादिकं क्रमात्सर्वं पूर्वोक्तमनुचिन्तयन्।
प्राप्नोति ब्राह्ममैश्वर्यं बुद्ध्यावरणमाश्रितम् ॥
(मालिनीविजयोत्तरे १६.८–१२).
[23] मतङ्ग० विद्या० १७.१–१५.

[1]कृत्स्नं ब्रह्मगुणोपेतं विज्ञानं व्यक्तिमेति हि।
[2]बोद्धृत्वधर्मधर्मित्वाद्बुद्धिरध्यवसायिनी[3] ॥१०७॥
प्रागेव [4]साधिता [5]तुभ्यं [6]यया स्पष्टं प्रवेद्यते[7]।
[8]पुंस्थाण्वोर्निर्मलं [9]यत्स्याद्विज्ञानं सा मतिः स्मृता ॥१०८॥
[10]गच्छतः [11]सहसा [12]यत्र चक्षुराघ्रातमुल्बणम्[13]।
[14]दृष्ट्वोरगसमाकारं क्षोभमायाति[15] तत्क्षणात्[16] ॥१०९॥
पश्चाद्धिया[17]ध्यवस्याणू रज्जुरित्यव[18]धार्य तु।
[19]अवैति शङ्कां सा बुद्धिर्बोद्धव्या[20] युक्तिवादिभिः ॥११०॥
सा एव [21]परभावेन [22]गर्वत्वेन व्यवस्थिता।
[23]निर्जित्य [24]योगसामर्थ्याद्दैवैः [25]सार्धं रमेत्सुधीः ॥१११॥

[प्रधानजयः]

[26]प्रधानमस्या बोद्धव्यं कारणं मुनिसत्तम।
[27]यज्जया[28]दणिमाद्यं [29]स्यादैश्वर्यं योगिनः स्फुटम् ॥११२॥

---

[1] सकृत्स्नं ब्रह्मणोपेतं — च.
[2] योद्धृत्व० — ख; योध्यध्व — छ, ज.
[3] ०रध्यवसायिनम्—ख, छ, ज; ०रज्यवसायिनी — च.
[4] साधितं — ओ, ख; साधितुं — छ, ज; मतङ्ग० विद्या० १७.१–१५.
[5] तुल्यं — ख, छ, ज.
[6] यथा — ओ, च; यधा — छ.
[7] प्रमोदते — ओ, ख, छ, ज; प्रवेदते — च.
[8] पुंस्याणो० — ओ; पुंस्थाणो० — ख, छ, ज.
[9] यस्माद्विज्ञानं — ओ; पुंसो विज्ञानं — ख, छ, ज.
[10] गजतः — छ, ज.
[11] साहसा — ख; सह सं० — छ, ज.
[12] या तु चक्षु० — ओ; याति चक्षुराघ्राण० — ख; याति चक्षुराघ्र० . . — छ, ज.
[13] ०मुद्बणम् — ओ, ख, छ, ज; ०मुल्बणः – च.
[14] दृष्टोग० — ख; मृष्टोरग० — ख० पाठान्तरम्; दृष्टोरग० — छ, ज.
[15] ०मायान्ति — ओ.
[16] तद्बणात् — ओ.
[17] ०ध्यवसार्थाद्रज्जुरित्यवसाय — ओ; ०ध्यवव्यस्याशु रज्जु० — ख, ज. व्यवस्याणु रज्जु० — च; ध्यवध्याशु रज्जु० — छ.
[18] ०धार्यते — ख; ०धार्यत — छ, ज.
[19] अवेति शंक सा — ओ; अवेति शक्ति सा — ख; अवैति शक्ति सा — छ, ज. अपेति शङ्कां — च.
[20] बुद्धि बो० — ख; बद्धिबोद्धव्यं — छ, ज.
[21] परा भावेन — ओ; पुरभावेन — ख, छ, ज.
[22] गर्वतेन व्यवस्थया — ओ; गन्धत्वेन व्य.. स्थया — ख; गर्भत्वेन व्यव . . — च; गन्धत्वेन व्यवस्थया — छ, ज.
[23] निर्गत्य — ओ.
[24] योगमार्गार्थाद्दैवे — ओ; योगसमर्थ्या देवैः — ख, छ, ज.
[25] साध्य रमेत् — ज.
[26] प्रधानमस्य — ओ; प्रधानमत्स्या — छ, ज.
[27] यज्जय्या० — छ.
[28] ०दणुमाद्यं — ओ.
[29] स्यादैश्वर्यै योगिन स्फुटम् — ख; स्यादैश्वर्यैर्योगिन स्फुटम् — छ; स्यादैश्वर्यै यो हि न स्फुटम् — ज.

व्यक्ति[1]मायाति [2]येनासावकृतार्थेष्ववारितः[3]।
भुवनेषु [4]विचित्रेषु [5]भोगान्भुङ्क्ते मनोऽनुगान्[6] ॥११३॥

मतङ्ग उवाच —

[7]भवता निखिलं [8]प्रोक्तं [9]विज्ञानस्य तु साधनम्।
तच्च संयोगजं [10]दृष्टं क्षणप्रध्वंसिकारणम्[11] ॥११४॥
वक्तव्यं [12]निर्मलोक्त्या [13]तु [14]संदेहविनिवृत्तये।

परमेश्वर उवाच —

[15]नाचैतन्यसहस्रेऽपि द्रव्याणा[16]मेकतः स्थिते ॥११५॥
[17]मादकादेर्मुनिव्याघ्र विज्ञानं दृश्यते क्वचित्।
तस्मा[18]दस्त्यत्र चैतन्य[19]मनपायि [20]स्थिरं ध्रुवम् ॥११६॥
यदर्थमितरेषां तु [21]भावानां [22]संततिः स्मृता।
महदादिसमस्तानां यतोऽत्राप्युचितं त्विदम्[23] ॥११७॥
[24]प्रवृत्तिर्न [25]निराधारान्न चोत्पत्ति[26]रकारणात्।
न चैवानुपकाराय [27]घटादेरपि वस्तुनः ॥११८॥

---

[1] मायान्ति — ओ.
[2] येना सा च कृतेष नि० — ओ; तेनासा वक्तु तेष्वनि० — ख; येना सा वक्तु तेष्वनि० — छ, ज.
[3] ०वारितम् — ख; ०वारितुम् — छ, ज.
[4] विचित्रेऽपि — छ.
[5] भोगाद्भुङ्क्ते — ओ; भोगाद्भुक्ते — ख, ज; भोगद्भुक्ते — छ.
[6] मनोरगात् — ओ; मनोनुगात् — ख, छ, ज; रसोत्तमान् — च.
[7] भुवना — च.
[8] प्रोक्तुं — छ, ज.
[9] विज्ञास्य तु — छ, ज.
[10] सृष्टि क्षण० — ओ, दृष्ट्वा क्षण० — ख, छ, ज.
[11] ०प्रध्वंसकारणम् — च.
[12] निर्मलोक्त्वा — छ, ज.
[13] नु — ओ.
[14] सन्देहव्यनि० — ओ; सदेह विनि० — ख, छ, ज.
[15] न चैतन्यसह० — ओ; सा चैतन्यसहस्रोऽपि — ख, छ, ज.
[16] ०मेकतस्थिते — ओ; ०मेकतस्थितेः — ख, ज; ०मेकतस्थितैः — छ.
[17] सादरादे मुनि० — ओ; सोनकादे मुनि० — ख, छ, ज; मोदकोदेर्मुनि० — च.
[18] ०दन्यत्र – ओ; ०दस्त्यस्य – ख, छ; ०दस्यस्य — ज.
[19] ०मनयापि — च; ०मनपाधि — छ.
[20] स्थिति — ओ.
[21] भावना — ओ.
[22] सान्ततिः — ओ; सन्तति — ख; सन्नतिः — च.
[23] चितम् — ओ; ध्रुवम् — छ, ज.
[24] प्रवृतं न — छ, ज.
[25] निराधारा न — ओ, ख; निरा . . — छ, ज.
[26] न कारणा — ओ.
[27] कटादे० — ओ; कूटादे० — च; घटादे अपि — छ, ज.

[1]तस्मात्समन्वयात्सिद्धमस्ति कारणमत्र तु ।
[2]बुद्धिर्बुद्धिमतो[3] [4]दृष्टा ज्ञानं ज्ञानवतस्तथा ॥११९॥
[5]योगश्च योगिनः [6]सिद्धः [7]किमाश्चर्यं मुनीश्वर ।
तथा [8]चाहंकृतेनापि योऽहं[9]कारी सुनिश्चितः ॥१२०॥
स्वधर्मेणोचितं [10]सिद्धं [11]धर्मित्वं धर्मिणः सदा ।
प्रत्यक्षं भवतः सिद्धं प्रमाणमविरोधि यत् ॥१२१॥
चलतस्तस्य [12]संसिद्धा सर्वत्रैवानुमानता[13] ।
[14]क्लिष्टस्थूलप्रवाहस्य [15]हीयमानस्य नित्यशः ॥१२२॥
[16]कालायत्तस्य को नाम नेच्छते धर्मसंस्थितिम्[17] ।
[18]धर्मान्तर[19]स्थितिः सिद्धा संस्थित[20]स्येह धर्मिणः ॥१२३॥
[21]स च सुष्ठु प्रसिद्धोऽत्र [22]किमत्रापि [23]विमुह्यसे ।
साध्यसाधनभावेन व्यवहारात्मवर्तिना ॥१२४॥
असद्वस्तु[24]प्रवाहेण [25]निरवस्थानधर्मिणा ।
[26]अनवस्थितवीर्येण [27]स्वरूपव्यभिचारिणा ॥१२५॥
भावाभावविरुद्धेन व्यव[28]हर्तुं न लज्जसे ।
जगत्यस्मिन्प्रतीतं स्यात्कर्म[29] सर्वत्र [30]घुष्यते ॥१२६॥
तच्च [31]नाकारणं सिद्धं [32]कारणाच्च प्रतीयते ।

---

[1] तस्मान्मतस्तथा — ओ; तस्यां ममतया सिद्ध० — ख, छ, ज.
[2] बुद्धि बुद्धि०—ओ; बुद्धि बुद्धि० — ख, छ, ज.
[3] ०मनो — च; ०मते — ज.
[4] द्रष्टा — ओ.
[5] योगाश्च — छ, ज.
[6] सिद्धाः — ओ.
[7] किमाश्चर्यमनीश्वर — ज.
[8] चाभकृतेः — ज.
[9] ०कारिसुनिश्चितम् — ओ, ख; ०कारीसुनिश्चितम् — च; ०कारि सु० — छ, ज.
[10] सिद्धधर्मित्वं — छ, ज.
[11] 'ओ' मातृकायां '१२१' तमश्लोकस्य द्वितीयतृतीयपादौ न स्तः ।
[12] संसिद्धाः — ओ; सिद्धा च — ख; सिद्धाश्च — छ, ज.
[13] ०मानतः — ओ, ख, छ, ज.
[14] क्लीष्टस्तल० — ओ.
[15] दीयमानस्य — च.
[16] कलायत्तस्य — ख, छ, ज.
[17] ०स्थितम् — ओ, ज, ०स्थितः — ख, छ.
[18] धर्मान्तरः . . सिद्धा — छ, ज.
[19] ०स्थिति सिद्धा — ओ.
[20] ०स्येव धर्मिणा — ओ.
[21] सा यान्ति सुप्र० — ओ; स याति सुप्र० — ख, छ, ज.
[22] किमुद्याविह मुच्यते — ओ; किमद्यापि प्रमुह्यते — च.
[23] विमुह्यसेत् — ख; विमभ्यसे — छ.
[24] प्रवाहेन— ओ, ख, छ, ज.
[25] निरवज्ञानसर्पिणा — ख, छ, ज; निरवस्थानसर्पिणा — च.
[26] अनवस्थानवीर्येण — च.
[27] स्वरूपाव्यभिचारणा — ओ, छ, ज; स्वरूपां व्यभिचारिणा — ख.
[28] ०हर्तुर्नलंजयेत् — ओ.
[29] ०न्प्रति तं स्यात्कर्म० — छ; ०न्प्रति तस्या कर्म — ज.
[30] पुष्यते — ओ, ख, छ, ज.
[31] नाकरणं — ओ, ख, ज.
[32] करणाच्च — ख, छ, ज.

[1]अस्त्यत्र निश्चितः कर्ता [2]स च कार्येण [3]साध्यते ॥१२७॥
[4]विचित्ररचनां दृष्ट्वा [5]कुड्ये चित्रकरो यथा ।
सिध्यते मुनिशार्दूल [6]तद्वदत्रापि कारणम् ॥१२८॥
[7]तच्च ध्येयं प्रधानाख्यं [8]यज्जयान्निर्जितं जगत् ।
[9]तदुक्तं साधकेन्द्रस्य विभूतिप्रतिपादकम् ॥१२९॥

[उक्तार्थोपसंहारो वक्ष्यमाणोपक्रमश्च]

[10]तत्त्वध्यानमविस्तरोक्ति[11]रचनान्यायेन [12]ह्यावर्णितं
[13]यत्साध्यामरकन्यकाभिरतुलं प्रेम्णा समालिङ्गितम्[14] ।
[15]अप्रक्षीणवपुर्वियोगरभसा[16] [17]प्रोद्दामरागान्वितं[18]
[19]क्रीडत्यूर्जितयोगशक्तिकिरणैः[20] [21]पुंस्तत्त्वमत्रोच्यते ॥१३०॥

इति श्रीमतङ्गपारमेश्वरे[22] योगपादे [23]तत्त्वसाधनपटलश्चतुर्थः ॥

चतुर्थः पटलः

---

[1] 'स्पष्टानि करणान्यत्र कर्म चात्र परिस्फुटम् । एवं करणकर्मभ्यां कर्ता सिध्यत्यसंशयः ॥' (मतङ्ग० विद्या० ६.३१).

[2] स्वकार्येण सोध्यते — ख, छ, ज.

[3] बुध्यते — च.

[4] स भवित्रा च नान्दृष्ट्वा — ओ; विचित्ररचना दृष्टा — ज.

[5] रुन्धे — ख; रुद्धे — छ, ज.

[6] तद्वक्त्रपि च — ओ; तद्वत्तत्रापि — ख, छ, ज.

[7] तद्ध्येयं — ओ; तच्चाप्येत्थ प्रधा० — ख; तच्चाप्येकं प्रधा० — घ, छ, ज.

[8] यं जया जयितं — ओ; यद्ययं निश्चितं — ख; यद्यया निर्जितं — घ; यद्ययाति जितं — छ, ज.

[9] तदुत्थं — ओ, ख, घ, च, छ.

[10] तत्त्वध्यानमहस्तरोक्ति० — ओ, तद्वद्धचानमविस्तरोऽग्नि० — ख; तद्वद्धयां विस्तरोऽग्नि० — घ; तद्वद्यां विस्तरोऽग्नि० — छ; तद्वध्याम विस्तारोऽग्नि० — ज.

[11] ०वचनान्यायेन — ओ; ०रचनाद्योगेन — ख, घ, छ, ज.

[12] यद्वर्णितम् — ख, घ; वर्णितम् — छ, ज.

[13] यत्साध्यमकरत्वकाभि० — ख; यत्साध्यामकरत्वकाभि० — घ, छ, ज; तत्साध्यामरकर्णिकाभि० — च.

[14] ०लिङ्गिते — ख, घ, छ, ज.

[15] यत्प्रक्षीण० — च.

[16] ०वपुवियोगं हसा — ख, घ; वपुर्वियोगं हसा — छ, ज.

[17] प्रेमरागान्वितम् — ओ.

[18] ०न्वितः — ख, घ, च, छ, ज.

[19] क्रीडार्जित० — ओ; क्रीडन्त्युज्झित०—ख; क्रीडत्युज्झित० — घ, छ; क्रीडन्तूर्जित० — च; क्रीडत्युंजित० — ज.

[20] ०किरण्यै — छ.

[21] पुंतत्त्व० — ओ, च; प्रतस्तत्व० — छ; पुनस्तत्त्व — ज.

[22] 'ख, घ, च, छ, ज' मातृकास्वत्र 'महातन्त्रे' इत्यधिकं दृश्यते ।

[23] तत्त्वप्रधान० — ख; अप्रधान० — घ; प्रधान० — छ, ज.

पञ्चमः पटलः

शिवतत्त्वोपलब्धिः

[भोक्तृपुरुषसाधनम्]

[१]अथ [२]पुं तत्र बोद्धव्यो [३]भोक्ता भोज्यस्य सुव्रत ।
भोक्तृत्वमभिलाषाख्यं [४]तच्च रागे [५]सतीष्यते ॥१॥
नारागी[६] युज्यते यस्मात्प्रकृतेरप्यसंस्थितः[७] ।
संयोगस्तत्कृतः [८]सर्गः स च युक्त्या विरुध्यते ॥२॥
यतोऽविद्यात्मकैर्भावैर्वासितोऽतीव [९]पुद्गलः ।
[१०]बुद्ध्यादेस्तत्त्वसर्गस्य [११]तन्मयो न विभाव्यते ॥३॥
[१२]चरत[१३]स्तस्य संयोगात्सर्वे गर्वादयोऽपि हि ।
[१४]अचैतन्यगुणात्मानो [१५]निजचैतन्यवत्स्थिताः ॥४॥
रागानुविद्धमूर्तेस्तु [१६]चितेर्बुद्धिगुणाः सदा[१७] ।
[१८]अष्टावप्युप[१९]चर्यन्ते रागश्चेत्कर्दमादिवत्[२०] ॥५॥
[२१]पुंसो योऽक्ष[२२]कषायोत्थ[२३]बाह्यरागमलीमसः[२४] ।
नान्यथा शक्यते [२५]कर्तुमथवा नासति क्वचित् ॥६॥

---

[१] . . . सुव्रत — ओ.
[२] पुमांस्तत्र . . व्यो — ख, घ, छ, ज.
[३] भोक्त भोज्यस्य — छ, ज.
[४] तद्धि — ओ.
[५] सतिर्यते — ओ; सतिष्यते — छ, ज.
[६] रागी च — ओ; न रागी — ख, घ; न रागि — छ, ज.
[७] ०त्प्राकृतेरप्यसंज्ञितम् — ओ; ०त्प्रकृतेरप्यसंज्ञितः — च; ०त्प्रकृतेरप्यत्र सुव्रत — ज.
[८] सङ्गः — ज.
[९] पद्गलम् — ओ; पुंगलः — च.
[१०] बुध्यात्मतत्त्ववर्गस्य — ओ; बुध्यादेस्तु त्वसर्गस्य — ख.
[११] तन्मयेन — छ, ज.
[१२] ते . . रत . . स्मात्सर्व० — ख; परतस्मात् सर्वं — घ, छ, ज.
[१३] ०स्तत्समायोगात् — ओ.
[१४] अचैतन्यं गुणाध्यानो — ख, घ; अचैतन्यं गुणाद्दानो — छ; अथैतन्यं गुणार्धा . . — ज.
[१५] निचेतनवत्स्थिताः — ओ; निजचैतन्यवत्स्थिता — ख, घ, छ, ज; नित्यं चेतनवत्स्थिताः — च.
[१६] चित्ते बुद्धि० — ओ, ख, घ, छ, ज.
[१७] ०गुणास्तदा — ओ, ख, घ, छ; ०गुणादिता — ज.
[१८] अक्षराप्युप . . . र्दमा पुरा । — ओ.
[१९] ०चार्यन्ते — ज.
[२०] कर्मसादिवत् — च; कर्ममादिवत् — छ, ज.
[२१] पुंवासोऽक्षक्षयोक्त्यर्थं — ओ; पुंसायोक्षकषायोत्थं — ख; पुंसायोक्षकषायोत्थ० — घ; पुंवासोऽक्षकषायोत्थ० – च; पुंसयोऽक्ष ०–छ, ज.
[२२] ०कषायोद्ध० — छ; ०कषायोर्थ० — ज.
[२३] वाप्यराग० — ख, घ, छ, ज.
[२४] ०मलीमसम् — ओ, ख, घ, च, छ, ज.
[२५] कर्तुरथवा — ख; कर्तु अथवा — घ, छ, ज; योक्तुमथवा — च.

[1]धर्माधर्मविकारैस्तु [2]बाध्यते [3]सुमलीमसैः ।
[4]शुक्लत्वधर्मधर्मित्वात्पटस्तन्तुभिराचितः[5] ॥७॥
[6]रागेण [7]शक्यते [8]योक्तुं [9]नासद्वस्तुनिबन्धनात्[10] ।

मतङ्ग उवाच—

[11]सत्वातीतः सुशुद्धात्मा नित्य[12]युक्तश्च कीर्त्यते ॥८॥
यद्येवं स्यात्ततः [13]सर्गः [14]सोपायश्च [15]किमात्मकः ।
[16]मनो[17]विज्ञानजः [18]सर्वप्रपञ्चोऽयं सुरेश्वर ॥९॥
[19]न चात्मा [20]बध्यते कश्चि[21]च्छुद्धत्वान्न च मुच्यते ।
[22]नित्ययुक्तो यतः साक्षी [23]वासनात्मोपचर्यते ॥१०॥

परमेश्वर उवाच—

अनादि[24]वासनाविद्धस्तच्चाज्ञानमिहोच्यते ।
ज्ञानात्प्रध्वंसमायाति नान्यथा वस्तुदर्शनात् ॥११॥
सत्यज्ञानेऽभिलाषी स्यात्प्रणष्टे[25]ऽप्यन्यथा [26]न हि ।
तस्मात्कि[27]मवगच्छामो [28]रागाविद्धः पुमान्सदा ॥१२॥

---

[1] धर्मे धर्मि० — ओ; धर्मे धर्मे — ख, घ, छ, ज; धर्मी धर्म० — च.
[2] बाध्यसे — ओ.
[3] सुमलीयसः — ओ, ख, घ, छ, ज; सुमतीप्लवैः — च.
[4] शुक्लत्वं धर्मकर्मित्वात् — ख, घ, छ; शुक्लत्वं धर्मकर्मित्वा परस्तन्तु० — ज.
[5] ०राचितम् — ओ, घ.
[6] रागणं — ख; राङ्गणं — घ, छ, ज.
[7] शक्तयो — च.
[8] योक्तु — ख, घ, छ, ज.
[9] नाचिद्यस्तु — ओ.
[10] ०बन्धनम् — च.
[11] सात्वतीतः स शुद्धात्मा — ख; 'सत्त्वाधीतः पुमान् सिद्धः' मतङ्ग० विद्या० ६.७५पू०.
[12] ०मुक्तश्च — च.
[13] सर्गसोपा० — ख.
[14] सोपायं च किमात्मनः — ओ.
[15] किमात्मकम् — छ, ज.
[16] 'अनादिकालसंरूढाद्वासितान्मनसः सदा ।
प्रपञ्चोऽयमविद्याख्यो न पुंसः परिपठ्यते ॥'
(मतङ्ग० विद्या० ६.७०उ०, ७१पू०)
[17] ०विज्ञानना — ओ; ०विज्ञानतः — च.
[18] सर्वं — ओ, ख, घ, छ, ज.
[19] 'एवं वदन्ति मुनयो ह्यात्मा शुद्धः सदैव तु ॥
विरागी स च मुक्तात्मा न च तस्मात्परं क्वचित् ।
प्रधानस्येष्यते सर्गः स च सर्वत्र संस्थितः ॥
न कश्चिद्बध्यते लोके न च कश्चिद्विमुच्यते ।
(मतङ्ग० विद्या० ६.६२उ० –६४ पू०)
[20] बुध्यते — ओ; बाध्यते — छ, ज.
[21] ०च्छुद्धात्मा न विमुच्यते — ख, घ, छ, ज.
[22] इदमर्धं 'ख, घ, छ, ज.' मातृकासु न दृश्यते ।
[23] वसनां नोपचर्यते — ओ.
[24] ०वासराविद्ध० — छ, ज.
[25] प्रनष्टे० — छ, ज.
[26] भवेत् — ओ, ख, घ, छ, ज.
[27] ०मवशं छामो — ओ; ०मवनच्छामो — ख, घ, छ, ज.
[28] नागा० — ख, घ, छ, ज; रागाद्विन्दुः — च.

मनोवृत्तिकषायेण[१] [२]युज्यते [३]नान्यथा क्वचित् ।
प्राधानिक[४]मचैतन्यं लोष्टवत्परतन्त्रकम्[५] ॥१३॥

मतङ्ग उवाच --

[६]प्रधानाद्व्यतिरिक्तं [७]यद्वस्तु [८]तत्पुंसमाश्रितम् ।
पुंसोऽतिरिक्तं [९]संख्येयं [१०]यद्येवं [११]प्राकृतं ततः[१२] ॥१४॥
[१३]पुंसश्चेत्सहजं[१४] तस्मा[१५]दनपायि स्थितं स्फुटम् ।
[१६]हेयं चेत्तदभावात्तु पुंसः केन [१७]निवार्यते ॥१५॥

परमेश्वर उवाच --

मायोत्थाभिरमोघाभिर्वासनाभिः पशुर्यतः ।
कलादिकञ्चुक[१८]न्यायाच्छादितो ह्युपचर्यते ॥१६॥
[१९]मले सति प्रधानोत्थभोगेष्वभिलषन्मुने ।

मतङ्ग उवाच --

कतमोऽत्र विशेषोऽन्यो [२०]वासनात्मा समानयोः ॥१७॥
मायाप्रधान[२१]योर्येन तद्विशिष्टो[२२] मलोऽपरः[२३] ।

परमेश्वर उवाच --

भोज्यभोक्तृत्व[२४]भावो यः [२५]सोभयोरपि निश्चितः ॥१८॥

---

[१] ०कषायैव -- छ, ज.
[२] युज्यथे -- ओ.
[३] नान्यथात्मनः -- ओ; नाथ मे मनः -- ख; नाथा . . . मनः -- घ; नाथ वा मनः -- छ; नाथवा मना -- ज.
[४] ०मचैतन्यलोष्ट० -- ओ.
[५] पारतन्त्रिकम् -- च.
[६] प्रधानाध्यवतिक्तं -- ओ; प्रधानव्यतिरिक्तं -- ख; प्रधानाव्यतिरिक्तं -- घ; प्रधाना-च्यतिरिक्तं -- छ; प्रथनाव्यतिरिक्तं -- ज.
[७] हि य . . स्तु पुं समा० -- छ; हि यद्वस्तु पुं समा० -- ज.
[८] पुंसा समाश्रितम् -- ख; पुंसामाश्रितम् -- घ.
[९] सांख्येयं -- ओ, ख, घ, छ, ज.
[१०] यद्येयं -- ख.
[११] प्रक्तं -- ओ.
[१२] तमः -- ओ.
[१३] असंश्चेत्सहस्तामादन०--ओ; पुंसश्च सहजं--च.
[१४] ०त्सहजः -- घ, छ, ज.
[१५] ०दनपायस्थितं -- ख, घ, छ, ज; ०दन-पाय्यव्ययं -- च.
[१६] हेयश्चे ० -- ओ.
[१७] विधार्यते -- ख.
[१८] ०न्याय इच्छतेऽभ्युप० -- ओ; ०न्यायछोदितो ऽभ्युप० -- ख, घ, छ, ज.
[१९] विलोपेन प्रधानोत्थं -- ओ; मलोपेतप्रधानो-त्थ० -- च; मले सति प्रसारे . . -- ज.
[२०] वासनात्र -- ओ; वासनात्मसमा० -- ख, घ, छ, ज; वासना वा समा० -- च.
[२१] ०योग्यश्च -- ख, घ, छ, ज.
[२२] तद्विशिष्टा -- ख, घ, छ, ज.
[२३] मनोऽपरः -- ओ; मलोऽपरम् -- ख, घ, छ; ०मथापरम् -- ज.
[२४] ०भावोऽयं -- ख, घ, छ, ज.
[२५] सोह्यो० -- घ, छ, ज.

भोज्यं प्रधानमत्रोक्तं भोक्तृत्वं [1]वासनात्मकम् ।
तत्समर्थितसामर्थ्यं [2]कञ्चुकेन कलादिना ॥१९॥
[3]भोगाः कर्मविपाकोत्थाः कलातो[4] व्यक्तिमागतान्[5] ।
गुणानाश्रित्य [6]भूतान्तं भूतये स्थूलतां गताः[7] ॥२०॥
तस्मा[8]त्कलादेर्माहा[9]त्म्यात्सुसूक्ष्मोऽपि पुमान्सदा ।
[10]भोगभोक्तृत्वसामर्थ्यं प्राप्नोति मुनिपुङ्गव ॥२१॥
[11]स पुंभावत्वमापन्नः [12]पुरुषे तूपचर्यते[13] ।

[[14]पुंस्तत्त्वजयः]

ध्यातव्यो योगिभिर्नित्यं खद्योताकारवत्स्थितः[15] ॥२२॥

---

[1] वसानार्थकम् — ओ; चासना० — ख, घ, छ, ज.

[2] कच्छकेन — च; कंचकेन —छ, ज.

[3] भोगात्कर्मविभागोर्थात् — ओ; भोगान् कर्मविपाकोत्थान् — ख, घ, छ; भोगान् कर्म . . तो — ज.

[4] कालतो — ओ; कलो — ख.

[5] ०मागतात् — ओ; ०मागताः — च.

[6] भूतानां — च; हूनान्तं — छ; भूनांतं ज.

[7] गतम् — ओ; गता — ज.

[8] ०त्कलादिमाहा० — च.

[9] ०त्म्यात्सूक्ष्मोऽपि — ओ; ०त्म्यात्सुसूक्ष्मेऽपि — च.

[10] भोगाद्भोक्तृ० — च.

[11] स पुमान् भावसंपन्नः — च.

[12] 'शृणुध्वमथ पुंस्तत्त्वं यथावन्मुनिपुङ्गवाः ।
पञ्चकञ्चुकसंयुक्तः प्रकृतिं भोक्तुमुद्यतः ॥
अविद्यादिसमायुक्तः पुरुषः परिकीर्तितः ।
न विज्ञानाकलस्तेन नापि प्रलयकेवलः ॥
पुरुषाख्यां लभेद्यस्मान्नाविद्यादिविवर्जितः ।
तस्मात्सकल एवाणुर्लभते पुरुषाह्वयम् ॥
कलादिपञ्चकस्यैव यदि पुंस्त्वे निमित्तता ।
तदा प्रकृतिभोक्तृत्वं न स्याज्ज्ञानाकले यथा ॥
तथाविद्यादिमात्रस्य नापि पुंस्त्वे निमित्तता ।
कलाद्यभावे कर्तृत्वाभावाद्भोक्ता कथं भवेत् ॥
प्राकृतो यस्त्वविद्यादिः पुंसां पुंस्त्वमलः स्मृतः ।
तदाक्रान्तः कलाद्याढ्यः पुरुषस्तेन संमतः ॥'
(पौष्करे विद्या० पुंस्तत्त्वपटले १–६).

[13] पुरुषेत्युपचर्यते — ओ; पुरुषेऽत्र प्रचर्यते – ख; पुरुष इत्युपचर्यते — च; पुरुणे तूपचर्यते — छ; पुरु . . र्प्यते — ज.

[14] 'देहं मुक्त्वा स्वरूपेण नान्यत् किंचिदिति स्मरेत् ॥
सितपद्मासनासीनं मण्डलत्रितयोपरि ।
एवमत्र स्थिरीभूते मासमात्रेण योगवित् ॥
सर्वव्याधिविनिर्मुक्तो भवतीति किमद्भुतम् ।
षण्मासादस्य विज्ञानं जायते पृथिवीतले ॥
अब्दाज्जरादिनिर्मुक्तस्त्रिभिः पुंस्तत्त्वदृग्भवेत् ।
हृदधः पङ्कजेऽत्रैव द्वादशार्धाङ्गुलां तनुम् ॥
हृदन्ते भावयेत्स्वान्यां षण्मासान्मृत्युजिद्भवेत् ॥
त्रिभिरब्दैः समाप्नोति पुंस्तत्त्वेश्वरतुल्यताम् ॥
बिम्बादौ पूर्ववत्सर्वं तत्र संचिन्तिते सति ।
फलमाप्नोत्यसंदेहात्पुरुषावरणस्थितम् ॥'
(मालिनीविजयोत्तरे १६.१८उ०–२३).

[15] ०कारवत्स्थितम्—ओ, ख, छ, ज; ०करवत् स्थितम् — घ.

[1]यज्जयाज्जायते [2]सिद्धिः [3]पौरुषी [4]सुमनोहरा ।
विशुद्धेन्द्रिय[5]सामर्थ्यं [6]भौवनं [7]सुमनोरमम् ॥२३॥
रुद्रैः सहैकतां [8]गत्वा [9]क्रीडत्यक्लिष्टवीर्यवान् ।
रागतो नियतिः सिद्धा [10]कालश्चैव महामुने ॥२४॥
नियामकत्वाद्बोद्धव्या[11] कालतत्त्वादधःस्थिता[12] ।
[13]पूर्वमत्र सुनिर्णीतं क्रमान्मायादिपञ्चकम् ॥२५॥
तत्तथैव प्रयोक्तव्यं [14]योगिना योगसिद्धये ।
माया मायाविनी [15]पुंसः सत्यां यस्याममी गुणाः ॥२६॥
स्ववृत्तिबलमाहात्म्यात्पुंसां [16]धारयितुं [17]क्षमाः ।
[18]सापि ध्यानबलात्त्याज्या [19]भोज्या वा भुवनात्मिका ॥२७॥
[20]तदीशगुणसंपत्सु [21]क्रीडत्यविकलैः सुखैः ।
[22]पुमानेष समस्तोक्त्या मायातः परिकीर्तितः ॥२८॥

[शुद्धाध्वभोगप्राप्तिः]

तदूर्ध्वमैश्वरं तत्त्वं [23]समस्तोक्तिनिदर्शनात् ।
[24]सर्वे रुद्रा महात्मानः सदाशिव[25]मनूत्थिताः ॥२९॥
[26]तन्मूर्तिष्वमितप्राणः[27] [28]पञ्चमन्त्रतनुः शिवः[29] ।

---

[1] इज्यया जायते — ओ.
[2] 'ख' मातृकायां 'सिद्धिः' इत्यारभ्य चर्यापादे षष्ठपटले '३५' तमश्लोकस्य पूर्वार्धे 'पानकं हि' इत्यन्तो भागः पत्राणामभावाल्लुप्तः ।; सिद्धिपौरुषी — ओ, घ.
[3] पौरुषः — ज.
[4] सुमनोहरम्—ओ, घ, छ; स मनोहरम्—ज.
[5] ०सामर्थ्यां — छ, ज.
[6] भावनं — छ.
[7] सुमनोहरम् — घ, छ, ज.
[8] गता — ओ; गन्ता — घ, छ, ज.
[9] क्रीडन्त्यक्लिष्ट० — ओ.
[10] कालं चैव — ओ.
[11] ०द्बोद्धव्याः — घ, छ, ज.
[12] ०तत्त्वादयः स्थिताः — ओ; ०तत्त्वादवस्थिताः — घ, छ, ज.
[13] पूर्वमन्त्रितसुवर्णीतं — ओ; पूर्वमन्त्रे सु० — घ, छ, ज; मतङ्ग० विद्या० ८–१३ पटलेषु ।
[14] योगिनां — ओ, घ, छ, ज; योगिनो — च.
[15] पुंस सत्यां — ओ; पुंसः सत्त्वं यास्याममी — घ; पुंस सत्वयास्याममी — छ, ज.
[16] सारयितुं — ओ; मारयितुं — च.
[17] क्षमा — ओ, घ, च.
[18] सा विध्याध्यानला त्याज्या — ओ; सिसाविद्या बलन्त्याज्या — घ; सिद्धाविद्धा बलं त्याज्या — छ, ज.
[19] बाहु भुवनात्मिका — घ, छ, ज.
[20] 'छ, ज' मातृकयोः '२८' तमश्लोको न दृश्यते ।
[21] क्रीडन्त्यविमलैः — ओ; क्रीडन्त्यविरलैः — च.
[22] पुमानेव — घ.
[23] समस्तोऽग्निनि० — ओ.
[24] सर्वरुद्रा — घ.
[25] तमुत्थिताः — घ, छ; ०समुत्थिताः — च; तमुत्थिता — ज.
[26] ०न मूर्ति० — घ; न मुक्ति० — छ, ज.
[27] ०ष्वमितं प्राणः — ओ; ०ष्वमितः प्राणः — छ; स्वमितः प्राणः — ज.
[28] पञ्चमं तु तनुः — च.
[29] ०तनुच्छिवः — छ; ०तनुच्छिवम् — ज.

प्रक्रीडत्यमितात्मासौ[१] तेजोमूर्तिरखण्डितः ॥३०॥
[२]तदीशत्वं शरीरेऽस्मिंस्तत्त्वत्वेन[३] व्यवस्थितम् ।
ध्यायेत्तेजोमयं स्पष्टं तद्योगाद्ध्यानभेदतः ॥३१॥
प्राप्नोति विपुलान्भोगान्क्रमाच्छुद्धाध्वनि स्थितान्[४] ।

[शिवतत्त्वप्राप्तिः]

[५]चतस्रो मूर्तयः प्रोक्ता [६]व्यापारात्परतः स्थिताः[७] ॥३२॥
[८]ईश्वरस्य तु सूक्ष्मान्याः [९]स्वतेजोऽमितविक्रमाः ।
[१०]ध्यातुरुन्मीलने सर्वं [११]जगन्मायात्मकं [१२]महत् ॥३३॥
तद्ध्यानात्परमं[१३] शान्तं शिवतत्त्वं [१४]प्रपश्यति ।
[१५]यद् दृष्ट्वा न [१६]पुनर्मोह[१७]खेदेन परिपीड्यते ॥३४॥
ईशतत्त्वात्मकैः सूक्ष्मैः [१८]कारणैः [१९]शुद्धवर्तिभिः[२०] ।
प्राप्नोति परमं स्थानं यत्तच्छाश्वतमुत्तमम् ॥३५॥
[२१]यस्मिन्प्राप्तस्य न पुनर्जन्मेहास्ति कदाचन ।

मतङ्ग उवाच —

[२२]व्याख्याता [२३]भूतये [२४]भोक्तुः प्रधान[२५]पुरुषेश्वराः ॥३६॥
मुक्तये च परं तत्त्व[२६]मनपाय्यव्ययं शुभम् ।
तेषां [२७]विभागं रूपं च यथावद्वक्तुमर्हति ॥३७॥

---

[१] प्रक्रीडत्यात्मनासौ — घ; प्रक्रीडत्यनिरात्मासौ — च; प्रक्रीडत्यात्मनासौ ते — छ; प्रक्रीडत्यात्मनास्रौ ते — ज.
[२] तदीशित्वशरीरे० — घ, छ, ज.
[३] ०स्तत्तत्वेन — ओ, घ; ०स्ततत्वेन — छ, ज.
[४] कामान् शुद्धाध्वनिश्चितान् — ओ; क्रमशुद्धाध्वनि स्थितान् — छ, ज.
[५] मतङ्ग० विद्या० ३.२३उ०–३४पू०.
[६] व्यापारान् — ओ, छ, ज.
[७] परितस्थिता — छ, ज.
[८] ईश्वरस्तु सुसूक्ष्मेभ्यः — ओ; ईश्वरः स सुसूक्ष्माभ्यां — घ; ईश्वरः सुसूक्ष्माभ्यां — छ, ज; सूक्ष्माः अन्याः इत्यत्र सन्धिरार्षः ।
[९] तत्तेजोऽमितविक्रमः — ओ, छ, ज; स्वतेजोभिरतिक्रमाः — च.
[१०] धातुरुन्मीलने — ओ, घ; ध्यातुं मीलने — छ; ध्यातुर्मीलने — ज.
[११] जगदात्मात्मकं — च.
[१२] जगत् — घ, छ, ज.
[१३] तद्ध्यानापरं — ओ.
[१४] प्रशम्यति — ओ.
[१५] यं — ओ, घ, च, छ, ज.
[१६] पुनर्मोहः खे० — च.
[१७] ०स्वेदेन — ओ.
[१८] करणैः — च.
[१९] शुद्धि० — ओ.
[२०] ०वृत्तिभिः — ओ, घ, च, छ.
[२१] मतङ्ग० विद्या० ३.२१ पू०.
[२२] त्र्याख्याता — ओ; त्र्याख्या . . — छ, ज.
[२३] भूतयो — ओ.
[२४] भोक्तुं — छ, ज.
[२५] ०पुरुषेश्वरः — घ, छ; ०पुरुषेध्वरः — ज.
[२६] ०मनप्याश्लाघनं — ओ; ०मनपार्यं व्ययं — छ, ज.
[२७] विभागरूपं — ओ, घ, छ, ज.

[प्रधानतत्त्वं पुरुषतत्त्वं च]

परमेश्वर उवाच —

चतुर्विशात्मकं[१] तत्त्वं प्रधानमुपवर्णितम् ।
[२]तस्मात्पुमानिह ज्ञेयो [३]नियत्याप्युपबृंहितः[४] ॥३८॥
तत्त्वानां रचना सिद्धा [५]भुवनत्वव्यवस्थया ।
[६]सोपभोगाय रुद्राणां विधात्रा रचिता [७]स्फुटा ॥३९॥
मायां विक्षोभ्य किरणैरमोघैर्बलशालिभिः ।
[८]मन्त्रयोग[९]विधानोत्थवीर्येणाथ [१०]महात्मना ॥४०॥
भोगाय मुनिशार्दूल नानाभोग[११]गुणात्मिका ।
पशोः पशुत्वमेतद्धि[१२] [१३]तत्तत्त्वेनोपचर्यते ॥४१॥
मायात्मकेन भोक्तृत्व[१४]दापनेन कलादिना ।
[१५]स्थूलेनाशुद्धवीर्येण परिणामगुणात्मना[१६] ॥४२॥
मोहादिनापि सूक्ष्मेण [१७]पुंभावात्पीडनात्मना[१८] ।
[१९]कलातोत्पन्न[२०]सद्भावस्वात्मना च वशीकृतान्[२१] ॥४३॥
स्वयमे[२२]वार्जिता[२३]नर्थान्कलातो व्यक्तिमागतान् ।
[२४]भुङ्क्ते प्रधानमाश्रित्य [२५]परिपाकमुपागतान् ॥४४॥
[२६]स भोक्ता पुरुषः प्रोक्तः कारणेच्छानुवर्तकः ।
पुंप्रधान[२७]समुत्थाभि[२८]र्वृत्तिभिर्यः प्रदृश्यते ॥४५॥

---

१ . . धात्मकं — ओ.
२ तत्पुमानपरि० — ओ; तस्मात्पुं न परि० — घ, छ, ज.
३ नियत्यामुप० — च; नियत्यात्युप० — छ, ज.
४ ०बृंहितम् — ओ, घ, छ, ज.
५ भुवनत्वं व्य० — ओ.
६ सोऽपि भोगाय — घ, छ, ज.
७ स्फुटाः — छ.
८ मन्त्रयाग० — छ.
९ ०विधानोत्थं — ओ; विधानोद्ध० — छ; विधानोर्थ० — ज.
१० महात्मनाम् — च.
११ ०गुणात्मराट् — ओ; ०गुणात्मकान् — छ, ज.
१२ ०मेतावत् — घ, च, छ, ज.
१३ तन्त्रत्त्वेनो० — च; तं त वेनो० — ज.
१४ . . . न — ओ; नायकेन — घ, छ, ज.
१५ स्थूलेन शुद्ध० — ओ.
१६ ०गुणात्मनाः—ओ; ०गणात्मना—घ, छ, ज.
१७ पुंमावात् — च; पुंभवात् — छ, ज.
१८ ०पीडनात्मनः — ओ; ०पीडनात्मनाम् — च.
१९ कलातोऽन्यत्र सद्भाव० — च; कलातः+ उत्पन्नः = कलात उत्पन्नः; ततः संधिरार्षः।
२० ०सद्भावस्वान्तेशात्मवशी० – ओ; ०सद्भावा साञ्जसात्मवशी० — घ, छ, ज.
२१ ०कृतः — ओ, घ; ०कृतं — च; ०कृताः — छ; ०कृताम् — ज.
२२ ०वोज्झितादर्थात्कलातो — घ, छ, ज.
२३ ०नर्थाक . . व्यक्ति० — ओ.
२४ इदमर्धं 'च' मातृकायां न दृश्यते।
२५ परिवार० — ओ.
२६ स मोक्तः पुरुषाः प्रोक्त० — ओ; संभोक्ता पु० — घ, ज; दंभोक्ता पु० — छ.
२७ ०समर्थ्याभि० — ओ.
२८ ०र्व्यक्तिभिर्यो प्रदृश्यते — ओ; ०र्व्यक्तिभिर्योग उच्यते — घ; ०र्वृत्तिभिर्योपपद्यते — च; ०र्वृत्तिभिर्योग उच्यते — छ, ज.

[1]वाचकश्चावकत्वादिन्यायेन [2]स शरीरभृत् ।
[3]तत्तत्त्वं पौरुषं विद्धि [4]प्रधानादुपलभ्यते ॥४६॥

[ईश्वरतत्त्वं सदाशिवतत्त्वं च]

तस्मादुपरि बोद्धव्यं तत्त्वमीश्वरसंज्ञकम् ।
[5]व्यस्तं [6]भुवनमार्गेण व्याख्यातं क्रीडनाय वै ॥४७॥
[7]ईशशब्देन भगवान्कीर्तितः[8] स सदाशिवः ।
नानाभोगविलासेन कृत्वात्मानमनेकधा ॥४८॥
[9]रुद्रमूर्तिभिरेकोऽसौ क्रीडत्यम्लानवीर्यभृत्[10] ।
[11]चतुर्विधेन मार्गेण [12]क्षेत्रज्ञानुग्रहं प्रति ॥४९॥
[13]सैव वक्ति परं[14] ज्ञान[15]मज्ञानोच्छित्तिकारणम् ।
बुद्धिमत्कारणं नित्यं [16]सुप्रसन्नाक्षगोचरम् ॥५०॥
[17]स्वदर्पोद्भूतवीर्याभिः [18]शक्तिभिः समधिष्ठितम् ।
[19]क्रीडन्तस्तन्नियोगेन विद्याविद्येश्वराश्च ये ॥५१॥
[20]विभिन्ना ह्युपचर्यन्ते शतशोऽथ [21]सहस्रधा ।
स्थानभेदात्क्रिया[22]भेदात्कार्यकारणभेदतः ॥५२॥
[23]तथाधिकारभेदाच्च स्फुरत्सूर्यायुतप्रभाः ।
[24]अप्राप्यात्मबलोपेताः[25] सर्वे खण्डेन्दुमौलयः ॥५३॥

---

[1] वाचका ग्रापकत्वादि० — ओ.
[2] तृशरीर० — च.
[3] पुंतत्त्वं . . प्र० — ओ.
[4] प्रधानमुप० — घ, छ, ज.
[5] व्यस्तमीश्वर० — घ, छ, ज.
[6] मतङ्ग० विद्या० ४.८उ०–१३, ५१–५३पू०; ५.६उ०, ७.
[7] ईशः शब्देन — छ, ज.
[8] भगवान्क्रीडते — च.
[9] रुद्रशक्तिभि० — ओ; रुद्रस्य मूर्तिरेवासौ — च.
[10] ०वीर्यहृक् — घ; ०वीर्यवान् — च; वीर्य-धृक् — छ, ज.
[11] मतङ्ग० विद्या० ३.२३उ०–३४पू०.
[12] क्षेत्रज्ञानग्रहं — ओ.
[13] सः एव 'सोऽचि लोपे चेत् पादपूरणम्' (पा०सू० ६.१.१३४) इति सुलोपः, ततो वृद्धिः ।
[14] शैवशक्तिपरं — ओ; सै व्यक्तपरं — घ; मसैव्यक्तपरं — छ, ज.
[15] ०मज्ञानो मुक्ति० — ओ; ०मज्ञानाच्छक्ति० — घ; ०मज्ञानः शक्ति० — छ, ज.
[16] सप्रसन्ना० — घ, ज.
[17] स्रदतोऽद्भुत० — ओ; स्वदर्पोद्भुत० — घ.
[18] . . . षितम् — ओ; . . . समधिष्ठितम् — छ, ज.
[19] क्रीडन्तं — ओ; क्रीडतः — घ, च, छ, ज.
[20] विभिन्नान्नुप० — ओ; विभिन्नान्युप० — घ, छ, ज.
[21] सहस्रशः — च.
[22] ०भेदाः कार्यं० — च.
[23] तथादिभेदकार्याच्च — ओ; तदाधिकार० — घ, छ, ज.
[24] अप्रच्याविबलो० — च.
[25] ०त्मन्नलोपेता — घ; ०त्मान्नलोपेताः — छ, ज.

नानारूपधराः सर्वे सर्वज्ञाः [1]परमेश्वराः ।
[2]भोगमोक्षप्रदाः सर्वे [3]सर्वेऽलुप्तवपुष्मतः[4] ॥५४॥
[5]यद्यप्युक्तं [6]मया [7]पूर्वं [8]रुद्राणूनां [9]विचेष्टितम् ।
[10]तथापि [11]तद्बला[12]वेशाद्व्यक्तं क्रीडयतः प्रभोः ॥५५॥
स एव [13]तद्बलं सता यत्तत्सारमनिन्दितम् ।
स एव तद्विजानाति यतस्तेनैव [14]भाषितम् ॥५६॥
प्रत्यक्षं च प्रभोः सर्वं जगत्स्थावरजङ्गमम्[15] ।
यस्मात्तस्मात्प्रपत्तव्यं[16] सत्यमीश्वरभाषितम् ॥५७॥
ईशित्व[17]मीशिता नाम पशुत्वाद्व्यतिरिच्यते ।
[18]मोहादिनापरिक्लिष्टगुणैस्तृप्त्युचितात्मभिः ॥५८॥
लक्ष्यते मुनिशार्दूल [19]यत्तन्त्रश्च पशुः सदा ।
भोगभोक्तृत्वभावेन[20] विभिन्नमुपचर्यते ॥५९॥

[शान्त्यादिभुवनस्थाः ।

सदाशिवस्य देवस्य क्रीडतो [21]याः [22]पुरोदिताः ।
[23]चतस्रो [24]मूर्तयः [25]सूक्ष्मास्ता अवाप्य मुमुक्षवः ॥६०॥
योगवीर्यबलोपेता [26]दीक्षया [27]वा नियोजिताः ।

---

[1] परमेश्वर — छ, ज.
[2] योगमोक्ष० — च.
[3] सर्वलुप्त० — ओ.
[4] ०वपुष्मता — छ, ज.
[5] अद्याप्युक्तं — ओ.
[6] मधुपूर्वं — छ, ज.
[7] मतङ्ग० विद्या० ४.८उ० – १३, ५१–५३पू०; ५.५–१८.
[8] रुद्राणीनां — ओ; रुद्राण्यानां — छ, ज.
[9] विशेषतः — घ, छ, ज.
[10] तथा तद्बलावेशात् . . प्रभो — ओ.
[11] नद्धावेश्यावद्व्यक्तं — छ.
[12] ०देशा व्यक्तं — घ, ज; ०वेशा व्यक्तं — छ.
[13] तद्बलः सक्ता — ओ; तद्बलासक्ता — घ, छ, ज.
[14] भक्षितम् — छ, ज.
[15] ०जंघमम् — ओ.
[16] प्रकर्तव्यं — ओ; प्रवक्तव्यं — छ, ज.
[17] ०मीशिता . . त्वाद्यति० — ओ; ०मीशितानां तु पशु० — घ, छ, ज.
[18] मोहादिरपरिक्लिष्टं गुणैस्त्रप्युचि० — ओ; मोहाच्चिरपरिक्लिष्टगुणैस्तृस्य चितात्मभीः — च; मोहिदीनापरिक्लिष्टगुणैस्तुष्यचिता० — छ; मोहिदीनां परिक्लिष्टगुणैस्तप्युचि० — ज.
[19] यत्तत्र पशुः — घ, छ, ज; यत्तत्रश्व पशुः–च.
[20] ०प्रभावेन — ओ.
[21] या — च; यां — छ, ज.
[22] पुरोदिता — ओ, च; परोदिताः — घ; परोदिता — छ, ज.
[23] मतङ्ग० विद्या० ३.२३उ०–३४पू०.
[24] मुक्तयः — छ, ज.
[25] साक्षास्ता — ओ; सूक्ष्मा यानवाप्य — घ, छ, ज; सूक्ष्मा यामवाप्य — च.
[26] दीक्षाया — ओ.
[27] विनियोजिताः — छ.

[1]रमन्ति [2]सूक्ष्मविभवा [3]यथा वच्मि मुनीश्वर ॥६१॥
[4]सदाशिवसमाः सर्वे [5]न च ते कारणेश्वराः ।
न शिवत्वमनुप्राप्तास्तेषां [6]धर्मोऽधुनोच्यते ॥६२॥

[सप्तप्रकारो मोक्षः]

[7]सारूपाः शान्तिपृष्ठस्थाः शान्त्यतीताश्रिताश्च ये ।
[8]सामीप्याः शान्तिनिलया ज्ञानकेवलिनो मताः ॥६३॥
सालोक्याश्चैव[9] [10]विद्यायां [11]येऽप्यधः परिसंस्थिताः ।
[12]योगकेवलिनस्तेऽपि तन्त्रेऽस्मिन्परिभाषिताः[13] ॥६४॥
[14]सांनिध्यास्तु प्रतिष्ठायां शक्तिकेवलिनो मताः ।
[15]काम्याश्चैव निवृत्तिस्था[16] मूर्तिकेवलिनः स्मृताः[17] ॥६५॥
[18]सादाख्ये चैव [19]ये तत्त्वे संस्थिताः[20] परमाणवः[21] ।
[22]मूर्तिकेवलिनस्तेऽपि शेषा रुद्राः प्रकीर्तिताः ॥६६॥
मोक्षः सप्तप्रकारोऽयं विभागेनोपवर्णितः[23] ।
[24]एभ्यो [25]ह्येकः परः [26]सूक्ष्मः कार्यकारणगोचरात्[27] ॥६७॥
[28]अतीतः परिपूर्णश्च स्वतन्त्रः सर्वतोमुखः[29] ।
एको [30]निरीश्वरः [31]स्वस्थः षडन्ये [32]सेश्वरा मताः ॥६८॥
संरुद्धशक्तयश्चान्ये[33] स्थूलभेदाः[34] प्रकीर्तिताः ।

---

[1] नमन्ति — घ; नमन्त्रि — छ, ज.
[2] योगविभवा — ओ.
[3] यथा सिद्धि मुनी० — ओ; यथावच्च मुनीश्वराः — घ, छ, ज.
[4] यदा शिव० — छ, ज.
[5] न चैते — ओ.
[6] धर्मोच्यतेऽधुना — ओ, घ, छ, ज.
[7] इदमर्धं 'घ, च, छ, ज' मातृकासु' न दृश्यते ।
[8] सामीप्य शान्ति० — घ, छ, ज.
[9] सालोक्यश्च वि० — घ; एतावत्पर्यन्तमेव 'घ'मातृकोपलभ्यते ।; सालोक्यं चैव — च; सालोक्यश्चैव — छ, ज.
[10] विद्याङ्गे य व्यधः परिसुस्थितः — ओ.
[11] येऽप्यधिः परि० — छ; येऽप्यधीपरि० — ज
[12] 'छ, ज' मातृकायोः '६४' उत्तरार्धप्रभृति '६६' श्लोकान्तो भागो न दृश्यते ।
[13] ०भाषितः — ङ.
[14] सान्नैध्यास्तु — ओ; सान्तोद्धास्तु — ङ.
[15] कामश्चैव — ओ.
[16] निवृत्तिस्थ० — ङ.
[17] ०केवलिन स्मृताः — ङ.
[18] तादात्म्ये — च.
[19] यै तत्त्वै — ङ.
[20] संस्थिता — ङ.
[21] परमाणवाः — ओ; परमाणस्य — ङ.
[22] मूर्तके० — ओ.
[23] ०वर्णितम् — ङ; ०कर्णिकम् — छ, ज.
[24] एह्योभ्येकः — ओ; एह्यो ह्येकः — ङ.
[25] ०प्येकपरः — छ, ज.
[26] सूक्ष्मकार्य० — ओ, ङ, छ, ज.
[27] ०गोचराः — छ, ज.
[28] अतीतं — छ, ज.
[29] ०मुखम् — छ, ज.
[30] निरीश्वराः सस्थं — ओ; निरीश्वरस्वस्थं—ङ.
[31] स्तब्धः — च; संस्थः — ज.
[32] रिश्चरा मताः — छ; रिश्वरा मता — ज.
[33] ०शक्तश्चारे — छ, ज.
[34] ०देहाः — च.

प्रलये [1]प्रलयाख्यास्तु [2]तेऽपि केवलिनो मताः ॥
बुभुक्षवः [3]सर्व एव [4]प्रोक्ताः संसारिणो [5]नराः ॥६९॥

[उक्तार्थोपसंहारः वक्ष्यमाणोपक्रमश्च]

[6]ध्यानश्रिया चोचिततत्त्वमार्गः
[7]प्रदीपकः सम्यगुपात्तवीर्यः[8] ।
[9]उक्तः शिवार्थे [10]ह्यधुना तवेत्थं
वक्ष्यामि चित्रं विधिकर्म भूत्यै ॥७०॥

इति श्रीमतङ्गपारमेश्वरे[11] योगपादे शिवतत्त्वोपलब्धिपटलः पञ्चमः ॥

पञ्चमः पटलः

---

[1] प्रलयाख्यस्तु — ओ, ङ; प्रलये ख्याता — छ, ज.

[2] स्तुते केवलिनो मता — छ; स्तुतेऽपि केवलिनो मता — ज.

[3] स एवं संसारि से . . .नराः — ओ; स एव संसारसेन्नरः — ङ.

[4] सर्वे सं० — छ, ज.

[5] मताः — छ, ज.

[6] ध्यानाशिरेषोचिततश्च मार्ग० — ओ; ध्यानः शिरेषोचिततत्त्वमार्ग० — ङ; ध्यानाग्निराशेर्विततत्वमार्ग० — च; ध्यान्यानिरेषा विचिता तु मार्गा — छ, ज.

[7] प्रदीपकं — ङ.

[8] ०वीर्यं — ङ; ०वीर्यम् — छ, ज.

[9] उक्तं — ओ, ङ, छ, ज; शिवार्थ . . . मधुना — च.

[10] भ्यधुनाथ वेथ — ओ; भ्यतु नाथ वेत्थ —ङ.

[11] अत्र 'च' मातृकायां 'महातन्त्रे' इत्यधिकं दृश्यते ।

षष्ठः पटलः

कर्मयोगः

[1]अथ संक्षेपतो [2]वच्मि नानासिद्धिफलप्रदम् ।
विचित्रकर्मसंतानं[3] [4]विशिष्टकरणात्मकम्[5] ॥१॥

[[6]प्राणजयः]

---

[1] अतः — 'ओ' पाठान्तरम् ।
[2] वक्ष्ये — च, छ, ज.
[3] ०संस्थानं — च.
[4] विशिष्टं — ओ; विश्लिष्टं — छ, च.
[5] कारणात्मकम्—ओ, छ, ज; ०कारणात्मकः—ङ.
[6] 'कानि प्राणादिवृत्तीनां स्थानान्यस्मिन् शरीरके ।
जितासु तासु किं वा स्यादिति ब्रूहि सुरोत्तम ॥
तस्य हृत्कण्ठनाभ्यङ्गपृष्ठदेशेषु धारणात् ।
जयः प्रणयनादीनां वृत्तीनां योगिनो भवेत् ॥
जितप्रणयनो धत्ते स्वेच्छया देहमात्मनः ।
जितापनयनोऽश्नाति शकृदादि जहाति न ॥
विजितोन्नयनोऽभ्येति वाग्वशित्वादिकान् गुणान्।
समानवृत्तिविजयाद् भवेत्त्यक्तजरो वशी ॥
वपुर्विहारवशिता भवेद्विनमने जिते ।
पङ्काम्बुकण्टकासङ्गो वीर्यमक्षयमद्भुतम् ॥'
(मृगेन्द्रे योग० ४४–४८);
'प्राणसंयमनं नाम देहे प्राणादिधारणम् ।
एष प्राणजयोपायः सर्वमृत्यूपघातकः ॥
किंचित्प्राणजयोपायं तव वक्ष्यामि तत्त्वतः ।
बाह्यात्प्राणं समाकृष्य पूरयित्वोदरस्थितम् ॥
नाभिमध्ये च नासाग्रे पादाङ्गुष्ठे च यत्नतः ।
धारयेन्मनसा प्राणं संध्याकालेषु सर्वदा ॥
सर्वरोगविनिर्मुक्तो जीवेद्योगी गतक्लमः ।
नासाग्रे धारणं गार्गि वायोर्विजयकारणम् ॥
सर्वरोगविनाशः स्यान्नाभिमध्ये च धारणात् ।
शरीरं लघुतां याति पादाङ्गुष्ठे च धारणात् ॥
रसनावायुमाकृष्य यः पिबेत्सततं नरः ।
श्रमदाहौ न तस्य स्तो नश्यन्ति व्याधयस्तथा ॥
संध्ययोर्ब्राह्मकाले वा वायुमाकृष्य यः पिबेत् ।
त्रिमासात्तस्य कल्याणि जायते वा सरस्वती ॥
षण्मासाभ्यासयोगेन महारोगात्प्रमुच्यते ।
आत्मन्यात्मानमारोप्य कुण्डल्यां यस्तु धारयेत् ॥
क्षयरोगादयस्तस्य नश्यन्तीत्यपरे विदुः ।
जिह्वया वायुमानीय जिह्वामूले निरोधयेत् ॥
यः पिबेदमृतं विद्वान् सकलं भद्रमश्नुते ।
आत्मन्यात्मानमिडया समानीय भ्रुवोऽन्तरात् ॥
पिबेद्यस्त्रिदशाहारं व्याधिभिः सोऽभिमुच्यते ।
नाडिभ्यां वायुमारोप्य नाभौ वा तुन्दपार्श्वयोः ॥
घटिकैकां वहेद्यस्तु व्याधिभिः सोऽभिमुच्यते ।
मासमेकं त्रिसंध्यायां जिह्वयारोप्य मारुतम् ॥
पिबेद्यस्त्रिदशाहारं धारयेत्तुन्दमध्यमे ।
गुल्माषी वा प्लिहा चान्या त्रिदोषजनितास्तथा॥
तुन्दमध्यगता रोगाः सर्वे नश्यन्ति तस्य वै ।
ज्वराः सर्वे विनश्यन्ति विषाणि विविधानि च॥
बहुनोक्तेन किं गार्गि पलिता (नि? दि) च नश्यति।
एवं च विजयोपायं प्राणस्य तु वरानने ॥
शक्यमासनमास्थाय समाहितमनास्तथा ।
करणानि वशीकृत्य विषयेभ्यो बलात्सुधीः ॥
अपानमूर्ध्वमाकृष्य प्रणवेन समाहितः ।
हस्ताभ्यां बन्धयेत्सम्यक् कर्णादिकरणानि च ॥
अङ्गुष्ठाभ्यामुभे श्रोत्रे तर्जनीभ्यां तु चक्षुषी ।
नासापुटावथान्याभ्यां प्रच्छाद्य करणानि वै ॥
आनन्दानुभवं यावत्तावन्मूर्धनि धारयेत् ।
प्राणः प्रयात्यनेनैव ततस्त्वायुर्विघातकृत् ॥
ब्रह्मरन्ध्रे सुषुम्नायां मृणालान्तरसूत्रवत् ।
नालोत्पत्तिस्त्वनेनैव शुद्धस्फटिकसंनिभा ॥
आमूर्ध्नो वर्तते नादो वीणादण्डवदुत्थितः ।
शङ्खध्वनिनिभस्त्वादौ मध्ये मेघध्वनिर्यथा ॥
व्योमरन्ध्रगते नादे गिरिप्रस्रवणं यथा ।
व्योमरन्ध्रगते वायौ चित्ते चात्मनि संस्थिते ॥
सदानन्दी भवेद्देही वायुस्तेन जितो भवेत् ।'
(योगयाज्ञवल्क्ये ६.३५–५७पू०).

[1]प्राणाद्या वायवः पञ्च [2]यैर्वृतं जगदातुरम्[3] ।
तेषां जयः प्रकर्तव्यः प्रथमं [4]योगिना सदा[5] ॥२॥
[6]निष्काम्याशेषमनिलं [7]विधार्य च शनैः शनैः ।
आपूरयेज्जगत्पश्चात् [8]पूरयित्वा च धारयेत् ॥३॥
वातपित्तकफप्राया[9] दोषा वायुसमीरिताः ।
क्षणात्प्रध्वंसमायान्ति योगिनो योगवर्त्मनि ॥४॥
क्षीणदोषस्ततो[10] योगी नाभिदेशे विधार्य तु ।
चक्रवन्मण्डलं ध्यायेन्नाभिनेमि[11]समन्वितम्[12] ॥५॥
[13]भ्रमद्वेगेन तन्मध्ये वायुभूतः स योगिराट् ।
[14]नाभेः प्रदक्षिणं [15]गच्छदात्मानं परिचिन्तयेत्[16] ॥६॥
[17]यावत्तन्निश्चली[18]भूतं [19]तदोत्क्षिप्य [20]स मारुतः ।
नाभि[21]देशाद्धृदि [22]स्थाप्य ह्यनिलं कमलोदरे ॥७॥
[23]पूर्ववच्च समभ्यस्य [24]चक्रं हृद्व्योममण्डले ।
वेगवद्दक्षिणावर्तं [25]यावन्निश्चलतां व्रजेत् ॥८॥
[26]कण्ठतालुललाटेषु [27]क्रमाद्योज्यो विधिः सदा ।
जितप्राणस्ततो योगी ललाटस्थं विधारयेत् ॥९॥
[28]तालुमध्ये ततश्चक्रमेकीकृत्य समभ्यसेत् ।

---

[1] प्राणाद्यवयवः — ओ; प्राणन्यालयवः — ङ; प्राणाद्यवयवाः — छ, ज.
[2] यैर्धृतं — ज.
[3] जगदातुकम् — छ, ज.
[4] योगिनां — ङ; योगिनोः — च, छ.
[5] तदा — च.
[6] निष्काम्य शेषनिलयं — ओ, ङ; निःकाम्याशेषनिलं — च; . . . निष्काम्यमनिलं — छ, ज.
[7] विधाय — ओ, ङ, छ, ज.
[8] पूरकत्वाच्च — ओ, ङ; पूरयित्वा नु — च.
[9] ०प्रायो — ओ
[10] ०दोषस्तथा — ओ.
[11] नाभौ नाभि० — ओ, ङ, छ, ज.
[12] ०समन्वितः — ओ; ०समन्विता — ङ.
[13] भ्रूमध्ये केन तन्मध्ये — छ; भामध्ये केन तन्मध्ये — ज.
[14] नाभो — छ, ज.
[15] गच्छेदात्मानं — ओ, ङ; गच्छन्नात्मानं — च
[16] ०चिन्तये — ङ.
[17] यावत्तु निश्च० — च; यावत्तन्निबिडीभूतं — छ, ज.
[18] ०मूत० — ङ.
[19] ततो क्षिप्तः — ओ, ङ; ततोत्क्षिप्य — छ, ज.
[20] समारुतम् — ङ; समाकुलम् — छ, ज.
[21] ०देशाद्धृदी — ङ; ०देशे हृदि — च.
[22] स्थाप्य मलिनं — ओ; स्थाप्यामनिलं — ङ; स्थाप्य मनिदं — छ, ज.
[23] पूर्ववच्चक्रमभ्यस्य — ओ, ङ; पूर्ववच्चक्रमभ्यर्च्य — छ, ज.
[24] चक्रहृद्व्योम० — ङ; वक्त्रं हृद्व्योम० — च; स्वं चक्रं व्योम० — छ, ज.
[25] यावन्निश्चयतां — ओ; यावन्निश्चयतं — ङ; धाधन्निश्चलतां — छ; याय निश्चलतां — ज.
[26] कर्णतालु० — ओ; कर्णश्च तालु० — ङ.
[27] क्रमाद्योज्या बहिः — च.
[28] 'छ' मातृकायां '१०' श्लोकः '११' श्लोकस्य पूर्वार्धं च न दृश्येते ।

कण्ठहृन्नाभिचक्राणां क्रम एष प्रकीर्तितः ॥१०॥
एव[1]मभ्यस्यतो नित्यं [2]योगिनस्तल्लयात्मनः ।
[3]प्राणाद्या [4]वशतां यान्ति सम्यग्यैर्वशवर्तिभिः[5] ॥११॥
[6]वपुर्दीप्ति[7]रनालस्यं [8]प्रज्ञा चैवोपजायते ।
[9]रुग्जराक्षुत्पिपासाद्यैर्दोषैर्न परिभूयते ॥१२॥
नासौ [10]प्रदूष्यते [11]विघ्नैर्योगी [12]योगपथि स्थितः ।

मतङ्ग उवाच —

शिवतेजोऽपविद्धस्य[13] प्रागेव [14]परमेश्वर ॥१३॥
[15]तत्प्रभावात्समस्तानां [16]विघ्नानामजयो भवेत् ।
बाध्यते [17]चेत्ततः [18]कष्टं [19]मुक्तेरप्यत्र संशयः ॥१४॥

परमेश्वर उवाच —

अतिरस्कृतवीर्येण कारणेच्छानुवर्तिना[20] ।
[21]व्यक्ता यं प्रत्य[22]नायासमनिवर्तकतेजसा ॥१५॥
[23]तमवश्यं [24]नयत्यूर्ध्वं [25]किंतु शेषमपेक्षते[26] ।
[27]परिपाकं शरीरस्य [28]धर्माधर्मात्मकस्य [29]सा ॥१६॥

---

[1] ०मभ्यसतो — ङ, च.
[2] योगिनस्तालुवर्त्मना — ओ; योगितल्लधरात्मनः — ङ.
[3] प्राणाद्यां वशितां याति — ङ; तालुमद्यावतां यान्ति — छ.
[4] वशमायान्ति — च.
[5] ०र्वशिवन्तिभिः — छ; ०र्वशवक्तिभिः—ज.
[6] त्वदुद्दीप्तिनरालभ्यं — ओ; त्वदुद्दीप्तिरनालभ्यं — ङ.
[7] ०रकालस्यं — छ, ज.
[8] प्रजा — ओ, ङ.
[9] कुञ्जराक्षुत्० – ओ, ङ; रुक्जटाक्षुत्० — छ.
[10] प्रदृष्यते — ओ; प्रदृश्यते — च; प्रहृष्यते — छ, ज.
[11] विघ्नयोगी – ओ; विघ्नो योगी — ङ; विघ्ने योगि — छ, ज.
[12] ग्रोगवतस्थितः – ओ; योगावतः स्थितः — ङ.
[13] शिवतेजोघचित्तः सन् — ओ. शिवत्तेजोघलित्तः सन् – ङ; शिवतेजोपविद्धः सन् – च; शिवतेजोपविसन् — छ, ज.
[14] परमेश्वरः — ङ.
[15] तद्भावना समस्तानां — ओ; तद्भावनात् समस्तानां — ङ.
[16] विघ्नकर्मजयो — ज.
[17] चेतसः — ओ; च्चेतसाः — ङ.
[18] कष्टमुक्तोऽप्यत्र न संशयः — छ, ज.
[19] मूकेरप्यत्र — ओ; मूकैरप्यत्र — ङ; मुक्तेरप्यवशः स च — च.
[20] कारणे छं तु वर्तिना–छ; कारणेछक्तुवर्तिना–ज.
[21] सक्तो — ओ; व्यक्तो — ङ, च, छ; व्यक्ति . . . — ज.
[22] ०नायामतिवर्तक० — छ, ज.
[23] तमवश्यन्नवत्यूर्ध्वं — ज.
[24] नयत्यध्वं — ओ; नयत्यध्व — ङ; नयत्पूर्वं — च.
[25] तमवश्यमपे० — छ, ज.
[26] ०मपेक्ष्यते — ओ.
[27] परिवारशरी० — ओ; परिवारं शरी० — ङ.
[28] 'ओ, ङ' मातृकयोः अयं पादो लुप्तः ।
[29] तु — छ, ज.

[1]धर्माधर्ममुखः प्रोक्तो ह्यविघ्नो विघ्न [2]एव च ।
[3]समुद्यतस्य यो भोक्तुः [4]प्रवृत्तस्य च कुत्रचित् ॥१७॥
विपर्ययोपचारेण [5]व्याघातो [6]विघ्न एव सः ।
[7]सिद्ध्युपेतस्य [8]यत्प्रोक्तं विधानं [9]मन्त्रिणो मुने ॥१८॥
सिद्धिरेवान्तरायोऽत्र[10] [11]मुक्तेर्मुनिवरेश्वर ।
[12]न च तत्र [13]प्रकर्तव्यमनुध्यानं शिवात्मकम्[14] ॥१९॥
[15]धर्मोपो[16]द्बलितस्येत्थं पुण्यभाजः प्रवर्तते ।
[17]सिद्धिर्मन्त्रात्मिका [18]तस्याप्यभियुक्त[19]स्य नित्यशः ॥२०॥
[20]यथोक्तकर्ममार्गेण [21]चरतः [22]साधकात्मनः ।
[23]न विघ्ना नोपसर्गाश्च विधिवैकल्यमेव वा[24] ॥२१॥
भवन्ति विधि[25]वैकल्यात्साधकस्य [26]विनायकाः ।
तेऽपि मन्त्रबलात्क्षिप्रं ध्वंसमायान्ति सुव्रत ॥२२॥
[27]तच्छक्तिः पौरुषैः स्थूलै[28]र्हेतुभिर्न विचार्यते ।

---

१ धर्माधर्ममुखप्रोक्तो — ङ; धर्माधर्मः सुखः प्रोक्तो — च; धर्माधर्मुखप्रोक्तो — छ; . . र्मुखप्रोक्तो — ज.
२ एव सः — च, छ; एव सा — ज.
३ १७ श्लोकस्योत्तरार्धं १८ श्लोकस्य पूर्वार्धं च 'छ, ज' मातृकयोर्न स्तः ।; वासमुद्यतयो भोक्तुं — ओ.
४ प्रवृत्तस्याथ — ओ, ङ.
५ व्याघाते — ओ, ङ.
६ घन एव सः — ओ; विघ्न उच्यते — च.
७ विध्युद्यतस्य — ओ; विद्युद्यतस्य– ङ, छ; . . ध्यद्यतस्य — ज.
८ यत्रोक्तं — ओ, ङ, छ, ज.
९ मन्त्रिणा — ओ, ङ.
१० ०न्तरा चोत्र — ओ.
११ मुक्ते मुनि० — ओ, ङ, छ, ज; मुक्तेन्दुनि० — च.
१२ स विघ्नोऽत्र — च.
१३ प्रवर्तव्यमनुव्यानु शिवा — ओ; प्रवक्तव्यमनुव्यानु शिवा — ङ; प्रपत्तव्यो द्वचनुध्यानं — च; प्रवक्तव्यमनुध्यानं — छ.
१४ ०त्मकाम् — ङ.
१५ धर्मो चोद्बलिनः सोऽर्थं — ङ.
१६ ०द्बलितस्येर्ध पुभाजः — छ; ०द्बलिनस्येर्थमुपभाजः — ज.
१७ सिद्धिमन्त्रात्मिका — ओ; सिद्धि मन्त्रात्मिकां — ङ; सिद्धिमन्त्रात्मका — छ, ज.
१८ तस्याभि० — ओ; तस्यमभि० — ङ.
१९ ०व्यनित्यशः — छ, ज.
२० यथोक्तं क्रममार्गेण — छ, ज.
२१ तातः — ओ, ङ; तरसा — छ, ज.
२२ साधकमात्मनः — ओ.
२३ न विघ्नानेव सर्गाश्च — ओ; न विघ्ना वै सर्गाश्च — ङ; न विघ्नानुपसर्गाश्च — छ; निविघ्नानुपसर्गाश्च — ज.
२४ च — ओ; वः — ङ.
२५ ०वैकल्पसाध० — च.
२६ वितानकाः — ङ; विनायकः — छ, ज.
२७ तच्छक्तिपौरुषैः — ओ; तच्छक्तिपौरुषैस्थौलै० — ङ; तच्छक्तिपौरुषैद्दि०यैर्हे० — छ, ज.
२८ २३ श्लोकस्य द्वितीयपादप्रभृति २५ श्लोकस्य प्रथमपादान्तो भागो 'ओ' मातृकायां लुप्तः।; ते तु भिन्न वि० — ङ; हेतुभिर्ना वि० — छ, ज.

[1]अवेक्ष्य भगवान्कर्म[2]योग्यत्वं बन्धदान् यतः ॥२३॥
[3]ददाति [4]साधकेन्द्राणां [5]भोगान्भीतिसमन्वितान् ।
[6]यत्रोक्तसाधकेन्द्राणां भुक्तभोग[7]क्षयात्मनाम् ॥२४॥
मोक्षस्तत्र [8]प्रवक्तव्यो [9]भिन्नदेहस्य नान्यथा ।
नानुध्यानादृते [10]सोऽपि यावत्तद्देहमादरात् ॥२५॥
[11]पालयेन्मन्त्रसामर्थ्याद्योगाद्वा[12] करणोद्भवात्[13] ।
[14]तावत्प्रक्रीडमानः[15] [16]सन्न विघ्नैरभिभूयते ॥२६॥
[17]युक्तः सदाशिवे तत्त्वे [18]दीक्षया साधकोत्तमः ।
[19]भिन्नदेहः स तत्रैव [20]भुक्त्वा भोगाननेकधा ॥२७॥
लयं याति न संदेहः किं तु मुक्तो ह्यनीश्वरः ।
सेश्वरत्वान्मुनिव्याघ्र [21]सर्वेशस्तस्य लीलया ॥२८॥
दत्त्वाधिकारं किंचिद्वा [22]नयेत्पूर्वं पदं यदा ।
योगयुक्सर्वविघ्नेषु ललाटसमयाच्चिरम् ॥२९॥
परं तेजः समभ्यस्य तदुत्थेन दृगात्मना ।
संपश्यन्निर्दहे[23]द्विघ्नान् [24]स्थिरधीः प्रयतात्मवान् ॥३०॥

[प्राणजयाद्विचित्रकर्मकरणम्]

अस्मात्प्राण[25]जयात्कर्म विचित्रं लीलयैव हि ।
करोति योगयुक् क्षिप्रं[26] तं प्रवक्ष्यामि तेऽधुना ॥३१॥
हृत्पद्मकर्णिका[27]रूढं खद्योतसमवर्चसम् ।

---

[1] अपेक्ष्य — च, छ, ज.
[2] ०योग्यत्वबन्धिमान् — ङ; योग्यत्वं बुद्धिमाप्नुयात् — च; योक्तव्यं बुद्धिमान् — छ, ज.
[3] 'च' मातृकायाम् इदमर्धं न दृश्यते।
[4] साग्रकेन्द्राणां — ङ.
[5] भोगाद्भीति० — ङ, छ, ज.
[6] यत्रोक्तं साध० — ङ, च.
[7] ०क्रियात्मनां — च.
[8] प्रकर्तव्यो — ङ; प्रपत्तव्यो — च.
[9] भिन्नदेवस्य — छ, ज.
[10] स यावर्तदेहं च मादरात् — छ; यावत्तदेहं च मादरात् — ज.
[11] ज्वालये मन्त्र० — ओ.
[12] ०द्योगाद्या — ओ, ङ; ०द्योगान्धा — च.
[13] कारणोदितम् — ओ; कारेणोदितम् — ङ; ०कारणोद्यताम् — च; कारणोद्भवात् — छ.
[14] तावत्क्रीडमनाः सम्यग्विघ्नैर . . — ओ.
[15] तावद्धि क्रीडमानः — ङ.
[16] सन् अविघ्नैरभि० — छ, ज.
[17] उक्तः — च.
[18] दीक्षाया साध० — ओ, छ, ज.
[19] भिन्नदेहे — च, छ, ज.
[20] २७ श्लोकचतुर्थपादप्रभृति ३० श्लोकतृतीयपादान्तो भागः 'च' मातृकायामेव दृश्यते।
[21] सवेश० — च.
[22] नयत्पूर्वं — च.
[23] ०द्विघ्नां — च.
[24] भिन्नधीः — छ, ज.
[25] ०जयात्क्षिप्रकर्मचित्रं लिलैव — छ; ०जयात्क्षिप्रकर्मचित्र लिलैव — ज.
[26] ०युग्विप्र — ओ, छ, ज; योगयद्विप्र — ङ.
[27] ०रूढखद्योत० — ङ.

ध्यात्वात्मानं विशेदूर्ध्वं [१]मार्गेणातिमहौजसा[२] ॥३२॥
[३]यावतुर्यं तत[४]स्तस्मिन् [५]पद्मं ध्यायेन्महौजसम्[६] ।
उदयादित्यसंकाशं [७]तन्मध्ये कर्णिकां शुभाम् ॥३३॥
[८]तामन्वीक्ष्य विशेद्योगी [९]भित्त्वोद्घातैस्तु ग्रन्थिकान्[१०] ।
[११]तत्स्थः [१२]संपश्यते सिद्धान् [१३]वसून्रुद्रान्सभास्करान् ॥३४॥
नक्षत्राणि च सर्वाणि [१४]ग्रहांश्चैव दिवौकसान् ।
[१५]पश्येद्विमा[१६]नयानोऽयं स्थाने व्योमन्यनेकधा ॥३५॥
तैः सार्धं [१७]विपुलैर्भोगैः क्रीडते सुचिरं [१८]सुधीः ।
ध्यानेन[१९] वर्तुलीकृत्वा[२०] [२१]हृत्प्रदेशे सुनिश्चलम्[२२] ॥३६॥
[२३]पीतं [२४]बिन्दुवपुर्ध्यायेन्निबिडं [२५]गुरुमण्डलम् ।
[२६]क्षणाद्वज्रशरीरः[२७] स्याद्देवैरपि न[२८] धृष्यते[२९] ॥३७॥
निष्क्रम्य [३०]बाह्यतस्तूर्णं स्पष्टमत्यन्तदीप्तिमत्[३१] ।
[३२]चक्राकारं स योगीन्द्रो [३३]यां यां दिश[३४]मशङ्कितः ॥३८॥

---

[१] मार्गेणात्र — ओ; माह्येणाति० — छ, ज.
[२] त्रिमहेच्छया — ङ.
[३] यावत्कर्तुं — ङ; तावत्तुर्यं — च.
[४] ०स्तस्मात्पद्मं — छ, ज.
[५] ०पद्माद्धार्ये महौजसः — ङ.
[६] महौजसः — ओ.
[७] तन्मध्यकर्णिकां — च.
[८] तमन्वीक्ष्य विशेद्ये . . — ओ; तमन्वीक्ष्य विशे० — ङ; तमुद्वीक्ष्य विशे० — च; वीक्ष्य प्रविविशे० — छ, ज.
[९] हित्वोद्घातैस्तु — ओ, ङ, छ, ज; त्वाद्घातैस्तु — च.
[१०] ग्रन्थयः — ओ, ङ, च, छ; ग्रन्थया — च.
[११] एतदारभ्य योगपादान्तं 'ग' मातृकायामुपलभ्यते ।; तत्स्थं — ओ; ततः समभ्यसेत् सिद्धान् — च; तत्रस्थं पश्यते — ग.
[१२] संविश्यते — ङ; संप्रश्यते — छ, ज.
[१३] वस्तून्रुद्रान् — ग; वसूरुद्रान् — ङ; वसून् मुद्रानभास्क० — छ, ज.
[१४] ग्रहांश्च दिवौ० — ग; ग्रहांश्च सदिवौ० — च; गृहांश्च सदिवौकसः — छ, ज.
[१५] पश्येहि मानमानौ संघस्थान्योऽप्यनंकधा — ज.
[१६] ०नयानौघसंस्थाने — ग; ०नायानोऽयं संस्थाने — ङ; ०नपारौधसंघस्थान्व्योम्न्यनेकशः ०च; ०नयानौ संघस्थान्व्योमन्येन — ज.
[१७] विपुलैर्योगैः — छ, ज.
[१८] सुखी — ओ, ग, ङ; सुचे — छ; सुचौ — ज.
[१९] ध्याने — छ, ज.
[२०] ०भूत्वा — ओ, ग, ङ, छ, ज.
[२१] भूप्रदेशे — ग; हृत्प्रदेशेषु निश्चलम् — च.
[२२] सुनिश्चल — ग; सुनिश्चयः — ङ.
[२३] यत . . ध्यायेन्नभिडं — ओ; वीतद्विन्दुवपुध्यायेन्नविडं — ङ; पीतबिन्दुवपुर्ध्यायि० – च.
[२४] बिन्दुवपुर्ध्यायेंनिबिडं — ग; विधुवपुध्याये निबिडं — छ; विधुवपुध्याये . . — ज.
[२५] गुमन्धरः — ओ; गुरुमन्थरम् — ग, च; गुरमन्थरम् — ङ; . . मन्धरम् — ज.
[२६] ०क्षणोद्वज्रंज्र० — छ; क्षणोद्वजं० — ज.
[२७] ०शरीरं — ग.
[२८] ०द्देव्यै वि न — छ.
[२९] धूज्यते — ग; दृश्यते — च.
[३०] वाग्यतस्तूर्णं — च; बाह्यत सूर्णं — छ, ज.
[३१] ०मत्यन्तदीप्तम् — छ, ज.
[३२] चक्रान्तरं — ओ, ग, ङ, छ, ज; अत्र 'ध्यायन्" इत्यध्याहार्यम् ।
[३३] यायान्निश० — ग; यास्यां दिश० — छ; यास्यानिश० — ज.
[३४] ०मशक्तितः — ओ, ङ; ०मशङ्कितम् — ग; शमागतः — छ; श. . गतः — ज.

[1]पश्येत्सा सा मुनिव्याघ्र स्तम्भिता नात्र संशयः ।
[2]नाभ्युत्थेन महा[3]तेजाः शिखासंघट्टसर्पिषा[4] ॥३९॥
निर्धूमाङ्गारवपुषा [5]वेगवत्किरणात्मना ।
साटोपेन [6]सुतीव्रेण [7]क्रोधरन्ध्रविनिर्गमात् ॥४०॥
[8]निर्यातं [9]निर्मलं [10]ध्यात्वा तेन संवेष्टयेज्जगत् ।
संहरन्निव सर्वत्र ज्वलमानेन भूरिणा ॥४१॥
[11]तीव्रसंतापसंतप्तं दह्यमानं [12]सुविह्वलम् ।
[13]आत्मानममृतप्रख्यममृतोर्मिसमाकुलम् ॥४२॥
[14]विशन्तं तज्जगत्सर्वं [15]ध्यायेत्तु [16]सततं बुधः ।
[17]अस्माद्ध्यानाज्जगत्क्षिप्रं [18]वशमेति चराचरम् ॥४३।
धूम्राकारेण [19]विद्वेषः [20]कपिलाशबलेन च ।
[21]प्रोच्चाटनं [22]सुरक्तेन [23]क्षणादाकर्षणं भवेत् ॥४४॥
शुक्लेन प्रीतिजननं[24] ध्रुवम[25]प्यसितेन [26]तु ।
बिन्दुना [27]मारणं प्रोक्तं [28]शान्तिकर्म [29]शिवात्मना ॥४५॥
यत्र [30]यत्रेच्छते गन्तुं [31]योगी योगबलान्वितः ।
तत्र तत्र [32]लयः कार्यो [33]मनसः [34]प्रयतात्मना ॥४६॥

---

[1] पश्येत्स सा — ओ, ङ, छ, ज; पश्यते सा — च.
[2] नाभ्युर्थेन — ज.
[3] ०तेजा शिखा० — ग; ०तेजा जिघां — ङ; ०तेजा शिखां — च; तेजनशिखा० — छ; ०जेन शिखा० — ज.
[4] ०संघटसर्पिषा—ओ, ङ; ०सर्पिणा—छ, ज.
[5] वेगवत्करुणात्मना — छ, ज.
[6] सतीव्रेण — ङ; सुतिप्रेण — छ, ज.
[7] क्रोधारन्ध्र० — ङ; क्रोधमन्द्र० — छ, ज.
[8] निर्यान्तं — ग; निर्यातां – ङ; निर्घातं — च.
[9] विपुलं — ओ, ग, छ, ज; विपुलां — ङ.
[10] ध्यात्वान्तन — ओ, ङ.
[11] ०तिप्रसन्नाहसं — छ; ति प्रसन्नाधसं० — ज.
[12] तु विद्वलम् — ओ, ङ.
[13] आश्मानममृतं प्रख्य० — ङ; आत्मानममृतं प्रख्य० — छ.
[14] निर्विशन्तं जगत् — ओ, ग, छ, ज; निव्य-शन्तं जगत् — ङ.
[15] ध्यातव्यं — ओ, ग, ङ, च, छ, ज.
[16] स्वतनौ — ओ, ङ, च, छ, ज.
[17] अस्माद्ध्यात्वा . . क्षिप्रं — ओ; अस्मा-ध्यानाज्जग० — ग; अस्माद्ध्यानात्क्षिप्रं—ङ.
[18] वचमेति — ज.
[19] विद्वेषात् — ङ; विविश — छ, ज.
[20] कपिशेन बलेन — ओ, ग, ङ, छ, ज; कपिलेन चलेन — च.
[21] प्रोच्चाटना — छ; प्रोच्चाटनाः — ज.
[22] च रक्तेन — च.
[23] कृष्णादा० — छ, ज.
[24] प्रीतिजान — छ, ज.
[25] ०प्यशिवेन — ओ, ङ; ०प्यशितेन — छ, ज.
[26] च — च.
[27] मरणं — ओ, ङ, छ, ज; . . रणं — ग.
[28] शान्तिकं च — ओ, ङ, च; शाक्तिकं च — छ, ज.
[29] सितात्मकम् — च; समात्मना — छ, ज.
[30] यत्रेच्छतं — ओ.
[31] योगियोग० — छ, ज.
[32] लयं — ङ.
[33] ४६ तमश्लोकस्य चतुर्थपादप्रभृति ४७ तम-श्लोकस्य तृतीपादान्तो भागः 'छ, ज' मातृकयोर्न दृश्यते ।
[34] प्रयतात्मनः — ओ, ङ; प्रयतात्मवान् — च.

[1]संप्राप्य मनसि [2]प्राप्ते क्षणात्तत्रैव योगिराट् ।
समाविश्याथवा स्वस्थः [3]कर्णिकायां तु पूर्ववत् ॥४७॥
कदम्ब[4]गोलका[5]कारमात्मानममलात्मकम्[6] ।
स्फुरद्रश्मिसहस्राढ्यं ध्यानयुक्तेन [7]चेतसा ॥४८॥
[8]निश्चरन्ति [9]सुदीप्ताङ्ग्यो जपापुष्प[10]समप्रभाः ।
आकुञ्चि[11]ताग्रा [12]विस्पष्टाः [13]स्वदेहान्मुनिसत्तम[14] ॥४९॥
[15]ताभिराकृष्य [16]विद्धाङ्गं [17]जगदेतच्चराचरम् ।
[18]आकृष्य [19]चेष्टयेद्योगी [20]तेन वा [21]सूक्ष्मवर्त्मना ॥५०॥
[22]यायाद्यथेप्सितं स्थानं [23]शिवशक्तिबलेरणात् ।
ललाटसमयं प्राप्य [24]व्योमरूपमथोज्ज्वलम् ॥५१॥
निरीक्ष्य [25]भेदयेत्स्थाणुमपि[26] [27]वज्रचयोपमम् ।
शङ्खकुन्देन्दु[28]धवलं हृद्व्योमकमलोदरे ॥५२॥
[29]प्लुतं परामृतेनैव ध्यायेत्संविद्धचेतसम्[30] ।
ईषत्प्रदक्षिणं नित्यं [31]न मृत्योर्वशमाप्नुयात् ॥५३॥

---

[1] संप्राप्ते — ओ, ग, च; संप्राप्तो — ङ.
[2] प्राप्तः — ओ, ङ, च; प्रोप्ते — ग.
[3] कर्णिकायास्तु — ग.
[4] ०कोलकाकार० — ओ.
[5] ०कारमात्मानं परमेश्वरम् — छ; का. . ध्यानं परमेश्वरम् — ज.
[6] ०मात्मानमलात्मकम् — ओ.
[7] तेजसा — ओ, ग, ङ, छ, ज; ग्रन्थानुस्यूतेरभावादितःपरं ग्रन्थपातः स्यादिति भाति।
[8] निश्चरन्ती — ओ; निश्चिरन्ति — ग; निश्चक्रामन्ती — ङ; निश्चरन्त्यः — च.
[9] सुदीप्ताङ्गो — ओ, ग, ङ, छ, ज.
[10] समप्रभः — ओ, ग, ङ; संनिभाः — च; समप्रभम् — छ, ज.
[11] ०ताग्रविस्पष्टा — ओ, छ, ज; ०ताश्च विस्पष्टाः — च.
[12] विस्पष्टा — ग, ङ.
[13] स्वदेहा मुनि० — ङ; सुदेहा मुनि० — छ; सु. . मुनि० — ज.
[14] ०सत्तमः — ओ.
[15] तादिराकृष्य — छ, ज.
[16] विद्धाग्र० — ओ; विद्धाग्रं — ग, ङ; विद्वाग्रं — छ, ज.
[17] जगदित्थं चरा० — च; जगमेतच्चरा० — छ, ज.
[18] आकृष्ट चेष्टते योगी — ग.
[19] चेष्टते योगी — ओ, ङ; चेष्टत योगि — छ; चेष्टते योगि — ज.
[20] केन — ग.
[21] सूक्ष्मकर्मणा — ओ, ङ; सूत्रवर्त्मना — ग.
[22] यायाद्यभीप्सितं — ओ; यथा यथेप्सिते – ग; यायाद्यभीप्सित० — ङ; यायाद्यदीप्सितं — छ; . . दीप्सितं — ज.
[23] स्वस्वशक्ति० — ङ.
[24] लोमरूपमथो० — ग, ङ, छ, ज; लोमत्रयमथो० — च.
[25] भेदयत्स्थाणु० — ओ, छ.
[26] ०स्थाणुरपि — च.
[27] वज्रचयोप्तम् — ङ; वज्रमयोपमम् — च; वज्रश्चयोपमम् — छ, ज.
[28] ०धवलहृद्व्योम० — ङ, छ, ज.
[29] प्लुतः — ग.
[30] संविद्धचेतसा — ग; संवित्तचेतसम् — छ, ज.
[31] न श्रित्योर्वशिमाप्नु० — छ; न श्रुत्योर्वशिमाप्नु० — ज.

मयूरकण्ठ[1]सदृशं ध्यात्वा [2]संवेश्य चेतसि ।
[3]तिष्ठन्स नियतो [4]योगी [5]योगिभिर्नोप[6]लभ्यते ॥५४॥
बहुनात्र किमुक्तेन [7]यद्यदाकाङ्क्षते क्षितौ ।
[8]तत्तत्सर्वमवाप्नोति [9]ध्यानान्मुनिवरेश्वर ॥५५॥
जित्वा [10]प्राणान्विधानेन [11]कालेन [12]च [13]सदा लयात् ।
[14]क्रीडन्नपि विशेद्योगी [15]शरीराणि सहस्रधा ॥५६॥
[16]स निर्ग[17]च्छत्यनायासाद्वीर्येण पवनात्मना ।
यत्र यत्र [18]लयं सम्यक्प्रकरोति स योगयुक् ॥५७॥
तत्र [19]तत्रेप्सितान्कामान्प्राप्नोति मुनिपुङ्गव ।
[20]यथाग्निर्दारुसंभूतः प्रद्योतयति खेतलम् ॥५८॥
[21]सुसमिद्धेन्धनस्तद्व[22]च्चित्तं योगबलान्वितम् ।
[23]प्रकाशयति विप्रेन्द्र [24]सुसूक्ष्मानपि [25]गोचरान् ॥५९॥

मतङ्ग उवाच —

[26]शिवः सर्वगतः [27]सूक्ष्मो [28]मनसैव सुनिश्चयात् ।
द्रष्टव्यस्तेन [29]सोऽभ्यासात्सर्वत्रैव [30]विजृम्भते ॥६०॥

---

[1] ०सादृश्यं — छ; सा. . . ज.

[2] संसिद्धचेतसि — ओ; संविश्य चेतसि — ग, छ; सा विद्धचेतसि — ङ; संविश्य चेतसी — ज.

[3] निष्कम्पं नियतो — ओ; निष्कम्पनियतो — ग; निष्कम्बं नियतो — ङ; निष्कम्पं नियते — छ; निष्क. . .न्नियते — ज.

[4] योगि० — छ,

[5] योगी भिन्नोप० — ओ.

[6] ०लक्ष्यते — छ, ज.

[7] यद्यतां काङ्क्षते — ङ.

[8] तत्सर्वमवा० — छ; तत्तवर्मवा० — ज.

[9] ध्यात्वा मुनि० — ओ; ध्याता मुनि० — ङ; ध्यानोन्मुनि० — छ, ज.

[10] प्राणं द्विधानेक० – ओ; प्राणद्विधानेन — ङ; प्राणाद्विधानेन — छ; प्रणाद्विजानेन — ज.

[11] कलेन — ङ.

[12] 'च' मातृकायां चकारो नास्ति ।

[13] समाकुलाम् — छ.

[14] विशेद्योगी शरीराणि — ओ, ङ; क्रीडन्त्यधि-विशेद्योगी — च; . . पि विशेद्योगी — छ; . . . तपि विशेद्योगि — ज.

[15] शतशोऽत्र सहस्रधा — ओ; शतशोऽथ सहस्रधा — ङ; शरीरेषु सहस्रधा — च.

[16] निर्गच्छनिरायासपर्येण — ओ; निर्गच्छति च निर्या. . येण — ग; निर्गच्छनिचनाया-सापर्येण — ङ; निर्गच्छति च निर्यासवीर्येण — छ; निर्गच्छति च निर्यासवीर्येणा — ज.

[17] ०च्छति नायासाद्वीर्येणोपचितात्मना — च.

[18] लये — ओ, ङ; लयः — ग; कुलः – छ, ज.

[19] तत्र स्थितान् — ङ.

[20] यथाग्निदारु० — च, छ; दथाग्निदारु० — ज

[21] समिद्धन्धनदं तद्व० — ओ; ससमिद्धे० — ङ.

[22] ०च्चित्तयोग० — च.

[23] प्रकामयति — ओ, ग; प्रक्तामयति — ङ.

[24] सुसूक्ष्ममपि — च.

[25] गोचरात् — ओ, ग, ङ, च.

[26] शिवसर्गगते — छ, ज.

[27] सूक्ष्मा — ओ.

[28] मनसस्तु — च.

[29] साभ्यासात् — ओ, ग, ङ, छ, ज.

[30] पिता भवेत् — ओ, ङ.

[1]मनसस्तु व्यतीतोऽयं [2]भगवान्ध्यायते कथम् ।

परमेश्वर उवाच —

मनसो [3]हीयमानस्य ध्यातुरन्यत्सुनिर्मलम् ॥६१॥
[4]व्यक्तिमायाति विज्ञानं [5]येन जानाति तत्पदम् ।
[6]ध्यातुः सैव परा काष्ठा तत्तेजोद्योतितात्मवान् ॥
[7]दृश्यं दृशा यथादर्शे तथा पश्यति [8]सुव्रत ॥६२॥

[उक्तार्थोपसंहारो वक्ष्यमाणोपक्रमश्च]

[9]उक्तं मया योगविधानमार्गे
चित्रं [10]विभूत्यै [11]ह्यखिलं हि कर्म ।
[12]उद्घातसाध्यं सकलं मुनीन्द्र
[13]यतस्ततोद्घातविधिं प्रवक्ष्ये ॥६३॥

इति श्रीमतङ्गपारमेश्वरे योगपादे कर्मयोगपटलः षष्ठः ॥
षष्ठः पटलः

---

[1] . . . व्यतीतोऽयं — ओ, ङ; . . व्यतीतेयं — ग; मनसः शुद्धयतीत्येवं — च; . . व्यतितोयं — छ, ज.

[2] भगवानध्यासते – ओ, ङ; ०भगवान्ध्यासते — ग; भगवान्साध्यते — च; भगवान्ध्यायेत — छ.

[3] भीयमानस्य साधुरन्यत् — ओ; हि धामासाधारन्यत् — ङ; हियमानस्य ध्यातुरन्यसु० — छ; हियमानस्य ध्या . . सु० — ज.

[4] व्यतिमायाति वि० — ङ; विज्ञानं व्यक्तिमायाति — च.

[5] येन ज्ञानादि तत् — ओ, ङ; यो न जानाति तत् — ग.

[6] ध्यात्वास्यैव — ओ, ङ; धातुः सैव — छ, ज.

[7] दृशे दृशा यथा देशे — ओ, ङ; दृशन्दृशन्यथा द्देशत्तथा — ग; दिशि दुशा यथा देशे — छ; दिशि दु . . यथा देशे — ज.

[8] सुव्रतः — च.

[9] युक्तं — ङ.

[10] विधूत्यै — ङ.

[11] न खला हि कामम् — ओ, ङ; न खलाभि कर्म — ग; न खलाभि मम — छ; न खल . . — ज.

[12] उद्घातसात्व्यः — ओ; उद्घातसाध्यः – ङ; उद्योगसाध्यम् — च; उद्घातसाध्या – छ, ज.

[13] यत . . घातविधिं — छ, ज; ततः उद्घातविधिं, अत्र संधिरार्षः ।

सप्तमः पटलः

उद्घातविधिः

[1]अथोद्घातविधानं[2] ते कीर्तयिष्याम्यनुक्रमात् ।

[उद्घातः[3]]

सम्य[4]ग्वायोर्निरुद्धस्य [5]कोष्ठस्थस्य चलात्मनः ॥१॥

---

[1] अस्मिन्पटले प्रथमश्लोकात्प्रभृति १६ पूर्वार्ध-पर्यन्तो भागः 'छ' मातृकायां न दृश्यते ।

[2] अथोत्थानविधानं — ग.

[3] 'प्राणसंज्ञाधुना शृणु ।
सहस्रद्वियुते षट् च शतानि तदहर्निशम् ॥
एवं कालस्य सूक्ष्मोऽपि अध्यात्मप्रविभावितः ।
निश्वासोच्छ्वासयोगेन ब्रह्मादीनां भवेन्मृतिः ॥
न क्वापि न मृतिस्तस्य शिवस्य परमात्मनः ।
कालक्षेपो भवेद्योगी ज्ञात्वा मृत्युमनामयम् ॥
वञ्चनं शास्त्रदृष्टेन तन्मार्गेणाभ्यसेत्पुनः ।
तत्क्षणोत्क्रान्तियोगेन प्राणत्यागोऽथवा भवेत् ॥
न्यासं कृत्वा तु पूर्वोक्तं प्रदद्यादष्टपुष्पिकाम् ।
शास्त्रोक्तैरष्टभिः पुष्पैर्मानसैः शृणु तद्यथा ॥
वारिजं सौम्यमाग्नेयं वायव्यं पार्थिवं पुनः ।
वानस्पत्यं पुनः षष्ठं प्राजापत्यं च सप्तमम् ॥
अष्टमं शिवपुष्पं तु शृणु तेषां विनिर्णयम् ।
वारिजं सलिलं ज्ञेयं सौम्यं घृतपयोदधि ॥
आग्नेयं धूपदीपाद्यं वायव्यं चन्दनादिकम् ।
पार्थिवं कन्दमूलाख्यं वानस्पत्यं फलादिकम् ॥
प्राजापत्यं यदन्नाद्यं शिवपुष्पं तु वासना ।
इत्येतैरष्टभिः पुष्पैः शिवं संपूजयेत्सदा ॥
पद्मासनात् [ने] परं बीजं यत्परो धारणादितः ।
हृच्छिरो हुंफडन्तं तु योजयेत्पूरकं तथा ॥
कुम्भकं तु ततः कृत्वा कृतमाविश्य तत्पुटम् ।
जिह्वातालुसमायोगात्तत्क्षणोत्क्रमणं भवेत् ॥
तद्बीजाभ्यसनं योगान्मूर्ध्नि भेदे तपो भवेत् ।
परतत्त्वे लयं कृत्वा प्राणत्यागः शुभो मतः ॥
रससिक्तं यथा ताम्रं ताम्रभावाद्विमुच्यते ।
सुवर्णेन तु हेमत्वं गतं तज्जातिहेमवत् ॥
ज्ञानविद्धः स तद्वच्च पशुभावाद्विमुच्यते ।
शिवेनैव सहैकत्वं गतं तत्त्वं तु तत्समम् ।'
(किरणे योग० २.२४उ०–३८पू०);
'ऊर्ध्वं घातो वायोः उद्घातः द्वादशान्तं यावन्नादवृत्त्या प्रेरणम् । यदुक्तं त्रयोदशशतिके —
'प्राणेनोच्चार्यमाणेन अपानः पीड्यते यदा ।
गत्वा चोर्ध्वं निवर्तेत एतदुद्घातलक्षणम्' । इति' (सार्धत्रिशतिकलोत्तरे (२.३उ० ४पू० वृत्तिः)
'रेचकस्तु —'
'मुञ्चेद्वायुं ततश्चोर्ध्वं श्वासेनैकेन योगवित् ।
निश्वासयोगयुक्तस्तु यावदूर्ध्वं स रेचयेत् ॥
रेचकस्त्वेष विख्यातः प्राणसंशयकारकः ।'
'हृदयपुण्डरीकादूर्ध्वं नासिकापुटेन वायोःप्रेरणं रेचकः । स च प्राणसंशयकारक इति शरीरे तद्विच्छेदः उत्क्रान्तिवत् । तथा हि —
'यत्तद्धृदि सदा पद्मधोमुखमवस्थितम् ।
विकसत्येतदूर्ध्वं तु पूरकेण तु पूरितम् ॥
ऊर्ध्वस्रोतो भवेत्पद्मं कुम्भकेन निरोधितम् ।
रेचकेन तथा क्षिप्तं सद्यः प्राणहरेण तु ॥
मुक्त्वा हृदयपद्मं तु ऊर्ध्वस्रोतो व्यवस्थितम् ।
रेचितो गच्छति ह्यर्ध्वं ग्रन्थिं भित्त्वा क्षणेन च ॥
भित्त्वा कपालद्वारे तु जीवो ह्यूर्ध्वं तु रेचितः ।
'सदाशिवपदं गत्वा न भूयो जन्मचाप्नुयात् ॥'
सर्वदा अधोमुखमविकसितमेव पूरकेण तद् विकासं समायाति । विकसितं च कुम्भकेन निरोधमेति । रेचकेन तु प्राणहरेण अभ्यासतो मध्यनाडीवर्तिना यदा रेचितं भवति, तत ऊर्ध्वत्वमायातीत्युक्तं प्राक् । तदा जीवः तथाभूतेन रेचकेन च स्वसंबन्धिना रेचितः, हंसवत् हृत्पद्मं परित्यज्य, हृदयग्रन्थिं भित्त्वा, मध्येन ऊर्ध्वं

[१]प्रधावतोर्ध्वं [२]यातस्य [३]स्वभावेनात्मवर्तिना ।
[४]ब्रह्मरन्ध्राब्जसंप्राप्तिः[५] शनैराकृष्य [६]धारणात् ॥२॥
[७]वितत्य कुक्षि[८]विवरे [९]नाभौ [१०]विक्षिप्य लेशतः ।
ऊर्ध्वमाघात[११]धर्मित्वात्साटोपाद्ग्रन्थिभेदनात्[१२] ॥३॥
[१३]उद्घाटनाच्च [१४]ग्रन्थीनामुद्घातः परिभाष्यते ।
योगे युक्तस्तु[१५] सर्वाणि [१६]कर्माण्यस्मिन्करोति हि[१७] ॥४॥
[१८]सोपकाराय विप्रेन्द्र [१९]सिद्ध्यै [२०]योगयुजः सदा ।
[२१]तल्लयोर्जितवीर्येण [२२]समभ्यस्य मुहुर्मुहुः ॥५॥
येनात्मवशगेनासौ प्राप्नोति फलमीप्सितम्[२३] ।

कपालद्वारं ब्रह्मरन्ध्रं निर्भिद्य सदाशिवपदं यातीत्युक्तैवोत्क्रान्तिरिति ॥'
(सार्धत्रिशतिकालोत्तरे ११, १४–१९ श्लोकाः वृत्तिश्च).

[४] ०ग्वायुनि० — ओ, ङ; ०ग्वायोर्वि० — च; ०ग्विधोन्निरु० — ज.

[५] कोष्ठस्तस्याचलात्मनः — ग, ङ; काष्ठस्तस्यानलात्मनः — च; कोष्टस्तस्याचलात्मनः — ज.

[१] प्रधावतोध्ययं क्तस्य — ङ; प्रधानतोऽर्ध्वं यत्तस्य — च; प्रधावतो यतस्तस्य — ज; प्रधावत ऊर्ध्वं; अत्र संधिरार्षः ।

[२] यत्तस्य — ओ, ग.

[३] प्रभावेनात्म० — च.

[४] ब्रह्मरन्ध्राच्च — ङ.

[५] ०संप्राप्तः — ओ, ग, ङ, ज; ०संप्राप्ता — च.

[६] धारणा — ग, ज.

[७] वितन्यन्नक्षि० — ग; वितस्यन्नक्षि० — 'ग' पाठान्तरम् ।

[८] ०विचरे — ङ.

[९] नाभें — ओ; नभो — ङ.

[१०] निक्षिप्य — च.

[११] ०धर्मित्वा सा गोपा ग्रन्थि० — ग; ०धर्मीथात्साटोपा ग्रन्धि० — ज.

[१२] ०भेदना — ङ; ०देवनात् — च.

[१३] उद्घाग्रनाय — ग; उद्घाटनाश्च — ङ.

[१४] ग्रसिनामु० — ङ.

[१५] योगयुक्तेन — च.

[१६] कार्याण्य० — च.

[१७] 'करोति हि' इत्यारभ्य षष्ठश्लोके पूर्वार्धे 'प्राप्नोति' इत्यन्तो भागो 'ङ' मातृकायां लुप्तः ।

[१८] सोपकाराणि — च; 'सः उपकाराय' अत्र 'सोऽचि लोपे चेत्पादपूरणम्' (पा० सू० ६. १. १३४) इति सुलोपः, ततो गुणसंधिः ।

[१९] शीलैर्योग० — ओ.

[२०] योगयाज सदा — ग; यागयुजा सदा — च.

[२१] तल्लयार्जित० — ओ; तल्लवोझित० — ज.

[२२] समभ्यर्च्य — ओ; समभ्यस्यो — ग; समभ्यासो — ज.

[२३] ०मीप्सितः — ग.

[[१]पुरसंक्रमणम्]

[२]पुरसंक्रमणे न्यायो [३]योऽधुना ते मयोच्यते ॥६॥
[४]सोऽप्युद्घातवशात्क्षिप्रं [५]सिध्यते नान्यथा मुने ।
[६]जितोद्घातः प्रसन्नात्मा [७]योगी लब्धसमाधिकः[८] ॥७॥
[९]प्राणानाकृष्य विधिवत्कर्णिकायां[१०] विधारयेत्[११] ।
[१२]अधोर्ध्वं नियतो भूत्वा समाकृष्य शनैः शनैः ॥८॥
अधि[१३]ष्ठातृपदान्येभ्यो विसृतेभ्यः पृथक् पृथक् ।
भौतिकेभ्यो[१४]ऽतिरिक्तेभ्यः[१५] स्थूलसूक्ष्मा[१६]त्मकानि च[१७] ॥९॥

---

[१] 'ऊरुस्थोत्तानचरणः सव्ये न्यस्योत्तरं करम् ।
उत्तानं किंचिदुन्नाम्य मुखं विष्टभ्य चोरसा ॥
निमीलिताक्षः सत्त्वस्थो दन्तैर्दन्तानसंस्पृशन् ।
तालुस्थाचलजिह्वश्च संवृतास्यः सुनिश्चलः ॥
संनिरुद्धयेन्द्रियग्रामं नातिनीचोच्छ्रितासनः ।
द्विगुणं त्रिगुणं वापि प्राणायाममुपक्रमेत् ॥
ततो ध्येयः स्थितो योऽसौ हृदये दीपवत्प्रभुः ।
धारयेत्तत्र चात्मानं धारणां धारयन्बुधः ॥
अन्तर्धानं स्मृतिः कान्तिर्दृष्टिः श्रोत्रज्ञता तथा ।
निजं शरीरमुत्सृज्य परकायप्रवेशनम् ॥
अर्थानां छन्दतः सृष्टिर्योगसिद्धेर्हि लक्षणम् ।
सिद्धे योगे त्यजन्देहममृतत्वाय कल्पते ॥'
(याज्ञवल्क्यस्मृतिः ३.४.१९८-२०३);
'महासेनोऽति बुद्धिमान् ।
प्राह तं तङ्गणसुतं प्रणम्य च कृताञ्जलिः ॥
मुनिपुत्र प्रियं मेऽद्य करोषि यदि सत्यतः ।
त्वत्पितुस्तेऽद्य वाञ्छामि समाधेर्व्युत्थितस्य वै ॥
सह संभाषणं किंचिदेतदत्यन्तवाञ्छितम् ।
अनुकम्प्यो यद्यहं ते द्रुतमेतत्प्रसाधय ॥
श्रुत्वैतद्वचनं राज्ञः प्राह तापसजः पुनः ।
राजन्नसाध्यं ह्येतत्ते वाञ्छितं सर्वथा भवेत् ॥
तथापि ते करोमीति प्रतिश्रुत्यान्यथा कथम् ।
ब्रवीमि भूयस्तत्किंचित्प्रतीक्षस्वाभियाचितः ॥
मुहूर्तमात्रं मे पश्य सामर्थ्यं योगसंभवम् ।
एष मेऽद्य गुरुः शान्तपदे परमपावने ॥
संस्थितस्तं बाह्ययत्नैरपि को वै प्रबोधयेत् ।
पश्याहं बोधयाम्येनं योगयुक्त्यैव सूक्ष्मया ॥
इत्युक्त्वाथ समाविश्य समाहृत्येन्द्रियाण्यलम् ।
प्राणेऽपानं सुसंयोज्य मुख्यप्राणेन निर्गतः ॥
देहं पितुः प्रविश्याशु प्रलीनं तस्य मानसम् ।
बोधयामास चाकृष्य प्रबोध्याशु विनिर्गतः ॥
देहं स्वमाविशद्यावत्तावत्स बुबुधे मुनिः ।
अपश्यदग्रगं भूपं स्तुवन्तं प्रणतं तदा ॥
किमेतदिति संचिन्त्य सर्वं योगदृशाविदत् ।'
(त्रिपुरारहस्ये ज्ञानखण्डे १२.३६उ०–४६)

[२] पुरः संक्रमण० — ओ; पूरसंक्रमणे — ग; पुरसंक्रमणो — ङ, ज.

[३] यो ध्यानो ते — ओ; यो ध्यानो मयो० — ङ; मधुना ते मधो० — ज.

[४] साप्युद्घातवशी क्षिप्रं — ओ; साप्यत्पातवशात्क्षिप्रं — ङ.

[५] न सिद्धचते नान्यथा — ङ; साध्यते नान्यथा–च.

[६] जिघोद्धातः – ओ, ङ; जितोद्घातप्र० – ग, ज.

[७] . . . गोः । — ओ; योगिलब्धः समायिना–ज.

[८] ०समाधिगः — ग; ०सनामिगः — ङ.

[९] प्राणिनाकृष्य — ओ.

[१०] किर्णिकानां — ज.

[११] विधार्यते — ग.

[१२] अधोर्ध्वनियतो — ओ, ग, ङ; . . . यको — ज; अधः + ऊर्ध्वं = अध ऊर्ध्वं; ततः संधिरार्षः ।

[१३] ०ष्ठातृपदे नेव्यो वि० — ओ; ०ष्ठातृपदेऽन्येभ्यो वि० — ग; ०ष्ठातृपदेप्यो वि० — ङ; ०ष्ठात्रपदेऽन्योन्यविसृतेभिः — ज.

[१४] ०ऽतिरिक्तेभ्यो स्थूलं . . . त्मकानि — ओ; ०तिरिक्तेभ्यो स्थूल० — ङ.

[१५] स्थूलेभ्योऽक्षात्मकानि — च.

[१६] ०त्मकान्य तु — ज.

[१७] तु —ओ, ग, ङ.

स्वाधिष्ठान[1]विशेषेण योगशक्त्या विगृह्य तु ।
स्वात्मन्येवात्मसंस्थानि [2]कर्तव्यान्युचितं यतः ॥१०॥
स्वाभिमानपदं विप्र [3]तत्स्थः सोऽप्यतिभावितः[4] ।
लीलयैव [5]विनिष्क्रम्य क्रीडयित्वा च भूरिशः ॥११॥
भूयो[6]ऽप्यात्मतनौ योगी [7]प्रविशत्यविशङ्कितः ।

मतङ्ग उवाच —

[8]योगक्रमः स [9]वक्तव्यो [10]विस्पष्टोक्तिनिदर्शनात् ॥१२॥
येन [11]योगयुजो नाथ [12]पन्था निर्मलतां व्रजेत् ।

परमेश्वर उवाच —

[13]कृते बीजे फले पुष्पे प्रदीपे वा मनोरमे ॥१३॥
पूर्ववत्प्रकटीकृत्य[14] लक्ष्ये[15] संधाय चेतनम्[16] ।
[17]प्रोद्घातैर्बहुभिर्जित्वा [18]बहुलक्षं समाविशेत् ॥१४॥
[19]यावत्तत्स्पन्दते ताव[20]द्बीजाद्यं तदधिष्ठितम् ।
दिव्येन चक्षुषा ध्यात्वा [21]देहं जानात्यसंशयम्[22] ॥१५॥
[23]मदीयमित्यनायासं भूयोऽप्येवमतन्द्रितः ।
[24]शक्नोति गन्तुमागन्तुं [25]भूयो भूयोऽनिवारितः[26] ॥१६॥
[27]ततः स्वात्मबलं ज्ञात्वा [28]संसिद्धः स्मरणोद्यमी ।

---

[1] ०विशिष्टेभ्यो–ओ, ग, ङ, च; ०विशेषेभ्यो–ज.

[2] कर्तव्यानुचितं – ओ, ङ; कर्तव्या रचितां – ज.

[3] तत्स्थः सोह्यति० — ओ; तत्स्थ सो ह्यति — ङ; तत्स्कः सोऽप्यति — च; तत्स्थः सोऽभ्यति — ज.

[4] ०भासितः — ङ.

[5] निनिष्क्रम्य — च.

[6] ०प्यात्मन्तनौर्योगी — ओ; ०प्यात्मन्तनो योगी — ङ.

[7] प्रविशेत न शङ्कितः — ओ, ग, ङ; प्रविशेत न शाकितः — ज.

[8] योऽनुक्रमः — ओ, ङ; योऽनुक्रमस्य व०–ग, ज.

[9] पत्तव्यो — ङ.

[10] विस्पष्टोऽग्निनि० — ओ, ङ.

[11] योगयुजा नाथ — ओ, ग, ङ, ज.

[12] पण्डा — ओ; पथा — ग, ज; पन्धा — ङ.

[13] कृतं —ओ, ग; कृतौ — ङ, ज; कृतो — च.

[14] सरलीकृत्य — ओ, ङ; सकलीकृत्यं — ग, ज.

[15] लक्षे — ओ, ग, ङ, ज.

[16] चेतसम् — ओ, ङ, ज; चेतसः — ग.

[17] प्राद्घातैर्ब० — ओ; प्रोद्घाते ब० — ज.

[18] बहिर्लक्षं — च.

[19] यावन्तं संस्वते — ओ; यौवन्तं संस्वते — ङ; यावन्न स्यन्दते — च; यावत्तत्स्पन्दने — ज.

[20] ०द्बीजाद्यावदधि० – ओ, ङ; द्बीजा ह्यावदधि० — ग; द्बीजन्यावदधि० — ज.

[21] देहाञ्जानात्यसंशयः — ओ; देहोञ्जानात्यसंशयः — ङ.

[22] ०त्यसंशयः — ग; ०त्यसंशया — ज.

[23] मदीयमप्यना० — च.

[24] १६ उत्तरार्धं १७ श्लोकश्च 'ङ' मातृकायां न दृश्येते ।; शक्तोऽतिगन्तु० – ओ, ग; शक्नोमि गन्तु० — छ, ज.

[25] प्रयो भूयो निवारिताः — छ, ज.

[26] ०ऽनिवारिताः — च.

[27] तत्त्वात्मबल संज्ञात्वा — ओ; तत स्वार्थबलं ज्ञात्वा — ज.

[28] समद्धस्मरणो० — ओ, समिधस्मरणो० — ग, ज; समिद्धस्मरणो० — छ.

[१]नत्वा देवं विभुं शान्तं प्राणायामादिभिः शनैः ॥१७॥
[२]संशोध्यादौ [३]शरीरं स्वं पश्चाद्ध्यानं समारभेत् ।
[४]लक्ष्यदृक् [५]प्राप्तसामर्थ्यो योगयुग्वायुमुल्बणम्[६] ॥१८॥
[७]शनैर्विमोचयेत्सूक्ष्मं [८]लोमकूपेन युक्तितः ।
नासाग्र[९]रन्ध्रयोर्मध्ये समुत्थेनान्यथा मुने ॥१९॥
व्याधिभिः पीड्यते [१०]गाढं विमुञ्चन्मुच्यते रुजः ।
ततः [११]शवं [१२]समादेयं निर्व्रणं प्रयतः सुधीः ॥२०॥
पशुपक्षि[१३]मृगाद्यं वा [१४]धारणाभिर्विशोध्य तु ।
कृत्वा [१५]संभवतो [१६]वाथ [१७]गन्धादिभिरलंकृतम्[१८] ॥२१॥
[१९]न चैवात्यन्तशौचादेर्यत्नश्चात्रोपयुज्यते ।
[२०]योक्तुः [२१]प्राणजया[२२]त्सर्वं [२३]प्रसिध्यत्यविचारितम् ॥२२॥
[२४]मनोजयाच्च [२५]विमलाद्विवेकाच्चातिसंस्फुटात्[२६] ।
न [२७]चावज्ञा तु शौचाय युक्तिरेव गरीयसी ॥२३॥

---

[१] हुत्वा — ओ, ग, भुक्त्वा — छ, ज.
[२] संशोध्यतौ — ओ, ङ; विशोध्यादौ — ग.
[३] शरीरस्थं — छ, ज.
[४] लक्षदृक् — ओ, ग, ङ; लक्षधृक् — छ, ज.
[५] प्रसमर्थो ये — ओ; प्रसमर्थो — ङ.
[६] वायुमुद्वणम् — ओ, ङ; वायुमुल्बणाम् – ग; वायुमुत्बणाम् — 'ग' पाठान्तरम्; वाममुद्वणम् — छ, ज.
[७] शनैर्विमोक्षयेत् — ज.
[८] लोमरूपेण — ओ, ङ; लोमकूपेषु — च; लोमरूपेन — छ, ज.
[९] ०मध्ययोर्मर्ध्ये — ग; ०राध्रयेन्मध्ये — ङ.
[१०] वाथ मुमोचं मुच्यते कुजः — ओ; वाथ मुमोच मुमोचन्मुच्यते रुजा — ग; वाथ मुमोच मुच्यते कजः — ङ; वाथ मुमोच मुच्यते रुजा — छ, ज.
[११] शैवं — ओ, ङ; सर्वं — च; शिवं — छ, ज.
[१२] स . . . निर्वाणं प्र० — ओ; समादाय निर्व्यूहत्प्र० — ग; समादाय निर्वणं प्र० — ङ; सदा निर्घृणः प्र० — छ; सदा य निर्घृणः प्र० — ज.
[१३] ०मृगाद्या वा — ग.
[१४] धायरणाभिर्विशोध्य — छ, ज.
[१५] संभवती — ओ; संवाहतो — छ, ज.
[१६] वापि — च.
[१७] गर्थाभिरलं० — ङ.
[१८] ०कृतः — ओ, च.
[१९] . . ौ . . त्यन्तशैवादे यत्तं चात्रोप० — ओ; . . न्त्यन्तशौचा ते यत्तं चात्रोप० — ङ; न चैवातीव शौचाद्यैर्यत्नश्चैवोप युते — च; न चैवाद्यन्तशौचादेर्यज्ञश्चात्रोप० — छ, ज.
[२०] योक्तुं — ज.
[२१] प्रमाणजयात् — ओ; प्राणाजयात् — ग; प्राणजुयात् — छ, ज.
[२२] सर्षप्रसिद्धचर्थविचार . . — ओ; सर्षप्रसिध्यर्थ-विचार . . — ङ;
[२३] प्रसिद्धचत्यविचारितः — च; प्रसिध्यत विचारतः — छ, ज.
[२४] नमोजयाच्च — ङ.
[२५] विमला विवेकाच्चाति० — ओ, ग; विमला विवेके चादि० — ङ; विमलाद्विवेकाच्चापि — च; विमलान् विवेकाच्चाति — छ, ज.
[२६] ०संस्फुरात् — ओ, ङ; संस्पुरात् — ग; सस्फुटान् — छ, ज.
[२७] चाव . . न शौचाय — ग; चावज्ञानुशौचाय — च.

शङ्खकुन्देन्दु[1]धवलं [2]हृद्ग्रन्थिविवराश्रितम्[3] ।
[4]चतुष्कलमसंदिग्धं पुर्यष्टकसमन्वितम् ॥२४॥
ईश्वराधिष्ठितं [5]दिव्यं [6]सुसंज्ञमजुगुप्सितम् ।
[7]निर्विशङ्कः प्रसन्नात्मा शनैराकृष्य वेगवान् ॥२५॥
[8]ध्यात्वा तद्धृदयं सम्यग्विशे[9]न्नासापुटेन तु ।
[10]अन्येन [11]वा [12]जितप्राणः [13]स्रोतसा साधकोत्तमः[14] ॥२६॥
[15]लोमकूपेन [16]वा क्षिप्रं [17]सुसूक्ष्मेणातिशोभिना ।
यतः सर्वाणि [18]हृद्देशात्प्रादुर्भूतान्यनेकधा ॥२७॥
स्रोतांसि तेन [19]नात्यन्तं [20]नियमोऽत्र [21]प्रकीर्तितः ।
गत्वा [22]तद्धृदयं [23]योगी स्वेषु स्वेषु विनिक्षिपेत् ॥२८॥
स्थानेषु स्थानमूलानि ततस्तेजः परं स्मरेत् ।
तेनापूर्य जगत्सर्वं तिष्ठेत्संयम्य [24]मारुतम् ॥२९॥
[25]स्वाक्षवृत्तिषु सर्वासु द्वाराणि परिशोधयेत् ।
[26]पूर्ववत्सर्वभूतानि निबिडं [27]दीप्तिमत्स्फुटम् ॥३०॥
[28]अहमित्रत्ययोपेतं [29]वीर्यमध्यवसायजम् ।

---

[1] ०धवला — ओ; धवलां — छ, ज.

[2] हृद्ग्रन्धिविवरा० — च; हृद्ग्रन्धिवि . . राश्रि . . — ज.

[3] ०विपराश्रितम् — ङ.

[4] चतुष्कलसमं दीर्घपुर्यष्ट० — ओ; चतुष्कलसमं दीर्घं पुर्यष्ट० — ग, ङ; चतुष्कमलसंदिग्धं पुर्यष्टं – छ; चतुष्कमलवन्तिर्गं पुर्यष्ट० — ज.

[5] दिव्यमसंज्ञ० — छ, ज.

[6] सुस . . जुगु० — ओ; स्वसंज्ञमजुगु० — च.

[7] निर्विशङ्कप्रसन्नात्मा — ओ; निर्विशङ्कप्रसिद्धात्मा — ज.

[8] ध्यात्वा हृदयं — ङ.

[9] ०न्नासपुटेन — छ, ज.

[10] . . न — ओ; अनेन — ग, ङ.

[11] योजितः प्राणस्रोतसा — छ, ज.

[12] जितः प्राणः — ओ, ङ.

[13] सोयसा — ओ; सोऽथ सा — ङ.

[14] ०कोत्तमम् — ज.

[15] लोमरूपेण — ओ, ङ; रोमरूपेण — छ, ज.

[16] वा विप्र — ओ, ग, ङ, छ, ज.

[17] सुसूनातीवशोभना — ओ; सुसूक्ष्मेणातिशोभना — ग; सुसूनातिशोभिना — ङ; सुसूक्ष्माणातिशोभिना — ज.

[18] हृद्देशा प्रातर्भूता० — ङ.

[19] "नात्यन्तं" इत्यारभ्य २९ श्लोके प्रथमपादे "स्थानेषु स्थान" इत्यन्तो भागः 'छ' मातृकायां लुप्तः ।; नासत्यं — ओ, ङ; नान्यत्तं — च; नात्यंत तु — ज.

[20] नियतोऽत्र — ज.

[21] प्रकीर्तिता — ओ, ज.

[22] तु हृदयं — ङ; त तु हृदयं — ज.

[23] योगि — ज.

[24] मारुतः — ग.

[25] स्वाक्षवृत्तिसु — ओ; साक्षवृत्तिषु — छ, ज.

[26] पूर्वं च सर्वं — ओ; पूर्ववत्सर्वपीतस्तन्निबिडं — ग; पूर्वसर्वभतन्निन्निबिडन्ति — ङ; पूर्ववत्सर्वपीतं तु निबिडं — च; पूर्ववत्सर्वपीतं निबिडं — छ, ज.

[27] दीप्त . . . — ओ; दीप्तमद्भुतम् — ग, ङ; लिप्तमद्भुतम् — छ; नीपमद्भुतम् – ज.

[28] अहमितप्रत्य०–ओ, ङ, च; अहमिति प्रत्य०–ग.

[29] वीर्यमध्यं वसायजम् — ओ; वीरमध्यं वसायजम् — ङ; वीर्यमद्यवसायजम् — च.

[1]शवस्याङ्गानि सर्वाणि [2]वशीकृत्य ततः सुधीः ॥३१॥
[3]पूर्वोक्तमासनं [4]बद्ध्वा [5]धारणां [6]धारयेत्क्रमात् ।
[7]ततोऽन्तःकरणं [8]मन्त्रैः कर्तव्यं बहिरेव च ॥३२॥
[9]येनाप्रतिहता शक्तिर्विचरेत्स्वेच्छया[10] क्षितौ ।
एवं [11]शवशरीराणि शतशोऽथ [12]सहस्रशः ॥३३॥
संत्यज्य [13]प्रविशेच्चापि [14]क्रीडत्यभ्रष्टयौवनः ।
स्वेच्छायुः [15]कामरूपी स्याच्छापानुग्रहकृत्तथा[16] ॥३४॥

[मृत्युभयनिवारणमापन्निवर्तनं च]

शब्दरूप[17]रसादीनामर्थानां [18]स्वविपर्ययात् ।
[19]धातुविप्रतिपत्तेर्वा [20]स्मृतेर्वापि [21]प्रहाणतः ॥३५॥
अना[22]दराद्वा [23]बालस्य [24]द्युतेर्हानाच्च सुव्रत ।
भूमेः[25] प्रध्वंसनाद्वाथ[26] प्रवाहैश्चापि वेष्टनात्[27] ॥३६॥

---

[1] शिवस्याङ्गानि–ओ, ङ, छ, ज; सर्वस्याङ्गानि–च.
[2] वशीकृत ततः — ग.
[3] पूर्वोक्तवासनं — ङ.
[4] कृत्वा — छ, ज.
[5] धारणाद्धारये० — ङ.
[6] धारणात्मिकाम् — च; धारयेत्सुधीः — छ, ज.
[7] ततोर्ध्वः करणं — ओ, ततोऽन्तरेण — ग; ततोद्धः कारणं — ङ; क्रमात्ततोऽन्तकरणं कर्तव्यं — छ, ज.
[8] मन्त्री — ओ, ग; मद्री — ङ; मन्त्रैर्वर्तव्यं — च.
[9] येनाप्रविहतः शक्ति० — ओ; येनाप्रतिहतः शक्ति० — ङ; येषां प्रतिहता शक्ति० — च; येनाप्रतिहतं शक्ति० — छ, ज.
[10] विवरे स्वेच्छया — ग.
[11] शिवशरीराणि — ओ; शतशरीराणि — छ, ज.
[12] सहस्रधा — ओ, ङ, छ.
[13] प्रविशेद्वापि — ओ, ङ, छ, ज; प्रविशन्वापि — ग.
[14] क्रीडत्यक्लिष्टयौवनम् — ओ, क्रीडन्तो हृष्टयौवनाः — ग; क्रीडत्यश्रिष्टयौवनम् — ङ; क्रीडते हृष्टयौवनः — छ, ज.
[15] कामरूपः — च.
[16] ०कृत्तया — ङ; ०कृत्सदा — च.
[17] ०रसादीनामत्वना स्व० — ग.
[18] स्वाविपर्ययः — ओ, ग; स्वाविपर्ययात् —ङ; स्वपिपर्ययात् — ज.
[19] . . र्वप्रतिपत्तेर्वा — ओ; धातुर्विप्रतिपत्तेर्वा — ग, ङ; धातुर्विप्रपतेर्वापि — छ, ज.
[20] स्मृतेर्वा विप्रहाणतः — ग; समृतेर्वापिहारतः — छ, ज.
[21] प्रमाणतः — ङ.
[22] ०दराद्वालास्याद्वा द्युतो र्भानोश्च सु० — ओ; ०दराद्वा बालद्युतेर्हानाच्च सु० — ग; ०दराद्वालस्यादुतो भानाश्च सु० — ङ.
[23] लक्ष्यस्य — च.
[24] द्यूते हानाच्च — च; द्वितेर्हानाच्च — छ, ज.
[25] प्रभूमैः — ओ, ङ.
[26] प्रध्वंसना वाथ — ङ; प्रध्वंसनत्वाच्च — च.
[27] प्रवाहश्चाविचेष्टना — ओ; प्रवाहश्चापि वेष्टना — ग; प्रवाहाश्च विवेष्टना — ङ; प्रवाहस्याप्यचेष्टनात् — च; वाहश्चापि विशेषणात् — छ; वान्हश्चापि विशेषणात् — ज.

बाह्यलिङ्ग[1]विपर्यासादनिमित्ताच्च [2]सस्फुरात् ।
अकस्माच्चित्त[3]विक्षोभाद्वाह्यारिष्टनिदर्शनात् ॥३७॥
[4]हृत्पद्मकर्णिकारूढो[5] ध्यायेत्पूर्णेन्दुनिर्मलम्[6] ।
[7]क्षीराम्भःपरि[8]शुद्धेन्दु[9]मण्डलं चामृत[10]स्रवम् ॥३८॥
[11]भ्रमन्समभ्यसेद्विद्वान्[12]हृच्चक्रपरिवर्तनात् ।
[13]मुहूर्तमेकं संतिष्ठन्योगी मृत्युभयं त्यजेत् ॥३९॥
[14]तच्चैवाभ्यसतो नित्यं [15]योगिनस्तल्लयात्मनः ।
[16]नापत्संजायते [17]स्वल्पा [18]मयोक्तं निश्चितं [19]वचः ॥४०॥

[[20]विरक्तस्य देहत्यागविधिः, शिवपदप्राप्तिश्च]

[21]विरक्तो वा [22]त्यजेद्देहं[23] [24]तस्याप्येष विधिः स्मृतः ।
किं तु [25]हृद्विवरात्सर्वमाकृष्यास्त्रेण [26]पण्डितः ॥४१॥

---

[1] ०विपर्यासादनिमित्तश्च — ओ, ङ; विपर्यासा अनिमित्ताच्च — ग; विपर्यासादनिमित्ता च — च.

[2] सस्पुरा — ओ; सस्फुरा — ग, ङ.

[3] ०विक्षेपाद्वाह्यानिष्ट० — ओ, ङ; संक्षोभाद्वाह्यारिष्ट — च.

[4] हृत्पद्मे कर्णि० — ग.

[5] ०रूढं — च.

[6] ०पूर्णेन्दुमण्डलम् — च; ०पूर्वेषु मण्डले—छ, ज.

[7] क्षीराम्भोपरि — ओ, ग, ङ, छ, ज.

[8] ०शुद्धन्द्रमण्डलं — ङ; ०शुद्धेन्दुमण्डले — च.

[9] ०मण्डला छामृतस्रविट् — छ, ज.

[10] ०स्रवत् —च.

[11] भ्रमद्भ्यस्मभ्यसेद्विद्वान् —ओ; भ्रमत् समभ्यसेत्विवा — ग; भ्रमत्समभ्यसेद्विद्वान् — ङ, च, छ, ज.

[12] भचक्र० — च.

[13] मुहूर्तमेकः — ङ.

[14] तद्वै वाभ्यसतो — ओ; तच्चैवाभ्यसनो — ग; तच्चैवाभ्यासतो — ङ; तदैवाभ्यासकरो नि० — छ; तद् वैवाभ्यासकरो नि० — ज.

[15] योगीस्तल्लयमात्मनः — ओ, ङ; योऽग्निस्तल्लयमात्मनः — ग; योगितल्लज्जयात्मनः — छ; योगिवल्लज्जयात्मनः — ज.

[16] तावत्संजायते — ओ; तावत्संजाते — ङ; नापत्संधायते — ज.

[17] स्वल्पप्रत्युक्तं — ओ.

[18] प्रीत्युक्तं — ग, ङ, छ, ज.

[19] मनः — च.

[20] एतद्विषये रौरवे विद्या० पटलो '९' द्रष्टव्यः ।; 'अथात्मनो वधं मन्त्री न कुर्यात्फलवाञ्छया । न च दुःखसमुत्पत्तौ कामतो देहमुत्सृजेत् ॥ यदि निर्वेदमापन्नोऽप्राप्तभोगोऽथवा ततः । ध्यानधारणयोगेन शिवलीनमनास्त्यजेत् ॥' (स्वायम्भुवे ३१.१.२).

[21] विरक्तेन वा — छ.

[22] भवेद्देहं — च.

[23] विरक्तोऽन्त त्यजेद्देहः — ओ; विरक्तोन्त्यजेद्देहाः — ङ.

[24] तस्याप्येषो विधिः — ओ, ग, ङ; तस्याप्येष्टविधिः — ज.

[25] कृद्विवराः सर्प . . स्त्रेण — ओ; कृद्विवराः सर्वमारूष्यास्त्रेण — ङ; हृद्विवरं सर्वं — ग; हृद्विचरात्सर्वं — छ, ज.

[26] पीडितः — च.

[1]छित्वा छित्वा शनैः सर्वं क्रमाद्वै ग्रन्थिसंचयम्[2]।
[3]प्रदीप्तकिरणं ध्यायेद्धृदि सूर्यस्य मण्डलम्[4] ॥४२॥
[5]तन्मध्ये मण्डलं [6]चारु शशाङ्कस्यामितद्युतेः[7]।
सोममण्डलमध्यस्थं ध्यायेद्वह्नेस्तु मण्डलम् ॥४३॥
वह्निमण्डल[8]मध्यस्था [9]शिखा सूर्यायुतप्रभा[10]।
[11]सुसूक्ष्मा पद्म[12]सूत्राभा [13]ऋजुमार्गानुसारिणी[14] ॥४४॥
[15]ध्यातव्या योग[16]मार्गे[17]ऽस्मिन्न्यस्यां [18]लीनस्य योगिनः।
[19]क्रमतो निर्वि[20]शङ्कस्य [21]बाधो नैवोपजायते ॥४५॥
[22]तालुदेशं [23]विभिद्याशु [24]जिह्वाग्रं परिवर्त्य च।
[25]पश्यंस्तुर्यपदा[26]दूर्ध्वं [27]तेजः परम[28]दुर्जयम् ॥४६॥
[29]यावत्तुर्यपदद्वारि [30]विलग्नामर्गलां शनैः।
[31]अस्त्रेणोद्घाटच [32]विस्रब्धो यतत्पदमनामयम् ॥४७॥
[33]अव्यापारगुणोपेतमनौपम्यमतीन्द्रियम्।
[34]सर्वज्ञममलं शान्तं शिवं यात्युत्तमं पदम् ॥४८॥

---

[1] छित्वा शिवास्त्रेण सर्पाः क्रमाद्वा — ओ; छित्वा शिवास्त्रेण सर्वान्क्रमाद्वा — ग; श्छित्रशिवास्त्रेण सर्वाः क्रमाद्वा ङ; छित्वा शिवेन सूत्रेण सर्वमाग्रन्थि० — छ; छिन्नाभिधेन सूत्रेण सर्वमाग्रन्थिः — ज.

[2] ०संचयात् —ओ, ग, छ, ज; ग्रन्थसंचयात्–ङ.

[3] प्रतप्तकरणं — ज.

[4] ०द्धृदि वै सूर्यमण्डलाम् — ग; सूर्यमण्डलम्–ङ.

[5] न मध्ये — ग.

[6] चारुः — ङ.

[7] ०द्युते — ङ; ०द्विते: — छ, ज.

[8] ०मध्यस्थं — ओ, ङ; ०मध्यस्थ० — छ, ज.

[9] शिखाः सूर्या० — च; शिखसूर्या० — छ, ज.

[10] ०प्रभम् — ओ; ०प्रभाः — च.

[11] ससूक्ष्मा — ओ, ङ; सुसूक्ष्मपद्म ० — च.

[12] ०सूक्ष्माणि — ओ, ङ; ०सूत्राणि — ग, ज; ०सूत्राभि — च.

[13] ऋतुमार्गा० — च.

[14] ०सारिणि — च, छ.

[15] ध्यातव्यो — ओ, ङ.

[16] ०मार्गेसन्यस्यां — ज.

[17] ऽस्मिन्ये स्यां — ङ.

[18] विन्यस्य — छ, ज.

[19] अक्रमतो — ङ.; क्रमशो — छ, ज.

[20] ०शङ्कस्या — छ, ज.

[21] बाधनैवोप० — ओ, ङ.; बाधा नैवोप० —ग; बाधेनैवोप० — छ, ज.

[22] तालुषदेशं — छ, ज.

[23] विभज्यास्तु — ओ, ङ.

[24] जिह्वाग्रपरि० — ङ, छ, ज.

[25] पश्येत्तुर्य० — ग.

[26] ०दूर्ध्वे — छ.

[27] अजपरम० — ग.

[28] ०दुर्जयः — ओ, ङ.

[29] यावत्तुर्य . . . पदा द्वारि — ओ; यावत्तुर्यपदं चादि — ग; यावत्तुर्यपदं चारि — 'ग' पाठान्तरम्; यावात्युद्यय्य पादाद्वारि — ङ; पापातुर्यं . . . पदद्वारं — च.

[30] विलग्नामर्शलां —ग; विलग्नामर्गला — ङ; विलग्नामजलां — च; विलग्नामार्गबां–छ, ज.

[31] अस्त्रेणोद्घाप्य — ज.

[32] विश्रब्धो — च; विस्रस्तो, छ, ज.

[33] अव्यापादगुणोपेतामनौ० — ङ; अप्यपारगुणोपेत० — छ, ज.

[34] सम. . . शान्तं — ओ.

मतङ्ग उवाच —

[1]प्रसिद्धमैश्वरं तत्त्वं बुद्धिमत्सर्वगोचरम् ।
प्रक्रीड[2]न्नप्यमोहात्मा [3]स्वतन्त्रः परमेश्वरः[4] ॥४९॥
[5]धाताशेषस्य [6]विश्वस्य [7]योगकृत्पुंप्रधानयोः ।
[8]क्लिष्टपुंवृत्तिविषयादतीतश्चातिदीप्तिमान्[9] ॥५०॥
[10]तस्मादन्यत्परं [11]शान्तमनवस्थानदर्शनात् ।
तस्मादप्यपराण्यत्र[12] तेभ्योऽन्यानि सहस्रधा ॥५१॥
प्रभवन्त्यनिवार्याणि नियमः केन हेतुना ।

परमेश्वर उवाच —

सर्वाधिकार[13]निर्मुक्ता या सा काष्ठा परा मता ॥५२॥
[14]शान्तभावासमा सूक्ष्मा [15]नित्या [16]या सापराङ्मुखा ।
[17]स्वसंवेद्यातिनिर्वाणा[18] ह्येकातिशयवर्जिता[19] ॥५३॥
[20]तस्याः परं [21]कुतस्त्वन्यत्तत्त्वं मुनिवरेश्वर ।
प्रध्व[22]स्तातिशयास्पष्टात्सुसूक्ष्मत्वाच्च कारणात् ॥५४॥
अनन्तत्वाद्विभुत्वाच्च निष्ठातश्च[23] न विद्यते ।

---

[1] प्रसिद्धमीश्वरं – ग, छ, ज; प्रसिद्धमैश्वर्यं – ङ.

[2] ०न्नपि मोहात्मा — ओ; ०न पु मोहात्मा — ङ; ०न्नप्यमोघात्मा — छ, ज.

[3] स्वतन्त्रं — ओ, ग; प्रसन्नः — छ, ज.

[4] परमेश्वरम् — ओ, ग.

[5] ध्याताशेषस्य — ओ, ङ; ध्यातशेषस्य — ग; श्यातशेषस्य — छ, ज.

[6] वीर्यस्य — छ, ज.

[7] यागेर्यत्पुं० — छ; योगयुत्पुं० — ज.

[8] क्लृप्तपुंवृत्ति० — ओ; क्लिष्टां पुंवृत्ति० — ग; क्लिष्टा पुंव्यक्ति० — ङ.

[9] ०दीप्तिवान् — च.

[10] अस्मादन्य० — ओ, ग, छ.

[11] शास्त्रमनवस्थान० — ग; 'शान्तम्' लयतत्त्वम् (मतङ्ग० क्रिया० ८, ३ वृत्तौ).

[12] ०दप्यपरान्यत्र — ओ, ङ; ०दन्यत्परान्यत्र — च; ०दप्यपराण्यस्त्री — छ; दप्यापराण्यत्री — ज.

[13] ०निर्म . . . काष्ठा — ओ; निर्मुक्ता यवा काष्ठा — ङ.

[14] शान्ता भावाश्रया सू० — ओ, ङ; शान्तभावाश्रया सू० — ग; शान्ताभवश्रया सू० — छ, ज.

[15] नित्यायासपराङ्मुखा — छ, ज.

[16] सा परमा मुखा — ओ; या स पराङ्मुखा — ग; सा परमा मुने — ङ.

[17] संप्रत्याति निर्वाणो — ओ; स्वयं वेद्यानिनिर्वाणा — छ, ज.

[18] ०वेद्यादिनिर्वाणा — ग; ०वेद्यादिनिर्वाणो–ङ.

[19] ०वर्जिताः — ओ; ०वर्जितः — ङ; ०वर्तिता — छ; ०वर्तिना — ज.

[20] तस्यापरं — ओ; तस्यां परं — ग.

[21] कृतस्वस्यत्तत्त्वं मुनि० — ओ; कृतस्तंत्यक्तवान्मुनि० — ङ.

[22] ०स्तातिशयात्स्पृष्टा सु० — ओ; ०स्तातिशया स्पष्टा सु० — ग; ०स्ताशयात्स्पष्टात् सु० — ङ; ०स्तादिशयात्स्पष्टात् सु० — छ, ज.

[23] निष्ठातञ्च — ओ, ङ; निष्ठातस्य — च; निष्ठातच्च — छ, ज.

शिवतत्त्वात् परं तत्त्वं [1]न चैवेश्वरगोचरे ॥५५॥
[2]साधिकारात्परं [3]सिद्धं तच्चैवेश्वरगोचरात् ।
[4]क्रीडतो बुद्धितश्चैव [5]साभिलाषाच्च वैभवात् ॥५६॥
[6]कर्तृत्वादपरत्वं स्यान्नेष्टं[7] युक्तिविचारतः ।
[8]मूर्तिमानपि नित्योऽसौ योगयोगीश्वरो यतः ॥५७॥
[9]स्वेच्छाविधायी [10]भगवान् न प्रसृष्टबलः प्रभुः ।
कारणत्वाच्च कर्तृत्वमलुप्तविषयं[11] प्रभोः[12] ॥५८॥
एक [13]एव विधौ कर्ता [14]संस्थितो [15]मूर्तिभिर्विभुः ।
अतिरस्कृतवीर्याभिरमोघाभिरनिन्दितः[16] ॥५९॥
[17]क्रीडत्यक्लिष्टविभवो [18]जगत्यस्मिन्स विश्वराट् ।
[19]ददात्युत्कृष्टतेजाढ्यं [20]पदमत्यन्तनिर्मलम् ॥६०॥

मतङ्ग उवाच —

[21]सर्वेषामेव [22]दातॄणां [23]पददानमभीप्सितम् ।
सर्वस्वमात्मदानेन [24]सहैवान्यत्परं यतः ॥६१॥

---

[1] न चैश्वरगोचरात् — ओ; न चैवेश्वरगोचरा — ग; न चैश्वरे गोचरात् — ङ; न चैवेश्वरगोचरात् — च, छ; न चैचेश्वरगोचरात् — ज.

[2] स्वाविकारात्परं — ओ; साविकारात्परं – ङ.

[3] सिद्धि तथैवेश्वरगोचरम् — ओ, ङ; सिद्धि न तथेश्वरगोचरम् — ग; तत्त्वं न तथेश्वरगोचरम् — छ, ज.

[4] क्रीडते — च; क्रीडातो — छ, ज.

[5] साभिलाष . . — ओ; साभिलाषा च — च; स्वाभिलाषाच्च — छ, ज.

[6] इदमर्धं 'ओ' मातृकायां न दृश्यते ।

[7] ०दपरत्वादन्नेष्टं — छ; दपरत्वादवरत्वं स्यान्नेष्टं — ज.

[8] . . नतिनित्यो० — ओ; मूर्तिमानतिनित्यो० –ङ.

[9] स्वेच्छाभिधायी — च; स्वेजा विधायी — छ; स्वेच्छाविधायि — ज.

[10] भगवान् प्रसृष्टबलमप्रभुः — ओ; भगवान् न प्रहृष्टबलप्रभु — ग; भगवान् बलमप्रभुः — ङ; भगवान्नष्टभ्रष्टबलः प्रभुः — च; भगवान्न प्रहृष्टबलः प्रभुः — छ; भगवान् प्रहृष्टबलः प्रभुः — ज.

[11] ०मलुप्तः विषयः — छ; ०मलुप्तविधः — ज.

[12] प्रभो — ग.

[13] एकविधः कर्ता — ओ, ङ.

[14] संस्थिती — ओ.

[15] मूर्तिमद्वपुः — ओ; मूर्तिमद्विभु — ग; मूर्तिमार्द्विभुः — ङ; मूर्तिमान्विभुः — छ; मुक्तिमान्विभुम् — ज.

[16] ०रनिन्दिता — ओ; ०रतन्द्रितः — च.

[17] क्रीडन्त्यक्लिष्ट० — ओ, ङ; क्रीदक्लिष्ट० — छ, ज.

[18] जगत्यस्मिन्विराड . . — ग.

[19] तदात्युत्कृष्टतेजोभ्यां — ओ; ददात्यन्ततेजाढ्य० — ग; ददात्युत्कृष्ट तेजोभ्यां — ङ; ददात्यभीष्टं तेजोढ्यं — च; ददात्युत्कृष्टतेजाख्यं — ज.

[20] ०पटमत्यन्त — ग.

[21] ६१ श्लोकस्य प्रथमद्वितीयतृतीयपादाः 'ओ' मातृकायां लुप्ताः ।

[22] धात्राणां — ग; धर्माणां — ङ.

[23] परं दान० — ङ; पदं दान० — च, छ, ज.

[24] सह वान्यत्परा यत – ओ; स भवान्यत्पटाभवा यत — ग; सह वान्यत्परा यतः — ङ; स भवान्यत्परा यतः — छ, ज.

न विद्यते [1]ततस्तस्य दानमात्मबलात्परम्[2]।
[3]विशिष्टं [4]बहुभिर्धर्मैस्तत्कथं [5]दातुमर्हति ॥६२॥
[6]यदसाध्यं स्वयत्नेन[7] प्राप्यते[8]ऽतिगरीयसः।
परेभ्यः शक्यते दातुं लोकेऽस्मिन्न [9]प्रतीयते ॥६३॥

परमेश्वर उवाच —

[10]सांसिद्धिक[11]गुणोपेतवीर्येणातिमता[12] प्रभुः[13]।
साभिलाषेण दिव्येन [14]निरीशेनाविखण्डितः ॥६४॥
[15]द्विधाधिकारसंपन्न[16]प्रभावेनात्मवर्तिना।
[17]ददाति [18]विविधां [19]सिद्धिं साधकानां महात्मनाम् ॥६५॥
[20]विरक्ताः स्वाधिकारात्तु [21]येऽनुध्याता मुमुक्षवः[22]।
प्रागेव ध्वस्तविभवास्तेषां दद्यात्परं[23] पदम्[24] ॥
शेषाणामपि देवेशः[25] प्रददातीप्सितं फलम् ॥६६॥

[26]उद्घातानल[27]विप्रुषोर्मित[28]रलव्याघृष्ट[29]पक्षोद्यमा-
[30]त्तत्तद्दिग्गज[31]दुष्टभाव[32]रचित[33]व्यावर्तनाचेतसः[34]।

---

[1] ततस्तस्या — ओ, ङ.
[2] बलाद्वरम् — ङ.
[3] शिष्टं तद्बहुधर्मैस्तत्कथं — छ; शिष्टं ततु बहुधर्मैस्तत्कथं — ज.
[4] तच्च बहुभिस्तत्कथं — ओ; तच्चवहुभिधर्मैस्तत्कथं — ङ.
[5] दातुमर्हसि — ओ; दानमर्हति — छ, ज.
[6] वदस्वाध्यस्वयत्नेन — ओ; यदासाद्य द्वयं चैव — छ, ज.
[7] स्व . . . न्नैव — ग; स्वयं नैव — च.
[8] न गरीयसम् — ओ, ङ; ०ऽतिगरीयसम् — छ; ऽतिभिरीयसम् — ज.
[9] प्रदीयते — ओ, ङ.
[10] एवं सिद्धिगुणोपेतविध्येणाति० — छ, ज.
[11] ०गुणोपेतं — च.
[12] ०वीर्येणातमतः — ओ; वीर्येणादिमता – ग, च.
[13] प्रभु — ग; प्रभुम् — छ, ज.
[14] निरीशेनापि खण्डिता — ओ, ग; निरेशानापखण्डित — ङ; निरीशेन विखण्डिताः — च; नियेनाविखण्डितः — छ, ज.
[15] द्विधा विकारसंपन्न० — च; विधायिकानि संपन्न० — छ; निधायिकानि संपन्न० — ज.
[16] ०प्रदा वेदात्मवर्तिन — छ, ज.
[17] इदमर्धं 'ओ' मातृकायां न दृश्यते।; दधाति—ग.
[18] विदितां — छ, ज.
[19] विद्धि — छ.
[20] . . रात्ते — ओ; विरक्ता स्वाधि० — ङ; विरक्तां स्वाधिकारान्तां — च; विरक्तास्यधिकारं तु — छ; विरक्तस्याधिकारं तु — ज.
[21] येऽनुध्यत० — ओ; येऽनुध्यता — ग; येऽनुध्याना — ङ; येन ध्याता — छ; ये तु ध्याता — ज.
[22] मुमुक्षवा — ज.
[23] दद्यात्पदं — च; दण्डात्परं — छ, ज.
[24] परम् — च.
[25] देवेश — ओ, ग, ङ, छ, ज.
[26] उद्घाटानिल० — च; मघातानल० — छ; मत्घातानल० — ज.
[27] ०विप्रषोर्मि — ओ; विप्रेषाषोर्मि० — ङ; ०विप्लुषोर्मि — च; ०विप्रुषोक्ति — छ; विप्रषोक्ति — ज.
[28] तरालप्रघृष्टं — ङ.
[29] ०पक्षोद्यमां — ओ; पक्षीद्यमा — ग, छ, ज; . . क्षो . . मं — ङ. पन्थाद्यमात् — च.

[1]कालाच्चैव जया[2]त्प्रतप्तकिरणप्रोद्दामवेगाद् ध्रुवं[3]
[4]चाशु स्वान्तरकाललब्ध[5]वपुषो [6]व्यज्यत्यभीष्टं पदम् ॥६७॥

[उक्तार्थोपसंहारो वक्ष्यमाणोपक्रमश्च]

[7]व्याख्यातो[8] योग[9]पादः [10]खगपति[11]निलयोद्भूतसिद्धिप्रतापः[12]
[13]क्रीडातोयतरङ्गभङ्गकुटिलः[14] कल्लोल[15]दोलायितः ।
नानायुक्तिविचारभेद[16]रचितः सद्वस्तुबोधास्पदो[17]
[18]भर्तुर्वक्त्रशशाङ्क[19]वाक्यरचिता [20]चर्येति ज्योत्स्नायते ॥६८॥

इति श्रीमतङ्ग[21]पारमेश्वरे योगपादे [22]उद्घातपटलः सप्तमः ।

सप्तमः पटलः

योगपादः समाप्तः ॥

---

[30] मत्ता दिग्गज० — ओ; मत्ता . . जं — ग; मत्तदिग्गज — ङ, छ, ज.

[31] ०दत्तभाव — ओ; दुत्तमाभाव . . — ङ.

[32] चरित० — ओ; रचिता — च.

[33] ०व्यावृत्तना० — ओ.

[34] . . चेतस — ग.

[1] कालाश्चैव — ङ.

[2] ०त्प्रतप्तकिरणे — ओ; ०त्प्र . .किरणे—ङ; ०त्प्रतप्तकिरणाः — च; ०त्प्राप्तकिरण — छ, ज.

[3] ०प्रोद्धामवेगो धुव० — ओ; ०प्रोद्दामवेगो ध्रुवं — ग; ०प्रोद्दामवेप्रागोध्रुव० —ङ; ०प्रोद्दाम-वेदा ध्रुवं — च.

[4] ०माचोत्तरकाल० — ओ; चाशुश्चोत्तरकाल० — ग; ०माशुचोत्तरकाल० — ङ; ०माशु स्वान्तरकाल० — च; ०माशुश्चोत्तरकाल० — छ, ज.

[5] ०पुरुषो — ङ.

[6] व्यत्यञ्जभीष्टं . . — ओ; व्यत्यजभीष्टं — ङ; व्यज्यत्यदुष्टं — च;

[7] मातृकासु प्रथमपादे एकविंशत्यक्षराणि पादान्तरेषु, एकोनविंशत्यक्षराणि च सन्ति ।

[8] विख्यातो — ओ; व्याख्यातोऽतो — ङ.

[9] ०पादा — ज.

[10] खगति० — ओ, ङ; . . गपति० — ग.

[11] ०निलयो भूत० — ङ.

[12] ०सिद्धिः प्रदीपः — ओ; ०सिद्धिप्रताप — ग; ०सिद्धिप्रदाप – ङ; ०सिद्धिः प्रतापः — ज.

[13] क्रीडा तेयतिरङ्ग — ङ; क्रीडतोयतरङ्ग० — छ, ज.

[14] ०पङ्ककुदल० — ओ, ङ; ०भङ्गजटिलं — ग.

[15] ०प्रोल्लालितः — ओ, ङ; ०प्रेरवोकम् —ग; प्रेङ्खोलितः — छ; प्रङ्खोलितः — ज.

[16] ०रचित० — ओ; ०रचितं — ग.

[17] ०बोधास्पदं — ओ, ग, ङ; ०बद्धास्पदो – च; ०भेदास्पदां — छ, ज.

[18] भर्तृवक्तृ० — ओ; भोक्तुर्वक्त्र० — छ, ज.

[19] ०वाच्यरचिता — च, छ, ज.

[20] चार्येति — छ, ज.

[21] 'पारमेश्वरे' इत्यस्यानन्तरं 'च' मातृकायां 'महातन्त्रं' इत्यधिकं दृश्यते ।

[22] उपोद्घातसिद्धिपटलः — च; उद्घातसिद्धि-पटलः — छ, ज.

कङ्कालमालिनीतन्त्रम्

ॐ नमः श्रीगुरवे

श्रीभैरवी उवाच

त्रिपुरेश महेशान पार्वतीप्राणवल्लभ ।
जगद्वन्द्य शूलपाणे वर्णानां कारणं वद ॥ १ ॥

श्रीभैरव उवाच

कथयामि वरारोहे वर्णानां भेदमुत्तमम् ।
न प्रकाश्यं महादेवि ! तव स्नेहात् सुभाषिणि ॥ २ ॥
यज्ज्ञात्वा योगिनो यान्ति निर्गुणत्वं मम प्रिये !
तच्छृणुश्व स्वरूपेण महायौवनगर्विते ॥ ३ ॥
शब्दब्रह्मस्वरूपं तद् आदिक्षान्तं जगत्प्रभुः ।
विद्युद्जिह्वा करालास्या गर्जिनी धूम्रभैरवी ॥ ४ ॥
कालरात्रिर्विदारी च महारौद्री भयंकरी ।
संहारिणी करालिनी ऊर्ध्वकेश्युग्रभैरवी ॥ ५ ॥
भीमाक्षी डाकिनी रुद्रडाकिनी चण्डिकेति च ।
एते वर्णाः स्वरा ज्ञेयाः कौलिनि व्यंजनान् शृणु ॥ ६ ॥
क्रोधीशो वामनश्चण्डो विकार्युन्मत्तभैरवः ।
ज्वालामुखो रक्तदंष्ट्रो हसिताङ्गो वडवामुखः ॥ ७ ॥
विद्युन्मुखो महाज्वालः कपाली भीषणो रुरुः ।
संहारी भैरवो दण्डी वलिभुगुग्रशूलधृक् ॥ ८ ॥

सिंहनादी कपर्दी च करालाग्निर्भयङ्करः ।
बहुरूपी महाकालो जीवात्मा क्षतजोक्षितः ॥ ९ ॥

बलभेदी रक्तपश्च चण्डीशो ज्वलनध्वजः ।
वृषध्वजो व्योमवक्त्रस्त्रैलोक्यग्रसनात्मकः ॥ १० ॥

एते च व्यञ्जना ज्ञेयाः कादिक्षान्ताः क्रमादिताः ।
अकारादिक्षकारान्ता वर्णास्तु शिवशक्तयः ॥ ११ ॥

पञ्चाशच्च इमे वर्णा ब्रह्मरूपाः सनातनाः ।
येषां ज्ञानं विना वामे सिद्धिर्न स्याद् गुरुस्तनि ॥ १२ ॥

ते वर्णसागराः प्रोक्ता गुणत्रयमयाः शुभे ।
विद्युद्जिह्वा मुखं कृत्वा चण्डिकान्तं नगात्मजे ॥ १३ ॥

सत्त्वगुणमया वर्णा रजोगुणमयान् शृणु ।
क्रोधीशाद् दण्डिपर्यन्ता व्यञ्जना राजसाः स्मृताः ॥ १४ ॥

बलिभुग्वर्णमारभ्य त्रैलोक्यग्रसनावधि ।
ज्ञेयास्तमःस्वरूपास्ते तेभ्यो जातान् शृणु प्रिये ॥ १५ ॥

गुशब्दश्चान्धकारः स्याद् रुशब्दस्तन्निरोधकृत् ।
अन्धकारनिरोधित्वाद् गुरुरित्यभिधीयते ॥ १६ ॥

गकारः सिद्धिदः प्रोक्तो रकारः पापहारकः ।
उकारस्तु भवेद् विष्णुस्त्रितयात्मा गुरुः स्वयम् ॥ १७ ॥

आदावसौ जायते च शब्दब्रह्मसनातनः ।
वसुजिह्वा कालरात्र्या रुद्रडाकिन्यलङ्कृता ॥ १८ ॥

विषबीजं श्रुतिमुखं ध्रुवं हालाहलं प्रिये ।
ॐ चण्डीशः क्षतजारूढो धूम्रभैरव्यलङ्कृतः ॥ १९ ॥

नादबिन्दुसमायुक्तं लक्ष्मीबीजं प्रकीर्तितम् ।
श्रीं । क्रोधीशं क्षतजारूढं धूम्रभैरव्यलङ्कृतम् ॥ २० ॥

नादबिन्दुयुतं देवि नामबीजं प्रकीर्तितम् ।
श्रीं (क्रोधीशो वलभृद्) (वलिभुग्) धूम्रभैरवीनादबिन्दुभिः ॥२१॥
त्रिमूर्तिर्मन्मथः कामबीजं त्रैलोक्यमोहनम् ।
क्लीं । क्षतजस्थो व्योमवक्त्रो धूम्रभैरव्यलङ्कृतः ॥ २२ ॥
नादबिन्दुसुशोभाढ्य मायालज्जाह्वयं स्मृतम् ।
ह्रीं । व्योमास्यञ्ज विदारीस्थं नादबिन्दुविराजितम् ॥ २३ ॥
कूर्चकालं क्रोधबीजं जानीहि वीरवन्दिते ।
हूँ । व्योमास्यः कालरात्र्याढ्यो वर्मविद् बिन्दुसंयुतः ॥ २४ ॥
कथितं वचनं बीजं कुलाचारप्रियेऽमले ।
दूँ । व्योमास्यं क्षतजारूढं डाकिन्या नादबिन्दुभिः ॥ २५ ॥
ज्योतिर्मन्त्रं समाख्यातं महापातकनाशनम् ।
द्रौं । नादबिन्दुसमायुक्तां समादायोग्रभैरवीम् ॥ २६ ॥
भौतिकं वाग्भवं बीजं विद्धि सारस्वतं प्रिये ।
ऐं प्रलयाग्निर्महाजालः ख्यातोऽस्त्रमनुः शिवे ॥ २७ ॥
रक्तक्रोधीशभीमाख्योऽङ्कुशोऽयं नादबिन्दुमान् ।
क्रौं । द्विठः शिवो बह्नि जाया स्वाहा ज्वलनवल्लभा ॥ २८ ॥
स्वाहास्त्राहासंयुक्तं धूम्रभैरव्या रक्तस्य बलिभोजनम् ।
नादबिन्दुसमायुक्तं किङ्किणीबीजमुत्तमम् ॥ २९ ॥
द्रीं । नादबिन्दुसमायुक्तं रक्तस्थं बलिभोजनम् ।
करालास्यासनोपेतं विशिकाख्यं महामनुम् ॥ ३० ॥
दूं । विदार्या नेक्षितो गुह्ये वलिभुक् क्षतजोक्षितः ।
नादबिन्दुसमायुक्तो विज्ञेयः पिशिताशनः ॥ ३१ ॥
धूमोज्ज्वलकरालाग्नि ऊर्ध्वकेशीन्दुबिन्दुभिः ।
युगान्तकारकं बीजं वीरपत्निप्रकाशितम् ॥ ३२ ॥

संहारिण्या स्थितश्चोर्ध्वं कशिनन्तु कपर्दिनम् ।
नादबिन्दुसमायुक्तं बीजं बैतालिकं स्मृतम् ॥ ३३ ॥

सनादबिन्दुक्रोधीशं गुह्ये संहारिणीस्थितम् ।
कम्पिनीबीजमित्युक्तं चण्डिकाख्यं मनोहरम् ॥ ३४ ॥

कपर्दिनं समादाय क्षतजोक्षितसंस्थितम् ।
संयुक्तं धूम्रभैरव्या ध्वाङ्क्षोऽयं नादबिन्दुमान् ॥ ३५ ॥

ग्रीं । कदलीद्वयमादाय महाकालेन मण्डितम् ।
सनादस्तु नमित्युक्तं चण्डिकाख्यं पयोधरम् ॥ ३६ ॥

ठँ ठँ । प्रलयाग्निस्थितो धूमध्वजो गुह्येशबिन्दुमान् ।
संयुक्तो धूम्रभैरव्या स्मृता फेत्कारिणि प्रिये ॥ ३७ ॥

स्फीं । क्षतजस्थं व्योमवक्त्रं बिन्दुखण्डेन्दुलङ्कृतम् ।
खद्योतमिति विख्यातं ग्रसिनीकालरात्रियुक् ॥ ३८ ॥

द्रूँ । क्षतजोक्षितमारूढं नादबिन्दुसमन्वितम् ।
विदारीभूषितं देवि बीजं वैवस्वतात्मकम् ॥ ३९ ॥

॥ इति दक्षिणाम्नाये सार्धलक्षग्रन्थे कङ्कालमालिनीतन्त्रे
प्रथमः षटलः ॥ १॥

अथ द्वितीयः पटल

श्रीपार्वती उवाच

देव देव महादेव नीलकण्ठ तपोधन ।
योनिमुद्रां महादेव तत्त्वत्रयं परात्परम् ।
एतदेव महादेव कथ्यतां मे पिनाकधृक् ॥ १ ॥

श्रीईश्वर उवाच

शृणु वक्ष्यामि देवेशि दासोऽहं तव सुव्रते ।
अतिगुह्यं महापुण्यं तत्त्वत्रयं वरानने ॥ २ ॥
सारात् सारं परं गुह्यमतिगोप्यं सुनिश्चितम् ।
शङ्कापि जायते देवि कथं तत्कथयाम्यहम् ॥ ३ ॥
कथयामि महेशानि आज्ञया तव भामिनि ।
न चेत् तत् कथ्यते देवि तव क्रोधः प्रजायते ॥ ४ ॥
त्वया क्रोधे कृते देवि हानिः स्यान्मम कामिनि ।
मन्त्रार्थं मन्त्रचैतन्यं धर्मार्थकामदं प्रिये ॥ ५ ॥
योनिमुद्रा महेशानि तृतीयं ब्रह्मरूपिणी ।
अज्ञात्वा यो जपेन्मन्त्रं नहि सिद्धिः प्रजायते ॥ ६ ॥
ज्ञात्वा प्रारभ्य कुर्वीत ह्यकुर्वाणो विनश्यति ।
योनिमुद्रा महेशानि साक्षान्मोक्षप्रसाधिनी ॥ ७ ॥
ततो योनिर्महेशानि प्रिया मम यथा प्रिये ।
सततं परमेशानि दासोऽहं तव योनिना ॥ ८ ॥
तव योनिप्रसादेन मृत्युं जित्वा वरानने ।
मृत्युञ्जयोऽहं देवेशि सततं कमलानने ॥ ९ ॥

तव योनौ महेशानि ब्रह्माण्डं सचराचरम् ।
तिष्ठन्ति सततं देवि ब्रह्माद्यास्त्रिदिवौकसः ॥ १० ॥

मयूरस्य महेशानि पुच्छे कृत्वा च अद्भुतम् ।
योन्याकारं महेशानि दृष्ट्वा कृष्णः शुचिस्मिते ॥ ११ ॥

शिरे धृत्वा वरारोहे त्रैलोक्यं वशमानयेत् ।
तव योनिं महेशानि भावयामीत्यहर्निशम् ॥ १२ ॥

तत्रैव दृष्ट्वा ब्रह्माण्डं नान्यं पश्यामि कामिनि ।
कर्पूरपुलकोद्भूतं तव योनिपुरं परम् ॥ १३ ॥

तव योनिर्महेशानि तत्त्वत्रयसुपूजितम् ।
रेतोरजःसमायुक्तं साक्षान्मन्मथमन्दिरम् ॥ १४ ॥

न जाने किं कृतं कर्म कालिके कमलेक्षणे ।
तव योनौ महादेवि अत एव वरानने ॥ १५ ॥

योनिमुद्रां योनिवीजं सततं परमेश्वरि ।
अहं मृत्युञ्जयो देवि योनिमुद्राप्रसादतः ॥ १६ ॥

योनिबीजं महेशानि निगदामि शृणु प्रिये ।
प्रथमे परमेशानि योगिनीं रुद्रयोगिनीम् ॥ १७ ॥

उत्कृत्य वहुयत्नेन बलबीजयुतं कुरु ।
विन्द्वर्धचन्द्रसंयुक्तं बीजं त्रैलोक्यमोहनम् ॥ १८ ॥

बद्ध्वा तु योनिमुद्रां वै पूर्वोक्तक्रमतः प्रिये ।
योनिबीजं महेशानि अष्टोत्तरशतं जपेत् ॥ १९ ॥

अष्टोत्तरशतं जप्त्वा यत् फलं लभते प्रिये ।
माहात्म्यं तस्य देवेशि वक्तुं को वा क्षमो भवेत् ॥ २० ॥

यः करोति प्रसन्नात्मा रहस्ये योनिरूपिणीम् ।
ब्रह्माण्डं पूजयेत् ते न ब्रह्माद्यास्त्रिदिवौकसः ॥ २१ ॥

तव योनिर्महेशानि परं ब्रह्मस्वरूपिणी ।
तव योनिर्महेशानि भवस्य मोहिनी प्रिये ॥ २२ ॥
तव योनिर्महेशानि सिद्धिसूत्रेण वेष्टयेत् ।
सिद्धिसूत्रं महेशानि त्रिप्रकारं वरानने ॥ २३ ॥
ईडा च पिङ्गला चैव सुषुम्नात्रितयं तथा ।
सदानन्दमयीं योनिं नानासुखविलासिनीम् ॥ २४ ॥
शृङ्गारसमये देवि नान्तं गच्छामि पार्वति ।
मम लिङ्गो महेशानि भिनत्ति सकलं जगत् ॥ २५ ॥
तथापि परमेशानि नान्तं गच्छामि कामिनि ।
तव योनिर्महेशानि न जाने कीदृशीं गतिम् ॥ २६ ॥
तव योनिर्महेशानि आद्या प्रकृतिरूपिणी ।
सदा कुण्डलिनीं योनिमहाकुण्डलिनीं पराम् ॥ २७ ॥
यः सदा परमेशानि योनिं दृष्ट्वा वरानने ।
जपेद् बीजं वरारोहे भगाख्यं भगरूपिणीम् ॥ २८ ॥
योनिं बद्ध्वा महेशानि भगबीजेन पार्वति ।
अष्टोत्तरशतं जप्त्वा मम तुल्यो भवेत् प्रिये ॥ २९ ॥
तव योनौ महेशानि रमणं यत्नतश्चरेत् ।
तस्या रमणमात्रेण ब्रह्मविष्णुशिवात्मकः ।
स एव धनवान् वाग्मी वागीशसमतां व्रजेत् ॥ ३० ॥

श्रीदेवी उवाच

नीलकण्ठ महादेव रहस्यं कृपया वद ।
यदि नो कथ्यते देव विमुञ्चामि तदा तनुम् ॥ ३१ ॥

श्री ईश्वर उवाच

शृणु पार्वति कृष्णाङ्गि खञ्जनाक्षि सुलोचने ।
गोपनीयं रहस्यं हि सर्वकामफलप्रदम् ॥ ३२ ॥

तिस्रः कोट्यस्तदर्धेन शरीरे नाडिका मताः ।
तासु मध्ये दश प्रोक्तास्तासु तिस्रो व्यवस्थिताः ॥ ३३ ॥
प्रधाना मेरुदण्डाग्रे चन्द्रसूर्याग्निरूपिणी ।
मज्जयित्वा सुषुम्नायामहं योगी सुरेश्वरि ॥ ३४ ॥
षट्चक्रे परमेशानि भावयेद् योनिरूपिणीम् ।
प्रथमं परमेशानि आधारयुगपत्रकम् ॥ ३५ ॥
वादिसान्त्यैश्चतुर्वर्णैर्द्रुतहेमसमप्रभम् ।
तडित्कोटिप्रभाकारं स्थानं परमदुर्लभम् ॥ ३६ ॥
तत् कर्णिकायां देवेशि त्रिकोणमतिसुन्दरम् ।
इच्छाज्ञानक्रियारूपं ब्रह्मविष्णुशिवात्मकम् ॥ ३७ ॥
मध्ये स्वयंभूलिङ्गं च कुण्डलीवेष्टितं सदा ।
त्रिकोणाख्यं तु देवेशि लकारं चिन्तयेत् तथा ॥ ३८ ॥
ब्रह्माण्डं तत्र संचिन्त्य कामदेवं च चिन्तयेत् ।
बीजं तत्रैव निश्चिन्त्यं योनावादानमेव च ॥ ३९ ॥
पदे च गमनं पायौ विसर्गं नसि कामिनि ।
घ्राणं संचिन्त्य देवेशि महेशि प्राणवल्लभे ॥ ४० ॥
डाकिनीं परमाराध्यां शक्तिं च भावयेत् ततः ।
एतानि गिरिजे मातः पृथ्वीं नीत्वा गणेश्वरि ॥ ४१ ॥
तन्मध्ये लिङ्गरूपं हि कुण्डलीवेष्टितं प्रिये ।
तत्र कुण्डलिनीं नित्यां परमानन्दरूपिणीम् ॥ ४२ ॥
तत्र ध्यानं प्रकुर्वीत सिद्धिकामो वरानने ।
कोटिचन्द्रप्रभाकारां परंब्रह्मस्वरूपिणीम् ॥ ४३ ॥
चतुर्भुजां त्रिनेत्राञ्च वराभयकरां तथा ।
तथा च पुस्तकं वीणां धारिणीं सिंहवाहिनीम् ॥ ४४ ॥

गच्छन्ति स्वासनं भीमां नानारूपधरां पराम् ।
पूर्वोक्तां पृथ्वीं धन्यां गन्धे नीत्वा महेश्वरि ॥ ४५ ॥
आकृष्य प्रणवेनैव जीवात्मानं नगेन्द्रजे ।
कुण्डलिन्या सह प्रेमे गन्धमादाय साधकः ॥ ४६ ॥
सोऽहमिति मनुना देवि स्वाधिष्ठाने प्रवेशयेत् ।
तत्पद्मं लिङ्गमूलस्थं सिन्दूराभं च षड्दलम् ॥ ४७ ॥
स्फुरद्विक्रमसंकाशैर्वादिनान्तैः सुशोभितम् ।
तत्कर्णिकायां वरुणं तत्रापि भावयेद्धरिम् ॥ ४८ ॥
युवतिं राकिणीं शक्तिं चिन्तयित्वा वरानने ।
रसनेन्द्रिययूपस्थं जलञ्च कामलालसे ॥ ४९ ॥
एतानि गन्धञ्च शिवे रसे नीत्वा विनोदिनीम् ।
जीवात्मानं कुण्डलिनीं रसञ्च मणिपूरके ॥ ५० ॥
नीत्वा परमयोगेन तत्पद्मं दिग्दलं प्रिये ।
नीलवर्णं तडिद्रूपं डादिफान्तैश्च मण्डितम् ॥ ५१ ॥
तत्कर्णिकायां सुश्रोणि वह्निं सञ्चिन्त्य साधकः ।
तत्र रुद्रः स्वयं कर्ता संहारे सकलस्य च ॥ ५२ ॥
लाकिनीशक्तिसंयुक्तो भावयेत् तं मनोहरे ।
तत्र चक्षुरिन्द्रियञ्च कृत्वा तेजोमयं यजेत् ॥ ५३ ॥
एतं रसञ्च सुभगे रूपं नीत्वा महाभागे ।
जीवात्मानं कुण्डलिनीरूपञ्चानाहते नयेत् ॥ ५४ ॥
बन्धूकपुष्पसंकाशं तत्पद्मं द्वादशारकम् ।
कादिठान्तैः स्फुरद्वर्णैः शोभितां हरवल्लभाम् ॥ ४६ ॥
तत्कर्णिकायां वायुञ्च जीवस्थाननिवासिनम् ।
तत्र योनेर्मण्डलञ्च बाणलिङ्गविराजितम् ॥ ५६ ॥

काकिनीशक्तिसंयुक्तं तत्र वायोस्त्वगिन्द्रियम् ।
एतद् रूपञ्च संयोज्य स्वर्गे रमणकामिनि ॥ ५७ ॥
जीवकुण्डलिनीं स्पर्शं विशुद्धौ स्थापयेत् ततः ।
धूम्रवर्णं कण्ठपद्मं षोडशस्वरमण्डितम् ॥ ५८ ॥
तत्कर्णिकायामाकाशं शिवञ्च कारिणीयुतम् ।
वाचं श्रोत्रं च आकाशे संस्थाप्य नगनन्दिनि ॥ ५९ ॥
एतानि स्पर्शं शब्दे च नीत्वा शाङ्करि मत्प्रिये ।
जीवं कुण्डलिनीं शब्दञ्चाज्ञापत्रे निधापयेत् ॥ ६० ॥
नेत्रपद्मं शुक्लवर्णं द्विदलमक्षभूषितम् ।
तत्कर्णिकायां त्रिकोणं यद् बाणलिङ्गञ्च सङ्गतम् ॥ ६१ ॥
मनश्चात्र सदा भाति हाकिनीशक्तिलाञ्छितम् ।
बुद्धिप्रकृत्यहङ्कारलक्षितं तेजसा परम् ॥ ६२ ॥
जीवात्मानं कुण्डलिनीं मनश्चापि महेश्वरि ।
सहस्रारे महापद्मे मनश्चापि नियोजयेत् ॥ ६३ ॥
सहस्रारं नित्यपद्मं शुक्लवर्णमधोमुखम् ।
अकारादिक्षकारान्तैः स्फुरद्वर्णैर्विराजितम् ॥ ६४ ॥
तत्कर्णिकायां देवेशि अन्तरात्मा ततो गुरुः ।
सूर्यस्य मण्डलञ्चैव चन्द्रमण्डलमेव च ॥ ६५ ॥
ततो वायुर्महानादो ब्रह्मरन्ध्रं ततः स्मृतम् ।
तस्मिन् रन्ध्रे विसर्गञ्च नित्यानन्दं निरञ्जनम् ॥ ६६ ॥
तदूर्ध्वे शंखिनी देवी सृष्टिस्थित्यन्तकारिणी ।
तस्याधःस्था च देवेशि चतुर्मण्डलमध्यगम् ॥ ६७ ॥
त्रिकोणं तत्र संचिन्त्य कैलासमत्र भावयेत् ।
इह स्थाने महादेवि स्थिरचित्तं विधाय च ॥ ६८ ॥

जीवजीवी गतव्याधिर्न पुनर्जन्मसंभवः ।
अत्र नित्योदिता वृद्धिक्षयहीना अमाकला ॥ ६९ ॥
तन्मध्ये कुटिला निर्वाणाख्या सप्तदशी कला ।
निर्वाणाख्यान्तर्गता वह्निरूपा निरोधिका ॥ ७० ॥
नादोऽव्यक्तस्तदुपरि कोट्यादित्यसमप्रभा ।
निर्वाणशक्तिः परमा सर्वेषां योनिरूपिणी ॥ ७१ ॥
अस्यां शक्तौ शिवं ज्ञेयं निर्विकारं निरञ्जनम् ।
अत्रैव कुण्डलीशक्ति र्मुद्राकारा सुरेश्वरि ॥ ७२ ॥
पुनस्तेन प्रकारेण गच्छन्त्याधारपङ्कजे ।
कथिता योनिमुद्रेयं मया ते परमेश्वरि ॥ ७३ ॥
विना येन न सिद्धेन निहरेत् परमात्मना ।
तद्‌ दिव्यामृतधाराभिर्लाक्षाभाभिर्महेश्वरि ॥ ७४ ॥
तर्पयेद् देवतां योगी योगेनाऽनेन साधकः ।
कुण्डलीशक्तिसिद्धिः स्याद् वर्णकोटिशतैरपि ॥ ७५ ॥
तस्मात् त्वयापि गिरिजे गोपनीयं प्रयत्नतः ।
मन्त्ररूपां कुण्डलिनीं ध्यात्वा षट्‌चक्रमण्डले ॥ ७६ ॥
कन्दमध्यात् सुमधुरं कूजन्तीं सततोत्थिताम् ।
गच्छन्तीं ब्रह्मरन्ध्रेण प्रविशन्तीं स्वकेतनम् ॥ ७७ ॥
मूलाधारे च तां देवीं संस्थाप्य वीरवन्दिते ।
चित्रिणीग्रथिता मालाजापं ब्रह्माण्डसुन्दरि ॥ ७८ ॥
रहस्यं परमं दिव्यं मन्त्रचैतन्यमीरितम् ।
मुद्राचैतन्ययोर्ज्ञानं वर्णानां ज्ञानमेव च ॥ ७९ ॥
मन्त्रार्थं कथितं देवि तव स्नेहात् प्रियंवदे ।
अस्य ज्ञानं विना भद्रे सिद्धिर्न स्यात् सुलोचने ।
इति ते कथितं देवि योनिक्रीडेदमुत्तमम् ॥ ८० ॥

श्रीईश्वरी उवाच

सुरासुरजगद्वन्द्य पार्वतीभगसेवक ।
इदानीं श्रोतुमिच्छामि योनेः कवचमुत्तमम् ॥ ८१ ॥

श्री ईश्वर उवाच

यद् धृत्वा पठनात् सर्वाः शक्तयो वरदाः प्रिये ।
एतस्य कवचस्यापि ऋषिश्च श्रीसदाशिवः ॥ ८२ ॥

छन्दो गायत्री देवता योनिरूपा सनातनी ।
चतुर्वर्गेषु देवेशि विनियोगः प्रकीर्तितः ॥ ८३ ॥

ॐ मम् माम् मिम् मीम् मुम् मूम् मेम् मैम् मोम् मौम् मं मः ।
(दक्षपादम्) मम शिरो रक्षन्तु स्वाहा ।
ॐ मम् माम् मिम् मीम् मुम् मूम् मेम् मैम् मोम् मौम् मं मः
ॐ माम् ॐ आकुटाम् मम रक्षन्तु स्वाहा मम् माम् ।
ॐ मम् माम् मिम् मीम् मुम् मूम् मेम् मैम् मोम् मौम्
मं मः मम हृदयादिदक्षबाहुं रक्षन्तु ।
ॐ मं मां मिं मीं मुम् मूम् मेम् मैम् मोम् मौम् मं मः
ॐ मम् माम् मिम् मीम् मुम् मूम् मेम् मैम् मोम् मौम् मं मः
मम हृदयादिवामबाहुं रक्षन्तु मम । ॐ मम् माम् मिम्
मीम् मुम् मूम् मेम् मैम् मोम् मौम् मं मः दक्षपादं रक्षन्तु
मम । वामपादं रक्षन्तु मम सदा स्वाहा स्वाहा स्वाहा ।
ॐ मम् माम् मिम् मीम् मुम् मूम् मेम् मैम् मोम् मौम् मं मः
मम हृदादिषु नासां रक्षन्तु स्वाहा । ॐ मम् माम् मिम्
मीम् मुम् मूम् मेम् मैम् मोम् मौम् मं मः उपस्थं रक्षन्तु मम
सदा स्वाहा । ॐ मम् माम् मिम् मीम् मुम् मूम् मेम् मैम्
मोम् मौम् मं मः ॥

इदं हि योनिकवचं रहस्यं परमाद्भुतम् ।
अज्ञात्वा यो जपेन्मन्त्रं सर्वं निष्फलतां व्रजेत् ॥ ८४ ॥
रहस्यं परमं दिव्यं सावधानाऽवधारय ।
मूलाधारे महेशानि जपेद् यन्त्रं वरानने ॥ ८५ ॥
मूलाधारे महेशानि वरारोहेऽन्तरात्मनि ।
प्रतिचक्रे महेशानि पठेद् योनिं सनातनीम् ॥ ८६ ॥
चन्द्रसूर्योपरागे च पठेद् वा कवचं प्रिये ।
स्वनारीं रमयेद् यन्त्रे परनारीमथापि वा ॥ ८७ ॥
कवचस्य प्रसादेन योनिमुद्रा हि सिद्धयति ।
इदं हि कवचं देवि पठित्वा कमलानने ॥ ८८ ॥
मैथुनं महदाख्यानं त्वया सह मया कृतम् ।
कवचस्य प्रसादेन जना यान्ति परां गतिम् ॥ ८९ ॥
भूर्जपत्रे समालिख्य स्वयंभूकुसुमेन तु ।
शुक्लेन कुसुमेनापि रोचनालक्तकेन च ॥ ९० ॥
स्वर्णस्थां गुटिकां कृत्वा धारयेद् यन्त्रमानवः ? ।
इह लोके परत्रे च स एव श्रीसदाशिवः ॥ ९१ ॥
अष्टोत्तरशतश्चास्य प्रपठेत् सिद्धि वाञ्छया ।
किमत्र बहुनोक्तेन अस्मात् परतरो नहि ।
नमो योन्यै नमो योन्यै कुण्डलिन्यै नमो नमः ॥ ९२ ॥

इति दक्षिणाम्नाये सार्धलक्षग्रन्थे कङ्कालमालिनीतन्त्रे
योनिमुद्रादिकथनं द्वितीयः पटलः ॥ २ ॥

॥ १७ ॥

सपल्लवयोगः

अथ योगः। तत्र देवलः

देवमनुष्ययोः द्विविधः पुरुषार्थोऽभ्युदयो निःश्रेयसमिति। तयोरभ्युदयः पूर्वोक्तः द्विविधः। निश्रेयसमिति सांख्ययोगौ। पञ्चविंशतितत्वज्ञानं सांख्यम्। विषयेभ्यो निवृत्याऽभिप्रेतेऽर्थे मनसोऽवस्थापनं योगः। उभयत्राऽपवर्गः फलम्।

विष्णुपुराणे

[1]आत्मप्रयत्नसापेक्षा विशिष्टा या मनोगतिः।
तस्या ब्रह्मणि संयोगो योग इत्यभिधीयते॥

दक्षः

वृत्तिहीनं मनः कृत्वा क्षेत्रज्ञं परमात्मनि।
एकीकृत्य विमुच्येत योगोऽयं मुख्य उच्यते॥

विष्णुपुराणे

तदेतत्कथितं राजन्नविद्याया मया तव।
क्लेशानां च क्षयकरं योगादन्यन्न विद्यते॥

1 ६, ७, ३१.

योगियाज्ञवल्क्यः

सर्वधर्मान् परित्यज्य योगधर्मं समाश्रयेत् ।
सर्वे धर्माः सदोषास्तु पुनरुत्पत्तिकारकाः ॥
[1]नेहाऽतिक्रमनाशोऽस्ति प्रत्यवायो न विद्यते ।
स्वल्पमप्यस्य धर्मस्य त्रायते महतो भयात् ॥

'अतिक्रमः' अनारम्भः नाशोऽत्र नैष्फल्यम् ।

महाभारते

[2]यथा वाऽनिमिषाः स्थूला जालं भित्वा पुनर्जलम् ।
प्राप्नुवन्ति तथा योगात्तत्पदं वीतकल्मषाः ॥

'अनिमिषाः' मत्स्याः ।

तथैव वागुरां भित्वा बलवन्तो यथा मृगाः ।
प्राप्नुयुर्विमलं मार्गं विमुक्ताः सर्वबन्धनैः ॥
लोभजानि तथा राजन् बन्धनानि बलान्विताः ।
[3]भित्वा योगात् परं मार्गं गच्छन्ति विमलाः शिवम् ।

यथा च शकुनाः सूक्ष्माः प्राप्य जालमरिन्दमम् ।

तत्राऽशक्ता[4] निबध्यन्ते विमुच्यन्ते बलान्विताः ।
कर्मजैर्बन्धनैर्बद्धास्तद्वद्योगाः परन्तप ॥
अबलाश्चैव नश्यन्ति मुच्यन्ते च बलान्विताः ।
[5]अप्रमत्तो यथा धन्वी लक्ष्यं हन्ति समाहितः ॥

1 गीतायामपि दृश्यते—२, ४०.

2 शां—३०६, १२.

3 शा—३०६, १७.

4 'तत्र शक्ता' इति ना. and स; तत्र सक्ता इति मु. महाभारते.

5 शा—३०६, ३१.

युक्तः सम्यक् तथा योगी मोक्षं प्राप्नोत्यसंशयम् ।
[1]यथा कश्चिद्वनं घोरं बहुसर्पसरीसृपम् ॥
श्वभ्रवत्तोयहीनं च दुर्गमं बहुकण्टकम् ।
अभक्तमटवीप्रायं दावदग्धमहीरुहम् ॥
पन्थानं तस्कराकीर्णं क्षेमेणाऽतिपतेन्नरः ।
योगमार्गं समाश्रित्य यः कश्चिद्व्रजते द्विजः ॥
क्षेमेणोपरमं मार्गं बहुदोषो हि स स्मृतः ।

तथा

अपि वर्णावकृष्टस्तु नारी वाऽधर्मकांक्षिणी ।
तावप्येतेन मार्गेण गच्छेतां परमां गतिम् ॥

[2]तथा

नास्ति बुद्धिरयुक्तस्य न चाऽयुक्तस्य भावना ।
न चाऽभावयतः शान्तिरशान्तस्य कुतः सुखम् ॥

[3]तथा

तपस्विभ्योऽधिको योगी ज्ञानिभ्योऽपि ततोऽधिकः ।
कर्मिभ्यश्चाऽधिको योगी तस्माद्योगी भवाऽर्जुन ॥
योगिनामपि सर्वेषां मद्गतेनाऽन्तरात्मना ।
श्रद्धावान् भजते यो मां स मे युक्ततमो मतः ॥

अथ योगाङ्गानि

तत्र महाभारते

यमनियमासनप्राणायामप्रत्याहारधारणाध्यानसमाधयोऽष्टाङ्गानि योगस्य ।

1 शा—३०६, ५१–५३.
2 भगवद्गीता—२, ६६.
3 भगवद्गीता—६, ४६–४७.

मार्कण्डेयपुराणे

[1]प्रागेवाऽऽत्माऽऽत्मना ज्ञेयो योगिनां स हि दुर्जयः ।
कुर्वीत तज्जये यत्नं तस्योपायं शृणुष्व मे ॥
प्राणायामैर्देहदोषान् धारणाभिश्च किल्बिषम् ।
प्रत्याहारेण संसर्गान् ध्यानेनाऽनीश्वरान् गुणान् ॥

'दोषान्' स्वेदवेपथुप्रभृतीन् । 'संसर्गान्' विषयसंबन्धान् । 'अनीश्वरान्' प्राकृतान् ।

देवलः

रागद्वेषमोहाः कषाया उच्यन्ते । तेषां यमनियमलक्षणेन तपसा पञ्चविधेन तत्त्वज्ञानेन चाऽपकर्षणम् । कषायपाचनम् ।

विष्णुपुराणे

[2]ब्रह्मचर्यमहिंसां च सत्यास्तेयापरिग्रहान् ।
सेवेत योगी निष्कामो योग्यतां सुमना नयन् ॥
स्वाध्यायशौचसन्तोषतपांसि नियतात्मवान् ।
कुर्वीत ब्रह्मणि तथा परस्मिन्प्रवणं मनः ॥
एते यमाः सनियमाः पञ्च पञ्च च कीर्तिताः ।
विशिष्टफलदाः काम्या निष्कामानां विमुक्तिदाः ॥
एकं तत्राऽऽसनादीनां समास्थाय गुणैः पुनः ।
[3]यमाख्यैर्नियमाख्यैश्च युञ्जीत नियतो यतिः ॥

1 ३९, ९–१०.

2 ६, ७, ३६.

3 समाख्यैः इति उद. मातृ.

वायुपुराणे

[1]पद्ममूर्द्धासनं वाऽपि तथा स्वस्तिकमासनम् ।
आस्थाय योगी युञ्जीत कृत्वा तत्प्रवणं मनः ॥

मार्कण्डेयपुराणे

[2]प्राणापाननिरोधश्च प्राणायाम उदाहृतः ।

विष्णुपुराणे

[3]प्राणाख्यमनिलं वश्यमभ्यासात् कुरुते हि यः ।
प्राणायामः स विज्ञेयः सबीजोऽबीज एव च ।

'सबीजो' मन्त्राद्यालम्बनः ।

बृहस्पतिः

[4]बद्ध्वाऽऽसनं नियम्याऽसून्स्मृत्वा चर्य्यादिकं तथा ।
सन्निमीलितदृङ्मौनी प्राणायामं समभ्यसेत् ॥
सव्याहृतिं सप्रणवां गायत्रीं शिरसा सह ।
त्रिः पठेदायतप्राणः प्राणायामः स उच्यते ॥
[5]आदानं बोधमुत्सर्गं वायोस्तिस्रः समभ्यसेत् ।
ब्रह्माणं केशवं शम्भुं ध्यायन् मुच्येत बन्धनात् ॥
रक्तं[6] पितामहं ध्यायेद्विष्णुं नीलोत्पलप्रभम् ।
श्वेतं त्र्यक्ष्यं हरं चैव संसारार्णवतारणम् ॥

1 ११-१३.
2 ३९, १२.
3 ३, ७, ४०.
4 आचारकाण्डम्—३१, ३२.
5 संस्कारकाण्डम्—५५९.
6 आचारकाण्डम्—३८ ; प्रजापतिमिति मु. पु. पाठः

अतीतानागतानर्थान् विप्रकृष्टांस्तिरोहितान् ।
विजानातीन्दुसूर्यर्क्षं ग्रहाणां ज्ञानसंपदम् ॥
तुल्यप्रभावस्तु यदा योगी प्राप्नोति संविदम् ।
तदा संविदिति ख्याता प्राणायामस्य सा स्थितिः ॥
यान्ति प्रसादं येनाऽस्य मनः पञ्च च धातवः ।
इन्द्रियाणीन्द्रियार्थाश्च स प्रसाद इति स्मृतः ॥

'पञ्चधातवः' पृथिव्यादि पञ्चभूतानि ।

तथा

[1]प्राणायामा दश द्वौ च धारणा साऽभिधीयते ।
द्वे धारणे स्मृतो योगो योगिभिस्तत्त्वदर्शिभिः ॥
तथा वै योगयुक्तस्य योगिनो नियतात्मनः ।
सर्वदोषाः प्रणश्यन्ति स्वस्थश्चैवोपजायते ॥
वीक्षते च परं ब्रह्म प्राकृतांस्तु गुणान् पृथक् ।
व्योमादिपरमाणुश्च तथाऽऽत्मानमकल्मषम् ॥
इत्थं योगी यताहारः प्राणायामपरायणः ।
जितां जितासनो भूमिमारोहेत यथा गृहम् ॥
दोषान्मोहं तथा व्याधिमाक्रान्ता भूरनिर्जिता ।
विवर्द्धयति नारोहेत्तस्माद्भूमिमनिर्मितम्[2] ॥
[3]उपायश्चाऽत्र कथितो योगिभिः परमर्षिभिः ।
येन व्याध्यादयो दोषा न जायन्ते हि योगिनः ॥
यथा तोयार्थिनस्तोयं पद्मनालादिभिः शनैः ।
आपिबेयुस्तथा योगी पिबेद्वायुं जितश्रमः ॥

1 ३९, ३५.
2 अनिर्जिताम्—स.
3 ३९, ४२–४६.

प्राङ्नाभ्यमुदरे चाऽथ तृतीया च तनोपरि[1] ।
कण्ठे मुखे नासिकाग्रे नेत्रभ्रूमध्यमूर्द्धसु ॥
किञ्चित् परस्यात्तस्मिंस्तु धारणा परमा स्मृता ।
दशैता धारणाः प्राप्य प्राप्नोत्यक्षरसाम्यताम् ॥
[2]प्राणानामुपसंरोधात् प्राणायाम उदाहृतः ।
धारणेत्युच्यते ज्ञेयं धार्यते यन्मनोऽनया ॥
शब्दादिभ्योऽनिवृत्तानि यदक्षाणि यतात्मभिः ।
प्रत्याह्रियन्ते योगेन प्रत्याहारस्ततस्स्मृतः ॥

'अनिवृत्तानि' स्वविषये संसक्तानि । 'योगेन चित्तवृत्तिनिरोधेन', 'योगश्चित्तवृत्तिनिरोध' इति पातञ्जलेऽभिधानात् ।

देवलः

अणुत्वाच्चापल्याल्लाघवाद्बलवत्त्वाद्वा योगभ्रष्टस्य मनसः पुनः प्रत्यानीयार्थे योजनं प्रत्याहारः ।

'अर्थो' त्वाऽत्मा ।

विष्णुपुराणे

[3]शब्दादिष्वनुरक्तानि निगृह्याणीति योगवित् ।
कुर्याच्चित्तानुकारीणि प्रत्याहारपरायणः ॥
पश्यता परमा तेन जायतेति च नात्मनाम् ।
इन्द्रियाणामवश्यैस्तै र्न योगी योगसाधकः ॥

1 तथोरसि इति स.
2 ३९, ४०–४१.
3 ६, ७, ४३.

देवलः

शरीरेन्द्रियमनोबुध्यात्मनां धरणाद्धारणा ।

हारीतः

मनसो धारणं अन्तःशरीरे, हृदि, ललाटे, परंब्रह्मात्मज्योतिरादित्यमहीनभस्सु जलभाजनवन्मनसस्त्वेकधारणाद्धारणा ।

'अन्तर्देहे', हृदयादौ, बहिर्वापहृतपाप्मादि गुणक परब्रह्मादौ, यन्मनसो धारणं सा धारणा। 'जलभाजनवत्' इति, यद्भाजनगतं जलं तस्य भाजन एव स्थितिः। एव मेतेषु सत्सु, गतिर्मनसोऽवस्थितिरेकत्र देशविशेषे धारणाज्ञायत इति। 'एवं च देशवन्न चित्तस्य' यः साधारण उक्ता स्यात्। तथा च पातञ्जलसूत्रम्। "देशवन्न चित्तस्य धारणा" इति।

शङ्खः

मनस्संयमनं तज्ज्ञै धारणेति निगद्यते ॥

विष्णुपुराणे

[1]प्राणायामेन पवनैः प्रत्याहारेण चेन्द्रियैः ।
वशीकृतं ततः कुर्यात् स्थितं चेतः शुभाश्रये ॥

महाभारते

[2]सुस्थेयं क्षुरधारासु निशितासु महामते ।
धारणासु सुयोगस्य दुःस्थेयमकृतात्मभिः ॥

1 ६, ७, ४५.
2 शा—३०६, ५४.

विपन्ना धारणा यस्मान्नयन्ति न शुभां गतिम् ।
नेत्रहीनं यथा नारं पुरुषाणां तु वै नृप ॥
यस्तु तिष्ठति कौन्तेय धारणासु यथाविधि ।
मरणं जन्मदुःखं च सुखं च परिमुञ्चति ॥
योगकृत्येषु योगानां ध्यानमेव परं बलम् ।
तथाऽपि द्विविधं ध्यानमाहुर्वेदविदो जनाः ॥
एकाग्रभावं मनसः प्राणायामास्तथैव च ।
तद्रूपप्रत्ययायैकसन्ततिश्चान्यनिःस्पृहा ॥
तद्ध्यानं प्रथमैरङ्गैः षड्भिर्निष्पाद्यते नृप ।
तस्यैव कल्पनाहीनस्वरूपग्रहणं हि यत् ॥
मनसा ध्याननिरताद्यः समाधिः सोऽभिधीयते ।

अथाहारादिनियमः

तत्र मार्कण्डेयपुराणे

[1]भैक्षं यवागू तक्रं वा पयो यावकमेव वा ।
फलं मूलं विपक्वं वा कणपिण्याकसक्तवः ॥
इत्येते वै शुभाहारा योगिनां सिद्धिकारकाः ।

महाभारते

[2]कणानां भक्षणो युक्तः पिण्याकस्य च भक्षणे ।
स्नेहानां वर्जने युक्तो योगी बलमवाप्नुयात् ॥
भुञ्जानं यावकं भक्ष्यं दीर्घकालमरिन्दम ।
एकदाऽसौ विशुद्धात्मा योगी बलमवाप्नुयात् ॥

1 ४१, ११.
2 शा—३०६, ४३-४५.

पक्षान्मासान् ऋतून् स्थित्वा सञ्चरंश्च ग्रहांस्तथा ।
अपः पीत्वा पयोमिश्राः योगी बलमवाप्नुयात् ॥

वायुपुराणे

[1]योगिनां चैव सर्वेषां श्रेष्ठं चान्द्रायणं स्मृतम् ।
एकंद्वे त्रीणि चत्वारि शक्तितो वा समाचरेत् ॥

महाभारते

मोक्षधर्मेषु नियतो लब्धाहारो जितेन्द्रियः ।
प्राप्नोति ब्रह्मणःस्थानं यत्परं प्रकृतेर्ध्रुवम् ॥

तथा

सदुष्करं ब्रह्मचर्यमुपायं तत्र मे शृणु ।
संप्रवर्त्तमुदीर्णं च निगृह्णीयाद्विजोत्तमः ।
योषितां न कथा श्राव्या न निरीक्ष्या निरम्बराः ॥
कथञ्चिद्दर्शनादासां दुर्बलानाऽऽविशेद्रजः ।
रागोत्पत्तौ चरेत्कृच्छ्रमह्नस्त्रिः प्रविशेदपः ॥
मग्नः स्वप्ने[2] च मनसा त्रिर्जपेदघमर्षणम् ।
पाप्मानं त्रिर्दहत्येवं अन्तर्भूतरजोमयम् ॥

'दुर्बलान्' अजितेन्द्रियान् । 'स्वप्ने च' स्त्रीविषयानुरागोत्पत्तौ इत्यर्थः ।

मार्कण्डेयपुराणे

[3]शून्येष्वेवावकाशेषु वनेषु च गुहासु च ।
नित्ययुक्तः सदा योगी ध्यानं सम्यगुपाक्रमेत् ॥

1 १६, १६.
2 स्वल्पेन मनसा—ना. and स.
3 ४१, २१.

[1]सशब्देऽग्निजलाभ्याशे जीर्णे गोष्ठे चतुष्पथे ।
शुष्कपर्णचये नद्यां श्मशाने ससरीसृपे ॥
सभये कूपतीरे वा चैत्यवल्मीकसञ्चये ।
देशेष्वेतेषु तत्त्वज्ञो योगाभ्यासं विवर्जयेत् ॥

महाभारते

[2]विमुक्तः सर्वसङ्गेभ्यो लघ्वाहारो जितेन्द्रियः ।
सपूर्वापररात्रिषु धारयेन्मनसाऽऽत्मनि ॥
[3]मूत्रोत्सर्गे पुरीषे च भोजने च नराधिप ।
त्रिकालं नाऽभियुञ्जीत शेषं युञ्जीत तत्परः ॥

मार्कण्डेयपुराणे

[4]नाऽऽध्मातः क्षुधितः श्रान्तो न च व्याकुलचेतनः ।
युञ्जीत योगं राजेन्द्र योगी सिध्यर्थमादृतः ॥
नाऽतिशीते न चोष्णे वा द्वन्द्वे नाऽप्यनिलात्मके ।
कालेष्वेतेषु युञ्जीत न योगं ध्यानतत्परः ॥
[5]सत्त्वस्याऽनुपपत्तौ च देशे काले विवर्जिते ।
नाऽसतो दर्शनं योगे तस्मात्तं परिवर्जयेत् ॥
दोषानेताननादृत्य मूढत्वाद्यो युनक्ति वै ।
विघ्नाय तस्य ये दोषा जायन्ते तान्निबोध मे ॥
बाधिर्यं जडता लोपः स्मृतेर्मूकत्वमन्धता ।
ज्वरश्च जायते सद्यः तद्वदज्ञानयोगिनः ॥

1 ३९, ४८, ५०.
2 शा—३११, १३.
3 शा—३११, ९.
4 ३९, ४६–४७.
5 ३९, ५०–५३.

अथ दोषचिकित्सा

तत्र वायुपुराणे

[1]तेषां चिकित्सां वक्ष्यामि दोषाणां च यथाक्रमम् ।
यथा शाम्यन्ति ते दोषाः प्राणायामसमुत्थिताः ॥
स्निग्धां यवागूमत्युष्णं भुक्त्वा तत्र तु धारयेत् ।
अनेन क्रमयोगेन वातगुल्मं प्रणश्यति ॥
तदावर्त्तप्रतीकारमिदं कुर्याच्चिकित्सितम् ।
सर्वगात्रप्रकंपेन समारब्धस्य योगिनः ॥
इमां चिकित्सां कुर्वीत यथा संपद्यते सुखम् ।
मनसा पर्वतं काये विष्टम्भीकृत्य धारयेत् ॥
उरोघाते [2]रसस्थाने कण्ठदेशे च धारयेत् ।
[3]वचोघाते तथा वाचि बाधिर्ये श्रोत्रयोस्तथा ॥

'समारब्धस्य' क्रान्तस्य । विष्टंभीकृत्य धारयेत् पर्वतं धारयेत् ।

मार्कण्डेयपुराणे

[4]अमानुषं सत्त्वमन्तर्योगिनं प्रविशेद्यदि ।
वाय्वग्निधारणादेनं देहसंस्थं विनिर्दहेत् ॥

'अमानुषं सत्त्वं' रक्षःपिशाचादि ।

वायुपुराणे

[5]कृष्णसर्पोपबाधे तु धारयेत् हृदयोदरे ।
महर्जनस्तपःसत्यं हृदि कृत्वा तु धारयेत् ॥

1 ११, ३९.
2 उरस्स्थानं, इति, मु. पाठः
3 त्वचोऽवघाते तां वाचि बाधिर्ये श्रोत्रयोस्तथा, इति, मु. पाठः
4 ३९, ६०.
5 ११, ५५.

विषस्य तु पलं पीत्वा विशल्यां धारयेत्ततः ।
सर्वतः सनगां पृथ्वीं कृत्वा मनसि धारयेत् ॥
हृदि कृत्वा समुद्रांश्च तथा सर्वांश्च देवताः ।
सहस्रेण घटानां तु युक्तः स्नायीत योगवित् ॥
उदके कण्ठमात्रे तु धारणां मूर्ध्नि धारयेत् ।
प्रतिस्रोतोपविष्टस्तु[1] धारयेत्सर्वगात्रकम् ॥
शीर्णार्कपर्णपुटकैः पिबेत् वल्मीकमृत्तिकाम् ।
चिकित्सितविधिर्ह्येष [2]क्रमशो योगिनां हितः ॥
व्याख्यातस्तु समासेन योगदृष्टेन हेतुना ।

अथ योगविधिः

[3]तत्र महाभारते

योगी युञ्जीत सततमात्मानं रहसि स्थितः ।
एकाकी यतचित्तात्मा निराशीरपरिग्रहः ॥
शुचौ देशे प्रतिष्ठाप्य स्थिरमासनमात्मनः ।
नात्युच्छ्रितं नातिनीचं चैलाजिनकुशोत्तरम् ॥
तत्रैकाग्रं मनः कृत्वा यतचित्तेन्द्रियक्रियः ।
उपविश्याऽऽसने युञ्ज्याद्योगमात्मविशुद्धये ॥
समं कायशिरोग्रीवं धारयन्नचलं स्थिरः ।
संप्रेक्ष्य नासिकाग्रं स्वं दिशश्चाऽनवलोकयन् ॥
प्रशान्तात्मा विगतभीः ब्रह्मचारिव्रते स्थितः ।
मनः संयम्य मच्चित्तो युक्त आसीत मत्परः ॥

1 विषाविष्टो for पविष्टस्तु in printed वायुपुराण.
2 विश्रुतो योगनिर्मितः इति, मु. पाठः
3 भगवद्गीता—६, १०–१४.

वायुपुराणे

[1]ॐकारं प्रथमं कृत्वा चन्द्रसूर्यौ नमस्य च ।
आसनं स्वस्तिकं कृत्वा पद्ममर्द्धासनं तथा ॥
समजानुरेकजानुर्वा उत्तानस्वस्तिकोऽपि वा ।
समो दृढासनो भूत्वा संहृत्य चरणावुभौ ॥
पार्ष्णिभ्यां वृषणौ च्छाद्य तथा प्रजननं ततः ।
इन्द्रियाणीन्द्रियार्थेभ्यो मनः पञ्च च मारुतान् ॥
निगृह्य समवायेन प्रत्याहारमुपक्रमेत् ।
यस्तु प्रत्याहरेत् कामान् कूर्मोऽङ्गानीव सर्वशः ॥
तथाऽत्मरतिरेकस्थः पश्यत्यात्मानमात्मना ।
पूरयित्वा समीरं तु सबाह्याभ्यन्तरः शुचिः ॥
आकण्ठनाभियोगेन प्रत्याहारमुपक्रमेत् ।

[2]याज्ञवल्क्यः

ऊरुस्थोत्तानचरणः सव्ये न्यस्येतरं करम् ।
उत्तानं किञ्चिदुन्नम्य[3] मुखं विष्टभ्य चोरसा ॥
निमीलिताक्षः सत्वस्थो दन्तैर्दन्तानसंस्पृशेत्[4] ।
तालुस्थाचलजिह्वश्च संवृतास्यः सुनिश्चलः ॥
सन्निरुद्धेन्द्रियग्रामो नातिनीचोच्छ्रितासनः ।
द्विगुणं त्रिगुणं वाऽपि प्राणायाममुपक्रमेत् ॥

'सत्त्वस्थः' कामक्रोधादिरहितः ।

1 ११, १३.
2 ३, १९८–२००.
3 उन्नम्य इति विज्ञानेश्वरपाठः, उन्नम्य इति अपरार्कपाठः
4 संस्पृशन् इति अपरार्कमिताक्षरापाठः

देवलः

देवतायतनं शून्यागारगिरिकन्दरनदीपुलिनगुहारण्यानामन्यतमे शुचौ निराबाधे विभक्ते समुपस्तीर्णमानसं कृत्वा, तस्मिन्लघ्वाहारो निरामयः, शुचिः शिरोग्रीवापाणिपादौ च समास्थाप्य, शरीरमृजुं समाधाय, शिश्नवृषणावपीडयन्, यत्किञ्चिदपाश्रित्य स्वस्तिकं भद्रकं मण्डलं वाऽधिष्ठाय, उदङ्मुखः, प्राङ्मुखो वा, दन्तैर्दन्तानसंस्पृश्य, अक्षिभ्यामव्यक्तमनुन्मील्य च, मुखनासिकाभ्यां ऐक्यावसन्नाग्रस्थितदृष्टिः, सर्वेन्द्रियाणि संहृत्योर्ध्वं प्राणानुदीर्य, मनसा तच्चिन्तनं ध्यानम् ।

[1]महाभारते

नाऽत्यश्नतस्तु योगोऽस्ति न चैकान्तमनश्नतः ।
न चाऽतिस्वप्नशीलस्य जाग्रतो नैव चाऽर्जुन ॥
युक्ताहारविहारस्य युक्तचेष्टस्य कर्मसु ।
युक्तस्वप्नावबोधस्य योगो भवति दुःखहा ॥
तथाच देवमुपशान्तेन दान्तेनैकान्तशीलिना ।
आत्मारामेण वृद्धेन यो ह्यात्मा स नसंशयः ॥

दक्षः

कषायमोहविक्षेपलज्जाशङ्कादिचेतसः ।
व्यापारास्तु समाख्याताः तैर्हीनं वशमानयेत् ।
कुटुम्बैः पञ्चभिर्ग्राममषष्ठं तत्र महान्मनः ।
देवासुरमनुष्यैर्वा संजेतुं नैव शक्यते ॥

1 भगवद्गीता—६, १६, १७.

बलेन परराष्ट्राणि गृह्णन् शूरस्तु नोच्यते ।
[1]जितेन्द्रियेन्द्रियग्रामः स शूरः कथ्यते बुधैः ॥

महाभारते

[2]श्रीभगवानुवाच ।

सङ्कल्पप्रभवान् कामान् त्यक्त्वा सर्वानशेषतः ।
मनसैवेन्द्रियग्रामं विनियम्य समन्ततः ॥
शनैःशनैरुपरमेत् बुद्ध्या धृतिगृहीतया ।
आत्मसंस्थं मनः कृत्वा न किञ्चिदपि चिन्तयेत् ॥
यतो यतो निश्चरति मनश्चञ्चलमस्थिरम् ।
ततस्ततो नियम्यैतदात्मन्येव वशं नयेत् ॥
युञ्जन्नेवं सदाऽऽत्मानं योगी विगतकल्मषः ।
सुखेन ब्रह्मनिर्वाणमत्यन्तं[3] सुखमश्नुते ॥
सर्वभूतस्थमात्मानं सर्वभूतानि चाऽऽत्मनि ।
ईक्षते योगयुक्तात्मा सर्वत्र समदर्शनः ॥
यो मां पश्यति सर्वत्र सर्वं च मयि पश्यति ।
तस्याऽहं न प्रणश्यामि स च मे न प्रणश्यति ॥
सर्वभूतस्थितं यो मां भजत्येकत्वमास्थितः ।
सर्वथा वर्तमानोऽपि स योगी मयि वर्तते[4] ॥
आत्मौपम्येन सर्वत्र समं पश्यति योऽर्जुन ।
सुखं वा यदि वा दुःखं स योगी परमो मतः ॥

1 जितो येनेन्द्रियग्रामः स शूरः कथ्यते बुधैः—ना. and स.

2 भगवद्गीता—६, २४–२८–३५; श्रीभगवानुवाच appears only at the beginning of the chapter.

3 ब्रह्मसंस्पर्शम् इति ना. स. and श्री शङ्करभाष्यपाठश्च.

4 उदयपुरमातृकायां 'न स भूयोऽपि जायते' इति पाठः

अर्जुन उवाच ।

यो यो योगस्त्वया प्रोक्तः साम्येन मधुसूदन ।
एतस्याऽहं न पश्यामि चञ्चलत्वात् स्थितिं स्थिराम् ॥
चञ्चलं हि मनः कृष्ण प्रमाथि बलवद्दृढम् ।
तस्याऽहं निग्रहं मन्ये वायोरिव सुदुष्करम् ॥

श्रीभगवानुवाच ।

असंशयं महाबाहो मनो दुर्निग्रहं चलम् ।
अभ्यासेन तु कौन्तेय वैराग्येण च गृह्यते ॥
असंयतात्मना योगो दुष्प्राप इति मे मतिः ।
वश्यात्मना तु यतता शक्योऽवाप्तुमुपायतः ॥

'न प्रणश्यामि' न तिरो भवामि । 'सर्वथा वर्तमानोऽपि' मयि वा बुद्धिविकारे वा प्रपञ्चे ब्रह्मबुद्ध्या । 'चेतसा वर्तमानो' मय्येवाऽसौ वर्त्तत इत्यर्थः ।

<u>तथा</u>

पिण्डीकृत्येन्द्रियग्राममासीनः काष्ठवन्मुनिः ।
शब्दं न विन्देच्छ्रोत्रेण स्पर्शं चाऽपि न वेदयेत् ॥
रूपं न चक्षुषा विन्द्याज्जिह्वया च रसांस्तथा ।
श्रेयांस्यपि च सर्वाणि जह्याद्योगेन योगवित् ॥
पञ्चवर्गप्रमाथीनि नेच्छेच्चैतानि वीर्यवान् ।
तमो मनसि संसृज्य पञ्चवर्गविचक्षणः ॥
समादध्यान्मनो भ्रान्तमिन्द्रियार्थैः सपञ्चभिः ।
निःसंसारि निरालम्बं पञ्चद्वारं चलाचलम् ॥
पूर्वध्यानपथे धीरः सदा दध्यान्मनोन्तरम् ।
इन्द्रियाणि मनश्चैव यदा पिण्डीकरोत्ययम् ॥

एवं ध्यानपथः पूर्णो मया समनुवर्णितः ।
तस्य तत्पूर्वसंरुद्धमात्मषष्ठमनोन्तरम् ।
स्फुरिष्यति समुद्भ्रान्तं विद्युदम्बुधरो यथा ॥
जलबिन्दुर्यथा लोकपर्णस्थः सर्वतश्चलः ।
एवमेवाऽस्य तच्चित्तं भवति ध्यानवर्त्मनि ॥
समाहितं क्षणं किञ्चित् ध्यानवर्त्मनि तिष्ठति ।
पुनर्वायुपथभ्रान्तं मनो भवति वायुवत् ॥
अनिर्वेदो गतक्लेशो गततन्द्री विमत्सरः ।
समादध्यात्पुनश्चेतो ध्यानेन ध्यानयोगवित् ॥
विचारश्च वितर्कश्च विवेकश्चोपजायते ।
मुनेः समादधानस्य प्रथमं ध्यानमात्मनः ॥
मनसा क्लिश्यमानस्तु स समाधानकाम्यया ।
न निर्वेदं मुनिर्गच्छेत्कुर्यादेवाऽऽत्मनो हितम् ॥
स्वयमेव मनश्चैकं पञ्चवर्गश्च भारत ।
पूर्वं ध्यानपथं प्राप्य नित्ययोगेन शाम्यति ॥
न तत्पुरुषकारेण न च दैवेन केनचित् ।
सुखमेष्यसि तत्तस्य यदेवं संयतात्मनः ॥
सुखेन तेन संयुक्तो वंस्यते ध्यानकर्मणि ।

'पिण्डीकृत्य' प्रत्याहृत्य ।

दक्षः

लोको वशीकृतो यैस्तु यैरात्मा च वशीकृतः ।
इन्द्रियार्थान् यतस्तेषां योगं वक्ष्याम्यशेषतः ॥
नाऽरण्यसेवनाद्योगो नाऽनेकग्रन्थचिन्तनात् ।
व्रतैर्यज्ञैस्तपोभिर्वा न योगः कस्यचिद्भवेत् ॥

न वै पद्मासनाद्योगो न नासाग्रनिरीक्षणात् ।
न वै शास्त्रातिरिक्तेन शौचेन भवति क्वचित् ॥
न मौनमन्त्रकुहकैरनेकैः कुसृतैस्तथा ।
लोकयात्राभियुक्तस्य न योगः कस्यचिद्भवेत् ॥
अभियोगात्तथाऽभ्यासात्तस्मिन्नेव विनिश्चयात् ।
पुनः पुनरनुद्वेगाद्योगः सिध्यति नाऽन्यथा ॥
आत्मचिन्ताविनोदेन शौचक्रीडनकेन च ।
सर्वसत्त्वसमत्वेन योगः सिध्यति नाऽन्यथा ।
यस्त्वात्ममिथुनो नित्यमात्मक्रीडस्तथैव च ॥
आत्मानन्दश्च सततमात्मन्येव समाहितः ॥
आत्मन्येव च सन्तुष्टः सन्तुष्टो नाऽन्यमानसः ।
आत्मन्येव च तृप्तस्य योगः सिध्यति नाऽन्यथा ॥
स्वप्नेऽपि योऽभियुक्तश्च जाग्रदेव विशेषतः ।
ईदृक्चेष्टः स्मृतः श्रेष्ठो वरिष्ठो ब्रह्मवादिनाम् ॥

[1]याज्ञवल्क्यः

अनन्यविषयं कृत्वा मनोबुद्धिस्मृतीन्द्रियम् ।
ध्येय आत्मा स्थितो योऽसौ हृदये दीपवत् प्रभुः ॥
यथाविधानेन पठन् सामगायत्र्यमव्ययम्[2] ।
सावधानस्तथाऽभ्यासात्[3] परमात्माऽधिगच्छति ॥
अपरान्तकमुल्लोप्यं मद्रकं प्रकरीं तथा ।
आवैणकं सरोबिन्दुमुत्तरं गीतकानि तु ॥
ऋग्गाथा पाणिका दक्षविहिता ब्रह्मगीतिका ॥

1 ३, १११–११६.
2 सामगायमविच्युतम् इति विज्ञानेश्वरपाठः ;
सामगायत्यविस्वरम् इति अपरार्कपाठः (पृ. ९९०.)
3 तदभ्यासात् परं ब्रह्माधिगच्छति इति मिताक्षरापाठः

गेयमेतत्तदभ्यासकारणान्मोक्षसंज्ञकम् ।
वीणावादनतत्त्वज्ञः श्रुतिजातिविशारदः ॥
तालज्ञश्चाऽप्रयासेन मोक्षमार्गं नियच्छति ।
गीतज्ञो यदि गीतेन नाऽऽप्नोति परमं पदम् ।
रुद्रस्याऽनुचरो भूत्वा तेनैव सह मोदते ॥

'अपरान्तकमुल्लोप्यम्' अत्र प्रकर्यो रेणकानि स्वरबिन्दुसहितमुत्तरं चेति । एतानि प्रकरणाख्यानि सप्तगीतकानि ऋग्गाथाद्याः चतस्रो गीतिकाः। एतदपरान्तकादिगीतजातं परमात्मतया चिन्तितं मोक्ष साधनत्वान्मोक्षसंज्ञकं ज्ञातव्यम् । तदभ्यासस्यैकाग्रताप्रतिपादनद्वारेणौत्सुक्यापत्तिहेतुत्वात् । 'श्रूयत' इति । श्रुतिर्द्वाविंशतिधा । सा तु स्वरेषु । तथाहि षड्जमध्यमपञ्चमाः प्रत्येकं चतुःश्रुतयः । ऋषभधैवते प्रत्येकं त्रिश्रुती । गान्धारनिषादौ प्रत्येकं द्विश्रुती । जातयस्तु षड्जातयः शुद्धाः । सङ्करजास्त्वेकादश । एवमष्टादशविधाः । 'गीतज्ञो यदि' इति । गीतिज्ञो यदि कथञ्चिद्विघ्नतो योगस्थः सन्मुच्यते तदा रुद्रानुचरत्वं लभत इत्यर्थः ।

॥ १८ ॥

युक्तलक्षणम्

तत्र महाभारते

युक्तस्य तु महाराज लक्षणान्युपधारयेत् ।
निर्वाते तु यथा दीपो ज्वलेत्स्नेहसमन्वितः ॥
निश्चलोर्द्ध्वशिखस्तद्वद्युक्तमाहुर्मनीषिणः ।
पाषाण इव मेघोत्थैर्यथा बिन्दुभिराहतः ॥
नालं चालयितुं शक्यः तथा युक्तस्य लक्षणम् ।
शङ्खदुन्दुभिनिर्घोषैः विविधैर्गीतवादितैः ॥
क्रियमाणैर्न कम्पेच्च युक्तस्यैतन्निदर्शनम् ।
तैलपूर्णं यथा पात्रं कराभ्यां धारयन्नधः ॥
सोपानमारुहेद्भीतः तर्ज्यमाणोऽसिपाणिभिः ।
संयतात्मा भयात्तेषां न पात्राद्बिन्दुमुत्सृजेत् ॥
तथैवोत्तरमाणस्य एकाग्रमनसस्तथा ।
स्थिरत्वादिन्द्रियाणां च निश्चलत्वे तथैव च ॥
एवं युक्तस्य तु मुनेर्लक्षणान्युपधारयेत् ।
संयुक्तः पश्यति ब्रह्म यत्तत्परममव्ययम् ॥
महतस्तमसो मध्ये स्थितं ज्वलनसन्निभम् ।
एतेन केवलं याति त्यक्त्वा देहमसाक्षिकम् ॥
कालेन महता राजन् श्रुतिरेषा सनातनी ।

तथा

स्थिरीकृत्येन्द्रियग्रामं मनसा मिथिलेश्वर ।
मनो बुद्ध्या स्थिरं कृत्वा पाषाण इव निश्चलः ॥

स्थाणुवच्चाऽप्यकम्पः स्यादिगरिवच्चाऽपि निश्चलः ।
बुद्ध्या विधिविधानज्ञास्तदा युक्तं प्रचक्षते ॥
न शृणोति नचाऽऽघ्राति न रस्यति न पश्यति ।
न च स्पर्शं विजानाति न सङ्कल्पयते मनः ॥
न चाऽभिमन्यते किञ्चिन्न बुद्ध्यति च काष्ठवत् ।
तदा प्रकृतिमापन्नं युक्तमाहुर्मनीषिणः ॥

तथा

[1]यदा विनियतं चित्तमात्मन्येवाऽवतिष्ठति ।
निस्स्पृहः सर्वकामेभ्यो युक्त इत्युच्यते तदा ॥
यथा दीपो निवातस्थो नेङ्गते सोपमा स्मृता ।
योगिनो यतचित्तस्य युञ्जतो योगमात्मनः ॥
यत्रोपरमते चित्तं निरुद्धं योगसेवया ।
यत्र चैवाऽऽत्मनाऽऽत्मानं पश्यन्नात्मनि तुष्यति ॥
सुखमात्यन्तिकं यत्तद्बुद्धिग्राह्यमतीन्द्रियम् ।
वेत्ति यत्र न चैवाऽयं स्थितश्चलति तत्त्वतः ॥
यं लब्ध्वा चाऽपरं लाभं मन्यते नाऽधिकं ततः ।
यस्मिन् स्थितो न दुःखेन गुरुणाऽपि विचाल्यते ॥
तं विद्याद्दुःखसंयोगवियोगं योगसंज्ञितम् ।
स निश्चयेन योक्तव्यो योगो निर्विघ्नचेतसा ॥

तथा

[2]ज्ञानविज्ञानतृप्तात्मा कूटस्थो विजितेन्द्रियः ।
युक्त इत्युच्यते योगी समलोष्टाश्मकाञ्चनः ॥

'कूटस्थो' निर्विकार इत्यर्थः ।

1 गीता—६, १८–२३.
2 गीता—६, ८.

॥ १९ ॥

अथ ध्येयस्वरूपम्

[1]विष्णुः

ऊरुस्थोत्तानचरणः सव्ये करे करं इतरं न्यस्य तालुस्थाचलजिह्वो दन्तैर्दन्तान् संस्पृशन्, स्वं नासिकाग्रं पश्यन्, दिशश्चाऽनवलोकयन्, विगतभीः, प्रसन्नात्मा,[2] चतुर्विंशत्या तत्त्वैर्व्यतीतं चिन्तयेत् ॥ १ ॥ नित्यमतीन्द्रियमगुणम् । शब्दस्पर्शरूपरसगन्धातीतं, सर्वस्थमतिस्थूलम् ॥ २ ॥ सर्वगमतिसूक्ष्मम् ॥ ३ ॥ सर्वतः पाणिपादं, सर्वतोऽक्षिशिरोमुखं, सर्वतः सर्वेन्द्रियशक्तिम् ॥ ४ ॥ एवं ध्यायन् ॥ ५ ॥ ध्याननिरतस्य च संवत्सरेण योगाविर्भावो भवति ॥ ६ ॥ अथ निराकारे लक्षबन्धं कर्तुं न शक्नोति तदा पृथिव्यप्तेजोवाय्वाकाशमनोबुद्ध्यात्माव्यक्तपुरुषाणां पूर्वं पूर्वं ध्यात्वा तत्र लब्धलक्षः तत्तत् परित्यज्याऽपरमपरं ध्यायेत् ॥ ७ ॥ एवं पुरुषध्यानमारभेत ॥ ८ ॥ अत्राऽप्यसमर्थो हृदयपद्मस्याऽधोमुखस्य मध्ये दीपवत्पुरुषं ध्यायेत् ॥ ९ ॥ तत्राऽप्यसमर्थो

1 All three Mss. attribute what follows to the *Viṣṇupurāṇa*. The passage is from *Viṣṇusmṛti*, अ. ९७, १— . Even *Vīramitrodaya*, Mokṣaprakāśa, p. 359 refers to this passage as from the *Viṣṇupurāṇa*.

2 प्रशान्तात्मा इति मु. पु. (पृ. २००).

भगवन्तं वासुदेवं किरीटिनं कुण्डलिनं गदिनम् । श्रीवत्साङ्कं वनमालाविभूषितोरस्कं सौम्यरूपं चतुर्भुजं शङ्खचक्रगदापद्मधरं ध्यायेत् ॥ १० ॥ यद्यद्ध्यायेत् तदाप्नोति ध्यानगुह्यम् ॥ ११ ॥ तस्मात्सर्वमेव क्षरं त्यक्त्वाऽक्षरमेव ध्यायेत् ॥ १२ ॥ न च पुरुषं विना किञ्चिदपि अक्षरं अस्ति ॥ १३ ॥ तं प्राप्य मुक्तो भवति ॥ १४ ॥

पुरमाक्रम्य सकलं शेते यस्मान्महाप्रभुः ।
तस्मात्पुरुष इत्येवं प्रोच्यते तत्त्वचिन्तकैः ॥ १५ ॥
प्राग्रात्रापररात्रेषु योगी नित्यमतन्द्रितः ।
ध्यायेत्तु पुरुषं विष्णुं निर्गुणं पञ्चविंशकम् ॥ १६ ॥
सर्वतत्त्वात्मगम्यं च सर्वतत्त्वविवर्जितम् ।
[1सर्वेन्द्रियगुणाभासं सर्वेन्द्रियविवर्जितम् ।]
असक्तं सर्वभृच्चैव निर्गुणं गुणभोक्तृ च ॥ १७ ॥
बहिरन्तश्च भूतानामचरं चरमेव च ।
सूक्ष्मत्वात्तदविज्ञेयं दूरस्थं चाऽन्तिके च तत् ॥ १८ ॥
अविभक्तं च भूतेन विभक्तमिव च स्थितम् ।
भूतभव्यभवद्रूपं ग्रसिष्णु प्रभविष्णु च ॥ १९ ॥
ज्योतिषामपि तज्ज्योतिस्तमसः परमुच्यते ।
ज्ञानं ज्ञेयं ज्ञानगम्यं हृदि सर्वस्य विष्ठितम् ॥ २० ॥
इति क्षेत्रं तथा ज्ञानं ज्ञेयं चोक्तं समासतः ।
मद्भक्त एतद्विज्ञाय मद्भावायोपपद्यते[2] ॥ २१ ॥

1 [ ] Not found in printed विष्णुस्मृति.

2 All three manuscripts are unintelligible in parts. Text restored from printed *Viṣṇusmṛti*.

नरसिंहपुराणे

महेश्वर उवाच ।

[1]ज्ञातामृतं परं गुह्यं रहस्यमृषिसत्तम ।
वक्ष्यामि हृदि दुःखघ्नं सर्वबन्धभयापहम् ॥
तृणादि चतुरास्यान्तं भूतग्रामं चतुर्विधम् ।
चराचरं जगत्सर्वं सुषुप्तं यस्य मायया ॥
तस्य विष्णोः प्रसादेन यदि कश्चित्प्रबुध्यते ।
स निस्तरति संसारं देवानामपि दुस्तरम् ॥
भोगैश्वर्यमदोन्मत्तः तत्वज्ञानपराङ्मुखः ।
संसारे सुमहापङ्के जीर्णा गौरिव मज्जति ॥
यस्त्वात्मानं निबध्नाति कर्मभिः कोशकारवत् ।
तस्य मुक्तिं न पश्यामि जन्मकोटिशतैरपि ॥
तस्मान्नारद सर्वेशं देवानां देवमव्ययम् ।
आराधयेत्सदा सम्यग्ध्यायन् विष्णुं समाहितः ॥
यस्तं विश्वमनाद्यन्तमजं स्वात्मनि संस्थितम् ।
सर्वज्ञमचलं विष्णुं सदा ध्यायन् विमुच्यते ॥
स्वग्राह्यमक्षरं नित्यं निर्गुणं तमसःपरम् ।
सर्वदृक् शाश्वतं विष्णुं सदा ध्यायन् विमुच्यते ॥
निर्विकल्पं निराभासं निष्प्रपञ्चं निरामयम् ।
वासुदेवं सदा विष्णुं सदा ध्यायन् विमुच्यते ॥
निरञ्जनपरं शान्तमच्युतं भूतभावनम् ।
वेदगर्भं विभुं विष्णुं सदा ध्यायन् विमुच्यते ॥
सर्वभावविनिर्मुक्तमप्रमेयमलक्षणम् ।
निर्वाणमनघं विष्णुं सदा ध्यायन् विमुच्यते ॥

1 १७, ११–२८.

अमृतं परमानन्दं सर्वपापविवर्जितम् ।
ब्रह्म ज्ञेयं शिवं विष्णुं सदा ध्यायन् विमुच्यते ॥
योगेश्वरं पुराणाख्यं स्वशरीरगुहाशयम् ।
अमात्रमव्ययं विष्णुं सदा ध्यायन् विमुच्यते ॥
शुभाशुभविनिर्मुक्तमूर्मिषट्कपरं प्रभुम् ।
तं वेद्यममलं विष्णुं सदा ध्यायन् विमुच्यते ॥
सर्वद्वन्द्वविनिर्मुक्तं सर्वदुःखविवर्जितम् ।
अप्रतर्क्यं सदा विष्णुं सदा ध्यायन् विमुच्यते ॥
अनामगोत्रमद्वैतं चतुर्थं परमं पदम् ।
तं सर्वहृद्गतं विष्णुं सदा ध्यायन् विमुच्यते ॥
अरूपं सत्यसङ्कल्पं शुद्धमाकाशवत् परम् ।
एकाग्रमनसा विष्णुं सदा ध्यायन् विमुच्यते ॥
सर्वात्मकं स्वभावस्थमात्मचैतन्यरूपकम् ।
शुभ्रमेकाक्षरं विष्णुं सदा ध्यायन् विमुच्यते ॥
कालातीतं त्रिकालज्ञं विश्वेशं लोकसाक्षिणम् ।
सर्वस्मादुत्तरं विष्णुं सदा ध्यायन् विमुच्यते ।
[1]विष्णौ प्रतिष्ठितं विश्वं विष्णुर्विश्वे प्रतिष्ठितः ॥
विश्वेश्वरमजं विष्णुं सदा ध्यायन् विमुच्यते ।

तथा

[2]ध्येयः सदा सवितृमण्डलमध्यवर्त्ती
नारायणः सरसिजासनसन्निविष्टः ।
केयूरवान् मकरकुण्डलवान् किरीटी
हारी हिरण्मयवपुर्धृतशङ्खचक्रः ॥

1 १७, ३२.
2 २६, १७.

<u>शङ्खः</u>

हृत्स्थस्य ध्यानयोगेन देवदेवस्य दर्शनम् ।
ध्यानं प्रोक्तं प्रवक्ष्यामि ध्यानयोगमतः शुभम् ॥
हृदिस्था देवतास्सर्वा हृदि प्राणः प्रतिष्ठितः ।
हृदि ज्योतींषि सूर्यश्च हृदि सर्वं प्रतिष्ठितम् ॥
स्वदेहमरणिं कृत्वा प्रणवं तूत्तरारणिम् ।
ध्याननिर्मन्थनाभ्यासाद्विष्णुं पश्येद्धृदि स्थितम् ॥
रविमध्ये स्थितः सोमः सोममध्ये हुताशनः ।
तेजोमध्ये स्थितं सत्वं सत्वमध्ये स्थितोऽच्युतः ॥
[1]अणोरणीयान्महतो महीयान्
आत्मा गुहायां निहितोऽस्य जन्तोः ।
तेजोमयं पश्यति वीतशोको
धातुप्रसादान्महिमानमीशम् ॥
एष देवस्तु मर्त्यानां पटैरिव विधीयते ।
अज्ञानपटसंवीतैरिन्द्रियैर्विषयैः श्रुतिः ॥
एष वै पुरुषो विष्णुर्व्यक्ताव्यक्तः सनातनः ।
एष धाता विधाता च प्रधानं निष्कलः शिवः ।
[2]वेदाऽहमेतं पुरुषं महान्त-
मादित्यवर्णं तमसः परस्तात् ।
तं वै विदित्वा न बिभेति मृत्यो-
र्नाऽन्यः पन्था विद्यतेऽयनाय ॥

1 तैत्तिरीयारण्यकम्—२, ४, १०, १०, १.
महानारायणोपनिषत्—८, ३.
कठोपनिषत्—२, २० ; श्वेताश्वतरोपनिषत्, ३, २०.
2 तैत्तिरीयारण्यकम्—३, १२, ७; १३, १.
श्वेताश्वतरोपनिषत्—३, ८ ; वाजसनेयिसंहिता (वेबरं) ३१, १८.

ब्रह्माण्डपुराण

[1]यस्माद्वाचो निवर्तन्ते अप्राप्य मनसा सह ।
अव्यक्तं तत्परोक्षत्वाद्गहनं तु दुरासदम् ॥
भिद्यते हृदयग्रन्थिश्छिद्यन्ते सर्वसंशयाः ।
क्षीयन्ते चाऽस्य कर्माणि दृष्टे तस्मिन् परावरे ॥

[2]याज्ञवल्क्यः

ततो ध्येयः स्थितो योऽसौ हृदये दीपवत् प्रभुः ।
धारयेत्तत्र चाऽऽत्मानं धारणा धारयन् बुधः ॥

[3]तथा

द्वासप्ततिसहस्राणि हृदयादभिनिःसृताः ।
हिताहिता नाम नाड्यस्तासां मध्ये शशिप्रभम् ॥
मण्डलं तस्य मध्यस्थ आत्मा दीप इवाऽचलः ।
स ज्ञेयस्तं विदित्वेह पुनराजायते न तु ॥

नरसिंहपुराणे

[4]योगाभ्यासरतस्येह नश्यन्ते पातकानि च ।
तस्माद्योगपरो भूत्वा ध्यायेन्नित्यक्रियान्तरे ॥
प्राणायामेन पवनं प्रत्याहारेण चेन्द्रियम् ।
धारणाभिर्वशीकृत्य पूर्वं दुर्धर्षणं मनः ॥
एकं कारणमानन्दं बोधरूपमनामयम् ।
सूक्ष्मात्सूक्ष्मतरं ध्यायेत् जगदाधारमच्युतम् ॥

1 'यतो वाचो निवर्तन्त' इति तैत्तिरीयोपनिषदि—२, ४, १; ९, १; ४, ४, ११.
2 ३, २०१.
3 ३, १०८–१०९.
4 ६१, ३–१३.

आत्मानमरविन्दस्थं तप्तचामीकरप्रभम् ।
रहस्येकान्त आसीनो [1]ध्यायेदभिरणादणुम् ॥
यः सर्वप्राणचित्तज्ञो यः सर्वेषां हृदि स्थितः ।
यश्च [2]सर्वावरज्ञेयः सोऽहमस्मीति चिन्तयेत् ।
आत्मलाभसुखं यावत् तावद्ध्यानमुदाहृतम् ॥
श्रुतिस्मृत्युदितं कर्म तदूर्ध्वं तु समाचरेत् ।
यथाश्वरथहीनस्तु रथश्चाऽऽश्वैर्विना यथा ॥
एवं तपोऽप्यविद्यस्य विद्या[3] वाऽप्यतपस्विनः ।
[4]यथाऽन्नं मधुसंयुक्तं मधु वाऽन्नेन संयुतम् ॥
एवं तपश्च विद्या च संयुक्तं भेषजं महत् ।
उभाभ्यामेव पक्षाभ्यां यथा खे पततां गतिः ।
तथैव ज्ञानकर्मभ्यां प्राप्यते ब्रह्म शाश्वतम् ॥
विद्यातपोभ्यां संपन्नो ब्राह्मणो योगतत्परः ।
देहद्वयं[5] विहायाऽऽशु मुक्तो भवति बन्धनात् ।
न देवयानमार्गेण यावत्प्राप्तं परं पदम् ॥
न [6]तावल्लिङ्गदेहस्य विनाशो विद्यते क्वचित् ।

'नित्यक्रियान्तरे' नित्यानां कर्मणामन्तराले, नित्यकर्मकाल एवेत्यर्थः । '[7]आरणै'रुपनिषद्भिः ।

1 ध्यायेदात्महृदि स्थितम्—इति मु. पाठः
2 सर्वानवज्ञेयः—ना ; सर्वावरज्ञेयः—स ; सर्वारणिर्ज्ञेयः—मु. पाठः
3 एवं तपश्चविद्या च उभावपितपस्विनः—इति मुद्रितपाठः
4 यथाऽऽज्यं मधुसंयुक्तं मधुचाऽऽज्येन संयुतम्—ना.
5 द्वन्द्वं—इति मु. पाठः
6 न तावद्देहलिङ्गस्य इति मु. पाठः
7 नेदं पदं वचनेषु दृश्यते.

तथा

[1]उत्पन्नवैराग्यबलेन योगी
ध्यायन् परब्रह्म सदा क्रियावान्।
सत्यात्मकं चित्सुखरूपमाद्यं
विहाय देहं पदमेति विष्णोः ॥

योगियाज्ञवल्क्यः

[2]ॐतत्सदिति निर्देशो ब्रह्मणस्त्रिविधस्मृतः।
ब्राह्मणास्तेन वेदाश्च यज्ञाश्च विहिताः पुरा ॥
तस्मादोमित्युदाहृत्य यज्ञदानतपःक्रियाः।
प्रवर्तन्ते विधानोक्ताः सततं ब्रह्मवादिनाम् ॥

तस्य च मात्रास्तिस्रो व्यक्ताऽव्यक्ता तथाऽपरा सूक्ष्मा।

अध्यात्मामधिभूतामधिदेवीं तां विजानीयात्।

ॐकारप्रणवस्तारः अक्षरः प्रणवः परः।
उद्गीथश्च तथाऽऽदित्यो हंसो नारायणो विभुः ॥
पर्यायैश्च तथाऽन्यैश्च शास्त्रेभ्यः संप्रतीयते।
ॐकारसंज्ञं त्रिविधं त्र्यक्षरं च त्रिदैवतम् ॥
त्रिब्रह्म च त्र्यवस्थानं त्रिकालं त्रिप्रतिष्ठितम्।
सत्वं रजस्तमश्चेति गुणास्तैस्त्रिगुणाः स्मृताः ॥
अकारश्चाऽप्युकारश्च मकारश्चाऽक्षरं त्रयम्।
ब्रह्मा विष्णुश्च रुद्रश्च त्रिदैवत्य उदाहृतः ॥
अग्निवायुरविभ्यश्च त्रिमात्र इति संज्ञितः।
ऋग्यजुश्च तथा साम त्रिब्रह्म इति कीर्तितः ॥

1 नरसिंहपुराण—६१, २२.

2 गीता—१७, २३-२४.

भूर्भुवःस्वस्त्र्यवस्थानं हृत्कण्ठतालुकास्तथा ।
तुर्ये प्राणे तथाऽऽदित्ये त्रिषु चैव प्रतिष्ठितः ॥
भूतं भव्यं भविष्यच्च त्रिकालस्तेन चोच्यते ।
अन्तःप्रज्ञो बहिःप्रज्ञो घनप्रज्ञ उदाहृतः ॥
गार्हपत्यो दक्षिणाग्निराहवनीयः त्रिधात्मकः ।
शान्तो घोरस्तथा मूढस्त्रिरवस्थ इति स्मृतः ॥
स्त्रीपुंनपुसकं चैव तत् त्रिलिङ्गमिति स्मृतम् ।
त्रिप्रकारं विदित्वा तु ॐकारं मुच्यते द्विजः ॥
एकैकाऽत्र भवेन्मात्रा बहुधा सा[1] तु वै पुनः ।
तासां सर्वं वाङ्मयं तु ओतं प्रोतं व्यवस्थितम् ॥
प्रथमा तस्याऽकारेण वाक् सत्वं भू हुताशनः ।

विष्णुः

स्थूला जाग्रद्वृत्तिर्विज्ञेया योगतत्वज्ञैः ॥
ब्रह्माऽन्तरिक्षसंज्ञो मनोरजः सोमसंज्ञित उकारः ।
मात्रा स्वप्नविकल्पा सृष्टिः संज्ञा द्वितीया स्यात् ॥
रौद्री मकारसंज्ञा प्राणाख्या तामसी तृतीया स्यात् ।
संहरति जगत् कृत्स्नं सा सौषुप्ताख्या महानिद्रा ।
आद्या परा तु सूक्ष्माशां तार्यावयवालक्ष्म्याः (?) ।
सौम्या मकारसंज्ञा विज्ञाता काश्च संबन्धा (?) ।
अ उ म इति तिस्रो मात्रा मकारश्चाऽर्द्धमात्रिकः ।
तिस्रो मात्रा लयं यान्ति अर्धमात्रे न संशयः ।
अर्द्धमात्रा त्वमात्रे सा लयं याति निरामये ।
अकारे पीड्यमाने तु उकारं प्रतिपद्यते ।
उकारे पीड्यमाने तु मकारं प्रतिपद्यते ।

1 मानुषैः पुनः—ना.

मकारे पीड्यमाने तु अर्धमात्रा तदा भवेत्।
जिह्वायां पीड्यमानायां निरालम्बस्तदा भवेत्।
एकमात्रं द्विमात्रं वा त्रिमात्रं कृत्स्नमेव च।
ह्रस्वं दीर्घं प्लुतं शान्तं शान्तेन मनसोद्भवेत्।
समाहितमना भूत्वा तत्वध्यानपरायणः।
ॐकारं यस्त्वभिध्यायेदाध्यात्मिक इति स्मृतः।
यथा वै शंकुना पर्णाः संपूर्णा एव सर्वशः।
एवं सर्वास्तु वै वाचः [1]संतृण्णाः प्रणवेन तु।
क्लेशकर्मविपाकैस्तु वासनाभिस्तथैव च।
अपरामृष्टमेवाह पुरुषं हीश्वरं श्रुतिः।
वाच्यस्तस्येश्वरः प्रोक्तो वाचकः प्रणवः स्मृतः।
वाचकेन तु विज्ञातो वाच्य एव प्रसीदति।
तदर्थं प्रणवो जप्यो ध्यातव्यः सततं बुधैः।
ईश्वरः पुरुषस्तेनोपासितः संप्रसीदति।
यथा हि गौर्वत्सरुतं निशम्य
हुंकृत्य वत्साभिमुखी प्रयाति।
ब्रह्माऽपि तद्वत्प्रणवोपहूतं
वक्तारमागच्छति चाऽऽशु वक्त्रे॥
[2]द्वे ब्रह्मणी वेदितव्ये शब्दब्रह्म परं च यत्।
शब्दब्रह्मणि निष्णातः परं ब्रह्माऽधिगच्छति।
अन्तःशरीरप्रभवमुदानप्रेरितं च यत्।
वागुच्चार्यं श्रोत्रवृत्ति शब्दवृत्तिस्तदुच्यते।
शब्दब्रह्म परं ब्रह्म तस्मिन् क्षीणे यदक्षरम्।
तदक्षरं सदा ध्यायेद्यदीच्छेद्योगमात्मनि॥

1 संपूर्णाः—ना.

2 विष्णुपुराणे ६, ५, ६४.

अकारश्चाऽप्युकारश्च मकारो विष्णुरेव च ।
मात्रार्द्धत्रययोगाच्च प्रणवः पञ्चलक्षणः ।
[1]वेदादौ यः स्वरः प्रोक्तो वेदान्ते च प्रतिष्ठितः ।
तस्य प्रकृतिलीनस्य यः परः स महेश्वरः ।
[2]यतो वाचो निवर्तन्ते अप्राप्य मनसा सह ।
आनन्दं ब्रह्मणो विद्वान् न बिभेति कुतश्चन ।
[3]प्रणवो धनुः शरो ह्यात्मा ब्रह्म तल्लक्ष्यमुच्यते ।
अप्रमत्तेन वेद्धव्यं शरवत् तन्मयो भवेत् ।
स्वदेहमधरां[4] कृत्वा प्राणमेवोत्तरारणिम् ।
ध्याननिर्मथनाभ्यासाद्देवं पश्येन्निगूढवत् ।
कश्चिदाराधनाकामो विष्णोर्भक्तिं करोति वै ।
तदाराधनसिद्ध्यर्थं प्रतिमां व्यञ्जिकां तथा ॥
धातुदार्वादिपाषाणैः कृत्वा भावं निवेशयेत् ।
भक्त्या श्रद्धादराभ्यां च तस्य विष्णुः प्रसीदति ॥
ॐकारेण तदा ह्यात्मोपासितः संप्रसीदति ।
[5]एतदालेवनं श्रेष्ठमेतदालेवनं परम् ।
एतदालम्बनं ज्ञात्वा ब्रह्मभूयाय कल्पते ॥
अदृष्टविग्रहो देवो भावग्राह्यो मनोमयः ।
तस्योंकारः परं नाम तेनाऽऽहूतः प्रसीदति ॥
तस्मादोमिति पूर्वं तु कृत्वा युञ्जीत तत्परः ।
जाग्रत्स्वप्नसुषुप्तानि पदान्येतानि तस्य तु ॥

1 महानारायणोपनिषत्—१०, ८.
2 तैत्तिरीयोपनिषत्—२, ४, १.
3 मुण्डकोपनिषत्—२, २, ४.
4 अरणिं कृत्वा इति श्वेताश्वतरोपनिषत्—१, १४.
5 कठोपनिषदि, २, १७ :—"एतदालम्बनं श्रेष्ठमेतदालम्बनं परम् । एतदालम्बनं ज्ञात्वा ब्रह्मलोके महीयते ॥"

बहिःप्रज्ञस्तथाऽतश्च घनप्रज्ञस्त्रिधा भवेत् ।
दक्षिणाक्षिमुखे विष्णोर्मनस्यन्तस्तु तेजसः ॥
आकाशे तु हृदि प्राज्ञस्त्रिधा देहे व्यवस्थितः ।
स्थूलं वैश्वानरो नित्यं तेजसोऽन्तःप्रवृत्तिभुक् ॥
आनन्दभुक् तथा प्राज्ञस्त्रिधा भोगं विजानता ।
स्थूलं तु सर्वतो विश्वं प्रविभक्तं तु तैजसम् ॥
आनन्दं च तथा प्राज्ञं त्रिधा तृप्तिं विजानत ।
त्रिषु धामसु यद्भोज्यं भोक्ता यश्च प्रकीर्तितः ॥
उभयं विन्दते यस्तु स भुञ्जानो न लिप्यते ।
यस्तु शब्दमयोङ्कार उच्चार्यः स्थूल एव सः ॥
अमात्रश्चाऽयमुच्चार्यः पर ॐकार उच्यते ।
तिस्रः सार्द्धास्तथा मात्राः स गृह्णाति यथाक्रमम् ॥
परब्रह्म तदेवाहुः स्वात्मानं ब्रह्मचिन्तकाः ।
यत्पूर्वं तु समुद्दिष्टमोंकारेऽग्रे व्यवस्थितम् ॥
अक्षरैश्च पदैश्चैतदतीतं परमं पदम् ।
यत्प्राप्य न निवर्त्तन्ते ॐकारपरमाश्रिताः ॥
मनस्तत्र समाधाय शरीरं लिङ्गमात्रकम् ।
सङ्कल्पाध्यवसायं च अभिमानाख्यमेव च ॥
चेतनाधिष्ठितं सूक्ष्मं तथा सूक्ष्मैः सहैव तत् ।
ॐकारं पद्मनालेन हृद्युद्धृत्य नियोजयेत् ॥
परे व्योम्नि अनन्ताख्ये सर्वसङ्कल्पवर्जिते ।
तस्मिंस्तावन्निबोद्धव्यो मनश्चोंकार एव च ॥
निर्मलस्तां गतो यावदेष योग उदाहृतः ।
मनो युंज्यात्तथोंकारे ॐकारं प्रणवे तथा ॥
प्रणवं ब्रह्मणि स्थाप्य न किन्चिदपि चिन्तयेत् ।

अप्राणो विमलः शुद्धो निश्शब्दो ब्रह्मसंज्ञितः ॥
तस्मादुत्पद्यते प्राणः पुनस्तत्रैव लीयते ।
प्रणवे नित्ययुक्तस्य न भयं विद्यते क्वचित् ॥

[1]मनुः

सर्वमात्मनि संपश्येत्सच्चाऽसच्च समाहितः ।
सर्वमात्मनि संपश्यन्नाऽधर्मे कुरुते मनः ॥
आत्मैव देवताः सर्वाः सर्वमात्मन्यवस्थितम् ।
आत्मा हि जनयत्येषां कर्मयोगं शरीरिणाम् ॥
खं संनिवेशयेत् खेषु चेष्टनस्पर्शनेऽनिलम् ।
पंक्तिदृष्ट्योः परं तेजः स्नेहे योगं च मूर्तिषु ॥
मनसीन्दुं दिशः श्रोत्रे पादे विष्णुं बले हरम् ।
वाच्यग्निं मित्रमुत्सर्गे प्रजने च प्रजापतिम् ॥
प्रशासितारमेतेषां अणीयांसमणोरपि ।
रुक्माभं स्वप्नधीगम्यं विद्यात्तं पुरुषोत्तमम्[2] ॥
एतमेके वदन्त्यग्निमसुमेके प्रजापतिम् ।
इन्द्रमेके परे प्राणमपरे ब्रह्म शाश्वतम् ॥
एष सर्वाणि भूतानि पञ्चभिर्व्याप्य मूर्तिभिः ।
जन्मवृद्धिक्षयैर्नित्यं संसारयति चक्रवत् ॥
एवं यः सर्वभूतेषु पश्यत्यात्मानमात्मना ।
स सर्वसमतामेत्य ब्रह्माऽभ्येति सनातनम् ॥

'कर्मफलसम्बन्धः' सर्वमात्मनि संपश्येदिति युक्तम्। तत्र विशेषमाह—'खं सन्निवेशयेत् खेष्विति' बाह्यमाकाशं शरीरगतनवच्छिद्राकाशेन सहैकत्वेन भावयेत्। एवं चेष्टा-

1 १२, ११८–१२५.
2 पुरुषं परमिति—मु. पु.

स्पर्शकारणभूतेन दैहिकेन वायुना सह बाह्यस्य वायोरैक्यम्। अशितपीतान्नपाकहेतुभूतकोष्ठचाक्षुषतेजोभ्यां सह प्रकृष्टतेजसः आदित्याख्यस्य ऐक्यं शारीराभिरद्भिः सह बाह्यानामपामैक्यम्। शारीरैश्च कठिनैर्भागैः पार्थिवैः सह बाह्यायाः पृथिव्या अप्यैक्यम्। मनसा सह चन्द्रस्य श्रोत्रेण सह दशदिशां पादेन्द्रियेण सह विष्णोः वीर्येण सह तस्यैक्यं भावयेत्। एवमाध्यात्मिकभूम्यादिभिः सहाऽऽधिभौतिकाधिदैविकानामैक्यं भावयित्वा तेषां प्रशासितारं ब्रह्मादिस्तम्बपर्यन्तानां व्यवस्थाकारिणां तथा च "तस्याक्षरस्य शासने गार्गी"त्यादि ब्राह्मणं परमाणोरपि सकाशात् सूक्ष्मतरममूर्तत्वात् सुवर्णवत् शुद्धरूपं उर्मिषट्करहितत्वात् सुषुप्तावस्थाविज्ञानोपमेयस्वरूपं परमात्मानं जानीयात्। यादृक् सुषुप्तावस्थायां प्रत्यस्तमितसुखदुःखविकल्पं क्षेत्रज्ञस्वरूपमेवं सर्वदा परमात्मनः। एनं परमात्मानमग्नित्वेनोपासते याज्ञिकाः।

अन्ये पुनः 'सर्वत एवाऽऽत्मानो व्युचरन्ती'ति स्रष्टृत्वश्रुतेः मन्वाख्यप्रजापतिरूपतयोपासते। अपरे पुनरैश्वर्ययोगादिन्द्ररूपतयोपासते। केचित् 'प्राणमुद्गीथमुपासीते'ति श्रुतेः प्राणात्मनैनमुपासते। अन्ये पुनः परमात्मतयेति 'एष परमात्मा सर्वान् प्राणिनः' पंचभिः पृथिव्यादिभिर्भूतैः शरीरांभकैः परिगृह्य स्वार्जितकर्मापेक्षयोत्पत्तिस्थितिविनाशैरसकृन्नियोजयतीत्यर्थः।

महाभारते

इन्द्रियग्राममखिलं मनस्यभिनिवेश्य च।
मनस्तथैवाऽहंकारे प्रतिष्ठाप्य नराधिप॥

अहङ्कारं तथा बुद्धौ बुद्धिं च प्रकृतावपि ।
एवं च परिसंख्याय ततो ध्यायेच्च केवलम् ॥
विरजसममलं नित्यमनन्तं शुद्धमव्रणम् ।
तस्थुषं परमं तत्वमभेद्यमजरामरम् ॥
शाश्वतं चाऽव्ययं चैव ईशानं ब्रह्म तत्परम् ।

विष्णुपुराणे

[1]आश्रयश्चेतसो ब्रह्म द्विधा तच्च स्वरूपतः ।
भूप मूर्तममूर्तं च परं चाऽपरमेव च ॥
[2]अक्षीणेषु समस्तेषु[3] विशेषज्ञानकर्मसु ।
विश्वमेतत्परं त्वन्यद्भेदभिन्नं दृशां नृप[4] ।
प्रत्यस्तमितभेदं यत् सत्तामात्रमगोचरम् ।
वचसामात्मसंवेद्यं तज्ज्ञानं ब्रह्मसम्मितम्[5] ।
तच्च विष्णोः परं रूपमरूपस्याऽऽद्यमक्षयम् ।
विश्वस्वरूपवैरूप्यलक्षणं परमात्मनः ।
न तद्योगयुजा शक्यं नृप चिन्तयितुं यतः ॥
ततः स्थूलं हरेरूपं चिन्तयेद्विश्वगोचरम् ।
हिरण्यगर्भो भगवान् वासवोऽथ प्रजापतिः ॥
मरुतो वसवो रुद्रा भास्करास्तारका ग्रहाः ।
गन्धर्वयक्षदैत्याद्याः सकला देवयोनयः ॥
मनुष्याः पशवः शैलाः समुद्रास्सरितो द्रुमाः ।

1 ६, ७, ४७.
2 ६, ७, ५२.
3 समस्तेषु—ना and स. ; मु—पाठश्च.
4 भेदभिन्नदृशां नृपः इति मु. पाठः
5 संज्ञितम्—ना—स. ; मु—पाहश्च.

[1]भूभृतान्यप्यशेषाणि भूतानां पञ्चहेतवः[2] ।
प्रधानादि विशेषान्तं चेतनाचेतनात्मकम् ॥
एकपादं द्विपादं च बहुपादमपादपम्[3] ।
मूर्त्तमेत्तत्त्वदो रूपं भावनात्रितयात्मकम् ॥
तच्च सर्वमिदं विश्वं जगदेतच्चराचरम् ।
परं ब्रह्म स्वरूपस्य विष्णोः शक्तिसमन्वितम् ॥
[4]एतान्यशेषरूपाणि कथितान्यस्य पार्थिव ।
यतस्तच्छक्तियोगेन युक्तानि नभसा यथा ॥
द्वितीयं विष्णुरूपस्य योगिध्येयं महामते ।
अमूर्तं ब्रह्मणो रूपं यत्सदित्युच्यते बुधैः ॥
समस्तविषयाश्चैते नृप यत्र प्रतिष्ठिताः ।
तद्विश्वरूपरूपं वै रूपमन्यद्धरेर्मतम्[5] ॥
समस्तशक्तिरूपाणि तत्करोति जनेश्वर ।
देवतिर्यङ्मनुष्याद्यैः चेष्टावन्ति स्वलीलया ॥
जगतामुपकाराय न सा कर्मनिमित्तजा ।
चेष्टा तस्याऽप्रमेयस्य [6]व्यापिन्यविहतात्मिका ॥
तद्रूपं विश्वरूपस्य तस्य योगजुषा नृप ।
चिन्त्यमात्मविशुद्ध्यर्थं सर्वकल्मषनाशनम् ॥
यथाऽग्निरुद्धतशिखः कक्षं दहति सानिलः ।
तथा चित्तस्थितो विष्णुः योगिनां सर्वकिल्बिषम् ॥

1 नृपभूतानि इति मु. पा.

2 ये च हेतवः इति मु. पा.

3 तथैव च for अपादपम्—ना and स. ; अपादकम्—इति मु. पा.

4 ६, ७, ६८.

5 महत् for मतम्—ना. and स. ; मु—पाठश्च.

6 व्यापिन्यव्याहतात्मिका इति मु. पाठः

तस्मात्समस्तशक्तीनामाकारे[1] तत्र चेतसः ।
कुर्वीत संस्थितिं सा तु विज्ञेया शुद्धधारणा ॥
शुभाश्रयस्य चित्तस्य सर्वगस्य तथाऽऽत्मनः ।
त्रिभावभावनातीतो मुक्तये योगिनां नृप ॥
अन्ये तु पुरुषव्याघ्र चेतसो ये व्यपाश्रयाः ।
अशुद्धास्ते समस्तास्तु देवाद्याः कर्मयोनयः ॥
मूर्ते भगवतो रूपे सर्वापाश्रयनिस्पृहे ।
एषा वै धारणा ज्ञेया यच्चित्तं यत्र धारयेत् ॥
तच्च मूर्तं हरेरूपं तद्विचिन्त्य नराधिप ।
तच्छ्रूयतामनाधारा धारणा तूपपद्यते[2] ॥
प्रसन्नचारुवदनं पद्मपत्रोपमेक्षणम् ।
सुकपोलं सुविस्तीर्णललाटं कनकोज्वलम् ॥
समकर्णान्तविन्यस्तचारुकुण्डलभूषणम् ।
कम्बुग्रीवं सुविस्तीर्णं श्रीवत्सांकितवक्षसम् ॥
वलीविभङ्गिनाभग्ननाभिना चोदरेण च ।
प्रलंबाष्टभुजं विष्णुमथवाऽपि चतुर्भुजम् ॥
समस्थितोरुजङ्घं च सुस्थिरांघ्रिकराम्बुजम् ।
चिन्तयेद्ब्रह्मरूपं तं पीतनिर्मलवाससम् ॥
किरीटचारुकेयूरकटकादिविभूषितम् ।
शार्ङ्गशङ्खगदाचक्रखङ्गाक्षवलयान्वितम् ॥
चिन्तयेत्तन्मयो योगी समाधायाऽऽत्ममानसम् ।
तावद्यावद्दृढीभूता तत्रैव नृप धारणा ।
वदतस्तिष्ठतोऽन्यद्वा स्वेच्छया कर्म कुर्वतः ॥

1 आधारे—मु. पाठः

2 नोपपद्यते—ना and स. ; मु. पा.

नाऽपयाति यदा चित्तात् सिद्धां मन्येत तां तदा ।
ततः शङ्खगदाचक्रशार्ङ्गादिरहितं बुधः ॥
चिन्तयेद्भगवद्रूपं प्रशान्तं साक्षसूत्रकम् ।
सा यदा धारणा तद्वदवस्थानवती तदा ॥
किरीटकेयूरमुखैर्भूषणै रहितं स्मरेत् ।
तदेकावयवं देवं चेतसो हि पुनर्बुधः ॥
कुर्यात्ततोऽवयविनि प्रणिधानपरो भवेत् ।

तथा

मैत्रेय उवाच ।

[1]भूषणास्त्रस्वरूपस्थं यथैतदखिलं जगत् ।
बिभर्ति भगवान् विष्णुः तन्ममाऽऽख्यातुमर्हसि ॥

पराशर उवाच ।

नमस्कृत्याऽप्रमेयाय विष्णवे प्रभविष्णवे ।
कथयामि यथाख्यातं वसिष्ठेन ममाऽभवत् ॥
आत्मानमस्य जगतो निर्लेपमगुणामलम् ।
बिभर्ति कौस्तुभमणिस्वरूपं भगवान् हरिः ॥
श्रीवत्ससंस्थानधरमनन्ते च समाश्रितम् ।
प्रधानं बुद्धिरप्यास्ते गदारूपेण माधवे ॥
भूतादिमिन्द्रियादिं च द्विधाऽहङ्कारमीश्वरः ।
बिभर्ति शङ्खरूपेण शार्ङ्गरूपेण च स्थितम् ॥
बलस्वरूपमत्यन्तं जवेनाऽन्तरितानिलम् ।
चक्रस्वरूपं च मनो धत्ते विष्णोः करे स्थितम् ॥

1 Omission in Udaipur Ms; supplied by ना and स.; विष्णुपुराणे, १, २२, ६६–७८.

पञ्चरूपा तु या माला वैजयन्ती गदाभृतः ।
सा भूतहेतुसङ्घाता भूतमाला च वै द्विज[1] ॥
यानीन्द्रियाण्यनेकानि बुद्धिकर्मात्मिकानि वै ।
[2]शवरूपाण्यशेषाणि तानि धत्ते जनार्दनः ॥
बिभर्त्ति यच्चाऽसिवरमव्यक्तोऽत्यन्तनिर्मलम् ।
विद्यामयं तु तद्ज्ञानमविद्याकोशसंस्थितम् ॥
इत्थं पुमान् प्रधानं च बुध्यहङ्कारमेव च ।
भूतादीनि हृषीकेशे मनः सर्वेन्द्रियाणि च ॥
विद्याऽविद्ये च मैत्रेय सर्वमेतत् समाश्रितम् ।
अस्त्रभूषणसंस्थानस्वरूपं रूपवर्जितम् ॥
बिभर्ति मायारूपोऽसौ श्रेयसे प्राणिनां हरिः ।
सविकारं प्रधानं च यत्पुमांश्चाऽखिलं जगत् ॥
बिभर्ति पुण्डरीकाक्षस्तदेवं परमेश्वरः ।
[3]या विद्या या यथाऽविद्या यत्सत्यं चाऽसमव्ययम् ॥
तत्सर्वं सर्वभूतेश मैत्रेय मधुसूदने ।

दक्षः

बहिर्मुखानि सर्वाणि कृत्वा चाऽन्तर्मुखानि वै ।
मनसैवेन्द्रियग्रामं स्वात्मना विनियोजयेत् ॥
सर्वभावविनिर्मुक्तं क्षेत्रजं ब्रह्मणि न्यसेत् ।
एतद्ध्यानं च योगं च शेषोऽन्यो ग्रन्थविस्तरः ॥
चतुर्णां सन्निकर्षेण फलं यत्तदशाश्वतम् ।
द्वयोस्तु सन्निकर्षेण शाश्वतं ध्रुवमव्ययम् ॥

1 भूतमाला वै द्विज— ना. and स.
2 शेषरूपाणि—ना. ; शररूपाणि—मु. पाठः
3 या विद्यायातथा विद्या यत्सद्यच्चासदव्य—पम् इति मु. पाठः

यन्नाऽस्ति सर्वलोकस्य तदस्तीति विरुध्यते ।
कथ्यमानं तथाऽन्यस्य हृदये नाऽवतिष्ठते ॥
सुसंवेद्यं हि तद्ब्रह्म कुमारी स्त्री सुखं यथा ।
अयोगी नैव जानाति जात्यन्धो हि यथाघटम् ॥
नित्याभ्यसनशीलस्य सुसंवेद्यं हि तद्भवेत् ।
तत्सूक्ष्मत्वादनिर्देश्यं परं ब्रह्म सनातनम् ॥

'चतुर्णामिति' आत्ममनोविषयेन्द्रियाणामिति । 'द्वयोः' आत्ममनसोः ।

ब्रह्मपुराणे

गुणेन्द्रियशरीरैश्च भूततन्मात्रजातिभिः ।
सुखदुःखैरहं नित्यमपरामृष्ट एव हि ॥
चिद्रूपो विमलो व्यापी द्रष्टा श्रोता च सर्वशः ।
घ्राता स्पर्शयिता देही तथा रसयिताऽस्मि च ॥
नित्यं कर्ता न कर्त्ता च ग्रहीता देहवर्जितः ।
ऐश्वर्ययोगमेतन्मे स्थितोऽस्म्येकस्त्वनेकधा ॥
आकाशं यदिदं सर्वं व्याप्यमस्थाणुजङ्गमम् ।
आत्मैवाऽहं जगत्सर्वं निष्कलं सकलं हि यत् ॥
इति भावनया योगी यदा स्यात्सुदृढीकृतः ।
विमुक्तो देहगहनात्तदा स्यात् परमेश्वरः ॥
शुभेऽशुभे च संक्षीणे दग्धे जीवे च जन्मनाम् ।
प्रयाति परमात्मानं तद्विष्णोः[1] परमं पदम् ॥
मोक्षस्य नैव किञ्चित्स्यादन्यत्र गमनं क्वचित् ।
स्थानं वा धाम परमं यत्र गच्छन्ति योगिनः ॥

1 बीजे इति उदयपुरकोशपाठः

अज्ञानं बन्धभेदस्तु मोक्षो ब्रह्मलयस्त्विति ।
त्यक्त्वा सर्वविकल्पांस्तु आत्मस्थं निश्चलं मनः ॥
कृत्वा शान्तो भवेद्योगी दग्धेन्धन इवाऽनलः ।
अगाधबुद्धिं पृथिवीं विचरेद्गगनाकृतिः ॥
उपगम्य स्वमात्मानं नाशोत्पत्तिविवर्जितम् ।
यस्मिन्काले स्वमात्मानं योगी जानाति केवलम् ॥
तस्मात्कालात्समारभ्य जीवन्मुक्तोऽभिधीयते ।

[1]महाभारते

मय्यावेश्य मनो ये मां नित्ययुक्ता उपासते ।
श्रद्धया परयोपेतास्ते मे युक्ततमा मताः ॥
ये त्वक्षरमनिर्देश्यमव्यक्तं पर्युपासते ।
सर्वत्रगमचिन्त्यं च कूटस्थमचलं ध्रुवम् ॥
सन्नियम्येन्द्रियग्रामं सर्वत्र समबुद्धयः ।
ते प्राप्नुवन्ति मामेव सर्वभूतहिते रताः ॥
[2]क्लेशोऽधिकतरस्तेषामव्यक्तासक्तचेतसाम् ।
अव्यक्ता हि गतिर्दुःखं देहवद्भिरवाप्यते ॥
ये तु सर्वाणि कर्माणि मयि सन्न्यस्य मत्पराः ।
अनन्येनैव योगेन मां ध्यायन्त उपासते ॥
तेषामहं समुद्धर्ता मृत्युसंसारसागरात् ।
भवामि न चिरात्पार्थ मय्यावेशितचेतसाम् ॥
मय्येव मन आधत्स्व मयि बुद्धिं निवेशय ।
निवसिष्यसि मय्येव अत ऊर्ध्वं न संशयः ॥

1 भगवद्गीता—१२, २-१२.

2 These three lines are missing in the Udaipur Ms. but are found in the other two Mss.

अथ चित्तं समाधातुं न शक्नोषि मयि स्थिरम् ।
अभ्यासयोगेन ततो मामिच्छाऽऽप्तुं धनञ्जय ॥
अभ्यासेऽप्यसमर्थोऽसि मत्कर्मपरमो भव ।
मदर्थमपि कर्माणि कुर्वन् सिद्धिमवाप्स्यसि ॥
अथैतदप्यशक्तोऽसि कर्तुं मद्योगमाश्रितः ।
सर्वकर्मफलत्यागं ततः कुरु यतात्मवान् ॥
श्रेयो हि ज्ञानमभ्यासाज्ज्ञानाद्ध्यानं विशिष्यते ।
ध्यानात्कर्मफलत्यागस्त्यागाच्छान्तिर्निरन्तरम्[1] ॥

मार्कण्डेयपुराणे

सारभूतमुपासीत ज्ञानं यत्कर्मसाधनम्[2] ।
ज्ञानानां बहुता येऽयं योगविघ्नकरी हि सा ॥
इदं ज्ञेयमिदं ज्ञेयमिति यस्तृषितश्चरेत् ।
अपि कल्पसहस्रैस्तु[3] न स ज्ञेयमवाप्नुयात् ॥

महाभारते

यस्मिन्यस्मिंस्तु विषये यो यो याति विनिश्चयम् ।
स तमेवाऽभिजानाति नाऽन्यं भरतसत्तम ॥

1 अनन्तरमिति शङ्करभाष्यपाठः ; स. पुस्तके च.

2 कार्यसाधकम्—ना. and स. ४१, १८–१९.

3 सहस्रेषु—ना and स.

॥ २० ॥

अथ योगप्रवृत्तिचिह्नानि

तत्र मार्कण्डेयपुराणे

[1]अलौल्यमारोग्यमनिष्ठुरत्वम्

गन्धः शुभो मूत्रपुरीषमल्पम् ।

कान्तिः प्रसादः स्वरसौम्यता च

योगप्रवृत्तेः प्रथमं हि चिह्नम् ॥

अनुरागं जनो याति परोक्षे गुणकीर्तनम् ।

न बिभ्यति च सत्वानि सिद्धेर्लक्षणमुत्तमम् ॥

शीतोष्णादिभिरत्युग्रैर्यस्य बाधा न जायते ।

न भीतिमेति चाऽन्येभ्यस्तस्य सिद्धिरुपस्थिता ॥

प्रवृत्तिर्लक्षणाख्याता योगिनो विस्मयात्तथा ।

विज्ञानं विलयं याति तस्माद्गोप्याः प्रवृत्तयः ॥

वायुपुराणे

[2]आत्मानं पृथिवीं चैव ज्वलन्तीं यदि पश्यति ।

भूतान्याविशते चैव विन्द्यात् सिद्धिमुपस्थिताम्

1 ३९, ६३.

2 ११, ६४.

॥ २१ ॥

अथ योगोपसर्गाः

तत्र देवलः

[1][नि ?]ष्टाभिभवो निद्राबाधाभयानकोत्पत्तिर्ज्ञानपीडा। भोगातिशयः कोपनैपुण्यमैश्वर्यविशेषो धर्ममहत्वं विद्यास्थानानि यशोदीप्तिरिति योगिनां दशोपसर्गाः।

'ज्ञानपीडा' स्मृत्यादिभ्रंशः।

मार्कण्डेयपुराणे

[2]उपसर्गाः प्रवर्त्तन्ते दृष्टेऽप्यात्मनि योगिनः।
ये तांस्ते संप्रवक्ष्यामि समासेन निबोध मे॥
काम्याः क्रियास्तथा कामान्मानुषानभिवाञ्छति।
स्त्रियो दानफलं विद्या मायाः कुप्यं धनं दिनम्॥
देवत्वममरेशत्वं रसायनवयःक्रियाः।
मरुत्प्रपतनं यज्ञो जलाग्न्याविशनं तथा॥
श्रद्धानाशकदानानां फलानि नियमास्तथा।
तपोपवासपूर्वं च देवतेज्या धनानि च॥
तेभ्यस्तेभ्यश्च कर्मभ्य उपसृष्टोऽभिवाञ्छति।
चित्तमित्थं प्रवर्तन्ते येन योगी निवर्त्तयेत्॥

1 All Mss. read like this. निष्ठाभिभव is suggested.

2 ४०, १–२८.

ब्रह्मसङ्गि मनः कुर्वन्नुपसर्गात्प्रमुच्यते ।
उपसर्गैर्जितैरेभिरुपसर्गास्ततः पुनः ॥
योगिनः संप्रवर्तन्ते सात्त्वराजसतामसाः ।
प्रातिभः श्रावणो देवो भ्रमावर्तौ तथा परौ ॥
पञ्चैते योगिनो योगविघ्नाय कटुकोदयाः ।
वेदान्तशास्त्रकाव्यात्मविद्याः शिल्पान्यनेकशः ॥
प्रतिभान्ति यदस्येति प्रातिभः स तु योगिनः ।
शब्दार्थानखिलान्वेत्ति शब्दं गृह्णाति चैव यत् ॥
योजनानां सहस्रेभ्यः श्रावणः सोऽभिधीयते ।
अष्टौ यदा तु दृश्यन्ते समन्ताद्देवयोनयः ॥
उपसर्गं तमप्याहुर्दैवमुत्तमवद्बुधाः ।
भ्राम्यते यन्निरालम्बं मनो दोषेण योगिनः ॥
समस्ताधारविभ्रंशाद्भ्रमः स परिकीर्तितः ।
आवर्त इव तोयस्य ज्ञानावर्त्तो यदाऽऽकुलः ॥
चित्तनाशकृदावर्त्त उपसर्गः स उच्यते ।
एतैर्नाशितयोगास्तु सकला देवयोनयः ॥
उपसर्गैर्महाघोरैरावर्तन्ते पुनः पुनः ।
प्रवृत्यालम्बकं शुक्लं योगी तस्मान्मनोमयम् ॥
चिन्तयेत्परमं ब्रह्म कृत्वा तत्प्रवणं मनः ।
योगयुक्तः सदा योगी लघ्वाहारो जितेन्द्रियः ॥
सूक्ष्मास्तु धारणाः सप्त भूराद्या मूर्ध्नि धारयेत् ।
धरित्रीं धारयन् योगी तत्सौक्ष्म्यं प्रतिपद्यते ॥
आत्मानं मन्यते चोर्वीं तद्गन्धं च जहाति सः ।
तथैवाऽप्सु रसं सूक्ष्मं तद्वद्रूपं च तेजसि ॥
स्पर्शं वायौ तथा तद्वद्बिभ्रतस्तस्य धारणा ।

व्योम्नस्सूक्ष्मप्रवृत्तस्य शब्दं तत्र जहाति च ॥
मनसा सर्वभूतानां मन आविशते यदा ।
मानसीं धारणां बिभ्रन्मनः सौक्ष्म्यं जहाति च ॥
एतद्बुद्धिमशेषाणां सत्वानामेत्य योगवित् ।
परित्यजति संप्राप्य बुद्धिसौक्ष्म्यमनुत्तमम् ॥
परित्यजति सूक्ष्माणि सप्त त्वेतानि योगवित् ।
सम्यग्विज्ञाय यो तर्कं [तत्त्वं ?] तस्यावृत्तिर्न विद्यते ॥
एतासां धारणानां तु सप्तानां सौक्ष्म्यमात्मवान् ।
दृष्ट्वा दृष्ट्वा ततः सिद्धिं त्यक्त्वा त्यक्त्वा परां भजेत्[1] ॥
यस्मिन् यस्मिंश्च कुरुते भूते रागं महीयते ।
तस्मिंस्तस्मिन् समासक्तिं सम्प्राप्य स विनश्यति ॥
तस्माद्विदित्वा सूक्ष्माणि संसक्तानि परं परम् ।
परित्यजति यो योगी स परं प्राप्नुयात्पदम् ॥
एतान्येव तु बन्धाय सप्त सूक्ष्माणि पार्थिव ।
भूतादीनां विरागोऽत्र सद्भावज्ञस्य मुक्तये ॥
गन्धादिषु समासक्तमित्येतदखिलं जगत् ।
पुनरावृत्तये भूप स ब्रह्म स न मानुषम्[2] ॥
सप्तैव धारणा योगी समतीत्य यदिच्छति ।
तस्मिंस्तस्मिन् लये सूक्ष्मे याति भूते नरेश्वर ॥
देवानामसुराणां च गन्धर्वोरगरक्षसाम् ।
देहेषु लयमायाति सङ्गं नाऽऽप्नोति च क्वचित् ॥

'मानुषाः कामाः' सत्वादयः । 'दारफलं' पुत्रादिकं । 'विद्या' आध्यात्मिकातिरिक्ताः । 'माया' इन्द्रजालादि ।

1 त्यजेत् इति—ना.

2 स ब्रह्मसनमानुषम्—ना. and स.

'कुप्यं' हेमरूप्यव्यतिरिक्तं कांस्यादि। 'मरुत्प्रपतनं' मरुद्गमनम्।

वायुपुराणे

[1]विदित्वा सप्त सूक्ष्माणि षडङ्गं च महेश्वरम्।
प्रधानं विनियोगज्ञः परं ब्रह्माऽधिगच्छति॥
सर्वज्ञता तृप्तिरनादिबोधः
स्वतन्त्रता नित्यमलुप्तशक्तिः।
अनन्तशक्तिं च विभुर्विभुज्ञाः
षडाहुरङ्गानि महेश्वरस्य॥
नित्यं ब्रह्मपरो युक्त उपसर्गैः प्रमुच्यते।

1 १२, ३२.

॥ २२ ॥

अथ योगविभूतयः

तत्र देवलः

अणिमा महिमा लघिमा प्राप्तिः प्राकाम्यमीशित्वं वशित्वं यत्र कामावसायित्वं चाऽष्टावैश्वर्यगुणाः। तेषामणिमामहिमालघिमास्त्रयः शारीराः। प्राप्त्यादयः पञ्चैन्द्रियाः। तत्र स्वशरीरत्वमणिमा[1] अणुभावात् सूक्ष्माण्यप्याविशति। शरीरमहत्त्वं महिमा। महत्त्वात् सर्वशरीराण्यावृणोति। शरीराशुगामित्वं लघिमा। तेनाऽतिदूरस्थानपि क्षणेनाऽऽसादयति। विश्वविषयावाप्तिः प्राप्तिः। प्राप्त्या सर्वप्रत्यक्षदर्शी भवति। यथेष्टचारित्वं प्राकाम्यम्। प्राकाम्येन सर्वभोगवरानाप्नोति। अप्रतिहतैश्वर्यमीशित्वम्। ईशित्वेन दैवतान्यप्यतिशेते। आत्मवश्यता वशित्वम्। वशित्वेनाऽपरिमितायुर्वश्यजजन्मा च भवति। यत्र कामावसायित्वं त्रिविधम्—छायावेशः अवध्यानावेशः अङ्गप्रवेश इति। यत् परस्य छायाप्रवेशमात्रेण चित्तं वशीकरोति स छायावेशः। यद्दूरस्थानामपि अनुध्यानेन चित्ताधिष्ठानं, सोऽवध्यानावेशः। यत्सजीवस्योभिस्ते [?] जीवस्य वा शरीरानुप्रवेशनं

1 वी. मि. मोक्ष. पृ. ४४८. reads तत्राणुशरीरत्वमणिमा.

सोऽङ्गप्रवेशः। यत्र कामावसायित्वेन मूर्तद्रव्यं चाधितिष्ठतीति ऐश्वर्यावस्थानं तच्च प्रकृति-पुरुषोत्तरहेतोर्द्धर्मतेजोज्ञानविशेषात्। [1]सातिशयेन संभूतं चैश्वर्याद्भवतीति। एवमेतानैश्वर्यगुणानधिगम्योद्धूतकल्मषः छिन्नसंशयः प्रत्यक्षदर्शी धर्मपरावरज्ञः कूटस्थः सर्वमिदं असदनित्यमिति ज्ञात्वा स्वयमेव शान्तिमधिगच्छतीत्यैश्वर्याप्तिः[2]।

[3]अल्पकश्च यथा राजन् वह्निः शाम्यति दुर्बलः।
आक्रान्त इन्धनैः स्थूलैस्तद्वद्योगो हि नु प्रभो[4]॥
स एव च यथा राजन् वह्निर्जातबलः पुमान्[5]।
समीरणयुतः कृत्स्नां दहेत् क्षिप्रं महीमिमाम्॥
न त्वजातबलो योगी दीप्ततेजो महाबलः।
अन्तकाल इवाऽऽदित्यः कृत्स्नं संशोधयेज्जगत्॥
दुर्बलश्च यथा राजन् स्रोतसा [6]ह्रियते नरः।
बलहीनस्तथा योगी विषयैः क्रियतेऽवशः॥
तदेव च यथा स्रोतो विष्टम्भयति रावणः।
तद्वद्योगबलं लब्ध्वा व्यूहते विषयान् बहून्।

1 'सातिशयं न भूतं चैश्वर्यात्भवति'—ना. and स.
'सातिशयं नवभूतं चैश्वर्यात् भवति—वी. मि. मोक्ष., पृ. ४४९.

2 "तेषां इति—पूर्वपूर्वोक्तानां ऐश्वर्याणां शरीरेन्द्रियत्वेन विभाग उक्तः। तत्र 'अणुशरीरत्वं' इत्यारभ्य 'सोऽङ्गप्रवेश' इत्यन्तेन अष्टानामपि लक्षणान्युक्तानि। 'प्रकृतिपुरुषोत्तर हेतोरिति। ईश्वरत्वेन हि प्रकृतिपुरुषनियामकत्वं भवति। तेनैव हेतुना धर्मतेजोज्ञानविशेषाः उत्पद्यन्ते। तेनैव सातिशयो भवतीति समुदायार्थः॥"—वी. मि. मोक्ष., पृ. ४४९.

3 शा—३०६, १९.

4 वी. मि. मोक्ष., पृ. ४५०, reads 'तद्वद्योगबल प्रभोः'।
ना. and स. read 'तद्वद्योगो न प्रभो'.

5 पुनः इति वी. मि. मो., ना. and स. पाठः

6 वी. मि. मो., पृ. ४५०, हीयते; ना. and स., क्रियते.

[[1]तथा]

विशन्ति परशल्यार्थं [2]योगायोगबलान्विताः ।
प्रजापतीनृषीन् देवान् महाभूतानि चेश्वराः ॥
न यमो नान्तकः क्रुद्धो न मृत्युर्भीमविक्रमः ।
ईशते नृपते सर्वे योगस्याऽमिततेजसः ॥
आत्मानं तु सहस्राणि बहूनि भरतर्षभ ।
योगं कुर्याद्बलं प्राप्य तैश्च सर्वैर्महीं चरेत्[3] ॥
प्राप्नुयाद्विषयान् कैश्चित् कैश्चिद्दुःखं तपश्चरेत् ।
संक्षिपेच्च पुनस्तानि सूर्यस्तेजोगणानिव[4] ॥

[5]याज्ञवल्क्यः

अन्तर्धानं स्मृतिः कान्तिः दृष्टिश्रोत्रज्ञता तथा ।
निजं शरीरमुत्सृज्य परकायप्रवेशनम् ॥
[6]अन्धानां छन्नतां (?) दृष्टिर्योगसिद्धेस्तु लक्षणम् ।
सिद्धे योगे त्यजन् देहममृतत्वाय कल्पते ॥

1 वी. मि. मोक्ष., पृ. ४४९.
2 *Ibid.*, परभोगार्थम्.
3 *Ibid.*, महीचरे.
4 *Ibid.*, गणानि च.
5 ३, २०२-२०३.
6 'अर्थानां छन्दतः सृष्टिः' इति मिताक्षरापाठः

॥ २३ ॥

अथ स्थितप्रज्ञचरितम्

तत्र महाभारते

[1]अर्जुन उवाच ।

स्थितप्रज्ञस्य का भाषा समाधिस्थस्य केशव ।
स्थितधीः किं प्रभाषेत किमासीत व्रजेत किम् ॥

श्रीभगवानुवाच ।

प्रजहाति यदा कामान् सर्वान् पार्थ मनोगतान् ।
आत्मन्येवाऽऽत्मना तुष्टः स्थितप्रज्ञस्तदोच्यते ॥
दुःखेष्वनुद्विग्नमनाः सुखेषु विगतस्पृहः ।
वीतरागभयक्रोधः स्थितधीर्मुनिरुच्यते ॥
यः सर्वत्राऽनभिस्नेहस्तत्तत् प्राप्य शुभाशुभम् ।
नाऽभिनन्दति न द्वेष्टि तस्य प्रज्ञा प्रतिष्ठिता ॥
यदा संहरते चाऽयं कूर्मोऽङ्गानीव सर्वशः ।
इन्द्रियाणीन्द्रियार्थेभ्यः तस्य प्रज्ञा प्रतिष्ठिता ॥
[2]या निशा सर्वभूतानां तस्यां जागर्ति संयमी ।
यस्यां जाग्रति भूतानि सा निशा पश्यतो मुनेः ॥

1 भगवद्गीता—२, ५४–५८.
2 भगवद्गीता—२, ६९–७२.

आपूर्यमाणमचलप्रतिष्ठं
समुद्रमापः प्रविशन्ति यद्वत्।
तद्वत्कामा यं प्रविशन्ति सर्वे
स शान्तिमाप्नोति न कामकामी ॥
विहाय कामान् यः सर्वान् पुमांश्चरति निस्पृहः।
निर्ममो निरहङ्कारः स शान्तिमधिगच्छति ॥
एषा ब्राह्मी स्थितिः पार्थ नैनां प्राप्य विमुह्यति।
स्थित्वाऽस्यामन्तकालेऽपि ब्रह्मनिर्वाणमृच्छति ॥

'या निशे'त्यादि निशेव निशा ब्रह्मतत्वं। तत्र हि सर्वभूतानां दर्शनाभावः। तस्यां जागर्ति तद्ब्रह्मस्वरूपमनुभवति। 'संयमी'योगध्यायीत्यर्थः। 'यस्यां जाग्रति' विषयासक्तिलक्षणायां निशायामुन्मीलिताक्षाणि भूतानि च यस्यां तस्यां तद्दर्शनवृत्तेर्निरोधादित्यर्थः। 'अचलप्रतिष्ठमिति'। अचला प्रतिष्ठा स्थितिर्यस्य तं अचलप्रतिष्ठम्। आपो यथा प्रविशन्ति विक्रियामनापादयन्त्यस्तथा योगिनः चित्तविक्रियामकुर्वन्तः कामविषया उपतिष्ठन्ते इत्यर्थः।

[1]तथा

प्रकाशं च प्रवृत्तिं च मोहमेव च पाण्डव।
न द्वेष्टि संप्रवृत्तानि न निवृत्तानि कांक्षति ॥
उदासीनवदासीनो गुणैर्यो न विचाल्यते।
गुणा वर्तन्त इत्येवं योऽवतिष्ठति नेङ्गते ॥
समदुःखसुखः स्वस्थः समलोष्टाश्मकाञ्चनः।
तुल्यप्रियाप्रियो धीरः तुल्यनिन्दार्थसंस्तुतिः ॥

1 भगवद्गीता—१४, २२–२६.

मानापमानयोस्तुल्यस्तुल्यो मित्रारिपक्षयोः ।
सर्वारम्भपरित्यागी गुणातीतः स उच्यते ॥
मां च योऽव्यभिचारेण भक्तियोगेन सेवते ।
स गुणान् समतीत्यैतान् ब्रह्मभूयाय कल्पते ॥
ब्रह्मणो हि प्रतिष्ठाऽहममृतस्याऽव्ययस्य च ।
शाश्वतस्य च धर्मस्य सुखस्यैकान्तिकस्य च ॥

प्रकाशस्य धर्मो ज्ञानं । प्रवृत्ती रजसो धर्मः । मोहस्तु तमसो धर्मः । 'संप्रवृत्तानि' सुखनिमित्तानीति शेषः । 'निवृत्तानि' सुखदुःखनिमित्तानीति शेषः । 'नेङ्गते' न चलति ।

[1]तथा

यदा भूतपृथग्भावमेकस्थमनुपश्यति ।
तत एव च विस्तारं ब्रह्म संपद्यते तथा ॥

[तथा]

[2]विद्याविनयसंपन्ने ब्राह्मणे गवि हस्तिनि ।
शुनि चैव श्वपाके च पण्डिताः समदर्शिनः ॥
इहैव तैर्जितः सर्गो येषां साम्ये स्थितं मनः ।
निर्दोषं हि समं ब्रह्म तस्माद्ब्रह्मणि ते स्थिताः ॥
न प्रहृष्येत् प्रियं प्राप्य नोद्विजेत् प्राप्य चाऽप्रियम् ।
स्थिरबुद्धिरसम्मूढो ब्रह्मविद्ब्रह्मणि स्थितः ॥
बाह्यस्पर्शेष्वसक्तात्मा विन्दत्यात्मनि यत्सुखम् ।
स ब्रह्मयोगयुक्तात्मा सुखमक्षय्यमश्नुते ॥

1 भगवद्गीता—१३, ३०.
2 भगवद्गीता—५, १८–२५.

ये हि संस्पर्शजा भोगा दुःखयोनय एव ते ।
आद्यन्तवन्तः कौन्तेय न तेषु रमते बुधः ॥
शक्नोतीहैव यः सोढुं प्राक् शरीरविमोक्षणात् ।
कामक्रोधोद्भवं वेगं स युक्तः स सुखी नरः ॥
योऽन्तःसुखोऽन्तरारामः तथाऽन्तर्ज्योतिरेव यः ।
स योगी ब्रह्मनिर्वाणं ब्रह्मभूतोऽधिगच्छति ॥
लभन्ते ब्रह्मनिर्वाणमृषयः क्षीणकल्मषाः ।
छिन्नद्वैधा यतात्मानः सर्वभूतहिते रताः ॥
कामक्रोधवियुक्तानां यतीनां यतचेतसाम् ।
अभितो ब्रह्मनिर्वाणं वर्त्तते विदितात्मनाम् ।

[तथा]

[1]सुहृन्मित्रार्युदासीनमध्यस्थद्वेष्यबन्धुषु ।
साधुष्वपि च पापेषु समबुद्धिर्विशिष्यते ॥

[तथा[2]]

यो मां पश्यति सर्वत्र सर्वं च मयि पश्यति ।
तस्याऽहं न प्रणश्यामि स च मे न प्रणश्यति ॥
सर्वभूतस्थितं यो मां भजत्येकत्वमास्थितः ।
सर्वथा वर्तमानोऽपि स योगी मयि वर्तते ॥
आत्मौपम्येन सर्वत्र समं पश्यति योऽर्जुन ।
सुखं वा यदि वा दुःखं स योगी परमो मतः ॥

'यदा भूतपृथग्भावमि'ति भूतानां पृथग्भावमेकस्थं प्रलयावस्थायां परमकारणेऽनुपश्यति तत एव चैकस्मा-

1 भगवद्गीता—६, ९.
2 भगवद्गीता—६, ३०-३२.

त्परमात्मनो विस्तारं । "तस्माद्वा एतस्मादात्मन आकाशः संभूत[1]" इति सृष्टिप्रलयविद्ब्रह्म संपद्यते इत्यर्थः । 'पण्डिताः समदर्शिनः' ब्राह्मणादिषु ब्रह्माऽवस्थितं समदर्शिनो भवन्ति। सर्वभूतेष्वाकाशवद् ब्रह्मरूपमनुगतं पश्यन्तीत्यर्थः ।

[2]तथा

बहूनां जन्मनामन्ते ज्ञानवान् मां प्रपद्यते ।
वासुदेवः सर्वमिति स महात्मा सुदुर्लभः ॥

'सर्वं वासुदेवमि'ति ज्ञास्तेषामित्यर्थः ।

[3]तथा

चरन्तं ब्राह्मणं कंचित् स्वल्पवित्तमनामयम् ।
पप्रच्छ राजा प्रह्लादो बुद्धिमान् बुद्धिमत्तरम्[4] ॥

[[5]प्रह्लाद उवाच ।]

स्वस्थः शक्तो मृदुर्दान्तो निर्विधित्सोऽनसूयकः ।
सुवाक् प्रगल्भो मेधावी [6]प्राज्ञश्चरसि बालवत् ॥
नैव प्रार्थयसे लाभमानीते नाऽनुशोचसि[7] ।
नित्यतृप्त इव ब्रह्मन् न किंचिदभिमन्यसे ॥
स्रोतसा ह्रियमाणासु प्रजासु विमना इव ।
धर्मकामार्थकार्येषु कूटस्थ इव शिष्यसे[8] ॥

1 तैत्तिरीयोपनिषत्, आनन्दवल्ली—२, २.
2 भगवद्गीता—७, १९.
3 महाभारत, शान्तिपर्व—१७०, ३–१०.
4 प्राज्ञसत्तमः—मु. भा. (कुम्बकोणं)
5 Omitted in text.
6 बहुमतो लोके—मु. भा.
7 नाऽलाभेऽनुशोचसि—मु. भा.
8 लक्ष्यसे—ना., मु. भा.

नाऽनुतिष्ठसि धर्मार्थौ न कामं वाऽनुवर्त्तसे ।
इन्द्रियार्थाननादृत्य मुक्तश्चरसि साक्षिवत् ॥
का नु प्रज्ञा श्रुतं वाऽपि वृत्तिर्वा का नु ते मुने! ।
क्षिप्रमाचक्ष्व मे ब्रह्मन् श्रेयो यदिह मन्यसे ॥

[[1]भीष्म उवाच ।]

अनुयुक्तः स मेधावी लोकधर्मविधानवित् ।
उवाच श्लक्ष्णया वाचा प्रह्लादमनपार्थया ॥
पश्यन् प्रह्लाद भूतानामुत्पत्तिमनिमित्ततः ।
ह्रासं [2]वृद्धिं विनाशं च न प्रहृष्ये न च व्यथे ॥

[[3]तथा]

दिवि सञ्चरमाणानि ह्रस्वानि च महान्ति च ।
ज्योतींष्यपि यथाकालं पतमानानि लक्षये ॥
इति भूतानि संपश्यन् अनुषक्तानि मृत्युना ।
सर्वं सामान्यतो विद्वान् कृतकृत्यः सुखं स्वपे ॥
सुमहान्तमपि ग्रासं ग्रसे लब्धं यदृच्छया ।
शये पुनरभुञ्जानो दिवसानि बहून्यपि ॥
आशयन्त्यपि मामन्नं पुनर्बहुगुणं बहु ।
पुनरल्पं पुनस्तोकं पुनर्नैवोपपद्यते ॥
कणं कदाचित् खादामि पिण्याकमपि च ग्रसे ।
भक्षये शालिमांसानि भक्ष्यांश्चोच्चावचान् बहून् ॥
शये कदाचित् पर्यङ्के भूमावपि पुनः शये ।
प्रासादे वाऽपि शय्या मे कदाचिदुपपद्यते ॥

1 Omitted in text.

2 वृद्धिविनाशं—ना. and मु. भा.

3 महाभारत, शान्तिपर्व, १७७, १७–३७.

धारयामि च चीराणि शाणक्षौमाजिनानि च ।
महार्हाण्यथ वासांसि धारयाम्यहमेव च[1] ॥
न सन्निपतितं धर्म्यमुपभोगं यदृच्छया ।
प्रत्याचक्षे न चाऽप्येनमनुरुन्धे सुदुर्लभम् ॥
अचलमनिधनं शिवं विशोकं
शुचिमतुलं विदुषां मते निविष्टम् ।
अनभिमतमसेवितं च मूढैः
व्रतमिदमाजगरं शुचिश्चरामि ॥
अचलितमतिरच्युतः स्वधर्मात्
परिमितसंसरणः परापवर्गः[2] ।
विगतभयकषायलोभमोहो
व्रतमिदमाजगरं शुचिश्चरामि ॥
अनियतफलभोज्यभक्ष्यपेयं
विधिपरिणामविभक्तदेशकालम् ।
हृदयसुखमसेवितं कदर्यैः
व्रतमिदमाजगरं शुचिश्चरामि ॥
इदमिदमिति तृष्णयाऽभिभूतं
जनमनवाप्तधनं विषीदमानम् ।
निपुणमनुनिशाम्य तत्वबुद्ध्या
व्रतमिदमाजगरं शुचिश्चरामि ॥
बहुविधमनुदृश्य चाऽर्थहेतोः
कृपणमिहाऽऽर्यमनार्यमाश्रयन्तम् ।
उपशमरुचिरात्मवान् प्रशान्तो
व्रत्तमिदमाजगरं शुचिश्चरामि ॥

1 एकदा—मु. भा.

2 परावरज्ञः—मु. भा.

सुखमसुखमलाभमर्थलाभं
रतिमरतिं मरणं च जीवितं च ।
विधिनियतमवेक्ष्य तत्वतोऽहं
व्रतमिदमाजगरं शुचिश्चरामि ॥
अपगतभयरागमोहदर्पो
धृतिमतिबुद्धिसमन्वितः प्रशान्तः ।
उपगतफलभोगिनो निशाम्य
व्रतमिदमाजगरं शुचिश्चरामि ॥
अनियतशयनासनप्रकृत्या
यमनियमव्रतशौचसत्ययुक्तः ।
अपगतफलसञ्चयः प्रहृष्टो
व्रतमिदमाजगरं शुचिश्चरामि ॥
अपगतमसुखार्थमीहनार्थैः
उपगतबुद्धिरवेक्ष्य चाऽऽत्मसंस्थः ।
तृषितमनियतं मनो नियन्तुं
व्रतमिदमाजगरं शुचिश्चरामि ॥
न हृदयमनुरुध्यते मनो वा
प्रियसुखदुर्लभतामनित्यतां च ।
तदुभयमपि लक्षयन्निवाऽहं
व्रतमिदमाजगरं शुचिश्चरामि ॥
बहुकथितमिदं हि बुद्धिमद्भिः
कविभिरतिप्रथयद्भिरात्मकीर्तिम् ।
इदमिदमिति तत्र तत्र हन्त
स्वपरमतैर्गहनं प्रतर्कयद्भिः ॥

तदिदमनुनिशम्य विप्रपातं
पृथगभिपन्नमिहाऽबुधैर्मनुष्यैः ।
अनवसितमनन्तदोषपारं
नृषु विहरामि विनीतदोषतृष्णः ॥

[[1]भीष्म उवाच ।]

अजगरचरितव्रतं महात्मा
य इह नरोऽनुचरेद्विनीतरागः ।
अपगतभयमन्युलोभमोहः
स खलु सुखी विहरेदिमं विहारम् ॥

[2]तथा

युधिष्ठिर उवाच ।

किंशीलः किंसमाचारः किंविद्यः किंपराक्रमः ।
प्राप्नोति ब्रह्मणस्स्थानं यत्परं प्रकृतेर्ध्रुवम् ॥

भीष्म उवाच ।

मोक्षधर्मेषु नियतो लघ्वाहारो जितेन्द्रियः ।
आप्नोति ब्रह्मणः स्थानं यत्परं प्रकृतेर्ध्रुवम् ॥
अत्राऽप्युदाहरन्तीममितिहासं पुरातनम् ।
जैगीषव्यस्य संवादमसितस्य च भारत[3] ॥
जैगीषव्यं महाप्राज्ञं धर्माणामागतागमम् ।
अक्रुद्ध्यन्तमहृष्यन्तमसितो देवलोऽब्रवीत् ॥

1 Omitted in the text.

2 महाभारत, शान्तिपर्व—२३६, १-२६.

3 The following s'loka occurs immediately after भारत in the Kumbhakonam edition of the *Mahābhārata* :—

महादेवान्तरे वृत्तं देव्याश्चैवान्तरे तथा ।
यथावच्छृणु राजेन्द्र ज्ञानदं पापनाशनम् ॥

[1]देवल उवाच ।

न प्रीयसे वन्द्यमानो निन्द्यमानो न कुप्यसे ।
का ते प्रज्ञा कुतश्चैषा किं ते तस्याः परायणम् ॥

भीष्म उवाच ।

इति तेनाऽनुयुक्तस्तमुवाच स महातपाः ।
महद्वाक्यमसन्दिग्धं पुष्कलार्थपदं शुचि ॥

जैगीषव्य उवाच ।

या गतिर्या परा निष्ठा या शक्तिः[2] पुण्यकर्मणाम् ।
तामहं संप्रवक्ष्यामि यन्मां पृच्छसि वै द्विज ॥
निन्दत्सु च समा नित्यं प्रशंसत्सु च देवल ।
निह्नुवन्ति च ये तेषां समयं सुकृतं च यत् ॥
उक्ताश्च न विवक्षन्ति वक्तारमहिते हितम् ।
प्रतिहन्तुं च नेच्छन्ति हन्तारं च मनीषिणः ।
नाऽप्राप्तान्यनुशोचन्ति प्राप्तकालानि कुर्वते ।
न चाऽतीतानि शोचन्ति नैतानि प्रतिजानते ।
संप्राप्तानां च पूज्यानां कामादर्थेषु देवल ॥
यथोपपत्तिं कुर्वन्ति शक्तिमन्तो धृतव्रताः ।
पक्वविद्या महाप्रज्ञाः जितक्रोधा जितेन्द्रियाः ॥
मनसा कर्मणा वाचा नाऽपराध्यन्ति कर्हिचित् ।
अनीर्षवो न चाऽन्योन्यं विहिंसन्ति कदाचन ॥
न च जातूपतप्यन्ते धीराः परसमृद्धिभिः ।
निन्दाप्रशंसे नात्यर्थं न वदन्ति परस्य च ॥

1 Not found in मु. भा.

2 शान्तिः—मु. भा.

न च निन्दाप्रशंसाभ्यां विक्रियन्ते कदाचन ।
सर्वतश्च प्रशान्ता ये सर्वभूतहिते रताः ॥
न कुप्यन्ति न हृष्यन्ति नाऽपराध्यन्ति कस्यचित् ।
विमुच्य हृदयग्रन्थिं संक्रमन्ते यथासुखम् ॥
येषां न बान्धवास्सन्ति येऽन्येषां च न बान्धवाः ।
अमित्राश्च न सन्त्येषां ये चाऽमित्रा न कस्यचित् ॥
य एवं कुर्वते मर्त्याः सुखं जीवन्ति सर्वदा ।
धर्ममेवाऽनुरुध्यन्ते धर्मज्ञा द्विजसत्तमाः ॥
ये ह्यतो विच्युता मार्गात्ते हृष्यंत्युद्विजन्ति च ।
आस्थितस्तमहं मार्गमसूयिष्यामि तत्कथम् ॥
निन्द्यमानः प्रशस्तो वा हृष्येयं केन हेतुना ।
यद्यदिच्छन्ति तत्तस्मादधिगच्छन्ति मानवाः ॥
न मे निन्दा प्रशंसाभ्यां ह्रासवृद्धी भविष्यतः ।
अमृतस्येव संतृप्येदवमानस्य तत्ववित् ॥
विषस्येवोद्विजेन्नित्यं सम्मानस्य विचक्षणः ।
अवज्ञातः सुखं शेते इह चामुऽत्र चोभयोः ॥
विमुक्तः सर्वपापेभ्यो योऽवमन्ता स बुध्यते ।
परां गतिं च ये केचित् प्रार्थयन्ति मनीषिणः ॥
[1]एतद्ब्रह्म समाश्रित्य सुखमेधन्ति ते जनाः ।
सर्वतश्च समाहृत्य क्रतून् सर्वान् जितेन्द्रियः ॥
प्राप्नोति ब्रह्मणः स्थानं यत्परं प्रकृतेर्ध्रुवम् ।
नाऽस्य देवा न गन्धर्वा न पिशाचा न राक्षसाः ।
पदमन्ववरोहन्ति प्राप्तस्य परमां गतिम् ॥

1 एतद्व्रतं समाश्रित्य—मु. भारते.

[1]मार्कण्डेयपुराणे

दत्तात्रेय उवाच ।

दुःखापहारमद्यैव करोमि तव पार्थिव ।
सत्यं ब्रूहि किमर्थं ते दुःखं च पृथिवीपते ॥

[[2]जड उवाच ।]

[3]कस्य त्वं कस्य वा दुःखं तत्वमेवं विचार्यताम् ।
[4]अङ्गानीमानि देहस्य सर्वाङ्गानि च चिन्तय ॥
इत्युक्तश्चिन्तयामास स राजा तेन धीमता ।
त्रिविधस्याऽपि दुःखस्य स्थानमात्मानमेव च ॥
स विमृश्य चिरं राजा पुनःपुनरुदारधीः ।
आत्मानमात्मना वीरः प्रहस्येदमुवाच ह ॥
[5]नाऽहमुर्वी न सलिलं न ज्योतिरनिलो न च ।
नाऽऽकाशं किन्तु शारीरं न मेऽत्र सुखमिष्यते[4] ॥
तथा च [6]ममतात्यक्ते विशेषेणोपलभ्यते[7] ।

1 ३७, २९–४२.

2 Not found in the manuscripts.

3 Not found in printed edition.

4 A. S. B. Ms. G. 10645 begins here.

5 The following lines, found in the printed Mārkandeyapurāṇa, are omitted here :—

न्यूनातिरिक्ततां याति पञ्चकेऽस्मिन् सुखासुखम् ।
यदि स्यान् मम किं त्वस्यात् अन्यस्थेऽपि हितं मयि ॥
नित्यप्रभूतसद्भावे न्यूनातिक्यान् नतोन्नते ।

6 A. S. B. समता for ममता; तत्वावमयत्यक्ते—ना; तथा च ममता त्यक्ते—स.

7 The following lines are omitted here :

तन्मात्रावस्थिते सूक्ष्मे तृतीयांशे च पश्यतः ।
तथैव भूतसद्भावं शारीरं किं सुखावहम् ॥

मनस्यवस्थितं दुःखं सुखं वा मनसा श्रितम्[1] ।
यतस्ततो न मे दुःखं सुखं वा न ह्यहं मनः ॥
नाऽहङ्कारो न च मनो बुद्धिर्नाऽहं यतस्ततः ।
अन्तःकरणजं दुःखं पारक्यं मम तत्कथम् ॥
नाहं शरीरं न मनो यतोऽहं
पृथक् शरीरात् मनसस्तथाहऽम् ।
तत्सन्तु चेतस्यथ वाऽपि देहे
सुखानि दुःखानि च किं ममाऽत्र[2] ॥
न यस्य हस्तादिकमप्यशेषं
न मांसमस्थीनि [3]सिरादिभागः ।
कस्तस्य नागाश्वरथादिकोशैः
स्वल्पोऽपि संबन्ध इहाऽस्ति पुंसः ॥
तस्मान्न मेऽरिर्न च मेऽस्ति दुःखं
न मे सुखं नाऽपि पुरं न कोशः ।
न चाऽश्वनागादिबलं न तस्य
नाऽन्यस्य वा कस्य मया विनाऽस्ति[4] ॥
[5]यथा घटीकुम्भकमण्डलुस्थ-
माकाशमेकं बहुधा विभाति ।
तथा सुबाहुः स च काशिपोऽहं
मन्ये च देहेषु शरीरभेदैः ॥

1 मनसाश्रयं—A. S. B. ना. स ; मानसं च यत्—मु. पु.

2 This s'loka appears in the printed text of the Purāṇa :

राज्यस्य वांशं कुरुतेऽप्रजोऽस्य देहस्य चेद् पञ्चमयस्स राशिः ।
गुणप्रवृत्त्या मम किं तत्र तत्स्थः स चाहं च शरीरतोऽन्यः ॥

3 त्वोराहि भागः—A. S. B. ; शिराविभागः—मु. पु.

4 कस्यचिद्वा ममास्ति—मु. पु.

5 यदा यथा for यद्यपि. U., A. S. B. and मु. पु.

विष्णुपुराणे[1]

राजोवाच ।

किं [2]श्रान्तोऽस्यल्पमध्वानं त्वयोढा शिबिका मम ।
किं मया स सह्यो नत्वं पीवानसि [3]निरीक्ष्यसे ॥

ब्राह्मण उवाच ।

नाऽहं पीवा न वै वोढा शिबिका भवतो मया ।
न श्रान्तोऽस्मि न चाऽऽयासः सोढव्योऽसि महीपते ॥

राजोवाच ।

प्रत्यक्षं दृश्यसे पीवा नाऽद्यापि शिबिका त्वयि ।
श्रमश्च भारोद्वहने भवत्येव हि देहिनाम् ॥

ब्राह्मण उवाच ।

प्रत्यक्षं भवता भूप यद्दृष्टं मम तद्वद ।
बलवानबलश्चेति वाच्यं पश्चाद्विशेषणम् ।
त्वयोढा शिबिका चेति त्वय्यद्याऽपि च संस्थिता ॥
मिथ्यैतदत्र तु भवान् शृणोतु वचनं मम ।
भूमौ पादयुगस्याऽऽस्था जङ्घे पादद्वये स्थिते ।
ऊरू जङ्घाद्वयावस्थे तदाधारं तथोदरम् ॥
वक्षःस्थलं तथा बाहू स्कन्धौ चोदरसंस्थितौ ।
स्कन्धाश्रितेऽयं शिबिका मम भारोऽत्र किंकृतः ॥

1 Mitramis'ra omits entirely the quotation from विष्णुपुराण, evidently as the passage goes against the Advaita doctrine. *Lakṣmīdhara's* rejection of Advaita is also presumable from his selection of this passage. Rāmānuja cites the identical passages in his सिद्धित्रयम्—२, १३, ६१.

2 यातोस्यल्पं for श्रान्तोस्यल्पं—A. S. B. and मु. पु.

3 निरीक्षसे—A. S. B. and मु. पु.

शिबिकायां स्थितं चेदं वपुस्त्वदुपलक्षितम् ।
तत्र त्वमहमप्यत्र प्रोच्यते चेदमन्यथा ॥
अहं त्वं च तथाऽन्ये च[1] भूतैरूह्यामहे वयम् ।
गुणप्रवाहपतितो भूतवर्गोऽपि यात्ययम् ॥
कर्मवश्या गुणाश्चैते सत्वाद्याः पृथिवीपते ।
अविद्यासंचितं[2] कर्म तच्चाऽशेषेषु जन्तुषु ॥
आत्मा शुद्धोऽक्षरः शान्तो निर्गुणः प्रकृतेः परः ।
प्रवृद्ध्युपचयौ नाऽस्य एकस्याऽखिलजन्तुषु ॥
यदा नोपचयस्तस्य न चैवाऽपचयो नृप ।
तदा पीवानसीतीत्थं कया युक्त्या त्वयेरितम् ॥
भूपादजङ्घाकट्यूरुजठरादिषु संस्थिते ।
शिबिकेयं यदा स्कन्धे तदा [3]भावसमस्त्वया ॥
तथाऽन्यजन्तुभिर्भूप शिबिकोत्था न केवलम् ।
शैलद्रुमगृहस्थोऽपि[4] पृथिवीसंभवोऽपि वा ॥
यदा पुंसः पृथग्भावः कारणैः प्राकृतैर्नृप ।
सोढव्यस्तु तदाऽऽयासः कतरो नृपते मया ॥
यद्द्रव्या शिबिका चेयं तद्द्रव्यो भूतसंग्रहः ।
भावतो मेऽखिलस्याऽस्य ममत्वेनोपबृंहितः ॥

<u>पराशर</u> उवाच ।

एवमुक्त्वाऽभवन्मौनी स वहन् शिबिकां द्विजः ।
सोऽपि राजाऽवतीर्योर्व्यां तत्पादौ जगृहे त्वरन् ॥

1 च for वा—A. S. B.

2 संवितं कर्म for संचितं कर्म; A. S. B. संचिते कर्म ना.

3 भारसमस्त्वया for भावसमस्त्वया—ना. स. and A. S. B.

4 गृहोत्थोपि for गृहस्थोपि—A. S. B.

राजोवाच ।

भो भो विसृज्य शिबिकां प्रसादं कुरु मे द्विज ।
कथ्यतां को भवानत्र [1]जाल्मरूपधरः स्थितः ॥
यो भवान् यन्निमित्तं च यदागमनकारणम् ।
तत्सर्वं कथ्यतां विद्वन्मह्यं शुश्रूषवे तथा[2] ॥

ब्राह्मण उवाच ।

श्रूयतां कोऽहमित्येतद्वक्तुं किंचिन्न शक्यते ।
उपभोगनिमित्तं च सर्वत्राऽऽगमनक्रिया ॥
सुखदुःखोपभोगौ तु तौ देहाद्युपपादकौ ।
धर्माधर्मोद्भवौ भोक्तुं जन्तुर्देहादिमृच्छति ॥
सर्वस्यैव हि भूपाल जन्तोः सर्वत्र कारणम् ।
धर्माधर्मौ यतस्तस्मात् कारणं पृच्छ्यते कुतः ॥

राजोवाच ।

धर्माधर्मौ न सन्देहः सर्वकार्येषु कारणम् ।
उपभोगनिमित्तं च देहदेशान्तरागमः ॥
यदेतद्भवता प्रोक्तं कोऽहमित्येतदात्मनः ।
वक्तुं न शक्यते श्रोतुं तन्ममेच्छा प्रवर्त्तते ॥
योऽस्ति सोऽहमिति ब्रह्मन् कथं वक्तुं न शक्यते ।
आत्मन्येष न दोषाय शब्दोऽहमिति यो द्विज ॥

ब्राह्मण उवाच ।

शब्दोऽहमिति दोषाय नाऽऽत्मन्येव तथैव तत् ।

1 जाड्यरूप for जाल्मरूप—A. S. B.,

2 त्वया for तथा—A. S. B., ना and स.

अनात्मन्यात्मविज्ञानं शब्दो[1] वा भ्रान्तिलक्षणः ॥
जिह्वा ब्रवीत्यहमिति दन्तोष्ठौ तालुकं नृप ।
एतेनाऽहं यतः सर्वे वाङ्निष्पादनहेतवः ॥
किं हेतुभिर्वदत्येषा वागेवाऽहमिति स्वयम् ।
तथाऽपि वाङ्नाहमेतद्वक्तुमित्थं न युज्यते ॥
पिण्डः पृथग्यतः पुंसः शिरःपाण्यादिलक्षणः ।
ततोऽहमिति कुत्रैतां संज्ञां राजन् करोम्यहम् ॥
यद्यन्योऽस्ति परः कोऽपि मत्तः पार्थिवसत्तम ।
तदेशोऽहमयं[2] चाऽन्यो वक्तुमेवमपीष्यते ॥
यदा समस्तदेहेषु पुमानेको व्यवस्थितः ।
तदा हि को भवान्कोऽहमित्येतद्विफलं वचः ॥
त्वं राजा शिबिका चेयं वयं वाह्याः[3] पुरःसराः ।
अयं च भवतो लोको न सदेतन्नृपोच्यते ॥
वृक्षाद्दारु ततश्चेयं शिबिका त्वदधिष्ठिता ।
क्व वृक्षसंज्ञा याता स्याद्दारुसंज्ञाऽथवा[4] नृप ॥
वृक्षारूढो महाराजो नायं वदति ते जनः ।
न च दारुणि तिष्ठन्तं[5] ब्रवीति शिबिकागतम् ॥
शिबिका दारुसङ्घातो रचनास्थितिसंस्थितः ।
[6]अन्विष्यतां नृपश्रेष्ठ तद्भेदे शिबिका त्वया ॥
एवं छत्रशलाकानां पृथग्भावो विमृश्यताम् ।
क्व यातं छत्रमित्येष न्यायस्त्वयि तथा मयि ॥

1 शब्दादाभ्रान्तिलक्षणः—A. S. B.
2 तद्देशोऽस्मयं चान्यो A. S. B.
3 वाहाः for वाह्यः—A. S. B.
4 वा तस्याः—ना.
5 दारुवितिष्ठन्तं—A. S. B.
6 अधिष्यतां—A. S. B.

[1]पुमांस्त्री गौरजो वाजी कुञ्जरो विहगस्तरुः।
देहेषु लोके संज्ञेयं विज्ञेया कर्महेतुषु॥
पुमान्न देवो न नरो न पशुर्न च पादपः।
शरीराकृतिभेदास्तु भूपैते कर्मयोनयः॥
वस्तु राजेति यल्लोके यच्च राजभटात्मकम्।
तथाऽन्यच्च नृपेत्थं तन्न सत्संकल्पमात्रकम्॥
यत्तु कालान्तरेणाऽपि नाऽन्यसंज्ञामुपैति वै।
परिणामादिसंभूतं तद्वस्तु नृप तच्च किम्॥
त्वं राजा सर्वलोकस्य पितुः पुत्रो रिपोरिपुः।
पत्न्याः पतिः पिता सूनोः कं त्वां भूप वदाम्यहम्॥
त्वं किमेतच्छिरः किन्तु शिरस्तव तनोदरम्।
किमु पादादिकं त्वं वै न वैतत् किं महीपते॥
समस्तावयवेभ्यस्त्वं पृथग्भूतो व्यवस्थितः।
कोऽहं त्वं चेति निपुणो भूत्वा चिन्तय पार्थिव॥
एवं व्यवस्थितोऽतत्वे मयाऽहमिति भावितम्।
पृथक्करणनिष्पाद्यं शक्यते नृप ते कथम्॥

'तदुपलक्षितस्त्वयात्मनाऽहं त्वया गृहीतः। तत्र त्वमिति'। तत्र त्वमहमत्रेत्यन्यथोच्यते। यतो नावयोर्वाच्यवाचकभावोऽस्तीति भावः। 'गुणप्रवाहः' गुणपरिणामस्रोतः। 'शुद्धः' केवलो वस्त्वन्तरसंसर्गशून्योऽसंज्ञीत्यर्थः। 'अक्षरो'ऽविनाशी। 'शान्तो' रागद्वेषरहितः। 'निर्गुणो' गुणातीतः। 'प्रकृतेः परः' अचेतनादत्यन्तविलक्षणः। 'भूपालेत्यादि'। यद्यन्येन ध्रियमाणे भावे परस्याऽपि भारो भवेत्,

1 Fol. 39 of the Nagpur Ms. which should begin here is lost.

तदा मदुपलक्षितस्कन्धाश्रिते भर्त्तव्ये तवाऽपि भारः[1] स्यादिति भावः। तथाऽन्यजन्तुभिर्भारः सम इत्यन्वयः। न केवलं शिबिकोत्थः भारः समः। किन्तु शैलभारोऽपि समः। 'जाल्मः' असमीक्ष्यकारी[2] यन्निमित्तमित्यागमनहेतुविषयः। 'किमागमनकारणमिति' उद्देश्यप्रश्नः। 'शब्दोऽहमि'ति दोषायेत्यादि। 'अहमि'ति शब्दोऽयमात्मनि स्वप्रयोक्तरि वर्त्तमानो न दोषाय भवति। किन्तु अनात्मन्यात्मविज्ञानं भ्रमः। तथाऽऽत्मशब्दस्याऽप्यनात्मनि प्रयोगो भ्रान्तिलक्षण इत्यर्थः। 'एते जिह्वादयः' शब्दाभिव्यक्तिहेतवो नाऽहं कर्तृकत्वादशरीरत्वात् (?) अशरीरत्वाच्चाऽहमिति शब्द-विज्ञानयोरन्यदानयनमित्यर्थः।

<u>तथा</u>

[3]परमार्थस्तु भूपाल संक्षेपात् श्रूयतां मम।
एको व्यापी समः शुद्धो निर्गुणः प्रकृतेः परः॥
जन्मबुध्यादिरहित आत्मा सर्वगतोऽव्ययः।
परज्ञानमयोऽसद्भिः नामजात्यादिभिर्विभुः॥
न योगवान्न युक्तोऽभून्नैव पार्थिव योक्ष्यते।
तस्याऽऽत्मपरदेहेषु सतोऽप्येकतमं हि तत्॥
विज्ञानं परमार्थोऽसौ द्वैतनोऽतत्त्वदर्शिनः।
वेणुरन्ध्रविभेदश्च यथा षड्जादिसंज्ञितः॥
अभेदव्यापिनो[4] वायोस्तथा तस्य महात्मनः।

1 भावः इति उदयपुरमातृकायाम्.

2 असमीक्षकारी.

3 २, १४, २८.

4 अभेदयायिनो—A. S. B.

तथा

[1]श्रूयतां नृपशार्दूल यद्गीतमृभुणा पुरा ।
प्रतिबोधं जनयता निदाघस्य महात्मनः ॥
ऋभुर्नामाऽभवत्पुत्रो ब्रह्मणः परमेष्ठिनः ।
विज्ञाततत्वसद्भावो निसर्गादेव भूपते ॥
तस्य शिष्यो निदाघोऽभूत्पुलस्त्यतनयः पुरा ।
प्रादादशेषविज्ञानं स तस्मै परया मुदा ॥
अवाप्तज्ञानतत्वस्य न तस्याऽद्वैतवासना ।
स ऋभुस्तर्कयामास निदाघस्य नरेश्वरः ॥
देविकायास्तटे वीर नगरं नाम वै पुरम् ।
समृद्धमतिरम्यं च पुलस्त्येन निवेशितम् ॥
रम्योपवनपर्यन्ते स तस्मिन् पार्थिवोत्तम ।
निदाघनामा योगज्ञ ऋभुशिष्योऽवसत्पुरा ॥
दिव्यवर्षसहस्रे तु समतीतेऽस्य तत्पुरम् ।
जगाम स ऋभुः शिष्यं निदाघमवलोककः ॥
स तस्य वैश्वदेवान्ते द्वारालोकनगोचरे ।
स्थितस्तेन गृहीतार्घ्यो निजवेश्म प्रवेशितः ॥
प्रक्षालिताङ्घ्रिपद्मं च कृतासनपरिग्रहम् ।
उवाच स द्विजश्रेष्ठो भुज्यतामिति सादरम् ॥

ऋभुरुवाच ।

भो विप्रवर्य भोक्तव्यं यदत्र भवतो गृहे ।
तत्कथ्यतां कदन्नेषु नः प्रीतिः सततं मम ॥

1 २, १५, २.

निदाघ उवाच ।

सक्तु [1]यावकवाट्यानामपूपानां च मे गृहे ।
यद्रोचते द्विजश्रेष्ठ तद्भक्षय यथेच्छया ॥

ऋभुरुवाच ।

कदन्नानि द्विजैतानि मिष्टमन्नं प्रयच्छ मे ।
संयावपायसादीनि द्राक्षाफाणितवन्ति च ॥

निदाघ उवाच ।

हे हे शालिनि मद्गेहे यत्किंचिदतिशोभनम् ।
भक्ष्योपसाधनं मिष्टं तेनाऽस्याऽन्नं प्रसाधय[2] ॥
इत्युक्ता तेन सा पत्नी मिष्टमन्नं द्विजस्य तत्[3] ।
प्रसाधितवती तस्य भर्त्तुर्वचनगौरवात् ॥
तं भुक्तवन्तमिच्छातो मिष्टमन्नं महामुनिम् ।
निदाघः प्राह भूपाल प्रश्रयावनतः स्थितः ॥
अपि ते परमा तृप्तिरुत्पन्ना तुष्टिरेव च ।
अपि ते मानसं स्वस्थमाहारेण कृतं द्विज ॥
क्वनिवासो भवान्विप्र क्व वा गन्तुं समुद्यतः ।
आगम्यते वा भवता यतस्तच्च द्विजोच्यताम् ॥

ऋभुरुवाच ।

क्षुद्यस्य तस्य भुक्तान्ने[4] तृप्तिर्ब्राह्मण जायते ।
न मे क्षुन्नाऽभवत्तृप्तिः कस्मान्मां द्विज पृच्छसि ॥

1 यावकवाट्यानां—A. S. B.
2 प्रसादय for प्रसाधय—A. S. B.
3 यत् for तत्.—A. S. B.
4 भुक्तेन्ने—A. S. B. makes a better reading.

वह्निना पार्थिवे धातौ क्षयिते क्षुत्समुद्भवः ।
भवत्यम्भसि[1] च क्षीणे नृणां तृप्ति[र्न]जायते ॥
क्षुत्तृष्णे देहधर्माख्ये न ममैते यतो द्विज ।
ततः क्षुत्संभवाभावात्तृप्तिरस्त्येव मे सदा ॥
मनसः सुस्थता तुष्टिश्चित्तधर्मो न मे द्विज ।
चेतसो ये तु[2] तत्प्रश्न पुमानेभिर्न युज्यते ॥
क्व निवासस्तवेत्युक्तं क्व गन्ताऽसि च यः त्वया ।
कुतश्चाऽऽगम्यते ह्यत्र त्रितयेऽपि निबोध मे ॥
पुमान् सर्वगतो व्यापी आकाशवदयं यतः ।
कुतः कुत्र क्व गन्ताऽसि ते तदप्यर्थवत्कथम् ॥
नाऽहं गन्ता न वाऽऽगन्ता[3] नैकदेशनिकेतनम् ।
त्वं चाऽन्ये च न च [4]त्वं नं नाऽन्येऽन्येवाऽहमप्यहम् ॥
मिष्टान्नमिष्टमित्येषा जिज्ञासा मे कृता तव ।
किं वक्ष्यसीति तत्राऽपि श्रूयतां द्विजसत्तम ॥
किमस्वाद्वथवा मिष्टं भुञ्जनोऽन्नं द्विजोत्तम ।
मिष्टमेव यदाऽमिष्टं तदेवोद्वेगकारणम् ॥
अमृष्टं जायते मृष्टं मृष्टादुद्विजते जनः ।
आदिमध्यावसानेषु किमत्र रुचिकारणम् ॥
मृन्मयं हि गृहं यद्वन्मृदा लिप्तं स्थिरं भवेत् ।
पार्थिवोऽयं यदा देहः पार्थिवैः परमाणुभिः ॥
यवगोधूममुद्गादि घृतं तैलं पयो दधि ।
गुडः फलादीनि तथा पार्थिवाः परमाणवः ॥

1 भवत्यांभसि for भवत्यभसि—A. S. B.
2 यस्य for यत्तु—A. S. B.
3 नचागन्ता for नावगन्ता—A. S. B.
4 त्वं त्वं for न च त्वं तं—A. S. B.

तदेतद्भवता ज्ञात्वा मिष्टाऽमिष्टविचारि यत् ।
तन्मना समतालम्बी कार्यं साम्यं हि मुक्तये ॥
इत्याकर्ण्य वचस्तस्य परमार्थान्वितं नृप ॥
प्रणिपत्य महाभागो निदाघो वाक्यमब्रवीत् ।
प्रसीद मद्धितार्थाय कथ्यतां कस्त्वमागतः ॥
नष्टो मोहस्समाकर्ण्य वचांस्येतानि वै द्विज ।

ऋभुरुवाच ।

ऋभुरस्मि तवाऽऽचार्यः प्रज्ञादानाय ते द्विज ।
इहाऽऽगतोऽहं यास्यामि परमार्थस्तवोदितः ॥
एकमेवमिदं ब्रह्मन्नभेदि सकलं जगत् ।
वासुदेवाभिधानस्य स्वरूपं परमात्मनः ॥
तथेत्युक्तो निदाघेन प्रणिपातपुरस्सरम् ।
पूजितः परया भक्त्या इच्छातः प्रययौ ऋभुः ॥
[1]पुनर्वर्षसहस्रे तु समतीते नरेश्वर ।
निदाघज्ञानदानाय तदेव नगरं ययौ ॥
नगरस्य बहिः सोऽथ निदाघं ददृशे मुनिम् ।
महाबलपरीवारे पुरं विशति पार्थिवे ॥
दूरे स्थितं महाभागं जनसम्मर्दवर्जकम् ।
क्षुत्क्षामकण्ठमायान्तमरण्यात् ससमित्कुशम् ॥
दृष्ट्वा निदाघं स ऋभुरुपगम्याऽभिवाद्य च ।
उवाच कस्मादेकान्ते स्थीयते भवता द्विज ॥

निदाघ उवाच ।

भो विप्र जनसंमर्दो महानेष नरेश्वरे ।
प्रविविक्षौ पुरं रम्यं तेनाऽत्र स्थीयते मया ॥

1 २, १६, १.

ऋभुरुवाच ।

नराधिपोऽत्र कतमः कतमश्चेतरो जनः ।
कथ्यतां मे द्विजश्रेष्ठ त्वमभिज्ञो मतो मम ॥

निदाघ उवाच ।

योऽयं गजेन्द्रमुन्मत्तं अद्रिशृंगमिवोच्छ्रितम् ।
अधिरूढो नृपेन्द्रोऽयं परलोकस्तथेतरः ॥

ऋभुरुवाच ।

एतौ हि गजराजानौ युगपद्दर्शितौ मम ।
भवता न विशेषेण पृथक्चिह्नोपलक्षितौ ॥
तत्कथ्यतां महाभाग विशेषो भवताऽनयोः ।
ज्ञातुमिच्छाम्यहं कोऽत्र गजः को वा नराधिपः ॥

निदाघ उवाच ।

गजो योऽयमजो [1]ब्रह्मन्नुपर्यस्यैष भूपतिः ।
वाह्यवाहकसम्बन्धं को न जानाति वै द्विज ॥

ऋभुरुवाच ।

जानाम्यहं यथा ब्रह्मन् तथा मामवबोधय ।
अधश्शब्दनिगद्यं किं किं चोर्ध्वमभिधीयते ॥

ब्राह्मण उवाच ।

इत्युक्तस्सहसाऽऽरुह्य निदाघः प्राह तं ऋभुम् ।
श्रूयतां कथयाम्येष यन्मां त्वं परिपृच्छसि ॥
उपर्यहं यथा राजा त्वमधः कुञ्जरस्तथा ।
अवबोधाय ते ब्रह्मन् दृष्टान्तो दर्शितो मया ॥

1 अथो for अजो—A. S. B.

ऋभुरुवाच ।

त्वं राजवद्द्विजश्रेष्ठ स्थितोऽहं गजवद्यदि ।
तदेव त्वं समाचक्ष्व कतरस्त्वमहं तथा ॥

ब्राह्मण उवाच ।

इत्युक्तस्सत्वरस्तस्य प्रगृह्य चरणावुभौ ।
निदाघः प्राह भगवानाचार्यस्त्वं ऋभुर्ध्रुवम् ॥
नाऽन्यस्याऽद्वैतसंस्कारसंस्कृतं मानसं तथा ।
यथाऽऽचार्यस्य तेन त्वां मन्ये प्राप्तमहं गुरुम् ॥

ऋभुरुवाच ।

तवोपदेशदानाय पूर्वशुश्रूषयाऽऽदृतः ।
गुरुस्तेऽहमृभुर्नाम निदाघ समुपागतः ॥
तदेतदुपतिष्ठन्ते संक्षेपेण महामते ।
परमार्थसारभूतं यत् तदद्वैतमशेषतः ॥

ब्राह्मण उवाच ।

एवमुक्त्वा ययौ विद्वान् निदाघं स ऋभुर्गुरुः ।
निदाघोऽप्युपदेशेन तेनाऽद्वैतपरोऽभवत् ।
सर्वभूतान्यभेदेन ददृशे स तदात्मनः ॥

<u>तथा</u>

परब्रह्मपरो मुक्तिमवाप परमां द्विजः ।
तथा त्वमपि धर्मज्ञ तुल्यात्मरिपुबान्धवः ॥
भव सर्वगतं जानन्नात्मानमवनीपते ।
सितनीलादिभेदेन यथैकं दृश्यते नभः ॥
भ्रान्तदृष्टिभिरात्माऽपि तथैकस्सन् पृथक् पृथक् ।

एकः समस्तं यदिहास्ति किंचित्
तदच्युतो नास्त्यपरं ततोऽन्यत् ।
सोऽहं स च त्वं स च सर्वमेत-
दात्मस्वरूपं त्यज भेदमोहम् ॥

तथा प्रह्लादचरिते[1]

प्रह्लाद उवाच ।

ममोपदिष्टं सकलं गुरुणा नाऽत्र संशयः ।
गृहीतं च मया किं तु न सदेतन्मतं मम ॥
साम चोपप्रदानं च भेददण्डौ तथाऽपरौ ।
उपायाः कथिता ह्येते मित्रादीनां च साधने ॥
तदहं च न पश्यामि मित्रादींस्तात मा क्रुधः ।
साध्याभावे महाबाहो साधनैः किं प्रयोजनम् ॥
सर्वभूतात्मके तात जगन्नाथे जगन्मये ।
परमात्मनि गोविन्दे मित्रामित्रकथा कुतः ॥
त्वय्यस्ति भगवान्विष्णुर्मयि चाऽन्यत्र चाऽस्ति सः ।
यतस्ततोऽयं मित्रं मे शत्रुर्वेति पृथक् कुतः ॥
तदेभिरलमत्यर्थं दुस्तरे[2] तूक्तिविस्तरे ।
अविद्यान्तर्गतैर्यत्नः कर्तव्यस्तात शोभने ॥
विद्या बुद्धिरविद्यायामज्ञानात्तात जायते ।
बालोऽग्निं किं न खद्योतमसुरेश्वर मन्यते ॥
तत्कर्म यन्न बन्धाय सा विद्या या विमुक्तये ।
आयासायाऽपरं कर्म विद्याऽन्या शिल्पनैपुणम् ॥

1 विष्णुपुराण, १, १९, ३४—४९.

2 दुष्टारम्भोक्तिविस्तरैः—मु. पु., पृ. १०६.

तदेतदवगम्याऽहमसारं सारमुत्तमम् ।
निशामय महाभाग प्रणिपत्य ब्रवीमि ते ॥
न चिन्तयति को राज्यं को धनं नाऽभिवाञ्छति ।
तथाऽपि भाव्यमेवैतदुभयं प्राप्यते नरैः ॥
सर्व एव महाभाग महत्त्वं प्रति सोद्यमः ।
तथाऽपि पुंसां भाग्यानि नोद्यमा भूतिहेतवः ॥
जनानामविवेकानामश्रृण्वानामपि प्रभो ।
भाग्यभोगानि राज्यानि सन्त्यनीतिमतामपि ॥
तस्माद्यतेत धर्माय[1] यदीच्छेन्महतीं श्रियम् ।
यतितव्यं [2]समत्वेन निर्वाणमपि चेच्छता ॥
देवा मनुष्याः पशवः पक्षिवृक्षसरीसृपाः ।
रूपमेतदनन्तस्य विष्णोर्भिन्नमिव स्थितम् ॥
एतद्विजानता सर्वं जगत्स्थावरजंगमम् ।
द्रष्टव्यमात्मवद्विष्णुर्यतोऽयं विश्वरूपधृक् ॥
एवं ज्ञाते स भगवाननादिः परमेश्वरः ।
[3]प्रसीदति ततस्तत्र प्रसन्ने क्लेशसंक्षयः ॥

1 पुण्येषु—मु. पु.
2 समत्वे च—मु. पु.
3 प्रसीदत्यच्युतः तस्मिन्.

॥ २४ ॥

अथ योगभ्रष्टगतिः

तत्र महाभारते[1]

अर्जुन उवाच ।

अयतिः श्रद्धयोपेतो योगाच्चलितमानसः ।
अप्राप्य योगसंसिद्धिं कां गतिं कृष्ण गच्छति ॥
कच्चिन्नोभयविभ्रष्टश्छिन्नाभ्रमिव नश्यति ।
अप्रतिष्ठो महाबाहो विमूढो ब्रह्मणः पथि ॥
एतन्मे संशयं कृष्ण छेत्तुमर्हस्यशेषतः ।
त्वदन्यः संशयस्याऽस्य छेत्ता न ह्युपपद्यते ॥

श्रीभगवानुवाच ।

पार्थ नैवेह नाऽमुत्र विनाशस्तस्य विद्यते ।
न हि कल्याणकृत्कश्चिद्दुर्गतिं तात गच्छति ॥
प्राप्य पुण्यकृतां लोकानुषित्वा शाश्वतीः समाः ।
शुचीनां श्रीमतां गेहे योगभ्रष्टोऽभिजायते ॥
अथवा योगिनामेव कुले भवति श्रीमताम्[2] ।
एतद्धि दुर्लभतरं लोके जन्म यदीदृशम् ॥

1 भगवद्गीता—६, ३७-४५.

2 'धीमतां' इति भाष्यकाराः पठन्ति.

तत्र तं बुद्धिसंयोगं लभते पौर्वदेहिकम् ।
यतते च ततो भूयः संसिद्धौ कुरुनन्दन ॥
पूर्वाभ्यासेन तेनैव ह्रियते[1] ह्यवशोऽपि सः ।
जिज्ञासुरपि योगस्य शब्दब्रह्माऽतिवर्तते ॥
[2]प्रयत्नाद्यतमानस्तु योगी संशुद्धकिल्बिषः ।
अनेकजन्मसंसिद्धस्ततो याति परां गतिम् ॥

विष्णुपुराणे

[3]योगयुक् प्रथमं योगी युंजानस्त्वभिजाग्रते ।
विनिष्पन्नसमाधिस्तु परं ब्रह्मोपलब्धिमान् ॥
यद्यन्तरायदोषेण मुच्यते नरमानसम् ।
जन्मान्तरैरभ्यसतो मुक्तिः पूर्वैव जायते ॥
विनिष्पन्नसमाधिस्तु मुक्तिं तत्रैव जन्मनि ।
प्राप्नोति योगी योगाग्निदग्धकर्मचयोऽचिरात् ॥

1 क्रियते हि अवशोऽपि सः— A. S. B.
2 प्रयत्नाद्यतमानस्तु—A. S. B., स. ना. भाष्यकाराश्च.
3 ६, ७, ३३–३५.

भूतशुद्धितन्त्रम्

॥अथ प्रथमः पटलः ॥

ॐ देव्युवाच —

कथयेशान ! सर्वज्ञ ! यतोऽहं तव वल्लभा ।
योगं शारीरिकं देव ! यतस्त्वं योगवित्तमः ॥१ ॥
विना येन न सिद्ध्येत् तु जपहोमार्चनादिकम् ।
आत्मज्ञानं महेशान येन त्वं सिद्धिमान् गुरुः ॥२ ॥

भैरव उवाच —

श्रृणु देवि ! प्रवक्ष्यामि सारात् सारतरं परम् ।
स्त्रीस्वभावात् कदा कुत्र न प्रकाश्यं कदाचन ॥३ ॥
अतिप्रेमवशीभूतः कथयामि तवाऽग्रतः ।
गुदोर्ध्वं द्व्यङ्गुलं देवि ! कन्दमूलं खगाण्डवत् ॥४ ॥
तत्र नाड्यः समुत्पन्नाः सहस्राणां द्विसप्ततिः ।
तासु नाड्यः प्रधानास्तु तत्र मुख्याश्चतुर्दश ॥५ ॥
तासां मुख्यतमास्तिस्र इडाद्याः परमेश्वरि ।
इडा च पिङ्गला चैव सुषुम्णा चेति तत्क्रमात् ॥ ६ ॥
सुषुम्णा त्रितया ज्ञेया वज्राचित्रान्तरान्विता ।
पञ्च नाड्यः प्रधानास्तु योगिनां साधने हिताः ॥ ७ ॥
मेरोर्वामे इडा दक्षे पिङ्गला चाऽस्थिनि स्थिते ।
पार्श्वयोर्मध्यदेशे च सुषुम्ना त्रिगुणा मता ॥ ८ ॥
पृष्ठदेशं समाश्रित्य प्रोद्गता ब्रह्मरन्ध्रकम् ।
सुषुम्ना चैव वल्ली च मेरोः श्लिष्टाः पुरोगताः ॥ ९ ॥

ग्रीवान्तं प्राप्य गलितं तिर्यग्भूता वराङ्गने !।
शङ्खिनीनालमालम्ब्य गता सा ब्रह्मसाधने ॥१०॥
तदूर्ध्वं द्व्यङ्गुलान्तं च वज्राख्या चित्रिणी तथा।
त्रिगुणा चातिसूक्ष्माग्रा ललन्ती ललना तथा ॥११॥
अतः सुषुम्णा त्रिगुणा ब्रह्मविष्णुशिवात्मिका।
सत्त्वादित्रिगुणाधारा मता तु ब्रह्मनाडिका ॥१२॥
कन्दलग्नोर्ध्वदेशे तु सहस्रच्छदमुत्तमम्।
श्वेतोदरं तथा श्वेतकिञ्जल्कपरिमण्डितम् ॥१३॥
पीतकर्णिकमाश्चर्यमैश्वर्यमजमव्ययम्।
कमलं सर्वदेवानामाक्रीडं तद्धि पार्वति ! ॥१४॥
तदूर्ध्वं त्र्यङ्गुलं गुह्यं मूलाधाराच्चतुर्दलम्।
रक्तं वशषसोपेतं डाकिन्या समधिष्ठितम् ॥
ध्यानं तस्याः प्रवक्ष्यामि सावधानाऽवधारय ॥१५॥
रक्ताक्षीं रक्तवर्णां पशुजनभयकृच्छूलखट्वाङ्गहस्तां
वामे खड्गं दधानां चणकमपि सुधापूरितं चैकवक्त्राम्।
अत्युग्रामुग्रदंष्ट्रामरिकुलमथनीं पायसान्ने प्रसक्तां
मूलाधारेऽमृतार्थे परिवृतवससां डाकिनीं चिन्तयेत् ताम् ॥१६॥
ध्यायेत् तत्र त्रिकोणं च तन्मध्ये विवरं शुचि।
तत्र ध्यायेत् कुण्डलिनीं प्रसुप्तां भुजगाकृतिम् ॥१७॥
संवेष्ट्याधोमुखं लिङ्गं त्रिवृत्त्या पुच्छसंयुताम्।
विनोद्वेगं विनोत्कण्ठां निजे याति ततोत्थिता ॥१८॥
हुताशतापसंविग्नां चोर्ध्वमात्रामृतार्थिनाम्।
ततो नयेत् पथि प्राज्ञो जीवयोगेन तत्पदम् ॥१९॥

तदूर्ध्वं ध्वजमूले तु पङ्कजं षड्दलं परम्।
स्वाधिष्ठानाख्यमाश्चर्यं सूक्ष्मं सर्वगुणान्वितम् ॥
बभमैर्यवलैर्युक्तमारक्तं राकिणीस्थितम् ॥२० ॥
श्यामां शूलाग्रहस्तां डमरुकरयुतां तीक्ष्णटङ्कं वहन्ती
मुग्रां रक्तां त्रिनेत्रां शुचिकुटिललसच्चोग्रदंष्ट्रां प्रभाति।
दीप्तां तां देवदेवीं त्रितयकमलगां रक्तधारैकनाथां
शुक्लान्ने सक्तचित्तामभिमतफलदां राकिनीं चिन्तयेत् ताम् ॥२१ ॥
रं बीजं कर्णिकायां तु तदन्ते विष्णुलिङ्गकम् ॥२२ ॥

॥इति श्रीभूतशुद्धितन्त्रे परमरहस्ये प्रथमः पटलः ॥

■

॥अथ द्वितीयः पटलः ॥

तदूर्ध्वं नाभिमूले तु पङ्कजं मणिपूरकम् ।

नीलं दशदलं शुद्धं डादिकान्ताक्षरान्वितम् ॥१ ॥

नीलां देवीं त्रिवक्त्रां त्रिनयनलसितां दंष्ट्रिणीमुग्ररूपां

वज्रं शक्तिं दधानामभयवरकरां दक्षवामक्रमेण ।

ध्यात्वा नाभौ सुपद्मे दशदलविलसत्कर्णिके लाकिनीं तां

मांसाशीं गौरवर्णां भक्तोत्सुकहृदयां विन्यसेत् साधकेन्द्रः ॥२ ॥

कर्णिकायां त्रिकोणस्थं रक्ताभं वह्निबीजकम् ।

तदन्तं चैव लिङ्गं च ध्यात्वा सिद्धीश्वरो भवेत् ॥३ ॥

बाह्योत्तरे मुखं तत्र त्रिकोणत्रयमुत्तमम् ।

हृदि पीतं द्वादशार्णं कादिठान्तार्णसंयुतम् ॥

अनाहताख्यं देवेशि ! पङ्कजं सुमनोहरम् ॥४ ॥

तत्र ध्यायेदिमां तां रविदलकमले कामिनीं वेदहस्तैः

पाशं शूलं वहन्तीं डमरुकमभयं धारिणीं पीतवर्णाम् ।

दध्यन्ने सक्तचित्तां - - - - - काकिनीं मत्तचित्तां

पत्रार्णैः कादिठान्तैः परिवृतवपुषां भावयेद् योगिनीं ताम् ॥ ५ ॥

कर्णिकायां च षट्कोणे वायुबीजयुतं महत् ।

ततः क्रोडे ईशं तदधस्त्रिकोणे बाणलिङ्गकम् ॥ ६ ॥

तन्मध्येऽष्टदलं रक्तं तत्र कल्पतरुं तथा ।

इष्टदेवासनं चारु चन्द्रार्कोपरि राजितम् ॥ ७ ॥

पिङ्गलाभं कण्ठदेशे विशुद्धाख्यं कलादलम् ।

षोडशस्वरसंयुक्तं पङ्कजं व्योमसंस्थितम् ।

हकारं धूम्रवर्णं तु तदङ्के च सदाशिवम् ॥ ८ ॥

देवीं ज्योतिःस्वरूपां त्रिनयनलसितां पञ्चवक्त्राभिरामां
हस्तैश्चापैश्च पाशं सृणिमपि दधतीं पुस्तकं ज्ञानमुद्राम्।
ध्यायेत् कण्ठस्थपद्मे निखिलपशुजनोन्मादिनीमस्थिसंस्थां
दुग्धान्ने प्रीतियुक्तां मधुमदमुदितां शाकिनीं साधकेन्द्रः ॥९॥
कर्णिकायां त्रिकोणस्थं पूर्णचन्द्रं च चिन्तयेत्।
हेमाभबीजमारूढमाकाशं तत्र चिन्तयेत् ॥१०॥
शुक्लं सुवेषचरितं ततो देवं सदाशिवम्।
गिरिजाभिन्नदेहार्धं रौप्यहेमशरीरकम् ॥११॥

॥ इति श्रीभूतशुद्धितन्त्रे परमरहस्ये द्वितीयः पटलः ॥

■

॥अथ तृतीयः पटलः॥

तदूर्ध्वमाज्ञाचक्रं च द्विदलं धूम्रधूमकम्।
हस्ताभ्यां लसितं शङ्खमालाधिष्ठितमद्भुतम्॥१॥
कर्णिकायां त्रिकोणस्थं मत्तालिप्रणवाकृतिम्।
जलद्वीपनिभं चोर्ध्वं नादरूपं मनोरमम्॥
बिन्दुं मकाररूपं च तदूर्ध्वं मनसालयम्॥२॥
चक्रस्थां शुक्लवर्णां डमरुकरयुतामक्षसूत्रां कपालं
विद्यां मुद्रां दधानां त्रिनयनविलसद्रक्तसद्वक्त्रयुक्ताम्।
हारिद्रान्ने प्रसक्तां मधुमदमुदितां शुक्लमब्जस्वरूपां
देवीं देवेन्द्ररत्नाकरमधुमुदितां भावयेत् शाकिनीं ताम्॥३॥
नादस्थानं तदूर्ध्वे तु नादान्तं च तदूर्ध्वतः।
शक्तिस्थानं तदूर्ध्वे तु समनिं च तदूर्ध्वतः॥४॥
उन्मनीं चिन्तयेदूर्ध्वे ततो ब्रह्मपुरं व्रजेत्।
ब्रह्मरन्ध्रस्थितं शुद्धं सहस्रच्छदमद्भुतम्॥५॥
शङ्खिनीशिखरासीनं प्रफुल्लं भानुतेजसा।
सर्वदेवाधिसंस्थानं गुरुराष्ट्रेण वर्त्मना॥६॥
हृदिस्थां कुञ्चिकां कृत्वा गत्वा तदुपरि शिवे!
कण्ठाद्यं समनुप्राप्य द्वारं सङ्कोचयेद् हठात्॥७॥
उत्थाप्य परमेशानि! परमात्मनि दीपयेत्।
हुताशनं प्रतप्त्वा तु तापसम्भूतमूर्ध्वता॥८॥
प्रसुप्ता नागिनी लिङ्गे योनिवक्त्रे प्रधापयेत्।
ततः प्रचालयेद् वायुं यावन्नाभ्यन्तरेषु च॥९॥
गुरुराष्ट्रेण मार्गेण सकृत् तु कुम्भकेन वै।
आक्रम्यैवं ततो जीवः श्वासत्वेन यथाम्भसः॥१०॥

ऊर्ध्वश्वासेनोर्ध्वमुखान् कोरकान् पङ्कजान् शिवे ! ।
प्रबोधयन् शनैर्भग्नमेरुश्रृङ्गं नयेत् सुधीः ॥११ ॥
गृहीत्वा प्रविसेद् वापि तत्तद्देवस्वरूपिणीम् ।
चित्रिणीं विवरे रक्तभेदपङ्कसमुद्भवाम् ॥१२ ॥
सत्यदक्षे पार्श्वयोश्च नालस्थां वाहयेच्च ताम् ।
पद्मान् नाडीन् मध्यवर्त्मबोधितान् परमेश्वरि ॥१३ ॥
नालं वार्य विशेत् पद्मान् तेन भेदः प्रजायते ।
यथाऽसौ परतिं रश्मिवह्निं नाययति प्रभुः ॥१४ ॥
भेदयित्वा तथा चक्रं स उ जीवं नयेष्टताम् ।
शिरःस्थानि महेशानि ! चिन्तयेद् गुरुमार्गतः ॥१५ ॥
साङ्गत्ये. . . तयोः सामरस्यं विभाव्य च ।
तदुद्भूतरसेनैव तर्पयेद् देहदेवताम् ॥१६ ॥
पाननिष्ठां सदा हृष्टामानन्दाप्लुतविग्रहाम् ।
पुनस्तेन पथा देवि ! आनयेत् कुलगह्वरम् ॥१७ ॥
एवं यो चिन्तयेद् देवि ! योगं चाहरहः सुधीः ।
आजातयाममन्त्रस्थस्तुभ्यं नित्यं न संशयः ॥१८ ॥
एतद्योगं विना देवि ! दीक्षापूजाजपादिकम् ।
निष्फलं नात्र सन्देहो विजस्थे चषकं यथा ॥१९ ॥
एतत् तत्त्वं परं तत्त्वं यो जानाति स एव हि ।
इत्येतत् कथितं तत्त्वं परं पिण्डविशोधनम् ॥
विना येन न सिद्धिः स्यात् सप्तजन्मकृतात् श्रमात् ॥२० ॥
तथाऽन्यत् सम्प्रवक्ष्यामि गुह्याद् गुह्यतरं महत् ।
यज्ज्ञात्वा सिद्धिमाप्नोति षणमासादपि साधकः ॥२१ ॥

॥ इति श्रीभूतशुद्धितन्त्रे परमहस्ये तृतीयः पटलः ॥

■

॥अथ चतुर्थः पटलः ॥

भैरव उवाच —

इडायां सञ्चरेच्चन्द्रः पिङ्गलायां च भास्करः ।
सुषुम्नायां सदा वह्नी रेतायोगविशेषतः ॥१ ॥

युगपत्रक्रमोद्योगमहं वेद्मि न चापरः ।
शुद्धचित्तेन सिद्धेन गुरोः प्रियहुतं क्वचित् ॥२ ॥

जानाति परमेशान ! गुरुपादप्रसादतः ।
त्रिधारां वहते तास्तु यस्तां वेत्ति स सर्ववित् ॥३ ॥

इडायां यमुना देवि ! पिङ्गलायां सरस्वती ।
सुषुम्नायां वहेद् गङ्गा तासां योगस्त्रिधा भवेत् ॥४ ॥

सङ्गता ध्वजमूलेन विमुक्ता भ्रूवियोगतः ।
त्रियोगवेणी सा प्रोक्ता तत्र स्नानं महाफलम् ॥ ५ ॥

ग्रहणेऽर्कस्य चेन्दोर्वा सुषुम्नायां सदा शुभे ।
गत्वा त्रिवेण्यां स्नात्वा च मनःसङ्कल्पपूर्वकम् ॥ ६ ॥

ग्रासाद् विमुक्तिपर्यन्तं जप्त्वा सिद्धीश्वरो भवेत् ।
यस्तु मन्त्री सुषुम्नायां विमले बिन्दुतीर्थके ॥ ७ ॥

गयाश्राद्धं कृतं तेन शताब्दं नात्र संशयः ।
त्रिवेण्यां यस्तु स्नायाद्वै पुष्करे वा द्विजाकुले ॥ ८ ॥

तस्य पुण्यफलं वक्तुं न शक्नोमि महेश्वरि ।
नित्यं स्नात्वा च तीर्थेऽस्मिन् जपपूजादिकं चरेत् ॥ ९ ॥

मन्त्रसिद्धिर्भवेत् तस्य पुरश्चर्यादिभिर्विना ।
सहस्रारे गुरुं ध्यात्वा परमानन्दनिर्वृतः ॥
कुर्वीताहरहः कृत्यं न च पापैर्विलिप्यते ॥१० ॥

सहस्रदलपङ्कजं सकलशीतरश्मिप्रभं
वराभयकराम्बुजं विविधगन्धमालान्वितम् ।
प्रसन्नवदनेक्षणं सकलदेवतारूपिणं
स्मरेत् शिरसि हंसगं तदभिधानपूर्वं गुरुम् ॥११ ॥

एतत् ते कथितं तत्त्वं सुगोप्यं पशुसङ्कटे ।
न कस्मैचित् प्रवक्तव्यं यदीच्छेत् सिद्धिमात्मनः ॥१२ ॥

॥ इति श्रीभूतशुद्धितन्त्रे परमरहस्ये चतुर्थः पटलः ॥

॥ग्रन्थश्च समाप्तः ॥

अकुलवीर तन्त्रम्

akulavIra tantram

sanskritdocuments.org

September 29, 2018

akulavIra tantram

अकुलवीर तन्त्रम्

Sanskrit Document Information

Text title : akulviiratantra

File name : akulviiratantra.itx

Category : tantra, devii, devI

Location : doc_devii

Transliterated by : Michael Magee <ac70 at cityscape.co.uk> 1997 - http://www.shivashakti.com/

Proofread by : Mike Magee <ac70 at cityscape.co.uk>

Latest update : January 5,2005

Send corrections to : Mike Magee <ac70@cityscape.co.uk>

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

Please help to maintain respect for volunteer spirit.

September 29, 2018

sanskritdocuments.org

अकुलवीर तन्त्रम्

श्रीमच्छन्दपादकेभ्यो नमः ।
श्रीमीनसहजनन्दं स्वकीयाङ्गसमुद्भवम् ।
सर्वमाधारगम्भीरमचलं व्यपकं परम् ।
अथातः सम्प्रवयामि अकुलवीरं महद्भूतम् ।
गुह्याद् गुह्यतरं गुह्यं सिद्धसद्भावसन्ततिः ॥ १॥

अनग्रहाय लोकानां सिद्धनाथेन भाषितम् ।
गोपनीयं प्रयत्नेन यदीच्छन् शाश्वतं पदम् ॥ २॥

संसारार्णवमग्नातां भूतानां महदाश्रयम् ।
यथा नदीनदाः सर्वे सागरे समुपागताः ॥ ३॥

तथा अकुलवीरेषु सर्वधर्मा लयङ्गताः ।
सर्वाधारमशेषस्य जगतः सर्वदा प्रभुः ॥ ४॥

सहजानन्दं न विन्दन्ति सर्वधर्मसमासृताः ।
अनानन्तमलैर्ग्रस्ता महामायान्धच्छदिताः ॥ ५॥

शास्त्रजालेन सन्तुष्टा मोहितास्त्यजयन्तिताः (?) ।
न विन्दन्ति पदं शान्तं कौलानां निष्कलं गुरुम् ॥ ६॥

संवादयन्ति ये केचिन् न्यायवैशेषिकास्तथा ।
बौधास्तु अरिहन्ता ये सोमसिद्धान्तवादिनः ॥ ७॥

मीमांस पञ्चस्रोताश्च वामसिद्धान्तदक्षिणाः ।
इतिहासपुराणञ्च भूततत्त्वन्तु गारुडम् ॥ ८॥

एभिः शैवागमैः सर्वैः परोक्षञ्च क्रियान्विताइः ।
सविकल्पसिद्धिर्सञ्चारन्तत् सर्वं पापबन्धवित् ॥ ९॥

विकल्पबहुलाः सर्वैर्मिथ्यावादा निरर्थकाः ।

न ते मुञ्चन्ति संसारे अकुलवीरविवर्जिताः ॥ १०॥

सर्वज्ञं सर्वमासृत्य सर्वतो हितलक्षणम् ।
सर्वेषां सिद्धिस्तत्रस्था सर्वसिद्धिश्च तत्र वै ॥ ११॥

यत्नासौ अकुलवीरो दृश्यते सर्वतोमुखम् ।
तं विदित्वा परं रूपं मनो निश्चलतां व्रजेत् ॥ १२॥

शब्दरूपरसस्पर्शगन्धश्चैवात्र पञ्चमम् ।
सर्वभावाश्च तत्रैव प्रलीणाः प्रलयं गताः ॥ १३॥

भावाभावविनिर्मुक्त उदयास्तमनवर्जितः ।
स्वभावमतिमतं शान्तं मनो यस्य मनोमयम् ॥ १४॥

अकुलवीरमिति ख्यातं सर्वाधारपापरम् ।
नाधारलक्षभेदन्तु न नादगोचरे पठेत् ॥ १५॥

हृदि स्थाने न वक्रे च घण्टिका तालरन्ध्रके ।
न इडा पिङ्गला शान्ता न चास्तीति गमागमे ॥ १६॥

न नाभिचक्रकण्ठे च न शिरे नैव मस्तके ।
तथा चक्षुरुन्मीलने च न नासाग्रनिरीक्षणे ॥ १७॥

न पूरककुम्भके तत्र रेचके [च] तथा पुनः ।
न बिन्दुभेदके ग्रन्थौ ललाटे न तु वह्निके ॥ १८॥

प्रवेशनिर्गमे नैव नावाहनविसर्जनम् ।
न करणैर्नासनं मुद्रैर्नमासे भिन्नतालुके ॥ १९॥

न निरोधो न चोद्धारो नातीतां चालनं न हि ।
न प्रेर्यप्रेरकश्चैव न स्थानन्नैव चश्रयम् ॥ २०॥

न चात्मनैव तद् ग्राह्यं ग्राह्यातीतपदं भवेत् ।
एतत् पक्षविर्निर्मुक्तं हेतुदृष्टान्तवर्जितम् ॥ २१॥

न दूरे न च वै निकटे न भरितो न च रिक्तकः ।
न उन्नोन सोऽधिक एभिः पक्षैर्विवर्जितम् ॥ २२॥

यश्च विंशात्मको ह्येष पुद्गल नास्ति यत्र वै ।
यत्र लक्षं न विद्येत अकुलवीर स उच्च्यते ॥ २३॥

यस्यैवं संशितं कऽश्चित् समरस संशितः ।
स ब्रह्मा सो हरिश्चैशः स रुद्रो स च ईश्वरः ॥ २४॥

स शिवः परमदेवः स सोमार्काग्निकस्तथा ।
स च साङ्ख्यः पुराणाश्च अर्हन्तबुद्ध एव च ॥ २५॥

स्वयं देवी स्वयं देवः स्वयं शिष्यः स्वयं गुरुः ।
स्वयं ध्यानं स्वयं ध्याता स्वयं सर्वत्र देवता ॥ २६॥

यादृशेन तु भावेन पुरुषो भावयेत् सदा ।
तादृशां फलमाप्नोति नात्र कार्यविचारणात् ॥ २७॥

अस्यैव हि हि नामानि पृथग्भूतानि योगिभिः ।
अनाम तस्य गियन्ते भ्रान्तिज्ञानविमोहितैः ॥ २८॥

धर्माधर्मसमाक्लिष्टाविकल्पतमश्छादिताः ।
तेन मुञ्चन्ति संसारं नरकं योनिसङ्कुलम् ॥ २९॥

अकुलवीरं महद्भूतं यदा पश्यन्ति सर्वगम् ।
स बाह्याभ्यन्तरे नित्यं एकाकारं चराचरम् ॥ ३०॥

निस्तरङ्गं निराभासं पदभेदविवर्जितम् ।
सर्वावयवनिर्मुक्तं निर्लयं निर्विकारजम् ॥ ३१॥

अदृष्टनिर्गुणं शान्तं तत्त्वातीतं निरञ्जनम् ।
सर्वज्ञं परिपूर्णञ्च स्वभावश्चैवमक्षयम् ॥ ३२॥

कार्यकारणनिर्मुक्तमचिन्त्यमनामयम् ।
मायातीतं निरालम्बं व्यापकं सर्वतोमुखम् ॥ ३३॥

समत्वं एकभूतञ्च ऊहापोहविवर्जितम् ।
अकुलवीरं महद्भूतं अस्तिनास्तिविवर्जितम् ॥ ३४॥

न मनो न च वै बुद्धिर्न चिन्ताचेतनादिकम् ।
न कालः कलनाशक्तिर्न शिवो न च इन्द्रियः ॥ ३५॥

न भूते गृह्यते सो हि न सुखं दुःखमेव च ।
न रसो हि न सुखं दुःखमेव च ॥ ३६॥

न रसो विरसश्चैव न कृतो न च जायते ।
न च्छाय न च तापस्तु न शीतो न च उष्णवान् ॥ ३७॥

न दृश्यते मन स्तत्र उदयास्तमनवर्जितम् ।
न सीमा दृश्यते तत्र न च तिर्थ्यं न चहिर्वहि ॥ ३८॥

अद्वैतमचलं शान्तं सङ्गदोषविवर्जितम् ।
निराकुलं निर्विकल्पञ्च निबद्धञ्च मलक्षणम् ॥ ३९॥

अनाथं सर्वनाथञ्च उन्मनां मदवर्जितम् ।
अनिगृढमसन्धिञ्च स्थावरं जङ्गमेव च ॥ ४०॥

ज्वलज्वलनभूम्या च आपोञ्चैव तथैव च ।
सर्वं समरसं पूर्णं अकुलवीरन्तु केवलम् ॥ ४१॥

यस्यैषा सम्।स्थिता मुक्तिः स मुक्तो भवबन्धनात् ।
न तस्य मातापिता व बान्धवं न च देवता ॥ ४२॥

न यज्ञं नोपवासञ्च न क्रिया वर्णभेदकम् ।
त्यक्त्वा विकल्पस।घातं अकुलवीरलयं गताः ॥ ४३॥

न जपो नार्चनं स्नानं न होमं नैव साधनम् ।
अग्निप्रवेशनं नास्ति हेतन्तभृगु नोदनम् ॥ ४४॥

नियमोऽपि न तस्यास्ति नोपवासो विधीयते ।
पितृकार्यं न करोताति तीर्थयात्राव्रतानि च ॥ ४५॥

धर्माधर्मफलं नास्ति न स्नानं नोदकक्रिया ।
स्वयं त्यज सर्वकार्याणि लोकाचाराणि यानि च ॥ ४६॥

समयाचारविचारञ्च कृतका बन्धकानि तु ।
सङ्कल्पञ्च निकल्पञ्च ये चान्ये किल धर्मिणः ॥ ४७॥

भवे योगी निराचारो पशुचारविवर्जितः ।
सिद्धिश्चविविधाकार पाताले च रसायनम् ॥ ४८॥

प्रत्यक्षञ्च या लब्धं न गृह्णीयात् कदाचन ।
सर्वञ्च पाशजालञ्च अधोमार्गप्रदायकः ॥ ४९॥

एतेषु मोचना नास्ति अकुलवीरविवर्जिताः ।
यथा मृताः न जानन्ति स्वादं कटुमधुरस्य तु ॥ ५०॥

तथा अकुलवीरन्तु न जानन्ति स्वभावगम् ।

यथा मदिरा महान्तस्य कथितं नेवशकृते ॥ ५१॥

रस्यपरमानन्दमतिगुह्यं सुगोपितम् ।
लोकानां च हितार्थाय सिद्धनाथेन भाषितम् ॥ ५२॥

निर्विकल्पं पदं शान्तं यत्र लीनं परापरम् ।
मोक्षस्य तन्महास्थानं मन्त्ररूपविवर्जितम् ॥ ५३॥

तत्रैव सृष्टिरूपेण पुनस्तत्र लयं गता ।
किन्तेन बहुनोक्तेन सर्वबन्धविवर्जितम् ॥ ५४॥

अकुलवीरं यदा लब्धं तदा किं कौलिकैः क्रमैः ।
लब्ध्वा तु मोक्षसद्भावं अकुलवीरं महापहम् ॥५५॥

कौलमार्गे द्वयो सन्ति कृतका सहजा तथा ।
कुण्डलि कृतका ज्ञेया सहजा समरस स्थिता ॥ ५६॥

प्रेर्यप्रेरकभावस्था कृतका साऽभिधीयते ।
ततः स पातयेद् भूमै मुद्रामन्त्रैर्नियोगितैः ॥ ५७॥

आहुते पतने चान्ये कर्णजापेन धूपकैः ।
एतत् साध्यमिदं तत्त्वं एतद् ध्यानञ्च धारणा ॥ ५८॥

अनेकैः कर्मसङ्घातैः नानामार्गविभावनैः ।
विकल्पकललोल्लोया उद्भ्रान्ता भ्रान्तचेतसः ॥ ५९॥

हृदि शोकेन सन्तप्ता व्यासङ्गाच्च महाभयैः ।
हर्षविषादसम्पन्ना शोच्यमाना मुहुर्मुहुः ॥ ६०॥

तावद्भ्रमन्ति संसारे कल्पाकल्पैर्भवार्णवैः ।
दग्धबीजेषु सम्भूतिर्यथा नैव प्रजायते ॥ ६१॥

मूलछिन्ने यथा वृक्षे न प्ररोहं विद्यते ।
अकुलवीरगतं भिन्नं नानाभावानुबन्धनैः ॥ ६२॥

न बध्यते यथा विमले रसं विप्रलयं गतम् ।
तद्वदकुलवीरे च सत्त्वे भ्राभ्राख्य यद्गतः ॥ ६३॥

तिमिरेण यथाच्छन्नमुदितार्कं न पश्यति ।
अज्ञानमनस्तद्वद् भ्रान्तिजालविमोहिता ॥ ६४॥

अकुले वीरे च सम्प्राप्ते सर्वमेतद्विनिश्यति ।
दधिमध्ये यथा सर्पिः काष्ठे चाग्नि स्थितो यथा ॥ ६५॥

पुष्पे गन्धस्तिले तैलं वृक्षे चाया समाश्रिता ।
मद्यमध्ये यथानन्दं दीपे प्रभा समाश्रिता ॥ ६६॥

पद्ममध्ये च कुण्डल्या अङ्गप्रत्यङ्गमेव च ।
रक्तार्थाकुलवीरे च तत्सर्वं विनियोजितम् ॥ ६७॥

भावाऽभावादिसम्।युक्तैः प्रत्ययैर्दृष्टिगोचरैः ।
अकुलवीरं न जानन्ति कृतकैर्मोहितात्मनः ॥ ६८॥

पाशजालनिबद्धाश्च महामायविमोहिताः ।
न जानन्ति पदं शान्तमचिन्त्यं नित्यसम्भवः ॥ ६९॥

सर्वव्यापिभावस्थं स्थानवर्णविवर्जितम् ।
सर्वभूतस्थितं ह्येकमध्ययं धेयवर्जितम् ॥ ७०॥

स च सर्वगतो भावः स्थिरे पूर्णो निरन्तरे ।
तत्र मनो विलीनन्तु अचलं भवतन्मयम् ॥ ७१॥

मनोवृद्धिस्तथा चिन्त्यं क्षिप्ता तन्मयतां गता ।
यथा तिष्ठति तत्त्वस्थः शिवनिष्कलमव्यये ॥ ७२॥

तदा तन्मयतां याति निर्मलं निश्चलं पदम् ।
अकुलवीरं महद्भुतमेकवीरं च सर्वगम् ॥ ७३॥

दुर्लभं सुरसिद्धानां योगिनीनाञ्च गोचरम् ।
केचिद् वदन्तीदं धर्ममिदं शास्त्रमिदं तपः ॥ ७४॥

अयं लोकमिमं स्वर्गमिदं साध्यमिदं फलम् ।
इदं ज्ञानञ्च विज्ञानं शुद्धाशुद्धमिदं परम् ॥ ७५॥

ज्ञेयञ्च तत्त्वकूटञ्च यत्र ध्यानञ्च धारणा ।
तदासौ योगिनी ह्येकः नान्यस्तु हि द्वितीयकः ॥ ७६॥

अनागतन्तु गतश्चैव न हच्छेन्न च तिष्ठति ।
न भूतं न भविष्यञ्च स्थितिप्रलयवर्जितम् ॥ ७७॥

न चाहं प्रचितैर्दोषैः लिप्तते न कदाचन ।
नाहं कश्चिन्न मे कश्चिन्न बद्धो न च बाधकः ॥ ७८॥

न मुक्ति वै न च न मुक्तमे मोक्षस्य च स्पृहा ।
गच्छंस्तिष्ठन् स्थपन् जाग्रद्भुञ्जानओ मैथुनेऽपि वा ॥ ७९॥

भयदारिद्रशोकैश्च विविधैर्भक्षणैस्तथा ।
चिकित्सा नैव कुर्वीत इन्द्रियार्थैः कदाचन ॥ ८०॥

आचरेत् सर्ववर्णैस्तु न तु भक्ष्यं विचारयेत् ।
एवं स चरते योगी यथारण्ये हुताशनः ॥ ८१॥

पिण्डबधाञ्च नानास्ति अवस्था मुर्खवासनाम् ।
सोमशून्यस्तथा वह्निप्राणायमवर्जितम् ॥ ८२॥

अप्रमेयनिराभासं धारणाध्यानवर्जितम् ।
येन जन्मसहस्राणि भक्त्या सम्पूजितो गुरुः ॥ ८३॥

ते लभन्ति महाज्ञानं अकुलवीरन्तु मोक्षदम् ।
योगिनीराकिणीचक्रे यस्य भक्तिः सुनिश्चला ॥ ८४॥

अकुलवीरं महद्भूतं गम्भीरं गहनामयम् ।
पिण्डातीतं यदा ज्ञेयमपिण्डं पिण्डवर्जितम् ॥ ८५॥

पदव्यञ्जननिर्मुक्तं विमलं सततोदितम्।
तल्लिने तन्मयात्मानं विन्दते श्वाश्वतं पदम् ॥ ८६॥

चितातीतं भवेत् सो हि योगसंयोगवर्जितम् ।
निर्वाणं वासनाहीनं तृप्तात्म च निरामयः ॥ ८७॥

तेन लब्धा न सन्देहोऽमला मलच्छेदनाः ।
तस्य प्रवर्त्तते क्षिप्तं तस्यैव सर्वसर्वगम् ॥ ८८॥

वेदसिद्धान्तशास्त्राणि नानाविधानि शिखानि च ।
तानि सर्वाणि मोहानि कायक्लेशैर्निरर्थकम् ॥ ८९॥

विद्याहङ्खारग्रस्तास्तु गर्विताः कुगतिं गताः ।
अनर्थेन च सन्तुष्टा बहुग्रन्थार्थचिन्तकाः ॥ ९०॥

अकुलवीरं न विन्दन्ति कृतकैर्मोहितामनः ।
गर्वितानं कुतो ज्ञानं ग्रन्थकोटिशतैरपि ॥ ९१॥

कर्पूरकुङ्कुमादीनां वस्त्रताम्बूलमेव च ।

खरवद्भवति तद्वारं सर्वं तस्य निरर्थकम् ।
अकुलवीरञ्च देहस्थं यदा पश्यति सर्वगम् ॥ ९२॥

धर्माधर्मफलं नास्ति नोदकं तीर्थसेवना ।
न क्रिया सत्यश्चैवं वा कर्मकाण्डे न भावना ॥ ९३॥

न तस्य कर्मकर्माणि लोकाचाराणि यानि च ।
चरिताः समयाचारा जनैर्भ्रान्तिविमोहितैः ॥ ९४॥

अकुलवीरं न जानन्ति किं विशिष्टं कुतः स्थितम् ।
कृतका बन्धना लोके कल्पिताश्च कुपण्डितैः ॥ ९५॥

सम्।कल्पविकल्पञ्च कलाकर्माणि यानि च ।
सिद्धयो विविधा लोके पातालं च रसायनम् ॥ ९६॥

प्रत्यक्षञ्च यदा लब्धं न विगृह्णीयात् कदाचन ।
सर्वे ते पाशबद्धाश्च अधोमार्गप्रदायकाः ॥ ९७॥

न चैतैर्मुक्तिः सम्।सारे अकुलं बीरवर्जिताः ।
यथा मदिरमानन्दं कथितं नैव जायते ॥ ९८॥

तद्वदकुलवीराख्यं स्वसम्।वेद्यनिरोपणम् ।
न जानन्ति नरा मूढाः सारात् सारतरं परम् ॥ ९९॥

तावद् भ्रान्तिविमुग्धात्मा यावत्तलं न विन्दति ।
चितातीते यदा योगी स योगी योगचिन्तकः ॥ १००॥

विरक्ता वासना यस्य तृप्तात्म च निरामयः ।
तावद् भ्रमन्ति मोहात्मा नानाभावानुबन्धनैः ॥ १०१॥

यावत् सममेकत्वं परमानन्दं न विन्दति ।
मुर्खाणां च यथाशास्त्रं कुमारीसुरतिं यथा ॥ १०२॥

अकुलवीरं विन्दन्ति कथ्यमानैः कुमारिकाः ।
दिशवेशाविनिर्मुल्क्तं स्थानवर्णविवर्जितम् ॥ १०३॥

निराकुलं निर्विकल्पं निर्गुणञ्च सुनिर्मलम् ।
अनाथं सर्वनाथञ्च प्रमादोन्मादवर्जितम् ॥ १०४॥

घननिविडनिसन्धिस्थावरे जङ्गमेषु च ।
जले ज्वलने तथा पवने भूम्याकाशे तथैव च ॥ १०५॥

सर्वत्र समरसं भरितमकुलवीरन्तु केवलम् ।
न ज्ञातं येन देहस्थं स मुक्तः सर्वबन्धनात् ॥ १०६॥

न तस्य क्रियाबन्धेन न वेद्यं न च वेदना ।
न यज्ञो नोपवासश्च न चर्या न क्रियोदयः ॥ १०७॥

न वर्णो वर्णभेदश्च अकुलवीरं यदागतम् ।
न जापो नार्चानग्नीनां न होमो नैव साधनम् ॥ १०८॥

नाग्निप्रवेशनन्तस्य मन्त्रपूजाचरणोदकम् ।
नियमाश्च न तस्यास्ति क्षेत्रपीठे च सेवनैः ॥ १०९॥

न क्रिया नार्चनाकाद्यैर्न तीर्थानि व्रतानि च ।
निरालम्बपदं शान्तं तथातीतं निरञ्जनम् ॥ ११०॥

सर्वज्ञपरिपूर्णञ्च स्वभावेन विलक्ष्यते ।
कार्यकारणनिर्मुक्तमचिन्तितञ्च अनामयम् ॥ १११॥

मायातीतं निरालम्बं व्यापकं सर्वतोमुखम् ।
स्वदेहे संस्थितं शान्तमकुलवीरं तदुच्यते ॥ ११२॥

समस्तमेकदाभूतं द्वैताभावविवर्जितम् ।
अकुलवीरं महद्भूतमस्तिनास्तिविवर्जितम् ॥ ११३॥

मनोबुद्धिचित्तस्तच्चित्ता नैव स्वचेतना ।
न कालकलना चैव न शक्तिश्च न चेन्द्रियः ॥ ११४॥

न भूते गृह्यते सो हि न दुःखं सुखमेव च ।
न रसोऽधिरसश्चैव कृतकं नैव कारकम् ॥ ११५॥

न च्छाया नातपो वह्निर्न च शीतोष्णववेदना ।
न दिनं रात्रिमित्युक्तमुदयास्तमनवर्जितम् ॥ ११६॥

न मनो दृश्यते तत्र नोर्द्धमध्यं च ज्ञायते ।
अक्षोभ्यमचलं शान्तमीदृशं तत्त्वनिर्णयम् ॥ ११७॥

यादृशेन तु भावेन पुरुषो भावयेत् सदा ।
तादृशं फलमाप्नोति नात्र कार्यविचारणात् ॥ ११८॥

एवञ्च कुलसद्भावमवाच्यं परमामृतम् ।

अगम्यं गम्यते कस्माद् भ्रान्तिज्ञानविहोहिताः ॥ ११९॥

न दूरे न निकटे चैव प्रत्यक्षं न परोक्षता ।
न भरितो न रिक्तो वा निपुणो नापि चाधिकः ॥ १२०॥

एतत्पक्षविनिर्मुक्तो हेतुदृष्टान्तवर्जितः ।
कृतकैर्मोहिता मूढाः कर्मकाण्डरतास्तु ये ॥ १२१॥

न तेषां मुक्तिः संसारे नरके योनिसङ्कुले ।
अकुलवीरं महद्भूतं यदा पश्यति सर्वगम् ॥ १२२॥

सबाह्याभ्यन्तरैकत्वं सर्वत्रैव व्यवस्थितम् ।
निस्तरङ्गं निराभासं पदच्छेदविवर्जितम् ॥ १२३।
सर्वावयवनिर्मुक्तं निर्विकारञ्च निर्मलम् ।
अदृश्यं निर्गुणं नित्यं निर्णिरोधञ्च निश्चलम् ॥ १२४॥

न ध्यानं धारणा नैव न स्थानं वर्णमेव च ।
न रेचकं पूरकञ्चैव नरोद्घातञ्च कुम्भकम् ॥ १२५॥

न चान्तमादिमध्यस्थं न सतो वृद्धिरेव च ।
ग्राह्यग्राहकनिर्मुक्तग्रन्थातीतञ्च यद्भवेत् ॥ १२६॥

एतैः सर्वैर्विनिर्मुक्तं हेतुदृष्टान्तवर्जितम् ।
सबाह्याभ्यन्तरैकत्वं सर्वत्रैव व्यवस्थितम् ॥ १२७॥

समरसानन्द्ररूपेण एकाकारं चराचरे ।
ये च ज्ञातं स्वदेहस्थमकुलवीरं महद्भूतम् ॥ १२८॥

यस्या वशं स्थितः कश्चित् समरसं रससंस्थितम् ।
स ब्रह्मा स हरिश्चैव स रुद्रश्चैवेश्वरस्तथा ॥ १२९॥

स शिवः शाश्वतो देवः स च सोमार्कशङ्करः ।
स विशाख्यो मयुराक्षो अर्हन्तो बुधमेव च ॥ १३०॥

स्वयं देवि स्वयं देवः स्वयं शिष्यः स्वयं गुरुः ।
स्वयं ध्यानं स्वयं ध्याता स्वयं सर्वेश्वरो गुरुः ॥ १३१॥

सर्वज्ञः सर्वमासृत्य सर्वतो हितलक्षणः ।
सर्वयोगिनी तत्रस्था सर्वे सिद्धाश्च तत्र वै ॥ १३२॥

सर्वं सर्वार्थकं चैव सर्वज्ञानश्च तत्र वै ।

यथासौ महार्थञ्च अकुलवीरमिति स्मृतम् ॥ १३३॥

शब्दः स्पर्शो रसो रूपं गन्धो वद्याणिपम च ।
सर्वे भीराश्च तत्रैव ये प्रलीनाः प्रलयं गताः ॥ १३४॥

नाधारे ध्येयलक्ष्ये च न नादगोचरे परे ।
न हृदि नाभिकण्ठे वा वक्रे घण्टिकरन्ध्रयोः ॥ १३५॥

न इडा पिङ्गला चैव सुष्मण च गमागमैः ।
न नाभिचक्रे कण्ठे च न शिरे बिन्दुके तथा ॥ १३६॥

चक्षुकर्णोन्मीलनं नैवं नासिकाग्रनिरीक्षणे ।
न पूरके कुम्भके चैव रेचके च तथा पुनः ॥ १३७॥

न बिन्दुभेदग्रन्थौ च ललाटे न च चन्द्रमाः ।
प्रवेशे निर्गमे चैव शिखा ऊर्द्धे न बिन्दुके ॥ १३८॥

न करैर्न सरैर्मुद्रैः नाकाशो वायुमण्डले ।
न चापे चन्द्रसूर्ये च भावाभावे समागमे ॥ १३९॥

अनौपम्यं निरालम्बं पक्षापक्षविवर्जितम् ।
अज्ञानमलग्रस्तात्मा महामायविमोहिताः ॥ १४०॥

शास्त्रार्थेन विमुढात्मा मोहिता विदुषो जनाः ।
न विदन्ति पदं शान्तं कैवल्यं निश्क्रियं गुरुम् ॥ १४१॥

सङ्ख्यादयश्च ये केचित् न्यायवैशेषिकास्तथा ।
बौद्धारहन्ताश्च ये केचित् सोमसिद्धान्तदक्षिणाः ॥ १४२॥

मीमांसा पञ्चरात्रञ्च वामदक्षिणकौलिकाः ।
इतिहासपुराणानि भूततत्त्वञ्च गारुडम् ॥ १४३॥

एते चैव समाः सर्वे केचित् वाऽपि क्रियान्विताः ।
विकल्पसिद्धिदाः सर्वे तद्विदुर्न च पण्डिताः ॥ १४४॥

विकल्पबहलाः सर्वे मिथ्यावादनिरर्थकाः ।
न ते मुच्यन्ति संसारे अकुलवीरविवर्जिताः ॥ १४५॥

यानि कानि च स्थानानि गिरिर्नगरसागरम् ।
सर्वत्र संस्थितं नित्यं स्थावरे जङ्गमेषु च ॥ १४६॥

पञ्चभूतात्मकं सर्वं यत् किञ्चित् सचराचरम् ।
शिवाद्यदेवपर्यन्तं सर्वं तत्रैव संस्थितम् ॥ १४७॥

ईदृशं योगिनं दृष्ट्वा उपसर्पन्ति ये नराः ।
गन्दैः पुष्पैश्च धूपैश्च खानपानादिभक्षणैः ॥ १४८॥

तर्पयन्ति च ये भक्तास्त्रिविधैश्चैवान्तरात्मना ।
तेऽपि बन्दैः प्रमुच्यन्ति मुक्तिमार्गी न काङ्क्षिणः ॥ १४९॥

ब्रहेन्द्रविष्णुरुद्रञ्च अरहन्ता बुद्धमेव च ।
विषाख्यो मयूराक्ष ये च ऋषयस्तपोधनाः ॥ १५०॥

देवादिभो नरेन्द्राश्च ये चान्ये मोक्षकाङ्क्षिणः ।
ते सर्वे मोक्षमिच्छन्ति अकुलवीरन्तु मोक्षदम् ॥ १५१॥

अथान्यं सम्प्रवक्ष्यामि भिन्नावस्थां स्वभागः ।
पूर्वं यदुक्ता सर्वे अन्वयमार्गे त्वकौलिके ॥ १५२॥

* * * * * * * * * *
* * * * * * * नात्र संशयः ॥ १५३॥

न जरास्तेषां न मृत्युश्च न शोको दुःखमेव च ।
सर्वव्याधिहरश्चैव न पुनर्भवसम्भवः ॥ १५४॥

अकुलवीरं स्थितं दिव्यं सिद्धनाथप्रसादतः ।
सर्वतः सर्वदा शुद्धः सर्वतः सर्वदा प्रभुः ॥ १५५॥

इति मच्छेन्द्रपादावतारिते कामरूपिस्थाने
योगिनीप्रसादाल्लब्धं अकुलवीरं समाप्तम् ।

Encoded by Mike Magee ac70@cityscape.co.uk

akulavIra tantram

pdf was typeset on September 29, 2018

Please send corrections to *sanskrit@cheerful.com*

अथ योगप्रकरणन्तृतीयम् ॥ ३ ॥

(१) मूलाधारादिषट्चक्रसहस्रारोपरि स्थितम् ॥ योगज्ञानैकफलकं रामचन्द्रपदं भजे॥ १॥

अथ योगज्ञानयोरन्योन्याश्रयत्वमाह ।

(२) योगहीनं कथं ज्ञानं मोक्षदं भवतीह भोः॥ योगोपि ज्ञानहीनस्तु न क्षमो मोक्षकर्मणि ॥ तस्माज्ज्ञानं च योगञ्च मुमुक्षुर्दृढमभ्यसेत् ॥२॥

(३) सर्वे वदन्ति शस्त्रेण जयो भवति नान्यथा ॥ विना युद्धेन वीर्येण कथञ्जयमवाप्नुयात् ॥ तथा ज्ञानेन कैवल्यं तद्योगरहितन्न हि ॥ ३ ॥

अथ योगस्य परत्वमाह ।

(४) जन्मान्तरैश्च बहुभिर्योगो ज्ञानेन लभ्यते ॥ ज्ञानन्तु जन्मनैकेन योगादेव

(१) योगचूडामण्युपनिषद् प० ४४५ । पृ० २ । पं० ३ ॥

(२।४) योगशिखोपनि० अ० १ । श्लो० १३ । ५२ । ५१ । प० ६०६ । पृ० २ । पं० ९।१ ॥

(३) योगबीजो० प० ३ । पृ० २ । प० ४ ।

प्रजायते ॥ तस्माद्योगात्परतरो नास्ति मार्गस्तु मोक्षदः ॥ ४ ॥

(१) योगमार्गे मोक्ष एव प्रार्थयन्ते ॥ ५ ॥

अथ योगलक्षणम् ।

(२) मनः प्रशमनोपायो योग इत्यभिधीयते ॥ ५ ॥

(३) यदा पञ्चावतिष्ठन्ते[१] ज्ञानानि[२] मनसा सह ॥ बुद्धिश्च न विचेष्टते[३] तमाहुः परमां[४] गतिम् ॥ तां योगमिति मन्यन्ते स्थिरामि[५]न्द्रियधारणाम्[६] ॥ ६ ॥

१-निर्व्यापाराणि भवन्ति ॥ २-श्रोत्रादिज्ञानेन्द्रियाणि ॥ ३-व्यापारवती न भवति ॥ ४-आत्मनो भानस्य साधनभूताम ॥ ५-लय, विक्षेप, कषाय, रसास्वादादिविघ्नैरकम्पाम् ॥ ६ ज्ञानेन्द्रियमनोबुद्धिनैश्चल्यरूपामवस्थाम् ॥

(१) भिक्षुकोपनिषत् प० ५६६ । पृ० २ । पं० ६ ॥

(२) महोपनिषद् अ० ५ । श्लो० ४२ । प० ५८९ । पृ० १ । पं० ३ ॥

(३) कठोपनि० अ० २ । व० ९ । प० १२ । पृ० २ । पं० ४॥

(१) अपानप्राणयोरैक्यं स्वरजोरेतसोस्तथा ॥ सूर्याचन्द्रमसोर्योगो जीवात्मपरमात्मनोः ॥ एवन्तु द्वन्द्वजालस्य संयोगो योग उच्यते ॥ ७ ॥

अथ योगसाधनानि ।

(२) षट्चक्रं षोडशाधारं त्रिलक्ष्यं व्योमपञ्चकम् ॥ स्वदेहे यो न जानाति तस्य सिद्धिः कथं भवेत् ॥ ८ ॥

अथ मन्त्रयोगः ।

(३) अनाख्येयमिदं गुह्यं योगिनां कोशसन्निभम् । हंसस्याकृतिविस्तारं भुक्तिमुक्तिफलप्रदम् ॥ ९ ॥

---

(१) योगशिखोपनिषत् अ० १ । श्लो० ६८ । प० ६१० । पृ० २ । पं० १ ॥

(२) योगचूडामण्युपनिषद श्लो० ३ । प० ४४५ । पृ० २ । पं० ५ ॥

(३) हंसोपनि० प० १९४ । पृ० ३ । प० ५ ॥

अथ षट्चक्राण्याह ।

(१) चतुर्दलं स्यादाधारं स्वाधिष्ठानं च षड्दलम् । नाभौ दशदलं पद्मं हृदये द्वादशारकम् ॥ १० ॥ षोडशारं विशुद्धाख्यं भ्रूमध्ये द्विदलं तथा ॥ सहस्रदलसङ्ख्यातं ब्रह्मरन्ध्रे महापथि ॥ ११ ॥

१–आधारचक्रं चतुर्दलं तप्तहेमवर्णाभं वॅ शॅ षॅ सॅ विभूषितं मध्ये त्रिकोणमिच्छाज्ञानाक्रियात्मकं तन्मध्ये स्वयंभूलिङ्गं कोटिसूर्यसमप्रभं सवाहनं सशक्ति श्रीगणेशाधिष्ठितं विभावयेत् ॥ २–स्वाधिष्ठानचक्रं षड्दलं वह्निवर्णं हीरकप्रभं वॅ भॅ मॅ यॅ रॅ लॅ भूषितं सवाहनशक्ति ब्रह्माधिष्ठितं भावयेत् ॥

३–मणिपूरकाब्जं दशदलं नीलजीमूतसन्निभं बहुतेजोमयं डॅढॅणॅ तॅथॅदॅधॅनॅपॅफॅ संयुतं सवाहनं सशक्ति श्रीविष्णवधिष्ठितं विभावयेत् ॥ ४–अनाहताब्ज द्वादशदलं प्रवालरुचिवर्णमुद्यतादित्यसन्निभं कॅखॅगॅघॅङॅचॅछॅजॅझॅञॅटॅठॅसंयुतं मध्ये बाणाख्यलिङ्गं सूर्यायुतसमप्रभं सवाहनं सशक्ति रुद्राधिष्ठितं भावयेत् ॥ ५ विशुद्धाब्जं षोडशदलं धूम्रवर्णं महत्प्रभं सबिन्दुस्वरभूषितं प्रदीपकलिकाकारं जीवात्माधिष्ठितं भावयेत् ॥ ६ आज्ञाचक्र द्विदलं चन्द्राभं हॅक्षंभूषितं दिव्यसौदामिनीनिचयाकारं निर्वाणाख्यपरमात्माधिष्ठितं भावयेत् ॥–

(१) योगचूडामण्युपनिषद् पं० ४४५ । पृ० २ । पं० ८ ॥

(१) आधारं गुदमित्युक्तं स्वाऽधिष्ठानं तु लैङ्गिकम् ॥ मणिपूरं नाभिदेशं हृदयस्थमनाहतम् ॥ १२ ॥

विशुद्धिः कण्ठमूले च आज्ञाचक्रं च मस्तकम् ॥ षट्चक्राणि परिज्ञात्वा प्रविशेत्सुखमण्डले ॥ १३ ॥

अथ वैष्णवीमुद्राया सामान्यलक्ष्यमाह ।

(२) गुदमेढ्रान्तरालस्थं मूलाधारं त्रिकोणकम् ॥ १४ ॥

(३) तप्तचामीकराभासं तडिल्लेखेव विस्फुरत् ॥ १५ ॥

–७ सहस्रार हिमवर्णाभं स्फटिकप्रभं सर्ववर्णविभूषितं तन्मध्ये श्वेतवर्णं द्विभुज वराभयकरं श्वेतमाल्यानुलेपनं स्वप्रकाशरूपं स्ववामस्थित स्वशक्तया स्वप्रकाशरूपया सहित गुरुं भावयेत् ॥

१–स्वाधिष्ठानम् ।

---

(१) योगकुण्डलिन्युप० अ० ३ । श्लो० १० । ११ । प० ७५० । पृ० १ । प० ७ ॥

(२) योगशिखोपनिषद् अ० १ । श्लो० १६८ । प० ६१७ । पृ० १ । प० ५ ॥

(३) योगचूडामण्युप० श्लो० ९ । प० ४४६ । पृ० १ । पं०५॥

(१) तस्य मध्यगतं वह्निम्प्रज्वलेद्दीपवर्त्तिवत् ॥ १६ ॥

अथ मठप्रकारः ।

(२) सुशोभनं मठं कुर्यात्सूक्ष्मद्वारन्तु निर्व्रणम्[१] ॥ मत्कुणैर्मशकैर्लूकैर्वर्जितं च प्रयत्नतः ॥ १७ ॥

अथासनविधिः ।

नात्युच्छ्रितं नातिनीचं चैलाजिनकुशोत्तरम् ॥ १८ ॥

अथाभ्यासविधिः ।

(३) सिद्धासने स्थितो योगी मुद्रां संधाय वैष्णवीम् ॥ १९ ॥

---

१ भूमिगतविवरादिरहितम् ॥

---

(१) योगशिखोपनि० श्लो० ७९ । प० ६१० । पृ०२ । पं०९॥
(२) योगतत्त्वोपनिषत् श्लो० ३२ । प० ३८८ । पृ० २ । पं० ६ ॥
(३) नादबिन्दूपनिषद् श्लो० ३१ । प० ३६९ । पृ०२ । पं०३॥

(१) गुदमवष्टभ्याधाराद्वायुमुत्थाप्य स्वाधिष्ठानं त्रिः प्रदक्षिणीकृत्य मणिपूरकं च गत्वा अनाहतमतिक्रम्य विशुद्धौ प्राणान्निरुध्याज्ञामनुध्यायन्ब्रह्मरन्ध्रं ध्यायन् त्रिमात्रोऽहमित्येवं सर्वदा ध्यायन् ॥ २० ॥

(२) अकारे रेचितं पद्ममुकारेणैव भिद्यते । मकारे लभते नादमर्धमात्रा तु निश्चला ॥ २१ ॥

(३) अनाहतस्वरूपेण ज्ञानिनामूर्ध्वगो भवेत् ॥ तैलधारामिवाच्छिन्नं दीर्घघण्टानिनादवत् ॥ २२ ॥ प्रणवस्य ध्वनिस्तद्वत्तदग्रं ब्रह्म चोच्यते ॥ ज्योतिर्मयं तदग्रं स्यादवाच्यं बुद्धिसूक्ष्मतः ॥ २३ ॥

अथ नादस्वरूपम् ।

(४) अथो नादमाधाराद् ब्रह्मरन्ध्रपर्यन्तं शुद्धस्फटिकसङ्काशं स वै ब्रह्म परमात्मेत्युते ॥ २४ ॥

---

(१) हंसोपनि० । प० १९४ । पृ० २ । पं० ८ ॥

(२) योगतत्त्वोप० । प० ३९५ । पृ० २ । प० २ ॥

(३) योगचूडामण्युपनिषद् । श्लो० ९ । प० ४५१ । पृ० २ । पं० ४ ॥

(४) हंसोपनिषद् प० १९५ । पृ० १ । प० २ ॥

अथाजपाजपविधिः ।

अथ हंस ऋषिः । अव्यक्ता गायत्री छन्दः । परमहंसो देवता । अहमिति बीजम् । स इति शक्तिः । सोऽहमिति कीलकम् । सूर्याय सोमाय निरञ्जनाय निराभासाय तनुसूक्ष्मं प्रचोदयादिति । अग्नीषोमाभ्यां वौषट् हृदयाद्यङ्गन्यासकरन्यासौ भवतः ॥ २५ ॥ एवं कृत्वा हृदये अष्टदले हंसात्मानं ध्यायेत् अग्नीषोमौ पक्षावोङ्कारः शिरो बिन्दुस्तु नेत्रे मुखं रुद्रो रुद्राणी चरणौ बाहू कालश्चाग्निश्चोभे पार्श्वे भवतः पश्यत्यनागारश्च शिष्टोभयपार्श्वे भवतः एषोऽसौ परमहंसो भानुकोटिप्रतीकाशः येनेदं व्याप्तम् ॥ २६ ॥

अथ हंसस्याष्टधा वृत्तिः ।

तस्याष्टधा वृत्तिर्भवति । पूर्वदले पुण्ये मतिः आग्नेये निद्रालस्यादयो भवन्ति ॥ याम्ये क्रूरे मतिः ॥ नैर्ऋते पापे मनीषा ॥ वारुण्यां क्रीडा ॥ वायव्ये गमनादौ

बुद्धिः ॥ सौम्ये रतिप्रीतिः ॥ ईशाने द्रव्यादानम् ॥ मध्ये वैराग्यम् । केसरे जाग्रदवस्था कार्णिकायां स्वप्नः॥ लिङ्गे सुषुप्तिः॥ पद्मत्यागे तुरीयम् । यदा हंसो नादे लीनो भवति तदा तुर्यातीतमुन्मनमजपोपसंहार इत्यभिधीयते ॥ २७ ॥

अथाजपाजपस्वरूपम् ।

(१) हङ्कारेण बहिर्याति सकारेण विशेत्पुनः । हंसहंसेत्यमुं मन्त्रं जीवो जपति सर्वदा ॥ २८ ॥ षट्शतानि दिवा रात्रौ सहस्राण्येकविंशतिः । एतत्सङ्ख्यान्वितं मन्त्रं जीवो जपति सर्वदा ॥ २९ ॥

१-जपसमर्पणमाह-षट्शतं गणनाथाय षट्सहस्रन्तु वेधसे । विष्णवे षट्सहस्रन्तु षट्सहस्रं शिवात्मने । जीवात्मने सहस्रन्तु सहस्रं परमात्मने । सहस्रं गुरवे चैव जपसंख्यां निवेदयेत् ॥

(१) योगचूडामण्युपनिषद् श्लो० ३१ । ३२ । प० ४४७ । पृ० ७ । पं० ३ ॥

(१) स एव जपकोट्या नादमनुभवति ॥३०॥

(२) अनाहतस्य[1] शब्दस्य तस्य शब्दस्य यो ध्वनिः । ध्वनेरन्तर्गतं ज्योतिर्ज्योतिषोऽन्तर्गतं मनः ॥ तन्मनो विलयं याति तद्विष्णोः परमम्पदम् ॥ ३१ ॥

(३) हंसवशान्नादो दशविधो जायते ।

अथ नादभेदाः ।

चिणीति प्रथमः ॥ चिञ्चिणीति द्वितीयः ॥ घण्टानादस्तृतीयः ॥ शङ्खनादश्चतुर्थः । पञ्चमस्तन्त्रीनादः । षष्ठस्तालनादः । सप्तमो वेणुनादः । अष्टमो मृदङ्गनादः । नवमो भेरीनादः । दशमो मेघनादः । नवमं परित्यज्य दशममेवाभ्यसेत् ॥ ३२ ॥

१—अनाहतन्तु यच्छब्दं तस्य शब्दस्य यो ध्वनिरिति पाठान्तरम् ।

(१–३) हंसोपनिषद् प० ११५ । पृ० २ । प० ६।९ ॥
२. योगशिखोपनि० अ० ६ । श्लो० २१ । प०६२८।पृ०१।पं०३॥

अथ नादफलानि ।

प्रथमे चिञ्चिणीगात्रं द्वितीये गात्रभञ्जनम् ।
तृतीये खेदनं याति चतुर्थे कम्पते शिरः ॥
पञ्चमे स्रवते तालु षष्ठेऽमृतनिषेवणम् ।
सप्तमे गूढविज्ञानं परा वाचा तथाष्टमे ॥
अदृश्यं नवमे देहं दिव्यं चक्षुस्तथाऽमलम् ।
दशमे परमं ब्रह्म भवेद्ब्रह्मात्मसन्निधौ ॥
तस्मिन् मनो विलीयते मनसि सङ्कल्पविकल्पे दग्धे पुण्यपापे सदाशिवः शक्त्यात्मा सर्वत्रावस्थितः स्वयंज्योतिः शुद्धो बुद्धो नित्यो निरञ्जनः शान्तः प्रकाशते ॥ २३ ॥

(१) अजपा नाम गायत्री योगिनां मोक्षदा सदा ॥ अस्यास्सङ्कल्पमात्रेण सर्वपापैः प्रमुच्यते ॥ अनया सदृशं ज्ञानं न भूतं न भविष्यति ॥ २४ ॥

इति मन्त्रयोगः ।

---

(१) योगचूडामण्युपनिषद् श्लो० ३३ । ३४ । प० ४४७ । पु० २ । प० ६ ॥

अथाष्टाङ्गयोगमाह ।

(१) सांकृते शृणु वक्ष्यामि योगं साष्टाङ्गदर्शनम् ॥ यमश्च नियमश्चैव तथैऽऽवासनमेव च ॥ ३५ ॥ प्राणायामस्तथा ब्रह्मन्प्रत्याहारस्ततः परम् ॥ धारणा च तथा ध्यानं समाधिश्चाष्टमं मुने ॥ ३६ ॥

अथ सलक्षणदशविधयमानाह ।

अहिंसा सत्यमस्तेयं ब्रह्मचर्यं दयाऽऽर्जवम्[१] ॥ क्षमा धृतिर्मिताहारश्शौचश्चैव यमादश॥३७॥ वेदोक्तेन प्रकारेण विना सत्यं तपोधन ॥ कायेन मनसा वाचाऽहिंसाऽहिंसा न चान्यथा ॥ ३८ ॥ आत्मा सर्वगतोऽच्छेद्यो न ग्राह्य इति मे मतिः ॥ सा चाहिंसा वरा प्रोक्ता मुने वेदान्तवेदिभिः ॥ ३९ ॥ चक्षुरादीन्द्रियैर्दृष्टं श्रुतं घ्रातं मुनीश्वर ॥ तस्यैवोक्तिर्भवेत्सत्यं विप्र तन्नाऽन्यथा भवेत् ॥४०॥

---

१ चित्तस्य कोमलत्वम् ।

---

(१) श्रीजाबालदर्शनोप० खं० १ । श्लो० ४ । १३ । प० ७६७। पृ० १ । पं० ३ ॥

सर्वं सत्यम्परम्ब्रह्म न चान्यदिति या मतिः॥ तच्च सत्यं वरम्प्रोक्तं वेदान्तज्ञानपारगैः ॥ ॥ ४१ ॥ अन्यदीये तृणे रत्ने काञ्चने मौक्तिकेऽपि च ॥ मनसा विनिवृत्तिर्य्या तदस्तेयं विदुर्बुधाः ॥ ४२ ॥ आत्मन्यनात्मभावेन व्यवहारविवर्ज्जितम् ॥ यत्तदस्तेयमित्युक्तमात्मविद्भिर्महामते ॥ ४३ ॥ कायेन वाचा मनसा स्त्रीणाम्परिविवर्ज्जनम् ॥ ऋतौ भार्यान्तदा स्वस्य ब्रह्मचर्यन्तदुच्यते ॥ ४४ ॥

(१) दर्शनं स्पर्शनं केलिः कीर्त्तनं गुह्यभाषणम् ॥ संकल्पोऽध्यवसायश्च क्रियानिष्पत्तिरेव च ॥ ४५ ॥ एतन्मैथुनमष्टाङ्गम्प्रवदन्ति मनीषिणः ॥ विपरीतम्ब्रह्मचर्यमनुष्ठेयम्मुमुक्षुभिः ॥ ४६ ॥

(२) ब्रह्मभावे मनश्चारम्ब्रह्मचर्यम्परन्तपः ॥ ॥ ४७ ॥ स्वात्मवत्सर्वभूतेषु कायेन मनसा

---

(१) कठरुद्रोपनिषद् श्लो० ५ । ६ । प० ७३१ । पृ० १ । पं० ५ ॥
(२) श्रीजाबालदर्शनोपनिषद् खं० १ । श्लो० १४ । से १८ । प० ७६७ । पृ० ३ । पं० ५ ॥

गिरा ॥ अनुज्ञा[१] या दया सैव प्रोक्ता वेदान्तवेदिभिः ॥ ४८ ॥ पुत्रे मित्रे कलत्रे च रिपौ स्वात्मनि सन्ततम् । एकरूपम्मुने यत्तदार्जवम्प्रोच्यते मया ॥ ४९ ॥ कायेन मनसा वाचा शत्रुभिः परिपीडिते ॥ बुद्धिक्षोभनिवृत्तिर्या क्षमा सा नरपुङ्गव ॥ ५० ॥

(१) अपकारिणि कोपश्चेत् कोपे कोपः कथन्न ते ॥ धर्मार्थकाममोक्षाणाम्प्रसह्य परिपन्थिनि ॥ ५१ ॥

(२) धृतिर्नामार्थहानौ स्वेष्टबन्धुवियोगे तत्प्राप्तौ सर्वत्र चेतः स्थापनम् ॥ ५२ ॥

(३) वेदादेव विनिर्मोक्षः संसारस्य न चान्यथा ॥ अहमात्मा नचान्योस्मीत्येवमप्र-

---

१–बोधः ।

---

(१) याज्ञवल्क्योपनिषद् श्लो० २० । प० ८०८ । पृ० २ । पं० ६॥

(२) शाण्डिल्योपनिषद् खं० १ । प० ५४२ । पृ० १ । पं० ८ ॥

(३) श्रीजाबालदर्शनोपनिषद् खं० १ । श्लो० १९ । प० ७६८ । पृ० १ । पं० २ ॥

च्युता मतिः ॥ इति विज्ञाननिष्पत्तिर्धृतिः प्रोक्ता हि वैदिकैः ॥ ५३ ॥ अल्पमृष्टाऽशनाभ्याश्च चतुर्थांशावशेषकम् । तस्माद्योगानुगुण्येन भोजनम्मितभोजनम् ॥ ५४ ॥

(१) लवणं सार्षपं चाम्लमुष्णं रूक्षं च तीक्ष्णकम् ॥ शाकजातं रामठादिवह्निस्त्रीपथसेवनम् ॥ प्रातःस्नानोपवासादि कायक्लेशांश्च वर्जयेत् ॥ ५५ ॥ अभ्यासकाले प्रथमं शस्तं क्षीराज्यभोजनम् ॥ गोधूममुद्गशाल्यन्नं योगवृद्धिकरं विदुः ॥ ५६ ॥

(२) आहारशुद्धौ सात्त्वशुद्धिः, सत्त्वशुद्धौ ध्रुवा स्मृतिः, स्मृतिलम्भे सर्वग्रन्थीनां विप्रमोक्षः ॥ ५७ ॥

१–हिङ्गुप्रभृतिवृक्षनिर्यासरूपम् ॥ २–भोक्तुर्भोगायाह्रियत इत्याहारः शब्दादिविषयविज्ञानम् । तस्य विषयोपलब्धिल-

---

(१) योगतत्त्वोपनिषद् श्लो० ४७ । ४८ । प० ३८९ । पृ० २ । पं० ४ ॥

(२) छान्दोग्योपनि० प्र० ७ । ख० २६ । प० ९७ । ० १ । पं० ५ ॥

(१) स्वदेहमलनिर्मोक्षो मृज्जलाभ्याम्महामुने॥
यत्तच्छौचम्भवेद्वाह्यम्मानसम्मननं विदुः५८॥
अहं शुद्ध इति ज्ञानं शौचमाहुर्मनीषिणः॥
अत्यन्तमलिनो देहो देही चात्यन्तनिर्म्मलः॥
उभयोरन्तरं ज्ञात्वा कस्य शौचं विधीयते॥५९॥

अथ सलक्षणदशाविधनियमानाह।

(२) तपः सन्तोष आस्तिक्यं दानमीश्वर-
पूजनम्॥सिद्धान्तश्रवणञ्चैव ह्रीर्म्मतिश्च जपो

-क्षणस्य विज्ञानस्य शुद्धी रागद्वेषमोहदोषैरसंस्पृष्टं विषयविज्ञानमित्यर्थः। अत्रार्थे स्मृतिः-रागद्वेषवियुक्तैस्तु विषयानिन्द्रियैश्चरन्नित्यादेः। ३-तद्गतोऽन्तःकरणस्य सत्त्वस्य नैर्मल्यम्॥ ४-यथाऽवगते भूमात्मनि ध्रुवाऽविच्छिन्ना स्मृतिरविस्मरणम्भवति॥

५-सर्वेषामविद्याकृतानर्थपाशरूपाणामनेकजन्मान्तरानुभवभावनाकाठिनीकृतानां हृदयाश्रयाणां ग्रन्थीनां रागादीनाम्॥ ६-विशेषेण प्रमोक्षाणां विनाशो भवति॥

---

(१) श्रीजाबालदर्शन ख० १। श्लो० २०। २१। २२। प० ७६८। पृ० १। पं० ३॥

(२) श्रीजाबालदर्शनोपनिषद्। खं० २। श्लो० १-५। प० ७६८। पृ० २। पं० २॥

व्रतम् ॥ एते च नियमाः प्रोक्तास्तान्वक्ष्यामि क्रमाच्छृणु ॥ ६० ॥ वेदोक्तेन प्रकारेण कृच्छ्रचान्द्रायणादिभिः ॥ [१] शरीरशोषणं यत्तत्तप इत्युच्यते बुधैः ॥ ६१ ॥ को वा मोक्षः कथन्तेन संसारम्प्रतिपन्नवान् ॥ इत्यालोकनमर्थज्ञास्तपः शंसन्ति पण्डिताः ॥ ६२ ॥ यदृच्छालाभतो नित्यम्प्रीतिर्या जायते नृणाम्। तत्सन्तोषं विदुः प्राज्ञाः परिज्ञानैकतत्पराः ॥ ॥ ६३ ॥ ब्रह्मादिलोकपर्यन्ताद्विरक्त्या यल्लभेत्प्रियम् ॥ सर्वत्र विगतस्नेहः सन्तोषम्परमं विदुः ॥ ६४ ॥ श्रौते स्मार्त्ते च विश्वासो यस्तदास्तिक्यमुच्यते ॥ ६५ ॥ न्यायार्जितधनं श्रान्ते श्रद्धया वैदिके जने ॥ अन्यद्वा यत्प्रदीयेत तद्दानम्प्रोच्यतेमया॥६६॥ (१) ईश्वरपूजनन्नाम प्रसन्नस्वभावेन यथाशक्ति विष्णुरुद्रादिपूजनम् ॥ ६७ ॥

१-श्रुतिस्मृतिप्रतिपादिते विधौ इदमित्थमेवेति ॥

---

(१) शाण्डिल्योपनिषद् खं० १ । मं० ६ । प० ५४३ । पृ० २ । पं० ५ ॥

(१) रागाद्यपेतं हृदयं वागदुष्टानृतादिना ॥
हिंसादिरहितं कर्म यत्तदीश्वरपूजनम् ॥ ६८ ॥
सत्यञ्ज्ञानमनन्तञ्च परानन्दम्परं ध्रुवम् ॥
प्रत्यगित्यवगन्तव्यं वेदान्तश्रवणम्बुधाः ॥ ६९ ॥
वेदलौकिकमार्गेषु कुत्सितं कर्म यद्भवेत् ॥
तस्मिन्भवति या लज्जा ह्रीः सैवेति प्रकीर्तिता ॥
॥ ७० ॥ वैदिकेषु च सर्वेषु श्रद्धा या सा मति-
र्भवेत् ॥७१॥ गुरुणा चोपदिष्टोपि तत्र सम्ब-
न्धवर्जितः ॥ वेदोक्तेनैव मार्गेण मन्त्राभ्यासो
जपः स्मृतः ॥ ७२ ॥ कल्पसूत्रे तथा वेदे
धर्मशास्त्रे पुराणके ॥ इतिहासे च वृत्तिर्या
स जपः प्रोच्यते मया ॥ ७३ ॥ जपस्तु
द्विविधः प्रोक्तो वाचिको मानसस्तथा ॥
वाचिकोऽपांशुरुच्चैश्च द्विविधः परिकीर्त्तितः ॥

१-विषयभोगसंसर्गवाञ्छारहितम् ॥
२-प्रत्यक्प्रतिशरीरव्यापकम् । प्रत्यगात्मस्वरूपमित्यर्थः ॥

(१) श्रीजाबालदर्शन० । ख० २। श्लो० ८-१६ । पं० ७६९ । पृ० १ । प० १ ॥

मानसो मननध्यानभेदाद्वैविध्यमाश्रितः ॥
॥ ७४ ॥ उच्चैर्जपस्तु सर्वेषां यथोक्तफलदो भवेत् ॥ उच्चैर्जपादुपांशुश्च सहस्रगुण उच्यते ॥ मानसश्च तथोपांशोः सहस्रगुण उच्यते ॥ ७५ ॥ नीचैः श्रोत्रेण चेन्मन्त्रः श्रुतश्चेन्निष्फलो भवेत् ॥ ७६ ॥

(१) व्रतन्नाम वेदोक्तविधिनिषेधानुष्ठान-नैयत्यम् ॥ ७७ ॥

अथासनानि सलक्षणानि ।

(२) जानूर्वोरन्तरे कृत्वा सम्यक्पादतले उभे ॥ समग्रीवशिरःकायः स्वस्तिकन्नित्यमभ्यसेत् ॥ ७८ ॥

(३) ऊर्वोरुपरि वै धत्ते यदा पादतले उभे ॥ पद्मासनम्भवेदेतत्सर्वव्याधिविपापहम् ॥
॥ ७९ ॥ पद्मासनं सुसंस्थाप्य तदङ्गुष्ठद्वय-

---

(१) शाण्डिल्योपनिषद् खं० २ । मं० १५ । प० ५४४ । पृ० १ । पं० १ ॥

(२) श्रीजाबालदर्शनोप० । खं० ३ । श्लो० २ । प० ७६९ । पृ० २ । पं० ४ ॥

(३) त्रिशिखिब्राह्मणोप० श्लो० ३९ । ४० । प० ४३३ । पृ० २ । पं० ८ ॥

पुनः ॥ व्युत्क्रमेणैव हस्ताभ्याम्बद्धपद्मासनं भवेत् ॥ ८० ॥

(१) योनिं वामेन सम्पीड्य मेढ्रादुपरि दक्षिणम् ॥ भ्रूमध्ये च मनो लक्ष्यं सिद्धासनमिदम्भवेत् ॥ ८१ ॥

(२) गुदन्नियम्य गुल्फाभ्यां व्युत्क्रमेण समाहितः ॥ योगासनम्भवेदेतदिति योगविदो विदुः ॥ ८२ ॥

(३) वामाङ्घ्रिमूलकन्दाधो अन्यं तदुपरि क्षिपेत् ॥ समग्रीवशिरः कायो वज्रासनमितीरितम् ॥ ८३ ॥

(४) प्रसार्य भुवि पादौ तु दोर्भ्यामङ्गुष्ठमादरात् ॥ जानूपरि ललाटं तु पश्चिमन्ताणमुच्यते ॥ ८४ ॥

१—गुददेशमेढ्रान्तरालस्थानम् ॥

---

(१) शाण्डिल्योपनिषद् खं० ३ । प० ५४४ । पृ०२ । पं०१ ॥

(२) त्रिशिखीब्राह्मणोपनि० । श्लो० ३८ । प० ४३३ । पृ० २ । प० ६ ॥

(३) योगकुण्डलिन्युपनि० अ० १ । श्लो० ६ । प० ७४१ । पृ० १ । प० १ ॥

(४) त्रिशिखीब्रा० । श्लो० ५० । ५२ । ५४ । प० ४३४ । पृ० २ । पं० २ । ५ । ६ ॥

(१) आसनं विजितं येन जितन्तेन जगत्त्रयम् ॥ ८५ ॥

अथ साङ्गप्राणायामः ।

(२) मरुज्जयो यस्य सिद्धस्सेवयेत्तं गुरुं सदा ॥ गुरुवक्त्रप्रसादेन कुर्यात्प्राणजयं बुधः ॥ ८६ ॥

(३) देहमानं स्वाङ्गुलीभिष्षण्णवत्यङ्गुलायतम् ॥ प्राणः शरीरादधिको द्वादशाङ्गुलमानतः ॥ ८७ ॥ देहस्थमनिलं देहसमुद्भूतेन वह्निना ॥ न्यूनं समं वा योगेन कुर्वन्ब्रह्मविदिष्यते ॥ ८८ ॥

(४) गुदात्तु द्व्यङ्गुलादूर्ध्वम्मेढ्रात्तु द्व्यङ्गुलादधः ॥ देहमध्यं[1] विजानीहि मनुजानां हि सां कृते ॥ ८९ ॥

१-मूलाधारम् इदमेव योनिस्थानम् ॥

(१-३) ९७ पृष्ठान्त टि०वत् ।

(२) योगशिखोप० श्लो० ८० । प० ६१२ । पृ० १ । पं० ६ ॥

(४) श्रीजाबालोपनिषद् अ० ४ । श्लो० २ । १ । ३ । ४ । प० ७० । पृ० २ । पं० २ । १ । ३ ॥

(१) देहमध्ये शिखिस्थानं तप्तजाम्बूनद-प्रभम् ॥ त्रिकोणम्मनुजानान्तु सत्यमुक्तं हि सांकृते ॥ ९० ॥

(२) कन्दस्थानम्मुनिश्रेष्ठ मूलाधारान्नवाङ्गुलम् ॥ चतुरंगुलमायामविस्तारम्मुनि-पुंगव ॥ ९१ ॥ कुक्कुटाण्डवदाकारम्भूषितं तु त्वगादिभिः ॥ तन्मध्ये नाभिरित्युक्तं योगज्ञैर्म्मुनिपुङ्गव ॥ ९२ ॥

(३) तत्र चक्रं द्वादशारं तेषु विष्णवादिमूर्त्तयः । अहन्तत्र स्थितश्चक्रं भ्रामयामि स्वमायया ॥ ९३ ॥ अरेषु भ्रमते जीवः क्रमेण द्विजसत्तम । तन्तुपञ्जरमध्यस्था यथा भ्रमति लूतिका ॥ प्राणाधिरूढश्चरति जीवस्तेन विना नहि ॥ ९४ ॥

(४) तस्योर्ध्वं कुण्डलीस्थानं नाभेस्तिर्यगथोर्ध्वतः ॥ अष्टप्रकृतिरूपा सा चाष्टधा

(१-२-३) ९८ पृष्ठस्थ जाबालोपनिषद्वत् ।

(४) त्रिशिखीब्राह्मणोपनि० । श्लो० ६१-६७ । प० ४३५ । पृ० १ । प० ७ ॥

कुण्डलीकृता ॥ ९५ ॥ यथावद्वायुसारञ्च ज्वलनादि च नित्यशः ॥ परितः कन्दपार्श्वे तु निरुध्यैव सदा स्थिता ॥ ९६ ॥ मुखेनैव समावेष्ट्य ब्रह्मरन्ध्रमुखन्तथा ॥ योगकालेन मरुता साग्निना बोधिता सती ॥ स्फुरिता हृदयाकाशे नागरूपा महोज्ज्वला ॥ ९७ ॥

(१) कन्दमध्ये स्थिता नाडी सुषुम्णा सुप्रतिष्ठिता ॥ पद्मसूत्रप्रतीकाशा ऋजुरूर्ध्वप्रवर्त्तिनी ॥ ९८ ॥ ब्रह्मणो विवरं यावद्विद्युदाभासनालकम् ॥ वैष्णवी ब्रह्मनाडी च निर्वाणप्राप्तिपद्धतिः ॥ ९९ ॥ इडा च पिङ्गला चैव तस्याः सव्येतरे स्थिते ॥ इडासमुत्थिता कन्दाद्वामनासापुटावधि ॥ पिङ्गला चोत्थिता तस्माद्दक्षनासापुटावधि॥१००॥ गान्धारी हस्तिजिह्वा च द्वे चान्ये नाडिके स्थिते ॥ पुरतः पृष्ठतस्तस्य वाम-

(१) त्रिशिखीब्राह्मणोपनिषद् श्लो० ६७–७५ । प० ४३५ । पृ० १ । पं० ४ ॥

तरहशौ प्रति ॥ १०१ ॥ पूषायशस्विनी-
नाड्यौ तस्मादेव समुत्थिते ॥ सव्येतर-
श्रुत्यवधि पायुमूलादलम्बुषा ॥ १०२ ॥
अधोगता शुभा नाडी मेढ्रान्तावधिरायता ॥
पादाङ्गुष्ठावधिः कन्दादधो याता च कौशि-
की ॥ १०३ ॥ दशप्रकारभूतास्ताः कथिताः
कन्दसम्भवाः ॥ तन्मूला बहवो नाड्यः
स्थूलसूक्ष्माश्च नाडिकाः ॥ १०४ ॥ द्वासप्त-
तिसहस्राणि स्थूलाः सूक्ष्माश्च नाडयः ॥
संख्यातुं नैव शक्यन्ते स्थूलमूलाः पृथ-
ग्विधाः ॥ यथाऽश्वत्थदले सूक्ष्माः स्थूलाश्च
विततास्तथा ॥ १०५ ॥

(१) सरस्वती तु या नाडी सा जिह्वाऽ-
न्तं प्रसर्पति ॥ १०६ ॥

(२) प्राणापानौ समानश्च उदानो व्यान
एव च ॥ नागः कूर्मश्च कृकरो देवदत्तो

---

(१) योगशिखोपनिषद् । अ० ५ । श्लो० २३ । प० ६२४ । पृ० १ । प० ३ ॥

(२) त्रिशिखीब्राह्मणोपनि० श्लो० ७६-९३ । प० ४३६ । पृ० १ । प० ५ ॥

कुण्डलीकृता ॥ ९५ ॥ यथावद्वायुसा-
रञ्च ज्वलनादि च नित्यशः ॥ परितः कन्द-
पार्श्वे तु निरुध्यैव सदा स्थिता ॥ ९६ ॥
मुखेनैव समावेष्ट्य ब्रह्मरन्ध्रमुखन्तथा ॥
योगकालेन मरुता साग्निना बोधिता सती ॥
स्फुरिता हृदयाकाशे नागरूपा महोज्ज्व-
ला ॥ ९७ ॥

(१) कन्दमध्ये स्थिता नाडी सुषुम्णा
सुप्रतिष्ठिता ॥ पद्मसूत्रप्रतीकाशा ऋजुरूर्ध्व-
प्रवर्त्तिनी ॥ ९८ ॥ ब्रह्मणो विवरं यावद्विद्यु-
दाभासनालकम् ॥ वैष्णवी ब्रह्मनाडी च
निर्वाणप्राप्तिपद्धतिः ॥ ९९ ॥ इडा च
पिङ्गला चैव तस्याः सव्येतरे स्थिते ॥
इडासमुत्थिता कन्दाद्वामनासापुटावधि ॥
पिङ्गला चोत्थिता तस्माद्दक्षनासापुटाव-
धि॥१००॥ गान्धारी हस्तिजिह्वा च द्वे चान्ये
नाडिके स्थिते ॥ पुरतः पृष्ठतस्तस्य वामे-

(१) त्रिशिखीब्राह्मणोपनिषद् श्लो० ६७–७५ । प० ४३५ । पृ० १ । प० ४ ॥

तरहशौ प्रति ॥ १०१ ॥ पूषायशस्विनीनाड्यौ तस्मादेव समुत्थिते ॥ सव्येतरश्रुत्यवधि पायुमूलादलम्बुषा ॥ १०२ ॥ अधोगता शुभा नाडी मेढ्रान्तावधिरायता ॥ पादाङ्गुष्ठावधिः कन्दादधो याता च कौशिकी ॥ १०३ ॥ दशप्रकारभूतास्ताः कथिताः कन्दसम्भवाः ॥ तन्मूला बहवो नाड्यः स्थूलसूक्ष्माश्च नाडिकाः ॥ १०४ ॥ द्वासप्ततिसहस्राणि स्थूलाः सूक्ष्माश्च नाडयः ॥ संख्यातुं नैव शक्यन्ते स्थूलमूलाः पृथग्विधाः ॥ यथाऽश्वत्थदले सूक्ष्माः स्थूलाश्च विततास्तथा ॥ १०५ ॥

(१) सरस्वती तु या नाडी सा जिह्वाऽन्तं प्रसर्पति ॥ १०६ ॥

(२) प्राणापानौ समानश्च उदानो व्यान एव च ॥ नागः कूर्मश्च कृकरो देवदत्तो

(१) योगशिखोपनिषद् । अ० ५ । श्लो० २३ । प० ६२४ । पृ० ४ । प० ३ ॥

(२) त्रिशिखोब्राह्मणोपनि० श्लो० ७६-९२ । प० ४३६ । पृ० ४ । प० ५ ॥

धनञ्जयः ॥ १०७ ॥ चरन्ति दशनाडीषु दश प्राणादिवायवः ॥ प्राणादिपञ्चकं तेषु प्रधानन्तत्र च द्वयम् ॥ १०८ ॥ प्राण एवाथवा ज्येष्ठो जीवात्मानं बिभर्त्ति यः ॥ आस्यनासिकयोर्मध्यं हृदयं नाभिमण्डलम् ॥ पादाङ्गुष्ठमिति प्राणस्थानानि द्विजसत्तम ॥ १०९ ॥ अपानश्चरति ब्रह्मन् गुदमेढ्रोरुजानुषु ॥ समानः सर्वगात्रेषु सर्वव्यापी व्यवस्थितः ॥ ११० ॥ उदानः सर्वसन्धिस्थः पादयोर्हस्तयोरपि ॥ व्यानः श्रोत्रोरुकट्याञ्च गुल्फस्कन्धगलेषु च ॥ ॥ १११ ॥ नागादिवायवः पञ्च त्वगस्थ्यादिषु संस्थिताः ॥ तुं[1]न्दस्थजलमन्नं च रसादीनि समीकृतम् ॥ ११२ ॥ तुन्दमध्यगतः प्राणस्तानि कुर्यात्पृथक्पृथक् ॥ इत्यादिचेष्टनम्प्राणः करोति च पृथक् स्थितम् ॥ ११३ ॥ अपानवायुर्मूत्रादेः करोति च विसर्जनम् ॥ प्राणापानादिचेष्टादि क्रियते

१-कुक्षिस्थजलम् ॥

व्यानवायुना ॥ ११४ ॥ उज्जीर्यते शरीरस्थमुदानेन नभस्वता ॥ पोषणादि शरीरस्य समानः कुरुते सदा ॥ ११५ ॥ उद्गारादिक्रियो नागः कूर्मोऽक्ष्यादिनिमीलनः ॥ कृकरः क्षुतयोः कर्त्ता दत्तो निद्रादिकर्मकृत् ॥ मृतगात्रस्य शोभादेर्धनञ्जय उदाहृतः ॥ ११६ ॥ नाडीभेदम्मरुद्भेदम्मरुतां स्थानमेव च ॥ चेष्टाश्च विविधास्तेषां ज्ञात्वैव द्विजसत्तम ॥ शुद्धौ यतेत नाडीनाम्पूर्वोक्तज्ञानसंयुतः ॥ ॥ ११७ ॥ विविक्तदेशमासाद्य सर्वसंबधवर्जितः ॥ योगाङ्गद्रव्यसम्पूर्णं तत्र दारुमये शुभे ॥ ११८ ॥ आसने कल्पिते दर्भकुशकृष्णाजिनादिभिः ॥ तावदासनमुत्सेधे तावद्द्वयसमायते ॥ ११९ ॥ उपविश्यासने सम्यक् स्वस्तिकादि यथारुचि ॥ बद्धा प्रागासनं विप्रो ऋजुकायः समाहितः ॥ ॥ १२० ॥ नासाग्रन्यस्तनयनो दन्तैर्दन्तान्न संस्पृशेत् ॥ रसनां तालुनि न्यस्य स्वस्थ-

१—देवदत्त इत्यर्थः ॥

चित्तो निरामयः ॥ १२१ ॥ आकुञ्चितशिरः किञ्चिन्निबध्नन्योगमुद्रया ॥ हस्तौ यथोक्तविधिना प्राणायामं समाचरेत् ॥ १२२ ॥ रेचनं पूरणं वायोः शोधनं रेचनं तथा ॥ चतुर्भिः क्लेदनं वायोः प्राणायाम उदीर्यते ॥ १२३ ॥

अथ रेचकादीनां लक्षणानि ।

(१) उत्क्षिप्य वायुमाकाशं शून्यं कृत्वा निरात्मकम् ॥ शून्यभावेन युञ्जीयाद्रेचकस्येति लक्षणम् ॥ १२४ ॥ वक्त्रेणोत्पलनालेन तोयमाकर्षयेन्नरः ॥ एवं वायुर्ग्रहीतव्यः पूरकस्येति लक्षणम् ॥१२५॥ नोच्छ्वसेन्न च निःश्वसेन्नैव गात्राणि चालयेत् ॥ एवं भावं नियुञ्जीयात्कुम्भकस्येति लक्षणम् ॥१२६॥ (२) वाह्यादापूरणं वायोरुदरे पूरको हि सः॥संपूर्णकुम्भवद्वायोर्धारणं कुम्भको भवेत्॥ वहिर्विरेचनं वायोरुदराद्रेचकः स्मृतः ॥१२७॥

---

(१) अमृतनादोपनिषत् श्लो० १२ । १३ । १४ । प० २२७ । पृ० २ । प० ९ ॥

(२) श्रीजाबालदर्शनोप० ख० ६ । श्लो० १२ । १३ । प०७७६। पृ० १ । पं० ६ ॥

अथ रेचकादिषु ध्यानानि।

(१) अतसीपुष्पसंकाशं नाभिस्थाने प्रतिष्ठितम् ॥ चतुर्भुजं महाविष्णुम्पूरकेण विचिन्तयेत् ॥ १२८ ॥ कुंभकेन हृदि स्थाने चिन्तयेत्कमलासनम् ॥ ब्रह्माणं रक्त-गौराभं चतुर्वक्त्रं पितामहम् ॥ १२९ ॥ रेचकेन च विद्यान्मां ललाटस्थं त्रिलोच-नम् ॥ शुद्धस्फटिकसङ्काशं निष्कलं पाप-नाशनम् ॥ १३० ॥

अथ मात्रालक्षणम्।

(२) जानु प्रदक्षिणीकृत्य न द्रुतं न विल-म्बितम् ॥ अङ्गुलिस्फोटनं कुर्यात्सा मात्रा परिगीयते ॥ १३१ ॥

अथाभ्यासक्रमः।

(३) हस्तेन दक्षिणेनैव पीडयेन्नासिकापु-टम् ॥ शनैश्शनैरथ बहिः प्रक्षिपेत्पिङ्गलाऽ-

(१) ध्यानविन्दूपनि० श्लो० ३० । ३१ । ३२ । प० ३७३ । पृ० १ । पं० ३ ॥

(२) योगतत्त्वोपनिषद् श्लो० ४० । प० ३८९ । पृ० १ । पं० ५ ॥

(३) त्रिशिखिब्राह्मणो० । श्लो० ९४–९७ । प० ४३७ । पृ० १ । प० ८ ॥

निलम् ॥ १३२ ॥ इडया वायुमापूर्य ब्रह्मन् षोडशमात्रया ॥ पूरितं कुम्भयेत्पश्चाच्चतुःषष्ट्या तु मात्रया ॥ १३३ ॥ द्वात्रिंशन्मात्रया सम्यग्रेचयेत्पिङ्गलानिलम् ॥ एवं पुनः पुनः कार्यं व्युत्क्रमादुत्क्रमेण तु ॥ १३४ ॥

(१) यया त्यजेत्तयाऽऽपूर्य धारयेदविरोधतः ॥ १३५ ॥

(२) प्रथमे दिवसे कार्यं कुम्भकानाञ्चतुष्टयम् ॥ प्रत्येकं दशसंख्याकं द्वितीये पञ्चभिस्तथा ॥ विंशत्यलं तृतीयेऽह्नि पञ्चवृद्ध्या दिनेदिने ॥ १३६ ॥

(३) प्रातर्मध्यन्दिने सायमर्धरात्रे च कुम्भकान् ॥ शनैरशीतिपर्यन्तं चतुर्वारं समभ्यसेत् ॥ एवं मासत्रयाभ्यासान्नाडीशुद्धिस्ततो भवेत् ॥ १३७ ॥

---

(१) योगतत्त्वोप० श्लो० २९ । प० २८९ । पृ० १ । पं०५ ॥

(२) योगकुण्डलिन्युप० अ० १ । श्लो० ५४।५५ । प०७४४ । पृ० १ । प० २ ॥

(३) योगतत्त्वोपनिषद् श्लो० ४३।४४।प०३८९।पृ०१।प०९ ॥

(१) शरीरलघुता दीप्तिर्वह्नेर्जठरवर्तिनः ॥ नादाभिव्यक्तिरित्येतच्चिह्नं तच्छुद्धिसूचकम् ॥ यावदेतानि सम्पश्येत्तावदेवं समाचरेत् ॥ १३८ ॥

(२) कनीयसि भवेत्स्वेदः कम्पो भवति मध्यमे ॥ उत्तिष्ठत्युत्तमे प्राणरोधे पद्मासनं महत् ॥ १३९ ॥

(३) हृदयाम्भोरुहश्चापि व्याकोचम्भवति स्फुटम् ॥ तत्र पश्येत्परात्मानं वासुदेवमकल्मषम् ॥ १४० ॥

(४) बन्धत्रयेण संयुक्तः केवलप्राप्तिकारकः ॥ अथास्य लक्षणं सम्यक् कथयामि समासतः ॥ १४१ ॥

---

(१) श्रीजाबालदर्शन० खं० ५ । श्लो० १० । ११ । प० ७७५ । पृ० १ । पं० ६ ॥

(२) शाण्डिल्यो० ख० ४ । श्रु० ३ । प० ५४९ । पृ० १ । प० ६ ॥

(३) त्रिशिखीब्रा० श्लो० ९९ । प० ४३७ । पृ० २ । पं० ४ ॥

(४) योगशिखोप० अ० १ । श्लो० ८९ । प० ६११ । पृ० २ । पं० ८ ॥

(१) गुदम्पार्ष्ण्या तु सम्पीड्य पायुमाकुञ्च-येद्बलात् ॥ वारंवारं यथा चोर्ध्वं समायाति समीरणः ॥ प्राणापानौ नादविन्दू मूलबन्धेन[1] चैकताम् ॥ १४२ ॥

(२) कण्ठमाकुञ्च्य हृदये स्थापयेद्दृढमिच्छया ॥ बन्धो जालन्धराख्योऽयममृताप्यायकारकः ॥

(३) पूरकान्ते च कर्त्तव्यो बन्धो जालन्धराभिधः ॥ १४३ ॥

(४) नाभेरूर्ध्वमधश्चापि त्राणं कुर्यात्प्रयत्नतः ॥

(५) उडियानन्तु सहजं गुरुणा कथितं सदा ॥ १४४ ॥

१–पूरकादौ मूलवन्धः कर्त्तव्यः । अनुक्तकालत्वात् ।

---

(१) योगशिखोपनिषद् अ० १ । श्लो० १०५ । प० ६१२ । पृ० २ । प० ८ ॥

(२।३।४) योगशिखोपनि० अ० १ । श्लो० १११।११०।१०९ प० ६१३ । पृ० १ । प० ७ । ६ । ५ ॥

(५) योगशिखोपनि० अ० १ । श्लो० १०८ । ११० । १०७ प० ६१० । पृ० १ । पं० ३ । ५ । २ ॥

(१) षण्मासमभ्यसेन्मृत्युञ्जयत्येव न संशयः ॥

(२) कुम्भकान्ते रेचकादौ कर्त्तव्यस्तूडियानकः ॥ १४५ ॥

(३) अधस्तात्कुञ्चनेनाऽऽशु कण्ठसंकोचने कृते ॥ मध्ये पश्चिमतानेन स्यात्प्राणो ब्रह्मनाडिगः ॥ १४६ ॥

(४) ब्रह्मग्रन्थिं ततो भित्त्वा रजोगुणसमुद्भवम् ॥ विष्णुग्रन्थिम्प्रयात्युच्चैः सत्वरं हृदि संस्थिताम् ॥ १४७ ॥ ऊर्ध्वं गच्छति यच्चास्ते रुद्रग्रन्थिं तदुद्भवम् ॥ भ्रुवोर्मध्यं तु सम्भिद्य पाति शीतांशुमण्डलम् ॥ १४८ ॥

(५) ब्रह्मरन्ध्रम्प्रविश्यान्तस्ते यान्ति परमां गतिम् ॥

(१-२) १०८ पृष्ठान्तिमटिप्पणीवत् ।

(३) योगशिखोपनिषद् अ० १ । श्लो० १०२ । से० प०६१३। पृ० १ । प० ८ ॥

(४) योगकुण्डलिन्युपनि० अ० १ । श्लो० ६७ । ६८ । ६९ । प० ७५४ । पृ० २ । पं० ८ ॥

(५) योगशिखोपनि० अ० ६ । श्लो० ३५ । प० ६२९ । पृ० १ । प० १ ॥

(१) तत्र पश्येत्परात्मानं वासुदेवमकल्मषम् ॥ १४९ ॥

(२) रेचकं पूरकम्मुक्त्वा कुम्भीकरणमेव यः ॥ करोति त्रिषु कालेषु नैव तस्यास्ति दुर्लभम् ॥ १५० ॥

(३) यावत्केवलसिद्धिस्स्यात्तावत्सहितमभ्यसेत् ॥ १५१ ॥

(४) यथा पर्वतधातूनां दह्यन्ते धमनान्मलाः ॥ तथेन्द्रियकृता दोषा दह्यन्ते प्राणधारणात् ॥ १५२ ॥

अथ कुम्भकभेदानाह ।

(५) सूर्योज्जायी शीतली च भस्त्री चैव चतुर्थिका ॥ भेदैरेव समं कुम्भो यस्स्यात्स हितकुम्भकः ॥ १५३ ॥

(१ । २) त्रिशिखीब्राह्मणोप० श्लो० ९९ । १०७ । प० ३३७ । ३३८ । पृ० २ । १ । पं० ५ । ४ ॥

(३-५) योगकुण्डलिन्युपनिषद् अ० १ । श्लो० २० । २८ । प० ७४१ । पृ० २ । पं० ९ ॥

(५) अमृतनादोप० । श्लो० ७ । प० २२७ । पृ० २ । पं० ४ ।

अथ सूर्यभेदकुम्भकमाह ।

दक्षनाड्या समाकृष्य बहिष्ठं पवनं शनैः ॥ यथेष्टं पूरयेद्वायुं रेचयेदिडया ततः ॥ १५४ ॥ कपालशोधनेवाऽपि रेचयेत्पवनं शनैः ॥ चतुष्कं वातदोषन्तु कृमिदोषं निहन्ति च ॥ १५५ ॥ पुनः पुनरिदं कार्यं सूर्यभेदमुदाहृतम् ॥ १५६ ॥

अथोज्जायाख्यमाह ।

मुखं संयम्य नाडीभ्यामाकृष्य पवनं शनैः ॥ यथा लगति कण्ठात्तु हृदयावधि सस्वनम् ॥ १५७ ॥ पूर्ववत्कुम्भयेत्प्राणं रेचयेदिडया ततः ॥ शीर्षोदिताऽनलहरं गलश्लेष्महरं परम् ॥ १५८ ॥ सर्वरोगहरं पुण्य देहाऽनलविवर्धनम् ॥ नाडीजलोदरं धातुगतदोषविनाशनम् ॥ गच्छतस्तिष्ठतः कार्यमुज्जायाऽऽख्यन्तु कुम्भकम् ॥ १५९ ॥

अथ शीतलीनामकुम्भकम् ।

जिह्वया वायुमाकृष्य पूर्ववत्कुम्भकादनु॥शनैस्तु घ्राणरन्ध्राभ्यां रेचयेदनिल सुधीः ॥१६०॥

गुल्मप्लीहाऽऽदिकान्दोषान्क्षयं त्तं ज्वरं तृषाम् ॥ विषाणि शीतली नाम कुम्भकोऽयं निहन्ति हि ॥ १६१ ॥

अथ भस्त्राख्यमाह ।

ततः पद्माऽऽसनं बद्ध्वा समग्रीवोदरस्सुधीः ॥ मुखं संयम्य यत्नेन प्राणं घ्राणेन रेचयेत् ॥ १६२ ॥ यथा लगति कण्ठात्तु कपाले सस्वनं ततः ॥ वेगेन पूरयेत्किंचिद्धृत्पद्मावधि मारुतम् ॥ १६३ ॥ पुनर्विरेचयेत्तद्वत्पूरयेच्च पुनःपुनः ॥ यथैव लोहकाराणां भस्त्रा वेगेन चाल्यते ॥ १६४ ॥ तथैव स्वशरीरस्थं चालयेत्पवनं शनैः ॥ यथा भ्रमो भवेद्देहे तथा सूर्येण पूरयेत् ॥ १६५ ॥ यथोदरं भवेत्पूर्णं पवनेन तथा लघु ॥ धारयन्नासिकामध्यं तर्जनीभ्यां विना दृढम् ॥ १६६ ॥ कुम्भकं पूर्ववत्कृत्वा रेचयेदिडयाऽनिलम् ॥ कण्ठोत्थिताऽनलहरं शरीराग्निविवर्धनम् १६७ कुण्डलीबोधकं पुण्यं पापघ्नं शुभदं सुखम् ॥ ब्रह्मनाडीमुखान्तस्थकफाऽऽद्यर्गलनाश-

नम् ॥ १६८ ॥ गुणत्रयसमुद्भूतग्रंथित्रयवि-
भेदनम् ॥ विशेषेणैव कर्त्तव्यमस्नाख्यं कुंभक-
न्त्विदम् ॥ १६९ ॥

(१) यथा सिंहो गजो व्याघ्रो भवेद्वश्यश्शनैःशनैः॥तथैव सेवितो वायुरन्यथा हन्ति साधकम् ॥ १७० ॥ युक्तंयुक्तं त्यजेद्वायुं युक्तयुक्तं प्रपूरयेत् ॥ युक्तंयुक्तं प्रबध्नीयादेवं सिद्धिमवाप्नुयात् ॥ १७१ ॥

अथ मुद्रालक्षणानि तत्रादौ महामुद्रालक्षणम् ।

(२) पार्ष्णि वामस्य पादस्य योनिस्थाने नियोजयेत ॥ प्रसार्य दक्षिणं पादं हस्ताभ्यां धारयेद्दृढम् ॥ चिबुकं हृदि विन्यस्य पूरयेद्वायुना पुनः ॥ कुम्भकेन यथाशक्त्या धारयित्वा तु रेचयेत् ॥ वामाङ्गेन समभ्यस्य दक्षाङ्गेन ततोऽभ्यसेत् ॥ १७२ ॥

---

(१) योगचूडामण्युपनिषद् श्लो० ११८ । ११९ । प० ४५४ । पृ० १ । पं० ७ ॥

(२) योगतत्त्वोपनिषत् । श्लो० ११२-११७ । प० ३९३ । पृ० २ । पं० ७ ॥

अथ महाबन्धलक्षणम् ।

प्रसारितस्तु यः पादस्तमूरूपरि मानयेत् ॥
अयमेव महाबन्ध उभयत्रैवमभ्यसेत्॥ १७३॥

अथ महावेधलक्षणम् ।

महाबन्धस्थितो योगी कृत्वा पूरकमेकधीः ॥
वायूनां गतिमावृत्य निभृतं कर्णमुद्रया॥ १७४॥
पुटद्वयं समाक्रम्य वायुः स्फुरति सत्वरम् ॥
अयमेव महावेधः सिद्धैरारभ्यतेऽनिशम्॥ १७५॥

अथ विपरीतकरणीलक्षणम् ।

(१) करणी विपरीताख्या सर्वव्याधिविनाशिनी ॥ नित्यमभ्यासयुक्तस्य जाठराग्निविवर्धनी ॥ १७६ ॥ आहारो बहुलस्तस्य सम्पाद्यः साधकस्य च ॥ अल्पाहारो यदि भवेदग्निर्देहं हरेत्क्षणात् ॥ १७७ ॥ अधः शिरश्चोर्ध्वपादः क्षणं स्यात्प्रथमे दिने ॥ क्षणाच्च किञ्चिदधिकमभ्यसेत्तु दिनेदिने। १७८। वली च पलितश्चैव षण्मासार्धान्न दृश्यते ॥ याममात्रं तु यो नित्यमभ्यसेत्स तु काल-

(१) योगतत्त्वोपनिषत् । श्लो० १२२-१२७ । प० ३९४ । पृ० ७ । पं० १ ॥

जित् ॥ १७९ ॥ वज्रोलीमभ्यसेद्यस्तु स योगी सिद्धिभाजनम् ॥ लभ्यते यदि यस्यैव योगसिद्धिः करे स्थिता ॥ अतीतानागतं वेत्ति खेचरी च भवेद्ध्रुवम् ॥ १८० ॥

अथ शक्तिचालनमाह ।

(१) कुण्डल्येव भवेच्छक्तिस्तान्तु सञ्चालयेद्बुधः ॥ स्वस्थानादाभ्रुवोर्मध्यं शक्तिचालनमुच्यते ॥ १८१ ॥ तत्साधने द्वयं मुख्यं सरस्वत्यास्तु चालनम् ॥ प्राणरोधमथाभ्यासादृज्वी कुण्डलिनी भवेत् ॥१८२॥ तयोरादौ सरस्वत्याश्चलनं कथयामि ते ॥ अरुन्धत्येव कथिता पुराविद्भिस्सरस्वती ॥ १८३ ॥ तस्यास्सञ्चालनेनैव स्वयं चलति कुण्डली ॥ इडायां वहति प्राणे बद्ध्वा पद्मासनं दृढम् ॥ १८४ ॥ द्वादशाङ्गुलदैर्घ्यं च अंबरं चतुरङ्गुलम् ॥ विस्तीर्य तेन तन्नाडीं वेष्टयित्वा ततः

(१) योगकुण्डलिन्युपनिषद् अ० १ । श्लो० ७१३ । प०७४१। पृ० १ । प० २ ॥

सुधीः ॥ १८५ ॥ अङ्गुष्ठतर्जनीभ्यान्तु हस्ताभ्यां धारयेद्दृढम् ॥ स्वशक्त्या चालयेद्वामे दक्षिणेन पुनः पुनः ॥ मुहूर्त्तद्वय-पर्यन्तं निर्भयाच्चालयेत्सुधीः ॥ ऊर्ध्वमाकर्ष-येत्किञ्चित्सुषुम्नां कुण्डलीगताम् ॥ १८६ ॥

अथ प्रकारान्तरेण शक्तिचालनम् ।

(१) सति वज्रासने पादौ कराभ्यां धारये-द्दृढम् ॥ गुल्फदेशसमीपे च कन्दं तत्र प्रपी-ऽडयेत् ॥ १८७ ॥

(२) कुर्यादनन्तरं भस्त्रीं कुण्डलीमाशु बोधयेत् ॥ १८८ ॥

अथ षण्मुखीलक्षणम् ।

(३) स्वस्तिकासनमास्थाय समाहितमना-स्तथा ॥ अपानमूर्ध्वमुत्थाप्य प्रणवेन शनैश्शनैः ॥ १८९ ॥

---

(१) योगकुण्डलिन्युपनिषद् अ० १ । श्लो० ४८ । प० ७४३ । पृ० २ । पं० ५ ॥

(२) योगशिखोपनि० अ० १ । श्लो० ११४ । प० ६१३ । पृ० २ । पं० १ ॥

(३) श्रीजाबालदर्शन० ख० ६ । श्लो० ३२ । प० ७७७ । पृ० २ । पं० २ ॥

हस्ताभ्यां धारयेत्सम्यक् श्रोत्रादिकरणानि च ॥ अङ्गुष्ठाभ्यां मुने श्रोत्रे तर्जनीभ्यान्तु चक्षुषी ॥ १९० ॥ नासापुटाऽवधानाभ्यां प्रच्छाद्य करणानि वै ॥ आनन्दाऽऽविर्भवो यावत्तावन्मूर्धनि धारणात् ॥ १९१ ॥ प्राणः प्रयात्यनेनैव ब्रह्मरन्ध्रं महामुने ॥ ब्रह्मरन्ध्रं गते वायौ नादश्चोत्पद्यतेऽनघ ॥ १९२ ॥ शङ्खध्वनिनिभश्चादौ मध्ये मेघध्वनिर्यथा ॥ शिरोमध्यगते वायौ गिरिप्रस्रवणं यथा॥१९३॥ पश्चात्प्रीतो महाप्राज्ञस्साक्षादात्मोन्मुखो भवेत् ॥ पुनस्तज्ज्ञाननिष्पत्तिर्योगात्संसारनिह्नुतिः ॥ १९४ ॥

अथ वैष्णवीमुद्रालक्षणम् ।

(१) अन्तर्लक्ष्यं बहिर्दृष्टिर्निमेषोन्मेषवर्जिता ॥ एषा सा वैष्णवी मुद्रा सर्वतन्त्रेषु गोपिता ॥ १९५ ॥ अन्तर्लक्ष्यविलीनचित्तपवनो योगी सदा वर्त्तते दृष्ट्या निश्चल-

(१) शाण्डिल्योपनिषद् खं० ८ । श्लो० १४-१७ । प०५५० । पृ० २ । प० २ ॥

तारया बहिरधः पश्यन्न पश्यन्नपि ॥ मुद्रेयं खलु खेचरी भवति सा लक्ष्यैकताना शिवा शून्याऽशून्यविवर्जितं स्फुरति सा तत्त्वं पदं वैष्णवी ॥ १९६ ॥ अर्धोन्मीलितलोचनं स्थिरमना नासाऽग्रदत्तेक्षणश्चन्द्रार्कावपि लीनतामुपनयन्निष्यन्दभावोत्तरम् ॥ ज्योतीरूपमशेषबाह्यरहितं देदीप्यमानं परं तत्त्वं तत्परमस्ति वस्तुविषयं शाण्डिल्य विद्धीह तत् ॥ १९७ ॥

अथोन्मनीलक्षणम् ।

तारं ज्योतिषि संयोज्य किञ्चिदुन्नमयन्भ्रुवौ ॥ पूर्वाभ्यासस्य मार्गोऽयमुन्मनीकारकः क्षणात् ॥ १९८ ॥

अथ वैष्णवीमुद्राया विशेषलक्षणान्याह ।

(१)मूलाधारादारभ्य ब्रह्मरन्ध्रपर्यन्तं सुषुम्ना सूर्याभा तन्मध्ये तडित्कोटिसमा मृणालतन्तुसूक्ष्मा कुण्डलिनी तत्र तमोनिवृत्तिः ॥ तर्जन्यग्रोन्मीलितकर्णरन्ध्रद्वये फूत्कारशब्दो

(१) मण्डलब्राह्मणोपनिषद् ब्रा० १ । प० ४५७ । पृ० २। पं० ६॥

जायते ॥ तत्र स्थिते मनसि चक्षुर्मध्यनील-ज्योतिः पश्यति ॥ १९९ ॥

(१) आदावग्निमण्डलम् । तदुपरि सूर्यमण्डलम् ॥ तन्मध्ये सुधाचन्द्रमण्डलम् । तन्मध्येऽखण्डब्रह्मतेजोमण्डलम् ॥ तद्विद्युल्लेखावच्छुक्लभासुरम् ॥ २०० ॥

(२) जीवः पञ्चविंशकः स्वकल्पितचतुर्विंशतितत्त्वं परित्यज्य षड्विंशः परमात्माहमिति[१] ॥ २०१ ॥

अथ पञ्चव्योमलक्षणानि ।

(३) बाह्याभ्यन्तरमन्धकारमयमाकाशम् ॥ बाह्याभ्यन्तरे कालानलसदृशं पराकाशम् ॥ सबाह्याभ्यन्तरेऽपरिमितद्युतिनिभं तत्त्वं महाकाशम् ॥ सबाह्याभ्यन्तरे सूर्यनिभं सूर्याकाशम् ॥ अनिर्वचनीयज्योतिः सर्वव्यापक।निरतिश-

---

१—यत्पूर्वोक्तं विद्युल्लेखावच्छुक्लभास्वरं परमात्मस्वरूपं ब्रह्म तदेवाहमस्मीत्येवं लक्ष्यस्वरूपे मनसः स्थापनं कर्त्तव्यम् ।

(१–२–३) मण्डलब्राह्मणोपनिषद् ब्रा० २ । १ । ४ ।प०४५८। ४६२ । पृ० २ । १० पं० ९ । ८ ॥

यानन्दलक्षण परमाकाशम् ॥ एवं तत्तल्लक्ष्य-दर्शनात्तत्तद्रूपो भवति ॥ २०२ ॥

(१) बहिर्लक्ष्यन्तु नासाग्रे चतुष्षडष्टदश द्वादशाङ्गुलीभिः क्रमान्नीलद्युतिश्यामत्वसदृगरक्तभङ्गीस्फुरत्पीतशुक्लवर्णद्वयोपेतं व्योमत्वं पश्यति स तु योगी ॥ २०३ ॥

अथ ससाधनखेचरीमुद्रालक्षणम् ।

(२) कपालकुहरे जिह्वा प्रविष्टा विपरीतगा ॥
भ्रुवोरन्तर्गता दृष्टिर्मुद्रा भवति खेचरी ॥ २०४ ॥

(३) मेलनमनुः । ह्रीँ भँ सँ पँ फँ सँ क्षम् ॥ २०५ ॥

(४) तस्याष्षडङ्गं कुर्वीत तया षट्स्वरभिन्नया । कुर्यादेवं करन्यासं सर्वसिद्ध्यादिहेतवे ॥ २०६ ॥

---

(१) मण्डलब्राह्मणोपनिषद् ब्रा० १ । प०४५७ । पृ०२।पं०२ ॥
(२) योगचूडामण्युप० श्लो० ५२ । प०४४९ । पृ०१ । पं०२ ॥
(३-४) योगकुण्डलिन्युपनिषद् अ० ३ । प० ७४९ । ७४८ । ०१ । २ । पं० ८ । २ ॥

(१) य इमां पञ्चलक्षाणि जपेदपि सुयन्त्रितः ॥ तस्य श्रीखेचरीसिद्धिस्स्वयमेव प्रवर्त्तते ॥ २०७ ॥

(२) स्नुहीपत्रनिभं शस्त्रं सुतीक्ष्णं स्निग्धनिर्मलम् ॥ समादाय ततस्तेन रोममात्रं समुच्छिनेत् ॥२०८॥ हित्वा सैन्धवपथ्या[१]भ्यां चूर्णिताभ्यां प्रकर्षयेत ॥ पुनः सप्तदिने प्राप्ते रोममात्रं समुच्छिनेत् ॥ २०९ ॥ एवं क्रमेण षण्मासं नित्योद्युक्तस्समाचरेत् ॥ षाण्मासरसनामूलं शिराबद्धं प्रणश्यति ॥ २१० ॥ अथ वागीश्वरीधाम शिरोवस्त्रेण वेष्टयेत् ॥ शनैरुत्कर्षयेद्योगी कालवेलाविधानवित्२११॥ पुनष्षण्मासमात्रेण नित्यं सङ्घर्षणान्मुने ॥ भ्रूमध्याऽवधि चाऽप्येति तिर्यक्कर्णबिलाऽवधि ॥ २१२ ॥ अधश्च चिबुकं मूलं प्रयाति

१–सैन्धवहरीतकीभ्यां वा खदिरहरीतिकीभ्याम् । ग्रन्थान्तराद्बोद्धव्यम् ॥

(१–२) योगकुण्डलिन्युप० अ० २ । श्लो० २९–३७ । प० ५४७ । ५४८ । पृ० २ । १ । पं० ३ । २ ॥

क्रमचारिता ॥ पुनस्संवत्सराणान्तु तृतीया देवलीलया ॥ २१३ ॥ केशान्तमूर्ध्वं क्रमति तिर्यक्छाखावधिर्मुने ॥ अधस्तात्कण्ठकूपान्तं पुनर्वर्षत्रयेण तु ॥ २१४ ॥ ब्रह्मरन्ध्रं समावृत्य तिष्ठत्येव न संशयः ॥ तिर्यक् चूलितलं याति अधः कण्ठबिलाऽवधि ॥ शनैश्शनैर्मस्तकाच्च महावज्रकपाटभित् २१५॥ (१) अङ्गुल्यग्रेण सङ्घृष्य जिह्वामात्रं निवेशयेत् ॥ एवं वर्षत्रयं कृत्वा ब्रह्मद्वारं प्रविश्यति ॥ २१६ ॥

(२) स्वर्णजां रौप्यजां वापि लोहज वा शलाकिकाम् ॥ नियोज्य नासिकारन्ध्रं दुग्धसिक्तेन तन्तुना ॥ २१७ ॥ प्राणान्निरुध्य हृदय सुखमासनमात्मनः ॥ शनैस्सुमथनं कुर्याद्भ्रूमध्ये न्यस्य चक्षुषी ॥ २१८ ॥ षण्मासं मथनाऽवस्थाभावेनैव प्रजायते ॥ यथा सुषुप्तिर्बालानां यथा भावस्तथा भवेत् ॥ २१९ ॥ न सदा मथनं शस्त मासे

(१-२) योगकुण्डलिन्युपनिषद् अ० २ । श्लो० ४१ । ४४-४८ । प० ७४८ । ७४९ । पृ० २ । १ । पं० ७ । २ ॥

मासे समाचरेत् ॥ सदा रसनया योगी मार्गं न परिसंक्रमेत् ॥ २२० ॥ एवं द्वादशवर्षान्ते संसिद्धिर्भवति ध्रुवा ॥ २२१ ॥

(१) न रोगमरणं तस्य न निद्रा न क्षुधा तृषा ॥ न च मूर्च्छा भवेत्तस्य यो मुद्रां वेत्ति खेचरीम् ॥ २२२ ॥

अथ प्रत्याहारनिरूपणम् ।

(२) इन्द्रियाणां विचरतां विषयेषु स्वभावतः ॥ बलादाहरणं तेषां प्रत्याहारः स उच्यते ॥ २२३ ॥

(३) विषयेभ्य इन्द्रियार्थेभ्यो मनोनिरोधनम्प्रत्याहारः ॥ २२४ ॥

(४) शब्दादिविषयान्पञ्च मनश्चैवातिचञ्चलम् ॥ चिन्तयेदात्मनो रश्मीन्प्रत्याहारः स उच्यते ॥ २२५ ॥

---

(१) योगचूडामण्युपनिषद् श्लो० ५३।प०४४९।पृ०१।पं०३ ॥

(२) श्रीजाबालदर्शनोपनिषद् ख० ७ । श्लो० १ । २ । प० ७७८ । पृ० २ । पं० ८ ॥

(३) मण्डलब्राह्मणोपनि० ब्रा० १ । श्रु० १ । प० ४५६ । पृ० २ । पं० ८ ॥

(४) अमृतनादोप० श्लो० ५ । प० २२७ । पृ० २ । पं० २ ॥

(१) यद्यत्पश्यति चक्षुर्भ्यां तत्तदात्मेति भावयेत् ॥ यद्यच्छृणोति कर्णाभ्यां तत्तदात्मेति भावयेत् ॥ २२६ ॥ लभते नासया यद्यत्तत्तदात्मेति भावयेत् ॥ जिह्वया यद्रसं ह्यत्ति तत्तदात्मेति भावयेत् ॥ २२७ ॥ त्वचा यद्यत्स्पृशेद्योगी तत्तदात्मेति भावयेत् ॥ एवं ज्ञानेन्द्रियाणां तु तत्तत्सौख्यं तु साधयेत् ॥ २२८ ॥ याममात्रम्प्रतिदिनं योगी यत्नादतन्द्रितः ॥ यथा वा चित्तसामर्थ्यं जायते योगिनो ध्रुवम् ॥ २२९ ॥ दूरश्रुतिर्दूरदृष्टिः क्षणाद्दूरागमस्तथा ॥ वाक्सिद्धिः कामरूपत्वमदृश्यकरणी तथा ॥ २३० ॥ मलमूत्रादिलेपेन लोहादेः स्वर्णता भवेत् ॥ खे गतिस्तस्य जायेत सन्तताभ्यासयोगतः ॥ २३१ ॥ सदा बुद्धिमता भाव्यं योगिना योगसिद्धये ॥ एते विघ्ना महासिद्धेर्न रमेत्तेषु बुद्धिमान् ॥ २३२ ॥

---

(१) योगतत्त्वोप० श्लो० ६९–७५ । प० ३९१।पृ०१।पं०२ ॥

(१) पादाङ्गुष्ठगुल्फजङ्घाजानूरुपायुमेढ्र-नाभिहृदयकण्ठकूपतालुनासाऽक्षिभ्रूमध्यल-लाटमूर्धानः स्थानानि ॥ तेषु क्रमादारोहा-वरोहक्रमेण प्रत्याहरेत् ॥ २३३ ॥

अथ धारणलक्षणम् ।

(२) पादादि जानुपर्यन्तं पृथिवीस्थान-मुच्यते ॥ पृथिवीचतुरस्रञ्च पीतवर्णं लव-र्णकम् ॥ २३४ ॥ पार्थिवे वायुमारोप्य लकारेण समन्वितम् ॥ ध्यायंश्चतुर्भुजाकारं चतुर्वक्त्रं हिरण्मयम् ॥ २३५ ॥ धारयेत्पञ्च घटिकाः पृथिवीजयमाप्नुयात् ॥ पृथिवी-योगतो मृत्युर्न भवेत्तस्य योगिनः ॥ २३६ ॥ आजानोः पायुपर्यन्तमपां स्थानं प्रकीर्त्ति-तम् ॥ आपोऽर्धचन्द्रं शुक्लञ्च वंबीजं परि-कीर्त्तितम् ॥ २३७ ॥

(१) शाण्डिल्योपनिषद् खं० १० । प० ५५५ । पृ० १।पं०६॥
(२) योगतत्त्वोपनि० श्लो० ८४-१०३।प०२९२।पृ०१।पं०३ ॥

वारुणे वायुमारोप्य वकारेण समन्वितम् ॥ स्मरन्नारायणं देवं चतुर्बाहुं किरीटिनम् ॥ ॥ २३८ ॥ शुद्धस्फटिकसंकाशं पीतवाससमच्युतम् ॥ धारयेत्पञ्चघटिकाः सर्वपापैः प्रमुच्यते ॥ ततो जलाद्भयं नास्ति जले मृत्युर्न विद्यते ॥ २३९ ॥ आपायोर्हृदयान्तं च वह्निस्थानं प्रकीर्तितम् ॥ वह्निस्त्रिकोणं रक्तं च रेफाक्षरसमुद्भवम् ॥ २४० ॥ वह्नौ चानिलमारोप्य रेफाक्षरसमुज्ज्वलम् ॥ त्र्यक्षं च वरदं रुद्रं तरुणादित्यसन्निभम् ॥ ॥ २४१ ॥ भस्मोद्धूलितसर्वाङ्गं सुप्रसन्नमनुस्मरन् ॥ धारयेत्पञ्चघटिका वह्निनाऽसौ न दाह्यते ॥ न दह्यते शरीरं च प्रविष्टस्याग्निमण्डले ॥ २४२ ॥ आहृदयाद् भ्रुवोर्मध्यं वायुस्थानम्प्रकीर्त्तितम् ॥ वायुः षट्कोणकं कृष्णं यकाराक्षरभासुरम् ॥ २४३ ॥ मारुतं मारुतस्थाने यकाराक्षरभासुरम् ॥ धारयेत्तत्र सर्वज्ञमीश्वरं विश्वतोमुखम् ॥ २४४ ॥ धारयेत्पञ्च घटिका वायुवद्व्योमगो भवेत्॥

मरणं न तु वायोस्तु भयम्भवति योगिनः ॥
॥ २४५ ॥ आभ्रूमध्यात्तु मूर्धान्तमाकाश-
स्थानमुच्यते ॥ व्योम वृत्तं च धूम्रं च हका-
राक्षरभासुरम् ॥ २४६ ॥ आकाशे वायुमा-
रोप्य हकारोपरि शङ्करम् ॥ बिन्दुरूपं महा-
देवं व्योमाकारं सदाशिवम् ॥ २४७ ॥
शुद्धस्फटिकसंकाशं धृतबालेन्दुमौलिनम् ॥
पञ्चवक्त्रयुतं सौम्यं दशबाहुं त्रिलोचनम् ॥
॥ २४८ ॥ सर्वायुधैर्धृताकारं सर्वभूषणभूषि-
तम् ॥ उमार्धदेहं वरदं सर्वकारणकारणम् ॥
॥ २४९ ॥ आकाशधारणात्तस्य खेचरत्व-
म्भवेद्ध्रुवम् ॥ यत्र कुत्र स्थितो वापि सुखमत्य-
न्तमश्नुते ॥ २५० ॥ एवञ्च धारणाः पञ्च
कुर्याद्योगी विचक्षणः ॥ ततो दृढशरीरः
स्यान्मृतिस्तस्य न विद्यते ॥ ब्रह्मणः प्रलये-
नाऽपि न सीदति महामतिः ॥ २५१ ॥
(१) विषयव्यावर्त्तनपूर्वकं चैतन्ये चेत-
स्स्थापनं धारणं भवति ॥ २५२ ॥

(१) मण्डलब्राह्मणोपनिषद् ब्रा० १ । खं० १ । प० ४५६ । पृ० २ । पं० ९ ॥

(१) इन्द्रियाणि मनो हृत्य मनसात्मनि योजयेत् ॥ २५३ ॥

(२) यत्रोपरमते चित्तं निरुद्धं योगसेवया ॥ तत्र चैवाऽऽत्मनाऽऽत्मानं पश्यन्नात्मनि तुष्यति ॥ २५४ ॥

अथ साङ्गसगुणध्याननिरूपणम् ।

(३) वद्ध्वा योगासनम्पूर्वं हृद्देशे हृदयाञ्जलिः ॥ नासाग्रन्यस्तनयनो जिह्वां कृत्वा च तालुनि ॥ २५५ ॥ दन्तैर्दन्तानसंस्पृश्य ऊर्ध्वकायः समाहितः ॥ संयमेच्चेन्द्रियग्राममात्मबुद्ध्या विशुद्धया ॥ २५६ ॥

(४) समभ्यसेत्तथा ध्यानं घटिकाषष्टिमेव च ॥ वायुन्निरुध्य चाकाशे देवतामिष्टदामिति ॥ २५७ ॥

---

(१) श्रीजावालदर्शनोप० खं० ६ । श्लो० । प० ७१० । पृ० १ । पं० ७ ॥

(२) योगशिखोपनिषद् अ० ३ । श्लो० १४ । प० ६२० । पृ० १ । प० ४ ॥

(३) त्रिशिखीब्राह्मणोपनिषद् श्लो० १४४ । १४५ । १४६ । प० ४४० । पृ० २ । पं० २ ॥

(४) योगतत्त्वोपनिषद् श्लो० १०४ । प०३९३ । पृ०१।पं०७॥

(१) अब्जपत्रमधः पुष्पमूर्ध्वनालमधोमुखम् ॥ कदलीपुष्पसंकाशं सर्वदेवमयं शिवम् ॥ २५८ ॥ शतारं शतपत्राढ्यं विप्रकीर्णाम्बुकर्णिकम् ॥ तत्रार्कचन्द्रवह्नीनामुपर्य्युपरि चिन्तयेत् ॥ पद्मस्योद्घाटनं कृत्वा बोधचन्द्राग्निसूर्यकम् ॥ २५९ ॥

(२) हृत्पुण्डरीकं विरजं विशुद्धं विचिन्त्य मध्ये विशदं विशोकम् ॥ अचिन्त्यमव्यक्तमनन्तरूपं शिवं प्रशान्तममृतं ब्रह्मयोनिम् ॥ २६० ॥ तमादिमध्यान्तविहीनमेकं विभुं चिदानन्दमरूपमद्भुतम् ॥ उमासहायम्परमेश्वरम्प्रभुं त्रिलोचनं नीलकण्ठं प्रशान्तम् ॥ २६१ ॥

(३) स्फटिकरजतवर्णम्मौक्तिकीमक्षमालाममृतकलशविद्यां ज्ञानमुद्रां कराग्रे ॥ दधतमुर-

---

(१) ध्यानबिन्दूपनि० श्लो० ३३ । ३४ । ३५ । प० ३७३ । पृ० १ । पं० ७ ॥

(२) कैवल्योपनिषद् श्लो० ४ । ५ । ६ । प० १९० । पृ० १ । पं० ४ ॥

(३) दक्षिणामूर्त्युप० प० ४६४ । पृ० १ । पं० १ ॥

गकक्ष्यं चन्द्रचूडं त्रिनेत्रं विधृतविविधभूषं दक्षिणामूर्त्तिमीडे ॥ २६२ ॥

अथवा विष्णुध्यानम् ।

(१) अष्टपत्रं विकसितं हृत्पद्मं तत्र संस्थितम् ॥ दिव्यध्वजाऽऽतपत्रैस्तु चिह्नितं चरणद्वयम् ॥ २६३ ॥ श्रीवत्सलाञ्छनं हृत्स्थं कौस्तुभं प्रभया युतम् ॥ चतुर्भुजं शङ्खचक्रशार्ङ्गपद्मगदाऽन्वितम् ॥ २६४ ॥ सुकेयूरान्वितं बाहुं कण्ठमालासुशोभितम् ॥ द्युमत्किरीटमभयं स्फुरन्मकरकुण्डलम् ॥ २६५ ॥ हिरण्मयं सौम्यतनुं स्वभक्तायाऽभयप्रदम् ॥ ध्यायेन्मनसि मां नित्यं वेणुशृङ्गधरन्तु वा ॥ २६६ ॥

(२) सगुणं ध्यानमेतत्स्यादणिमादिगुणप्रदम् ॥ २६७ ॥

---

(१) गोपालोत्तरतापिन्युप० श्लो० १५-१९ । प० ८०० । पृ० २ । पं० ६ ।

(२) योगतत्त्वोप० श्लो० १०५ । प० ३९३ । पृ० १ । पं० ८ ॥

अथ निर्गुणध्याननिरूपणम् ।

(१) निर्गुणमात्मयाथात्म्यम् ॥ २६८ ॥

(२) हृत्पुण्डरीकमध्ये तु भावयेत्परमेश्वरम् ॥ साक्षिणं बुद्धिवृत्तस्य परमप्रेमगोचरम् ॥ २६९ ॥ अगोचरं मनोवाचामवधूतादिसंप्लवम् ॥ सत्तामात्रप्रकाशैकप्रकाशं भावनातिगम् ॥ २७० ॥ अहेयमनुपादेयमसामान्यविशेषणम् ॥ ध्रुवं स्तिमितिगम्भीरं न तेजो न तमस्ततम् ॥२७१॥ निर्विकल्पं निराभासं निर्वाणमयसंविदम् ॥ ॥ २७२ ॥ नित्यः शुद्धो बुद्धमुक्तस्वभावः सत्यः सूक्ष्मः संविभुश्चाद्वितीयः ॥ आनन्दाब्धिर्यः परः सोऽहमस्मि प्रत्यग्धातुर्नात्र संशीतिरस्ति ॥ २७३ ॥

(३) सर्वभूतेषु चैतन्यैकताानताध्यानम् ॥ २७४ ॥

---

(१) शाण्डिल्योप० अ० १ प० ५५५ । पृ० २ । पं० १ ॥

(२) मैत्रायण्युप० प्र० १ । श्लो० ८–११ । प० ३०६ । पृ० १ । प० ४ ॥

(३) मण्डलब्रा० १ । श्लो० ८ । प० ४५६ । पृ० २ । पं०९ ॥

(१) अङ्गुष्ठमात्रमात्मानमधूमज्ज्योतिरुत्तमम् ॥ प्रकाशयन्तमन्तस्थं ध्याये कूटस्थमव्ययम् ॥ २७५ ॥

(२) निर्गुणध्यानयुक्तस्य समाधिश्च ततो भवेत् ॥ २७६ ॥

अथ समाधिलक्षणम् ।

दिनद्वादशकेनैव समाधिं समवाप्नुयात् ॥ वायुन्निरुध्य मेधावी जीवन्मुक्तो भवत्ययम् ॥ समाधिः समतावस्था जीवात्मपरमात्मनोः ॥ २७७ ॥

(३) जीवात्मपरमात्मैक्यावस्था त्रिपुटीरहिता शुद्धचैतन्यात्मिका भवति ॥ २७८ ॥

अथ समाधिभेदानाह ।

(४) अस्ति भाति प्रियं रूपं नाम चेत्यंशपञ्चकम् ॥ आद्यं त्रयं ब्रह्मरूपं जगद्रूपं ततो द्वयम् २७९

---

(१) योगकुण्डलिन्युप० श्लो० २६ । प० ७५१ । पृ० १। पं० ३ ॥
(२) योगतत्त्वोप० श्लो० १०५ । प० ३९३ । पृ० १ । प० ९॥
(३) शाण्डिल्योपनि० अ० १। खं० १२। प० ५५५। पृ० २। पं० २॥
(४) सरस्वतीरहस्योप० श्लो० २२–३१ । प० ८५२ । पृ० २ । पं० ६ ॥

अपेक्ष्य नामरूपे द्वे सच्चिदानन्दतत्परः ॥ समाधिं सर्वदा कुर्य्याद्धृदये वाऽथ वा बहिः ॥ २८० ॥ सविकल्पो निर्विकल्पः समाधिर्द्विविधो हृदि ॥ दृश्यशब्दानुभेदेन सविकल्पः पुनर्द्विधा ॥ २८१ ॥ कामाद्याश्चित्तगा दृश्यास्तत्साक्षित्वेन चेतनम् ॥ ध्यायेदृश्यानुविद्धोऽयं समाधिः सविकल्पकः ॥ ॥ २८२ ॥ असङ्गसच्चिदानन्दः स्वप्रभो द्वैतवर्जितः ॥ अस्मीति शब्दविद्धोऽयं समाधिः सविकल्पकः ॥ २८३ ॥ स्वानुभूतिरसावेशाद्दृश्यशब्दाद्यपेक्षितुः॥ निर्विकल्पः समाधिः स्यान्निवातस्थितदीपवत् ॥ २८४ ॥ हृदीव बाह्यदेशेऽपि यस्मिन्कस्मिंश्च वस्तुनि ॥ समाधिराद्यसन्मात्रान्नामरूपपृथक्कृतिः ॥ ॥२८५ ॥ स्तब्धीभावो रसाऽऽस्वादात्तृतीयः पूर्ववन्मतः ॥ एतैस्समाधिभिष्षड्भिर्नयेत्कालं निरन्तरम् ॥ २८६ ॥

(१) अङ्गुष्ठमात्रमात्मानमधुमज्ज्योतिरुत्तमम् ॥ प्रकाशयन्तमन्तस्थं ध्याये कूटस्थमव्ययम् ॥ २७५ ॥

(२) निर्गुणध्यानयुक्तस्य समाधिश्च ततो भवेत् ॥ २७६ ॥

अथ समाधिलक्षणम् ।

दिनद्वादशकेनैव समाधिं समवाप्नुयात् ॥ वायुन्निरुध्य मेधावी जीवन्मुक्तो भवत्ययम् ॥ समाधिः समतावस्था जीवात्मपरमात्मनोः ॥ २७७ ॥

(३) जीवात्मपरमात्मैक्यावस्था त्रिपुटीरहिता शुद्धचैतन्यात्मिका भवति ॥ २७८ ॥

अथ समाधिभेदानाह ।

(४) अस्ति भाति प्रियं रूपं नाम चेत्यंशपञ्चकम्॥आद्यं त्रयं ब्रह्मरूपं जगद्रूपं ततो द्वयम् २७९

(१) योगकुण्डलिन्युप० श्लो० २६ । प०७५१ । पृ०१।पं०३॥
(२) योगतत्त्वोप० श्लो० १०५ । प० ३९३ । पृ० १ । पं०९॥
(३) शाण्डिल्योपनि० अ० १।खं० १२।प०५५५।पृ०२।पं०२॥
(४) सरस्वतीरहस्योप० श्लो० २२–३१ । प० ८५२ । पृ० २ । पं० ६ ॥

अपेक्ष्य नामरूपे द्वे सच्चिदानन्दतत्परः ॥ समाधिं सर्वदा कुर्य्याद्धृदये वाऽथ वा बहिः ॥ २८० ॥ सविकल्पो निर्विकल्पः समाधिर्द्विविधो हृदि ॥ दृश्यशब्दानुभेदेन सविकल्पः पुनर्द्विधा ॥ २८१ ॥ कामाद्याश्चित्तगा दृश्यास्तत्साक्षित्वेन चेतनम् ॥ ध्यायेद्दृश्यानुविद्धोऽयं समाधिः सविकल्पकः ॥ ॥ २८२ ॥ असङ्गसच्चिदानन्दः स्वप्रभो द्वैतवर्जितः ॥ अस्मीति शब्दविद्धोऽयं समाधिः सविकल्पकः ॥ २८३ ॥ स्वानुभूतिरसावेशाद्दृश्यशब्दाद्यपेक्षितुः॥ निर्विकल्पः समाधिः स्यान्निवातस्थितदीपवत् ॥ २८४ ॥ हृदीव बाह्यदेशेऽपि यस्मिन्कस्मिंश्च वस्तुनि ॥ समाधिराद्यसन्मात्रान्नामरूपपृथक्कृतिः ॥ ॥२८५ ॥ स्तब्धीभावो रसाऽऽस्वादात्तृतीयः पूर्ववन्मतः ॥ एतैस्समाधिभिष्षड्भिर्नयेत्कालं निरन्तरम् ॥ २८६ ॥

(१) सलिले सैन्धवं यद्वत्साम्यं भवति योगतः ॥ तथाऽऽत्ममनसोरैक्यं समाधिरभिधीयते ॥ २८७ ॥ यदा सङ्क्षीयते प्राणो मानसं च प्रलीयते ॥ तदा समरसत्वं यत्समाधिरभिधीयते ॥ २८८ ॥ यत्समत्वं तयोरत्र जीवाऽऽत्मपरमाऽऽत्मनोः ॥ समस्तनष्टसङ्कल्पस्समाधिरभिधीयते ॥ २८९ ॥ प्रभाशून्यं मनश्शून्यं बुद्धिशून्यं निरामयम् ॥ सर्वशून्यं निराभासं समाधिरभिधीयते ॥ ॥ २९० ॥ स्वयमुच्चलिते देहे देही नित्यसमाधिना ॥ निश्चलं तं विजानीयात्समाधिरभिधीयते ॥ २९१ ॥ यत्रयत्र मनो याति तत्रतत्र परं पदम् ॥ तत्रतत्र परं ब्रह्म सर्वत्र समवस्थितम् ॥ २९२ ॥

(२) निर्विकल्पे स्थितो विद्वान्भूयो नाऽप्यनुशोचति ॥ २९३ ॥

---

(१) सौभाग्यलक्ष्म्युपनि० श्लो० १४-१९ । प० ८४७ । पृ० १ । पं० १ ॥

(२) सौभाग्यलक्ष्म्युपनिषद् । श्लो० १३ । प० ८४७ । पृ० १ । प० १ ॥

(१) भिद्यतेहृदयग्रन्थिश्छिद्यन्ते सर्वसंशयाः ॥ क्षीयन्ते चास्य कर्माणि तस्मिन्दृष्टे परावरे ॥ २९४ ॥

अथ ज्ञानयोगलक्षणम् ।

(२) यत्तु चित्तस्य सततमर्थे श्रेयसि बन्धनम् ॥ ज्ञानयोगः स विज्ञेयः सर्वसिद्धिकरः शिवः ॥ २९५ ॥

अथ ज्ञानयोगाङ्गलक्षणानि ।

(३) सर्वं ब्रह्मेति वै ज्ञानादिन्द्रियग्रामसंयमः ॥ यमोऽयमिति संप्रोक्तोऽभ्यसनीयो मुहुर्मुहुः ॥ २९६ ॥ सजातीयप्रवाहश्च विजातीयतिरस्कृतिः ॥ नियमो हि परानन्दो नियमात्क्रियते बुधैः ॥ २९७ ॥ त्यागो हि महता पूज्यः सद्यो मोक्षप्रदायकः ॥ यस्माद्वाचो निवर्तन्ते अप्राप्य मनसा सह ॥२९८॥

---

(१) सरस्वतीरहस्योपनिषद्० श्लो० ३२ । प० ८५३ । पृ० १ । प० ८ ॥

(२) त्रिशिखीब्राह्म० श्लो० २६ । प० ४३३ । पृ०१ । पं०२ ॥

(३) तेजोबिन्दूप० अ० १ । श्लो० १७–४९ । प० ३३८ । पृ० २ । पं० ३ ॥

यन्मौनं योगिभिर्गम्यं तद्भजेत्सर्वदा बुधः ॥ वाचो यस्मान्निवर्तन्ते तद्वक्तुं केन शक्यते ॥ ॥ २९९ ॥ प्रपञ्चो यदि वक्तव्यः सोऽपि शब्द-विवर्जितः ॥ इति वा तद्भवेन्मौनं सर्वं सहज-संज्ञितम् ॥ गिरां मौनं तु वालानामयुक्तं ब्रह्मवादिनाम् ॥ ३०० ॥ आदावन्ते च मध्ये च जनो यस्मिन्न विद्यते ॥ येनेदं सततं व्याप्तं स देशो विजनः स्मृतः ॥ ३०१ ॥ कल्पना सर्वभूतानां ब्रह्मादीनां निमेषतः ॥ कालशब्देन निर्दिष्टं ह्यखण्डानन्दमद्वयम् ॥ ॥ ३०२ ॥ सुखेनैव भवेद्यस्मिन्नजस्रं ब्रह्म-चिन्तनम् ॥ आसनं तद्विजानीयादन्य-त्सुखविनाशनम् ॥ ३०३ ॥ सिद्धये सर्व-भूतादिविश्वाधिष्ठानमद्वयम् ॥ यस्मिन्सिद्धिं गताः सिद्धास्तत्सिद्धासनमुच्यते ॥ ३०४ ॥ यन्मूलं सर्वलोकानां यन्मूलं चित्तबन्धनम् ॥ मूलबन्धः सदा सेव्यो योग्योऽसौ ब्रह्मवा-दिनाम् ॥ ३०५ ॥ अङ्गानां समता विद्या-त्समब्रह्मणि लीयते ॥ नो चेन्नैव समानत्व-

मृजुत्वं शुष्कवृक्षवत् ॥ ३०६ ॥ दृष्टिं ज्ञान-
मयीं कृत्वा पश्येद्ब्रह्ममयं जगत् ॥ सा
दृष्टिः परमोदारा न नासाग्रावलोकिनी ॥
॥ ३०७ ॥ द्रष्टृदर्शनदृश्यानां विरामो यत्र
वा भवेत् ॥ दृष्टिस्तत्रैव कर्त्तव्या न नासा-
ग्रावलोकिनी ॥ ३०८ ॥ चिन्तादिसर्वभा-
वेषु ब्रह्मत्वेनैव भावनात् ॥ निरोधः सर्व-
वृत्तीनां प्राणायामः स उच्यते ॥ ३०९ ॥
निषेधनं प्रपञ्चस्य रेचकाख्यः समीरितः ॥
ब्रह्मैवास्मीति या वृत्तिः पूरको वायुरुच्यते ॥
॥ ३१० ॥ ततस्तद्वृत्तिनैश्चल्यं कुम्भकः
प्राणसंयमः ॥ अयं चापि प्रबुद्धानामज्ञानां
घ्राणपीडनम् ॥ ३११ ॥ विषयेष्वात्मतां
दृष्ट्वा मनसश्चित्तरञ्जकम् ॥ प्रत्याहारः स
विज्ञेयोऽभ्यसनीयो मुहुर्मुहुः ॥ ३१२ ॥
यत्रयत्र मनो याति ब्रह्मणस्तत्र दर्शनात् ॥
मनसा धारणं चैव धारणा सा परा मता ॥
॥ ३१३ ॥ ब्रह्मैवास्मीति सद्वृत्त्या निरालं-
म्बतया स्थितिः ॥ ध्यानशब्देन विख्यातः

परमानन्ददायकः ॥ ३१४ ॥ निर्विकार-
तया वृत्त्या ब्रह्माकारतया पुनः ॥ वृत्तिवि-
स्मरणं सम्यक् समाधिरभिधीयते ॥ ३१५ ॥
इमं चाकृत्रिमानन्दं तावत्साधु समभ्यसेत् ॥
लक्ष्यो यावत्क्षणात्पुंसः प्रत्यक्त्वं संभवे-
त्स्वयम् ॥ ३१६ ॥ ततः साधननिर्मुक्तः
सिद्धो भवति योगिराट् ॥ तत्स्वं रूपं भवे-
त्तस्य विषयो मनसा गिराम् ॥ ३१७ ॥
समाधौ क्रियमाणे तु विघ्नान्यायान्ति वै
बलात् ॥ अनुसंधानराहित्यमालस्यं भोग-
लालसम् ॥ ३१८ ॥ लयस्तमश्च विक्षेप-
स्तेजः स्वेदश्च शून्यता ॥ एवं हि विघ्नबा-
हुल्यं त्याज्यं ब्रह्मविशारदैः ॥ ३१९ ॥ भाव-
वृत्त्या हि भावत्वं शून्यवृत्त्या हि शून्यता ॥
ब्रह्मवृत्त्या हि पूर्णत्वं तया पूर्णत्वमभ्यसेत्॥
॥ ३२० ॥ ये हि वृत्तिं विहायैनां ब्रह्माख्यां
पावनीं पराम् ॥ वृथैव ते तु जीवन्ति पशु-
भिश्च समा नराः ॥ ३२१ ॥ ये तु वृत्तिं
विजानन्ति ज्ञात्वा वै वर्धयन्ति ये ॥ ते वै

सत्पुरुषा धन्या वन्द्यास्ते भुवनत्रये ॥३२२॥ येषां वृत्तिः समा वृद्धा परिपक्का च सा पुनः ॥ ते वै सद्ब्रह्मतां प्राप्ता नेतरे शब्द-वादिनः ॥ ३२३ ॥ निमिषार्द्धं न तिष्ठन्ति वृत्तिं ब्रह्ममयीं विना ॥ यथा तिष्ठन्ति ब्रह्माद्याः सनकाद्याः शुकादयः ॥ ३२४ ॥ कारणं यस्य वै कार्यं कारणं तस्य जायते ॥ कारणं तत्त्वतो नश्येत्कार्याभावे विचा-रतः ॥ ३२५ ॥ अथ शुद्धं भवेद्वस्तु यद्वै वाचामगोचरम् ॥ उदेति शुद्धचित्तानां वृत्तिज्ञानं ततः परम् ॥ ३२६ ॥

(१) पुङ्खाऽनुपुङ्खविषये क्षणतत्परोऽपि ब्रह्माऽवलोकनधियं न जहाति योगी ॥ सङ्गीततालवाद्यवशङ्गताऽपि मौलिस्थ-कुम्भपारिरक्षणधीर्नटीव ॥ ३२७ ॥

(१) वाराहोपनिषत् अ० २ । श्लो० ८१ । प० ८१६ । पृ० १ । पं० ९ ॥

यथा[1] सतः[2] पुरुषात्[3] केशलोमानि तथाऽक्षरात्[4] सम्भवतीह विश्वम् ॥ २ ॥

(१) यथा[5] सुदीप्तात्पावकाद्विस्फुलिङ्गाः[6]
सहस्रशः प्रभवन्ते सरूपाः[7] ।
तथाऽक्षराद्विविधाः सोम्यभावाः[8]
प्रजायन्ते तत्र चैवाऽपियन्ति[9] ॥ ३ ॥

१-ननु भवत्वचेतनायाः पृथिव्या अचेतनानामोषधीनामुत्पत्तिः चेतनाद्ब्रह्मणः कथञ्जडकार्यस्योत्पत्तिरिति शङ्कानिरासाय दृष्टान्तान्तरमाह-सत इति-जीवतः ॥ २-चेतनत्वेन प्रसिद्धान्तरात् ॥ ३-केशलोमानि सम्भवन्तीत्यनुषङ्गः ॥ ४-न क्षरति न नश्यति इत्यक्षरः अविनाशी-ब्रह्मेत्यर्थः ॥ ५-अथ ब्रह्मणः सरूपत्वेनाऽपरोक्षत्वेन जीवरूपत्वेन यज्जननं तत्र दृष्टान्तमाह-यथा सुदीप्तादिति ॥ ६-अग्निकणाः॥ ७-ज्योतिष्ट्वेन सदृशरूपाः ॥ ८-अग्निकणा इव कारणरूपा एव जीवादयो जायन्ते ॥ ९-लीयन्ते, तत्रैव नीरतरङ्गयोरिव भेदानुभवो भ्रम इति परमानिष्कर्षः ॥

---

(१) मुण्डकोपनिषद् मु० २ । खं० १ । पत्र० २२ । पृ० १ । पं० १ ॥

भृगुवारे च संगृह्य द्रव्याण्येतानि पुत्रक।
हरिद्रां पङ्कजं चैव कस्तूरीं च मृगाङ्कम्।।
श्रीखण्डं चाऽगुरुं चैव रोचनां कुसुमं समम्।
मर्दयेत् शीतलेनैव जलेनैव कुमारक।।
तेन कुर्यात् पुत्तलीं च चतुरङ्गुलमानतः।
सदा च सुन्दरीं देवीं द्विभुजां बगलामुखीम्।।
हस्ते वज्रधरां देवीं पानपात्रं च विभ्रतीम्।
पीतवर्णा मदाऽऽघूर्णामर्धचन्द्रां च पुत्तलीम्।।
प्राणप्रतिष्ठां कुर्याद् वै संस्थाप्य विधिनाऽर्भक्।
अखण्डतण्डुलेनैव हरिद्राऽक्षतमेव च।।
कृत्वा चैकाक्षरीमन्त्रैरक्षतान् मूर्ध्नि निःक्षिपेत्।
प्रत्यहं युग्मपूजां च कुर्याच्चैव विचक्षणः।।
एवं कृत्वा तत्त्वलक्षं देवीप्रत्यक्षमाप्नुयात्।
यस्मै कस्मै न दातव्यं न वक्तव्यं कदाचन।।
एवं पूजाविधिं कृत्वा दुर्वासा मुनिराट् पुरा।
तत्त्वलक्षप्रकारेण ग्रन्थोक्तं फलमाप्नुयात्।।

।। इति सांख्यायने चतुर्विंशतिः पटलः।।

९. योगविधिवर्णनम्

योगशास्त्रस्य चित्तवृत्तिनिरोधपर्यवसितत्वात् अस्मिन्नेवाऽर्थे पतञ्जलिना सूत्रितत्वाच्च "योगश्चित्तवृत्तिनिरोधः" इति चित्तवृत्तीनां निरुद्धे सत्येव योगसिद्धेः। प्रकृतोपयोगिमन्त्रसाधने योगस्य करणत्वमवेक्ष्य किञ्चित् प्रस्तूयते। यतश्चित्तैकाग्र्यमापन्ने मन्त्रार्थसाक्षात्कारः। आदौ – अहिंसा-सत्यमस्तेयब्रह्मचर्याऽपरिग्रहशौचसन्तोषाऽऽदियमनियमान् अनुतिष्ठन् साधको जपादि कुर्वन्नासनमनुतिष्ठेत् –

आसनं च योगार्णवे

ततो गुह्ये वामपादपार्ष्णिं तु विनियोजयेत्।
तस्योपरि महादेवि दक्षपार्ष्णि निवेशयेत्।।
ऋजुकायशिरोग्रीवः काकचञ्चुपुटेन च।
अकारेण बहिर्वायुं जठरे परिपूरयेत्।।
अङ्गुलीभिर्दृढं बध्वा करणानि समाहितः।
अङ्गुष्ठाभ्यामुभे श्रोत्रे तर्जनीभ्यां विलोचने।।
नासारन्ध्रेमध्यमाभ्यामन्याभिर्वदनं दृढम्।
बध्वा मे प्राणमनसामेकत्वं तन्मनुं स्मरन्।।
धारयेन् मारुतं सम्यग् योगोऽयं योगिवल्लभः।

योनिमुद्रा

इयं मुद्रा जपविधावपि कर्तव्या। ततः सिद्धासने उपविश्य प्राणायाममाचरेत्। यतो मनसो निरोधः प्राणाधीनत्वात्। हृदयमारभ्य नासाद्वारपर्यन्तं प्राणगतिः। अधोभागे अपानः, नाभिमण्डले समानः, कण्ठदेशे उदानः, सर्वशरीरवृत्तिः व्यानः। वामे यदा प्रवहति, तदा शीतांशुः, दक्षिणे भास्करः, साम्ये अग्निः। तद्गतिमूलास्तिस्रो नाड्यः। इडा पिङ्गला सुषुम्णेति प्रसिद्धाः। एतास्वेव योगः प्रवर्तते। नाडीत्रयेऽपि सुषुम्णैव मुख्या तन्मध्ये चित्रा नाडी, तन्मध्ये पञ्चभूताऽधिदेवता, ब्रह्म विष्णु रुद्रेश्वरसदाशिवसंज्ञकाः। चित्रायामेव षट्चक्राणां चिन्तनं योगिनः कुर्वन्ति। उक्तं च –

सुषुम्णा संनिविष्टा च तन्मध्ये चित्ररूपिणी।
तत्रैव ग्रथितं पद्ममूलादि पञ्च पद्मकम्।।
मूलद्वारं समाऽऽच्छाद्य स्थिता नागस्वरूपिणी।
वायुना भिद्यते मुक्तं दृढं चित्रा नयेत् ततः।। इत्यादि

मूलाऽऽधारे त्वगादिधातुवेष्टितं चतुर्दलं पाण्डुरवर्णं पद्मं, तत्कर्णिकामध्ये योनिः, तन्मध्ये सकलप्रपञ्चनिमित्तोपादानभूता कुण्डलिनी चिन्मयी शक्तिः। त्रिगुणिताऽऽदिरूपेण सूर्येन्दुवैश्वानराणां मूलभूता भ्रमति, या त्रिकोणमुत्थिता सुषुम्णा नाम नाडी वीणादण्डाख्यस्य पृष्ठवंशस्य पुरोभागमवलम्ब्य ब्रह्मरन्ध्रपर्यन्तमूर्ध्वाऽऽकारा तिष्ठति, प्राणायामस्य दृढतराऽभ्यासेन सा जागर्ति, यतोऽविद्यया निद्रिता, तेन सर्पाऽऽकृतिं परित्यज्य सुषुम्णामार्गेण ऊर्ध्वमुत्क्रामति, आधारात् स्वाधिष्ठानं ततो मणिपूरं ततोऽनाहतं, ततो विशुद्धं, ततः आज्ञां ततः सहस्रारं प्राप्य परमशिवे लीयते, मन्त्रविज्ञाने नादरूपा वर्णमयीति द्विधा स्मर्यते। मन्त्रार्थं मन्त्रचैतन्यं च तदैव सम्पद्यते, चक्राणां विशेषविवरणमुपरिष्टाद् वक्ष्यामः। अष्टकुम्भकमभ्यस्य मूलबन्धमुड्डीयानं जालंधराख्यं बन्धत्रयं सम्पाद्य प्राणान् नियन्तुं हठाऽभ्यासिनां प्रसस्तोपायः। प्रच्छर्दनविधारणाभ्यां वा प्राणस्येति सूत्रितत्वाच्च। ततः धारणासु च योग्यता मनसः। ततः **"क्षीयते प्रकाशाऽऽवरणम्"** इत्यादि सूत्रैः प्रत्यपादयन् माहात्म्यं प्राणानिरोधस्य। एवमनुष्ठिते विक्षेपाऽभावस्ततो देशबन्धश्चित्तस्य, धारणेति धारणाऽभ्यासः प्रवर्तते, बाह्ये आभ्यन्तरे च तद्विषयः। बाह्ये स्फुटः आभ्यन्तरे शाम्भवी-आदिमुद्राभिः।

"अन्तर्लक्ष्यो बहिर्दृष्टिर्निमेषोन्मेषवर्जितः"।
एषा हि शाम्भवी मुद्रा सर्वतन्त्रेषु गोपिता।।

तथा –

त्यजेत् शैथिल्यमङ्गानां नासाग्रे रोपयेद् दृशौ।
मुखं विवृणुयात् किञ्चिद् दन्तैर्दन्तान् न च स्पृशेत्।।
रसनामन्तरा कुर्याद् अनङ्गे धारयेन् मनः।
इयं सा परमा मुद्रा निरालम्बेति पञ्चमी।।

अनङ्गे आधारस्थयोनिमण्डले। एवं धारणां कुर्वन् ध्यानाऽभ्यासे योग्यतां प्राप्नोति, ध्याने सिद्धे समाधिरिति पतञ्जलिक्रमः। अपरं च योगिनां चिन्तनक्रममेवाऽऽह –

इन्दुर्ललाटदेशे च तदूर्ध्वे बोधिनी स्वयम्।
तदूर्ध्वे भाति नादोऽसौ अर्धचन्द्राऽऽकृतिः परः।।
तदूर्ध्वे च महानादो लाङ्गलाऽऽकृतिरुज्ज्वलः।
तदूर्ध्वे च कला प्रोक्ता आञ्जीति योगिवल्लभा।।
उन्मनी तु तदूर्ध्वे च यद् गत्वा न निवर्तते।
(आज्ञाचक्रादूर्ध्वभागे सर्वमेतदवगन्तव्यम्।।)
सच्चिदानन्दविभवात् सकलात् परमेश्वरात्।
आसीच्छक्तिस्ततो नादो नादाद् बिन्दुसमुद्भवः।।
पराशक्तिमयः साक्षात् त्रिधाऽसौ भिद्यते पुनः।
बिन्दुर्नादस्तथा बीजं तस्य भेदाः समीरिताः।।
बिन्दुर्नादात्मको बीजं शक्तिर्नादस्तयोर्मिथः।
समवायः समाख्यातः सर्वाऽऽगमविशारदैः।।

पराशक्तिमयः पर शिवस्तेन शिवशक्तिमयो बिन्दुरयं ललाटोर्ध्वे स्थितः बिन्दुर्नादात्मकः शिवात्मकः। बीजं शक्तिबोधिनीरूपम्। नादस्तयोः समवायः सम्बन्धः क्षोभ्यक्षोभकरूपः, तेनाऽयं क्रियाशक्तिरूपः। एतात्तयोर्ध्वे महानादः पूर्वोपदर्शितः। तदूर्ध्वे च कला कलाशक्तिराञ्जीति तिर्यग्रेखारूपमात्राऽऽकारा इयं शक्तिः सृष्ट्यादावाविर्भूता।

यत्र गत्वा हि मनसो मनस्त्वं नैव विद्यते।
उन्मनी सा समाख्याता सर्वतन्त्रेषु गोपिता।।
सहस्रारकर्णिकायां चन्द्रमण्डलमध्यगा।
सर्वसंकल्परहिता कला सप्तदशी भवेत्।।

उन्मनी नाम तस्या हि भवपाशनिकृन्तनी।
ततो हि व्यापिका शक्तिराज्ञीति यां विदुर्जना:।।
समनीमूर्ध्वस्तस्या उन्मनी तु तदूर्ध्वत:।

आज्ञाचक्रादूर्ध्वं द्वितीयबिन्दु: शिवरूप:, अर्धमात्रा बोधिनी शिवशक्ति समवायरूपा, अर्धचन्द्राकृतिर्नाद:। तदूर्ध्वे समनी, तत: उन्मनीति सप्तकारणरूपाणि वर्तन्ते।

मूलाधारं स्वाधिष्ठानं, मणिपूरम्, अनाहतम्।
विशुद्धम् आज्ञाचक्रं च बिन्दुर्भूय: कलापदम्।।
निबोधिका तथोर्ध्वेन्दुं नादो नादान्त एव च।
उन्मनीं विष्णुवक्त्रम् च ध्रुवमाण्डलिक: शिव:।।
इत्येतत् कथितं देवि षोडशाऽऽधारमुत्तमम्।
अकुलेश्वरदेवस्य सम्बन्ध: प्रथम: स्थित:।।
रूपाऽतीत: परो बिन्दु: शक्त्यावेष्टितभास्कर:।
अतो नादो विरोधी च अर्धचन्द्रसमुत्क्रमात्।।
एतत्तु पञ्चमं प्रोक्तं ज्ञानरत्नं महोदयम्।
तत्र तद्दक्षिणं षट्कमाज्ञापूर्वं कुलोद्भवम्।।

इति षडाधारा:

सर्वमेतत् कुण्डलिन्या जागरणे सति ज्ञातुं शक्यते।

१०. सहस्रार-निर्णय:

सुषुम्नानाड्यूर्ध्वे सहस्रदलपद्मं शुक्लवर्णम् अधोमुखम्, रक्तकिंजल्कशोभितम् अकारादिक्षकारान्तपञ्चाशद्वर्णै: शुक्लाभैर्विशत्याऽऽवर्तनेन सहस्रसंख्याकैर्युक्तं सहस्रदलम्, एतत् कर्णिकायां हंसस्तत: परमशिवरूपो गुरु: तत: सूर्यमण्डलम् चन्द्रमण्डलं ततो महावायु: ततो ब्रह्मरन्ध्रम्, ततो महाशङ्खिनी, चन्द्रमण्डले विद्युदाकारं

त्रिकोणं तन्मध्ये मृणालतन्तुशतभागैकभागरूपा सूक्ष्मा चन्द्रस्य षोडशी कला, अधोमुखी रक्तवर्णा, तत्क्रोडे केशाग्र सहस्र भागैक भागरूप सूक्ष्मा निर्वाणकला रक्तवर्णा अधोमुखी, तद्धस्ताद् अव्यक्तनादात्मकनि-बोधिकाऽऽख्यवह्निः तदुपरि निर्वाणकला क्रोडे परबिन्दुः शिवशक्त्यात्मकः। अस्य केशाग्रकोटिभागैक भागरूप-सूक्ष्मतेजोहंसरूपा निर्वाणशक्तिः अस्या हंसो जीवः, बिन्दोर्मध्ये शून्यं ब्रह्मपदम्।

मतान्तरम् – सहस्रदलकर्णिकामध्ये चन्द्रमण्डले अकथादि त्रिकोणं, तन्मध्ये त्रिकोणसमीपे त्रिबिन्दुः तस्याऽधो बिन्दुर्हकारः पुरुषात्मकः, उर्ध्वबिन्दुद्वयरूपविसर्गः सकारः प्रकृतिरूपः। एतदुभयाऽऽत्मको हंसस्त्रिबिन्दुरूपेण प्रकाशते, तन्मध्ये अमा कला, तत्क्रोडे निर्वाणशक्तिः तस्या मध्ये परं ब्रह्म। उक्तं च –

तेजोरूपा प्रिया तस्य ब्रह्मवर्त्मसुदुर्लभा।
परमं ब्रह्म यत्पादपङ्कजद्युतिवैभवम्।।
अमाषोडशभागेन देवि प्रोक्ता महाकला।
संस्थिता परमा माया देहिनां देहधारिणी।।

अन्यच्च संक्षेपेणाऽऽह उमानन्द

तन्मध्ये तु त्रिकोणं तु विद्युदाकारमुत्तमम्।
बिन्दुद्वयं च तन्मध्ये विसर्गरूपमव्ययम्।।
तन्मध्ये शून्यदेशे च शिवः परमसंज्ञकः।

षट् शिवास्तन्त्रशास्त्रेषु निर्दिष्टा

ब्रह्मा विष्णुश्च रुद्रश्च ईश्वरश्च सदाशिवः।
ततः परशिवो देवि षट् शिवाः परिकीर्तिताः।।

श्रीशङ्कराचार्यैरप्युक्तम् – "परमशिवपर्यङ्कनिलयाम्"। अयं सुन्दरीक्रमः। बगलाक्रमे उक्तम् – "पीतवासोमते पुत्र पञ्चप्रेतगतां स्मरेत्"

"बगलां सुन्दरीं ध्यायेत्", "सुधासिन्धोर्मध्ये" "मध्ये सुधाब्धिमणि-मण्डपरत्नवेदी" त्यादिभिरुभयोरभेदः। अस्यामवस्थायां शिवशक्त्योरभेद-मनुभवति योगी। इदंमेव सामरस्याऽऽख्यं महामाहेश्वरैः कथ्यते। वेदान्तसम्प्रदायविद्भिराचार्यैरपि "तत्त्वमसि" "अहं ब्रह्मास्मि" इति वचनैरिदमेव परमं तत्त्वमुपदिश्यते। उक्तं च संङ्केतपद्धतौ –

अकारः सर्ववर्णाऽऽद्यः प्रकाशः परमः शिवः।
हकारोऽन्त्यः कलारूपो विमर्शाऽऽख्यः प्रकीर्तितः।।
उभयोः सामरस्यं तु परस्मिन् महसि स्फुटम्।

अयमेव परमपुरुषार्थपदवाच्यः यं प्राप्य कुतकृत्यो भवति। उक्तं हि गीतायाम् –

"एतद् बुद्ध्वा बुद्धिमान् स्यात् कृतकृत्यश्च भारत।"
॥ इति विरम्यते॥

११. षट्चक्रनिरूपणम्

पूर्वं सुषुम्णा नाडी उक्ता, तदनन्तरे चित्रा नाम नाडी अतिसूक्ष्मा, तस्यामेव षट् चक्राणि ग्रथितानि । तेषु –

प्रथम चक्र

(१) प्रथमं मूलाधाराऽऽख्यं चतुर्दलात्मकं पीतवर्णं, वं शं षं सं इति दलागताश्चत्वारो वर्णाः, पूर्वादिक्रमेण तेषां न्यासः, पार्थिवं लं बीजं, चतुष्कोणात्मक यन्त्रं, डाकिनी देवी, ब्रह्मदेवश्चक्राधिपत्येन ध्येयः, स्वयम्भूनामकं लिङ्गाऽऽख्यं ज्योतिः, सार्धत्रिवलयां कुण्डलिनीं तद्वेष्टितां चित्कलां चपलां तत्र चिन्तयेत्। तज्जागरणा हंसमन्त्रेण हुंकारेण वा गुरुपदिष्टमार्गेण, "यतोऽविद्यया सा सुप्ता" विसतन्तुनिभां चित्रान्तर्गतां तां कृत्वा सम्यगभ्यसेत्। मुहूर्तद्वयाऽभ्यासेन प्रकाशानुभूतिः सर्वाः सिद्धयश्चाऽऽविर्भवन्ति। यथा शरीरस्य कान्तिः नादव्यक्तिः, अग्निः

प्रदीप्तो भवति, इन्द्रियपाटवम्, नैरुज्यम्, दुःखराहित्यम्, अतीताऽनागतान् जानाति, अश्रुतशास्त्राणि वेत्ति, स्वेच्छाविहारित्वं जायते, स्तम्भक्षोभौ भवतः, बगलाया मुख्यं चिन्तनम् अत्रैव, "बीजं स्मरेत् पार्थिवम्" इति वचनात्।

द्वितीय चक्र

(२) तदूर्ध्वे द्वितीयं षड्दलाख्यं पद्मं लिङ्गमूले स्वाधिष्ठानाऽऽख्यं बालाऽऽदित्यनिभं बं भं मं यं रं लं इति वर्णैर्युक्तं, विष्णुर्देवः, चक्राधिपा देवी राकिणी, वं वारुणं बीजम् अर्धचन्द्राकृति यन्त्रम, एतच्चिन्तनेन विगतजराऽऽमयः, शुचिः, बिन्दुधारणे दृढः, मृत्युभीतिरहितः, कान्तिमान्, अश्रुतशास्त्रज्ञानवान्, अनङ्गसदृशो योगी भवति जले चाऽव्याहतगतिः।

तृतीय चक्र

(३) तृतीयं मणिपूराऽऽख्यं नीलाञ्जनप्रख्यं त्रिकोणयन्त्रं रं बीजभूषितं दशदलोपेतं डं ढं णं तं थं दं धं नं पं फं इति दश वर्णैः संयुतं, रुद्रो देवः, चक्राधिपा लाकिनी देवी, तत्त्वं वह्निः, एतच्चिन्तनेन वश्याऽऽकर्षणनिर्विषीकरणे तथा तिरस्करिणीविद्यायां सिद्धिः मृतशरीरोत्थापने प्रवेष्टुं च योगी समर्थो भवति पातालसिद्धिश्चेत्यादयः प्रभावा भवन्ति।

चतुर्थ चक्र

(४) चतुर्थम् अनाहतं चक्रं तृतीयान् मणिपूरकाद् ऊर्ध्वं हृदयस्थितम् इन्द्रगोपकीटनिभं रक्तवर्णं, षटकोणयन्त्रे वायुबीजं यं, काकिनी चक्राधिपा देवी, ईश्वरो देवः, कं खं गं घं ङं. चं छं जं झं ञं टं ठं इति द्वादशवर्णैर्भूषितं, बाणाऽऽख्यं लिङ्ग चात्रैव, एतस्य चिन्तनेन त्रिकालविषयकं ज्ञानं, दूराच्छ्रवणं, योगिनां सिद्धानां च सम्मेलनं सिध्यति।

पञ्चम चक्र

(५) कण्ठदेशे पञ्चमं विशुद्धाऽऽख्यं पद्मं धूम्राभं वृत्ताऽऽकारेण यन्त्रेण युक्तं हं बीजलसितं, व्योम तत्त्वं, जीववासोऽत्रैव अणुपरिमितः कलिकाकारः, शाकिनी देवी, सदाशिवो देवः, अं आं इं ईं उं ऊं ऋं ॠं लृं ॡं एं ऐं ओं औं अं अः इति क्रमेण वर्णन्यासः एतस्मिन् युक्तचित्तो योगी त्रिकालदर्शी, रोगरहितः, सदा युवा, कृष्णकेशः, वीतुमृत्युः सन् चिरं जीवति। एतदभ्यासी योगी यदि क्रुध्यति, सम्पूर्णं जगत् संचालयति, तं शमयितुं ब्रह्मादयोऽपि असमर्थाः भवन्ति।

षष्ठ चक्र

(६) आज्ञानामकं षष्ठं चक्रं भ्रूमध्ये स्थितं शारदीयकमलसंकाशं प्रणवबीजेन युक्तं, मनसो वासोऽत्र, हाकिनी देवी, इतरलिङ्गम् अर्धनारीश्वरो देवः, हकारसकारयुक्तः, एतस्मिन् कृताभ्यासो योगी पूर्वजन्मकृतानि कर्माणि स्मरति, दूरदर्शनं श्रवणं च भवति, मृतश्चेन्मोक्षलाभः। हाकिन्या ऊर्ध्वं त्रिकोणं, प्रणवो मनः इतरलिङ्गम्, निरालम्बया मुद्रया खेचरीति नाम्न्या धारणया परमाऽऽनन्दसुखाप्तिः एतदुपरि सहस्राराख्यं पद्मं। कुण्डलिन्या ब्रह्मपदं प्राप्य कुलाऽमृतं रसं निपीय पुनस्तस्याः प्रत्यावर्तनम कार्यम्। यथा –

पीत्वा दिव्यामृतौघं पुनरपि च विशेन् मध्यदेशं कुलस्य।
चक्रे चक्रे क्रमेणाऽमृतरसविसरैस्तर्पयेत् कुण्डलीं ताम्।।

तथोक्तं श्रीशङ्कराचार्यै –

सुधाधाराऽऽसारैश्चरणयुगलान्तर्विगलितैः ।
प्रपञ्चं सिञ्चन्ती पुनरपि रसाम्नायमहसा।।
अवाप्य स्वां भूमिं भुजगनिभमध्युष्टवलयम्।
स्वमात्मानं कृत्वा स्वपिषि कुलकुण्डे कुहरिणि।।

इत्थं कुलाऽकुलयोर्विस्तारः धारणाध्यानविषय

१२. नादाऽभ्यासवर्णनम्

सामरस्याऽभिधेयात् परमतत्त्वसकाशात् ज्ञानक्रिययोः सिसृक्षावशात् प्रादुर्भावः ज्ञानक्रियोपाधिमत्योः शिवशक्त्योः प्रथमः समुल्लासः बिन्दुः, तस्मान्नादः तस्माच्च क्रमेण सर्वा सृष्टिरिति सिद्धान्तः। स्थूलसूक्ष्मभेदेन षट्त्रिंशत्तत्त्वानि जायन्ते इत्यादि प्रस्तारः। अस्मिन् नादाभ्यासनाम्नि योगे नादाभ्यासेनैव परम तत्त्वसाक्षात्कारो मन्यते। स नादो द्विधा वर्णाऽऽत्मको ध्वन्यात्मको वा। वर्णाऽऽत्मकरूपेण विवृतस्य तस्य मन्त्राऽऽत्मकः परिणाम;, यस्याऽभ्यासः मानसिकोपांशुवाचकभेदेन जपात्मकः प्रकारो, यस्येयता ग्रन्थेन उपदिष्टोऽपरो नादः तस्य विधिरिदानीं प्रदुश्यते – योनिमुद्राभ्यासशीलस्य योगिनः सुषुम्णाऽन्तर्गतः प्राणो भवति तेनाऽऽनन्दजनको नादः सहसाऽऽविर्भवति। तदुक्तम् –

आदौ मत्तालिमालागलपथविगलत्तारझंकारहारी।
नादोऽसौ वंशिकांस्याऽनिलभरितलसद्वंशनिस्वानतुल्यः।।
घण्टानादानुकारी तदनु जलनिधिध्वानधीरो गभीरः
गर्जत्पर्जन्यघोषः पर इह कुहरे वर्तते ब्रह्मनाड्याः।।१।।
विजितो भवतीह तेन वायुः, सहजो यस्य समुत्थितप्रणादः।
अणिमादिगुणा भवन्ति तस्याऽमितपुण्यस्य महासुखास्पदस्य।।२।।
सुरराजतनूजवैरिरन्ध्रे विनिरुध्य स्वकराङ्गुलिद्वयेन्।
जलधेरिव धीरनादमन्तः प्रसवन्तं सहसा शृणोति मर्त्यः।।३।।
(कर्णे – सुरराज इन्द्रः तस्य तनूजः अर्जुनः तस्य वैरी कर्णः)
परिभावयतोऽपि नादमेनं त्रिदशाऽधीशतनूजवैरिजातम्।
सततं भवतीह तस्य जन्तोर्गुणसम्पत्तिरपेतकल्मषस्य।।४।।
शृङ्गाण्यङ्गुलिभिर्निरुध्य विधिवत् कोदण्डयोः पण्डितः।
मध्ये बद्धमरुन्निरुध्य वृषभश्रेष्ठं च षष्ठेन्द्रियम्।।
साक्षात्तत्क्षणमेव पश्यति शनैस्त्रय्यन्तगीतं परम्।
योगी पश्यति दिव्यरूपममलं ब्रह्माऽऽख्यशुभ्रं महः।।५।।

१३. नादसाधनरीतिः

नास्ति नादात् परो मन्त्रो, न देवः स्वात्मनः परः।
नानुसन्धेः परा पूजा, नहि तृप्तेः परं सुखम्।।

इति प्रमाणान्नादानुसन्धानस्य श्रैष्ठ्यं गम्यते। प्रथमं द्वे मुद्रे कर्णच्छिद्रमुद्रणार्थं निर्मापयितव्ये। तद्द्रव्याण्येवम् - कस्तूरिका एकरत्तिकापरिमिता, जायफलं द्विरत्तिकापरिमितम् जावित्री त्रिरत्तिका परिमिता, लवङ्गानि षट्रत्तिकापरिमितानि एतत् सर्व चूर्णीकृत्य जम्बुफलाऽऽकृत्या मुद्रानिर्माणं तदनन्तरं पट्टसूत्रैः संग्रथ्य अभ्यासकाले कर्णयोर्धारणीये। सूर्योदयात् प्रागुत्थाय शौचादिकार्यं कृत्वा स्वस्थेन मनसा अभ्यासः कर्तव्यः। चिणीति प्रथमः, चिंचिणीति द्वितीयः, घंटानादस्तृतीयः, शङ्खनादश्चतुर्थः पञ्चमस्तन्त्रीनादः, षष्ठस्तालनादः, सप्तमो वेणुनादः, अष्टमो मृदङ्गनादः, नवमो भेरीनादः, दशमो मेघनादः। मूलाधारादारभ्य सहस्रारपर्यन्तं शुद्धस्फटिकसंकाशं नादस्वरूपं चैतन्याऽऽत्मकं ध्येयत्वेनाऽभिमतम्। हंसमन्त्रस्य अभ्यासः। अभ्यासकर्तुः शरीरोपरि दश प्रभावास्चेत्थं भवन्ति।

प्रथमे चिंचिणीगात्रं, द्वितीये गात्रभञ्जनम्।
तृतीये खेदनं याति, चतुर्थे कम्पते शिरः।।
पञ्चमे स्रवते तालु, षष्ठेऽमृतनिषेवणम्।
सप्तमे गूढ़विज्ञानं, परा वाचा तथाऽष्टमे।।
अदृश्यं नवमे देहं दिव्यं, चक्षुस्तथाऽमलम्।
दशमे परमं ब्रह्म भवेद् ब्रह्मात्मसन्निधौ।।
इति

योगेन स्तब्धछिन्नाऽऽदिदोषदुष्टा मन्त्राश्चैतन्या भवन्ति, सिद्धिश्चाऽऽसीदति। "जन्मौषधिमन्त्रतपःसमाधिजाः सिद्धयः" इत्यत्र पतञ्जलिना मन्त्रेण सिद्धयः प्रतिपादिताः। भोजेन मन्त्रसिद्धेरानुसङ्गिकं

प्रतिपादितं तच्च सूत्रकारविरुद्धमेवाऽवगन्तव्यम्। योगो द्विविधः सिद्ध्यात्मको, मोक्षाऽऽत्मकश्च, सिद्धिरूपो योगो लौकिकैश्वर्यप्रदः तस्माद् विरक्तस्य मोक्ष इति तत्त्वं लक्ष्यीकृत्य योगप्रवृत्तिः। योगसम्पन्न एव महाविद्यातत्त्वं सम्यग् वेत्ति, अतो महाविद्यासाधने उपयुज्यते।

१४. कुण्डमण्डपविधिः

कर्मणः सिद्धौ साग्निकानामेवाऽधिकारः। ये च मुमुक्षवस्तेऽपि निष्कामतया देवताऽर्पणबुद्ध्या विहितं कर्म कुर्वन्तः सिद्धिं समियन्ति। तदुक्तं गीतायाम् –

स्वकर्मणा तमभ्यर्च्य सिद्धिं विन्दति मानवः।

अग्निकार्ये कुण्डानामेव विधानं प्रधानम्। आदावतः कुण्डविधिः कथ्यते –

विद्वेषे चाऽभिचारे च त्रिकोणं कुण्डमिष्यते।
द्विमेखलं कोणमुखं हस्तमात्रं तु सर्वतः।।
उच्चाटनं तु नैऋत्यां शत्रुपक्षस्य कारयेत्।
उत्सादनं तु वायव्यां देवानामपि कारयेत्।।
शत्रूणां तापने शस्तं योन्याऽऽख्यमग्निकोणगम्।
अर्धचन्द्रं च याम्यायां शत्रुणां मारणे स्थितम्।।
त्रिकोणं नैऋते कुण्डं रिपूणां ब्याधिवर्धनम्।
दाहायाऽग्नौ च विद्वेषे कुण्डं पूर्णेन्दुसन्निभम्।।
चतुरस्रं तु कर्तव्यं द्वेषाऽदौ तु विचक्षणैः।
कुण्डं सुलक्षणं कृत्वा तत्र कार्याणि साधयेत।।
चतुरस्रे भवेद् वश्यमाकर्षे च त्रिकोणकम्।
कर्षणे स्तम्भने देवि, विद्वेषं च त्रिकोणकम्।।
अथैवोच्चाटनं प्रोक्तं षट्कोणे मारणं स्मृतम्।
उदीच्यां पौष्टिके कुण्डं वारुण्यां शान्तिकाऽऽदिषु।।

पूरयेत्सकलं वाह्याच्चतुरस्त्रं पुरं तु तत् ।
रजनीरसमादाय पद्मषण्डमथोदकम् ॥ ७९ ॥
रोचनारसकर्पूरैर्नैशं चोदकमेव च ।
सुदिने पूजयित्वाऽऽदौ वागीशं विलिखेत्ततः ॥ ८० ॥
भूर्जे नेत्रेऽथ वा वस्त्रे सौवर्णोत्थशलाकया ।
त्रिलोहवेष्टितं कृत्वा यन्त्रं यो धारयेद्द्विज ॥ ८१ ॥
तस्याशु वाचि भूतिश्च धनमानौ रिपुक्षयः ।
अक्षयश्च महाघोरे संग्रामे स भवेद्द्विज ॥ ८२ ॥
न भयं विद्यते तस्य विषाहिज्वलनादितः ।
पूरयेदखिलान्कामान् धारणस्मरणादिभिः ॥ ८३ ॥
तस्मादेतत्प्रयत्नेन कुर्याद्बाह्वोर्गलेऽथ वा ।
सर्वकालजयार्थी वै पुमान्सद्वैष्णवः सदा ॥ ८४ ॥

इति श्रीपाञ्चरात्रे जयाख्यसंहितायां साधनविधिर्नाम द्वात्रिंशः पटलः ।

अथ योगाख्यान नाम त्रयस्त्रिंशः पटलः ।

श्रीभगवान्—

अथ योगविभूत्यर्थं योगं युञ्जीत वैष्णवः ।
सुगुप्ते विजने देशे निर्द्वन्द्वे शुभलक्षणे ॥ १ ॥
जितदर्पां मतिं कृत्वा सर्वभूतहिते स्थितः ।
देवाग्निगुरुभक्तश्च सच्छास्त्राभिरतस्सदा ॥ २ ॥
भूतद्रोहपरित्यागी आस्ते यः संयतेन्द्रियः ।
आसने चोपविष्टस्तु सुशुभे लक्षणान्विते ॥ ३ ॥
शुभदारुसमुत्थे तु चतुर्विंशाङ्गुलायते ।
द्वादशाङ्गुलकोत्सेधे सुधौतेनापि वाससा ॥ ४ ॥
कुशैश्च मृदुभिश्छन्ने पवित्रेणाथ चर्मणा ।
तत्रोपविष्टः सततं योगाङ्गानि समभ्यसेत् ॥ ५ ॥

[प्राणायामस्य त्रैविध्यम्]

रेचकादिचतुर्भिस्तु मात्राभेदकृतैस्तु सः ।
कनीयान्मध्यमो ज्येष्ठः प्राणायामः प्रकीर्तितः ॥ ६ ॥
प्रत्याहारं ततः कुर्याच्चित्तसंयमनं तु सः ।
बुद्धिर्मनस्त्वहङ्कारस्त्रिभिश्चित्तं प्रकीर्तितम् ॥ ७ ॥

तथापि मनसः कुर्यात्प्रत्याहारं प्रयत्नतः ।
मनश्चतुर्विधं प्रोक्तं प्रत्याहारेण निर्जितम् ॥ ८ ॥
तिष्ठते लक्ष्यमार्गे तु अ(ना?)न्यथा तु कदाचन ।
ध्यानं लक्ष्यस्य निष्पत्तिश्चिन्तनं तत्प्रकीर्तितम् ॥ ९ ॥
धारणा तु ततो धार्या शीतदाहापनुत्तये ।
पञ्चधा पूर्ववत्सा तु प्रतिमन्त्रव्यवस्थया ॥ १० ॥
जपं निमीलिताक्षेण कुर्यान्मन्त्रं तु वाचकम् ।
वाच्यस्य प्रतिपत्त्यर्थं पिण्डबीजपदात्मकम् ॥ ११ ॥
त्रिविधं वै समुद्दिष्टं प्रागुक्तविधिभावितम् ।
योगोऽपि त्रिविधः प्रोक्तस्तं च कार्त्स्न्येन मे शृणु ॥ १२ ॥
प्राकृतं पौरुषं चैव ऐश्वर्यं च तृतीयकम् ।
ऊहस्तु कीर्त्यते तर्कस्तच्च सिद्धिविचारकम् ॥ १३ ॥
समाधिस्त्वात्मलाभः स्यादात्मजः परिकीर्तितः
स तु लक्ष्यं परित्यज्य मन्त्रोच्चारणवर्जितम् ॥ १४ ॥
सदा विभज्यते ब्रह्मन् कलांशविधिवर्जितम् ।
समाधौ परिनिष्पन्ने परमाप्नोति पूरुषम् ॥ १५ ॥
प्राणायामादितो यावत्समाध्यन्तं प्रकीर्तितम् ।
द्विगुणं त्रिगुणं चैव मात्राभेदेन संस्थितम् ॥ १६ ॥
योगासनस्थः कुर्वीत विधिमेव यथोदितम् ।
योगासनानि चत्वारि योगपट्टेन बन्धयेत् ॥ १७ ॥
पर्यङ्कं कमलं वाऽपि भद्रं वा स्वस्तिकं दृढम् ।
एषामेकतमे स्थित्वा ऋजुकायोर्ध्वतः क्रमात् ॥ १८ ॥
स्पष्टाङ्गसन्धिः कुर्वीत विस्तीर्णोरुः स(सु?)कन्धरः ।
बाहू परिसमौ कृत्वा किञ्चिदाकुञ्चयेच्छिरः ॥ १९ ॥
नाभौ जघनमध्ये वा हस्तौ कच्छपसंस्थितौ ।
सव्यस्य चोपरिस्थं तु वामे सव्यमथापि वा ॥ २० ॥
उत्तानौ तु करौ कृत्वा कच्छपीतां (?) नियोजयेत् ।
ग्रीवां तु बिभृयाद्यत्नान्नातिस्तब्धां न कुंचिताम् ॥ २१ ॥
किञ्चिन्निमीलयेन्नेत्रे नासाग्रमवलोकयेत् ।
समुद्गवत्पिधायास्यं दन्तैर्दन्तानसंस्पृशन् ॥ २२ ॥

सगर्भं योगमातिष्ठेन्निर्गर्भं वा सुयन्त्रितः ।
ततः प्रमथयेद्वायुं प्राणाख्यं चित्तसंयुतम् ॥ २३ ॥
रेचकादिचतुर्भेदैः प्राणायामः प्रकीर्तितः ।
चित्तं जयेत्सदा यत्नाद्दुर्जयं देवदानवैः ॥ २४ ॥
यद्यप्यभ्यासवैराग्यैश्चित्तं संयम्यते बलात् ।
तथापि यत्नादातिष्ठेत्पूर्वाधीनं तु वर्जयेत् ॥ २५ ॥
द्विविधास्ते तु विज्ञेयास्सन्निकृष्टा मनोगताः ।
सन्निकृष्टाः स्थानगताश्चित्तोपा(श्चैत्ता वा ?)सनया कृताः ॥ २६ ॥
न दंशमशकाकीर्णे निश्शब्दे गन्धवर्जिते ।
निमीलिताक्षस्सन्तिष्ठेत्सर्वेन्द्रियविवर्जितः ॥ २७ ॥
एवं परित्यजेत्सर्वानुपाधीन्सन्निकर्षजान् ।
वासनोत्थांश्च विविधान्सम्यग्लक्ष्यं समास्थितः ॥ २८ ॥
प्रत्याहरेत् सदा चित्तं विक्षिप्तं सर्ववस्तुषु ।
तामसं तत्तु बोद्धव्यं चित्तं सर्वत्रगं सदा ॥ २९ ॥
गतं रागादितो ज्ञेयमभ्यासाद्राजसं तु तत् ।
सात्विकं कथ्यते चित्तं संश्लिष्टं लक्ष्यगोचरे ॥ ३० ॥
संलीनं च ततो ज्ञेयं गुणातीतं तपोधन ।
ध्यानमेवंविधं कुर्यात्सगर्भं प्राणनिग्रहे ॥ ३१ ॥
उच्यते च ततो भूयस्त्रिविधं योगिनां हितम् ।
सकलं निष्कलं विष्णुं तृतीयं पररूपिणम् ॥ ३२ ॥
अन्यत्र त्रिविधं ज्ञेयं शब्दं व्योम सविग्रहम् ।
विग्रहं देवरूपस्य लक्ष्यरूपं विचिन्तयेत् ॥ ३३ ॥
ध्यानमेवं समुद्दिष्टं यावद्व्योमान्तिमं भवेत् ।
तावच्च भावयेल्लक्ष्यं यावल्लक्ष्यं न भावयेत् ॥ ३४ ॥
भावे ह्यभावमापन्ने स्वस्वभावः परः स्मृतः ।
स्थूलं पूर्वं समभ्यस्येत्ततः सूक्ष्मं ततः परम् ॥ ३५ ॥
एवं विलीयते चित्तं लक्ष्यं चोपाधिभिस्सह ।
विग्रहं देवदेवस्य ध्यायेद्धृत्पद्मगोचरे ॥ ३६ ॥
ततोऽन्यच्चिन्तयेल्लक्ष्यं स्थूलं सूक्ष्मं ततः परम् ।
एवमभ्यस्यमानस्य गुणोत्कर्षः प्रजायते ॥ ३७ ॥

चन्द्रार्काग्निमयं बिम्बं रविमण्डलसन्निभम् ।
शुक्लरूपधरश्चापि गुणोत्कर्षप्रदायकम् ॥ ३८ ॥
ततः सूक्ष्मतरं बिन्दुं राजमुद्गसमप्रभम् ।
तं विद्यात्सर्वमन्त्राणामूर्ध्वमाक्रम्य तिष्ठति ॥ ३९ ॥
ततस्तु राजकाबीजप्रमाणं चिन्तयेत्क्रमात् ।
उत्पादकमथास्यापि यस्यान्ते नादमाश्रितः ॥ ४० ॥
तं विलीय समुत्पन्नमश्ववालप्रमाणकम् ।
यस्सदा गच्छति व्योम्नि मनश्चागच्छते हृदि ॥ ४१ ॥
ततो विचिन्तयेत्सूक्ष्मं शिरोवालप्रमाणकम् ।
ब्रह्मनाडीमनेनाशु पश्यन्ति ध्यानसेचनात् ॥ ४२ ॥
ततोऽङ्गरोमप्रमात्रं तु बिसवालसमं ततः ।
ध्यायेन्नियममास्थाय ब्रह्मनाडीप्रकाशकम् ॥ ४३ ॥
तदा सा दृश्यते नाडी सादृश्यरहिता परा ।
तया यायात्परं स्थानं ब्रह्मरन्ध्रपथेन तु ॥ ४४ ॥
एवं तु निष्कलं ध्यायेत्सोऽपि लीनः परे पदे ।
परं त्वभ्यसमानस्य उन्मनस्त्वं प्रजायते ॥ ४५ ॥
ततस्तु व्यज्यते सत्ता स्वकीया ब्रह्मरूपिणी ।
शब्दरूपं [1]तु वा ध्यायेदेवं सकलनिष्कलम् ॥ ४६ ॥
नारायणात्मकं मन्त्रं प्रणवादिनमोन्तकम् ।
ध्यायेच्छब्दमयो ह्येष सकलः परमेश्वरः ॥ ४७ ॥
निष्कलं वर्णमेकं तु क्षौं ह्रीं(?)वाऽपि चिन्तयेत् ।
ततोऽपि निष्कलं बिन्दुं तन्मूर्धस्थं त्रिदैवतम् ॥ ४८ ॥
सा शक्तिस्तत उत्पन्ना प्रमाणार्धप्रमाणका ।
सा शक्तिर्लीयते नादे नादो याति लयं परे ॥ ४९ ॥
एवं हि ध्यानयोगेन परं पश्यन्ति शाश्वतम् ।
अथ वाऽऽलोकशब्दौ हि प्रथयित्वा विचिन्तयेत् ॥ ५० ॥
स्वयं विलीनो यत्रैव तत्रैव परमं पदम् ।

---

1 नवा C L नवा S

अथवा व्योमरूपं तु ध्येयं तत्त्वं सनातनम् ॥ ५१ ॥
बाह्यान्तस्थं शिखातीतं त्रिव्योमं चिन्तयेत्सदा ।
मुख्येऽन्तस्थं परं ध्यात्वा न भूयो भवभाक्भवेत् ॥ ५२ ॥
एवं ध्यात्वा भवेन्मुक्तिर्मुक्तिस्तु सकले स्थिता ।
सकलो देवदेवस्य विग्रहो विष्णुरूपिणः ॥ ५३ ॥
शङ्खपद्मधरो देवो गदापद्मविभूषितः ।
चतुर्भुजश्चतुर्मूर्तिश्चतुर्वक्त्रः सुलोचनः ॥ ५४ ॥
लक्ष्मीवक्षाः खगारूढः सर्वरत्नोपशोभितः ।
कृष्णस्सुरोत्तमो विष्णुर्जिष्णुस्सर्वत्रगो हरिः ॥ ५५ ॥
हलहेतिर्हयग्रीवो [1]हरिरूपधरः प्रभुः ।
नृहरी क्रोडरूपी च शक्त्यङ्गश्च महेश्वरः ॥ ५६ ॥
एवमास्थाय[2] नियमं पिण्डवत्त्वं परित्यजेत् ।
परिज्ञाय पुरा पिण्डं(ण्ड?)पाक(त ?)लक्षणमुत्तमम् ॥ ५७ ॥
निरुद्धं सन्धिमार्गं तु कृत्वा देहसमीरणम् ।
मुक्त्वा सद्ब्रह्मरन्ध्रेणोत्क्रान्तिकरणेन तु ॥ ५८ ॥
ध्यात्वा परित्यजेद्देहं नित्याभ्यासरतो यदि ।
स ब्रह्मपरमभ्येति वासुदेवाख्यमव्ययम् ॥ ५९ ॥

नारदः—

भगवन् श्रोतुमिच्छामि एतत्संक्षेपतस्त्वहम् ।
लक्षणं देहपातस्य वायोर्गतिनिरोधनम् ॥ ६० ॥

श्रीभगवान्—

युक्ताहारविहारस्य क्रियासक्तस्य नारद ।
युक्तस्वप्नावबोधस्य समधातोः सदैव हि ॥ ६१ ॥
निर्वर्तते सदाशब्दो हृद्गतो दुन्दुभिस्स्वनः ।
[3]सृजच्छीतातपे काले न जानात्युष्णशीतलौ ॥ ६२ ॥
ध्यात्वा ज्योतिर्भ्रुवोर्मध्ये द्वादशान्तेऽथ नारद ।
प्रत्य (स्त)मेति वै [4]शब्दो न चोदेत्यथवा मुने ॥ ६३ ॥

---

1 हर V CL बल A 2 ध्याय A 3 स्पर्शोऽग्निनाऽतपे A 4 शीघ्र A

न जानाति समाधिस्थो ह्वादमाब्जं यदान्तरे ।
परिशुष्यति गात्रस्थं शोणितं श्लेष्मलक्षणम् ॥ ६४ ॥
न वेत्ति पार्थिवं गन्धं स बाह्याभ्यन्तरे यदा ।
पिण्डपातस्तदा विप्र बोद्धव्यो न चिरेण तु ॥ ६५ ॥
पार्थिव्यां संस्थितश्चैव धारणायां समाहितः ।
न वेत्ति शब्दं प्रागुक्तं पश्चाहात्पञ्चमे क्षणे ॥ ६६ ॥
स्थितस्समाधौ वाऽप्येतौ शीतोष्णौ नानुविन्दति ।
पतेद्दिनचतुष्केण पिण्डस्तत्कलिते क्षणे ॥ ६७ ॥
रूपध्यानं समासाद्य पूर्वोक्तविधिना यदि ।
न भाति हृदयाकाशे बहिर्वा ज्योतिषां पतिः ॥ ६८ ॥
पिण्डपातो ह्यवश्यं स्यात्तृतीयेऽह्नि तथा क्षणे ।
समाधौ यदि वायव्ये योगी नारद वर्तते ॥ ६९ ॥
न वेत्ति परमाह्लादं तृषितः परिकम्पते ।
दिनद्वयेन पिण्डस्य पातः स्याद्वितये क्षणे ॥ ७० ॥
स्थितो [1]गगनभावे तु प्रागुक्तविधिना यदि ।
न वेत्ति विविधं गन्धमन्तर्बाह्ये शुभाशुभम् ॥ ७१ ॥
तत्रैवास्य दिने पातः क्षणे प्रथमलक्षणे ।
ध्यात्वैवं मुनिशार्दूल योगी ध्यानैकमानसः ॥ ७२ ॥
स्वयमुत्क्रमते पिण्डाद्यायाद्ब्रह्मनिकेतनम् ।
प्रविशेत्पिण्डमन्यं वा प्राग्वत्सन्धानयोजितः ॥ ७३ ॥
कालो यद्देहपातस्य लक्षणेन समासतः ।
कथितः सारभूतस्य वायोस्संरोध उच्यते ॥ ७४ ॥
सगर्भं हृदयावासादुद्धृत्य कतलावधि ।
अप्रमेयविहीनं तु विकरालं नियोजयेत् ॥ ७५ ॥
प्रधानं कण्ठकूपे तु न याति हृदयं पुनः ।
स्मरेद्द्विजन्मपुटके(?)प्रधानं व्यापकोज्झितम् ॥ ७६ ॥
पन्धानं [2]नन्द...........येत्मन थमवर्जितम् ।
रोधमार्गद्वयस्यैवं दद्यात्सव्येतरस्य तु ॥ ७७ ॥

1 भगन A 2 दन्तकोटिस्थं A

नेत्रनासाननाख्यस्य ततश्चाव्यक्तभास्वरम् ।
मन्त्रान्ते केवलं वाऽथ वषड् ध्यायेत्खरन्ध्रगम् ॥ ७८ ॥
प्राक्रमेत्परमात्मानं त्यक्त्वा पिण्डमिमं मुने ।
परिपक्वसमानं च आश्रयेच्छाश्वतं पदम् ॥ ७९ ॥
इत्येतत्कथितं सर्वं पंचरात्रार्थमुत्तमम् ।
सर्वस्वमिव विप्रेन्द्र रक्षणीयं प्रयत्नतः ॥ ८० ॥
सर्वोत्तमा संहितैषा सर्वविज्ञानदीपिका ।
नाख्येया दुष्टबुद्धीनां नराणां कलुषात्मनाम् ॥ ८१ ॥
मत्सराणामभक्तानां शठानां छद्मचारिणाम् ।
गर्वान्मे शास्त्रसद्वस्तुनिन्दकानां विशेषतः ॥ ८२ ॥
मद्भक्तदूषकाणां च शुष्कतर्करतात्मनाम् ।
शास्त्रापकर्तॄणामन्यदर्शने भावितात्मनाम् ॥ ८३ ॥
देयं विविक्तबुद्धीनां स्वधर्मनिरतात्मनाम् ।
संसारभयभीतानां मद्भक्तिनिरतात्मनाम् ॥ ८४ ॥
मच्छासनप्रपन्नानां ये पश्यन्ति सदा मुने ।
मद्भाविनो मत्समयाद्दृष्ट्या चातिविशुद्धया ॥ ८५ ॥
तेषां वाच्यमिदं शास्त्रं दीक्षां कृत्वा यथाविधि ।
प्रदर्श्य मन्त्रसंघं वा पूजितं मण्डलं पुरा ॥ ८६ ॥
शास्त्रार्थमनुवक्तव्यं शास्त्रमादौ प्रपूज्य च ।
येनाशु विविधा सिद्धिर्द्वयोर्भवति शाश्वती ॥ ८७ ॥

इति श्रीपाञ्चरात्रे जयाख्यसहितायां योगाख्यानं नाम त्रयस्त्रिंशः पटलः ।

समाप्तेयं जयाख्यसहिता ।

षष्ठः पटलः

पार्वती उवाच

देव्याः पूजा समाख्याता तृतीयाया महेश्वर ।
तां कथय सुरश्रेष्ठ विस्तरेणाधुना प्रभो ! ॥ १ ॥
ज्ञानेन कर्मणा चेह देहशुद्धिर्द्विधा भवेत् ।
ज्ञानशुद्धिस्त्वया प्रोक्ता कर्मशुद्धिर्न दर्शिता ॥ २ ॥
विण्मूत्रपिच्छिलो देहः कथं देवमयो भवेत् ।
तन्मे वद महादेव प्रसादसुमुख प्रभो ॥ ३ ॥

ईश्वर उवाच

ज्ञानेन कर्मणा वापि सिद्धिर्भवति नान्यथा ।
ज्ञानयोगश्च वक्तव्यः कर्मयोगं शृणु प्रिये ॥ ४ ॥
ब्राह्मे मुहूर्त्ते उत्थाय साधकः स्थिरमानसः ।
पद्मासनसमासीनः प्राणायामपुरःसरम्[1] ॥ ५ ॥
ब्रह्मरन्ध्रे स्थिते पद्मे सहस्रदलशोभिते ।
विमले पूर्णचन्द्रस्य मण्डले चिन्तयेद् गुरुम् ॥ ६ ॥
शुद्धस्फटिकसङ्काशं श्वेताभरणभूषितम् ।
तादृक्प्रसूनमाल्यादिविभूषितत[2]नुं तथा ॥ ७ ॥
पद्मासनसमासीनं सर्वयोगनि[3]षेवितम् ।
वराभयकरं शान्तं त्रिनेत्रं[4] करुणामयम् ॥ ८ ॥

---

१. पुरःसरः–ख० ।

२. विभूषितं–ख० ।

३. निशेवितम्–ख० ।

४. द्विनेत्रम्–ख० ।

वामोरुगतया शक्त्या रक्तया वामपाणिना ।
धारयन्त्योत्पलं दक्षहस्तेनालिङ्गितं विभुम् ॥ ९ ॥
[1]परमानन्दसन्दोहसान्द्रमानसमीश्वरम् ।
आनन्दसान्द्ररक्ताक्षं स्मरेत् स्मितमुखाम्बुजम् ॥ १० ॥
बालाद्यं भुवनेशानी रमा चैवाथ खेचरी ।
शिवचन्द्रौ मातृकान्तं कालशक्रा[2]म्बुवह्नयः ॥ ११ ॥
वायुश्च वामकर्णेन योजिता बिन्दुमा[3]लिनः ।
चक्रं कृत्वाऽऽदिमं तेषु कर्णं वामाक्षि योजयेत् ॥ १२ ॥
शिवचन्द्रौ त्रिशूलाढ्यौ बिन्दुना परिमण्डितौ ।
चन्द्रशिवौ त्रिशूलाढ्यौ स्वर्गवन्तौ महेश्वरि ! ॥ १३ ॥
तस्मात् स्वगुरुनामान्ते आनन्दनाथ चालिखेत् ।
तथा शक्तिपदान्ते वै अम्बापदमतो लिखेत् ॥ १४ ॥
पादुकां पूजयामीति विधिना परिपूजयेत् ।

लं पृथिव्यात्मना ब्रह्मणा गन्धं कल्पयामि । गन्धतन्मात्रात्मने[4] घ्राणाय गन्धं गृहाण स्वाहा ।

अथाऽङ्गुष्ठकनिष्ठाभ्यां योजयेद् गन्धमुत्तमम् ॥ १५ ॥

हं आकाशात्मना सदाशिवेन पुष्पं कल्पयामि शब्दतन्मात्रात्मने श्रोत्रेन्द्रियाय पुष्पं गृहाण स्वाहा ।

अङ्गुष्ठतर्जनीयोगे पुष्पदानं तथैव हि ।

यं वाय्वात्मना ईश्वरेण धूपं कल्पयामि स्पर्शतन्मात्रात्मने त्वगिन्द्रियाय स्पर्शं गृहाण स्वाहा ।

अङ्गुष्ठमध्यमायोगं धूपदानं तथैव हि ॥ १६ ॥

---

१. सरमानन्द-ख० ।

२. शक्राद्य-ख० ।

३. नादिनः-ख० ।

४. तन्त्रे-ख० ।

वं वह्न्यात्मना रुद्रेण दीपं कल्पयामि रूपतन्मात्रात्मने चक्षुरिन्द्रियाय रूपं गृहाण स्वाहा ।

अङ्गुष्ठाभ्यां महेशानि दीपं दद्यात् समाहितः ।

वं अमृतात्मना विष्णुना नैवेद्यं कल्पयामि । रसतन्मात्रात्मने जिह्वेन्द्रियाय रसं गृहाण स्वाहा ।

अङ्गुष्ठानामिकायोगं नैवेद्यं तत्प्रतिष्ठितम् ॥ १७ ॥

एवं कुलगुरुं देवि पूजयित्वा विधानतः ।
योनिमुद्रां प्रदर्श्याथ प्रणमेत् सिद्धिहेतवे ॥ १८ ॥

नमस्ते भगवन्नाथ शिवाय गुरुरूपिणे ।
विद्यावतारसंसिध्यै स्वीकृतानेकविग्रह ॥ १९ ॥

नराय नररूपाय परमात्मैकरूपिणे ।
सर्वाज्ञानतमोभेदभानवे चिद्घनाय ते ॥ २० ॥

स्वतन्त्राय दयातृप्तविग्रहाय शिवात्मने ।
परतन्त्राय भक्तानां भव्यानां भव्यरूपिणे ॥ २१ ॥

विवेकिनां विवेकाय विमर्शाय विमर्शिनाम्[1] ।
प्रकाशिनां प्रकाशाय ज्ञानिनां ज्ञानरूपिणे ॥ २२ ॥

पुरस्तात् पार्श्वयोः पृष्ठे नमस्कुर्यामुपर्यधः[2] ।
सदा मच्चित्तरूपेण विधेहि भवदासनम् ॥ २३ ॥

अज्ञानतिमिरान्धस्य ज्ञानाञ्जनशलाकया ।
चक्षुरुन्मीलितं येन तस्मै श्रीगुरवे नमः ॥ २४ ॥

नमोऽस्तु गुरवे तुभ्यं ब्रह्मविष्णुशिवात्मने ।
अविद्याग्रस्त-संसारसागरोत्तारहेतवे ॥ २५ ॥

---

१. अविमर्शिनाम्–क० ख० ।

२. नमस्कुर्यात्–ग० ।

गुरुर्ब्रह्मा गुरुर्विष्णुर्गुरुर्देवो महेश्वरः ।
गुरुरेव परं ज्ञानं [1]गुरुरेव परं तपः ॥ २६ ॥

अतः सर्वत्र देवेशि ! गुरुपूजा गरीयसी ।
अन्यदेवसपर्या वा चान्यदेवस्य कीर्तनम् ॥ २७ ॥

गुरुदेवं विना देवि तदग्रे क्रियते यदि ।
तदा नरकमाप्नोति सत्यमेतद् वदाम्यहम् ॥ २८ ॥

पूजिते गुरुपादे वै सर्वदेवः सुखी भवेत् ।
सर्वेषां मन्त्रतन्त्राणां पिताऽसौ यः सदाशिवः ॥ २९ ॥

यस्य भक्तिर्गुरौ नित्यं वर्तते देववत् प्रिये ।
तस्य सर्वार्थसिद्धिः स्यान्नाऽन्यथा खलु पार्वति ॥ ३० ॥

गुरुपादरजो मूर्ध्नि ध्यात्वा कर्म समारभेत् ।
ब्रह्मरन्ध्रे सहस्रारे कर्पूरधवलो गुरुः ॥ ३१ ॥

वराभयकरो नित्यो ब्रह्मरूपी सदानघः ।
जागर्त्ति परमेशानि ! निजस्थानप्रकाशकः ॥ ३२ ॥

कुलनाथं परित्यज्य ये शाक्ताः परसेविनः ।
तेषां दीक्षा च यागश्च ह्यभिचाराय कल्प्यते ॥ ३३ ॥

तस्मात् सर्वप्रयत्नेन कुलीनं गुरुमाश्रयेत् ।
कुलीनः सर्वविद्यानामधिकारीति गीयते ॥ ३४ ॥

दीक्षाप्रभुः स एवात्र सर्वतन्त्रेषु नापरः ।
गुरुमण्डलपूजां तु कुर्यात् सप्तसु पर्वसु ॥ ३५ ॥

---

१. गुरुसेव—क० ख० ।

देवी उवाच

विना योगं न सिध्येत कुण्डली च क्रमः प्रभो ।
मूलपद्मे कुण्डलिनी यावन्निद्रायिता प्रभो ॥ ३६ ॥
तावत् किञ्चिन्न सिध्येत मन्त्रयन्त्रार्चनादिकम् ।
जागर्त्ति यदि सा देवी बहुभिः पुण्यसञ्चयैः ॥ ३७ ॥
तदा प्रसादमायान्ति मन्त्रयन्त्रार्चनादयः ।
शिववद् विहरेल्लोके अष्टैश्वर्यसमन्वितः ॥ ३८ ॥
योगयोगाद्[1] भवेन्मुक्तिर्मन्त्रसिद्धिरखण्डिता ।
सिद्धे मनौ परावाप्तिरिति शास्त्रार्थनिर्णयः ॥ ३९ ॥
युक्तात्मा येन विहरेत् स्वर्गे मर्त्ये रसातले ।
जीवन्मुक्तश्च देहान्ते परं निर्वाणमाप्नुयात् ॥
तत् कार्त्स्न्येन परं योगं कथयस्व मयीश्वर ॥ ४० ॥

ईश्वर उवाच

कथयामि तव स्नेहाद् योगयोग्याऽसि पार्वति ।
संसारोत्तारणं मुक्तिर्योगशब्देन कथ्यते ॥ ४१ ॥
योगो हि ललिता देवी निश्चितं विद्धि पार्वति ।
न योगो [2]नभसः पृष्ठे न भूमौ न रसातले ॥ ४२ ॥
ऐक्यं जीवात्मनश्चाहुर्योगं योगविशारदाः ।
कामक्रोधलोभमोहमदमात्सर्यसंज्ञकाः ॥ ४३ ॥
तत्समूहाः षडाख्याता योगविघ्नकरा इमे ।
योगज्ञैरेभिर्जित्वा[3] तान् योगिनो योगमा[4]प्नुयुः ॥ ४४ ॥

---

१. योगयोगाद्भवेत्–ग० ।

२. नभः–ख० ।

३. भित्वा–ग० ।

४. साधने–ग० ।

[1]यमं नियममासनप्राणायामौ ततः परम् ।
प्रत्याहारं धारणाख्यं ध्यानं सार्द्धं समाधिना ॥ ४५ ॥

अष्टाङ्गान्याहुरेतानि योगिनो योगसाधने ।
अहिंसा सत्यमस्तेयं ब्रह्मचर्यं दयाऽऽर्जवम् ॥ ४६ ॥

क्षमाधृतिमिताहारशौचं चेति यमा दश ।
तपः सन्तोष[2] आस्तिक्यं दानं देवस्य पूजनम् ॥ ४७ ॥

सिद्धान्तश्रवणं चैव ह्रीर्मतिश्च जपो हुतम् ।
दशैते नियमाः प्रोक्ता योगशास्त्रविशारदैः ॥ ४८ ॥

पद्मासनं स्वस्तिकाख्यं भद्रं वज्रासनं तथा ।
वीरासनमिति प्रोक्तं क्रमादासनपञ्चकम् ॥ ४९ ॥

ऊर्वोरुपरि विन्यस्य सम्यक् पादतले उभे ।
अङ्गुष्ठौ च निबध्नीयाद्धस्ताभ्यां व्युत्क्रमात् ततः ॥ ५० ॥

पद्मासनमिति प्रोक्तं योगिनां हृदयङ्गमम् ।
जानूर्वोरन्तरे सम्यक् कृत्वा पादतले उभे ॥ ५१ ॥

ऋजु[3]कायो वसेत् योगी स्वस्तिकं तत् प्रचक्षते ।
सीमन्याः पार्श्वयोर्न्यस्येद् गुल्फयुग्मं सुनिश्चलम् ॥ ५२ ॥

वृषणाधः पादपार्ष्णि पाणिभ्यां परि[4]बन्धयेत् ।
भद्रासनं समुद्दिष्टं योगिभिः परिकीर्त्तितम् ॥ ५३ ॥

ऊर्वोः पादौ क्रमान्न्यस्य जान्वोः प्रत्यङ्मुखाङ्गुलीः ।
करौ निबध्यादाख्यातं वज्रासनमनुत्तमम् ॥ ५४ ॥

---

१. 'यम्'इत्यारभ्य 'योगसाधने' इत्येतदन्तं नास्ति–ग० ।

२. सन्तोषं–ग० ।

३. कारो–ख० ।

४. परिपूजितम्–ग० ।

एकं पादमधः कृत्वा विन्यस्योरौ [1]तथेतरम् ।
ऋजुकायो वसेद् योगी वीरासनमितीरितम् ॥ ५५ ॥

इडया कर्षयेद् वायुं बाह्यं षोडशमात्रया ।
धारयेत् पूरितं योगी चतुःषष्ट्या च मात्रया ॥ ५६ ॥

सुषुम्नामध्यगं सम्यग् द्वात्रिंशन्मात्रया शनैः ।
नाड्या पिङ्गलया चैवं रेचयेद् योगवित्तमः ॥ ५७ ॥

प्राणायाममिमं प्राहुर्योगशास्त्रविशारदाः ।
भूयो भूयः क्रमात् तस्य [2]व्यत्यासेन समाचरेत् ॥ ५८ ॥

मात्रावृद्धिक्रमेणैव सम्यग् द्वादश षोडश ।
जपध्यानादिभिर्युक्तं सगर्भं तद् विदुर्बुधाः ॥ ५९ ॥

तदुपेतं[3] विगर्भं च प्राणायामं परं विदुः ।
क्रमादभ्यसतः पुंसो देहे स्वेदोद्गमोऽधमः ॥ ६० ॥

मध्यमः [4]कल्यसंयुक्तो भूमित्यागः परो मतः ।
उत्तमस्य गुणावाप्तिर्यच्छीलनकमिष्यते ॥ ६१ ॥

इन्द्रियाणां विचरतां विषयेषु निराकुलम् ।
बलादाहरणं तेभ्यः प्रत्याहारोऽयमीरितः ॥ ६२ ॥

अङ्गुष्ठगुल्फजानुषु सीमनीलिङ्गनाभिषु ।
हृद्ग्रीवाकण्ठदेशेषु लम्बिकायां ततो नसि ॥ ६३ ॥

भ्रूमध्ये स्तनके मूर्ध्नि द्वादशान्ते यथाविधि ।
धारणं प्राणमरुतोर्धारणेति निगद्यते ॥ ६४ ॥

---

१. अथेतरम्—ख० ।

२. वात्यासेन—ख० ।

३. तदुपेतं—क० ख० ।

४. कल्पे—क० ख० ।

समाहितेन मनसा चैतन्यान्तरवर्त्तिना ।
आत्मन्यभीष्टदेवानां ध्यानं ध्यानमिहोच्यते ॥ ६५ ॥

[1]समत्वभावना नित्यं जीवात्मपरमात्मनोः ।
समाधिमाहुर्मुनयः प्रोक्तमष्टाङ्गलक्षणम् ॥ ६६ ॥

इति ते कथितं देवि ! कामादिषट्कनाशनम् ।
अथ ते कथयिष्यामि मन्त्रात्मयोगमुत्तमम् ।
दुर्लभं विषयासक्तैः सुलभं संयमात्मनाम् ॥ ६७ ॥

समाधिः संविदुत्पत्तिः परजीवैकतां प्रति ।
यदि जीवः पराद् भिन्नः कार्यतामेति सुव्रते ॥ ६८ ॥

[2]सुचित्तं च [3]प्रसह्यैव घटवत् परमेश्वरि ।
विनाशित्वं भयं चैव द्वितयाविति ते श्रुतिः ॥ ६९ ॥

नित्यः सर्वगतो ह्यात्मा कूटस्थो दोषवर्जितः ।
एकः सन् भिद्यते भ्रान्त्या मायया न स्वरूपतः ॥ ७० ॥

तस्माद् द्वैतं न मे चाऽस्ति न प्रपञ्चो न संसृतिः ।
यथाकाशो घटाकाशो महाकाश इतीरितः ॥ ७१ ॥

तथा भ्रान्तिर्द्विधा प्रोक्ता ह्यात्मा जीवेश्वरात्मना ।
नाहं देहो न च प्राणो नेन्द्रियाणि तथैव च ॥ ७२ ॥

न मनो नैव बुद्धिश्च नैव चित्तमहङ्कृतिः ।
नाहं पृथ्वी न सलिलं न च वह्निस्तथाऽनिलः ॥ ७३ ॥

न चाकाशो न शब्दश्च न च स्पर्शस्तथा रसः ।
न हि गन्धो न रूपं च न मायाऽहं न संसृतिः ॥ ७४ ॥

---

१. ममत्व-क० ख० ।
२. स्वचित्तञ्च-क० ख० ।
३. प्रसज्यैव-क० ख० ।

सदा साक्षिस्वरूपाद् वा ब्रह्म चैवास्मि केवलः ।
[1]सोऽहं ब्रह्म न संसारी न मत्तोऽन्यत् कदाचन ॥ ७५ ॥

इति विद्यात् स्वमात्मानं समाधिः परिकीर्तितः ।
समाधौ [2]सुखरूपोऽसौ तुरीयस्वर एव हि ॥ ७६ ॥

तुरीयांशः पराशक्तिर्बिन्द्वात्मा ब्रह्म केवलम् ।
प्रज्ञात्मानं[3] वदन्त्येके [4]एकेऽपि ब्रह्म केवलम् ॥ ७७ ॥

जीवमीश्वरभावेन विद्यात् सोऽहमिति ध्रुवम् ।
यथा [5]फेनतरङ्गादि समुद्रादुत्थितं पुनः ॥ ७८ ॥

समुद्रे लीयते यद्वज्जगदात्मनि लीयते ।
यस्यैवं परमात्मा स[6] पृथग्भूतः प्रकाशितः ॥ ७९ ॥

स याति परमं भावं स्वयं साक्षात् परामृतम् ।
यदा मनसि चैतन्यं भाति सर्वात्मकं सदा ॥ ८० ॥

योगिनो व्यवधानेन तदा सम्पद्यते स्वयम् ।
यदा भूतानि सर्वाणि स्वात्मन्येवाभिपश्यति ॥ ८१ ॥

सर्वभूतेषु चात्मानं ब्रह्म सम्पद्यते तदा[7] ।
यदा सर्वाणि भूतानि समाधिस्थो न पश्यति ॥ ८२ ॥

एकीभूतः परेणासौ तदा भवति केवलः ।
तदा जन्मजरादुःखव्याधीनामेव भेषजम् ॥ ८३ ॥

---

१. सोऽयं–ख० ।
२. स्वस्वरूपोऽसौ–क० ख० ।
३. प्रज्ञात्मा न–क० ख० ।
४. एकोऽपि–ग० ।
५. फेण–क० ख० ।
६. सम्पृ–ग० ।
७. सदा–क० ख० ।

केवलं ब्रह्मविज्ञानं जायतेऽसौ तदा शिवः ।
तस्माद् विज्ञानतो मुक्तिर्नान्यथा भवकोटिभिः ॥ ८४ ॥

मन्त्रौषधिबलैर्यद्वज्जीर्यते भक्षितं विषम् ।
तद्वत् सर्वाणि कर्माणि जीर्यन्ति ज्ञानिनः क्षणात् ॥ ८५ ॥

देहाभिमाने गलिते विदिते परमात्मनि ।
यत्र यत्र मनो याति तत्र तत्र समाधयः ॥ ८६ ॥

अहं ब्रह्म न चान्योऽस्मि मुक्तोऽहमिति भावयेत् ।
सच्चिदानन्दरूपोऽहं नित्यं मुक्तस्वभाववान् ॥ ८७ ॥

एवं समाधियुक्तो यः समाधये[1] स कल्प्यते ।
सदाशिवोऽहमित्युक्त्वा स्वेच्छया विहरेद् यतिः ॥ ८८ ॥

लिप्यते न स पापेन बध्यते न च कर्मणा ।
[2]यथाऽग्निविद्रुतं स्वर्णं मालिन्यं दहति क्षणात् ॥ ८९ ॥

तथा ब्रह्मार्पितात्माऽसौ सर्वकर्माणि दह्यति ।
आत्मस्थां देवतां त्यक्त्वा बहिर्देवं विचिन्वते ॥ ९० ॥

करस्थं कौस्तुभं त्यक्त्वा भ्रमते काचतृष्णया ।
न योगेन न यन्त्रेण न मन्त्रेण विना हि सः ॥ ९१ ॥

द्वयोरभ्यासयोगेन ब्रह्मसंसिद्धिकारणम् ।
तमःपरिवृते गेहे घटो दीपेन दृश्यते ॥ ९२ ॥

एवं मायावृतो ह्यात्मा मनुना गोचरीकृतः ।
एतत् ते कथितं देवि ! ब्रह्मज्ञानमिदं महत् ॥ ९३ ॥

विज्ञाय गुरुतो जप्त्वा संसारसागरं तरेत् ।
यत्र यत्र मृतश्चायं गङ्गायां श्वपचालये ॥ ९४ ॥

---

१. स समाधये–ग० ।
२. यथा गिरिद्रुतं–ख० ।

ब्रह्मविद् ब्रह्मभूयाय कल्पते नान्यथा प्रिये ।
विश्वं शरीरमित्युक्तं पञ्चभूतात्मकं प्रिये ॥ ९५ ॥

चन्द्रसूर्याग्नितेजोभिर्जीवब्रह्मैक्यरूपकम् ।
तिस्रः कोट्यस्तदर्द्धेन शरीरे नाड्यो मताः[1] ॥ ९६ ॥

तासु मुख्या दश प्रोक्तास्तासु तिस्रो व्यवस्थिताः ।
प्रधाना मेरुदण्डेऽत्र चन्द्रसूर्याग्निरूपिणी ॥ ९७ ॥

इडा वामे स्थिता नाडी शुक्ला तु चन्द्ररूपिणी ।
शक्तिरूपा तु सा नाडी साक्षादमृतविग्रहा ॥ ९८ ॥

पिङ्गलाख्या च या दक्षे पुंरूपा सूर्यविग्रहा ।
दाडिमीकुसुमप्रख्या विषाख्या चापरा मता ॥ ९९ ॥

मेरुमध्यस्थिता या तु मूलाद्ब्रह्मरन्ध्रगा ।
सर्वतेजोमयी सा तु सुषुम्ना वह्निरूपिणी ॥१००॥

तस्या मध्ये विचित्राख्या अमृतस्राविणी शुभा ।
सर्वदेवमयी सा तु योगिनां हृदयङ्गमा ॥१०१॥

विसर्गाद् बिन्दुपर्यन्तं व्याप्य तिष्ठति तत्त्वतः ।
मूलाधारे त्रिपुराख्ये इच्छाज्ञानक्रियात्मके ॥१०२॥

मध्ये स्वयम्भुलिङ्गं तु कोटिसूर्य[2]समप्रभम् ।
तदूर्ध्वे तत्तुरीयं तु ध्यायेद् बन्धूकसन्निभम् ॥ १०३॥

तदूर्ध्वे तच्छिखाकारा कुण्डली रक्तविग्रहा ।
सा एव हि परा सूक्ष्मा महात्रिपुरसुन्दरी ॥१०४॥

चैतन्यं सर्वभूतानां शब्दब्रह्म यदुच्यते ।
तत्प्राप्य कुण्डलीरूपं प्राणिनां देहमध्यगम् ॥१०५॥

---

१. नताः–ख० ।
२. सूर्य–ख० ।

सर्वतेजोमयं तत्तु सच्चिदानन्दमव्ययम् ।
तद्बाह्ये हेमवर्णाभं रसवर्णं चतुर्दलम् ॥१०६॥

द्रुतहेमसमप्रख्यं पद्मं तत्र विभावयेत् ।
तदूर्ध्वेऽग्निसमप्रख्यं[1] षड्दलं हीरकप्रभम् ॥१०७॥

वादिलान्तषड्वर्णेन युक्तं स्वाधिष्ठानसंज्ञकम् ।
मूलमाधारषट्कानां मूलाधारं ततो विदुः ॥१०८॥

स्वशब्देन परं लिङ्गं स्वाधिष्ठानं ततो विदुः ।
तदूर्ध्वे नाभिदेशे तु [2]मणिपूरं महत्पुरम् ॥१०९॥

हेमाभं वैद्युताभं च बहुतेजोमयं तथा ।
मणिवद् भिन्नं तत् पद्मं[3] मणिपूरं ततो विदुः ॥११०॥

दशभिश्च दलैर्युक्तं डादिफान्ताक्षरान्वितम् ।
विष्णुनाऽधिष्ठितं पद्मं विश्वालोकनकारणम् ॥१११॥

तदूर्ध्वेऽनाहतं पद्ममुद्यदादित्यसन्निभम् ।
कादिठान्तं दलैरर्कपत्रैश्च समलङ्कृतम् ॥११२॥

तन्मध्ये बाणलिङ्गं तु सूर्यायुतसमप्रभम् ।
शब्दब्रह्ममयः शब्दो [4]मोहितस्तत्र दृश्यते ॥११३॥

तेनाहताख्यं तत्पद्मं योगिभिः परिकीर्त्यते ।
आनन्दसदनं तत्तु पुरुषाधिष्ठितं परम् ॥११४॥

तदूर्ध्वे तु विशुद्धाख्यं दलैः षोडशभिर्युतम् ।
स्वरैः षोडशकैर्युक्तं धूम्रवर्णं महत्प्रभम् ॥११५॥

---

१. प्रोक्षं–ख० ।
२. नाल–ग० ।
३. पूरं–क० ख० ।
४. अनाहतः–क० ख० ।

विशुद्धिं तनुते यस्माज्जीवस्य हंसलोकनात् ।
विशुद्धं पद्ममाख्यातम् आकाशाख्यं महाद्भुतम् ॥११६॥
आज्ञाचक्रं तदूर्ध्वे तु आत्मनाऽधिष्ठितं परम् ।
हक्षादिद्विदलं पद्मं चन्द्रेणाऽधिष्ठितं तु तत् ॥११७॥
आज्ञासंक्रमणं तत्र गुरोराज्ञेति कीर्तितम् ।
कैलासाख्यं तदूर्ध्वे तु [1]रोधिनी तु तदूर्ध्वत. ॥११८॥
सहस्राराम्बुजं देवि ! बिन्दुस्थानं तदूर्ध्वतः ।
आदौ पूरकयोगेन स्वाधारे योजयेन्मनः ॥११९॥
[2]गुदमेढ्रान्तरे शक्तिं तामाकुञ्च्य प्रबोधयेत् ।
लिङ्गभेदक्रमेणैव बिन्दुस्थानं समानयेत् ॥१२०॥
शम्भुना तां परां शक्तिमेकीभावं विचिन्तयेत् ।
तदुद्भवामृतं यक्तद्रुतं लाक्षारसोपमम् ॥१२१॥
पाययित्वा च तां शक्तिं [3]पराख्यां योगसिद्धिदाम् ।
षट्चक्रदेवतास्तत्र सन्तर्प्याऽमृतधारया ॥१२२॥
आनयेत् तेन मार्गेण मूलाधारं पुनः सुधीः ।
यातायातक्रमेणैव तत्र कुर्यान्मनोलयम् ॥१२३॥
एवमभ्यास[भ्यस्य]मानन्तु अहन्यहनि पार्वति ।
जरामरणदुःखाद्यैर्मुच्यते भवबन्धनैः ।
इत्युक्तं परमे योगं योनिमुद्राप्रबन्धनम् ॥१२४॥
अथापरं प्रवक्ष्यामि समाधिं भवनाशनम् ।
अथवा परमेशानि ! यथोक्तध्यानयोगतः ॥१२५॥

---

१. बोधिनी–क० ख० ।

२. गुद मेढ्रान्तरे–क० ख० ।

३. परोक्षां–क० ख० ।

हृत्पद्मकलिकामध्ये ध्यायेद् देवीमनन्यधीः ।
त्रिपुरात्मकमात्मानं भावयेन्न्यस्तविग्रहः ॥१२६॥
ऐक्यं सम्भावयेन्नित्यं स्वगुरुदेवतात्मनाम् ।
अहं देवो न चान्योऽस्मि ब्रह्मैवाहं न शोकभाक् ॥१२७॥
सच्चिदानन्दरूपोऽहं शुद्धिबुद्धिस्वभाववान् ।
प्रणवं पूर्वमुद्धृत्य तदिति परतस्ततः ॥१२८॥
सदिति तु समालोच्य कर्म कुर्याद् विचक्षणः ।
स्मरणात् कर्मणामाद्यं ब्रह्मभूयाय कल्पते ॥१२९॥
सर्वमङ्गलसम्पन्नो बहिर्निर्गत्य साधकः ।
[1]त्यक्त्वा मूत्रपुरीषे च करपादौ विशोधयेत् ॥१३०॥
मुखं प्रक्षाल्य देवेशि ! नासारन्ध्रद्वयं ततः ।
नेत्राञ्जनं विधायैव शुद्धस्थानं समाश्रयेत् ॥१३१॥
नेत्राञ्जनमकृत्वैव संपश्येत् सौरमण्डलम् ।
जन्मार्जितफलं नश्येत् का कथा तस्य दुर्मतेः ॥१३२॥
त्रितत्त्वेन त्रिधाऽऽचम्य दन्तधावनमाचरेत् ।
दन्तका[2]ष्ठमखादित्वा पूजयेद् यस्तु देवताम् ॥१३३॥
तत्पूजा विफला देवि मृते च नरकं व्रजेत् ।
क्लीमात्मकं कामदेवं सर्वान्ते जनमालिखेत् ॥१३४॥
प्रियाय हृदयान्तोऽयं मनुर्दन्तविशुद्धये ।
चतुर्दशस्वरैर्वक्त्रं क्षालयेच्छुद्धिहेतवे ॥१३५॥

इति गन्धर्वतन्त्रे षष्ठः पटलः ॥ ६ ॥

---

१. त्यक्त-क० ख० ।

२. काठ-क० ख० ।

कुण्डलिनीस्तोत्रम्

श्रीशिव उवाच—

ॐ तडित्कोटिप्रभदीप्ति-चन्द्रकोटि सुशीतलाम्
सार्द्धत्रिवलयाकार- स्वयम्भूलिङ्गवेष्टिताम्।। १।।
उत्थापयेन्महादेवीं महारक्तां मनोन्मनीम्।
श्वासोच्छ्वासादुद्गच्छन्तीं द्वादशाङ्गुलरूपिणीम्।। २।।
योगिनीं खेचरीं वायुरूपां मूलाम्बुजस्थिताम्।
चातुर्वर्णस्वरूपां तां वकारादि- समस्तकाम्।। ३।।
कोटि कोटि- सहस्रार्क-किरणोऽलमोहिनीम्।
महासूक्ष्मपथप्रान्त-रान्तरान्तर-गामिनीम्।। ४।।
त्रैलोक्यरक्षितां वाक्य-देवताशब्दरूपिणीम्।
महाबुद्धिप्रदां देवीं सहस्रदलगामिनीम्।। ५।।
महासूक्ष्मपथे तेजोमयीं सत्यस्वरूपिणीम्।
कालरूपां ब्रह्मरूपां सर्वत्र सर्वविन्मयीम्।। ६।।
जन्मोद्धारिणी रक्षिणीह तरुणी वेदादिबीजादिना
नित्यं चेतसि भाव्यते भुवि कदा मद्वाक्यसञ्चारिणी।
मां पातु प्रियदा सदा सविपदं संख्यातय श्रीधरे
धात्री त्वं स्वयमादिदेववनिता दीनातिदीनं परम्।। ७।।
रक्ताभामृत चन्द्रिका लिपिमयी सर्पाकृतिर्निद्रिता
जग्रद्धर्म-समाश्रिता भगवती त्वं ,वांशलोकाश्रया।
मांसोद्गन्धक-दोषजालजड़ितं वेदादिकार्यान्वितं
संपाल्यामल - कोटिचन्द्रकिरणे नित्यं शरीरं कुरु।। ८।।

सिध्यर्थी निजदोषवित् खलगति-र्व्याधीयते विद्यमा
कुण्डला कुलमार्गयुक्तनगरी सायाह्नमाज्ञाश्रया।
यद्येवं भजति प्रभात समये मध्याह्नकालेऽथवा
नित्यं यः कुलकुण्डली-निजपदाम्भोजं स सिद्धो
भवेत्।। ६।।

यो वाकाश्चतुर्द्दलेऽतिविमले वाञ्छाफलोन्मूलके
नित्यं सम्प्रति नित्यदेशघटिता सङ्केतिता भाविता।
विद्या कुन्तलमालिनी स्वजननी सारक्रिया भाव्येत,
यै-स्तैः सिद्धकुलोद्भवैः प्रणतिभिः कीर्त्त्या परं
शम्भूभिः।। १०।।

वाचा शङ्करमोहिनी त्रिवलयाच्छायापटोद्गामिनी
संसारादिमहासुखप्रहननी नेत्रस्थिता योगिनी।
सर्वाग्रन्थिविनोदिनी सुभुजगा सूक्ष्मातिसूक्ष्मा परा
ब्रह्मज्ञानबिनोदिनी कुलकुठाराघातिनी भाव्यते।। ११।।

वन्देश्रीकुलकुण्डलीं त्रिवलिभिः सार्द्धं स्वयम्भूप्रियां
प्रवेष्टयासुरसारचित्तचपला वाला वला निष्फला।
या देवी परिभाति वेदवदना सम्भावना भावना
तामिष्टां शिरसि स्वयम्भुवनितां सम्भावयामि
क्रियाम्।। १२।।

वाणी कोटिमृदङ्गनादनदना निःश्रेणिकोटिध्वनिः
प्राणेशी रसधाममूलक मलोल्लासैकपूर्णानना।
आषाढ़ोद्भवमेघराजनियुतध्वान्तान्तरस्थायिनी
माता सा परिपातु सूक्ष्मपथगे मां योगिनं
शङ्करु।। १३।।

त्वामाश्रित्य नराब्रजन्ति सहसा बैकुण्ठकैलासयो-
रानन्दैक विलासिनीं शशिपदानन्दाननाकारिणीम्।
मातः श्रीकुलकुण्डलि प्रियकले काले कुलोद्दीपने
भूतस्थां प्रणमामि रुद्रवनितां मामुद्धरत्वं
पथि।। १४।।

कुण्डलीशक्तिमार्गस्थं स्तोत्राष्टकं महाफलम्।
यः पठेत् प्रातरुत्थाय स योगी भवति
ध्रुवम्।। १५।।

क्षणादेव हि पाठेन कविनाथो भवेदिह।
परत्र कुण्डलीयोगाद् ब्रह्मलीनो भवेन्महान्।। १६।।

इति ते कथितं नाथ कुण्डलीकोमलस्तवम्।
एतत्स्तोत्र प्रसादेन देवेषु गीष्पतिगुरुः ।। १७।।

सर्वे देवाः सिद्धियुक्ता अस्याः स्तोत्रप्रसादतः।
द्वापरार्द्धचिरंजीवी ब्रह्मा सर्वसुरेश्वः।। १८।।

त्वञ्चापि मम सन्निध्ये स्थितो भगवतीपतिः।
मां बिद्धि परमां शक्तिं स्थूलसूक्ष्मस्वरूपिणीम्।। १६।।

सर्वप्रकाशकरणीं विन्ध्यपर्वतवासिनीम्।
हिमालयसुतां सिद्धां सिद्धमन्त्रस्वरूपिणीम्।। २०।।

वेदान्तशक्तितन्त्रस्थां कुलतन्त्रार्थगामिनीम्।
रुद्रयामलमध्यस्थां स्थितिस्थायक भावनाम्।। २१।।

पञ्चमुद्रास्वरूपाञ्च शक्तियामलमलिनीम्।
रत्नमालावलाकाढ्यां चन्द्रसूर्यप्रकाशिनीम्।। २२।।

सर्वभूतमहाबुद्धीदायिनीं दानवापहाम्।
स्थित्त्युत्पत्तिलयकरीं करुणासागरस्थिताम्।। २३।।
महामोहनिवासाढ्यां दामोदरशरीरगाम्।
छत्रचामररत्नाढ्यांमहाशलकरां पराम्।। २४।।
ज्ञानदां बुद्धिदां विद्यां रत्नमालाकलापदाम्।
सर्वतेजः स्वरूपां मामनन्त कोटि विग्रहाम्।। २५।।
दरिद्र धनदां लक्ष्मीं नारायणमनोरमाम्।
सदा भावय शम्भो त्वं योगनायकपण्डित।। २६।।
इति श्रीरुद्रयामले उत्तरखण्डे कुण्डलिनीस्तोत्रं समाप्तम्।

प्रकीर्णांशः

अथ योनिमुद्रालक्षणम्, तदुक्तं-यन्त्रमन्त्रावल्याम्।

देव्युवाच—

योनिमुद्रा च कथिता यत्नेता न प्रकाशिता।
साम्प्रतं श्रोतुमिच्छामि मुद्रायाश्चैव लक्षणम्।।
योनिमुद्रा च किं नाम फलं तस्याश्च किं प्रभो[1]।
विधानं किं स्वरूपञ्च कथयस्व जगत् प्रभो !।।

श्री शिव उवाच—

शृणु देवि ! महाभागे ! मुद्रां ज्ञानस्वरूपिणीम्।
यां ज्ञात्वा साधकाः सर्वे ज्ञानपीयूषसागरे।।
निमज्जन्ति कुलैः सार्द्धं सकृदभ्यासमात्रतः।।
षण्णवत्यङ्गुलायामं शवीरमुभयात्मकम्।।
गुद-ध्वजान्तरे कन्दमुत्सेधाद् द्वयङ्गुलं प्रिये !।
तस्य द्विगुणविस्तारं वृत्तरूपेण शोभितम्।।
नाड्यस्तत्र समुत्पन्ना मुख्यास्तिस्तस्तु भाविनि !।
इड़ा वामे स्थिता नाड़ी पिङ्गला दक्षिणे स्थिता।।
तयोर्मध्यगता नाड़ी सुषुम्ना वंशमाश्रिता[2]।
पादाङ्गुष्ठद्वयं याता शिखाम्यां शिरसा पुनाः।।
ब्रह्मस्थानं समापन्ना सोमसूर्याग्निरूपिणी।
तस्या मध्यगता नाड़ी चित्राख्या योगिवल्लभा।
ब्रह्मरन्ध्रं विदुस्तस्यां[3] पद्मसूत्रनिभं परम्।
